१८ श्रीराधारमणोजयति

श्रीमद्भागवतम् ।

महर्षिप्रवर श्रीकृष्णद्वैपायन प्रणीतम् ।

श्रीश्रीपाद श्रीधरस्वामिकृत भावार्थ दीपिका श्रीराधारमणदास गोस्वामि विरचित दीपिन्याख्य तट्टिप्पणी श्रीमद्वीरराघवाचार्य्यकृतभागवतचंद्रिका श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली श्रीमद्वल्लभाचार्य्यकृतसुबोधिनी श्रीगौडीय वैष्णवाचार्य्यप्रवर श्रीमज्जीवगोस्वामिकृत क्रमसन्दर्भ श्रीमद्विश्वनाथचक्रवर्त्तिकृत सारार्थदर्शिनी तथा श्रीनिम्बार्क सम्प्रदायि श्रीमच्छुकदेवकृत सिद्धान्तप्रदीपाख्य टीका समेतम् भाषानुवादसहितञ्च ।

परमहंस परिव्राजकाचार्य्य श्रीमत् स्वामि प्रकाशानन्दसरस्वती पूज्यपादशिष्य

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम् ।

बङ्गदेशान्तर्गत ताड़ास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

श्री वनमालि राय बहादुरस्य

सम्पूर्ण साहाय्येन

प्रकाशितञ्च ।

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।

पिबत भागवतं रसमालयं, मुहुरहो रसिका भुवि भावुकाः ॥

श्रीवृन्दावनधामनि

श्रीमद्देवकीनन्दनाख्य स्वकीये यन्त्रे श्रीनित्यस्वरूपब्रह्मचारिणा
मुद्रितम्

सम्वत् १९६१

श्रीमद्भागवतम् ।

पञ्चमस्कन्धः ।

—(:o:)—

प्रथमोऽध्यायः ।

ओं नमो भगवते वासुदेवाय ।

॥ राजोवाच ॥

प्रियव्रतो भागवत आत्मारामः कथं मुने ! ।
गृहेऽरमत यन्मूलः कर्मबन्धः पराभवः ॥ १ ॥
न नूनं मुक्तसङ्गानां तादृशानां द्विजर्षभ ! ।
गृहेष्वभिनिवेशोऽयं पुंसां भवितु मर्हति ॥ २ ॥
महतां खलु विप्रर्षे ! उत्तमश्लोकपादयोः ।
छायानिर्वृतचित्तानां न कुटुम्बे स्पृहामतिः ॥ ३ ॥
संशयोऽयं महान् ब्रह्मन् ! दारागारसुतादिषु ।
सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता ॥ ४ ॥

॥ श्रीशुक उवाच ॥

गद्यं । बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविन्दमकरन्दरस आवेशितचेतसो भागवतपरमहंसदयितकथां किञ्चिदन्तरायविहतां स्वां शिवतमाम्पदवीं न प्रायेण हिन्वन्ति ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीमत्परमहंसास्वादितचरणकमलचिन्मकरन्दाय ।
जनमानसनिवासाय श्रीरामाय ॥

अथातः पञ्चमस्कन्धव्याख्यानेकविशेषवान् ।
प्रियव्रतान्वयो यत्र सप्रपञ्चः प्रपञ्च्यते ॥ १ ॥
षड्विंशत्यधुनाध्यायैः पञ्चमे स्थानमीर्यते ।
लोकद्वीपादिमर्यादापालनाख्यमनेकधा ॥ २ ॥
पृथिव्युपर्यधोलोकैर्मर्यादा त्रिविधा मता ।
पुनश्चैकैकशस्तेषु मर्यादा बहुधा मता ॥ ३ ॥
भुवि द्वीपादिमर्यादाः पाल्यन्ते राजभिः पृथक् ।
अत्रोपरि देवाद्यैस्ततश्चाधोऽसुरपालिभिः ॥ ४ ॥
तत्राध्यायैस्तु विंशत्या प्रियव्रतपुरःसरैः ।
भुवि द्वीपादिमर्यादाः पालिता इति वर्ण्यते ॥ ५ ॥
त्रिभिः सूर्यादिभिर्ज्योतिश्चक्रादिरिति कीर्त्यते ।
अतलादिषु दैत्याद्यैः पालनं च ततस्त्रिभिः ॥ ६ ॥
तत्र तु प्रथमेऽध्याये ज्ञानिनो राज्यनिर्वृतिः ।
पुनश्च ज्ञाननिष्ठेति प्रियव्रतकथाद्भुता ॥ ७ ॥
वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ! ।
यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ।
भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ।

इति पूर्वस्कन्धान्ते प्रियव्रतस्य प्रथममात्मविद्या ततो गृहाश्रमस्ततः सर्वसङ्गत्यागेन मोक्ष इत्युक्तम् तत्र विस्मितः पृच्छति प्रियव्रतो

श्रीधरस्वामिकृतभावार्थदीपिका ।

…नोऽत एवात्मारामो गृहे कथमरमत ननु रमतां को दोष इत आह । कर्मणा बन्धः पराभवश्च स्वरूपतिरस्कारो …ा भवति यद्दृढं मूलं कारणं यस्य ॥ १ ॥

गृहेषु रतिश्च तदभिनिवेशात् स चास्तु च भागवतानामात्मारामाणां न सम्भवतीत्याह । न नूनमिति ॥ २ ॥

गृहासक्तिर्हि कुटुम्बादिस्पृहया भवति सा च तेषां नास्तीत्याह । महतामिति । उत्तमश्लोकपादयोश्छायया कामादिसन्तापहारिण्या तया निर्वृतं चित्तं येषां तेषां स्पृहायुक्ता मतिर्नास्ति ॥ ३ ॥

दाराद्यासक्तस्य तु मोक्षः श्रीकृष्णेऽस्खलिता मतिश्चाभूदिति यदयं च महान्संशय इत्याह । संशय इति ॥ ४ ॥

अङ्गीकृत्य परिहरति । बाढमभिनिवेशादिकं नास्तीति सत्यमेव तथापि विघ्नवशेन तेषां प्रवृत्तिः पूर्वाभ्यासबलेन पुनर्निवृत्तिश्च सञ्जायत इत्याह । भगवतः श्रीमच्चरणारविन्दमकरन्दरूपो यो रसस्तस्मिन्नावेशितं चेतो यैस्तेऽपि केन चिदन्तरायेण विघ्नेन विहतामपि स्वां शिवतमां पदवीं मार्गं न हिन्वन्ति न त्यजन्ति काम भागवता एव परमहंसास्तेषां दयितस्य प्रियस्य श्रीवासुदेवस्य कथाम् ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तृतीये "स्वायम्भुवस्यापि मनोर्वंशः परमसम्मतः । कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः । प्रियव्रतोत्तानपादौ सुतौ स्वायम्भुवस्य च । यथा धर्मं जुगुपतुः सप्तद्वीपवतीं महीम्" इति पृष्टं स्वायम्भुववंशं प्रक्रम्य तद्दुहितृवंशः ज्येष्ठपुत्रोत्तानपादवंशश्च कथितः प्रजाः सृजेत्यादिना चतुर्थस्कन्धान्तेन ग्रन्थेन तावतैव शुश्रूषितं सर्वं श्रुतप्रायमिति मन्वानेन क्षत्त्रा प्रियव्रतचरित्रं न पृष्टं तत्र चतुर्थस्कन्धान्ते यो नारदादात्मविद्यामधिगम्य पुनर्महीं भुक्त्वेत्यधिगतात्मविद्यस्यापि प्रियव्रतस्य पुनर्भोगानुभव उक्तः तदिदमघटमानं पृच्छति । राजा प्रियव्रत इत्यादिना चतुर्भिः । हे मुने! प्रियव्रतो भागवतः भगवद्धर्मनिष्ठः मुमुक्षुः आत्मारामः प्रकृतिविमुक्तब्रह्मात्मकस्वात्मयाथात्म्यानुभवनिष्ठः कथं गृहेऽरमत गृहशब्दो देहापत्यकलत्रादीनामुपलक्षणमेवंभूतः कथं गृहासक्तोऽभूत् भगवत आत्मारामोऽपि रमतां गृहे को विरोध इति चेत्तत्राह । कर्मबन्धः कर्मरूपो बन्धः तेन पराभवस्तिरस्कारः ज्ञानसङ्कोचश्च यन्मूलः या[illegible]सक्तिर्मूलं यस्य सः कर्मबन्धान्मुमुक्षोः कर्मबन्धहेतुभूतगृहास[illegible]क्तिश्च तथासङ्कुचितज्ञानात्मयाथात्म्यनिष्ठस्य ज्ञानसङ्कोचकर्मबन्धनिमित्ता च गृहासक्तिर्न घटत इति भावः ॥ १ ॥

गृहादिष्वासक्तिर्हि तेषां प्रीतिविषयतयाऽदोषदर्शनरूपा तत्त्यागपूर्वकं निरतिशयप्रियस्वात्मपरमात्मस्वरूपमनुभवतां तेषु पुनः कुतः प्रीतिरित्याह । नेति । हे द्विजर्षभ! तादृशानां भागवतानामात्मारामाणां मुक्तसङ्गानां दुःखहेतुत्वानुसन्धानेन त्यक्तदेहापत्यकलत्राद्यभिनिवेशानां पुंसां पुनर्गृहेष्वभिनिवेशः पूर्वदोषदर्शनेन त्यक्ताभिनिवेशः भवितुं नार्हति नूनं निश्चयः ॥ २ ॥

दुःखहेतुत्वेऽपि तात्कालिकसुखहेतुत्वादस्त्वभिनिवेश इति चेत्तत्राह । महतामिति । हे विप्रर्षे! उत्तमश्लोकस्य भगवतः पादयोश्छायया तापत्रयनिरसनद्वारानन्दहेतुत्वादनुभूतिः छायाशब्देन विवक्षिता भगवत्पादाब्जानुभूत्या नि[illegible] येषां महतां कुटुम्बे स्पृहारूपा मतिर्न सम्भवति निरतिशयानन्दरूपभगवच्चरणानुभवसुखितचित्तानां दुःखमिश्र[illegible]सुखे बन्धनिमित्तेष्वभिनिवेशो न सम्भवतीत्यर्थः ॥ ३ ॥

अस्तु चात्मारामस्य प्राक्तनबलप्रतिबन्धवशाद्गृहासक्ति[illegible] यापि पुनर्गृहासक्तस्य भगवद्भक्तिस्ततो मुक्तिश्च कथं घटत इत्य[illegible] संशय इति । हे ब्रह्मन्नयं महान्संशयः कोऽसावित्यत्राह । दारपुत्रसुतधनादिष्वासक्तस्य कृष्णे मतिर्भक्तिस्ततो गार्हस्थ्यधर्मैर्दा[illegible]वजिता या मुक्तिश्च कथमभूदिति यदयं महान्संशय इत्यर्थः ॥ ४ ॥

एवमापृष्टो बादरायणिः सत्यमात्मारामस्य गृहासक्तिर्गृहासक्तस्य च पुनर्भक्तिश्च न घटत इति आत्मारामस्य भागवतस्यापि उपाधिवशाद्गृहासक्तत्वेऽपि प्राचीननिर्वृत्तधर्मानुष्ठानबलात्पुनः भक्तियोगोपसंहारः संभवत्येवेत्याह । बाढमुक्तमिति । सत्यमुक्तमित्यर्थः गृहासक्तस्य भक्तियोगासंभव इत्यत्राङ्गीकारः आत्मारामस्य पुनः गृहाद्यभिनिवेश इत्यत्राङ्गीकारः प्रियव्रतस्य स्वायंभुवः स्वयंभ्वादिप्रार्थनया गृहाश्रमपरिग्रहः न तु स्वाभिनिवेशेनेत्यात्मारामस्य गृहाद्यभिनिवेशो नास्त्येवेत्यभिप्रायः ज्ञानिनोऽपि गृहाद्यभिनिवेशो नास्तीति तु सम्यगुक्तमपि तु गृहासक्तस्य पुनर्भक्त्युपसंहारो न घटत इत्यप्युक्तमित्याह । किं त्विति । उत्तमैर्ब्रह्मादिभिः श्लोक्यते स्तूयते इत्युत्तमश्लोकः उत्तमः श्लोकः स्तवो यस्येति वा तस्य भगवतः श्रीमतोः श्रिया सेव्यमानयोश्चरणारविन्दयोररविन्दवत्सौगन्ध्यसौकुमार्यलावण्यादिशो[illegible]युक्तयोश्चरणयोर्यो मकरन्दः मकरन्दवत्प्रवाहः सुख[illegible]भक्तिरसः तस्मिन्नावेशितं चेतो यैस्ते कथं चिदन्तरायेण विघ्नेन विहतां विच्छिन्नामपि कथंचिदित्यनेन भागवतैर्भक्तेरविचाल्यत्वं व्यज्यते भागवता ये परमहंसा नितरां विशुद्धान्तःकरणाः तेषां दयितस्य प्रीतिविषयस्य भगवतः कथां कथाश्रवणादिरूपां भक्तिं शिवतमां पदवीं मोक्षमार्गभूतां न हिन्वन्ति न त्यजन्ति किन्तु पूर्ववासनया तामेवानुतिष्ठन्तीत्यर्थः तथा चोक्तम् भगवता "पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते" इत्यादिना । "तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् । यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः" इत्यनेन अत्र प्रायशो[illegible]न्तरायविहतामित्यन्वयः भक्तियोगस्य विघ्नबहुलत्वात् [illegible] प्रायेण न हिन्वन्तीत्यन्वयः "जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते । प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः । अनेकजन्मसंसिद्धस्ततो याति परां गतिम्" इति ब्रह्मजिज्ञासायत्नवत्त्वमात्रेणापि भक्त्यन्त्यागाभिधानात् उपक्रान्तभक्तियोगानां कथमपि तत्त्यागायोगात् ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रभवति जगदेतद्यत्कटाक्षेक्षणेन ।
स्थितयति यदुपेक्षालेशतो नाशमेति ।
गतमगतमभिज्ञा जानते यस्य वृत्तम् ।
शरणमिममयेऽहं कालसंज्ञं मुकुन्दम् ॥ १ ॥
गद्यहेमाद्यमगहनपञ्चमस्कन्धपर्वतम् ।
आम्नायज्ञा महान्तो मे प्रीयन्तामारुरुक्षवे ॥ २ ॥
स्वस्वविहितधर्मसाधनसामग्र्या समुत्पन्नेन ज्ञानेन [illegible]

[illegible]द्विजयध्वजतीर्थकृतपदरत्नावली ।

[illegible]मीन्ध्रेतास्मिन्नध्याये निरूप्यते । तत्र विशेषविवि-[illegible] परीक्षितुर्कं पृच्छति । प्रियव्रत इति । जीवात्मनः पराभवः [illegible]मात्मज्ञानलक्षणः यन्मूलः यदहंकलत्रादिलक्षणं मूलं [illegible] कस्मादित्यत उक्तम् । करोति । दुष्कर्मनिमित्त इत्यर्थः [illegible] गृहे कथमरमतेत्यन्वयः ॥ १ ॥

[illegible] केवलमस्यैवायुक्तं गृहे रमणमन्येषामप्येतादृशानां न [illegible] । न नूनमिति । मुक्तसङ्गानां फलाभिसन्धिरहि-तानाम् ॥ २ ॥

[illegible] हेतुमाह । महतामिति । ज्ञानलक्षणया छायया (१) संसारसन्तापं परिहरन्त्या आह्लादं जनयन्त्या निर्वृत्तं प्राप्तपर-मानन्दं चित्तं येषां ते तथा तेषां कुटुम्बे स्पृहया युक्ता मति-र्न भवतीत्यन्वयः ॥ ३ ॥

सामान्यमुक्त्वा विशिनष्टि । संशय इति । ज्ञानविरोधिषु दारागारादिषु सक्तस्य प्रियव्रतस्य कृष्णे अच्युता निरन्तर-मनुवर्तमाना मतिरुपासनलक्षणा च तथा सिद्धिर्मुक्तिलक्षणा चाभूदिति यदस्मात्तस्मात्संशयः कुटुम्बासक्तस्य सिद्धावच्युतमतेः [illegible] "उत गृहस्थोऽपि विमुच्यत" इति स्मृतेः "कुटुम्बी शुचौ [illegible] स्वाध्यायमधीयान" इति श्रुतेश्च चेतसः कुटुम्बभरणलक्षणा-[illegible] आहोस्विदुभयमथवा निवृत्तिमार्गानुपमर्देन तत्सक्ति-रविरोधिनीति ॥ ४ ॥

तत्र तृतीयपक्षमङ्गीकृत्य परिहरति बाढमिति । उक्तं बाढमोमिति किं [illegible] इति सकलसौभाग्यनिधेः सदा निर्दोषयशसो हरेः सक-[illegible]पद्मकमलमधुरसे आविष्टः आवेशितचेतसो जन्मप्रभृति-[illegible]न्तःकरणस्य पुरुषस्य गृहस्थाश्रमो निवृत्तिमार्गाविरोधी न स्यात् इति यत्तदिति शेषः तर्हि कस्य विरोध इति चतु-र्थाभिप्रायं इत्याह । बाढमिति । वेदशिरस्सु वेदान्तेषु [illegible] यस्य स तथा तस्य हरेः श्रीमच्चरणारविन्दमकरन्दरसे निरन्तरनिलयनाह्लादनोत्सुकान्तःकरणस्य भगवतः सर्वपू-[illegible] सर्वासिनः ।

> श्रीभूहिरण्यपशवो यतेर्यस्य परिग्रहाः ।
> तादृशं कर्दमं दृष्ट्वा सचैलो जलमाविशेत् ।

इति स्मृतिस्तद्वचनं तद्बाढमिति वा सिद्धावच्युतमतिः प्रयो-[illegible] यत्त्रापीदमेवोत्तरं बाढमिति । तर्हि कुटुम्बासक्तिर्विरुद्धा-[illegible] तत्राह । भगवत इति । बार्हिर्षिमिव हरिचरणैकशरणस्य [illegible] कुटुम्बाभिनिवेशो न मुक्तिपदवीपरिपन्थी किन्तु भूयणाम-[illegible] गृहस्थोऽपि विमुच्यत इत्यत्र भगवदर्पणबुद्ध्या यदि-[illegible] करोति तर्हि ज्ञानजननद्वारा मुक्तिसाधनमन्यथानर्थ इत्यङ्गी-[illegible]मेवोत्तरं बाढमिति नैष्कर्म्यमप्यच्युतभाववर्जितमिति [illegible] अनेन तृतीयपक्षोऽपि व्याख्यातः अत्रापि भगवत इत्यु-[illegible] हेतुः कुटुम्बभरणव्यासक्तस्य विक्षेपणादिविघ्नैः भग-[illegible]परिचर्याया विहतिरवश्यम्भाविनीति तत्राह । भागवतेति, भागवताश्च परमहंससमाजश्च भागवतपारमहंस्यः [illegible] प्रियो जनः स्वां स्वभिहितां शिवतमां शुभतमां [illegible] निवृत्तिलक्षणां विक्षेपणाद्यन्तरायैर्विहतां विच्छेदमुखीमपि [illegible] [२] बहुलं न हिन्वन् न त्यजन् [illegible] इत्यन्वयः

(१) [illegible]याविद्याहरेदृक्कायेतिन्नयिनात्पर्यात् ।

(२) अस्मदादिव्यावृत्तये प्रायेणेति ।

अरणे कारणं भागवतेति अथवा भगवत उत्तमश्लोकस्य तद्भ्रापि हेतुत्वेन सम्बध्यते समावेशितचेतसत्वादिति भग प्रियं परमहंसाश्रमं दयितः प्राप्तोऽपि "दय दानगतिशोषणे" इति धातुः अत्रापि पूर्वोक्त एव हेतुः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

> श्रीकृष्ण कृष्णचैतन्य ससनातन रूपक ।
> गोपाल रघुनाथाप्त व्रजवल्लभ पाहि माम् ॥
> पञ्चमक्रमसन्दर्भे सन्दर्भाणां समाहृतिः ।
> क्रियते यन्निदेशेन स मेऽनन्यगतेर्गतिः ॥
> अथ पञ्चमस्कन्धस्य क्रमसन्दर्भः ।
> स्वामिपादैर्न यद्व्यक्तं यद्व्यक्तं चास्फुटं क्वचित् ।
> तत्र तत्रैव लेख्योऽयं सन्दर्भः क्रमनामकः ॥
> वैष्णवपरितोषः स्याद्यत्र यत्र ततस्ततः ।
> लेख्यं वैष्णवसिद्धान्तदाक्षिण्येनैव किञ्चन ॥

भागवत आत्माराम इति भगवदादिषदात्मारामेष्वपि भागवत इत्यर्थः । मुक्तानामपीत्यादिः अत एवाग्रेऽप्यस्य मुख्य भागवतत्वमेवानुवदिष्यते नतु गौणात्मारामत्वं ततश्चात्मारामत्वे-ऽपि गृहारामत्वं न संभवति कुतस्तरां भागवतत्वेऽपीत्याह । कथ मुन इति । ततश्च सुतरां मोक्षमपि न संभवतीत्याह । यन्मूल इति । कर्मणा बन्धः पराभवश्च स्वरूपतिरस्कारो यतो भवति यद्गृहं मूलं यस्य ॥ १ ॥

तदेव स्पष्टयति । न नूनमित्यादि ॥ २ ॥

छाया आश्रयः कान्तिर्वा स्पृहा तावत्तावदस्त्येव मतिस्तद-नुसन्धानश्च नास्तीत्यर्थः ॥ ३ ॥

सिद्धिर्भगवत्सामीप्यादिरूपा न केवलं तस्यामेव संशयः अपितु तत्साधनरूपायां तादृशतन्मतावपीत्याह । कृष्णे-ति ॥ ४ ॥

भागवता ये परमहंसा इति पूर्ववत् । शिवतमामन्तरा-येष्वपि भगवच्चित्ततापादनेन परमकल्याणरूपामित्यर्थः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

> प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।
> लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥
> गोपरामाजनप्राणप्रेयसेऽति प्रभूष्णवे ।
> तदीयप्रियदास्याय मां मदीयमहं ददे ॥
> त्रिभिः प्रियव्रताग्नीध्रनाभीनां चरितं क्रमात्
> आर्षभं त्रिभिरध्यायैर्भरतस्य तथाष्टभिः ।
> गयोपाख्यानमेकेन चतुर्भिर्जम्बुमण्डिनः ।
> द्वीपा निरूप्यन्ते द्वीपान्तरशैलनगादिकम् ॥
> एकेन ज्योतिश्चक्रादि द्वाभ्यां ध्रुवपदं ततः ।
> एकेन द्वाभ्यां सूर्याधः अशोवर्णनमुच्यते ॥
> एकेन नरकश्चैव पञ्चमस्कन्धसङ्ग्रहः ।
> अत्र स्थानं तत्र देवादिभिः पालनमुच्यते ॥
> देवासुरनरादीन सूर्ध्वाधोमध्यवर्त्तिनाम ।
> तत्र तु प्रथमे ब्रह्मा गिरं सम्मानयन् व्यधात् ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

राज्यं प्रियव्रतः पश्चाद्विरज्यावाप माधवम् ।
यथा प्रियव्रतस्यापि निशम्य नृपसत्तम ! ।
यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ।
भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात् पदम् ॥

... ते पूर्वस्कन्धान्ते प्रियव्रतस्य प्रथममात्मारामत्वं ततो विषय-भोग इति श्रुत्वा विस्मितः पृच्छति । प्रियव्रत इति । भागवत इत्यात्मारामत्वेऽपि भक्तानिष्ठातिविशिष्ट इत्यर्थः । यन्मूलः गृहासक्तिहेतुकः कर्मबन्धो भवति स च शुद्धः शुद्धजीवस्य तस्य पराभवप्रदत्वात् पराभवः ॥ १ ॥

भागवतत्वे सत्यन्यत्रासक्तिर्न सम्भवतीत्याह । न नूनमिति ॥२॥

भगवत्यासक्तेर्हेतुमाह । महतामिति । छाया संसारसन्ताप निवर्त्तिका तथेति येषां चित्तं सदा भगवच्चरणानुगामीति ध्यानमुक्तं भवति स्पृहा सेवामतिरज्ञानम् ॥ ३ ॥

भवतु वा कथञ्चिदपराधवशात् किन्तु तत्रापि तस्य सिद्धिः कृष्णासक्तिश्च न च्युतेति कथम् ॥ ४ ॥

अङ्गीकृत्य परिहरति । बाढमिति । आत्मारामस्य गृहारामता गृहासक्तस्य च कृष्णासक्तिरित्युभे न सम्भवत इति सत्यमेव तद्-व्यतिमहतां पूर्वितकथंचरितानां क्वापि कादाचित्की विषयासक्तिस्त्वया न विश्वसनीयेत्याह । भगवत इति । आवेशितचेतसो जनाः भागवती भगवतः सम्बन्धिनी चासौ परमहंसानां दयिता प्रियतमा च या कथा तां किञ्चिन्मात्रेण अन्तरायेण विघ्नेन विहतां व्यवधानीकृतां न प्रायशो हित्वन्ति न त्यजन्ति कीदृशीं स्वां शिवतमां पदवीमिति तत्कथैव भक्तानां पदवी सुखमयवर्त्म तयैव गम्यो भगवानित्यर्थः । ननु "त्वयाभिगुप्ता विचरन्ति निर्भया विनायकानीकपमूर्द्धसु प्रभो !" इत्याद्युक्तेः भक्तानामन्तरायो नास्त्येव सत्यं कालकर्मादिहेतुकोऽसौ नास्त्येव किन्त्व-न्तरायो हि भक्तानां द्विविधः महदपराधहेतुको भगवदिच्छाहेतुकश्च । तत्र महदपराधो हि समुचितकष्टभोगेन चिरकालत एव तस्यैव महतः कृपया सद्य एव च शाम्यति । यथा चित्रकेत्वा-दीनां गजेन्द्रादीनाञ्च । भगवदिच्छा च स्वभक्तसदाचारशिक्षणार्था । तत्रान्त्यो विघ्नस्तु प्रेमवर्द्धनार्थ एव यथा भरतादीनां तत्र प्रियव्रतस्यापराधाभावाद्भगवदिच्छानिबन्धन एव विघ्नोऽयं तत्र गुणा-बुद्ध्यापि भक्तैः क्वापि ममता न कर्त्तव्येति यथा भरतस्य मृग-पोषणप्रदर्शनया स्वभक्ता भगवता शिक्षिताः तथा महदाज्ञा हि भक्तः ... गिन्यपि भक्तैः प्रतिपालनीयैवेति प्रियव्रतकर्तृक-ब्रह्माज्ञा ... प्रतिपालनप्रदर्शनया शिक्षिता इति ज्ञेयम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीहंसं श्रीकुमारं च देवर्षिं निम्बभास्करम् ।
श्रीश्रीनिवासमाचार्यं भाष्यकारं महामुनिम् ॥
सर्वेश्वरं नमस्कृत्य श्रीगुरुं तत्पदाश्रयम् ।
सिद्धान्तद्योतको दीपः पञ्चमे क्रियतेऽधुना ।

अथ क्रमप्राप्तं स्थानम् षड्विंशाध्यायैर्निवक्ष्येन पञ्चमस्कन्धेन वर्णयेन । यदुक्तमतिक्रान्तस्कन्धान्ते यो नारदादात्मविद्यामधिगम्य पुनर्महीम् । भुक्त्वा विभज्य पुत्रेभ्य ऐ... ... ...मिति तत्र प्राप्तात्मविद्यस्य गृहेष्वभिनिवेशो गृहस्थस्य च ... त्यागेन मोक्ष इत्यघटमानं मत्वा पृच्छति । प्रियव्रत इति चतु... हे मुने ! प्रियव्रतो राजर्षिः भागवतः भगवद्भक्तः अत एव आत्मारामः आत्मा परमेश्वरः तत्स्वरूपगुणशक्तिचिन्तनरसास्वा... यद्गृहं मूलं यस्य सः कर्मभिर्बन्धः ज्ञानभक्तिसङ्कोचरूपो वा परा-भवश्च भवति तस्मिन् गृहे कथं केन हेतुना अरमत आभि-निवेशमकरोत् गृह इत्युपलक्षणं दारापत्यादीनाम् ॥ १ ॥ २ ॥

उत्तमश्लोकस्योत्तमकीर्तेर्विष्णोः पादयोः सर्वार्थप्रदत्वगुण-योगात् चरणकल्पद्रुमयोः शरणीक्रियमाणयोः कामादितापहारित्वगुणयोगादनुस्मृतिश्छाया तया निर्वृतं सुखितं चेतो येषां तेषां स्पृहायुक्ता मतिर्नास्ति ॥ ३ ॥

हे ब्रह्मन् ! दारादिषु सक्तस्य कृष्णे अच्युता दारादित्यागेन निर्विघ्ना मतिः तया सिद्धिः श्रीकृष्णसाधर्म्यरूपा मुक्तिश्चाभू-दिति यत् अयं महान् संशयः प्राप्तविद्यस्यापि यदा दारा-द्यासक्तिस्तदा अल्पसंशयः अनादिबद्धस्य जीवस्य मायामो-हादिसम्भवात् दाराद्यासक्तस्य तत्त्यागपूर्वकपरमेश्वरभक्तिर्मुक्ति-श्चेति तु महान् संशय इति भावः ॥ ४ ॥

उत्तरमाह । बाढमित्यादिना । यद्यपि प्राप्तपरमात्मविद्यस्य गृहासक्तिः गृहासक्तस्य तत्त्यागेन कृष्णे अच्युता मतिर्मुक्तिश्च संशयं जनयतीति भवदुक्तं सर्वं बाढं सत्यमेव तथापि भगवतः षाड्गुण्यनिधेः उत्तमाः श्रुतिस्मृतिरूपाः ...तिपादकाः श्लोका यस्य तस्य श्रीयुक्तचरणपद्ममकरन्दभूतो यो रसः तत्रावेशितचेतसोऽपि उत्तममार्गस्था अपि किञ्चिदन्तरायेण केनचिद्विघ्नेन विहता उत्तममार्गाच्चालिताः अपि भागवता एव परमहंसाः हेयोपादेयविदस्तेषां दयितस्य प्रियस्य भगवतः कथां स्वां शिवतमां पदवीं मार्गं न हित्वन्ति किन्तु ब्रह्मन्स्येव प्रायग्रहणेन कामात्मा कलत्रापत्यकिङ्करः कृपणः अतिमन्दोऽधिकारी किञ्चित्कालं हित्वतीति द्योत्यते उत्तमाधिकारिणस्तु गार्हस्थ्यं प्रथमत एव न स्वीकुर्वन्ति किं प्रजया किं धनेन त्यागेनैकेनामृतत्वमानशुरित्यादिश्रुतेः मध्यमाधिकारिणस्तु गार्हस्थ्यं स्वीकृत्यापि त्यजन्त्येव यदहरेव विरजेत्तदहरेव परिव्रजे-दितिश्रुतेः ॥ ५ ॥

भाषा टीका ।

॥ श्रीमते रामानुजाय नमः ॥

दोहा—रामानुज पद वंदि करि, कृष्ण पाद शिरनाय ।
पञ्चम की भाषा लिखत, लक्ष्मणदास बनाय ॥ १ ॥

श्री परीक्षित महाराज शुकदेवजी से बोले कि हे महामुनि ! प्रियव्रत जी तो महाभागवत हैं आत्माराम हैं वह घर में कैसे रत भये क्योंकि घरतो महा दुःख संसार बन्धन का मूल है ॥ १ ॥

हे मुनि श्रेष्ठ ! जिस प्रकार के संसार सङ्ग को छोड़ने वाले महा पुरुषों को इस प्रकार का घरों में आ... होने के योग्य नहीं है ॥ २ ॥

यर्हि वाव ह राजन्! स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयाञ्जसावगतपरमार्थसतत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकान्तभाजनतया स्वपित्रा उपामन्त्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलकारकक्रियाकलापो नैवाभ्यनन्दद्यद्यपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः ॥ ६ ॥

अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवनादवततार ॥ ७ ॥

स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगन्धर्वसाध्यचारणमुनिगणैरुपगीयमानो गन्धमादनद्रोणीमवभासयन्नुपससर्प ॥ ८ ॥

तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवन्तं हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन सह पितापुत्राभ्यामवहिताञ्जलिरुपतस्थे ॥ ९ ॥

भगवानपि भारत! तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ॥ १० ॥

भाषाटीका।

हे विप्रर्षे! उत्तमश्लोक भगवान् के चरण कमल की छाया में जिनका चित्त सन्तुष्ट होरहा है तिनको कुटुम्ब में इच्छा बुद्धि नहीं होती है ॥ ३ ॥

हे ब्रह्मन्! हमको यह बडा सन्देह है जो कि स्त्री पुत्र गृहादि में आसक्त होने पर भी उनकी मति कृष्ण के विषय में अचल भई और मोक्ष की सिद्धी भी होगई ॥ ४ ॥

श्री शुकदेवजी बोले हे राजन्! आपने ठीक कहा है परन्तु जिन पुरुषों के चित्त उत्तम श्लोक भगवान् के श्रीमच्चरण कमल के मकरन्द रसमें लगे हैं उन पुरुषों को मध्य में कोई विघ्न आपडते हैं तो भी अपने कल्याण करने वाली महा भागवत परमहंसों के प्रिय जो श्रीकृष्ण तिनकी कथा को प्रायःकरके नहीं त्यागते हैं तिसी से गृहस्थ होने पर भी प्रियव्रत जी की कृष्ण कथा नहीं छूटी तब कथाही से उनकी मोक्षसिद्धी भी होगई तो कुछ आश्चर्य नहीं है ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

प्रियव्रतस्य प्रव्रज्यैवान्तरायरूपा बभूवेति सप्रसङ्गमाह। यर्हीत्यादिना। विमुक्तसङ्गः प्रकृतिं भजन्नित्युक्तं तत्र यर्हि वाव ह यदा हि वावेति प्रसिद्धार्थौ ह इति च स स्वपित्रा मनुनाऽवनितलपरिपालनायोपामन्त्रितो नियुक्तो नैवाऽभ्यनन्ददित्युक्तं अथ ह तर्हि भगवानादिदेवो ब्रह्मा स्वभवनादवततारेत्यन्वयः उपामन्त्रणे हेतुः आम्नाता शास्त्रेणोक्ता ये प्रवराः श्रेष्ठा गुणास्तेषां गणस्यैकान्तभाजनतया नियताश्रयत्वेन अनिच्छायां हेतुः पर- [illegible] गपि वासुदेव एव निरन्तरसमाधियोगेन चित्तैकाग्र्येण समावेशितः समर्पितः सकलकारकाणामिन्द्रियाणां याः क्रियास्तासां कलापो येन सः यद्यपि तत्पित्रोक्तं न प्रत्याख्येयं तथापि तदधिकरणे राज्याधिकारेऽसतोऽपि मिथ्याभूतादपि राज्यप्रपञ्चादात्मनः पराभवमालोचयन्नाभ्यनन्दत् ॥ ६ ॥

गुणविसर्गस्य गुणसृष्टेः परिबृंहणं समृद्धिस्तदनुचिन्तया व्यवसितः सकलजगतामभिप्रायो येन सः यथा राज्ञा चारैर्मण्डलेश्वराणामभिप्रायो निश्चीयते तद्वत् अखिलैर्निगमैर्मूर्तिमद्भिर्वेदैर्निजगणैश्च मरीच्यादिभिः परिवृतः सत्यलोकादवतीर्णः ॥ ७ ॥

स च ब्रह्मा तत्र तत्रोडुपतिश्चन्द्र इव प्रकाशमानो गन्धमादनस्य द्रोणीं दरीमवभासयन्नुपससर्पेत्यन्वयः अमरपरिवृढैर्देवेन्द्रादिभिः ॥ ८ ॥

हंसयानेनोपलक्ष्यमाणेन पितरमुपलभमानो मत्पितायमिति लक्षयन्पितापुत्राभ्यां मनुप्रियव्रताभ्यां सह नारदः कृताञ्जलिः सन्सहसैवाभ्युत्थायार्हणेन पूजया सहोपतस्थे तुष्टाव [illegible] तदा मन्दरद्रोण्यां नारद उपदिशति मनुश्च तं [illegible]गमाऽस्तीति ज्ञातव्यम् ॥ ९ ॥

हे भारत! भगवानादिपुरुषो ब्रह्मापि तं प्रियव्रतमिति होवाचेत्यन्वयः तेन नारदेनोपनीतमर्हणं यस्य सः सूक्तवाक्येन यथोचितवाक्येन अतिशयेनोदिता वर्णिता गुणगणा अवताराः सुजयाः सर्वोत्कर्षाश्च यस्य ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

यदुक्तं स्वात्मपरमात्मयाथात्म्यानुभवनिष्ठस्य कथं गृहाद्यभिनिवेश इति तत्परिजिहीर्षुस्तस्य प्रथमं निवृत्तिधर्मनिष्ठां स्वायम्भुवस्वयम्भूप्रार्थनया गृहाश्रमपरिग्रहं चाह। यर्हि-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मा । वावेति निपातसमुदायःप्रसिद्धिद्योतकः यदा हि राज्ञः पुत्रः स प्रियव्रतः सर्वोत्कृष्टभागवतधर्मनिष्ठः नारदस्य चरणसेवयाञ्जसा सुखेनैव तत्त्वेन सहितः सतत्त्वः तत्त्वग्रहणं हितस्याप्युपलक्षणम् अधिगतः परमपुरुषार्थः सतत्त्वः तत्त्वहिताभ्यां युक्तः येन अधिगततत्त्वहितपुरुषार्थ इत्यर्थः अवगतपरमपुरुषार्थतत्त्व इति पाठेऽप्ययमेवार्थः पुरुषार्थतत्त्वग्रहणस्य उपायस्याप्युपलक्षणत्वात् ब्रह्मसत्रेण ज्ञानयज्ञेन दीक्षिष्यमाणः स्वपरयाथात्म्यविज्ञाननिष्ठो भविष्यामीति कृतसंकल्पः भगवति वासुदेव एवाविच्छिन्नध्यानयोगेन समाधियोगेनेति हेत्वर्थे तृतीया हेतुरिह फलमध्ययनेन वसतीतिवत् अव्यवधानसमाधियोगार्थं समावेशितः ब्रह्मार्पणं ब्रह्महविरिति न्यायेन भगवति समर्पितः सकलकारकाणि कर्त्रादीनि षट् तेषां क्रियास्तद्व्यापारास्तासां च कलापः समूहो येन कर्तृकरणत्वादिकं ब्रह्मण एवानुसंदधत् कारकव्यापाराणां ब्रह्माराधनरूपतां चानुसंदधानः भक्तियोगानुग्राहकत्वेन फलासङ्गकर्तृत्वत्यागपूर्वकमीश्वराराधनैकवेषः स्ववर्णाश्रमोचितधर्मानुष्ठानपर इत्यर्थः स्वपित्रा स्वायंभुवमनुना उपामन्त्रणकर्त्रा आम्नाता राज्ञां गुणत्वेन नीतिशास्त्रेषु कथिता ये अग्र्याः गुणास्तेषामेकान्तभाजनतया नियताश्रयत्वेन हेतुना अवनितलपालनाय उपामन्त्रित उपच्छन्दितोऽपिप्रार्थितोऽपि नैवाभ्यनन्दत् अवनितलपालनमिति विभक्तिव्यत्ययेनानुषङ्गः नन्वेतावदेव शुश्रूषा कार्या पितरि पुत्रकैः बाढमित्यनुमन्येत सादरं वत्स रोवैच इत्यादिशास्त्रार्थं जानन् सद्गुणाश्रयः कथं नैच्छदित्याशङ्क्य समाधत्ते । यद्यपीति । तत्पित्रोक्तं यद्यपि न प्रत्याख्येयं तथापि तदधिकरणे राज्याधिकरणे सर्वात्मनः अन्यस्मादसतः प्रकृतिपरिणामरूपाद्देहात्तत्प्रयुक्तरागादेश्च पराभवं ज्ञानसंकोचमन्वीक्षमाणः निरूपयन्नाभ्यनन्ददित्यनुषङ्गस्तेनैवान्वयो वा ॥ ६ ॥

अथ पितृप्रार्थनानभिनन्दनानन्तरं इवावेति पूर्वप्रसिद्धिद्योतको निपातसमुदायः देवानामाद्यो भगवानात्मयोनिर्ब्रह्मा गुणपरिणामरूपस्यैतस्य जगतः परिबृंहणं ज्ञानेन परितो व्याप्तिरनुध्यानमनुचिन्तनं ताभ्यामवसितः सकलजगदभिप्रायो येन सः स्वधर्मभूतज्ञानेनाभितो व्याप्य तद्बुद्धिविषयं साक्षात्कृत्य पर्यवितोऽस्य लोकस्याभिप्राय इतिकृतनिश्चय इत्यर्थः अखिलैर्निगमैर्मूर्तिमद्भिर्वेदैर्निजगणैर्मरीच्यादिभिश्च परिवृतः स्वभवनात्सत्यलोकादवतीर्णः ॥ ७ ॥

एकाकी सन्तं ब्रह्माणं विशिषन्प्रियव्रतसमीपं जगामेत्याह । तत्रेति । तत्र ततो लोके ऽर्वाचीने गगनतले उडुपतिश्चन्द्र इव प्रकाशमानः अनुपदं पदेपदे प्रतिक्षणमित्यर्थः अमरश्रेष्ठैर्देवेन्द्रादिभिरभितः कार्त्स्न्येन पूज्यमानः प्रतिमार्गं वरूथशः संघीभूतैः सिद्धानां गणैः प्रत्येकं सिद्धादिसङ्घाभिप्रायेण गणशब्दः प्रयुक्तः अतो न पौनरुक्त्यमुपसमीपमेत्य गीयमानस्य गन्धमादनस्य गिरेर्द्रोणीं प्रकाशयन्नुपससर्प समीपं गतः ॥ ८ ॥

तत्रह देवर्षिर्नारदः एनमयतरन्तं हंसवाहनेनोपलक्षणेन पितरं भगवन्तं चतुर्मुखमुपलभमानः हिरण्यगर्भोऽयमिति जानन् स आश्वत्र पितापुत्राभ्यां मनुप्रियव्रताभ्यां सहोत्थायाहर्णेन पूजया सह कृताञ्जलिर्बद्धाञ्जलिरुपतस्थे तुष्टाव तदा मन्दरद्रोण्यां प्रियव्रतस्य ज्ञानोपदेशाय नारद आगत्य स्थित इति बोध्यम् ॥ ९ ॥

हे भारत ! भगवान् हिरण्यगर्भोऽपि तेन नारदेन [illegible] कृतमर्हणं पूजनं यस्य सभ्यगुक्तेन वाक्येन समीचीनस्तुतिरूपेण वाक्येन नितरामुदितः वर्णितः गुणगणावतारः सत्यलोकादवरुह्य पृथिव्यामागमः तत्सम्बन्धिसुजयः सर्वोत्कर्षः [illegible] मिति यावत् चतुर्मुखरूपेण भगवदावेशावतारत्वात्सम्भवः सुजयो वा यस्य सदयः दयायुक्तोऽवलोको यस्य सः तं प्रियव्रतमिति वक्ष्यमाणं वाक्यमुवाच ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दारादिषु सक्तस्य प्रियव्रतस्य कृष्णविषयाच्युतमत्या सिद्धिः कथमभूदिति प्रश्नपरिहारः कथमागत इति तद्वक्तुमुपक्रमते यर्हीति । प्रियव्रतोऽप्येवमेव इति कृत्वा तच्चरितं वक्तुमुपक्रमते इत्यतोवाह । यर्हीति । यर्हि यदा स राजपुत्रः प्रियव्रतो [1] भुवनरक्षणाय स्वपित्रा स्वायम्भुवेनोपामन्त्रितो नियोजितोऽपि राज्यरक्षणलक्षणं पितृवचनं नैवाभ्यनन्दनाङ्गीकृतवान् वाव किल अथ तदात्मयोनिर्ब्रह्मा स्वभवनादवततार इत्यन्वयः अनभिनन्दने किङ्कारणमित्यत उक्तं ब्रह्मेति ब्रह्मसत्रेण सन्यासेन दीक्षिष्यमाणः सन्यासदीक्षां प्राप्नुयामिति मन्वानः ननु अज्ञाततत्त्वस्य संन्यासाधिकारः कथमस्य सम्भवतीत्यत उक्तमवगतेति अवगतं परमार्थसत्तत्त्वं येन सोऽवगतपरमार्थसत्तत्त्वः कालत्रयाव्याबाधितब्रह्माख्यतत्त्वज्ञानीत्यर्थः अलौकिकस्य वस्तुनो विशेषज्ञानं गुरुकटाक्षं विना न घटत इत्यत उक्तं चरणेति गु[illegible]ति शेषः एवं विधस्य समग्रानुग्रहकर्ता गुरुः कः येन तत्त्वज्ञानं स्यादित्यत उक्तं नारदस्येति नन्वयोग्यश्चेत्तत्त्वज्ञानग्रहणं कथं सम्भाव्यत इत्यत उक्तं परमभागवत इति इदं चानभिनन्दने कारणमित्याह । भगवतीति । अव्यधानो व्यवधानरहितोऽप्रतिबन्धो यः समाधियोगश्चित्तैकाग्रतालक्षणस्तेन वासुदेवे भगवत्येव सम्यगावेशितः समर्पितः सकलानां कारकाणां चक्षुरादीन्द्रियाणां क्रियाकलापो व्यापारसमूहो येन स तथा जीवस्य ब्रह्माधीनत्वानिरीक्षणलक्षणसमाधियोगेन संन्यस्ताहंकर्तृत्वादिसमुदायो वा नन्वजवत् पित्रादेशमुल्लङ्घ्यत्कथमयमिति तत्राह । यद्यपीति राज्यं कुर्विति यत्पित्रोक्तं तद्वचनमप्रत्याम्नातव्यं न करोमीति निराकर्तुमयुक्तं यदपि यद्यपीति जानाति तथापि तदधिकरणे राज्यरक्षणाधिकारे असतो ऽप्रशस्तादन्यस्माच्छब्दादेर्विषयादात्मनो मनआदेः पराभवं पुनः पुनः संसारप्राप्तिलक्षणं पराजयमन्वीक्षमाणः सम्यक् पश्यन् गुरुवचनं चाग्निस्नेहे निमित्तमिति संपश्यमानः अनेन गुर्वादेशोल्लङ्घनदोषोऽपि पर्यहारीति (१) द्रष्टव्यम् नन्वेवं विधश्चेत्किमिति पित्रोपामन्त्रित इति तत्राह आम्नातेति । आम्नाता नीतिशास्त्रेण परिपठिताः प्रवराः उत्तमा राज्ञां गुणा अभिगम्यादयो ये तेषामेकान्तभाजनतया नियतपात्रत्वात् ॥ ६ ॥

नन्वतर्कितनाभ्यागमने किंकारणमिति तत्राह । [illegible]ति । सत्त्वादिगुणैर्विविधः सर्गो यस्य तत्तथा तस्यैतस्य जगतः परिबृंहणं वृद्धिस्तस्यानुध्यानं सदा सञ्चिन्तनं तेन व्यवसितो निश्चितो ऽखिलजगदभिप्रायो येन स तथा परिबृंहणं [illegible]

---

(२) गुरूणां वचनमपि मोक्षप्रतिपन्थिचेदश्रमाणमिति [illegible]

[illegible]ध्वजतीर्थकृतपदरत्नावली ।

[illegible]न्तरकालीनानुध्यानेनापरोक्षीकृत इष्टानिष्टप्राप्तिपरिहारोपाय-[illegible]णी जगदभिप्रायो येनेति वा अखिलैर्मूर्तिमद्भिर्निगमैर्वेदादिभि-[illegible]र्मरीच्यादिभिर्निजगणैश्च परिवृत इत्यनेन भूतग्रामस्य प्रिय-[illegible]स्यात्मयोमिषवचनेऽतिविश्वासजननायोक्तमिति दर्शितम् ॥ ७ ॥

तद्भुवनस्यप्राधान्ये तन्माहात्म्यमाह । तत्र तत्रेति । उडुपतिरिन्द्र इवेति दृष्टान्तः सोऽयत्वे अमरपरिवृढैर्देवश्रेष्ठैरनुपथमिति वीप्सायां गन्धमादनस्य पर्वतस्य द्रोण्यां निम्नं नितम्बप्रदेशं प्रियव्रततपःस्थानं प्रकाशयन्नुपससर्प प्राप वाढमित्याद्येकं वाक्यं वा महान् संशयो म इति यदुक्तं तद्वाढं सत्यमित्यङ्गीकारः कथं मन्वादीनां सन्देहावकाशो न विदुषां तथा हि प्रियव्रतस्य प्रथमशरीरग्रहणमारभ्य हरिचरणारविन्दमकरन्दरसास्वादनैकचित्तत्वात् कुटुम्बासक्तिर्मुक्तिपरिपन्थिनी न स्यात् त्रिजगद्गुरुवरचतुर्मुखाज्ञाकारित्वेन गुणकरी च एतत्कुत इति तत्राह । भगवतेति । शेषं पूर्ववत् ॥ ८ ॥

इवा इत्येतौ निपातौ गद्यवाक्यालङ्कारार्थौ इतिहासश्रद्धातिशयजननार्थौ वा तत्र तस्यामवस्थायां हंसयानेन लक्षणेन स्वपितरं चतुर्मुखमुपलभमानः पश्यन्नारदः शिष्यशिक्षणाय पूर्वमुपविष्टः सहसैव झटित्येव पितापुत्राभ्यां नाम्ना स्वयंभुवप्रियव्रताभ्यां सह बद्धाञ्जलिरुपतस्थे उत्थानसेवामकरोत् ॥ ९ ॥

तेन प्रियव्रतेन मनुना चोपनीतमर्पितमर्हणमर्घ्यपाद्यादिपूजनं यस्मै स तथा "हिरण्यगर्भः समवर्तताग्र" इत्यादिसूक्तवचनेन स्वागतमुपविशासनमित्यादिप्रियवाक्येन वा नितरामतिशयेनोदितौ प्रकाशितौ गुणावतारो गुणविस्तारश्च शोभनो विजयश्च यस्य स तथा दयया सहितो हासः तादृशेन युक्तोऽवलोको यस्य स तथा एवम्भूत आदिपुरुषश्चतुर्मुखस्तं प्रियव्रतमिति वक्ष्यमाणप्रकारेणोवाच ह किल प्रत्यारम्भे प्रसिद्धौ च "वार्तासम्भाव्ययोः किल" इत्यभिधानतः सूक्तवाक्येन हितोपदेशसहितवाक्येन वा ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

राजपुत्र इति नववयस्त्वं ज्ञापितं तत्र स्वभावत एव परमभागवतः ततो नारदस्येत्यादि । ततो भगवति वासुदेव इत्यादि ततो ब्रह्मसत्रेणेत्यादि ततोऽवनितलपरिपालनायेत्यादि । ततो नैवाभ्यनन्ददिति योज्यम् । तत्र परमार्थमतत्त्वं भगवत्तत्त्वं कारणानि स्वाभाविकेन्द्रियचेष्टाः क्रियाकलापाश्च शास्त्रोक्ताः तेषां समर्पणञ्च यत् करोषि यदश्नासीत्यादि । ब्रह्मार्पणं ब्रह्म हविरित्यादि श्रीगीतोक्तप्रकारेण ज्ञेयम् । ब्रह्मसत्रेण इतः परं भगवत्तत्त्वमात्रं परस्परं विचारयितव्यम् नान्यत् किमपि कर्त्तव्यमिति सङ्कल्पेन दीक्षिष्यमाणो नियमं कर्तुमुद्यत इत्यर्थः ॥ ६—२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रियव्रतस्यात्मारामत्वमौत्पत्तिकमेव श्रीनारदकृपया परमं [illegible]तत्त्वं श्रीब्रह्माज्ञया गार्हस्थ्यञ्चाह । यहीत्यादिना । [illegible] [illegible]कर्मणि व प्रियव्रतः स्वपित्रा अवनितलप्रतिपालनाय उपामन्त्रितो नियुक्तोऽपि तत् नैवाभ्यनन्दत् तदा ब्रह्मा ततारेत्यन्वयः । अञ्जसा शीघ्रं सततं तत्त्वं ब्रह्मसत्र ध्यानेन दीक्षिष्यमाणः दीक्षां प्राप्स्यन् अतः परं स[illegible] मात्रं यद्वहन् तदेवानुभवनीयं ननु प्राक्तं किमपीति सङ्क[illegible] नियमं कर्तुमुद्यत इत्यर्थः । तत्क्षण एव पित्रा मनुना आम्नातो राज्ञां शास्त्रेणोक्ता ये प्रवरा गुणास्तेषां गणस्य एकान्तभाजनतया नितराश्रयत्वेन हेतुना हे प्रियव्रत ! सम्प्रति त्वमवनिं पालय इत्युपामन्त्रितस्तन्नाभ्यनन्दत् स्वस्याभद्रममन्यतेति नैच्छदित्यर्थः । कुतः भगवति अव्यवधानसमाधियोगेन निरन्तरचित्तैकाग्र्येण सम्यक् निर्वाहितः सकलानां कारकाणामिन्द्रियाणां व्यापारसमूहो येन सः यद्यपि तत् पित्रोक्तमप्रत्याख्यानाव्यमप्रत्याख्येयम् । तदपि नाहं राज्यं करोमीति प्रत्याख्यातवानित्यर्थः कुतः तदधिकरणे राज्याधिकारे आत्मनः स्वस्य अंशतः असद्भूतादपि कामक्रोधादेः सकाशात् पराभवं पर्यालोचयन् ॥ ६ ॥

अथ ह तत आदिदेवो ब्रह्मा गुणविसर्गस्य जगत्सृष्टेः परिबृंहणं समृद्धिस्तदनुचिन्तया व्यवसितः सकलजगतामभिप्रायो येन सः । यथा राज्ञा चारैः मण्डलेश्वराणामभिप्रायो निश्चीयते तद्वत् अखिलैः निगमैः मूर्तिमद्भिर्वेदैः निजगणैश्च मरीच्यादिभिश्च परिवृतः इति प्रियव्रतं प्रत्युपदेष्टव्यं धर्मं प्रमाणीकरणार्थं सत्यलोकादवतीर्णः भूतलमिति शेषः ॥ तत्र प्रियव्रतं बाल्यमारभ्यैव विरक्तं गृहान्निर्विद्य वन एव कृतवासं ज्ञात्वा तदाज्ञया कनिष्ठोऽप्युत्तानपादो राज्यं चकार तद्वंश्याश्च प्रचेतःपर्यन्तं यथा समयं राज्यं चक्रुरेवञ्च स्वायम्भुवमन्वन्तरस्यार्द्धादप्यधिकः कालो गच्छतिस्म । प्राचेतसो दक्षस्तु स्वायम्भुवे मन्वन्तर एव लब्धजन्मा पौत्रैर्भविष्यदैश्वर्यकामनया तपसे जगाम ततश्चाराजकं वीक्ष्य मनुरपायान्तरमनालोच्य विरक्तमपि प्रियव्रतं वनादानेतुमिच्छन्नानेतुं यदा न शशाक तदा ब्रह्मैवागत्य प्रियव्रतं राज्ये प्रवर्त्तयामास । ततश्च पञ्चममन्वन्तरपर्यन्तं क्रमेण प्रियव्रतस्य तद्वंश्यानां [illegible]राज्याधिकारः तृतीयचतुर्थपञ्चममनूनामुत्तमतामसरैवतानां प्रियव्रतपुत्रत्वात् द्वितीयमनोः स्वारोचिषस्यापि तद्वन्तःपातात् तत्तन्मनुपुत्रपौत्राद्यास्तु प्रियव्रता एव राज्यं खण्डमण्डलेश्वररूपा राजानो बभूवुः ततश्च षष्ठस्य चाक्षुषमन्वन्तरस्यारम्भे तपसो निवृत्तेन दक्षेण प्रजासृष्टिमन्वस्य तस्य साम्राज्यञ्च यदुक्तं "चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविद्रुते । यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः" इति । चाक्षुषस्य [illegible]नाम पादवंश्यत्वात्तन्मन्वन्तरपर्यन्तमेव स्वायम्भुवमनोरधिकार इति ज्ञेयम् ॥ ७ ॥

भूतलं प्रति तस्यावतरणे शोभामाह । स ब्रह्मा परिवृढैर्मुख्यैः कीदृशैः विमानानामावलिर्येषां तैः ॥ ८ ॥

हंसयानोपलक्षणेन पितापुत्राभ्यां मनुप्रियव्रताभ्याम् ॥ ९ ॥

तदा नारदस्तत्र प्रियव्रतमुपदिदेश । मनुस्तं तनुमागतोऽस्मीति ज्ञेयम् । भगवान् ब्रह्मापि प्रियव्रतमुवाच तेनोक्तमनुप्रियव्रतोपनीतमर्हणं यस्मै सः उदितौ वर्णितौ गुणगणैः स्वप्रजानुवात्सल्यादिरूपत एव हेतोरवतारः सत्यलोकादवतरणं तत एव सुजयः अत्युत्कर्षो यस्य सः । सवर्गेन अस्याभिगताद्वितिमति-

॥ श्रीभगवानुवाच ॥

निबोध तातेदमृतं ब्रवीमि मासूयितुं देवमर्हस्यप्रमेयम् ।
वयं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम् ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

आत्मारामाणामस्मत्प्रतिबन्धकोऽभूदं तद्गार्हस्थ्येऽस्य भक्ति-र्बध्नामित्याशीर्वचक: सदयावलोक: अहं राज्यं न करो-मीति तव प्रौढि: त्वामहं राज्यं कारयामीति मम प्रौढिस्तत्र पश्याम: कस्याद्य प्रौढिर्जित्वरीति तस्मिन् प्रियव्रते सहासाव-लोकश्च यस्य स: ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप:

प्रियव्रतस्तु ब्रह्मगौरवाद्गार्हस्थ्यं किञ्चित्कालं नियोजितस्तदाज्ञां पालयित्वा पुनर्निवृत्त इत्याह । यर्हीत्यादिना । नारदस्य पदवीं पुनरेवानुससारेत्यन्तेन वावह इति निपातसमुदायो वाक्यालं-कारार्थ: यर्हि यदा स: प्रियव्रत: नारदस्य चरणोपसेवया अञ्जसा सुगमेनैव यत्नेन अवगतपरमार्थसतत्त्व: अवगतमुपलब्धं परमार्थसतत्त्वं परमात्मस्वरूपगुणादियाथात्म्यं येन स: अत एव परम-भागवत: अत एव ब्रह्मसत्रेण बृहत्स्वरूपगुणादिभगवद्विषयकज्ञानय-ज्ञेन भगवत्स्वरूपादिश्रवणमननानिदिध्यासनव्यापारेण दीक्षिष्य-माण: पित्रा मनुना आम्नाता राजनीतौ प्रोक्ता ये प्रवरा: गुणास्तेषां गण-स्यैकान्तभाजनतया अवनितलपरिपालनाय उपामन्त्रित: अनुज्ञात: यद्यपि यत्पितुर्वचनमप्रत्याम्नातव्यमप्रत्याख्येयं तथापि नाभ्यनन्दत न प्रशशंस नाङ्गीचकारेत्यर्थ: तत्र हेतुमाह । तदधिकरण इत्यादिना तदधिकरणे अवनिपालनाधिकारे आत्मन: जीवस्वरूपत: अन्यस्मादा-त्मन: असत: असाधुन: बन्धकारणात् पराभवमन्वीक्षमाण: वासुदेव एव निरन्तरसमाधियोगेन समावेशित: सम्यगर्पित: सकलकारकाणा मिन्द्रियाणां या: क्रियास्तासां कलापो येन स: अथानन्तरमेव एतस्य विश्वस्य गुणविसर्गस्य गुणाविक्षुब्धे: परिबृंहणानुध्यानेन व्यवसित: सकलजगदभिप्रायो येन स: अखिलैर्निगमादिभि: परिवेष्टित: स्वभवनादवततार ॥ ६ ॥ ७ ॥

स ब्रह्मा अनुपथं पथि पथि विमानावलिभिरुपलक्षितै: सुरैरभिपूज्यमान: पथि पथि च वरूथश: पुञ्जभूतै: सिद्धादिभिरुपगीयमान: उडुपतिरिव गन्धमादनस्य द्रोणी-रवभासयन्नुपससार समीपं गत: ॥ ८ ॥

देवर्षि: एनं पितरं हंसयानेनोपलक्षणेन पितेत्यभिलक्ष्य-माण: पुत्राभ्यां पितापुत्राभ्यां मनुप्रियव्रताभ्यां सह कृताञ्जलि: अर्हणेन पूजया सहोपतस्थे तुष्टाव ॥ ९ ॥

तेन देवर्षिणा उपनीतं संपादितमर्हणं पूजनं यस्य सूक्त-वाक्येन सूक्तानि सुष्ठु उक्तानि वाक्यानि यस्मिंस्तेन स्तोत्रेण अतितरामुदिता: प्रकाशिता गुणगणा: अवतारा: शोभना जया: सर्वोत्कर्षाश्च यस्य स: प्रियव्रतं ह स्फुटमुवाच ॥ १० ॥

भाषाटीका ।

हे राजन् ! जब वे राजपुत्र प्रियव्रत परम भागवत श्रीना-रदजी के चरणसेवा से अनायाससे परमार्थतत्त्व ज्ञान को प्राप्त करके ब्रह्मसत्रयागसे दीक्षाग्रहणकरने को उद्यतभये तब भगवान् वासुदेव के विषय निरन्तर चित्तकी एकाग्रता से सब क्रिया सब इन्द्रियों के व्यापार को भगवान् मे समर्पण करदिया फिर राजों के कहे जो शास्त्रोक्त श्रेष्ठगुण तिनका पात्र होनेसे उन के पिताने जब पृथ्वी के पालन करने की आज्ञा दी तब उस बात को अच्छा नहीं समुझा यद्यपि पिता की आज्ञा त्यागने योग्य नहीं है तथापि राज्य का अधिकार होने से असत्प्रपंच में पड़नेसे सत् आत्म स्वरूप का तिरस्कार होना जानकर राज्यपालन न किया ॥ ६ ॥

इसके अनन्तर इस सब जगत् के गुणत्रयकी सृष्टि की वृद्धिकी चिन्ता के होने से सब प्राणियों के अभिप्राय को जानने वाले भगवान् आदि देव आत्मयोनि ब्रह्माजी देह धारी वेदगण तथा मरीच्यादि ऋषि गण इनोंसे वेष्टित हो कर अपने स्थान सत्य लोग से उतरे ॥ ७ ॥

मार्ग में आकाश के मध्य में बडे देव गणोंके विमानों की पङ्क्तियों से वेष्टित होकर पूजित होते हुये रस्ते रस्ते में समूहके समूह सिद्ध गन्धर्व साध्य चारण मुनि गणोंसे गाये जातेथे इसी प्रकार से गन्धमादन पर्वत की कन्दरा को प्रकाश-करते हुये प्रियव्रत के समीप आगये ॥ ८ ॥

उहांपर हंसविमानपर बैठे हुये भगवान् हिरण्यगर्भ ब्रह्माजी को देखकर अपने पिता होने से पिता पुत्र जो स्वायम्भुव मनु प्रियव्रत तिनके सहित आप भी नारदजी हाथ जोडकर ब्रह्माजी की अस्तुति करने लगे ॥ ९ ॥

हे परीक्षितजी ! नारदादिकों ने जब ब्रह्माजी की पूजा की और सुन्दर वचनों से अत्यन्त उनके अवतारों के सुन्दर गुणगणों का गान किया तब बैठकर आदि पुरुष ब्रह्माजी दया से हासयुक्त कृपा दृष्टि से देखकर प्रियव्रत से बोलने लगे ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रवृत्तिनिष्ठं मद्वाक्यं प्रतिकूलं मत्वा मय्यसूयां करिष्यतीति शङ्कमानो नाहमेवं वदामि किन्तु मन्मुखेन हरिरेव त्वामाज्ञापयतीति वदन्प्रवृत्तिनिवृत्तिरहस्यमाह । निबोधेति नवभि: । ऋतं सत्यमप्रमेयं देवमसूयितुं दोषारोपेण द्रष्टुं नार्हसि ते तव ततस्तात एष त्वमुरुश्च महर्षि: दिष्टमादिष्टमाज्ञां [illegible] अस्वतन्त्रा: सन्तो वहाम: ॥ ११ ॥

न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ।
नैवार्थधर्मैः परतः स्वतो वा कृतं विहन्तुं तनुभृद्विभूयात् ॥ १२ ॥
भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदाभयाय ।
सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताङ्ग ! धत्ते ॥ १३ ॥
यद्वाचि तन्त्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स ! वयं सुयोजिताः ।
सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥ १४ ॥
ईशाभिसृष्टं ह्यवरुन्ध्महेङ्ग ! दुःखं सुखं वा गुणकर्मसङ्गात् ।
आस्थाय तत्तद्यदयुङ्क्त नाथश्चक्षुष्मतान्धा इव नीयमानाः ॥ १५ ॥
मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ।
यथानुभूतं प्रतियातनिद्रः किन्त्वन्यदेहाय गुणान्न वृङ्क्ते ॥ १६ ॥
भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आस्ते सह षट्सपत्नः ।
जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किन्नु करोत्यवद्यम् ॥ १७ ॥
यः षट्सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् ।
अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् ॥ १८ ॥
त्वं त्वब्जनाभाङ्घ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ।
भुङ्क्ष्वेह भोगान्पुरुषातिदिष्टान्विमुक्तसङ्गः प्रकृतिं भजस्व ॥ १९ ॥

॥ श्रीशुक उवाच ॥

इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयावनतशिरोधरो बाढमिति सबहुमानमुवाह ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विश्वासार्थमेवाह । चतुर्भिः नेति । तस्य कृतं तेन निर्मितं तनु जीवस्तपआदिभिर्विहन्तुमन्यथाकर्तुं न विभूयात्प्रभुर्न भवेत् नीवया सामादिबुद्धिबलेन परतो बलवदाश्रयात् ॥ १२ ॥

तत्र देहयोगे तावत्पारतन्त्र्यं प्रसिद्धमित्याह । भवायेति । भवो जन्म भवाद्यर्थमव्यक्तेनेश्वरेण दिष्टं दत्तं देहयोगं जनता जीवसमूहः सदा धत्ते नत्वन्यथा कर्तुं शक्नोति अङ्ग । हे प्रियव्रत ॥ १३ ॥

कर्मकरणेऽपि पारतन्त्र्यमाह । यद्वाचीति । यस्य वाचि वेदलक्षणायां तन्त्यां दामन्यां गुणाः सत्त्वादयस्तत्पूर्वकाणि च यानि कर्माणि तन्निबन्धनैर्दामभिर्ब्राह्मणादिशब्दैः सुदुस्तरैः सुदृढैः वत्स ! वयं सर्वे सुयोजिता निबद्धाः सन्तस्तस्मै ईश्वराय बलिं वहामस्तदिच्छया कर्म कुर्मः नसि नासिकायां प्रोता बद्धाः सन्तश्चतुष्पदो बलीवर्दा यथा द्विपदे पुरुषाय ॥ १४ ॥

भोगेषु पारतन्त्र्यमाह । ईशा ईश्वरेणाभिसृष्टं दत्तमेवाङ्ग हे प्रियव्रतावरुन्ध्महे स्वीकुर्मः यथा स्वामिना दत्तमेव कर्मकारिभिर्भक्ष्यन्ति न स्वेच्छया तद्वत् नचैवं वैषम्यमीश्वरस्य [illegible] गुणकर्मसङ्गाद्यो यद्देवतिर्यगादि लक्षणां देहमयुङ्क्त योजितवांस्तत्तदास्थाय स्वीकृत्य यथान्धाश्चक्षुष्मता छायामातपं वा नीयमानाः सन्तस्तत्रैव गच्छन्ति तद्वत् ॥ १५ ॥

नन्वेतत्सर्वमविदुष एव नत्वात्मविद इत्याशङ्क्याह । मुक्तोऽपीति । यावत्प्रारब्धं कर्म तावत् यथा स्वप्नेऽनुभूतं प्रतियातनिद्रो गतनिद्रोऽभिमानशून्य एवानुस्मरति तर्हि भोगवासनया पुनर्जन्म भवेत्तत्राह । किन्तु देहान्तरारम्भकान्गुणान्कर्माणि वासनाश्च न वृङ्क्ते न संभजते ॥ १६ ॥

ननु गृहे वर्तमानस्य भोगान्भुञ्जानस्य कुतोऽभिमानाभावो मोक्षो वा अतस्तत्त्यागेन वनवास एव युक्तस्तत्राह । भयं सं सारः स्यादेव प्रमत्तस्याजितेन्द्रियस्य वनेष्वपि सङ्गभिया वनाद्वनान्तरं गच्छतोऽपीत्यर्थः सहैव षट् सपत्नाः शत्रवो मनोबुद्धीन्द्रियाणि च यस्य स तथाभूत एव वनेष्वपि यत आस्ते बुधत्वेन जितेन्द्रियत्वादात्मरतेरात्मारामस्यावद्यं रागादिदोषं किं नु करोति न करोत्येव ॥ १७ ॥

ननु गृहे वसतः पुरुषस्य रागादयः संभवन्ति ननु सत्यमित्याशङ्क्याह । य इति । यः षट् वैरिणः षडिन्द्रियाणि विजिगीषमाणः स पूर्वं गृहेषु स्थित्वा तेषामत्यन्तं निरोधमकुर्वन् जनु यतेत क्षीणेष्वरिषु कामं गृहेऽन्यत्र वा विचरेत यतो वाऽयं

श्रीधरस्वामिकृतभावार्थदीपिका

स्थानान्दुर्गाश्रित एवारीन् जयति पश्चाद्दुर्गे वान्यत्र वा यथेष्टं पाडे प्रहरेदित्यर्थः ॥ १८ ॥

इह च गृहदुर्गाश्रयणं प्राकृतानां त्वं त्वत्पादकमलाश्रयणलक्षण एव दुर्गं तदाश्रिता इत एव निर्जितषट्सपत्नश्च सर्वोऽपि पुरुषो गृहाश्रमादिविषयानुपभुञ्जानोऽपि त्वत्पादपद्मसेवया पश्चात्तीर्णसंसार स्वरूपं भजन्त आत्मनिष्ठो भवेदित्यर्थः ॥ १९ ॥

भगवताभिहितो लघुतयाल्पतया तच्छासनमङ्गीचकार यद्वा भगवतो यदनुशासनं तद्‌लघुतया गौरवेण बाढं तथा करिष्यामीत्यवनतकन्धरः सन् जग्राह ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमेवाह । निबोधेति नवभिः । भगवच्छासनमेवाहमुपदेक्ष्यामि भवतो मदुपदेशरूपं भगवच्छासनमुल्लङ्घ्य त्वया भगवदाज्ञा पालनीया इत्याह । निबोधेति । हे तात ! प्रियव्रत ! इदमृतं तथ्यं ते कथयामि तच्छ्रवणावधानेन शृणु अप्रमेयं प्राकृतकरणानभिगम्यमित्यर्थः अपरिच्छिन्नमिति वा देवं दीव्यमानं निरस्तसमस्तदोषं भगवन्तमसूयितुं दोषदृष्ट्याशङ्कितुं नार्हसि को न्वासावप्रमेयस्तत्राह । यस्य भगवतो दिष्टमादिष्टं शासनं विधानं तदधीनाः सन्तो भगवान् ते तव ततः पिता मनुरयं महर्षिर्नारद वयं मत्प्रभृतयो मरीच्यादयश्च इत्येते सर्वे वहामः कुर्म इत्यर्थः ... निरस्तातिशय भगवानस्माकं सर्वेषामीशानः त्वयास्माभिश्च सर्वैः ... ॥ ११ ॥

तथा च श्रूयते "एतस्य वा अक्षरस्य प्रशासने गार्गि ! सूर्याचन्द्रमसौ विधृतौ तिष्ठत" इत्यादिश्रुतिभाव एतदेव उपपादयति । नेति । ... करणानामप्यपलक्षणं यद्वक्तकरण... तस्य भगवतः कृतं भावकः कृतिं प्रशासनं ... कर्माणि वा कः तत्पति कर्तारि वा कृतं शासनमिथं तपआदिभिरुपायैर्विहन्तुमन्यथा कर्तुं न विभूयाच्च समर्थो भवेत् तपसा ज्ञानादिना विद्यया शास्त्रीयज्ञानेन ... योगबलेन मनीषया विचारक्षमया बुद्ध्यार्थं ... परतः ... तपआदिक्रियाभिः ... कर्मोपायेन वा ॥ १२ ॥

[illegible]

अनुकूलप्रतिकूलात्मकं प्राचीनकर्मानुसारेण भोगार्थं देहप्राप्तिनिमित्तं कर्म च कर्तुमकर्तुमन्यथाकर्तुं चेत्यर्थः सदा अभयाऽऽयेति च छेदः मुक्तये इत्यर्थः स्वशासनानुवर्तिनामनुग्रहे तदतिवर्तिनां निग्रहार्थं च सत्त्वादिप्रचुरदेहयोगमादिशतीति भावः ॥ १३ ॥

हे वत्स ! यस्य भगवतो वाचि वेदाख्यायां तन्त्यां दामन्यां रज्ज्वां गुणकर्मदामभिः गुणाः सत्त्वादयः कर्माणि सात्त्विकादिभेदेन भिन्नानि स्वस्ववर्णाश्रमोचितानि कर्माणि तान्येव दामानि नामभिरिति पाठे वर्णाश्रमनामानि एव निगडबन्धनग्रन्थयस्तरज्जवः तैर्दृढतरैः सर्वे वयं सुयोजिता निबद्धाः सन्तः तस्मै ईश्वराय भगवते बलिं पूजां वहामः कुर्मः यथा नसि नासिकायां छिन्नायां प्रोता वद्धरज्जवश्चतुष्पदो बलीवर्दाः द्विपदे मनुष्याय कुर्वन्ति तद्वत् ॥ १४ ॥

किञ्च न वयमिष्टानिष्टप्राप्तिपरिहारसाधकाववोधनतदुपसंहारसमर्था इत्याह । ईशाभिसृष्टमिति । अङ्ग ! हे प्रियव्रत नाथ ईश्वरो यद्यद्युङ्क्ते योजितवान् तत्तद्वर्णाश्रमादिकं जात्यादिकं चास्थाय स्थिता वयं तत्तदीश्वरादिष्टं देवतिर्यगादिशरीरमास्थाय स्थिता वर्णानि वा गुणकर्मणां सात्त्विकादिभेदानां कर्मणां संगात्सं-बन्धान्निर्मितानि तत्तत्कर्मानुरूपाणीत्यर्थः अनेनेश्वरस्य वैषम्याभाव उक्तः ईशेन भगवताभिसृष्टं दत्तं सुखं दुःखं चाऽवकल्पमहे प्राप्नुमः ईश्वरस्य हिताहितज्ञत्वे अन्येषामनभिज्ञत्वे चक्षुष्मतेति च दृष्टान्तमाह । यथा चक्षुष्मताऽविप्लुतचक्षुरिन्द्रियेण पुरुषेण छायामातपं वा नीयमानाः प्राप्यमाणाः अन्धाः प्राप्नुवन्ति तद्वत् अतोऽस्माभिरीश्वरादिष्टे प्रवृत्तिधर्मे एवानुष्ठेय इति भावः ॥ १५ ॥

ननु देहात्माभिमानिनः संसारिणो जीवस्य प्रवृत्तिधर्मानुवृत्तिर्युक्ता अहं त्वधिकृतात्मविद्यो मुमुक्षुः कथं प्रवृत्तिधर्ममनुतिष्ठामि बन्धकत्वादित्याशङ्कायां तावन्मुमुक्षोरप्यामुक्तेर्देहधारणमावश्यकं तदनुवर्तितया भोगेषु कर्मसु च प्रवृत्तोऽपि न बध्यत इत्याह । मुक्तोऽपीति । प्रतियातनिद्रः निवृत्ताज्ञानः पुमान् यथानुभूतमनुभूतवान् जागरणात् पूर्वमनुभूतकर्मवदज्ञानदशायां कर्मानुभवादिति यावत् आ नाशाद्यावत्तस्यारब्धं स्वसुखदुःखादिफलप्रदानाय प्रवृत्तं पुण्यापुण्यरूपं कर्माङ्कितमनुभवन्नपि तदभिमानशून्यः सन् ... देहमस्मृतकादयो यथाभिमानमात्मन्यकुर्वाणाः ... विभृयादेव देहात्माभिमानरहितः ... विभृयादिति ... प्रारब्धस्य कर्मणोऽवश्यभोक्तव्यत्वात्प्रारब्धस्य ... तहिज्ञानिनः ... इत्याह । अयं प्रतियातनिद्रः अन्यदेहाय देहान्तराय ... निमित्तभूतानि सत्त्वादिगुणप्रयुक्तकर्माणि न ... प्रारब्धानुभवो देहधारणं चेत्युभयं तुल्यं पुनः देहान्तरानिमित्तकर्माकरणरूपो विशेष इति भावः ॥ १६ ॥

... मुक्तोऽपि देहधारणं प्रारब्धानुभवश्चेति वन्धेऽपि देहधारणं ... परं बध्यामि ... संसृतिहेतुः ... प्रमादः प्रमाद्यति ... देहक्रियापारवश्यं ... ननु ...

देहानुबन्धिनां कलत्रादीनां प्रसह्य प्रवर्त्तयतां ज्ञाननिष्ठाविरोधिना-भावात्मा प्रतिनिष्ठितो स्यादिह तु विपरीतमित्यत्राह । यतः यस्मात् आत्मवान् सह षट्सपत्नैः सहैव षट्सपत्नाः शत्रवो मनःसहितानि ज्ञानेन्द्रियाणि यस्य तथाभूत एव मन आस्ते "वोपसर्ज" स्यादिति वाग्रहणात्सहस्य सभावाभावः "इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते" इति समनस्केन्द्रियवर्गस्य विषयप्रवणस्य ज्ञाननिष्ठाविरोधित्वात्तन्नाश्रमिणोऽपीन्द्रियवर्गस्य सहैव विद्यमानत्वाद्दोष स्यादेव अत इन्द्रियवर्ग एव नियन्तव्यः यद्येवं तर्हि किमपराद्धं गृहाश्रमेणेत्याह । जितेन्द्रियस्यात्मरतेः प्रकृतिविविक्तात्मानुभवशीलस्य बुधस्य ब्रह्मनिष्ठस्य पुंसः गृहाश्रमः किन्तस्य नाम करोति न कमपि दोषं करोतीत्यर्थः ॥ १७ ॥

ननु यदीन्द्रियपारवश्यरूपप्रमाद एव यद्येतन्कर्हि इन्द्रियाणि ज्ञाननिष्ठाविरोधीनि वन एव नमन् जयामीत्यत्राह । य इति । सपत्नान् ज्ञाननिष्ठाविरोधित्वेन शत्रुतुल्यान् षडिन्द्रियाणि यो विजिगीषमाणः विजेतुमिच्छन्सः पूर्वं प्रथमं गृहान् निविश्य गृहाश्रम एव स्थित्वा यतेत इन्द्रियजयार्थं यतेत तथा हि लोके यः कश्चन शत्रून्विजिगीषमाणः विजेतुमिच्छन्प्रथमं दुर्गमाश्रित्य क्षीणान् बलिष्ठान् शत्रूनत्येति जयति ततः त्यागात् शत्रून् बलहीनान् सन्तु कामं यथेष्टं दुर्गेऽन्यत्र वा विचरेदिति निपाठितादर्थ इत्यर्थः ॥ १८ ॥

सत्यं [illegible]थमं दुर्गाश्रित एवारीनत्येति अहमपि भगवच्चरणारविन्दरूपं दुर्गमाश्रित्य शत्रून् जेष्यामि तत्त्याजयितुमित्याह । त्वमिति । यद्यपि त्वमब्जनाभस्य भगवतश्चरणकमलकोशदुर्गाश्रितः यथा कमलकोशान्तर्गतभ्रमरं वातातपवर्षादयो न बाधन्ते तद्वद्भगवच्चरणारविन्दसमाश्रितजनमपीन्द्रियाणि न बाधन्त इति ज्ञापनाय कोशशब्दः प्रयुक्तः निर्जित [illegible]न्द्रियवर्गो ऽसि तथापि पुरुषेण परमपुरुषेण दिष्टान् भोगान् इह लोके भुक्त्वा ततो विमुक्तसङ्गः [illegible] विसृज्य [illegible] ॥ १९ ॥

इतीत्थं ब्रह्मणा भगवताभिहित उक्तः महाभागवतः त्रिभुवनाधिपतेः प्रियव्रतश्चतुर्मुखस्यानुशासनमात्मन स्वस्य लघुतया इतरथा भोगाननुभवन् एव पुनर्मुक्त्य[illegible]त्वात्तदनुशासनस्य सुकरत्वं यद्वा आत्मनो गुरुशासने तत्तथा गौरवेण बाढं करिष्यामीत्यनुमत्य [illegible] बहुमानं यथा भवति तथा [illegible] आज्ञां जग्राह ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ऋते शास्त्रविहित [illegible] हरिणा स्वधर्मो दुष्टभव[illegible] आराजां [illegible] [illegible] हरौ दोषाविष्कार[illegible] [illegible] दुष्परिहरः स्यादिति [illegible] [illegible] [illegible] [illegible]

[illegible] मन [illegible] इत्यर्थः । [illegible] तत्स्नाता मनः [illegible] [illegible] ॥ १६ ॥

नन [illegible] सुशक स्यादि[illegible] न तर्ह्यति । तस्य [illegible] [illegible] [illegible] ॥ १७ ॥

[illegible] इत्युक्तं स्पष्टयति । [illegible] [illegible] कर्मफलभोगाय [illegible] [illegible] कर्मीणि [illegible] ॥ १३ ॥

[illegible] [illegible] ॥ १४ ॥

यथा [illegible] तथा [illegible] । ईशावास्य[illegible] [illegible] ॥ १५ ॥

[illegible] [illegible] ॥ १६ ॥

ननु [illegible] [illegible]

[illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

[illegible] मत्तस्तेन्द्रियाख्यशत्रून् युध्येन विषयगमनं निरुध्यात्मा- [illegible]र्यात् पुनः क्षीणपूर्वकर्मात्मपयप्रचारोऽथवाऽन्द्रियेषु सत्सु [illegible]कामं निर्भयो विचरेदित्यन्वयः विपश्चिदित्यनेन ।

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते म०

इत्येतद्विवक्षितम् ॥ १८ ॥

बहालापैरलं किमधुना कर्तव्यमत्राह । त्वमिति । तुना प्रिय- व्रतस्य स्वस्माद्विशेषं सूचयति तमेवाह । अब्जनाभेति । पुरुषा- भिमुखात् श्रीनारायणप्रसादोपततात् विमुक्तसङ्गः पुत्रादिसंबन्ध- लक्षणसङ्गरहितः सदसं प्रकृति मविद्यानन्दलक्षणस्वभावं सन्यासा- श्रमेण मोक्षो नान्याश्रमेणेत्ययं वाञ्छयामाह एव "विहितो यस्य यो धर्मो विष्णुना प्रभविष्णुना । तेन मुक्तिर्भवेत्तस्य तं गुरुर्वेद सर्ववित्" इति स्मृतेस्तत्र विहितेन प्रजापालनलक्षणधर्मेण स्वयो- ग्यमुक्तिरिति विवक्षया (१) तत्र विमुखं त्वामुद्बोध्य तत्कर- णाय त्वामिति मत्थतस्तत्कुर्वित्येतद्वा (२) तुनाह ॥ १९ ॥

अथ प्रियव्रतस्य शिष्टजनशिक्षणाय विरिञ्चस्याज्ञाग्रहणप्रका- रमाह । इतीति । विरिञ्चादात्मनः स्वस्य लघुतयामितमहिमत्वाद् वनतशिरोधरः प्रणतकण्ठः ॥ २० ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रवृत्तिनिष्ठं मद्वाक्यं स्वासह्यं मत्वा मदसूयां माकृथाः भोः प्रियव्रत ! अहन्तु त्वत्प्रभोरेवाधीनस्तस्यैवाभिप्रेतं वच्मीत्याह । निबोध स्वबुद्ध्यैवेदं परामृशेत्यर्थः । हे तातेति नाहं तव शत्रुः त्वां दुःखयामीति भावः । ऋतं सत्यमेव न तु त्वामहं प्रतारयामीति भावः ब्रवीमीत्यनेन ब्रह्मा न तु स्वापितवाहमप्यप्रमाणी कर्तव्य इति भावः । किं सत्यं तत्राह । वयमिति । भवो रुद्रोऽपि ते तव तत- स्तातो मनुर्महर्षिर्नारदोऽयं तव गुरुरित्येते वयं यस्य दिष्टमाज्ञा- मेव वहामः स खलु यस्मै यस्मै हृद्रा यद्यद्दिशति तथैव चेष्टते इति तदाज्ञयैव त्वामहं राज्ये प्रवर्त्तयामीति भावः । यमहं सर्वा- त्मना भजे स प्रभुरेव मां संसारसिन्धौ निमज्जयतीति स्वेष्ट- देवेऽपि दोषदर्शी मा भूरित्याह । मा स्मासूयितुमिति । अप्रमेयं प्रमातु- मशक्यं कमपि संसारेऽपि प्रवर्त्य शीघ्रमुद्धरति कमपि वनेऽपि प्रस्थाप्य नोद्धरतीति कस्तस्य चरितं वेदेति भावः ॥ ११ ॥

[illegible] स्वहठं रक्षितुमात्मनस्तपोविद्यायोगबलं प्रदर्शयि- तव्यमित्याह । नेति । तस्य कृतं तेन निर्मितं तपआदिभिर्विद्यन्तु- मन्यथा कर्तुं तनुभृज्जीवो न विभूयात् न प्रभवेत् ननु त्वद्द्वारा मां राज्ये प्रभुः प्रवर्त्तयति यथा तथा महर्षिद्वारा मां राज्यात् प्रव्राजयति चेति किमत्र निश्चिनोमीति चेत् बुद्धिबलेन मां परमेश्वरं विजिगीषसीत्याह । मनीषया चेति । तेनोभयमपि भगव- दादिष्टं मत्वा राज्यं कुर्वंस्तत्रानासक्त्या प्रव्रज्यामपि कुर्विति भावः । न च यथेष्टकृत्यदातनः स्वगतिमूर्त्तिकल्पनेन राज्यं चिकीर्षितं पापीमां विपरं वहुधर्मबलवदाश्रयेण वा स्वबाहु- बलेन चोल्लिनीर्षेत्याह । नैवास्येत्यादि ॥ १२ ॥

(१) प्रजापालनकर्मणा ।
(२) प्रजापालनं ।

नात्र किमपि शोचनीयं यतो देहधारिणां [illegible] भद्रम- भद्रं वा स्वेच्छया परेच्छया वा सर्वं सहन्त एवेत्याह । भवायेति । भवनाशौ पुनःपुनर्जन्ममृत्यू तदाद्यर्थं जनता जीवसमूहः अव्यक्तेनेश्वरेण दिष्टं दत्तं देहयोगं सदा धत्ते स्वकर्मोपार्जित- मपि देहमीश्वराज्ञां विना न प्राप्नोति यथा साध्वसाधुक्रियाभिरु- पार्जितमपि शालिहैवकारागारादिकं नृपाज्ञां विना प्रजा न प्राप्नोति नृपः खलत्वन्यथापि कुर्यादित्यतो हेतोः ॥ १३ ॥

देहधारणे पारतन्त्र्यमित्र कर्मकरणेऽपि पारतन्त्र्यमाह । यस्य वाच वेदलक्षणायां तन्त्यां दामन्यां गुणाः सत्त्वादयस्तद्- प्रवर्तितानि कर्माणि नामवन्धनैर्नामभिर्ब्राह्मणादिशब्दैः सुदृढैः सुदृढैः हे वत्स ! वयं सर्वे सुयोजिताः निबद्धाः तस्मै ईश्वराय बलिं वहामः तदादिष्टं कर्म कुर्मः अत्र दृष्टान्तः । नसि नासि- कायां प्रोता बद्धाः स्वन्तः चतुष्पदो बलीवर्दाः द्विपदे मनुष्याय । ते यथा मनुष्यदत्तस्य भारस्यावहने गमनागमनक्रियादिषु स्वात- न्त्र्यं न क्वापि प्राप्नुवन्ति तथा वयमपीति भावः ॥ १४ ॥

कर्मफलभोगेऽपि पारतन्त्र्यमाह । ईशा ईश्वरेण अभिसृष्टं दत्तमेव अङ्ग प्रियव्रत ! अवरुन्ध्महे प्राप्नुमः दुःखं सुखं वेति नचात्र वैषम्यमीश्वरस्येत्याह । गुणेति । तमआदिगुणानिबन्धनानि यानि कर्माणि तेषु सङ्गासक्तत्वात् यथा स्वीयत्वात् ममेत्यापि वलीवर्देषु मध्ये साध्वसाधुकर्मकरणतारतम्यानुरूपमेव कस्यचिदुत्तमगृहाभ्यन्तरे स्थापनस्य सघृतदुग्धौदनादिकं तत्स्वामी दत्त कस्यचन रूक्षवस्त्रमिवाग्रे तृणादिकं कस्यचन कणशघासादिकं कस्यचन नीहारातपपङ्कादि- मति बहिःस्थलं स्थापितेभ्यः साक्रोशदण्डप्रहारं विरसं तृण- पलालादिकमिति किं कृत्वा अवरुन्ध्महे नाथः स्वामी यद्यद्- युङ्क्ते अभद्रं भद्रं वा फलं ददौ तत्तदाश्वाय अस्मद्गुणग- माकृतयानुरूपमेव ददाति स्वामिनः कोदोष इति मनाक् विश्व- स्येत्यर्थः । प्रत्युत परमेश्वरस्यात्र गुणा एव द्रष्टव्य इति दृष्टा- न्तेनाह । चक्षुष्मतेति । शीतलमातपतसं वा वत्सं नीयमानास्तत्र कदाचित् शीतलं वर्त्मनि कण्टककूपादिकं दृष्ट्वा यदा तत्र त्वमं नीयन्ते तेन किमन्धैश्चक्षुष्मानुपालभ्यते अपि तु हितकृदय- मिति विश्वस्य प्रशस्यत एवेति भावः ॥ १५ ॥

नन्वेतत् सर्वमविदुषः कर्मिण एव ननु कर्मग्रन्थित उत्ती- र्णस्यात्मज्ञानिन इत्याशङ्क्याह । मुक्तोऽपीति । यावत्प्रारब्धं कर्म तावत् यथा स्वप्नेऽनुभूतं प्रतियातनिद्रो गतनिद्रोऽभिमान- शून्य एवानुस्मरति तर्हि भोगवासनया पुनर्जन्म स्यात्तत्राह । किन्तु अन्य देहाय देहान्तरं प्राप्तुं गुणान् कर्माणि वासनाश्च न वृङ्क्ते न संभजते ॥ १६ ॥

ननु तदपीश्वराधीनत्वेऽपि मम सांप्रतिकाद्वनवासात् भावि- नी गृहे स्थितिरपकारं करिष्यत्येवेत्याशङ्क्याह । भयं संसारः सह- षट्सपत्नः षड्भिरिन्द्रियशत्रुभिः सहितः जितेन्द्रियस्य तत्राप्यात्मरते- रात्मारामस्य तत्रापि बुधस्य वनगृहयोस्तारतम्याभावं बुध्यमानस्य किमवद्यं रागादिदोषम् ॥ १७ ॥

अजितेन्द्रियो जितेन्द्रियः इन्द्रियजयेच्छुरित्यत्र लोके द्विविधो जनस्तत्राद्ययोर्गृहाश्रमो न दोष इत्युक्तम् । अन्त्यस्य तु प्रत्युत गुण एवेत्याह । यो विजिगीषमाणः । विजेतुमिच्छति स पूर्वं गृहेषु स्थित्वा तेषामत्यन्तनिरोधमकुर्वन् जेतुं यते[illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

…तो लोक ऊर्जितान् बलिष्ठानरीन् दुर्गाश्रित एवात्येति जयति ततश्च क्षीणेष्वरिषु कामं गृहेष्वन्यत्र वा विचरेत् युध्येनेति पाठे प्रहरेदित्यर्थः ॥ १८ ॥

…त्वन्तु तेषु त्रिषु मध्ये न कोऽपीत्याह । त्वमिति । दुर्गिकोपक्रमे षड्जनाभेति मत्वन्यप्राकृतगृहदुर्गाश्रितः नचान्यवाङ्मनेन्द्रियश्च यती निर्जितेनेति जितषट्सपत्नेभ्यो निर्गतः तत्र षडिन्द्रियाणि भगवत्सौन्दर्याद्यास्वादकानि परमामित्रायेव ननु शत्रवः अतः पुरुषेण स्वप्रभुणैवातिशयेन दिष्टान् दत्तान् भोगान् इति कर्म जन्यानामेव भोगानां बन्धकत्वं नत्वीश्वरदत्तानामिति भावः । प्रकृतिं भजस्वेति पश्चाद्राज्यभारं स्वपुत्रं विन्यस्य वनेऽपि गत्वा तिष्ठ ॥ १९ ॥

आत्मनः स्वस्य लघुतया तत्पौत्रत्वादित्यर्थः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हेतात ! पौत्र ! ते ततः तातः मनुः एष देवर्षिः ते गुरुः भवः वयमिति मरीच्याद्यभिप्रायेण बहुवचनमेते सर्वे विवशाः यस्य दिष्टमाज्ञां वहाम अयमर्थः ज्ञानेन वयसा च त्वत्तोऽधिका वयं यत्र नियोजितास्तत्पराः सन्तः तस्य दुर्ज्ञेयस्वदुर्लभत्वादिकमनादृत्य तमर्थेव द्रक्ष्यामः अर्थेन प्राप्स्याम इत्येवं नाशयाम इति अतोऽविपक्वकषायस्त्वम अप्रमेयं निखिलैः प्रमाणैः साकल्येन प्रमातुमशक्यमसूयितुम अविपक्वकषायाधिकारिसाध्यत्वदोषारोपेण द्रष्टुं नार्हसीत्यर्थः ॥ ११ ॥

यत्र यैस्तेन नियोजितस्तत्स्वीकुर्वन् आत्मपरत्वं नियम्यनियन्तृतावमवधार्य शनैः शनैर्मुक्तो भवेदित्याह । न तस्येति पञ्चभिः । तस्य तेन परमेश्वरेण कृतं विहन्तुमन्यथाकर्तुं न विभूयात् न प्रभुर्भवेत् ॥ १२ ॥

भवभाव मोक्षाय च अव्यक्तदिष्टं दुर्लक्ष्यपरमेश्वरदत्तं देहयोगं जनता मुमुक्षुबुभुक्षुजनसमूहः धत्ते अव्यक्त एव भोगं मोक्षं च यथाधिकारं यथाकालं जनतायै ददाति तदर्थमातुरो न भवेदिति भावः ॥ १३ ॥

आतुरत्वं तु न पुरुषार्थसाधकमित्याशयेनाह । यदिति द्वाभ्याम । यस्य भगवतः वाचि तन्त्यां वेदरूपायां दामनि, गुणकर्मनामभिः सत्त्वादिगुणैः पुण्यादिकर्मभिः देवादिनामभिः सुदुस्तरैर्दुर्निवार्यैः सुयोजिताः वयं तस्मै बलिं वहामः तत्र दृष्टान्तः नसि नासायां प्रोताश्चतुष्पदो बलीवर्दा यथा द्विपदे कर्षकाय बलिं वहन्ति तद्वत् ॥ १४ ॥

गुणकर्मसंयोगात् अस्माभिः सत्त्वादिगुणवशात्कृतानि यानि कर्माणि तद्योगात् नाथः यद्यद्देहादिकमयुङ्क्त योजितवान् तत्तदास्थायाङ्गीकृत्य ईष्ट इतीट् नेनेशा नियन्त्रा दुःखं सुखं वा अभिसृष्टं दत्तम् अनुरुन्ध्महे स्वीकुर्मः तथा च मन्त्रः “ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मागृधः कस्य स्विद्धनम्” इति ॥ १५ ॥

एवं सामान्यतः सर्वैरीश्वरदत्तमिष्टमनिष्टं वा पारवश्यात्स्वीकार्यमेव अथ मुमुक्षुणापि पारवश्यात्प्रारब्धकर्मफलं स्वीकर्तव्यमित्याह । प्रतिपन्नान्निद्रः प्रतिबुद्धः मुमुक्षुः यथानुभूतं शरीरं तादृशाय अन्यदेहाय गुणान् “ऊर्ध्वं गच्छन्ति सत्त्वस्था” इत्यादिनोक्तान् स्वर्गादिप्रदान् सत्त्वादीन् न हृष्टः न भजति किन्तु यावन्मोक्षं तावत्प्रारब्धमश्नन् देहं बिभृयादेव ॥ १६ ॥

ननु गृहे वसतः पुना रागाद्युत्पत्त्या संसारभयं स्यादेवेत्याशङ्क्याह । भयमित्यादिना । सहैव षट् एकं मनः पञ्चज्ञानेन्द्रियाणि च सपत्नाः शत्रवो यस्य सः ॥ १७ ॥

अत्येति जयति ॥ १८ ॥

पूर्वं भोगान् भुङ्क्ष्व पुनर्जितषट्सपत्नः विमुक्तसङ्गः त्यक्तकलत्रादिः सन्प्रकृतिं विश्वहेतुं “कारणं तु ध्येयम्” इति श्रुतेः अनेनाजितेन्द्रियत्वात्त्वयाधुना न वैराग्याधिकार इति सूचितम ॥ १९ ॥ २० ॥

भाषाटीका ।

श्रीभगवान् ब्रह्माजी बोले हे तात ! हम तुम से सत्य वचन कहते हैं अप्रमेय परमात्मा की असूया नहीं करना जिसपरमात्मा के वश हो कर हम महादेव जी तुमारे पिता यह मनुजी महर्षि नारद सबही जिनकी आज्ञा को ग्रहण करते हैं ॥ ११ ॥

कोई भी देह धारी उस परमात्मा की आज्ञा को तपस्या से या विद्यासे या योग प्रभाव से या बुद्धिसे धर्म अर्थ से दूसरे से या अपने से टाल नहीं सका है ॥ १२ ॥

हे प्रियव्रतजी ! जितना जनसमूह है सो जन्म के लिये मरने के लिये कर्म करने के लिये शोचने को मोहित होने को भ्रान्त होने को भीत होने को सुखी दुःखी होने को ईश्वर के दिये देह को प्राप्त होताहै ॥ १३ ॥

हे वत्स ! जिस परमात्मा के वचन रूप (वेद) रूपी रस्सी मे हम लोग गुण कर्मरूप छोटी डोरी मे बंधे हुये सब ईश्वर को भेट देते हैं जैसे नाक मे नथे हुये पशु मनुष्यके आधीन होकर काम करते हैं ॥ १४ ॥

सत्त्वादि गुणों के अनुसार जो जो देह ईश्वर की आज्ञा से प्राप्त होता है तिसदेह को धारण करके हम लोग वसी ईश्वर के दिये हुए सुख दुःख को भोगते हैं जैसे कि अंधों को आंख वाला जहां चाहे तहां लेजाता है तैसे हमारे भोग ईश्वर के आधीन हैं ॥ १५ ॥

जिस को जगत् का अहंकार ममकार छूटगया है वहभी अभिमान रहित होकरभी तबतक प्रारब्ध को भोग… आ देह को अवश्य धारण करेगा जैसे कि निद्रा छूटने परभी स्वप्न की स्मृति बनी रहती है केवल दूसरे देह के हेतु उस के कर्म नहीं होते हैं ॥ १६ ॥

जोपुरुष अपने कर्तव्यमे कुशल नहीं है तिसको वनमे रहने से भी भयहोगा क्योंकि काम क्रोधादिक छः शत्रु तो उसके साथही है जो मुमुक्षु है जितेन्द्रिय है विवेकी है तिस का तो गृहाश्रमभी क्या बिगाड़ कर सकता है ॥ १७ ॥

जो पुरुष छः शत्रुओं को जीतना चाहे वह घर मे रह कर उनके जीतने का यत्न करे पहिले जैसे कि किले मे रहनेवाला राजा प्रबल शत्रुओं को जीतता है इसीप्रकार घर मे रहने से कामादिशत्रु यदि क्षीण होजावें तब ज्ञानी होकर यथेष्ट विचरता रहे ॥ १८ ॥

भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत् ॥ २१ ॥

मनुरपि परेणैवं प्रतिसन्धितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामण्डलस्थितिगुप्तय आस्थाप्य स्वयमतिविषमविषयविषजलाशयाशाया उपरराम ॥ २२ ॥

इति ह वाव स जगतीपतिरीश्वरेच्छयाऽधिनिवेशितकर्माधिकारोऽखिलजगद्बन्धध्वंसनपरानुभावस्य भगवत आदिपुरुषस्याङ्घ्रियुगलानवरतध्यानानुभावेन परिरन्धितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास ॥ २३ ॥

अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम तस्यामु ह वाव आत्मजानात्मसमानशीलगुणकर्मरूपवीर्योदारान् दश भावयाम्बभूव कन्यां च यवीयसीमूर्जस्वतीं नाम ॥ २४ ॥

आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ॥ २५ ॥

एतेषां कविर्महावीरः सवन इति त्रय आसन्नूर्ध्वरेतसस्त आत्मविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥ २६ ॥

तस्मिन्नु ह वा उपशमशीलाः परमर्षयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविन्दाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥ २७ ॥

अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तमस्तामसो रैवत इति मन्वन्तराधिपतयः ॥ २८ ॥

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दण्डयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥ २९ ॥

यावदवभासयति सुरगिरिमनुपरिक्रामन् भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनन्दन् समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीय इव पतङ्गः ॥ ३० ॥

भाषाटीका ।

तुमतो पद्म नाभ भगवान् के चरण कमलरूप किले को आश्रय करके देहस्थित शत्रुओं को जीतगये हो तौभी भगवान् के दिये अधिकार भोगों को भोगो पीछे आसक्ति छोड़ कर आत्मनिष्ठ होकर विचरना ॥ १९ ॥

श्रीशुकदेव जी बोले इस प्रकार त्रिभुवन नाथ भगवान् ब्रह्मा जी के वचन को महाभागवत प्रियव्रत जीने अपने को छोटा मान कर मस्तक नवाकर बहुमानपूर्वक स्वीकार किया ॥ २० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

मनुना सन्तुष्टेनोपकल्पिता पूजा यस्य । प्रियव्रतस्य योगभ्रंशाशङ्कस्य च शिष्यनाशात्कुटिलमीक्षणं सम्भवति तत्तु नास्तीत्याह । अविषमं यथा तथा तयोरभिसमीक्षमाणयोः सतोरात्मनः समवस्थानमवाङ्मनसं वाङ्मनसयोरविषयं क्षयं निवासं जगाम । पाठान्तरे अवाग्वाचामगोचरं कथञ्चिन्मनसः क्षयं विषयमतोऽव्यवहृतं व्यवहारशून्यं ब्रह्म निवृत्तं प्रवर्तयन् । व्यवहाराद्विपश्चाः सन् व्यवहारातीतं स्वरूपं चिन्तयन्नगमदि इत्यर्थः ॥ २१ ॥

पुत्रं राज्येऽभिषिच्य वनं यास्यामीत्येवं यो मनोरथः

श्रीधरस्वामिकृतभावार्थदीपिका ।

...णा ब्रह्मणैव प्रतिसन्धितः सम्पादितो यस्य सः भावस्यानुमतेन राज्यं स्थापयित्वा निर्विषमो दुस्तरो यो विषयविषजलाशयो ...हे तस्याशा विषु प्रवृत्तिवासना भोगेच्छा वा तस्या उपरतोऽभूत् ॥ २२ ॥

यस्तूत्तं गृहे कथमरमत तत्रोक्तमुक्तमुपसंहरति । इति हवाव । इत्थमेवाहि अभिनिवेशितः प्रापितः कर्माधिकारो यस्य अखिलस्य जगतो बन्धध्वंसनः परोऽनुभावो यस्य तस्य यदङ्घ्रियुगलं तस्यानवरतं ध्यानं तदनुभावेन पारिरन्धितकषायो दग्धरागादिमल आशयो यस्य अतोऽवदातः शुद्धोऽपि महतां ब्रह्मादीनामाज्ञापालनेन मानुवर्त्तनः ॥ २३ ॥

उ इति विस्मये ह इति प्रसिद्धौ वावेति निश्चये आत्मनः समानैः शीलादिभिरुदाराम्महतो दशपुत्रान् जनयामास ॥ २४ ॥

नामाह । आग्नीध्र इध्मजिह्वो यज्ञबाहुर्महावीरो हिरण्यरेता घृतपृष्ठः सवनो मेधातिथिर्वीतिहोत्रः कविश्चेत्यग्नीनां नामानि येषां ते ॥ २५ ॥

अभंमावाह्वाल्याद्वारभ्य ॥ २६ ॥

तस्मिन्पारमहंस्याश्रमे श्रीमच्चरणारविन्दयोरविरतस्मरणेनाविगलितोऽखण्डितो यः परमो भक्तियोगस्तस्यानुभावेन विशोऽ धितान्तःकरणा प्रतीतो यो भगवांस्तस्मिन्नात्मनस्त्वंपदार्थस्य तादात्म्यमविशेषेण विशेषो देहाद्युपाधिस्तद्रहितेन प्रापुः । ॥ २७ ॥ २८ ॥

उपशमाश्रयेषु सत्सु दशकोटिभिरेकमर्बुदम् एतादृशानि वर्षाणामेकादशार्बुदानि जगतीं बुभुज इत्यन्वयः राज्ञो धर्मपालनविषयभोगप्रभावैर्भोग्यम् तत्रानायासेनैव धर्मपालनमाह । अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्मात्तेन सारेण बलेन सम्भृतौ पूर्णौ दोर्दण्डौ तयोर्युगलं तेनापीडितं आकृष्टं मौर्वीगुणस्तस्य स्तनितं टङ्कारस्तेनैव युद्धं विना विरमिता निरस्ता धर्मप्रतिपक्षा येन भोगातिशयमाह । बार्हिष्मत्याः स्वभार्याया अनुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इवात्मानं विषयासक्तमात्मानमनवबुध्यमान इव बुभुजे तत्र प्रमोद मायान्तं पतिं दृष्ट्वा हर्षस्ततः प्रसरणमभ्युत्थानादिलीला ततो ...विषयं योषित्स्वभावकृतभ्रूभङ्गाद्यनुभावप्रकाशनं ततो व्रीडया प्रमुषिताः सङ्कुचिता हासावलोकास्ततो रुचिरक्ष्वेल्यादयः परिहासवाक्यादीनि तैः ॥ २९ ॥

प्रभावातिशयमाह । यावदवसुधातलं लोकालोकपर्यन्तमवभासयति मेरुं प्रदक्षिणीकुर्वन्नादित्यस्तस्मिन्नर्द्धेनैवोपलक्षितं प्रतपति प्रकाशयत्यर्द्धेन चावच्छादयति तमसा वृणोति तदा द्वितीयः पतङ्गः सूर्य इव पर्यक्रामत् न चेदमसम्भावितम् यतो भगवदुपासनेनोपचितोऽतिपुरुषः पुरुषानतिक्रान्तः प्रभावो यस्य ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो भगवान् ब्रह्मापि मनुना स्वायम्भुवेन यथाविधि कृतपूजः प्रियव्रतस्य योगप्रधानादस्य शिष्याभावात् कुटिलमीक्षणं मेऽभवेत्यनु नास्तीत्याह । अविषममकुटिलं यथा भवति तथा ...तमीरदुर्योरपि समीक्षमाणयोः सतोरवाङ्मनसमवगं वाङ्मनसयोरविषयं वाङ्मनसे "अप्राप्य निवर्तन्ते" इत्यादिना निषधनात् समासान्तोऽच्प्रत्ययः तयोः क्षय वेद्यं "द्वि निवासगत्योः" इति गत्यर्थत्वाज्ज्ञानार्थत्वाद्वाङ्मनसविषयं न वाङ्मनसस्य गमनेन ... वांचमिलोकापेक्षया वैचित्र्य विवाभूतं विचित्रान्तराह इदमर्थः वाङ्मनसगोचरामपि लोकं प्राणिनो दृश्यन्ते यत्र चैतत्परब्रह्मस्वरूपगुणानामेवापरिच्छिन्नत्वेन वाङ्मनसयोरविषयत्वात्कारणत्वेनेत्र वाङ्मनसविषयत्वात्सत्यलोकस्यापि कार्यत्वादव्यवहितं द्विपरार्द्धावसानपर्यन्तं तत्रत्यानां जन्मजरामरणाद्यभावेन सत्यलोकमित्यादिव्यवहारविषयं तथा चोक्तं द्वितीये "यद्द्विपरार्ध्यं तदुपारमेष्ठ्यं न यत्र शोको न जरा न मृत्युर्नार्तिर्न चोद्वेगः" इत्येवं विधमात्मनः समवस्थानं निवासस्थानं सत्यलोकमगमत् ॥ २१ ॥

मनुः स्वायंभुवोऽपि परेण ब्रह्मणैवं प्रतिसन्धितः सम्पादितः मनोरथः राज्ये पुत्रमभिषिच्य वन वासरूपाभिप्रेतकर्मा मनोरथो यस्य तथाभूतः सन् सुरर्षिवरो नारदस्तस्यानुमतेनानुमत्या भावे क्तः आत्मजं पुत्रं प्रियव्रतं निखिलभूमण्डलस्याधारक्षणाय स्थापयित्वातिविषमा दुस्तरा ये विषयाः शब्दादयस्त एव विषजलाशयाः विपाकवशाद्विषवरूपं यद्गृहं तस्मिन्नाशा भोगेच्छा तत उपरतोऽभूत् ॥ २२ ॥

इति हवावेत्थं हि स जगतीपतिः प्रियव्रतः प्रथममात्मनः स्वेच्छाया अभिनिवेशितः प्रापितः कर्माधिकारः भगवदाराधनरूपकर्माधिकारः यस्य सः अखिलस्य जगतः बन्धनध्वंसनः बन्धननिवर्त्तकः अत एव उत्कृष्टः अनुभावः प्रभावो यस्य तस्य भगवतः कृत्स्नजगदुद्भवविभवलीलस्य यदङ्घ्रियुग्मं तस्य यदनच्छिन्नं ध्यानं तस्य प्रभावेण परिरन्धितकषायः दग्धरागादिमल आशयोऽन्तःकरणं यस्यात एवावदातः निर्मलोऽपि महतां ब्रह्मादीनामाज्ञापालनेन मानवर्द्धनः भूमण्डलमनुशिष्टवान् ॥ २३ ॥

अनुशासनप्रकारमेव विवक्षुस्तावद्दारपरिग्रहमपत्यानि चाह । अथेति । अथ चतुर्मुखादेशानन्तरं निवृत्तनिष्ठोऽपि प्रवृत्तोऽभूदिति विस्मयते । हेति । विश्वकर्मणा विश्वकर्मनाम्न प्रजापतेर्दुहितरं बर्हिष्मतीं नाम दुहितरमुपयेमे उदवोढ उ इति विस्मये हवावेति प्रसिद्धौ तस्यां बर्हिष्मत्यामात्मसमानैः स्वतुल्यैः शीलादिभिर्गुणैरुदारान्महतः औदार्यादीनिति पाठे आत्मसमाः शीलादयो येषामिति बहुव्रीहिः तत्र शीलं स्वभावः सद्वृत्तिश्च गुणाः शौर्यादयः कर्मव्यापारः रूपं सौन्दर्यं वीर्यं पराभिभवसामर्थ्यं शौर्यं रणमध्ये स्वगृह इव प्रवेशसामर्थ्यमौदार्यं ...एवं विधान् दशात्मजान् भावयास्वभूत उत्पादयामास तथा यवीयसीं दशानामात्मजानामनुजामूर्जस्वतीं नाम कन्यां भावयाम्बभूवेति पूर्ववदन्वयः ॥ २४ ॥

पुत्रान्निर्दिशति । आग्नीध्रेति । आग्नीध्रादीनामितरेतरयोगद्वन्द्वः सर्वेऽग्नीनां नामानि येषां तथाभूता ये तेषां दशानां पुत्राणां मध्ये कविर्महावीरः सवन इति त्रय ऊर्ध्वरेतस जितेन्द्रिया आसन् ते कव्यादयः त्रयः बाल्याद्वाल्यादारभ्यात्मविद्यायां कृतः परिचयो यैस्ते पारमहंस्ये परमहंसाः शुद्धान्तःकरणाः तेषां सर्वान्यनमाश्रममभजन् केवलं निवृत्तिधर्मपरायणा अभवन्नित्यर्थः ॥ २५ ॥ २६ ॥

तस्मिन्नुक्ते पारमहंस्याश्रमे हि वर्तमानाः उपशम इन्द्रियनिग्रह एव शीलं येषां ते अत एव परमर्षय

सकलशरीराणां निकायः समूहः स आत्मा शरीरं यस्य सकायस्याधारस्तस्येति वा मृत्युभयं संसृतिभयं तेन भीतानां शरणभूतस्य रक्षणोपायभूतस्य रक्षितुश्च भगवतो वासुदेवस्य श्रीमतोऽरणारविन्दयोर्द्वन्द्वं स्मरणं तेनाविगलितः अविच्छिन्नः अत्युत्कर्षरूपो यः परमभक्तियोगः तस्य प्रभावेण उपनयेन वा परिभाविते निरस्तरागादिके निर्मलितान्तर्मनसि यावत् यस्मिन्हृदये अनस्तमितमधिगते साक्षात्कृते सर्वेषां भूतानामात्मभूते अन्तः प्रविश्य शासनेन धारके प्रत्यगात्मनि प्रत्यग् जीवः आत्मा शरीरं यस्य तस्मिन् प्रतीचः आत्मनीति वा प्रत्यगात्मशरीरक इति वा भूतानामात्मभूते इत्यनेनैतस्य शरीरकत्वमुक्तं प्रत्यगात्मनीति जीवशरीरकत्वमेवंभूते भगवत्येव वर्तमानस्य भगवदपृथक्सिद्धविशेषणतया साक्षात्कृतस्यात्मनः स्वरूपस्याविर्भावलक्षणं तत्स्वभावतां साधर्म्यमित्यर्थः अविशेषेण जगद्व्यापारवर्जं कार्त्स्न्येन समीयुः मुक्ता बभूवुरित्यर्थः अवशिष्टाः सप्तपुत्राः पित्रधीनाः स्थिता इतिभावः ॥ २७ ॥

तथा अन्यस्यामपि भार्यायां त्रयः पुत्राः जातास्तान् तदधिकारं च निर्दिशति । उत्तम इति ॥ २८ ॥

एवमुपशमायनेषु उपशमो गुणान्तराणामप्युपलक्षणमात्मसमानशीलेति पूर्वमुक्तत्वात् सद्गुणाश्रयेषु सात्स्वित्यर्थः अथ- जगतीपतिः प्रियव्रतः अर्बुदः कोटिः अन्य तु दशकोटिमर्बुदमित्याहु. वत्सराणामेकादशार्बुदानि जगतीं बुभुज इत्यन्वयः राज्ञा धर्मपरिपालनविषयभोगप्रभावैर्भाव्यं तत्रानायासेनैव धर्मपरिपालनमाह । अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्य तेन सारेण बलेन संभृतौ पूर्णौ यौ दोर्दण्डौ तयोः युगलं तेनापीडितं आकृष्टो यो मौर्वीगुणस्तस्य स्तनितं टङ्कारस्तेनैव युद्धं विना विरमिता निरस्ता धर्मविरोधिनो येन भोगातिशयमाह । बर्हिष्मत्यां स्वभार्यायामनुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इवात एव विपर्ययत्यानवबुद्ध्यमानः स बुभुजे तत्र प्रमोदः पतिं दृष्ट्वा हर्षः ततः प्रसरणमभ्युत्थानादि लीलाः ततो योषिद्वयं योषित्स्वरूपकृतशृङ्गारादिभावप्रकाशनं ततो व्रीडया मुषिताः सङ्कोचिताः हासावलोकाः ततो रुचिरक्ष्वेलादयः मृदुतरपरिहासवाक्यादीनि तैः ॥ २९ ॥

प्रभावातिशयमाह । यावदिति । भगवानादित्यः सूर्यः सुरगिरिं मेरुमनुभ्रामन्परिक्रमन्प्रदक्षिणीकुर्वन् वसुधातलं भूमण्डलं यावदवभासयति अर्द्धेनैव प्रतपत्यर्द्धमेव प्रकाशयत्यर्धमाच्छादयति तमिस्रदिग्यानस्तमसाच्छादयति मेरोः पार्श्वान्तरगतत्वात्सम्यगपि पार्श्वान्तरं न प्रकाशयतीत्यालोच्य तद्वसुधातलार्द्धमनभिनन्दनमसमीचीनं मन्वानः रजनीमपि दिवसं करिष्यामीति यत्सूर्यगणयाता वसुधातलार्द्धं तदप्यत्रभासयामीति कृतसङ्कल्पः भगवदुपासनेनोपार्जितोऽतिपुरुषप्रभावः अमानुषप्रभावः यस्य समजवेन सूर्यसमानवेगेन तत्प्रकाशबहुलेन च रथेन द्वितीयः पतङ्ग. अपरः सूर्य इवानन्तरगतिः सप्तकृत्वः यथा तरणिर्गच्छति तथा मेरोः परितः आकाशमार्गेण मेरोर्दक्षिणस्यां दिशि सूर्योऽस्तमयते तदा स्वरथेनोत्तरस्यां यदा स उत्तरस्यां तदा स्वयं दक्षिणस्यामित्येवं सप्तचक्रायसिद्धिरित्यर्थः अथमप्यन्यः प्रभावविशेषः सूर्योऽन्तरिक्षं प्रकाशयति अयं तु भूम्यां चरणपर्यवज्ञार्चीचकारादिति ॥ ॥३० ॥

स्वाज्ञाग्रहणात्प्रियव्रताय तुष्टो विरिञ्चः सत्यलोकमापेत्याह भगवानपीति । मनुना यथावदुपकल्पितां अपचितिः पूजा यस्य सः अपचितिमिति क्रियाविशेषणम् परमविदूरस्य आत्मसमवस्थानं स्वस्थानं सत्यलोकं वाङ्मनसयोः वाचो मनसश्च स्वयं विषयीकर्तुमशक्यमव्यवहितं सतामिति शेषः रागादिदोषरहितत्वात् ॥२१॥

स्वायम्भुवमनोरपि संसारत्यागप्रकारमाह । मनुरपीति । परेण विरिञ्चेन सुरर्षिवरानुमतेन देवर्षीणां मध्ये वरः श्रेष्ठः नारदः तस्यानुमतेन गुप्तौ रक्षा अतिविषमविषय एव विषं तदेव जलाशयो हृदस्तस्मात् ॥ २२ ॥

प्रियव्रतस्य यथा विरिञ्चोपदेशं क्षितिरक्षणप्रकारं ब्रवीति । इति हेति । इतिशब्दो हेत्वर्थः यस्माद्गुरुणामनुशासनमनुल्लङ्घनीयमत इति बन्धध्वंसनपरोऽनुभावः प्रभावः सामर्थ्यं यस्य स तथा तस्य ध्यानानुभावेन ध्यानसामर्थ्येन ध्यानादुत्पन्नज्ञानेन, वा कपाटः पापं रचिताहं रञ्जितं दग्धमपि सम्भावितमिति ॥ २३ ॥

वानप्रस्थाश्रमस्थ एवायं राज्यमपालयद्विरक्तत्वान्न तु गृहाश्रमस्थ इतिशङ्कां परिहर्तुमाह । अथेति । साप्युभयकुलशुद्धिकरीत्याशयेनाह । तस्यामिति । उहवा इति निपाताः प्राक्पुत्रानुत्पत्तौ सन्तापं पश्चात्सन्तोषं तत्र प्रसिद्धिं सूचयन्ति भावयामास अभूदुत्पादयामास ॥ २४ ॥

तेषां नामान्याह । आग्नीध्रेति । यज्ञबाहोरनुजो महावीरः घृतपृष्ठानुजः सवनः वीतिहोत्रानुजः कविः ॥ २५ ॥

ऊर्ध्वरेतसां ब्रह्मचर्यव्रतधारिणः अर्भकभावाद्बाल्यात्प्रभृति आत्मविद्यायां परविद्यायां कृतपरिचयाः पूर्णाभ्यासाः एवाहंदन मानसपरमहंसाश्रमं व्यावर्तयति ॥ २६ ॥

तस्मिन्नाश्रमे वर्तमानाः स्वयोग्यगुणोपसंहारेण मुक्तिः स्यादिति दर्शयितुं सकलजीवेत्यादिगुणविशिष्टत्वं हरेरुक्तं ननु गुणानामियत्तया अविरतस्मृत्या विगलितस्य तैलधारायितस्य परमभक्तियोगस्यानुभावेन परिभाविते वशीकृतेऽन्तर्हृदयेऽधिगतं ज्ञाते आत्मभूते प्रतिबिम्बे प्रत्यगात्मनि स्वबिम्बेऽन्तर्यामिणि अविशेषेण पार्थिवदेहत्यागेन तादात्म्यं तद्रूपसाम्यमेवापुः . सर्वे चतुर्बाहव इत्यादेः भगवतीति सप्तमीनिर्देशादैक्यमत्राव्यक्तं तदधीनत्वं तत्स्वामित्वं वा तदेकचित्तत्वं वा तत्कामितकामित्वं वा विशेषेण स्वातन्त्र्यमन्तरेणेति च ॥ २७ ॥

न केवलमस्यैकैव पत्नी किन्तु द्वितीयाप्यस्ति सापि प्रयोजकपुत्रप्रसूरित्याह । अन्यस्यामपीति । इत्थं कृत्स्नमुक्तं मन्वन्तराधिपतय इति ॥ २८ ॥

स प्रियव्रतो राजा कियन्तं कालं राज्यमभुङ्क्तेति तत्कालावधिमाह । एवमिति । उपशमायनेषु संन्यस्तेषु भगवतोऽधिकनिष्ठेवायनमाश्रयो येषां ते तथा तेष्विति वा परिवत्सराणामेकादशार्बुदानि मौर्वीगुणो ज्याख्यरज्जुस्तस्य स्तनितेन विस्फूर्जितेन प्रमोदप्रसरणमानन्दप्रवाहस्तस्य पोषणं प्रवर्धनं तेन च व्रीडया च निशिप्रचयलक्षणया च प्रमुषितहास ईर्ष्यातिरस्कृतहास्यं तेन युक्तोऽवलोको यस्तेन कान्तया क्ष्वेलनर्मवागेवं पूर्वैः पराभूयमानविवेकोऽनभिभूतविवेकज्ञानस्थापनवबुध्यमान इवाननुरूपः न्यक इत्यर्थः महामना इत्युक्तेः ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तन्मन्त्रस्य विषमविषयभोगविशेष एवोक्तो न तु माहात्म्य-विशेष इत्यतस्तमाह । यावदिति । अयमादित्यो भगवान्सुरगिरिमनुक्रामन्यावदवभासयतीत्युक्तमेव विवृणोति । वसुधातलमिति । अर्धपादि प्रकाशयति पुरुषमानमतिक्रम्य वर्तमानः प्रभावो यस्य स तथा तदादित्यप्रवर्तनमात्मराज्यान्धकारकरणं समजवेन सूर्यरथसदृशवेगेन रजनीं रात्रिमपि दिनं प्रकाशवत् व्यवहारयोग्यं करिष्यामीति मत्वा तरणिमन्वादित्यस्य पृष्ठतः सप्तवारं पर्यक्रामत् मेरोः परिसरभूमिमिति शेषः पतङ्गः सूर्यः ॥३०॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अवाङ्मनसं स्वधामेति पाठे स्वयं निवासं ब्रह्मलोकमगमदित्यन्वयः । अवाङ्मनसं इत्यादिकं त्वात्मसमवस्थानमित्यस्यैव विशेषणम् । तत्र भगवत्स्वरूपस्फूर्त्तिः तत्प्रियव्रतनारदयोः प्रवर्त्तयन् अगमत् स्वं निवासम् ॥ २१ ॥

मनुरपीत्यादिवाक्येन प्रियव्रतस्य राज्यं पूर्वमिति गम्यते तथैव श्रीविष्णुपुराणेऽपि दृश्यते तथैव च तत्पुत्राणां तृतीयचतुर्थपञ्चममनुत्वमुत्तानपादवंशजस्य तु चाक्षुषस्य षष्ठमनुत्वं तद्वंशान्तिमस्य प्राचेतसस्य दक्षस्य च षष्ठमन्वन्तरे राज्यं घटते अन्यथा परिवेत्तृत्वादिकमापद्येत । न च तयोर्ज्येष्ठानुक्रमेणैव राज्यं किन्तु वंशेषु कदाचित् कस्य चित् साम्राज्यमिति वेषां मृत्यौ प्रवेशसां तपस्यायां चाराजकत्वासम्भवात् किन्तूत्तानपादस्य चिरकालेनैव सुतोत्पत्तिरिति गम्यते यत्तु चतुर्थे । "प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ । तत्पुत्रपौत्रनप्तृणामनुवृत्तं तदन्तरम्" इति तदपि तद्वंशस्य मनूनामपि तद्ग्रहणेन गृहीतत्वात् स्वारोचिषस्यापि तदन्तःपातात् यच्च श्रीपृथुं प्रति ब्रह्मवचनम् । "न बध्यो भवतामिन्द्रो यद्यज्ञो भगवत्तनुः" इति यज्ञस्येन्द्रत्वेन तद्राज्यस्य स्वायम्भुवसमकालत्वं बोधयति । अत्रापि तदादरायैव तदभेदनिर्देशो ज्ञेयः तदंशावेशेनैवान्येषामिन्द्रत्वात् शब्दार्थस्तु तत्रैव दर्शितः तत्र प्रायः प्रियव्रतादिराज्यं तृतीयमन्वन्तरावसानमुत्तानपादादिराज्यन्तु षष्ठावसानम् प्रियव्रतवंशयोस्तामसरैवतयोस्तु मनुत्वं राजत्वमतीत्य चरमावस्थायां ज्ञेयं चाक्षुषवत् तस्मात् सर्व्वमेव समञ्जसमतः कथन एव विपर्ययो ननु कथनीये । यथा दशमे कुरुक्षेत्रयात्रादौ ॥ २२ ॥

रागादिदोषराहित्येन शुक्रोऽपि महीतलमनुशशास । महतां मानवर्द्धनः सन् तत्रापि तदर्थमेवेत्यर्थः ॥ २३ ॥

अथ अतो हेतोः राज्यादनेरेव ॥ २४—२६ ॥

तादात्म्यं तत्साम्यम् ॥ २७ ॥ २८ ॥

अर्ब्बुदं कोटिपर्यायं न्यर्बुदमेवन्तु दशकोटिः । तथैव पद्मस्कन्धे बलेः स्वर्गादिजये तैर्व्याख्यातम् । तथाचामरकोषे श्रीस्वामिधृतं प्रमाणवचनम् । "एकं दशशतमहस्त्रायुतमयुतं प्रयुतमत्य लक्ष्यमथ नियुतम् । अर्ब्बुदकोटिन्यर्बुदपद्मं खर्व्वं निखर्व्वमिति दशाभिः । गुणनाम महाशङ्खमसमुद्रमध्यान्तमथ परार्द्धञ्च । खदतं अर्द्धमितं तत् स्वदतं भूयंतोऽसङ्ख्यमिति । प्रयुतलक्ष्यमिति तयोरेकपर्य्यायत्वमित्यर्थः एवमर्ब्बुदकोटिरपि भ्रमार्थैकोटिरिति मध्यपदलोपी समासः । तथा च माध्यन्दिनशाखायाम् इमा मेऽग्नय: इष्टका धेनवः सन्त्वेका दश च शतञ्च सहस्रञ्च सहस्रायुतं चायुतञ्चार्ब्बुदञ्च न्यर्ब्बुदञ्च समुद्रमध्यं चान्तश्च परार्द्धश्चेत्यादि ॥ २६ ॥

यावदिति प्रजाऽयः सुखदानकृतैव न तु स्पर्द्धयेति ज्ञेयम् । गत्यान्ते एवं कुर्व्वाणं प्रियव्रतमागत्य चतुराननस्तवाधिकारो नास्तीति निवारयामासेत्यधिकं क्वचित् ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथावदिति तत्कालदेशोचितसपर्य्यया इत्यर्थः । अत्र प्रियव्रतस्य योगभ्रंशात् नारदस्य च शिष्यगतमनोरथध्वंसात् कुटिलमीक्षया सम्भवति तत्तु नास्तीत्याह । अविषमं यथा स्यात्तथा तयोरभिसमीक्षमाणयोः सतोः आत्मनः परमात्मनः सम्यगवस्थानं स्वरूप स्वहृदि प्रवर्त्तयन् स्मरन् कीदृशं वाङ्मनसयोः प्राकृतयोरविषयं स्वयं सर्व्वनिवासस्थानत्वादाश्रयतत्त्वमित्यर्थः । पाठान्तरे अवाक् न विद्यन्ते वाचस्त्रिगुणविषया विधिनिषेधात्मिकाः श्रुतयो यत्र तथाभूतं यन्मनस्तस्य स्वयं निस्त्रैगुण्यमनोविषयमित्यर्थः अव्यवहृतं व्यवहारशून्यं यद्वा अव्यवहृतं प्रियव्रतं व्यवहारे प्रवर्त्तयन् स्वयं सत्यलोकमगमत् कीदृशान् आत्मनः स्वस्य सम्यगवस्थानं यत्र तत् प्रियव्रतं कीदृशमवाङ्मनसम आत्मारामहाभागवतत्वात् प्राकृतवाङ्मनसशून्यमित्यर्थः ॥ २१ ॥

परया ब्रह्मणैव प्रतिसन्धितः संपादितो मनोरथो यस्य सः स्थितिगुप्तये मर्य्यादापालनाय विषमविषय एव विषजलाशयः विषसमुद्रस्तत्र या आशा प्रवृत्तियास्तया तस्याः सकाशात् ॥ २२ ॥

गृहे कथमरमतेत्यस्योत्तरमाह । इति एवाच इत्थमेवेत्यर्थः । बन्धध्वंसन एव परानुभावः प्रकटप्रभावो यस्य तस्य परिरम्भितकषायो दग्धरागादिमलः आशयो यस्य सः अत एवावदातः परमशुद्धोऽपि महतां ब्रह्मादीनामाज्ञापालनेन मानमादरं वर्द्धयतीति सः ॥ २३ ॥

शीलादिभिरुदारान् भावयाम्बभूव उत्पादयामास ॥ २४ ॥ ॥ २५ ॥ २६ ॥

तस्मिन्नुह्वे पारमहंस्याश्रम एव अविगलितो निश्चलो यः परमभक्तियोगः तस्यानुभावेन प्रभावेण परिशोधितं यदन्तर्हृदयं तत्राधिगतः प्रतीतो यो भगवान् तस्मिन् आत्मनस्त्वंपदार्थस्य तादात्म्यं लयमविशेषेण विशेषो [illegible]भिकृतपृथग्भावस्तद्रूपेण ॥ २७ ॥ २८ ॥

उपशमाश्रयेषु सत्सु दशकोटिभिरेकमर्ब्बुदमिति श्रीस्वामिचरणाः अर्ब्बुदं कोटिपर्यायमिति सन्दर्भः एकादशार्ब्बुदानि परिवत्सरान् जगतीं बुभुजे इत्यन्वयः राज्ञां खलु परिवत्सरानु प्रतापविषयभोगप्रमादव्यावदयकेषु मध्ये प्रथमं तस्य प्रतापातिशयं वर्णयति । अव्याहताः अलिताः पुरुषकाराः पौरुषाणि यस्मात्तेन सारेण बलेन संभृतं पूर्णं यद्दोर्दण्डयुगलं तेन आपीडितः आकृष्टो मौर्व्यीगुणास्तस्य स्तनितं टङ्कारः तेनैव युक्तविनैव विरामिता निरस्ता धर्मप्रतिपक्षाः शत्रवो येन सः भोगातिशयं वर्णयति । वर्हिष्मत्याः स्वभार्य्याया अनुदिनमेधमानैः प्रमोदादिभिः पराभूयमानविवेक इव तत्र प्रमोद आयातं पतिं दृष्ट्वा हर्षः ततः प्रसरणमभ्युत्थानस्वाङ्गरचनाविन्यस्तस्थानान्तरगमनादि

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

ततो योषयन् योषित्स्वाभाविकधर्मोऽपाङ्गचालननासामुकोञ्चन- कर्णकण्डूयनादिस्तयं कुर्वन्। ततः पत्युरौत्सुक्य मालक्ष्य व्रीडया प्रमुषिताः सङ्कुचिता हासावलोकास्ततो रुचिराः क्ष्वेल्यादयः परिहासवाक्यादीनि तैः अत एव विषयासक्तया आत्मानमनव- बुध्यमान इव अत्र इवशब्देन तस्य विवेकज्ञानयोः संपूर्णयोरक्षुण्णा- योरपि वैषयिकलोकैर्दुर्गमत्वं व्यञ्जितं तत्र हेतुर्महामनाः विषया- सक्तिनद्भावयोर्योगपद्येन सद्भावाद्दुस्तर्कमनस्तस्य इत्यर्थः॥२९॥

प्रभावातिशयं वर्णयति। यावद्वसुधातलं लोकालोकपर्यन्त मादित्योऽवभासयति मेरुं प्रदक्षिणं कुर्वन् तत्र अर्द्धेन अर्द्धा- वर्त्तेन प्रतपति प्रकाशयतीति दिवा भवति अर्द्धेन अपरार्द्धा- वर्त्तेन आच्छादयतीति तमसा रात्रिर्भवति तदाहि प्रियव्रत- राज्याधिकारसमय इत्यर्थः। भगवदुपासनेन उपचितः अति- पुरुषः पुरुषानतिक्रान्तः प्रभावो यस्य सः तदनभिनन्दन् अर्द्धे- नाच्छादनमप्रशंसन् तरणिमनुलक्ष्यीकृत्य तरणेरस्ताचलावरो- हसमये स्वयमुदयाचलमारोहामीत्यर्थः। पतङ्गः सूर्यः पर्यक्रा- मत् परिक्रान्तवान् प्रजाभ्यः सुखदानेच्छयैव न तु सूर्यस्पर्द्धया तेन ज्येष्ठादिमासेषु प्रियव्रताख्यसूर्यस्य चन्द्रादप्यतिशीत- त्वं मार्गशीर्षादिमासेषु तु सूर्यादपि प्रातःसायङ्कालयोरौ- ष्ण्यमधिकमिति ज्ञेयम्। एतच्च प्रियव्रतस्य सौभर्यादेरिव योग- बलेनैव राजत्वसूर्यत्वे कायद्वैतेनैव ज्ञेये॥ ३०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अभिसमीहमानायाः सतां मनुना उपकल्पिता अपचितिः पूजा यस्य स अविषमं सर्वदैकरसमवाङ्मनसं वाङ्म- नसयोः कात्स्न्येनाविषयमव्यवहृतं लौकिकव्यवहारातीतम आत्मसमवस्थानमात्मनि उपासके सम्यगवस्थानं यस्य तम- न्तर्यामिणं प्रवर्त्तयन् चिन्तयन् क्षयं स्वस्थानमगमत्॥ २१॥

अतिविषमः मुमुक्षवननुरूपो यो विषयजलाशयः गृहं तस्य आशा दिक् तस्याः अपि सकाशात् सुरर्षिवरस्य योगाधीशस्य अनुमतेन उपरराम॥ २२॥

अधिनिर्वेशितः प्रवर्तितः कर्माधिकारो यस्य सः परिरन्धि- तकषायः दग्धरागादिमलः आशयोऽन्तःकरणं यस्य सः महतां ब्रह्ममन्वादीनां मानवर्द्धनः तदाज्ञापालनात्॥ २३॥ २४॥

अग्नीनां नामानि येषां ते तथा॥ २५॥ २६॥

श्रीमच्चरणारविन्दयोरविरतस्मरणेन निरन्तरध्यानेन अवि- गलितः अस्खलितो यः परो ध्रुवानुस्मृतिरूपो भक्तियोगस्त- स्यानुभावेन परिभाविते योग्यतां नीते अन्तर्हृदयेऽधिगतं अधिभूतं भगवति सर्वेषां भूतानामचेतनानामात्मभूते आश्रय- रूपे प्रत्यगात्मनि प्रतीचां चेतनानां आत्मनि आश्रये चिदचि- च्छक्तिमतीत्यर्थः आत्मनस्तादात्म्यम् अंशत्वेन भिन्नस्वरूप- स्यापि जीवात्मनः अंशिभिन्नावस्थानाभावादभिन्नत्वं सर्वे अवि- शेषेण समीयुः॥ २७॥ २८॥

उपशमायनेषु सत्सु एकदशशहस्रायुतं लक्षप्रयुतकोटीः क्रमशः अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कुस्तस्मात्। जलधि- रन्त्यं मध्यपरार्द्धमिति दशगुणोत्तरासंज्ञाः संख्याया व्यवहारार्थं पर्यांकृताः पूर्वैरिति संख्यावचनात् दशकोटिरर्बुदं भवति एवं त्रियानि परिवत्सराणामेकादशार्बुदानि जगतीपतिः बर्हिष्मत्याः अनुदिनमेधमानमनुरागेण प्रसरणमभ्युत्थानादिरूपेण परेण योष- यन्त्या योषित्स्वभावानुरूपगुणप्रकाशनेन व्रीडाप्रमुषितैः लज्जासङ्- कुचितैः हासावलोकैः रुचिरैः क्ष्वेल्यादिभिश्च पराभूयमानो विवेक इव अनवबुध्यमान इव च जगती बुभुजे कथम्भूत- प्रत्याहताः अप्रतिहताः अखिलपुरुषकाराः समग्रपौरुषाणि यस्मात्तेन सारेण बलेन सम्भूतयोः पर्यायोर्दण्डयोर्युगलेन आपीडितस्य मौर्वीगुणस्य स्तनितेन टङ्कारेणैव विरमिताः त्यक्ताः धर्मव्यापाराः धर्मप्रतिपक्षा अधार्मिका ये ते तः॥ २९॥

आदित्यः सुरगिरिमनुपरिक्रामन् यावत् वसुधातलमवभा- सयति प्रकाशयति तत्र अर्द्धेन उपलक्षितं यदा प्रतपति अवशिष्टनार्द्धेनोपलक्षितं तु अवच्छादयति दूरीभूतस्वतेजोऽभा- वेन तमसा पूरयतीत्यर्थः तदाहि तद्वसुधातलस्य अर्द्धभागं तमोऽध्यासमसमभिनन्दन् रजनीमपि दिनं करिष्यामीति बुद्ध्या- द्वितीयः पतङ्गः आदित्य इव समकृत्यः सप्तवारान् तरणिमनु- पर्यक्रामत् यतो भगवदुपासनेनोपचितः सुसमृद्धः अतिपुरुषः पुरुषानतिक्रान्तः अतिपुरुषः। तथाभूतः प्रभावो यस्य सः॥ ३०॥ ३१

भाषार्टीका।

प्रियव्रतजी का इस प्रकार सद्व्यवहार को देखने से मनुजी को बड़ा सन्तोष हुआ तब तिनने आनन्द से ब्रह्मा- जीका पूजनकिया ब्रह्माजी भी मनु के पूजन को ग्रहण- करके प्रियव्रत तथा नारदजी के सामने ही मन वचन के अगोचर जो अपना धाम सत्यलोक तहां चले गये॥ २१॥

मनुजी भी अपने मनोरथ के सिद्ध होजाने से नारद- जीकी अनुमति से सम्पूर्ण पृथिवी मण्डल की स्थिति तथा पालन के निमित्त अपने पुत्र प्रियव्रत के हस्त मे राज्य को देकर दुस्तर विषय वासना रूप जलाशय से निवृत्त हो गये॥ २२॥

यद्यपि भगवान् आदिपुरुष के चिन्तन से सब संसार का बन्धन नाश होजाता है तो प्रियव्रत भी उन भगवान् के चरणयुगल के आश्रय करने से रागादिक मलों के नष्ट होजाने से शुद्ध चित्तवाले होगये तथापि ब्रह्माजी की आज्ञा का पालन करने के निमित्त राजा होकर पृथिवी का पालन करते थे फिर विश्वकर्मा नामक प्रजापति की पुत्री बर्हिष्मती केसाथ उनने विवाह किया॥ २३॥

उसी भार्या मे उनने अपने तुल्य शीलगुण वाले रूप- वाले वीरतावाले उदार गुणवाले दश पुत्रों को एक ऊर्जस्वती नामक कन्या को उत्पन्न किया॥ २४॥

हे राजन्! प्रियव्रत के दशपुत्रों के नाम सुनो अग्नीध्र इध्मजिह्व यज्ञबाहु महावीर हिरण्यरेता घृतपृष्ठ सवन मेधातिथि वीतिहोत्र कवि अग्नि के नाम के समान के नाम है तिन के मध्य मे कवि महावीर सवन् तीनो जन ऊर्ध्वरेता हुये २५

वे सब बाल्य अवस्था से आत्मविद्या मे अभ्यास करके परमहंस आश्रम को धारण करके रहे॥ २६॥

उस आश्रम मे वे तीनो शान्त परम ऋषी होकर जो भगवान् सब जीवों के निवासभूत हैं संसार मे डरने वाले के रक्षक हैं उन भगवान् वासुदेव के चरणारविन्दको निरन्तर स्मरण करने से निश्चल परमभक्तियोग को प्रा

ये वा उह तद्रथचरणनेमिकृतपरिखातास्ते सप्त सिन्धव आसन् यत एव कृताः सप्त भुवो द्वीपाः ॥ ३१ ॥

जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञास्तेषां परिमाणं पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो यथासङ्ख्यं द्विगुणमानेन बहिः समन्तत उपक्लृप्ताः ॥ ३२ ॥

क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः सप्त द्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक्परित उपकल्पितास्तेषु जम्ब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान् यथासङ्ख्येनैकैकस्मिन्नेकमेवाधिपतिं विदधे ॥ ३३ ॥

दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद्देवयानी नाम काव्यसुता ॥ ३४ ॥

नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम्।
चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम् ॥ ३५ ॥

भाषाटीका।

होकर अपने अन्तःकरण को शुद्ध करते भये तिस से तिनके अन्तःकरणों मे सर्वभूतात्मा भगवान् का प्रकाश होने से प्रत्यगात्मा मे देहादि उपाधियों के नाश होने से दिव्य भगवत्सायुज्य को प्राप्त भये ॥ २७ ॥

प्रियव्रतजी की दूसरी एक भार्या मे उत्तम तामस रैवत नाम के तीन पुत्र भये वे तीनो मन्वतर के अधिपति भये ॥ २८ ॥

वे तीनो पुत्र शांति के आश्रय करने वाले भये तब बड़े उत्साह वाले प्रियव्रत जीने पृथिवी के पति ग्यारा अर्बुद वर्ष पर्यन्त पृथिवी का भोग किया उनके भुजा दोनो अतिशय बलसे परिपूर्ण हैं तिस से धनुष के गुणको आकर्षण करके ध्वनि करते थे तब युद्धके विना भी उस शब्द को सुन कर अधर्मी लोग दूर होजाते थे उनका विषय भोग भी बहुत था अपनी प्रिया बर्हिष्मती के साथ प्रतिदिन बढने वाले आनन्द क्रीडा को करते थे हास्यपरिहासादिकों से विज्ञान विवेक सब छिपगयेथे तिस से आत्म तत्त्वको भूलगये ॥ २९ ॥

सुमेरु की परिक्रमा करते हुये भगवान् सूर्यनारायण जहां चलते थे तहां अंधेरा से उजाला होता था आधे मे अंधेरा रहता था तिससे असन्तुष्ट होकर प्रियव्रतजीने प्रतिज्ञा किया कि हम अपने प्रभाव से रातको भी दिन कर देंगे इस विचार से सूर्य सरीके तेजवाले रथको लेकर दूसरे सूर्य सरीके सात वखत सूर्य के पीछे घूमे जैसा दूसरा सूर्य हो तिस प्रकार से ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ये वै उह अतिप्रसिद्धास्तस्य रथचक्राग्रकृताः परिखाता गर्ताः। यतो यैरेव कृताः ॥ ३१ ॥

तानाह। जम्ब्विति। तेषां परिमाणं श्रोतव्यतिशेषः पूर्वस्य यद्विस्तारमानमुत्तरस्ततो द्विगुणेन विस्तारमानेनेत्येवं सिन्धुभ्यो बहिः समन्तत उपक्लृप्ता रचिताः ॥ ३२ ॥

यथा सिन्धुभ्यो बहिरेकैकशो द्वीपा एवं द्वीपानामपि बहिः सिन्धव इत्याह। क्षारोदेति। दधिमण्डो मथितं दधि एते सप्त जलधयः सप्तद्वीपानां परिखा इवाभ्यन्तरे तैः समं-

स्थिता ये द्वीपास्तैः समाना विस्तारतः बहिर्नान्तः पृथगसङ्कीर्णतया ॥ ३३ ॥ ३४ ॥

अहो आश्चर्यं राज्ञः सामर्थ्यमिति परीक्षिदभिप्रायको भगवान्बादरायणिराह। नैवमिति। जिताः षड्गुणाः इन्द्रियाणि षड्वर्गो वा यैस्तेषामेवंविधः पुरुषकार इति न चित्रं नामस्वाधितम यतो विदूरविगतोऽन्त्यजोऽपि यस्योरुक्रमस्य नाम सकृदुच्चारयेत् सोऽधुना तत्क्षणमेव बन्धं संसारं तत्त्यजति पाठोऽप्ययमर्थः पाठान्तरे तत्त्वं चाण्डालत्वम् जहाति शुद्धो भवतीत्यर्थः ॥ ३५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

प्रभावान्तरमप्याह। य इति। ये हि सप्त तस्य प्रियव्रतस्य यद्रथचक्रं तस्य नेमिना कृताः परितो गर्तास्त एव सप्त सिन्धवः सप्तसमुद्रा आसन् यतः यैरेव सिन्धुभिः कृताः सप्तसंख्यकाः भुवो द्वीपाः केऽमी द्वीपा के वा सप्त सिन्धव इति विविदिषायां तावत् द्वीपान्निर्दिशति। जम्ब्विति। तेषां द्वीपानां परिमाणं श्रोतव्यमिति कथयामीति वा शेषः पूर्वस्मात् लक्षयोजनादिपरिमाणविशिष्टाज्जम्ब्वादिपूर्वपूर्वात्तद्द्वीपादुत्तरोत्तरः प्लक्षादिद्वीपः यथासंख्येन द्विगुणेन द्विलक्षण परिमाणेनेत्येवं बहिः पूर्वपूर्वद्वीपाद्बहिः परित उप[illegible]ताः कल्पिताः ॥ ३१ ॥ ३२ ॥

अथ सिन्धूंश्च निर्दिशंस्तेषां परिमाणं चाह। क्षारोदेति। दधिमण्डो मथितं दधि एते सप्त सिन्धवः सप्तद्वीपानां परिखा इव दृश्यन्ते अभ्यन्तरद्वीपसमानाश्चाभ्यन्तरद्वीपास्तत्समुद्रवेष्टिता द्वीपास्तेस्तत्परिखावद्वर्तमानाः समानपरिमाणाः सप्तद्वीपेषु यथापूर्वमेकैकशः बहिर्नान्तःपृथगसङ्कीर्णमुपकल्पिता इत्यर्थः अयमर्थः प्रथमं जम्बूद्वीपो लक्षयोजनविस्तारस्तत्परिखाभूतः क्षारोदोऽपि लक्षयोजनविस्तारः (१) ततः प्लक्षद्वीपो हि लक्षयोजनविस्तारः तत्परिखाभूतेक्षुरसोदश्च द्विलक्षयोजनविस्तारः तत शाल्मलिश्चतुर्लक्षयोजनः सुरोदोऽपि चतुर्लक्ष इत्यादिना तत्तत्परिमाणो द्विगुणपरिमाणेन वेष्टितेन समपरिमाणात् कथमतद्वृत्यतं विस्तारमात्रेऽपि दैर्घ्याधिक्यानुपपत्तिः तेषु जम्ब्वादिषु द्वीपेषु बर्हिष्मतीपतिः प्रियव्रतः अनुवर्तिन आग्नीध्रादिसंज्ञकान् सप्तात्मजानेकैकस्मिन् द्वीपे जम्ब्वादौ यथासंख्येन ज्येष्ठादिक्रमेण एकमेकमेवाधिपतिं विदधे च सुतां ऊर्जस्वतीं नाम,

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दुहितरमूर्जस्वतीं शुक्राय प्रादात् यस्यामूर्जस्वत्यां काव्यस्योशनसः सुता देवयानी नाम कन्यका आसीदुत्पन्नाभूत् ॥ ३३ ॥ ३४ ॥

एवमतिमानुषप्रियव्रतप्रभावं श्रुतवतो राज्ञस्तत्प्रभावविषयासम्भावनामाशङ्क्य न केवलमुक्त एव तस्य प्रभावः किन्त्वन्येऽपि सन्तीति सर्वस्मादन्यविधविचित्रशक्तिं भगवन्तं सर्वात्मनोपासीनानां ऐकान्तिकभक्तानां प्रभावो नासम्भावनीय इत्याह । नैवमिति । उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानां पुरुषकारः पुरुषव्यापार एवंविध उक्तविधः चित्रमसम्भावनीय इति न किन्तूक्तविधा अन्येऽपि प्रभावाः सम्भाव्यन्ते एवेति भावः तत्र हेतुः । उरुक्रमस्य त्रिलोकीं पदत्रयेणाक्रान्तवतो विचित्रशक्तेर्भगवतः पुंसां भक्तानां तस्योरुक्रमस्याङ्घ्रिरजसा जिताः षड्गुणाः अशनायापिपासाशोकमोहजरामृत्यवो येस्तेषामिति त्रिलोक्याक्रमणादिरूपातिनरसाधारणप्रभावशीलं भगवच्चरणारविन्दमुपासीनानामतिनरसाधारणप्रभावसम्भावना न कार्येति द्योतनायोरुक्रमस्य तदङ्घ्रिरजसेत्युक्तं किं वक्तव्यं तच्चरणप्रभावोऽतिनरसाधारण इति यतस्तन्नामप्रभावो न वाङ्मनसगोचर इत्याह । विदूरविगतः सत्पथादपेतः अन्ये तु विदूरविगतः दूरतः परित्याज्योऽन्त्यज इति व्याचक्षते यस्य भगवतो नामधेयं सकृदप्यवशेनाभिदध्यात् स विदूरविगतः अधुना तत्क्षणमेव बन्धं संसारं विजहाति मुक्तो भवतीत्यर्थः एवं सामान्येन नामस्मरणस्य मुक्तिसाधनत्वप्रतिपादकमेवंविधं वचनजातमन्तिमस्मरणस्य मुक्तिसाधनत्वपरं द्रष्टव्यं "जन्मलाभः परं पुंसामन्ते नारायणस्मृतिः नामानि येऽसुविगमे विवशा गृणन्ति तेनेकजन्मशमलं सहसैव हित्वा संयान्ति" इतिवचनान्तरानुरोधात् अन्यथा "तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते" इति वेदनातिरिक्तोपायान्तरनिषेधश्रुतिविरोधापत्तेः अन्तिमस्मरणं तु वेदनरूपतामापन्नं तत्साधनं भवतीति न विरोधः ननु वेदनं हि नाम ज्ञानकर्मयोगानुगृहीता दृढदृढतराभ्यासाधेयातिशयमाप्रयाणादनुवर्तमानमसकृदावृत्तिकं विजातीयप्रत्ययान्तराव्यवहितं प्रत्यक्षतापन्नं प्रीतिरूपात्मकं ज्ञानं तत्कथमन्तिमनामस्मरणमात्रमुक्तविधवेदनात्मतामापन्नं भवतीति उच्यते नोक्ताकारा अपि वेदनशब्दवाच्याः किन्तु परमात्मविषयं स्मरणात्मकं ज्ञानमेवान्तिमप्रत्ययरूपं तत्र प्रबलप्रतिबन्धानभ्यासविच्छेदव्यामङ्गा[illegible]षो ऽपेक्षादिभिरन्तकाले कथङ्कारमाभूदित्यसम्भवपरिहारोपायतया ज्ञानकर्मयोगानुग्रहादय[illegible]काराः उपासनप्रकरणेषु कीर्तिताः तत्र भगवत्प्रसादवशाज्जायमानस्वविषयस्मरणात्मकज्ञानस्य नोक्ताकारा अपेक्षिता अत एव हि रागद्वेषभयाद्यात्मकमपि भगवद्विषयमन्तिमं ज्ञानं मुक्तिसाधनमिति वक्ष्यति गोप्यः कामाद्भयात्कंस इति ॥ ३५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अदृश्यमानं तल्लक्षणं किन्तादिति तत्राह । ये वा इहेति । अत्र वा इत्यादिनिपाताः अस्य ग्रन्थस्य वेदतुल्यत्वद्योतनाय अत एव संहितायामिति प्रत्यक्षागममुक्तिरिति इह भूतले तस्य प्रियव्रतस्य रथवरस्य रथचक्रस्य नेमयः प्रान्तधाराताभिः कृताः परिखा दीर्घिकाः ताः सप्तपरिखाः सप्तसिन्धव आसन्नित्यन्वयः वा इत्यनेन समुद्राणां पूर्वसद्भावप्रसिद्धिं ध्वनयति अयं तु तेषां स्थौल्यं कृतवानिति तदुक्तम् ।

पूर्वसृष्टान् रथावृत्त्या स्थूलीचक्रे प्रियव्रतः ।
समुद्रांस्तेन तत्कर्तृत्वमाहुर्नं प्रियव्रतम् ।

इति यतो येभ्यः समुद्रेभ्यः सीमाभूतेभ्य एव भुवः सप्त द्वीपाः कृताः यद्वा एवशब्दः प्रधानभूताः सप्तवान्येऽवान्तरद्वीपा बहवः सन्तीति विशेषद्योतनार्थः ते सिन्धवः सप्तेति शेषः ॥ ३१ ॥

तेषां नामान्याह । जम्बूप्लक्षेत्यादिना । तेषां द्वीपानां परिमाणं शृणु वदतीति शेषः किमित्यत उक्तं पूर्वस्मादिति पूर्वस्मात्पूर्वस्मादुत्तरोत्तर इत्यान्तरादान्तरात् बाह्योबाह्य इत्यन्तर्बहिर्भावेन वर्तमानाः द्वीपा यथासंख्यं द्विगुणेन बहिः समन्तत उपक्लृप्ताः ॥ ३२ ॥

सिन्धुनामान्याह । लवणेति । अभ्यन्तरद्वीपसमानी इति जम्बूद्वीपसमानो लवणोदधिः प्लक्षद्वीपसमान इक्षुरसोदधिरित्येव संख्येयं तत्रारीजकत्वे तत्रत्यानां जनानां मिथो विवादेन विनाशः स्यादिति कृत्वाग्नीध्रादि मम पुत्रांस्तत्पतीञ्चक्रे इत्याह । तेष्विति ॥ ३३ ॥

परिग्रहदाने सुतानां मिथो विवादः स्यादिति कृत्वा कन्यादानमपि स्वयमेव चक्रे इत्याह । दुहितरमिति । "उशना शुक्रः काव्य" इति हलायुधः तत्पुत्र्यपि राजकुलवृद्धिकरीति भावेन तत्सुतामाह । यस्यामिति ॥ ३४ ॥

एषां विक्रमस्योरुक्रमविक्रमसम्बन्धित्वान्मुमुक्षुणा श्रवणादिनावश्यमभ्यसनीय इति भावेनाभिप्रैति । नैवंविध इति । हरेः पुंसां भक्तानामेवंविधः पुरुषकारो माहात्म्यविशेषोऽत्यद्भुतं न भवतीति कुत इति तत्राह । तदङ्घ्रिरजसेति । निषेवितेनेति शेषः षड्गुणाः कामादयो आरामादयो वा अशनादयो वा मनसा सह शब्दादयो वा येरेते जितास्ते तथोक्ताः इतोऽपि चित्रमित्याह । विदूरेति । विप्रविपक्षतया विदूरः शूद्रस्तस्मादपि विगतश्चण्डालः यस्य हरेर्नारायणादि नामधेयं सकृदाददीत सोऽधुना सद्य एव संसारलक्षणं बन्धं जहाति त्यजतीत्यन्वयः । तस्योरुक्रमस्येति । यद्वा विदूरविगतः दूराद्दूरकृतो दोषनिमित्ताद्बहिष्कृतोऽपि बन्धं दोषलक्षणमिति ॥ ३५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ये वै इति । रथोऽयमेकचक्रत्वादिच्छा परिमाणश्च ज्ञेयः ॥ ३१ ॥

मतो बहिर्बहिर्मण्डलस्याधिक्यात्तादृशतादिच्छया समुद्राणामुत्तरोत्तराधिक्यम् ॥ ३२ ॥

बहिर्बहिर्गमनं चान्तचान्तरावकाशनाशाशङ्कया ज्ञेयम् ॥ ३३ ॥ ३४—३८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ये वै उह अति प्रसिद्धास्तस्य रथचक्राग्रकृताः परिखाता गर्ता अत्र समुद्राणां सप्तसङ्ख्यत्वात्तथा अपि सप्तैव स्वयोगबलकल्पिता एकचक्राः सूर्यरथावत्युच्चतराः मण्डलावृत्तिगत्या भ्राम्यमाणा ज्ञेयाः तत्र च बहिर्बहिर्मण्डलानामधिकप्रमाणत्वात्तथा अपि क्रमेणाधिकप्रमाणा अभूवन् इति सन्दर्भ सदीयो दूरस्थोऽपि रथ आर्यावर्तगतमहीयराजधानीस्थप्रजानां दृष्टिगोचरी भवत्विति इच्छया पूर्वपूर्वरथादिगुणोच्चताविशालताक उत्तरोत्तरो रथः कृत इत्यन्ये प्राहुः ।

स एवमपरिमितबलपराक्रम एकदा तु देवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानं मन्यमान आत्मनिर्वेद इदमाह ॥ ३६ ॥

अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिन्द्रियैरविद्यारचितविषमविषयान्धकूपे तदलमलममुष्या वनिताया विनोदमृगं मां धिग्धिगिति गर्हयाञ्चकार ॥ ३७ ॥

परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः पुत्रेभ्य इमां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सह महाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतहरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवानुससार ॥ ३८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एव रथचक्राग्राणामधिकाधिकप्रमाणत्वात्तत्परिखाताः समुद्रा अप्यधिकप्रमाणा दृश्यन्ते तेषु चोत्तरोत्तराधिकप्रमाणेषु सप्तसु रथेषु मध्ये पञ्चविंशत्या दिनैः सार्द्धपञ्चचत्वारिंशद्घटिकाधिकैकरथस्यारोहणमेवं सूर्य्यस्येव दक्षिणायनस्योपक्रममारभ्य प्रियव्रतस्योत्तरदेशतो दक्षिणदेशगमनं पौषपर्य्यन्तं पुनरुत्तरायणस्योपक्रममारभ्य परिसमाप्तिपर्य्यन्तं तावत्सङ्ख्यकदिनैर्व्युत्क्रमेण पुनरपि तत्तद्रथारोहणम् । एवं दक्षिणदेशात उत्तरदेशागमनमाषाढपर्य्यन्तं किन्तु स्वगत्या मेरुं वामावर्त्तेनैव परिक्रामयतोऽपि सूर्य्यस्य ज्योतिश्चक्राधीनैरेव प्रदक्षिणीकृत्य क्रमेण शीघ्रगमनैर्दक्षिणायने दिनानि मासि मासि ह्रसन्ति उत्तरायणे तु क्रमेण मन्दगमनैर्दिनानि वर्द्धन्ते प्रियव्रतस्य तु सूर्य्यकृतरात्रिलोपार्थं स्वेच्छयैव मेरुं प्रदक्षिणीकृत्य परिक्रामतः स्वेच्छयैव मन्दीकृतैर्गमनैरुत्तरायणे दिनानि वर्द्धन्ते दक्षिणायने तु स्वेच्छाधीनया शीघ्र गत्या दिनानि ह्रसन्तीति ज्ञेयं रथानां योगप्रभावत्वाद्यथा समयं प्राकट्याप्राकट्ये च ज्ञेये तेषां सप्तसङ्ख्यत्वेनैव सप्तकृत्व इति पूर्वमुक्तं ज्ञेयं व्याख्येयं सप्तदिनानन्तरं प्रियव्रतस्य स्वयं निवृत्त्यनौचित्यादन्येन केनाप्यनिवर्त्तनश्रवणाच्च नासमञ्जसा यतो येभ्यः सिन्धुभ्य एव हेतुभ्यः ॥ ३१ ॥

परिमाणं श्रृणिवति शेषः । द्विगुणविस्तारमानेन एकैकस्मात् सिन्धोर्बहिः समन्ततः चतसृष्वेव दिक्षु ॥ ३२ ॥

यथैवैकैकशः सिन्धोर्बहिरेकैकोद्वीपस्तथैकैकस्माद्द्वीपाद्बहिरेकैकः सिन्धुरित्याह । क्षारोदेति । दधिमण्डोमथितं दधि अभ्यन्तरे वर्त्तमाना ये द्वीपास्तैः समाना विस्तारे । एव एकैकशोनेति एकस्मादेकस्माद्बहिरेकैकः सिन्धुरित्येवं सप्तस्वपि द्वीपेषु यथानुपूर्व्यमानुपूर्व्येण पृथगसङ्कीर्णतया बहिर्बहिरेव नान्तः ॥ ३३—३४ ॥

एवं विधः पुरुषकारः पौरुषः प्रभावो न चित्रं तदङ्घ्रिरजसेति । रजसापि यैर्दुर्जयानि षडिन्द्रियाणि जीयन्ते इति विरोधः यतो विदूरविगतोऽन्त्यजोऽपि अधुना नामोच्चारणक्षण एव बन्धं तन्वं तत्त्वमिति त्रय एव स्वामिसम्मताः पाठास्तत्र बन्धं कर्म्मबन्धं तन्वं तनुं तत्क्षण एव तनुत्यागादर्शनात् तन्वारम्भकं कर्म्मेति प्रारब्धकर्मैव उक्तः तत्त्वं महदादिपृथिव्यन्तं स्थूलसूक्ष्मदेहादित्यर्थः तदापि तद्देहस्थितिर्नाम एवाचिन्त्यप्रभावत्वादिति ज्ञेयं गत्यन्तराभावात् ॥ ३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेषां द्वीपानां परिमाणं वदामीति शेषः पूर्वस्मात् पूर्वस्माल्लक्षयोजनपरिमाणकजम्ब्वादेः उत्तरोत्तरः प्लक्षादिर्यथासङ्ख्यं द्विगुणमानेन येभ्यः इत्येवं समन्ततः जम्बुवादिभूतक्षारोदादिभ्यो बहिरुपक्लृप्ताः रचिताः ॥ ३२ ॥

एवं जम्ब्वादिभ्यो बहिः विस्तारतो जम्ब्वादिसमानाः क्षारोदादयः रचिता इत्याह । क्षारोदेति । अभ्यन्तरद्वीपसमानाः स्वस्वावृतद्वीपसमानाः सप्तस्वपि द्वीपेषु बहिः परितः पृथक् न खाहिकुण्डलानीवोपकल्पिता इत्यर्थः ॥ ३३ ॥ ३४ ॥

एवंविधः पुरुषकारः पौरुषं चित्रमद्भुतं न भवति एतदेव कैमुतिकन्यायेन दृढीकरोति विदूरं विगतः परित्याज्योऽन्त्यजोऽपि सकृदप्याददीत यः स बन्धं संसारमधुनैव शीघ्रमेव जहाति त्यजति मुक्तो भवति ॥ ३५ ॥

भाषाटीका।

प्रियव्रत के रथके चक्रों के चलने से जो सात गढ़ेल भये वेई सात समुद्र होगये जिनसे सात द्वीप कल्पित भये ॥ ३१ ॥

जम्बू प्लक्ष शाल्मली कुश क्रौंच शाक पुष्कर इन द्वीपों के नाम हैं उनका परिमाण एकसे एक बाहिर का द्विगुण बड़ा है चारों ओरसे ॥ ३२ ॥

खारा जल ईखका रस मदिरा घृत दूध दधि भात का मांड़ शुद्ध जल एसे सात समुद्र हैं सो सातों द्वीपों में बर्हिष्मती के पति प्रियव्रत जी ने अपने आज्ञाकारी सात पुत्रों को क्रमसे राजा किया उनके नाम आग्नीध्र इध्मजिह्व यज्ञबाहु हिरण्यरेता घृतपृष्ठ मेधातिथि वीतिहोत्र ॥ ३३ ॥

उर्जस्वती नामक पुत्री को शुक्राचार्य को दिया जिसमें शुक्राचार्य की पुत्री देवयानी हुई ॥ ३४ ॥

उत्पत्त्यादि लीला करने वाले उरुक्रम भगवान् के चरण के रजसे सब विषयों को जीतने वाले महापुरुषों को यह कुछ आश्चर्य नहीं है क्योंकि जिन भगवान् के नाम लेने से नीच योनि वाले भी एक बखत में भी संसार बन्ध को छोड़ देते हैं ॥ ३५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य पराक्रममुपसंहरन्निवृत्तिक्रममाह । स एवमिति । देवर्षिचरणयोरनुशयनमुपसत्तिस्तदनुपतितो यो गुणविसर्गो

तस्य ह वा एते श्लोकाः ।

प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम् ।
यो नेमिनिम्नैरकरोच्छायां घ्नन्सप्त वारिधीन् ॥ ३९ ॥
भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः ।
सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः ॥ ४० ॥
भौमं दिव्यं मानुषं च महित्वं कर्मयोगजम् ।
यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे प्रियव्रतविजये पारमहंस्यां संहितायां वैयासिक्यां प्रथमोऽध्यायः ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

राज्यादिप्रपञ्चस्तत्संसर्गेण आत्मनि मनसि निर्वेदो यस्य ॥ ३६ ॥

तमाह । मयाऽसाध्वनुष्ठितम् यद्यतोऽभिनिवेशितः तस्ततः अलमलं विषयैः विनोदमृगं मर्कटम् ॥ ३७ ॥

परदेवताया हरेः प्रसादेनाधिगतः प्राप्तो य आत्मप्रत्यवमर्शो विवेकस्तेन नारदस्य पदवीं तदुपदिष्टमार्गमेव पुनरनुससारेत्यन्वयः । किं कृत्वा । अनुगतेभ्यः पुत्रेभ्य इमां पृथ्वीं विभज्य भुक्ता भोगा यस्यास्तां भार्यां महाविभूतिः साम्राज्यसम्पत्तत्सहितां महिषीं मृतशरीरमिव परित्यज्य तत्र हेतुः हृदि निहितो निर्वेदो येन हृदीत्यस्योत्तरत्राप्यन्वयः हृदि गृहीतो निश्चितो हरिविहारस्तेनानुभावस्त्यागसामर्थ्यं यस्य ॥ ३८ ॥

तस्य महिमोपनिबन्धनश्लोकाः पूर्वसिद्धाः कथ्यन्ते यथा वेदे तदप्येष श्लोको भवतीति को नु को नाम कुर्याच्छायां घ्नन् तमां निरस्यन् ॥ ३९ ॥

भूसंस्थानं द्वीपैः कृतम् । सरिद्गिरिवनादिभिः सीमा च येन कृता भूतानां निर्वृत्यै सुखायाविवादाय ॥ ४० ॥

भौमं पातालजं दिव्यं स्वर्गजं मानुषं मर्त्यलोकजं महित्वं वैभवं यो निरयतुल्यं मेने पुरुषानुजना विष्णुभक्तास्त एव प्रिया यस्य सः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् ।
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदप्युक्तं कथंचिदन्तरायविहताः स्वां शिवतमां पदवीं न प्रायेण हिन्वन्तीति तत्प्रियव्रतदृष्टान्तेन स्पष्टयितुं तस्य तावन्निर्वेदं वदति । स इति । एवमपारो बलपराक्रमो यस्य सः प्रियव्रतः देवर्षेर्नारदस्य चरणयोरनुशयः सेवा तदनुपश्चात्पतितः प्राप्तः गुणविसर्गसंसर्गः प्रकृतिमार्गसम्बन्धस्तेन स्वात्मानमनिर्वृतमसुखिनमिव मन्यमानः इवशब्देन तद्ग्रामभोगानां दुर्लभत्वं तेषु तस्य निरयौपम्यं च सूच्यते तथाचोक्तं "एतं वै निरयास्तात स्थानस्य परमात्मन इति । वासुदेवे मनो यस्य जपहोमार्चनादिषु । तस्यान्तरायो मैत्रेय: देवेन्द्रत्वादिकं फलम्" इति अत एवात्मनि मनसि निर्वेदः परितापो यस्य स इदं वक्ष्यमाणमाह ॥ ३६ ॥

अहो इति निर्वेदद्योतको निपातः मयाऽसाध्वसमीचीनमनुष्ठितमाचरितं किन्तदसाध्वनुष्ठितं तत्राह । अहं प्रथमं केवलं निवृत्तिधर्मपरोऽहमिन्द्रियैः प्रमाथिभिरविद्या रचिता प्रकृतिपरिणामरूपा अज्ञानमूलया भोग्यतमबुद्ध्या रचिताः सम्पादिताः विषयाः परिणामविषोपमाः हेया ये विषयाः शब्दादयस्त एवान्धकूपः तृणावृतकूपः तस्मिन्नभिनिवेशितः पातित इति धृतस्ततः अलमलं विषयानुभवेन अमुष्या वनिताया बर्हिष्मत्या विनोदमृगं क्रीडामृगं मां धिग्धिगिति निन्दयामास आत्मानं निन्दितवान् ॥ ३७ ॥

ततः परदेवतायाः भगवतः प्रसादेन "नह्यभिक्रमनाशोऽस्ति प्रत्यवायो न । विद्यते स्वल्पमपि" इत्याद्युक्तप्रकारेण महाप्रभाववशीलोपक्रान्तिमानिवृत्तिधर्माराधितभगवत्प्रसादेनाधिगतं प्राप्तमात्मनः स्वात्मनः परमात्मनश्च यत्प्रत्यवमर्शनं यथावस्थितस्वरूपचिन्तनं तेन परिनिर्वृतः निरस्ततापत्रयः नितरां सुखितः अनुगतेभ्यः स्वानुवर्तिभ्यः पुत्रेभ्यः इमां सप्तद्वीपात्मिकां भूमिं यथादायं यथा योग्यं भागं विभज्य गह्वा दायं पितृक्रमागतं यथावद्विभज्याग्नीध्रादिप्रतिपुत्रं जम्ब्वादिप्रतिद्वीपं विभज्येत्यर्थः भुक्ता भोगा यस्यास्तां पञ्चम्यैव बहुव्रीहिः महिषीं भार्यां बर्हिष्मतीं मृतकमिव शवमिव मन्यमान इतिशेषः महाविभूतिं महदैश्वर्यमपहाय महाविभूत्या सहितां महिषीं मृतकामिवापहायेति वा स्वयमुपदेशमन्तरेणैव विहितः कृतः निर्वेदः परितापो यस्य हृदगृहीताः परिशीलिताः हरेर्भगवतः विहाराणां प्रभावाः यस्य सः भगवतो नारदस्य पदवीं पुनरप्यनुससार गन्धमादनद्रोण्यां श्रीनारदमेव सेवमानः सिद्धिं गत इत्यर्थः ॥ ३८ ॥

तस्य प्रियव्रतस्यैते श्लोकाः तन्महिमोपनिबन्धने पूर्वप्रसिद्धा

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्र श्लोकाः कथ्यन्ते यथा वेदे तद्व्येष श्लोको भवतीति के ते श्लोकाः तत्राह । प्रियव्रतेति । प्रियव्रतेन कृतं कर्म ईश्वरं विनान्यः को नाम कुर्यात् यः प्रियव्रतः छायां तमः प्रमृजिष्यन् रथनेमिभिर्निम्नैरेव सप्त वारिधीन् समुद्रानकरोत् ॥ ३९ ॥

येन प्रियव्रतेन भूसंस्थानं द्वीपैर्भुवः संस्थानमवयवविन्यासः कृतं तथा द्वीपे द्वीपे भूतनिर्वृत्यै भूतानां कृत्यै सुखाय वा सरिदादिभिः विभागशः असङ्कुरेण सीमा च कृता ॥ ४० ॥

यः भौमं पातालजं दिव्यं स्वर्गजं मानुषं मृत्युलोकजं सुखं योगरूपकर्मजमणिमादिसिद्धिरूपं महित्वं माहात्म्यं योगस्य मनोव्यापाररूपत्वेन कर्मत्वव्यपदेशः ।

वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ।
शरीरजैः कर्मदोषैर्यातिस्थावरतां नरः ।

इति मनुनापि मानसैः कर्मदोषैरिति मनोव्यापारे कर्मशब्दः प्रयुक्तः निरयौपम्यं नरकसदृशं चक्रे मनुसंहितवान् "एते वै निरयास्तात स्थानस्य परमात्मन" इत्यादिवचनार्थोऽत्रानुसन्धेयः निरयौपम्यकृतौ कारणमाह । पुरुषस्य परमपुरुषस्यानुजना अनुचरा भक्ता एव प्रिया यस्य सः तेषां हि प्रिय इति वा ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीं पूर्वानुवादपूर्वकं वैराग्येण [१] तस्य संसारानन्त्यप्रकारं कथयति । स एवमिति । अनुपतितो यदृच्छया प्राप्तो गुणविसर्गः ।

सन्धिं च विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संशयं च षड्गुणान् कवयो विदुः ।

इत्यादि गुणप्रयोगो गुणकार्यविषयप्रपञ्चो वा तस्य संसर्गेण सम्बन्धेन प्राप्तनिर्वेदः प्राप्तवैराग्यः ॥ ३६ ॥

किमाहेत्यत्राह । अहो इति । विनोदमृगम् ॥ ३७ ॥

तस्य संसारविरक्त्या सन्न्यासप्रकारं वक्ति । परदेवतेति । परदेवता नारायणः तस्य प्रसादेनाधिगतम् प्राप्तमात्मप्रत्यवमर्शनं प्राप्तपरमात्मज्ञानं तेन परिनिर्वृतो नष्टलब्धचिन्तामणिरिव परमानन्दमाप्तः यथादायं यो योग्यः पितृधनस्य तस्य तथा मृतकं शवमिव महती विभूतिर्यस्याः सा तथा तां नारदस्य पदवीं निवृत्तिमार्गः सन्न्यासलक्षणः ताम् ॥ ३८ ॥

प्रियव्रतचरितश्रवणस्मरणादेरनायासेन मुक्तिसाधनत्वाभित्यजयाय श्लोकरूपेण संक्षिप्य तच्चरितं कीर्तयति । तस्येति । रथचक्रनेमिकृतनिम्नैः छायां रात्रिकृताम् ॥ ३९ ॥

भूसंस्थानं भुवोऽ (२) वयवविशेषनामभूतनिर्वृत्यै प्राणिनां सुखाय ॥ ४० ॥

महित्वं माहात्म्यं योगकर्मजं योगसामर्थ्यजातं निरयौपम्यं निरयसुखसमम् ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

रथस्याकाशमार्गेणैव तन्मण्डलगामित्वं ज्ञेयम् ॥ ३९—४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
प्रथमोऽध्यायः समाप्तः ॥ १

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

भोगप्रभावमुपसंहरंस्तस्य वैराग्यप्रभावमाह । स एवमिति । देवर्षिचरणयोरनुशयनानि गुरुत्वेन दण्डवत्प्रणामास्तानुपतित एव गुणविसर्गो राज्यादिप्रपञ्चस्तत्संसर्गेण अनिर्वृतमिवेति यद्यपि राज्येऽप्यनासक्तत्वेनान्तर्निर्वृत्तिरासीत्तदपीत्यर्थः ॥ ३६ ॥

विनोदमृगं मर्कटम् ॥ ३७ ॥

परदेवताया हरेः प्रसादेनाधिगतः प्राप्तो य आत्मप्रत्यवमर्शो विवेकस्तेन नारदस्य पदवीं तदुपदिष्टमार्गमेव पुनरनुससारेत्यन्वयः किं कृत्वा अनुप्रवृत्तेभ्यः अनुगतेभ्यः । इत्यादि हृदि गृहीतो यो हरेर्विहारो लीला विलासस्तेनानुभावा अश्रुपुलकादयो यस्य सः ॥ ३८ ॥

श्लोकाः पूर्वेमिश्रा एव कथ्यन्ते छायां रात्रिम् ॥ ३९ ॥

भुवः संस्थानं द्वीपैः कृतं सरिदादिभिः सीमा च भूतानां जनपदग्रामाद्यधिपतीनां निर्वृत्यै निर्विवादसुखाय ॥ ४० ॥

भौमं पातालजं दिव्यं स्वर्गजं मानुषं मर्त्यलोकजं महित्वं वैभवम् ॥ ४१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं महदाज्ञया प्रवृत्तिमार्गं प्रविष्टस्य कर्माङ्गयुक्त्याथ स प्रवृत्तिमार्गान्निवृत्तोऽभूदिति वक्तुमाह । स इति । देवर्षिचरणयोरनुशयनमनुवर्तित्वं तदनुपतितो यो गुणविसर्गः गुणानां प्रारब्धकर्मफलानां विसर्गो विस्तारः साम्राज्याद्यैश्वर्यं तस्य[illegible]त्मनि मनसि निर्वेदो यस्य सः अनिर्वृत्तमिव सतिताद्यासक्तमिव अनिर्भिन्नमिति पाठोऽप्युक्त नामेव ॥ ३६ ॥

असाध्वनुष्ठितं मया निरोधः यत्र यस्मिन् अविद्यया अचेतनया भगवच्छक्त्या रचितं विषमा मुमुक्षुजनानर्हा धिषणा यस्मिन् तत्तथाभूतं गृहं तदेवान्धकूपस्तस्मिन् प्रवेशितः तस्य गृहेण अलं पर्याप्तम् किञ्च वनितायाः विनोदमृगं क्रीडामर्कटं मां धिग् धिगित्यात्मानं गर्हयाञ्चकार ॥ ३७ ॥

परदेवताप्रसादात्प्राप्तेन आत्मावधारणेन नारदस्य स्वगुरोः पदवीं निवृत्तिमार्गं पुनरनुससार कथम्भूतः हृदि गृहीतो यो हरेर्विहारस्तेनानुभावः सर्वपरित्यागपूर्वकहरिप्राप्तिगर्वं यस्य स अत एव हृदि निहितनिर्वेदः ॥ ३८ ॥

---

[१] प्रियव्रतस्य ।

[२] सीमाभावे परस्परविवादेन दुःखमेव स्यादिति ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पूर्वगीता इति शेषः छायां रात्रिरूपां घ्नन् निरस्यन् ॥ ३९ ॥

येन भूसंस्थानं द्वीपविभागरूपं सरिदाद्रिभिः द्वीपे द्वीपे सीमा च भूतसुखाय कृता ॥ ४० ॥

यः पुरुषानुजनाः वैष्णवाः प्रिया यस्य स भौमं भूविवरस्थं नामसं मानुषं राजसं दिव्यं सात्त्विकम् योगजमणिमादिरूपं महित्वं वैभवं कर्म च तत्तत्साधनं काम्यलक्षणम् एतत्साध्यं साधनं च सर्वं निरयोपम्यं चक्रे तस्य माहात्म्यं किमन्यद्वर्ण्यते इति भावः ॥ ४१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
प्रथमाध्यायार्थप्रकाशः ॥ १ ॥

———

भाषाटीका।

इस प्रकार के बड़े पराक्रम वाले प्रियव्रत जी एक दिन श्री नारदजी के चरण कमल के शरणागति के होने से पीछे माया जो राज्यादि प्रपञ्च तिसके संसर्ग से अपने आत्मा को बहुत असन्तुष्ट मानकर विरक्त चित्त होकर इस वचन को बोलने लगे ॥ ३६ ॥

अहो यह बड़ा आश्चर्य हुआ जो कि विवेकी होकर मैंने अच्छा नहीं किया जोकि शरीर के अभिनिवेश से इन्द्रिय भोगों के हेतु अज्ञान रचित विषम विषय रूप अन्धे कुवा में गिरगया हूं सो अब नहीं करूंगा मेरे को धिक्कार है जो कि मैं इस स्त्री का क्रीडामृग होगया हूं इस प्रकार अपना निन्दा किया ॥ ३७ ॥

पर देवता परमात्मा के प्रसाद से आत्मज्ञान के प्राप्त होने से अपने अनुवर्तन करने वाले उन पुत्रों को यथायोग्य इस पृथिवी का भाग देकर भोगी हुई रानी को मरीसी छोड़कर स्वयं महाविभूति को छोड़कर हृदय में वैराग्य को धारण करके भगवान् के विहार के प्रभाव को स्मरण करके फिर भगवान् नारदजी के मार्ग को ग्रहण करलिया ॥ ३८ ॥

उन प्रियव्रतजी के ये श्लोक हैं प्रियव्रत के किये कर्मों को ईश्वर विना दूसरा कौन करेगा जिनने कि अँधेरे के नाश करने के लिये रथचक्र के खातों से सात समुद्र बनादिये ॥ ३९ ॥

जिनने सब प्राणियों के सुखके लिये सब द्वीपों में विभाग से पर्वत नदी वनादिकों से पृथिवी का विभाग करदिया ॥ ४० ॥

जिनने भगवद्भक्तों के प्रिय होकर स्वर्ग मर्त्य पाताल के कर्मानुष्ठान से भये भोगोंको नरक के तुल्य करके छोड़दिया ॥ ४१ ॥

इति श्रीमद्भागवतपञ्चमस्कन्ध प्रथमअध्याय का
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ १ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे प्रथमोऽध्यायः समाप्तः ॥ १ ॥



॥ द्वितीयोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

एवं पितरि संप्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जम्बूद्वीपौकसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगोपायत् ॥ १ ॥

स च कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवन्तं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्व्याराधयाम्बभूव ॥ २ ॥

तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्वचित्तिं नामाप्सरसमभियापयामास ॥ ३ ॥

सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहङ्गममिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारण्डवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ॥ ४ ॥

तस्याः सुललितगमनपदविन्यासगतिविलासायाश्चानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये प्रोक्तमाग्नीध्रचरितं स्त्रैणमानसम् ।
पत्न्यां हि पूर्वचित्त्यां यो नाभिमुख्यानजीजनत् ॥ १ ॥
अस्मिन्वंशे प्रसिद्धोऽयमाग्नीध्रः स्त्रैणपुङ्गवः ।
विहसन्निव तस्येदं चरितं मुनिरब्रवीत् ॥ २ ॥

जम्बूद्वीपमोको यासां ताः प्रजाः पुत्रवत्पालयामास धर्मावेक्षमाणः धर्ममवेक्षमाणो धर्मगोप्त्यर्थः ॥ १ ॥

पितृलोककामः पुत्रकामः सुरवराणां वनितास्तासामाक्रीडाचलो मन्दरस्तस्य द्रोण्यामाभृतानि सम्पादितानि परिचर्योपकरणानि पुष्पादीनि येन ॥ २ ॥

तदुपलभ्य ज्ञात्वा अभियापयामास सम्भोगार्थं प्रस्थापयामास ॥ ३ ॥

सा च तदाश्रमोपवनमुपबभ्रामेत्यन्वयः [illegible] विशिनष्टि । विविधाश्च निबिडाश्च ये विटपिनस्तेषां विटपाः [illegible] निकरास्तैः संश्लिष्टाः पुरटलताः [illegible] स्थलविहङ्गा मयूरादयस्तेषां मिथुनैः प्रोच्यमानाः श्रुतिमिथुनमार्गाः षड्जादिस्वरैः प्रतिबोध्यमाना ये [illegible] विचित्रं [illegible] तथोपकूजिता [illegible] अमला [illegible] जलाशयाः [illegible] तेषामाकरमुपवनम् ॥ ४ ॥

सुललिते गमने ये पदविन्यासास्तेषां गतौ विलासो यस्याः तस्याः [illegible] [illegible] अनुपदं [illegible] [illegible] कुर्वतो रुचिरस्य [illegible] स्वनमाकर्ण्य नयने एव नलिनमुकुले तयोर्युगलमीषद्विकचय्य किञ्चिदुन्मील्य व्यचष्ट ददर्श ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं आग्नीध्रप्रियव्रतचरित्रा [illegible] तत्पुत्राणां चरित्रं विवक्षुस्तावदाग्नीध्रचरित्रमाह । एवमिति । एवमुक्तविधज्ञानपूर्वकं पितरि प्रियव्रते संवृत्ते मुक्ते सति तस्य प्रियव्रतस्यानुशासने मनुपूर्वैः शास्त्रैर्विविच्य [illegible] वर्तने तदुपादेयहिताहितविवेके वर्तमानः आग्नीध्रः धर्ममवेक्षमाणः धर्मसञ्चयमेव कर्तुमुद्यतः जम्बूद्वीप ओकः स्थानं यासां ताः प्रजा औरसवत्स्वपुत्रवत् परितः सर्वतः सर्वेभ्य उपद्रवेभ्योऽगोपायद्ररक्षत् जम्बूद्वीपस्य स्वभागस्थाज्जम्बूद्वीपौकस इत्युक्तम् ॥ १ ॥

सः आग्नीध्रः कदाचित्पितृलोककामः सन्तानार्थं पितृलोकस्य सन्तानतया प्राप्यत्वात्पितृलोककाम इत्युक्तम् पितृलोकप्रापकसन्तानार्थीत्यर्थः "पितरो हि प्रजया पितृभ्य इति श्रुत्यर्थान्या सन्तानाय कृतयत्नः प्राप्यन्ते सुराणां वनिताः ना[illegible] [illegible] मन्दरः [illegible] ततो अचलपदेन [illegible] तेन सुरवनितापदेन [illegible] द्रोण्यामाहृतानि सम्पादितानि परिचर्योपकरणानि पूजासाधनानि पुष्पादीनि येन [illegible] चित्तैकाग्र्यरूपेण तपसा विश्वसृजां पतिं ब्रह्माणमाराधयाम्बभूव ॥ २ ॥

तदाराधनमुपलभ्य ज्ञात्वा भगवानादिपुरुषो ब्रह्मा स्वसदसि गायन्तीं [illegible] पूर्वचित्तिं नाम पूर्वचित्त्याख्यामप्सरसमभियापयामास [illegible] प्रस्थापितवान् सन्तानार्थमप्सरसः प्रेषणं न तु तपोविघ्नार्थम् ॥ ३ ॥

सा च पूर्वचित्तिस्तस्याग्नीध्रस्याश्रमे यदुपवनं तदुपबभ्राम समीपे चचार आश्रमोपवनं विशिनष्टि । अतिरमणीयं [illegible] प्रपञ्चयति । विविधाश्च निबिडाः सान्द्राश्च ये विटपिन्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वृक्षास्तेषां विटपाः शाखास्तेषां निकराः समूहास्तैः संश्लिष्टाः पुरटलताः स्वर्णवर्णवल्लयस्तास्वारूढाः स्थिता विहङ्गमाः मयूरादयस्तेषां मिथुनैः स्त्रीपुंसद्वन्द्वैः प्रोच्यमानाभिः उच्चार्यमाणाभिः श्रुतिभिः षड्जादिस्वरैः करणभूतैः प्रबोध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा भवति तथोपकूजिता नादिता अमला जलाशयास्तेषु कमलानि पङ्कजानि तेषामाकरमुपवनम् ॥ ४ ॥

तस्या इति सुललिते गमने सुन्दरगतौ ये पदविन्यासास्तैर्गतिविलासा यस्यास्तस्याः पूर्वचित्त्याः क्वणक्वणेति ध्वनिं कुर्वतो रुचिरस्य चरणाभरणस्य स्वनं ध्वनिमुपाकर्ण्य श्रुत्वा नरदेवस्य प्रियव्रतस्य कुमारः आग्नीध्रः समाधियोगेन आमीलिते नयने एव नलिनमुकुले तयोर्युगलमीषद्विकचय्य किञ्चिदुन्मील्य व्यचष्ट ददर्श ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीमद्भक्तं परिहरतः पुंसः करतलस्थैव मुक्तिरित्यभिप्रेत्य तस्यापरिहारार्थत्वं प्रतिपाद्यतेऽस्मिन्नध्याये तत्रादावाग्नीध्रस्य राज्यलक्षणप्रकारमाह । एवमिति । औरसवदात्मपुत्रवत्पर्यगोपायदरक्षत् गुपू रक्षणे ॥ १ ॥

विश्वसृजां पतिं ब्रह्माणं पितृलोककाम इत्यनेन सन्तानार्थित्वं लक्षयति "सोऽयं मनुष्यलोकः पुत्रेण जेय" इतिश्रुतेः सुपुत्रेण पितुः पितृलोकप्राप्तिश्रवणात् आक्रीडः क्रीडास्थानमात्मनोऽन्तःकरणस्यैकाग्र्यं यस्मिंस्तत्तथा तेनात्मैकाग्र्यविषयेण वा ॥ २ ॥

अभियापयामास प्रेषयामास ॥ ३ ॥

अतिरमणीया विविधाश्च निबिडाश्च सङ्कुचिताश्च विटपिनो वृक्षास्तेषां विटपाः शाखास्तेषां निकटपुटेषु समीपभागेषु या लतास्तासां कुटिलेषु वक्रभागेषु रूढा आरूढाश्च स्थलविहङ्गमाः मयूरकोकिलादयस्तेषां मिथुनैः प्लाव्यमाना श्रुतिः धनुर्मण्डलमात्रप्रदेशव्यापिनी ध्वनिस्तन्ततिर्येषां तानि तथा तैः प्रबोध्यमानैः प्रतिनादोन्मुखीकरणायेति शेषः जलकुक्कुटादिभिर्विचित्रं यथा तथोपकूजिते निर्मलजलाशये रूढः कमलाकरो यस्मिन् तत्तथा ॥ ४ ॥

सुललितो ललितपदविन्यासः कोमलपदविक्षेपो यया सा ललितपदविन्यासा च गतिर्गमनं तस्या विलासेन शृङ्गारलक्षणशोभयानुपदं प्रतिचरणविक्षेपं क्वणक्वणायमाने मिश्रितध्वनिविशेषं कुर्वाणे रुचिरे शोभने चरणाभरणे नूपुरे ये तयोर्ध्वनिमाकर्ण्य स राजकुमारः समाधियोगेन निमित्तेनामीलितौ नयननलिनमुकुलौ यौ तयोर्युगलमीषदल्पं विकचय्य विकासं कृत्वा आचष्ट अद्राक्षीत् ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पितृलोककाम इति तस्य स्त्रिया वन्ध्यात्वं गम्यते ॥ १—११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्वितीये तपसा प्राप्य पूर्वचित्तिमजिह्मपत् ॥
आग्नीध्रो निजराज्यत्वं पुत्रांश्चास्यामजीजनत् ।

धर्म एव अवेक्षणं यस्य सः ॥ १ ॥

पितृलोककामः पुत्रकामः विश्वसृजां पतिं ब्रह्माणम् आभृतानि संपादितानि परिचर्योपकरणानि पुष्पादीनि येन सः ॥ २-३ ॥

सा च तदाश्रमोपवनमुपवभ्रामेत्यन्वयः विविधाश्च निबिडाश्च ये विटपिनस्तेषु विटपाः स्कन्धाः यासां तासु निकटस्थपुरटलतासु आरूढाः स्थलविहङ्गाः कोकिलादयस्तेषां मिथुनैः प्रोच्यमानाभिः श्रुतिभिरुच्चार्यमाणैः पञ्चमादिस्वरैः प्रतिबुध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा स्यात्तथा उपकूजिता नादिता अमला जलाशया वाप्यादयः कमलाकराः कासाराश्च यस्मिंस्तत् ॥ ४ ॥

तस्यां सुललिते गमने ये पदयोर्विन्यासास्तैरेव गतिश्चेष्टा विलासश्च सर्वाङ्गगतो यस्याः ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्वितीये प्रियव्रतपुत्रस्य आग्नीध्रस्य भार्यालाभोऽपत्योद्भवश्च वर्ण्यते । एवमिति । संप्रवृत्ते प्रजापालनाभिवृत्ते सति आग्नीध्रः धर्मावेक्षमाणः राज्ञां प्रजापालनमेव धर्म इत्येवं धर्ममवेक्षमाणः जम्बूद्वीपमोको वासस्थानं यासां ताः प्रजाः औरसवत्पुत्रवत् पितेः क्षुत्तृड्भ्यो वृत्तिदानेन शत्रुभ्यो रक्षणेन च अगोपायत् अरक्षत् ॥ १ ॥

स आग्नीध्रः पितृलोककामः पुत्रेण लोकान् जयतीति पितृलोकजयार्थे पुत्रमभिलषन्नित्यर्थः आभृतानि संभृतानि परिचर्योपकरणानि पूजासाधनानि येन सः ॥ २ ॥

आदिदेवः विश्वसृड्भ्यः पूर्वो ब्रह्मा तदाराधनमुपलभ्य ज्ञात्वा अभियापयामास पुत्रोत्पादनार्थं प्रस्थापयामास ॥ ३ ॥

सा च पूर्वचित्तिः तदाश्रमोपवनमुपवभ्राम कथम्भूतम् अतिरमणीयम् तद्रमणीयत्वं प्रपञ्चयति । विविधनिबिडविटपिनां बहुजातिसघनद्रुमाणां विटपनिकरैः स्कन्धसमूहैः संश्लिष्टासु पुरटलतासु स्वर्णवल्लीषु आरूढानां स्थलविहङ्गानां मयूरादीनां मिथुनैः स्त्रीपुरुषद्वन्द्वैः प्रोच्यमानाभिः श्रुतिभिः षड्जर्षभादिस्वरैः प्रतिबोध्यमाना ये सलिलकुक्कुटादयस्तैर्विचित्रं यथा भवति तथोपकूजितेषु नादितेषु अमलजलाशयेषु यानि कमलानि तेषामाकरमालयम् ॥ ४ ॥

नरदेवस्य कुमारः अनेनाहढसमाधित्वे हेतुरुक्तः आमीलिते नयने एवमुकुले तद्युगलमीषत् किञ्चिद्विकचय्योन्मील्य तस्या अनुपदं प्रतिपदम् क्वणक्वणायमानस्य रुचिरचरणाभरणस्य स्वनमुपाकर्ण्य व्यचष्ट ददर्श तामिति शेषः कथम्भूतां सुललिते गमने ये पदविन्यासास्तैर्गतिर्विलासो यस्याः ॥ ५ ॥

भाषाटीका

श्रीशुकदेवजी बोले पिता प्रियव्रतके इस प्रकार भजनमें प्रवृत्त होने पर उनकी आज्ञा मे वर्तमान आग्नीध्रजी

तामेवाविदूरे मधुकरीमिव सुमनस उपजिघ्रन्तीं दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारव्रीडाविनयावलोकसुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरं निजमुखविगलितामृतासवसहासभाषणामोदमदान्धमधुकरनिकरोपरोधेन द्रुतपदविन्यासेन वल्गुस्पन्दनस्तनकलशकबरभाररशनां देवीं तदवलोकनेन विवृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदिति होवाच ॥६॥

का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायाऽसि कापि भगवत्परदेवतायाः ।
विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किम्वा मृगान्मृगयसे विपिने प्रमत्तान् ॥७॥
बाणाविमौ भगवतः शतपत्रपत्रौ शान्तावपुङ्खरुचिरावतितिग्मदन्तौ ।
कस्मै युयुङ्क्षसि वने विचरन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु ॥ ८ ॥
शिष्या इमे भगवतः परितः पठन्ति गायन्ति साम सरहस्यमजस्रमीशम् ।
युष्मच्छिखाविलुलिताः सुमनोऽभिवृष्टीः सर्वे भजन्त्यृषिगणा इव वेदशाखाः ॥ ९ ॥
वाचं परं चरणपञ्जरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम् ।
लब्धा कदम्बरुचिरङ्कविटङ्कबिम्बे यस्यामलातपरिधिः क्व च वल्कलं ते ॥१०॥

भाषाटीका ।

धर्मकी अपेक्षा करते हुये सब प्रजाओंकी रक्षा पुत्र सरीकी करते थे ॥ १ ॥

सो आग्नीध्र किसी समय मे पितृलोक की कामना करके देवताओं की स्त्रियोंके क्रीडाका स्थान जो मन्दराचल पर्वत तिसकी कन्दरामे जाकर पुष्पादि पूजाकी सामग्री का जोडकर एकाग्र चित्तसे तपस्वी होकर प्रजापतियों के पति ब्रह्माजी का पूजन करने लगे ॥ २ ॥

उस बातको जानकर आदिपुरुष भगवान् ब्रह्माजीने अपनी सभामे गान करती हुई पूर्वचित्ती नामकी अप्सराको भेजदिया ॥ ३ ॥

सो अप्सरा उस आश्रमके उपवनमे जाकर अतिरमणीय स्थान देखा नाना प्रकार के सघन वृक्षों के मूल मे लगी हुई जो सुवर्ण की लताओं मे चढे जो स्थलके पक्षियों के जोडे तिनके उच्चारण किये जो गान्धारादि शब्द तिनसे चेतन होते हैं जलके मुरगा कारंडव कलहंसादि पक्षि तिनके नाना प्रकारके शब्दोंसे युक्त सरोवरवाला जो वन तिसमे वह अप्सरा विचरती रही ॥ ४ ॥

उसके सुन्दर ललित चालसे जो पगनकी धरण तथा गतिके विलास तिसके साथ खण खण शब्द करने वाला जो मनोहर चरण के आभरणका शब्द तिसको सुनकर राजपुत्र आग्नीध्रने समाधि योगमे जो किंचित मन्द दोनो नेत्रकमल तिनको कुछ थोडा खोलकर उसकी ओर देखा ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तामेव देवीं मकरध्वजस्य वशमुपनीतः सन् जडवदिति वक्ष्यमाणम् वचः श्लोकानुवाच आख्यानुकरणां च भेदग्रहेण तद्धीकारार्थम् दिविजानां देवानां मनुजानां च यानि मनांसि नयनानि च तेषामाह्लाददुघैर्गत्यादिभिर्नृणां मनांसि कामस्य विवरं प्रवेशद्वारं विदधतीं गतिश्च विहारश्च क्रीडाविनययुक्ता ऽवलोकश्च सुस्वराक्षराणि चावयवाश्च तैराद्यन्तैः निजमुखाद्विगलितममृतमिव स्वादु आसव इव मादकं च यत्सहासं भाषणं तस्मिन्नामोदो निःश्वासगन्धस्तेन मदान्धा ये मधुकरनिकरास्तैरुपरोध आवरणं तेन भयाद्द्रुतः शीघ्रो यः पदविन्यासस्तेन वल्गु स्पन्दनं किञ्चिच्चलनं स्तनकलशयोः कबरभारे रशनायां यस्यास्तां तस्या अवलोकनेन विवृतावसरस्य दत्तावकाशस्य ॥ ६ ॥

का त्वं शैले गिरावस्मिन्किं चिकीर्षसि मुनिवर्येत्यादि पुंस्त्वेन सम्बोधनादि आख्यानुकरणार्थम् । हे मुनिवर्य ! नूनं भगवतः परदेवताभूतस्य मायाऽसि भ्रूचापावलक्ष्याह । हे सुहृत्तमत्रे विज्ये निर्गुणे धनुषी बिभर्षि किमात्मनोऽर्थे तवैवान्यं किं कार्यमस्ति किं वा प्रमत्तानजितेन्द्रियान्मृगान्नुत्यानस्मदादीन्मृगयसे वश्यीकर्तुं धनुषी धारयसीत्यर्थः ॥ ७ ॥

कटाक्षावालक्ष्याह । बाणाविमौ शतपत्रे नेत्रकमले ते एव पत्राणि पिच्छानि ययोः शान्तौ निःप्रभेण मन्थरौ पुङ्खाभ्यां विनापि रुचिरौ पक्ष्मतया कल्पितनेत्रयोः पश्चाद्भागस्य पुङ्खस्थानीयस्याभावात् । अतितिग्मौ तीक्ष्णौ दन्ताग्रभागौ ययोः तौ कस्मै प्रयोक्तुमिच्छसीति न विद्मः अतो भयात्त्वां प्रार्थयामहे तवायं विक्रमोऽस्माकं क्षेमायास्तु ॥ ८ ॥

तदङ्गपरिमललोभेनानुगच्छतो भ्रमरानालक्ष्याह । शिष्या इति । अजस्रं सन्ततं युष्मच्छिखाभ्यो विलुलिता विगलिताः सुमनसः ताभिर्वृष्टीर्गलितानि कुसुमानि भजन्तीत्यर्थः शुद्धत्वेनोपमा वेदशाखा इवेति ॥ ९ ॥

नूपुरध्वनिमाकर्ण्याह । वाचमिति । तुभ्यं तव चरणावेव पञ्जरं तत्रस्थानां तित्तिरीणामदृश्यमानानां परं केवलं वाचं शृणुम कदम्बभूतामरूपा अदृश्यवक्तृका मुखरा अति प्रकटा च तां च न पीतं परिधानवस्त्रं नितम्बकान्त्यैव प्रकल्प्याह । कदम्बकुसु

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्य रुचिर्दीप्तिरङ्कुर्निरङ्कुविम्बं नितम्बस्य सुन्दरमण्डले क लब्धा पाठान्तरे अङ्कोति सम्बोधनम् मेखलामालक्ष्याह । यस्यामेखलातटपरिधिर्वर्तते यत्र नितम्बकान्तित्वेन प्रकल्प्य वस्त्रमदृष्ट्वेव पृच्छति । क च ते वल्कलामिति ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तामेव देवीमस्मरमं तदवलोकनेन विवृतान्तस्मरस्य प्रस्तावकाशस्य भगवतो मकरध्वजस्य मन्मथस्य वशमुपनीतः प्राप्तः जडवत्स्त्रीणामनभिज्ञ इव इति वक्ष्यमाणश्लोकानुवाचेत्यन्वयः आढ्यानुकरणं वैदग्ध्येन तद्वशीकरणार्थं तदभिप्रायज्ञापनार्थं देवीं विज्ञापयति । अविदूरे समीपे मधुकरीं भ्रमरीमिव सुमनसं पुष्पमुपाजिघ्रन्तीं गन्धमुपाददतीं द्विजजातीनां मनुजानां च यानि मनांसि नयनानि च तेषामाह्लादकृद्भिः सुखकरैर्गत्यादिभिः नृणां मनांसि कामस्य विवरं प्रवेशद्वारं विदधतीं गतिश्च क्रीडाविलासाभ्यां युक्तोऽवलोकश्च सुस्वरागयन्त्रणाश्च वाचयव्याश्च तेषामादयन्तैर्निजमुखाद्विगलितममृतमिव स्वादु आसवमिव मादक यस्मात्सं सम्भाषणं तस्मिन्नामोदो निश्वासगन्धस्तेन मदान्धा ये मधुकराणां निकरास्तैरुपरोध आवरणं तेन भयाद्द्रुतं शीघ्रं यः पदविन्यासस्तेन वल्गु सुन्दरं किञ्चित्चलनं स्तनयोः कचरभारं रशनायां यस्यास्ताम् ॥ ६ ॥

तद्वचनमेवाह । का त्वमिति । हे मुनिवर्य ! पुंस्त्वेन सम्बोधनं जात्यानुकरणं का त्वं कस्मात्रातीया शैले गिरौ अस्मिन् किञ्चिकीर्षसि कर्तुमिच्छसि नूनं भगवतः परदेवताख्यस्य मायासीति कृत्स्नां उक्तिमालक्ष्य भगवन्मायात्वेन निरूपयति । अथ भ्रूचापद्वयवाम् प्रत्यक्षमालक्ष्य धनुरादित्वेन रूपयति तत्र भ्रूचापलक्ष्याह । विज्ये निर्गुणे धनुषी बिभर्षि किं सुहृदः मादृशस्य आत्मनो वा अर्थं प्रयोजनाय आश्यां किं कार्यमस्ति किञ्चाप्रमत्तान् जितेन्द्रियान् मृगान् मृगतुल्यानस्मदादीन् मृगयसे कान् विजेतुं किं धनुषी धारयसीत्यर्थः ॥ ७ ॥

कटाक्षावालक्ष्य तद्विवक्षया प्राह । बाणाविमौ । शतपत्रे नेत्रकमले ते एव पत्राणि पिच्छानि ययोः शान्तौ विभ्रमेण मन्थरगतपुङ्खरुचिरौ पुङ्खाभ्यां विनापि रुचिरौ सुन्दरौ पश्यतया [illegible] परागमस्य पुङ्खस्थानीयस्याभावादपुङ्खरुचिराविरपुङ्खनिरिनिरतौ [illegible] यद्वा शतपत्रपत्रौ इति [illegible] वने [illegible] ॥ ८ ॥

[illegible] तद्विवक्षयाह । शिष्या [illegible] शिष्या [illegible] तत्र गुरुचनोपमा [illegible] ॥ ९ ॥

नूपुरादिचरणाभरणस्वनमाकर्ण्य तद्विवक्षयाह । वार्चीमिति । तुभ्यं तव विभक्तिव्यत्यय आर्षः पञ्जराकारत्वात्तीयचरणालङ्कारान्तर्गतानां तित्तिरीणामिति चरणाभरणस्वनविवक्षया तित्तिरिशब्दः पक्षिरूक्जात्यापत्त्युत्तवद्ध्वनिप्रतिवचनः स चाभेदोपात्तसमीराणरः तेषां वाच परं केवलं शृणुमः कथंभूतामरूपमुत्तरामदृश्यमानवक्तृकां मुखरीमुखरितां यद्वा चरणपञ्जरतित्तिरीणामिति नूपुरादिचरणाभरणविवक्षेव अस्मिन्पक्षे अरूपमुत्तरामित्यस्यानभिव्यक्तवर्णध्वन्यात्मिकामनोज्ञामित्यर्थः हे ब्रह्मन् ! नितम्बं परिधानवस्त्र नितम्बकान्तित्वेन प्रकल्प्याह । कदम्बकुसुमस्य रुचिर्दीप्तिरङ्कुविटङ्कुविम्बं अङ्कुयाश्च विटङ्कविम्बयोः सुन्दरनितम्बयोश्च तयोः समाहारः प्रायकुत्वादेकवद्भावः तस्मिन् क लब्धा पाठान्तरे अङ्कोति सम्बोधनं नितम्बमण्डले कदम्बरुचिः क लब्धेत्यर्थः मेखलामालक्ष्याह । यस्यां कदम्बरुच्यामेखलातटपरिधिः वर्तते अलातः साङ्गारकाष्ठं तद्भ्रमणनिमित्तेन वलयाकाररेखाकृतिमापन्नोऽग्निपरिधिः वस्त्रं नितम्बकान्तित्वेन परिकल्प्य वस्त्रमदृष्ट्वेव पृच्छति । क च ते वल्कलामिति । जात्यानुकरणनिमित्त ऋषित्वव्यपदेशाभिप्रायेण वल्कलशब्दप्रयोगः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततः किं तत्राह । तामिति । एवशब्देनान्यदर्शनं निवारयति अन्यदर्शनाभावे निमित्तमाह । अविदूर इति । सुमनसः पुष्पाणि द्विजजातीनां मनोनयनानामाह्लादं दुहन्तीति मनोनयनाह्लादकृद्भिर्गतिश्च विहारश्चाविनयश्च विलोकनं च सुस्वरावर्णाश्च वाचयवाश्च ते तथा तैः कुसुमायुधस्य कामस्य विवरमवकाशमद॥

निजमुखाद्विगलितः स्रुतः मदजनकासवः तस्यामोदाघ्रातेन मदेनान्धा मधुकरनिकारा ये तैरुत्पन्नेन उपरोधेन निवारणक्लेशेन द्रुतपदविन्यासेन वल्गु शोभनं स्पन्दनमीषच्चलनं येषां स्तनकलशादीनां ते तथा वल्गु स्पन्दनाः स्तनकलशादयो यस्याः सा तथा तां पूर्वचित्तरवलोकनेन बुद्धिभ्रंशविशेषोऽनेन प्राप्त इत्याह । तैरिति । भगवतः योनिलक्षणप्रशस्तस्थानगतस्य सर्वजनसम्भावयस्य वा मकरध्वजस्य कामस्य जडवद्वस्तुविचारपरिज्ञानशून्य इव इति वक्ष्यमाणप्रकारेण इवशब्देन "प्रभवति [illegible] मनांसि विवेको विदुषामपि शास्त्रसम्भवस्तावत् । प्रपतन्ति दृष्टिविशिखा यावन्नेन्दीवराक्षीणाम्" इत्यादिप्रसिद्धिं दर्शयति जडत्वमेव दर्शयति । का त्वमिति । मुनिवर्येति पुंलिङ्गेन सम्बोध्य का त्वमिति स्त्रीलिङ्गेन प्रश्न इत्यादिविवेकाभावे लिङ्गं शैले [illegible] कर्तुमिच्छसि परदेवतायाः मायासि किं तत्रापि [illegible] विज्ये मौर्वीरहिते धनुषी [illegible] सुहृदामात्मनोऽर्थे सुहृदामनो वशीकरणाय कस्य [illegible] पालनप्रयोजननिमित्ते वा बिभर्षि अर्थान्तरमाह । [illegible] भ्रूयुगलधनुर्भ्यां मृगान्मृगयसे किम्वेत्य[illegible] ॥ ७ ॥

बाणौ नयनलक्षणौ शतपत्रपत्रौ पद्मदलसदृशपक्षयुतौ शान्तौ [illegible] अपुङ्खरुचिरौ पुङ्खं विना शोभमानौ अतिनिम्नदृशौ अनिमिषकटाक्षलक्षणौ एवं विधौ कस्मै पुंसे युयुक्षसि प्रयोक्तुमिच्छसि ॥ ८ ॥

हस्तचारणलक्षणादिशायोग्यत्वाच्छिष्या इति भृङ्गा युष्म[illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

शिखाविलुलिता युष्माकं केशपाशाच्च्युताः सुमनोऽभिवृष्टीः पुष्पवृष्टीः ॥ ९ ॥

हे बालक! तुभ्यं तव चरणपङ्कजनिस्सरणां चरणपद्मनूपुरान्तर्गतरत्नाख्योपवालानां वाचं शब्दमात्रं परं न तु व्यक्तार्थां कथंभूतां रूपं विनापि मुखरीं शब्दवादनशीलामित्यरूपमुखरीं "तितिरिर्नूपुरान्तस्थरत्नपक्षिविशेषयोः। वक्रमार्गे यजुर्वेदे सिल्पामपि च कथ्यते" इत्यभिधानं कदम्बपुष्पवद्रुचिरस्य सुन्दरस्याङ्कस्य सामीप्यात् कटिप्रदेशस्य घटङ्कबिम्बं उन्नतमण्डलं शृङ्गारविशेषयुक्तमण्डलं वा वर्तमाना ते तव वल्कला पटः क लब्धा यस्यां वल्कलायां अलातपरिधिः अलातमेवालातः तद्वत्स्थिता परिधिः परिवेषः काञ्चीकलापा च "वल्कं वल्कलमस्त्रियाम" इत्यभिधानाज्जडत्वाल्लिङ्गव्यत्यासः तथाच यस्य वल्कलस्योपर्यलातपरिधिरस्तीत्यन्वितव्यम ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

तामेव देवीं मकरध्वजस्य वशमुपनीतः सन् जडवदिति वक्ष्यमाणां दशश्लोकीमुवाच जाड्यानुकरणाच्च वैदग्ध्यविशेषद्योतनार्थं विवरं मनोऽन्तःप्रवेशद्वारं विदधतीं निजमुखाद्विगलितममृतमिव स्वादु आसव इव मादकं यत् सहासं भाषणं तस्मिन् सति य आमोदो गन्धस्तेन मदान्धा मधुकरनिकरास्तैरुपरोधः आवरणं तेन भयात् द्रुतः शीघ्रो यः पदविन्यासस्तेन वल्गु स्पन्दनं किञ्चिच्चलनं स्तनकलशयोः कबरभारे रसनायाञ्च यस्यास्ताम ॥ ६ ॥

का त्वमित्युक्त्वा ससम्भ्रममतिवात्स्यमारभ्यैव तपस्यतो मम स्त्रीपुंविशेषज्ञानं नास्तीति द्योतयन्नाह । हे मुनिवर्येति । अहमिव त्वमपि तपोऽर्थमत्र निर्जने किमसि भावः किञ्च त्वं मुनिवर्यो भूत्वा मुनिं मां यन्मोहयस्यत्र किं कारणमिति त्वरां विभाव्य ज्ञातमित्याह । मायासीति । भगवतेव परदेवता तस्याः मायैव त्वं मुनिवर्यरूपेणात्र वर्त्तसे इति भावः किञ्च भ्रुवावालक्ष्याह । विज्ये निर्गुणे धनुषी बिभर्षि हे सुहृत्! सखे! किमात्मनोऽर्थे स्वस्य कृते तदेताभ्यां किं कार्यमस्ति किं वा मृगानस्मदादीनिति गूढोऽर्थः ॥ ७ ॥

कटाक्षावालक्ष्याह । बाणौ शतपत्रे नेत्रकमले एव पत्रे ययोस्तौ शान्तौ विभ्रमेण मन्थरौ पुङ्खाभ्यां विनापि रुचिरौ अतितिग्मौ तीक्ष्णौ दन्ताग्रभागौ ययोस्तौ क्षेमायेति यद्यस्मात् प्रतियोक्ष्यसे तर्ह्येनयोर्ज्वालया नैव जीविष्याम इति भावः ॥ ८ ॥

तस्याः सौरभ्यलोभेनानुगच्छतो भ्रमरानालक्ष्याह । शिष्या भ्रमराः ॥ ९ ॥

नूपुरस्वनमास्वाद्याह । वाचमिति । तुभ्यं त्वामानन्दयितुं तव चरणस्थयोः पञ्जरयोरन्तर्गतास्तित्तिरपक्षिणो वर्त्तमाना अनुभाषन्ते यस्मादरूपामदृश्यवक्तृकां मुखरीं पारम्पर्यकलहमयीं वाचं शृणुयाम हे ब्रह्मन्निति तव तपोयोग्यतानलमित्यर्थः। इति भावः परिधानीयाजिनस्थस्पीतवस्त्रस्य नितम्बलग्नत्वेन लावण्यमास्वाद्याह । अङ्गविटङ्कबिम्बे नितम्बस्य सुन्दरमण्डले कदम्बरुचिभिः पीतकान्तिर्लब्धा श्यामस्यापि तव नितम्बः पीत इत्याश्चर्यमङ्गविटङ्कबिम्बे इति पाठे अङ्गेति सम्बोधनं स्नेहमयीं स्मितस्मेराह । यस्यां पीतकान्तौ अलातपरिधिर्ज्वलदङ्गारमण्डलं

अहो ते तपस्वीत्वमिति भावः क च वल्कलं ते इति किं स्वाश्रम एव वल्कलं प्रमादवशादपहाय मन्निकटं नग्न एवायातोऽसीति भावः भङ्ग्या सुरतप्रार्थना च द्योतिता ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तां नयनगोचरां देवीमविदूरं निकटं सुमनसः उपाजिघ्रन्तीं मधुकरीमिव जडवदिति उवाच कथम्भूतः तदवलोकनेन तस्या अवलोकनेन विवृतावसरस्य दत्तावकाशस्य मकरध्वजस्य वशमुपनीतः कथम्भूताम विविजादिमनोनयनाह्लादकं मुखं त्यादिभिर्नृणां मनसि कुसुमायुधस्य विवरं छिद्रं विदधतीं निजमुखाद्विगलितममृतवत् स्वादु आसववन्मादकं यत्सहासं मन्दहसितसहितं सम्भाषणं तस्मात् य आमोदः बहिर्निःसृतो गन्धस्तेन मदान्धमधुकरनिकरैरुपरोधः आवरणं तेन भयाद्द्रुतेन शीघ्रेण पदविन्यासेन वल्गु स्पन्दनं किञ्चिच्चलनं स्तनकलशयोः कबरभारे रसनायां च यस्याः ॥ ६ ॥

तद्वचनमेवाह । का त्वमिति दशाभिः । मुनिवर्येत्यादि पुंस्त्वेन सम्बोधनं भ्र्वादीनां धनुष्ट्वादिकल्पनं च स्वात्मनस्तद्वश्यत्वद्योतकं तस्याः वशीकरणार्थं च भगवतां ब्रह्मादीनां परदेवता उपास्यभूता या देवता तस्याः कापि काचित् मायाऽसि किम भ्रुवौ धनुष्ट्वेन कल्पयित्वाह । हे सुहृत्! विज्ये ज्यारहिते बिभर्षि किमात्मनोऽर्थे स्वभाजनार्थे वा शङ्केन वृथा मांसभक्षणस्य निन्दितत्वात् आश्चर्यमप्रमत्तान् अनवहितानस्मद्विधान् मृगयसे ॥ ७ ॥

कटाक्षौ बाणत्वेन कल्पयित्वाह । बाणाविति । शतपत्रे नेत्ररूपेण संस्थिते कमले ते एव पत्राणि पिच्छानि ययोः अपुङ्खरुचिरौ पुङ्खाभ्यां दीर्घशलाकारूपाभ्यां विनापि रुचिरौ अतितिग्मवन्तौ अतितीक्ष्णाग्रभागौ कस्मै युयुक्षसि प्रयोक्तुमिच्छसीति न विद्मः स्वस्य तल्लक्ष्यत्वं ज्ञापयन् प्रार्थयते तव विक्रमः अत्र प्रचारः सोऽस्माकं क्षमायेऽर्थमसर्थे अस्तु ॥ ८ ॥

तदङ्गसौरभलोभेन परितो भ्रममाणान् ध्वनिं कुर्वतः मधुकरान् तच्छिष्यत्वेन कल्पयित्वाह । शिष्या इति । मरहस्यं साङ्गं साम पठन्ति अजस्रं सन्ततमीश्वरं गायन्ति च मूर्तं मत्वा त्वक्ष्यतीति शङ्कया तथ्येन मधुकरानेवाह । ऋषिगणाः वेदशाखा इव सुमनोऽभिवृष्टिमर्जन्ति अर्थादेते पुष्पपरिमललुब्धा मधुकरा इत्यर्थः ॥ ९ ॥

नूपुरादीन् पञ्जरादित्वेन कल्पयित्वाह । वाचमिति । हे[illegible]न! तुभ्यं तव चरणस्थपञ्जरयोः नूपुरयोः तित्तिरीणामन्तर्गतरत्नानाम अरूपमुखरामरूपा अदृष्टवक्तृका मुखरा प्रकटा तां च वाचं परं केवलं शृणुयाम शृणुमः पीतं पटं तत्र कान्तित्वेन कल्पयित्वा पृच्छन्ति अङ्गविटङ्कबिम्बे नितम्बस्य सुन्दरे मण्डले कदम्बकुसुमस्य रुचिः कान्तिः क लब्धा कुत्र प्राप्ता काञ्चीं मेखलाम अलातपरिधिं प्रकल्प्याह । यस्यां कदम्बकल्पामलातपरिधिर्भाति नितम्बकान्तित्वेनोक्तां नग्नां प्रकल्प्य पृच्छति च पुनस्ते वल्कलं क्वेति ॥ १० ॥

भाषाटीका।

थोड़े दूरमें जैसे भौंरी फूलों को सूंघती हो तैसे देव-मनुष्योंके मनको आनन्द देने वाले गति विहार विनय अङ्ग-

किं सम्भृतं रुचिरयोर्द्विज ! शृङ्गयोस्ते मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ।
पङ्कोऽरुणः सुरभिरात्मविषाण ईदृग्येनाश्रमं सुभग ! मे सुरभीकरोषि ॥ ११ ॥
लोकं प्रदर्शय सुहृत्तम!तावकं मे यत्रत्य इत्थमुरसावयवावपूर्वौ ।
अस्मद्विधस्य मनउन्नयनौ बिभर्ति बह्वद्भुतं सरसरासमुधादि वक्रे ॥ १२ ॥
का वात्मवृत्तिरदनाद्धविरङ्ग ! वाति विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ ।
उद्विग्नमीनयुगलं द्विजपङ्क्तिशोचिरासन्नभृङ्गनिकरं सर इन्मुखं ते ॥ १३ ॥
योऽसौ त्वया करसरोजहतः पतङ्गो दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी मे ।
मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टोऽनिलो हरति लम्पट एष नीविम् ॥ १४ ॥
रूपं तपोधन!तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धम् ।
चर्तुं तपोऽर्हसि मया सह मित्र!मह्यं किम्वा प्रसीदति स वै भवभावनो मे ॥ १५ ॥

भाषाटीका।

लोकम सुन्दर अक्षरोंके वचनोंसे मनुष्यों के हृदय में काम-के बाणों से बेधन कराती हुई निज मुखसे निकला जो अमृत-रूप आसव सहित सम्भाषण तिससे जो आमोद तिसके मदसे अन्धे भौंरोंके समूह से जो रुकावट तिससे चलनेमें जो शीघ्र पदन्यास तिससे मनोहर किंचित् चालसे चलाय मान स्तनोंका भार तथा कोंधनी जिसकी ऐसी प्रकाश मान जो अप्सरा तिसके देखनेमे अवसर पाने वाले भगवान् मकरध्वज कन्दर्पके वशीभूत होकर जड बुद्धी सा होकर राजा इस वचनको बोला ॥ ६ ॥

मोहित होकर स्त्रीलिङ्ग पुलिङ्गको न समझकर बोलने लगे कि हे मुनिवर्य ! तु कौनसी है क्या करने चाहती है इस पहाडपे क्यों आयी है परदेवता भगवान् .की कोई माया है क्या हे सुहृत् बिना प्रत्यंचाके दो धनुष (भौं) धारण किये हो ये धनुष क्या अपने वास्ते हैं कि वा कोइ हमसे, प्रमादी मृगोंको वनमे ढूंडती हो ॥ ७ ॥

भ्रुकुटी देखकर कहते हैं कि नेत्र कमल ही बाण के पक्ष्म पत्र हैं अतिशान्तहै पुंख बाणके मूलके बिना भि अति मनोहर है अति तीक्ष्ण दांत वाले हैं ऐसे दोनों बाणों को [illegible] ऊपर छोडोगे वनमे विचरते समय आपका पराक्रम हम जड बुद्धि वालों के कल्याणको होवे ॥ ८ ॥

भौंरोंको देखकर कहते हैं कि आपके शिष्यसे सब भग-वान् आप ईश्वरको चारों तरफसे रटते हैं और रहस्य सहित सामको गान करते हैं आपके बालोंके शिखों से गिरे फूलोंकी वृष्टि को ये सब ग्रहणकर रहे जैसे कि ऋषिगण वेद शाखोंको ग्रहण करें ॥ ९ ॥

हे ब्रह्मन् ! आपके चरण पङ्कज जोतित्तिरि रूप तिनके जो बिना रूपके और शब्द वाले वचन को केवल हम सु-नते मात्र हैं आपकी कटि मनोहर है नितम्बबिम्बमें कदम्ब की कान्ति कहां से आई तुमारी कटि पर मेखला से अग्नि का चक्र-धूमताहै आपका वल्कल वस्त्र कहां गयाहै ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स्तनावाचक्ष्याह । शृङ्गयोः स्तनयोः किं सम्भृतं किं पूर्ण-मस्ति । मनोहरं किञ्चिदस्तीत्येतावत्तु जानामि । यतो मध्यं कृशो-ऽपि त्वं कृच्छ्रेण वहसि धारयसि । यत्र च मे दृशिर्दृष्टिः श्रिता संलग्नास्ति । अन्यथेदं द्वयं न घटत इति भावः । स्तनगतं कुङ्कु-ममाचक्ष्याह । पङ्कोऽरुण आत्मनस्तव विषाणे शृङ्गे ईदृगत्यपूर्वः । कुत इत्यत आह । येन पङ्केनाश्रमं सुरभीकरोषि सुगन्धयुक्तं करोषीति ॥ ११ ॥

लोकं स्थानं यत्रत्यो जन उरसा इत्थमपूर्वावयवौ बिभर्ति । मनस उन्नयनौ । क्षोभकौ पाठान्तरे "इत्थम्भूतलक्षणे" तृतीया । वक्रे च बह्वद्भुतं बिभर्ति । किं तदाह । रसो मधुरालापो रासो विलासस्ताभ्यां सहिता सुधा अधरामृतमादिशब्दात्स्मित-नर्मादि ॥ १२ ॥

का वा तव लोके आत्मनो देहस्य वृत्तिराहारः । अङ्ग ! हे सखे ! अदनाच्चर्वणाद्धविरिति तत्सम्बन्धी गन्धो वात्यागच्छति इति ताम्बूलाभिप्रायम् । अदनाद्बहिरङ्ग भातीति पाठ मम तावद्भो-जनाद्बहिर्भूतैव वृत्तिर्भातीत्यर्थः । यतस्त्वं विष्णोः कलाऽसि विष्णुश्च नाश्नाति "अनश्नन्नन्यो अभिचाकशीति" इति श्रुतेः।विष्णोः कलासीत्यत्र हेतुः । तव च कर्णौ विष्णोरिवानिमिषोन्मकरौ अनिमिषौ रत्ननेत्रत्वेन निमेषशून्यावुल्लसन्तौ मकरौ तदाकारे कुण्डले ययोस्तौ । किञ्च । तव मुखं सर इव सर इव । तदेवाह । उद्विग्नं चञ्चलं मीनयुगलमिव नेत्रद्वयं यस्मिन् । द्विजा दन्तास्तेषां पङ्क्त्या शोचिः शोभा यस्मिन् । सरसि तु द्विजा राजहंसाः आसन्नो भृङ्गनिकर इव केशस्तोमः परिमललुब्धभृ-ङ्गस्तोमो वा यस्मिन् ॥ १३ ॥

पतङ्गः कन्दुको भ्रमतो भ्रमविलसस्य मे अक्षिणी एजयते चञ्च-लतां नयति । वक्रकेशसमूहं मुक्तबन्धनं न स्मरसि न सम्भा-वयसि किम् । कष्टो धूर्तोऽनिलो नीवीं हरत्येतन्न स्मरसि किम् ॥ १४ ॥

उपलब्धं प्राप्तम् । मह्यं मम । हे मम मित्र ! मया सह तपश्चर्तुम-र्हसि । किञ्च स वै भवभावनः संसृतिविस्तारको ब्रह्मा मे प्रसीदति । त्वां भार्यां कल्पयतीत्यर्थः ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्तनावालक्ष्याह । हे द्विज ! सुन्दरयोः शृङ्गयोः किं सम्भृतं किंपूर्णमस्ति मनोहरं किञ्चिद्वस्त्वीत्येतावत्तु जानामि यतो मध्ये मध्यकाये कृशोऽपि त्वं कृच्छ्रेण शृङ्गद्वयं वहसि अत्र शृङ्गयोर्मे दृशिराश्रिता संलग्नास्ति अन्यथेदं वहनं मम हृदयासञ्जनं च न घटेत् इति भावः स्तनगतं कुङ्कुममालक्ष्याह । पङ्कोऽरुणः सुरभिरात्मनस्तव विषाणो स्तने ईदृगत्यपूर्वः लिप्त इति शेषः कुतः येन पङ्केन सुभगं ममाश्रमं सुरभीकरोषि ॥ ११ ॥

हे सुहृत्तम ! तावकं त्वत्सम्बन्धिनं लोकं स्थानं मे मह्यं प्रदर्शय यत्रत्यः यः तावकलोकस्थः जनः अस्मद्विधस्य मादृशस्य मनउन्नयनौ मनःक्षोभकौ उल्लासकरौ वा हत्वयत्वयलोपाः यलोपश्च्यासत्त्वात्र गुणाः इत्थं ईदृशावपूर्वावयवौ शृङ्गरूपौ स्तनौ उरसा बिभर्ति वक्त्रं च बह्वद्भुतं बिभर्ति किं तत्सरसरासमुदि सरसो मधुरालापः रासो विलासस्ताभ्यां सहिता सुधा अधरामृतमादिशब्देन स्मितादिसङ्ग्रहः ॥ १२ ॥

तव लोके आत्मनो देहस्य वृत्तिराहारः का वा अङ्ग ! हे सखे ! अदनाद्यर्थमार्हिः भक्षणार्थनिरर्थका भक्षणं विना तवात्मवृत्तिर्जीवनं संभवतीति भाति सा कीदृशी अदनाद्यविदन्तीति पाठे हविः शब्दस्तद्गन्धे उपचाराद्वर्तते अदनाद्यर्थगान्धर्विः सम्बन्धि गन्धो वात्यायातीति ताम्बूलाभिप्रायं पूर्वोक्तपाठ एव साधुः विष्णोः कलासीति हेतूक्तेः तथाहि तस्मिन्पाठे तव भोजनाद्यभिभूतैव वृत्तिरित्यवभातीत्यर्थः कुतः यतस्त्वं विष्णोः कलांशोऽसि विष्णुर्नाश्नाति "अनश्नन्नन्यो अभिचकाशीति" इति श्रुतेः विष्णोः कलासीत्यत्र हेतुः तव कर्णौ विष्णोरिवानिमिषोन्मकरावनिमेषौ रत्नश्रेष्ठत्वेन निमेषशून्यौ उल्लसन्तौ मकरौ तदाकारे कुण्डले ययोस्तौ किं च तव मुखं सरःसर इव तदेवाह । उद्विग्नं चञ्चलमीनयुगलमिव नेत्रद्वयं यस्मिन् द्विजाः दन्ताः हंसाः पङ्क्तयः शोचिः शोभा यस्मिन् शोचिःशब्दः सान्तः सरसि तु द्विजाः हंसाः आसन्नो भृङ्गनिकर एव केशस्तोमः कमललुब्धभृङ्गस्तोमो वा ॥ १३ ॥

त्वया करसरोजेन हतः योऽसौ पतङ्गः कन्दुकः दिक्षु भ्रमन् मनः भ्रमितचित्तस्य मेऽक्षिणी एजयते चञ्चलतां नयति वक्रासंमूढं मुक्तबन्धनं न स्मरसि न बध्नासि किं कष्टं धूर्तः लम्पटो जसः एव अनिलो वायुः नीवीं हरत्यधराम्बरं हरति, एतच्च स्मरसि किम् ॥ १४ ॥

हे तपोधन!तपश्चरतां तपोविघ्नकरमेतद्रूपं भवता केन तपसोपलब्धं प्राप्तं हे मित्र ! मया सहितस्तपश्चर्तुमर्हसि भवभावः विश्वस्रष्टा स वै अजो ब्रह्मा किं वा मह्यं प्रसीदति त्वां यौ कल्पयतीत्यर्थः ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मध्ये कृश इत्यलुक् कृशमध्यस्त्वं यौ वहसि ते तव नयोः चिरयोः शृङ्गयोः शृङ्गवदुन्नतयोः स्तनयोः संभृतं किं चूचुकस्वर्णनीलरत्नानीति शेषः यत्र ययोः द्विजेति सम्बोधनं अङ्गात् कुङ्कुमाद्यङ्गरागमभिप्रायेणाह । पङ्क इति । आत्मानिषाणे तव स्तनद्वयेऽरुणः पङ्कः कुङ्कुमाद्यङ्गरागः ईदृगीदृशगुणोपेतः कथमाह । येनेति ॥ ११ ॥

यत्रत्यः यस्मिन् देशे भूतस्त्वमुरसा अपूर्वौ नूतनौ अवयवौ स्तनलक्षणौ बिभर्षि किं विशिष्टावस्मद्विधस्य मनउन्नयनौ मनस उत्कर्षप्रदौ स त्वं तावकं लोकं प्रदर्शयेत्यन्वयः अन्यदपीत्याह । वाहीति । किं तदत्राह । सरभीति । वक्त्रं स्मितेन सह वर्तमानः सस्मो हासः मन्दहासः तेन युक्तां सुधामधरामृतं च बिभर्षि पानेन सस्मितहासक्रीडाकरीं सुधामति वा ॥ १२ ॥

अङ्ग ! तवात्मवृत्तिर्देहयात्रा का भवतीति वक्तव्याह । अदनादीति । अदनाद्यर्हभोजनं विनेति मे भाति अन्नभक्षणेनैव यत्परिपालनमाग्नेयादिकं स्यात्तत्र नास्तीति भावना कल्प्यत इति भावः किं च त्वं विष्णोः कलासीति मन्ये अशनाद्यभावात् लक्षणान्तरं चास्तीत्याह । अनिमिषन्मकरावित्येति । अनिमिषन्मावुन्मीलन्तौ मकरौ मकरमत्स्यलक्षणौ कर्णौ कुण्डलाख्यकलयोर्विष्णुत्वे लक्षणमिति शेषः इदं चास्मन्मनोहरमित्याह । उद्विग्नमीनेति । ते तव मुखं सरः सुखादं सरः उत्कृष्टरूपमित्यन्वयः कथमुद्विग्नं संचलितं मीनयोर्नेत्रयोर्युगलं यस्मिंस्तत्तथा अनवस्थितलक्षणाव्यभिचारादेवस्थाने मीनग्रहणं सरःपदोपादानाच्च द्विजानां दन्तवासविघटनया स्थितानां पक्ष्मणां पङ्क्तिभिः शोभाकर्षणे द्विजपङ्क्तिशोभि अन्यत्र पक्षिणां पङ्क्तिभिः शोभि आसन्नो भृङ्गाणां निकरो यस्मिन् तत्तथा उभयत्र समं द्विजपङ्क्तिशोचिरिति कचित्पठन्ति ॥ १३ ॥

त्वया करसरोजेन हतो योऽसौ पतङ्गः कन्दुकः दिक्षु भ्रमन् भ्रमतः तवाक्षिणी एजयते चालयतीत्यन्वयः लम्पटो गात्रो भव एव कृष्णः [1] एवः अनिलो वायुः वरो वरणीयश्च बभ्रुः कपिलश्च जटानां वरूथः समूहस्ते तव तं हरति नीवीं वस्त्रबन्धं च हरतीत्येतच्च युक्तमित्यन्वयः ॥ १४ ॥

हे तपोधन ! तव यद्रूपं तपः कुर्वाणानां पुंसां तपोघ्नं तपोविघ्नकरमेतद्रूपमिह तपोराशौ केन तपसा त्वया लब्धमित्यन्वयः हे मित्र ! मया सह तपः कर्तुमर्हसीत्यन्वयः "तप ऐश्वर्ये" इति धातो ऐश्वर्यनिमित्तं विषयभोगलक्षणमानन्दं गमयितुमिति वा चरतेर्गत्यर्थत्वात् मह्यं मे त्वं प्रसीदसि किं वा नहीति शेषः कुत इति तत्राह । स इति । स भवान्मे भवभावनः सम्पत्करो वा इत्यन्वयः ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लोकमिति । उन्नयनौगिति पाठे लोभगौरपूर्वैस्त्वप्रकारं प्रापयावित्यर्थः ॥ १२ ॥

ननु निराहार एवाऽहं तत्राह । अदनाद्यर्थगान्धर्विः हविर्यज्ञियद्रव्यमिव परमपवित्रं किमपि वाति तत्सम्बन्धिगन्धः प्रसरतीत्यर्थः पूर्वपाठे विष्णोः कलासीति हेतुत्वं तु विष्णोर्यज्ञभोक्तृत्वादिति श्रेयः इदित्यव्ययमत्रार्थः एवार्थश्चात्र मादृश इति श्रेयः उदीति तु कल्पितमेव ॥ १३—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

स्तनावालक्ष्याह । हे द्विज !शृङ्गयोः किं संभृतं किमद्भुतं बहुमूल्यरत्नं वस्तु धृतं वर्त्तते यन्मदृष्टिपातसमय एव मुहुराकर्षयतीति भावः आद्ययोः भूत्वापि शृङ्गद्वयं धत्से तत्रापि वहसि तत्रापि मनोहरमेव वस्तु धत्से यतो मध्ये कृशोऽपि

[1] भजितः

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

कुचकुङ्कुमापि वहसि यत्र दृशिमदृष्टिः स्थिता वर्त्तते मद्दृष्टिरेवात्र प्रमाणमिति भावः तेनाच्छादनमुद्घाट्य स्वयमेव दर्शयित्वा मत्सन्देहमपाकुरु किं वा याचयामि चेत् सौहार्देनाहमेवोद्घाटयामि तपस्विनो मम वस्तुनि प्रयोजनं नास्ति केवलं दर्शन एवेति भावः स्तनस्य शृङ्गत्वं तुङ्गत्वातिशयविवक्षया अयं स्तनगतं कुङ्कुममालक्ष्याह । आत्मन: स्वस्य विषाणं शृङ्गे ईदृक् पङ्कः भूतः कस्य सरोवरस्य सुरभिरुणश्च पङ्कस्तमहमपि वक्ष्यसि स्थितामीति भावः ॥ ११ ॥

अस्मद्देशे मनुष्योऽपि वक्षसि शृङ्गद्वयं धत्ते इति चेत्तत्रैव गत्वा तपश्चिकीर्षामीत्याह । लोकमिति । हे सुहृत्तमेति सौहार्देनैवेति भावः तन्वंते शृङ्गे न भवत इत्यत आह । यत्रत्यो जन इत्थमुरसा वक्षसा मनस उन्मयनौ क्षोभकौ उन्मयनैरिति पाठे उत्कर्षेण प्रहर्षौ: वक्त्रे च बहद्भुतं बिभर्ति किन्तदाह । सरसो मधुरालापः रासो विलासः ताभ्यां सहिता सुधा अधरामृतम् आदिशब्दादामोदमकरन्दादिकं स्मितनर्मादि ॥ १२ ॥

का वा तव लोके आत्मनो देहस्य वृत्तिर्जीविका ताम्बूलगन्धमनुभूतं व्यञ्जयन्नाह । हविरिति । अदनात् भक्षणात्तेनोः हविरिति तत्सम्बन्धी गन्धो वाति आगच्छति देशान्तरे यत्लोका हविर्भोजिनः श्रूयन्ते तस्मात्तेऽप हविष एव गन्धोऽनुमीयत इति ताम्बूलहविषोः स्वापरिचितत्वं व्यञ्जितम् अदनाद्यविरङ्ग भातीति पाठे भोजनाद्बहिर्भूतैव वृत्तिर्भातीत्यर्थः यतस्त्वं विष्णोः कलासि विष्णुश्च "नाश्नाति अनश्नन्नन्योऽभिचाकशीति„ इतिश्रुतेः अत्र लिङ्गं विष्णोरिवानिमिषोन्मकरौ स्वनेत्रत्वेन निमेषशून्यौ उत्कृष्टमकरौ कुण्डलाकारौ ययोस्तौ किञ्च एवं मुखं सर इव सर इव उद्विग्नमीनयुगलमिव नेत्रद्वयं यत्र तत द्विजाः हंसा दन्ताश्च तेषां पङ्क्त्या शोचिः शोभा यस्मिंस्तत् आसन्नो भृङ्गनिकर इवालकसमूहो यस्मिंस्तत् ॥ १३ ॥

कन्दुकक्रीडामालक्ष्याह । पतङ्गः कन्दुकः भ्रमतः भ्रमाश्चित्तस्य मे अक्षिणी एजयते चञ्चलीकरोति वक्रं जटावरूथं केशसमूहं मुक्तं मुक्तबन्धनं न स्मरति कष्टो धूर्तः नीवीं हरति एतच न स्मरसि किमेतावांस्तव कन्दुकक्रीडायामावेश इति भावः ॥ १४ ॥

तपस्विनो मम तपस्विसङ्गोऽपेक्षित एवेत्याह । रूपमिति । हे तपोधन ! एव अभिकयेन लब्धं मह्यं मां सुखयितुं मया सह तपश्चरितुमर्हसि मे मां पूर्णमनोरथीकर्तुं भवभावनो ब्रह्मा ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्तनौ शृङ्गयुगलत्वेन प्रकल्प्य पृच्छति हे द्विज ! ते त्वया शृङ्गयोः किं रत्नादिकं सम्भृतं निहितं यतो मध्ये कृशोऽपि त्वं वहसि यत्र शृङ्गयोर्भृते वस्तुनि शृङ्गद्वये वा मे दृशि दृष्टिः स्थिता प्रोथिता न परावृत्ते शक्ता इत्यर्थः स्तनस्थकुङ्कुमं पङ्कत्वेन परिकल्प्याह । आशीविषाणे भवदीयशृङ्गे अरुणः सुरभिश्च ईदृक् पङ्कोऽस्ति येन पङ्केन आश्रमं सुरभीकरोषि सुगन्धव्याप्तं करोषि ॥ ११ ॥

हे सुहृत्तम ! तावकं त्वदीयं लोकं स्थानं मे [illegible] प्रदर्शय यत्रत्यो जन इत्थमपूर्वावयवौ विषाणरूपौ उरसा बिभर्ति मनस उन्मयनौ हर्षकरौ वक्त्रे च रससयं मृदुभाषणास्य यो रासः प्रवर्त्तनं तेन सहितं सुधादि अधरामृतदन्तकान्ति असन्दस्मितादि बहु अद्भुतं बिभर्ति ॥ १२ ॥

हे अङ्ग ! मित्र ! आत्मनस्तव का वा वृत्तिः आहारादिरूपा जीविका अदनाद्भक्षणात् हविः वाति गन्ध आगच्छति गुञ्जागुञ्जानोरभेदात् किञ्च विष्णोः कलासि किं च ते अनिमिषोन्मकरौ कर्णौ भवतः नेत्राकारमणिद्वययुक्ततया निमिषरहितौ उज्ज्वलौ मकरौ तत्सदृशौ कुण्डले ययोस्तौ भवतः किञ्च ते मुखं सर इव मीनहंसभ्रमरादिश्रीयुक्तसर इवास्ति यतः उद्विग्नं चपलं मीनयुगलमिव नयनयुगलं यस्मिन् द्विजपङ्क्त्या दन्तपङ्क्त्या शोचिरोचिर्यस्मिन् आसन्नो गन्धलोभेन निकटगो भृङ्गनिकरो यस्य तत् ॥ १३ ॥

भ्रमतः सोद्वेगस्य मुक्तं गतबन्धनं वक्रजटावरूथं न स्मरसि कष्टः धूर्त्तः लम्पटः त्वय्यासक्तः नीवीं वस्त्रं हरति तच्च स्मरसि किम् ॥ १४ ॥

हे मित्र ! स ब्रह्मा ॥ १५ ॥

भाषाटीका

हे द्विज ! आपके सुन्दर दोनों सींगों में क्या रखा है बीच में कृष होकर उन सींगों को [स्तनों] को धारण करते हो जिनमें मेरी दृष्टि लग गई है आपके सींग में लाल कीचड इस प्रकार का है जिससे कि हे सुभग! हमारे आश्रमको सुगन्धित करते हो ॥११॥

हे सुहृत्तम ! आप अपना लोक हमको दिखाओ जहां रहने वाले पुरुष हमारे मनको हरण करने वाले ऐसे अपूर्व अवयवों को छाती से धारण करते हैं और मुख में बहुत अद्भुत सरस विलास अमृत हासादि धारण करते हैं ॥ १२ ॥

हे मित्र ! आपकी आहार की वृत्ति क्या है जिसके भक्षण से सुगन्ध आता है आप तो विष्णु की कला हो और तुम्हारे कर्णों में भी विना निमिष के सुन्दर मकर हैं भय से चलाय मान दो मत्स्य हैं जिसमें हंसों की पङ्क्ति की शोभा है जिसमें समीप में भैरों का समूह है जिसमें ऐसा तुम्हारा मुख सरोवर सरीका भान होता है ॥ १३ ॥

यह जो तुमने हाथ से फेंक दिया सूर्य (गेंद) दिशों में घूमता है सो मैं भ्रमित हूं मेरी आंखों को घुमाता है तुम्हारा जटाओं का समूह खुला हुआ है तिसको तुम नहीं याद करते हो यह दुष्ट पवन तुम्हारे कटि वस्त्रको उडा देता है सो भी तुम स्मरण नहीं करते हो ॥ १४ ॥

हे तपोधन ! इस रूपको तुमने किस तपस्या से लाभ किया है यह रूप तपस्या करने वाले हम सरीके पुरुषों के तप का नाश करने वाला है हे मित्र ! आप तो मेरे साथ तपस्या करने लायक हो अथवा वह जगत्कर्ता ब्रह्मा हम पर प्रसन्न होकर ऐसा करेगा क्या ॥ १५ ॥

न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नम् ।
मां चारुशृङ्गर्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरन्तु शिवाः सचिव्यः ॥ १६ ॥

॥ श्रीशुक उवाच ॥

इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास ॥ १७ ॥

सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जम्बूद्वीपपतिना भौमस्वर्गभोगान् बुभुजे ॥ १८ ॥

तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत् ॥ १९ ॥

सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्विजदेवेन ब्रह्मणा दत्तम् एक मनश्च लग्नं सन्नापयाति हे चारुशृङ्गि ! यतस्ते चित्तं तत्र मां त्वदधीनं नेतुमर्हसि सचिव्यस्तव सख्योऽपि शिवा अनुकूलाः सख्यो मां प्रतिसरन्त्वनुवर्तन्ताम् यद्वा एतावत्पर्यन्तं मे याः सचिव्यः सख्यः शिवाः फेरवस्ताः प्रतिसरन्तु निर्यान्तु यद्वा वनवासे सहचर्यो हरिणयः शिवाः प्रतिसरन्तु प्रदक्षिणं गच्छन्तु ॥ १६ ॥

ग्राम्येषु वैदग्ध्यं यस्यास्तया परिभाषया वाचा सभाजयामास पूजयामास सम्मुखीचकारेत्यर्थः ॥ १७ ॥

बुद्ध्यादीनां द्वन्द्वैक्यम् ॥ १८ ॥ १९ ॥

सूत्वा प्रसूय उपनस्थेऽभजत् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हे द्विज ! देवेन ब्रह्मणा दत्तं त्वां न त्यजामि यस्मिंस्त्वयि नोऽस्माकं दृङ्मनश्च लग्नं सन्न वियाति न ततो गच्छति हे चारुशृङ्गि ! यतस्ते चित्तं ततो मां त्वदधीनं नेतुमर्हसि सचिव्यस्तव सख्योऽपि शिवा अनुकूलाः मां प्रतिसरन्त्वनुवर्तन्तां यद्वा एतावत्पर्यन्तं मे याः सचिव्यः शिवाः फेरवस्ताः प्रतिसरन्तु निर्यान्तु यद्वा वनवासेन सह वसन्त्यो हरिणयः शिवाः प्रतिसरन्तु प्रदक्षिणं गच्छन्तु सरयथ इति पाठे सरन्तीति सरण्यो रात्रयः शिवाः मङ्गलरूपाः सरन्तु गच्छन्तु ॥ १६ ॥

इतीत्थं ललनानुनये ताः स्वाधीनाः कर्तुमित्यर्थः अतिनिपुणो ग्राम्येषु वैदग्ध्यं कौशलं यस्यास्तया परिभाषया तां विबुधवधूमप्सरसं मोहितचित्तः अति सभाजयामास सबहुमानं तामनुकूलामकरोदित्यर्थः ॥ १७ ॥

सा च पूर्वचित्तिः तस्य वीरयूथपतेः वीराणां यूथाः तेषां पतेराग्नीध्रस्य बुद्ध्यादीनां द्वन्द्वैक्यं तेन पराक्षिप्तमासक्तं मनो यस्याः सा जम्बूद्वीपपतिना तेनाग्नीध्रेण सह बहुकालं भौमस्वर्गाः तत्स्वर्गतुल्याः तेषु ये भोगास्तान् बुभुजे ॥ १८ ॥

ततः स राजश्रेष्ठः आग्नीध्रः तस्यां पूर्वचित्त्यां नाभिप्रभृतीनवात्मजान् पुत्रानजनयत् पुमाख्यान्नरकात्त्रायत इति पुत्र इत्यन्वयार्थावगमाय पुत्रशब्दः प्रयुक्तः अतो न पौनरुक्त्यम् ॥ १९ ॥

सा पूर्वचित्तिः प्रतिवत्सरमेकैकं पुत्रमिति नव सुतान् सूत्वा गृह एवापहाय विहाय पुनरजं देवं ब्रह्माणमुपतस्थेऽभजत् ॥२०॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे द्विज ! देवेन विधिना दत्तं यस्मिंस्त्वयि लग्नं मनो लग्ना दृगपि ईदृशी न वियात्यन्यत्र न गच्छति हे चारुशृङ्गि ! सुन्दरस्तनि ! त्वं मां नेतुमर्हसि कुतः मम चित्तं ते तवानुव्रतमनुगतमिति यतः मुग्धो ग्राम्यकाम इवाह । प्रतिसरन्त्विति । इमाः शिवाः शुभाः सचिव्यो दासीवद्वर्तमाना मधुकर्यः प्रतिसरन्त्वपसरन्तु दूरं गच्छन्तु अधुनाहं त्वां सम्भोक्तुकाम इति शेषः यद्वा सचिवीवद्वर्तमानाः शिवाः शृगालस्त्रियः प्रतिसरन्तु प्रदक्षिणं गच्छन्त्विति स्वकार्यसिद्धये शकुनं प्रार्थयन इति तन्वत्र कथं विजयं इत्याद्यनर्थो वार्ता। संगच्छत इतिचेदुच्यते परिहासार्थत्वदर्शनमात्रमुक्तम्। परिहासप्रलापादिष्वनर्थो वागर्थत्वकार्यादीनि । तस्मादाग्नीध्रः कामार्तोऽवादीर्थविधानि वाक्यानि प्राजल्पदिति युक्तम् ॥ १६ ॥

विरागिणां भ्रातॄणां कर्णदुःसहायाः इह शाब्दिकानामपहासं हर्तारिव स्थिताया ग्राम्यकथाया अथापि ममाभि[illegible]ति मत्वान इदोत्तरकथाप्रसंगमाह । इतीति । इतिशब्द आविष्यन्तः सर्वाभिवचनो वा ग्राम्ये विषयभोगकथायां वैदग्ध्य पाटवं यस्याः सा तथा तया परिभाषया संभाषणया ॥ १७ ॥

यद्यनया परिभाषया वशीकृता स्यात्तर्हि अस्य तत्र ग्रन्थमस्तीति वक्तुं युक्तं तत्कथमत्राह । सा चेति । अनया विषयभोगास्मिन्नुक्तं वशीकरणाम ॥ १८ ॥

न केवलमियं भोगकर्त्री किं तु संतानकर्त्रीति भावनाह । तस्यामिति । पुत्रोत्पत्त्यनन्तरं पूर्वचित्त्या किमकारीति तत्राह । सासूत्वेति । अजं देवं ब्रह्माणम् ॥ १९ ॥२०॥

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जम्बूद्वीपवर्षाणि बुभुजुः ॥ २१ ॥

आग्नीध्रो राजाऽतृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवारुन्ध यत्र पितरो मादयन्ते ॥ २२ ॥

सम्परेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमितिसंज्ञा नवोदवहन् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां संहितायां वैयासिक्यामाग्नीध्रवर्णनं नाम

द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

अयुतायुतं न्यर्बुदम्। नृपत्वे भौमभोगान् देवत्वे स्वर्गभोगांश्च ॥ १८—२० ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

ननु त्वया मम किं फलं तद्विनो यामीत्याशङ्क्याह। न त्वामिति। यतो द्विजदेवेन ब्रह्मणा यस्मिंस्त्वयि लग्नं न वियाति न विगतं भवति हे चारुशृङ्गि! उन्नतस्तनीति स्त्रीलिङ्गेन सम्बोधनमपि कामवैवश्येनावहित्थाया नाशं द्योतयति। यतः यत्र देशे तव चित्तं तत्रैव सन्निधयस्तव सख्योऽपि शिवाः अनुकूलाः सत्यः मां प्रति सरन्तु अनुवर्त्तन्ताम् ॥ १६ ॥

ग्राम्याणामिव वैदग्ध्यं यस्यां तया ॥ १७ ॥

वृक्षवादीनां छन्दैकयं गाढमने यकारः अयुतायुतं न्यर्बुदम् ॥ १८—१९ ॥

गृहे राज्ञो भवन एवापहाय अप्सरस्त्वात्तेषु वात्सल्यमपि पूर्वकृतं त्यक्त्वा ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हे व्रज! हे चारुशृङ्गि! यतः यत्र ते चित्तं तत्र त्वं मां नेतुमर्हसि। सन्निधयस्तव परिचारिकाः शिवाः कल्याण्यः अनुव्रतं भवदीयपरिचर्यायां समासक्तं प्रतिसरन्तु अनुसरन्तु ॥ १६ ॥

ग्राम्येषु वैदग्ध्यं वैशारद्यं यस्यास्तया सभाजयामास आरतवान् ॥ १७ ॥ १८ ॥ १९ ॥

उपतस्थेऽभजत् ॥ २० ॥

भाषाटीका

ब्रह्माजी ने मेरे को आपसे मिलाया है अब मैं आपको नहीं छोड़ूंगा जिन आपमें मेरे मन तथा नेत्र लगगया है सो हटता नहीं है हे सुन्दर सींग वाली तु मेरे को जहां इच्छा हो तहां ले चल मैं तेरा अनुचर हूं इस मनोरथ सिद्धि के लिये मंगालिक हरिणा मेरे दक्षिण ओर में चलें ॥ १६ ॥

श्रीशुकदेवजी बोले इस प्रकार से देवतों की सी बुद्धिवाला स्त्रियों के वशीकरने मे बडा चतुर आग्नीध्र ने ग्राम्यविषयों मे बडी निपुण बोली से उस अप्सरा का बडा सत्कार किया ॥ १७ ॥

तदनन्तर वह अप्सरा पूर्वचित्ति भी उस आग्नीध्र के बुद्धिशील रूप शोभा उदारबुद्धि इनों से मोहित होकर अर्बुद अयुत परिवत्सर काल पर्यन्त उस जम्बूद्वीप के पति आग्नीध्र के साथ भूमि स्वर्ग के भोगों को भोगती रही ॥ १८ ॥

उस राजश्रेष्ठ आग्नीध्र ने उस अप्सरा मे अपने वीर्य से नाभि किम्पुरुष हरिवर्ष इलावृत रम्यक हिरण्मय कुरु भद्राश्व केतुमाल नाम के नौ पुत्रों को पैदा किया ॥ १९ ॥

वह पूर्वचित्ति एक एक वर्षमे एक ऐसे नौ वर्ष में नौ पुत्रों को पैदा करके उन सबोंको घरही मे छोडकर फिर ब्रह्माजीकी सेवा करने चलीगई ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

औत्पत्तिकेनैव स्वभावेन संहननं दृढाङ्गत्वम् ॥ २१ ॥

कामानां भोगैः अध्यधिकं मन्यमानः श्रुतिभिर्वैदिकैः कर्मभिः अवारुन्ध प्राप मादयन्ते मोदन्ते ॥ २२ ॥

इत्येवम्भूताः संज्ञा यासां ताः परिणीतवन्तः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम्।

द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ताभ्यादयः आग्नीध्रसुता मातुरनुग्रहादौत्पत्तिकेन स्वभावतः संहननं दृढाङ्गत्वं बलं च ताभ्यामुपेताः पित्रा आग्नीध्रेण विभक्ता विभागमनतिक्रम्य आत्मतुल्यनामान्यात्मभिः सह तुल्यनामानि जम्बूद्वीपवर्षाणि बुभुजुः भारतवर्षस्यापि भरतसम्बन्धात्पूर्वमजनाभमिति व्यवहारादात्मतुल्यनामानीत्यस्य न विरोधः ॥२१।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

आग्नीध्रो राजाऽतृप्तकामस्तामेवाप्सरसं पूर्वचित्तिमभिमन्यमानः तत्सङ्गनिमित्तानन्तरमधिकं कामयमानः श्रुतिभिः श्रुत्युक्तसाधनैः कर्मभिस्तस्याः सलोकतामवरुन्धे प्राप कोऽसौ लोकस्तत्राह। यत्र लोके प्राप्ताः पितरो मादन्ते ॥ २२ ॥

पितर्याग्नीध्रे सम्परेते मृते सत्यनन्तरं नव भ्रातरः नाभिप्रभृतयः मुमेरोर्दुहितृर्मेरुदेवीप्रभृतीः नव उदवहन् विवाहितवन्तः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

दृढं देहपुष्टिः आत्मतुल्यनामानि आत्मनामाक्षरतुल्यनामाक्षराणि जम्बूद्वीपे विद्यमानानि वर्षाणि खण्डानि "खण्डोऽस्त्री ब्रविडते भिषु" इति यादवः ॥ २१ ॥

आग्नीध्रेण पुनः किमकारीत्यत्राह। आग्नीध्र इति। तामभिमन्यमान इति तया सह सुरतानन्दसुखं चिन्तयन्नित्यर्थः समानलोकतामवरुन्धन्नाप्तुकामः श्रुतिभिः श्रुतिविहितैः साधनैरीजे श्रीहरिमिति शेषः यद्वा एवं विधसाधनैरेव यजन्नप्सरः समानलोकतां श्रुतिभिराकर्णनैरवरुन्धन् लोकं विशिनष्टि। यत्रेति। मादयन्ते हृष्यन्ति अनेन पितृलोक एवाप्सरसां लोक इतिध्वनितम् ॥ २२ ॥

सम्परेते मृते मेरोर्दुहितृः पुत्रीः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

यत्र पितर इति तत्र पितृणामधिकारस्य वर्तनं इति ज्ञेयम् ॥ २२ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
प्रथमोऽध्यायः समाप्तः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

मातुरनुग्रहात्तदीयस्तनपानात् औत्पत्तिकेनैव स्वाभाविकेन संहननं दृढाङ्गत्वं शुभुजुः पालयामासुः ॥ २१ ॥

कामानां कामैः श्रुतिभिः श्रुत्युक्तताद्दशकर्मभिः तल्लोकमवरुन्धे प्राप मादयन्ते मोदयन्ते मोदन्ते ॥ २२—२३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
द्वितीयः पञ्चमेऽध्यायः सङ्गतः सङ्गतः सताम् ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

औत्पत्तिकेन स्वाभाविकेनैव गुणेन ॥ २१ ॥

काम्यन्ते इति कामाः विषयास्तैरतृप्तस्तृतीयार्थे षष्ठी अनुदिनं प्रतिदिनमपि अधिकं मन्यमानः श्रुतिभिर्वेदैरुपायभूतैस्तल्लोकमवरुन्धे प्राप यत्र प्राप्तं पुरुषं पितरो मादयन्ते ॥ २२ ॥

इति उदाहृताः संज्ञा यासां ताः उदवहन् परिणीतवन्तः ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वितीयाध्यायार्थप्रकाशः ॥ २ ॥

भाषाटीका।

आग्नीध्र के वे पुत्र सब माता के अनुग्रह से उत्पत्ति के स्वभाव से उत्तम शरीर बलसे युक्त होकर रहे थे पिता के विभाग करके देने से अपने नाम के तुल्य नामवाले जम्बूद्वीप के नौ वर्षोंको भोगने लगे ॥ २१ ॥

आग्नीध्रराजा कामों से तृप्त न होकर उसी अप्सरा को सर्वदिन अधिक मानता रहा फिर श्रुतियों से उसी अप्सरा के लोकको प्राप्त हुआ जहां पितृलोग आनन्द करते हैं ॥ २२ ॥

पिता आग्नीध्र के परलोक जाने पर नौ भ्राताओं ने मेरु की पुत्री मेरुदेवी प्रतिरूपा उग्रदंष्ट्री लता रम्या श्यामा नारी भद्रा देववीति इन संज्ञावाली नौ कन्यों के साथ विवाह किया ॥ २३ ॥

इति श्री भागवत पञ्चमस्कन्ध दूसरा अध्याय का
भाषानुवाद लक्ष्मणाचार्य कृत
समाप्त ॥ २ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

—○—

॥ तृतीयोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवन्तं यज्ञपुरुषमवहितात्माऽयजत ॥ १ ॥

तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयङ्गमं मनोनयनानन्दनावयवाभिराममाविश्चकार ॥ २ ॥

अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयाम्बरधरमुरसि विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालाच्छूर्यमृतमणिगदादिभिरुपलक्षितं स्फुटकिरणप्रवरमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावनतशीर्षाण उपतस्थुः ॥ ३ ॥

॥ ऋत्विज ऊचुः ॥

अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमोनम इत्येतावत्सदुपशिक्षितं कोऽर्हति पुमान्प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् ॥ ४ ॥

सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ॥ ५ ॥

परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वाङ्कुरैरपि सम्भृतया सपर्यया किल परम ! परितुष्यसि ॥ ६ ॥

अथानयापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ॥ ७ ॥

आत्मन एवानुसवनमञ्जसाऽव्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किन्तु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीये चरितं नाभेः परं मङ्गलमीर्यते ।
यस्य यज्ञे प्रतीतः सन्पुत्रोऽभूदृषभो हरिः ॥ १ ॥

नाभिराग्नीध्रसुतः अपुत्रया मेरुदेव्या भार्यया सह ॥ १ ॥

प्रवर्ग्यसंज्ञकेषु कर्मसु क्रियमाणेषु द्रव्यादयः सप्त ये योगा उपायास्तेषामुपपत्त्या सम्पत्त्या दुरधिगमो दुष्प्रापोऽपि भागवतेषु कृपालुतया सुप्रतीकः शोभनावयवः सन्नात्मानमाविश्चकार अपराजितं स्वतन्त्रं निजभक्तानां येऽभिप्रेतार्थास्तेषां विधित्सया गृहीतमाकृष्टं हृदयं चित्तं यस्य हृदयङ्गमं सुखकरं यतो मनो नयनान्यानन्दयन्ति येऽवयवास्तैरभिरामं सुन्दरम् ॥ २ ॥

अथ हेत्यादिनिपातद्वयं वाक्यालङ्कराय आविष्कृतम् भुजानां युगलद्वयं चतुष्टयं येन हिरण्मयं तेजोमयं पुरुषेषु विशिष्यत इतितया पुरुषोत्तममित्यर्थः अर्हणेनार्घ्येण सहोपतस्थुरभजन्नित्यन्वयः विलसन् श्रीवत्स एव ललामं चिह्नं यस्य दरवरः शङ्खश्रेष्ठः वनरुहं पद्मम् अच्छूरि चक्रम् अमृतमणिः कौस्तुभः एवमादिभिरुपलक्षितम् स्फुटकिरणा ये प्रवरा महार्घ्यरत्नमयानि यानि मुकुटादीन्यङ्गानां भूषणानि तैर्विभूषितं बहुमाने दृष्टान्तः अधना इवोत्तमधनं निधिम् ॥ ३ ॥

अर्हसीत्यादिना निगदेन स्तुवन्ति हे अर्हत्तम परिपूर्ण ! ऽपि त्वमनुपथानां भृत्यानामस्माकमर्हणां मुहुःस्वयमेव स्वीकर्तुमर्हसि न तु वयं स्तोतुं शक्ता इत्याहुः । नमोनम इत्येतावदेवास्माकं सद्भिरुपशिक्षितं तद्रूपस्य दुर्ज्ञेयत्वात् तदेवाहुः । कोऽर्हतीति । प्रकृतिगुणानां व्यतिकरः प्रपञ्चस्तस्मिन्नेव मतिर्यस्यात एवानीशः प्रकृतिपुरुषयोः परस्यात एवेश्वरस्यार्वाक्तनाभिरत्वाभस्पृक्ताभिः प्रपञ्चान्तर्गताभिर्नाम च रूपं चाकृतिश्चाकारस्ताभिस्तव रूपनिरूपणं कर्तुं को नाम पुमानर्हति ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स ह्येतन्मात्रमेवार्हतीति नातिक्रामन्त्याहुः । सकलजननिकायस्य वृजिनं निरस्यन्तीति तथा शिवतमाः प्रवराश्च ये गुणगणास्तेषामेकदेशस्तस्य कथनाद्धि नाधिकं नार्हति ॥ ५ ॥

वाङ्मनसागोचरोऽपि त्वं भक्तानां सुखाराध्य एवेत्याहुः । हे परम ! परिजनैरनुरागेण विरचिता ये शबलसशब्दा गद्गदाक्षरस्तुतयः सलिलं च सितांकिसलयाश्च शुद्धपल्लवाः शिलमिति पाठे शिलं कुशादिमञ्जरी एवमादिभिः सम्भृतया सम्पादितया पूजया परितुष्यसि ॥ ६ ॥

अथेति प्रकारान्तरे अन्यथा त्वनयेज्यया यागेनाप्युरुभारभरयानेकाङ्गसमृद्धयापि भवतः समुचितमपेक्षितं प्रयोजनं नैव पश्यामः ॥ ७ ॥

अत्र हेतुः । आत्मनः स्वत एवानुसवनं सर्वदाञ्जसा साक्षादपरिरक्षेण समन्वयेन बोभूयमाना अतिशयेन भवन्तो येऽशेषाः पुरुषार्थास्ते स्वरूपं यस्य परमानन्दस्य नचैवं सत्यपि यागानर्थक्यमित्याहुः । किन्त्विति । सकामानामस्माकमेवैतदुपपद्यते न तवेत्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रियव्रताग्नीध्रचरितमभिधायाग्नीध्रापत्यचरित्रमभिधित्सुस्तावन्नाभिचरितमाह । नाभिरिति तृतीयेन । अपत्यकामः सन्तानार्थी नाभिराग्नीध्रपुत्रः अप्रजयाविद्यमानसन्तानया मेरुदेव्या भार्यया सह समाहितचित्तः यज्ञपुरुषं यज्ञाराध्यं परमपुरुषमयजत् यज्ञैराराधितवानित्यर्थः ॥ १ ॥

अथवा कर्त्तव्यविषयत्वरया विशुद्धान्तःकरणेन च तस्य नाभेर्यजतः सतः प्रवर्ग्यनामकेषु यागेषु प्रचरत्सु प्रवर्त्तमानेष्वनुष्ठीयमानेषु द्रव्यादयः सप्त योगाः उपायास्तेषामुपपत्त्या सम्पत्त्या दुरधिगमो दुष्प्रापोऽपि भगवान् द्रव्यं हविर्देशः स मं-[illegible]जेतनि विहितः कालो वसन्तादिरूपः विधानं विधिरनुष्ठानप्रकारः भागवतेषु वात्सल्यं यस्य तस्य भावः तत्ता तया वत्सलतयेति पाठे भागवतेषु दयालुतया निजजनानां भक्तजनानामभिप्रेतार्थं विधित्सयाभिमतार्थनिष्पादनेच्छया इत्यर्थं तृतीया अध्ययनेन वसतीति धत् गृहीतहृदयः कृतसङ्कल्पः शोभनाः प्रतीकावयवा यस्मिन् तदेव प्रपञ्चयति हृदयङ्गमं चित्तापहारिणं तत्र हेतुः मनसां नयनानां च आनन्दयन्तीत्यानन्दनाः नन्द्यादित्वात्कर्त्तरि ल्युः तैरवयवैरभिरामं सुन्दरतमपराजितमकर्मबद्धमात्मानं दिव्यविग्रहमाविष्कृत्य प्रकटीचकार ॥ २ ॥

अथानन्तरं हेति विस्मये तमाविर्भूतं भगवन्तं कथम्भूतमाविष्कृतं भुजानां युगलद्वयं चतुष्टयं येन हिरण्मयं प्रकाशयुक्तं पुरुषे विशिष्यते इति पुरुषविशेषस्तं पुरुषोत्तममित्यर्थः कपिशं पिशङ्गं कौशेयं कृमिकोशोत्थजन्तुजन्यमम्बरं बिभ्रतमुरसि विलसच्छ्रीवत्स एव ललाम चिह्नं यस्य सः दरवरः शङ्खः वनरुहं पद्मं कुरि चक्रमसृणमणिः कौस्तुभः एवमादिभिरुपलक्षितं दकुरतिकरञ्चा ये प्रवरा मणयः [illegible] यानि मुकुटादीन्यङ्गानां भूषणानि तैर्भूषितस्तुरङ्ग [illegible] ऋत्विजः सदस्या गृहपतिर्यजमानस्तेषामितरेतरयोगे [illegible] ते निर्धना इवामत्तं धन-

मुपलभ्य यथा बहुमानयन्ति तथा अर्हणेन पूजापुरःसरमवनतशीर्षाणः नम्रशिरसः कृतप्रणामा इत्यर्थः उपतस्थुः समीपमेत्य स्तुतवन्तः धातूनामनेकार्थत्वादित्युपात धातुरत्र स्तुतौ वर्त्तते मन्त्रकरणकत्वाभावादोपान्मन्त्रकरणे इत्यात्मनेपदम् ॥ ३ ॥

स्तुतिमेवाह । अर्हसीत्यादिना । परमस्तुलायमगुणकथनेऽस्मीत्यर्थेन निगदेन त्वदायार्हणग्रहणात्सुकमपरिपूर्णं मां कथं स्तुवन्तीति शङ्कामपनुदन्त आहुः । हे महत्तम ! परिपूर्णोऽप्यनुपथानां भृत्यानामस्माकमर्हणां मुहुः स्वयमेव स्वीकर्तुमर्हसि परिपूर्णस्य तव नास्मदर्हणाग्रहणेन न्यूनतेति भावः न वयं कात्स्न्येन भवद्यागुणकथने प्रभवामः किन्त्वेकदेशकथन एवेति वदन्तः स्तुवन्ति नमोनम इत्यादिना एतत्इत्यनेन नमो नम इत्यादि तावदेवास्माकं सद्भिरुपशिक्षितं त्वत्स्वरूपस्वभावयोरानन्त्यात्कात्स्न्येन तत्कथनायोगात्केवलं नमो नम इत्येव कथनीयमिति सद्भिरुपशिक्षिता वयमित्यर्थः ॥ ४ ॥

एतदेवाहुः । कोऽर्हतीति । प्रकृतेर्गुणाः सत्त्वादयः तेषां व्यतिकरः परिणामः शब्दादिरूपः सद्भिरुपशिक्षिता मतिर्यस्य अत एवानीशः कर्मपरवशः अर्वाक्तनाभिः स्वकार्यभूताभिर्नामादिभिरुपलक्षितः तत्र नाम देवमनुष्यादिनामधेयं रूपं संस्थानमाकृतिस्तद्द्रव्यजातिःप्रकृतिपुरुषयोः परस्य विलक्षणस्येश्वरस्य तव स्वरूपनिरूपणं स्वरूपशब्दः स्वभावादेरप्युपलक्षणः कर्त्तुं को नाम पुमानर्हति सतीनावन्मात्रमेवार्हति नाधिकमित्याह । सकलजनानां निकायः समूहस्तस्य वृजिनं पापं निरस्यन्तीति तथा शिवतमाः प्रवराश्च ते गुणास्तेषामेकदेशस्तस्य कथनाद्धिता गुणलवकथनमेवार्हति न तु स्वरूपनिरूपणं स्वरूपस्वभावादीनामानन्त्यादिति भावः ॥ ५ ॥

यद्यपि समस्तपुरुषार्थस्वरूपस्य नित्यतृप्तस्य तव नानेन यागेनार्थस्तथापि "पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति" इति भक्तिपूर्वकाराधनस्य किञ्चिन्मात्रस्यापि स्वप्रीतिकरत्वं त्वयैव गीतमितीदं यजनं सूर्याय दीप इव किञ्चिदाराधनमात्रमित्याहुः । परिजनेत्यादिना अर्हतीत्यनेन परिजनैरनुरागेण विरचिताः शबलसंशब्दा गद्गदाक्षरास्तुतयः सलिलं विशुद्धजलं शिलं व्रीह्यादिमञ्जरीत्यर्थः सितानि पाठे सिताकिसलयाः शुक्लपल्लवाः एवमादिभिः सम्भृतया सम्पादितया पूजया परितुष्यसि किल ॥ ६ ॥

तस्मादन्योऽर्थो नास्तीत्याहुः । अनया इज्यया उरुभारभरयानेकाङ्गसम्भृतया भगवतस्तव समुचितं संमतमपेक्षितमर्थं प्रयोजनं नैव पश्यामः अत्र हेतुं वदन्तो विशिंषन्ति आत्मनः स्वत एवानुसवनं सर्वदा अञ्जसा साक्षादेधमाना अतिशयेन भवन्तो येऽशेषाः पुरुषार्थास्ते स्वरूपाणि यस्य नापेक्ष्यार्थोऽस्ति किन्त्विदमाराधनमात्रमित्याहुः । किन्त्विति । हे नाथ ! आशिषः पुरुषार्थानाशासानानामभीप्सतामस्माकमेतद्यजनं त्वदीयाराधनमात्रं भवितुमर्हति त्वत्सन्तोषजननद्वारा कामदुघत्वेन योग्यमेवेति भावः मानवा भगवतोऽननुरूपत्वं विवक्षितम् अननुरूपाराधनप्रकृतया परमकारुणिकत्वं च व्यञ्जितम् ॥ ७ ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

स्वभावतोऽव्यक्तोऽपि भगवान् भक्तवत्सलतया प्रत्यक्षोऽपि भवतीत्यतो हरौ भक्तिरेव कर्तव्येति विधीयतेऽस्मिन्नध्याये तत्र नाभिनाम्नो राज्ञोऽपत्यार्थं हरियजनप्रकारमाह। नाभिरिति। न प्रजा अपत्यं यस्याः सा तथा तया सह ॥ १ ॥

शुद्धभावेन शुद्धान्तःकरणेन शुद्धकर्मणा वा प्रवर्ग्येषु कर्मविशेषेषु प्रचरत्सु प्रवर्तमानेषु सत्सु दुरधिगमो दुर्ज्ञेयोऽपि द्रव्यदेशादीनामुपपत्त्या सम्पत्त्या भागवतेषु स्नेहातिशयेन च सुप्रीतो भगवान् गर्भवासादिदुःखैरपराजितं हृदयङ्गमं मनोहरं मनोनयनसुखकरं चारुतरकरचरणाद्यवयवोपेतमात्मानमाविश्चकार प्रत्यक्षीचकारेत्यन्वयः किङ्कार्यो भगवानित्यत उक्तम्। निजेति। योगो ध्यानम् ॥ २ ॥

निराकारं चेत्कथं ध्यानास्पदं स्यादित्यत आह। अथेति। आविष्कृतभुजयुगलद्वयं स्पष्टीकृतचतुर्भुजं हिरण्मयं "सुवर्णवर्णं कौशेयं कृमिकोशोत्थम्"इत्यभिधानम् विलसन् श्रीवत्स एव ललामं चिह्नं यस्य स तथा तं स्फूर्जामृतमणिगणप्रवराः स्फूर्जाः शाणोल्लीढा अमृतवद्धवलाश्च मणिगणश्रेष्ठाः एत एवादिर्येषां ते तथा तैः दरवरादिभिः शाणोत्तेजितधवलमणिगणश्रेष्ठादिभिश्चोपलक्षितं विशिष्टम् मुकुटं शिरस्त्राणं किरीटं मौलिः स्फुटकिरणानि फुल्लरश्मीनि प्रवराणि मणिमयानि मुकुटकिरीटादीनि स्फुटकिरणप्रवरमणिमयमुकुटकिरीटादीनि एतैरङ्गभूषणैर्भूषितमलङ्कृतमधना दरिद्रा उत्तमं धनं रत्नमुपलभ्य स बहुमानमर्हणेन पूजासाधनेन ॥ ३ ॥

अर्हसि मुहुरित्यारभ्येति निगदेनेत्यतः पूर्वतनो ग्रन्थ उपस्थानमन्त्रः हे अर्हत्तम! अनुपथानां भृत्यानां नोऽर्हणां त्वमर्हसि ग्रहीतुमिति शेषः मुहुरित्यनेनार्हणस्य भूयस्त्वं सूचयति। किन्त्वर्हणां तत्राह। नम इति। तत्र दोषलेशो नास्तीत्याह। सद्भिरिति। सद्भ्यः पुरुषेभ्यः उपशिक्षितत्वात्सत्प्रशस्तं नमो नम इत्येतद्व्यतिरिक्तनामादिकीर्तनस्मरणाद्यर्हणं किम क्रियत इति तत्राह। कोऽर्हतीति। नामरूपादिवेदनस्य श्रुत्यादिसिद्धत्वात्तत्कथमाक्षिप्यते इति तत्राह। प्रकृतीति। प्रकृतिगुणैः शब्दादिभिः व्यतिरेकः भ्रंशो यस्याः सा तथा तादृशी मतिर्यस्य स तथा अत एवार्वाक्तनमतिः बहिर्बुद्धिः तत्र कारणमनीश इति सर्वेश्वरस्य [illegible] सन्निवृत्तौ सामर्थ्याभावात्त्वदीश्वरत्वमनुपहतमिति भावेनाह। प्रकृतीति ॥ ४ ॥

तर्हि किमपि नार्हतीत्यत उक्तम्। सकलेति। सकलजनानां निकायस्य वृजिनं दुःखं निरस्यन्तीति वृजिननिरसनाश्च शिवतमा मङ्गलतमाश्च प्रवराश्च ये गुणगणास्तेषामेकदेशकथनमन्तरेणान्यत्किमपि नार्हतीत्यर्थः ॥ ५ ॥

गुणगणकथनात्मकस्य हरिपरितोषः कया विधया स्यादित्राह। परिजनेति। हे परम! परिजनैर्भृत्यजनैरनुरागेण विरचितः स्तवः स्तोत्रं तस्य लवः लेशस्तस्य संशब्दः कथनं सलिलं जलं किसलयः पल्लवस्तुलसी च दूर्वाङ्कुरश्च तैः स्तवजलादिभिः सम्भृतया सम्पादितया पूजया परितोषं यास्यसि किलेत्यन्वयः ॥ ६ ॥

नित्यतुष्टस्य कदाचित्परितोषो भक्तानुकम्पोन्मुखत्वं तन्वप्राप्तिलक्षणा इत्याह। अथेति। उरुसम्भारलक्षणो भारो यस्याः सा तथा तया सम्भारः साधनं भरः समूहः ॥ ७ ॥

कुतोऽमुष्य नार्थ इति तत्राह। आत्मनइति। स्वत एवानुसवनं सर्वदाऽऽसमासमुत्पन्नो व्यतिरेकेणाभेदेनानुबोभूयमानोऽत्यन्तमनुभूयमानोऽशेषःपूर्णः पुरुषार्थः सुखमनुबोभूयमानपुरुषार्थः स एव स्वरूपं यस्य स तथा तस्य तर्हि किमर्थमाराधनं क्रियत इति तत्राह। किंन्त्विति। किन्तु तवार्थो नास्त्येव तथापि हे नाथ! आशिषः आशासानानां कामयमानानामेतत्कर्मलक्षणं यजनं तवाभिसंराधनमात्रं केवलमनुग्रहलक्षणसिद्धिसाधनं भवितुमर्हति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पितृलोक काम इति तस्य स्त्रिया बन्ध्यात्वं गम्यते ॥ १ ॥

वक्ष्यमाणमनोनयनानन्दनावयवाभिरामत्वेऽपि भागवतवत्सलतया सुप्रतीकः परमसुन्दरः ॥ २—३ ॥

अर्हसीत्यादि गद्यानामिति निगदेनाभिष्टूयमान इति अथोद्घगद्येनान्वयः टीकायां निगदेन गद्यात्मकस्तोत्रेण स्तुवन्ति न तु वयं स्तोतुं शक्ता इति येन च स्तवेन तदङ्गीकुर्य्यास्तमपि कर्तुमित्यर्थः पन्थानं भक्तिमार्गमनुगतास्तत्सामीप्यमागताः ननु तमेव साक्षात् प्राप्ताः सकामत्वात्। तथा भूता ये तेऽनुपथास्तेषामपि पूजां मुहुरर्हसि स्वीकर्त्तुं योग्योऽसि तव कृपालुत्वादेव न तु वयं योग्या इति भावः तवोत्कर्षे विचार्यमाणे तु सर्व्व एवायोग्या इत्याहुः। नमोनम इति ॥ ४ ॥

तर्हि मदुत्कर्षोऽपि वर्ण्यतां तत्राहुः। कोऽर्हतीति। अर्व्वाक्तनाभिः प्रपञ्चान्तर्गतसादृश्येन स्फुरन्तीभिरित्यर्थः नाम च रूपञ्च आकृतिश्च जातिः ताभिस्तव रूपनिरूपणं याथार्थ्येन प्रतिपादनं कर्त्तुं को नाम पुमान् अर्हति तत्र हेतुः। प्रकृतिगुणेति। प्रकृतिगुणानां व्यतिकर आसङ्गः तदीयनामादीनां तद्वर्तीतत्वे हेतुः। ईश्वरस्य परस्येति। ननु तादृशत्वमनुसन्धायैव निरूप्यताम् तत्राहुः। अनीश इति। रूपनिरूपणं याथार्थ्येन प्रतिपादनं तर्हि तादृशेन ज्ञानेन तन्निरूपणं कीदृशं किं माहात्म्यं वा तत्राहुः। एकदेशत्वं यत् किञ्चित्त्वं तदाभास इति यावत् तादृशत्वेऽपि सकलेत्यादिमाहात्म्योऽस्तीत्यर्थः। तस्मादत इति। तदेव निरूपयितुमर्हतीत्यर्थः। अथवा अर्व्वाक्तनाभि स्वल्पप्रमाणाभिः। अनन्तानां स्फुरणासंभवात् रूपनिरूपणं सम्यक् स्वरूपप्रतिपादनं किं तर्हि तत्राहुः। सकलेति। यद्वा अर्व्वाक्तनाभिरिति कर्म्मोपासनादौ तत्तद्यतनाम्न्याभिनीभिरित्यर्थः। तर्हि केन निरूपणं स्यात्। तत्राहुः सकलेति ॥ ५ ॥ ६ ॥ ७ ॥

अव्यतिरेकेणाविच्छेद राहित्येन वोभूयमाना सातिशयेनाविर्भवन्त इत्यर्थः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

तृतीये नाभिनेष्टोऽभ्यज्ञे तुष्टोऽस्य नन्दनः।
त्वत्समो मे सुतोऽस्त्वेतद्वरं भुत्वा हरिः स्वयम् ॥०॥

नाभिराग्नीध्रस्य प्रथमः पुत्रः ॥ १ ॥

प्रवर्ग्यसंज्ञकेषु कर्मसु प्रचरत्सु संपद्यमानेषु द्रव्यादिभिः समाभिः शुद्धैः सह योगः भक्तियोगस्तस्य उपपत्त्या निष्पत्त्या

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

प्रतीकः सुन्दराङ्गः आत्मानं स्वदेहमाविश्चकार अपराजितं स्वैर्वशीकर्तुमशक्यमपि गृहीतहृदय आकृष्टचित्तः मनो नयनानन्दनैरवयवैः श्रीमुखाब्जादिभिरभिराममतिरमणीयम् ॥ १ ॥

हिरण्मयं प्रकाशबहुलं पुरुषेषु विशिष्यत इति पुरुषोत्तम इत्यर्थः । कपिशेति तेन श्यामवर्णमिति बुद्ध्यते । पीतांशुके लसिते श्रियेत्यत्र पीतांशुकपदेनात्र ध्वन्यते श्यामवर्णतेति श्रीभागवतामृतोक्तेः दरवरः शङ्खः वनरुहं पद्मम् चक्राभिक्रमममृतमणिः कौस्तुभः ॥ २ ॥

अर्हणीत्यादिगद्यानामिति निगदेनाभिगृणमान इत्यनेनान्वयः ।

परिपूर्णोऽप्यस्माकमप्यर्हणामङ्गीकर्त्तुमर्हसि तत्र हेतुः अनुपथानां पश्चात् भक्तियोगस्तमनुवर्त्तमानानां ननु साक्षात्त प्राप्तानां सकामत्वात् तदपि तव भक्तिसम्बन्धगन्धवत्त्यापि वात्सल्यादेवेति भावः ३ ॥

अस्माकमनुपथत्वेऽप्येतावदेव लक्षणमस्ति नाधिकमित्याहुः । नमो नम इति । सद्भ्यः सकाशात् शिक्षितं ननु पूजापरिचर्य्यास्तुत्यादिकं जानीम इति भावः ॥ ४ ॥

ननु विज्ञांसो मद्भक्ताश्च यूयं सर्वं जानीथेव तत् किं स्तोतुं संकुचथेति तत्राहुः । कोऽर्हतीति । लोके हि मुखाद्यङ्गानां चन्द्राद्युपमाभिः स्तुतिर्भवति । तवतु अर्व्वाक्तनाभिः प्रपञ्चान्तर्गताभिः नाम इन्द्रनीलमणयादिरूपं तच्छ्यामताकृतिस्तत्प्रतिमा ताभिः रूपस्य निरूपणामपि कर्त्तुं कोऽर्हति स्तुतेर्वार्त्ता तु दूरे वर्त्ततामित्यर्थः तव कीदृशस्य प्रकृतिपुरुषयोरपि परस्य नहि प्रकृतिपुरुषातीतं रूपं प्राकृतेन्द्रनीलमणयादिभिः सदृशी कर्त्तुमुचितमिति भावः । नन्वप्राकृतपदार्थैरेव मद्रूपमुपमीयतां तत्राहुः । गुणानां यो व्यतिकरः प्रपञ्चः तस्मिन् एव मतिर्यस्य सः प्राकृतजीवलोकस्याप्राकृतपदार्थेषु बुद्धिप्रवेशासम्भवादिति भावः । अतस्तव भक्तवात्सल्यगुणानां केनाप्यंशेन कीर्त्तनमात्रं कर्त्तुमर्हतीत्याहुः ॥५॥ सकलेति । भक्तवात्सल्यमेवाहुः ॥ ५ ॥

परिजनैर्भक्तजनैरनुरागेण विरचिता शवलसंशब्दा गद्गदाक्षरस्तुतयश्च सलिलादयश्च तैरपि सम्पादितया शिखेति पाठे शिखं सञ्चरी हे परम ! ॥ ६ ॥

अस्माकन्तु भक्तिर्नास्तीत्यतः कथं ते परितोषो भविष्यतीत्याहुः । इज्यया यागेन उरुभारभरया अनेकाङ्गसमृद्ध्यापि भवतः समुचितमपेक्षितं प्रयोजनं नोपलभामहे ॥ ७ ॥

तत्र हेतुः आत्मनः स्वतएवानुसवणं प्रतिक्षणमेव अञ्जसा साक्षादेव अव्यतिरेकेण व्यतिरेकं विच्छेदं विनैव वाभूयमाना अतिशयेन भवन्तो येऽर्थाः फलभूता आनन्दात्मकं स्वरूपं यस्यतचैवं सत्यपि यागानर्थक्यमित्याहुः । किन्त्विति । सकामानामस्माकमेतदेव सराधनमात्रमिति अस्मत्कर्त्तृकमेव ननु वस्तुतो भवत्कर्म्मकमित्यर्थः ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आग्नीध्रपुत्रस्य नाभेः यज्ञपुरुषाराधनरूपं कर्म भगवद्रूपं पुत्रं च दर्शयति । तृतीयेन नाभिरिति ॥ १ ॥

तस्य नाभेः विशुद्धेन भक्तिभाविनेन भावेनान्तःकरणेन यजतः सतः प्रवर्ग्यादिषु कर्मसु प्रचरत्सु क्रियमाणेषु द्रव्याणुरूपरया दुरधिगमोऽपि दुष्प्रापोऽपि भगवान् भागवतवत्सलतयाऽस्वातन्त्र्यजनहितकारित्वेन निजजनाभिमतार्थविधित्सया गृहीतहृदय आकृष्टचित्तः सुप्रतीकः शोभनावयवः सन् अपराजितमभक्तैर्देहाभिः साधनबलैर्द्रष्टुमनर्हमपि मनोनयनानन्दनानन्दयन्ति ये अवयवास्तैरभिरामं सुन्दरं हृदयङ्गमात्मानमाविश्चकार ॥ २ ॥

अथेति मङ्गलं हेतिरूपं अतिक्रान्तं भुजानां युगलं येन हिरण्मयमप्राकृतज्योतिर्मयं पुरुषेषु विशिष्यते इति पुरुषविशेषस्तं पुरुषोत्तमं कपिशकौशेयाम्बरधरं कपिशं पीतं कौशेयाम्बरं बिभ्राणमुरसि विलसत् श्रीवत्स एव ललामं चिह्नं यस्य तं दरवरः शङ्खः वनरुहं पद्मम् चक्रम् अमृतमणिः कौस्तुभः एवमादिभिरुपलक्षितम् स्फुटकिरणा ये प्रवराः श्रेष्ठाः मणयस्तन्मयानि यानि मुकुटादीन्यङ्गभूषणानि तैर्विभूषितमधना उत्तमधनं चिन्तामणिमिव उपलभ्य निकटं प्राप्य ऋत्विगादयः अर्हणेन अर्घ्येण सह बहुमानं यथा तथावनतशीर्षाणः कृतप्रणामाः उपतस्थुः स्तुष्टुवुः ॥ ३ ॥

हे अर्हत्तम ! अनुपथानामनुवर्त्तिनाम अर्हणामर्घ्यं मुहुः अर्हसि स्वीकर्त्तुं योग्योऽसि तव स्वरूपगुणादीनां दुर्ज्ञेयत्वात्साङ्गनेमो नम इत्येतावदेवोपशिक्षितम् तदेवोपपादयन्ति । कोऽर्हतीति । प्रकृतिगुणानां व्यतिकरः संसारस्तस्मिन् मतिर्यस्य सः अर्वाक्तनाभिः प्रकृतिगुणकार्यभूताभिः नामरूपाकृतिभिरुपलक्षितः अत एव अनीशः प्रकृतिपुरुषयोः मायाजीवयोः परस्य तव स्वरूपनिरूपणां कर्त्तुं कोऽर्हति न कोऽपीत्यर्थः रूपस्येयत्ताशून्यत्वात् तर्हि गुणा एव वर्णनीया अत आहुः । सकलानां देवमनुष्यादीनां जनानां निकायस्य समुदायस्य वृजिनानि पापानि निरस्यन्तीति तथा ते शिवतमाः मङ्गलतमाः प्रवराः श्रेष्ठाश्च ये गुणगणास्तेषामेकदेशः लेशमात्रं तस्य कथनादिते तव स्वरूपनिरूपणं च कर्त्तुं कोऽपि नार्हतीति यावत् ॥ ४ ॥ ५ ॥

एवमनन्तस्वरूपगुणस्त्वं स्वरूपतो गुणतश्च ज्ञातुमशक्योऽपि परिजनैर्भक्तैः अनुरागेण विरचिताः शवलसंशब्दाः गद्गदाक्षराः सगद्गद शब्दाः स्तवरूपाणि वाक्यानि सलिलानि च शिताः शुद्धाः किशलयाः पल्लवाश्च एवमादिभिः सम्भृतया संपादितया सपर्यया पूजया परितुष्यसि भक्तोदितां पूजां गृह्णासि स्वप्रयोजनार्थी तु तादृशपूजया कोऽपीदृकं कुर्यादिति भावः ।

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ।

इति श्रीमुखवचनमत्रानुसन्धेयम् ॥ ६ ॥

अथेति प्रकारान्तरे उरुभारानेकाङ्गसमृद्ध्या प्रयोजनार्थं पूजाग्रहणार्थं न भवत आत्मनः स्वतएव अनुसवनं सर्वदा अञ्जसा साक्षादेव तत्रापि व्यतिरेकेण अव्याकुलत्वेन वाभूयमानाः अतिशयेन भवन्तो ये अर्थाः पुरुषार्थास्तेषां स्वरूपस्य कारणस्य भवत इज्यया उरुभारभरया अनेकाङ्गसमृद्ध्यापि समुचितमपेक्षितमर्थं प्रयोजनं नैव पश्यामः ॥ ७ ॥

किन्तु आशिषः पुरुषार्थान् आशासानानामस्माकं एतत्कर्म अभिसंराधनमात्रमपि तत्सगुणं त्वदाराधनमात्रं सर्वपुरुषार्थदातृत्वेनानुग्रहं निमित्तमात्रं भवितुमर्हतीति । तव प्रयोजनार्थमित्यर्थः ॥ ८ ॥

———

तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपरमपुरुषप्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः ॥ ९ ॥

अथायमेव वरो ह्यर्हत्तम! यर्हि बर्हिषि राजर्षेर्वरदर्षभो भवान्निजपुरुषेक्षणविषय आसीत् ॥ १० ॥

असङ्गनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगण परममङ्गलायनगुणगणकथनोऽसि ॥ ११ ॥

अथ कथञ्चित्स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु ॥ १२ ॥

किञ्चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् ॥ १३ ॥

को वा इह तेऽपराजितोऽपराजितया माययाऽनवसितपदव्यानावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः ॥ १४ ॥

यदु ह वाव तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मन्दानां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्येन सर्वान् प्रतिवोढुमविदुषाम् ॥ १५ ॥

भाषाटीका ।

श्रीशुकदेवजी बोले नाभिराजाने पुत्रकी कामना से मरुदेवी भार्या के सहित यज्ञपुरुष विष्णु भगवान् का यजन किया ॥ १ ॥

तिनके अत्यन्तश्रद्धासे निर्मलभाव से यज्ञकरने से प्रवर्ग्य कर्मों के प्रचार होने से उत्तम द्रव्य देश काल मन्त्र ऋत्विग दक्षिणा विधि योग के संपत्ति से अपने भक्त जनों के मनोरथ सिद्ध करने में चित्त के वश होजाने से यद्यपि भगवान् दुर्लभ हैं तथापि भागवतों में अतिकृपा होनेसे सुन्दर शरीरको धारण करके भक्तों के मन नयन के मोद करने वाले अवयवों से युक्त अपने शरीर को प्रगट करतेभये ॥ २ ॥

हे महाराज! भगवान् की जो मूर्त्ति नाभिराजा के आगे प्रगट भई उस मूर्त्ति में चार भुजा प्रकाश मान हैं वह मूर्त्ति तेजोमय है और पुरुषाकृति है ऐसे पिङ्गलवर्ण के रेशमी वस्त्र को धारण कीये हुये हैं वक्षस्थलमें श्रीवत्सका चिह्न है और शङ्ख चक्र गदा पद्म वनमाला कौस्तुभादि शोभा से शोभित हैं बड़े तेज वाला मणिका मुकुट है कुण्डल कङ्कण कटिसूत्र हार केयूर नूपुर आदि सब भूषणों से मनोहर कान्ति हो रही है इसी से सब शरीर शोभित होरहा है तिससे ऋत्विक् सदस्य गृहपति ये सब मनोहर मूर्त्ति का दर्शन करके ऐसे होगये कि जैसे दरिद्र [illegible] बहुतधन के मिलने से होवे बड़ा मान कर के मस्तकों को नम्र करके सब सामग्री से पूजन करने लगे ॥ ३ ॥

ऋत्विक् कहने लगे हे पूज्यतम! हम लोग आपके भृत्य हैं आप परिपूर्ण हैं तौभी हम लोगों की पूजा को ग्रहण करने को वारम्वार योग्य हो हे प्रभो! हम लोगोंका ऐसा सामर्थ्य नहीं है कि जो आप की स्तुति कर सकें आप का स्वरूप बड़ा दुर्ज्ञेय है तिससे महात्माओं से हम ने आपको नमस्कार करना मात्र शीखा है हे ईश्वर! जिन पुरुषों का चित्त संसार में आसक्त है वे क्या कभी आप के स्वरूप का निरूपण करसके हैं प्रकृति पुरुष दोनों से पर आप ईश्वर हो तिन आप के स्वरूप का निरूपण नूतन नाम रूप आकृतियों से कौन पुरुष कर सक्ता है ॥ ४ ॥

सब मनुष्यों के समूह के पापों के नाश करने वाले कल्याणकारि आपके गुण गणों का एक देश के कथन से अधिक कोई नहीं जानता है ॥ ५ ॥

सेवकों के अनुराग से कीने प्रेम युक्त वचनों से समेत जल सफेद दूर्वा अङ्कुर तुलसी पल्लव इन्हो से करी हुई पूजा से भी हे परम! आप सन्तुष्ट होजाते हैं ॥ ६ ॥

और यह सिद्धि जो बड़ी भारी सामग्री सहित पूजा है तिस से भी आप का उचित मनोरथ को हम नहीं देखते हैं ॥ ७ ॥

अपने स्वरूप ही से आपको सब पुरुषार्थ अनायास से प्राप्त हो रहे हैं तब हे नाथ! जो लोग स्वयं मनोरथ को चाहते हैं वे क्या आपका आराधन कर सकेंगे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वोपयोगमेव प्रदर्शयन्ति । तद्यथेति । परमश्रेयोऽपि हे परमपुरुष प्रकर्षयुक्तया करुणया । उपकल्पयिष्यन् सम्पादयिष्यन् । पूजाराहित्यमिति च नापचितोऽनपचितोऽपूजित एव पूजानपेक्षत्वात्स्वय [illegible] मेवोपलक्षितो दृष्टोऽसि इतरवत्सापेक्षवत् ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यद्यपि त्वं वरान् दातुमाविर्भूतोऽसि तथापि हे अर्हत्तम ! राजर्षेर्बर्हिषि यज्ञे निजपुरुषाणां त्वद्भक्तानामस्माकमीक्षणविषयो भवान् यर्हि यदा आसित्तदा अयमेव वरः सञ्जातः ॥ १० ॥

दर्शनस्य दुर्लभतामाहुः । असङ्गेन वैराग्येण निशितं यज्ज्ञानं स एवानलस्तेन विधूता अशेषा मला येषाम् अतो भवत इव स्वभावो येषाम् । तानेवाहुः । आत्मारामाणामेवम्भूतानां मुनीनामपि परममङ्गलायनं गुणगणकथनमेव मत् दर्शनं यस्य अत एवैरनवरतं परिगणिता अभ्यस्ता गुणगणा यस्येति सम्बोधनम् ॥ ११ ॥

दर्शनेनैव कृतार्था अपि वरमेकं प्रार्थयन्ते । अथेति । स्मरणाय विवशानां त्वां स्मर्तुमशक्तानां नः ॥ १२ ॥

अन्यच्च प्रार्थनीयमस्तीत्याहुः । किञ्चेति । आशिषामैहिकानां स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति प्रजायामेव पुरुषार्थ इति प्रत्ययो यस्य अधनो यथा फलीकरणं तुषकणादिकमाशासानो धनदमुपधावति ॥ १३ ॥

इदं च नातिचित्रमित्याहुः । इह संसारे तेऽपराजितया मायया अनवसितपदव्या अलक्षितमार्गया पराजितः को वै न कोऽपि अनन्यया अनावृतमतिः कः अत एव विषय एव विषं तस्य रयो वेगस्तैरनावृता प्रकृतिर्यस्य स कः यद्यनुपासितमहच्चरणः अत स्त्वन्मायया मोहितस्यैवमाशंसा घटत इत्यर्थः ॥ ॥ १४ ॥

अदभ्रकर्मन् ! हे बहुकार्यकारिन् ! अल्पीयसे कार्याय त्वं यद्यस्मादिह समाहूतोऽसि तत्र प्रजायामर्थे धीर्येषां मन्दानां तेषां नो यद्देवहेलनमवज्ञानं तत्सर्वाभ्प्रति तव साम्येन हेतुना प्रतिवोढुं सोढुमर्हसि ॥ १५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव स्पष्टयन्त आहुः । तदिति । हे परमपुरुष ! तत्तदा आराधनसमय एव नापचित पत्रानुरूपमनाराधित एव प्रकृष्टकरुणया स्वमहिमानं महत्त्वैश्वर्यादिरूपं मोक्षाख्यमाविष्कृतगुणाष्टकमस्पृष्टिरेव हि मोक्षप्रकारादस्मत्समीहितं च फलमुपकल्पयिष्यन्निर्वर्तयिष्यन् त्वमितरवत्परिपूर्णोऽप्यपरिपूर्ण इव नोऽस्माभिरिह यागे यथा यथावदुपलक्षितः दृष्टोऽसि नः कथम्भूतानामात्मनः स्वस्य परमुत्कृष्टं श्रेयः पुरुषार्थमविदुषामत एव बालिशानाम् ॥ ९ ॥

परमकारुणिकात्समस्तपुरुषार्थस्वरूपाद्भगवतो राज्ञा प्रार्थनीयस्य पुत्रस्य क्षुद्रपुरुषार्थतामाविष्कर्तुमतिदुर्लभस्य भगवद्दर्शनस्यैव कैमुत्यनयेन निरतिशयपुरुषार्थतामाहुः । अथेति । अर्हत्तम राज्ञोऽभिमतान् दातुं यद्यप्याविर्भूतोऽस्यथाप्ययमेव वरःसञ्जातः कोऽसावित्यत्राहुः । यर्हि वाव । यदा हि राजर्षेर्बर्हिषि यज्ञे वरदश्रेष्ठो भवान्निजजनानां पुरुषाणां त्वद्भक्तानामस्माकमीक्षणविषयः आसीदिति यत् असङ्गेन वैराग्येण निशितं यज्ज्ञानं तदेवानिलस्तेन विधूता अशेषा मलाः येषामात्मारामाणां प्रकृतिविविक्तब्रह्मात्मकस्वात्मयाथात्म्यानुसन्धानपराणां भगवत्स्वभावानां भगवत्समानधर्माणां मुनीनां कर्तरि षष्ठी मुनिभिरनवरतं सर्वदा परिगुणितैः गुणगणाः यस्य तस्य सम्बोधनमीदृशस्य तव गुणगणकथनमेव परममङ्गलायनं निरतिशयश्रेयःसाधनं किमुत्वद्दर्शनमित्यर्थः ॥ १० ॥ ११ ॥

यतः त्वद्गुणकथनं परममङ्गलायनमतस्तदेवायुक्तास्वपि दशासु नो भूयादिति प्रार्थयन्त आहुः । अथेति । अथ ननु भगवतः क्षुदादिव्यसनयुक्तदशासु तत्र तत्र स्खलनं चलनं पतनकर्मकत्वात् दुरवस्थानं दुःस्थितिनावस्थानमादिशब्देनाशुचित्वादवस्थान्तरसङ्ग्रहः तथा ज्वरदशायां मरणदशायां च परवशानामस्माकं श्रीमतस्तव चरणारविन्दस्मरणाय चरणारविन्दं स्मर्तुं सकलानां कश्मलानां निरसनानि निवर्तकानि गुणकृतनामानि नामधेयानि कल्याणगुणप्रवृत्तिनिमित्तकानि तव नामानि वचनगोचराणि उच्चारणविषयाणि भवन्तु ॥ १२ ॥

इदमिदानीं राज्ञा प्रार्थनीयमस्तीत्यावेदयन्त आहुः । किञ्चेति । अयं राजर्षिर्नाभिः पुत्रं कामयमानः तत्रापि भवादृशं त्वत्सदृशं प्रजामाशासानः आशिषामैहिकपुरुषार्थानां स्वर्गापवर्गयोश्च ईश्वरं प्रदातारं भगवन्तं षाड्गुण्यपूर्णं त्वां प्रजायामेव पुरुषार्थ इति प्रत्ययो यस्य सः उपधावति अनुवर्तते भजतीत्यर्थः तत्र दृष्टान्तः यथाधनो दरिद्रः फलीकरणं तुषकणादिकमाशासानो धनदं कुबेरमुपधावति ॥ १३ ॥

इदं च नातिचित्रमित्याहुः । इह सं सारेऽनुपासितमहच्चरणो यदि भवेत् उपासितमहच्चरणं जनं विनेत्यर्थः तथा अपराजितया कर्मवश्यैरनभिभूतया अनवसितपदव्या अलक्षितमार्गया सत्यर्थान्तरोपायिकया अलक्षितः को वै न कोऽप्यतस्त्वयानावृतमतिकः अत एव विषया एव विषं तस्य रयो वेगः तेनानावृता प्रकृतिर्यस्य सः अतस्त्वन्मायामोहित स्यैवमाशंसा घटत इत्यर्थः ॥ १४

अतिदुर्लभसमस्तपुरुषार्थभूतस्तव स्वपुत्राशंसार्थमाह्वानं हेलनमिवातस्तत् क्षन्तुमर्हसीति विज्ञापयन्त आहुः । यदुहवावेति । हे अदभ्रकर्तः ! बहुकार्यनिष्पादक ! उदारव्यापारकारिन्नवितथकर्म सत्यसङ्कल्प इतिवार्थः हे देवदेव देवानां ब्रह्मादीनामपि देव हे सर्वात्मन्नल्पीयसे प्रयोजनाय यद्यस्मादाहूतोऽसि ततस्तदर्थिनया तत्र प्रजायामर्थधीः पुरुषार्थबुद्धिर्येषामत एव मन्दानां नोऽस्माकं देवहेलनं देवस्य तव हेलनमाह्वानरूपमवज्ञानं तव साम्येन हेतुना प्रतिवोढुं सोढुमर्हसि ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्कथमत्राह । तदिति । हे परमपुरुष ! यत्तत्प्रमेयं यथा तथा प्रतिपादयामस्तथाहि परं परमं श्रेयोऽविदुषामज्ञानतामत एव बालिशानां शिशुवत्स्थितानां नः मम्बन्धिन्या प्रकृष्टया कृपया चशब्द एवार्थे अपवर्गाख्यं संसारमोक्षलक्षणं महिमानमुपकल्पयिष्यन् समर्पयमानः स्वयमनपचितः स्वानुग्रहलक्षणायत्नायत्त एव इतरवत्परप्रयत्नोपाचितवदुपलक्षितः प्रकाशित इति यस्मात् ॥ ९ ॥

अथ तस्मात् हे अर्हत्तम ! परं फलप्राप्त्यनन्तरमपि ध्यायेमहि यामः त्वद्विषयामर्हणक्रियां प्रार्थयामहे कस्मादित्यत्राथैनामित्याशङ्क्य फलदर्शनादित्याहुः । यर्हीति । स्वभक्तानां दृष्टिविषय आसीदिति यर्हि यस्मात्तस्मादिति शेषः बर्हिषि यज्ञे ॥ १० ॥

मुनीनामिति षष्ठी तृतीयार्थे मुनिभिर्नित्यं परिगणित...

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गुणगणानां परममङ्गलायतनं स्वरूपसुखविषयं कथनं कीर्तनं यस्य स तथा असङ्गेन निशितं तीक्ष्णं यज्ज्ञानं तदेवानलोऽग्निस्तेन विधूतानि निर्मूलितानि समस्तरागादिमलानि येषां ते तथा तेषां भग [१] वत्स्वभावानां सात्त्विकानाम् ॥ ११ ॥

किमत इति तत्राह । अथेति । यत एवममितमाहात्म्यस्त्वमतोऽथ तस्मादस्माकं तव गुणकृतनामधेयानि श्रीमच्चरणारविन्दस्मरणाय वचनगोचराणि भवन्त्वित्यन्वयः ज्ञानानन्दादिगुणाः कंसहननादिकृतानि नारायणादिनामानि च सदा प्रसन्नस्वेऽस्येषु सर्वथेति भावेनाह । स्खलनेति । न केवलं तात्कालिकफलदानि किन्तु पारत्रिकफलदानीत्याशयेनोक्तम् । ज्वरेति । दुरितसङ्घाते कथं पारत्रिकफलदानि स्युरित्यत उक्तम् । सकलेति । दुःखस्थानं प्रशमादिकम् ॥ १२ ॥

अन्यच्च प्रयोजनमस्तीति विज्ञापयन्ति । किञ्चेति । ऐहिकीनामाशिषामीश्वरं न केवलमासामीश्वरं किन्तु स्वर्गापवर्गयोरपीति उपधावति । शरणमाप्नोति पुरुषार्थप्रदं त्वां प्राप्य प्रजालक्षणं तुच्छफलमाकाङ्क्षितं कथमिति तत्राह । प्रजायामिति । अर्थप्रत्ययः पुरुषार्थबुद्धिः अत्र दृष्टान्तमाह । धनदमिति । फलीकरणं क्षुद्रकणं पलञ्जं (२) वा न कोऽपि याचत इत्यर्थः ॥ १३ ॥

तर्हि कीदृश ईहत इति तत्राह । अपराजितेति । हे अपराजित ! हरेः प्रसादं विना त्वपराजितया मायया मोहकशक्त्यानवसितमनिश्चितं यत्पदं स्वरूपं तत्त्वलक्षणं तस्य ध्याने व्यावृत्ता मतिर्यस्य स तथा कुतस्तत्राह । अनुपासितेति । तत्रापि कारणमाह । विषमेति । प्रकृतिः स्वभावः एवं विध ईहत इत्यर्थः अधनो दरिद्रः धनमपेक्षिताशेषपुष्टिं ददातीति धनदः ॥ १४ ॥

तं मुनयः स्वोत्कर्षाधिकमिति मन्वाना भगवत्क्षमां प्रार्थयन्ते । यदिहेति । हे अदभ्रकर्तेरनल्पकर्तः दूर्वाङ्कुर [३] चितस्य हरेरनाद्यनन्तकालीनानन्दपानन्दरूपमुक्तिदत्वादेवदत्तद्दत्तमेवस्वरूपस्य विष्णुमित्रस्य काकिणिकाधनदत्वदर्शनाद्येति राज्ञः पुत्रार्थमेनेह समाहूत इति यत्तदर्थेभिधां तत्प्रयोजनबुद्धीनां मन्दानां स्तुत्यादावपटूनां राज्ञोऽयं यत्तधाह्वानं विष्णुनायाहीनि तत्कलनमवज्ञानं साम्येन तत्तत्स्तुयोग्यतादर्शनेन प्रतिबोद्धुं क्षन्तुमर्हसीत्यन्वयः ज्ञानपूर्वाह्वानश्चेत्कथं क्षान्तिवचनमित्यत उक्तमनुग्रामिति ॥ १५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वस्य महिमानौश्वर्यमस्पर्शमित अपवर्गोऽस्मीति तस्यैवापवर्गं इति मतेत्यर्थः । उपकल्पयिष्यन् साक्षात्कारयिष्यन् नापचित अर्चित । पूजासम्पादकभक्त्यभावादिति भावः ॥ ९ ॥

यथापि तत्र अत्र इत्यति कश्चित् निजपुरुषस्तुणविषयोऽपि भवन्निति यर्हिहि यज्ञमात्रे यर्हि यदासीदयमेव वर इत्यर्थः ॥ १० ॥ ११ ॥

गुणाकृतानि च लीलानामधेयानि च ॥ १२ ॥

यजमानस्य स्वापराधमपि निवेदयितुं सङ्कुचन्तः परमात्मीयत्वेनाभिप्रायेण च तन्निवेदनीयमेव निवेदयन्ति । किञ्चेति । प्रथमं तावत् प्रजामाशासानः आशिषामैहिकानां स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति यथा फलीकरणमाशासानो धनदमुपधावति तद्वदिति परममौढ्यं न च तावतैव स्थितिः किन्तु मादृशीमाशासान इति धार्ष्ट्यं चेत्यर्थः ॥ १३ ॥

अनुपासितमहच्चरण इति सम्प्रति तेनोपास्यमीनं स्वमपि तुच्छी कुर्वन्ति ॥ १४-१९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

ननु तर्हि कथं सन्तुष्टोऽहं युष्मत्प्रत्यक्षीभूतोऽस्मीति तत्राहुः तत्तस्मात् यथा याचितानामज्ञानामपि समीपमनाहूतोऽप्यपूजितोऽपि विभुः कृपावशात्तानुद्धर्तुमायाति तथैव त्वं परमेश्वरोऽपि परमः पुरुषः प्रकर्षयुक्तया निरुपाधिकया करुणया स्वमहिमानं स्वमहैश्वर्यं तदनुभवमित्यर्थः अपवर्ग इत्याख्या यस्य तं चकारात् कामितं वस्तु च उपकल्पयिष्यन् दास्यन् स्वयं नापचित एवास्मद्भक्त्यभावादपूजित एव इतरवत् यज्ञकौतुकदर्शी इतरजन इव ॥ ९ ॥

यथा तथा भवतु यूयन्तु वरं वृणुतेति चेत तत्राहुः । अथ हायमिति । निजपुरुषाणां स्वभक्तानामीक्षणविषयोऽपि भवान् यर्हि यदा राजर्षेर्बर्हिषि यज्ञेऽत्यासीत् आविर्भूदयमेव वर इत्यन्वयः ॥ १० ॥

सत्त्वैरति दुर्लभात् त्वद्दर्शनादप्यधिको वरो वरणीय इति मूढानामेव मतं न तु विज्ञानामित्याह । असङ्गेन वैराग्येण निशितं यज्ज्ञानं स एवानलस्तेन निर्धूताशेषसकामत्वमलानां भवत्येव स्वीयो भावो दास्यादिर्येषामत एवात्मनि स्वरूपे आसक्त्येव रममाणानां मुनीनां परममङ्गलायनं गुणगणकथनमेव न तु दर्शनं यस्य अतस्तैरनवरतं परिगुणिता अभ्यस्ता गुणगणा यस्येति सम्बोधनम् ॥ ११ ॥

अस्माकं त्वस्थिरमनसां मन्दानामेतावत्तु भवत्वित्याहुः । अथेति । त्वद्दर्शनप्राप्त्यनन्तरमित्यर्थः स्मरणाय विवशानां त्वां स्मर्त्तुमसमर्थानाम् ॥ १२ ॥

किञ्चेति । निवेदयितुमयोग्यमप्यावश्यकत्वेनैकं निवेदयाम एवेत्यर्थः । अयमस्मद्यजमानो राजर्षिरपत्यकामः अपत्यं देवतान्तरयजनेनापि भवति तदपि त्वां भगवन्तमुपधावति ननु तदप्यहं स्वर्गापवर्गादिकमपि दास्यामीत्याशङ्कायामाहुः । आशिषामैहिकानां स्वर्गापवर्गयोरीश्वरमप्युपधावति अथ च प्रजायामेव अर्थः पुरुषार्थः इति प्रत्ययो न त्वपवर्गादिषु यस्य स इति मौढ्यम् अधनो यथा फलीकरणं तुषकणादिकमाशासानो धनदमुपधावतीति तत्रापि प्रजां भवादृशीमाशासान इति धार्ष्ट्यं च पश्येति भावः ॥ १३ ॥

नचास्य दोष इत्याहुः । को वा इति । इह संसारे अपराजितया केनापि पराजेतुमशक्यया अनवसितपद्व्या केनाप्यलक्षितमार्गया मायया को वा अनावृतमतिः न कोऽपीत्यर्थः ते तव कीदृशस्य पराजितः मायां पराजयत इति पराजित् किंवन्तम तस्य अनुपासितेत्युपासितमहच्चरण एवैको मायां निस्तरति राजर्षिरयन्तु न तादृश इति भावः ॥ १४ ॥

(१) भगवति स्वयोग्यो भावो भक्तिर्येषान्ते तथा ।

[२] पलञ्जं तिलचूर्णं चेतिमोदिनी ।

[३] अनल्पकर्त्तॄनामुपपादयति ।

॥ श्रीशुक उवाच ॥

इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह॥१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यजनस्य सकामत्वलक्षणमपराधं क्षमयन्तः स्तोत्रमुपसंहरन्ति। यदि हेति। हे अदभ्रकर्त्तः! अनल्पकारिन् ब्रह्मादिदुर्लभं त्वद्दर्शनमपि सकामेभ्योऽप्यस्मभ्यमदा इति भावः। यत् त्वमिह समाहूतस्तत्तेन अर्थाचयां सकामानामस्माकं यद्देवस्य तव हेलनमवज्ञानं तत् प्रतिबोद्धुं सोढुमर्हसि तत्र हेतुः हे देवदेव सर्वान् प्रति यत्तव साम्यं तेन ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अतोऽस्मदाराधनं निमित्तीकृत्य अस्मत्प्रयोजनार्थमाविर्भूतोऽसीत्याहुः। तथैवेति। हे परम! परमपुरुषः पुरुषोत्तमः भवान् परं मोक्षाख्यं श्रेयोऽविदुषामतो यथायथावत् बालिशानामसुखे सुखमानिनां बुभुक्षूणामप्यस्माकं तत्तस्मादाराधनमात्रेन आत्मनः प्रकृष्टया करुणया अपवर्गाख्यं स्वमहिमानं स्वज्ञानं स्वमाधुर्यं चकारात्कामितं च स्वयमुपकल्पयिष्यन् सम्पादयिष्यन् नापचितः अस्माभिरनुपकृतः पंक्तिरवदुपकृतवदुपलक्षितो दृष्टोऽसि ॥ ९ ॥

तत्र मुख्यकामितं त्वद्दर्शनमित्याहुः। अथायमेति ॥ १० ॥

भगवद्दर्शनस्य दौर्लभ्यमाहुः। असङ्गेति। हे अनवरतपरिगृणितगुणगण! अनवरतैर्नित्योद्युक्तैः परिगृणिता प्रशस्ता गुणगणा यस्य एवम्भूत! असङ्गेन कुटुम्बादिसङ्गत्यागेन निशितं यज्ज्ञानं तद्धेयानलस्तेन विधूताशेषमलानां भवति भजनीये स्वभावोऽनन्यनाथत्वलक्षणो येषां तेषामत एव आत्मनि त्वयि भजनीये रमणशीलानामेवं विधानां मुनीनामपि परममङ्गलायनं गुणगणकथनमेव नतु दर्शनं यस्य सोऽसि ॥ ११ ॥

हरिनामकीर्तनादीनां भक्तिभेदानां दुर्लभत्वं सूचयन्तो हरिनामकीर्तनरूपां भक्तिं प्रार्थयन्ते। अथ कथमिति ॥ १२ ॥

प्रस्तुतं कामितं प्रार्थयन्ते। किञ्चेति। आशिषामैहिककामानां धनधान्यादीनां स्वर्गापवर्गयोश्चेश्वरं दातारं त्वामुपधावति प्रजायां पुत्रे अर्थः पुरुषार्थः इति प्रत्ययो यस्य सः फलीकरणं तुषकणादिकमाशासानोऽधनो यथा धनदमुपधावति तद्वत् ॥ १३ ॥

त्वन्मायया मोहितानां पुत्राद्यर्थप्रार्थनं युक्तमेवेत्याहुः। क इति। अनवसितपदव्या दुर्गमं मायया गुणमय्या शक्त्या कः अनावृतमतिः अनावृतज्ञानः अत एव अदभ्रविजयः इति कारणानावरणो दर्शितः कार्यमावरणं दर्शयति विषयविषाग्निरिव विषं तस्य रयेनेरितानावृता प्रकृतिर्यस्य स च कः। उपास्य तमहच्चरणं विना न कोऽपीत्यर्थः ॥ १४ ॥

• अल्पीयसि प्रयोजने समाह्वानं तथ हेलनं कृतं तत्क्षमस्वेत्याहुः। हे अदभ्रकर्त्तः! अनल्पकारिन्! अल्पीयसि प्रयोजनाय यद्यस्मादिह यज्ञे समाहूतोऽसि तत्र अर्थाचयामर्थं पुत्रलाभं धीयेभ्यो नोऽस्माकं यद्देवहेलनं तत्सर्वान् प्रति तव साम्येन हेतुना हे देवदेव! प्रतिबोद्धुमर्हसि ॥ १५ ॥

भाषाटीका।

हम लोग मूर्ख हैं अपने परम कल्याण को नहीं जानते हैं हे परम पुरुष परम करुणा से आपकी महिमा मोक्ष नामक फल देने के लिये आप पूजित न होकर भी और सकाम देवता से इहां देख पड़े हो ॥ ९ ॥

हे अर्हत्तम यही एक हमारा वर है जो कि आप राजर्षि नाभिके यज्ञ में वर दाताओं में श्रेष्ठ होकर निज पुरुषों के नेत्र गोचर भये हो ॥ १० ॥

संसार के वैराग्य से तीक्ष्ण ज्ञानरूपी अग्निसे जिनके सब मल नष्ट होगये हैं आपके सदृश जिनके स्वभाव हैं जो आत्माहीमें रमते हैं ऐसे मुनिगणों के निरन्तर गानकरने के योग्य परममङ्गल दायक गुणों से आपका गान होता है ॥ ११ ॥

हे प्रभो! अब हम लोगोंको किसीप्रकार ठोकर लगकर गिरने में छींकनेमें जमुहाई में कोई दुर्दशा में परवश होजाने से भी ज्वरमें मरण के समय में भी सब पापों के नाश करने वाले आप के गुणों के नाम हमारे वचन के या स्मरण के गोचर होवें यही प्रार्थना है ॥ १२

और भी यह नाभिमहाराज पुत्रकी कामनावाले होकर आपसरीखे के पुत्रको चाहते हैं आपका पूजन करते हैं आप सब संपत्तियों के तथा स्वर्ग मोक्ष के स्वामी हो जैसे कुबेर के पास कोई धान के छिलका मांगे वैसे इन की केवल भोगार्थ में बुद्धि है ॥ १३ ॥

संसार में ऐसा कौन है कि जो महापुरुषों के चरणों के बिना उपासना किये विषयरूप विषसे जिसकी बुद्धि भ्रान्त नहोगई हो और जिस के मार्गको कोई नहीं जानसकता है वह सबको जीतने वाली है उस को कोई नहीं जीतसक्ता है उस माया के वस न हुआ ऐसा कौन होगा कोई नहीं है ॥ १४ ॥

हे प्रभो! सकल कर्ता आपको जो हम लोगोंने इहां बुलाया है सो हम लोग प्रयोजन मात्र में बुद्धिरखने वाले हैं यह जो आपकी अवज्ञा है तिसको आप अपनी समदृष्टि से सहन कीजिये हम लोगोंका और आपको उद्धारना होगा॥१५॥

श्रीधरस्वामिकृतभावार्थदीपिका।

इति निगदेन गद्यात्मकस्तोत्रेण वर्षधरैर्नाभिप्रभृतिभिरभिवादिता ये ऋत्विजस्तैरभिवन्दितौ चरणौ यस्य ॥ १६ ॥

॥ श्रीभगवानुवाच ॥

अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलम् ॥ १७ ॥

तत आग्नीध्रीयेंऽशकलयाऽवतरिष्याम्यात्मतुल्यमनुपलभमानः ॥ १८ ॥

॥ श्रीशुक उवाच ॥

इति निशामयन्त्या मेरुदेव्याः पतिमभिधायान्तर्दधे भगवान् ॥ १९ ॥

बर्हिषि तस्मिन्नेव विष्णुदत्त ! भगवान् परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान् दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया तनुवाऽवततार ॥२०॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे

पारमहंस्यां संहितायां वैयासिक्याम्

तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुजभावे हेतुः ममाहमेवाभिरूपः सदृशः कैवल्याद्द्वितीयत्वात् द्विजेषु देवा इव ये ब्राह्मणास्तेषां कुलम् ॥ १७ ॥

आग्नीध्रीये नाभौ ॥ १८ ॥

पतिं नाभिम् ॥ १९ ॥

हे विष्णुदत्त! तस्यावरोधायनेऽन्तःपुरे मेरुदेव्यां शुक्लया शुद्धसत्त्वरूपया मूर्त्याऽवततार केषां धर्मान् वातरशनानां दिग्वाससां पार्षण्डव्यावृत्त्यर्थमाह । श्रमणानां तपस्विनामृषीणां ज्ञानिनां ऊर्ध्वमन्थिनां नैष्ठिकब्रह्मचारिणाम् ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

इत्थं निगदेन गद्यात्मकसूक्तेनाभिष्टूयमानो भगवान् देवोत्तमो [illegible] वर्षधरः भारतवर्षधारको नाभिस्तेनाभिवन्दितौ ऋत्विग्भिरभिनन्दितौ चरणौ यस्य सः सदयं दयासहितमिदं वक्ष्यमाणं वाक्यमाह ॥ १६ ॥

अहो ऋषयः! अवितथगीर्भिः सत्यवाग्भिर्भवद्भिरसुलभं दुर्लभं वरं प्रत्यहमभियाचितः प्रार्थितः बतेत्याश्चर्ये कोऽसौ दुर्लभो वरस्तत्राह । मया सदृशः आत्मजो भूयादिति कथं तस्य वरस्य दौर्लभ्यं तत्राह । ममाहमेवाभिरूपः सदृशः कुतः कैवल्यात्प्रकृतिपुरुषविलक्षणत्वभावात् "न तत्समश्चाभ्यधिकश्च दृश्यते न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य" इत्युक्तरीत्या प्रकृतिपुरुषविलक्षणसमाभ्यधिकरहितस्य सदृशान्तराभावान्मत्सदृशरूपो वरोऽतिदुर्लभ इत्यर्थः यद्यप्ययं वरोऽतिदुर्लभस्तथापि हि यस्माद्द्विजदेवकुलं द्विजा एव देवास्तपोविद्यादिभिर्दीप्यमानास्तेषां कुलं ममैव हि मुखं "ब्राह्मणोऽस्य मुखमासीदिति,, उक्तरीत्या मुखं ततो ब्रह्मवादः ब्रह्मकुलस्य मन्मुखभूतस्य वादो वचः मृषा मिथ्या न भवितुमर्हतीत्यहमेव मत्सदृशमन्यमनुपलभमानः कलयांऽशेनाग्नीध्रीये नाभिसम्बन्धिनि क्षेत्रे मेरुदेव्यामवतरिष्यामीत्येवं मेरुदेव्याः निशामयन्त्याः शृण्वन्त्या सत्याः तत्पतिं नाभिं प्रत्यभिधायोक्त्वा भगवान् यज्ञपुरुषोऽन्तर्दधेऽन्तर्हितवानित्यर्थः ॥ १७—१८—१९ ॥

हे विष्णुरात ! राजन् तस्मिन् बर्हिषि यज्ञे एवं महर्षिभिः प्रसादितः आराधितो भगवान्नाभेः प्रियमिष्टं कर्तुं चिकीर्षितुमिच्छया तदवरोधायने नाभेर्भार्यायां मेरुदेव्यां शुक्लया सत्त्वप्रधानया तन्वावततार किं कर्तुकामः वातरशनानां दिग्वाससां पाषण्डव्यावृत्त्यर्थमाह । श्रमणानां तपस्विनामृषीणां ज्ञानिनामूर्ध्वमन्थिनां नैष्ठिकब्रह्मचारिणां धर्मान् दर्शयितुकामः अयमंशावतारः कपिलः तावन्मात्रकृत ईश्वरत्वव्यपदेशः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निगदेन महिमाविष्कर्तॄणां स्तुतिवचनेन अनिमिषाणामृषभो देवानां श्रेष्ठः वर्षधराभिवन्दितचरणः [१] नाभिवन्दितश्रीपादः ॥ १६ ॥

किमाहेति । तत्राह । अहो इति । अहो विस्मयोऽयं बत तुष्टोऽहं "अहो हि विस्मय" "इतियादवः" "बताभिमन्त्रणे भूते तोषे खेदे कृपायां चेति" च हे ऋषयो ! वितथगीर्भिः सत्यवचनैः भवद्भिर्मया सदृशः आत्मजो भूयादिति यं वरमभियाचित इतियदेतदसुलभं तत्कुतोऽत उक्तम् । ममेति । अभिरूपः प्रतिरूपः एतदपि कुत इत्यत उक्तम् कैवल्यादिति । अद्वितीयत्वात् तर्ह्येषामृषित्वं मुनित्वं च गतमेतद्बुद्धिनाशस्थज्ञानाभावादिति चेन्न भगवदुक्त्या

[१] भरतखण्डाधिपो नाभिः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

श्लोकज्ञापनपरत्वाद्दर्शनायाः नत्वद्वितीयत्वाज्ञानात्तदुक्तम्। "नास्ति विष्णोः समम्" इति आनन्तोऽप्यृषयः सदा तज्ज्ञापनाय लोकानामन्वे च प्रार्थयन् सममिति अन्ये कश्यपादयोऽपि हरिणा समं सुतमर्थयन्त इत्यर्थः एवं चेत्तद्भगवदुक्तमपि विप्रवचोऽङ्गीकृतमपहासकमिति तत्राह। अथापीति। कर्तव्यत्वे हेतुमाह। ममैवेति। द्विजदेवानां ब्राह्मणश्रेष्ठानाम् ॥ १७ ॥ १८ ॥

निशामयन्त्याः पश्यन्त्याः ॥ १९ ॥

बर्हिषि यज्ञे हे विष्णुरात! हे विष्णुदत्त! परीक्षित्तस्य नाभेरवरोधजने भार्याजने वातरशनानां वायुवस्त्राणां दिगम्बराणामित्यर्थः श्रमणानां परमहंसानां परमहंसाश्रमानुष्ठानवताम् ऊर्ध्वमन्थिनामूर्ध्वरेतसामृषीणां धर्मान् दर्शयितुकामो हरिः शुक्लया शुक्लं लापयति नाशयति शुक्लं ज्ञानं लाति ददातीति वा "शुकगतौ" इति धातुः गतिर्ज्ञानमतिशयितसुखज्ञानत्वाच्छुक्ला तया तनुवा देहेन ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

वातवसनानां सन्न्यासिनां श्रमणानां वानप्रस्थानामृषीणां तत्तन्मन्त्रदर्शिनमयायाज्ञिकानां गृहस्थानामित्यर्थः ऊर्ध्वमन्थिनां ब्रह्मचारिणामपि तच्चरिते तस्य तस्य दर्शयिष्यमाणत्वात् ॥ २० ॥

इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

निगदेन गद्यात्मकस्तोत्रेण वर्षधरो भारतवर्षपतिर्नाभिस्तेनाभिवादिता ये ऋत्विजस्तैरभिवन्दितौ चरणौ यस्य अवितथगीर्भिरमोघवाग्भिः ॥ १६ ॥

अभिरूपः सदृशः कैवल्यादिति अहं खलु जगदीश्वरः नहि जगदीश्वरादन्यः कश्चिदस्तीत्यर्थः द्विजेषु देवा इव ब्राह्मणास्तेषां कुलम् ॥ १७ ॥

आग्नीध्रीये अग्नीध्रपुत्रे ॥ १८ ॥ १९ ॥

हे विष्णुदत्त! तदवरोधायने तदन्तःपुरस्थले या मेरुदेवी तस्यां वातवसनानां दिग्वाससो दिग्वाससां बाला अपि भवन्तीत्यत आह। श्रमणानां तपस्विनां तथा भूताः पाषण्डिनोऽपि भवन्तीत्यत आह। ऋषीणां शास्त्रोक्तज्ञानवतां तेषां ब्रह्मचर्याश्रमाद्याह। ऊर्ध्वमन्थिनामूर्ध्वरेतसां शुक्लया शुद्धसत्त्वरूपया तनुवा तन्वा ॥ २० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
पञ्चमस्य तृतीयोऽयं सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

इत्येवम्भूतेन निगदेन गद्यात्मकस्तवेन अभिष्टूयमानो वर्षधरेण भारतवर्षपतिना नाभिना अभिवादितैः ऋत्विग्भिरभिवन्दितौ चरणौ यस्य स भगवान् सदयमिदमाह ॥ १६ ॥

कैवल्यात् निःसमानातिशून्यत्वात् द्विजेषु त्रैवर्णिकेषु देवा इव द्विजदेवाः विप्रास्तेषां कुलम् ॥ १७ ॥

ततो हेतोः आग्नीध्रीये वंशे अवतरिष्यामि ॥ १८ ॥

इति भगवद्वचनं निशामयन्त्याः शृण्वन्त्याः पतिं नाभिम् अभिधायोक्त्वा ॥ १९ ॥

हे विष्णुदत्त! परीक्षित! बर्हिषि यज्ञे परमर्षिभिर्भागवतैः ऋत्विग्भिः प्रसादितः तदवरोधायने नाभेरन्तःपुरे मेरुदेव्यां शुक्लया शुद्धया तनुवा तन्वा अवततार किं कर्तुकामः वातरशनानां दिग्वाससां पाषण्डव्यावृत्त्यर्थमाह। श्रमणानां वेदोक्ततपोनिष्ठानाम् ऋषीणां ज्ञानिनाम् ऊर्ध्वमन्थिनां नैष्ठिकब्रह्मचारिणां धर्मान्दर्शयितुकामः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
तृतीयाध्यायार्थप्रकाशः ॥ ३ ॥

भाषा टीका:।

श्रीशुकदेवजी बोले इस प्रकार से स्तोत्रसे जब स्तुति किये गये तब देवतों में श्रेष्ठ भगवान् पृथिवीपति तथा विप्रों के चरण वन्दनाकरने पर दयायुक्त होकर यह वचन बोले ॥ १६ ॥

श्रीभगवान् बोले हे ऋषिगणो! आपलोग सत्य वचन वाले हो आप लोगोंने मेरेसे अतिदुर्लभ वर माँगा है जोकि हमारे सदृश इस राजाका पुत्र होना चाहिये सोतो कैवल्यदाता होनेसे मेरे सदृशतो नहीं है तौभी ब्राह्मणों का वचन मिथ्या नहीं होना चाहिये जिससे कि ब्राह्मण देवता कुलतो हमाराही मुख है ॥ १७ ॥

तिस से अपने सदृश किसी को मै नहीं देखताहूं तो आग्नीध्रके वंश में अंशकलासे मैंही अवतार लेऊंगा ॥ १८ ॥

श्रीशुकदेवजी बोले इस प्रकार वचनको सुनती हुई मेरुदेवी के सन्मुख उसके पति को कह कर भगवान् अन्तर्ध्यान होगये ॥ १६ ॥

हे विष्णुदत्त! परीक्षितजी उस यज्ञ में इस प्रकार प्रसन्न करने से भगवान् नाभिराजा के प्रीति करने की इच्छा से उस राजाके रनवास में मेरुदेवी के गर्भ में दिगम्बर सन्यासी ऊर्ध्वरेता ऋषि लोगों के धर्मोंको दिखाने के वास्ते शुद्ध सत्वमयरूप से अवतीर्ण भये ॥ २० ॥

इति श्रीमद्भागवत पञ्चमस्कन्ध तृतीयअध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे तृतीयोऽध्यायः समाप्तः ॥ ३ ॥

॥ चतुर्थोऽध्यायः ॥

॥ श्रीशुक उवाच ॥

अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ॥ १ ॥

तस्य हवा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥ २ ॥

(१)तस्य हीन्द्रः स्पर्द्धमानो भगवान् वर्षे न ववर्ष तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं नामाभ्यवर्षत् ॥ ३ ॥

नाभिस्तु यथाभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवन्तं पुराणपुरुषं मायाविलसितमतिर्वत्सतातेति सानुरागमुपलालयन् परां निर्वृतिमुपगतः॥४॥

विदितानुरागमापौरप्रकृति जनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ॥ ५ ॥

यस्य ह पाण्डवेय ! (२) श्लोकावुदाहरन्ति ।
को नु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् ।
अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥ ६ ॥
ब्रह्मण्योऽन्यः कुतो नाभेर्विप्रा मङ्गलपूजिताः ।
यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ॥ ७ ॥

अथ ह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयन्त्यामिन्द्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुञ्जन्नात्मजानामात्मसमानानां शतं जनयामास ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्थादिभिस्त्रिभिः प्रोक्तमृषभस्येहितं महत् ।
लोकार्थं येन सत्कर्म नैष्कर्म्यं च निदर्शितम् ॥ १ ॥
चतुर्थे शतपुत्रस्य राज्यं तस्योपवर्ण्यते ।
यस्य राज्ये जनः सर्वः सन्तोषामृतनिर्वृतः ॥ २ ॥

अभिव्यज्यमानानि भगवल्लक्षणानि पादतलादिषु वज्राङ्कुशादीनि यस्य। महाविभूतिः सर्वसम्पत्तिः साम्यादिभिः सह वर्द्धमानप्रभावम्। प्रकृतयोऽमात्यादयः। जगृधुरभिकाङ्क्षन्ति स्म ॥१॥

वर्ष्मणा देहेन। तस्य [illegible]। वरीयसा श्रेष्ठतमेन। बृहन्तः श्लोकाः पद्यानि [illegible] च। ओजस्तेजः वीर्यं प्रभावः शौर्यमुत्साहः एतैर्गुणैरतिश्रेष्ठत्वादृषभः श्रेष्ठ इति नाम चकार ॥ २ ॥

तस्य वर्षे मण्डले ॥ ३ ॥

अवरुध्य प्राप्य। स्वैरमिच्छया गृहीतो नरलोकसमानधर्मो मनुष्याकारो येन तम्। अतएव मायया स्वपुत्र इति विलसिता मतिर्यस्य ॥ ४ ॥

आपौरप्रकृति पौरान्प्रकृतींश्चाभिव्याप्य विदितोऽनुरागो यस्मिन्। कथम्भूतो नाभिः। जनपदः जनाः पौरादयः पदं प्रमाणं यस्य सः आत्मजं धर्ममर्यादारक्षणार्थमभिषिच्य ब्राह्मणानामुत्सङ्गे निधाय विशालायां बदरिकाश्रमे। प्रसन्नं परानुद्वेजकं निपुणं

---

(१) यस्य हीति [illegible]पाठः।

(२) श्लोका इति श्रीवीरराघवपाठः।

श्रीधरस्वामिकृतभावार्थदीपिका ।

तीव्रं तेन उपासीनः सेवमानः कालेन तन्महिमानं जीवन्मुक्तिमवाप ॥ ५ ॥

नाभेस्तत्प्रसिद्धं कर्म अनु तदनन्तरं को नु पुमानाचरेत् न कोऽपीत्यर्थः ॥ ६ ॥

मङ्गलैर्दक्षिणाभिः पूजिताः सन्तः ओजसा मन्त्रबलेन ॥ ७ ॥

अन्येषां ग्रहणाय प्रदर्शितो गुरुकुलवासो येन अनुशिक्षमाणोऽनुशिक्षयन् उभयविधं श्रुतिस्मृतिलक्षणं कर्म विधिमभियुञ्जन्ननुतिष्ठन् जयन्त्यां भार्यायामात्मजानां शतं जनयामास ॥ ८ ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं नाभेश्चरित्रमुपवर्णितमुपसंहरँस्त्रिभिरध्यायैर्नाभेः पुत्रस्य ऋषभस्य चरित्रमुपवर्णयति । अथेति । अथ ह्यवतारानन्तरमुत्पत्त्यैव जन्मनैवाभिव्यज्यमानानि भगवल्लक्षणानि पादतलादिषु वज्राङ्कुशादीनि यस्य साम्यं सर्वभूतेषु समत्वमुपशमः अन्तर्बाह्येन्द्रियनियमः वैराग्यं विषयेष्वनासक्तिः ऐश्वर्यं सर्वभूतनियन्तृत्वं महाविभूतिः सर्वसम्पत्तिः साम्यादिभिः सह वर्धमानः अनुभावः प्रभावो यस्य तं निशाम्य दृष्ट्वा प्रकृतयोऽमात्यादयः प्रजा जना ब्राह्मणा देवताश्च गोवलीवर्दन्यायेन ब्राह्मणदेवता इत्युक्तमवनितलसमवनाय भूमण्डलपरिपालनायातितरां भृशं जगृधुरैच्छन् ॥ १ ॥

तस्य जातस्य पुत्रस्य इत्थं सत्त्वप्रधानेन वरीयसा श्रेष्ठेन वर्ष्मणा देहेन बृहत्श्लोकेन विपुलगुणप्रथया ओजसा इन्द्रियबलेन बलेन देहबलेन श्रिया सम्पदा यशसा विपुलचरित्रप्रथया वीर्यं पराभिभवसामर्थ्यं शौर्यं रणमध्ये स्वगृह इव प्रवेशसामर्थ्यं ताभ्यां चातिशयितप्रभावत्वेन श्रेष्ठत्वादृषभ इति नामधेयं पिता नाभिश्चकार ॥ २ ॥

ऋषभशब्दप्रवृत्तिनिमित्तं प्रभावातिशयमेव संप्रहेणाह । यस्य हीति । यस्य ऋषभस्य वर्षे राज्ये भारतवर्षे स्पर्धमानः ऋषभेण विरोधमाचरन्निन्द्रः नववर्षं वृष्टिं निरुद्धवान् तदिन्द्रकृतकमवर्षणमवधार्य निश्चित्येन्द्रकृत्यः प्रहस्य भगवानृषभदेवो योगेश्वरः आत्मीयविचित्रशक्त्या स्वयमेवाजनाभवर्षं भारतवर्षस्य प्राक्तनं नामाजनाभमित्यववर्षत ॥ ३ ॥

नाभिस्तु यथाभिलषितं स्वेच्छानुरूपं सुप्रजस्त्वं शोभना प्रजा यस्य सः सुप्रजाः "नित्यमसिच्प्रजामेधयोः" इत्यसिच तस्य भावः सुप्रजस्त्वं सुपुत्रत्वमवरुध्य प्राप्य निरतिशयप्रमोदेन विह्वलः गद्गदया गिरा मायया भगवन्मायया स्वपुत्र इति विलसिता मतिर्यस्य सः हे वत्स ! तातेति सानुरागं पुत्रमुपलालयन् परां निर्वृतिमानन्दमुपगतः प्राप्तः कथंभूतं पुत्रं स्वैरं स्वेच्छया गृहीतः नरलोकसधर्मः मनुष्याकारो येन भगवन्तं षाड्गुण्यपूर्णं पुराणं पुरुषं पुरापि नवः पुराणः तं पुरुषं पुरुषशब्दवाच्यं ततो राजा नागिरापौरप्रकृतिजनपदं पौरान्प्रकृतीर्देशवासिनश्चाभिप्रेत्य विदितोऽनुरागो यस्मिन् जनपद इति पाठे आर्षत्वात्प्रयोगस्य "नाव्ययीभावादतोऽम्त्वपञ्चम्याः" "अव्ययादाप्सुपः" इति लुगभावश्च नाभिरात्मजं समयसेतवः वर्णाश्रमधर्ममर्यादास्तेषां रक्षायामभिषिच्य राज्याभिषिक्तं कृत्वेत्यर्थः ब्राह्मणा-

नामुपसङ्ग्रहे निधाय निशालायां बदरिकाश्रमे मेरुदेव्या स्वभार्यया सह प्रसन्नेन परानुद्वेजकेन निपुणेन निपुणानुपहतेन समाधिना साङ्गेन भक्तियोगेन भगवन्तं नारायणाख्यं वासुदेवमुपासीनः कालेन प्रारब्धावसानकालेन तस्य वासुदेवस्य महिमानमवाप प्राप्याविर्भूतगुणाष्टकोऽभूत् मुक्तोऽभवदिति यावत् ॥ ४—५ ॥

नाभेश्चरित्रं निगमयन् तत्प्रभावप्रतिपादकौ श्लोकावुदाहर्तुं तयोः सर्वपरिगृहीतत्वमाह । यस्येति । हे पाण्डवेय ! यस्य नाभेः श्लोकौ "लोपः शाकल्यस्य" इति यस्य लोपे तस्यासिद्धत्वात्स्वरसंध्यभावः उदाहरन्ति आर्या इतिशेषः तावाह । कोनु इति । राजर्षेर्नाभेस्तत्प्रसिद्धं कर्म को नु पुमानाचरेत्कुर्यान्नकोऽपीत्यर्थः यस्य नाभेः शुद्धेन कर्मणा भगवानपत्यतां पुत्रतामगात्प्राप्तः ॥ ६ ॥

नाभेरन्यः कुतो ब्रह्मण्यः को ब्रह्मण्य इत्यर्थः प्रथमार्थे तामिरार्थः यस्य नाभेर्बर्हिषि यज्ञे मङ्गलैनिआर्जितधनादिभिः पूजिता विप्राः ओजसा मन्त्रबलेन यज्ञेशं दर्शयामासुः प्रदर्शितवन्तः ॥ ७ ॥

अथ राज्याभिषेकानन्तरं भगवानृषभदेवः स्ववर्षमजनाभं वर्षं कर्मक्षेत्रं स्वर्गापवर्गसाधनकर्मानुष्ठानयोग्यं स्थानं मन्यमानः अन्येषां ग्रहणाय प्रदर्शितो गुरुकुलावासो येन उपलब्धाः वरा यैस्तैर्गुरुभिरनुज्ञातः गृहमेधिनां गृहाश्रमिणां धर्माननुशिक्षमाणः अनुशिक्षयितुमित्यर्थः समाम्नातं विहितमुभयविधं प्रवृत्तिनिवृत्तिलक्षणं श्रौतस्मार्तरूपं वा कर्माभियुञ्जन्ननुतिष्ठन् इन्द्रेण दत्तायां जयन्त्यां भार्यायामात्मजानां शतं जनयामास येषामात्मजानां मध्ये भरतो नाम ज्येष्ठः पुत्रः श्रेष्ठगुण आसीत् येन भरतेन भरतसम्बन्धेन इदमजनाभं वर्षं भारतमिति व्यपदिशन्ति व्यवहरन्ति ॥ ८—९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

ऋषभनाम्नो हरेर्गार्हस्थ्यधर्मप्रदर्शनव्याजेन देवादीनामवश्यवतारे तत्प्रवर्तकप्रकारो वर्ण्यतेऽस्मिन्नध्याये तत्रादौ तस्मिंल्लोकानुरागप्रकारं कथयति । अथेति ॥ १ ॥

अथ पिता तद्गुणानुविशिष्टं नाम चकारेत्याह । तस्येति । इत्थं विचिन्त्य कथम "ऋष ज्ञाने भा दीप्तौ" इति धातुद्वयार्थत्वेन वरीयसा श्रेष्ठेन वर्ष्मणा देहेन ज्ञानप्रकाशदेहत्वादृषभ इति ऋदुरषाणां मूर्धेति स्थानसाम्यादकारेण णकारो लक्ष्यते तेन णकारपकाराभ्यामोजो बलं गृहीतं "णकारो बलं पकारः प्राणमात्मा" इति श्रुतेः बृहता श्लोकेन अन्वर्थनिबन्धेन यशसा किंवदन्तीति लक्षणेन सामान्यविशेषात्मना वा श्रौतस्मार्तकर्मानुष्ठाननिमित्तप्रसिद्धलक्षणादिना वा श्लोकेन यशसा श्रिया काम्यया सर्वमनङ्कारेण गृहीते ऋषभ इति समकेन वीर्यशौर्ये गृहीते "ऐश्वर्यस्य समग्रस्य" इति वचनात् शब्दत षड्गुणत्वाच्च ऋषभ इति वर्तेत इति धन्यत्वर्थे सः ईदृक् नाम ईदृक् गुणविशिष्टं नाम ॥ २ ॥

अस्माद्भक्तोऽथ्यैवं नामेत्येति भावेनाह । यस्येति । योगमायया स्वरूपसामर्थ्येन अभ्यवर्षीद्वृष्टियुक्तमकार्षीत अत्र इन्द्रशब्देनेन्द्रपदे स्थितः यज्ञनामा हरिर्गृह्यते तदुक्तम् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

दुष्टानां (१) मोहनार्थाय यश्च इन्द्रपदे स्थितः।

पस्पर्श ऋषभेणैव स्वरूपेण हरिः स्वयम्।

इति ॥ ३ ॥

सुप्रजस्त्वं सत्पुत्रत्वं "सुप्रजास्त्वमङ्गिरसो वो ऽस्तु प्रतिगृभ्णातमानवं सुमेधम्" इति श्रुतेः स्वैरं स्वेच्छया गृहीतो नरलोकधर्मो मेहनादिः काकपक्षादिर्वा चौलादिर्वा वक्ष्यमाणगुरुकुलवासादिर्वा येन स तथा मायया प्रकृत्या विलसिता वशीकृता मतिर्यस्य स तथा मायाविलासमेव वक्ति। धर्मेति। पौरादीनां पुत्रे योऽनुरागः स विदितो येन स तथा समयसेतुरक्षायां "समयस्तु क्रियाकारे सङ्केते चरिते सतां सिद्धान्ते शपथे काले" इत्यभिधानोक्तार्थरक्षणे विशालायां बदरिकाश्रमे नरनारायणाख्यमित्युक्ति विकारस्थि कालेन ज्ञानाविलासप्रोत्साहितेन तस्य हरेर्महिमानं जरामरणादिराहित्यलक्षणां नतु सर्वज्ञत्वादिलक्षणाम् ॥ ४ ॥ ५ ॥

हे पाण्डवेय! ओजसा तपोजनितेन ॥ ६ ॥ ७ ॥

उपलब्धदक्षिणाख्यवरैः उभयलक्षणां प्रवृत्तिनिवृत्तिलक्षणां समाम्नायाम्नातं समीचीनेषु निर्दोषेषु आम्नायेषु वेदेष्वाम्नानमभ्यस्तमभियुञ्जन्प्रयुञ्जानः कुर्वाण इत्यर्थः आत्मसमानानां लक्षणैरिति शेषः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

साम्यादिभिः पूर्वस्यैवान्वयः वर्ष्मादिभिः ऋषभः श्रेष्ठ इति हेतोरिदमृषभ इत्येतन्नाम चकार ॥ १ ॥ २ ॥ ३ ॥ ४ ॥

समयसेतुरक्षायां न तु राजत्वे इति ज्ञेयं तदाहि तदुचितगार्हस्थ्याश्रमपरिग्रहाभावात् राज्याभिषेकस्तु पश्चात् ब्राह्मणैरेव कर्तव्य इति ज्ञेयम् ॥ ५ ॥ ६ ॥

मङ्गलमत्र सुगमाय: ॥ ७—१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

चतुर्थे पुत्रशतकं भरतप्रवरं प्रभुः।

जनयित्वा व्यधाद्राज्यं प्रजानां सार्वकामिकम् ॥ ० ॥

जगृभुरभिचकाङ्क्षुः ॥ १ ॥

वर्ष्मणा देहेनेत्यस्य विशेषणद्वयम् वरीयसा श्रेष्ठेन बृहन्तः श्लोकाः कवीनां यस्मिन् तेन वीर्ये प्रभावः शौर्यमुत्साहः। ऋषभ इति श्रेष्ठत्वादित्यर्थः ॥ २ ॥

अजः श्रीऋषभदेवः नाभिस्तत्पिता ताभ्यां रक्षितत्वाद्‌जनाभसंज्ञमित्यर्थः वृद्धभाव आर्तेः ॥ ३ ॥

अवरुद्ध्य प्राप्य मायया पुत्रस्नेहेन विलसिता मतिर्यस्य सः "स्यान्माया शाम्बरी बुद्धौ" इति त्रिकाण्डशेषः ॥ ४ ॥

आपौरप्रकृति पौरान् प्रकृतीश्चाभिव्याप्य विविदितोऽनुरागो यस्मिंस्तं कथंभूतो नाभिः जनपदः जनाः पौरादय एव पदं आत्मजाभिषेके प्रमाणं यस्य सः समयानां सदाचाराणां या या मर्यादास्तद्रक्षणाय विशालायां बदरिकाश्रमे प्रसन्नेन सर्वत्र प्रसादवता सर्वसुखदेनेत्यर्थः निपुणेन फलसाधनसामर्थ्येन तस्यैव महिमा यत्र तं वैकुण्ठम् ॥ ५ ॥

शुद्धेन कर्मणा भक्तियोगेन ॥ ६ ॥

मङ्गलं यथास्यात्तथा दक्षिणादिभिः प्रसादिता भक्तत्वान्मङ्गलेनैव कर्मा पूजिता इति वा ओजसा भक्तिबलेन ॥ ७ ॥

अनुमन्यमानो जानन् प्रदर्शितेत्यन्येषां ग्रहणायेत्यर्थः। लब्धवरैर्लब्धदक्षिणैः अनुशिक्षमाणः शिक्षयन् उभयविधं श्रुतिस्मृतिलक्षणमुभयलक्षणामिति पाठः सम्यगाम्नायेन ब्राह्मणोपदेशेनाम्नातमभ्यस्तमभियुञ्जन् अनुतिष्ठन् "आम्नायो निगमेऽपि च उपदेशेऽपि" इति मेदिनी ॥ ८ ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अथेत्याद्यध्यायत्रयेण ऋषभचरित्रं वर्णयति। उत्पन्नस्यैव जन्मनैव अभिव्यज्यमानानि भगवल्लक्षणानि यस्य तम् प्रकृतयः मन्त्रिप्रभृतयः अवनितलस्य सम्यगवनाय जगृभुः अभिकाङ्क्षन्ति स्म ॥ १ ॥

वरीयसा अतिशयतो वरेण्योत्कृष्टेन बृहन्तः उपादेयत्वेन श्रेष्ठाः श्लोकाः कवीनां यस्मिन् तेन वर्ष्मणा देहेन ओज आदिभिश्चातिश्रेष्ठत्वादृषभः श्रेष्ठ इति नाम चकार ॥ २ ॥

तस्य वर्षे अजनाभाख्ये मण्डले ॥ ३ ॥

नाभिर्यथा अभिलषितं कामितं तथैव सुप्रजस्त्वं सुपुत्रत्वम् अवरुध्य प्राप्य अतिप्रमोदभरेण विह्वलः स्वैरं स्वेच्छया गृहीतो नरलोकसधर्मः नरलोकसमानो धर्मः वेदोक्तमार्गो येन तम् भगवन्तं वत्स! तातेति गिरा उपलालयन् परां निर्वृतिमुपगतः प्राप्तः यतो मायया भगवत्कृपया विलासिता मतिर्यस्य सः ॥ ४ ॥

नाभिः जनपदः जनाः पौरादयः पदं प्रमाणं यस्य सः पौरादिलक्षणो तन्मतानुसारीत्यर्थः अतः समयसेतुरक्षायां वेदोक्तप्रजापालनादिधर्ममर्यादारक्षायाम् आपौरप्रकृति पौरान् मन्त्र्यादिरूपान् प्रकृतीश्चाभिव्याप्य विदितः अनुरागो यस्मिन् तम् अभिषिच्य ब्राह्मणेषु हेयोपादेयरूपसकलव्यवहारशास्तृषु उपनिधाय विशालायां नरनारायणाश्रमे प्रसन्ननिपुणेन प्रसन्नं सात्त्विकं निपुणं सुदृढं च तेन तपसा समाधियोगेन भगवत्समाधिरूपेण योगेनोपायेन वासुदेवमुपासीनः तन्महिमानं तत्साधर्म्यमवाप ॥ ५ ॥

तत्प्रसिद्धं कर्म ॥ ६ ॥

मङ्गलेन भक्त्यार्जवादिना पूजिताः ॥ ७ ॥

उपनयनादारभ्य तच्चरित्रं वर्ण्यते। अथेति। लोकसङ्ग्रहार्थं प्रदर्शितो गुरुकुलवासो येन अनुशिक्षमाणः अनुशासयन् उभयलक्षणां जायापतियुग्मानुरूपं समाम्नायाम्नातं सहोभौ धर्मं चरतामित्यादिवेदप्रोक्तम् अभियुञ्जन् जयन्त्यां पुत्रशतं जनयामास ॥ ८ ॥ ९ ॥

---

[१] स्वायम्भुवमन्वन्तरे ऋष [illegible] इन्द्रोऽपि यज्ञनामा भगवानेव अतः कथं स्वेनैव स्वरूप स्पर्शस्याङ्ग प्रमाणेनैव तदुक्तेरभिप्रायमाह।

येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीद्येनेदं वर्षं भारतमिति व्यपदिशन्ति ॥ ९ ॥

तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः केतुर्भद्रसेन इन्द्रस्पृग्विदर्भः कीकट इति नव नवतिप्रधानाः ॥ १० ॥

कविर्हविरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ॥ ११ ॥

इति भागवतधर्मदर्शना नव महाभागवतास्तेषां सुचरितं भगवन्महिमोपबृंहितं वसुदेवनारदसम्वादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ॥ १२ ॥

यवीयांस एकाशीतिर्जायन्तेयाः पितुरादेशकरा महाशालीना महाश्रोत्रिया यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः ॥ १३ ॥

भगवानृषभसंज्ञ आत्मतन्त्रः स्वयं नित्यनिवृत्तानर्थपरम्परः केवलानन्दानुभव ईश्वर एव विपरीतवत्कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशान्तो मैत्रः कारुणिको धर्मार्थयशःप्रजानन्दामृतावरोधेन गृहेषु लोकं नियमयत् ॥ १४ ॥

यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः ॥ १५ ॥

यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास ॥ १६ ॥

भाषाटीका ।

श्रीशुकदेवजी बोले तदनन्तर उत्पत्ति ही से जिन के भगवच्चिह्न विदित होते हैं समता ऐश्वर्य उपशम महा विभूति से जिनका प्रभाव प्रतिदिन बढता जाता है तिन को देखकर सब प्रजा ब्राह्मण देवता उन के पृथिवी पालन की इच्छा करने लगे ॥ १ ॥

उन के शरीर के बडेहोने से बडे यश के होने से बल से शोभा से वीर्य से शौर्य से पितानाभीने ऋषभ ऐसा नाम रक्खा ॥ २ ॥

किसी समय पर इन्द्र भगवान् ने ईर्ष्यासे उन के वर्ष में वर्षा नहीं किया तिस बात को जानकर भगवान् ऋषभदेवजी ने योगेश्वर होने से हँसकर अपनी योगमाया से अपना अजनाभ वर्ष में वर्षा करदिया ॥ ३ ॥

नाभि राजा तो अपनी इच्छा के माफिक पुत्र को प्राप्त होकर अत्यन्त आनन्दित विह्वल होकर गद्गदवाणी से अपनी इच्छा से नरधर्म धारण करनेवाले पुराण पुरुष भगवान् से माया में बुद्धि के मोहित होजाने से हे वत्स ! हे तात, इस प्रकार से प्यार करते हुए बोले ॥ ४ ॥

नाभि राजाने जानलिया कि पुरवासीजन देश के जन सब ऋषभदेवपर अनुराग करते हैं तब राज्य धर्म के मर्यादा के पालन में पुत्र को अभिषिक्त कर के ब्राह्मणों को सौंप कर मेरु देवी के सहित बद्रीनारायण को जाकर अति प्रसन्न मनसे तपस्या कर के समाधि योग से नरनारायण वासुदेव भगवान्की उपासना करके काल आने पर भगवान् की महिमा को प्राप्त होगये ॥ ५ ॥

हे परीक्षित् ! जिस नाभि राजा के दो श्लोक कहे गये हैं नाभि राजर्षीके कर्म की तुल्यता कौन पुरुष कर सकेगा जिन के शुद्ध कर्म से हरि भगवान् पुत्र होगये ॥ ६ ॥

ब्राह्मणों का मानने वाला नाभी से दूसरा कौन होगा जिनके मङ्गलाचार से पूजित ब्राह्मणों ने यज्ञमें अपने प्रभाव से भगवान् का दर्शन करादिया ॥ ७ ॥

इसके अनन्तर भगवान् श्रीऋषभदेव जी अपने अजनाभ वर्ष को कर्मक्षेत्र मानकर गुरुकुलवास की ब्रह्मचारी को शिक्षा लोकों को दिखाई फिर गुरुनकी आज्ञापाकर गृहस्थों के धर्मों को शिखाने के निमित्त इन्द्र की दीहुई जयन्ती भार्या में शास्त्र में कहे दोनों प्रकार के कर्म में युक्त होकर अपने तुल्य सौ पुत्रों को उत्पन्न किया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तं भरतमनुकुशावर्तादयो नव पुत्रा नवतेः प्रधाना ज्येष्ठाः ॥ १० ॥ ११ ॥

तदनन्तरं कविप्रमुखा नव भागवतधर्मप्रदर्शकाः वसुदेवनारदयोः सम्वादो यस्मिन् उपरिष्टादेकादशस्कन्धे ॥ १२ ॥

महाशालीना अतिविनीताः ॥ १३ ॥

केवलः शुद्धः विपरीतवदनीश्वरवत्कर्माणि कुर्वन् नियमयन् नियमितवान् पाठान्तरे नि[illegible] कर्मकरणे हेतुः अनुग-

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमुत्सन्नं धर्मं स्वयमाचरणेनातद्विदामुपशिक्षयन् कथं धर्मादीनामवरोधेन सङ्ग्रहेण आनन्दो भोगः अमृतं मोक्षः ॥ १४ ॥

शीर्षण्यः श्रेष्ठस्तेनाचरितम् तत्तदनुवर्तते यतः ॥ १५ ॥

सकलो धर्मो यस्मिंस्तद्ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वेनैव विदितं तथापि ब्राह्मणान् पृष्ट्वैव करोतीत्यर्थः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तं भरतमनुपश्चात्कुशावर्तादयो नव सङ्ख्याकाः नवतिप्रधानाः प्रथमपुत्रदशके भरतः प्रधानः इतरेषु नवसु दशकेषु प्रत्येकं कुशावर्तादयः प्रधानाः स्वव्यतिरिक्तनवापेक्षया प्रधानाः ज्येष्ठाः कुशावर्तादयो नव भरतमनुजाताः तमेवानुसृत्य स्थिता इति वार्थः ॥ १०-११ ॥

तत्र नवतिपुत्राणां मध्ये कव्यादयो नव भागवतधर्मप्रकाशका महाभागवता भगवद्धर्मनिष्ठा अभूवन् तेषां कव्यादीनां सुचरितं भगवन्महिम्नोपबृंहितं वर्धितं भगवन्महिम्ना युक्तमित्यर्थः अत एवोपशमायनं चित्तशान्तिहेतुकमुपरिष्टादेकादशस्कन्धे वसुदेवनारदसम्वादे वक्ष्यामः कथयिष्याम इत्यर्थः ॥ १२ ॥

यवीयांस एकाशीतिसङ्ख्याकाः जायन्तेया जयन्तीपुत्राः पित्राज्ञानुवर्तिनो महाशालीना गार्हस्थ्यसम्पत्समृद्धा महाश्रोत्रिया अधीतसाङ्गवेदाः यज्ञानुष्ठानशीलाः कर्मणा सदाचारेण विशुद्धा ब्राह्मणा बभूवुः ॥ १३ ॥

अथ ऋषभसंज्ञो भगवानात्मतन्त्रः स्वतन्त्रः अकर्मवश्यः अत एव नित्यं निवृत्तकर्मायत्ताः सुखदुःखाद्यनर्थपरम्परा यस्य सः केवलदुःखासम्भिन्नो य आनन्दः स्वरूपानन्दः तस्यानुभावो यस्य सः स्वयमीश्वर एव सन् इतरवत्प्राकृतवत्कर्माण्यारभमाणः वर्णाश्रमधर्मरूपाणि कर्माणि कुर्वाणः किं कुर्वन्कालेनानुगतं प्रलीनं धर्ममाचरणेनातद्विदां धर्मतदनुष्ठानादिकमजानताम् उपशिक्षयन् किमर्थं धर्माद्यविरोधेन धर्मादिप्राप्त्या हेत्वर्थे तृतीया फलं चात्र हेतुः धर्मादिप्राप्तिरूपफलायेत्यर्थः प्रजानन्दः प्रजार्थो भोगः अमृतमेवं पुरुषार्थचतुष्टयसंग्रहः सर्वभूतसमः उपशान्तः रागाद्यकलुषितचित्तः मैत्रः अपकृष्टेष्वपि भूतेषु स्वसाम्यबुद्धिः कारुणिकः परदुःखासहिष्णुः गृहेषु गृहाश्रमेषु लोकान्नियमयन् नियमयन्नभूदित्यर्थः नियमयन्निति वा पाठः आर्षत्वादडभावो वा ॥ १४ ॥

आचरणेनोपशिक्षयन्नियमदित्यत्र हेतुः । यद्यदिति । शीर्षण्यः श्रेष्ठः तेन यद्यदाचरितं तत्तदेव हि यस्माल्लोकोऽनुवर्ततेऽनुतिष्ठति तथाचोक्तम् ।

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः

स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते

इति लोकसंग्रहार्थमाचरणेनोपशिक्षयन्नित्यर्थः तथा सकलो धर्मो यस्मिंस्तद्ब्रह्म गुह्यं वेद- [illegible] यद्यपि स्वेनैव विदितं तथापि ब्राह्मणान् पृष्ट्वा तैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतां जनसमूहमनुशासन् क्रत्वादिभि [illegible] सर्वधर्म [illegible] शतक्रत्व इयाज [illegible] नव. [illegible] देशः कालः [illegible] वयः [illegible] तियुक्त वयः श्रद्धा

कर्तव्यविषया त्वरा विविध उद्देशः इति कर्तव्यता ॥ १५-१६-१७

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

येन भरतेनाधिकृतत्वाद्भारतमिति नाम्ना कथयन्ति ॥ ९ ॥

तं भरतमन्वनन्तरं नवतिभ्यः प्रधानाः ॥ १० ॥ ११ ॥

भागवतधर्मान् दर्शयन्तीति भगवतो महिम्नोपबृंहितं पूरितमुपरिष्टादेकादशस्कन्धे उपशमायनं भगवन्निष्ठाप्रकारदर्शकम् ॥ १२ ॥

जायन्तेया जयन्तीपुत्राः महाशालीनाः महाशालाः कलमान्नभोजिनो वा गार्हस्थ्यधर्मप्रदर्शका वा ब्राह्मणाः यजनयाजनाध्ययनादिविप्रकर्मनिष्ठतत्वेन तच्छब्दवाच्याः ॥ १३ ॥

विपरीतवत् प्राकृतजनवत् आचारेण स्वयमनुष्ठानेन अतद्विद्वांसं अज्ञानिनं लोकमिति शेषः धर्मार्थादीनामविरोधेनानुकूल्येन शीर्षण्येन श्रेष्ठेन"यद्यदाचरति श्रेष्ठ"इति स्मृतेः ॥१४॥१५॥

यदपि यद्यपि स्वेन विदितं तथापि ब्राह्मणैर्दर्शितमार्गस्य प्रकारेण सकलधर्मं जनतामनुशशासेत्यन्वयः ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कालेन संहारकेण अनुगतमुत्सन्नमित्यर्थः ॥ १४-१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ॥

तं भरतमनुभरतस्य कनिष्ठा इत्यर्थः । नवतिप्रधानाः नवते ज्येष्ठा इत्यर्थः । पुंस्त्वमार्षम् ॥ १० ॥ ११ ॥

उपरिष्टादेकादशस्कन्धे ॥ १२ ॥

महाशालीना अतिविनीताः ॥ १३ ॥

विपरीतवत् अनीश्वरो जीव इव अतद्विदां द्वितीयार्थे षष्ठी धर्ममविदुष इत्यर्थः धर्मादीनामवरोधेन प्राप्त्या हेतुना न्ययमयत् नियमितवान् । न्यरमयदिति च पाठः ॥ १४ ॥

शीर्षण्यः श्रेष्ठः ॥ १५ ॥

सकला धर्मा यस्मिन् तद्ब्राह्मं गुह्यं वेदोक्तं रहस्यं यद्यपि स्वेनैव विदितं तदपि ब्राह्मणैर्दर्शितेनैव ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नवतेः प्रधानाः श्रेष्ठाः ॥ १० ॥

अवशिष्टेषु नवतिसङ्ख्याकेषु नव कविप्रभृतयः भागवतधर्मप्रदर्शका इत्याह । कविरिति ॥ ११ ॥

तेषां वसुदेवनारदयोः सम्वादो यस्मिन् तच्छोभनं चरितमुपरिष्टादेकादशे वर्णयिष्यामः ॥ १२ ॥

महाशालीना विनीततमाः ॥ १३ ॥

नित्यनिवृत्ता रागद्वेषादिरूपा अनर्थपरम्परा यस्मात्सः केवलानन्दस्य साधनरक्षणाद्युपकरणापेक्षस्य स्वरूपानन्दस्यानुभवो यस्य स स्वयमीश्वरः इतरवत्प्राकृतवत् कर्माण्यारभमाणः कालेनानुगतमुत्सन्नं धर्ममाचरणेन अतद्विदां धर्माचरणतत्प्रयोजनानभिज्ञानामुपशिक्षयन् धर्माद्यवरोधेन सङ्ग्रहेण अध्ययनेन वसतीति वतृतीया धर्मादिप्राप्त्यर्थमित्यर्थः गृहेषु सन्तं लोकं मुमुक्षुं बुभुक्षुं च न्ययमयत् नियमितवान् तत्र गृहस्थेन बुभुक्षुणा धर्मोऽर्थयशः प्रजानन्दप्राप्त्यर्थं मुमुक्षुणामृतार्थं कर्म कर्तव्यमिति लोकं नियमितवानित्यर्थः ॥ १४ ॥

द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज ॥ १७ ॥

भगवतर्षभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वाञ्छत्यविद्यमानमिवात्मनोऽन्यस्मात्क-
थञ्चन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृम्भितस्नेहातिशयमन्तरेण ॥ १८ ॥

स कदाचिदटमानो भगवानृषभो ब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीनामात्म-
जानवहितात्मनः प्रश्रयप्रणयभरसुयन्त्रितानप्युपशिक्षयन्निति होवाच ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यामृषभदेवानुचरिते
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शिष्यपयेन श्रेष्ठेनाचरितमनुष्ठितम् ॥ १५ ॥

किञ्च सकलो धर्मो यस्मिन् तद्ब्राह्मं गुह्यं वेदरहस्यं यद्यपि स्वविदितं स्वतोऽनुभूतं तथापि ब्राह्मणैर्दर्शितमार्गेणैव जनसमूहं सामादिभिरनुशशास ॥ १६ ॥

———

भाषाटीका

जिन के मध्य में महा योगी भरतजी बड़े हैं श्रेष्ठ गुण वाले भये जिन से यह वर्ष भारत कहाता है ॥ ९ ॥

भरतजी के पीछे कुशावर्त इलावर्त ब्रह्मावर्त मलय केतु भद्रसेन इन्द्रस्पृक् विदर्भ कीकट इन नामों वाले नौ पुत्र भये वे नव्वे पुत्रों के बड़े हुयेथे ॥ १० ॥

कविहरि अन्तरिक्ष प्रबुद्ध पिप्पलायन आविर्होत्र द्रुमिल चमस करभाजन एनओं के नाम हैं ॥ ११ ॥

यह सब भागवत धर्मके दर्शन वाले महा भागवत भये उनका चरित्र जो भगवान् के महिमासे युक्त है तिसको वसुदेव नारदजी के संवाद शान्ति का देनेवाले को आगे एका दशस्कन्ध मे वर्णन करेंगे ॥ १२ ॥

छोटे एकाशी जयन्ती के पुत्र भये पिता की आज्ञा करने वाले बड़े गृहस्थ बड़े वैदिक यज्ञों के करने वाले कर्म काण्ड में निरत ब्राह्मण होगये ॥ १३ ॥

ऋषभनामा भगवान् स्वयं स्वतन्त्र हैं नित्य अनर्थ की परम्परासे निवृत्त भी हैं केवल आनन्द अनुभव स्वरूप हैं ईश्वर हैं तौ भी विपरीत से कर्मों को आरंभ करते काल में प्राप्त धर्म को लोकों को शिखाते भये अज्ञानि जनों को उपदेश करते हुये रहे शान्त स्वरूप सबके मित्र करुणा वाले होकर धर्म अर्थ यश संतति आनंद मोक्ष इनके संग्रह के हेतु से मनुष्यों को गृहस्थ धर्म की शिक्षा देते भये ॥ १४ ॥

जिस जिस कर्म को श्रेष्ठ जन करते हैं तिसी कर्म को सब लोक करते हैं ॥ १५ ॥

यद्यपि ब्राह्मणों का सब धर्म गुप्तभी आप को विदित है तौ भी ब्राह्मणों के बताये सामादि उपायों से प्रजाओं को सिखाते भये ॥ १६ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्रव्यादिभिरुपचितैर्यज्ञैरिष्टवान् तत्र वयो यौवनम् तुवैव धर्मसम्बिच्छक्तेर्दिनबन्धनात् विविधोद्देशा नानादेवतोद्देशाः यथोपदेशं यथाविधि ॥ १७ ॥

अन्यस्मात्सकाशादात्मनः कश्चिदपि किमपि कथञ्चनापि न वाञ्छति इच्छानुदयं दृष्टान्तः अविद्यमानं खपुष्पादिकमिव नचान्यदीयमवेक्षतेऽपीत्यर्थः भर्तरि ऋषभदेवे प्रतिक्षणमुल्लसितस्नेहोद्रेक विनान्यन्नवाञ्छति ॥ १८ ॥

अवहितात्मनः संयतचित्तानपि प्रजानुशासनार्थमुपशिक्षयन्निति ह वक्ष्यमाणमुवाच ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

भगवता ऋषभेणैतस्मिन् वर्षे भारते परिरक्ष्यमाणो सति कश्चन पुरुषो भर्त्तरि ऋषभे अनुसवनं शश्वद्विजृम्भितो यः स्नेहोऽनुरागः तस्यातिशयमन्तरेण विनान्यं पुरुषार्थमात्मनः स्वस्याविद्यमानमन्यस्मात्पुरुषान्तरात्कदाचिदपि किञ्चिदपि केनापि निमित्तेन नापेक्षते ॥ १८ ॥

स भगवानृषभदेवः कदाचिदटन् ब्रह्मावर्तगतः ब्रह्मर्षिश्रेष्ठानां सभायां प्रजानां निशामयन्तीनां शृण्वन्तीनां सतीनामात्मजान् अवहितात्मनः समाहितचित्तान् प्रश्रयो विनयः प्रणयः स्नेहस्ताभ्यां यत्सुखं तेन यन्त्रितान् वशीकृतानुपशिक्षयन्निति वक्ष्यमाणप्रकारेणोवाच ह ॥ १९ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
चतुर्थोऽध्यायः ॥ ४ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अविद्यमानमिव न वाञ्छति आत्मनोऽन्यस्मात् पुंसः किमपि

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

नापेक्षत इत्यन्वयः तदपेक्ष्यमाणां किन्तदाह। भर्त्तरीति॥ १८॥

अटमान इति शानच् तादर्थ्याभिकार्यः अटितुकामः प्रव्रजिष्यन्नित्यर्थः निशामयन्तीनां शृण्वन्तीनामवहितात्मनः उक्तग्रहणान्तरनमनसः प्रश्रयादिगुणैः सुयन्त्रितान् सुष्ठुबद्धान् इतिवक्ष्यमाणप्रकारेण॥ १९॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्यां
चतुर्थोऽध्यायः॥ ४॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
चतुर्थोऽध्यायःसमाप्तः॥ ४॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

द्रव्यादिभिरुपचितैः वयो यौवनं युवैव धर्म्ममन्विच्छेदिति वचनात् विविधोद्देशा नानादेवतोद्देशाः॥ १७॥

कश्चन कश्चिदपि पुरुषोऽविद्यमानं खपुष्पमिव कमपि आत्मनः स्वस्य अन्यस्मात् सकाशात् नवाञ्छति भर्त्तरि ऋषभदेवे स्नेहातिशयं केवलमपेक्षते अन्तरेणान्तरात्मना "अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च" इत्यमरः॥ १८॥ १९॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
पञ्चमस्य चतुर्थोऽयं सङ्गतः सङ्गतः सताम्॥ ४॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

किञ्च द्रव्यादिभिरुपचितैः सर्वैर्यज्ञैर्यथोपदेशं यथाविधि शतकृत्व इयाज इष्टवान् तत्र द्रव्यं पुरोडाशादि देशः पुण्यतीर्थादिः कालो वसन्तादिः वयो यौवनम् श्रद्धाभिरुचिः ऋत्विजः बहुशः कृतानुष्ठानाः विविधोद्देशाः भगवतः सर्वयज्ञभोक्तुः सर्वश्रेष्ठस्य सर्वात्मनः अंशभूताः नाना या देवताः वेदे प्रोक्तास्तदुद्देशेन कृताः "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति श्रीमुखोक्तेः॥ १७॥

अविद्यमानं खपुष्पादिकमिव कश्चिदपि अन्यस्मात् किमपि न वाञ्छति न चान्यदीयमपेक्षते॥ १८॥

इति वक्ष्यमाणमुवाच॥ १९॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्थाध्यायार्थप्रकाशः॥ ४॥

उत्तम द्रव्य उत्तम देश उत्तम काल अवस्था श्रद्धा ऋत्विज् विविध विधानों से सब यज्ञों से उपदेश के अनुसार सौ बार भगवान् ने यज्ञ किया॥ १७॥

भगवान् ऋषभजी के रक्षा करने से इस वर्ष के मध्य मे कोई भी पुरुष कोई चीज अपने पास न रही सरीकी, दूसरे किसी से नहीं मांगता था कभी भी किसी प्रकार नहीं चाहता था केवल अपने स्वामी राजा का स्नेह मात्र सब चाहतेथे॥ १८॥

सो भगवान् ऋषभजी कभी ब्रह्मावर्त में प्राप्त होकर ब्रह्मर्षियों के सभा में प्रजाओं के सुनते ही अपने अनुकूल अपने पुत्र जोकि प्रेम नम्रता से युक्त हैं तिनको शिक्षा करते हुये यह वचन बोले॥ १९॥

इति श्रीमागवत पञ्चमस्कन्ध चौथा अध्यायका
भाषानुवाद ब्रह्मण्याचार्य कृत
समाप्त॥ ४॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे चतुर्थोऽध्यायः समाप्तः॥ ४॥

——(:o:)——

पञ्चमोऽध्यायः ।

॥ ऋषभ उवाच ॥

नायं देहो देहभाजां नृलोके कष्टान् कामानर्हते विड्भुजां ये ।
तपो दिव्यं पुत्रका ! येन सत्त्वं शुद्ध्येद्यस्माद्ब्रह्मसौख्यं त्वनन्तम् ॥ १ ॥
महत्सेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम् ।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये ॥ २ ॥
ये वा मयीशे कृतसौहृदार्था जनेषु देहंभरवार्तिकेषु ।
गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश्च लोके ॥ ३ ॥
नूनं प्रमत्तः कुरुते विकर्म यदिन्द्रियप्रीतय आपृणोति ।
न साधु मन्ये यत आत्मनोऽयमसन्नपि क्लेशद आस देहः ॥ ४ ॥
पराभवस्तावदबोधजातो यावन्न जिज्ञासत आत्मतत्त्वम् ।
यावत्क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबन्धः ॥ ५ ॥
एवं मनः कर्मवशं प्रयुङ्क्ते अविद्ययाऽऽत्मन्युपधीयमाने ।
प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयोगेन तावत् ॥ ६ ॥
यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् ।
गतस्मृतिर्विन्दति तत्र तापानासाद्य मैथुन्यमगारमज्ञः ॥ ७ ॥
पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रन्थिमाहुः ।
अतो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहंममेति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चमे मोक्षधर्मोपदेशैः पुत्रानुशासनम् ।
उक्तं पारमहंस्यं च तस्य दुर्ज्ञाततिच्चर्या ॥ १ ॥

विड्भुजामपि ये सन्ति तान्कष्टान्दुःखदान्कामान् विषयाना-र्हति तद्योग्योऽयं मनुष्यदेहो न भवति दिव्यमुत्कृष्टम् येन तपसा यस्माच्छुद्धात्सत्त्वादनन्तं ब्रह्मसुखं भवति ॥ १ ॥

मोक्षबन्धयोर्निदानमाह । महत्सेवामिति । तमसः संसारस्य द्वारं योषितां ये सङ्गिनस्तेषां सङ्गम् महतां लक्षणमाह सार्धेन । महान्त इति । साधवः सदाचाराः ॥ २ ॥

मयि ईशे कृतं सौहृदमेवार्थः पुरुषार्थो येषाम् वाशब्देना-न्यनिरपेक्षत्वमेवास्य लक्षणमिति दर्शयति । देहं बिभ्रतीति । देहंभरा विषयवार्तैव न धर्मविषया येषु तेषु जनेषु जायादियु-क्तेषु गृहेषु च रातिर्मित्रं धनं वा पाठान्तरे जायादिप्रदेषु यावदर्थाश्च यावदर्थमेवार्थो येषामिति मध्यमपदलोपी समासः देहनिर्वाहाधिकस्पृहाशून्या इत्यर्थः ॥ ३ ॥

कामानर्हतीति यदुक्तं तदुपपादयति । नूनमिति । यदा यदा इ-प्रीतये आपृणोति व्याप्रियते तदा प्रमत्तः सन् विकर्म पाप कुरुते यतो विकर्मणः प्राचीनादयं क्लेशदो देहो जातस्त पुनःकरणं साधु न मन्ये ॥ ४ ॥

देहादेरनश्वरत्वात्क्रियातन्त्रमनर्थं इत्याशङ्क्याह । पराभवो विना स्वरूपाभिभवो ज्ञानकृतस्तावद्भवति तत्र हेतुः यावत् क्रियास्तावदिदं मनो हि कर्मात्मकमेव स्यात् येन कर्मा मनसा ॥ ५ ॥

उक्तमुपसंहरति । एवं पूर्वकृतं कर्म कर्तृभूतं मनः कर्मभू प्रयुङ्क्ते पुनः कर्मनिष्ठं करोतीति जीवन्मुक्तकर्मव्यावृत्त्यर्थ अविद्ययेति । अविद्यया आत्मनि उपधीयमाने आच्छा सति एवं मनः कर्तृ पुरुषं कर्म वशं प्रयुङ्क्ते इति वा ॥ ६ ॥

न केवलं देहयोगमात्रमनर्थान्तरं चेत्याह । यदा गु मिन्द्रियार्थानामीहां चेष्टां यथा मिथ्या परमार्था न भवतीति विवेकी सन् पश्यति न पश्यतीति पाठे अथवा

श्रीधरस्वामिकृतभावार्थदीपिका ।

...त्वेनेत्यर्थः तत्र तदा सहसा गतस्मृतिः स्वरूपस्मृतिशून्यः मत्तहो मूढो मैथुनसुखप्रधानं गृहं प्राप्य तापान् विन्दति ॥ ७ ॥

ननु यथोपयोगं स्त्रिया मिथुनीभूय सुखमात्रमनुभवतः कुतस्तापाः स्युस्तत्राह । पुंस इति । प्रत्येकं तयोरेकैको हृदयग्रन्थिरस्त्येव एवं मिथः परस्परं स्थूलमन्यं हृदययोर्ग्रन्थिं दुर्भेदं वदन्ति कुत इत्यत आह । अतोऽस्मान्मिथुनीभावात् प्रत्येकं हृदयग्रन्थिना तु देहेन्द्रियमात्रेऽहं ममेति मोहोऽस्मात्तु गृहादिभिर्विषयभूतैर्महान्मोहो भवेदित्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उक्तमेवाह । ऋषभ इति । तद्वन्मुक्त्युपायत्वेन भगवदुपासनमुपदेक्ष्यमाणो वैराग्यं विना उपदिष्टोऽपि भक्तियोगो न सम्यक् प्रतितिष्ठतीति तदुत्पत्तये कामान्निन्दति । नायमित्यर्द्धेन । देहभृतां मध्ये यो नृलोकः मनुष्यस्तस्मिन्सत्ययं मनुष्यदेहः कष्टान्कृच्छ्रसम्पाद्यानन्ततो दुःखरूपान् कामान् यत्नादीन् प्रति नार्हति कामाननुभवितुं नार्हतीत्यर्थः कामोपभोगार्थो नायं नृदेह इत्यर्थः । कुतः ये कामा विड्भुजामपि सूकरादीनामपि सन्ति किन्तु हे पुत्रकाः ! दिव्यं देवस्य विष्णोराराधनरूपं तपश्चर्तुमर्हति किं वचनात् विविधी... तत्राह । यस्मा... [illegible]

...कस्मान् कश्चिदपि पुरुषाऽविद्यमानं खपुष्पमिव कमपि आ... [illegible] तत्तपः यदहा... प्रकाशा... [illegible] ...शुध्यान्नरस्तसंसारो भवेत् येन च ब्रह्मसुखमपारं भवेत् कामोपभोगेन संसृतिः एवं कामोपभोगः संसृतिहेतुः भगवदुपासनं मोक्षहेतुरित्युक्तम् ॥ १ ॥

एवं भोगोपासनयोर्बन्धमोक्षहेतुत्वमभिधाय तयोर्निदानमाह । महतां सेवां विमुक्तेर्द्वारं मूलं कारणमाहुः तथा योषितां स्त्रीणां ये सङ्गिनः तेषां सङ्गं तमसः संसारस्य द्वारमाहुरित्यनुषङ्गः के ते महान्तः यत्सेवा विमुक्तेर्द्वारं तत्राह । सार्द्धेन । ये समचित्तत्वादिगुणयुक्तास्ते महान्त इत्यन्वयः समचित्ताः सुखदुःखादिष्वविक्रियमाणचित्ताः सर्वस्य ब्रह्मात्मकत्वज्ञानात् प्रशान्ताः जितबाह्यान्तःकरणाः विमन्यवः तितिक्षवः सुहृदः सर्वभूतहितैषिणः साधवः परोपकारनिरताः ॥ २ ॥

मयीशेऽस्मच्छरीरकेऽस्मदन्तरात्मनि सर्वेश्वरे शास्त्रदृष्ट्या स्वात्मनो भगवदात्मकत्वादेव मुक्तिः यथाह "प्रह्लादः सर्वगत्वादनन्तस्य स एवाहमवस्थित" इति । यद्वा देवशब्दस्याभिभवाद्भगवदंशोद्भवादेव मुक्तिः कृतं सौहृदं प्रीतिरेवार्थः प्रयोजनं येषां ते देहम्भरवार्तिकेषु देहधारणवार्त्तैव न धर्मविषया वार्त्ता येषु जनेषु गृहेषु च कथंभूते जाया कलत्रमात्मजाः पुत्राः रातिर्मित्रं धनं वा तद्वत्सु प्रीतियुक्ता न भवन्ति ये च लोके यावदर्थाः देहधारणापेक्षामात्रग्राहिणः देहनिर्वाहकाधिकयार्थस्पृहाशून्या इत्यर्थः ॥ ३ ॥

कामान्नार्हतीति यदुक्तं तदुपपादयति । नूनमिति । प्रमत्त आत्मभ्रान्त्या देहपरवशः अत एव हीनः यदिन्द्रियप्रीतये कर्म आपृणोति व्याप्रियते करोतीति यावत् तत् कर्म साधु समीचीनं न मन्यते कुतः यतः यस्मादिन्द्रियप्रीत्यर्थात्कर्मणः असन्नप्यस्थिरोऽप्ययं क्लेशदो देहः आ... [illegible] प्राप्त इति तस्यैव पुनः करणं साधु न म... इत्यर्थः [illegible]

ननु देहस्यास्थिरत्वात्क्रियानयमनर्थ इत्याशङ्क्याह । पराभव इति । यावदात्मनः प्रकृतिविलक्षणस्यात्मनः तत्त्वं याथात्म्यं यावन्न जिज्ञासते ज्ञातुं नेच्छति न जानातीत्यर्थः तावदबोधजातः आत्मस्वरूपतिरोभावः आत्मयाथात्म्याज्ञाननिमित्तपराभवः यावत्पराभवस्तावदिन्द्रियप्रीतये क्रियाः प्रवर्तन्ते यावच्च क्रियास्तावदिदं मनः कर्मात्मकं कर्मप्रवणं न तु ज्ञानप्रवणं येन कर्मात्मकेन मनसा भूयोऽपि शरीरबन्धः शरीराणां नश्वरत्वेऽपि पुनःपुनस्तत्सम्बन्धोऽविच्छिन्न इति तन्निमित्तानर्थपरम्पराप्यविच्छिन्नेति भावः ॥ ५ ॥

एतदेवाह । एवमिति । अविद्यया देवमनुष्याद्यौपाधिकदेहविशिष्टत्वेनाहङ्कारममकाररूपयोपधीयमाने कर्मवासनामूलया संसृज्यमाने सत्यात्मनि मनः कर्मवशं प्रयुङ्क्ते व्यापारयति पुरुषमिति शेषः अतो यावद्वासुदेवे मयि प्रीतिः प्रीतिरूपा भक्तिर्न स्यात्तावद्देहयोगेन न मुच्यते ॥ ६ ॥

न केवलं देहयोगमात्रमपि त्वनर्थान्तरसत्त्वं चेत्याह । यदेति स्वार्थे स्वस्य पुरुषार्थभूते स्वात्मपरमात्मयाथात्म्यानुसंधानेऽप्रमत्तः सन् गुणेहां शब्दादिगुणविषयामिन्द्रियाणां प्रवृत्तिम् यथा आत्मनः स्वाभाविकी न भवति किं तु देहसंबन्धप्रयुक्तेति विपश्चिद्विवेकी सन् यदा सहसा न पश्यति तदासौ पुमान् गतस्मृतिः

नहीं चाहता था केवल ... [illegible]

स्वात्मपरमात्मस्मृतिरहितः अत एवाज्ञः मैथुन्यं मैथुनसुखप्रधानं गृहं प्राप्य तत्र तापान् विन्दति प्राप्नोति एतदुक्तं भवति अनादिकर्मवासनयाहङ्कारममकाररूपाविद्याविद्यया च देहसंबन्धः देहसंबन्धेन पुनः पुनः कर्म कर्मणस्तापः तापानुभवेन कर्मणो विनाशेऽपि तद्वासनाया अनिवृत्तौ पुनरविद्याविद्यया च देहसंबन्धद्वारा तापानुभव इत्येवं चक्रवत्परिवृत्तिरिति ॥ ७ ॥

एवं रूपसंसारस्य निदानं वासनैव तन्निवृत्तिरेव मुक्तेर्निदानमिति प्रतिपादयितुं तावद्वासनापि मिथुनीभावमूलेत्याह । पुंस इति । पुंसः स्त्रिया सह योऽयं मिथुनीभावस्तं प्रत्येकं तयोर्हृदयग्रन्थिमाहुः । हृन्मनः तद्गता कर्मवासना दुर्भेद्यत्वाद्ग्रन्थिरित्युच्यते मिथुनीभावं हृदयग्रन्थिकारणमाहुरित्यर्थः कोऽसौ हृदयग्रन्थिर्यं मिथुनीभावमाहुस्तत्राह । यतः हृदयग्रन्थिहेतोः गृहादिभिर्विषयभूतैरहं ममेत्यविद्यारूपो मोहो जनस्य भवेत् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

पुत्राणां तत्त्वोपदेशव्याजेन लोकहिताय सकलशास्त्रसारभूतं तत्त्वं निरूपयत्यस्मिन्नध्याये तत्रादौ विषयसेवा मुमुक्षुणा अवश्यं वर्जनीयेति भावेनाह । नायमिति । नृलोके देहभाजां शरीरिणामयं देहः स्रक्चन्दनादिभोगाय न भवति किन्तु तपश्चरणायेति शेषः सोऽपि पुरुषार्थेष्वेकत्वेन विहितत्वात्कर्तव्यं इति तत्राह । क इति । ये कामा विड्भुजां च सूकरादीनामपि सन्ति को विवेकी तत्कामान् काम्यन्त इति कामाः विषयास्तान्विषयानर्हति न कोऽपीति शेषः तर्हि अनेन किम्विधेयमत्राह । तप इति । तपोऽर्हथ कर्तुमिति शेषः इदमेव प्रयोजनं नान्यत् पूर्वतनैः साधितत्वादितीममर्थं हिशब्देन वक्ति येन तपसा सत्त्वमन्तःकरणं ततः किन्तत्राह । यस्मादिति । यस्माच्छुद्धान्तःकरणादनन्तमन्तत्रयविधुरं सुखं सुष्ठु निर्दोषं खं ज्ञानात्मक-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

...न्द्रियं यस्य तत्तथा तद्वद्म सिध्यतीति शेषः हि यस्मात्तस्मात्तपश्चरणमेव देहधृतिप्रयोजनमित्यर्थः हिना मध्यनन्तगुणा इति वाक्यं स्मारयतीति वा ॥ १ ॥

अन्वयव्यतिरेकमुखेनेममर्थं द्रढयति। महत्सेवामिति। योषितां सङ्गिभिः सह सङ्गमित्यनेन कैमुत्यन्यायो दर्शित इति ज्ञातव्यम् निषिद्धेत्युपपदं योज्यमन्यथा योषिन्मात्रस्यापि हेयत्वं प्रसज्येत तच्चानुपपन्नं "न काञ्चन स्त्रियं परिहरेत्" इति श्रुतेरिति भावः द्वे नित्यमुक्तौ तत्रानन्तसुखलक्षणैका नित्यदुःखलक्षणान्येति बोद्धव्यं महल्लक्षणं ज्ञाते तत्सेवायां श्रद्धातिशयः स्यादिति तल्लक्षणमाह। महान्त इति। ये समचित्तत्वादिगुणावन्तस्ते महान्त इत्यन्वयः "मन ज्ञान" इति धातुर्विशेषणे ज्ञानशीलाः मनव्यवहारयोश्चेति धातोर्विशिष्टव्यवहारशीला इति वा समे ब्रह्मणि चित्तं येषां ते तथा समं तत्तद्योग्यतानुसृतं चित्तं येषां ते तथेति वा साधवः रागादिदोषविधुराः ॥ २ ॥

वार्थे वाशब्दः ये च ईशे मयि कृतं सौहृदमेवार्थः प्रयोजनं येषां ते तथा देहंभराणां देहपोषणा एव रतानामुक्तानुकदुरुकचिन्तालक्षणां वार्तिकं वार्तासमुदायो वा येषां ते तथा तेषु जायाचात्मजाश्च रातिर्मित्रं रा अर्थश्च येषां ते तथा तेषु न प्रीतियुक्तास्ते महान्तः किञ्च लोके जने यावाञ्छरीरयात्रादिलक्षणोऽर्थो येषां ते तथा ॥ ३ ॥

इदानीं देहस्मरवृत्तिं कथयति। नूनमिति। जन इन्द्रियाणां शब्दाद्यनुभवलक्षणप्रीतये यत्कर्म कुरुते नूनं निश्चयेन दीनः क्षीणः प्रमत्तोऽज्ञः तत्कर्मावृणोति स्वीकरोति कुत इत्यत उक्तम् यत इति। असत्त्वश्वरत्वादमङ्गलोऽपि विण्मूत्रादिपात्रत्वेन जुगुप्सितोऽयं देहो यतः कर्मणा आत्मनः कर्तुः क्लेशदः संसारात्मकक्लेशद आप्नोति यतस्तस्मात्कर्म साधु श्रेयः साधनमिति न मन्ये नूनमिदानीं प्रमत्तः कर्तव्यतामूढोऽत एव दीनोऽयं जनः इन्द्रियप्रीतये तत्कर्म कुरुते यत्कर्मात्मानमावृणोत्याच्छादयति कथमावृणोतीति तत्राह। यत इति। यतो यस्मात्कर्मण उत्पन्नोऽसन्नपि असाधुरेवायं देहः आत्मनः क्लेशद आस तस्मादेतत्कर्म करणं साधु न मन्य इति वा नूनं प्रायः कर्म कुरुते अत एव दीनः कथमिन्द्रियप्रीतये आवृणोतीति यत्तदपि कुत इत्यत्राह। यत इति। आत्मनः क्लेशद आसेति यतस्तस्मान्न साधु मन्य इति वा ॥ ४ ॥

तस्माज्ज्ञानमेव संसारनिवृत्तिसाधनमित्यभिप्रेत्य तन्निवृत्त्यवधिमाह। पराभव इति। यावदात्मतत्त्वं न जिज्ञासते तावत्पराभवः क्लेशः किञ्चिदात्मबोधजातः आत्मानात्मतत्त्वाज्ञानोत्पन्नाः क्रियाः क्रियाफलं च तावत्तेन कर्मात्मकेन मनसा शरीरबन्धः स्यात्तत्कर्मवशं बाह्यान्तःकरणलक्षणं मनश्च तावदित्यन्वयः ॥ ५ ॥

शरीरबन्धादिकं करोतीत्यत्राह। एवमिति। अत्रात्मपदेन जीवपरावुभावपि गृह्येते एवमात्मानात्मतत्त्वाज्ञानिनः अविद्यया जीवपरयोः स्वरूपाच्छादिकया मायया आत्मनि जीवपरयोः स्वरूपेऽवधीयमाने आच्छाद्यमाने सति कर्मवशं मनो जीवं विपर्ययं प्रायुङ्क्त इत्यन्वयः एवं संसरणं कियन्तं कालमत्राह। प्रीतिरिति। प्रीतिः स्नेहलक्षणा भक्तिः ॥ ६ ॥

कालतो वा प्रारब्धकर्मनाशतो वा देहवियोगेनानन्दानुभवलक्षणा मुक्तिः स्यात्किमभक्तस्येत्याशङ्क्य बन्धध्वंसि भगवत्प्रसादान्तरङ्गभक्तिं विना न कदाचिदभक्तमुक्तिः स्यात्प्रत्युतानादिकर्मपरम्परया विषयानुध्यानहेतुभूतया तृणजलूकवत्प्रवर्तमानस्य सन्ताप एव स्यादित्याह। यदेति। स्वतो विपश्चिज्जानात्मा यदा यथा गुणेहां स्वाभिमतविपरीतेन्द्रियप्रवृत्तिमनुकूलां पश्यति ममेदं हितमित्यङ्गीकरोति तदा सहसा गतस्मृतिर्नष्टशास्त्रानुसन्धानः स्मरणरहितोऽत एव स्वार्थे प्रमत्तोऽत एवाज्ञः पुरुषो मैथुन्यं स्त्रीपुंसबन्धयोग्यमगारं गृहमासाद्य तत्र गृहे तापान्विन्दतीत्यन्वयः ॥ ७ ॥

केचिदेवंविधसंसारो मिथ्येति सङ्गिरन्ते तत्राह। पुंस इति। पुंसः स्त्रिया सहैषः मिथुनीभावः तयोः स्त्रीपुंसयोर्हृदयग्रन्थिं मनोबन्धपाशमाहुरित्यर्थः अर्थक्रियाकारित्वान्न मिथ्येति शेषः सकलतापानामेतदेव मूलमित्येतां चाह। पुंस इति। सुखसाधनान्वेषणायासेन तापा एव स्युरित्यर्थः हृदयग्रन्थिविकारप्रकारमाह। यत इति। अत एव दुःखं स्यादित्यर्थः। मिथुनीभावस्य तापहेतुत्वे कुटुम्बी शुचौ देश इत्याद्युक्त्या "न च पुनरावर्तते" इति कुटुम्बिनोऽपुनरावृत्तिलक्षणमुक्तिवचनात् कथं स निन्दामर्हतीति चेन्न प्रायिकत्वात्तस्य "अश्वाद्या याज्ञवल्क्याद्या मुच्यन्ते स्त्रीसहायिनः। बध्यन्ते केचनैतेषां विशेष च विदो विदुः" इति वचनात् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

महदिति युग्मकम्। तत्र प्रसङ्गस्य निर्विशेषसविशेषतामेवेन द्वैविध्यप्रतिपादकं महतां द्वैविध्यमाह। समचित्ताः अभेददर्शिनः। तेषां साधनान्याह। प्रशान्ता इत्यादिना। उत्तरेषामपि साधनान्याह। जनेष्वित्यादिना। यावानर्थो मत्सौहृदमयभक्तिस्वादात् तदनुरूप एव नत्वधिकन्यूनः अर्थो धनं येषां ते ॥ १ ॥ २ ॥ ३ ॥

विकर्मात्र काम्यं कर्म। देहोऽपि मनुष्यदेह एव ॥ ४ ॥ ५ ॥

उपधीयमाने युज्यमाने यद्यप्येवमात्मतत्त्वबोधात्स एव बोधस्तथापि मत्प्रीतिं विना सोऽपि न सिद्ध्यतीत्याह। प्रीतिरिति ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

स्वभक्तिं स्वानुपाविद्य विधाय भरतं नृपम्।
प्रव्रज्य पञ्चमे देवो जडचर्यामवीवदत् ॥

उपशिक्षयिष्यन्नुदाहरिष्यन्नुक्तं तत्र भक्तियोगे प्रवर्तयितुं प्रथमं मनुष्यदेहस्य पुरुषार्थसाधनत्वं विषयभोगानौचित्यञ्चाह। नायमिति। कष्टान् कष्टप्रदान् कामान् योषिद्दर्शनस्पर्शनादीन् नार्हति नैवार्हतीति कुतः ये विड्भुजामपि सन्ति कामाः हेत्वे मनुष्यदेहशूकरदेहयोस्तुल्यत्वापत्तेरिति भावः। तेन शूकरदेहादिभिर्यन्न लभ्यते तदेव मनुष्यदेहेन लब्धुं यतनीयं तदेव मनुष्यत्वचिह्नं किं तत्राह। तप इति। तपसामाहात्म्यमेतपसा महत्तादिकं ब्रह्मादीनामपि वर्तत इति तदुपायत्वेनेमाह। दिव्यमप्राकृतं भगवत्सम्बन्धीत्यर्थः हे पुत्रकाः। अनुकरणीयं कुरु सत्त्वमन्तःकरणम् ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मनुष्यदेहादेवोद्धारोऽधःपातश्च भवतीति तयोः कारणमपि मनुष्यदेहेऽस्तीत्याह । महदिति । विमुक्तेर्द्वारमुक्तेः ब्रह्मसौख्यं त्वनन्तमिति पूर्वोक्तब्रह्मसौख्यस्य च निर्विशेषसविशेषब्रह्मसम्बन्धित्वेन द्वैविध्यान्मुक्तिरपि सायुज्यं भक्तिमत्पार्षदत्वञ्चेति द्विविधा विशब्दाद्व्याख्येया महान्तोऽपि द्विविधा ब्रह्मोपासका भगवदुपासकाश्च तेषां लक्षणं तन्त्रेणैवाह । समचित्ताः समदर्शिनः अकुटिलचित्ताश्च प्रशान्ताः प्रशमादियुक्ताः भगवन्निष्ठबुद्धयश्च शमो मन्निष्ठता बुद्धेरिति भगवदुक्तेः विमन्यव इत्यादि विशेषणत्रयमुभयत्र तुल्यार्थं साधवः परदोषाग्राहिणः ॥ २ ॥

उत्तरेषामसाधारणं लक्षणं पुनराह । मयि ईशे कृतं सौहृदं प्रीतिरेव अर्थः पुरुषार्थो येषां मत्प्रीतेरन्यत्तत्तु ये पुरुषार्थं न मन्यन्त इत्यर्थः वाशब्दोऽनन्यानिरपेक्षत्वस्यैव लक्षणत्वं दर्शयतीति श्रीस्वामिचरणाः देहम्भराणां भोजनपानाद्यासक्तानां या वार्त्ता जीविकाः कथा वा ताभिरेव ये दीव्यन्ति तेषु जनेषु जायादियुक्तेषु गृहेषु च विद्यमानेष्वपि न प्रीतियुक्ताः रतिर्येन ननु तर्हि किमर्थं तेषु गृहेषु तिष्ठन्तीति तत्राह । यावद्भिरेव धनादिभिरर्थो मत्पादसेवनाद्यात्मिका भक्तिर्भवेत्तावन्त एवोपार्जयन्ति । येषां ते तावदादि पदानां वृत्तावुत्तरपदलोपः । ... ॥ ३ ॥

तत्पः यवहीन ... सर्वनाशम्

नमो द्वारात् योषित्सङ्गिसङ्गात् देहिन एवाधःपातः क्रियादिति तं दर्शयति शोचति च । नूनमिति । विकर्म परदारादिग्रहणपापम् आपृणोति विकर्मण्येव व्यापृतो भवति यतो विकर्मणः प्राचीनादयं क्लेशदो देहो जातः तस्यैव पुनः करणं न साधु मन्ये देहः कीदृशः आत्मनो जीवस्य असन्नपि तत्तुतो न वर्त्तमानोऽपि । "असङ्गो ह्ययं पुरुष" इति श्रुतेः ॥ ४ ॥

तर्हि पुण्यं कर्त्तव्यमिति चेन्न तस्यापि संसारहेतुत्वेन क्लेशहेतुत्वात् तस्मात् पुण्यपापयोर्निरासकं ज्ञानमेवाभ्यसनीयमेवेत्याह । पराभवः कर्म्मपारतन्त्र्यं तदेव जीवस्य बन्धः सचाज्ञानकृतस्तावदेव भवति यावन्न जिज्ञासत इति "ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुतेऽर्जुन" इत्युक्तेः । यावज्ज्ञानं नोद्भवेत् तावत् कर्माणि न नश्यन्ति यावत् क्रियाः पुण्यपापकर्म्माणि स्युस्तावदिदं मनो हि कर्म्मात्मकं कर्म्म स्वभावमेव स्यात् येन कर्म्मात्मकेन मनसा ॥ ५ ॥

केन प्रकारेण मनः कर्मात्मकं स्यात्तमाह । एवमिति । कर्म्म प्राचीनमर्वाचीनं वा कर्तृ मनः कर्म्मभूतं वशे प्रयुङ्क्ते पुनः कर्म्मनिष्ठं करोति एवमनेन प्रकारेण मनः कर्म्मात्मकं स्यात् यद्वस्तु यदधीनं स्यात् तच्च तदात्मकमेव भवेदित्यर्थः । जीवन्मुक्तकर्म्मव्यावृत्त्यर्थमाह । अविद्ययेति । आत्मनि जीवे लपधीयमाने युज्यमाने सति उपाधिरुपाधिलिङ्गं तदध्यासात्तद्रूपीक्रियमाणा इत्यर्थः किञ्च सर्व्वकर्म्मनिर्मूलीकरणी भक्तिरेवेत्याह । प्रीतिरिति ॥ ६ ॥

तत्रश्च भक्तिमिश्रस्य ज्ञानस्य परिपाकदशायामेव नैष्कर्म्यं तदपरिपाकदशायामित्याह । यदा गुणेषु ... र्थेषु इहां वाञ्छाम् ... अनर्थरूपां विपश्चित् ज्ञाततत्त्वोऽपि ... यदानुपश्यतीति पाठे गुणानामिन्द्रियाणां ... ममात्मन एवेयं चेष्टेत्यर्थः तत्र तदा सहसा गतस्मृतिः सन् तापान् विन्दति मैथुनाद्यमगारं प्राप्य स्वजितापानित्यर्थः ॥ ७ ॥

इन्द्रियचेष्टानामात्मीयत्वाभिमननसद्भावेऽपि स्वकुटुम्बसङ्गस्ततो यथा मोहस्तथा तद्रहितस्य नेत्याह । पुंस इति । मिथो हृदयग्रन्थिः ममेयं स्त्रीत्येकोऽयं ग्रन्थिस्तदुपरि ममायं पतिरिति द्वितीयो ग्रन्थिस्तेन पुंसा वैराग्येण त्यक्तामिणापि, स्त्रीनं तं जहातीति बन्धकस्य गाढत्वमुपलक्षणमेवं पिता पुत्रयोरपि ज्ञेयम् । कुटुम्बराहित्ये तु वस्त्रासनपात्रादिष्वात्मीयत्वेनाभिमानसद्भावेऽपि मिथो ग्रन्थ्यभावान्न तादृशो बन्ध इति भावः अतो मिथो हृदयग्रन्थितो हेतोः गृहादिभिरहं गृही मम गृहमित्येवम् मोहो भवति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पञ्चमे पुत्रादीन् प्रति मोक्षधर्माभिरूप्य गृहादिभ्यो विरक्तोऽभूदृषभ इति वर्ण्यते तत्र तावद्विषयासक्तिर्बन्धहेतुः भगवत्सम्बन्धितप आसक्तिर्मोक्षहेतुरित्याह । नायमिति । कष्टान् दुःखोदर्कान् कामान् विषयान् दिव्यं परदेवसम्बन्धि ... येन तपसा सत्त्वं शुद्ध्येत् ... भवेत् यस्मात् ... सत्त्वात् ब्रह्मसौख्यं ब्रह्मसाम्यं भवेत् ॥ १ ॥

तपोरुच्युत्पादनद्वारा महत्सेवां विमुक्तेर्द्वारम् विषयरुच्युत्पादनद्वारा योषितां सङ्गिसङ्गं तमसः संसारस्य द्वारम् आहुर्बन्धमोक्षविद इति शेषः महल्लक्षणमाह । महान्त इति सार्द्धेन । कृतं सौहृदमेवार्थः प्रयोजनं येषां ते देहं बिभ्रतीति देहंभराः कलत्रापत्यादयस्तत्परा वार्त्ता येषां तेषु जनेषु जाया आत्मजाः रातिर्मित्रं धनं वा तद्वत्सु गृहेषु च न प्रीतियुक्ताः यावदर्थाः यावदर्थमर्थो येषामिति "शाकपार्थिवादीनामुत्तरपदलोपश्च" इत्यनेन समासः देहनिर्वाहो यावता भवेत्तावन्मात्रग्राहिण इत्यर्थः ॥ २ ॥ ३ ॥

महत्सेवां मुक्तेर्द्वारं योषितां सङ्गिसङ्गं संसारद्वारं चाहुरित्युक्तम् । अथात्र पञ्चभिः संसारप्रकारं तदनन्तरं षड्भिर्मुक्तिप्रकारं च प्रपञ्चयति । यद्यदा असत्सङ्गाद्विना नूनं निश्चितं प्रमत्तः इन्द्रियप्रीतये आपृणोति व्याप्रियते तदा विकर्म पापं कुरुते यतो विकर्मणः पूर्वकृतात् अयं असन् हरिसेवानर्हः अत एव क्लेशदो देहो जातः तस्यैव विकर्मणः पुनःकरणं न साधु मन्ये ॥ ४ ॥

पराभवो जन्ममरणप्रवाहलक्षणं संसारप्राप्तिः अबोधः आत्मानात्मपरमात्मविवेकस्तस्माज्जातः आत्मनः यद्विज्ञानेन सर्वं विज्ञातं स्यात्तस्य भगवतस्तत्त्वं यावन्न जिज्ञासते तत्र हेतुः यावत्क्रियाः विकर्मव्यापाराः तावत्कर्मात्मकं कर्मस्वभावमेव मनः स्यात् येन कर्मात्मकेन मनसा शरीरैः पुनः पुनर्जायमानैर्बन्धो यत्र शरीरादिबन्धाः बन्धनानि यस्मिन् सः संसारः स्यात् जन्ममरणप्रवाहलक्षणः संसार एव स्यात् ॥ ५ ॥

एवमविद्यया आत्मानात्मपरमात्माविवेकेन आत्मनि जीवे उपधीयमाने आच्छाद्यमाने सति मनः उपधीयमानमात्मानं कर्मवशे प्रयुङ्क्ते पुनःपुनरात्मानं कर्मनिष्ठं करोति एवं विधस्य वासुदेवे यावत्प्रीतिर्न तावन्न देहयोगेन मुच्यते संसारान्मुक्तो न भवति ॥ ६ ॥

अविपश्चिदविवेकी स्वार्थे मोक्षमार्गे अप्रमत्तः गुणेहां मायागुणकारितामीहामयथामनिष्टां संसारप्रापिकाम् ॥ ७ ॥

यदा मनोहृदयग्रन्थिरस्य कर्मानुबद्धो दृढ आश्लथेत ।
तदा जनः सम्परिवर्ततेऽस्मान्मुक्तः परं यात्यतिहाय हेतुम् ॥ ९ ॥
हंसे गुरौ मयि भक्त्यानुवृत्त्या वितृष्णया द्वन्द्वतितिक्षया च ।
सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृत्त्या ॥ १० ॥
मत्कर्मभिर्मत्कथया च नित्यं मद्देवसङ्गाद्गुणकीर्तनान्मे ।
निर्वैरसाम्योपशमेन पुत्रा ! जिहासया देहगेहात्मबुद्धेः ॥ ११ ॥
अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सध्र्यक् ।
सच्छ्रद्धया ब्रह्मचर्येण शश्वदसम्प्रमादेन यमेन वाचाम् ॥ १२ ॥
सर्वत्र मद्भावविचक्षणेन ज्ञानेन विज्ञानविराजितेन ।
योगेन धृत्युद्यमसत्त्वयुक्तो लिङ्गं व्यपोहेत्कुशलोऽहमाख्यम् ॥ १३ ॥
कर्माशयं हृदयग्रन्थिबन्धमविद्ययासादितमप्रमत्तः ।
अनेन योगेन यथोपदेशं सम्यग्व्यपोह्योपरमेत योगात् ॥ १४ ॥
पुत्रांश्च शिष्यांश्च नृपो गुरुर्वा मल्लोककामो मदनुग्रहार्थः ।
इत्थं विमन्युरनुशिष्यादतज्ज्ञान्न योजयेत् कर्मसु कर्ममूढान् ।
कं योजयन्मनुजोऽर्थं लभेत निपातयन्नष्टदृशं हि गर्ते ॥ १५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुंसः स्त्रिया सह मिथुनीभावं तयोः स्त्रीपुंसयोः हृदयग्रन्थि हृदयग्रन्थिमूलमाहुः अतो हृदयग्रन्थितः अहं भोगीत्यादिमोहो गृहादिभिश्च बाह्यैर्गृहादयो ममेत्यादिमोहश्च भवति ॥ ८ ॥

भाषाटीका

भगवान् श्रीऋषभदेवजी बोले हे पुत्रो ! इस मनुष्य-लोक में देहधारियों का जो देह है सो कष्टदायक कर्मों के करने को नहीं है जो कि कुत्सितकर्म सूकरादिक भी करते हैं यह मनुष्य देह तो तप करने के योग्य है जिस तप-से अन्तःकरण शुद्ध होता है फिर अन्त में सुखकी प्राप्ति होती है ॥ १ ॥

महत्पुरुषों का सङ्ग मुक्ति का द्वार है स्त्रियों के सङ्गियों का सङ्ग नरक का द्वार है ऐसा शिष्ट जनों का कथन है महत्पुरुष वेही हैं जोकि समान चित्त वाले क्रोध रहित सब के कार्य के साधने वाले हैं ॥ २ ॥

अथवा जो ईश्वर मेरे में प्रेमरूप प्रयोजन को जानने वाले हैं केवल देह के भरण पोषण वृत्ति वाले स्त्री पुत्र धन घर इनोंमें जिनकी प्रीति नहीं है संसार मे देह निर्वाह मात्र प्रयोजन रखते हैं ॥ ३ ॥

निश्चित है कि मनुष्य प्रमादी होकर इन्द्रियों की प्रीति के वास्ते पाप कर्मों में लगा रहता है तिस बात को मै ठीक नहीं मानता हूं जोकि देहादि असत्पदार्थ होकर भी दुःखदाता है ॥ ४ ॥

जब पर्यन्त यह पुरुष आत्मतत्त्व को नहीं जानता है तब पर्यन्त आत्मा का अज्ञान रहता है तब ही तक संसार की क्रिया रहती है जबतक क्रिया है तबतक इस पुरुष का शरीर बन्धन रहता है ॥ ५ ॥

इस प्रकार अज्ञान से आत्मस्वरूप के आच्छादित हो जाने से मन इस पुरुष को अपने आधीन करता है जबतक इस वासुदेव में प्रीति नहीं होती है तबतक इसका देहयोग नहीं छूटता है ॥ ६ ॥

विवेकी भी होकर जबतक गुणों की प्रवृत्ति के दोषों को नहीं देखता है तबतक स्वार्थ में प्रमादी होने से शीघ्र ही अपने स्वरूप के भूलजाने पर अज्ञानी होकर मैथुन सुख के हेतु घर मे रहकर तहां दुःखों को भोगता रहता है ॥ ७ ॥

स्त्री पुरुष का परस्परमें जो प्रेम है सो हृदय की ग्रन्थि है ऐसा शिष्टजन कहते हैं इसी से गृह क्षेत्र सुत पुत्र धन इनोंसे पुरुष को अहन्ता ममता रूप मोह होता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कदा तर्हि तस्य निवृत्तिरत आह । यदास्य जनस्य कर्मभिरनुबद्धो दृढो मनोरूपो हृदयग्रन्थिः शिथिलो भवेत्तदास्मान्मिथुनीभावान्निवर्तते ततश्च हेतुमहङ्कारं त्यक्त्वा मुक्तः सन्परं पदं याति ॥ ९ ॥

हेतुमतिहायेत्युक्तं [illegible] पञ्चविंशतिसाधनान्याह चतुर्भिः । हंसे मयि गुरौ भक्तिः [illegible] अनुवृत्तिस्तत्परता वितृष्णता

लोकः स्वयं श्रेयसि नष्टदृष्टिर्योऽर्थान् समीहेत निकामकामः ।
अन्योऽन्यवैरः सुखलेशहेतोरनन्तदुःखं च न वेदमूढः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वत्र लोकान्तरेऽपि व्यसनावगत्या दुःखानुसन्धानेन ईहानिवृत्त्या काम्यकर्मत्यागेन ॥ १० ॥

मदर्थैः कर्मभिः अहमेव देवो येषां तैः सङ्गात् हे पुत्राः ! देहगेहयोरात्मबुद्धेरहंममेति बुद्धेः ॥ ११ ॥

अध्यात्मयोगेनाध्यात्मशास्त्राभ्यासेन सम्यक् सम्यगिति सर्वत्र सम्बन्धः असंप्रमादेन कर्तव्यस्यापरित्यागेन ॥ १२ ॥

सर्वत्र मद्भावो मद्भावना तत्र विचक्षणेन निपुणेन विज्ञानविराजितेनानुभवपर्यन्तेन ज्ञानेन योगेन समाधिना धृत्युद्यमसत्त्वयुक्तो धैर्यप्रयत्नविवेकैर्युक्तः सन्नहङ्काराख्यमुपाधिं व्यपोहेन्निरस्येत् ॥ १३ ॥

ततः साधनादुपरमेदित्याह । कर्माशयमिति । यस्मिन् योगेनोपायेन यद्यपि फलं सिद्धं साधनोपरमः सिद्ध एव तथापि यावद्देहपातं तदभ्यासशङ्कावारणायोक्तम् ॥ १४ ॥

किञ्च पुत्रान्पिता शिष्यान्वा गुरुर्नृपश्च प्रजा एवमनुशिष्येत् मम लो[illegible] कामयते यद्वा मदनुग्रह एवार्थो यस्य विमन्युः शिक्षितस्याकरणेऽपि कोपशून्यः अतज्ज्ञांस्तत्त्वमविदुषः श्रेयोबुद्ध्या कर्मसु मूढान् अन्यथोपदेशे प्रत्यवायमाह । मनुजः काम्यकर्मसु पुरुषं योजयन् गर्ते संसारकूपे तं पातयति स मनुजः कमर्थं पुरुषार्थं लभेत न कमपीत्यर्थः ॥ १५ ॥

न योजयेदित्येतदुपपादयति । लोक इति त्रिभिः । नष्टदृष्टित्वे हेतुः । य इति । निकाममतिशयेन कामो यस्य ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हृदयग्रन्थिशैथिल्यमेव मुक्तिहेतुरित्याह । यदेति । अस्य पुरुषस्य यदिमो दार्ढ्ययुक्तः कर्मानुबन्धः कर्म अनुसृत्य बध्यते सम्बध्यते इति कर्मानुबन्धः कर्मणि क्रियमाणे तत्पृष्ठभागेन प्राप्तमित्यर्थः यद्वा कर्मानुबध्यते प्राप्यते येन स कर्मानुबन्धः यस्मिन् सति नान्तरीयकं कर्म सकर्मानुबन्ध इत्यर्थः एवं भूतो मनोहृदयग्रन्थिः मनोरूपे अन्तःकरणे हृदयशब्दस्य हृदयस्थानपरत्वशङ्कानिवृत्त्यर्थं मन इत्युक्तं तद्गतो ग्रन्थिर्वासनारूपः यद्वा हृदयग्रन्थिशब्दो वासनायां रूढः मनसो यो हृदयग्रन्थिर्यदा श्लथेत शिथिलो भवेत्तदा जनः अस्मात्सम्परिवर्तितः संसारान्मुक्तः हेतुं कर्मरूपं हेतुमतिहाय पुण्यपापे विधूयेत्यर्थः परं परमपुरुषं याति ॥ ९ ॥

इदानीं हृदयग्रन्थिशैथिल्ये साधनान्याह चतुर्भिः । हंसेऽविद्याशेषगन्धरहिते गुरौ हितोपदेष्टरि मयि यद्वा मद्रूपे गुरौ भक्त्या गुरुभक्तेः प्रथमकारणत्वात् अनुवृत्त्या सेवया तत्परतया शब्दादिषु विगततृष्णया द्वन्द्वानां शीतोष्णादीनां तितिक्षया सर्वत्रेहामुत्र च जन्तोर्व्यसनावगत्या दुःखानुसन्धानेन जिज्ञासया हेयोपादेययोर्जिज्ञासया तपसा [illegible] तपसा ईहानिवृत्त्या सुखाकाङ्क्षानिवृत्त्या ॥ १० ॥

मत्कर्मभिर्मदाराधनरूपैर्वर्णाश्रमोचितकर्मभिः भगवत्कथया चाहमेव देवो येषां ते भागवतास्तेषां सङ्गात् मद्गुणकीर्तनात् निर्वैरादीनां समाहारद्वन्द्वः निर्वैरादिभिः हे पुत्राः ! देहगेहयोरात्मीयबुद्धेर्जिहासया त्यागेच्छया ॥ ११ ॥

अध्यात्मयोगेन प्रकृतिविविक्तात्मयाथात्म्यानुभवयोगेन विविक्तसेवया । विशुद्धाहारेण सम्यक् प्राणेन्द्रियमनसां जयेन सच्छ्रद्धया सदुपायविषयश्रद्धया ब्रह्मचर्येण स्त्रीसङ्गविरहितत्वेन शश्वत् सर्वदासम्प्रमादेन कर्तव्यस्यापरित्यागेन वाचंयमेन नियमेन ॥ १२ ॥

सर्वत्र भूतेषु मद्भावविचक्षणेन ब्रह्मात्मकत्वप्रदर्शनेन विज्ञानं शास्त्रं तेन विराजितेन उद्दीपितेन ज्ञानेन ध्यानात्मकेन योगेन समाधियोगेन च धृत्युद्यमसत्त्वयुक्तो धैर्यप्रयत्नव्यवसायैर्युक्तः सत्त्वशब्दो व्यवसायपरः उक्तसाधनकलापं तत्साध्यं च व्यवसायस्ततः प्रयत्नस्तत्र धैर्यमेवमुक्तेन साधनज्ञानेन कुशलः सन्नहमाख्यं देहाहङ्काराख्यं लिङ्गं बन्धहेतुं यद्वाहङ्कारगोचरं देहोऽहंशब्दो लक्षणया वर्ततेऽहंबुद्धिविषयं लिङ्गं देहं व्यपोहेदपनुद्यात् उक्तसाधनकलापोपचितया भगवत्कृपया हृदयग्रन्थिशैथिल्यापादनद्वारा देहसम्बन्धं व्यपोहेदिति भावः ॥ १३ ॥

तदेवाह । कर्माशयं कर्मवासनारूपं हृदयग्रन्थिबन्धं कथम्भूतमविद्याहङ्कारादिरूपाविद्यया कर्मद्वारा आसादितं प्रमादरहितः यथोपदेशमुपदेशप्रकारमनतिक्रम्यानुष्ठितेन योगेन सम्यग्व्यपोह्य योगादुपरमेत् यावत्कर्माशयव्यपोहं योगोऽनुष्ठेय इत्यर्थः ॥ १४ ॥

एवं संसारैकभेषजं योगमुपदिश्य हितोपदेशस्तस्मिन्नेव योगे लोको नियोज्य इत्याह । पुत्रांश्चेति । मल्लोकं मत्सारूप्यं कामयमानः मदनुग्रहो यस्यार्थः प्रयोजनतयाभिमतः स मदनुग्रहार्थः पिता पुत्रान् गुरुः शिष्यान्नृपः प्रजाः विमन्युः शिक्षितस्याकरणे कोपशून्यः अनजानुक्तयोगमज्ञानात् इत्थमनुशिक्षयेत् नतु कर्ममूढाननादिपुण्यापुण्यरूपकर्मणा मूढानज्ञान् पुनः कर्मसु योजयेत् ॥ १५ ॥

एतदेवोपपादयति । लोक इति त्रिभिः । लोकः स्वयं श्रेयसि नष्टदृष्टिस्तत्साधनज्ञानशून्यः तत्र हेतुः यो लोकः निकाममतिशयेन कामो यस्य तथाभूतः सन्नर्थान् शब्दादिविषयानेव समीहतेऽनर्थावहार्थसाधनकर्माण्येव कुरुते अतः श्रेयसि नष्टदृष्टिरिति भावः अर्थानामनर्थगर्भत्वेन तत्प्रसाधनं श्रेयोऽनभिज्ञतामूलमित्याह । अन्योऽन्येति । सुखलेशानां शब्दादीनामर्थे हेतोः कर्मणः अन्योऽन्यवैरं ततः अनन्तदुःखं च न वेदातो मूढः श्रेयसि लोक इत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वदुःखनिवृत्तौ किं कारणमित्यतो हृदयग्रन्थिविनाश एवेत्याह । यदेति । कर्मणामनुबन्धः परम्परा यस्य स कर्मानुबन्धः संसारहेतुं हृदयग्रन्थिमतिहाय परं ब्रह्म यातीत्यन्वयः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(१) भक्त्यादिसाधनसम्पत्त्या सत्यस्यापि बन्धस्य निवृत्तिः सुघटा गरुडध्यानेन विषनिवृत्तिवदित्यभिप्रेत्य तत्साधनमाह । गुराविति । हरौ मयि गुरौ स्थिते हरौ मयीति वा अनुवृत्त्या निरन्तरसेवया सर्वत्र योनिषु व्यसनावगत्या त्रिविधक्लेशोऽस्तीति ज्ञानपूर्वकविचारेण जिज्ञासया वेदान्तवाक्यविचारेण पञ्चाग्निमध्यस्थित्यादितपसा ईहानिवृत्त्या आत्मविहितकर्मव्यतिरिक्तकर्मपरित्यागेन तदुक्तम् ।

आत्मनोऽविहितं कर्म वर्जयित्वाऽन्यकर्मणः ।
कामस्य वा परित्यागो निरीहेत्याहुरुत्तमाः ॥

इति मत्कर्मभिर्मदाराधनलक्षणैः मम पादः स्वरूपं येषु ते मत्पादास्तेषां महतां सङ्गात् मम प्रतिमासेवालक्षणसङ्गाद्वा देवकीनन्दननन्दकुमारेत्यादिगुणनामसङ्कीर्तनात् ॥ १० ॥

भूतेषु निर्वैरेण साम्येनोपशमेन च देहात्मगेहात्मबुद्ध्युज्जिहासया हानेच्छया अध्यात्मयोगेन नाडीशोधनादिलक्षणेन प्राणस्येन्द्रियाणामात्मनो मनसश्चाभिजयेन वशीकरणेन ॥ ११ ॥

सत्या प्रशस्तया श्रद्धया असंप्रमादेन इतिकर्तव्यताया अविस्मृत्या वाचामिति पुनर्वागिन्द्रियग्रहणं दुःशास्त्राभ्यासनिवृत्त्यर्थं सर्वदा मौनकरणार्थं वा मद्भावविचक्षणेन सर्वत्र मम सत्तालक्षणव्याप्ति दर्शनेन येन मुक्तिः स्यात्तद्विज्ञानं तेन विराजितेन तेजितेन प्रतिजीवं विष्णुः सर्वस्मादुत्तम इति यत्तेन ज्ञानेन तदुक्तम् ।

सर्वस्मादुत्तमो विष्णुरिति ज्ञानमुदाहृतम् ।
प्रतिजीवं येन मुक्तिस्तद्विज्ञानं विदां मतम् ।

इति यद्वा यद्विष्णोरुत्तमत्वज्ञानं तदेव प्रतिपुरुषं विशेषविषयं तद्विज्ञानं तेन विराजितेन विशेषितेन ज्ञानेन अनयोर्विशेषं च सर्वज्ञो गुरुर्जानाति तदुक्तम् ।

ज्ञानं विष्णोरुत्तमत्वे तदेव प्रतिपूरुषम् ।
विशेषेण तु विज्ञानं तच्च जानाति सर्ववित् ।

इति च स्वस्वयोग्यतानुसारेण सर्वेषामपि सर्वज्ञत्वेन तज्ज्ञानमपि विज्ञानं स्यादित्यतो व्यावृत्तलक्षणं वक्तव्यं तत्किमिति चेदुच्यते द्वात्रिंशल्लक्षणाद्युपेत एव सर्वज्ञ इत्युच्यते न तु स्वयोग्यतानुसारेण विज्ञस्तदुक्तम् ।

द्वात्रिंशल्लक्षणैर्युक्तस्तीक्ष्णादंष्ट्रश्च सोऽव्यक् ।
लोटक चेति पुरुषः सर्वज्ञः स उदाहृतः ।

इति सर्वज्ञस्य गुरोः प्रत्यक्षलक्षणान्यपि शास्त्रैर्निरूप्यन्ते

षण्णवत्यङ्गुलो यस्तु न्यग्रोधपरिमण्डलः ।
सप्तपादश्चतुर्हस्तः स देवैरपि पूज्यते ।

इत्यादौ न्यग्रोधपरिमण्डलो बाहुद्वयमण्डलमण्डितः "व्यामोच्छ्रयमण्डलो व्यामो बाहुन्यग्रोध उच्यते" इतिवचनात् ॥ १२ ॥

योगेन ध्यानेन जिह्वोपस्थेन्द्रियजयो धृतिः वैष्णवसिद्धान्तादचलनं वा उक्तलक्षणं स्वीकृतसत्त्वगुणः ताभ्यां युक्तः भूत्वा उक्तेन उत्कृष्टजन्मना सत्त्वेन ब्रह्मकल्पावध्यनशनेऽध्यवसानेन युक्त इति वा अहमात्मनाहङ्कारशब्दवाच्यं लिङ्गशरीरं व्यपोहेत् त्यजेत् किमिव लिङ्गं कर्माशयाशेरते

(१) अत्र त्रिभिरध्यायैः श्लोकस्तेन पञ्चदशपर्यन्तं मूलटीकयोः क्रियामात्रभेदस्ततस्तौ व्ययम् ।

स्मिन्निति कर्माशयं हृदयग्रन्थिं मिथुनीभावलक्षणं बध्नातीति हृदयग्रन्थिबन्धमविद्याज्ञानेन प्राप्तम् ॥ १३ ॥

अनेनोक्तेन योगेन व्यपोह्य निरस्य पश्चाद्योगादुपरमेत प्रासादात् प्रेक्षन् इतिवत्पश्चाद्योगमुपगम्य क्रीडत इत्यर्थः उक्तमतिदिशति । पुत्रानिति । शिक्षाफलमाह । मदनुग्रहार्थं इति । ममानुग्रह एवार्थः प्रयोजनं यस्य स तथा मत्प्रसादरूपो मोक्षो यस्येति वा ॥ १४ ॥

विमन्युर्विगतशोकः विगतपापो वा निरस्तक्रोधो वा अतज्ज्ञानमज्ञान् ननु कर्मकरणप्रेरणायां गुरुत्वेन पूजादिलाभात् किमिति न योजयेदित्युच्यते इति तत्राह । कं योजयन्निति । प्रवृत्तिकर्मणि प्रेरयन् कमर्थं लभते न कमपि प्रत्युत ज्ञानचक्षुरहितस्याधःपातहेतुत्वेन स्वस्यापि नरकपातः स्यादित्यभिप्रेत्याह । निपातयन्निति ॥ १५ ॥

माभूत्परोपदेशस्तथापि स्वयमेव प्रवर्तमानो जनोऽर्थान् लभतामत्राह । लोक इति । नितरां कामकामो विषयभोगेच्छा यस्य स तथा अत एव श्रेयसि नष्टशास्त्रदृष्टिः स्वयमुपदेशं विना यो लोको जनोऽर्थानापादयितुं समीहेत इच्छेत् स अनर्थानामर्थानां मध्ये कं पुरुषार्थं लभते न कमपीति पूर्वेणान्वयः न केवलं पुरुषार्थानवाप्तिरपि तु बहुदुःखावाप्तिश्च स्यादित्याह । अन्योऽन्येति । सुखलेशहेतोरन्योऽन्यवैरमनन्तदुःखं च मूढो न वेद ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हेतुमतिहायेत्युक्तम् । तत्र च प्रीतिरेव कारणमुक्तं सा च तत्र द्विधा प्रवर्तते स्वमात्रपुरुषाणां स्वद्वारा मुमुक्षूणां तु ज्ञानद्वारेति किन्त्वन्येच्छत्वात् प्रीत्याभासपदवीं श्रेयः तत्रोभयत्रापि गुरुभक्तिरपेक्षत इत्याह । हंस इति चतुष्केण । तत्र पूर्वेषां साधनान्याह । वितृष्णयेति पञ्च पद्या ॥ १० ॥

अपरेषामाह । निर्वैरेति द्वाभ्याम् । अतो लिङ्गं व्यपोहेदिति पूर्वैरुत्तरैश्च पृथग् योज्यम् योगेन धृत्युद्यमसत्त्वयुक्त इति तृष्णयैव वितृष्णया तृष्णाविगमेनेत्यर्थः । जिज्ञासया शास्त्रादुगवत्स्वविचारेण तपसा भगवत्प्रीणनस्वधर्मेण ईहा निवृत्त्या ऐहिकपारलौकिककामनाभ्यनिवर्तनेन ततश्च नित्यं मत्कर्मभिर्मद्दर्शनपादसेवनलक्षणैरित्यादिब्रह्मचर्येण कायमनोवाग्गतेन ॥ ११-१२ ॥

अत्र प्रीतिं बीजं निक्षिपति । सर्वत्र मद्भावेति । योगेन उपायेन धृत्याभियुक्तः सन् ॥ १३ ॥

अभिनिवेशार्थं तदेव संक्षिप्य पुनराह । कर्मेति । अनेन पूर्वोक्तेन योगेन उपायैकतरेण तेन च न पुस्तकदर्शनमात्रकथाश्रवणेन अपि तु यथोपदेशं श्रीगुरोराशासनप्रकारेणेत्यर्थः । उपरमेदिति । प्रीतिपुरुषार्थिना अनुसङ्गमात्रेण तद्व्यपोहकार्याः प्रीतेरेव स्वयं सिद्धेः मुमुक्षूणां तद्व्यपोहातिरिक्तसाध्याभावात् ॥ १४—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कदा तर्हि मुक्तिरत आह । यदा मनोरूपां हृदयग्रन्थिरज्जु

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ॥

अतस्य कर्मभिरनुबद्धोऽपि ज्ञानवैराग्याभ्यासेन शिथिलो भवेत्तदा अस्मान्मिथुनीभावान्निवर्तते ततश्च हेतुमहङ्कारात्ख्यमुपाधिं त्यक्त्वा मुक्तः सन् परम्पदं याति ॥ ९ ॥

भक्तिमिश्रज्ञानेन लिङ्गभङ्गमुक्त्वा ज्ञानमिश्रया च भक्त्या पञ्चविंशत्यङ्ग्या लिङ्गभङ्गमाह । चतुर्भिः । तत्रापि शुद्धभक्तानां केवलयैव भक्त्या पञ्चदशाङ्ग्या लिङ्ग भङ्गमाह । प्रथमद्वाभ्याम् । हंसे परमहंसस्वरूपे मयि गुरौ भक्त्यैत्यादिभिः अहमाख्यं लिङ्ग लिङ्ग-देह व्यपोहेदित्यन्वयः । वितृष्णया निष्कामतया जिज्ञासया भक्ते-र्भजनीयेश्वरस्य चेति शेषः । तपसा एकादशीकार्त्ति-कादिव्रतलक्षणेन विष्णुनैवेद्यान्नमेवानिबन्धनस्त्रीयभोजनशय-नादिसङ्कोचलक्षणेन च । ईहानिवृत्त्या व्यापारान्तरराहि-त्येन अहमेव देवः प्रभुर्येषां तैः सङ्गात् निर्वैरमत्रेषूत्त्वम् साम्यमन्यस्य सुखदुःखयोः सुखदुःखसाऽप्यभावना उप-शमः क्रोधशोकादेरन्येषां द्वन्द्वैक्यं तेन देहगेहादिष्वात्मी-यत्वबुद्धेस्त्यागासामर्थ्येऽपि त्यागेच्छया असंप्रमादेन कर्त्तव्य-व्यापारित्यागेन मद्भावविचक्षणेन मदीयसत्तावदर्शनेन विज्ञान-विराजितेन विज्ञानजनकेनेत्यर्थः । अनुभवजनकत्वमेव ज्ञानस्य विराजमानमिति भावः योगेनाध्यात्मेन सत्त्वमुत्साहः व्यपोहेत् निरस्येत् ॥ १०—१३ ॥

ततश्च लिङ्गभङ्गार्थकसाधनादुपरमेदित्याह । कर्मेति । यथोपदेशं योगेन गुरूपदेशमनतिक्रम्य यो योग उपायस्तेन नतु पाण्डित्यबलात् पुस्तकदर्शनमात्रादेव स्वोत्प्रेक्षितेन कर्म्माशयाशेरते यस्मिंस्तं बन्धं व्यपोह्य निरस्य योगादुपायात् विरमेदिति लिङ्गव्यपोहनार्थमेव विरमेत् नतु तत्पदार्थज्ञानार्थ-मित्यर्थः । तदर्थस्तु भक्तिं कुर्व्वीतैव यदुक्तम् ।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्व्वेषु भूतेषु मद्भक्तिं लभते पराम् ।
भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।

इति तत्पदार्थानुभवसिद्धेऽपि भक्तेः सर्व्वथैवात्याग आत्मारा-माश्च मुनय इत्यादिप्रमाणान्व्याख्येय एवेत्यतो भक्तिभिन्नादुपा-याद्विरमेदिति केचिदाहुः ॥ १४ ॥

एवं भक्तेर्गुणभावमन्तर्भूतकैवल्यञ्चोक्त्वा भक्तेरुपदेशेनापि कृतार्थः स्यादित्याह । पुत्रानिति । विमन्युः शिक्षितस्याकरणेऽपि क्रोधशून्यः कर्मसु न योजयेत् कर्म्मैव कुर्वीतेति नोपदिशेत् । 'जोषयेत् सर्व्व कर्म्माणि विद्वान् युक्तः समाचरन्' इतितज्ज्ञानोपदेष्टृ-विषयं नतु भक्त्युपदेष्टृविषयमिति ज्ञेयम् ॥ १५ ॥

एतदेवोपपादयति । लोक इति त्रिभिः । अर्थान् भोग्यपदार्थान् इहानदृशांश्च निकाममतिशयेन काम एव यस्य सः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मुक्तिप्रकारं प्रपञ्चयति । यदेत्यादिना । यदा मनोहृदयग्रन्थिः श्लथेत शिथिलो भवेत् तदा अस्मात् संसारात् भवोभजात् हेतु-भवोधं पूर्वोक्तमतिहाय सं [illegible] मुक्तः [illegible] भवति मुक्तश्च परंपर-मात्मसाधर्म्यं याति च [illegible] ॥

तत्र साधनान्याह [illegible] । हंसे परमहंसे गुरौ मयि च ॥ १० ॥

अहं देवो येषां तेषां सङ्गात् ॥ ११ ॥

सध्यूक् सम्यक् ॥ १२ ॥

सर्वत्र मद्भाव विचक्षणेन सुदृढेन योगेन ध्यानाभ्यासेन धृत्युद्यमसत्त्वयुक्तः धैर्यसाधतेनोद्यमेन साधनावृत्यात्मानात्मपर-मात्मबोधयुक्तः अहमाख्यं लिङ्गं तदुपलक्षितं संसारं व्यपो-ह्येत् त्यजेत् ॥ १३ ॥

एतदेवाह । कर्माशयमिति । कर्माणि संसारप्रदान्याशेरते यस्मिन् तत् अनेन योगेन साधनयोगेन सम्यग्व्यपोह्य निरस्य योगात् युज्यते इति योगः जन्ममरणप्रवाहलक्षणः संसारस्तस्मात् ॥ १४ ॥

अतिदिशति । इत्थं यथा मया पुत्रादयः शिक्षिताः तथा अन्योऽपि पिता पुत्रान् गुरुः शिष्यान् नृपः नॄन् अनुशिष्यात् अनुशिक्षयेत् कर्ममूढान्कर्मसु न योजयेत् ननु कर्मसु यस्मान् योजयेत्स स्वर्गं गच्छेत्स्वप्राप्तिमार्गोपदेशतः किं स्यादत्राह । मल्लोक-कामः मदनुग्रह एवार्थः प्रयोजनं यस्य सः ॥ १५ ॥

कर्मसु न योजयेदिति यदुक्तं तदेव द्रढयति । द्वयेन । निकामकामः अत्यन्तः कामो यस्य सः ॥ १६—१७ ॥

भाषा टीका ।

जब कर्मों से बंधे हुये इस पुरुष के मन की हृदय-ग्रन्थि छूट जाती है तब इस मिथुन भावसे छूटकर अनर्थ का कारण अहङ्कार को छोडकर मुक्तिमार्ग को प्राप्त होता है ॥ ९ ॥

छूट ने के साधन ये हैं विवेककारक हंससरी के गुरु मे भगवान् मे भक्ति के होने से अनुवर्तनकरने से विषय तृष्णा छोडने से सुख दुःखों के सहने से सब कार्यों मे जीव के दुःख देख ने से तत्त्व विचार से काम्य कर्म के त्याग से ॥ १० ॥

प्रतिदिन हमारे पूजादिकर्मों से हमारी कथा से हम को देवता मानने वाले भक्तों के सङ्ग से हमारे गुणों के कीर्तन से निर्वैरता से समता से चित्तकी शान्ति से देहगृहादि-क मे जो आत्मबुद्धि तिस के छोडने से ॥ ११ ॥

अध्यात्मयोग से एकान्त सेवासे प्राण इन्द्रिय मन इनों के अच्छीतरह से जीतने से शास्त्र में अच्छी श्रद्धासे निरन्तर ब्रह्मचर्यसे सावधानतासे वचनों के नियमन से ॥ १२ ॥

सर्वत्र हमारे भाव के देखने से अनुभव सहित ज्ञान के होनेसे समाधिसे धैर्यसहित यत्न के करने से कुशलपुरुष का अहङ्कारनामक लिङ्ग देह छूटजाता है ॥ १३ ॥

अविद्या से प्राप्त हुआ जो कर्मोंका स्थान हृदयका ग्रन्थि अज्ञान तिसको उपदेश के अनुसार इस उपाय से अच्छी-तरह दूरकरके सब उपायों से निवृत्त होजावै ॥ १४ ॥

मेरे अनुग्रह को चाहने वाला मेरे लोकको चाहने वाला पुरुष राजा अथवा गुरु अपने पुत्रों को तथा शिष्यों को क्रोधरहित होकर जो कि अज्ञानी हैं तिनको इस प्रकार सिखावे जो कर्ममे मोहित हैं तिनको कर्म मे संयुक्त नहीं करे काम्यकर्मों में उन को लगाने से मनुष्य को क्या अर्थ लाभ होगा ॥ १५ ॥

कस्तं स्वयं तदभिज्ञो विपश्चिदविद्यायामन्तरे वर्तमानम् ।
दृष्ट्वा पुनस्तं सघृणः कुबुद्धिं प्रयोजयेदुत्पथगं यथान्धम् ॥ १७ ॥
गुरुर्न स स्यात् स्वजनो न स स्यात्पिता न स स्याज्जननी न सा स्यात् ।
दैवं न तत् स्यान्न पतिश्च स स्यान्न मोचयेद्यः समुपेतमृत्युम् ॥ १८ ॥
इदं शरीरं मम दुर्विभाव्यं सत्त्वं हि मे हृदयं यत्र धर्मः ।
पृष्ठे कृतो मे यदधर्म आरादतो हि मामृषभं प्राहुरार्याः ॥ १९ ॥
तस्माद्भवन्तो हृदयेन जाताः सर्वे महीयांसममुं सनाभम् ।
अक्लिष्टबुद्ध्या भरत भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् ॥ २० ॥

भाषाटीका ।

सब लोक स्वयं अपने कल्याण में अज्ञान होगया है जोकि अत्यन्त कामी होकर विषयों को चाहता है थोडेसुख के लिये परस्पर मे वैर करता है मूढ होने से अनन्त दुःख को नहीं जानता है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमीदृशं कुबुद्धिं दृष्ट्वा तत्रैव कस्तं प्रवर्तयेत् कोऽपि उत्पथेन गच्छन्तमन्धं यथा तत्रैव गच्छेति को ब्रूयात् ॥ १७ ॥

समुपेतः सम्प्राप्तो मृत्युः संसारो येन तं ततो भक्तिमार्गोपदेशेन यो न मोचयेत्स गुर्वादिर्न भवतीत्यर्थः यद्वा यस्तं मोचयितुं न शक्नुयात्स तस्य गुर्वादिर्न स्यादिति निषेधः ननु पिता न स्यादिति पुत्रोत्पत्तौ यत्नो न कार्य इत्यर्थः दैवं देवता न स्यादिति पूजा न ग्राह्येत्यर्थः एवमन्यदपि द्रष्टव्यम् ॥ १८ ॥

एवं मोक्षधर्मानुपादिश्य भ्रातृशुश्रूषालक्षणं धर्मं स्पर्द्धादिनिवृत्तये तेषां जन्मकथनपूर्वकमाह । द्वाभ्याम् । इदं मनुष्याकारं शरीरं मम दुर्विभाव्यमवितर्क्यं मदिच्छाधिष्ठितम् नत्वहं प्राकृतो मनुष्य इत्यर्थः मे हृदयं तु सत्त्वं किं तद्धृदयं यत्र धर्मस्तत् शुद्धं सत्त्वमित्यर्थः कुतः यद्यस्मान्मयाधर्मो दूरादेव पृष्ठे कृत उत्सारितः अत एवमामृषभं श्रेष्ठं प्राहुः ॥ १९ ॥

भवन्तश्च हृदयेन शुद्धसत्त्वमयेन जातास्तस्मान्मत्सरं हित्वा महत्तमं सनाभं सोदरं भजध्वम् ननु त्वत्पुत्रत्वात्त्वां वयं भजेम राजपुत्रत्वात्प्रजाश्च पालयामेति चेदत आह । तदेव मे शुश्रूषणं प्रजानां च पालनं भरतानुवृत्त्यैव सर्वं कृतं स्यादिति भावः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

एवमविद्यायामन्तरे वर्तमानमज्ञानान्तरे वर्तमानं कर्ममार्ग एव वर्तमानमिति वा तं श्रेयसि मन्दबुद्धिं पुरुषं दृष्ट्वा स्वयं तदभिज्ञः श्रेयस्तत्साधनाभिज्ञः अत एव विपश्चिद्धेयोपादेयविभागज्ञः सुहृत्तमः पुमान् कुबुद्धिं तत्र कर्मणि पुनः प्रयोजयेत् काम्यकर्मणि प्रयोजयेदित्यर्थः तत्र दृष्टान्तः यथानुत्पथेन गच्छन्तमन्धं तेनैव गच्छेति यो ब्रूयात्तद्वदिति ॥ १७ ॥

यस्तूक्तभक्तियोगोपदेशेन संसारान्न मोचयेत्तस्य गुरुत्वादिकमेव नास्तीत्याह । गुरुरिति । यः गुर्वादिर्हितोपदेशादिना समुपेतः संप्राप्तो मृत्युः संसारो येन तं पुमांसं योगोपदेशेन संसारान्न मोचयेत्स गुर्वादिरेव न भवतीत्यर्थः ॥ १८ ॥

एवं तावन्मोक्षधर्मानुपदिश्य भ्रातृशुश्रूषालक्षणं धर्मं स्पर्द्धादिनिवृत्तये तेषां जन्मकथनपूर्वकमाह द्वाभ्याम् । ममेदं शरीरं दुर्विभाव्यमितरसजातीयत्वेन विभावयितुमशक्यमित्यर्थः कुतः हि यस्मात् सत्त्वं मे हृदयं इदं सत्त्वप्रचुरं ममेदं शरीरं रजस्तमःप्रचुरमिति सजातीयत्वेन दुर्विभाव्यमित्यर्थः किं तत्सत्त्वं यद्धृदयं मे इत्यत्र तत्राह । यत्र सत्त्वे धर्मः अपि कृतः यत्र चाधर्म आरात् दूरात् पृष्ठे कृतः भागवतधर्मरोधकं प्रवृत्तिधर्मरोधकं यत्तत्सत्त्वमित्यर्थः यतः सत्त्वप्रचुरं मच्छरीरमतो मामार्या ऋषभं श्रेष्ठं प्राहुः ॥ १९ ॥

हृदयेन सत्त्वप्रधानहृदयेनोपलक्षिताः तस्मात् मच्छरीराज्जाताः भवन्तः सर्वे सत्त्वप्रचुराः अतः सनाभं सोदरं महीयांसं भवतां पूज्यममुं भरतमक्लिष्टबुद्ध्या निष्कपटभावेन भजध्वं ननु त्वत्पुत्रत्वात्त्वां वयं भजेम राजपुत्रत्वाच्च प्रजाश्च पालयाम इति तत्राह । तदेव मे शुश्रूषणं प्रजानां च पालनं भरतभजनमेव तदुभयं कृतं स्यादिति भावः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तर्हि मूढो वर्त्ता(?)त्यायातं तदस्तु ततः किं तत्राह । कस्तमिति । स्वयं तदभिज्ञः प्रवृत्तिधर्मोदनन्तदुःखावाप्तिमभिजानन् । को विपश्चित् ज्ञानी पुरुषः अविद्यायामन्तरे अज्ञाननिमित्तसंसारविषये वर्तमानं कुबुद्धिं तं दृष्ट्वा सघृणो दयालुः पुनरपि तं पुरुषं प्रवृत्तिधर्मे प्रयोजयेत् न प्रयोजयतीत्यर्थः कथमिव उत्पथगं मार्गं विहाय गच्छन्तमन्धं यथा कुमार्गे न योजयति तथेत्यर्थः ॥ १७ ॥

इतोऽपि प्रवृत्तिधर्मस्योपदेष्टॄणां गुरुत्वादिकमपि न स्यादित्याह । गुरुरिति । समुपेतमृत्युमज्ञानाद्याप्तसंसारं प्रवृत्तिधर्मस्योपदेष्टरि शिष्येणां गुर्वादिबुद्धिरपि न कर्तव्येत्यतोऽवाह । गुरुरिति । गुरुरपि पूज्यो न स्यादित्यानुक्रम ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अतो गुर्वादिना हरेः स्वरूपमुपदेष्टव्यमित्याशयवानाह । इदं शरीरमिति । दुर्विभाव्यं दुर्निरूप्यम् अपरिच्छिन्नत्वादभौतिकत्वात् ज्ञानात्मकत्वाच्च कुत इत्यत्राह । सत्त्वमिति । मे सत्त्वं बलं ज्ञानसमाहारलक्षणं वस्तुहृदयं हि यस्मात्तस्मात् ज्ञानपूर्वमनुष्ठित एव धर्मः न त्वन्य इत्यभिप्रेत्याह । यत्रेति । यत्र यस्मिन् ज्ञानात्मके हृदये धर्मः स्थितः अनेन ज्ञानपूर्वानुष्ठितो धर्मः नित्यफलप्रद इत्युक्तं भवति प्रसङ्गादधर्मस्थानमाह । पृष्ठ इति । मे पृष्ठे भूत्वा अधर्म आरात्कृतो दूरीकृत इति यद्यस्मात्तस्माज्ज्ञानरूपत्वाद्धर्मादिरिहितहेतुत्वाच्च ऋषभमाहुः ज्ञानपूर्वकमनुष्ठितं धर्मं हृदयं बिभर्तीति के आर्याः शब्दतत्त्वार्थवेदिन इति ॥ १९ ॥

उक्तार्थमुपसंहरन्नेषां योग्यगुणविशिष्टं हरिमुपदिशति । तस्मादिति । भवन्तः सर्वे मम हृदयेन जाता इति यस्मात्तस्माद्यूयं महीयांसं महतोऽपि महान्तं भरतं प्रजाभरणात्तं सुनाभं सर्वाधारं हरिमक्लिष्टबुद्ध्या भजध्वं "नाभिरित्यथ नाम स्याद्धरेः सर्वाश्रयो यत,, इति वचनाद्धरेरिदं यौगिकं नाम अनेन भरतो येषां पूज्य इति ध्वनयति भवच्छुश्रूषणेन भवत्प्रीत्या मुक्तिः करतलगता स्यात् ज्येष्ठानुवर्तनशुश्रूषणलक्षणेन किमित्याशङ्क्य भवद्भिरनुवर्तितेन भरतेन यत्प्रजानां भरणं तत्रस्थस्य मम शुश्रूषणं भवतीत्याह । शुश्रूषणमिति । ज्येष्ठानुवृत्त्या राष्ट्रभेदाभावेन भवद्भिरपि प्रजाभरणमनुष्ठितमिति । अतो भरतं शुश्रूषद्भिर्भवद्भिरपि मम शुश्रूषणं कृतमिति ज्ञातव्यम् ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

व्यावहारिकगुर्वादीनां त्यागेऽपि परमार्थपथिकानां न दोष इत्याह । गुरुर्न स स्यादिति टीकायां पुत्रोत्पत्तौ यत्नो न कार्य इत्यत्र तेनेति शेषः यत्नं न कुर्यादित्यादिकं तु वक्तव्यं कर्तृप्रधानेनैव विवक्षितत्वात् ॥ १८ ॥

आवेशावतारतया प्रतीतस्य श्रीऋषभदेवस्यापि विग्रह एवं युज्यते । इदं शरीरमिति । इदं मनुष्याकारं मम शरीरं हि निश्चितं दुर्विभाव्यं दुर्वितर्क्यं यत्तत्त्वं तदेव यत्रैव धर्मो भागवतलक्षणः तत्रैव मे हृदयं मनः यद्यस्मात्तद्विपरीतादिलक्षणो धर्मो मया पृष्ठे कृतः ततः पराङ्मुखोऽहमित्यर्थः अत एव वक्तुरस्य श्रीऋषभदेवस्य सर्वान्तिमलीलापि व्याजेनान्तर्धापनमेव प्राकृतलोकप्रतीत्यनुसारेणैव तु तथा वर्णितम् आत्मारामनारीतिनिर्दर्शनार्था तदुक्तम् । योगिनां साम्परायविधिमनुशिक्षयन्निति । अतः स्वकलेवरं जिहासुरित्यत्र कलेवरशब्दस्य प्रपञ्च एवार्थः उपासनाशास्त्रे तस्य तथा प्रसिद्धेः ॥ १९ ॥

ननु जायात्मजरातिमत्सु न प्रीतियुक्ता इत्यनेन स्वसम्बन्धिभक्तिः परित्याजितैव पुनः कथमुपदिश्यते तत्राह । महीयांसमिति । महत्सङ्गं द्वारमाहुरित्यादिना तेषां महतां सङ्ग उपदिष्टः तेष्वपि [illegible] [illegible] [illegible] एवाक्लिष्टबुद्ध्या सुखमेव [illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तमेतादृशं कुबुद्धिं दृष्ट्वा तत्रैव कस्तं प्रवर्तयेत् न कोऽपि उत्पथेन गच्छन्तमन्धं कः खलु तेनैव गच्छेति वदेत् ॥ १७ ॥

एवं भक्त्युपदेशासमर्थानाम् तदनुपदेष्टॄणां गुरुत्वबन्धुत्वादिभावं तद्धेतुकं तेषां त्यागं चाभिव्यञ्जयति । समुपेतः सम्प्राप्तो मृत्युः संसारो येन तं जनं भक्तिमार्गोपदर्शनेन यो न मोचयेत् स गुर्वादिर्न भवत् न भवति वाचः शुक्राचार्य इव तं गुरुं त्यजेदेव तस्य प्रणत्यनुवृत्त्याद्यभावेऽपि न प्रत्यवायी स्यादिति भावः एवं विभीषणो रावणमिव तं स्वजनं प्रह्लादो हिरण्यकशिपुमिव तं पितरं श्रीभरतः कैकेयीमिव तां जननीं खट्वाङ्ग इन्द्रादीनिव तद्देवं याज्ञिकब्राह्मणी याज्ञिकविप्रानिव तं पतिं त्यजेदेवेत्यर्थः यद्वा स्यादिति विधिलिङ्‌ यस्तं मोचयितुं न शक्नुयात् स तस्य गुर्वादिर्न स्यात् प्रणत्यनुवृत्त्यादिकं न गृह्णीयाद्यदि गृह्णीयात्तर्हि प्रत्यवायी स्यादिति तेन च यदि मोचयितुं न शक्नुयात् तर्हि गुरुर्भवितुमन्यं न शिष्यं कुर्यात् स्वजनो भवितुं बन्धुतां न दद्यात् पिता भवितुं पुत्रोत्पत्तौ न यतेत जननी भवितुमन्यं गर्भं न दध्यात् देवं भवितुं पूजां न गृह्णीयात् । पतिर्भवितुं पाणिं न गृह्णीयादिति द्योतितम् ॥ १८ ॥

यस्य भक्तिः कर्तव्या स क भगवांस्तथा भक्तिप्राप्त्यर्थं भागवतसेवा चापेक्षणीयेति क वा स भागवत इति युष्माकमल्पोऽपि प्रयासो नास्ति यतो गृह एव भगवानहं वः पिता तथैव गृह एव भागवतोऽयं वो भ्राता वर्तत इत्याह । इदमिति द्वाभ्याम् । इदं शरीरमिति इदं मनुष्याकारं शरीरं हि निश्चितं दुर्विभाव्यं दुर्वितर्क्यं यत्तत्त्वं चिदानन्दरूपं तदेव नत्वहं प्राकृतो मनुष्य इत्यर्थः चिद्वस्तुनस्तत्त्वस्य यन्मूर्तत्वम् एतदेव दुर्विभाव्यत्वम् अन्येषां पृथिव्यादीनां तत्त्वानां दुर्विभाव्यत्वाभावादिति भावः हि निश्चितं यत्र मे धर्मः मत्प्रापको भक्तियोगस्तत्रैव मे हृदयं मनः "साधवो हृदयं मह्यम्" इति मदुक्तेः मे अधर्मः मद्धर्मभिन्नोऽर्थः । आराद्दूरत एव पृष्ठे कृतः ततः पराङ्मुखोऽहं तत्र मे न मनं इत्यर्थः अतो हेतोर्मामृषभं सर्वश्रेष्ठम् ॥ १९ ॥

हृदयेन उरसा जाताः अत एव पुत्रा औरसा उच्यन्त इत्यर्थः सनाभं सोदरं भरतं भजध्वं ननु गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता इत्यनेन कलत्रपुत्रभ्रात्रादिष्वासक्तिं निषिद्ध्यापि पुनरेतां किमित्युपदिशसीत्यत आह । महीयांसं महत्स्वपि श्रेष्ठं महत्सेवां द्वारमाहुर्विमुक्तेरित्यादिना भक्तिहेतुत्वेन महत्सेवाया मयैवोक्तत्वात् अक्लिष्टबुद्ध्येति भ्रातृत्वेन तुल्यैरस्माभिः कथमयं भजनीय इति व्यवहारदृष्टिर्न कार्येति भावः ननु त्वं परमेश्वरत्वात् पितृत्वाच्च त्वां वयं भजामः भक्तिहेतुत्वेन नारदादीन् महतः सेवामहि महाराजपुत्रत्वात् प्रजाश्च पालयाम इति चेत्तत्राह । तदेव मे शुश्रूषणं प्रजानां च पालनं भरतानुवृत्त्यैव सर्वं कृतं स्यादिति मन्मतमिति भावः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अथ यः यं जीवं भगवत्प्राप्तिमार्गोपदेशादिना संसारान्मोचयितुं न शक्नुयात् स तं जीवं शिष्यादिकं न कुर्यादित्याह । यः समुपेतमृत्युं समुपेतः संप्राप्तः मृत्युः संसारो यं यद्यपि संसा-

भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोधनिष्ठाः ।
ततो मनुष्याः प्रमथास्ततोऽपि गन्धर्वसिद्धा विबुधानुगा ये ॥ २१ ॥
देवासुरेभ्यो मघवत्प्रधाना दक्षादयो ब्रह्मसुतास्तु तेषाम् ।
भवः परः सोऽथ विरिञ्चवीर्यः स मत्परोऽहं द्विजदेवदेवः ॥ २२ ॥
न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्राः ! किमतः परं तु ।
यस्मिन्नृभिः प्रहुतं श्रद्धयाहमश्नामि कामं न तथाग्निहोत्रे ॥ २३ ॥
धृता तनूरुशती मे पुराणी येनेह सत्त्वं परमं पवित्रम् ।
शमो दमः सत्यमनुग्रहश्च तपस्तितिक्षानुभवश्च यत्र ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

राच मोचयेत् स गुरुर्न स्यात् शिष्यं न कुर्यात् एवमग्रेऽपि बोध्यम ॥ १८ ॥

अथ भरतानुवृत्तिर्ब्राह्मणभक्तिः सर्वभूतेषु वासुदेवदृष्टिश्च भवद्भिः कर्तव्या दुर्लङ्घ्यशासनस्येश्वरस्य ममाज्ञयेति पुत्रशिक्षार्थं स्वस्येश्वरस्येश्वरत्वमाह । न तु स्वमाहात्म्यसूचनार्थमिदमिति इदं मम शरीरं तावद्दुर्विभाव्यं दुर्लभं मम स्वरूपस्य तु का कथा मे हृदयमन्तःकरणञ्च तत्त्वं शुद्धं यथार्थव्यवहारनिष्ठमित्यर्थः यत्र धर्मो वसतीति शेषः यद्वेन मे मम हृदयेन अधर्मः दूरात्पृष्ठे कृतः अतो मामृषभं श्रेष्ठं प्राहुः ॥ १९ ॥

इत्येतोकलक्षणेन तस्मादुक्तलक्षणाच्छरीराज्जाताः ॥ २० ॥ २१ ॥

भाषाटीका ।

पण्डित होकर स्वयं उस बात को जानने वाला ऐसा कौन होगा जो कि उसको अविद्या में वर्तमान देख करके भी दयालु होकर उस कुबुद्धिपुरुष उत्पथगामी को अन्धे की तरह उसी मार्ग में चलावेगा ॥ १७ ॥

इस संसार में जन्म मरण रूप मृत्यु को जो नहीं छुटासके सो न किसी का गुरू होवे न स्वजन होवे न पिता होवे न माता होवे न दैव होवे न पति होवे उसको कोई योग्यता नहीं है ॥ १८ ॥

यह हमारा मनुष्याकार शरीर तर्कना करने के योग्य नहीं है जिससे शुद्ध सत्त्वमय हमारा हृदय है जिस हृदय में धर्म है मैने अधर्म को दूरही से पीठ के तरफ करदिया है इसी से श्रेष्ठपुरुष मेरे को ऋषभ कहते हैं ॥ १९ ॥

हे पुत्रो ! तिस हेतु से आप लोग मेरे हृदय से सब भये हो तो सब मिलकर तुमारे सहोदर तुम से बड़े इन भरत को शुद्ध बुद्धि होकर भजो तिसी से तुमारा प्रजापालनरूप धर्म भी होजायगा ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं ब्राह्मणाश्च सेव्या इत्याशयेन तेषां सर्वेभ्यः श्रेष्ठ्यमाह पञ्चभिः । भूतेषु चेतनाचेतनेषु विरोहन्तीति वीरुधः स्थावरा उद्भवैरतिशयेनोत्तमाः तेभ्योऽपि ये सरीसृपाः सर्पन्तीति जङ्गमास्ते उदुत्तमा इति सर्वत्रानुषङ्गः तेष्वपि सबोधा निष्ठा स्थितिर्येषां पश्वादीनां ते कीटकादिभ्यः ततस्तेभ्योऽपि मनुष्याः ततोऽपि प्रमथा भूतप्रेतादयः ततोऽपि गन्धर्वाः ततः सिद्धाः ततोऽपि विबुधानुगाः किन्नरादयः ॥ २१ ॥

तेभ्योऽसुराः देवा असुरेभ्यः संधिरार्षः देवाश्च मघवत्प्रधानाः देवेभ्य इन्द्रः श्रेष्ठ इत्यर्थः ततोऽपि ब्रह्मसुता दक्षादय तेषां मध्ये भवः परः श्रेष्ठः स भवो विरिञ्चवीर्यो विरिञ्चवीर्यं शक्तिः कारणं यस्य स विरिञ्चवीर्यः प्रतत्वज्ञनकत्वाद्विरिञ्चतः पर इत्यर्थः स विरिञ्चो मत्परः अहं परो यस्य द्विजदेवा ब्राह्मणा एव देवाः पूज्या यस्य सोऽहम् ॥ २२ ॥

ब्राह्मणैरन्यद्भूतं न तुलये समं न पश्यामि अतो ब्राह्मणात्परं तु भूतं किं पश्यामि न किञ्चित् विप्रा इति तत्रत्यानां ब्राह्मणानां सम्बोधनम् समस्यैवाभावादधिकं कुतस्त्यमित्यर्थः तत्र हेतुमाह सार्द्धाभ्याम् । यस्मिन् ब्राह्मणे श्रद्धया प्रक्षेपेण हुतमन्नादि कामं यथेच्छमहमश्नामि ॥ २३ ॥

मे तनूर्मूर्तिर्वेदाख्या येन ब्राह्मणेनेह लोके धृता यत्र च ब्राह्मणे सत्त्वादयोऽष्टौ गुणाः सन्ति ततः परं किं पश्यामीत्यन्वयः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इदानीं भागवताश्च सेव्या इति वक्तुं तेषां सर्वेभ्यः श्रेष्ठ्यमाह पञ्चभिः । भूतेषु चेतनाचेतनेषु विरोहन्तीति वीरुधः वीरुद्भ्यः ये उत्तमाः सरीसृपा जङ्गमास्तेषु सबोधनिष्ठाः बोधेन सहिता स्थितिर्येषां पश्वादीनां ते कीटादिभ्यः उत्तमाः तेभ्यो मनुष्यास्तेभ्योऽपि प्रथमास्ततो गन्धर्वाः किन्नरादयः ॥ २१ ॥

तेभ्यः असुरास्तेभ्योऽपि मघवत्प्रधाना इन्द्रप्रभृतयो देवाः देवासुरेभ्य इत्यत्र सन्धिरार्षः तेभ्योऽपि दक्षादयो ब्रह्मसुताः तेभ्योऽपि भवो रुद्रः परः श्रेष्ठः स भवः विरिञ्चवर्यः विरिञ्चः ब्रह्मा वर्यः श्रेष्ठो यस्मात्तथा भवस्य जनको विरिञ्चो भवाच्छ्रेष्ठ इत्यर्थः विरिञ्चवीर्य इति पाठे विरिञ्चस्य वीर्यं शक्तिः कारणं यस्य विरिञ्चवीर्यः तज्जनकत्वाद्विरिञ्चस्ततः पर इत्यर्थः स विरिञ्चः मत्परः अहं परो यस्य तथाभूतः अहं द्वि[illegible] ब्राह्मणश्रेष्ठा एव देवा यस्य तथाभूतः उत्कर्षकाष्ठाभूता द्वि[illegible] इति भावः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह। नेति। हे विप्रा! इति तत्रत्यब्राह्मणानां सम्बोधनं ब्राह्मणैरन्यद्भूतं न तुलये सममेव न पश्यामि अतो ब्राह्मणेभ्यः परमुत्कृष्टं भूतं किं पश्यामि न किञ्चित्समस्यैवाभावादधिकं कुत इत्यर्थः तत्र हेतुमाह। सार्द्धेन यस्मिन् ब्राह्मणाग्नौ श्रद्धया प्रकर्षेण हुतमन्नादिकं कामं यथेच्छमहमश्नामि यथा ब्राह्मणान्तर्यामित्वेनाश्नामि तथाग्निहोत्रे नाश्नामि अग्निहोत्रशब्दः कर्मनामधेयवैदिककर्मोपलक्षकः तत्राग्निहोत्रे नाश्नामीत्यर्थः ॥ २३ ॥

किं च तनूशब्दः शमादिगुणपरः वेदपरो वा पुराणी चिरन्तना मे तनूर्मूर्तिर्वेदाख्या येन ब्राह्मणेनेह लोके धृता शमादिगुणपरत्वे तु शमोदम इत्यादिस्तत्प्रपञ्चः यत्र ब्राह्मणे निरतिशयपवित्रं सत्त्वं प्रतिष्ठितमिति शेषः तथा यत्र ब्राह्मणे शमादयः प्रतिष्ठितास्तत्र शमोऽन्तःकरणनिग्रहः बाह्येन्द्रियनिग्रहो दमः अनृतराहित्यं भूतहितं च सत्यम् अनुग्रहः भूतानुग्रहः तप अनशनादिस्तितिक्षा द्वन्द्वसहिष्णुता अनुभवः स्वात्मपरमात्मयाथात्म्यानुभवः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

तारतम्यज्ञानमेव मुक्तिसाधनं नान्यदिति भावेन तदाह। भूतेष्विति। भूतेषूत्पन्नेषु प्राणिषु मध्ये वीरुधः स्तम्बेभ्यो ये सरीसृपा जङ्गमास्त उ तुत्तमा उत्कृष्टतमा इति ज्ञेयाः तेषु सरीसृपेषु ये सुबोधनिष्ठाः ज्ञानयुक्तास्ते पश्वादय उत्तमा इति सर्वत्र योज्यम् ॥ २१ ॥

ये दक्षादयो ब्रह्मसुताः सनकादयश्च तेषां सकाशादिन्द्रः प्रधान इत्यर्थः अथ इन्द्रानन्तरं विरिञ्चवीर्यो विरिञ्चपुत्रो यो भवः स रुद्र उत्तमः स विरिञ्चस्तस्माद्रुद्रात्परः तस्मादहमेव परो नान्य इत्यत उक्तम् मत्पर इति अहमेव परो यस्य स तथा अनेन मुख्यप्राणस्य विरिञ्चसमत्वं सूचयति राजभिर्ब्राह्मणभक्तिर्विशेषतोऽनुष्ठेयेति वेदयितुमाह । अहं द्विजेति । द्विजदेवानां देवः ॥ २२ ॥

यज्ञादीनामैश्वर्यमदेन ब्राह्मणतिरस्कारसम्भवेन कुशनाशः स्यात्सचानुपपन्न इति तेषु श्रद्धातिशयजननार्थमाह। न ब्राह्मणैरिति । ज्ञानपात्रत्वादतः विप्रात्परमुत्तमं मम सन्निधानपात्रं किञ्च न किमपीत्यर्थः कुत एतदत्राह। यस्मिन्निति। मम तृप्तिहेतुत्वादित्यर्थः नन्वग्न्यादेः सम्भवात्किमिति विशिष्योच्यत इति तत्राह। न तथेति ॥ २३ ॥

अन्यादेर्गुणवैशिष्ट्यादित्याह। धृतास्तनूरिति। पवित्रं सत्त्वं शमादिगुणा अनुभावो ज्ञानं च यत्र येषु ब्राह्मणेषु सन्ति ते ब्राह्मणा मे पुराणीरुशतीः शुद्धास्तनूर्मत्स्यादिलक्षणा वेदाख्या वा धृता धारयन्तीति येन तस्मात् ब्राह्मणेभ्यः परं न किमपीति भावः यद्वा येन ब्राह्मणकुलेनापौरुषेयत्वेन निर्मलाः पुराणीः अनादिनिधनाः मे तनूस्तनवो वेदलक्षणा धृता यत्र ब्रह्मकुले सत्त्वादिगुणाः सन्ति तस्मात्परमुत्तमं न किमपीति ॥ २४॥

श्रीमज्जीवगोस्वामि[illegible]

भूतेष्वित्यादिकमुत्तरोत्तर[illegible] द्विजदेवतानान्तु आदरणीयत्वात्कृष्टत्वं विवक्षितं तच्च स्वोपकारित्वमननेन तदेवाह । यस्मिन्निति । तद्द्वारैव मम तृप्तिः स्यादित्यर्थः ॥ २१—२३

सा च कुतस्तत्राह। धृतेति। तद्द्वारैव कारणम सत्त्वमिति सत्त्वमन्तःकरणं पवित्रं विशुद्धमनुग्रहो भूतदया तपः स्वधर्मः अनुभवः श्रीभगवतः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी

इदानीं ब्राह्मणाश्च सेव्या इत्याशयेन तेषां सर्वेभ्यः श्रैष्ठ्यमाह चतुर्भिः। भूतेषु मध्ये विरोहन्तीति विरुधः स्थावरा उत्तमा उच्चैरतिशयेनोत्तमाः तेभ्योऽपि सर्पन्तीति सरीसृपा जङ्गमाः तेष्वपि सबोधनिष्ठा स्थितिर्येषां ते पश्वादयः सिद्धानुगाः किन्नरादयः तेभ्योऽसुरा देवाः असुरेभ्यः सन्निधरार्थः देवाश्च मघवत्प्रधानाः देवेभ्य इन्द्रः श्रेष्ठ इत्यर्थः । तत इन्द्रादपि ब्रह्मसुता दक्षादयः तेषां मध्ये भवः परः श्रेष्ठः स च विरिञ्चवीर्यः ब्रह्मपुत्रः पुंस्त्वमार्षं तज्जनकत्वात्ततो ब्रह्मा श्रेष्ठ इत्यर्थः । अत्र ब्राह्मणभक्तेः प्रक्रान्तत्वात् ब्राह्मणवेषेणांशेन भवाद्विरिञ्चस्य श्रेष्ठ्यं वैष्णवतया वैभवेण च भवस्यैव तस्मात् श्रेष्ठ्यमिति ज्ञेयम्। स ब्रह्मा मत्परः अहं परो यस्येति ब्रह्मतोऽप्यहं श्रेष्ठ इत्यर्थः द्विजेषु दीव्यन्तीति द्विजदेवा विप्रा एव देवा यस्य सः मत्तोऽपि पूज्या ब्राह्मणा इत्यर्थः ॥ २१ ॥ २२ ॥

ब्राह्मणैरन्यद्भूतं न तुलये हे विप्राः! अतो ब्राह्मणेभ्यः परं किं पश्यामि नैव पश्यामीत्यर्थः । तत्र हेतुमाह। यस्मिन्निति सार्द्धेन ॥ २३ ॥

मम तनूर्वेदाख्या येन इह लोके धृता यत्र च ब्राह्मणे सत्त्वादयोऽष्टौ गुणाः सन्ति ततः परं किं पश्यामीत्यन्वयः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

द्विजदेवा देवा यस्य सः तथा ॥ २२ ॥

ब्राह्मणैरन्यद्भूतं न तुलये समं न गणयामि अतो ब्राह्मणात् परं श्रेष्ठं तु अन्यद्भूतं किं पश्यामि न किञ्चित् हे विप्राः! इति तत्रत्यानां मुनीनां सम्बोधनं यस्मिन् ब्राह्म[illegible] ॥ २३ ॥

येन ब्राह्मणेन मे तनूर्मूर्तिः वेदरूपा इह लोके धृता यत्र ब्राह्मणे सत्त्वादयो गुणाः सन्ति ततः परं किं पश्यामीत्यनुषङ्गः ॥ २४ ॥

भाषाटीका

सब प्राणिमात्र मे वृक्ष उत्तम हैं तिनसे चलने वाले उत्तम हैं उनसे भी ज्ञानवाले पशु आदि उत्तम हैं तिनसे मनुष्य उत्तम हैं तिनसे भूत प्रेतादि उत्तम हैं तिनसे गन्धर्व उत्तम हैं तिनसे सिद्ध उत्तम हैं तिनसे किन्नर उत्तम हैं ॥ २१ ॥

तिन से असुर उत्तम हैं तिनसे देवता उत्तम हैं देवतों से इन्द्र उत्तम है तिससे ब्रह्माजी के पुत्र दक्षादिक उत्तम हैं उनमें भी महादेवजी उत्तम हैं उन से भी ब्रह्माजी उत्तम हैं ब्रह्मा से मैं बड़ा हूं मेरे भी पूजनीय ब्राह्मण हैं ॥ २२

मत्तोऽप्यनन्तात्परतः परस्मात्स्वर्गापवर्गाधिपतेर्न किञ्चित् ।
येषां किमु स्यादितरेण तेषामकिञ्चनानां मयि भक्तिभाजाम् ॥ २५ ॥
सर्वाणि मद्धिष्ण्यतया भवद्भिश्चराणि भूतानि सुता ! ध्रुवाणि ।
सम्भावितव्यानि पदेपदे वो विविक्तदृग्भिस्तदुहार्हणं मे ॥ २६ ॥
मनोवचोदृक्करणेहितस्य साक्षात्कृतं मे परिबर्हणं हि ।
विना पुमान् येन महाविमोहात्कृतान्तपाशान्न विमोक्तुमीशेत् ॥ २७ ॥

॥ श्रीशुक उवाच ॥

एवमनुशास्यात्मजान्स्वयमनुशिष्टानपि लोकानुशासनार्थं महानुभावः परमसुहृद्भगवानृषभापदेश उपशमशीलानामुपरतकर्मणां महामुनीनां भक्तिज्ञानवैराग्यलक्षणं पारमहंस्यधर्ममुपशिक्षमाणः स्वतनयशतज्येष्ठं परमभागवतं भगवज्जनपरायणं भरतं धरणिपालनायाभिषिच्य स्वयं भवन एवोर्वरितशरीरमात्रपरिग्रह उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात्प्रवव्राज ॥ २८ ॥

जडान्धमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव ॥ २९ ॥

तत्र तत्र पुरग्रामा[illegible]टखर्वटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैः परिभूयमानो मक्षिकाभिरिव वनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थान एतस्मिन्देहोपलक्षणे सदपदेश उभयानुभवस्वरूपेण स्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखण्डितमनाः पृथिवीमेकचरः परिबभ्राम ॥ ३० ॥

भाषाटीका ।

हे विप्रो ! मैं ब्राह्मणके साथ दूसरे प्राणिकी तुलना नहीं करता हूं इनसे ज्यादे कोई को भी नहीं देखता हूं जिन ब्राह्मणों के मुखमें श्रद्धा पूर्वक मनुष्यों का दिया जो अन्नादिक तिसको मैं यथेष्ठ भोजन करता हूं तैसा अग्निहोत्र में नहीं ग्रहण करता हूं ॥ २३ ॥

जिस ब्राह्मणने हमारी प्राचीन वेदरूपी मूर्तिको धारण की है तथा परम पवित्र सत्व धारण किया है शम दम सत्य दया तप तितिक्षा ज्ञान जिसमें स्थित हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निःस्पृहत्वमाह । मत्तोऽपि येषां न किञ्चित्प्रार्थनीयमस्ति तेषामितरेण राज्यादिना किमु स्यान्न किमपि ॥ २५ ॥

तदेवं ब्राह्मणसम्मानं विधायेदानीं सर्वभूतसम्मानं विधत्ते हे सुताः ! सर्वाणि जङ्गमानि स्थावराणि च भूतानि मदधिष्ठानतया वो युष्माभिः सम्माननीयानि पदे पदे क्षणे क्षणे विविक्ता पूता मत्सरादिरहिता दृष्टिर्येषां तैः तदेव ममार्हणम् ॥ २६ ॥

सर्वकर्मणामीश्वरार्पणं विधत्ते । मनोवचोदृशामन्येषां च करणानामीहितस्य व्यापारस्य मे परिबर्हणमाराधनमेव साक्षात्कृतं फलम् । येन परिबर्हणेन विना कालपाशाद्विमोक्तुं न ईशेत समर्थो भवेत् ॥ २७ ॥

स्वत एव सुशिक्षितानपि लोकानुशासनार्थमनुशास्य मुनीनां पारमहंस्यधर्ममुपशिक्षयिष्यन्भरतमभिषिच्य ऋषभ इत्यपदेशो नाम यस्य स भगवान् ब्रह्मावर्तात्स्वदेशात्प्रवव्राजेत्यन्वयः उर्वरितोऽवशिष्टः शरीरमात्रपरिग्रहो यस्य ॥ २८ ॥

अभिभाष्यमाणोऽपि जनानां मध्ये जडादिवद्गृहीतमौनव्रतस्तूष्णीं बभूव अवधूतस्येव वेषो यस्य ॥ २९ ॥

तत्र तत्र पुरादिष्वनुपथं मार्गे मार्गेऽवनिचरापसदैर्दुर्जनैस्तर्जनादिभिः परिभूयमानोऽपि तदविगणयन्नेकचर एकाकी पृथिवीं परिबभ्रामेत्यन्वयः तत्र पुरं पत्तनं ग्रामा हट्टहीनाः आकरा रत्नानि खेटः कृषीवलग्रामः वाटः पुष्पादिवाटिका खर्वटः पर्वतप्रान्तग्रामः शिबिरं सेनाया वासस्थानम् व्रजो गवां स्थानं घोषो गोपानां स्थानं सार्थो यात्रिकजनसङ्घातः आश्रमा ऋषीणाम् तर्जनं भयजननं ताडनं प्रहारः अवमेहनमुपरि मूत्रणं ष्ठीवनं फूत्कृत्य श्लेष्मप्रक्षेपः ग्राव्णां शकृतो रजसश्च प्रक्षेपः पूतिवातोऽधोवायुः दुरुक्तं शापः एते अगणने दृष्टान्तः मक्षिकाभिरिवेति तत्र हेतुः असति मिथ्याभूते संस्थाने सन्निवेशे देह इत्युपलक्षणम् [illegible] कारो यस्य सदित्यपदेशो [illegible] यस्य तस्मिन्निरभिमानत्वात् [illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

हेतुना उभयोः सदसतोर्योऽनुभवस्तत्स्वरूपेण यत्स्वमहिम्न्यव-स्थानं तेन अत एवाखण्डितं मनो यस्य स परिबभ्राम ॥ ३० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथाच निःस्पृहा च यत्राहेत्याह । मत्त इति । परस्माद्ब्रह्मादेरपि परतः परस्मात्स्वर्गापवर्गयोरधिपतेर्मत्तोऽपि प्रार्थनीयं येषां ब्राह्मणानां न किञ्चिदस्ति एषामकिञ्चनानां नास्ति किञ्चन प्रार्थनीयं येषां तेऽकिञ्चनाः तेषामपि भक्तिं कुर्वताम् इतरैर्णाहिकपुरुषार्थेन किमु स्यान्न किमपीत्यर्थः ॥ २५ ॥

एवं भागवतभक्तिं विधायेदानीं सर्वभूतानां ब्रह्मात्मकत्वभावं विधत्ते । सर्वाणीति । हे सुताः ! चराणि भुवाणि स्थावराणि च सर्वाणि भूतानि मद्धिष्ण्यतया मच्छरीरतया प्रकृतिपुरुषेश्वराणां परस्परवैलक्षण्यबुद्धिमद्भिः भवद्भिः पदे पदे क्षणे क्षणे संमाननीयानि तद्गतसम्भावनमेव ममार्हणं महाराधनम् ॥ २६ ॥

महाराधनमेव निरतिशयफलसाधनमित्याह । मन इति । मनो वचोदृशामन्येषां च करणानाम् ईहितस्य व्यापारस्य साक्षात्कृतं रूपं फलं मत्परिबर्हणं महाराधनमेव येन मत्परिबर्हणेन विना पुमान् कालपाशरूपात् महाविमोहात् विमोक्तुं नेशेत न शक्नुयात् महाराधनमेव मुक्तिसाधनं महाराधनं च सर्वभूतानां ब्रह्मात्मकतया सम्भावनमेवेति भावः ॥ २७ ॥

एवमिति । स्वयमनुशिष्टान् हेयोपादेयविभागज्ञानप्यात्मजान् लोकानुशासनार्थं लोकस्य विविच्य ज्ञापनार्थमेवमनुशास्य स महाप्रभावः सर्वभूतसुहृद्भगवान् ऋषभ इत्यपदेशो व्यवहारो यस्य सः परमहंसाः ब्रह्मार्थिनस्तेषां धर्मं भक्त्यादिरूपमुपशिक्षयिष्यन् भरतं भूमण्डलपालनायाभिषिच्य ब्रह्मावर्तात् स्वदेशात्प्रवव्राजेत्यन्वयः केषामुपशिक्षयिष्यन्मुनीनां शुभाश्रयमननशीलानां कथम्भूतानामुपरतकर्मणां निवृत्तप्रवृत्तिधर्माणामुपशमशीलानां बाह्यान्तःकरणनियमनशीलानां कथंभूतं भरतं स्वस्य तनयानां पुत्राणां शतज्येष्ठं भगवज्जना भागवतास्त एव परायणा भजनीया यस्य तमत एव परमभागवतं भागवतश्रेष्ठं भगवद्भक्तैः भागवतपर्येन्तस्व एव पूतैः स्वयं कथम्भूतः प्रवव्राज गृह एव उर्वरितः अवशिष्टः शरीरमात्रपरिग्रहो यस्य सः परित्यक्तवस्त्रभूषणादिदेहानुबन्ध इत्यर्थः उन्मत्त इवोपलक्षितः गगनमाकाश एव परिधानं यस्य सः दिगम्बर इत्यर्थः प्रकीर्णाः विच्छिन्नाः केशा येन सः आत्मन्यारोपितः आहवनीयो वैदिकोऽग्निर्येन सः उन्मत्त इवेत्यादिना न शास्त्रातिलङ्घनमुच्यते किन्तु "जनेनावमतो योगी सिद्धिं च विन्दति" इति न्यायेन योग वर्द्धकावमानादिफलकव्रतविशेषा उच्यन्ते ॥ २८ ॥

अभिभाष्यमाणोऽपि जनानां मध्ये जडाधिवद्वर्तमानः अवधूतवेषः सर्वैः परिभाव्यो वेषो यस्य सः गृहीतं मौनं व्रतं येन सः तूष्णीं बभूव जडाचारस्य नाभापतेत्यर्थः ॥ २९ ॥

तत्र तत्र पुराविष्वनुपदं मार्गे मार्गे [illegible] निचरापसदैः दुर्जनैस्तर्जनादिभिः परिभूयमानः मक्षि [illegible] तदविगणयन्नेव एकचरः एकाकी सन्पृथिवीं परिबभ्रामेत्यन्वयः तत्र पुरं पत्तनं ग्रामो वृद्धरहितः आकरः [illegible] खेटः कृषीवलग्रामः खर्वटः निषादादिग्रामः [illegible] शिबिरं सेनाया आवासस्थानं व्रजो गोनिवासस्थानं घोषो गोपानामावासस्थानं सार्थो यात्रिकजनसङ्घातः आश्रमः ऋषीणामाश्रमस्थानं तर्जनं भयजनकव्यापारः ताडनं प्रहारः मेहनमुपरिमूत्रणं निष्ठीवनं खात्कृत्य श्लेष्मप्रक्षेपणं ग्राव्णां पाषाणानां शकृतो मलस्य रजसश्च क्षेपः पूतिवातोऽपानवायुः दुरुक्तं शापः एतैः अविगणन् दृष्टान्तः । मक्षिकाभिरिव वनगज इति । तत्रैव हेतुः असत्संस्थाने सततपरिणामिनोऽचिद्द्रव्यस्य परिणामरूपे सन्निवेशे देहोपलक्षणे देहाकारे सदपदेशे देहात्मभ्रान्तिमतामात्मत्वव्यपदेशविषये शरीर इत्यर्थे उभयानुभवः स्वात्मपरमात्मयाथात्म्यानुभवः स्वरूपेण स्वमहिम्नः अवस्थानेन स्वस्य स्वात्मनो महिमा स्वभावः तस्मिन्नवस्थानेन उभयानुभवरूप एव ह्यात्मनः स्वस्वभावत्वेनावस्थितिरित्येवमुक्तं स्वमहिमावस्थानेन हेतुना देहे तदनुबन्धिनि चानारोपित अहंममाभिमानो येन तस्य भावस्तत्त्वं तस्माद्देहविलक्षणात्मयाथात्म्यानुभवरूपभावावस्थित्या निरस्तदेहात्माभिमानत्वादित्यर्थः अत एवाखण्डितमनाः सर्वात्मब्रह्मसाक्षात्कारैकरूपा मतिर्यस्य ॥ ३० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ब्राह्मणेष्वपि विशेषोऽस्तीत्याह । मत्त इति । येषां मत्तोऽपि न किञ्चित्प्रयोजनमस्ति तेषामितरेण स्वर्गाद्याशीर्लक्षणेन पुरुषार्थेन किमु स्यान्न किम[illegible]यथः स्ववचोविश्वासार्थमनः[illegible]दित्यादिविशेषणं भक्तिमन्त[illegible] किमप्यपेक्षणीयमिति प्रकटनायाकिञ्चनानां भक्तिभाजामिति विशेषणद्वयम् ॥ २५ ॥

इदानीं चराचरभूतानि स्वनिवासहेतुत्वेन सम्भाव्यानीत्याह । सर्वाणीति । हे सुताः ! भवद्भिः सर्वाणि भूतानि मद्धिष्ण्यतया मम निवासस्थानत्वेन ध्रुवाणि निश्चितानि सम्भावितव्यानीत्यन्वयः ननु मम धिष्ण्यतया मम विग्रहत्वेन स्वरूपत्वेन सम्भावितव्यानीत्यर्थः किं न स्यादित्याशङ्क्य तस्य तदपूजनत्वादित्याह । पदे पदे इति । या पदे पदे अनुक्षणं विविक्तदृष्टिः जीवानां धिष्ण्यतया परमेश्वरस्य भेददृष्टिः भेददर्शने तदुत तदेव मे अर्हणं भवति प्रीतिजनकं नान्यदित्यर्थं इति यद्वा भेददर्शनमेव नार्हणमपि तु भेदप्रतिपादनमप्युतार्थे इति तदुक्तम् ।

उपपादयेत्परात्मानं जीवेभ्यो यः पदे पदे ।
भेदेनैव न चैतस्मात्प्रियो विष्णोस्तु कश्चन इति ।

"यो हरेश्चैव जीवानां भेदवक्ता हरेः प्रिय" इति च अनेन भेददर्शनात्तत्प्रतिपादनस्य फलाधिक्यं भवतीति ध्वनितमिति ॥ २६ ॥

भेददर्शनस्य मोक्षसाधनत्वाम्नायमर्थं इति तत्राह । मनोवच इति । करणैः कर्मभिः यन्मन आदिना जीवपरयोर्भेददर्शनादिकं यस्य तस्य साक्षात्कृतं मुख्यतः पूर्णं तस्य तदेव तदेव मे परिबर्हणं पूजनं भवति भवदर्हणेन किं फलमित्यतोवाह । मनोवच इति । मन आदिसाधनैर्यन्मदर्हणं तत्साक्षात्कृतं साक्षात्कारफलं भवति येनार्हणेन विना पुमान्महाविमोहकृतात्पाशाद्ज्ञानलक्षणासंसाराद्विमोक्तुमीशः समर्थो न स्यादित्यन्वयः ॥ २७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सावत्प्रयोजनमनुशास्तं चेत्समासमतः परं हरिणा किमकार्यथापि हरिकथया श्रुतयाश्रुश्रुर्षिनं आयतेऽतः सा वक्तव्येत्यत्र शारीरलक्षणो मुनिस्वभारिनशेषमुक्तमाहत्य वक्ति । स एवमनुशास्येति । ऋषभापदेश ऋषभनामा भवन एव सर्वं परित्यज्यति शेषः उर्वरितशरीरमात्रपरिग्रहः अवशिष्टशरीरमात्रपरिकरः गगनमेव परिधानं वस्त्रं यस्य स तथाविगम्बर इत्यर्थः ॥ २८ ॥ २९ ॥

गृहात्संन्यस्तस्य उत्तरस्थितिप्रकारं कथयति । तत्र तत्रेति । कर्पटं वस्त्रोत्पादनस्थलं कुविन्दाश्रयः व्रजो गोकुलं घोष आभीरपल्ली सार्थः परिषज्जनः अवनिचरापसदैः भूमिचरेषु दुर्वृत्तैर्नीचैरित्यर्थः निष्ठीवनं थूत्कारः पूतिवातोऽधोवायुः तत्तर्जनादिकर्मभिर्गणयंस्तूष्णीं प्रतिप्रत्तिमपि अकुर्वन्नेव स्थितः कुत इति तत्राह । असदिति । अन्नामयकृत्स्नानां कृशानां संस्थानं यस्मिस्तस्मिन्नेतस्मिन् देहोपलक्षणे अमप्रस्तुतत्र इत्यपदेशः शब्दो यस्य स तथा तस्मिन् जडशब्दवाच्ये देहे अभयानुभवस्वरूपेण सर्वभयशून्यज्ञानस्वरूपेण स्वमहिमावस्थानं यस्मिस्तेनासमवरोपितनाहंममाभिमानत्वात्यक्ताहंममाभिमानत्वादखण्डितः अदरिकृष्ण इति यस्मादिति शेषः यद्वा असतो ब्रह्मणः संस्थानं यस्मिंस्तथा तस्मिन् तर्हि देहदेहिनोर्भेदापत्त्या "नेह नानास्ति किञ्चन" इति श्रुतिव्याकोपः स्यादत्राह । असदिति । असद्ब्रह्मेत्यपदेशो यस्य देहस्य स तथा देहोऽपि ब्रह्म एवेत्यर्थः "विज्ञानमानन्दं ब्रह्म" इति श्रुतिः अस्मिन्नर्थेव तद्भेदः सूचयन्नित्याह । समवरोपितेति । समवरोपितः सम्यक् त्यक्तः अहंममाभिमानस्तस्य भावः समवरोपिताहंममाभिमानत्वं तस्मात् "तद्ब्रह्मैवाहं ब्रह्मास्मि" इति श्रुतिश्च तर्हि स्वपरिच्छिन्नत्वेन खण्डितत्वमत्राह । अखण्डितेति । अखण्डितस्य खण्डितत्वेन ज्ञानाभावात् तत्र तत्रावमर इत्यर्थः एकमर इत्यनेनाद्वावन्त चाद्येक एव परतीत्ययोऽपि गृह्यते इत्यभिप्रायेणाकर्मिति ज्ञायते ॥ ३० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

द्विजदेवत्वे कारणविशेषमाह । मत्त इति । मत्तोऽपि सकाशात् ॥ २५ ॥

ततुह तदपीत्यर्थः ॥ २६ ॥

साक्षात् कृतं पुरतः करणं समर्पणमित्यर्थः ॥ २७ ॥

एवमिति । भक्तिशिक्षात्र भरतद्वारा ज्ञेया ॥ २८ ॥ २९ ॥

असत् संस्थानमित्यादिकं लोकशिक्षणाय व्यञ्जनमात्रमिदं शरीरं मम दुर्विभाव्यं तत्त्वमित्याद्युक्तेः ॥ ३० ॥ ३४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ततो मद्भक्ताः श्रेष्ठास्ते सर्वत एवाधिकत्वेनाराधनीया इत्याह । मत्तः सकाशाद्येषां न किञ्चित् प्रयोजनं प्रार्थनीयमस्ति अनन्ता दित्यत एवानन्तैश्वर्यमाधुर्यगुणोऽहमेव प्रभुर्येषां प्रयोजनत्वेन वर्ते इति भावः । इतरेण ब्रह्मादिना अकिञ्चनानामहन्तास्पदममतास्पदयोर्मध्ये इत्स्याम विद्यते किञ्चनापि येषामित्यर्थः । मयि भक्तिः प्रेमा तामेव भजतां प्रतिक्षणं प्राप्नुवतामित्यर्थः । अत एव तथा बुभूषांभस्ते नित्यमाराधनीया इति भावः । तृतीयोऽपि ब्राह्मणेभ्योऽपि सकाशाद्भक्ताः श्रेष्ठा उक्ताः श्रीकपिलदेवेन यथा "तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः । मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः । न पश्यामि परं भूतमकर्तुः समदर्शनात्" इति ॥ २५ ॥

स्पर्धावज्ञादिदोषशान्त्यर्थं सर्वभूतसम्माननं विधत्ते । सर्वाणि भूतानि मदधिष्ठानतया मदधिष्ठानतया हे सुताः ! धुनाणि स्थावराणि च भवद्भिः सम्भावितव्यानि ध्येयानि शिक्षिता मत्सरादिदोषरहिता इत्यभिप्रायेण तैः तदेव हित्वा युष्माभिर्ममाहंणामिति पृथग्वाक्यमतो य इत्यस्य न पौनरुक्त्यम् ॥ २६ ॥

समासेन भक्तेर्लक्षणं तां च विना निस्ताराभावं च वदन्नुपसंहरति । मनो वचोदृशामन्येषाञ्च करणानां यथावदीहितस्य देहव्यापारस्य च मे साक्षात् कृतं साक्षात्मनसम्बन्धित्वेन यत् करणं प्रवृत्तिस्तदेव मे परिबर्हणमाराधनमित्यर्थः । येन परिबर्हणेन विना ॥ २७ ॥

उपशिक्षमाणाः उपशिक्षयिष्यन् उर्वरितोऽशिष्टः शरीरमात्रपरिग्रहो यस्य सः ॥ २८ ॥ २९ ॥

तत्र पुरं पत्तनं ग्रामा हट्टहीनाः आकरः खनिः खेटः कृषीवलग्रामः खर्वटः गिरितटग्रामः वाटः पुष्पादिवाटिका शिबिरं सेनाया वासस्थानं व्रजो गवां घोषो गोपानां सार्थो यात्रिकजनसङ्घातः आश्रमा ऋषीणामवनिचरापसदैः मनुष्याधमैः । तर्जनं भयजननं ताडनं प्रहारः मेहनमुपरिमूत्रणं ष्ठीवनं फूत्कृत्य श्लेष्मप्रक्षेपः ग्रावशकृद्रजसां शिलाविड्धूलीनां प्रक्षेपः पूतिवातोऽधोवायुः दुरुक्तैः शापरूपैः परिभूयमानस्ततः परिभवनमगणयन् असति अनित्ये संस्थाने संनिवेशे देह इत्युपलक्षणमाकारो यस्य सोऽसदपदेशमात्रं यस्य तस्मिन्नभिमानत्वात् इति स्वामिचरणाः असत् संस्थानमित्यादिकं लोकशिक्षणाय व्यञ्जनमात्रमिदं शरीरं मम दुर्विभाव्यं तत्त्वमित्याद्युक्तेरिति सन्दर्भः किञ्च श्रीऋषभदेवदेहस्य चक्रपरोक्षान्वादिलक्षणवाच्यत्वं न घटते तस्मादेवं व्याख्येयमेतस्मिन् जगति नश्वरत्वादसत्संस्थाने समष्टित्वेन देहमुपलक्षयतीति जगदपि प्राकृतः स्वदेहस्तस्मिन्नभिमानत्वादिति तज्जीवादिकृतमसमुदायगतां जगतः स्वदेहत्वेनाभिमाने हन्त हन्त एताहशमहदपराधक्षेपकं दुष्टो जगदात्मको मद्देह इति खेदेन मनः क्षोभितं स्यात् अतः स्वमहिम्नि चिन्मयानन्दे यदवस्थानं तेन हेतुना तत्र देहे निरभिमानत्वात् कीदृशेन उभयोश्चिच्छक्तिमायाशक्त्योः स्वीयस्वरूपत्वाश्यां योऽनुभवस्तेन यत् स्वमहिमावस्थानं तेन ॥ ३० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

येषां मत्तोऽपि किञ्चित् स्वर्गादिरूपमपि प्रार्थनीयं नास्ति इतरेण दात्रा तद्दत्तेन वा राज्यादिना किमु स्यात् ॥ २५ ॥

मद्धिष्ठानतया मदाश्रयतया मदुपादानतया भूतानि कारणानन्यानि "सदेव सोम्येदमग्र आसीत् सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा" इत्यादिश्रुतेर्वो युष्माभिः पदे पदे प्रतिक्षणम सम्भावितव्यानि सम्माननीयानि तदेव सर्वभूतसम्माननमेव मम मदीयं पूजनम् ॥ २६ ॥

म्रात्रादिशिष्टजनानि [illegible] भक्ति सर्वभूतसम्मानं च मानसमुक्त्वाथ सर्वसाधनफलं [illegible] आदिव्यापारफलं च मदाराधन-

अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासः प्रकृतिसुन्दरस्वभावहाससुमुखो नवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरः सदृशसुभगकपोलकर्णकण्ठनासो विगूढस्मितवदनमहोत्सवेन पुरवनितानां मनसि कुसुमशरासनमुपदधानः परागवलम्बमानकुटिलजटिलकपिशकेशभूरिभारोऽवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत ॥ ३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मित्युपदिशति। मन इति। मनोवचोदृक्कर्माहितानां करणानां श्रोत्रादीनामीहितस्य व्यापारस्य मे परिबर्हणं ममाराधनं साक्षात्कृतं फलं येन परिबर्हणेन कालपाशात् जनो विमोक्तुमात्मानं विमोचयितुं नेशोऽसमर्थो भवेत् ॥ २७ ॥

अथ गार्हस्थ्यं त्यक्त्वा जनसङ्ग्रहार्थं विरक्तोऽभूदित्याह। स एवमित्यादिना। स्वयमनुशिष्टानपि लोकानुशासनार्थमेवमनुशास्य मुनीनां मननशीलानां मुमुक्षूणां भक्तिज्ञानवैराग्यलक्षणां पारमहंस्यं देहगेहादिविस्मृतिपूर्वकभगवत्प्राप्त्युपाययुक्तः परमहंसलक्ष्यानुष्ठेयं पारमहंस्यमुपशिक्षयिष्यन् भरतमभिषिच्य ऋषभ इत्यपदेशो नाम यस्य स भगवान् ब्रह्मावर्तात्प्रवव्राज उर्वरितोऽवशिष्टः शरीरमात्रं परिग्रहो यस्य स ननु दण्डादि आश्रमचिह्नापरिग्रहे कोऽभिप्राय इति चेच्छृणु द्विविधा हि आश्रमिणः लोकप्राप्तिकामाः भगवज्ज्ञानभक्तिसम्पन्ना भगवत्प्राप्तिकामाश्च तत्राद्याः।

> अन्तस्त्रिलोक्यां त्वपरो गृहमेधोऽबृहद्व्रतः।
> लोकास्त्रयो वहिश्चासन्नप्रजानां च आश्रमाः।

इति द्वितीये स्कन्धे सूचिताः तेषां लोकप्राप्तिकामानां स्वलोकसिद्धये आश्रमचिह्नधारणमावश्यकमेव ज्ञानभक्तिसम्पन्नानां तुच्छीकृतब्रह्मलोकपर्यन्तफलानां भगवदनुरागिणां धृतोर्ध्वपुण्ड्रमुद्रादिवैष्णवचिह्नानां परमभागवतानां निरभिमानिनां दण्डाद्याश्रमचिह्नधारणमनावश्यकम्।

> ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः।
> सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः।

इति वक्ष्यमाणादिति दिक् ॥ २८ ॥

अभिभाष्यमाणोऽपि जनानां मध्ये गृहीतमौनव्रतः जडादिवत्तूष्णीं बभूव ॥ २९ ॥

पुरादिषु अनुपथं प्रतिमार्गम् अवनिचरेष्वपसदैरधमैः मक्षिकाभिर्वनगज इव परिभूयमानोऽपि तदविगणयन् एकचर एकाकी पृथिवीं पर्यटन्नित्यन्वयः तत्र पुरं पत्तनं ग्रामो हट्टहीनः आकरो मणयाद्युत्पत्तिस्थानम् खेटः कर्षकग्रामः वाटः पुष्पादिवाटिका शिविरं सेनास्थानम् व्रजो गवां घोषो गोपानां सार्थो यात्रिकसमूहः आश्रम ऋषीणाम् कथं भूतः एतस्मिन् संसारे असतां बाह्याभ्यन्तरचारिणां विरोधानां सम्यक् स्थानं यस्मिन् सत्कार्यमपदेशो नाम यस्य तस्मिन् देहोपलक्षणो देह अनित्य उपलक्षणमनित्यमादिर्दोषद्योतको यस्य तस्मिन् उभययोः हेयोपादेययोः अनुभवो यस्मिन् तेन स्वरूपेण स्वमहिम्नि अवस्थानेन असमारोपितः अहं ममाद् सर्वाङ्गोऽपि अहं ममाभिमानो येन स तस्य भाववत्तत्वं तस्मा[illegible]दर्शना: ॥ ३० ॥

भाषाटीका

सब देवतों से परमश्रेष्ठ अनन्त मैं हूं स्वर्ग मोक्ष का अधिपति हूं तो भी मेरे में भक्ति करने वाले पुरुषों को मेरे से भी कुछ प्रयोजन की चाहना नहीं है तो इन भक्तिजनों को और ऐश्वर्यों से क्या प्रयोजन है ॥ २५ ॥

हे पुत्रों! स्थावर जङ्गम जितने भूतमात्र हैं तिनको आपलोग क्षणक्षणमें निर्मल ज्ञानदृष्टि होकर हमारे निवास स्थान रूप समुझो यही हमारा पूजन है ॥ २६ ॥

मन वचन कर्म की चेष्टा साक्षात् फल हमारा पूजन ही है कैसा वह पूजन है कि जिसके विना जीवमात्र महामोह रूप यमपाश से छूटने को समर्थ नहीं होसका है ॥२७॥

श्रीशुकदेवजी बोले महानुभाव परमसुहृद ऋषभनामक भगवान् सब पुत्र स्वयं शिक्षित हैं तो भी लोकों के शिक्षार्थ के लिये इस प्रकार से उनको शिक्षाकर शान्ति स्वभाव वाले सब कर्मो से निवृत्त जो महामुनिजन तिन के भक्ति ज्ञान वैराग्य रूप परमहंस धर्मको शिखाने की इच्छा से अपने सौ पुत्रों में बडे जो भरतजी जो परमभागवत हैं भगवज्जनों में प्रेमी हैं तिनको पृथिवी के पालन में राज्याभिषिक्त करके आप घरही में शरीर मात्र से अन्य सब पदार्थों को छोडकर पागल से होकर दिगम्बर होकर केशों को खोलकर गार्हस्थ्य अग्नि को शास्त्रविधि से आत्मामे आरोपण करके सर्व संन्यास लेकर ब्रह्मावर्त से निकल गये ॥ २८ ॥

जड अन्ध मूक बधिर सरी के पिशाचसरीके अवधूत वेष धारण किये रहे सब मनुष्यों के तिरस्कार करनेपर भी मौनव्रत धारण करके उदासीन होकर रहगये ॥ २९ ॥

तहाँ तहाँ पुरग्राम खान खेतीके ग्राम पुष्पवाटिका सेनास्थान गउओं के स्थान गोपों के स्थान यात्रावालो का समूह पर्वत आश्रम वन इन सब स्थानों में पुरुषों में अधमलोगोंके तिरस्कार करनेपर भी जैसे वनकी माखीयों से हस्ति को होवै तैसे मनुष्यों के तर्जनना उनके ऊपर मूतना थूकना पत्थरविष्ठा धूलका फेकना अधोवायु का छोडना इत्यादि को कुछ न गिनकर असत् स्थितिवाले इस देह मे सत् मात्र व्यवहार होनेका है जिसमें स्थूल सूक्ष्म अनुभव से जो अपने स्वरूपमें स्थित है तिस से अहं ममाभिमानको छोडनेसे चित्त के क्षोभसे रहित होकर इकेलेही पृथिवीमें घूमने लगे ॥ ३० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स च तदा ग्रहगृहीत इवादृश्यत तत्र हेतुः पराक् पुरतोऽवलम्बमानाश्च ते कुटिलाश्च ते जटिलाश्च कपिशाश्च केशास्तेषां भूरि भारो यस्य सः अवधूतमनादृतमत एव मलिनं निजशरीरं तेन कप

यर्हि वाव स भ   लोकमिमं योगस्याद्धा प्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्मबीभत्सितमिति व्रतमाजगरमास्थितः शयान एवाश्नाति पिबति खादत्यवमेहति हदति स्म चेष्टमान उच्चरित आदिग्धोद्देशः ॥ ३२ ॥

तस्य ह यः पुरीषसुरभिसौगन्ध्यवायुस्तं देशं दशयोजनं समन्तात्सुरभिं चकार ॥ ३३ ॥

एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकमृगगोचरितः पिबति खादत्यवमेहति स्म ॥ ३४ ॥

इति नानायोगचर्याचरणो भगवान्कैवल्यपतिरृषभोऽविरतपरममहानन्दानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेव आत्मनोऽव्यवधानानन्तरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगैश्वर्याणि वैहायसमनोजवान्तर्धानपरकायप्रवेशदूरग्रहणादीनि यदृच्छयोपगतानि नाञ्जसा नृप ! हृदयेनाभ्यनन्दत् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्याम्
संहितायां वैयासिक्यामृषभदेवानुचरिते
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रभूतोऽप्येवमदृश्यत । अतिसुकुमाराणि करचरणोरःस्थलानि तथा विपुला बाह्वादयस्त एवावयवास्तेषां विशिष्टो न्यासः सन्निवेशो यस्य सः तथा प्रकृत्यैव सुन्दरः स्वभावसिद्धो हासस्तेन शोभनं मुखं यस्य तथा नवनलिनदलवद्याचरती यं शिशिरतारे तापहारिकनीनिके अरुणे आयते नयने ताभ्यां रुचिरः तथा सदृशा अन्यूनाधिकाः सुभगाश्च कपोलकर्णकण्ठनासिका यस्य तथा विगूढस्मितं यद्वदनं तस्य महोत्सवेन विभ्रमेण पुराङ्गनानां मनसि काममुद्दीपयन् एवंभूतोऽपि तथा दृश्यतेत्यन्वयः ॥ ३१ ॥

यर्हि यदा लोकं जनं योगस्य प्रतिपक्षमाचक्षाणः पश्यन्नथ तस्य प्रतिक्रियाकरणं कर्म च निन्दितमित्याचक्षाणस्तदाजगरं व्रतमास्थितः सन् शयान एवाश्नातीत्यन्वयः आजगरं व्रतं नामैकत्रैव स्थित्वा प्रारब्धकर्मोपभोगः अवमेहति मूत्रयति हदति पुरीषमुत्सृजति उच्चरिते पुरीषे चेष्टमानो विलुठन् तेनैवादिग्धा आलिप्ता उद्देशा देहप्रदेशा यस्य सः ॥ ३२ ॥

बीभत्समिवाशङ्क्याह । तस्येति । पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य सः वायुः ॥ ३३ ॥

एवं गवादिचर्यया पानादि करोति स्म तदेवाह । व्रजन्नित्यादिना । काकमृगगवामिवान्यदपि चरितं वृत्तिर्यस्य ॥ ३४ ॥

नानायोगचर्या आचरतीति तथा लोकयात्रापरिहाराय योगिभिरेतं वर्तितव्यमिति प्रदर्शनाय तथा कृतवान् वस्तुतस्तु भगवान्यतोऽविरतः पैरमहानुत्तरोत्तरशनगुणान्वितोऽको य आनन्दस्तदनुभवस्वरूपः किञ्च वासुदेवे आत्मनोऽव्यवधानेनाभेदेन न विद्यतेऽन्येषामिवान्तरा मध्ये उदरस्य देहोपाधेर्भावस्तेन नित्यनिवृत्तोपाधित्वेनेत्यर्थः स्वत एव सिद्धैः समस्तैरर्थैः फलैः परिपूर्णत्वाद्योगैश्वर्याणि नाभ्यनन्दत वैहायसं खेचरत्वम् मनोजवं मनस इव देहस्य वेगं दूरग्रहणं दूरदर्शनम् हे नृप ! हृदयेन मनसा ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतिसुकुमाराणां करचरणाद्यवयवानां विशिष्टं न्यास सन्निवेशो यस्य सः तथा प्रकृत्यैव सुन्दरः स्वभावसिद्धहासः तेन सुन्दरं मुखं यस्य नवनलिनदलाचरती शिशिरतापहारिकनीनिके ययोस्ते अरुणे आयते नयने ताभ्यां रुचिरस्तथा सदृशा अन्यूनाधिकाः शोभनाश्च कपोलादयो यस्य तथाविगूढं स्मितं यद्वदनं तस्य महोत्सवेन विभ्रमेण पुराङ्गनानां मनसि कुसुमशरासनकाममुपदधानः उद्दीपयन्नेवंभूतोऽपि गुरुक परित अवलम्बमानाश्च ते कुटिलाश्च कपिशाश्च केशास्तेषां भूरिभारो यस्य अवधूतं दुर्जनैरिति शेषः अत एव मलिन च यन्निजशरीरं तेन ग्रहगृहीत इव पिशाचग्रस्त इवादृश्यताज्ञ जनैरिति शेषः ॥ ३१ ॥

यर्हि यदा स भगवानृषभः लोकं जनं योगचर्याया स्याप्रतीपं विरोधमाचरन्तमाचक्षाणः पश्यन् स्वभूत तस्य प्रतिकूलं प्रतिक्रियाकरणं च बीभत्सितं निन्दितमित्याचक्षाणः प्रतिक्रियाकरणस्य लोकानर्थावहत्वादिति भावः तदा आजगरं व्रतमेकत्र स्थित्वा प्रारब्धोपभोगरूपं व्रतमाश्रित्य सन् शयान एवाश्नाति खादति अशनं भोजनं पानादिचर्वणं स्वादनं मेहति मूत्रयति स्म हदति पुरीषमुत्सृजति स्म उच्चरितमूत्रमलमुच्चरिते पुरीषे चेष्टमानो विलुठन् तेनैवादिग्धा आलिप्ताः उद्देशा देहप्रदेशा

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका

यस्य सः वीभत्सितमिदमित्याशङ्कयाह । तस्येति । तस्य ऋषभस्य पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य स वायुः समन्ताद्दशयोजनं देशं सुरभीचकार पुरीषस्य सौगन्ध्योक्तिः योगप्रभावातिशयज्ञापनार्था ॥ ३२ ॥ ३३ ॥

एवं गवादिचर्यया यानादि करोति स्म तदेवाह । वर्जेत्यादिना । काकमृगगवामिवान्यदपि चरितं वृत्तिर्यस्य इत्थं नानायोगचर्याचरणः योगिभिरेवं कर्त्तव्यमिति प्रदर्शनाय नानाविधयोगवृत्तानि कुर्वाणः कैवल्याधिपतिः मोक्षाधिपतिः परमात्मदृष्टेरिदं विशेषणं भगवानृषभः आत्मनि स्वात्मशरीरके तथा सर्वेषामात्मभूते च भगवति वासुदेवे परमात्मदृष्टेरिदं वासुदेवे आत्मनि स्वस्मिन्नित्यव्यवधानानन्तरोदरभावेन व्यवधीयतेऽनेनेति व्यवधानं तिरोधायकं कर्म अव्यवधानेन तिरोधायकाभावेन निमित्तेनायमनन्तरोदरभावः तेनान्तरं भेदः उच्छेदोऽस्यार्थः अरशब्दोऽल्पवचने इषदपि भेद इत्यर्थः ततो नञ्समासः स्वरूपतिरोधायकाभावादभ्यन्तरभूतगणाद्विवरेण तस्याब्रह्मात्मकस्वतत्त्वतत्त्वभेदज्ञानस्य किञ्चिन्मात्रस्याप्यभावेनेति यावत् आत्मनः स्वस्य सिद्धाः समस्तार्थाः तैः परिपूर्णः अत एव यदृच्छयानिच्छयापि योगप्रभावादेवानुषङ्गिकतया प्राप्तान्यपि वैहायसादीनि खेचरत्वादीनि योगैश्वर्याणि हे नृप ! हृदयेन मनसा नाभ्यनन्दत् मनोजवो मनस इव देहस्य वेगो दुरदर्शनं दूरस्थवस्तुग्रहणं वैहायसादीनां संसृतिनिमित्तत्वेन मुक्तिविरोधित्वात्तानि न परिगृहीतवानित्यर्थः ॥ ३४ ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अतिसुकुमारत्वेनविशेषणं सर्वत्रानुगमयितव्यं सदृशेत्येतत् न नयनयोः सादृश्यं कपोलादीनामुक्तं किन्तु कपोलकर्णयोस्तथा चान्योऽन्यसदृशौ कपोलौ कर्णौ चेत्यर्थः स्मयतेन सुभगत्वं कर्णादीनामपि ग्राह्यं विगूढमपि वस्तु स्मितं यस्य तस्य कुसुमशरं कामं परामृशः ॥ ३१ ॥

यर्हि नाम स भगवान् ऋषभदेव इति मत्वा अजगरस्य निकाम व्रतमास्थितः शयान एवाश्नात्यन्नादिकं करोति सम्यक् यो योगी योगवत्स्य स्वात्मारामो नित्यसन्तोषनिष्ठ उपरतिमयानिकृतमिवाचरन्नास्ते पदरीश ... प्रतिकूलतया मूत्रपुरीषादिकमपि तत्रैव करोति शौचादिकं न करोतीति ... तेन पुरीषेण उषितः उद्देशः ... यस्य सः पुरीषसुरभिगन्धेन सौगन्ध्यं यस्य स तथा ॥ ३२—३४ ॥

योगैश्वर्यं न गर्हयन्नित्यर्थः । प्रकाशते । आत्मभूते ... आत्मनि ... व्यवधानानन्तरोदरभावेन ... नित्यसिद्धः समस्तार्थैः परिपूर्णः ... योगैश्वर्याणि दृष्ट्वापि नाभ्यनन्द-

इत्यन्वयः वैहायसमाकाशगमनं दूरग्रहणं दूरस्थितग्रहणं ज्ञानं यदृच्छया स्वेच्छया सहसा वा ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

आत्मनि निजांशिनि ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सदृशा अन्यूनातिरिक्ताः अत एव सुभगा मनोहराः कपोलादयो यस्य सः ॥ ३१ ॥

प्रतीपं क्षुत्पिपासालोकोपद्रवाद्यैर्विक्षेपकारणैः प्रतिकूलम् । दृढयोगारूढयोगानां प्रायः प्रातिकूल्याभावात् आजगरं व्रतं नामैकत्रैव स्थित्वा प्रारब्धकर्मोपभोगः एकत्रावस्थाने सति परिचितत्वादेर्लोकोपद्रवाद्यधिकं न स्यादिति भावः । एवमेहति मूत्रयति हदति पुरीषमुत्सृजति उच्चरिते पुरीषे चेष्टमानो विलुठन् तेन । दिग्धा आलिप्ता उद्देशा देह प्रदेशा यस्य सः ॥ ३२ ॥

तस्य चिन्मयशरीरस्यैतद्वीभत्सितमित्याशङ्कयाह । तस्येति । पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य सः वायुः ॥ ३३ ॥

काकमृगाणां पशुतुल्यलोकानां गोचरितः तादृशस्वभावत्वेन दृष्टिविपर्याभूत इत्यर्थः ॥ ३४ ॥

कैवल्यपतिरित्यन्येभ्योऽपि कृपया यः कैवल्यं ददाति तस्येयं योगिजनशिक्षणार्था लीला ध्येयैव नतु अनुचिकीर्षणीयेति भावः भगवानपि भगवति वासुदेवे वसुदेवनन्दने तस्यैव सर्वावताराणामप्याराधनीयत्वात् यदुक्तं भीष्मेण ।"अस्यानुभावं भगवान् वेद गुह्यतमं शिवः । देवर्षिर्नारदः साक्षाद्भगवान् कपिलो मनुः" इति । ईश्वरस्याद्युत्वं वारयति आत्मनि स्वस्यांशित्वात् स्वस्मिन्नित्यर्थः आत्मनः स्वस्याव्यवधानः साक्षाद्भूतः अनन्तः अपारः रोदं रोदनमश्रु राति आददातीति रोदरो भावः प्रेमा तेनैव सिद्धैः समस्तैरर्थैः परिपूर्णः वैहायसं खेचरत्वं मनोजवं मनस इव देहस्य वेगं दूरग्रहणं दूरदर्शनं हे नृप ! हृदयेन ॥ ३५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमे पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

अतिसुकुमारा ये करादयोऽवयवास्तेषां विशिष्टो न्यासः सन्निवेशो यस्य सः प्रकृत्या सुस्वभावेनैव सुन्दरः स्वभावसिद्धेन हासेन शोभनं मुखं यस्य सः नवनलिनदलवदाचरतो ये शिशिरतापहारिकनीनिके ययोस्ते अरुणे आयते नयने ताभ्यां चिरः सदृशाः समानाः सुभगाश्च कपोलकर्णकण्ठनासिकाः यस्य सः विगूढस्मितवदनस्य महोत्सवेन विलासेन पुरवनि-

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स्त्रीणां मनसि कुसुमशरासनमुपदधानः एवंभूतोऽपि पराक् परितः प्रवलम्बमानाश्च ते कुटिलाश्च जटिलाश्च कपिशाश्च केशास्तेषां भूरिभारो यस्य सः अवधूतं तपोयुक्तम् यथेष्टभोजनवस्त्राभरणाशय्यासनोऽभईनापि सकलसुखवर्जितमित्यर्थः अत एव मलिनमसंस्कृतमाणवत् गूढप्रकाशं निजशरीरं तेन ग्रहगृहीत इवाऽदृश्यत ॥ ३१ ॥

स ऋषभो भगवान् यर्हि लोकं जनं योगस्य प्रत्यक्षात् प्रतीपमिवाचक्षाणाः पश्यन् अभूत् तत्तस्य लोकस्य प्रतिक्रियाकरणं च बीभत्सितं गर्हितमित्याचक्षाणाः तदा आजगरं व्रतमास्थितः सन् शयान एवाश्नाति भोजनं करोति पिबति च खादति चणकादीनां चर्वणं करोति अवमेहति मूत्रयति हदति पुरीषमुत्सृजति उभयरिते पुरीषे चेष्टमानो विलुण्ठन् तेनैवादिग्धा उद्देशाः शरीरावयवा यस्य सः ॥ ३२ ॥

तस्य भगवतः पुरीषस्य सुरभिणा गन्धेन सौगन्ध्यं यस्य स वायुः समन्तात् दशयोजनं तं देशं सुरभीचकार ॥ ३३ ॥

किञ्च गवादिचर्यया पिबति खादत्यवमेहति स्म काकमिव मृगगवामिवान्यदपि चरितं यस्य सः ॥ ३४ ॥

इति एवं नानायोगचर्या आचरतीति तथा अविरतः अखण्डः परममहानन्दानुभवो यस्य सः आत्मनि परमात्मनि वासुदेवे सर्वावतारमूले आत्मनः अवतारभूतस्य अव्यवधानः अव्युच्छिन्नः न विद्यते अन्तरे मध्ये उदरः फलाभिसन्धिलक्षणं छिद्रं यस्य स चासौ सन् तेन भावेन ध्यानेन सिद्धैः समस्तैरर्थैः फलैः परिपूर्णः योगैश्वर्याणि हे नृप ! हृदयेन मनसा नाभ्यनन्दत् ॥ ३५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चमाध्यायार्थप्रकाशः ॥ ५ ॥

भाषाटीका

भगवान् ! ऋषभदेवजी का वर्णन है अत्यन्त सुकुमार उनके करचरण वक्षस्थल भ्रू अतिसुकुमार हैं भुजास्कन्ध गला वदन अतिपुष्ट हैं सुन्दर उनका विन्यास है मुखारविन्द में सुन्दर हास स्वभावहीसे सिद्ध है नूतन कमल दल सरीके शीतलता वाले लालवर्ण के नयनों से अत्यन्त मनोहर हैं सुन्दर बराबर कपोल कर्ण नासिका वाले हैं मन्दहासके गुप्त होनेसे मुखमें जो विलक्षण शोभा जिसमें पुरस्त्रियों के मनमें कन्दर्प को पैदा करते हैं आगे की तरफ लटकते टेढ़े जटा बन्धे पिङ्गल वर्ण के केशों का भार धारण किये हैं अवधूत का सा मलिन अपने शरीर से ग्रहों के पकड़े से लोगों को दीखपड़े ॥ ३१ ॥

जब ऋषभ भगवान् ने देखाकि यहसंसारी लोग योग का विरोधी हैं और उसके हटाने का उपाय भी बड़ा खराब है तब अजगर व्रतको धारण किया जिसमें एक ठिकाने सोतेहीं हुये खाते पीते थे और मलमूत्र करते थे उसीसे शरीर भी उनका सब लिप्त होगया था ॥ ३२ ॥

उनके शरीर के विष्ठाके सुगन्ध से युक्त जो वायु तिसने चारों तरफ दश योजन मात्र देशको सुगन्धित कर दिया ॥ ३३ ॥

इस प्रकार गऊ मृग काक की चेष्टासे चलते बैठते खड़े होते सोते काकगौ मृग के तुल्य ही खाते पीते मलमूत्र करते थे ॥ ३४ ॥

निरन्तर परम महा आनन्द अनुभव करने वाले कैवल्यके पति भगवान् ऋषभदेवजी ने सब भूतों के आत्मभूत सब के आत्मा वासुदेव भगवान् में निरन्तर आत्मा का भाव होने से सिद्ध सब अर्थों से परिपूर्ण होजाने से अपने आपही प्राप्त जो आकाश गमन मनोवेग गमन छिपजाना परकाय प्रवेश दूरदृष्टि इत्यादि योग के ऐश्वर्यों को साक्षात् देखकर भी मन में अच्छा नहीं माना ग्रहण नहीं किया ॥ ३५ ॥

इति श्रीभागवत पञ्चमस्कन्ध पांचवां अध्याय का
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ५ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पञ्चमोऽध्यायः समाप्तः ॥ ५ ॥

षष्ठोऽध्यायः ।

॥ राजोवाच ॥

न नूनं भगवः! आत्मारामाणां योगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणि पुनः क्लेशदानि भवितुमर्हन्ति यदृच्छयोपगतानि ॥ १ ॥

॥ ऋषिरुवाच ॥

सत्यमुक्तं किन्त्विह वा एके न मनसोऽद्धा विश्रम्भमनवस्थानस्य शठकिरात इव सङ्गच्छन्ते ॥ २ ॥

॥ तथाचोक्तम् ॥

न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते ।
यद्विश्रम्भाच्चिराच्चीर्णं चस्कन्द तप ऐश्वरम् ॥ ३ ॥
नित्यं ददाति कामस्य च्छिद्रं तमनु येऽरयः ।
योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ ४ ॥
कामो मन्युर्मदो लोभः शोकमोहभयादयः ।
कर्मबन्धश्च यन्मूलः स्वीकुर्यात्कोऽनु तद्बुधः ॥ ५ ॥

अथैवमखिललोकपालललामोऽपि विलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावो योगिनां सांपरायविधिमनुशिक्षयन् स्वकलेवरं जिहासुरात्मन्यात्मानमसंव्यवहितमनर्थान्तरभावेनान्वीक्षमाण उपरतानुवृत्तिरुपरराम ॥ ६ ॥

तस्य ह वा एवं मुक्तलिङ्गस्य भगवत ऋषभस्य योगमायावासनया देह इमां जगतीमभिमानाभासेन संक्रममाणः कोङ्कवेङ्ककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतः [illegible]टकाचलोपवन आस्य कृताश्मकवल उन्माद इव मुक्तमूर्धजोऽसंवीत एव विचचार ॥ ७ ॥

अथ समीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानः [illegible] तेन ददाह ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे लिङ्गाभिमानस्य देहत्यागक्रमाभिधा ।
प्रदहन्तं दवाग्निं यः पश्यन्नपि न पश्यति ॥ १ ॥

योगैश्वर्याणि नाङ्गीकृतानीत्युक्तं तत्र पृच्छति । नेति । भगवः ! हे भगवन् ! योगेन समीरितमुद्दीपितं यज्ज्ञानं तेनावभर्जितानि दग्धानि कर्मबीजानि रागादीनि येषां तेषां यदृच्छया प्राप्तानि योगैश्वर्याणि पुनः क्लेशदानि भवितुं नार्हन्ति अतः किमिति नाङ्गीकृतानीत्यर्थः ॥ १ ॥

अङ्गीकृत्य परिहरति । सत्यमिति । एके बुद्धिमन्तोऽनवस्थानस्य चञ्चलस्य मनसो विश्वासं न सङ्गच्छन्ते न सम्यक् प्राप्नुवन्ति शठः किरातो यथा धृतेष्वपि मृगेषु शठे किराते यथा मृगा इति सप्तम्यन्तं वा पाठान्तरं शठो वञ्चकः किरातो वागुरापाशहर्तारि यथा [illegible] विश्वासं न यातीत्यर्थः परिभ्रंशकोऽपि दोषो [illegible] उपरतेषु नाङ्गीकृतानीति भावः ॥ २ ॥

तत्र हेतुः यद्विश्रम्भात्तस्य [illegible] विश्वासाच्चिराच्चीर्णं बहुकालसञ्चितं तपश्चस्कन्द क्षुब्धम् [illegible] मोहिनीरूपदर्शनेन यद्वा ईश्वराणां समर्थानामपि सौभर्यादीनां [illegible] तपः ॥ ३ ॥

नित्यमिति । कृतविश्वासे [illegible] योगी तदीयं मनः कामस्य तमनु येऽरयस्ते[illegible] दहाति यथा कृतविश्वासस्य पत्युः पुं[illegible]राणामवकाशं दत्त्वा पतिं घातयति तथा म[illegible]योगिनं घातयतीत्यर्थः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थ[illegible]

अरीन् कथयन्नुपसंहरति । काम इ[illegible]मितो भवति तन्मनः को नु बुधः स्वीकुर्यात् [illegible] ॥ ५ ॥

प्रासङ्गिकं समाप्य प्रस्तुतमाह । अथेति [illegible]खिलानां लोकपालानां ललामो भवडनभूतोऽप्युपरतः [illegible] उपरराम देहाभिमानं जहौ विलक्षणै[illegible]कारैरवधूतवेषादि-भिर्न विलक्षितो भगवत्प्रभावो यस्मिन् [illegible]परायविधिं देहत्यागप्रकारम् आचारायैव भावव्याप्त्यर्थमाह । अनर्थान्तरभावेनाभेदेन उपासनाव्याप्त्यर्थमाह । असंव्यवहितम् ॥ ६ ॥

मनसा त्यक्तेऽप्यभिमाने केनापि संस्कारेण देहः प्रचलति यथा कुलालचक्रं सोऽयमभि[illegible]मानाभासस्तेन स च जीवन्मुक्तानामविद्यावासनया भवतीति अतो विशेषमाह । योगमायावासनयेति । कोङ्कादीन् देशान् गतः सन्कथापि वासनयाऽऽस्ये कृतोऽश्मकवलो येन असंवीतो नग्नः ॥ ७ ॥

समीरवेगेन विधूतानां कम्पितानां वेणूनां संघर्षणेन जात उग्रो दावानलः आलेलिहानः सर्वतो प्रसरन् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तं युक्तिविरोधित्वाद्वैहायसादीनि योगैश्वर्याणि नाभ्यनन्ददिति तत्र पृच्छति राजा । नेति । हे भगवन्नात्मारामाणां योगेन समीरितमुद्दीपितं ज्ञानं तेन योगरूपवायुसहकृतज्ञानलक्षणाग्निनाकार-रूपज्ञानाग्निना भर्जितानि दग्धानि कर्माणि बीजानि वासनारूपाणि येषां हेतुगर्भमिदम् ज्ञानयोगाभ्यां निर्दग्धशेषकर्मबीजत्वादित्यर्थः यदृच्छयोपगतानि ऐश्वर्याणि वैहायसादीनि पुनः क्लेशदानि संसृतिनिमित्तानि भवितुं नार्हन्तीति किमिति नाभ्यनन्ददिति प्रश्नार्थः ॥ १ ॥

उत्तरयति शुकः । सत्यमुक्तमिति । योगैश्वर्यासक्तिनिमित्तज्ञानयोगक्षयसम्भावनया नाभिनन्दनेऽङ्गीकारः पुनः संसृतिनिमित्तानि न भवन्त्यत्रानङ्गीकारः सौभर्या[illegible]दीनामैश्वर्यस्य संसृतिनिमित्तत्वदर्शनात् यदुक्तं पुनः क्लेशदानि न भवन्तीति तत्रापि तु योगसमयान्तरा भवन्त्येवेत्याह । कि[illegible]न्त्विति । इह वा एके महामुनयः वशीकृतमनसः पुरुषाः कि[illegible]नवस्थानस्यातिचञ्चलस्य मनसः अद्धा साक्षाद्धिकल्पं विश्वासं न [illegible]कुर्वन्ते न प्राप्नुवन्ति न कुर्वन्तीत्यर्थः मनो न विश्वसन्तीति [illegible] जितमनस्कानामपि भोगासक्त्या मनःपारवश्यं सत्य[illegible]स्थितं मनस्तान् वञ्चयित्वात्माधीनं सत्संसारयेदिति भावः [illegible] दृष्टान्तः । शठकिरात इवेति । शठकिरातो वागुरिकः कस्मिं[illegible] विश्वासपर्यन्तं मृगाधीन इव स्थित्वा वञ्चयन् नाघ्नन्ति [illegible] ॥ २ ॥

अत्राभियुक्तोक्तिमुदाहरति । तथा चोक्तमिति । मनस्यनवस्थिते सति कदाचिदपि कस्मिंश्चिदपि जितमनस्कोऽपि मम स्वाधीनमनः किमनर्थमापादयेदिति बुद्ध्या सङ्गं न कुर्यात् यस्य मनसो विस्रम्भाद्विश्वासाच्चिरकालस[illegible]ञ्चितमपि ऐश्वरमीश्वरस्य विष्णोः सम्बन्धि तपः ज्ञानभवम् उप[illegible]ासनात्मकं तपश्चस्कन्देत् स्कन्दे न [illegible] ॥ ३ ॥

स्युरित्याह । नित्यमिति । यो मनःकृतविश्वासो योगी कामस्य छिद्रं योगरूपमैश्वर्यं ददाति काममनुसृत्य जायमाना येऽरयः शत्रुवदनर्थकारिणः क्रोधादयस्ते मनसि कृतमैत्रस्य योगिनो मनश्छिद्रं ददाति यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जाराणामवकाशं दत्वा पतिं घातयति तथेति ॥ ४ ॥

अरीन्कथयन्नुपसंहरति । काम इति । कर्मरूपो बन्धश्च बन्धमूलः भोगैश्वर्यभोगासक्तिमूलः अतः को नु पुमान् बुधः सन् तत्कामादिमूलं स्वीकुर्यात् [illegible] स्वीकुर्यादित्यर्थः ॥ ५ ॥

प्रासङ्गिकं परिसमाप्य प्रकृतमाह । अथेति । अखिलानां लोकपालानां ललामो भवडनभूतोऽपि विलक्षणैरनेकप्रकारैर्जडवदवधूतवेषादिभिर्विलक्षितो भगवत्प्रभावो यस्मिन् योगिनां साम्परायविधिं देहत्यागप्रकारमनुशिक्षयन् स्वशरीरं त्यक्तुमिच्छुरव्यवधानमज्ञानातिरोहितमात्मानं प्रत्यगात्मानमात्मनि परमात्मन्यनर्थान्तरभावेन अर्थान्तरं स्वतन्त्रं वस्तु तस्य भावस्तत्ता नञ्समासः परमात्मा पृथक्सिद्धत्वेनान्वीक्षमाणः साक्षात्कुर्वाणः अत एव उपरतानुवृत्तिर्निवृत्तप्रारब्धकर्मानुवृत्तिः उपरराम देहादिति शेषः देहं त्यक्तवानित्यर्थः ॥ ६ ॥

त्यागप्रकारमेवाह गद्यद्वयेन । तस्येति । एवं मुक्तलिङ्गस्य मनसा त्यक्तशरीराभिमानस्य तस्य भगवतो ऋषभस्य देहो विचचारेत्यन्वयः देहो विचचारेत्युक्तिर्देहधारणाभावद्योतनार्था अन्यथा सुषुप्तमूर्छितदेहस्येव संचारानुपपत्तेः कथंभूतो विचचार योगमायाया भगवन्मायाया वासनाया मायावा[illegible]ऽपि तद्वासनामात्रानुवृत्त्याय: अभिमानाभासः देहे आत्मीयत्वाभिमानाभासस्तेन देहात्माभिमानाभासमात्रमेवास्य न तु तत्त्वतो देहात्माभिमानोऽस्तीति ज्ञापनायाभासपदं प्रयुक्तम् इमां जगतीं चङ्क्रममाणः सञ्चरन्नेकदा कदाचित्कोङ्काादीन्देशान् यदृच्छयागतः कुटकाचलस्योपवने आस्ये वक्त्रे कृतः निक्षिप्तः अश्मैव कवलो येन उन्माद इव लक्ष्यमाणः मुक्ता विकीर्णाः मूर्धजाः शिरोरुहा यस्य असंवीतः नग्न एव ॥ ७ ॥

अथानन्तरं समीरवेगेन विधूतानां कम्पितानां वेणूनां विघर्षणेन संघर्षणेन जातो य उग्रो दवाग्निस्तद्वनं कुटकाचलवनमालेलिहानो दहनः तेन ऋषभस्य देहेन सह ददाह दाहासाहित्यमत्र विवक्षितम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

शुभयोगिजनशिक्षार्थमशुभयोगिजनमोहनार्थं तत्प्रभृतिभेदाभेदशास्त्रप्रवृत्तिप्रकाश इत्येतदृषभदेवचरितापदेशेन निरूप्यतेऽस्मिन्नध्याये । तत्रादौ यद्यपि देवादीनामैश्वर्यभोगेन मनःसक्त्याहिमुक्तिसङ्गानन्दह्रासो नास्ति तथाप्यल्पाधिकारिणां न स्यादिति तात्पर्यं ज्ञाप्यते अत्रानन्तरातीताध्यायान्ते योगैश्वर्याणि नाभ्यनन्ददित्युक्तं तत्र राजा शङ्कते । न ननूनमिति । योगेन हरे-रूपाग्निलक्षणेन समीरितमुत्पन्नं यत् ज्ञानं तेनावमार्जितं दग्धं कर्मबीजं रागादिलक्षणं येषां ते तथा तेषां परमात्मनिरतानां यदृच्छयानिच्छयोपगतानि योगैश्वर्याणि पुनः पश्चात्क्लेशदानि भवितुं नार्हन्ति नूनं कथं तानि नाभ्यनन्ददित्यन्वयः ॥ १

अर्धाङ्गीकारेण परिहरति । सत्यमिति । अनङ्गीकारपक्षमाह ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किञ्चिदिति । एके महात्मानः घटकिराटे नूतनघटे स्थितस्य जलस्येवानवस्थानस्य विस्रम्भं विश्वासं वा इत्यनेन ।

महैश्वर्यस्वरूपोऽपि भगवानृषभो विराट् ।
नैश्वर्याणि स्वकीयानि ख्यापयामास सर्ववित् ।
उत्तमानां ज्ञापनार्थं धर्मतत्त्वस्य केशवः
तेषामैश्वर्यभोगे हि मनः सक्तं व्रजेद्यदि ॥
आनन्दो मुक्तिगो ह्रासं विकर्मकरणाद्व्रजेत् ।
धर्माधर्मविहीनोऽपि भगवानृषभस्ततः ॥
तेषां धर्मज्ञापनार्थं नाविश्चक्रे परां स्थितिम् ।
देवानां नाशुभाद्ध्रासः शुभात्किञ्चित्सुखोन्नतिः ।
आधिकारिकजीवानामेवमन्येषु तद्द्वयम् ॥
अल्पाधिकारिणां तत्र ह्रासोऽपि भवति ध्रुवम् ।
अशुभाभावजोत्साहो महाधिकारिणामपि ॥
अशुभे कृते न भवति तारतम्या च सस्मृतः ।
प्रजापाश्च तथा देवा महाधीकारिणः स्मृताः ॥
ऋष्यशीतिस्तथा सप्त पितरोऽप्सरसां शतम् ।
गन्धर्वाणां तथा राज्ञां विद्यदन्यासु जातिषु ॥
अल्पाधीकारिणः प्रोक्ता अनधिकारिणः परे इति ।

शास्त्रान्तरप्रसिद्धं तात्पर्यं ज्ञापयति । मठकिराट इति पठित्वा वागुरेति कश्चिद्व्याचक्षते ते प्रेक्षकाणां परिचयसम्प्रदायज्ञा इति परिहसनीया इति ॥ २ ॥

त्रैलोक्यशिक्षार्थं श्लोकसंग्रहेणामुक्तमित्याह । तथाचोक्तमिति । यथा मनोविश्वासे तपआदर्विध्वंसनं भवति तथा चोक्तमित्यर्थः ऐश्वर्यमीश्वरविषयम् अनेन सौभर्यादीश्वराणामपि यथा तपः स्कन्दितं तथेति व्यनयति ॥ ३ ॥

छिद्रमवकाशं तमनु कामानन्तरम् अरयः क्रोधादयः तेषां चच्छिद्रं ददातीत्यर्थः कृतमैत्रस्य मनसा सहेति शेषः पुंश्चली पुरुषमात्राभिगामिनी जाया पत्युररीणामुपपतीनां प्रवेशमिव ॥ ४ ॥

पात्रे प्राप्ते द्रव्यात्यागेच्छा लोभः अनीतदुःखस्मरणनिमित्तचित्तविक्षेपः शोकः वैचित्यं विपरीतज्ञानं मोहः पूर्वस्थितास्त्रस्तनं भयं कर्मणा संसारबन्धो यन्मनोमूलं यस्य स तथा को नु बुधस्तन्मनो ममेत्यात्मनि स्वीकुर्यादित्यर्थः ॥ ५ ॥

अधुना प्रासङ्गिकं मोहं परिहृत्य प्रकृतमनुसरति । अथेति ।
विष्णोः कलेवरत्यागो भूत्यागोऽन्यो न विद्यते ।
कलेवरत्यागोऽन्येषां पञ्चत्वं समुदीरितम् ।

इति वचनात्स भगवान् स्वकलेवरं स्वाधीनां पृथिवीं जिहासुः त्यक्तुमिच्छन्नुपरराम विरतव्यापारो बभूवेत्यन्वयः कलेवरशब्दस्य प्रतीत एवार्थः किं न स्यादित्याशङ्क्य वक्ष्यमाणानां विशेषणानां प्राकृतपुरुषेऽसम्भवादुक्तएवार्थ उचित इति भावेनाह । अखिलेति अखिललोकपालानां ललामस्थचूडामणिः अनेनाप्राकृतत्वं कथमवगतमित्यतउक्तं विलक्षणा इति । लोकविपरीतलक्षणः अस्थूलमनणुह्रस्वमित्यादेः कथं तर्हि तस्य प्रभावो न लक्ष्यत इत्यत उक्तं जडवदवधूतेति । किमतः प्रयोजनमत उक्तं योगिनामिति । साम्परायविधि मोक्षसाधनप्रकारम् उपहितस्यास्य शिक्षा कथं मोक्षोपयोगिनी स्यादित्यत उक्तमात्मनीति । आत्मानं स्वस्वरूपमात्मनि प्रणि[illegible] अनन्य[illegible] भिन्नो नास्मीति मनसा असंतयन्नाहितं व्यवधानरहितं [illegible]भाभोऽनुभवन्नुपरतानुवृत्तिः निवृत्तविषयानुवृत्तिः निवृत्त[illegible]वक्यो वा नित्यमुक्तत्वस्यत्वादिति ॥ ६ ॥

इदानीं हरेर्देहः सच्चिदानन्दत्वेन नदाभिन्न इति दर्शयितुं तस्य सञ्चरणप्रका[illegible] वक्ति । तस्य हवेति । एकदर्षभस्य देह इमां जगतीं विच[illegible]रेत्यन्वयः मुक्तलिङ्गस्य वर्णाश्रमादिलक्षणरहितस्य भौतिकशरी[illegible]राहितस्य वा योगमाया योगसामर्थ्यं तस्यावसानं काष्ठोत्कर्षो [illegible]स्य स तथा देहस्य जडस्य सञ्चरणं कथं घटत इत्यत उ[illegible]भिमानाभासेनेति । आभेन ज्ञानप्रकाशेन चङ्क्रममाणः पुनः पु[illegible]र्पं कुर्वाणः ज्ञानात्मकत्वात् गमनादिक्रियां कुर्वाणः [illegible]ः अनेन देहदेहिनोरभेदोऽपि सूचित इति कस्मात् कान् दे[illegible]हिश्य गमनमित्यत उक्तम् । काङ्कटकर्णाटकादीनि । काङ्कटक[illegible]टक श्रीमरध्युपपदनदीमातृकदेशाद्दक्षिणकर्णाटकात् सौराष्ट्र[illegible] स्वेच्छयोपगतः तत्र नागपुरग्रामात्पूर्वत उत्तरत[illegible]ग्रामाक्षि तस्य निकटे कुटचाचलस्य कुटचपर्वतस्य प्राचीन[illegible] विद्यमाने उपवने स्थित आस्यकृताश्मकवलः मुखान्तर्गतपा[illegible]ग्रास [illegible]सस्त्रीतो वस्त्राद्यावरणरहितः उन्मादे सति पुमान्यथा [illegible]ने [illegible]त्यर्थः ॥ ७ ॥

इदानीं तस्य देहस्य[illegible] दावाग्निनिविष्टस्य जगत्संहारप्रकारमाह । अथेति । समीरवेगेन विधुना अन्योऽन्यमाकम्पिता ये वेणवः वंशास्तेषा निकर्ष[illegible]ज्जातो यो दवानलोऽवधिरुद्धया दिवमावेवि[illegible]नान्विता [illegible]धनेन सह भगवांस्तदुपवनं ददाहेत्यन्वयः [illegible]ऽप्यदहदपीति शेषः अत्र प्रतीतमनङ्गीकृत्यान्यार्थाङ्गीकारे किं प्रमाणमत्रोच्यते ।

ज्ञानानन्द[illegible]की देह ऋषभस्य महात्मनः ।
तादृशेनैव मनसा [illegible] कुटचाचले ।
दावाग्नि[illegible] तत्रस्थः प्राहहज्जगदिति ।

कालान्तभाविनो वि[illegible]नीमयं करोतीति कथं युज्यत इति चेन्न तद्देहित्वेनाग्नेर[illegible]स्थितस्य तस्य योगात् तदुक्तम् ।

एवमग्नेर[illegible] विष्णुः सनातन इति

न केवलं विश्वत्त्यय[illegible] किंतु पश्चादपि मतं तर्हि स्वमाहात्म्यं किं न प्र[illegible]माधवतारस्य देवशिक्षणार्थत्वेन धर्माणामप्रा[illegible]त्वात् ऋषभत्वेन सङ्कार्यधर्मोनद्यापि तत्रगः [illegible] वासुदेवोऽहमित्यजः सदास्थित इत्यनेन [illegible] तिरोभावो नास्तीति सूचितं निर्लेपेन सर्वज्ञेन [illegible] किंप्रयोजनमकारीति चेन्न असुरजनमोहनार्थ[illegible] ॥

श्रीमज्जीव[illegible]सन्दर्भः ।

टीकायां पाक्षिक इ[illegible]वेति सन्दिह्यमानदोषोऽपीत्यर्थः [illegible]तत्तु [illegible]धकमात्रविषयत्वात् तानपि शिक्ष[illegible]तुमिति भावः [illegible] तत्तत् सर्वं मायानुकरणमात्रमिति ज्ञेयम् । [illegible] जिज्ञासितेति [illegible] र्येश्च [illegible]तवाणोऽयं स्वकले[illegible]आत्मनि मिश्री शिरो श्रीवासुदेवे आत्मानं त[illegible]मनुवृत्तिः [illegible] आत्मवर्णनम उपरराम [illegible]

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लिङ्गमपि तदेव योगमायावासनया श्री[illegible]संस्कारेण आत्मे कृताहमकबलम्बमभ्यत् किञ्चिदपि न [illegible]यं न वक्तव्य[illegible]भिप्रायाभासेन ॥ ७ ॥

अथ समीरेति । वास्तवार्थश्चायं तेन सहैव कर्तुसाहाय्ये तृतीया। गौणमुख्यन्यायेन कर्तव्यैव प्राथमिकप्रवृत्तः तनश्च दावानलस्तद्वनवर्तिनवादिजीवानां स्थूल [illegible] ददाह ऋषभदेवस्तु सूक्ष्मं देहमिति तस्य सर्वमायावाद[illegible]नुमन्धेयम “स यैः स्पृष्टोऽभिदृष्टो वा । संविष्टोऽनुगतोऽपि वा[illegible] काशवाम्ते ययुः स्थानं यत्र गच्छन्ति योगिनः । इतिवत् ततोऽन्यसाधर्म्यं वर्णयित्वा तद्दन्तर्धानमेव तस्येति व्याज[illegible] ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मनसश्चाति दौरात्म्यं देहान्तर्धानं हरेः ।

पाषण्डोत्पत्तिरित्येवं षष्ठेऽध्याये निरूप्यते ॥

योगैश्वर्याणि नाङ्गीकरोति मुग्धा पृच्छति । नेति । हे भगवः ! हे भगवन् ! योगेश्वरेण समीरितमुद्दीपितं ज्ञानं तेनावभर्जितानि कर्मबीजानि येषां तेषां यदृच्छयोपगतान्यपि तत्मात् प्राप्तेषु योगेश्वनपकुर्वत्सु विरज्यत इति भावः ॥ १ ॥

सत्यमुक्तमिति । क्लेशदानि न भवन्त्येव तदपि एके सुधियः मनसो विश्वासं न संगच्छन्ते न सम्यक् प्राप्नुवन्ति । कुतः अनवस्थानस्य प्रतिक्षणमेव प्रापणादपावकस्येत्यर्थः । तेन सुखं भूत्वाप्यसुखं भवितुं न तस्य विलम्ब इति भावः । शठे धूर्ते किराते नीचजातौ च धूर्तो यथा सौहार्दं प्रदर्श्य लुण्ठितमेव विश्वासितारं हन्ति तथैव मनः खलु कामक्रोधाद्यभिभवरूपां कामुकि प्रदर्श्य स्वनिरोधे शिथिलप्रयत्नं साधकलोकस्मिन् दिने कामाद्येरेवाकस्मिकैरनम: पातयति यथा च नीचजातिमुहुरपि धर्ममध्यापितोऽपि साधुना दयालोऽपि [illegible]दकोपादिषु विश्वस्तः सन् स्वमयं दुस्त्यजस्वीयस्वभावप्राप्तं [illegible]येव करोति तथैव मनः शमदमादिभिः शोधितमपि भयात्[illegible]नादिषु कर्यैव दयानमपि विश्वस्तं सदनिरुद्ध्यमानं कस्मिं[illegible] दुर्विषयेष्वपि निमज्ज द्विवेकज्ञानादिकमपहरति ॥ २ ॥

यस्य विस्रम्भात् विश्वासात् चराचीर्णं बहुकालसञ्चितं तपश्चस्कन्द सुस्राव । ऐश्वरं शाम्भवं विष्णोर्मोहिनीरूपदर्शनेन यद्वा ईश्वराणां समर्थानामपि सौभरिप्रभृतीनां तपः ॥ ३ ॥

तत्र हेतुः । नित्यमिति । कृतविश्वासस्य योगिनो मनः कामस्य छिद्रमवकाशं ददाति तं काम तु वै अन्यः क्रोधलोभादयस्तेषाञ्च । यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जारागामवकाशं दत्वा पतिं घातयति तथा मनोऽपि कामादिभिर्योगिनं भ्रंशयतीत्यर्थः ॥ ४ ॥

मतीन् कथयन्नुपसंहरति । काम इति । यन्मन एव मूलं यस्य सः ॥ ५ ॥

प्रासङ्गिकं समाप्य प्रस्तुत[illegible]। अथेति । सम्परायविधिं देहत्यागप्रकारमिति देहत्यागा[illegible]व शिक्षयन्नित्यर्थः तद्देहस्य [illegible]वात् वस्तुतस्तु [illegible] वपमात्मानि स्वस्मिन् आत्मानं [illegible] । अत एव रता अनुवृत्तिरपुनर्भवानुकरणं यस्य सः उपरराम प्रायताराधीशातो विरराम अत एव स्वकलेवरं जिहासुः स्वकलेवरप्राकट्यं त्यक्तुमिच्छुरिति वास्तवोऽर्थः अज्ञानेऽपि प्रकटोऽर्थः स्पष्ट एव ॥ ६ ॥

तस्य देहान्तर्धानप्रकारमाह । तस्येति । भगवतोऽपि मुक्तलिङ्गस्य त्यक्तभगवद्विग्रहस्य मुक्तानामिव लिङ्गं यस्येति वा यथा योगिनां केनापि संस्कारेण देहः प्रचलति निष्पन्नग्रहमपि कुलालचक्रमिव सोऽयमभिमानाभासः स च जीवन्मुक्तानामविद्याभासवासनया भवतीति ततो विशेषमाह । योगमायावासनया आवधूत्य लीलेच्छासंस्कारेण यथाभिलाषको यद्यत् प्राप्नोति तदपि स्वमुखं निःक्षिपति तथैव कृताहमकवलः असंवीतो नग्नः ॥ ७ ॥

उपररामेत्युक्तं तत्र किं कुर्वन्नुपररामेत्यत आह । अथेति । तेन सह श्रीऋषभदेवसहित एव दावानलस्तद्वनं ददाह । तद्वनवर्तितरुमृगादीनां स्थूलं देहं दावानलो ददाह सूक्ष्मं देहन्तु श्रीऋषभ इति तद्वनवर्तिनः सर्वे तत्प्रसादान्मुक्ता बभूवुरित्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप ।

षष्ठे ऋषभचरितमुपसंहरति पूर्वाध्यायान्ते योगैश्वर्याणि नाङ्गीकरोतीत्युक्तम् तत्र तदभिनन्दने आत्मारामायां काष्ठानिरिस्याशयेन पृच्छति । न नूनमिति । हे भगवः ! हे भगवन् ! योगेन ध्यानयोगेन समीरितमुद्बोधितं यज्ज्ञानं तेनावभर्जितानि देहगेहादौ अहम्ममात्मकानि कर्मबीजानि येषां तेषां योगैश्वर्याणि क्लेशदानि दुःखदानि न भवितुमर्हन्ति अतः किमिति नाङ्गीकरोतीति भावः ॥१॥

अनवस्थानस्य दुरवग्रहस्य शठकिराते मृगा इवेति शेषः इह पूर्वस्वभावपरित्यागे मनसो विस्रम्भं न सङ्गच्छन्ते शठकिराते यथा यथा पूर्वस्वभावपरित्यागे विस्रम्भं न सङ्गच्छन्ते इत्यन्वयः ॥ २ ॥

यस्य मनसो विस्रम्भाद्विश्वासात् चीर्णं सञ्चितम् ऐश्वरं माहेश्वरम् मोहिनीदर्शने चस्कन्द सुस्राव ॥ ३ ॥

कृतं मैत्रं मनसो विश्वासो येन तस्य मन इति शेषः कामस्य छिद्रं ददाति तं काममनु ये अरयः मन्युमदादयस्तेषां च यथा कृतविश्वासस्य पत्युः पुंश्चली जाया जारस्य तदनुवर्तिनां च छिद्रं ददाति ॥ ४ ॥

यन्मूलो यन्निमित्तस्तन्मनः कः स्वीकुर्यात्स्वाधीनं मन्येत ॥ ५ ॥

अथोक्तलोकसङ्ग्रहार्थं स्वचरितप्रदर्शनानन्तरम् अखिललोकपालानां ललामोऽलङ्कारभूतः योगिनां साम्परायविधिं देहाभिमानत्यागविधिमनुशिक्षयन् उपरतानुवृत्तिः उपरता निवृत्ता देहाभिमानरूपा अनुवृत्तिर्यस्मात्स्वेषां तथापि तत्तद्विरहकानां सः उपरराम लोकसङ्ग्रहार्थं चेष्टाया निवृत्तोऽभूत् किं कुर्वन् आत्मात्मनि अनारभूततमात्मन्यवतारिणि विष्णौ अर्थान्तरभावः नृदेहभावः तदर्थपर्यास्येन असंव्यवहितं निर्वृत्यभानमन्वीक्षमाणः साक्षात्कुर्वाणः ॥ ६ ॥

एवं मुक्तलिङ्गस्य त्यक्तनृपलिङ्गस्य तस्य ऋषभस्य देहो गुण्यन इति योगः सङ्कल्पस्तेन गृहीता या नृपलीला तद्याहत्यक्तत्वेऽपि तद्वासनया अभिमानस्य तत्तत्स्वाभिमानस्य आभासेन इमां जगतीं चङ्क्रममाणः कोङ्कादीन्देशान् गतः सन् कयापि वासनयाऽयं कृतः अश्मकवलो येन सः असंवीतो नग्नो विचचार ॥ ७ ॥ ८ ॥

यस्य किलानुचरितमुपाकर्ण्य कोङ्कवेङ्ककुटकानां [illegible] शिक्ष्य कलावधर्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्मपथमकुतोभयमपहाय कुपथ [illegible] सं निजमनीषया मन्दः सम्प्र वर्त्तयिष्यते ॥ ९ ॥

येन हवाव कलौ मनुजापसदा देवमायामोहिताः [illegible] चारित्रविहीना देवहेलनान्यप-व्रतानि निजनिजेच्छया गृह्णाना अस्नानानाचमनाशौचकेश [illegible] कलिनाऽधर्मबहुलेनोपहतधियो ब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाः प्रायेण भविष्यन्ति ॥ १० ॥

ते च ह्यर्वाक्तनया निजलोकयात्रयाऽन्धपरम्परयाऽऽश्वस्त [illegible] स्वयमेव प्रपतिष्यन्ति ॥ ११ ॥

अयमवतारो रजसोपप्लुतकैवल्योपशिक्षणार्थः तस्यानुगुणा [illegible] कान् गायन्ति ॥ १२ ॥

अहो भुवः सप्तसमुद्रवत्या द्वीपेषु वर्षेष्वधि [illegible] ।
गायन्ति यत्रत्यजना मुरारेः कर्माणि भद्राण्य [illegible] ॥ १३ ॥
अहो नु वंशो यशसावदातः प्रैयव्रतो यत्र पुमान् पुराणः ।
कृतावतारः पुरुषः स आद्यश्चचार धर्मं यदकर्महेतुम् ॥ १४ ॥
को न्वस्य काष्ठामपरोऽनुगच्छेन्मनोरथेना [illegible] योगी ।
यो योगमायाः स्पृहयत्युदस्ता ह्यसत्तया येन [illegible] ॥ १५ ॥

इति ह स्म सकलवेदलोकदेवब्राह्मणगवां परमगुरोर्भगवत ऋषभा [illegible] विशुद्धाचरितमीरितं पुंसां समस्तदुश्चरिताभिहरणं परममहामङ्गलायनमिदमनुश्रद्धयोपचितयाऽनुशृणोत्याश्रावयति वाऽवहितो भगवति तस्मिन् वासुदेव एकान्ततो भक्तिरनयोरपि समनुवर्त्तते ॥ १६ ॥

भाषाटीका

राजा परीक्षित् जी बोले हे भगवन्! निश्चित है कि योगसे उद्दीपित किये ज्ञान रूप अग्नि से जिन के कर्म बीज नष्ट होगये हैं ऐसे आत्माराम योगिजनों को दैवयोग से प्राप्त जो ऐश्वर्य हैं सो तो क्लेशदायक नहीं होते हैं तब ऋषभदेवजीने क्यां उनका त्यागकिया ॥ १ ॥

ऋषि श्रीशुकदेवजी बोले कि आपका सत्यकथन है तथापि यह मन धूर्त किरात सरीका है उत्तम महात्मा लोग इस का विश्वास नहीं करते हैं ॥ २ ॥

तैसा कहा है चञ्चल मनका कभी विश्वास नहीं करना चाहिये जिस के विश्वास करने से चिरकाल से सञ्चित जो तपस्या सो श्रीमहादेवादिकों का नष्ट होगया है ॥ ३ ॥

जैसे कि दुष्ट स्त्री के विश्वास करने वाले पुरुष के मारने को खोटी स्त्री जार पुरुषों को अवकाश बताती है तैसे मन के साथ विश्वास करने वाले योगी को भ्रष्टकरने को मन भी विषय भोग रूप शत्रुओं को अवकाश देतारहता है ॥ ४ ॥

जिसमन के हेतु से काम क्रोध मद लोभ शोक मोह भयादिक कर्म बन्ध इस मनुष्य को होते हैं तिस को कौन पण्डित विश्वास से ग्रहण करेगा ॥ ५ ॥

इसप्रकार से सब [illegible] के भूषण रूपभी भगवान् जड अवधूत सरी [illegible] वेष भाषा चरितों से भगव त्स्वभाव को छिपाकर [illegible] का देहत्याग विधि को दिखाने के वास्ते शरीर [illegible] की इच्छा से सदा निरन्तर अभेद भावसे परमात्म [illegible] को लगाते हुये देहादि अभिमान वृत्ति से [illegible] ॥ ६ ॥

इस प्रकार से [illegible] भगवान् ऋषभदेवजी का शरीर, योगमाया [illegible] अभिमान के आभास से इस पृथिवी में घूमता हुआ [illegible] वेंकट कुटक आदि दक्षिण कर्णाटक देशों में [illegible] आकर कुटकाचल पर्वत के जङ्गल में प्रमत्त के [illegible] को खोलकर नग्नहुआ मुख में पाषाण [illegible] रहा ॥ ७ ॥

इस के अनन्तर [illegible] से कम्पायमानबांसों के घिसने से उत्पन्नहुआ [illegible] उस बन को जलाता हुआ उन के सहित [illegible] ॥

श्रीधरस्वामि [illegible] ।

अवधूतवेषेण ऋषभदे [illegible] सुखमाह । यस्य किलाभमातीतमनुषा [illegible] उपाकर्ण्य कोङ्क- श्रिति नाम ५४५ स राजा [illegible]

श्री[illegible]

[illegible] पापपङ्कम् तं निजमनीषया [illegible] तत्र हेतुः कलाविलासादि भवितव्येन [illegible] पाप-[illegible] ॥ ९ ॥

येन प्रवर्तकेन मनुजेष्वपसदा [illegible] नियोगो यस्मिन् शौचरहिते तद्विहीना देवा[illegible] कुम-तानि गृहाण वेदादीनां विदूषका [illegible]

तत्फलं चान्धन्तमः प्राप्स्यन्तीत्याह [illegible] लौकमया अवेदमूलया निजलोकयात्रया [illegible] आभस्ताः कृतविश्वासाः ॥ ११ ॥

ननु तदनर्थकारी किमर्थोऽयम् [illegible] अयमिति । रजोव्याप्तानां जनानां मोक्षमार्गो [illegible] कैवल्योप-शिक्षणस्यानुरूपात् ॥ १२ ॥

अपि अधिकं पुण्यं यस्मिन् [illegible] ऋषभावत-तारयुक्तानि कर्माणि ॥ १३ ॥

प्रियव्रतस्य वंशः अवदातः [illegible] यस्मात् अक-र्ममोक्षस्तस्य हेतुं धर्मं चचार ॥ [illegible]

अपरः को नु योगी अस्य [illegible] योगी येन ऋषभेणासत्यवाऽस्य [illegible] योगमायाः सिद्धीर्वाञ्छति कथम्भूताः कुतः [illegible] तदर्थं प्रयत्नं च करोतीत्यर्थः । यद्वा कथम्भूता [illegible] कृतयत्नाः सेवितु-मुद्यता अपीत्यर्थः ॥ १५ ॥

विशुद्धाचरितं यदीरितं [illegible] सकलं दुश्चरितमभितो हरतीति तथा परममहामङ्गल[illegible] अवहितः सन् अनयोरपि श्रोतृश्रावयित्रोर [illegible] सम्यगनुवृत्ता भव-तीत्यर्थः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृता [illegible] चन्द्रिका ।

तस्य ऋषभस्याभमानां [illegible] वर्तमानम-नुचरितं कुटकाचलोपदेश [illegible] र्हदिति नाम यस्य स राजा विमोहितः [illegible] आगराविप्रताकरस्य कालीयस्वमज्ञानन् वैदिक [illegible] बुद्धिं कृत्वाऽकुतोभयं नास्तिकुतोऽपि भयं यस्मा[illegible] पदाय स्वपमार्गम् अत-मुपशिक्ष्यमाणा उपशिक्षित [illegible] पापपङ्कम् तमसमञ्ज-समुपधर्मं प्रति मनुजा [illegible] स आर्हतान्यग्रन्थम [illegible] प्रवर्तयिष्यति [illegible] मनुजाः प्रवर्तन्त इत्य-र्थः कलावधर्म उत्कृष्ट [illegible] प्राणिनां पूर्वसञ्चितपापमूलकेन [illegible] धर्मे उत्कृष्यमाणो उत्कर्षं प्राप्ते सतीत्यर्थः भवि[illegible] मनुजानामधर्मबुद्धिभूय-स्त्वादार्हन्ते प्रवर्तन्ते [illegible]

मनुजेष्वपसदाः [illegible] देवमायया विमो-हिताः येनार्हन्तेनोपदे[illegible] ताः सन्तः स्वाविभिना [illegible] प्राप्तो यो नियोगो नियमः यस्मिन् [illegible] शौचरहितेति समाहारद्वन्द्वः इतरेतरयोगे [illegible] त्र शौचं [illegible] तत्र वेद-

शुद्धिः चारित्रं लोकोपासनादिदेवाव[illegible]तानादीनि कुम-तानि निजेच्छया गृहाणाः कुर्वाणाः अधर्मप्रचुरेण कलिनापहता अभिभूता धियो विवेका येषां ते ब्रह्मादिविदूषकाः प्रायशो भविष्यन्ति अस्नानं स्नानाभावः आचमनाभावः अत एवाशौचं केशलुञ्चनं केशोत्पाटनं अत्र वेदः यज्ञपुरुषो भगवान् लोका लोका भागवताः ॥ १० ॥

तत्फलं चान्धन्तमः प्राप्स्यन्तीत्याह । ते चेति । अर्वाक्तनयाऽवे-दमूलयाऽत एवान्धपरम्परया निर्मूलया स्वस्था चारात्मानमपि वेद-मूलत्वेनैव प्रामाण्यवादिति भावः ते निजपात्रया लोकाकृतप्र-वृत्या निजलोकयात्रयेति पाठेऽप्ययमेवार्थः लोकयात्रो देहपरः तयैवाहितस्मृत्यैवाभस्ताः तदुक्तेपूपधर्मेषु कृतविश्वासाः अन्धे तमसि नरकविशेषे स्वयमेव स्वात्मनैव रिपुणा प्रपति-ष्यन्ति पतन्तीत्यर्थः ॥ ११ ॥

ननु तर्हि भगवतर्षभेणा किमर्थमेव मनुष्ठितं तत्राह । अय-मिति । रजसा उपप्लुतानां व्याप्तानां रजःप्रचुराणां कैवल्यस्य मोक्षमार्गस्य योगचार्यभेदस्य शिक्षणार्थोऽयमवतारस्तद-र्थमेव कृतमितिभावः ॥ १२ ॥

आर्षभप्रभावप्रतिपादकान् श्लोकानुदाहरन्ति पठन्ति भावो इति शेषः के त इत्यत्राह । अहो इति । सप्त समुद्राः अस्यां सन्तीति सप्तसमुद्रवती तस्या भुवः द्वीपेषु मध्ये च उत्कृष्टो जम्बूद्वीपः तस्यापि वर्षेषु नवसु मध्ये एतद्भारतं वर्षमपि आधिकं पुण्यं यथाभूतम् अहो इत्याश्चर्यं कुतः यत्रत्याः भारतवर्षस्था जनाः मुरारेर्भगवतः ऋषभावतारयुक्तानि कर्माणि भद्राणि श्रेयः साधनानि गायन्ति ॥ १३ ॥

अहो प्रियव्रतः प्रियव्रतसम्बन्धी वंशः यशसा विशुद्धः विशुद्ध-विपुलकीर्तिसम्पन्नः यत्र वंशे प्रैयव्रते वंशे पुराणः पुरुषो भगवानृषभरूपेणा कृतावतारः बभूव सत्यावतीर्णा भावः पुरुषः यतोऽकर्महेतुकं न विद्यते कर्म साधनं तपो यस्य तदकर्म मोक्षः तस्य हेतुं धर्मं चचार ॥ १४ ॥

अस्य ऋषभस्य काष्ठां निष्ठां दिशं वाऽपरो योगी मनोरथे-नापि तत्त्वानुष्ठानेन कोऽन्वनुगच्छेदनुवर्तेत न कोऽपीत्यर्थः कुतो यो योगी येन ऋषभेणा योगमाया अणिमादयः कृतप्रयत्नः सेवितु उद्यता अप्यसत्तया हेयतयानादृतास्ताः स्पृहयति हि ॥ १५ ॥

ऋषभचरितश्रवणादिफलमाह । इतीदृशं भूतं इत्यर्थः प्रसि-द्धाश्रयवेदानां निगमानां सकललोकादीनां परमगुरोर्ब्राह्मणानां हितोपदेष्टृत्वाद्गुरुः वेदार्थदिक्मार्गप्रवर्तकत्वाद्ब्रह्मस्य गुरुः तथामपि पूज्यत्वोपदेष्टृत्वाद्गुरुः ऋषभाख्यभगवतः विशुद्धाच-रितं यदीरितं कथितं समस्तदुश्चरितमभितो हरतीति तथा परममङ्गलानामयनमाश्रयमिदमेतत्कमानुपूर्व्येतया प्रवृद्धयानया श्रद्धयाऽनुसवनं सर्वदा यः पुमानुदृश्याऽऽत्याश्रावयत्युत्सरति अनयोः श्रोतृश्रावयित्रोः भगवति वासुदेवे एकान्ततः एकान्ता अव्यभिचरिता भक्तिः समनुवर्तते भवतीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमनेन तद्भूविनि तत्राह । यस्येति । अनानुपशिक्ष्य उत्कृ-ष्यमाणो वर्धमाने भवितव्येन विधिना निजमनीषयैवानेनार्हत्या-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुरत्वमसुचि मन्दो निर्भाग्य इत्यनेन आनन्दात्मपुरुषार्थशून्य इति ध्वनयति भगवन्मततात्पर्यं न जानातीति वा उपाकर्येत्यनेन तस्यतत्त्व क्षिपति तां तु शुभावाहौ सुरात्मवानिति वाक्यं स्मारयति पाखण्डमद्वैतमसमञ्जसं जैनमतमित्यनेन शास्त्रद्वयमनेनाकारीति सूचितम् । तदुक्तम् ।

पूर्वं तु पौण्ड्रको नामा वासुदेवः सुदुर्मतिः ।
जातिस्मरो द्विधा शास्त्रं पाखण्डं निर्ममे नृपः ॥
एकं तु वासुदेवाख्यं वासुदेवोऽहमित्यपि ।
कुत्सितं वासुदेवत्वप्रतिपादकमात्मनः ।
लोकार्थं चापरमिति चकारार्हतनामकमिति ।

अनेनाहेस्य पूर्वजन्मनि पौण्ड्रकादवशासुरत्वं स्पष्टीकृतं वासुदेवोऽहमित्यात्मनो जीवस्य वासुदेवत्वप्रतिपादकवासुदेवाख्यं कुत्सितमेकं शास्त्रं परमार्हतनामकं लोकार्थमहिंसाधर्मप्रतिपादकमपरं चकारेत्यन्वयः ॥ ९ ॥

शास्त्रस्य प्रवर्तनमाह । येनेति । येन शास्त्रद्वयेन ह वा इति निपातद्वयेन तत्प्रशिष्येण कमुना विरचितेन शास्त्रेणेति स्मारितं तदुक्तम् ।

तत्प्रशिष्यः कमुर्नाम स जानंस्तन्मतं परम् ।
वासुदेवात्मतां सर्वजीवानामवदत्कुधीः ॥
कपवाख्यं शास्त्रमकरोद्भेदप्रतिपादकम् ।
कुशास्त्रं सर्ववेदानां विरुद्धं तामसावयम् ॥
तद्दृष्ट्वापि वर्तन्ते वर्तिष्यन्ति तथा कलौ ।
अशौचा अव्रताचारा वासुदेवोऽहमित्यपि इति ॥

एतद्विमिशाचेणास्मानेत्युक्तं मनुजापसदा मनुष्याभासाः स्वविधिः स्वकीयो वेदः तस्य नियोगे विकाययौं मयवद्धासता न संवदेतेत्यादिकः तेन विहिनः शौचाचारः विष्णवादिदेवानां दूषणादीन्यभेददर्शनावशानादीन्यपव्रतानि वेदविरुद्धव्रतानि स्वेच्छया प्रमाणं विना किञ्चास्नानादीनि गृह्णन्तः निमित्तमाह । कलिनेति । देवहेलनादि विधिनद्वि । प्रक्षेति ॥ १० ॥

तत्फलमाह । तैरपीति । तैर्हेलनादिभिः क्रियमाणाऽशांकनया मीचयान्धपरम्परया निजलोकयात्रया स्वप्रमनोरथकल्पितव्यवहारेण । स्वशरीरजीवनेन वा त एवानाद्याः एकदापि व्यापारमन्तरेण न स्थिताः हि शब्देन" अन्धेनैव नीयमाना यथान्धाः" इति श्रुतिं प्रमाणयति ॥ ११ ॥

न केवलमसुरमोहनार्थः किन्तु स्वपादमूलशरणजनस्य मुक्तिसाधनार्थोऽपीत्याह । अयमिति । रजसा गुणेनोपप्लुतस्य उपद्रुतस्य साधुजनस्य कैवल्यशिक्षणार्थो मुक्तिसाधनशिक्षणाभिप्राय इत्यन्वयः कुत इति तत्राह । तस्येति । तस्य कैवल्यसाधनोपदेशस्यानुगुणानुरूपामित्यर्थः ॥ १२ ॥

सप्तद्वीपेषु नवसु वर्षेषु एतद्भारताख्यं खण्डमधिपुण्यमधिकपुण्यसाधनमुपलक्षणमेतत् पापसाधनं चेति तदुक्तम् ।

विशेषाद्भारते पुण्यं चरेयुः पापमन्यथा ।
तथैव भगवद्भक्तिं पृथिव्यां नान्यवर्षगा इति ।

अनेनाहस्साधनमेतदन्यानि भोगसाधनानीति विशेष उक्त इति ज्ञायते अवतारवन्ति प्रकाशयन्ति ॥ १३ ॥

अथवा यत्तदाश्रया पुराणपुरुषेणावतीर्णेन किं प्रयोजनमभूदित्याह पुरुषः इति । अकर्महेतुं मोचकं मोक्षकारणं धर्मं शिक्षयितुं चचारेति यद्यस्मात्तस्मादिति शेषः पूर्णं पुरुषात्मकोऽहमिति पूर्णफलं मोक्षं ददातीत्यर्थः इति कर्त्तुः उपलक्षणं [illegible] ॥ १४ ॥

ऋषभो नाम [illegible] योगी न हरिरिति तत्राह । कोन्विति । अभवाय मुक्तये [illegible] शिक्षणार्थमेव धर्माचरणं न तु तत्फलापेक्षयेत्याह । यद्योग [illegible] मिति । श्रीहरिप्रेरणया कृतप्रयत्नाः महापुरुषाः येनोक्ता नित्यनिरस्ता योगमायामणिमादियोगफलं स्पृहयन्तीति यद्यस्मात्तस्माल्लोकशिक्षणार्थं धर्ममाचरतोऽस्य काष्ठां [illegible] योगशक्तिं हरिमन्तरेणापरः को नु योगी गच्छेत कोऽपीत्यन्वयः ।

नित्योदस्ता [illegible] शक्तिरनपेक्ष्यं फलं यतः ।
नित्यस्वरूपभूत [illegible] हिः फलविवर्जनात् ॥
अकर्मेत्युच्यते [illegible] मोक्षः फलविवर्जनात् इति ।

वचनात् अदृस्तामिति [illegible] विशेषणाद्योगमायामिन्द्रजालमुच्यत इत्येतन्निरस्तं तस्मादपि [illegible] दियोगशक्तिर्नित्यादस्ताः कुतःफलमनपेक्ष्यमिति यतस्तर्हि हरेः स्वरूपभूतानामणिमादिशक्तिर्नास्ति कमित्यत उक्तं नित्येति यद्यपि [illegible] रूपभूताणिमादिशक्तिरस्ति तथाप्यन्येच्छाविषयाणिमादियोग [illegible] वा बहिर्नित्यस्वरूपशक्तेः पृथक् फलविवर्जनात्क्रियासाध्यफल [illegible] त्वात्तत्र दृष्टान्तः । अकर्मेति । यथा मोक्षस्त्वकर्मेति वदन्ति [illegible] फलानिच्छत्वात् तथेति ॥ १५ ॥

ननु कृष्णादिचरिते [illegible] स्य चरितमपि यदि संसारनाशनं स्यात्तदायमपि श्रीनाराय [illegible] णा इति निश्चयेन निरूपचरितमक्तिः स्यात्तत्कथमिति शङ्कां [illegible] हरन्नुपसंहरति । इतीति । इति शब्दः प्रभृतिवचनः इ हमेति [illegible] तो अत्यातिशयजननार्थो [illegible] केवलरामाद्यवतारवद्वषभजनः [illegible] तु व्यासाद्यवतारवत् ज्ञानस्योपदेशेति ज्ञापनाय परमगुरोरि [illegible] त विष्णुश्चाचरितं कथितमिति शेषः इदमाचरितं विशेषतः शुद्धमेव न तु शुद्धमद्वैतवस्तुतात्पर्यापरिज्ञानादन्यथा प्रतीतम् इति न तेनाशुद्धभ्रमाकर्त्तव्येति विज्ञापयितुं विष्णोरेव [illegible] क एतदिति तत्राह । पुंसामिति । दुश्चरितानिहरणं पापनाशनं न केवलमेतदेव फलमन्यदप्यस्तीत्याह । परमेति । न [illegible] कलोपयोगित्वे युक्तमुक्तमविरतत्कथमत्राह । इदमिति । उप [illegible] तयानुदिनमेवमानया इदमेव श्रेय इत्यन्तःकरणधर्मविशेषः [illegible] अनयोः भोक्तृवक्त्रोः अपि शाम्यात्पठनः वासुदेवे निश्चिता भक्तिः समनुवर्तेत इत्यन्वयः ॥ १६ ॥

श्रीमज्जीवगोस्वामि [illegible] क्रमसन्दर्भः ।

अत एव ऋषभदेवाविर्भाव [illegible] तृतीयेऽध्याय इत्येवोक्तं ननु जन्मेति तदेवं सर्वहितमपि [illegible] रतं वैदिकवेदापराधसंस्कारवतां स्वन्यथैव भातमित्याह । [illegible] स्यागिना । अन्येषां तु रजसोपरक्तानामपि तद्द्वयभ्रमयोगात् [illegible] विरक्तानां हितायैव जायते तदित्याह ॥ ९—११ ॥

अयमिति ॥ १२—१३ ॥

अहो इति । यतः पुराणः [illegible] स्वं मायः किन्तु स मायः [illegible]

श्रीमच्छ्रीवल्लोकामिकुलक्रम [illegible]

[illegible] धर्मं चचारेत्यर्थः । यद्यप्येवं [illegible] रितं तथापि तत् पराख्यो भक्त एव पर्यवस्यति [illegible] त्याह ॥ १४ ॥ १५ ॥

इति हृस्मेति । निवृत्ता तत् स्वरूपया [illegible] ॥१८॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अहयावतारस्य लीलाश्रवणकीर्त्तनादि [illegible] वर्त्तिनः परात्पर्दर्शिनो जीवाः कृतार्था भवन्तु [illegible] नेन । कलौ प्रायः प्रत्यक्षदर्शनासम्भवात् [illegible] वलवाह्या- चरणमात्रनिष्ठा भ्रष्टा एव भवन्तीत्याह [illegible] कलौ अनिच्छमानो लोकशास्त्रद्वारा [illegible] तादृशा- चरणेन वयमपि तथा भवामेति मत्वा [illegible] आधि- क्येन शिक्षित्वा भवितव्येन तादृश [illegible] मवितव्यं तेन हेतुना ॥ ६ ॥

अविधिना नियोगो यत्र [illegible] चारित्र्येण विहीनाः ॥ १०—११ ॥

तेन श्रीऋषभदेवो यदेवाचरितं [illegible] निजजनैरेव तच्चरितमनुवर्त्तितव्यमित्याह । [illegible] रजोगुणेन उप- प्लुतं कालेन विनष्टीभूतं यत् [illegible] पशिक्षणार्थः यद्वा रजो व्याप्तानामपि जनानां [illegible] णार्थः । तेन सत्यादियुगत्रये तद्वर्त्तितव्यं [illegible] तव्येति व्यव- स्थितिः ॥ १२ ॥

वर्षेषु मध्ये एतद्भारतं वर्षमधि [illegible] कपुण्यप्रदम् । कुतः गायन्तीत्यादि ॥ १३ ॥

वंशेष्वपि मध्ये प्रियव्रतवंशो [illegible] अहो इति ॥ १४ ॥

योगिष्वपि मध्ये ऋषभदेवो [illegible] इत्याह को नु अपरो योगी अस्य काष्ठां दिशमप्यनुगच्छेत् [illegible] किमुत कर्मणा अस्य कीदृशस्य [illegible] यो योगी येन ऋषभेण असत्तया [illegible] योगमाया योगा- ज्जाता मायाः सिद्धीर्वाञ्छति [illegible] प्रयत्नो यासु तदर्थं प्रयत्नांश्च करोतीत्यर्थः । [illegible] स्मात् स्वीकरोत्विति कृतः प्रयत्नो याभिस्ताः [illegible]

किञ्च सत्यादियुग [illegible] योगानु- ष्ठातृभ्योऽपि सकाशात् [illegible] जनास्तल्लीलाश्रवण- कीर्त्तनवन्तो ऽधिकफलभाजो [illegible] । इति ह स्मेति । परम- गुरोर्भक्तिकारिणः विशुद्ध [illegible] मायं देहो देहभाजा- मित्याद्युपदेशवाक्यञ्च [illegible] यति च अनयोः श्रोतृ- वक्त्रोरपि [illegible] १६ ॥

श्रीम [illegible] प्रदीपः ।

हिताः येनाहेस्तेो [illegible] स राजा कुदका- [illegible] मनुजाभाद्धिः [illegible] धर्मे [illegible] मोहितः [illegible] तादप- [illegible] कुपथमार्गी पाष-

एतच्च तं निजमनीषया संप्रवर्त्तयिष्यते तद्द्वयक्रमदर्शनेन लोकतया कृतेन लोके स्थापयिष्यति ॥ ६ ॥

येन कुपथपाषण्डप्रवर्त्तनेन मनुजाधमाः अविधिना नियोगो यस्मिन् शौचचारित्रे तेन विहीनाः देवहेलनानि देवावज्ञारूपाणि अस्नानादीनि अयमव्रतानि गृह्णानाः वेदादीनां विदूषका भवि- ष्यन्ति ॥ १० ॥

ते मनुजापसदाः अकारास्त अर्हन्नामको राजा च अशोक भया भ्रंशमूलया तथैव निजलोकः मनुजापसदानुरूपो लोकः नरक- लोकस्तद्रूपो यात्रा प्रवृत्तिः उपधर्मविषयकाहंकिर्मितनिबन्धाध्यय- नाध्यापनतदुक्तोपधर्मानुष्ठानादिक्रिया तथा अन्धानां ज्ञानचक्षु- र्हीनानां मूर्खाणामुपदेष्टॄणां परम्परया वंशावलया आश्वस्ताः कृत- विश्वासाः अन्धे तमसि नरके प्रपातिष्यन्ति ॥ ११ ॥ १२ ॥

अवतारयन्ति ऋषभाद्यवतारयन्ति यत्रत्या जनाः गायन्ती- त्युपलक्षणं श्रवणादेः तदेतद्भारतं वर्षमधिकं पुण्यं यस्मिन् तदधिपुण्यं भवति ॥ १३ ॥

अवदातः शुद्धः यत् यशः पुमान् स कृतावतारः पुरुषः ऋषभ मूर्त्तिः सन् "नास्त्यकृतः कृतेन इति श्रुत्या अकर्म कर्मावश्यं मद्य तद्धेतुं तत्प्रदकं पारमहंस्यलक्षणं धर्मं चचार ॥ १४ ॥

कृतप्रायत्नाः अतः सेवितुं प्रवृत्ताः अपि योगमायाः योगजा विभू- तयः येन असत्तया असाधुतया उज्झिताः उपेक्षिताः यः अपरः योगी स्पृहयति स कोनु अस्य ऋषभस्य काष्ठां दिशमप्यनुगच्छेत् ॥१५॥

विशुद्धाचरितैरंशांसादिभिरीरितम् ॥ १६ ॥

———

भाषाटीका ।

जिनके चरित्र को श्रवण करके कौंक, बेंक कुटक देशों का राजा अर्हन् नामा उन धर्मों को सिखाकर कलियुग में अधर्म के बढ़नेसे भावितभय से मोहित होकर निर्भय अपने धर्म मार्ग को छोड़कर कोई अयुक्त पाखण्ड मार्ग को अपनी दुर्बुद्धि से चलावेगा यह बड़ा मन्द है ॥ ९ ॥

जिस पाखण्ड मतसे कलियुग में मनुष्याधम लोग देवकी माया से मोहित होकर अपने विधि विहित शौच चरित्र से रहित होकर देवतों के अपमान कारक कोई व्रतों को अपनी इच्छा से धारण करते हुये स्नान आचमन [illegible] का न करना केशोल्लुञ्चन आदि कर्म करेंगे बहुत अधर्म वाले कलि से मति के भ्रष्ट होने से प्राय करके वेद ब्राह्मण यज्ञ पुरुष परमात्मा के दोष लगाने वाले होजायंगे ॥ १० ॥

वे सब मनुष्य अंधपरम्परा सरी के बिना वेद मूल के अपने इच्छा की प्रवृत्तिसे विश्वास करके अपने आपही नरकमें पड़ते हैं ॥ ११ ॥

भगवान् का यह अवतार रजोगुणी लोगों के शिक्षाके वास्ते है उनके गुणोंके श्लोकों को महाजन गाते हैं ॥ १२ ॥

अहो आश्चर्य है कि सात समुद्रों वाली पृथिवी के सब द्वीपों में यह भारतवर्ष ही अधिक पुण्यवाला है जिसमें रहनेवाले मनुष्य विष्णुभगवान् के अवतारों के चरित्रों को गाते हैं ॥ १३ ॥

यस्यामेव कवय आत्मानमविरतं विविधवृजिनसंसारपरितापोपतप्यमानमनुसवनं स्नापयन्त-स्तयैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः ॥ १७ ॥

राजन् ! पतिर्गुरुरलं भवतां यदूनां दैवं प्रियः कुलपतिः क्व च किङ्करो वः ।

अस्त्वेवमङ्ग ! भगवान् भजतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम् ॥ १८ ॥

नित्यानुभूतनिजलाभनिवृत्ततृष्णः श्रेयस्यतद्रचनया चिरसुप्तबुद्धेः ।

लोकस्य यः करुणयाभयमात्मलोकमाख्यान्नमो भगवते ऋषभाय तस्मै ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां

संहितायां वैयासिक्यामृषभदेवानुचरिते

षष्ठोऽध्यायः ॥ ६ ॥

भाषाटीका ।

अहो प्रियव्रत का वंश यशसे बड़ा पवित्र है जिस में आद्य पुराण पुरुष भगवान् ने अवतार लेकर कर्मों के निवृत्त करने वाले धर्म को किया ॥ १४ ॥

जगत् मे दूसरा ऐसा कौन योगी है जोकि मनोरथ से भी ऋषभजी की पदवी को पहुंचे यह योगी बड़े यत्नो को करके उन माया ओं को चाहता है कि जिनको ऋषभजी ने असत् मानकर छोड़दी हैं ॥ १५ ॥

इस प्रकार से सकल वेद लोक देव ब्राह्मण गऊ इन के रक्षक भगवान् ऋषभदेव का निर्मल चरित हमने कहा यह चरित पुरुषों के सब पापों के नाश करने वाला है अति मंगल दायक है इसको अतिश्रद्धा से जो सुने या सुनावे सावधान तासे तो सुनने सुनाने वाले दोनों की भगवान् वासुदेव मे अतिशय भक्ति प्रवृत्त होती है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भक्तेः परमपुरुषार्थत्वमाह । यस्यां भक्तावेव ननु योगादिषु अनुसवनमविरतमात्मानं स्नापयन्तः स्वयमासादितमप्रार्थितं भगवता स्वयमेव दीयमानमपि । अनादरे हेतुः । भगवदीयत्वेनैव परितः समाप्ताः सम्यक् प्राप्ताः सर्वे पुरुषार्थाः यैस्ते ॥ १७ ॥

ननु भगवतोऽतिसुलभत्वदर्शनान्मोक्षस्य चातिदुर्लभत्वादियमतिस्तुतिरेवेत्याशङ्क्याह । हे राजन् ! भवतां पाण्डवानां यदूनां च पतिः पालकः गुरुरुपदेष्टा दैवमुपास्यः प्रियः सुहृत् कुलस्य पतिर्नियन्ता किं बहुना क्व च कदाचिद्दौत्यादिषु वः पाण्डवानां किङ्करोऽप्याज्ञानुवर्ती अस्तु नामैवं तथाप्यन्येषाम् नित्यं भजतामपि मुक्तिं ददाति नतु कदाचिदपि सप्रेमभक्तियोगम् ॥ १८ ॥

वर्णितमृषभावतारं नमस्करोति । नित्यमनुभूतं यन्निजं रूपम् स एव लाभस्तेन निवृत्ता तृष्णा यस्य सः । अतद्रचनया देहाद्यर्थमनोरथेन श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य तस्य जनस्य करुणया निर्भयमात्मस्वरूपं य आख्यातवांस्तस्मै नमः ॥१९॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम् षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किं भक्त्या साध्यमत्र भगवदनुभवरूपाया भक्तेरतिशयपुरुषार्थतामाह । यस्यामिति । यस्यां भगवदनुभवसुखात्मरूपायां भक्तौ कवयो ज्ञानिनः विविधानि वृजिनानि पापानि यस्मिंस्तस्मिन् संसारे ये परितापाः क्लेशास्तैरुपतप्यमानं क्लिश्यमानमात्मानमनुसवनं स्नापयन्तः भगवदनुभवेन [illegible] दुःखान्यपनुदन्त इत्यर्थः तत्र भगवदनुभवजनितया निर्वृत्या आनन्देन परमपुरुषार्थमपि स्वयं प्राप्तमप्यापवर्गिकमपवर्गरूपं फलमात्यन्तिकमत्यन्तमेवाद्रियन्ते अनादरे हेतुः भगवदीयत्वेनैव परितः समस्ताः पुरुषार्था यैस्ते ॥ १७ ॥

भक्तेर्दौर्लभ्यं सनिदर्शनमाह राजन्निति । हे राजन् ! भगवान् पाण्डवानां यदूनां च मुकुन्दो भगवान् पतिः पालकः गुरुर्हितोपदेष्टा दैवमुपास्यः प्रियः सुहृत् कुलस्य पतिर्नियन्ता किं बहुना क्व च कदाचिद्दूत्यादिषु वः पाण्डवानां किङ्करोऽप्याज्ञानुवर्ती अस्तु नामैवं तथाप्यङ्ग ! हे राजन्नन्येषां नित्यम्भजतामपि मुक्तिं ददाति इति नतु भक्तियोगमिति भक्तेर्दुर्लभत्वोक्तिः ॥ १८ ॥

ऋषभचरितमुपसंहरन् नमस्करोति नित्येति । नित्यमनुभूतं यन्निजं ब्रह्मात्मकं स्वरूपं स एव लाभस्तेन निवृत्ता तृष्णा पुरुषार्थान्तरेषु यस्य एवंभूतो यः अतद्रचनया अश्रेयसां पापकर्मणां रचनया श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य तस्य लोकस्य करुणयाऽभयमात्मस्वरूपमाख्यादाख्यातवान् तस्मै ऋषभरूपाय परमपुरुषाय नमः ॥ १९ ॥

इतिश्रीमद्भा[illegible]पुराणे पञ्चमस्कन्धे

श्रीमद्वीरराघवाचार्यकृत[illegible]

षष्ठोऽध्यायः ॥ [illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्ना[illegible]

मन्यितरेषु साधनेषु सुलभमेव कि[illegible]-
याकुन्द सामान्यमुक्तेरस्याः परमानन्दहेतुत्वा[illegible] ।
[illegible]यो यस्यां भक्त्यां आत्मानं मनः स्नापयन्[illegible]
परयोत्कृष्टया निवृत्तधात्यन्तिकमापवर्गिक[illegible]-
पार्थं स्वयं अत एव प्राप्तिमपि नैवां[illegible]न्ते
नमाह । भागवतत्वेनेति । भक्त्या भागवता[illegible]-
प्रिया इति भावेनैव परिसमाप्ताः पूर्[illegible] ते
तथा स्नापने निमित्तमाह । अविरतेति । [illegible]राणि
विविधानि वृजिनानि दुःखानि यानि [illegible] मनन-
मरणादय: तन्निमित्तसन्तापेनोपतप्[illegible]सुखनं
सर्वदा मुक्तेः पूर्वं तस्यामनादरं [illegible]त्कर्षः
स्यादित्येतमर्थं हिशब्देनाह ।

ब्रह्मणोऽप्यस्य नो पूर्णां [illegible] ।
मुक्तिं ददाति सर्वेषामुपासा[illegible] ॥

इतेत्यनेन

नाद्रियन्ते तु ये मोक्षं पूर्वं [illegible] ।
स्वयोग्यं व्यज्यते मुक्तौ [illegible]ष्वपुक ॥

इत्यनेन चात्र तात्पर्यमवगन्तव्यम् [illegible]

भगवति क्रियमाणाया भ[illegible]त्वेन पुरुषार्थत्वं
यतोऽनन्तस्या मुक्तेरप्यतिदौर्लभ्यम[illegible]ति । एवं गुरुत्वादि-
कमस्तु तदन्यविगानेन मुक्तिं [illegible] कदापि
ब्रह्माणं विना न कस्मैचित्पूर्णां [illegible]त्यन्वयः "ब्रह्म-
णोऽप्यस्य नापूर्णां दद्यान्मुक्तिं [illegible] अर्जुनादीनाम्
ज्ञानोपदेष्टृत्वेन गुरुत्वम् ॥ १८ ॥

सिंहावलोकन्यायेनावतारप्रयो[illegible] । नित्येनि । अतद्वचनया
श्रेयोविरुद्धकर्मणा श्रेयसि चिरसु[illegible] अप्रज्ञानस्य लोकस्य
ज्ञानग्रहणायोग्यजनस्य यो भगवा[illegible] दृश्यते इत्यात्म-
ज्ञानं मुक्तिसाधनमाच्चपादाचष्ट[illegible] तस्मै [illegible] नम इत्यन्वयः
ऋषभोक्तार्थे विश्रम्भाय ऋष[illegible]ति । नित्यमनुभूतो-
परोक्षीकृतो निजलाभः स्वरूप[illegible]ता तृष्णा यस्य
[illegible]: तथोक्तः अनेन नित्यानन्द[illegible]सर्वाखिलपदार्थ-
विशेषत्वात्तदुक्तावाप्तिः सुतरा[illegible] ॥ १९ ॥

इति श्रीमद्भागवते [illegible]स्कन्धे
श्रीमद्विजय[illegible]वल्याम्
षष्ठोऽ[illegible]

श्रीमज्जीव[illegible]सन्दर्भः ।

तच्छ्रुत्वा तस्यै स्पृ[illegible]तु सा परमश्लाघ्ये-
त्याह । राजन्निति । म[illegible]चिदिति तदेतत् फले-
च्छुत्वाभावे वासनान्त[illegible] ॥ १८ ॥ १९ ॥

इति श्रीम[illegible]मस्कन्धे
श्रीमज्[illegible]सन्दर्भस्य

[illegible]शनी ।
[illegible]भक्तावेव सुधा-
[illegible]मपि भगवता

[illegible]यमेव दीयमानमपि अनादरे हेतुः भगवदीयत्वेनैव परितः
सर्वथा प्राप्ताः सर्वेऽर्था येनेतु भगवत्त्वेनेत्यर्थः ॥ १७ ॥

धन्योऽयं प्रियव्रतवंशो यत्र भगवानृषभदेवोऽवतीर्णः उत्ता-
नपादवंशोऽपि धन्यः यत्र पृथुः रघुवंशोऽपि धन्यः यत्र रामः यदु-
वंशपुरुवंशयोरेककालिकयोरपि मध्ये यदुवंश एव सुभगः यत्र
कृष्णः अस्मदीयः पुरुवंशस्तु सर्वतोऽतिदुर्भगो यत्र भगवान्नाव-
ततार इति मनोऽनुतापेन विषीदन्तं राजानं सर्वज्ञतयैव ज्ञात्वा
मोक्षाद्भक्तेरुत्कर्षेण प्रतिपादितेनैव तमानन्दयति हे राजन् ! भवतां
पाण्डवानां यदूनाञ्च पतिः पालकः गुरुरुपदेष्टा दैवमुपास्यः
प्रियः प्रीतिकृत् कुलपतिर्नियन्तेति यदुभ्यस्तरतोऽपि कृष्णस्य
तेषु भवत्सु च तुल्य एव व्यवहारो दृष्टः किञ्च क्व कदाचित् वः
पाण्डवानां दूत्यादिषु किङ्करः न च तथा यदूनामिति यदुभ्योऽपि
प्रेमवत्त्वेन भवतामाधिक्यमेवेति भावः । भवद्भ्यो भजद्भ्योऽपि
परमप्रेमाधिक्यदानस्य वार्त्ता कियती वक्तव्या सा सर्वोपरि
विराजिता अन्येभ्यो भजद्भ्योऽपि भक्तियोगं भावभक्तिमपि
प्रायो न ददाति किन्तु ततोऽप्यर्वाचीनकृष्टां मुक्तिमेवेत्याह । अस्त्वेवमि
भजतां भजद्भ्यः अत्र कर्हिचिदपीत्यनुक्तेर्मुक्तिमनिच्छद्भ्यः शुद्ध-
भक्तेभ्यस्तु भक्तिमेव ददातीत्यर्थो लभ्यते ॥ १८ ॥

उपाख्यानं समाप्य प्रणमति । नित्यमेव अनुभूतो यो निजः स्वरू-
पानन्दस्तल्लाभेनैव विगततृष्णः अतद्वचनया देहाद्यर्थचेष्टया
श्रेयसि विषये चिरं सुप्ता बुद्धिर्यस्य तस्य जनस्य अभयं निर्भय-
कारणम् आत्मलोकं श्रीवैकुण्ठं प्राप्यं करुणयोपदिष्टेन भक्ति-
योगेन य आख्यातवांस्तस्मै नमः ॥ १९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठोऽध्यायः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भक्तिरनुवर्तते इत्युक्ताया भक्तेः परमपुरुषार्थत्वमाह । यस्या-
मिति ॥ १७ ॥

भक्तावात्मानं स्नापयन्तः परमपुरुषार्थं मोक्षमपि तत्रापि
स्वयमासादितं नो पर्याद्रियन्ते इति मदुक्तमिक्रान्ते असम्भावना
न कार्येत्याशयेनाह । राजन्निति । हे अङ्ग ! भजतां भक्तानां कर्हिचित्
वरप्रदानकाले मुकुन्दो मुक्तिं ददाति न पुनरिह लोके भक्तिं
हे राजन् ! एवं मदुक्तं भक्तेर्मुक्तितः श्रैष्ठ्यमस्तु यतः भवतां यदूनां
च तदुपलक्षितानां गोपादीनां च वो युष्माकं सर्वेषां भजतां भक्ति-
मतां पतिः पालकः गुरुस्तत्त्वोपदेष्टा दैवमुपास्यः प्रियः सुहृत्
कुलस्य पतिर्नियन्ता च किं बहुना क्व च कस्मिंश्चित्कार्ये कस्यचित्
भक्तस्य किङ्करो भवति यथा श्रीयशोदानन्दयोः श्रीदेवकीवसुदेवयोः
उग्रसेनादीनां युधिष्ठिरादीनां च किङ्करोऽग्रे प्रसिद्धः सर्वान् भक्तान्
प्रति श्रीभगवद्वचनम् "अहम्भक्तपराधीन" इतिश्रुतिश्च भक्तिवशः
पुरुष इति नहि मुक्तौ किङ्करत्वं भगवतोऽतो मुक्तेर्भक्तिर्गरीयसी-
तिसंक्षेपः ॥ १८ ॥

भगवन्तमृषभं प्रणमति । नित्येत्यादिना । अतद्वचनया अनात्म-
भूतदेहाद्यर्थकव्यापारेण श्रेयसि कल्याणे भगवदाराधने चिरं
सुप्ता बुद्धिर्यस्य तस्य लोकस्य जनस्य आत्मनः स्वरूपस्य

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

लोकं स्थितिप्रवृत्तिस्थानमभयं वासुदेवं य आख्यात् उक्तवान् तस्मै नमः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षष्ठाध्यायार्थप्रकाशः ॥ ६ ॥

भाषाटीका

वह भक्ति कैसी है कि जिसमें ज्ञानी पुरुष निरन्तर नाना प्रकार के दुःख रूप संसार के तापों से तपायमान आत्माको सब काल में स्नान करायते हुये अत्यन्त सुख से अत्यन्त परम पुरुषार्थ मोक्षनामा सुख को भी स्वयं प्राप्त होने पर भी आदर नहीं करते हैं क्योंकि वे भगवत्सम्बन्धि होने से सब अर्थों से पूर्ण रहते हैं ॥ १७ ॥

हे राजा! भगवान् श्रीकृष्ण यदुन के आप पाण्डवों के रक्षक हैं गुरु हैं देवता हैं प्रिय हैं कुलपति हैं कहीं पर प्रभु पाण्डवों के दूत भी होगये हैं यद्यपि ऐसा है तथापि मुकुन्द भगवान् भजने वालों को मुक्ति तो देदेते हैं परन्तु प्रेम लक्षणाभक्ति को कभी नहीं देते हैं ॥ १८ ॥

निरन्तरी अपने स्वरूपानुभव के लाभ से तृष्णा से निवृत्त जो ऋषभ भगवान् तिनके अर्थ नमस्कार है उन भगवान् ने संसार की रचना के भोग से चिरकाल तक सोई हुई बुद्धि वाले लोक के पर करुणा करके अपने स्वरूप का उपदेश किया है ॥ १९ ॥

इति श्रीभागवत पञ्चमस्कन्ध छठवांअध्याय का
भाषानुवाद ब्रह्मचार्यकृत
पूर्ण ॥ ६ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

[illegible]मोऽध्यायः ।

[illegible]शुक उवाच ।

भरतस्तु महाभागवतो [illegible]नितक्षपरिपालनाय संचिन्तितस्तदनुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥ १ ॥

तस्यामु ह वा आत्मजान्[illegible]नात्मनः पञ्च जनयामास भूतादिरिव भूतसूक्ष्माणि ॥ २ ॥

सुमतिं राष्ट्रभृतं सुदर्श[illegible]केतुमिति अजनाभं नामैतद्वर्षं भारतमिति यत आरभ्य व्यपदिशन्ति ॥ ३ ॥

स बहुविन्महीपतिः [illegible]वत्सलतया स्वे स्वे कर्मणि वर्तमानाः प्रजाः स्वधर्ममनुवर्तमानः पर्यपालयत् ॥ ४ ॥

ईजे च भगवन्तं यज्ञ[illegible]वचैः श्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिभिरनुसवनं [illegible] ॥ ५ ॥

संप्रचरत्सु नानायागे[illegible]क्रियेष्वपूर्वं यत्तत्क्रियाफलं धर्माख्यं परे ब्रह्मणि यज्ञपुरुषे सर्वदेवतालिङ्गानां मन्त्राणा[illegible]या साक्षात्कर्तरि परदेवतायां भगवति वासुदेव एव भावयमान आत्मनैपुण्यमृदितकषा[illegible]भिर्गृह्यमाणेषु स यजमानो यज्ञभाजो देवांस्तान्पुरुषावयवेष्वभ्यध्यायत् ॥ ६ ॥

एवं कर्मविशुद्ध्या [illegible]न्तर्हृदयाकाशशरीरे ब्रह्मणि भगवति वासुदेवे महापुरुषरूपोपलक्षणे श्रीवत्सकौस्तु[illegible]दरगदादिभिरुपलक्षिते निजपुरुषहृल्लिखितेनात्मनि पुरुषरूपेण विरोचमान उच्चैस्तरां भक्ति[illegible]नरयाऽजायत ॥ ७ ॥

एवं वर्षायुतसह[illegible]कर्मनिर्वाणावसरोऽधिभुज्यमानं स्वतनयेभ्यो रिक्थं पितृपैतामहं यथादायं विभज्य स्वयं [illegible]केतात्स्वनिकेतात्पुलहाश्रमं प्रवव्राज ॥ ८ ॥

श्रीधर[illegible]दीपिका ।

अध्यायानां [illegible]रितम् ।

अष्टाभिर्भरता[illegible]तम् ॥ १ ॥

सप्तमे भरतो [illegible]यजन् ।

आरब्धकर्मनि[illegible]रिम् ॥ २ ॥

संचिन्तितः सङ्कल्पेनै[illegible] १ ॥

आत्मनोऽनुरूपान्[illegible] भूतसूक्ष्माणीति सन्त-

[illegible]यविशाखः सूचितः ॥ ३ ॥

[illegible]हन्निरत्पेक्ष

क्रतुभिः कर्मभिः श्रद्धया ईजे च । तानेवाह । आहृताः स्वाधिकारेणात्मसात्कृताः येऽग्निहोत्रादयस्तेषां प्रकृतिविकृतिभिः अग्निहोत्राद्याः [illegible]: सकलाङ्गयुक्ताः प्रकृतयः विकलाङ्गा विकृतय इति । नैर्विविधैरर्पाण्यानित्यर्थः । अनुसवनमित्यन्तं वा चातुर्होत्रविधिनेत्यन्तं वा गद्यम् ॥ ५ ॥

किञ्च संप्रचरत्सु प्रवर्तमानेषु नानायागेषु विरचितानुष्ठिताङ्गक्रिया येषां तेषु यदपूर्वं तद्वासुदेव एव भावयमानोऽभ्यध्यायत् यजमानो यज्ञभाजो ये देवाः सूर्यादयस्तान्पुरुषस्य वासुदेवस्यावयवेषु चक्षुरादिष्वभ्यध्यायत्तु पृथक्त्वं मत्स्यन्वयः । अपूर्वं पदार्थम मीमांसकानाम् तदानीमेव सूक्ष्मत्वेनोत्पन्नं फलमथापूर्वं कालान्तरफलोत्पादिका कर्मशक्तिर्वा । तदुक्तम् ।

यागादेव फलं तद्धि शक्तिद्वारेण सिध्यति ।

सूक्ष्म शक्त्यात्मकं वापि फलमेवोपजायत इति ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवाह । क्रियाफलं धर्माख्यमिति च ननु यद्यपि देवता: कर्मप्रधानमिति मतं तर्हि कर्तृनिष्ठमपूर्वं स्यात् । तदुक्तम् ।

कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा ।
योग्यता शास्त्रगम्या या परा सा पूर्वमिष्यत इति ।

अथ देवताप्रधानं कर्म तु देवताराधनार्थं तदा देवताप्रसादरूपत्वादपूर्वस्य देवताश्रयत्वमेव युक्तम् । मोक्षयागापूर्वस्येव श्रीशाखाश्रयत्वम् । कुतो वा वासुदेवाश्रयमपूर्वं भावयति । उच्यते यदि कर्तृनिष्ठमपूर्वं तर्हि वासुदेवस्यान्तर्यामितया प्रवर्तकत्वेन मुख्यकर्तृत्वात्तदाश्रयमेवापूर्वं ननु तत्प्रयोज्ययजमानाश्रयम् । "शास्त्रफलं प्रयोक्तरि" इतिन्यायात् अन्यथा ऋत्विजामप्यपूर्वाश्रयत्वप्रसङ्गात् । तदेवाह । साक्षात्कर्तरीति । देवताश्रयत्वेऽपि वासुदेवाश्रयत्वमेवेत्याह । परदेवतायामिति । परदेवतात्वे हेतुः । सर्वदेवतालिङ्गानां तत्तद्देवताप्रकाशकानां मन्त्राणां येऽर्था इन्द्रादिदेवतास्तेषां नियामकतया तस्यैव प्रसादनीयत्वात्फलदातृत्वाच्च युक्तमेवापूर्वाश्रयत्वमित्यर्थः एवं भावनमेवात्मनो नैपुण्यं कौशलं तेन मृदिताः क्षीणाः कषाया रागादयो यस्य अध्वर्युभिरिति बहुवचनं नानाकर्माभिप्रायेण ॥ ६ ॥

एवम्भूतया कर्मविशुद्ध्या विशुद्धसत्त्वस्य भक्तिरजायतेत्यन्वयः । क अन्तर्हृदये य आकाशः स एव शरीरमभिव्यक्तिस्थानं यस्य तस्मिन् ब्रह्मणि कीदृशे महापुरुषरूपस्योपलक्षणमाकारो यस्य तस्मिन् । किञ्च । श्रीवत्सादिभिरुपलक्षिते निजपुरुषाणां नारदादीनां हृदि लिखितवन्निश्चलतया स्थितेनांकेन पुरुषरूपेणात्मनि स्वमनसि विरोचमाने कीदृशी भक्तिः अत्यन्तातिशयेनैधमानो रयो वेगः प्रकर्षो यस्याः ॥ ७ ॥

एवमनुवृत्त्या वर्षाणामयुतानि तेषां सहस्रं तत्पर्यन्तकालेऽवसितो निश्चितः कर्मनिर्वाणावसरो राज्यभोगादुपसमाप्तिसमयो येन सः अधिकृत्य भुज्यमानं रिक्थं धनं यथाविभागं विभज्य सकलसम्पदां निकेतादाश्रयात् स्वगृहात् पुलहाश्रमं हरिक्षेत्रं प्रवव्राज ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमृषभचरितमुपवर्ण्य इदानीं तत्फलस्यास्य भरतस्य चरित्रमुपवर्णयति षड्भिरध्यायैः । भरत इति । महाभागवतो भरतो यदा भगवता ऋषभेणावनितलपरिपालनाय सञ्चिन्तितः संनियुक्तः तदा तदनुशासनपरः भूतलानुशासनपरः विश्वरूपस्य दुहितरं पञ्चजनीं नामोपयेमे विवाहितवान् ॥ १ ॥

तस्यामुवाच पञ्चजन्यां ह्यात्मनः स्वस्य कात्स्न्येनानुरूपान् पञ्चात्मजान् सुमत्यादीनुत्पादयामास यथा भूतादिस्तामसोऽहङ्कारो भूतसूक्ष्माणि शब्दस्पर्शादीनीति सारूप्ये सन्ततिवृद्धौ च दृष्टान्तः ॥ २ ॥

पूर्वमजनाभाख्यमेतद्वर्षं यतो यन्नृपताधिपत्यादारभ्य भारतं समुदाहरन्ति स भरतो बहुवित् महीपतिः पितृवदतितरां वात्सल्येन स्वस्ववर्णाश्रमोचिते कर्मणि वर्तमानाः प्रजाः स्वयमपि स्वधर्ममनुवर्तमानः पर्यपालयत ॥ ३ ॥

ईजे चेत्यादिप्रकृतिविकृतिभिरित्यन्तमेकं वाक्यं उच्चावचैर्नाना[illegible] यजनं देवतां प्रति द्रव्यत्यागात्मकैः क्रतुभि[illegible]तमीजे इष्टवान् क्रतूनेव प्रपञ्चयति अग्निहोत्र [illegible]भिरिति यत्र पूर्णमङ्गजातमुपदिष्टं सेष्टिः प्रकृतिः यथा आग्नेयीष्टिः यथाम्नातोक्तमङ्गजातमुपजीव्यते सा विकृतिः यथा सौर्येष्टिः ॥ ४ ॥

यजनप्रकारमेव । अनुसवनं प्रातरादिसवनत्रये प्रातुर्होत्रविधिना चातुर्होत्रविधिना चतुर्भिः ऋत्विग्भिः क्रियमाणं यज्ञादि कर्म तस्मिन्ननुगुणाभिः विरचिताः अङ्गक्रिया येषु तेषु नानायागेषु सम्प्रचरत्सु वर्तमानेषु सत्सु तत्र यागेषु धर्माख्यं योगसाध्यं धर्मं इतिपर्यादिश्यमानमपूर्वापरपर्यायं क्रियाफलं तद्गतमपि वासुदेवे भावमानः भगवदनुग्रहरूपमिति मन्वानः क्षणध्वंसिनो यागाः कालान्तरभाविस्वर्गादिफलसाधनत्वानुपपत्त्या तान्निवर्त्यव्यवहितं यागसक्तात्मकमपूर्वं यागजन्यं फलसाधनमिति तदर्थः ।

इष्टापूर्तं बहुधा जायमानं विश्वम्
बिभर्ति भुवनस्य नाभिः तदेवाग्निस्तद्वायुः इति

श्रुत्युक्तरीत्या इन्द्रादिदेवतान्तर्यामितयावस्थितस्य भगवतोऽनुग्रह एवापूर्वशब्दार्थ इति भावयमान इत्यर्थः तदेव विशदयन् भगवन्तं विशिनष्टि । सर्वदेवतालिङ्गानाम । उद्देश्यत्वेन स्मृतानां देवतालिङ्गानि स्मारकाणि चिह्नानि येषु तेषां मन्त्राणामर्थनियामकतया अर्थोऽभिधेय इन्द्रादिस्तस्य नियामकतयान्तः प्रविश्य धारकत्वेन नियन्तृतया प्रयोजकतया वा साक्षादेव कर्तरि इष्टरि मन्त्रकर्ता वृणीतेतिवत् निर्देशः यद्वा कर्तरि फलोत्पादयितरि कर्मणः फलसाधनत्वानुपपत्त्यापि नापूर्वं कल्प्यं किन्तु रात्रिसत्रप्रतिष्ठाफलवत् वसन्तावेनमिन्द्रः प्रजया पशुभिस्तर्पयतीति वायुर्वैक्षेपिष्ठा देवतेत्याद्यर्थवादैः फलप्रदतया गताग्नीन्द्रादिदेवतायास्तदेवाग्निस्तद्वायुरित्युक्तरीत्यान्तर्यामितयावगतब्रह्मण एव फलप्रदत्वमित्याशयेन तदेवाह । यज्ञपुरुषे यज्ञोद्देश्येन्द्रादिपुरुषरूपे परब्रह्मणि परदेवतायामिति एवं भावनमेवात्मनो नैपुण्यं कौशलं तेन मृदिता निरस्ताः कषायाः कर्मवासना रागादयो वा यस्य अध्वर्युभिरिति बहुवचनं नानाकर्माभिप्रायेण हविःषु सपुरोडाशाज्येषु गृह्यमाणेषु होमार्थमिति शेषः यजमानः स्वयं यज्ञभोजिन आराध्यन्त इतियज्ञभाजो देवा इन्द्रादयस्तान् पुरुषस्य परमपुरुषस्यावयवेष्ववध्यायत् "यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः । सूर्यश्चक्षुर्दिशः श्रोत्रं लोकपालाः भुजेष्वासन्" इत्यादिश्रुतिरूप्यप्रतिपादकशास्त्रानुसारेणानुसंहितवानित्यर्थः ॥ ५ ॥

एवं भगवदाराधनरूपकर्मणानुगृहीतो भक्तियोगोऽस्य जायतेत्याह । एवमुक्तविधकर्मविशुद्ध्या शुद्धान्तःकरणस्य तस्य भगवत्युपर्युपरि तरामतितरां प्रतिदिनमेधमानो वर्धमानो रय उत्कर्षो यस्याः सा भक्तिरजायतेत्यन्वयः भगवन्तं विशिनष्टि । अन्तः शरीरान्तःस्थितं यद्हृदयं पुण्डरीकाकारं तस्मिन् य आकाशः, दहरः सशरीरं रूपं यस्य [illegible] रूपे दहराकाशस्य परमात्म[illegible] शिलापुत्रकस्य शरीरमितिवत् [illegible] शब्दो हृदयान्तर्वर्तिभूता[illegible]स्य [illegible]ति हृदये आकाशते प्रकाश[illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्[illegible]

[illegible]स्येति च प्रश्रयेण करुणेन गुणेन [illegible]ग-
वति षाड्गुण्यपूर्णे वासुदेवे सर्वान्तरात्म[illegible]हा-
पुरुषरूपमुपलक्षणमाकारो यस्य तस्मिन् [illegible]पच-
यितं भक्तिरूपकं हरः शङ्कुः असिः [illegible]यायां
भक्तानां हृदि स्थिते स्थितवत्सिमल[illegible] लोक-
पुरुषरूपेण आत्मनि आत्मनसि विरोच[illegible] ॥

एवमुक्तया वृत्त्या वर्षाणामयुतानि [illegible] तेषा-
मन्ते तत्पर्यन्ते कालेऽवसितो विदितः [illegible] राज्य-
भोगादेस्समाप्तिसमयो येन सः अभि[illegible] पित्रादि-
परम्परया आगतमृक्थं धनं [illegible] यथा विभागं
विभज्य दत्वा स्वयं सकलानां सम्प[illegible] अनि-
केतात्स्वगृहात्पुलहाश्रमं शालिग्रामक्षे[illegible] जगाम ॥८॥

श्रीमद्विजयध्वजतीर्थकृत[illegible] ।

श्रीनारायणप्रसादजनककामसा[illegible] निरूप्यतेऽ
स्मिन्नध्याये । तत्राद् वृषभे साक्षा[illegible] राज्यरक्षणक-
र्मणि निवृत्ते तत्पुत्रो भरतः किम[illegible] भगवद्भक्त-
कथाया अपि श्रीहरिकथान्तर्भूतत[illegible] क्रियते । भर-
तस्त्विति । तुशब्द इतरराजकथ[illegible] विशेषं वक्ति
संचिन्तितः संमन्त्र्याभिषिक्तः "[illegible]नावर्चाया-
मभिषेचन" इत्युत्पलमालायां तस्य[illegible]माला ॥ १ ॥

पञ्चसंख्यामात्रत्वे दृष्टान्तमा[illegible] । भूतादिस्तामस-
साहङ्कारः भूतसूक्ष्माणि शब्दा[illegible] चेतनदशान्नापे-
क्षायां भूतादिः परमात्मा भू[illegible] शब्दाद्यभि-
मानिदेवानिव यतो भरतात् ॥[illegible]

आहितः प्रतिष्ठितोऽग्निर्येन [illegible]: अग्निहोत्रादयः
प्रकृतयः पशुसोमादयो वि[illegible]कानि कर्माणि
प्रकृतयः एकदेशाङ्गयुक्तानि [illegible] भिरेव क्रियमाणा
अश्वमेधादयः सोमरसैरेव [illegible] सोमयागाश्चत्वारो
होतारो यत्र तच्चातुर्होत्रं तद्ध[illegible] ॥

प्रचरत्सु कुर्वाणेषु अध्व[illegible] नामायोगेषु देवता-
ध्यानलक्षणेषु यजनाद्युपायेषु [illegible] सत्सु यदपूर्वं
क्रियाफलं धर्मसंज्ञं तद्वासुदेवे[illegible] हर्यधीनत्वेन समर्प-
यन् स यजमानो ये हरेश्च[illegible] तत्पदास्तान् यज्ञभाजो
यज्ञभागाधिकारिणो दे[illegible] पुरुषस्य पूर्णा[illegible]-
नस्य हरेश्चक्षुराद्यवयवेषु [illegible]ता इत्यध्यभावयद्-
चिन्तयदित्यन्वयः कद[illegible] गृह्यमाणेषु सत्सु
कर्माङ्गत्वेन वासुदेवं सम[illegible] उक्तम । यदेति । सर्व-
देवतानां लिङ्गभूताः प्र[illegible]कतेषां वज्रधरत्वादीनां
तुल्यानां च । अर्थनियाम[illegible]प्रेरकत्वेन मुख्यकर्तरि
[illegible] । [illegible] चेदं मनुष्याफलमान्य

भगवदर्पणेन
स तथा

तस्यान्तर्हृदये आकाशशरीरे सूक्ष्मरूपे [illegible]परिच्छिन्ने महा-
पुरुषस्य हरेरुपलक्षणैः चिह्नैर्महापुरुषं श्रीनारायणोऽयमिति उप-
लक्षयन्ति ज्ञापयन्ति महापुरुषोपलक्षणैर्वा स्वभक्तानां हृदुल्लि-
खितेन स्फुरितेनात्माकारेण कीदृशः स इत्यत आह । पुरुषरू-
पेणेति । आत्मनि स्वस्मिन्नेधमानया वर्द्धमानया ॥ ७ ॥

भरतस्य वैराग्योपजृम्भणप्रकारमाह । एवमिति । वर्षायुतस-
हस्रावसानेऽवसितस्य प्रारब्धकर्मणो निर्याणावसरः मात्राक-
क्षणो यस्य स तथा रिक्थं राज्यादर्षितं सकलसम्पत्तिके-
तात्सर्वसमृद्धधान्याभिकेतनात् गृहात् पुलहाश्रमं शालग्रामक्षेत्र
न तत्रान्याधीनत्वेन सन्निधानमित्यभिप्रायेणोक्तमिच्छतेति ॥ ८-९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नाभेरेवाजनाभ इति संज्ञा भारतमित्यजनाभाख्यमपीदं वर्ष
लोकैस्तस्मिन्ननुरागवैशिष्ट्येन ख्यापितमिति ज्ञेयम् ॥ १—६ ॥

एवं कर्मविशुद्ध्या विशुद्धसत्त्वेति । एवं पूर्वोक्तप्रकारेण कर्म-
विशुद्ध्या विशुद्धसत्त्वस्य भक्तिः सभक्ताश्रवणकीर्त्तना विल-
क्षणा जायतेत्यन्वयः क भगवति वासुदेवे पूर्णस्वरूपभगवत्यां
सर्वान्निवासेन च तत्तदात्मा प्रसिद्धेः अन्तर्हृदयं यथाकाशः स
एव शरीरं स्वस्यैवाविर्भावविशेषाधिष्ठानं यस्य तस्मिन्नन्तर्या-
मिणि परमात्माख्ये ब्रह्मणि निर्विशेषतयाविर्भावात् तदाख्ये च
भगवतो निराकारत्वं वारयति महापुरुषस्य यद्रूपं शास्त्रे श्रूयते
तदुपलक्ष्यते दृश्यते यत्र तस्मिन् किञ्च श्रीवत्सादिभिरपि चिह्नैः
एधमानया वर्द्धमानप्रकर्षा सन्निधाप्यते अभ्युपि प्रकर्षा-
क्रियते ॥ ७—९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सप्तमे भवने यज्ञैः पत्रपुष्पादिभिर्घनं ।
भरतो भक्तिभरतो हरिमीजे हृढव्रतः ॥

ऋषभदेवो भगवान् भरतस्तु भागवत इति तुशब्दार्थः ।
भ्रमादिरहङ्कारः ॥ १—२ ॥

अजनाभमिति । नाभेश्चऋषभदेवस्याजस्य येनद्वर्षं नामित्वा-
दित्यर्थः नाभिश्चाजश्चेत्यजनाभी अल्पाच्तरत्वादज इति पदस्य
पूर्वनिपातः तयोरिदमजनाभं संज्ञापूर्वकविधेरनित्यत्वाद्वृद्ध्यभावः भार-
तमिति भरतस्वामिकत्वात् ॥ ३—४ ॥

यज्ञाः सयूपाः क्रतवः अयूपास्तद्रूपं उच्चावचैर्महद्भिरल्पैश्च
क्रतुभिः कीदृशैः कर्मितानां श्रद्धया आहूताः स्वाधिकारात्म-
मानकृता येऽग्निहोत्रादयो हविर्धाख्यत्वा प्रकृतिविकृतिभिः अग्नि-
होत्रादयः सकलाङ्गयुक्ताः प्रकृतयः विकलाङ्गा विकृतय इति [illegible]-
विधैरपीप्रवानित्यर्थः ॥ ५ ॥

ननु "तावत् कर्माणि कुर्वीत न निर्विद्येत यावता । मत्कथा-
श्रवणादौ वा श्रद्धा यावन्न जायते" । इति भगवदुक्तेर्भगवत्कथा-
दिषु प्रौढश्रद्धस्य निष्कामस्य शुद्धभक्त्यधिकारिणो भरतस्य
कर्मकर्तृत्वं कर्मफलभोक्तृत्वं च कथं सङ्गच्छतामित्यत आह । सम्प्र-

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चरतन्तु प्रवर्त्तमानेषु विरचिता अनुष्ठिता अङ्गक्रिया येषां तेषु यज्ञपूर्वं तत् परे ब्रह्मणि वासुदेवे क्षेत्रज्ञे एव भावयमानः अस्य कर्मणो यत् फलं भावि तत्र न मे लिप्सा किन्तु तद्वासुदेवप्रीत्यर्थं वासुदेवायैव समर्पितमिति तत्र न मे स्वत्वमिति चिन्तयन्नित्यर्थः ननु कर्म कर्तृप्रधानं देवताप्रधानं वेति मीमांसकानां पक्षद्वयं तत्राद्ये पक्षे कर्तृनिष्ठमपूर्वं द्वितीये कर्मणो देवताराधनार्थत्वाद्देवतानिष्ठं तत्र भरतस्य निष्कामत्वादपूर्वस्य देवतानिष्ठत्वे एव युक्ते देवतानां चन्द्रसूर्यादीनां बाहुल्यात् कथमेकस्मिन् वासुदेव एव कर्मफलभावनेत्यत आह । सर्वदेवताङ्गानां तत्तद्देवताप्रकाशकानां मन्त्राणां येऽर्था इन्द्रादिदेवतास्तेषां नियामकतया यज्ञपुरुषं यज्ञफलभोक्तारीत्यर्थः । नन्वेवं भरतस्य मास्तु भोक्तृत्वं कर्मकर्तृत्वं तु तस्य दुर्वारमित्यत आह । साक्षात् कर्त्तरि वासुदेवस्यैवान्तर्यामिणः प्रवर्त्तकत्वेन स्वतन्त्रकर्तृत्वात् साक्षात् कर्तृत्वं ननु तत्प्रयोज्यस्य यजमानस्यास्वतन्त्रस्य अन्यथा ऋत्विजामपि साक्षात् कर्तृत्वप्रसङ्गात् "यज्ञभुग् यज्ञकृद्यज्ञ" इति नामस्मृतेश्च तस्य स्वतन्त्रकर्तृत्वेऽप्यज्ञानादहङ्करोमीति स्वस्य स्वतन्त्रकर्तृत्वमननमेव कर्तृत्वगमकं बन्धकारणञ्च ज्ञेयम् । आत्मनो नैपुण्यमेवं भावनमेव तेन मृदिताः क्षीणाः कषायाः कर्मकरणवासनात्मका येन सः अध्वर्युभिरित्यनेन तथाविधानां भक्तानां कर्तृत्वाद्यभिमानशून्यानां कर्मफलत्यागिनां स्वप्रतिमूर्त्तिद्वारा कर्मकरणमपि कर्माणि श्रद्धाराहित्यात् कर्माकरणमेव ज्ञेयमिति इति द्योतितम् ।

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत् ।

असदित्युच्यते पार्थ ! न च तत् प्रेत्य नो इह इति ।

भगवद्गीतोक्तेः अत एवाम्बरीषादीनां शुद्धया भगवद्भक्त्यैव यापितायुषामानामपि पितृपैतामहसदाचारपरम्पराप्राप्तयज्ञादिकर्माचरणं प्रतिनिधिद्वारैव श्रूयते अर्वाचीनानामपि प्राच्यादिदेशवर्तिनां सुप्रतिष्ठानां गृहस्थमहाभागवतानां विवाहोपनयनादावपि सर्वथैव वर्णाश्रमाभावे लौकिकादपि साङ्कर्यदोषाद्बिभ्यतां प्रतिनिधिद्वारैव कर्मकरणं दृश्यते च तत एव तावत् कर्माणि कुर्वीतेत्यात्मनेपदप्रयोगाद्यथन्तनिर्देशाच्चानात्मगामिफलत्वे सति प्रतिनिधिद्वारा कर्मकरणमपि शुद्धसत्त्वभक्तानां न दूषणं तथैव शुद्धभक्तिलक्षणेऽप्यन्याभिलाषिताशून्यमितिवज्ज्ञानकर्मादिशून्यमित्यनुक्त्वा ज्ञानकर्माद्यनावृतमित्यनावृतपदोपन्यासात् प्रतिनिधिद्वारा कर्मकरणेऽपि क्षीयेन्द्रियैः प्रतिक्षणश्रवणादिभक्त्यवकाशप्राशा भक्तेः कर्मानावृतत्वात् शुद्धत्वमेवेति केचिद्व्याचक्षते । नन्वेवम्भूतत्वेन भरतस्य मास्तु कर्मकरणदोषः यज्ञानां नानादेवताराधनात्मकत्वात् कथमनन्यता तस्योपपाद्यतामित्यत आह । स यजमानो भरतः यज्ञभाजो देवानिन्द्रादीन् पुरुषस्य भगवतोऽवयवेषु बाह्वादिषु अभ्यध्यायत् इन्द्राय स्वाहेत्युक्तेऽमुं प्रभोर्बाहुपूजेयं सूर्याय स्वाहेत्युक्ते लोचनपूजेयमिति भावयामास । पृथक् पृथग्देवतात्वेन पूजा ह्यनन्यता विघातिनी नतु तदङ्गत्वेनेति ॥ ६ ॥

एवं कर्मकर्तुरन्तःकरणं विशेषतः शुद्ध्यतीत्याह । एवमिति । "मां कृष्णबुद्ध्या भरतं भजध्वम्" इति भगवद्वाक्यादेव उत्पत्तित एव शुद्धान्तःकरणस्य तस्य विपर्ययान्योक्त एवं कर्मविशुद्ध्यापि शुद्धान्तःकरणस्य यद्वा एवमनेन प्रकारेण कर्मणो विशुद्धिर्यस्मिन् स चासौ विशुद्धसत्त्वश्चेति तस्य भक्तिरौत्पत्तिक्येव प्रतिदिनमुच्चैस्तरां वर्द्धमानवेगा गङ्गेव भुवनपावन्यजायतेत्यन्वयः । ... हृदये वासुदेवनन्दने कृष्णे स एव परमात्मब्रह्मभगवच्छब्दैरुपनिषद्भिर्नोच्यते इत्याह । अन्तर्हृदयाकाशे शरीरं योगिभिर्ध्येय एव तस्मिन् परमात्मनीत्यर्थः "केचित्स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तं चतुर्भुजम्" इत्यादिना परमात्मनोऽपि साकारत्वश्रवणात् तथा ब्रह्मणि ज्ञानिभिरुपास्ये भगवति भक्तैरुपास्ये वसुदेवपुत्रत्वेऽपि महापुरुषस्य वैकुण्ठनाथस्य यद्रूपं शास्त्रेषु श्रूयते तद्रूप आधिक्येन लक्ष्यते दृश्यते यत्र तस्मिन् श्रीवत्सादिभिरपि चिह्नैः निजपुरुषाणां नारदादीनां हृदि निश्चयप्रद इव लक्षितर्मांसचक्षुतया स्थितेन पुरुषरूपेण निराकारब्रह्मरूपेण विद्यमाने क आत्मनि स्वमनसि ॥ ७ ॥

एवं वर्षाणामयुतानीनां सहस्रं तत्पर्यन्तकालेऽपि न वसितो[1] नावसितो न निश्चितः स्वनिर्वाणावसरः राज्यभोगावसानसमाप्तिसमयो येन सः राज्यभोगस्य भक्त्यानुषङ्गिकफलत्वात् कर्मफलत्वाभावेऽपि कर्मफलमननं दैन्यादेवेति ज्ञेयम् । ततश्च विरज्यैव हठादेव प्रयत्नं रिक्थं धनम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथाष्टाभिर्भरताख्यानमाह । तत्र तावद्भरतस्य पित्राज्ञानुसारेण प्रजापालनदेवयज्ञादिकं कर्म सप्तमेन वर्णयति । भरतस्त्विति । स अभिन्नस्तत्रावधावत्तावत्मनवेलायामयमवनितलपालनं करिष्यतीति मनसैवाभिलषितपरिपालनाय सङ्कल्पितः ॥ १ ॥

भूतादिरहङ्कारः ॥२—३—४ ॥

किञ्च स बहुवित् यथाक्रतुरूपं यज्ञाः अयूपाः क्रतवः सयूपाः तद्रूपमग्न्यादिसर्वदेवात्मकयुक्तसर्वयज्ञरूपमित्यर्थः "यज्ञो वै विष्णुः तदेवाग्निस्तद्वायुः" इत्यादिश्रुतेः उच्चावचैर्महद्भिः स्वल्पैश्च क्रतुभिर्यागैः श्रद्धया ईजे इत्यन्वयः क्रतूनेवाह । आहुताः स्वाधिकारतः स्वीकृताः येऽग्निहोत्रादयस्तेषां प्रकृतिविकृतिभिः स्वप्रकरणोक्तसकलाङ्गयुक्ताभिः प्रकृतिभिः प्रकरणान्तरोक्तैरङ्गैः पूर्यमाणाभिर्विकृतिभिश्च तैर्विविधैरीजे अपरञ्च प्रातरादिषु त्रिषु कालेषु चातुर्होत्रविधिना चतुर्णां होत्रादीनामृत्विजां कर्म चातुर्होत्रं तद्विधिना ॥ ५ ॥

अथ मीमांसकानां सर्वकर्मकारणभूतभगवदनुग्रह एव कर्मफलमिति सिद्धान्तमजानतां मतं निराचिकीर्षुः भरतस्य बहुवित्त्वं प्रपञ्चयन् "स एवैनमिष्टः प्रजया पशुभिश्च तर्पयति" इत्यादि श्रुतिप्रोक्तान् फलदातॄनिन्द्रादीन् देवानतिहाय कथमेकं भगवन्तमेव फलदातारमित्याशङ्कां निवारयति । सम्प्रचरत्स्विति । सम्प्रचरत्सु अनुष्ठीयमानेषु विरचिता निष्पादिताः अङ्गक्रिया येषां तेषु अपूर्वं साध्यं तद्वासुदेवे भावयमानः वासुदेवप्रसाद एव सर्वैः कर्मभिः साध्य इति मन्वान इत्यर्थः स यजमानो भरतो यज्ञभाजो यं देवास्तान् पुरुषस्य वासुदेवस्यावयवेषु अन्वध्यायत् "अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यौ" इत्यादिश्रुतिभ्यः ।

यस्याग्निरास्यं द्यौर्मूर्द्धा नाभिश्चरणौ क्षितिः ।
सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै भगवते नमः ॥
द्यां मूर्द्धानं यस्य विप्रा वदन्ति
खं वै नाभिश्चन्द्रसूर्यौ च नेत्रे ॥
दिशः श्रोत्रं विद्धि पादौ क्षितिं च
सोऽचिन्त्यात्मा सर्वभूतप्रणेता ॥

इत्यादिस्मृतिभ्यश्च प्रसङ्गान्मीमांसकानाम् ... क्रियाफलं धर्माख्यं चेति । तदानीमे... काल ... फलोत्पादिका क्रिया ...

[1] पर्यन्तकालेऽपि इति ...

यत्र ह वाव भगवान् हरिर[illegible] निजजनानां वात्सल्येन सन्निधाप्यत इच्छारूपेण ॥९॥

यत्राश्रमपदान्युभयतो ना[illegible]कनदी नाम सरित्प्रवरा सर्वतः पवित्रीकरोति ॥१०॥

तस्मिन् वाव किल स एक[illegible]पवने विविधकुसुमकिसलयतुलसिकाम्बुभिः कन्दमूलफलोपहारैश्च समीहमानो [illegible] विविक्त उपरतविषयाभिलाष उपभृतोपशमः परां निर्वृतिमवाप ॥ ११ ॥

तयेत्थमविरतपुरुषपरिचर्य[illegible] प्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औ[illegible]बाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारविन्दानुध्यानपरिचितभक्तियो[illegible]परमाह्लादगम्भीरहृदयह्रदावगाढधिषणस्तामपि क्रियमाणां भगवत्सपर्यां न सस्मार ॥ [illegible] ॥

श्रीमच्छुकदेवकृतसि[illegible]

मांसकानां प्रागल्भ्यमात्रं वक्तव्यं तु[illegible] सत्कर्मभिः प्रसादित ईश्वरः सर्वपुरुषार्थप्रदो [illegible] ननु यदि देवताङ्गमात्रं प्रधानं तु कर्म प्रकल[illegible] मकिञ्चित्करत्वात् तदा कर्तृनिष्ठमपूर्वं स्या[illegible] कर्मणः कर्मनिरपेक्षस्य जमस्य च दृष्टसाधक[illegible] प्रधानं तर्हि देवताधीनमपूर्वमेवं सति [illegible] कर्मभिः प्रसादनीय इति दुराग्रहो न युक्त [illegible]तीति । परदेवतायामिति च । सर्वमेतनप्रत्क[illegible]रि सर्वदेवताांशानि स कीरयन्ति पुण्यमथा[illegible]र: "सर्वस्य वशी सर्वस्येशानः तं देवतानां पर[illegible] इत्यादिवाक्यकदम्बात् परदेवतात्वे हेतुः सर्व[illegible]: प्रकाशका ये मन्त्रास्तेषामर्थाः इन्द्रादिदेवता[illegible]था नियन्तृतया वासुदेवे ध्यापूर्वभावयमान इति[illegible] भावनमेवात्मनो नैपुण्यं तेन मृदिनाः कषाय[illegible] यस्य सः हविःषु चरुपुरोडाशादिषु अध्वर्युभिरि[illegible]कर्माभिप्रायम् ॥६॥

अन्तर्हृदये हृदयमध्ये य [illegible] शरीरं वासस्थानं यस्य तस्मिन् महापुरुष[illegible]रो यस्य तस्मिन् श्रीवत्सादिभिरुपलक्षिते निज[illegible] जितेन सुस्थिरेणोक्तपुरुष[illegible]त्मनि मनसि[illegible] वासुदेवे अनुदिनं प्रतिदिनमुच्चैस्तरामेधमा[illegible] यस्याः' सा भक्तिरजायत ॥ ७ ॥

एवमन[illegible] वृत्या वर्षा[illegible]स्यान्ते अवसितो निश्चितः कर्मनिर्वाणावसरः [illegible]समाप्तिसमयो येन स रिक्थं धनम् यथादायं [illegible] पुलहाश्रमं हरिक्षेत्रं प्रवव्राज जगाम ॥ ८ ॥

भा[illegible]

[illegible]रतजी [illegible] भगवान् ने सङ्कल्प से आज्ञा दी [illegible] जी के

[illegible] [illegible]किये

सुमति राष्ट्रभृत सुदर्शन आवरण धूम्रकेतु ये पुत्रोंके नाम हैं इस वर्षका नाम अजनाभ था भरतजीके पीछे भारतवर्ष इसका नाम होगया ॥ ३ ॥

वे सर्वज्ञ राजा पिता पितामह सरीके कृपा वाले होनेसे अपने अपने कर्ममें वर्तमान सब प्रजाओंको आपभी अपने धर्ममें वर्तमान होकर रक्षा करने लगे ॥ ४ ॥

यज्ञक्रतुरूप यज्ञपुरुष भगवान् को छोटे बड़े यज्ञों से यजन करते भये तिसमें श्रद्धा से किया जो अग्नि होत्र दर्श पौर्णमास चातुर्मास्य पशुसोम आदि यागों के प्रकृतिविकृत भेदोंसे चातुर्होत्र विधि तिस से सब काल मे यजन करते रहे ॥ ५ ॥

नाना प्रकारके ऐसे यागोंके होते सन्ते नानाप्रकार की अङ्गक्रिया का जो फल है तिसको यज्ञपुरुष परं ब्रह्म परदेवता भगवान् वासुदेव जो कि सब देवतों के नाम से विहित मन्त्रों के नियामक होने से साक्षात्कार करने वाले हैं तिनमें अर्पण करते भये इस आत्मज्ञानकी निपुणता से अन्तःकरण के मल निवृत्त होजाने से यजमान राजा ने ब्राह्मणों के हवि अर्पण करते समय यज्ञ भोक्ता सब देवों को परमात्मा के अङ्गोंमें ध्यान किया ॥ ६ ॥

इस प्रकार विशुद्ध कर्मोंसे अन्तःकरण के शुद्ध होजाने से भरतजीके हृदय मे आकाश शरीर वाले दहराकाश परब्रह्म भगवान् महापुरुषरूपसे उपलक्षित श्रीवत्स कौस्तुभ वनमाला चक्र शङ्ख गदादिकों से शोभित अपने पुरुष नारदादिकों के हृदयमें लिखित सरीके रहने के पुरुषरूप से वासुदेव भगवान् जब प्रकाशमान भये तब निलप्रति अतिशय वृद्धिको प्राप्त होने वाली भक्ति भगवान् मे उत्पन्न भई ॥ ७ ॥

इस प्रकार राज्य में अयुत हजारों वर्ष जब बीत गये तब भरतजी ने कर्म की समाप्तिका अवसर जान लिया तब अपना भोग राज्य को पुत्रोंको देकर पितृपितामहों का धन यथाभाग उनको देकर सम्पूर्ण सम्पत्ति वाले अपने घर में से स्वयं निकलकर शालग्राम क्षेत्र को गमन किया ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्र- क्षेत्रे विद्याधरकुण्डे वात्सल्यं कर्तृ तेन सन्निहितः क्रियते । भक्तानामपेक्षितेन रूपेण सन्निहितो भवतीत्यर्थः ॥ ९ ॥

इत्थं धृतभगवद्व्रत ऐणेयाजिनवाससाऽनुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च विरोचमानः सूर्यर्चा भगवन्तं हिरण्मयं पुरुषमुज्जिहाने सूर्यमण्डलेऽभ्युपतिष्ठन्नेतदुहोवाच ॥ १३ ॥

परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान सुरेतसाऽदः पुनराविश्य चष्टे हंसं गृध्राणं नृषद्रिङ्गिरामिमः ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्याम्
संहितायां वैयासिक्यामृषभदेवानुचरिते
सप्तमोऽध्यायः ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आश्रमस्थानान्युभयत उपर्यधश्च नाभिर्येषां तैर्दृषच्चक्रैः शिलामध्यगतैश्चक्रैश्चक्रनदी गण्डकी सरितां श्रेष्ठा पवित्रीकरोति ॥ १० ॥

एकल एकः आराधनं समीहमानः कुर्वाणः विविक्तः शुद्धः अतएवोपरतो विषयाभिलाषो यस्य । उपभृतः संवृद्ध उपशमो यस्य ॥ ११ ॥

प्रवर्धमानानुरागस्य भरेण यद्द्रुतं द्रवीभूतं हृदयं तस्मिन् शैथिल्यमनुद्यमो यस्य । आत्मनि देहे उद्भिद्यमानं रोमपुलककुलं रोमाञ्चवृन्दं यस्य । ककारः समासान्तः । औत्कण्ठ्यात्प्रवृत्तेन प्रणयवाष्पेण निरुद्धोऽवलोको ययोस्ते नयने यस्य सः एवं वर्तमानस्तामपि भगवत्सपर्यां न सस्मारेत्यन्वयः । तत्र हेतुः । निजरमणस्य श्रीनिवासस्य अरुणे चरणारविन्दे तयोरनुध्यानेन परिचितः समृद्धो भक्तियोगस्तेन परिप्लुतः सर्वतो व्याप्तः परमं आह्लादः परमानन्दो यस्मिन्गम्भीरहृदयह्रदे तस्मिन्नवगाढा निमग्ना धिषणा यस्य ॥ १२ ॥

धृतानि भगवद्व्रतानि येन स भगवन्तं सूर्यमण्डलेऽभ्युपतिष्ठन्नेतदुहोवाचेत्यन्वयः । कीदृशः । एणया हरिण्या अजिनमैणेयं तदेव वासस्तेनानुसवनाभिषेकेणार्द्राः कपिशाश्च याः कुटिला जटास्तासां कलापेन च विरोचमानः सूर्यप्रकाशिकया ऋचा हिरण्मयं "ध्येयः सदा सवितृमण्डलमध्यवर्ती" इत्यादिनोक्तम् उज्जिहाने उद्गच्छति सति । सकरान्तपाठे सप्तम्यन्तात्पचाद्यच् । अर्थस्तु स एव ॥ १३ ॥

परोरजः रजसः प्रकृतेः परं शुद्धसत्त्वात्मकं सवितुर्देवस्य सूर्यरूपेण भर्गः स्वरूपभूतं तेजः जातं वेदो धनं कर्मफलं यस्मात्तत्कर्मफलदमित्यर्थः । अत्र हेतुः । यन्मनसैवेदं विश्वं जजान ससर्ज पुनश्च अदः सृष्टं विश्वमन्तर्यामिरूपेण प्रविश्य गृध्राणं काङ्क्षन्तं हंसं जीवं सुरेतसा चिच्छक्त्या विचष्टे पश्यति पालयतीत्यर्थः । नृषु सीदत्युपाधितया तिष्ठतीति नृषत्तद्रिङ्क्ति रिङ्गि रिङ्गणां गतिं राति ददातीति नृषद्रिङ्गिराम् । "धा छन्दसि ॥ ६ । १ ॥ १०६ ॥ इत्यामिपूर्वरूपत्वाभावः तद्भर्गः इमः शरणं व्रजामः ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कोऽसौ पुलहाश्रमः यं प्रवव्राजेत्यत्राह । गद्यद्वयेन यत्र ह पुलहाश्रमे भगवान् हरिरधुनापि निजजनानां वात्सल्येन निजजनविषयकवात्सल्येन स्वेच्छापरिगृहीतरूपेण सन्निधाप्यते सन्निहितो भवतीत्यर्थः ॥ ९ ॥

यत्राश्रमस्थानान्युभतः उपर्यधश्च नाभिर्येषां तैर्दृषच्चक्रैः शिलामध्यगैश्चक्रैर्निमित्तभूतैश्चक्रनद्याख्या सरितां प्रवरा श्रेष्ठा सर्वतः पवित्रीकरोति १० ॥

तस्मिन् पुलहाश्रमोपवने एकलः असहायः नानाविधैः कुसुमादिभिः कन्दादिरूपैरुपहारैर्नैवेद्यैश्च भगवत आराधनं समीहमानः कुर्वाणः विविक्तः विशुद्धाहारः उपरतो निवृत्तो विषयेष्वभिलाषो यस्य अतएवोपभृतः समृद्धः उपशमः बाह्यान्तःकरणनिग्रहो यस्य सः निर्वृतिं प्रीतिरूपां 'परां भक्तिमवाप ॥ ११ ॥

एतदेव प्रपञ्चयति गद्येन । एवं तयोक्तविधया अविच्छिन्नपरमपुरुषपरिचर्यया सन्ततात्मनि भगवति निरतिशयकीर्तौ प्रवर्धमानो यः अनुरागः प्रेमा तस्य बलेन उत्कर्षेण यत् द्रुतं द्रवीभूतं हृदयं तेन शैथिल्यमनुद्यमो यस्य प्रहर्षवेगेनानन्दातिशयेनात्मनि देहे उद्भिद्यमाने रोमपुलककुलं रोमाञ्चवृन्दं यस्य समासान्तः ककारः औत्कण्ठ्येनातिवृत्तेन प्रणयानन्दवाष्पेण निरुद्धोऽवलोको ययोस्ते नयने यस्य सः (१) अभिरेमे उपररामेत्यर्थः एवं वर्तमानः तामपि स्वां भगवत्सपर्यां न सस्मार तत्र हेतुं वदन् विशिनष्टि । निजरमणस्य निरतिशयप्रीतिविषयस्य भगवतोऽरुणे चरणारविन्दे तयोरनुध्यानेनोपचितः समृद्धः यो भक्तियोगः कृत्स्नः शुभाश्रयः तेन परिप्लुतः सर्वतो व्याप्तः परमाह्लादः परमानन्दो यस्मिन् सः गम्भीरो हृदयह्रदस्तस्मिन्नेव गाढा निमग्ना धिषणा बुद्धिर्यस्य सः ॥ १२ ॥

एवं धृतानि भगवद्व्रतानि येन सः एणया हरिण्याश्चर्म ऐणेयं तदेव वासस्तेनानुसवनं समये अभिषेकेण स्नानेन आर्द्राः कपिशाश्च कुटिलाश्च या जटास्तासां समूहेन विरोचमानः सूर्यमण्डले उद्गच्छति स स्वयमुपतिष्ठन् सूर्यमण्डलस्थं हिरण्मयम् "एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी" इत्यादिवाक्यसिद्धं भगवन्तं सूर्यं वा सूर्यान्तर्वर्तिभगवत्प्रकाशिकया ऋचा [illegible]

(१) अभिरेमेइति मूलेपाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्र[illegible]

कुर्वन् भजन् अनुगुणप्रकारं ध्यायन्नित्यर्थः [illegible] मिदमुवाच ह ॥ ११ ॥

मन्त्रमुदाहरति । परोरज इति । सवितुः सर्वलोक[illegible]प्रसवना-नुत्पादनात् सविता "सर्वलोकप्रसवनात् सविता स तु कीर्तितः" इतिस्मृतेः' यद्वा षू प्रेरणे प्रबोधयिता सविता वा विष्णुरेव "विष्णोर्नामसहस्रं मे" इत्युपक्रम्य "सविता [illegible]" इति सवितृशब्दस्य भगवन्नामतयापठितत्वात् तस्य सवितुर्देवस्य विष्णोर्भर्गस्तेजोमयं रूपम् इमः "इण् गतौ" इत्यस्माल्लट् उत्तमबहुवचने रूपमेतत् शरणं गच्छेम इत्यर्थः भर्गो विशिनष्टि परोरजः रजसः परं लोकं लिवसन्तं लोकपरोऽत्र रजःशब्दः "लोका रजांस्युच्यन्ते" इति यास्कोक्तेः यद्वा रजः प्रकृतिमण्डलात् परं "ध्यायन्तमस्य रजसः पराके आदित्यवर्णं तमसः परस्तात्" इति श्रुतेः रजसः प्रकृतिमण्डलात्पराके परस्तात् वसन्तं निवसन्तमित्यर्थः जातवेदः जातं सततमाविर्भूतं वेदः ज्ञानं यस्य तत् नित्यासङ्कुचितज्ञानमित्यर्थः अत्र सवितुर्देवभर्गपदैर्गायत्री प्रत्यभिज्ञाता भवति तत्रापि यथोक्त एवार्थः देवस्य भर्गम् इम इति निर्देशः शिवापुत्रकस्य शरीरमितिवत् यः कीदृशोऽसौ देवः यस्य भर्गं इमस्तत्राह । मनसा संकल्पज्ञानेन चिदचिदात्मकमिदं जगज्जजान ससर्ज यश्चादः स्वसृष्टम् स्वरेतसा स्वस्य रेतः स्वशक्तिः स्वशरीरभूतेन जीवेनाविश्यानुप्रविश्य यद्वा इदं चिदचिदात्मकं जगत् स्वतेजसात्मीयसंकल्पेन ज्ञानेन प्रविश्य पूर्वं जीवान्तःप्रविष्टोऽपि पुनः करणात् प्रेरणानुकूलव्यापाराय स्वसंकल्परूपेण ज्ञानेनानुप्रविश्येत्यर्थः हंसं जीवं यश्चै पश्यति हंसं विशिनष्टि । गृध्रायां शब्दादिविषयकाङ्क्षायां वृषद्रिङ्किरां वृषीदति अवसादयति क्लेशयति संसारयति इति वृषद्बुद्धिस्तस्या रिङ्किः रिङ्कणं वृत्तिः "रिगि गतौ" इति धातुः बुद्धिवृत्तिरित्यर्थः तया दात्यावदाति कर्मफलानि भुङ्क्ते वृषद्रिङ्किरस्तं वृषद्रिङ्किरां छान्दसत्वात् । वा छन्दसि । इ/ पूर्वरूपत्वाभावे सवर्णदीर्घं इति वृषद्रिङ्किरं हंसमाचष्टे इतिपदैः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्यो अभिचाकशीति" इति श्रुतेः प्रत्यभिज्ञाता भवति तत्रापि यथोक्त एवार्थः ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीर-
राघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तमोऽध्यायः ॥७॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कीदृशमिच्छारूपमित्यतस्तत्राह यत्रेति । यत्रेति । यत्र चक्रनदी-नाम सरित्प्रवरा उभयतो शिलाभिरूर्ध्वाधश्चक्राङ्कितैश्चक्रैः शिलासमूहैः सर्वतः पवित्रीकरोतीत्यन्वयः ॥ १० ॥

स [illegible]तस्मिन्नुपाश्रमे वसं निर्वृतिमवापेत्यन्वयः उपरतः [illegible] यस्य स तथा ॥११॥ [illegible] संशयलक्षणां [illegible] रोमाङ्कुरसमूहः [illegible] प्रवाहधा-[illegible]या निजरमया-

भक्तवरस्यारविन्दयोरनुध्यानेनोपचितेन प्रवृद्धेन भक्तियोगेन परि-प्लुतपरमाह्लादभावं गम्भीरहृदयावगाढधिषणश्चेति स तथोक्तः गम्भीरहृदये विष्णावगाढा मग्ना धिषणा बुद्धिर्यस्य स तथा यद्वा परिप्लुतं परमाह्लादं गम्भीरहृदयं यस्य स तथा अत एव दूरावगाढा धिषणा यस्य स तथा ॥ १२ ॥

ऐणाजिनवाससा कृष्णाजिनाख्यवस्त्रेणानुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापेन च सूर्य इव विरोचमानः ॥ १३ ॥

एतन्मन्त्रार्थवाचकं पद्यमाह । परो इति । अथोशब्दवत्परोशब्दोऽव्ययं नाम रजसः प्रकृते परो परः उत्तमः निरन्तरजोगुणो वा सवितः जगतः कर्तः ज्ञानं सर्वं वेत्तीति ज्ञानवेदाः वेदः तस्य सम्बुद्धिर्जातवेदः वेदप्रतिपाद्यत्वाद्वेदस्य गर्भः वेदस्य तनय इत्यर्थः भगवानिदं जगज्जजान जनयामास किमुपकरणमत्राह । मनसेति । अनेन सवितृशब्दार्थो लक्षितः नियन्तृत्वमप्यस्यैवेत्याह । स्वरेतसेति । स्वरेतसा वीर्येणादः अमुमपि जगत्प्रविश्य स्थितः दुःखिजगत्सम्बन्धेन दुःखलेशोऽपि नास्तीत्याह । हंसमिति । सर्वस्य दुःखहन्तृत्वाद्धंसः तं त्वां ऋतम्भरं गृध्राणां जीवानामृषभं स्वामिनं गृधु अभिकाङ्क्षायाम् इतिधातुः जीवानां सर्वाकाङ्क्षा हि एवंविधं त्वां सङ्गृणीमः स्तुम इत्यन्वयः

परोरजा रजस्कत्वाद्वायीड्यत्वाद्वयीसुतः ।
गुणात्ययात्तुरीयश्च जातवेदाश्च सर्ववित् ॥
हंसो दुःखादिहानेन जीवेशत्वाच्च गृध्रराट् ।
कामःसर्वनियन्तृत्वात्परमात्मा प्रकीर्तितः इति ।

वचनात् उक्त एवार्थः परोरजा इत्यनेन ज्ञाताक्षरगायत्रीप्रतिपाद्यो नारायणो मन्त्रदेवतेत्युक्तं परोरजा रजस्कत्वादित्यत्रा-रजस्कत्वादिति पदच्छेदश्छान्दसत्वादुक्त इतिसन्तोष्टव्यम् ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नाभिव्यक्तं दशाशकैः शाखाग्रैः ॥ १०—१२ ॥

तं प्रेमविकारमपि भगवतोऽर्चायां विघ्नमेव मत्वा तदुपहानियोग्यं बुद्धिवृत्तिप्रेरकतया तदुपासनान्तरं कृतमित्याह । इ[illegible]मिति ॥ १३ ॥

तत्र गायत्रीसहोदरं मन्त्रमाह । परोरज इति ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वात्सल्येन कर्त्रा हरिः सन्निधाप्यते सन्निहितः क्रियते केन रूपेण तत्रस्थानां निजभक्तानामिच्छाविषयीभूतेन श्रीकृष्णारामाद्यन्यतमेन रूपेणेत्यर्थः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आश्रमस्थानानि पवित्रीकरोतीत्यन्वयः । उभयत उपयं-भश्च नाभिर्येषां तैर्दृशच्चक्रैः शिलामध्यगतैश्चक्रैरेव चक्रनदी गण्डकी ॥ १० ॥

उपभृतः संवृद्धः उपशमो यस्य सः ॥ ११ ॥

द्रुतं द्रवीभूतं यत् हृदयं तेनैव हेतुना शैथिल्यं नित्यकृत्येऽप्यनुद्यमो यस्य सः आत्मनि देहे उद्भिद्यमानै रोमभिः पुलककुलं यस्य सः कप् समासान्तः । परिप्लुतेन सर्वतो व्याप्तेन परमाह्लादामृतेन गम्भीरो यो हृदयह्रदस्तत्रावगाढा निमग्ना धिषणा बुद्धिर्यस्य सः ॥ १२ ॥

तमपि प्रेमविकारं पूजायां विघ्नमिव मत्वा प्रेमविकारेणापि मे बुद्धिर्नचल्यामियतामिति विमृश्य बुद्धिप्रकाशकेन केन च भगवन्मन्त्रेण भगवन्तमुपासितुं प्रवदते इत्याह । इत्थमिति । सूर्यस्थां सूर्यमण्डलस्थभगवत्प्रकाशिकया ऋचा हिरण्मयं "ध्येयः सदा सवितृमण्डलमध्यवर्त्ती" इत्यादिनोक्तम् उज्जिहाने उदयति सति उज्जिहास इति पाठे समन्तात् पश्चाच्च उदेतुमिच्छति सतीत्यर्थः ॥ १३ ॥

> सवितुर्देवस्य भर्गः तन्मण्डलमध्यस्थितम् ।
> ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
> नारायणः सरसिजासनसन्निविष्टः ॥

इत्यादि मन्त्रवाच्यं तेज इमः शरणं प्रजामः कीदृशं परोरजः रजसः प्रकृतेः परं विशुद्धसत्त्वात्मकं जातं वेदो धनं भक्तानामभीष्टं यतस्तत् यद्भर्गः कर्तृ मनसा सङ्कल्पमात्रेणैव इदं जगत् जजान जनयामास स्वरेतसा स्वीयचिच्छक्तितेजसा पुनरपि अदो जगत् आविश्य अन्तर्यामिरूपेण प्रविश्य गृध्रायां दुर्विषयसुखमभिकाङ्क्षन्तं मद्विधं हंसं जीवं चष्टे पश्यति कृपया पालयतीत्यर्थः केन प्रकारेणेत्यपेक्षायां स्वस्मिन् बुद्धिवृत्तिप्रेरणयैवेत्याह । नृषु सीदति उपाधितया तिष्ठतीति नृषत् बुद्धिस्तस्या रिङ्ग्निस्तस्मिन्नेव गतिं राति ददातीति तत् अतस्तद्विषयिणी मे बुद्धिः केनाप्यावृता माऽस्त्विति भावः । वा छन्दसि । इत्यभिपूर्वरूपत्वा--भावः ॥ १४ ॥

> इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
> पञ्चमे सप्तमोऽध्याय सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र पुलहाश्रमे वात्सल्यकर्तृत्वेन सन्निधाप्यते सन्निहितः क्रियते स्वेच्छारूपेण स्वभक्तेच्छानुसारिरूपेण ॥ ९ ॥

उभयतो नाभिर्येषां तैः दृषच्चक्रैः शिलामध्यगैश्चक्रैश्चक्रनदी गण्डकी यत्र क्षेत्रे आश्रमपदानि आश्रमस्थानानि सर्वतः पवित्रीकरोति ॥ १० ॥

समीहमानः सम्यक् कुर्वाणः ॥ ११ ॥

तया इत्थमविरतपुरुषपरिचर्यया निरन्तरभगवत्सेवया आत्मनि विश्वात्मनि भगवति प्रवृद्धमानानुरागभरेण द्रुते द्रवीभूते हृदये शैथिल्यं यस्य सः प्रहर्षवेगेन उद्भिद्यमानं रोमपुलककुलकं रोमाञ्चवृन्दं यस्य समासान्तः ककारः औत्कण्ठ्यप्रवृत्तेन प्रणय-[illegible]के नयने 'यस्य सः एवम्वर्तमानस्तामपि [illegible] तस्मादित्यन्वयः यतो निजरमणारुणचरणा-रविन्द[illegible] परिचितः समृद्धो यो भक्तियोगस्तेन परिप्लुत[illegible] परमाह्लादो यस्मिन् गम्भीरहृदयह्रदे तस्मिन्न-वगाढ[illegible]ा यस्य सः ॥ १२ ॥

[illegible]वद्भूतानि येन सः एतया हरिण्या अजिन-मेणेयं [illegible]न अनुसवनाभिषेकेण त्रिकालस्नानेन आर्द्रा [illegible]कुटिला जटास्तासां कलापेन च विरोचमानः उ[illegible]ति सूर्यमण्डले सूर्यान्तर्गतभगवत्प्रकाशिकया ऋचा [illegible] सदा सवितृमण्डलमध्यवर्ती नारायण" इत्यादि[illegible]ोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्य[illegible]प्रणखात्सर्व एव सुवर्णः" इत्यादिश्रुतिप्रसि[illegible] भगवन्तं सर्वधीप्रेरकं 'गायत्रीप्रतिपाद्यं श्री[illegible]तद्वक्ष्यमाणमुवाच ॥ १३ ॥

विश्वस्य [illegible] भगवान् वासुदेवस्तस्य भर्गो हिरण्मयं [illegible] प्रजामः कीदृशं परोरजः रजसः प्रकृतेः परम् "[illegible] तमसः परस्तात्" इति श्रुतेः अप्राकृतं हिरण्मयं [illegible] वेदो धनं कर्मफलं यस्मात्तं कीदृशस्य [illegible] विश्वं मनसा सङ्कल्पेनैव जजान ससर्ज यश्च [illegible] विश्वं स्वरेतसा स्वप्रभावेण प्रविश्य गृध्रायां काङ्[illegible] विचष्टे पश्यति पालयति तस्य कथम्भूतं भर्गः [illegible] सीदति करणत्वेन तिष्ठतीति नृषद्बुद्धिस्तस्याः [illegible] गतिं राति ददातीति नृषद्रिङ्गिराम् "वा छन्दसि [illegible]" इत्यभिपूर्वरूपत्वाभावः अयं श्लोकः गायत्र्यर्थप्रकाशक[illegible] ॥

> इति [illegible] महापुराणे पञ्चमस्कन्धे
> [illegible]सिद्धान्तप्रदीपे
> [illegible]ाः ॥ ७ ॥

[illegible]का

जिस क्षेत्र में अभीष्ट [illegible] उहांवाले अपने भक्तोंके वात्सल्य से इच्छा रूपसे [illegible] मूर्ति से रहते हैं ॥ ९ ॥

जहां पर चक्र नदी [illegible] नदी दोनों किनारोंके चक्राङ्कित शिला रूपों से [illegible] आश्रमों को पवित्र करती है ॥ १० ॥

उस पुलहाश्रम के उपवन [illegible]के पुष्प कोमल पत्र-तुलसी दल शीतल जलोंसे [illegible] की सामग्रीसे भगवान् का आराधन करते रहे तिस[illegible]से निवृत्त होजाने से दिव्य शान्ति प्राप्त होनेसे [illegible]को प्राप्त होगये ॥ ११ ॥

उस भक्ति से इस प्रकार [illegible] भगवत्सेवा के करने से भगवान् के विषय बढा हुआ जो [illegible] तिससे द्रवीभूत हृदय होनेसे हृदय उनका शिथिल होगया है आनन्द के वेग से देह में पुलकावली का समूह होता है उत्कण्ठासे प्रवृत्त जो प्रेम के आंसु तिनों से दृष्टि [illegible] की रुकगई है जिनकी इस प्रकार से अपने पति परमेश्वरके [illegible] कमल से [illegible] के ध्यान से बढा जो भक्तियोग तिससे [illegible] जो [illegible]

भाषाटीका

अत्यन्त गम्भीर हृदयरूपी हौद में जिनकी बुद्धि [illegible] गई है सब जिस पूजा को करते थे तिसको भी भूलगये ॥ १२ ॥

इस प्रकार से भगवान् के व्रत धारण करनेवाले भरतजी मृगचर्म के वस्त्र से सब काल में स्नान करसे गीले तथा पिङ्गल वर्णवाले टेढे जटों के समूह से शोभायमान होकर सूर्य-मण्डल के उदय के समय हिरण्मय पुरुष भगवान् को सूर्यकी ऋचा (गायत्री) से स्तुति करते [illegible] इस श्लोकको बोले ॥ १३ ॥

प्रकृति से परे वर्तमान वेदोक्त कर्मफलके उत्पन्न करने वाले जिनने संकल्पसे इस जगत्को पैदा किया है जोकि सृजे हुये इस संसार को अन्तर्यामी रूपसे प्रविष्ट होकर सुखकी कामना करने वाले इस जीवको देखते हैं तथा मनुष्यों में वर्तमान बुद्धि इन्द्रिय प्राणादिकों की गतिको प्रेरणा करते हैं तिन भगवान् सूर्यनारायण के तेजको हम ध्यान करते हैं ॥ १४ ॥

इति श्रीभागवत पञ्चमस्कन्ध सातमे अध्यायका
भाषानुवाद ब्रह्मणाचार्यकृत
समाप्त ॥ ७ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे सप्तमोऽध्यायः समाप्तः ॥ ७ ॥

अष्टमोऽध्याय

श्रीशुक उवाच

एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको [illegible] गृणानो मुहूर्तत्रयमुदकान्त उपविवेश ॥ १ ॥

तत्र तदा राजन्! हरिणी पिपासया जलाशया[illegible]म ॥ २ ॥

तया पेपीयमान उदके तावदेवाविदूरेण नदतो मृग[illegible] भयङ्कर उदपतत् ॥ ३ ॥

तमुपश्रुत्य सा मृगवधूः प्रकृतिविक्लवा चकितनिरीक्षणा सुतरामपि हरिभयाभिनिवेशव्यग्र-हृदया पारिप्लवदृष्टिरगततृषा भयात् सहसैवोच्चक्राम ॥ ४ ॥

तस्या उत्पतन्त्या अन्तर्वत्न्या उरुभयावगलितो योनिनिर्गतो [illegible] स्रोतसि निपपात ॥ ५ ॥

तत्प्रसवोत्सर्पणभयखेदातुरा स्वगणेन वियुज्यमाना कस्याञ्चिद्दर्यां कृष्णसारसती निपपाताथ च ममार ॥ ६ ॥

तं त्वेणकुणकं कृपणं स्रोतसाऽनूह्यमानमभिवीक्ष्यापविद्धं बन्धुरिवानुकम्पया राजर्षिर्भरत आदाय मृतमातरमित्याश्रमपदमनयत् ॥ ७ ॥

तस्य ह वा एणकुणक उच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेनात्मनियमाः सह यमाः पुरुषपरिचर्यादय एकैकशः कतिपयेनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अष्टमे भजतो विष्णुं तस्य कर्मान्तरायतः।
पयारण्यप्रसक्तस्य जातमेणत्वमीर्यते ॥ १ ॥
कृपयापि कृतः सङ्गः पतनायैव योगिनः।
इति प्रदर्शयन्नाह भरतस्यैणपोषणम् ॥ २ ॥

नैयमिकं नित्यनैमित्तिकविधिप्राप्तमावश्यकमर्थप्राप्तं मूत्रोत्सर्गादि कृतमभिषेकादिकं येन। ब्रह्माक्षरं प्रणवं जपन् उदकान्ते नद्यास्तीरे ॥ १ ॥

जलाशयाभ्याशं नद्याः समीपे ॥ २ ॥

पेपीयमाने अत्यासक्त्या पीयमाने सति। तावदेव तत्क्षणमेव अविदूरेण सन्निधौ मृगपतेः सिंहस्य उन्नादो महानाद उद्गतः ॥ ३ ॥

प्रकृत्या स्वभावत एव विक्लवा व्याकुला सुतरां तु हरिभयस्याभिनिवेशेन व्यग्रं व्याकुलं हृदयं यस्याः पारिप्लवदृष्टिः परिभ्रान्तनेत्रा न गता तृषा तृट् यस्याः उच्चक्राम नदीमुल्लङ्घितवती ॥ ४ ॥

अन्तर्वत्न्या गर्भिण्याः उरुभयेन स्थानाद्विचलितो योनेर्निर्गतः सन् स्रोतसि प्रवाहे निपतितः ॥ ५ ॥

तत्प्रसवो गर्भ[illegible]लङ्घनं भयं च एतैः खेदेनातुरा पीडिता दर्यां [illegible] हरिणवधूर्निपपात अथानन्तरं मृता च ॥ ६ ॥

एणकुणकं [illegible] बन्धुभिस्त्यक्तमित्येतैः कृपणत्वादिहेतुभिरनुकम्पया [illegible]नयत् ॥ ७ ॥

कृतो निजः स्वीय [illegible] पोषणं तृणादिना पालनं वृकादिभ्यो रक्षणं [illegible] प्रीणनं कण्डूयनादिना एतैर्यदनुध्यानमासक्ति[illegible]ः स्नानादयो यमा अहिंसादयस्तत्सहिता ईश्वर[illegible]प्रत्यहमेकैकशो वियुज्यमानाः सन्तः कतिपयैर[illegible]ता बभूवुः ॥ ८ ॥

श्रीमद्वीरराघवा[illegible]चन्द्रिका।

स भरत एकदा कस्मिंश्चि[illegible]नद्यां कृताभिषेकः कृतः अभिषेकः स्नानं नैयमिकं [illegible] नित्यनैमित्तिकं च येन स ब्रह्माक्षरं प्रणवं जप[illegible] मुहूर्त[illegible]वान् ॥ १ ॥

हे राजन्! तत्र तीरे तदा [illegible] पिपासया जलाश्या[illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तृषा हरिण्या उदके नितरां पेपीयमाने सति तस्मिन् समीप एव नदतो ध्वनिं कुर्वतो मृगपतेः सिंहस्य घोषश्च उन्नादो [illegible]निरुदपद्यत हरिण्या श्रुतोऽभवदित्यर्थः ॥ २ ॥ ३ ॥

तमुन्नादमुपश्रुत्याकर्ण्य सा मृगस्य वधूर्हरिणी प्र[illegible]भावेनैव विक्लवा व्याकुला सुतरां हरिभयस्य सिंहभयस्य [illegible]भिवेशेन व्यग्रं व्याकुलं हृदयं यस्याः सा अत एव पारिप्लव[illegible] दृष्टिरत एव चकितनिरीक्षया प्रतिहतानि[illegible]या अ[illegible] अपगता तृषा पिपासा यस्याः सा तथा भूतैव सहसा [illegible] उच्चक्राम नदीमुल्लङ्घितवती ॥ ४ ॥

[illegible] उत्पतन्त्या अन्तर्वत्न्याः पूर्णगर्भिण्यास्तस्या हरिण्या गर्भ उरु भयेन सिंहभयेनावगलितः स्वस्थानात्प्रच्युतो योनेर्निर्गतः स्रोतसि प्रवाहे निपपात पतितोऽभूदित्यर्थः ॥ ५ ॥

तत्प्रसवो गर्भपात उत्सर्पणमुल्लङ्घनं भयं [illegible]: खेद-स्तेनातुरा पीडिता स्वयूथेन वियुक्ता कृष्णसार[illegible] कृष्णमृगवधूः कस्यांचिद्दर्यां गिरिगुहायां निपपात अथ पतनानन्तरं ममार मृत-वती च ॥ ६ ॥

तत्स्रोतसा प्रवाहेणोह्यमानमेणकुणकमेण्याः स्यापत्यमभिवीक्ष्य राजर्षिर्भरतः मृता माता यस्य तं मृतमातरं बन्धुभिः स्वपित्रा-दिभिरपविद्धं परित्यक्तमित्यनुकम्पया [illegible] हस्ते गृहीत्वा स्वाश्रमस्थानमनयत्प्रापितवान् ॥ ७ ॥

एतस्मिन्नेणशिशौ कृतः निजाभिमान आत्मीयत्वाभिमानो येन तस्य भरतस्याहरहस्तस्यैणशिशोः [illegible]नुध्यानेन ध्यानेन तत्र पोषणमाहारेण पालनं व्याघ्रादिभ्यो रक्षणं प्रीणनं कण्डू-यनादि लालनं करस्पर्शनं चुम्बनादि एतैरनुध्यानैरासक्तिस्तेनान्त-रायेण भगवत्परिचर्यादयः आत्मनियमाः शौचाचारादयः सह यमाः अहिंसादिभिः सहिताः सर्वे एव यमाः प्रत्यहमेकैकशो वियु-ज्यमानाः सन्तः कतिपयेनाहर्गणेन उत्सन्ना बभूवुः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्वसङ्गतिमन्तरेणेतरसङ्गतिः संसारहेतुरिति एतन्निरूप्यतेऽस्मि-न्नध्याये तत्र भरतस्यैणशावक[illegible]प्रकारं कथयितुमुपक्रमते एकदेति । अभिषेकः स्नानमावश्यकं मूत्रपुरीषोत्सर्जनादि नैयमिकं नित्यकर्म अत्र क्रमस्त्वविवक्षितः एतावत्करोतीति क्रियमाण-मनुष्ठानं नैयमिकं सन्ध्यानुष्ठानमावश्यकमिति वा ब्रह्माक्षरं प्रणवः गायत्री वा अघमर्षणसूक्तं वा जलाशयाभ्याशं नदी-समीपं तावत्तदानीं मृगपतिः सिंहः ॥ १—३ ॥

प्रकृत्या स्वभावेन विक्लवा पारवश्योपेता अत एव चलित-निरीक्षणा चञ्चलावलोकना [illegible]भिनिवेशः भयोद्वेगः तेन व्यग्रं भ्रान्तं हृदयं यस्याः सा तथा "हरिण्याग्रे पञ्चमुखे भेके मूर्धसमीरयोः" इति [illegible] एव पारिप्लवदृष्टिः चञ्चलदृष्टिः तृषेति-[illegible] [illegible]पपात ॥ ४ ॥

[illegible] निर्गतः स्रोतसि [illegible]रिभयं च खेदश्च एते-[illegible] ॥ ५ ॥ ६ ॥

[illegible] एणकुणकं मृगबालकमपविद्धबन्धुं त्यक्तबन्धुजनं मृता माता [illegible] स तथा तम् ॥ ७ ॥

पोषणं तृणादिदानेन लालनमुत्सङ्गारोपणादिना अनुध्यानं क्षेमचिन्तनं पोषणाद्यनुचिन्तनं वा यमा अहिंसादयः पुरुषपरि-चर्यादयो विष्णुपूजादयः उदवसन् उत्सन्ना बभूवुः ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

योगारम्भणतो यमनियमादितः स्वारब्धकर्मणा अपराध-रूपेण योगभ्रष्टतापसो भगवदुपासकः ॥ १—३१ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अष्टमे भरतश्चक्रे मृगपालनलालने ।
तद्वियोगेन तच्चेताः प्राप तद्देहतामपि ॥
दयामपि त्यजेद्भक्तिबाधिनीमिति दर्शयन् ।
तं मृगं पोषयामास कृष्णभक्तिरिमाम्बुधिः ॥
अनुतापाम्बुधौ क्षिप्त्वा स्वप्रेमाब्धौ निमज्जयन् ।
तमेनं पोषयन् भक्तवात्सल्यं चाप्यदीदृशत् ।

नैयमिकं नित्यनियमप्राप्तमावश्यकं मूत्रोत्सर्गादिकमभिषेकस्ना-नं च कृतं येन सः अग्न्याहिताग्न्यादित्वात् त्वान्तमभिषेकशब्-दस्य पूर्वनिपातः । अक्षरमक्षरात्मकं ब्रह्म कृष्णमन्त्रम् । अभि-गृणानो जपन् ॥ १ ॥ २ ॥

पेपीयमाने अत्यासक्त्या पीयमाने मृगपतेः सिंहस्य ॥ ३ ॥

सहसा नादसमकालमेव भयात् त्रासात् । उच्चक्राम नद्या धारामुल्लङ्घ्य ॥ ४ ॥

अन्तर्वत्न्या गर्भवत्याः ॥ ५ ॥

उत्प्रसव उच्चक्रमणादेव गर्भपातः ॥ ६ ॥

एणकुणकं हरिणबालकम् । अपविद्धं बन्धुभिस्त्यक्तम् इति एतैः कुणकत्वादिहेतुभिर्या अनुकम्पा तया ॥ ७ ॥

पोषणं तृणादिना पालनं वृकादिभ्यः प्रीणनं कण्डूयना-दिना लालनं चुम्बनादिना एतैर्यदनुध्यानमासक्तिस्तेन । उदवसन् उत्सन्ना बभूवुः ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अष्टमे वैराग्यरत्नाप्रसक्त्या भरतस्यैणभावो वर्ण्यते । एक-देति । महानद्यां गण्डक्यां कृतमभिषेकादिकं येन सः तत्र अभि-षेकः स्नानं नैयमिकं नित्यनैमित्तिकाविधिप्राप्तमावश्यकं मूत्रोत्सर्गादि अक्षरं प्रणवं जपन् उपविवेश उपविष्ट-वान् ॥ १ ॥ २ ॥ ३ ॥

पारिप्लवदृष्टिः परिभ्रान्तदृष्टिः उच्चक्राम नदीमुल्लङ्घितवती ॥ ४ ॥

महद्भयेन प्रच्यवितः अत एव योनितो निर्गतः ॥ ५ ॥

तत्तदा प्रसवोत्सर्पणभयैः गर्भपतनमनधुल्लङ्घनसिंहभयैः खेदस्तेनातुरा व्याकुला पपात ममार च ॥ ६ ॥

अहो बतायं हरिणकुणकः कृपण ईश्वररथचरणप[illegible] स्वगणसुहृद्बन्धुभ्यः परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृ[illegible] [illegible]याय(१) नान्यं कञ्चन वेद मय्यति-विस्रब्धश्चात एव मया मत्परायणस्य पोषणपा[illegible] [illegible]सूयुनाऽनुष्ठेयं शरण्योपेक्षादोषविदुषा ॥ ९ ॥

नूनं ह्यार्याः साधव उपशमशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि गुरुतरानुपेक्षन्ते ॥ १० ॥

इति कृतानुषङ्ग आसनशयनाटनस्थानाशनादिषु सह [illegible] स्नेहानुबद्धहृदय आसीत् ॥ ११ ॥

कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणो [illegible]कादिभ्यो भयमाशंसमानो यदा सह हरिणकुणकेन वनं समाविशति ॥ १२ ॥

पथिषु च मुग्धभावेन तत्र तत्र विषक्तमतिप्र[illegible] [illegible]हृदयः [illegible]पात्स्कन्धेनोद्वहति एवमुत्सङ्ग उरसि चाधायोपलालयन् मुदं परमामवाप ॥ १३ ॥

क्रियायां निर्वर्त्यमानायामन्तरालेऽप्युत्थायोत्थाय यदैनमभिचक्षीत तर्हि वाव स वर्षपतिः प्रकृतिस्थेन मनसा तस्मा आशिष आशास्ते स्वस्ति स्ताद्वत्स ! ते सर्वत इति ॥ १४ ॥

अन्यदा भृशमुद्विग्नमना नष्टद्रविण इव कृपणः सकरुणमतितर्षेण हरिणकुणकविरहविह्वलहृदयसन्तापस्तमेवानुशोचन् किल कश्मलं महदभिरम्भित इति होवाच ॥ १५ ॥

अपि बत स वै कृपण एणबालको मृतहरिणीसुतोऽहो ममा[illegible] शठकिरातमतेरकृतसुकृतस्य कृतविस्रम्भ आत्मप्रत्ययेन तदविगणयन् सुजन इवागमिष्यति ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नं तु एणकुणकं मृगदारकमिति शब्दो हेतौ यतः मृतमातृकमत्यक्तं बन्धुः पित्रादिर्यथा भवति तद्वत् आदाय आश्रमस्थानमनयत् ॥ ७ ॥

एतस्मिन् एणकुणके कृतनिजाभिमानस्य तस्य भरतस्य अस्तस्य मृगदारकस्य तृणादिना पोषणेन व्याघ्रादिभ्यः पालनेन कण्डूयनादिना प्रीणनेन चुम्बनादिना लालनेन यदनुध्यानं पुनःपुनश्चिन्तनं तेन पुरुषपरिचर्यादयः आत्मनो नियमाः स्नानादयः सह यमाः अहिंसादियमसहिताः अहरहः प्रतिदिनमेकैकशो वियुज्यमानाः कतिपयेनाहर्गणेन सर्वे उदवसन् त्यक्ता [illegible]ः ॥ ८ ॥

भाषाटीका ।

श्रीशुकदेवजी बोले श्रीभरतजी एक दिन महानदी गण्डकी मे स्नानादि नित्यकर्म को करके ओंकार का जप करते तीन मुहूर्त तक जलके भीतर बैठ रह गये ॥ १ ॥

हे राजन् ! तहांपर तिसीसमय एक हरिणी प्यासी इकेली नदीके पास जलपीने को आई ॥ २ ॥

उसके जल पीते समय थोडे दूरमे गर्जन करते हुये सिंहका महा शब्द सुन पडा ॥ ३ ॥

उस शब्दको सुनते [illegible] स्वभावसे डरने वाली वह मृगी चकित होकर [illegible] [illegible] करके सिंहके भयसे जिसका हृदय कांप उठा है उसकी दृष्टि चंचल होगई है तो अबभी नहीं पीसकी शीघ्रही कूदगई ॥ ४ ॥

वह मृगी गर्भवती थी उसके कूदते समय बडे भयके मारे योनिके रस्ते निक[illegible] [illegible] नदी के प्रवाह मे गिरगया ॥ ५ ॥

उस गर्भके गिरने तथा [illegible] के भयसे दुःखित हुई अपने यूथसे छूटी वह मृगी [illegible] कन्दरा मे गिरपडी और मरगई ॥ ६ ॥

अतिदुःखित पडे हुये [illegible] प्रवाह मे बहते उस मृगके बच्चे को देखकर [illegible] [illegible] जानकर राजर्षि भरतजी बन्धु सरीके होकर [illegible] [illegible]की माता मरी जानकर उस बच्चेको आश्रममे ले आये ॥ ७ ॥

उस मृगके बच्चे में [illegible] [illegible] अभिमान करने से नित्यप्रति उस के पालन पोषण [illegible] प्रीणन ध्यानके करने मे यम नियम भगवत्पूजा [illegible] एक एक छूटते छूटते कुछ दिन में सबही छूटगये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आसक्तिं प्रपञ्चयति । अहो इत्यष्टभिः इति [illegible] [illegible] इतीत्यर्थः ईश्वररथचरणः कालचक्र [illegible] परि[illegible] [illegible] स्वगणादिभ्यो विप्रलोहितः मा इति [illegible] [illegible] [illegible]

(१) गोपायनंनान्यमिति श्रीवीरराघव श्रीविजयध्वजतीर्थयोः पाठः

श्रीधरस्वामिकृतभावार्थदीपिका ।

मातापित्रादिवियुक्तयोपेयाय प्राप्तः यौथिकात् यूथात् [illegible] । अनसूयुना एतन्निमित्तं मम स्वार्थो भ्रश्यतीति दोषदृष्टिमकुर्वता ॥ ९ ॥

तदेवाह । नूनं इति ॥ १० ॥

इत्थं कृतोऽनुषङ्ग आसक्तिर्येन । मृगजहुना मृगापत्येन सह स्नेहेनानुबद्धं हृदयं येन ॥ ११ ॥

स्नेहानुबन्धमेव प्रपञ्चयति । कुशकुसुमेत्यादिना अध्यायसमाप्त्यन्तेन । वृकशालावृकाः श्वानः यदा भयं शङ्कमानो भवति तदा तेन सह वनं समाविशति ॥ १२ ॥

अतिशयितः प्रणयभरो यस्य तत्हृदयं यस्य सः ॥ १३ ॥

क्रियायां देवपूजादिलक्षणायां वर्षपतिर्भरतः स्वस्ति हयेन स्वस्थेन स्तात् भूयात् ॥ १४ ॥

अन्यदादर्शने सकरुणं यथा भवत्येवमनुशोचन्निति ह्यावाचेत्यन्वयः । अतितर्षेणात्यौत्सुक्येन हरिणकुणकविरहेण विह्वले हृदये सन्तापो यस्य कश्मलं मोहं प्राप्तः [illegible] ॥ १५ ॥

अपीति सम्भावनायां बतेत्यनुकम्पायाम् अहो इति खेदे शठकिरातयोरिव वञ्चनपरा क्रूरा च मतिर्यस्याकृतसुकृतस्य निर्भाग्यस्य मम तच्छाठ्यादिकमगणयन्[illegible]यमागमिष्यति किम् अपराधाचिन्तने हेतुः आत्मप्रत्ययेन स्वा[illegible]शुद्ध्या कृतविश्वासः सन् सुजनो न यथा गणयति तद्वत् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागव[illegible]चन्द्रचन्द्रिका ।

तदासक्तिं प्रपञ्चयति । अहो इत्यादि[illegible] इति कृतानुषङ्ग इत्यन्तेन । अयं हरिणकुणकः ईश्वररथच[illegible] कालचक्रं तस्य परिभ्रमणवेगेन स्वगणादिभ्यो विवर्जित अत एव कृपणो दीनोऽयं मां शरणमासादितः प्राप्तश्च मामेव मातापित्रादिवियुक्त्या उपेयाय प्राप्तः यूथिकाः सङ्घातिनः मोपेक्ष्यैव मामेव गोपायनं गोप्तारमधिकं मन्वानः मत्तोऽन्यं कञ्चन गोप्तारं न वेद मय्येवातिविश्रब्धातितरां विश्वासयुक्ता मतिर्यस्य सः अतः कारणादेवं मत्परायणस्य मदेकशरणस्य हरिणकुणकस्य पोषणादिकम् एतन्निमित्तं मम स्वार्थो नश्यतीत्यसूयारहितेन मयावश्यमनुष्ठेयं हि यस्माच्छरणयोपेक्षा शरणागतानादरः विदुषां दोषः प्रत्यवायकरः यद्वा शरणं गन्तव्या शरण्या रक्षकत्वेन विश्वसनीयास्तेषामुपेक्षा शरणागतविषयेऽनादरः विदुषां दोष इति ॥ ९ ॥

अत एवार्याः साधवः परोपकारशीलाः उपशमस्वभावाः कृपणेषु सुहृदः सौहार्दवन्त एवंविधार्थं शरणागतरक्षणार्थं स्वार्थान् स्वप्रयोजनानि गुरुतरानपि उपेक्षन्ते गुरुतरानपि प्रयोजनमनादृत्यैवंविधशरणागतरक्षणं कुर्वन्ति नूनमित्थं कृतानुषङ्गः कृत अनुषङ्गः आसक्तिर्येन भरतः आसनाद्यवस्थासु तत्रासनमुपवेशनमटनं सञ्चरणमशनं भोजनं कन्दमूलादीनां मृगापत्येन सह स्नेहस्तेनानुबद्धं हृदयं येन तथाभूत

[illegible] ...त्यवशात्स्यन्तेन ...गति चषतान्नं ...माशङ्कमानः

वृकशालावृका अरण्यश्वानः हरिणकुणकेन सहैव वने प्रविशति पथि पथि च मृगशावेन सौकुमार्येण मौग्ध्येन वा विषमगमनिरासकर्मानर्हो गन्तुमसमर्थो भवति मन्दगतिर्वा मृगस्तत् तं प्रणयस्य स्नेहस्योत्कर्षो यस्मिन्नवधृतं यस्य तथाभूतो भरतः कार्पण्यान्मृगविश्लेषजः आसाद्य विष्णुत्वाद्यन्य तु स्कन्धेनाङ्कहृति स्कन्धयोरारोप्य गच्छति एवमासनसमये उत्सङ्गे शयनसमये उरसि चाधाय परमां मुदमवाप प्राप्तवान् ॥ ११ ॥ १२ ॥ १३ ॥

क्रियायां नित्यनैमित्तिकादिक्रियायां निर्वर्त्यमानायां क्रियमाणायां सत्यामन्तराले मध्ये क्षणे क्षणे उत्थायोत्थाय यर्हि मृगमभिचक्षीत पश्यति तर्हि वा तदा हि स वर्षपतिः भरतः प्रकृतिस्थेन मनसा तस्मै मृगाय आशिष आशास्ते आशीराशासनमेवाह । स्वस्तीति । हे वत्स ! ते तुभ्यं सर्वतः सर्वत्र देशे काले च स्वस्ति स्यादिति आशास्ते स्तादिति पाठे स्वस्त्येवार्थः ॥ १४ ॥

अन्यथा मृगस्यादर्शने तु सकरुणं यथा भवति तथा एवमनुशोचन्निति वक्ष्यमाणप्रकारेण प्रोवाचेत्यन्वयः कथम्भूत अनुशोचन्नष्टधन इव नितरां भीतमना अतितर्षेणौत्सुक्येन हरिणकुणकसेवाविरहेण विह्वले हृदये सन्तापो यस्य महत्कश्मलं मोहमभिलम्भितः प्रापितः ॥ १५ ॥

किमुवाच तदाह । अपीति । मम तदनार्यत्वादिकमविगणयन् कृतः विश्रम्भो येन तथाभूत एवात्मप्रत्ययेन स्वबुद्ध्या एव सुजन इवागमिष्यत्यपि आगच्छेत् किं क्षेमेण वृकादिभिरनुपहतं तत्र हेतुः दैवेन भगवता गुप्तं रक्षितं मदाश्रमसमीपवने शष्पाणि कोमलतृणानि चरन्तं भक्षयन्तमपि द्रक्ष्यामि ॥ १६ ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ईश्वररथचरणस्य कालचक्रस्य परिभ्रमणरंहसा गमनागमनवेगेन मा मां गोपायनं गोप्तारं रक्षितारं शरणं प्राप्तस्योपेक्षया महान् दोषो भवतीति दोषविदुषा ॥ ९ ॥

मृगपोषणादिना भगवदुपासनाभङ्ग इति तत्राह । नूनमिति ॥ १० ॥

इत्युक्तप्रकारेण कृतानुषङ्गः कृतस्नेहाभिनिवेशः मृगजहुना मृगबालकेन ॥ ११ ॥

आहरिष्यमाण आनयिष्यन् ॥ १२ ॥ १३ ॥

वर्षपतिः भरतखण्डनाथः प्रकृतिस्थेन स्वस्थेन ॥ १४ ॥

अन्यदा अदर्शने अतितर्षेण अत्युत्कण्ठया कश्मलं विषादम् अभिरम्भित आश्रितः ॥ १५ ॥

आत्मप्रत्ययेन स्वमनःशुद्ध्या तन्ममोदासीन्यमविगणय्य अविचिन्तयन् स्वजनः पुत्र इव ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आसक्तिं प्रपञ्चयति । अहो इत्यादिना इति कृतानुषङ्ग इत्यन्तपर्यन्तेन । ईश्वरस्य रथचरणः कालचक्रं तस्य परिभ्रमणरंहसा परिवर्जितः वियोजितः मा माम् अनसूयुना एतन्निमित्तं मम स्वार्थो

अपि क्षेमेणास्मिन्नाश्रमोपवने शष्पाणि चरन्तं देवगुप्तं द्रक्ष्यामि ॥ १७ ॥
अपि च न वृकः शालावृकोऽन्यतमो वा नैकचर एकचरो वा भक्षयति ॥ १८ ॥
निम्लोचति ह भगवान् सकलजगत्क्षेमोदयस्त्रय्यात्माद्यापि मम न मृगवधून्यास आगच्छति ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अद्रयतीति दोषदृष्टिमकुर्वता शरणयकर्तृकोपेक्षायां दोषं जानता ॥ ९ ॥

यत एव एव मे वस्तुतः स्वार्थं इत्याह । नूनमिति ॥ १० ॥

अनुषङ्ग आसक्तिः मृगजहुना मृगापत्येन ॥ ११ ॥

स्नेहानुबन्धमेव प्रपञ्चयति । कुशकुसुमेति । शाखा वृकाः कपि-कोष्टुश्वानः तद्भादिभ्यः ॥ १२ ॥

तत्र तत्र महाकर्दमोपरितले कोमलतृणादौ मुग्धभावेन कर्दममध्ये निमङ्क्ष्यामीति ज्ञानराहित्येन विषक्तमासक्तम् ॥ १३ ॥

क्रियायां भगवत्परिचर्यायामपि अन्तराले मध्येऽपि अभिक्षणं न जाने क गतो मे हरिणबालक इति उत्थाय पश्येत् प्रकृतिस्थेन तद्दर्शनानन्दप्राप्त्यर्थम् ॥ १४ ॥

अन्यदा देवाददर्शने सतीत्यर्थः । अतितर्षेण तद्दर्शनातितृष्णया कश्मलं मोहमभिरम्भितः प्रापितः ॥ १५ ॥

अपीति सम्भावनायां वर्तत्यनुकम्पायाम् अहो इति खेदोऽथे आश्चर्ये । अनार्यस्य तत्पालनपोषणादावसावधानत्वान्निर्दयस्यात एव शठकिरातयोरिव क्रूरा मति र्यस्य तत्र हेतुरकृतसुकृतस्य भाग्यहीनस्य मम तन्निर्दयत्वादिकमपराधमगणयन् आगमिष्यति किमपराधागणने हेतुः आत्मप्रत्ययेन आत्मवन्मन्यते जगदिति न्यायेन स्वस्य गुरुचित्तत्वान्मामपि शुद्धचित्तं प्रतियन्निव्यपि:। अत एव कृतविस्रम्भः अविश्वास्येऽपि मयि विश्वस्तः सन् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ईश्वरस्य रथचरणः कालचक्रं तस्य भ्रमणवेगेन मोपसादितः ॥ ९ ॥ १० ॥

कृतोऽनुषङ्गोऽनुरागो येन सः ॥ ११ ॥

शालावृकः श्वा ॥ १२ ॥

प्रति अतिशयितः प्रणयभरो यस्य तद्धृदयं यस्य सः ॥ १३ ॥

प्रकृतिस्थेन स्वभावस्थेन स्तात् स्यात् ॥ १४ ॥

अन्यदा तदर्शने सकरुणं यथा स्यात्तथा तमेवानुशोचन् महत्कश्मलं कृपणमभिरम्भितः प्राप्तः सन् इति वक्ष्यमाणमुवाच ॥ १५ ॥

शठकिरातयोरिव मन्दा निर्दया च मतिर्यस्य मम तदनार्यत्वमगणयन्नागमिष्यति किम् ॥ १६ ॥

भाषाटीका ।

भरतजी कहनेलगे अहो आश्चर्य है यह हरिणका बच्चा बड़ा दुःखी है भगवान् के कालचक्र के भ्रमण के वेगसे अपने अपने समूह सुहृत बन्धुओं से रहित होगया है तब मेरे को प्राप्त हुआ है मेरेही को माता पिता मानता है भ्राता ज्ञाति यूथ मुझे समझकर आया है और कोई को नहीं जानता है मेरे में बड़ा विश्वास करता है इसी से मेरे में तत्पर इसका पालन पोषण प्रीणन लालन इस के अवगुणों को न देखकर मेरे को करना चाहिये क्योंकि मैं शरणागत के उपेक्षा दोषको जानने वाला हूं ॥ ९ ॥

यह बात निश्चित है कि उत्तम साधु शान्तिशील दीनों के दयालु पुरुष इस प्रकार के कार्य में अपने भारी कार्यों को छोड़देते हैं ॥ १० ॥

इस प्रकार से भरतजी आसक्ति करके आसन शयन चलन बैठन समयोंपर मृगबालक के साथ स्नेह से बंधगये ॥ ११ ॥

जिसवखत कुशा पुष्प लकड़ी पत्ता फल मूल जल लाने को जाते थे तिस वखते भेड़िये गीदड़ व्याघ्रादिकों से भयमानकर अब आते तब हरिण के बच्चेको साथ मे लेजाते थे ॥ १२ ॥

रस्तामें मोलेपनेसे जहां तहां मृगका बच्चा तृणादिकों में आसक्त होता तब भरतजी बड़े प्रेमसे कृपाके मारे उसको कांधे में चढ़ालेते थे ऐसेही गोदमे छातीमें रखकर बड़े सन्तुष्ट होते थे ॥ १३ ॥

पूजादि क्रियाके समाप्तहोनेपर या मध्यमें ही उठकर जब उसको देखते थे तब के अर्थपति भरतजी निश्चल मनसे उस के वास्ते आशीर्वाद करते कहते कि हे वत्स ! तेरा सर्वत्र कल्याण होवे ॥ १४ ॥

जब किसी दिन मृग अभाव से वह चलागया तब अति दुःखित होगये धन के बरोबर अति अधैर्य से होगये बड़ी उत्कण्ठा होनेसे मृग के बच्चे के विरह से हृदय मे विह्वल होगये सन्ताप करने लगे महा मोह को प्राप्त होकर बोलने लगे ॥ १५ ॥

बोले वह दुखित मृगबालक मरी हुई हरिणी का बच्चा मेरेपर विश्वास करता था मैं क्षुद्र हूं शठ किरातकी बुद्धिवाला हूं मैंने पुण्य नहीं किये हैं तोभी वह मृगबालक हमारे अवगुणों को न गिनकर सुजन के माफिक आजायगा क्या ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शष्पाणि कोमलतृणानि ॥ १७ ॥

नैकचरो यूथचरः सूकरादिः । यद्वा । एक एव चरति यः क्रूरस्वभावो व्याघ्रादिर्न भक्षयति किम् ॥ १८ ॥

सकललोकस्य क्षेमो यस्मात्स उदयो यस्य वेदत्रयी आत्मा स्वरूपं यस्य सः सूर्यो निम्लोचत्यस्तं याति [illegible] निक्षेपभूतः ॥ १९ ॥

हरिण एव राजकुमार [illegible]

अपिस्विदकृतसुकृतमागत्य मां सुखयिष्यति हरिणराजकुमारो विविधरुचिरदर्शनीयनिजमृगदारकविनोदैरसन्तोषं स्वानामपनुदन् ॥ २० ॥

क्ष्वेलिकायां मां मृषासमाधिनाऽऽमीलितदृशं प्रेमसंरम्भेण चकितचकित आगत्य पृषदपरुषविषाणाग्रेण लुठति ॥ २१ ॥

आसादितहविषि बर्हिषि दूषिते मयोपालब्धो भीतभीतः सपद्युपरतरास(१) ऋषिकुमारवदवहितकरणकलाप आस्ते ॥ २२ ॥

किंवा अरे आचरितं तपस्तपस्विन्याऽनया यदियमवनिः सविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुर(२) पदपङ्क्तिभिर्द्रविणविधुरातुरस्य कृपणस्य मम द्रविणपदवीं सूचयन्त्यात्मानं च सर्वतः कृतकौतुकं द्विजानां स्वर्गापवर्गकामानां देवयजनं करोति ॥ २३ ॥

अपिस्विदसौ(३) भगवानुडुपतिरेनं मृगपतिभयान्मृतमातरं मृगबालकं स्वाश्रमपरिभ्रष्टमनुकम्पया कृपणजनवत्सलः परिपाति ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

न्वयः किं कुर्वन् विविधै रुचिरैर्दर्शनीयैर्निजैर्मृगदारकविनोदैः स्वीयानां खेदमपनुदन् ॥ २० ॥

सम्भवति चैतदित्याह । क्ष्वेलिकायां क्रीडायां मृषा यः समाधिस्तेनामीलिते दृशौ येन तं मां प्रेमसंरम्भेण प्रणयकोपेन पृषज्जलबिन्दुस्तद्वदपरुषेण मृदुना विषाणाग्रेण लुठति सङ्घट्टयति॥२१।

आसादितं हविर्यस्मिन्बर्हिषि दर्भे दन्ताकर्षणादिना चापलेन दूषिते सति । दूषितेति पाठे बर्हिषि विषये दूषणां कृत्वेत्यर्थः मयाऽधिक्षिप्तः संस्तत्क्षणमेवोपरतक्रीडो निभृत आस्ते ॥ २२ ॥

इति बहुधा प्रलप्योत्थाय बहिर्निर्गत्य तत्खुरखातभूभागोपलम्भसंभ्रान्तहृदय आह । किंवेति । अरे अहो अनया क्षित्या किंवा तप आचरितं तपस्विन्या सभाग्यया । यद्यस्मादियं सविनयस्य कृष्णसारतनयस्य तनुतराः सुभगाश्च शिवतमाश्चाखराश्च खुरा येषु तेषां पदानां तन्नताङ्कितानां पङ्क्तिभिर्द्रविणं मृगस्तेन रहितस्यात एवातुरस्य दुःखितस्य मम द्रविणमार्गं सूचयन्ती सती स्वात्मानं च ताभिः कृतमण्डनं द्विजानां देवयजनं यज्ञभूमिं करोति । "यस्मिन्देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत" इति स्मृतेः ॥ २३ ॥

तावदुदिते चन्द्रे मृगं दृष्ट्वा स्वमृगत्वं संभावयन्नाह । अपिस्विदिति ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वृकः शालावृको वा नैकचरो यूथचरो वराहादिरसहायचरो व्याघ्रादिर्वा अपि न भक्षयति सकललोकानां क्षेमो यस्मात्स उदयो यस्य त्रयी वेद आत्मा स्वरूपं यस्य सः सूर्यो भगवान् [illegible]स्तं गच्छति किंवाद्यापि मम मृगवध्न्यासः [illegible] मारः हरिणा- [illegible] स्यन्वयः किं कुर्वन् विविधैः रुचिरैर्दर्शनीयैर्मृगदारकविनोदैः स्वीयानां नः असन्तोषं खेदमपनुदन् ॥ १८—२० ॥

सम्भवति चैतदित्याह । क्ष्वेलिकायां खेन सह क्रीडायां मृषा यः समाधिस्तेनामीलिते दृशौ येन तं प्रेमसंरम्भेण प्रणयकोपेन पृषज्जलबिन्दुः तद्वदपरुषेण मृदुना विषाणाग्रेण चकितं चकितं पुनः पुनः प्रतिहतं यथा तथा आवृत्य परितो व्यावृत्य लुठति सङ्घट्टयति ॥ २१ ॥

आसादितं हविर्यस्मिन् बर्हिषि दर्भे दूषिते दन्ताकर्षणादिना चापलत्वेन दूषिते सति मयाधिक्षिप्तः सन् भीतः तत्क्षणमेव उपरतरासः निवृत्तक्रीडः अवहितः निश्चलीकृतः करणानामिन्द्रियाणां कलापो येन एवंभूतः ऋषेः कुमारवदास्ते ॥२२॥

इति बहुधा प्रलप्योत्थाय बहिर्निर्गतः सन् खुराघातभूभागोपलम्भसंभ्रान्तहृदय आह । किम्वेति । अरे अहो तपस्विन्या सम्भाव्यमानयाऽनया क्षित्या किं तप आचरितं यद्यस्मादियं क्षितिः सविनयस्य कृष्णसारतनयस्य तनुतराः सुभगाश्च शिवतमाश्च खराश्च कठिनाश्च खुराः येषु तेषां पातानां तन्नताङ्कितानां पङ्क्तिभिर्द्रविणं मृगस्तेन रहितस्यात एवातुरस्य दुःखितस्य मम द्रविणमार्गं सूचयन्ती सती स्वात्मानं च ताभिः पङ्क्तिभिः कृतमण्डनं स्वर्गापवर्गकामानां द्विजानां यज्ञभूमिं करोति "यस्मिन् देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत" इति स्मृतेः ॥ २३ ॥

उदिते चन्द्रे तस्मिन् मृगं दृष्ट्वा स्वमृगत्वं सम्भावयन्नाह । अपिस्विदिति । सिंहभयान्मृता माता यस्य तं स्वाश्रमात्परिभ्रष्टं मृगबालकं कृपणजनवत्सलोऽसौ भगवानुडुपतिश्चन्द्रः कृपयाऽपि स्वित्परिपाति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

क्षेमेण सुखेन ॥ १७ ॥

नैकचरः अष्टपान्मृगविशेषः ॥ १८ ॥

[illegible]। (२) पातपङ्क्तिभिरिति श्रीवीरराघवाचार्यपाठः । (३) भगवानुडुपतिरि[illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निम्लोचत्यस्तं गच्छति मृगवध्वन्यासः मृगीनिक्षेपलक्षणोऽर्थः ॥ १९ ॥

विविधाश्च रुचिराश्च दर्शनीयाश्च निजाः स्वजातिप्रयुक्ताश्च मृगदारकाणां मृगबालकानां ये विनोदा लीलाविशेषास्तैः ॥२०॥

क्ष्वेलिकया मृगजातिक्रियया नादविशेषक्रियया वा प्रेमसंरम्भेण स्नेहातिरेकेण प्रणयकोपेन वा सचकितं सभयं पृषतः कृष्णमृगः अपरुषविषाणाग्रेण कोमलशृङ्गमुखेन लुठति परिवर्तयति अभिमुखीकरोतीत्यर्थः उपहन्तीति वा "लुठ उपघात" इति धातुः लुण्ठतीति पाठे अनुष्ठानालस्यं करोति लुठि आलस्ये ॥ २१ ॥

आसादितं अवरोपितं हविर्यस्मिंस्तत्तथा तस्मिन्बर्हिषि भक्षणादिना दूषिते सति उपालब्धो भर्त्सित उपरतरभसः शान्ताभिनिवेशः अत एवावहितकरणकलापः संवृतसर्वेन्द्रियव्यापारसमूहः ॥ २२ ॥

अनया भूम्या तप आचरितं तत् किमिति शेषः सविनयस्य कृष्णसारतनयस्य तनुतरा अतिशयेनाणवश्च सुभगाः सुन्दराश्च शिवतमाः सुखतमाश्च खराः परुषाश्च खुरा ये तेषां पदानां निक्षेपचिह्नानां पङ्क्तिभिर्द्रविणविधुरस्यार्तस्य दुःखातुरस्य न केवलं ममोपकरोति किन्तु द्विजानामपीत्याह । आत्मानमिति । कृष्णसारतनयस्य पदपङ्क्तिभिः कृतकौतुकं कृतमङ्गलमात्मानं द्विजानां देवयजनं च करोति इदं प्रलप्योत्थाय बहिर्गत्यापश्यतो हि वचनं "यस्मिन् देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत" इति स्मृतिः ॥ २३ ॥

अधुनेन्दूदयेऽप्यनागतं दृष्ट्वा तत्प्रलापप्रकारमाह । अपिस्विदिति । उडुपश्चन्द्र एनं मृगबालकं परिपालयत्यपि स्विदित्यन्वयः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ईशेन कृपालुना मद्विष्टदेवेनैव रक्षितम् ॥ १७ ॥

नैकचरो यूथचरः सूकरादिः एक एव चरति यः क्रूरो व्याघ्रादिर्न भक्षयति किम् ॥ १८ ॥

निम्लोचति सम्प्रत्यस्तं याति सकलजगतामपि क्षेममुदयादेर्यस्य सः केवलं ममैव दुर्भगस्याक्षेममिति भावः । अयमात्मा वेदस्वरूपो वेदप्रवर्तको वा केवलमहमेव वेदोक्तदयाधर्मविमुख इति भावः । मृगवध्वा न्यासो निक्षेपभूतः ॥ १९ ॥

प्रेमाण्यं तद्गुणानुत्कीर्तयन् विलपति । अपिस्विदित्यादिना । सुखयति सुखयिष्यति ॥ २० ॥

क्ष्वेलिकायां क्रीडायां मृषासमाधिनेति रे मूढ ! त्वां पुष्यतो मे स्मरणार्कासेनादि नित्यकृत्यं न निर्वहतीति तत्त्वं मया त्यक्तो धर्मपुमितो याहीति मृषैवाकुश्य मृषासमाधिनेति तत्रोत्पतविरहाया: प्राबल्यात् प्रेमसंरम्भेण प्रणयकोपेन पृषत् जलविन्दुकमलरूपरूपेण मृदुना विषाणाग्रेण लुठति सङ्घट्टयति ॥ २१ ॥

आसादितं हविर्यस्मिन् तस्मिन् बर्हिषि दर्भे दन्तस्पर्शेन दूषिते सति दूषितेति पाठे बर्हिषि विषये दूषणां कृत्वा स्थितवतीत्यर्थः मयोपालब्धः सन् किमरे करोषीत्यधिक्षिप्तः उपरतक्रीडः अवहितकरणकलापः निश्चलीकृतसर्वेन्द्रियः ॥ २२ ॥

इति बहुधा प्रलप्योत्थाय बहिर्निर्गत्य तत् खुरजातभूभागोपलब्ध्या प्रेम्णारोपितेन तत्र माहात्म्येन स्वं साधितम् सम्बोध्य विलपति अरे मन्दभाग्य ! भरत ! वृथा तपस्विन् ! अनयावन्या किं तप आचरितं तत्तपस्त्वया न तप्तमिति भावः । यद्वा विशेषानुक्त्या अरे चतुर्दशलोका भूत रे भूत युष्मासु मध्ये अनयेति युष्माकमीदृशं तपो नास्तीति भावः । तनुतरे-त्यादिविशेषणैस्तन्माधुर्यास्वादः स्वस्य व्यञ्जितः । द्रविणपदवीं सूचयन्तीति भो दुःखिन् ! भरत ! किं रोदिषि अनयैव खुरक्षुण्णया पदव्या वनं प्रविशन्तं मृगबालकं स्वप्राणार्थनं प्राप्स्यसीति कृपया मा माश्वासयतीत्यर्थः । आत्मानं स्वं च ताभिः पदपङ्क्तिभिर्मण्डितत्वात् कृतकौतुकं देवयजनं यज्ञस्थलं करोति "यस्मिन्देशे मृगः कृष्णस्तस्मिन् धर्मान्निबोधत" इति स्मृतेः ॥ २३ ॥

ऊर्ध्वमवलोक्य तत्रोपलब्धे चन्द्रे स्वमृगं सम्भावयन्नाह । अपि स्विदिति । स्वाश्रमात् परिभ्रष्टमिति ममैव पापिष्ठस्यानवधानादिति भावः भगवानिति भगवत्त्वं विना ईदृशं भाग्यं न सम्भवेदिति भावः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शष्पाणि बालतृणानि ॥ १७ ॥

नैकचरः यूथचरः वराहादिः एकचरः व्याघ्रादिः ॥ १८ ॥

सकलजगतः क्षेमो यस्मात्स उदयो यस्य त्रय्यामूर्तिभिः स्तुत्यर्थं प्रोच्यमानायामात्मा मनो यस्य सः वेदत्रयी आत्मा मूर्तिर्वा यस्य स भगवान् सूर्यो निम्लोचति अस्तं याति मम मृगवध्वा न्यासः मृगभार्ययोपन्यस्तः ॥ १९ ॥

हरिणराजस्य कुमारः विविधरुचिरदर्शनीयैर्निजैर्मृगदारकविनोदैः स्वानामसन्तोषमपनुदन् आगत्य माम् अपिस्वित् सुखयति सुखयिष्यति ॥ २० ॥

क्ष्वेलिकायां बाललीलायां प्रेमसंरम्भेण प्रणयकोपेन चकितचकितः अतिक्षुभितः माम् आधूय पृषद्वत् जलविन्दुवत् अपरुषेण मृदुना विषाणाग्रेण लुठति सङ्घट्टयति ॥ २१ ॥

आसादितं निहितं हविर्यस्मिन् तस्मिन् बर्हिषि दर्भे कथंचिद्दूषिते सति मयोपालब्धः सन् सद्यएव उपरतरासः त्यक्तक्रीडः ॥ २२ ॥

तदन्वेषणे प्रवृत्तस्तत्खुराङ्कितां भूमिं दृष्ट्वाह । किञ्चेति । यत् यतः सविनयस्य कृष्णसारतनयस्य तनुतराः सुभगाश्च शिवतमाश्च अखराश्च खुरा येषां पदानां तत्र तत्राङ्कितानां पङ्क्तिभिः द्रविणेन धनभूतेन मृगेन रहितस्य अत एवातुरस्य मम द्रविणपदवीं सूचयन्ती स्वात्मानं च ताभिः कृतमङ्गलं द्विजानां यज्ञभूमिं करोति तथाच स्मृतिः "यस्मिन्देशे मृगः कृष्णः तस्मिन् धर्मान्निबोधत" इति ॥ २३ ॥

चन्द्रे मृगं दृष्ट्वाह । अपीति ॥ २४ ॥

किंवाऽऽत्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनीकं मामुपसृतमृगीतनयं शिशिरशान्तानुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिः स्वधयतीति च ॥ २५ ॥

एवमघटमानमनोरथाकुलहृदयो मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशितः स (१)योगतापसो भगवदाराधनलक्षणाच्च कथमितरथा जात्यन्तर एणकुणक आसङ्गः साक्षान्निःश्रेयसप्रतिपक्षतया प्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्य तस्यैवमन्तरायविहतयोगारम्भणस्य राजर्षेर्भरतस्य तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषङ्गेणाविगणयत आत्मानमहिरिवाखुबिलं दुरतिक्रमः कालः करालरभस आपद्यत ॥ २६ ॥

तदानीमपि पार्श्ववर्तिनमात्मजमिवानुशोचन्तमभिवीक्षमाणो मृग एवाभिनिवेशितमना विसृज्य लोकमिमं सह मृगेण कलेवरं मृतमनु न मृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप ॥ २७ ॥

तत्रापि ह वा आत्मनो मृगत्वकारणं भगवदाराधनसमीहानुभावेनानुस्मृत्य भृशमनुतप्यमान आह ॥ २८ ॥

भाषाटीका

क्या कल्याण से यहां आवेगा देवतोंने उसकी रक्षा की होगी मैं अपने आश्रमके वनके पास घास चरते हुये उस को देखूंगा ॥ १७ ॥

क्या उसको भेड़िया गिदड़ अथवा दूसरा कोई जनावर इकेला या सब के साथ मिलकर उस बच्चे को खाते न होंगे ॥ १८ ॥

सब संसार के कल्याण करने को उदय होनेवाले भगवान् सूर्यनारायण अस्त होते हैं अब तक भी मृगी का धरोहर सौं बच्चा नहीं आया है ॥ १९ ॥

अथवा मैंने जो बड़े सुकृत किये होंगे तो हरिणराजा का कुमार अपने जनों के दुःखको दूर करने को नाना प्रकार के मनोहर दर्शनीय अपने मृगबच्चा के मनोहर चेष्टाओंसे मेरेको सुखित करेगा ॥ २० ॥

जब कभी हम खेल करनेको झूंठी समाधि लगाकर नेत्र बन्दकरलेते थे तब वह बड़े प्रेमके विश्वास से चकितसा होकर आता था फिर जलबिन्दु सरीं के शीतल शीगों के अग्रभाग से मेरेको धीरे कुंचता था ॥ २१ ॥

जब जिन कुशोंपर हम हविको रखतेथे तिन कुशों को वह जूंठे करदेता था तब हम धमकाते थे तो डरतासराका होकर शीघ्रही खेलको छोड़कर सब इन्द्रियों की चेष्टा को छोड़कर ऋषिपुत्र सरीका हो रहता था ॥ २२ ॥

अहो इस तपस्विनी पृथिवी ने क्या तपस्या की है जो कि बड़े विनय वाले मृगबालक के अतिसूक्ष्म सुन्दर माङ्गलिक कोमल खुरों के चिन्ह की पंक्तियों से मृगरूपी धन- [illegible] जमाती हुई [illegible] कौतुकी करके [illegible]

[illegible] जिसकी [illegible] बालको देख

कर दुःखितों के दयालु होने से सिंहके भयसे इसबच्चे की रक्षा करेंगे क्या ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चन्द्ररश्मिस्पर्शसुखं प्राप्याह । किंवेति । सम्भावनायामात्मजविश्लेषेण ज्वरस्तापः स एव दवदहनस्तस्य ज्वालाभिरुपतप्यमाना हृदयरूपा स्थलनलिनी यस्य जलस्थ पद्मं तापं सोढुं क्षमामिति स्थलग्रहणमुपसृतोऽनुगतो मृगीतनयो येन तं मां चन्द्रः स्वधयति शान्तिं गमयति । कैः । शिशिरं च तच्छान्तं च मय्यनुरागेण गुणितं आवर्तितं पुनःपुनः स्वधयद्वदनसलिलं तदेवामृतमया गभस्तयस्तैः लोके हि मन्त्रवादिनो वदनसलिलेन तापं शमयन्तीति प्रसिद्धम । उपसृत्य मृगीतनय इति पाठे मनोरथान्तरमेतत् उपसृत्य मृगीतनयः किंवा मां स्वधयिष्यतीति । शेषं समानम ॥ २५ ॥

मृगदारकवदाभासमानेन भगवदाराधनलक्षणात्कर्मणश्च विभ्रंशितः प्रारब्धकर्मैव हेतुः । कथमितरथेति । साक्षान्निःश्रेयसप्रतिपक्षतया पूर्वं परित्यक्ता दुस्त्यजा औरसा येन । पुत्रस्तत्कथमासङ्गः स्यात् पूर्वं परित्यक्ता दुस्त्यजा औरसा येन । आत्मानमविगणयत अन्तरायेण विहतं योगारम्भणं यस्य । आत्मचिन्तामकुर्वतः तावदेव तीव्रवेगः कालो मृत्युरूपः समापद्यत ॥ २६ ॥

लोकं देहं मृगेण सहितं विसृज्य प्राकृत इव मृगशरीरमवाप । कथम्भूतः । कलेवरं मृतमनु न मृता न विनष्टा पूर्वजन्मानुस्मृतिर्यस्य ॥ २७ ॥

आह स्वचित्ते ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चन्द्ररश्मिस्पर्शसुखं प्राप्याह । किंवेति । सम्भावनायामात्मजविश्लेषेण मृगविवियोगेन योज्वरस्तापः स एव दहनः तस्य ज्वालाभिरुपतप्यमाना हृदयरूपा स्थलनलिनी यस्य तज्जलस्थ पद्मं तापं सोढुमक्षमामिति स्थलग्रहणं उपसृतोऽनुगतः मृगीतनयो

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

येन मां येऽयं चन्द्रः क्षपयति विश्रान्तिं विगमयति कैः शिशिरमच्छान्तं च मय्यनुरागेण गुणितं चावर्तितं च पुनः पुनः स्रवत् यत्सलिलं त एवामृतमया गभस्तयः किरणास्तैः लोके हि मान्त्रिका मुखसलिलैस्तापं शमयन्तीति प्रसिद्धम् उपसृतमृगीतनय इति पाठे मनोरथान्तरमेतत् उपसृतः प्राप्तो मृगीतनयः किं वा क्षपयतीति शेषं सर्वं समानम् ॥ २५ ॥

इत्युक्तरीत्या एवं शब्दोऽनुक्तमनोरथान्तरद्योतकः उक्ता अनुक्ताश्चाघटमानाः ये मनोरथास्तैराकृष्टं हृदयं यस्य स भरतः मृगदारकाभासेन मृगपुत्रव्याजेन प्रारब्धकर्मणामन्तरायभूतेन योगारम्भणतः ज्ञानयोगारम्भात्स्वयोगतपसः स्ववर्णाश्रमोचितकर्मयोगरूपात्तपसः भगवदाराधनलक्षणाद्भगवद्भक्तिरूपाच्च तपसः विभ्रंशितो विभ्रष्टोऽभूत् प्रारब्धकर्मत्वे हेतुः कथमितरथेति इतरथा प्रारब्धकर्ममूलत्वाभावे मृगदारकासक्तिः जात्यन्तरेण कुणके साक्षात् स्वपुत्र इव कथमासङ्गः स्यात् श्रेयसः प्रतिपन्नतया मुक्तिविरोधितया पूर्वं परित्यक्ताः दुस्त्यजाः हृदयाभिजाताः औरसा येन तस्यैव पुनरेवंविधेनान्तरायेण विहितो योगारम्भो यस्य तस्य राजर्षेर्भरतस्य मृगार्भकस्य पोषणादिनिमित्तेनानुषङ्गेणात्मानमभिगणयतः प्रमत्तस्य तावदेव करालरभसः तीव्रवेगः कालः मृत्युकालः दुरतिक्रमः अवर्जनीयः मूषकाविलं प्रत्यहिः सर्प इवापद्यत प्राप्तः ॥ २६ ॥

स भरतस्तदानीमपि मरणसमयेऽपि स्वपार्श्ववर्तिनं मृगमात्मजमिवानुशोचन्तमभिवीक्षमाण आत्मीयाभिमानेन पश्यन् मृगमिवासक्तमना इमं देहं मृगेण सह विसृज्य कलेवरमन्वनुमृत्य अमुना अविनष्टा पूर्वजन्मानुस्मृतिर्यस्य तथाभूतः इतरवत्प्राकृतवन्मृगशरीरमवाप ।

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।

तं तमेवैति कौन्तेय ! सदा तद्भावभावितः ॥

इत्युक्तरीत्या मृगमनुस्मरन्मृगत्वमेवावापेत्यर्थः ॥ २७ ॥

तत्र मृगजन्मन्यात्मनः मृगत्वनिमित्तं पौर्वभवभगवदाराधनानुष्ठानप्रभावेण मृगासङ्ग एवेत्यनुस्मृत्य नितरामनुतप्यमानः आह ॥ २८ ॥

(५ श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किञ्च रथिरथा चाटुकुर्वन्महां प्रयच्छत्यपिस्विदित्याह । एष इति । उपसृतश्चासौ मृगीतनयः उपसृत्य गभस्तिभिर्मां क्षपयति तद्यपि स्विदित्यन्वयः शिशिराणि शीतलानि च तानि मनुरागेण गुणितानि बहुलीकृतानि च तानि निजवदननिर्गतसलिलानि तान्येवामृतगभस्तयश्चन्द्रस्तद्यस्तैः किं विशिष्टं मामात्मज इवात्मजो मृगीतनयस्तस्य विश्लेषनिमित्तो यो ज्वरः सन्तापः स एव दवदहनः वनाग्निस्तस्य शिखाभिरुपतप्यमानं दह्यमानं हृदयस्थलनलिनं यस्य स तथा तम् ॥ २५ ॥

सङ्कल्पमाह । इतीति इत्याद्यलपन् । सः योगतापसो भरतो योगारम्भणतो भगवदाराधनलक्षणात्कर्मणश्च विभ्रंशितः परिमोचित इत्यन्वयः केन मृगदारकरूपेणात्मनन्ताद्भासत इति तेन स्वारब्धकर्मणा मनुष्यस्यैवमघटमानो मृगे मनोरथः स्नेहविशेषस्तेनाकुलं हृदयं यस्य स तथा इतरथा प्रारब्धकर्माभावे जात्यन्तरेऽसमजातिविलक्षणमृगजातावासङ्गः स्नेहः कथं स्यात् योगो ध्यानं तस्य भरतस्य कथम्भूतस्य साक्षात्श्रेयसस्य प्रतिपक्षतया विघ्नत्वेन हेतुना पूर्वपरित्यक्तास्त्यक्तुमशक्या हृदयाभिजाता औरसाः पुत्राः येन स तथा तस्य पूर्वं मृगपोतलालनाद्याकुलचेतसो भरतस्य मरणसमयावाप्तिमाह । तस्येति । अन्तरायेण विघ्नेन विहतं योगारम्भणं ध्यानोपक्रमो यस्य स तथा तस्य पोषणादिषु सतानुषङ्गेण निरन्तरस्नेहाभिनिवेशेनात्मानं श्रीहरिं स्वं वा विगणयतो चिन्तयतः करालो रभसो वेगो यस्य स तथा ॥ २६ ॥

इमं लोकं भरतोपाध्युपलक्षितशरीरं मृगेण सह वर्तमानं विसृज्य इतरमृगवन्मृगशरीरमवाप पूर्वकलेवरमनु तस्यानुकूलत्वेन स्मृता जन्मानुस्मृतिर्जातिस्मृतिर्येन स तथा पूर्वदेहतःकृतकर्मस्मृतिरित्यर्थः ॥ २७ ॥

भगवदाराधनस्य समीहानुष्ठानं तस्य सामर्थ्येन ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

चन्द्रकिरणानां दाहकत्वमनुभूयाहो मदात्मजविरहे शीतकिरणोऽप्ययमुष्णकिरणो भवति हन्त हन्त स किं मे समयो भविष्यति यत्र स मृगीतनयो भूयोऽपि मामुपैष्यति चन्द्रोऽप्ययं मां शिशिरयिष्यतीत्यभिलषन्नाह । किञ्चेति । उपसृतो मृगीतनयो यं तथाविधं मां चन्द्रोऽयं सुखयति विरहसन्तप्तस्याङ्गस्य सुधाप्लुतीकरणात् सुधावन्तं किं नु करिष्यतीति । "विभ्वनोर्लुक्" इति मतुपो लुका रूपं कैः शिशिरश्च तत् शान्तमनुष्णं च मय्यनुरागेण गुणितञ्च यद्वदनसलिलं पुनः पुनः स्रवत् तदेवामृतमया गभस्तयस्तैः । लोके हि मान्त्रिका यथा वदनसलिलैस्तापं शमयन्ति तथैवायमपीत्यर्थः उपसृतो मृगीतनय इति पाठे स एव मदङ्गेषु प्रेम्णा निजमुखस्पर्शेनेत्यर्थः ॥ २५ ॥

मृगदारकमाभासयति प्रकाशयति यस्तेन स्वारब्धकर्मणेति प्रारब्धं हि द्विविधं शोभनमशोभनञ्च तत्राद्यं भक्तप्रियेणापि भगवतीव्रार्जनवानन्यायेन स्वभक्तोत्कण्ठावर्धनविदग्धेन भगवतैव स्वेच्छयैव प्रारब्धतुल्यत्वात् प्रारब्धमुपपाद्यते यदुक्तौ भक्त्युद्रेक एव स्यात्तत् अजातपक्षरतीनामपि सम्भवेदेव । द्वितीयन्तु प्राचीनप्राकृतकर्ममयमेव । यदुदर्को विषयाभिनिवेश एव स्यात् अत्र तु शोभनेनारब्धेनेति साक्षात् सुशब्द एवोपन्यस्तः योगेन भक्तियोगेनैव हेतुना तापसः सर्वविषयत्यागरूपं तपः कुर्वाणः । अप्यर्थे चकारः । यद्यपि भक्तियोगो बहुविघ्नाकुलो न भवति तदपि भगवदिच्छया भगवदाराधनाद्विभ्रंशित इत्यर्थः ॥ २६ ॥

इतरथेति । भगवदिच्छामयं प्रारब्धं यदि न स्यादित्यर्थः । हृदयाभिजाताः स्वपुत्राः । यद्वा । मृगदारक एवाभासो यस्य तथाभूतेन स्वस्यारब्धकर्मणेति प्रारब्धकर्माभासेनेत्यर्थः १ यथा जीवन्मुक्तानामभिमानाभावेऽप्यभिमानाभासस्तथैव जातरतिभक्तानां प्रारब्धाभावेऽपि प्रारब्धाभासः । अथवा मृगदारकाभासेन निकृष्टमृगदारकेण विभ्रंशितः कीदृशेन शोभनमारब्धं कर्म यस्य तेन तस्य मृगदारकस्य सुखारब्धवशादेव भरतस्य पाक

अहो कष्टं भ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्तसङ्गस्य विविक्तपुण्यारण्यशरणस्यात्मवत आत्मनि सर्वेषामात्मनां भगवति वासुदेवे तदनुश्रवणमननसंकीर्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेन कालेन समावेशितं समाहितं कार्त्स्न्येन मनस्तत्तु पुनर्ममाबुधस्यारान्मृगसुतमनु परिसुस्राव ॥२९॥

इत्येवं निगूढनिर्वेदो विसृज्य मृगीं मातरं पुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितं शालग्रामं पुलस्त्यपुलहाश्रमं कालञ्जरात्प्रत्याजगाम ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इतरथा यदि मृगस्य सुखप्रारब्धं न स्यात्तदा तस्यापि तत्र पिपालयिषा न स्यादित्यर्थः । भरतस्य विभ्रंशस्तु "यथाधनो लब्धधने विनष्टे तच्चिन्तयान्याभिभूतो न वेद" इति भगवदुक्तन्यायेन मृगजन्मनि ब्राह्मणजन्मनि च भक्त्युत्कण्ठा वर्द्धनार्थो भगवतैव निर्मितः । आत्मानमविगणयतः । आत्मचिन्तामकुर्वतः आखुबिलमहिरिव तं भरतं कालो मृत्युः अनुशोचन्तं मृगं लोकं देहं मृगेण सहितं विसृज्य मृगशरीरमवाप । कलेवरं मृतमनु न मृता न विनष्टा पूर्वजन्मानुस्मृतिर्यस्य सः इतरवदितरः प्राकृतः कर्मी तद्वदिति । भरतस्तु कर्मातीत इत्यत एव तस्य प्रारब्धाभावः प्राक् समर्थितः ॥ २७ ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

किम्वा उडुपतिः आत्मजः मम पुत्रो मृगस्तद्विश्लेषेण वियोगेन यो ज्वरस्तापः स एव दवदहनो दवाग्निस्तस्य ज्वालाभिरुपतप्यमाना हृदयाम्बिका स्थलनलिनी यस्य तमुपसृतः अभिवृद्धः मृगीसुतो येन तं शिशिरं शीतलं च तच्छान्तमुखेनाहं च मय्यनुरागेण गुणितं निरन्तरं प्रवर्तितं यद्वदनसलिलं तदेवामृतमया गभस्तयः किरणास्तैः मां स्वधयति शान्तिं गमयति ॥ २५ ॥

स भरतः एवम्भूतैरघटमानैर्मनोरथैराकुलं हृदयं यस्य सः योगतापसः योगौ ज्ञानयोगभक्तियोगौ तल्लाभार्थं यत्तपः तीर्थवासभूशयनफलाहारदेहशोषणादिरूपं तद्विशिष्टः मृगदारकाभासेन मृगबालकवदाभासमानेन प्रारब्धकर्मणा योगारम्भणतः योगयोः ज्ञानयोगभक्तियोगयोः आरम्भणतस्तदुपक्रमणाभूतात्तपसः भगवदाराधनलक्षणात् तदर्चनवन्दनरूपात्साधनभक्तियोगाच्च विभ्रंशितः इतरथा मृगदारकव्याजेन प्रारब्धकर्मणा स्वधर्मनिष्ठाभ्रंशानङ्गीकारे प्राक्परित्यक्ता दुस्त्यजा हृदयाभिजाताः येन तस्य राजर्षेः साक्षात् पुत्रवत् जात्यन्तरे एणकुणके श्रेयसो मोक्षस्य प्रतिपक्षतया विरोधित्वेन आसङ्गः आसक्तिः कथं घटेतेति शेषः एवमुक्तप्रकारेणान्तरायेण विहतं योगारम्भणं यस्य तस्य राजर्षेः मृगार्भकपोषणाद्यनुषङ्गेण आत्मानमविगणयतः आत्मनः कृतार्थताचिन्तामकुर्वतः तावदेव दुरतिक्रमो दुर्लङ्घ्यः करालरभसतीव्रवेगः कालः मृत्युसमयमापद्यत ॥ २६ ॥

[illegible] पार्श्ववर्तिनं [illegible] लोकं [illegible] दर्शयन्न [illegible] मृगेणानेनेति देहं [illegible] मनोनिवेशितं [illegible] मृगशरीरमवाप । [illegible] म ! [illegible] इति

श्रीमुखवचनात् किन्तु भगवदाराधनप्रभावात् कलेवरं मृतमनु न मृता न विलुप्ता पूर्वजन्मानुस्मृतिर्यस्य सः ॥ २७ ॥

आह स्वचित्ते एव ॥ २८ ॥

भाषाटीका ।

अथवा पुत्रके वियोगसे जो ज्वर वनके अग्नी सरीका तिसकी शिखाओं से तपायमान है हृदयरूपस्थल कमल जिसका तथा आश्रय किया है मृगीके तनयको जिसने तिस मेरेको शीतल शान्त अनुराग युक्त निज मुखके अमृत रूप किरणों से मेरे को अमृत से चन्द्रमा तृप्त करेगा क्या ॥ २५ ॥

इस प्रकार से मनके सन्तुष्ट न होने से हृदय आकुल होगया फिर मृगपुत्रके स्वरूप वाले प्रारब्ध कर्मसे योगारम्भसे भ्रष्ट होगये योगयुक्त तापस वे भरतजी भगवान् के आराधनसे भ्रष्ट होगये यदि प्रारब्धमे न होता तो मोक्षके विरोधि जानकर जिनने पहिले निज पुत्रों को छोड़ दिये थे तिनको दूसरे जातके मृगबालक मे क्यों आसक्ति होती तब इस प्रकार से उन राजर्षि भरतजी के विघ्नसे योगारम्भ भ्रष्ट होने से मृगके बालक के पोषण पालन प्रीणन लालन की आसक्ति से आत्माको न गिननेसे जैसे मूसेके बिलमे सर्प आजावे तैसे बड़े विकराल वेगवाला काल जिसको कि कोइ अति क्रमण नहि कर सकता है सो आगया ॥ २६ ॥

तिस समयपर भी पास में बैठकर शोचते हुये पुत्रसरीके उस मृगबालक को देखते हुये भरतजी मृगही में मन को प्रवेश करने से मृग के साथ इस शरीर को छोड़कर शरीर के छूटने से भी स्मृति के न छूटने से भगवद्विमुख सरीके मृगसरीर को प्राप्त होगये ॥ २७ ॥

तिस मृगजन्म में भी पहिले भगवान् की आराधना के प्रभाव से अपने मृगजन्म के कारण को स्मरण करके बड़ा अनुताप करते हुये यह वचन बोले ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अहो कष्टं धीराणां मार्गाद्भ्रष्टोऽहम् भ्रंशमेवाह । यद्यतो विमुक्ताः समस्ताः सङ्गा येन विविक्तं पुण्यारण्यं शरणं यस्य आत्मवतो धीरस्य मम मनः सर्वेषां भूतानामात्मनि वासुदेवे समावेशितं समाहितं च निश्चलं तदाराद्दूरादेव सुस्राव गलितं निःसृतम् । केन समावेशितम् । तस्यानुश्रवणादिरूपाभियोगेनाभिनिवेशेनाशून्याः सकला यामा यस्मिंस्तेन कालेन ॥२९॥

निगूढोऽनाविष्कृतो निर्वेदो येन शालवृक्षोपलक्षितं ग्रामम् कालञ्जराद्यत्र हरिणो जातस्तस्मात्पर्वतात् ॥ ३० ॥

तस्मिन्नपि कालं प्रतीक्षमाणः सङ्गाच्च भृशमुद्विग्न आत्मसहचरः शुष्कपर्णतृणवीरुधा वर्तमानो मृगत्वनिमित्तावसानमेव गणयन्मृगशरीरं तीर्थोदकक्लिन्नमुत्ससर्ज ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
पारमहंस्यां संहितायां वैयासिक्याम्
भरतचरिते अष्टमोऽध्यायः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मैव सहचरो यस्य एकाकी प्रतीक्षमाणस्यैव प्रपञ्चः मृगत्वनिमित्तेति । तीर्थोदकेन क्लिन्नमार्द्रमर्थोदकस्थमित्यर्थः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवाह । अहो इति । आत्मविदां ज्ञानिनामनुपथान्मार्गानुसरणा- दहं भ्रष्टः अहो कष्टमिति खेदं प्राप्तस्तमेवाह । यद्यस्मात्त्यक्ताः समस्ता देहतदनुबन्धिसङ्गा येन विविक्तं निर्जनं पुण्यारण्यं तदेव शरणं गृहं यस्य आत्मवतः जितेन्द्रियस्य मम सर्वेषां भूतानामन्तरा- त्मभूते भगवति वासुदेवे तस्य भगवतः अनुश्रवणाद्यभिनिवेशे- नाशून्याः सफला यामा यस्मिंस्तेन कालेन सम्यगावेशितं कार्त्स्न्येन सर्वविषयेभ्यः समाहितं प्रत्याहृतं यन्मनस्तदेव पुनरधुना रागा- न्मृगसङ्गादबुधस्य मम मृगसुतमनुसृत्य परितः कार्त्स्न्येन योगात् सुस्राव भ्रंशितम् ॥ २९ ॥

इत्येवं निगूढः अनाविष्कृतो निर्वेदो येन सः मातरं मृगीं हरिणीं विसृज्य उपशमशीलानां दयितं प्रियं भगवदभिव्यक्ति- स्थानं शालग्रामाख्यं पुलहाश्रमं प्रति कालंजराख्यात्स्वोत्पत्तिस्था- नात्पर्वतादाजगाम ॥ ३० ॥

तस्मिन्पुलहाश्रमे आत्मैव सहचरः सहायो यस्य एकाकी स्वल्पं कालं मृगदेहावसानकालं प्रतीक्षमाणः सङ्गात्क- स्यचिदपि सङ्गान्नितरां भीतः शुष्कपर्णादिना आहारेण वर्त- मानः कालं नयन्नात्मनो मृगत्वनिमित्तस्य प्रारब्धस्यावसान- (?) गणयन् तीर्थोदके क्लिन्नमार्द्रम् मग्नोदकस्थितं मृगशरीर- मुत्ससर्ज तत्याज ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीर-
राघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किमाह । अहो इति । किं कष्टं तत्राह । भ्रष्ट इति । आत्मव- तामनुपथात् आत्मा स्वामी ममास्तीति भावयन्त आत्मवन्तः पर- मात्मज्ञानिन इत्यर्थः तेषां समूहः आत्मवता जनताशब्दवत्त- स्यानुपथादनुगमनलक्षणमार्गात् आत्मास्यास्तीत्यात्मवान् तस्य भावः आत्मवत्ता तस्यानुपथादनुसरणात् "पथ गतौ" इति धातोः भ्रष्टः आलस्यं मुक्तवान् पतितः कुत एतादिति तत्राह । यदिति । सर्वेषामात्मनां चेतनानामात्मनि अन्तर्यामिणि वासुदेवे भगवति कार्त्स्न्येन कालेन समावेशितं समाहितं सन्निधाय स्थिरीकृतं यन्मम मनः पुनस्तदेव मम मनः रागान्मृगसुतमनुस्रुत्यानुस्रुत- मभूदित्यन्वयः तस्मादिति शेषः विविक्तं च तत्पुण्यसाधनं च तत् अरण्यं विविक्तपुण्यारण्यं तदेव शरणं यस्य सः तथा तस्या- त्मवतो बुद्धिमतः कथं कार्त्स्न्येनेति विशेषणं सङ्गच्छते अ- न्यार्थमन्यप्रसङ्गसम्भवादिति तत्राह । तदिति । तस्य वासुदेवस्यानु- श्रवणादिषु योऽभियोग आग्रहलक्षणः प्रयत्नस्तेनाशून्या अवि- नाभूताः सफलाः सफला यामाः यस्मिन्सः तथा तेन ॥ २९ ॥

निगूढनिर्वेदोऽन्तर्गतवैराग्यः दयितं प्रियं कालंजराद्रिरेः ॥ ३० ॥

आत्मसहचर एकाकी मृगत्वनिमित्तस्य दुष्कर्मणः प्रारब्ध- स्यावसानं नाशमेव गणयंश्चिन्तयन्संख्यां कुर्वन्निति वा क्लिन्न- मार्द्रमिति ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मवतो धीरस्य आत्मनां जीवानामात्मनि परमात्मनि तदनुश्रवणादीनामभियोगोऽभिग्रहणं तेन समाहितं निश्चलं यन्म- नस्तत् सुस्राव अधः पपात ॥ २९ ॥

कालञ्जरात् स्वजन्मभूमिपर्वतात् शालग्रामं शालग्रामाख्यं क्षेत्रम् ॥ ३०--३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमस्याष्टमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनुपथात् योगमार्गात् अहो कष्टमहं भ्रष्टः तत्प्रपञ्चयति । यदिति । यद्यतः विमुक्ताः समस्ताः सङ्गा येन तस्य निर्विक्तं ग्राम्यजनशून्यं पुण्यारण्यं तदेव शरणं गृहं यस्य आत्मा परमात्मोपास्यत्वेन विद्यते यस्य तस्य मम मनः सर्वेषां चित्पदार्थानामात्मनि सर्वात्मनि वासुदेवे समावेशितं निश्चलं च सत् आराद्दूरादेव सुस्राव पपात ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

यान्निःसृतं भवति केन समावेशितं तस्य वासुदेवस्य अनुश्रवणा-दध्याभियोगोऽभिनिवेशस्तेन अशून्याः सकला यामा यस्मिन् तेन कालेन ॥ २९ ॥

इत्येवं नितरां गूढो गुप्तो निर्वेदो यस्य सः कालंजरात् स्वोत्पत्तिस्थानात् गिरेः शालग्रामाख्यं भगवत्क्षेत्रं पुनराजगाम ॥ ३० ॥

तस्मिन् भगवत्क्षेत्रे आत्मैव सहचरो यस्य सः कालं मृगदेहभोगकालं प्रतीक्षमाणः तदेव विवृणोति । मृगत्वनिमित्तावसानं गणयन्निति तदवसाने तीर्थोदकेन क्लिन्नमार्द्रं तीर्थोदके स्नानं कुर्वन्नित्यर्थः मृगशरीरमुत्ससर्ज ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टमाध्यायार्थप्रकाशः ॥ ८ ॥

भाषाटीका।

अहो बडी खेदकी बात है जो कि मैं आत्मज्ञानियों के मार्ग से भ्रष्ट होगया मैंने सबकी आसक्ति छोडिदी थी एकान्त पुण्यवनमें वास करता था आत्मज्ञानी था सब आत्माओं के आत्मा भगवान् वासुदेव में उनके श्रवण मनन कीर्तन आराधन अनुस्मरण के अभि निवेश से किसी वक्त खाली न रखने से सब-प्रकार से समर्पित जो मेरे मूर्खका मन फिर भी शीघ्रही मृगसुतके पीछे नष्ट होगया ॥ २९ ॥

इस प्रकार से अत्यन्त वैराग्य होने से माता मृगीको छोडकर शान्त शीलवाले मुनिगणों का प्रिय भगवत् क्षेत्र पुलह पुलस्त्याश्रम शालग्राम क्षेत्रको कालंजर पर्वत से मृग भरतजी चले गये ॥ ३० ॥

तिस क्षेत्रमें भी सङ्गसे अति उद्वेग को प्राप्त होकर केवल आत्माके साथी होकर कालकी प्रतीक्षा करके सूखे पत्ते घास लता दूनों से वृत्ति करके मृग पने के समाप्ति को गिनते हुये तीर्थों के जलमें भीजे हुये मृगशरीर को त्याग दिया ॥ ३१ ॥

इति श्रीभागवत पञ्चमस्कन्ध अष्टमाध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे अष्टमोऽध्यायः समाप्तः ॥ ८ ॥

नवमोऽध्यायः ।

श्रीशुक उवाच ।

अथ कस्यचिद्द्विजवरस्याङ्गिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसन्तोषतितिक्षाप्रश्रयविद्याऽनसूयात्मज्ञानानन्दयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा नव सोदर्या अङ्गजा बभूवुर्मिथुनं च यवीयस्यां भार्यायाम् ॥ १ ॥

यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरं भरतमुत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतमाहुः ॥ २ ॥

तत्रापि स्वजनसङ्गाच्च भृशमुद्विजमानो भगवतः कर्मबन्धविध्वंसनश्रवणस्मरणगुणविवरणचरणारविन्दयुगलं मनसा विदधदात्मनः प्रतिघातमाशङ्कमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडान्धबधिरस्वरूपेण दर्शयामास लोकस्य ॥ ३ ॥

तस्यापि ह वा आत्मजस्य विप्रः पुत्रस्नेहानुबद्धमना आसमावर्तनात्संस्कारान् यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन्कर्मनियमाननभिप्रेतानपि समशिक्षयत् अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेति ॥ ४ ॥

स चापि तदु ह पितृसन्निधावेवासध्रीचीनमिव स्म करोति छन्दांस्यध्यापयिष्यन् सह व्याहृतिभिः सप्रणवशिरस्त्रिपदीं सावित्रीं ग्रैष्मवासन्तिकान् मासानधीयानमप्यसमवेतरूपं ग्राहयामास ॥ ५ ॥

एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपि समनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः ॥ ६ ॥

अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात् ॥ ७ ॥

पितर्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्यवसितमतयो न परविद्यायाम् जडमतिरिति भ्रातुरनुशासननिर्बन्धान्न्यवृत्सन्त ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमे जडविप्रत्वं तस्य रागाद्यभावतः ।
भद्रकालीपशुत्वेऽपि निर्विकारत्वमीर्यते ॥ १ ॥
पितुः प्रामात्मविज्ञानो भरतो मृगतां गतः ।
प्रारब्धकर्मवेगेन तदन्ते जडविप्रताम् ॥ २ ॥

आङ्गिरसगोत्रजानां प्रवरस्य श्रेष्ठस्य शमादियुक्तस्य । त्यागोऽतिथ्यादिभ्योऽन्नदानादि विद्या कर्मविद्या आत्मज्ञानं देहादिव्यतिरिक्तमात्मज्ञानमानन्दो धर्मसंपत्तिजः आत्मना सदृशाः श्रुतादयो गुणा येषां ते समानोदरा नव पुत्रा बभूवुः यवीयस्यां कनिष्ठायां च मिथुनं स्त्रीपुरुषयुग्मम् ॥ १ ॥

उत्सृष्टं मृगशरीरं येन तं "शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत„इति स्मृतेः ॥ २ ॥

तत्रापि चान्यसङ्गादात्मनो भ्रंशमाशङ्कमान आत्मानमुन्मत्तादिरूपेण दर्शयामासेत्यन्वयः किं कुर्वन् कर्मबन्धविध्वंसनं श्रवणं स्मरणं गुणानां विवरणं कथनञ्च यस्य तत् भगवतश्चरणारविन्दयुगलं मनसा विशेषेण धारयन् प्रतिघातशङ्कायां हेतुः अनुस्मृता स्वीयपूर्वजन्मनामावलिः [illegible] येन सः ॥ ३ ॥

पुत्रस्नेहेऽनुबद्धं मनो यस्य [illegible] समावर्तनान्तान् संस्कारान् विदधानस्तु [illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

...स्तस्यानभिप्रेतानपि शिक्षितवान् । तत्र हेतुः । अनुशिष्टेन हि भाव्यं पितुः सकाशात्पुत्रेणेति ॥ ४ ॥

सोऽपि च पितुः शिक्षानिर्बन्धनिवृत्तये असमीचीनमसमीचीनमिव करोति स्म उपाकरणं वेदव्रताद्यनन्तरं श्रावणादिमासेषु वेदानध्यापयिष्यन्नादौ तावद्व्याहृतिभिः सह प्रणवशिरःसहितां त्रिपदीं चैत्रादिचतुरो मासानधीयानमप्यसमवेतरूपं यथा भवत्येवं ग्राहयामास तावतापि कालेन स्वरानुपूर्व्या वियुक्तं व्याहृत्यादि तस्य नागतमित्यर्थः ॥ ५ ॥

आत्मभूते स्वतनुजेऽनुरागेणावेशितं चित्तं येन शौचादीनि यान्युपकुर्वाणकस्य सावधिब्रह्मचर्यवतः कर्माणि तेनानभियुक्तान्यनादृतान्यपि तं पुत्रं प्रत्यनुशास्याप्यप्राप्तपुत्रपाण्डित्यमनोरथः स्वयं कालेनोपसंहृतो मृत इत्यर्थः । अनुशासननिर्बन्धे पुनस्तमेव हेतुमाह । अनुशिष्टेन भाव्यमित्यसद्योग्य आग्रहो यस्य ॥ ६ ॥

सपत्न्यै समर्प्य । अनुसंस्थयाऽनुमरणेन । सप्तम्यन्तपाठेऽप्ययमेवार्थः ॥ ७ ॥

न्यवृत्सन्त निवर्तितुमैच्छन् । निवृत्ता इत्यर्थः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमारब्धभगवद्भक्तियोगस्यापि भरतस्य प्रारब्धकर्मात्तमृगासक्त्या मृगत्वापत्तिं प्रारब्धकर्मावसाने मृगत्वनिवृत्तिं चाभिधायेदानीं "नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।

स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् इति ।

नहि कल्याणकृत्कश्चिद्दुर्गतिं तात ! गच्छति ।

प्राप्य पुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः ।

शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ।

अथवा योगिनामेव कुले भवति धीमताम् ।

इत्युक्तरीत्या तस्य विशिष्टकुलप्रसूतिं देहादिष्वनादरं ततो मुक्तिं चाभिधत्ते । अथेत्यादिना । अथ मृगशरीरत्यागानन्तरमाङ्गिरसस्य यवीयस्यां कनिष्ठायां भार्यायां यन्मिथुनं स्त्रीपुंसयुग्मं समजायत तत्र मिथुने यस्तु पुमान् तं परमभागवतं राजर्षिप्रवरमुत्सृष्टं मृगशरीरं येन तं चरमशरीरेण विप्रत्वं गतमाहुरित्यन्वयः आङ्गिरसप्रवरं विशिनष्टि । द्विजश्रेष्ठस्याङ्गिरसगोत्रोद्भवानां मध्ये प्रवरस्य शमादियुक्तस्य तत्र शमदमावन्तर्बाह्येन्द्रियनिग्रहौ तपोऽनशनादि स्वाध्यायाध्ययनं वेदाध्ययनं त्यागो दानं सन्तोषो दैवाल्लब्धेन तितिक्षा द्वन्द्वसहिष्णुता प्रश्रयो विनयः विद्या शास्त्रजन्यज्ञानं अनसूया परेषु दोषानाविष्करणमात्मज्ञानं ज्ञानयोगः आनन्दो ब्रह्मानन्दानुभवरूपा भक्तियोगः आत्मना स्वेन स्वसदृशाः श्रुतादयः गुणा येषां ते श्रुतं वेदार्थश्रवणं नव सोदरा अङ्गजा आत्मजा बभूवुः ज्येष्ठायां भार्यायामिति शेषः ॥ १ ॥ २ ॥

...पि विप्रजन्मन्यपि ...सङ्गादात्मनः प्रतिघातं भ्रंश...भगवदनुग्रहेणैवानुस्मृता यया पूर्व...न सः आत्मानमुन्मत्तादिरूपेण ...कुर्वन् कर्मबन्धविध्वंसनं श्रवणस्मरणं गुणानां विवरणं कथनं यस्य तत्कर्मबन्धविध्वंसनसमर्थभवणादियुक्तमित्यर्थः एवंविधं भगवतश्चरणारविन्दं मनसा विदधानः विशेषेण धारयन् ॥ ३ ॥

स विप्रः आङ्गिरसस्तस्य जडादिवेषस्य पुत्रस्य पुत्रस्नेहेनानुबद्धमासक्तं मनो यस्य तथाभूतः सन् समावर्तनं स्नातकं तत्पर्यन्तान् संयतान् संस्कारान् गर्भाधानादीन् यथाविधिकुर्वाण उपनीतस्य तस्यानभिप्रेतान् पूर्ववासनयावगतत्वात् शिक्षणीयत्वेनानभिप्रेतानपि शौचाचमनादीन् कर्मनियमानित्यनैमित्तिकादिभेदेन नियतान् समशिक्षयत् शिक्षायां हेतुमाह । अनुशिष्टेनेति । पितुः सकाशादनुशिष्टेन विविच्य ज्ञापितेनैव पुत्रेण भवितव्यमितीति बुद्ध्येत्यर्थः ॥ ४ ॥

सोऽपि च पितुः शिक्षानिर्बन्धनिवृत्तये तत्समक्षमसमीचीनमसमीचीनमिव करोति छन्दांस्यध्यापयिष्यन् "श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्" इत्युक्तरीत्या वेदानध्यापयिष्यन् तावदादौ व्याहृतिभिः सह प्रणवशिरःसहितां त्रिपदीं सावित्रीं गायत्रीं व्याहृतयो भूरादयः प्रणव ओङ्कारः शिरः ओमापो ज्योतिरित्यादि एवंभूतां सावित्रीं ग्रैष्मवासन्तिकान्मासांश्चतुरो मासानधीयानमप्यध्ययनं कुर्वाणमपि पुत्रमसमवेतरूपं स्वरादिनानुपूर्व्या वियुक्तं न भवति यथा तथा ग्राहयामास तावता कालेनापि स्वरानुपूर्व्या वियुक्तव्याहृतिसहिता गायत्री तस्य दृढा नाभूदित्यर्थः ॥ ५ ॥

एवं स्वात्मजे आत्मनि "आत्मा वै पुत्रनामासि" इति श्रुत्युक्तरीत्या पुत्ररूपे आत्मन्यनुरागेणावेशितमासञ्जितं चित्तं येन सः शौचादीन्युपकुर्वाणकस्य सावधिब्रह्मचर्यवतो यानि कर्माणि उपकुर्वाणो गुरुशुश्रूषादिना वेदाध्ययनादि कुर्वाणः ब्रह्मचारी शौचं स्नानादिजन्या शुद्धिः व्रतानि काण्डव्रतादीनि तान्यभियुक्तानन्याविस्मृतवेदस्य तस्याध्ययनानपेक्षत्वादध्यापनाङ्गानि कर्माण्यनुपयुक्तानीत्यर्थः सम्यगनुशिष्टेन पुत्रेण भाव्यमित्यसदाग्रहः दुरभिमानवान् पुत्रमनुशास्यापि शिक्षित्वापि अनधिगतः मनोरथः पुत्रवैदुष्यरूपो येन सः तावदेवाप्रमत्तेन कालेन मृत्युना स्वयं गृहे प्रमत्तः सन्नुपसंहृतः मृत इत्यर्थः ॥ ६ ॥

अथ संहृत्यनन्तरं यवीयसी कनिष्ठा द्विजसती द्विजभार्या स्वगर्भजातं मिथुनं सपत्न्या उपसमीपे निधाय सपत्न्यधीनं कृत्वा स्वयमनुसंस्थया अनुमरणप्रक्रियया पतिलोकमगात्प्राप्तवती ॥ ७ ॥

पितर्युपरते मृते सति भ्रातरो नव एनं जडमतिरिति बुद्ध्याऽनुशासनरूपान्निर्बन्धान्न्यवृत्सन्त निवर्तितुमैच्छन् शिक्षां नाकुर्वन्नित्यर्थः जडमतिरित्यत्र हेतुं तद्विशिनष्टि । अतत्प्रभाववित्तस्य भ्रातः प्रभावमजानन्तः तत्रापि हेतुः त्रय्यामेव विद्यायां कर्मावबोधात्मकवेदविद्यायामेव पर्यवसितमतयः न ब्रह्मविद्यायां वेदान्तविद्यायां पर्यवसितमतयः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रायो वैराग्यसाधनसामग्रीसंपन्नस्यापि ब्राह्मणशरीरस्य मनःपुरुषस्य ज्ञानान्मुक्तिरित्यभिप्रायोऽस्मिन्नध्याये निरूप्यते । तदर्थमु-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न्यक्षज्ञानस्यापि भरतस्य विप्रतनुत्वप्राप्तिमाह । अथेति । अथ मृगशरीरोत्सर्जनानन्तरं कल्याणकरभरतकथोच्यत इति वा त्यागो दानं देवतामुद्दिश्य द्रव्यस्यागकारणो यज्ञो वा सन्तोषो यदृच्छालाभेनाखं बुद्धिः शमाद्यात्मज्ञानान्तं तैयं आनन्दस्तेन युक्तस्य शमादीनामानन्देन समृद्ध्या युतस्येति वा आत्मनः पितुर्गुणा-न्सदृशश्रुतादिगुणा येषां ते तथा सोदर्या अङ्गजाः एकस्या मातुः उदरजातत्वात् सोदर्याः अङ्गजाः पुत्राः ॥ १ ॥

उत्सृष्टं मृगशरीरं येन स तथा चरमशरीरेणान्त्यदे-हेन ॥ २ ॥

तत्र विप्रजन्मन्यपि लोकस्यात्मानमुन्मत्तादिरूपेण दर्शया-मासेत्यन्वयः उद्विजमानः स्वस्थानप्रच्युतिरिति बिभ्यतः गुणा-विवरणं व्याख्यानं विशेषेण दधतः आत्मनः स्वस्य श्रवणादेः प्रतिघातं विघ्नमाशंसमानः निरूपयन् अनुस्मृता स्वस्य पूर्व-जन्मनामावलिः परम्परा येन स तथा ॥ ३ ॥

स विप्रः पिता तस्यात्मजस्यापि लोकविज्ञिष्टस्यापि समा-वर्तनपर्यन्तं सतः संस्कारान् विप्रजातिविहितान् जातकर्मा-दीन्यथोपदेशं विदधानः कुर्वाणः पुनरुपनीतस्य शौचाचमना-दीन् कर्मनियमाननभीष्टानपि समशिक्षयदित्यन्वयः अनभिप्रेता-र्थंकिमित्यशिक्षयदिति तत्राह । अनुशिष्टेनेति । इवा इत्येतो भरतस्यापरोक्षज्ञानित्वेन कामचारो न दोषायेति सूचयतः अत एवासद्ग्रह इत्युक्तम् ॥ ४ ॥

यत्पित्रा शिक्षितं तदेव सध्रीचीनं समीचीनं रमणीयमिव किञ्चिदन्यथा हेत्यनेन अतीतानागतज्ञानी त्रैलोक्योद्धरणक्षमः इत्यादि स्मार्तन्यायमनुसन्दधान इवेति दर्शयति । सह प्रणवेन शिरसा त्रिपदी सप्रणवशिरस्त्रिपदी तामसमवेतरूपं असमञ्ज-सरूपं यथा तथा छन्दांसि वेदान् ॥ ५ ॥

"आत्मा वै पुत्रनामासि„इति श्रुतेरात्मनीति व्यपदेशः औपकुर्वा-णकानि उपकुर्वाणयोग्यानि उपकुर्वाणो विवाहः भिक्षाटनं वा अतदभियुक्तानि तस्यानपेक्षितानि एवमादीन्यपि कर्माणि ग्राह-यन् पुत्रमशिक्षयदित्यन्वयः अनागतमनोरथः अप्राप्तनिजाभिप्रायः उपसंहृतो मृतोऽभूत् ॥ ६ ॥

अनुसंस्थया अनुमरणेन अग्निप्रवेशलक्षणेन अथ्यां अग्नि-ष्टोमेन स्वर्गकामो यजेतेत्याद्यायां कर्मप्रतिपादिकायां पर्यवसि-तमतयः पुरुषार्थबुद्धयः "ब्रह्मविदाप्नोति परं तमेवं विद्वानमृत इह भवति„इत्याद्यायां न निष्णातमतयः अनुशासननिर्बन्धाच्छिक्षा-लक्षणाग्रहात् न्यवृत्सन्त निवर्तितुमैच्छन् ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भक्तत्वादेवमात्मनो भक्तिप्रतिघातमाशङ्कमानः ॥ १ ॥ २ ॥

स्वजनसङ्गाच्च भृशमुद्विजमान इत्यधिकं चान्यत्र नास्ति स्वाम्यसम्मतश्च दृश्यते । अवधानेन योजितत्वात् ॥ ३ ॥

अनुशिष्टेन हि भाव्यं पितुः पुत्रेणेतीत्यस्य पितुर्वाक्यस्य तस्मा-दयमनुशिष्टः कर्तव्यः । व्यतिरेके तु स्वयं दोषावहः स्यादिति तात्-पर्यम् ॥ ४——७ ॥

पितर्युपरत इति । एवं जडमतारिति ज्ञात्वेति योज्यं ज्ञात्वे-त्यध्याहारात् न परविद्यायामित्यनेन भगवद्भक्तेरर्थाविद्यानो-तत्वं परविद्यात्वञ्च दर्शितं तथापीत्यादि गद्ये तस्य भक्त्येक-निष्ठताया दर्शितत्वात् तत्रैवं परामृश्यते । सोऽयमन्तर्भगवन्निष्ठ एवेत्यात्मारामता तु बहिरङ्गा तदावरणाय प्रयुक्ता तस्याप्य[illegible] रणायोन्मत्तचेष्टतेति न्यवृत्सतामिति लुङ्प्रत्ययान्त आर्षः ॥ ८-२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नवमे जडता तस्य गायत्र्या अप्यशिक्षणम् ।
केदारकर्म देव्या अप्युच्चाटनमितीर्यते ॥

आङ्गिरसगोत्रजानां प्रवरस्य श्रेष्ठस्य शमादियुक्तस्य त्यागोऽत्रा-तिथ्यादिभ्योऽन्नदानादि विद्या कर्मविद्या आत्मज्ञानं देहादिव्यतिरि-क्तभोक्त्रात्मज्ञानमात्मना सदृशाः श्रुतादयो गुणा येषांते समानोदरा नव पुत्रा बभूवुः ॥ १ ॥ २ ॥

कर्मबन्धविध्वंसनं श्रवणादिकं यस्य तथाभूतं चरणारविन्दं विशेषेण दधत् लोकस्य लोकम् ॥ ३ ॥

अनभिप्रेतानिति शश्वदनुभूयमानभगवत्स्वरूपत्वेन स्वस्य कर्मानधिकारमननात् पितुः सकाशात् अनुशिष्टेन ॥ ४ ॥

स भरतः पितुः चित्तानिर्बन्धनिवृत्तये तत् शौचाचमनादिक मसध्रीचीनं विपर्यस्तं मूत्रपुरीषोत्सर्गादेः प्रागेवाचमनमृत्ति-काशौचादिकं करोति नत्वनन्तरमेवेति तस्य तदपि वस्तुतः समीचीनमेवेति उपाकरणवेदग्रहणाद्यनन्तरं श्रावणादिमासेषु वेदानध्यापयिष्यामि सम्प्रति तु जडमिमं गायत्रीन्तु शिक्षया-मीति विचार्य चैत्रादिभिश्चतुर्भिरपि मासैर्निरन्तरमपि गायत्र्याः पादत्रयं पाठयन् सम्पूर्णां तां धारयितुं न शशाकेत्याह । छन्दांसीति । असमवेतरूपं यथा स्यात्तथा ॥ ५ ॥

स्वतनुजे पुत्रे आत्मनि स्नेहात् स्वप्राणादप्यधिके इत्यर्थः । औपकुर्वाणकस्य सन्ध्याविधानपर्यन्ततः कर्माणि तेनानभियुक्तानि अनादृतान्यपि तं पुत्रं प्रत्यनुशास्य अनुशासननिर्बन्धे पूर्वोक्त-मेव हेतुमाह । स्वयमपीति उपसंहृतः मृतः ॥ ६ ॥

सपत्न्यै उपन्यस्य सपत्न्यामिति सप्तम्यन्तोऽपि पाठः । अनु संस्थया अनुमरणेन सप्तम्यन्तपाठेऽप्ययमेवार्थः ॥ ७ ॥

अनुशिष्टवतीति शेषः एनमनुशिष्टवति पितरि उपरते सती-त्यन्वयः । न्यवृत्सन् निवर्तितुमैच्छन् लुङिवा रूपं निवृत्ता इत्य-र्थः उभयथाप्यार्षप्रयोगः ननु पितेव तस्मिन्नत्याग्रहवन्त इति भावः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भरतस्य जन्म तत्र प्राणबाधे उपस्थितेऽपि निर्विकारत्वं वर्ण-यति नवमे । तत्रादौ मृगशरीरत्यागानन्तरम् ।

शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ।
अथवा योगिनामेव कुले भवति धीमताम् इति ॥

श्रीमुक्तोक्तरीत्या द्विजोत्तमगृहे भरतो जात इत्याह । [illegible]रणात- आङ्गिरसो गोत्रजानां प्रवरस्य शमादियुक्तस्य [illegible] तस्य आत्मना सदृशाः श्रुतादयो गुणा येषां [illegible] सदृशं पूर्ण यस्य नव अङ्गजा बभूवुः यवीयस्यां कनिष्ठायां [illegible] मनः [illegible] [illegible] समानोदरं कम् बभूव ॥ १ ॥ २ ॥

स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्माणि च स कार्यमाणः परेच्छया करोति विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं बहुमिष्टं कदन्नं वाऽभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम्, नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानन्दस्वात्मलाभाधिगमः सुखदुःखयोर्द्वन्द्वनिमित्तयोरसम्भावितदेहाभिमानः ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्रापि विप्रजन्मन्यपि स्वजनसङ्गात् चकारादिहाभिनिवेशाच्च भृशमुद्विजमानः यतः आत्मनः प्रतिघातं भ्रंशमाशङ्कमानः कर्मबन्धविध्वंसनं श्रवणं गुणविवरणं च यस्य तद्भगवतश्चरणारविन्दयुगलं मनसा विदधत् विधारयन् भगवदनुग्रहेण अनुस्मृतस्वीयपूर्वजन्मनामावलिर्येन सः आत्मानमुन्मत्तादिरूपेण दर्शयामास ॥ ३ ॥

तस्यापि उन्मत्तादिवद्वर्त्तमानस्यापि पुत्रस्नेहेन अनुबद्धं मनो यस्य सः आसमावर्त्तनात् समावर्त्तनपर्यन्तान् उपनयनादीन् संस्कारान् यथोपदेशं विदधानः यथाविधि कुर्वाणः तमुपनीयोपनीतस्य च पुनः शौचादीन् तस्यानभिप्रेतानपि समशिक्षयत् पितुः सकाशादनुशिष्टेन सुशिक्षितेन पुत्रेण भाव्यमिति हेतोः ॥ ४ ॥

सचापि तत् उपादिष्टम् असध्रीचीनमसमीचीनं करोतिस्म स विप्रः उपाकरणावेदव्रताद्यनन्तरं श्रावणादिमासेषु वेदानध्यापयिष्यन् आदौ तावद्व्याहृतिभिः सह प्रणवशिरःसहितां त्रिपदीं चैत्रादिचतुरो मासानधीयानमप्यसमवेतरूपं यथाभवत्येवं ग्राहयामास ॥ ५ ॥

एवमुक्तप्रकारेण समनुशिष्टेन भाव्यमित्यसन् अयुक्त आग्रहो यस्य सः अतएव आत्मनि "आत्मा वै पुत्रनामासि,, इति वाक्यात् आत्मभूते स्वतनुजे अनुरागेणावेशितं चित्तं येन सः शौचादीनि यान्यौपकुर्वाणकस्य सावधिब्रह्मचर्यवतः कर्माणि अनभियुक्तानि पुत्रानभीष्टान्यपि पुत्रं प्रत्यनुशास्यापि अनधिगतमनोरथः नाधिगतो न प्राप्तः पुत्रकर्मकोशलमनोरथो येन सः स्वयं यमेनोपसंहृतः ॥६॥

यवीयसी कनिष्ठा द्विजसती विप्रपत्नी सपत्न्यै मिथुनं स्वपुत्रकन्यकायुग्ममुपन्यस्य समर्प्य स्वयमनुसंस्थया अनुमरणेन पतिलोकमगात् ॥ ७ ॥

एनं जडमतिरिति मत्वा अनुशासननिर्बन्धात् न्यवृत्सन् निवर्तितुमैच्छन् निवृत्ता बभूवुरित्यर्थः । यदारे उन्मत्त ! जड बधिर इत्यभिभाष्यमाणस्तदा तदनुरूपाणि प्रभाषते स परेच्छया कार्यमाणः कर्माणि च करोति ॥ ८ ॥

भाषाटीका ।

श्रीशुकदेवजी बोले इसके अनन्तर अंगिरा गोत्र शम, दम, तप, स्वाध्याय अध्ययन त्याग सन्तोष तितिक्षा नम्रता विद्या ... ... आनन्दयुक्त ब्राह्मण श्रेष्ठ के अपने सदृश ... औदार्य गुणोंवाले नौ पुत्र भये और ... कन्या दो भये ॥ १ ॥

... वे तो मृगशरीरको छोडेहुये राजर्षि श्रेष्ठ परम भागवत अन्त शरीर में ब्राह्मणता को प्राप्त भये भरतजी हैं ऐसा महात्मा जन कहते हैं ॥ २ ॥

तिस जन्म में भी स्वजन संगसे अत्यंत डरतेहुये भरतजी कर्म बन्धके नाश करनेवाले भगवान् के चरित्रों के श्रवण स्मरण गुणों के वर्णन तथा चरणारविन्द युगल को मनमें धारण करके अपने आत्मा को घात की शङ्का से भगवान् के अनुग्रह होनेसे पूर्वजन्मों के स्मरण होनेसे सब लोकों को पागल अन्धा बहिरा रूपसे अपने को दिखाने लगे ॥ ३ ॥

उनके पिता ब्राह्मण पुत्र के स्नेह में मन के बंधजाने से अपने पुत्र जन्मादिक समावर्तन पर्यन्त संस्कारोंको विधि पूर्वक कराकर उपनयन होनेपर शौच आचमन आदिक कर्म जोकि भरतजी के प्रिय नहीं थे तिन को भी शिक्षा ते भये क्योंकि उनने समझा कि पुत्र को शिखाना पिता का धर्म है ॥ ४ ॥

सो भरतजी पिताके सम्मुखही में किसी शिक्षित आचार को नहीं करते थे पिता उनके वेद पढाने की इच्छा से ओंकार शिरो मन्त्रके सहित गायत्री साविनी व्याहृति ग्रैष्मवासन्तिक मासों के चारों को अयथार्थ रूपसे भी ग्रहण कराते थे ॥ ५ ॥

इस प्रकार से अपने पुत्र में अनुराग से चित्तके अभिनिवेश होने से पिता अपने पुत्रको शौच अध्ययन व्रत नियम गुरु अग्निका सेवा इत्यादिक अवधि वाले ब्रह्मचारी के आवश्यक कर्म जो कि भरतजी को अभिमत नहीं थे पिताका ऐसा असत् आग्रह था कि अवश्य शिखानाही चाहिये इस प्रकार पुत्र को शिखाते थे जब तक मनोरथ नहीं पूरा भया तबही इनके प्रमाद में रहने के समय अप्रमादी कालने इनको संहार कर दिया ॥ ६ ॥

तब ब्राह्मणकी छोटी भार्या अपने दोनों पुत्र पुत्री को दूसरी सौतिन के पास छोड कर पति के साथ सती होगई ॥ ७ ॥

पिता के चले जाने पर भरतजी के प्रभाव को न जानने वाले और सब भ्राता वेद त्रयी के कर्म मार्गमें निश्चित बुद्धि वाले होने से ब्रह्म विद्या को नहीं जानते थे तिसमे भरतजी को अति अज्ञानी समझकर भ्राता के सम्बन्ध से उनको अवन करते भये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यदाभिभाष्यमाणस्तदा तदनुरूपाणि प्रभाषते । मूल्यमन्तरेण बलात्कर्म कार्यते सा विष्टिः । वेतनं मूल्यम् । विष्टयादिभिरुपसादितमन्नमभ्यवहरति परं भुङ्क्ते केवलं नत्विन्द्रियप्रीतये । अत्र हेतुद्वयमाह । नित्यं सदा निवृत्तं निमित्तं यस्मात्स उत्पादकशून्यः स्वसिद्धोऽभिव्यञ्जकशून्यो विशुद्धः केवलो योऽनु-

शीतोष्णवातवर्षेषु वृष इवानावृताङ्गः पीनः संहननाङ्गः स्थण्डिलसंवेशनाननुन्मर्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबन्धुरिति संज्ञयाऽतज्ज्ञजनावमतो विचचार ॥ १० ॥

यदा तु परत आहारं कर्मवेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तदपि करोति किन्तु न समविषमन्यूनमधिकमिति वेद कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति ॥ ११ ॥

अथ कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ॥ १२ ॥

तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः परिधावन्तो निशि निशीथसमये तमसावृतायामनधिगतपशव आकस्मिकेन विधिना केदारान् वीरासनेन मृगवराहादिभ्यः संरक्षमाणमङ्गिरःप्रवरसुतमपश्यन् ॥ १३ ॥

अथ त एनमनवद्यलक्षणमवमृश्य भर्तृकर्मनिष्पत्तिं मन्यमाना बध्वा रशनया चण्डिकागृहमुपनिन्युर्मुदा विकसितवदनाः ॥ १४ ॥

अथ पणयस्तं स्वविधिनाऽभिषिच्याहतेन वाससाऽऽच्छाद्य भूषणालेपस्रक्तिलकादिभिरुपस्कृतं भुक्तवन्तं धूपदीपमाल्यलाजकिसलयाङ्कुरफलोपहारोपेतया वैशससंस्थया महता गीतस्तुतिमृदङ्गपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः ॥ १५ ॥

अथ वृषलराजपणिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमन्त्रितमसिमतिकरालनिशितमुपाददे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अथ स एवानन्दरूपः स्वात्मा तस्य लाभ एवंभूतोऽहमिति ज्ञानं तस्याधिगमः प्राप्तिरस्ति यस्य । द्वन्द्वानि सन्मानावमानादीनि तद्धेतुकयोः सुखदुःखयोरकृतदेहाभिमानः तस्मान्नेन्द्रियप्रीतिनिमित्तमभ्यवहरतीत्यन्वयः ॥ ९ ॥

अतएव शीतोष्णादिष्वनावृताङ्गो विचचारेत्यन्वयः कीदृशः पीनः पुष्टः संहननाङ्गः संहन्यन्ते निबिडीभवन्ति स्माङ्गानि यस्य काठिनाश्यव इत्यर्थः । स्थण्डिलसंवेशनं भूमिशयनम् अनुन्मर्दनं मर्दनाभावः अमज्जनं स्नानाभावः तैर्यद्रजस्तेनाप्रकटं ब्रह्मवर्चसं ब्राह्मं तेजो यस्य । यथा महामणिरनभिव्यक्ततेजा भवति कुत्सितेन पटेनावृता कटिर्यस्य । उरुमषिणाऽतिमलिनेन । तत्त्वमस्तं न जानन्ति ये तैर्जनैरवमतः सन् ॥ १० ॥

यदा तु परेभ्यः कर्ममूल्येनाहारमपेक्षमाणो भवति तदा केदारकर्मणि शालिक्षेत्रे कर्दमविलोडनादावाहारप्रलोभनेन नियुक्तः सन्करोति किन्त्वत्र कर्दमस्य प्रक्षेपे क्षेत्रं समं भवेदिति उद्धरणे विषमं स्यादित्यादि न वेद भ्रातृभिर्दत्तान्कणादीनप्यमृतवद्भुङ्क्ते । कणाश्चूर्णिततण्डुलाः । पिण्याकं तैलयन्त्रोद्धृतं तिलकिट्टम । फलीकरणं तुषाः । कुल्माषाः कीटदृष्टा माषाः । स्थालीपुरीषं स्थालीलग्नं दग्धान्नम ॥ ११ ॥

तस्य रागादिराहित्यमलौल्यं चैवमीरितम ।
अथान्यच्चरितं प्राह चित्रं मृत्यावसंभ्रमम ।

वृषलपतिः शूद्रसामन्तश्चोरराजः आलभताऽऽलब्धुं प्रवृत्तः ॥ १२ ॥

दैवाद्बन्धनविमुक्तस्य पशोः । तमसा व्याप्तायां निशि तत्रापि निशीथसमयेऽर्धरात्रावसरे । आकस्मिको दैवनिर्मितो विधिः प्रकारस्तेन । वीरासनेनोर्ध्वावस्थानेन ॥ १३ ॥

अवमृश्य ज्ञात्वा ॥ १४ ॥

पणयश्चोराः । अहतेन नूतनेन उपस्कृतमलंकृतम । वैशससंस्थया हिंसाविधानेन गीतादिघोषेण सह ॥ १५ ॥

वृषलराजस्य पणिः पुरोहितत्वेन वर्तमानश्चोरः । तदभिमन्त्रितं भद्रकालीमन्त्राभिमन्त्रितम ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदा स जडविप्रो द्विपदपशुभिर्हे उन्मत्तजड बधिरेत्यभिभाष्यमाणस्तदा तदनुरूपाणि उन्मत्ताद्यनुरूपाणि उन्मादजाड्यबाधिर्यादिसूचकानि वचांस्याभाषते स्वयं निर्व्यापारोऽपि परेच्छया कार्यमाणः कर्माणि करोति मूल्यमन्तरेण बलात्कर्म कार्यते सा विष्टिः वेतनं भृतिः विष्ट्यादिभिर्यदृच्छया दैवाद्वोपसादितं प्राप्तं तदप्यल्पं बहु वा मृष्टं कदन्नं वाऽभ्यवहरति भक्षयति परं केवलं प्रारब्धोपभोगयुक्तदेहधारणार्थं भुङ्क्ते नत्विन्द्रियप्रीतये ॥ ९ ॥

तत्र हेतुं वदन्विशिनष्टि । नित्येति । नित्यं निवृत्तानि निमित्तानि सुखदुःखनिमित्तानि पुण्यापुण्यकर्माण्यपात्मस्वरूपतिरोधायकानि

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

यस्मात्स एवंविधो यः स्वसिद्धविशुद्धानुभवानन्दः आत्मा नित्यासङ्गरागादिरहितज्ञानानन्दस्वरूप आत्मा तस्याधिगमः याथात्म्यविज्ञानं तन्नित्यं सदा यस्य द्वन्द्वानि शीतोष्णादीनि निमित्तानि कारणानि ययोस्तयोः सुखदुःखयोरसम्भावितदेहाभिमानः द्वन्द्वनिमित्तसुखदुःखादिप्रयुक्तदेहात्माभिमानसम्भावनामात्ररहित इत्यर्थः अत एव शीतातपादिषु वृष इव बलीवर्द इवानावृतमनाच्छन्नमङ्गं यस्य सः पीनः परिपुष्टसर्वावयवः संहननानि कठिनान्यङ्गानि यस्य स्थण्डिलसंवेशनं भूशयनम् अनुन्मर्दनं तैलेनाङ्गमर्दनाभावः अमज्जनं मलापनयनार्थं स्नानाभावः एभिर्वेद्रजः शरीरमालिन्यं तेनानभिव्यक्तमप्रकटं ब्रह्मवर्चसं ब्रह्मतेजो यस्य यथा महामणिर्बाह्यमलेनानभिव्यक्ततेजा भवति कुत्सितेन पटेनावृता कटिर्यस्य उरुमणिना प्रभूतं मलं यस्य तेनोपवीतेनोपलक्षणेन द्विजातिरित्यादिसंज्ञया वाचकशब्देन व्यवह्रियमाणोऽतज्ज्ञजनैः योगीश्वरचर्यानभिज्ञजनैरवमतः निन्दितः सन् विचचार ॥ १० ॥

यदा तु वेतनाद्धृते: परेभ्यः आहारमीहमानः इच्छन्भवति वेतनमिति पाठे आहारमित्यस्यानन्तरं लब्धुमिति शेषः आहारमात्रिकं लब्धुं वेतनमीहमानः कुर्वाणो भवति तदा आहारप्रलोभनेन स्वभ्रातृभिः केदारकर्मणि शालिक्षेत्रकर्दमविलोडनादौ नियुक्तस्तदपि केदारकर्म करोति किं त्वत्र कर्दमस्य प्रक्षेपे क्षेत्रं समञ्चेदिति उच्चरणे विषमं स्यादिति न वेद वैषम्यं नैव पश्यति। न्यूनमधिकं वा स्यादिति भ्रातृभिर्दत्तान्कणादीनप्यमृतवद्भक्षयति कणाश्चूर्णिततण्डुलाः पिण्याकस्तैलयन्त्रोद्धृतं तिलपिष्टं फलीकरणं तुषः कुल्माषा कुलुत्थाः बुषा माषाः स्थालीपुरीषं पात्रलग्नं दग्धान्नम् ॥ ११ ॥

एवं तस्य देहानादरमभिधायाथ "कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम्" इत्युक्तरीत्या मरणोद्योगेऽप्यसम्भ्रमं वक्तुं तस्याश्चर्यतमस्वमाविष्कुर्वन्नाह। अथेति। हे विष्णुरात! भरतस्येदं वक्ष्यमाणमद्भुतं कर्म शृणु कश्चिद्वृषलपतिः शूद्रायाः पतिः पुत्रकामः भद्रकाल्यै पशुं पुरुषपशुमालभमानः पुत्रश्चेन्मम भविता तदा भवत्यै पुरुषपशुमालप्स्य इति कृतसङ्कल्पोऽभूदित्यर्थः ॥ १२ ॥

तस्यैवं कृतसङ्कल्पस्य पुत्रप्राप्तिरूपसिद्ध्यनन्तरं दैवाल्लब्धं पशुमानयतेत्युक्तास्तदनुचराः शूद्राः दैवाद्विमुक्तस्य आलभ्यस्य पशोः पदवीं प्रति परितो धावन्तः अन्वेषमाणाः तमसा व्याप्तायां निशि रात्रावर्धरात्रिसमये अनधिगतः पशुर्यैस्ते आकस्मिको दैवनिमित्तो विधिः प्रकारस्तेन वीरासनेन ऊर्ध्वावस्थानेन केदारान् मृगादिभ्यः संरक्ष्यमाणं गोबलीवर्दन्यायेन वराहशब्दप्रयोगः आङ्गिरसप्रवरस्य सुतं भरतमपश्यन् दृष्टवन्तः ॥ १३ ॥

अथैनमाङ्गिरससुतमनवद्यानि निर्दुष्टान्यङ्गानि यस्य पङ्गुत्वकाणत्वादिरहितमवमृश्य ज्ञात्वा भर्तुः कर्मणः पुरुषपश्वालम्भनकर्मणः निष्पत्तिं मन्यमाना रशनया रज्ज्वा बध्वा मुदा विकसितानि वदनानि येषां ते चण्डिकाया भद्रकाल्या मन्दिरं प्रत्युपनिन्युर्नीतवन्तः ॥ १४ ॥

अथ पणयः चोराः तमाङ्गिरससुतं स्वविधिना विशसनविधिनाभिषिच्य स्नापयित्वाहतेन नूतनेन वाससा वस्त्रेणाच्छाद्य भूषणादिभिरुपस्कृतमलंकृतं भुक्तवन्तं धूपादिभिरुपेतया युक्तया वैशससंस्थया हिंसाविधानेन महता स्तुत्यादिघोषेण च पुरुष एव पशुस्तं भद्रकाल्या अग्रे उपवेशयामासुः ॥ १५ ॥

अथ वृषलराजस्य पणिः पुरोहितत्वेन वर्तमानश्चोरः पुरुषपशोरसृक्प्रक्रमेषासवं मद्यं तेन च भद्रकालीं यक्ष्यमाणः तर्पयिष्यमाणः तदभिमन्त्रितं भद्रकालीमन्त्राभिमन्त्रितमतिभयङ्करं तीक्ष्णधारमसिं खड्गमुपाददे गृहीतवान् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अतः परमसौ भरतः किमकरोदत्राह। सखेति। सर्वत्र विचचारेत्यन्वयः कथं प्राकृतैरित्यस्य विवरणं द्विपदेति। चतुष्पदः पशोर्द्विपदत्वमेव विशेषः ननु ज्ञानेन तादृशैर्मनुष्यैर्यदा हि उन्मत्तेत्यादिनामभिरभिभाष्यमाणो भवति तदा तदनुरूपाययुष्मत्तादिवचनानुकूलवचनानि भाषते विष्ठितः कर्तुः कर्मानुकूलद्रव्यक्लृप्तिमन्तरेण कर्मणा वेतनतो मौल्येन कर्मानुकूलद्रव्यक्लृप्त्येत्यर्थः कदन्नं कुत्सितान्नम् अभ्यवहरति भुङ्क्ते परं केवलम् नेन्द्रियप्रीतिनिमित्तं न जिह्वादीन्द्रियतृप्तिकारणमत्र हेतुगर्भविशेषणमाह। नित्येति। नित्यनिवृत्तदुःखस्वासिद्धविशुद्धानुभवानन्दोऽहमिति यः स्वात्मलाभस्तमधिगच्छतीति स तथोक्तः यद्वा नित्यनिवृत्तदुःखत्वाविधिविशिष्टस्वात्मा परमात्मा स एव लाभः फलं जानातीति स तथोक्तः अत एवासम्भाविनोऽनुत्पादितो देहाभिमानो येन स तथा शुष्कजलनारिकेलफलसम इत्यर्थः ॥ ९ ॥

उपविष्टभूमौ शयित्वा निद्राकरणं स्थण्डिलसंवेशनमनुन्मर्दनं देहमलात्यागः अनुन्मज्जनमस्नानं कर्पटेन पटचीरेण जीर्णवस्त्रेणेत्यर्थः आवृताच्छादिता कटिर्यस्य सः तथा उरुमलिनातिमलिनेन ॥ १० ॥

यदा परतः आहारं प्रतिवेतनतः कर्मेहमानश्चेष्टमानस्तदा स्वभ्रातृभिरपि केदारकर्मणि निरूपितस्तत्कर्मापि करोति अस्य कर्मण इदं मूल्यं सममिदं विषममिदमधिकमिदं न्यूनमिति न वेद कणां पाषाणोपेताणुतरतण्डुलं पिण्याकं नीरसतिलपिष्टं फलीकरणमवहतनतण्डुलतुषं कुल्माषः कीटादिविद्धमाषः वनमाषो वा स्थालीपुरीषं स्थालीतलतुलग्नं दग्धान्नं यावनालश्यामाककोद्रवादीन्यादिशब्दगृहीतानि आरोचयति मधुरीकरोति ॥ ११ ॥

भक्षितकणादिजीर्णीकरणं नातिशयितमाहात्म्यम् औषधादिनापि तत्सम्भवादित्याशङ्क्य विष्णुमाहात्म्यगर्भितं माहात्म्यान्तरमाह। अथेति। अथान्यमाहात्म्यं वक्ष्यामीति शेषः ॥ १२ ॥

दैवविमुक्तस्य अदृष्टक्षोभकपरमात्मापेक्षया व्याप्ता निशीथसमये मध्यरात्रिकाले अनधिगतपशवः अप्राप्तपुरुषपशवः केदारान् शालिक्षेत्राणि वीरासनेन मञ्चे स्थित्वा रक्ष्यमाणं पालयन्तं यत्प्रत्ययस्तु स्वयं हरिणा पालयत इति द्योतनपरः ॥ १३ ॥

रशनया रज्ज्वा ॥ १४ ॥

पणयो वृषलचोरा वा स्वविधिना आगमोक्तमार्गेण अहतेनाच्छिन्नेन धौतेन वा किसलयः पल्लवः अङ्कुरो नवाङ्कुरः वैशससंस्थया हिंसाविधानेन ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृषो धर्मो लीयत एभिरिति वृषलास्तेषां राजा वृषलराजः अत एव पणिश्चोरः वृषलराजेषु चोर इत्यर्थः असृगासवेन रक्ताख्यमद्येन तस्याः भद्रकाल्या मन्त्रेण "गृध्रकर्णि विरूपाक्षि लम्बस्तनि महोदरि । हनशत्रुं त्रिशूलेन कुद्धस्य पिब शोणितम्" इत्यादिनाभिमन्त्रितं जप्तमसि खड्गम् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मूल्यमन्तरेण बलात् यत् कार्यते सा विष्टिः नित्यं सदैव पूर्वजन्मन्यपि निवृत्तं निमित्तं कर्म यस्य सः स्वसिद्धेन स्वत एव सिद्धेन विशुद्धेनाप्राकृतेन अनुभवानन्देन इष्टेनैव स्वात्मनः स्वेष्टदेवस्य कृष्णस्य लाभाधिगमः लाभप्रतीतिर्यस्मिन् स च स च सः अत एव द्वन्द्वानि सम्मानावमानादीनि तद्धेतुकयोः सुखदुःखयोरकृतदेहाभिमानः अत एव नेन्द्रियप्रीतिनिमित्त-मभ्यवहरतीत्यन्वयः ॥ ६ ॥

अपावृताङ्गः अनावृताङ्गः संहननाङ्गः अतिबलिष्ठगात्रः स्थण्डिल-संवेशनं भूमिशयनमनुन्मर्दनमभ्यङ्गाद्यभावः अमज्जनं स्नानाभावस्तैर्यद्रजस्तेनानभिव्यक्तं ब्रह्मवर्चसं ब्राह्मं तेजो यस्य सः उरुमषिणा अतिमलिनेन ॥ १० ॥

कर्मवेतनतः कर्ममूल्येन आहारमीहमानो यदा भवति तदा स्वभ्रातृभिरिति सर्वं दिनं कर्म कारयित्वा आहारमात्रं चेदन्ये ददति नहिं वयमेव तथा कारयामः अप्रतिष्ठा च नस्तावती न भविष्यतीति मत्वेति भावः कर्दमविलोडनादिकर्मणि अत्र कर्द-मस्य प्रक्षेपे क्षेत्रं समं भवेदित उद्धरणे विषमं भवेदित्यादि तु न वेद पिण्याकं तैलयन्त्रोत्सृतं तिलकिट्टं फलीकरणं तुषः । कुल्माषाः कीटविद्धमाषाः स्थालीपुरीषं स्थालीलग्नं दग्धान्नं तदादीनि भ्रातृभिर्दत्तानि ॥ ११ ॥

वृषलपतिः शूद्रसामन्तश्चौरराजः अलभत आलब्धुं प्रवृत्तः॥ १२ ॥

दैवाद्बन्धनविमुक्तस्य पलायितस्य पुरुषपशोः वीरासनेन ऊर्ध्वावस्थानेन ॥ १३ ॥ १४ ॥

पणयश्चोराणां पुरोहिताः आहतेन नूतनेन वैशससंस्थया [illegible]साविधानेन युक्तम् ॥ १५ ॥

वृषलराजस्य पणिः मुख्यः पुरोहितः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विष्टितः बलात्कार्यमाणा क्रिया विष्टिः वेतनतः वेतनं मूल्यं ततः याच्ञया यदृच्छया वोपसादितं लब्धम् तत्राप्यल्पं बहु वा कुत्सितं मिष्टं वा अन्नम् अभ्यवहरति भुङ्क्ते परं केवलं नत्विन्द्रिय-प्रीतिनिमित्तं तत्र हेतुमाह । नित्येति । नित्यं निवृत्त्यादिहेतुर्यस्मात् सः अत एव स्वसिद्धः स्वायत्तः स्थितिप्रवृत्तिकः विशुद्धः स्वभाव-तोऽपास्तसमस्तदोषः सर्ववेदैकवेद्यः श्रीवासुदेवः तद्विषयको योऽनुभवः तस्माद्य आनन्दः स एव स्वात्मनो मुमुक्षोर्लाभस्तस्या-धिगमः प्राप्तिरस्ति यस्य सः इत्यन्तरमाह । द्वन्द्वानि स्वकृतानि पुण्यापुण्यकर्माणि निमित्तानि ययोस्तयोः सुखदुःखयोः अस-म्भावितदेहाभिमानः अहं सुखी अहं दुःखीत्यकृतदेहाभिमानः ॥ ६ ॥

शीतोष्णादिषु अनावृताङ्गः वृष इव विचचारेत्यन्वयः कथं-भूतः पीनः पुष्टः संहननाङ्गः कठिनावयवः भूशयनादिभिर्यद्रज-स्तेन अनभिव्यक्तमप्रकटं ब्रह्मवर्चसं ब्रह्मतेजो यस्य सः कुपटेन मलिनवस्त्रेणावृता कटिर्यस्य सः उरुमषिणातिमलिनेनोपवीतेनो-पलक्षणेन द्विजातिरिति संज्ञया अतज्ज्ञजनावमतः ॥ १० ॥

कर्मवेतनतः कर्मवेतनेन कर्ममूल्येन कणा दलितमुद्गादिनिष्कृष्टाः पिण्याकं तिलपिष्टं फलीकरणा तुषाः कुल्माषाः कीटदूषितमाषाः स्थालीपुरीषं स्थालीलग्नं दग्धान्नम् आदिना गतरसाद्यन्नसंग्रहः एतान्यप्यमृतवद्भुङ्क्ते ॥ ११ ॥

वृषलानां शूद्राणां पतिश्चौरराजः पुत्रकामः भद्रकाल्यै पुरुष-पशुमालभत आलब्धुं प्रवृत्तः ॥ १२ ॥

यं पुरुषपशुमालब्धुं प्रवृत्तस्तस्य पुरुषपशोः दैवान्मुक्तस्य बन्धन-विमुक्तस्य यथेष्टां दिशं पलायमानस्य पदवीं मार्गं तस्य वृषलपते-रनुचराः परिधावन्तोऽपि अनधिगतपशवः तं पलायमानं पशुमप्रा-प्येत्यर्थः तमसावृतायां निशि निशीथसमये अर्धरात्रावसरे आक-स्मिकेन विधिना दैवकृतेन योगेन अङ्गिरःप्रवरसुतमपश्यन् दृष्ट-वन्तः ॥ १३ ॥

अनवद्यानि शुद्धानि लक्षणान्यङ्गानि यस्य तमवमृश्या-वधार्य ॥ १४ ॥

पणयश्चोराः स्वविधिनाभिषिच्य आहतेन नूतनेन वाससा-च्छाद्य भूषणादिभिरुपस्कृतमलंकृतं वैशससंस्थया हिंसाविधानेन गीतादिघोषेण च सह पुरतोऽग्रे उपवेशयामासुः ॥ १५ ॥

अथानन्तरं वृषलराजस्य पणिः चोरभूतः पुरोहितः तदभिमन्त्रितं निशितं तीक्ष्णमसिं ... ॥ १६ ॥

भाषाटीका ।

उन भरतजी को दो पैरवाले पशु सरीके मनुष्य पागल है मूर्ख है बहिरा है ऐसे कहने लगे तब भरतजी तैसाही करने लगे तैसेही बोलने लगे दूसरे के कराने से काम करते थे वेगारसे मजूरीसे मागने से आपही मिलने से जो कुछ मीठा या खट्टा मिले तिसको खालेते कुछ इन्द्रिय प्रीति नहीं करते थे नित्यही सब निमित्तों को छोडदिये तिससे स्वयं सिद्ध निर्मल आनन्दानुभव आत्मलाभ के होनेसे सुख दुःख देह निमित्त द्वन्द्वमें देहाभिमानको छोडदिये ॥ ९ ॥

ठण्ड गरम पवन वर्षा मे बैलके तुल्य उघाडे ही रहते थे खूब शरीर से मोटे ताजी दीखते थे जमीन मे सोनेसे मर्दनादि न करने से शरीर मे रजके भरजाने से जैसे मणि मैला होने से रहता है तैसे ब्रह्म तेजको छिपाये रहते थे कमरमें मैलासा वस्त्र रखते बहुत मैला जनेऊ रखते थे तिसी से अज्ञानी मनुष्य कहते थे कि यह तो द्विज है अथवा अधम ब्राह्मण है इत्यादि ऐसे अपमान पाकर भरतजी पृथिवी में विचरते थे ॥ १० ॥

इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजउत्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्म्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्वैरस्य सर्वभूतसुहृदः सूनायामप्यननुमतमालम्भनं तदुपलभ्य ब्रह्मतेजसाऽतिदुर्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाट सैव देवी भद्रकाली ॥ १७ ॥

भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हन्तुकामेवेदं महाट्टहासमतिसंरम्भेण विमुञ्चन्ती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात्स्रवन्तमसृगासवमत्युष्णं सह गणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त च विजहार च शिरःकन्दुकलीलया ॥ १८ ॥

एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति ॥ १९ ॥

न वा एतद्विष्णुदत्त ! महदद्भुतं यदसम्भ्रमः स्वशिरश्छेदन आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रन्थीनां सर्वसत्त्वसुहृदात्मनां निर्वैराणां साक्षाद्भगवताऽनिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैः परिरक्ष्यमाणानां तत्पादमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानाम् ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

पारमहंस्यां संहितायां वैयासिक्याम्

भरतचरिते नवमोऽध्यायः ॥ ९ ॥

भाषाटीका ।

जब दूसरे से काम करने के मजूरी से आहार की इच्छा करते थे तब उनके भाइयो नें भी जब खेतीके काम मे रखदिया तो उसको भी करते थे परन्तु जमीन कहां पर ऊंची है कहां नीची है इस बात को नहीं जानते थे चावलकी कणी खली भूषा आदि जोकुछ मिले तिसको अमृत के तुल्य खाते थे ॥ ११ ॥

किसी समय पर किसी शूद्रों के राजाने पुत्रकी कामना से भद्रकाली देवी के वास्ते मनुष्य पशु मारने की तैयारी की ॥ १२ ॥

वह मनुष्य दैव योग से छूटकर भाग गया तब तिसके पीछे राजा के चाकर दौड़ते गये फिर अन्धेरी रात मे उस पशुके न मिलने से आधीरात बीती तब अकस्मात् दैव योग से मृग सूकर आदिकों से खेत की रक्षा करते हुये वीर आसन पर बैठे आङ्गिरा गोत्री भरत जी को उन दूतों ने देखा ॥ १३ ॥

तब वे लोग भरतजी को निर्दोष पशु जानकर अपने मालिककी कार्यसिद्धको समझकर रस्सीसे बांधकर प्रसन्नमुख होकर चंडिका के मंदिरको ले गये ॥ १४ ॥

इसके अनन्तर वे पुरोहितलोग अपनी विधिसे भरतजी को स्नान कराकर धौत वस्त्र से आच्छादित करके गहना चन्दन माला तिलकादि से युक्त करके भोजन कराकर धूप दीप माल्य लाह नये पत्ते अंकुर फल उपहार से युक्त जो हिंसा विधि तिससे बड़े भारी गाजा बाजा से उस पुरुष पशुको लेकर भद्रकाली के आगे बैठाते भये ॥ १५ ॥

इसके अनन्तर पुरोहित नामक चोरने पुरुष पशु के रक्त से भद्रकाली देवी का पूजन करने की इच्छा से काली के मन्त्र को पढकर बड़ा भयंकर तीक्ष्ण तरवार को हाथ में लिया ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

धनमद एव रजस्तेनोत्सिक्तं त्यक्तमर्यादं मनो येषां भगवत्कलायुक्तं वीराणां ब्राह्मणानां कुलं तुच्छीकृत्य यथेच्छं वर्तमानानां यत्कर्म तदुपलभ्य देवी उच्चचाट प्रतिमां त्यक्त्वा बहिर्निर्गता । कथम्भूतमालम्भनम् सूनायामप्यापत्कालेऽनुज्ञातायामपि हिंसायामननुज्ञातम् भद्रकालीत्यन्तं गद्यम् ॥ १७ ॥

अमर्षोऽपराधासहनं रोषश्च तयोर्वा दाहनं तयोरावेशस्तस्य रभसेन वेगेन विलसितं उत्तम्भितं भृकुटिलक्षणो विटपः शाखा कुटिला दंष्ट्राश्चारुणानीक्षणानि च तेषामाटोपः सम्भ्रमस्तेनातिभयानकं वदनं यस्या इदं जगद्धन्तुमुद्यतेव महान्तमट्टहासं सनादं हासं ततः स्थानादुत्पत्य विवृक्णानि छिन्नानि शीर्षाणि येषां गणेन परिवारेण सह शिरांस्येव कन्दुकानि तैर्या लीलया चिक्रीड च ॥ १८ ॥

ननु कथं देव्याराधकानामेवं विपरीतं फलं तत्राह । एवमेवेति । महदभिचाररूपोऽतिक्रमोऽपराधः ॥ १९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वसम्भावितमिदमेवं यन्मरणेऽप्यव्याकुलत्वं मारकेषु च क्रोधाभाव इत्यादि तत्राह । न वा इति । विमुक्तो देहाद्यात्मभावलक्षणः सुदृढो हृदयग्रन्थिर्यैः सर्वसत्त्वानां सुहृद आत्मानश्च ये तेषां नच तेषां देहाद्यभिमानसद्भावेऽपि मरणादिभयमस्तीत्याह । साक्षाद्भगवताभितो रक्ष्यमाणानां केन अनिमिषः कालः स एवारिचक्रं तेन वरायुधेन तैस्तैर्भावैश्चान्तर्यामितया प्रवर्त्यमानैर्भद्रकाल्यादिरूपैः न कुतश्चिदपि भयं यस्मिन् भागवतानां भगवदुपासकानां परमहंसानाम् ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतीत्थं तेषां वृषलानां रजस्तमःप्रचुराणां धनमद एव रजस्तेन उत्सिक्तममर्यादं मनो येषां भगवत्कथया युक्तं वीराणां ब्राह्मणानां कुलं कदर्थीकृत्य तुच्छीकृत्य उत्पथे दुर्मार्गे यथेच्छं विहरतां हिंसैव विहारो येषां तेषां यदतिदारुणमालम्भनरूपं कर्म तदुपलभ्य सैव भद्रकाली देवी ब्रह्मभूतस्य ब्रह्मसाम्यमापद्यमानस्य ब्रह्मर्षेराङ्गिरसः सुतस्य सूनायां हिंसायामप्यननुमतस्य दुर्विषहेण सोढुमशक्येन ब्रह्मतेजसातितरां दह्यमानं वपुस्तेन हेतुना सहसा आगूबचाट प्रतिमां त्यक्त्वा बहिर्निर्गताभूदित्यर्थः ॥ १७ ॥

अमर्षोऽपराधासहनं रोषश्च वपुषो दाहस्तयोरावेशस्य रभसेन वेगेन विलसितो विजृम्भितो भृकुटीलक्षणो विटपः शाखा कुटिला दंष्ट्राश्चारुणे ईक्षणे च तेषामाटोपः संभ्रमस्तेनातिभयङ्करं वदनं यस्या इदं जगद्धन्तुकामेव हन्तुमुद्यतेवाट्टहासं सनादं हासं मुञ्चन्ती ततः स्थानादुत्पत्य वृक्णानि छिन्नानि शीर्षाणि शिरांसि येषां तेषामतिगर्वितानां पापिष्ठानां कण्ठात्स्रवन्तं प्रसृतमत्युष्णमसृगासवं रुधिररूपं मद्यं परिषारेण सह निपीयाति अत्यन्तरुधिरपानजमदेन विह्वला परवशा स्वपार्षदगणैः सहोच्चैस्तरां जगौ गानं कृतवती ननर्त च शिरांस्येव कन्दुकानि तेषां क्रीडया विजहार विहारं कृतवतीव ॥ १८ ॥

ननु भद्रकाल्याराधनमेवं कथं विपरीतफलं तत्राह । एवमेवेति । महत्स्वभिचाररूपः हिंसारूपः हिंसारूपोऽतिक्रमोऽपराधः कार्त्स्न्येनात्मने अभिचारिणामेव फलति किल ॥ १९ ॥

नन्वेवमसंभावितमेवेदं यन्मरणाव्याकुलत्वं मारकेषु द्रोहाभावश्च तत्राह । न चैतदिति । हे विष्णुदत्त ! भागवतपरमहंसानां भागवताश्च ते परमहंसाश्च तेषामेवं विधानां स्वशिरश्छेदे आपतिते प्राप्तेऽपि यदसंभ्रमः यः असंभ्रमः इत्येतन्महदद्भुतमतीवाश्चर्यं न भवति परमहंसशब्दो विरक्तपरः आङ्गिरससुतस्य चतुर्थाश्रमप्रवेशाभावात् असंभ्रमे हेतुं वदन् विशिनष्टि मुक्तस्त्यक्तः देहादिष्वात्मभाव आत्माभिमानरूपः सुदृढो ग्रन्थिर्यैः सर्वेषु भूतेषु सुहृत्सौहार्दयुक्तः आत्मा मनो येषामत एव निर्वैराणां देहात्माभिमानाभावाद्वैराभावाच्च व्याकुलत्वाद्यभाव इति भावः देहात्माभिमानाविसत्त्वेऽपि न तेषां मरणभयमस्तीत्याह । साक्षाद्भगवताभिरक्ष्यमाणानां केन अनिमिषः कालः स एवारिचक्रं तेन वरायुधेनाप्रमत्तेनानलसेन तैस्तैर्भावैश्च भद्रकालीमारकप्रभृतिष्वपीश्वरात्मकत्वभावैश्चेति ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीर-
राघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उत्सिक्तमुच्छृङ्खलं मनो येषां ते तथा तेषां भगवत्कलासन्निहिताङ्गिरसकुलं कदर्थीकृत्य वृषलानां ब्रह्मर्षिसुतस्य भरतस्यालम्भनं हिंसनमतिदारुणं यत्कर्म तदुपलभ्य दृष्ट्वा ब्रह्मतेजसा शत्रुदहनलक्षणभरतस्य श्रीहरिसामर्थ्येन भृशं दन्दह्यमानेन देहेन युक्ता सा भद्रकाली सहसोच्चचाल "सद्योऽर्थः सहसा भृत" इति यादवः ॥ १७ ॥

या यष्टुमाकाङ्क्षिता सैवेत्येवशब्दार्थः किम्विशिष्टस्य सूनायां हिंसायामनभिमतस्यायोग्यस्य सर्वप्राणिहिंसका अपि ब्राह्मणहिंसां नानुमन्यन्त इति अमर्षरोषयोर्य आवेशः तस्य रभसेन कोलाहलेन विलसितः प्रकाशितः भृकुटिलक्षणो विटपः शाखा तथा कुटिलाभ्यां दंष्ट्राभ्यां चारुणानामीक्षणानामाटोपेन चातिभयङ्करं वदनं यस्याः सा तथा इदं जगद्धन्तुकामेवाट्टहासं कुर्वती ततः पूर्वस्थानादुत्पत्योत्थायागत्य वृक्णानि छिन्नानि शीर्षाणि येषां ते तथा तेषाम् ॥ १८ ॥

महत्स्वभिचारेण योऽतिक्रमः अनिष्टकरणं तदात्मने कर्त्रे कार्त्स्न्येनैकदेशमन्तरेण फलति परिपाकं प्राप्नोति ॥ १९ ॥

आश्चर्यमेतद्यदन्तकान्तिकानीतोऽपि ब्राह्मणस्तूष्णीमासेति राजाभिप्रायज्ञो बादरायणिराह । नवा इतीति । हे विष्णुरात ! परीक्षित्स्वशिरश्छेदन आपातितेऽप्यसम्भ्रम इति यदेतद्भागवतपरमहंसानामद्भुतं नवै नैवेत्यन्वयः विमुक्तो देहादावात्मभावलक्षणसुदृढहृदयग्रन्थिर्यैस्ते तथा तेषां सर्वसत्त्वानां सुहृदश्चात्मभूताश्च सर्वसत्त्वसुहृदात्मानः तेषां सुहृदात्मा मनो तेषां ते तथा तेषामिति वा "साक्षात्प्रत्यक्षतुर्ययो" इत्यभिधानात् साक्षाद्भगवत्तुर्यमूर्तेर्हरेरनिमिषारिवरायुधेन कालरूपचक्राख्यश्रेष्ठायुधेन तैस्तैर्भावैर्भद्रकाल्यादिसंज्ञैः परितो रक्ष्यमाणानामप्रमत्तेनेत्यनेन चक्रस्य चैतन्यमुपलक्षयति अत एव वैलक्षण्यसूचनाय भगवत अनिमिषेत्यपसन्धिः कृतः ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
नवमोऽध्यायः ॥ ९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

भगवतः कलानामवताराणां वीराः सेनान्यो ये भक्तास्तेषां कुलं कदर्थीकृत्य दुःखयित्वा स्वैरं विहरतां यत् कर्म तदुपलभ्य देवी उच्चचाट। प्रतिमां भित्त्वा बहिर्निर्जगाम यद्वा सैव प्रतिमारूपा देव्येव उच्चचाट भरततेजसा छिन्नभिन्ना बभूव ननु नर्मीयासिना भरतोऽच्छिन्नो बभूव इत्येवकारार्थो व्यक्तः सूनायामापत्काले स्वरक्षार्थमनुज्ञातायामपि हिंसायामननुज्ञातं सर्वथैव निषिद्धमाब्रह्मणनमित्यर्थः ॥ १७ ॥

अमर्षोऽपराधासहनं तद्धेतुकः कोपश्च तयोरावेशस्य योरभसो वेगस्तेन विलसितो विजृम्भितो भ्रुकुटिलक्षणो विटपः शाखा कुटिला दंष्ट्राश्च अरुणानीक्षणानि च तेषामाटोपेन प्रतापेन अतिभयानकं वदनं यस्याः सा इदं जगदपि तस्यैकस्य जगद्भर्तिनोऽपराधेनेत्यर्थः ॥ १८ ॥ १९ ॥

नन्वसम्भावितमेतद्यन्मरणेऽप्यव्याकुलत्वं मारकेषु क्रोधाभावस्तत्राह। नवेति। हे विष्णुदत्त! परीक्षित् विमुक्ता देहाद्यात्मभावलक्षणाः सुदृढा हृदयग्रन्थयः सर्वेषामेव सत्त्वानां स्वहन्तॄणामपि सुहृत्स्वरूपाणां न विद्यते निमिषमनवधानं यस्य तादृशमरि चक्रं तेन वरायुधेन करणेन भगवता कर्त्राऽप्रमत्तेन तैस्तैः प्रसिद्धैर्भावैर्भक्तवात्सल्यशिष्टपालनदुष्टनिग्रहाद्यैः ॥ २० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।

पञ्चमे नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

इत्थमेवं तेषां रजस्तमःस्वभावानां धनेन यो मदः स एव रजस्तमोत्सिक्तं निर्मर्यादं मनो येषां तेषां भगवत्कलाभिर्वेदादिभिर्युक्तं वीराणां ब्राह्मणानां कुलं कदर्थीकृत्य तुच्छीकृत्य उत्पथेन कुमार्गेण स्वैरं यथेच्छं विहरतां रममाणानां हिंसैव विहारो येषां तेषां ब्रह्मभूतत्वादिगुणवतः यदालम्भनात्मकर्मानदारुणं कर्म तदुपलभ्य सैव देवी अतिदुर्विषहेण ब्रह्मतेजसा दंदह्यमानं यद्वपुस्तेन हेतुना सहसा आशु उच्चचाट प्रतिमां हित्वा बहिर्निर्गताभूत् कथंभूतमालम्भनम् सूनायामपि आपत्काले अनुज्ञातायामपि प्राणिहिंसायाम् अननुमतमननुज्ञातम् ब्राह्मणवधस्य आपद्यपि निषिद्धत्वमित्यर्थः अतो बुभुक्षितो गरुडः आपदि कश्यपेन निषादग्रामसमूहभक्षणे अनुज्ञातस्तत्र यदि ब्राह्मणस्ते कण्ठं प्राप्स्यति स तदा त्वां दहेत् अतस्त्वया निवारणीय इतिमहाभारते स्थितम् ॥ १७ ॥

तदनन्तरं किंवृत्तमित्यत्राह। भृशमिति। भृशमत्यर्थम् अमर्षो व्यतिक्रमासहनं ततो रोषो व्यतिक्रमोक्तिर्नाशहेतुः क्रोधस्तस्यावेशस्य रभसेन वेगेन विलसित उत्तम्भितो भ्रुकुटिरूपो विटपः शाखापरपर्यायः कुटिला दंष्ट्राश्च अरुणानीक्षणानि च तेषामाटोपेन संभ्रमेणातिभयानकं वदनं यस्याः सा इदं विश्वं हन्तुकामेव महाट्टहासं सनादं विमुञ्चन्ती ततः उत्थायोत्पत्य तेनैवासिना विवृक्णानि विदारितानि शीर्षाणि येषां तेषां गलात्स्रवन्तमसृगासवं गणैः परिकरजनसमूहेन सह निपीय जगौ ननर्त शिरांस्येव कन्दुकानि तेषां लीलया चिक्रीड च भस्मान्ते इति शेषः ॥ १८ ॥

महत्सु अभिचारो द्रोहस्तन्निमित्तो नानाविधोऽपराधः ॥ १९ ॥

हे विष्णुदत्त! विमुक्तो देहेन्द्रियाद्यात्मभावलक्षणाः सुदृढा हृदयग्रन्थिर्येषां तेषां सर्वसत्त्वानां सुहृत् अनुकूलः आत्मा मनो येषाम् अनिमिषः सर्वमारकः कालः अरिवरं सर्वेभ्योऽरिभ्यश्च श्रेष्ठो वरं श्रेष्ठं सुदर्शनाख्यं चक्रं च इदं आयुधं यस्य तेन भक्तरक्षणे सदैवाप्रमत्तेन साक्षाद्भगवता तैस्तैर्भावैश्चान्तर्यामितया प्रवर्त्यमानैर्भद्रकाल्यादिरूपैः रक्ष्यमाणानाम् स्वशिरश्छेदे आपतिते प्राप्तेऽपि यदसंभ्रम इत्येतन्महदद्भुतं न भवति ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

नवमाध्यायार्थप्रकाशः ॥ ९ ॥

भाषाटीका

इस प्रकार से रजोगुण तमोगुण प्रकृतिवाले धन के मद से बड़े रजोगुणी हिंसा में विहार करनेवाले उन शूद्रों का तेजस्वी ब्राह्मणों के कुल का अपमान करके मर्यादा को छोड़कर इच्छा माफिक विहार करना इत्यादि कठिन कर्म साक्षात् ब्रह्मभूत ब्रह्मर्षि पुत्र निर्वैर सर्व सुहृत भरत जी का हिंसा करना जोकि नहीं करने के योग्य तिसको देखकर अति दुःसह ब्रह्म तेज से देवी का शरीर जलने लगा प्रतिमामें से देवी बाहर हो गई ॥ १७ ॥

तबतो देवी बड़े असह्य होने से रोषके आवेश होने से जो वेग तिस से देवी की शाखारूपी भृकुटी खड़ी होगई और टेढ़ी होगई टेढ़े भयंकर डाढ निकाल लिये लाल आंखें होगई तिनका जो संभ्रम तिससे बड़ा भयानक देवीका मुख होगया तब देवी ऐसी मालूम भई जैसे इस संसार को नाश करदेगी बड़े जोर से अट्टहास कर उहां से उछलकर उन्हीं के उसी तरवार को लेकर उन्हीं शूद्रों के कटेहुए गलों से गिरते हुये गरम मादक रक्त का सब गणों के साथ पान करके मदसे अति विह्वल

भाषाटीका ।

होकर पार्षदों के साथ ऊंचे स्वरसे गान करने लगी और नाचने लगी और मूडों की गेंदों से खेलने लगी ॥ १८ ॥

इसी प्रकार से महात्मा को अपमान करै तो अपने ऊपर पड़ता है ॥ १९ ॥

हे विष्णुदत्त ! परीक्षत जी यह बात कुछ बड़ी अद्भुत नहीं है जो कि अपने मस्तक के छेदन का समय आने से भी जिनके भय नहीं है देहादिक में से आत्मभाव छूटगये हैं जिनकी हृदय ग्रन्थि खुलगई है वे सर्व प्राणियों के सुहृद होगये हैं निर्वैर हैं साक्षात् चक्रायुध भगवान् सावधानतासे जिनकी रक्षा करते हैं तिन तिन भावों से वे रक्षित रहते हैं सुं प्रकार निर्भय भगत्पाद के वे आश्रित हैं परमहंस हैं उनका यह क्या आश्चर्य्य है ॥ २० ॥

इति श्रीभागवत पञ्चमस्कन्ध नवमाध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत।
समाप्त ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे नवमोऽध्यायः समाप्तः ॥ ९ ॥



दशमोऽध्यायः ।

श्रीशुक उवाच ।

अथ सिन्धुसौवीरपते रहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्ध एष पीवा युवा संहननाङ्गो गोखरवद्धुरं वोढुमलमिति पूर्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिबिकां स महानुभावः ॥ १ ॥

यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिबिकां रहूगण उपधार्य पुरुषानधिवहत आह हे वोढारः! साध्वतिक्रमत किमिति विषममुह्यते यानमिति ॥ २ ॥

अथ त ईश्वरवचः सोपालम्भमुपाकर्ण्योपायतुरीयाच्छङ्कितमनसस्तं विज्ञापयाम्बभूवुः ॥ ३ ॥

न वयं नरदेव! प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुमु ह वयं पारयाम इति ॥ ४ ॥

सांसर्गिको दोष एव नूनमेकस्यापि सर्वेषां सांसर्गिकाणां भवितुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसावृतमतिराह ॥ ५ ॥

अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रान्तो दीर्घमध्वानमेक एव ऊहिवान् सुचिरं नातिपीवा न संहननाङ्गो जरसा चोपद्रुतो भवान् सखे! नो एवापर एते संघट्टिन इति बहुविप्रलब्धोऽप्यविद्यया विरचितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनि संस्थानविशेषेऽहंममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिबिकां पूर्ववदुवाह ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दशमे क्षिपता राज्ञा शिबिकां स्वां वहन्मुनिः ।
स्वगुर्वादानुवादेन विज्ञायाशु प्रसादितः ॥ १ ॥
एवं भूतविकारित्वमज्ञसर्वज्ञयोः समम् ।
इति सर्वज्ञतासिद्ध्यै रहूगणकथेरणम् ॥ २ ॥

रहूगणो नाम सिन्धुसौवीरदेशयो राजा तत्त्वजिज्ञासुः कपिलाश्रमं यदा गच्छति स्म तदा यद्वृत्तं तदाह । अथेति । इक्षुमत्या नद्यास्तीरे तेषां शिबिकावाहानां कुलस्य नाथेन एष गौरिव खर इव च भारं वोढुं समर्थ इति धिया पूर्वं ये केचन विष्ट्या बलाद्गृहीतास्तैः सह प्रसभं बलाद्गृहीतः सन् अतदर्होऽपि स महानुभावः शिबिकामुवाहेत्यन्वयः ॥ १ ॥

हिंसा परिहारार्थं इषुमात्रप्रदेशावलोकस्यानु पश्चात् या गतिस्तस्या हेतुभूतायाः पुरुषाणां गतिः न सम्यगाहिता एकरूपा नाभूत् ॥ २ ॥

सोपालम्भं साक्षेपं सामदानभेददण्डेषु उपायेषु चतुर्थाच्छङ्कितचित्ताः ॥ ३ ॥

भवन्नियमानुपथास्त्वदाज्ञानुवर्तिनः न पारयामो न शक्नुमः ॥ ४ ॥

कृपणानां वचो निशम्य सांसर्गिकः संसर्गनिमित्त एकस्यापि दोषः सर्वेषामेव भवितुमर्हतीति निश्चित्य रहूगण आहेत्यन्वयः । कथम्भूत उपासिता वृद्धा येन सोऽपि स्वभावेन बलात् परवशः कृतः सन् कथम्भूतं प्रत्याह न विस्पष्टं ब्रह्मतेजो यस्मिन् भस्मनाच्छन्नमग्निमिव स्थितम् ॥ ५ ॥

भ्रातरिति सम्बोधनमाक्षेपाभिप्रायं व्यक्तं निश्चितम् उरु अधिकं परिश्रान्तोऽसीत्यादीनि विपरीतार्थानि वक्रवाक्यानि । ऊहिवान् प्रापितवान् । तत्रापि सुचिरं जरसा च वृद्धत्वेन । सङ्घट्टिनः सहचरा बहु यथा भवत्येवं विप्रलब्धोऽपि वक्रोक्त्या उपहसितोऽपि तूष्णीमुवाहेत्यन्वयः । तूष्णीम्भावे हेतुः अविद्यया रचिता द्रव्यादयो यस्मिन् तस्मिन् स्वचरमकलेवरेऽनध्यारोपितः मिथ्याप्रत्ययो येन । तत्र द्रव्याणि महाभूतानि गुणा इन्द्रियाणि कर्माणि पुण्यपापानि आशयोऽन्तःकरणं यतो ब्रह्मभूतः ॥ ६ ॥

अथ पुनः स्वशिबिकायां विषमगतायां प्रकुपित उवाच रहूगणः किमिदमरे त्वं जीवन्मृतो मां कदर्थीकृत्य भर्तृशासनमतिचरसि प्रमत्तस्य च ते करोमि चिकित्सां दण्डपाणिरिव जनताया यथा प्रकृतिं स्वां भजिष्यस इति ॥ ७ ॥

एवं बह्वबद्धमपि भाषमाणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्वभूतसुहृदात्मा योगेश्वरचर्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मामनादृत्य भर्तुः स्वामिनो मम शासनमाज्ञामतिक्रामसि ॥७॥

चिकित्सां शास्तिं दण्डपाणिर्यमो यथा जनसमूहस्य शास्तिं करोति तथा स्वां प्रकृतिम् अप्रमत्तताम् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं मृत्युभयासंभ्रममभिधायाथ परावरज्ञानवत्तां प्रपञ्चयितुमाह । अथेति । सिन्धुसौवीरदेशयो राज्ञः रहूगणाख्यस्य कपिलमुनिं प्रष्टुं तत्त्वमिति शेषः तत्त्वजिज्ञासोर्व्रजतो गच्छतः सत इक्षुमत्या नद्यास्तीरे शिबिकाया आन्दोलिकाया ये वाहका वोढारस्ते यामन्वेषणसमये तेषां वाहकानां कुलस्य पत्या नाथेन स आङ्गिरससुतो द्विजश्रेष्ठो दैवादुपसादितो लब्धः पीवा पुष्टावयवः युवा संहननाङ्गः सुदृढाङ्गप्रत्यङ्गसन्धिरेव गौरिव खर इव धुरं भारं वोढुमलं समर्थ इतिधिया पूर्वं ये विष्ट्या बलाद्गृहीतास्तैः सहितः सन्नतदर्होऽपि स महानुभावः शिबिकामुवाह ऊढवान् ॥ १ ॥

यदाहि शिबिकावाहनसमये द्विजवरस्येषुमात्रप्रदेशावलोकस्यानु पश्चाद्या गतिः कुटिला तस्या हेतुभूतायाः पुरुषाणां गतिर्न सम्यगाहिता एकरूपा नाभूत इषुमात्रप्रदेशगत्यवलोकनानन्तरद्विजसंबन्धिप्रातिकूल्यगतिनिमित्तवैषम्ययुक्ता पुरुषगतिरभूदित्यर्थः तदा विषमगतां सविषममूह्यमानां स्वशिबिकामुपधार्य दृष्ट्वा रहूगणः अभिवहतः वाहकान्पुरुषानाह उवाच उक्तिमेवाह । अहो इति । अहो वोढारः ! हे वाहकाः ! साधु सम्यगतिक्रमत पादविक्षेपान् कुरुत किमिति किमर्थं यानं शिबिका विषमं यथा तथोह्यत इति ॥ २ ॥

अथ एतदुक्त्यनन्तरं ते वोढारः सोपालम्भं साक्षेपम् ईश्वरस्य भर्तुः रहूगणस्य वच आकर्ण्य उपायेषु सामदानादिभिर्भेदेषु यस्तुरीयश्चतुर्थः तस्माच्छङ्कितमनसः निग्रहरूपादुपायाच्छङ्कितचित्ताः अस्मान् दण्डयेदिति बुद्ध्येत्यर्थः तं यानस्य विषमगतिहेतुकं द्विजम् आङ्गिरससुतं विज्ञापयांबभूवुः विज्ञप्तिपूर्वकं कथयामासुरित्यर्थः विज्ञप्तिपूर्वकत्वमेवाह । नेत्यादिना पारयाम इत्यन्तेन । हे नरदेव ! वयं न प्रमत्ताः किन्तु भवन्नियमानुवर्तिनः साध्वेव सम्यगेव वहामः अयं पुरुषोऽद्यैव नियुक्तोऽस्माभिस्सह द्रुतं नैव गच्छत्यतो वयमनेन सह वोढुं न पारयामः न समर्थाः ॥३॥

इति कृपणानां वचो निशम्य संसर्गनिमित्त एकस्यापि दोषः सर्वेषामपि बाधितुमर्हति नूनमिति निश्चित्य रहूगण आहेत्यन्वयः कथम्भूत उपासिता वृद्धा येन सोऽपि स्वभावेन प्राकृतेन बलात्परवशः कृतः रजोगुणव्याप्तचित्तः कुपितमनाः सन् कथम्भूतं प्रत्याह न स्पष्टं ब्रह्मतेजो यस्मिन् रजसा भस्मना आवृतं प्रच्छन्नं जातवेदसमग्निमिव स्थितम् ॥ ४—५ ॥

उक्तमेवाह । अहो इत्यादिना संघट्टिन इत्यन्तेन । अहो भ्रातरिति संबोधनमाक्षेपाभिप्रायकं व्यक्तं निश्चितम् उर्वधिकं परिश्रान्तोऽसीत्यादीनि विपरीतार्थकानि षड्वाक्यानि एक एवोढवान् तथापि सुचिरं जरसा वृद्धत्वेन च उपद्रुतः दौर्बल्यं प्राप्तो भवानपरे त्वद्व्यतिरिक्ता एते संघट्टिनः सह वाहका नो एव दीर्घाध्वगमनादिकमकृत्वैव सुखिनस्तिष्ठन्तीत्येवं बहुविप्रलब्धोऽधिक्षिप्तोऽपि ब्राह्मणस्तूष्णीं पूर्ववदुवाह तत्र हेतुं वदन् विशिनष्टि । अविद्ययाहंकारममकाररूपया कर्मसंज्ञया वा हेतुभूतया विरचिताः परिणताः द्रव्याणि पञ्चमहाभूतानि गुणाः शब्दादयः ज्ञानेन्द्रियविषयाः कर्माणि वागादिकर्मेन्द्रियविषयाः अभिजल्पादयः गुणकर्मशब्दौ तदिन्द्रियाणामप्युपलक्षणौ आशयोऽन्तःकरणं वासना वा यस्मिन्नवस्तुनि वसत्येकरूपेणेति वस्तु ततोऽन्यस्मिन्सततविकारिणीत्यर्थः अवयवविन्यासविशेषरूपे स्वकर्मकलेवरे तदनुबन्धिनि च अनारोपितः अहंममेत्येवंरूपो मिथ्याप्रत्ययो ज्ञानं येन अनहमर्थे शरीरे अहंप्रत्ययः रजतादिप्रत्ययवत् मिथ्येति मिथ्याप्रत्यय इत्युक्तम् ब्रह्मभूतः ब्रह्मसाधर्म्यमापत्स्यमानः तस्य ब्रह्मभावस्य सान्निध्यात्सिद्धवन्निर्देशः ॥ ६ ॥

अथ पुनः शिबिकायां विषमं नीयमानायां सत्यां रहूगणः प्रकुपितः पूर्वमीषत्कुपित आह । इदानीं तु प्रकुपित आहेति प्रकुपितस्यैवोक्तिमाह । किमित्यादिना भजिष्यस इत्यन्तेन । इदं किमित्याश्चर्यातिलङ्घित्वं दर्शयति । अरे त्वं भवान् जीवन्नपि मृतप्रायः मां कदर्थीकृत्य तुच्छीकृत्य भर्तुर्मम शासनमतिचरस्यतिक्रम्य वर्तसे ततः प्रमत्तस्य ते चिकित्सां दण्डं करोमि दण्डपाणिर्यमश्च जनसमूहस्य यथा त्वं स्वां प्रकृतिं भजिष्यसि समीचीनां करिष्यसि तथा चिकित्सां करोमीति ॥ ७ ॥

एवं बहुधिकमबद्धमनान्वितमभिभाषमाणं नराणां देवोऽहमित्यभिमानवन्तं तमसानुविद्धेनानुसक्तेन रजसा रजोगुणकार्येण क्रोधेन तन्मूलभूतमदेन सम्मोहितेन तिरस्कृताशेषभगवत्प्रियनिकेतनं भगवत्प्रियनिकेतनशब्दो भागवतपरः भगवतः प्रियनिकेतनत्वात् तिरस्कृता अशेषा भगवत्प्रिया निकेतना येन सः एतत्तिरस्कारेण सर्वेऽपि भागवतास्तिरस्कृतप्राया एवेत्यभिप्रायेणाशेषपदं प्रयुक्तं यद्वा तिरस्कृतः अशेषः सम्पूर्णः भगवतः प्रियः आश्रयो येनेति च पण्डितमात्मानं मन्यमानं योगीश्वराणां चर्या जडादिवदाचरणं तस्यां नात्यन्तव्युत्पन्ना परिचिता मतिर्यस्य तं रहूगणं सर्वभूतसुहृदात्मा कृतागस्यपि सौहृदयुक्तमनाः ब्रह्मभूतो भगवान् जगदुत्पत्त्यादिज्ञानवान् ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

ततः स ब्राह्मणः भरतः विगतस्मयः विगताश्चर्योऽपि स्मयमानो हसन्निव अनेन सुप्रसन्नता द्योत्यते इद वक्ष्यमाणमाह ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र पुरुषान्तरसम्वादबाहुल्येन श्रद्धातिशयो भवतीति पुनरपि पञ्चमाध्यायेषु हरेस्तत्त्वं निरूपयति । तदर्थं ब्राह्मणरहूगणयोः संल्लापं घटयितुमाह । अथेति । इक्षुमत्या नद्यास्तटे कस्मिंश्चिदाश्रमे स्थितं कपिलं मुनिं द्रष्टुं व्रजतो रहूगणस्यान्दोलिकावाहकपुरुषान्वेषणावेलायां तस्य राज्ञः कुलपतिना प्रधानपुरुषेण दैवेनादृष्टप्रेरकेण हरिणोपसादितः प्रापितः एष पीवा पुष्टः खरवत् धुरं शिबिकां वोढुमलं समर्थ इति निश्चित्य प्रसभं पूर्वविष्टिगृहीतैर्वाहकैः सह गृहीतोऽतदर्हः वहनायोग्यः स ब्राह्मणः शिबिकामुवाहेत्यन्वयः किं चित्रमिदमिति तत्राह । स हीति । स ब्राह्मणो महानुभावो हि यस्मात्तस्माद्ब्राह्मणेन वाहयितृत्वमनुपपन्नमिदमस्यात्यन्तायोग्यं महासामर्थ्योपेतत्वादित्यर्थः ॥ १ ॥

युगमात्रप्रदेशस्यावलोको दर्शनं युगमात्रावलोकः तदनुकूला गतिर्गमनं यस्य स तथा तस्य गत्या अन्येषां वाहकानां पुरुषाणां गतिर्न समन्विता न भवति यदा तदा रहूगणः अभिवहतो वोढ्रनाहेत्यन्वयः अतिक्रमत पदं निक्षिपत ॥ २ ॥

सोपालम्भं सतर्जनमीश्वरस्य राज्ञः वचः तुर्योत्सामाद्युपायानाम मध्ये चतुर्थाद्दण्डात् ॥ ३ ॥

भवतां नियमोऽनुशासनं तस्यानुपथा अनुगुणमार्गाः क्रुतमस्मद्गमनानुवृत्तिं न व्रजाति पारयामः पारं गच्छामः ॥ ४ ॥

नूनमिदानीमेकस्य सांसर्गिकः सम्बन्धात्सम्भूतः सम्भावनामात्रं नतु तात्त्विकं विचारासहत्वादितीममर्थमपिना सूचयति अयं दुष्ट इति निसर्गेण निश्चयेन सिन्धुविषयस्याधिपतिरहमित्यभिमानबलात्कृतः पूर्णः स्वभावान्तरं राजसं प्राप्त इति वा अत एवोत्थितकोपः ॥ ५ ॥

अहो कष्टमित्याद्याक्षेपाः विपरीतार्था वेदितव्याः भ्रातः सखे ! इत्याक्षेपे सम्बोधनं ज्ञातव्यं लोके भ्रात्रादिभिः सह विरोधो नान्यैरित्यत एतादृशैः शब्दैः सम्बोधनं कृतमित्यर्थः संकुचितः सह वाहकाः ॥ ६ ॥

इत्येवम्विप्रलब्धोऽपि भर्त्सितोऽपि तूष्णीं भूत्वा शिबिकामुवाहेत्यन्वयः तूष्णीम्भावे कारणमाह । ब्रह्मेति । ब्रह्मभूतः ब्रह्मनिविष्टमना इत्यर्थः अत्रापि कारणमाह । चरमेति । इतः परं भौतिकं शरीरग्रहणं नास्तीति द्योतनाय चरमेति स्वत्वेनाभिमतेऽन्त्यदेहे न अध्यारोपितो मिथ्याप्रत्ययो येन स तथा अनात्मनि कर्तृत्वाभिमानो मिथ्याप्रत्ययः तत्त्वनिर्वाच्यलक्षणः कस्माच्छरीरस्य हेयत्वमिति तत्राह । अवस्तुनीति । अवस्तुत्वादनित्यत्वादित्यर्थः तदपि कुत इत्यत्राह । संस्थानेति । अवयवविन्यासविशेषत्वादृष्टत्वादित्यर्थः केन विन्यासविशेष इत्यत्राह । अविद्ययेति । हरीच्छया प्रेरितया प्रकृत्या विहितानां द्रव्याणां पञ्चभूतानां गुणानां सत्त्वादीनां कर्मणां पुण्यपापलक्षणानामाशयः समूहो यस्मिंस्तत्तया द्रव्यादीन्याशेरते यस्मिन्निति वा विहितद्रव्यगुणकर्माशयं च स्वचरमकलेवरं चेति विग्रहस्तस्मिन् विचिकित्सया किम्फलमत्राह । यथेति । प्रकृतिं समस्वभावम ॥ ७ ॥

एवं राज्ञोपालब्धो ब्राह्मणः किमकरोदित्याह । एवमिति । अनन्याभिभाषणे कारणमाह । रजसेति । फलान्तरमाह । तिरस्कृतेति । अशेषा ये भगवत्प्रिया भागवतास्तत्कालगतमनुष्यास्तेषां निकेत आश्रयः विप्रजन्मा यः स भरतोऽशेषभगवत्प्रियनिकेतः तिरस्कृतो धिक्कृतोऽशेषभगवत्प्रियनिकेतो येन स तथा तं मनुष्यपदं प्रक्षिप्य किमिति समस्यत इतीयं शङ्का तत्कालस्थितभक्तेषु मानुषेष्वपि भागवतोऽपि धिक्कृतो राज्ञा सुहृदा वैष्णवेष्वपीत्यनेन परिहर्तव्येति मत्वा भूतसुहृदो वैष्णवास्तेष्वात्मा यस्य स तथा अत एव सुहृदा वैष्णवेष्विति तर्हि किमिति धिक्कार इत्यत उक्तं योगेश्वर्गति योगेश्वराणां चर्यायां शुश्रूषायां व्यवहारे वा नातिव्युत्पन्नमतिनाऽपरस्तबुद्धि स्मयमान इत्येतावशब्दो मन्दहासस्य स्वरूपभूतत्वं दर्शयति स्मयो नामकश्चन दोषः स विगतो यस्मात्स तथा इदं राज्ञ आक्षेपवचनानामुत्तरम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अस्य च श्रीभरतस्य भागवतपरमहंसत्वात्तद्गतगुणसंक्रान्तत्वेन सर्वत्र समस्यापि भक्तवात्सल्यं परमस्त्येव । ननु भजतोऽपि न वै कश्चिदिति न्यायेनान्येषामात्मारामाणामिव तत्राप्यौदासीन्यमिति महागुणान्तरं दर्शयितुमाह । अथ सिन्धिवेति ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥

परिश्रान्तोऽस्मीति टीकादृष्टमपि सर्वत्र नास्ति परिश्रान्त इत्येव सर्वत्र पाठः ॥ ६—७ ॥

ब्रह्मभूतः देहद्वयावेशरहितः ॥ ८—१४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वहन्तं शिबिकां क्षीयकट्यर्थंकृतं मुनिम् ।
ज्ञात्वा राजावरुह्याशु तुष्टाव दृशाम स्फुटम् ॥

तदेवं श्रीभरतः कणापिशाचादिभिः स्वपालकेषु भ्रात्रादिषु तत्प्रतिषेधितेषु च कर्मित्वाद्राजमंत्र्यपि कृपाञ्चकारैव यतो बहुकालमपि तेभ्यः स्वदर्शनं ददौ तथैव वृषलराजे दुराचारमत्तत्वादतितामसं व्रघातकेऽपि कृपाञ्चकारैव यतस्तेनापि प्रकारेण स्वस्य देव्याश्च साक्षाद्दर्शनं जन्मान्तरेऽपि तन्मुक्तिकारणं कारयामासैव तथैव रहूगणे ज्ञानित्वात् सात्त्विके राजत्वाच्च रजसा शिबिकां वाहयत्यपि कृपाञ्चकारेति तत्र रजस्तमसोः प्रकाशकत्वाभावात् सत्त्वस्य तु प्रकाशकत्वात् रहूगण एव भरतस्य भक्तिज्ञानादिप्रकाशो न पूर्वयोरिति ज्ञापयन् तदुपाख्यानमारभते । अथेति । परमहंसत्वेन सर्वत्र तस्य साम्यस्योचित्येऽपि महाभागवतत्वादेव कृपात्वाल्पेया भरतस्य भक्तिज्ञानवैराग्यादिकं भगवत्कृपया ज्ञानगुणी बभूवेति एतत् कथं ज्ञायेतेत्येतदर्थं रहूगणोपाख्यानमिति च केचिदाहुः । सिन्धुसौवीरदेशयोर्नृपस्य तेषां शिबिकावाहानां कुलपतिना पीवा पुष्टाङ्गः संहननाङ्गो गतिप्रसभं बलात् कृतं यथा स्यात्तथा गृहीतः अलं समर्थ इति मनसि विमाद्येत्यर्थः ॥ १ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

हिंसापरिहारार्थमिषुमात्रप्रदेशावलोकनानन्तरमेव या गतिस्तस्या हेतोः पुरुषाणां गतिर्न समाहिता न सम्यगाहिता एकरूपा नाभूत् ॥ २ ॥

ईश्वरस्य राज्ञो वचः सोपालम्भं साक्षेपमुपायेषु सामदानभेददण्डेषु मध्ये तुरीयात् चतुर्थात् दण्डात् ॥ ३ ॥

न वयं प्रमत्ताः किं तु भवदाज्ञानुवर्त्तिन एव ॥ ४ ॥

निसर्गेण राजत्वाद्राजसस्वभावेन बलात्कृतः बलात्कारविषयीकृतः जातवेदसमग्निं भस्माच्छादितमिव ॥ ५ ॥

भ्रातरित्याक्षेपाभिप्रायं सङ्घट्टितः सङ्गिनः विप्रलब्धः विपरीतलक्षणया उपहसितः तेन त्वं न श्रान्तोऽसि यतोऽधुनैवात्र नियोजितः अतिपीवा भवसि दृढाङ्गश्च भवसि युवा चासि एते अन्ये तव सङ्गिनश्च तदपि विरुद्धगत्या वोढुं न शक्नोमीति मयि राजन्यपि दुष्टतां किं प्रकाशयसीत्यर्थः । विप्रलब्धोऽपि तूष्णीमुवाह । तत्र हेतुः अविद्यया मायया रचिता द्रव्यादयो यस्मिन् तत्र स्वचरमकलेवरे न अध्यारोपितो मिथ्याप्रत्ययो येन तत्र द्रव्याणि भूतानि गुणा इन्द्रियाणि कर्माणि पुण्यपापानि आशयोऽन्तःकरणं अवस्तूनि कलेवरस्य प्राधानिकत्वेन वस्तुत्वेऽपि स्वस्य तत्सम्बन्धाभावादेवेति भावः यतो ब्रह्मभूतः यद्यपि भरतस्य तच्छरीरं शुकदेवादीनामिवाप्राकृतत्वादनश्वरं नित्यमेव तदपि तस्य तदानीमुत्पन्नप्रेमत्वादेव भगवन्तं विना अन्यत्र स्वदेहादौ ममत्वासम्भवात् तदानीं तेन देहेन साक्षात् सेवाया अलाभाद्वीतकण्ठ्यवृद्ध्यानिर्वैन्येनाहं त्वदस्यापनपेक्षणात् सर्वज्ञत्वेऽपि तत्र स्वदेहे प्राकृतत्वभानमेवातस्तत्सम्मत्या श्रीशुकदेवेनापि तत्प्राकृतमिव वर्णितं वस्तुतस्तु स्वसम्मत्या तदप्राकृतमेव व्याख्यातं सा व्याख्या च यथा अविद्यया मायया न निहिता द्रव्यगुणकर्माशया यत्र तथा भूते स्वस्य चरमेऽवशिष्टे पूर्वपूर्वेभ्यो नष्टेभ्यः कलेवरेभ्योऽवशिष्टेऽनश्वर इत्यर्थः । यद्वा सुष्ठु अचरमे अनिकृष्टे कलेवरे कर्मारब्धत्वाभावाद्वस्तुनि परमसत्ये सम्यगवस्थानविशेषो वैकुण्ठलोको यस्य तस्मिन्नपि प्रेमोत्थदैन्योदयादेव प्राकृतदेह इव अहं ममेति न अध्यारोपितो मिथ्याप्रत्ययो येन सः ॥६-७॥

अपक्वमनन्वितमनुविक्तेन प्रार्थितेन तिरस्कृतः अशेषः सम्पूर्णो भगवतः प्रियो निकेत आश्रयो भरताख्यो येन तं सर्वभूतसुहृत् स्वरूपः स्वापराधिन्यपि कृपालुरित्यर्थः । पण्डितमानिनोऽपि तस्य किञ्चिन्मात्रज्ञानित्वं सर्वज्ञत्वेनैव ज्ञात्वेत्यर्थः । योगेश्वराणां चर्यां जडादिवदाचरणं तस्यां तज्ज्ञानेऽत्यर्थः स्मयमान इत्यसौ स्वं ज्ञानिनं जानात्यथ चाज्ञानिवदुक्तिरिति इयेति तस्य वहिरनिष्क्रमात् विगतस्मयः ज्ञानित्वगर्वरहितः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं द्विजवरस्य शिरश्छेदप्रसङ्गेऽपि निर्विकारत्वमुक्त्वाथ शिविकोद्वहनदुर्वचनश्रवणादावपि निर्विकारत्वं वर्णयति दशमेनाध्यायेन । अथेति । तत्त्वजिज्ञासोः रहूगणस्य कपिलाश्रमं व्रजतः शिबिकावाहपुरुषान्वेषणसमये तेषां शिविकावाहानां कुलस्य पतिना स द्विजवर उपलब्धः प्राप्तः पीवा पुष्टः संहननाङ्गः सुदृढावयवः एष गौरिव खर इव धुरं भारं वोढुमलं पर्याप्तः इति बुद्धया पूर्वं ये विष्टया "विष्टिः कर्मकरे मूल्ये भद्राऽऽज्ञाप्रेरणेषु च" इति हैमकोशात् बलात्प्रेरणेन गृहीतास्तैः स शिविकामुवाहेत्यन्वयः कथंभूतः प्रसभं बलादेव गृहीतः सन् अतदर्होऽपि स महानुभावः ॥ १ ॥

यदा शिविकोद्वहनसमये पिपीलिकादिहिंसापरिहारार्थम् इषुपरिमितप्रदेशावलोकस्यानुपश्चाद्या गतिस्तस्या हेतुभूतायाः पुरुषाणामन्येषां वोढॄणां गतिर्न सम्यगाहिता एकरूपाभूत् तदा रहूगण आह ॥ २ ॥

ईश्वरस्य प्रजारक्षितुः सोपालम्भं साक्षेपं वचः उपायेषु सामदानभेददण्डेषु चतुर्थोच्छङ्कितचित्ताः तं द्विजवरं विज्ञापयांबभूवुः ज्ञापितवन्तः ॥ ३ ॥

हे नरदेव ! वयं प्रमत्ताः अनवहिता न किं तु भवन्नियमानुपथाः भवदीयाज्ञानुसारिणः द्रुतं शीघ्रं न व्रजति अतोऽनेन सह वोढुं न पारयामः न शक्नुमः ॥ ४ ॥

अथ रहूगणः कृपणानां तेषां वचो निशम्य श्रुत्वा सांसर्गिकः संसर्गनिमित्तः एकस्यापि दोषः सर्वेषां संसर्गिणामेव भवितुमर्हतीति निश्चित्य उपासितवृद्धोऽपि रजसावृतमतिर्निसर्गेण राजसस्वभावेन बलात्परवशः कृतः न विस्पष्टं ब्रह्मतेजो यस्मिन् तं रजसा भस्मना छन्नं जातवेदसमग्निमिव वर्त्तमानं प्रत्युवाच ॥ ५ ॥

तदाह । अहो इत्यादिना । हे भ्रातः ! त्वकं निश्चितमुर्वधिकं परिश्रान्तो दीर्घमध्वानमेक एवोढवान् प्रापितवान् तत्रापि सुचिरं नातिपुष्टः कृशोऽसि भवान् न संहननाङ्गः ' शिथिलावयवश्च जरसा च भवाननुपद्रुतः संघट्टिनः सहचराः इत्येवं बहु यथा भवति तथा विप्रलब्धोऽपि विपरीतार्थैर्वाक्यैरुपहसितोऽपि अविद्यया अचेतनस्वरूपया भगवन्मायया विहिता रचिता द्रव्यादयो यस्मिन् स्वचरममकलेवरे अवस्तुनि वस्तु आत्मा तद्भिन्ने संस्थानविशेषे आकारविशेषे अनध्यारोपितः देहोऽस्मीति मिथ्याप्रत्ययो येन सः शिविकां तूष्णीं पूर्ववदुवाह ॥ ६ ॥

विषमगतायां विषमं नीयमानायां सत्यां भर्तुः स्वामिनो मे शासनमाज्ञामतिक्रामसि चिकित्सां शास्तिम ॥ ७ ॥

अनुविक्तेन युक्तेन तिरस्कृतः अशेषस्य साङ्गोपाङ्गस्य ध्येयस्य भगवतः प्रियो निकेतो ध्यानरूप आश्रयो येन तं ब्रह्म अशेषो भगवान् भूतमनुभूतं ध्याने साक्षात्कृतं येन सः स्मयमानः स्वभावादेव हसन्निव विगतस्मयो विगतगर्वः ॥ ८ ॥

भाषाटीका ।

श्री शुकदेवजी बोले इसके अनन्तर सिन्धु सौवीर देश का पति राजा रहूगण नाम का किसी समय में ब्रह्मविद्या सीखने को कपिलजी के आश्रम को जाता था तब इक्षुमती नदी के किनारे पर पालकी ढोने वाले मनुष्यों के मालिक ने दुवाने को कोई मनुष्य ढूंढा उस समय दैवयोग से श्रीभरतजी मिले तब तिसने इनको देखा कि मोटा ताजा है जवान है दृढ शरीर वाला है तब समुझा कि बैल गधा सरीका खूब बोझा ढोवैगा. इस बुद्धि से पहिले पकडे

॥ ब्राह्मण उवाच ॥

त्वयोदितं व्यक्तमविप्रलब्धं भर्तुः स मे स्याद्यदि वीर ! भारः ।
गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः ॥ ९ ॥
स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च ।
निद्रा रतिर्मन्युरहं मदः शुचो देहेन जातस्य हि मे न सन्ति ॥ १० ॥
जीवन्मृतत्वं नियमेन राजन्नाद्यन्तवद्यद्विकृतस्य दृष्टम् ।
स्वस्वाम्यभावो ध्रुव ईड्य ! यत्र तर्ह्युच्यतेऽसौ विधिकृत्ययोगः ॥ ११ ॥
विशेषबुद्धेर्विवरं मनाक्च पश्यामि यन्न व्यवहारतोऽन्यत् ।
क ईश्वरस्तत्र किमीशितव्यं तथापि राजन् ! करवाम किं ते ॥ १२ ॥
उन्मत्तमत्तजडवत्स्वसंस्थां गतस्य मे वीर ! चिकित्सितेन ।
अर्थः कियान् भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः ॥ १३ ॥

॥ श्रीशुक उवाच ॥

एतावदनुवादपरिभाषया प्रत्युदीर्य मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्मारब्धं व्यपनयन्राजयानमपि तथोवाह ॥ १४ ॥

भाषाटीका ।

बेगारीयों के साथ इनको भी पकड़लिया यद्यपि ये इस लायक नहीं थे तथापि जबरदस्ती करने से महानुभाव होने से पालकी को ढोने लगे ॥ १ ॥

जब हिंसा के भय से एकबाण के आगे पर्यन्त दृष्टि करके जीवों को बचाकर चलने से सबकी चाल उनके साथ नहीं मिली तब पालकी को ऊंची नीची होती देखकर ढोने वाले मनुष्यों से रहूगण बोले हे ढोने वाले ! अच्छे चलो क्यों पालकी को टेढ़ी करते हो ॥ २ ॥

तब तो वे सब लोग राजाके भयानक वचन को सुनकर मारने से शङ्कित होकर भरतजी को राजा के आगे बताने लगे ॥ ३ ॥

वे लोग बोले हे राजन् ! हम लोग प्रमाद नहीं करते हैं आपके हुकम पर चलते हैं अच्छे हीं ढोते हैं यह मनुष्य अभी पकड़ागया है यह जल्दी नहीं चलता है इस के साथ हम लोग नहीं ढोसकते हैं ॥ ४ ॥

निश्चित है कि सङ्गका दोष एक का हो तो भी सब सङ्गवालों को लगता है इस प्रकार से उनके दुःखित वचनों को श्रवण करके रहूगण राजा वृद्धों के उपासना करने वाले हैं तौ भी स्वभाव के परवश होने से कुछ कुपित होकर रजोगुण की बुद्धि से छिपी हुई अग्नि सरीके छिपे ब्रह्मतेजवाले ब्राह्मण श्रेष्ठ भरतजी से बोले ॥ ५ ॥

हे भाई ! मालूम होता है कि तू बहुत श्रमित होगया है यहीं रस्तातक अकेला ही ढोलाया है बड़ी देर भई तू तो बड़ा मोटा नहीं है दृढ शरीर वाला नहीं है बूढा होगया है हे सखे । तेरे साथ वाले दूसरे ए लोग तो नहीं ढोते हैं इस प्रकार से बहुत कठोर वचनों के कहने परभी ब्रह्मभूत भरतजी अज्ञान से रचित महाभूत सत्त्वादिगुण इन्द्रिय पुण्य पाप वाले अपने असत्य शरीर में तुच्छ होने से मै हूं मेरा है ऐसा मिथ्या प्रतीति को आरोप न करने से चुपही पहिले सरीके पालकी को ढोते रहगये ॥ ६ ॥

तदनन्तर फिर भी अपनी पालकी के विषम होने से कुपित होकर रहूगण राजा बोले ॥ ७ ॥

क्यों रे यह क्या है तू जीते ही मरे सरीका मेरा अनादर करके मालिक की आज्ञा को नहीं मानता है तू पागल होगया है जैसे यमराज सब मनुष्यों को दण्ड देते हैं तैसे मैं तेरी दवाई करूंगा जिससे तेरी अकल ठिकाने आजावेगी ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र वक्रोक्त्या यदुक्तं त्वं न श्रान्तो न च दीर्घमध्वानमागत इति तत्रोत्तरमाह । त्वया यदुदितमुक्तं श्रमादि नास्तीति तद्वचनं स्फुटं तथैव । अविप्रलब्धं विप्रलम्भो न भवति । तदेवाह । हे वीर ! यदि भारो नाम कश्चित्स्यात्तस्य च भर्तुर्वोढुर्देहस्य यदि स्यात् स च मे यदि प्रसक्तः स्यात्तर्हीदानीं भाराभावादविप्रलम्भः स्यात्स्वेनदृष्टस्य भारस्य वोढुश्चानिरूप्यत्वादात्मनश्च तत्संबन्धाभावात् तथा गन्तुरधिगम्यं प्राप्यमध्वा वा यदि स्यात् । अत्रैव न पाद साक्षात्परमार्थतः । तच्च मे यदि स्यादित्यादि योज्यम् । यच्चोक्तं नातिपीवेति तत्राह । चेतनमुद्दिश्य स्थूलं पीवेति प्रवादो विदां,

स चापि पाण्डवेय ! सिन्धुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक् श्रद्धयाऽधिकृताधिकारस्तद्धृदयग्रन्थि-मोचनं द्विजवच आश्रुत्य बहुयोगग्रन्थसम्मतं त्वरयाऽवरुह्य शिरसा पादमूलमुपसृतः क्षमापयन्विगत-नृपदेवस्मय उवाच ॥ १५ ॥

कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः ।
कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेदसि नोत शुक्लः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विदुषां न भवति किन्तु मूर्खाणाम् । यतोऽयं प्रवादो राशौ भूतसङ्घे देहे एव न त्वात्मनि देह एव पीनो नाहमित्यर्थः ॥ ९ ॥

एतत्प्रपञ्चयति । स्थौल्यमिति । कलिः कलहः । अहङ्कारेण मदश्च देहेन सह तदभिमानेन जातस्य हि भवन्ति मम तु निरभिमानस्य न सन्ति यद्वा । देहे जाते यो जातस्तस्यैव तानि मम तु तत्र न जातस्य न सन्ति ॥ १० ॥

यच्चोक्तं जीवन्मृतोऽसीति तत्राप्याह । जीवन्मृतत्वं न केवलं मम किन्तु विकृतस्य सर्वस्यापि परिणामिनो दृष्टम् । यदस्मात्किञ्च प्रतिक्षणमाद्यन्तवत् । यदुक्तं भर्तृशासनमतिचरसीति तत्राह । स्वं च स्वाम्यं च तयोर्भावः सत्ता हे ईश ! यत्र पक्षे ध्रुवो यदि व्यवस्थितः स्यादित्यर्थः । तर्हि विधिर्नियोगः कृत्यं कर्म तयोर्योगो ध्रुव उच्यते उचितो भवति । "उच समवाये,, इति धातुः यदि तु तव राज्यभ्रंशो मम च राज्यं स्यात्तदा सर्वमेतद्विपरीतं स्यादित्यर्थः ॥ ११ ॥

ननु यावद्राजाहं तावत्तव स्वामी भवास्यैवेति चेत्तत्राह । विशेषो राजभृत्यादिभेदस्तद्बुद्धेर्विधरमवकाशं व्यवहारादन्यत्र पश्यामः । मनाक् च ईषदपि अथापि तवायमभिमानश्चेत्तर्हि ब्रूहि किं ते करवामेति ॥ १२ ॥

यत्तूक्तं प्रमत्तस्य ते चिकित्सां करोमि यथा स्वां प्रकृतिं भजिष्यस इति तत्राह । उन्मत्तादिवद्वर्तमानस्य वस्तुतः स्वसंस्थां ब्रह्मभावं गतस्य भवता कृतेन चिकित्सितेन दण्डेन शिक्षितेन वा कियानर्थः मुक्तस्यार्थानर्थयोरसम्भवात् । यदि पुनरहं न मुक्तः किंतु प्रमत्तः स्तब्धः एव तथापि मम शिक्षादिकं पिष्टपेषणवद्व्यर्थमित्यर्थः नहि जडस्वभावः शिक्षयापि पटूकर्तुं शक्यत इति ॥ १३ ॥

अनुवादरूपया परिभाषया भाषणेन तं प्रत्युत्तरं दत्त्वा उपरतमनात्म्ये देहात्मत्वे निमित्तमविद्या यस्य आरब्धफलं कर्म क्षपयन् ॥ १४ ॥

हे पाण्डवेय ! सम्यक् या श्रद्धा तयैव तत्त्वजिज्ञासायां प्राप्तोऽधिकारो येन । यथा दर्शपूर्णमासाधिकृतस्यैव गोदोहनेन पशुकामस्यापः प्रणयेदिति गुणफलसम्बन्धेऽप्यधिकारः । एवं सात्त्विकश्रद्धायामधिकृतस्यैवाधिकार इत्यर्थः । बहुयोगग्रन्थसम्मतं द्विजस्य तद्वचः श्रुत्वा विगतो नृपदेवोऽधिराज इति स्मयो गर्वो यस्य ॥ १५ ॥

द्विजानां मध्ये कतमः यतः सूत्रमुपवीतं बिभर्षि । यद्वा दत्तात्रेयादीनां मध्ये कतमोऽवधूतः । इहापि कस्मात् हेतोः प्राप्तः नोऽस्माकं क्षेमाय चेत् प्राप्तः तर्हि शुक्लः कपिलो मुनिर्न भवति किम् उतेति वितर्के ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र यदुक्तं वक्रोक्त्या त्वमुरु परिश्रान्तो दीर्घमध्वानमेक एवोढवानित्यादि तत्रोत्तरमाह । त्वयेति । यत्त्वयोक्तं तद्व्यक्तं स्पष्टमविप्रलब्धं लोकदृष्ट्या सत्यं त्वद्वचसां विपरीतार्थपरत्वेन दीर्घमार्गगमनपरिश्रमस्थौल्ययौवनाद्यभिप्रायकत्वेन प्रवृत्तत्वाच्च लोकदृष्ट्यासत्यमेव तथाप्यन्यगतानामेतेषामन्यत्रारोपेण प्रवृत्तत्वात्परमार्थदृष्ट्या सत्यमेवेति भावः तदेव व्यनक्ति । भर्तुरिति । भर्तुरित्यादिषु तवानुषक्तेणान्वयः यदि भर्तुर्भारः तत्प्रयुक्तः श्रमश्च स्यात् स न मे स्यान्मम भरणाभावात् यदि गन्तुरधिगन्तव्यं गन्तव्या भूमिः स्यात्स न मे अद्धा साक्षात्स्यात्साक्षाद्गमनस्याप्यभावात् पीवा पीन इति वादो राशौ भूतसङ्घाते देहे स्यान्न मे स्यादिति विदुषामात्मयाथात्म्यविदां प्रवाद इत्यर्थः ॥ ९ ॥

न मेत्युक्तम् प्रपञ्चयति । स्थौल्यमिति । व्याधयः शारीरोद्भवा रोगाः आधयः मनःपीडाः भयमागामिदुःखदर्शनजं ज्ञानं कलिः कलहः इच्छा कामः दम्भो वञ्चनं रतिर्विषयासक्तिः मन्युः क्रोधः अहमहङ्कारः अनात्मन्यात्माभिमानहेतुः मदः मोहः एते बाह्याकारा अन्तराकाराश्च सर्वे देहेन सहजातस्यापि मम स्वतो न सन्तीत्यर्थः एते देहे एव न जातस्याजातस्योत्पत्त्यादिरहितस्य मे न सन्तीति वार्थः ॥ १० ॥

यदुक्तम् । जीवन्मृत इति तत्राह । जीवन्मृतत्वमिति जीवत्त्वं श्वासवत्त्वं मृतत्वं त्यक्तपूर्वावस्थत्वं चैतन्यशून्यत्वं वा एतदुभयं हे राजन् ! यदाद्यन्तवदुत्पत्तिविनाशवत्तस्य विकृतस्य देहस्य दृष्टं नत्वात्मन इत्यर्थः यदुक्तं भर्तृशासनमतिचरसीति तत्स्वस्वामिभावं प्रतिक्षिपति । स्वस्वामिभावो यत्र ध्रुवः नियतः ईश ! हे राजन् ! तत्र नियतस्वस्वामिभाववत्सु पुरुषेषु विधिकृत्ययोगः विधिर्नियोगः शासनमिति यावत् कृत्यं कर्म च तयोर्योगो ध्रुव उच्यते उचितो भवति उच समवाये इति धातुः ययोर्जीवेशयोः स्वस्वामिभावसम्बन्धो नियतस्तयोरेव नियमेन प्रयोज्यप्रयोजकभावः त्वं चेन्न नियमेन भर्ता कालभेदेन यदि तु तव राज्यभ्रंशः मम च राज्यं स्यात्तदा विपर्ययसम्भवात् अतो न तव प्रशास्तृत्वं स्वतोऽस्ति अतः स्वस्य स्वामित्वबुद्धिर्भ्रान्तिरित्यर्थः ॥ ११ ॥

त्वं भृत्यः अहं स्वामीति वैषम्यबुद्धेर्विधरमवकाशं मनागपि दपि व्यवहारत उक्तिमात्रादन्यत्र न पश्यामः तत्रैवं सति क ईश्वरः किमीशितव्यं न त्वमीश्वरो नाहमीशितव्यः यद्ययमर्थस्त-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ऽपीष्टः अथापि किं कुर्मः अर्थोऽर्थान्तरत्वेनान्यथा कर्तुमशक्य इत्यर्थः ॥ १२ ॥

यदुक्तं प्रमत्तस्य ते चिकित्सां करोमीति तस्योत्तरमाह । उन्मत्तेति । ब्रह्मात्मके स्वात्मनि संस्थां निष्ठां "ब्रह्मसंस्थोऽमृतत्वमेति" इति श्रुतौ संस्थाशब्दस्य निष्ठापरत्वेन प्रयोगात्सिद्धांचोपासनाया अविच्छेदः स्वसंस्थां प्राप्तस्य उन्मत्तादीननुकुर्वतः तर्जनताडनादिपरिभवार्थिनो मम हे वीर ! चिकित्सितेन दण्डेन वा कियानर्थः त्वत्कृतं प्रहरणादिकं नानिष्टं स्यादित्यर्थः यदि पुनरहं न स्वसंस्थां गतः किन्तु प्रमत्तः संसार्येव तथापि स्तब्धस्य प्रमत्तस्य मम शिक्षादिकं पिष्टपेषणवन्निरर्थकमेव ज्ञानरहिते मादृशे संसारिजने यत्त्वया चिकित्सितं दण्डप्रदानं तत्पिष्टपेषो निष्फलः पूर्वमेव संसारव्यसनातुरत्वादित्यर्थः ॥ १३ ॥

अनुवादपरिभाषयानुवादरूपभाषणपूर्वकम् एतावत्प्रत्युदीर्य प्रतिवचनं कृत्वा उपशमः अक्रोधादिरेव शीलं यस्य उपरतं निरस्तमनात्मनो देहान्तरस्य निमित्तं येन सः विद्यया निरस्तदेहान्तरसम्बन्धापादकपूर्वोत्तरसञ्चितानभ्युपगतप्रामादिकबुद्धिपूर्वकभेदभिन्नपुण्यापुण्यरूपपापः आरब्धमभ्युपगतप्रारब्धरूपमपि कर्म पुण्यापुण्यरूपम् उपभोगेनानुभवेन उपनयन् स मुनिवरः तथैव पूर्ववद्राजयानमभ्युदवहत् ॥ १४ ॥

हे पाण्डुवंश्य ! स चापि सिन्धुसौवीरपती रहूगणोऽपि सम्यक् या श्रद्धा तयैव तत्त्वविजिज्ञासायामधिकृतः प्राप्तोऽधिकारभावो येन अधिकारः प्रस्तावः प्रारम्भ इति यावत् तत्त्वजिज्ञासायां कृतारम्भ इत्यर्थः अज्ञानविमोचनं बहुयोगग्रन्थसम्मतं बहुविधाध्यात्मशास्त्रसम्मतं च द्विजवच आभुत्य श्रुत्वा विगतो नरेशो देवोऽधिराज इति स्मयो गर्वो यस्य सः शिबिकायास्त्वरयावरुह्यावतीर्य तत्पादमूलमुपसृतः द्विजपादमूलं प्रति प्रयातः क्षमापयन् वक्ष्यमाणमुवाच ॥ १५ ॥

तदेवाह । द्विजानां मध्ये त्वं कतमः निगूढः अनभिव्यक्तब्रह्मवर्चसः चरसि नाहं द्विज इति चेन्न यतः । सूत्रमुपवीतम् बिभर्षि अतस्त्वमवधूतः सर्वैः परिभाव्यत्वेषां ज्ञाननिष्ठः कस्य पितुर्गुरोर्वा असि पुत्रः शिष्यो वासि कुत्र भवः इहापि कस्माद्धेतोः प्राप्तः नोऽस्माकं क्षेमाय चेत्प्राप्तः किं शुक्लः कपिलो मुनिर्भवसि किम् उतेति वितर्के ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उरु परिभ्रान्तो दीर्घमध्वानमेक ऊढवान् सुचिरमिति यदुपभाषि राज्ञा तत्रोत्तरमाह । त्वयेति । भो वीर ! निरूप्यमाणे सति यद्यहं भर्ता यदि च भर्तुर्मे मम स भारः स्याद्यदि वाहं गन्ता यदि वा गन्तुर्ममाधिगम्यं विषयाख्यं किञ्चित्स्याद्यदि वाध्वा मार्गः कश्चित्स्यात्तर्हि त्वयोदितमिदं सर्वं व्यक्तं स्पष्टमविप्रलब्धं सत्यं भवेत् किन्तु नाहं भर्ता न तवांशो भारः नाहं गन्ता न तत्राक्रान्तव्यं गन्तव्यं मार्गं इत्यर्थः स्वस्कन्धे शिबिकादण्डस्य प्रत्यक्षसिद्धत्वात् कथमेतद्वचनमित्यत उक्तं व्यक्तमिति "भर्ता सन् भ्रियमाणो बिभर्ति य उ त्रिधातु पृथिवीमुत द्याम्" इत्यादिश्रुतौ भरणादेर्हरिनियतत्वस्य व्यक्तमुक्तत्वात्तदभिप्रायेण भरतेनोच्यत इत्येतदपि भरणादिकं हरिरिति विस्तरपूर्वमब्रवीदिति स्मृतिसिद्धं यदुक्तम्

नाति पीवेति तत्राह । पीवेति । पञ्चभूतात्मके शरीरे पीवेति यः प्रवादः असौ विदां ज्ञानिनां पक्षे न शोभते देहस्य परिणामित्वेन चेतनस्यापरिणामित्वेन सिद्धत्वात् ॥ ९ ॥

नातिसंहननाङ्ग इत्यादि यदुक्तं तत्राह । स्थौल्यमिति । अत्र हिशब्द एवार्थे स्थौल्यादयो देहेन जातस्य देहाभिमानिनो एव स्यात् न मे सन्ति देहाभिमानाभावात् "देहमानी देहजातो विदुषां वर्जितः" इति वचनात् देहाभिमानिन एव स्थौल्यादिकानि नान्यस्येति बोद्धव्यमतिस्तत्वज्ञो अहमहङ्कारः ॥ १० ॥

जीवन्मृतोऽसीत्यस्योत्तरमाह । जीवन्मृतत्वमिति । आद्यन्तवत्त्वात्तद्विनाशवत्त्वस्य विकृतस्य जडस्य नियमेन जीवन्मृतत्वं दृष्टं तथाहि जीवनं प्राणयोगेन चेष्टावत्त्वं मृतत्वं प्राणत्यागेन रहितलक्षणमुच्छ्वासरहितत्वमेतच्छरीरस्याविनाभूतं प्राणयुक्तत्वस्य च "जडं जीवन्मृतं स्मृतम्" इति स्मृतेः न चैवं मम चेतनस्य देहयोगवियोगलक्षणजन्ममरणे अन्तरेण स्वतो विकाराभाव आद्यन्तवत्त्वायोगात् "नित्यो नित्यानां चेतनश्चेतनानाम्" इति श्रुतेः देहस्य सर्वथा नाशादनाशाच्चेतनस्य चेत्यारम्भ अत एव देहेन जातस्येत्युक्तं यत्त मां कदर्थीकृत्य भर्तृशासनमतिचरसीत्युक्तं तत्राकर्णयेति भावेनाह । स्वस्वामीति । यत्र यद्यपि स्वस्वामिभावो ध्रुवः सत्य इति त्वयोच्यते तथापि तदच्युते हरौ मुख्य इत्युच्यतां "एष सर्वेश्वर" इति श्रुतेः ननु त्वयि तवाहमस्मीत्युक्तत्वात् भृत्यत्वमेव मुख्यं तदुक्तं "स्वामित्वं तु हरेरेव मुख्यमन्यत्र भृत्यतेति एव राजा दण्डनाथ" इतिवचनात् अच्युते मुख्यत्वं कथमत्राहेतीति "मम स्वामी हरिर्नित्यं सर्वस्य पतिरेव च" इति स्मृतेः सन्ध्योपासनवन्मम स्वामी हरिरितीतिकर्तव्यतालक्षणो योग उपासनं हरावेव विहितमिति यस्मात्तस्मादिति शेषः ध्रुव इति विशेषणादन्यत्राध्रुवस्य न्यायप्राप्तत्वाच्च ॥ ११ ॥

"एको रुद्रो न द्वितीयोऽवतस्थे" इतिश्रुतेः रुद्रादीनामपि स्वामित्वप्रतीतेरिति तत्राह । विशेषबुद्धेरिति । मनागीषदपि विशेषबुद्धेः रुद्रादौ मुख्यबुद्धेरवकाशं स्वामिशब्दप्रवृत्तिनिमित्तं न पश्यामि भरतस्यापरोक्षज्ञानित्वेन करतलामलकवदशेषशब्दप्रवृत्तिनिमित्तस्यापरोक्षत्वात् पश्यामीत्युक्तं तस्मादेतद्दर्शनेन महानिति सूचितं चशब्देन कर्णताडितघटकृद्यमानस्य कथं नादनमिति तत्राह । यद्व्यवहारतोऽन्यदिति व्यवहारतोऽप्रकटिलक्षणानामिति तत्राह । अन्यन्मुख्यं नास्ति शेषः भवतो देवेषु प्रतीयमानं यत्स्वामित्वं तद्धरिनियतमिति बोद्धव्यं तदुक्तं देवेषु तारतम्यानि च सति अनेन हरिमन्तरेण देवेषु यथा तारतम्यं स्वामित्वं मुख्यमिति च ज्ञानहारि मन्तरेण देवेषु ... व्यपदेशो मम कथमित्यतो वाह । व्यम तर्हि सिन्धुपतिरिति व्यपदेशो मम कथमित्यतो वाह । विशेषेति । सैन्धवसौवीरेत्यामुद्दिश्य व्यवहारो ननु मुख्य इत्यर्थः एतदप्युक्तं स्वदादेर्व्यावहारिकमिति आदिशब्देन भवतो देशाधिपतय इति गृह्यते अस्तु व्यावहारिकमतः किं तत्राह । क ईश्वर इति । हरौ देवेषु च स्वामित्वमृतेऽन्यत्र मानुषेषु तस्य व्यत्यासात् को विशेषः व्यवहारमात्रनिर्मूलमिति तत्र तस्मिन्पक्षे स्थितं मनुष्येषु क ईश्वरः स्वामी ईशितव्यं समर्थनीयं च किं न किमपीत्यर्थः तदुक्तम् "मानुषेषु विशेषः को व्यवहारमृते वद" व्यत्यासादिति तत्र हरौ देवेषु स्वामित्वे मुख्यतो यथाक्रमं स्थितेऽन्यत्र क ईश्वर इति वा यथा मानुषेषु स्वस्वामिभावस्य व्यत्यासो न तथा देवेष्विति द्योतनाय तत्रेति तदुक्तं नहि देवेषु व्यत्यासः स्वामिता-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कुत इति एवं विचार्यमाणोऽन्येभ्यो जीवेभ्यस्तव विशेषाभावेऽपि सम्भावनार्थं तव स्वामित्वमङ्गीकृत्याथ्यवस्यामि किं कर्त्तव्यं तद्वदेत्य-भिप्रेत्याह । अथापीति । विशेषबुद्धेर्विवरं पश्यामि तद्व्यवहारतो ऽन्यच्च कुतः मनागल्पमप्यविषयत्वादिति वान्वयविशेषः अवशिष्टं पूर्ववत् ॥ १२ ॥

प्रमत्तस्य ते करोमि चिकित्सामिति यदुक्तं तत्र शृणिवत्याह । उन्मत्तेति । उन्मत्तादिस्वरूपावस्थति स्वतन्त्रे हरौ स्थितस्य प्रामत्त्यं मे चिकित्सितेन दण्डलक्षणेन भवता शिक्षितेन विहितेन तवार्थः कियान् कोऽपि तव रोदनादिदर्शनेन मम मनस्तृप्तिर्भवतीति तत्राह । स्तब्धेति । स्तब्धश्चासौ प्रमत्तश्चेति स्तब्धप्रमत्तः तस्य पिष्टपेषणवन्निष्फलं चिकित्सितं शिक्षासहस्रेणापि निर्मुक्तदेहाभिमानस्य मम व्यथानुभवाभावेन रोदनाद्यनुदयादिति द्विगुणितकोपवह्निना दग्धदेहसन्तापमन्तरेणान्यत्प्रयोजनं नास्तीति भावः ॥ १३ ॥

ब्राह्मणः पुनः किमकार्षीदत्राह । एतावदिति । तथा पूर्ववदुवाहेति अनुवादपरिभाषया उक्तस्य पुनर्वचनमनुवादपरिभाषा तया अनूद्यानूद्येत्यर्थः अनात्मा देहस्तत्सम्बन्ध्यनात्म्यं देहान्तरग्रहणं तस्य निमित्तं कारणं तदुपरतं निवृत्तं यस्य तत्तथा तादृशमारब्धं फलदानायोन्मुखं कर्मोपभोगेन व्यपनयन् क्षपयन् यथा देहान्तरोत्पत्तये न स्यात्तथा भुञ्जान इत्यर्थः ॥ १४ ॥

स रहूगणस्तं परित्यज्यान्येन वाहयित्वा विवक्षितगम्यं गतः किं नेत्याह । स चेति । अपिपदेन स्वोक्तस्य गर्हितत्वं सूचयति । अधिकृताधिकारः । उपदिष्टज्ञानग्रहणयोग्यतावान् बहुयोगग्रन्थमतमनेकयोगशास्त्रसिद्धं हृदयग्रन्थिरहङ्कारबन्धस्तं मोचयतीति हृदयग्रन्थिमोचनं तत् ॥ १५ ॥

कः किं जातिविशिष्टः न दृश्यते किं सत्यमित्याह । द्विजानामिति । सूत्रं लक्षणं यज्ञोपवीतमात्रं मलिनं बहुग्रन्थिवरं न दृश्यते अतः संशयः किं चैवं विधा बहवो योगीन्द्रा भवन्ति तेषां मध्ये त्वं कतमोऽवधूतः योगीन्द्रः कस्य योगीन्द्रस्य वंशे जातोऽसि कुत्रत्यः कस्मिन्देशे विद्यमानः इहास्मिन्देशे कस्मात्कारणादभूः चेद्यदि नोऽस्माकं क्षेमायासि तर्हि शुक्लः कपिलः वासुदेवः उत किं स न भवति तल्लक्षणसामग्र्यभावादित्यर्थः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सम्यक् श्रद्धया श्रीगुरुविषयया ॥ १५—१७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ज्ञानिमानिनमेनं ज्ञानेनैव परास्तीकृत्य कृपयिष्यामीत्यभिप्रेत्याह । त्वयोदितमिति । तत्र विरुद्धलक्षणया यदुक्तं त्वया त्वं न श्रान्तो न दीर्घमध्वानमागत इति तदविप्रलब्धं यथार्थमेव मत्वा-क्षेपः यतो भर्तुः शिविकावाहकस्य भारो यदि मे मम स्यात्तदा स विप्रलम्भः स्यादिति सम्बन्धः अहं देहाद्भिन्नो वोढैव न भवामीति भावः । एवं गन्तुरित्यादि अधिगम्यं प्राप्यं स्थानादिकमध्वा वा यत्त्वयोक्तं त्वं पीवा भवसीति तत् राशौ भूतानां राशिरूपे देहे विदां विदुषां प्रवादो न भवति किन्तु सत्यमेव पीवत्व-मित्यर्थः । मयि चेतनस्वरूपे तु प्रवादः कलङ्क एवेति भावः ॥ ९ ॥

न केवलं पीवत्वमेव मे नास्त्यपि त्वन्येऽपि देहधर्मा न वर्त्तन्त इत्याह । स्थौल्यमिति । देहेन सह यो जातस्तदभिमानी जीवः तस्यैव हि निश्चितं सन्ति ननु मे निरभिमानस्य ॥ १० ॥

यच्चोक्तं जीवन्मृतोऽसीति तत्राप्याह । जीवन्मृतत्वमिति । यदि त्वया मम देहाभिमानित्वमेव निर्धारितं तदपि जीवन्मृतत्वं नियमेन ममैव केवलं न किन्तु सर्वस्यैव विकृतस्य परिणामिनो दृष्टं प्रत्यक्षमेव यद्यस्मादिकृतं प्रतिक्षणमेवाद्यन्तवत् यच्चोक्तं भर्तृशासनमतिचरसीति तत्राह । स्वेति । स्वाम्यं स्वामित्वं तयोर्भावो विद्यमानत्वं स च यत्र यदा ध्रुवः स्थिरः स्यात्तर्हि विधिकृत्ये शिविकावहनादिकर्मणि योगः अयं जनो युज्यतामित्युच्यते कथ्यते उचितो वा भवतीति "उच समवाये,, इत्यस्य रूपं यदि तु तव राज्यभ्रंशो मम राज्यं स्यात्तर्हि त्वामप्यहं शिविकां वाहयन् किमिदमरे इत्यादि कथयेयमित्यर्थः ॥ ११ ॥

ननु यावद्राजाहं तावत्तव स्वामी भवाम्येवेति चेत्तत्राह । विशेषो राजभृत्यादिभेदस्तद्बुद्धेर्विवरमवकाशं व्यवहारादन्यत् न पश्यामि मनाक् ईषदपि तथापि तवायमभिमानश्चेत्तर्हि ब्रूहि किं ते करवामेति ॥ १२ ॥

यच्चोक्तं प्रमत्तस्य ते चिकित्सां करोमीति तत्राह । उन्मत्तादिवद्वर्त्तमानस्य वस्तुतस्तु स्वसंस्थानस्तन्निष्ठां गतस्य चिकित्सितेन कायिकेन वाचिकेन वा दण्डेन कियानर्थः साधयितव्यः मुक्तानामर्थानर्थयोरग्रहणात् यदि पुनरहं न मुक्तः किन्तु प्रमत्तस्तब्ध एव तदापि शिक्षितेन त्वद्दत्तदण्डेन पिष्टपेष एव भवति यथा पिष्टं वस्तु प्रहारेणापिष्टं न भवति किन्त्वतिपिष्टं भवति तथैव प्रमत्तस्य दण्डनेन प्रमत्तता न शाम्यति किन्त्वतिप्रमत्तता स्यादिति ॥ १३ ॥

अनुवादरूपया परिभाषया भाषमाणेन उपरतमनात्म्यस्य देहात्मभावस्य निमित्तमविद्या यस्य सः ननु स्वदेहाभिमानं विना तद्वचोऽनूद्य सोढुमसमर्थ इव समादधानः कथं तथा प्रत्युक्तवांस्तत्राह । उपभोगेन राजोचितैश्वर्यभोगेन ज्ञापितं यत् रहूगणस्य प्रारब्धं कर्म तदपि व्यपनयन् व्यपनेतुम् अनुवादमिषेण कृपया स्वोपदिष्टतदनुष्ठितया उक्त्यैव तत् प्रारब्धमपि दूरीकर्त्तु-मित्यर्थः । यद्वा प्रेमोत्थदैन्येन स्वस्य भक्तत्वाभिमननात् उपभोगेन शिविकाभारोद्वहनादिना आरब्धफलं कर्म व्यपनयन् व्यपनयामीति मनसि भावयन्नित्यर्थः ॥ १४ ॥

अधिकृतः प्राप्तोऽधिकारो येन सः ॥ १५ ॥

द्विजानां मध्ये त्वं कतमः यतस्त्वं सूत्रं बिभर्षि अवधूतः किं दत्तात्रेयोऽसि कस्य पुत्रोऽसि कुत्रत्यः किंदेशजन्मासि नोऽस्माकं क्षेमाय प्राप्तश्चेत् शुक्लो नारायणो नासि उत तदवतारः कपिलो नासि ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कापिलानां मते अब्रह्मात्मकप्रधानपरिणामभूतेषु भारवाहकादिषु भारादिरूपेषु च पदार्थेषु ब्रह्मदृष्टिर्न भवति तेषां ब्रह्मकार्यत्वाभावात् स्वमते तु "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुतेः सर्वस्य ब्रह्मकार्यत्वात् "कारणं तु ध्येयः सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" इत्यादिश्रुतिभ्यः ।

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केन चित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः ॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।
वासुदेवात्मकं प्राहुः क्षेत्रं क्षेत्रज्ञमेव च ॥

इत्यादिस्मृतिभ्यश्च सर्वत्र ब्रह्मात्मकत्वदर्शी मुनिः तत्र विपरीतार्थ-वाक्येन यदुक्तं त्वं न श्रान्तो न च दीर्घमध्वानमागतः न चासहाय इति तत्रोत्तरमाह । त्वयोदितमिति । त्वया यदुक्तं श्रमादि नास्तीति तद्व्यक्तं स्फुटम् । अविप्रलब्धमुपहासमात्रं न भवति श्रान्तत्वदुरगामित्वासहायत्वाभावात् परभावापन्नत्वं ममेति भावः किं तु यदि भारो भर्तुर्बोद्धुं स्यात् न चसर्वं भारोपपन्नत्वं पदार्थजातं ब्रह्मात्मकं स्यात् तदा विप्रलब्धं त्वयोदितं शेषः यदा तु भारः बोद्धुं न स्यात् "तत्र को मोहः कः शोकः एकत्वमनुपश्यतः । ऐतदा-त्म्यमिदं सर्वम्" इत्यादि श्रुतेः सर्वस्य वोढृत्वादेः ब्रह्मात्मकत्वात्तदा तु त्वयोदितं न युक्तमिति भावः सर्वस्य ब्रह्मात्मकत्वं पश्यतो मे श्रमादि नास्तीति फलितोऽर्थः "द्वितीयाद्वै भयं भवति" इति श्रुतेः एवं यदि अध्वा गन्तव्ये अधिगम्यं स्यात्तदा त्वयोदितं विप्रलब्धं भवतु सर्वस्योक्तश्रुत्या ब्रह्मात्मकत्वानुसन्धाने तु तन्न युक्तमित्यर्थः यच्चोक्तं नातिपीवेति तदपि राशौ पाञ्चभौतिके देहे युक्तम् । विदा-त्मविदां तु पीवेति प्रवादो न भवति पीवा स्थूलो देह एव न त्वात्मा ॥ ९ ॥

किञ्च स्थौल्यमिति । कलिः कलहः अहंमदः अहङ्कारेण मदः देहेन सह जातस्य देहात्माभिमानवतो जीवस्य भवन्ति मे मम तु आत्मयाथात्म्यविदो न सन्ति ॥ १० ॥

यच्चयोक्तं जीवन्मृतोऽसीति जीवन्मृतत्वमपि यदाद्यन्तवत् तस्य विकृतस्य परिणामिनो देहादेरेव नियमेन इदं मम नित्य-ज्ञानरूपस्य तु नेत्यर्थः भर्तृशासनमतिचरसीति त्वदुक्तः स्वस्वा-म्यभावः स्वं च स्वाम्यं च तयोर्भावः यत्र कल्पते "यदासीत्तदर्शन-मवासीत् "प्रधानक्षेत्रज्ञपतिः" इत्यादिश्रुत्या स्थिरं तत्र ध्रुवः हे ईड्य ! नृप असौ प्रभिन्नोऽपि नृपत्वादिविषयः यत्रास्ति तर्हि विधि-कृत्यस्य विहितकर्मणो योगः फलञ्चाध्रुव इत्यर्थः ॥ ११ ॥

अध्रुवत्वमेवाह । यतो विशेषबुद्धेः अहं नरपत्यादिः स्वामी असौ नरादिः सेवक इति विशेषबुद्धेर्विवरमवकाशं व्यवहारोऽन्यस्य पश्यामि नरपतित्वनरत्वादिव्यवहारापगमे तु कः ईश्वरः किमी-शितव्यं च स्यात् अतोऽसौ विधिकृत्ययोगोऽध्रुव इत्यर्थः तथापि हे राजन् ! उच्यतां ते किं करवाम ॥ १२ ॥

यच्चोक्तं प्रमत्तस्य ते चिकित्सां करोमीति तत्राह । उन्मत्त इति ॥ १३ ॥

अनुवादपरिभाषया अनुवादरूपेण भाषणेन प्रत्युदीर्य प्रति-वचनं दत्त्वा उपरतं निवृत्तमनात्म्ये देहात्मत्वे निमित्तमज्ञानं यस्य सः आरब्धफलं कर्म उपभोगेन क्षपयन् ॥ १४ ॥

हे पाण्डवेय ! परीक्षित् ! अधिकृतः प्राप्तोऽधिकारो येन सः ॥ १५ ॥

शुकः कपिलः ॥ १६ ॥ १७ ॥

भाषाटीका ।

इस प्रकारसे बहुत अयुक्त भाषण करने वाले राजा के अभिमान वाले रजोगुण तमोगुण के मदसे सम्पूर्ण भगव त्प्रियों के स्थानरूप भरतजी के तिरस्कार करने वाले पण्डित मानी राजा से वे सम्पूर्ण भूतों के सुहृत् ब्रह्मभूत सबके आत्मा योगेश्वरों के आचरण में अति निपुण बुद्धि वाले भरतजी गर्वरहित होकर यह वचन बोले ब्राह्मण बोले हे वीर ! तुमारा कथन बुरा नहीं है किन्तु सच्चा ही है उस भारका ढोने वाला मैं होता तो मेरको दुःख होता यह तो शरीर है मैं नहीं हूं यदि चलने का मार्ग मेरे लेजाने का होता तो मेरे को श्रम होता पहलो देहका है मोटा होना भी शरीर-का धर्म है ऐसा ज्ञानीयों का कथन है तो मेरको कोइ दुःख नहीं है तुमारा कथन ठीकही है ॥ ९ ॥

मोटा पतलापन शरीर के दुःख मन का दुःख क्षुधा तृषा भय कलह इच्छा जरा निद्रा ग्लानि क्रोध अहङ्कार मद शोक ये सब देह के साथ हमको है वस्तुतः हमारे धर्म नहीं है ॥ १० ॥

हे राजन् ! जीवते मरण यहतो नियमसे सबके है क्योंकि जो विकारवान् वस्तु है यह सब आदि अन्त वाला है स्वामी सेवक भाव यदि नियमसे होता हो तो यह नियम से आज्ञाकरना आप का ठीक है सोतो ठीक है नहीं ॥ ११ ॥

हम राजा हैं यह भृत्य है इस बात में केवल बुद्धि व्यवहार को छोडकर और कोइ हेतु नहीं है तो कौन स्वामी है कौन सेवक है यद्यपि ऐसा है तथापि हे राजन् ! तुमको हम क्या करें ॥ १२ ॥

मैं तो अपनी स्थिति से पागल सरीखा होरहा हूं तब मेरे दण्ड आदि चिकित्सा करने से तुमारा क्या सिद्ध होगा पागल को दंड देना तो पीसेको पीसने के तुल्य है ॥ १३ ॥

श्रीशुकदेवजी बोले उपशान्त स्वभाव वाले देहादि भावसे निवृत्त मुनिवर भरतजी प्रारब्ध कर्म के भोगसे क्षय करने के वास्ते राजाकी पालकी को फिर उसी प्रकार ढोने लगे ॥ १४ ॥

हे परीक्षितजी ! वेभी सिन्धु सौवीर देशके राजा रहूगणजी तत्त्वजिज्ञासामें अच्छे प्रवृत्त श्रद्धामें अधिकारीथे तिससे हृदयग्रन्थी के छुटाने वाले बहुत योगग्रन्थ से सम्मत ब्राह्मण के वचनको श्रवण करके तुरत उतरकर मस्तक से चरणमूल में जाकर राजाके अभिमान को छोडकर क्षमा कराते भये यह वचन बोले ॥ १५ ॥

अलक्षित होकर विचरनेवाले आप कौन हो अवधूत वेष आप हो ब्राह्मणों का यज्ञोपवीत धारण किये हो किसके पुत्र हो

नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात् ।
नाग्न्यर्कसोमानिलवित्तपास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् ॥ १७ ॥
तद्ब्रूह्यसङ्गो जडवन्निगूढविज्ञानवीर्यो विचरस्यपारः ।
वचांसि योगग्रथितानि साधो! न नः क्षमन्ते मनसाऽपि भेत्तुम् ॥ १८ ॥
अहं च योगेश्वरमात्मतत्त्वविदां मुनीनां परमं गुरुं वै ।
प्रष्टुं प्रवृत्तः किमिहारणं तत्साक्षाद्धरिं ज्ञानकलावतीर्णम् ॥ १९ ॥
स वै भवांल्लोकनिरीक्षणार्थमव्यक्तलिङ्गो विचरत्यपि स्वित् ।
योगेश्वराणां गतिमन्धबुद्धिः कथं विचक्षीत गृहानुबन्धः ॥ २० ॥

भाषाटीका ।

कहां के हो इहां क्यों आये हो यदि हमारे कल्याण को आये हो तो क्या कपिलजी तो नहीं हो ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किमनया चिन्तया शिबिकां तावद्वहामीति चेत्तत्राह । नाहमिति । वित्तपः कुबेरः ॥ १७ ॥

यस्मादृशं शङ्के तत्तस्मात्कस्त्वमित्यादिप्रश्नानामुत्तरं ब्रूहि । निगूढं पिहितं विज्ञानरूपं वीर्यं प्रभावो येन । अपारोऽनन्तमहिमा । तत्र हेतुः । नो मनसापि भेत्तुं न क्षमं न शक्यम् । किं भेत्तुमित्यपेक्षायामाह । ते वचांसीति । यद्वा मनसा युक्ताः सूक्ष्मदृष्टयोऽपि भेत्तुं न शक्नुवन्तीत्यर्थः ॥ १८ ॥

स्वस्य ज्ञानार्थितां दर्शयति । अहं चेति । इह संसारे यद्रणं शरणं तत्किमिति प्रष्टुं प्रवृत्तोऽस्मि । ज्ञानशक्त्यावतीर्णं कपिलम् ॥ १९ ॥

स एव भवान् किं स्विदेवं विचरति । गृहाविष्टः कथं विचक्षीत पश्येत् ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किमनया चिन्तया शिबिकां नावहहामीति चेत्तत्राह । नाहमिति । सुरराज इन्द्रः तस्य वज्रादहं न विशङ्के न बिभेमि तथा रुद्रस्य त्रिशूलात् यमस्य दण्डादपि तथाग्न्यादीनामस्त्रादपि तत्र वित्तेशः कुबेरः किन्तु ब्रह्मकुलावमानान्नितरां शङ्के ॥ १७ ॥

तस्मान्मत्प्रश्नानामुत्तरं ब्रूहि असङ्गो निष्परिग्रहः निगूढं पिहितं विज्ञानरूपं वीर्यं प्रभावो येन अपारः दुर्विभाव्याभिप्रायः जडवद्विचरसि तव वचांसि तु योगशास्त्रेण सन्दर्भितानि तत्र हेतुः हे साधो ! नोऽस्माकं मनसापि साक्षाद्बृहस्पतिरपि त्वद्वचो भेत्तुमभिप्रायतोऽवगन्तुं न क्षमं न शक्यम् ॥ १८ ॥

स्वस्य ज्ञानार्थितां दर्शयति । अहञ्चेति । तत्त्वविदां चिदचिदीश्वरतत्त्वविदां मुनीनां मध्ये प्रवरं हितोपदेष्टारं ज्ञानकलया निरस्तापरिच्छिन्नज्ञानशक्त्यंशेनावतीर्णं साक्षाद्धरिं योगेश्वरं कपिलमुनिं प्रति इह संसारे यच्छरणं रक्षकं तत्किमिति प्रष्टुमहं प्रवृत्तः ॥ १९ ॥

लोकनिरीक्षणार्थं स एव कपिलो भवान् विचरति किं स्विदेवं कथंभूतः अव्यक्तलिङ्गः अस्पष्टहेतुः गृहासक्तो मादृशो मन्दबुद्धिर्योगेश्वराणां गतिं कथं विचक्षीत पश्येत् विद्यादित्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ननु यो वा को वास्तु तव तावच्छिबिकावहनमलमिति चेत्तत्राह । नाहमिति । ब्रह्मकुलस्य ब्राह्मणकुलस्यावमानादपराधात् शङ्के तस्माद्ब्राह्मणश्रेष्ठमापयितुमिच्छया पृच्छामीत्यर्थः ॥ १७ ॥

यत एवं शङ्के तत्तस्माद्यथा जडस्य सङ्गबुद्धिर्नास्ति तथा तवापीत्यसङ्गः निगूढमप्रकाशितं विशिष्टं ज्ञानवीर्यं यस्य स अत एवापारः अगाधः मादृशानामिति शेषः योगे अध्यात्मविषये ग्रथितानि सम्बद्धानि वचनानि मनसा विभेत्तुं विवक्तुं नोऽस्माकं न क्षमन्ते न शक्यानीत्यन्वयः मनसा विभेत्तुं न शक्नुमः किं पुनर्वचनेनेत्यतो मनसेति ॥ १८ ॥

अहमपि कार्यान्तरमुद्दिश्य जनपदान्तरं गमिष्यामीति शङ्का माभूत् किन्तु ज्ञानार्थित्वेन कपिलवासुदेवम् अतो ज्ञानाधिकारित्वेन मम तत्त्वमुपदेष्टुं योग्यतास्तीत्यभिप्रेत्य विज्ञापयति । अहं चेति । अहमपीह संसारे क्लिश्यमानानां जनानां यदार्तिं अवगच्छति जानात्यनेन तत्त्वमिति ज्ञानलक्षणमरणं शरणं तत्किं प्रष्टुं प्रवृत्त इत्यन्वयः कपिलः किमयं श्रोत्रिय उत प्रवक्तेति तत्राह । गुरुमिति । श्रोतुरपेक्षिताशेषश्रोतव्यस्योपदेष्टारं केषां मुनीनां किमेते पाषाणवन्मौनशीलाश्च प्रवचनेन प्रयोजनमेतादृशशिष्यान् संगृह्य व्याख्या सर्वस्य सुशका चेति तत्राह । तत्त्वेति । तत्तत्पदार्थतत्त्वविन्नमाद्यधिकानामप्यस्तीत्यत आत्मेति । नचायं कपिलः सांख्यशास्त्रप्रणेतेत्याह । हरिमिति । न चायं शब्दः सावकाश इत्याह । साक्षादिति । नचास्यान्यत्र व्यापृतत्वे ज्ञानोपदेशानवसर इत्याह । ज्ञानेति । ज्ञानकामधेनुप्रवृत्तयेऽवतीर्णं कलकामधेनावितिधातुः कलाविस्तार इति वा ज्ञानव्याप्तय इति वा अनेन नेन मम कार्यान्तरे व्यापारो नास्तीति दर्शयति ॥ १९ ॥

दृष्टः श्रमः कर्मत आत्मनो वै भर्तुर्गन्तुर्भवतश्चानुमन्ये ।
(१) यथाऽसतोदानयनाद्यभावात्समूल इष्टो व्यवहारमार्गः ॥ २१ ॥
स्थाल्यग्नितापात्पयसोऽभितापस्तत्तापतस्तण्डुलगर्भरन्धिः ।
देहेन्द्रियास्वाशयसन्निकर्षात्तत्संसृतिः पुरुषस्यानुरोधात् ॥ २२ ॥
शास्ताऽभिगोप्ता नृपतिः प्रजानां यः किङ्करो वै न पिनष्टि पिष्टम् ।
स्वधर्ममाराधनमच्युतस्य यदीहमानो विजहात्यघौघम् ॥ २३ ॥
तन्मे भवान्नरदेवाभिमानमदेन तुच्छीकृतसत्तमस्य ।
कृषीष्ट मैत्रीदृशमार्तबन्धो ! यथा तरे सदवध्यानमंहः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ततः किं प्रकृत इति तत्राह । सचा इति । भवान्स वै कपिलो भगवानेव लोकनिरीक्षणार्थं साध्वसाधुजनपरीक्षणार्थम् अव्यक्तलिङ्गो भूत्वा विचरत्यपि स्वित् किमित्यन्वयः मादृशानां संशयः श्लाघ्य इत्याशयेनाह । योगेश्वराणामिति । विचक्षीत जानीयात् अन्धबुद्धिस्त्वे कारणं गृहानुबद्ध इति ॥ २० ॥

——

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नोऽस्माकं मनसा सह योगेनोपायेन युक्त्या प्रथितान्यपि यत्भेत्तुं न क्षमन्ते तद्ब्रूहि विशदीकुर्वित्यर्थः ॥ १८—२२ ॥

——

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु शिबिकारूढस्य तव किमनेन विचारेण इत्यत आह । नाहमिति । सुरराजादयो वज्रादिभिर्युधि मां हन्तुं यदि प्रयतन्ते तदपि स्वस्य वीरत्वस्वभावात् न शङ्के प्रत्युतोत्साहसुखमेव प्राप्नोमीति भावः यद्वा सुरराजादिषु -जातापराधोऽहं तेषां कुपितानां वज्रादिप्रहारादपि न शङ्के इत्यर्थः ॥ १७ ॥

तत्तस्माद्ब्रूहि कस्त्वमित्यर्थः । त्वच्छिबिकावाहकोऽस्मीति चेदतः परमपि मद्विडम्बनैस्त्वामहं कमपि महायोगीन्द्रमज्ञासिषमेवेत्याह । वचांसीति । यतो योगग्रथितानि ते वचांसि नोऽस्माकं मनसापि भेत्तुं न क्षमं न क्षमाणि न शक्यानि इत्यर्थः । यद्वा वचांसि योगैर्ग्रथितान्यपि योगेश्वराणामुपदेशवाक्यानि कर्तॄणि नोऽस्मानतिकठोरान् भेत्तुं छिन्नसंशयीकर्त्तु न क्षमन्ते न शक्नुवन्ति । कीदृशान् मनसापि सहितान् अवहितमनसोऽप्यवादित्वेन तानि जिघृक्षूनपीत्यर्थः । तव त्वेतावतापि प्रतिवचनेनैव छिन्नसंशयोऽस्मि सम्वृत्त इति भावः ॥ १८ ॥

योगेश्वराणामतिमुख्य एव मत्संशयं छेत्तुं समर्थ इति द्योतयन्नाह । अहञ्चेति । साक्षाद्धरिं श्रीकपिलदेवं ज्ञानस्य कलार्थं ज्ञापनाय अवतीर्णम् ॥ १९ ॥

स एव भवान् किं स्विदेव विचरति अन्धबुद्धिर्मेद्विषः ॥२०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु मद्रूपादिकं स्वयमेव वेदितुमर्हसीत्यत्राह । नो मनसापि भेत्तुं न क्षमं न शक्यं यत्तत् कस्त्वमित्यादिप्रश्नानामुत्तरं ब्रूहि यतो निगूढं विज्ञानरूपं वीर्यं येन सः अपारः दुर्ज्ञेयाभिप्रायः एवं भूतो विचरसि हे साधो ! त वचांसि योगग्रथितानि ज्ञानयोगभक्तियोगविषयाणि ॥ १८ ॥

इह यच्छरणं शरणं तत्किमिति प्रष्टुं प्रवृत्तोऽस्मि ज्ञानशक्त्याविर्भूतं कपिलम् ॥ १९ ॥

लोकनिरीक्षणार्थं गूढचिह्नः सन् सः कपिल एव भवान् किं स्विद्विचरति गृहानुबद्धः कथं विचक्षीत पश्येत् ॥ २० ॥

——

भाषाटीका

इन्द्र के वज्रसे मैं नहीं डरता हूं रुद्रजी के त्रिशूल से भी नहीं डरता हूं यमके दण्डसे भी नहीं डरता हूं अग्नि सूर्य चन्द्रमा पवन कुवेरास्त्रसे भी नहीं डरता हूं केवल ब्राह्मण कुलके अपमान से अत्यन्त डरता हूं ॥ १७ ॥

जिससे विज्ञान के गुप्त करने को आप जड़ सरीखे निःसङ्ग होकर विचरते हो अगाध हो हे साधो ! योगग्रन्थित आपके वचनों को हम लोक मनसे भी भेद न करने को सामर्थ नहीं हैं सो आप अपना हाल कहो ॥ १८ ॥

मैं तो आत्मज्ञानी मुनियों के परमगुरु योगेश्वर ज्ञानकला अवतीर्ण साक्षात् हरि कपिलजी को पूछने को प्रवृत्त हुआ हूं कि संसार में शरण करने को क्या वस्तु है ॥ १९ ॥

किंवा नहीं कपिल रूपही आप छिपकर संसार के देखने को विचरते होगे हम सरीखा गृहादिक में बुद्धिवाला योगेश्वरों की गति को कैसे देख सकेगा ॥ २० ॥

——

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं तत्स्वरूपं पृष्ट्वा तदुक्तोत्तरपयाक्षिपति तत्र यदुक्तं मम श्रमो नास्तीति तत्राह । दृष्ट इति । आत्मनो मे अनुमन्ये अनुमिमे अनुमानं चैवं भवान् भारवाहनादिना श्रान्तः

(१) यथा श्रुतोदानायनादिभावाः समूलदृष्टोऽव्यवहारमार्ग इति श्रीविजयध्वजतीर्थपाठः ।

न विक्रिया विश्वसुहृत्सखस्य साम्येन वीताभिमतेस्तवापि।
महद्विमानात्स्वकृताद्धि मादृङ्नङ्क्ष्यत्यदूरादपि शूलपाणिः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां जडभरतरहूगणसम्वादे
दशमोऽध्यायः ॥ १० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कर्तृत्वात् यः कर्ता स श्राम्यति यथाऽहं युद्धादिकर्तेति। नन्विदं व्यवहारमात्रं न तु सत्यम्। यदुक्तं व्यवहारतोऽन्यत्र पश्यामीति तत्राह। यथेति। व्यवहारमार्गः प्रपञ्चः समूलः सप्रमाणक एव दृष्टः। यथा यथावत्। असता घटादिनोदकानयनादेरभावात्। एवं प्रयोगः। प्रपञ्चः सत्यः अर्थक्रियाकारित्वात् यः पुनरसत्यः नासावर्थक्रियाकारी यथा मिथ्याघटादिरिति ॥ २१ ॥

यदुक्तमुपाधिधर्माः स्थौल्यादयो मे न वस्तुनः सन्तीति तत्रौपाधिकत्वेऽपि सत्यत्वं किं न स्यादित्याह। स्थाल्या अग्निना तापात्तन्मध्यवर्तिनः क्षीरस्य तापः तस्य तापात्तण्डुलानां बहिर्भागस्य ततस्तद्गर्भस्य च रन्धिः पाकः। न चात्र किञ्चिन्मिथ्या एवं देहादिभिः सन्निकर्षात्सम्बन्धात्तन्निमित्ता संसृतिः पुरुषस्य भवति। असवः प्राणाः आशयो मनः अनुरोधादुपाधिधर्मानुवृत्तेः। तथाहि। निदाघादिना देहे तप्ते इन्द्रियाणां तापस्ततः प्राणस्य ततो मनस इत्येवं यथायथमूह्यम् ॥ २२ ॥

यदुक्तं स्वस्वाम्यभावो ध्रुव इति तत्राह। शास्तेति। अध्रुवत्वेऽपि यदा यो नृपतिः स प्रजानां शास्ता गोप्ता च। यच्चोक्तं स्तब्धादेः शिक्षा पिष्टपेष इति तत्राह। याऽच्युतस्य किङ्करः स पिष्टं न पिनष्टि निष्फलं न करोति। स्तब्धत्वाद्यनपगमेऽपि शास्तुरीश्वराज्ञासम्पादनेनैव सफलत्वात्तदाह। स्वधर्मरूपमच्युतस्याराधनं कुर्वन्नस्मादघौघं विजहाति ॥ २३ ॥

यस्मादेवं मम त्वदुक्तं विपरीतं प्रतिभाति तत्तस्मान्नरदेवाभिमानमदेन तुच्छीकृतास्तिरस्कृताः सत्तमा भवादृशा येन तस्य मे मैत्रीदृशं स्नेहयुक्तां दृष्टिं कृपीष्ट करोतु सतामवज्ञारूपं पापं यथा तरिष्यामि ॥ २४ ॥

ननु ममावज्ञाकृतविकाराभावात्कुतः पापं तत्राह। नेति। यद्यपि तव विक्रिया नास्ति। विश्वस्य सुहृच्चासौ सखा च तस्य अतः सर्वत्र साम्येन स्वदेहे विगताभिमानस्य तथापि महतामवमानान्मादृशो विनङ्क्ष्यति अदूरात् क्षिप्रं शूलपाणिरिवातिसमर्थोऽपीत्यर्थः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका।

एवं तत्स्वरूपं पृष्ट्वा तदुक्तोत्तरायथाक्षिपति। तत्र यदुक्तं मम श्रमो नास्तीति तत्राह। दृष्ट इति। देहादन्यत्वेऽपि देहयोगादात्मनो मम कर्मतः युद्धादिकर्मणा श्रमो दृष्टः अतो मदृष्टान्तेन भर्तुर्भारस्य गन्तुरध्वनश्च गन्तुर्भवतोऽपि श्रममनुमन्येऽनुमिमे भवता श्रान्तेन भवितव्यं भर्तृत्वाद्गन्तृत्वाच्च यथा युद्धादिकर्ताहमित्यनुमिनोमीत्यर्थः। नन्विदं व्यवहारमात्रं न तु सत्यं तत्राह। असता घटादिना उदकाहरणाद्यभावदर्शनात् सता तु दर्शनाच्च व्यवहारमार्गः प्रपञ्चः समूलः प्रमाणमूलक एवेष्टः अत्रायं प्रयोगः प्रपञ्चः सत्यः अर्थक्रियाकारित्वात् यः पुनरसत्यः नासावर्थक्रियाकारी यथा शुक्तिरजतादिरिति ॥ २१ ॥

आत्मनः स्वतो दुःखाद्यभावेऽपि देहसंसर्गात्तत्सम्भवतीत्यभिप्रायेणाह। स्थालीति। स्थाल्यादिगताग्नितापात्तन्मध्यवर्तिनः शिशिरस्य पयसोऽभितापस्तस्य तापात्तण्डुलगर्भविक्लित्तिर्भवति तत्तस्माद्दृष्टान्तदर्शनाद्देहादीनां सन्निकर्षादनुरोधात्सन्निकृष्टस्यावर्जनीयत्वात्तन्निमित्ता पुरुषस्य संसृतिः सुखदुःखाद्यनुभूतिर्भवतीत्यर्थः असवः प्राणा आशयो वासना अन्तःकरणं वा ॥ २२ ॥

तथाहि निदाघादिना देहे तप्ते इन्द्रियाणां तापः ततः प्राणस्य ततो मनसस्तत आत्मन इत्येवं च सति दण्डयितृत्वादिकमपि सफलमित्याह। शास्तेति। यदाहं कर्मवशान्नृपतिस्तदा प्रजानामुत्पथवर्तिनीनां शास्ता सन्मार्गवर्तिनीनां तु गोप्ता ननु पूर्वमेव व्यसनातुरं दण्डयन्पिष्टं पिनष्टीत्युक्तमिति चेत्तत्राह। अच्युतस्य भगवतः स्ववर्णाश्रमधर्मेण किङ्करः आराधकः भगवदाराधनस्वरूपं स्ववर्णाश्रमप्रयुक्तं निग्रहादिकं कुर्वन् पिष्टं न पिनष्टि नैष्फल्यं न प्राप्नोति यत्स्ववर्णाश्रमोचितं कर्म ईहमानः कुर्वाणः अघौघं पापराशिं विजहाति विधुनोति ॥ २३ ॥

तस्मादेवं जिज्ञासुत्वाद्धे आर्तबन्धो! नरदेवोऽहमस्मीत्यभिमानजमदेनानादृतसज्जनस्य मे मह्यं मैत्रीदृशं स्नेहयुक्तां दृष्टिं कृपीष्ट कुरु यया दृशा सदवज्ञानं सतामवज्ञानरूपमंहः पापं तरं तरिष्यामि ॥ २४ ॥

ननु ममावज्ञाकृतविकाराभावात्कुतः पापं तत्राह। नेति। विश्वसुहृदीश्वरः सखा यस्य स विश्वसुहृत्सखः "द्वा सुपर्णा सयुजा सखाया" इति श्रुतेः तस्य साम्येन सर्वस्य ब्रह्मात्मकत्वभावेन वीता निरस्ताऽभिमतिर्देहात्माभिमतिः स्वतन्त्रवस्त्वभिमतिश्च यस्य तव यद्यपि मत्कृतावज्ञानाद्विकारो नास्ति तथापि महतामवमानात्स्वकृतान्मादृशो जन्तुः शूलपाणिरिवातिसमर्थोऽप्यदूरात् क्षिप्रं नङ्क्ष्यति स्थावरतामेष्यति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्थावरताप्राप्तिरेव हि जीवस्य विनाशो नाम तत्र नितरां चैतन्यानभिव्यक्तेः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

दशमोऽध्यायः ॥ १० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अधुना यत्त्वयोक्तं भर्तुर्मम भारो नास्ति गन्तुः कर्मतः श्रमो नास्तीति तत्राह । दृष्ट इति । यथात्मनो मम भर्तुः कण्ठभुजता-हेतुर्भारो गन्तुर्गमनलक्षणात्कर्मतः श्रमः पादवेदनालक्षणो दृष्टस्तथा भर्तुर्गन्तुर्भवतोऽद्य वहनगमनादिक्रियादर्शनाच्छ्रमो युक्त इति मन्ये वै सर्वानुभवसिद्ध इति न केवलं दृष्टिः श्रुतिरप्यस्तीत्याह । श्रुतेति । श्रुता उदानयनादिभावा इति प्रयोगमुत्सृज्य एकपद्येन प्रयोगस्तु छान्दसः उदानयनादिभावा जलाहरणसाधनघटादिपदार्थाः पोढृणां श्रमजनकाः श्रुताः इतीदमपि श्रमसद्भावे प्रमाणमित्यर्थः "भावो लीला क्रिया चेष्टा" इत्यभिधानाज्जलानयनादिक्रियाः श्रमहेतव इति वा किमत इति तत्राह । समूल इति । यतो वहनगमनादिक्रियाः श्रमजनकत्वेन सत्याः तस्माज्ज्ञानोपादानादिव्यवहारमार्गः समूलः सप्रमाणः दृष्टः साक्षिसिद्ध इत्यर्थः केचिदुदानयनादिभावेति पठन्ति तत्र श्रुतेति पदच्छेदः क्रियावाचिनो भावशब्दस्य टापि कृते स्त्रीलिङ्गत्वं साधु अनेन जीवन्मृतत्वं नियमेन राजन्नित्यत्र यद्देहस्येति उक्तं तत्प्रत्युक्तं "शतं कुम्भमसिञ्चन्त सुरायाः" इति श्रुतेः क्रियायाश्चेतननियतत्वात् ॥ २१ ॥

स्थौल्यादयो न मे सन्तीति यद्वादि तत्रोच्यते । स्थालीति । स्थाल्याः भाण्डस्याग्निना तापात् भाण्डस्थपयसो जलस्य तापः स्यात्तस्य पयसस्तापात्तण्डुलगर्भस्य तण्डुलान्तःसारस्य रन्धिः पाकः संयोगलक्षणसम्बन्धपरम्परयाऽन्यकार्योत्पत्तिर्यथा तथा देहश्चेन्द्रियाणि चासवश्चाशयोऽन्तःकरणं ते तथा तेषां सन्निकर्षात्संयोगलक्षणसम्बन्धात् या स्थौल्यादिलक्षणा संसृतिः सा पुरुषस्य भवतीत्यन्वयः कुतः अनुरोधात् अभिमानात् नत्वाभिमानो नास्तीति वाच्यं देहसद्भावेऽभिमानस्यावश्यं भावित्वाद् भ्रिसन्तप्तायोवत् ननु हेयाहेययोः स्वरूपे सामान्यतो ज्ञातेऽत्र प्रश्नपूर्वकं विशेषतो जिज्ञासा सञ्जाघटीतीति तदभावे स्तम्भसम्भावनवद्व्यर्थः स्यादित्यतो वा हेयस्वरूपं निरूपयति । स्थालीति । अर्थस्तूक्त एव आत्मा संसारी संसारान्तःपातित्वादग्नेः करणवत्स [१] च सत्योऽर्थक्रियाकारित्वादात्मवदित्याद्यूहनीयम् ॥ २२ ॥

स्वप्रमत्तस्य च विपर्येण इति यदुक्तं तत्राह । शास्तेति । यो नृपनिर्दुष्टप्रजानां शास्ता शिष्टप्रजानां गोप्ता देवब्राह्मणमुनीनां किङ्करश्च स्वविहितं नित्यनैमित्तिकं कर्मोच्युतस्याराधनं स्वधर्मं यद्यहमानः कुर्वाणश्च भवति तर्हि स राजा पिष्टं न पिनष्टि निष्फलव्यापारवाश्च भवति किन्तु सफलव्यापारवानेव एतत्कुतोऽवगम्यत इति तत्राह । विजहातीति । ज्ञानमन्तरेणान्येन न हन्यन्त इत्यघानि दुःखान्याधिव्याधिनिमित्तानि तेषामोघो यस्मिन् स संसारस्तथा तं विजहाति मुञ्चति मुक्तो भवतीत्यर्थः एवं संसारस्वरूपं निरूप्य राज्ञः स्वधर्मं निरूपयतीत्यतो वाह । शास्तेति ॥ २३ ॥

यत एवं मम ज्ञानं शबलं न शुद्धं फलादर्शनादतः संसारनिर्मूलनकरं ज्ञानमुपदिशेत्याह । तन्म इति । नराणां देवोऽहमित्यभिमाननिमित्तमदेन तुच्छीकृतसत्तमस्य धिक्कृतसज्जनोत्तमस्य मे यया दृशा सदवध्यानं सज्जनावज्ञाननिमित्तमंहः पापं तरेयं तीर्णो भवामि तां मैत्रीं मित्रं सर्वस्माविष्टतमो हरिस्तद्विषयां दृशं कृषीष्ठ अत्र करणं नाम प्रकाशनं निर्वाच्यं नत्वाविद्यमानस्य निर्माणं प्रकाशयेत्यर्थः मुक्तौ मुख्यं साधनं ब्रह्मज्ञानमेवान्यत् सर्वं तत्साधनमिति द्योतनाय वा कृषीष्ठेत्युक्तम् आर्तबन्धो इत्यनेन संसारान्धकूपे पतितानां जनानां दीपिकालक्षणार्थप्रदानेन समुद्धरणबन्धुभूतस्त्वमेव त्वादृशोऽन्यो नास्तीति स्वाभिप्रायमिदं प्रयुक्तमिति ज्ञातव्यं "इह गतो" इति धातोर्गतिज्ञानस्य प्रतिबन्धकत्वेन पापार्थं अंह इति निपातनात् साधुः ॥ २४ ॥

शिबिकावाहनलक्षणायास्मदवज्ञया तव कोपादिविकारो नास्तीत्याह । न विक्रियेति । विश्वसुहृत् विश्वस्य विश्वात्मना सर्वप्रकारेण वा सुहृत् श्रीनारायणः स एव सखा यस्य स तथा तस्य ते तव विक्रिया सन्तापलक्षणा मनसि विकारः कोपो वा नास्ति केन हेतुनेत्यत उक्तम् । साम्येनेति । मानावमानयोः समत्वकारणेन "मानावमानयोस्तुल्य" इति स्मृतेः तत्रापि किङ्कारणमत्राह । धीताभिमतेरिति । धीता विगताभिमतिरभिमानो यस्य स तथा तस्य सामान्यज्ञानिनोऽपि मनसि विकारो न स्याद्ब्रह्मापरोक्षज्ञानिनस्तस्य तव किं वक्तव्यमित्यपिशब्दार्थः धीताभिमानत्वेन तव मनसि विकाराभावोऽपि सम्भावित इति वा मम तु देहाभिमानो दुस्त्यजो यतोऽतो महदवज्ञां प्राप्य शाश्वतः कर्तव्य आत्मवधो न कृत इत्याशयेनाह । महद्विमानात् । मादृक् पुरुषः स्वकृतान्महतां भवादृशस्य विमानादवज्ञायाः दूरात्तदानीमेवात्मानं भक्षयति दहति न केवलं मादृगेवात्मानं दहति किन्तु सत्त्वोऽप्यधिकः शूलपाणिः सदा शिवोऽपि स्वतो महदवज्ञानादात्मानं दहति ।

ब्रह्महत्यासहस्रस्य पापं शाम्येत् कथञ्चन ।

न पुनस्तन्महदवज्ञानं कल्पकोटिशतैरपि ॥

स्वतो महदवज्ञानाद्रुद्रोऽप्यात्मानमादहेत् ।

इति वाक्यद्वयं हिशब्देनोपात्तमिति ज्ञातव्यमतो भवन्नं प्रार्थये इत्यपिशब्दार्थ इति ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

दशमोऽध्यायः ॥ १० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किङ्करो वेदरूपेश्वराज्ञाकारी मादृशो जनः ॥ २३—२५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

दशमोऽध्यायः ॥ १० ॥

---

(१) संसारः ।

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कपिलदेवं प्रष्टुं प्रवृत्तोऽहमध्वन्येव तमिमं प्राप्तस्तदेतद्धत्तोत्तरायेव प्रथममाक्षिपन् सर्वमेव स्वजिज्ञास्यमाविष्करिष्यामीति मनसि विचारयन् यदुक्तं मम श्रमो नास्तीति तत्राह । दृष्ट इति । आत्मनो मे अनुमन्ये अनुमिमे अनुमानञ्चैवं भवान् भारवाहादिना श्रान्तः कर्तृत्वात् यः कर्ता स श्राम्यति यथाहं युद्धादिकर्त्तेति नन्वेवं व्यावहारिका एवं जल्पन्ति नतु पारमार्थिका इति वाच्यं व्यवहारमार्गस्यापि निर्मूलीकर्त्तुमशक्यत्वादित्याह । यथेति । घटादिकरणकजलादिकमाहरेत्युक्ते असता घटादिना उदकानयनादर्शनात् व्यवहारमार्गः प्रपञ्चः समूलः सप्रमाणक एवेष्टः । यथा यथावत् एव प्रयोगः प्रपञ्चः सत्यः अर्थक्रियाकारित्वात् यः पुनरसत्यः नासावर्थक्रियाकारी यथा मिथ्या घटादिरिति ॥ २१ ॥

भारोद्वहनादिना देहेन्द्रियादेः श्रान्त्या आत्मा विश्रान्तो भवतीति तत्र दृष्टान्तमाह । स्थाल्या अग्निना तापात् तन्मध्यवर्त्तिनः पयसस्तापः । तस्य तापात् तण्डुलानां बहिर्भागस्य तापः ततस्तद्गर्भस्य रन्धिः पाको यथा तथैव देहादिभिः सन्निकर्षात् सम्बन्धात् तत्संसृतिस्तन्निमित्तकः संसारः पुरुषस्य भवति असवः प्राणाः आशयो मनः । अनुरोधादुपाधिधर्मानुवृत्तेः । यथा निदाघादिना देहे तप्ते इन्द्रियाणां तापः ततः प्राणस्य ततो मनसस्तत आत्मन इति ॥ २२ ॥

यदुक्तं स्वस्वाम्यभावो ध्रुव इति तत्राह । शास्तेति । अध्रुवत्वेऽपि यदा यो नृपतिः स प्रजानां शास्ता गोप्ता च भवत्येव यथोक्तं स्तब्धादेः शिक्षा पिष्टपेष इति तत्राह । योऽच्युतस्य किङ्करो मद्विधः स पिष्टं न पिनष्टि यतस्तब्धत्वाद्यनपगमेऽपि शास्तुरीश्वरस्याज्ञासम्पादनेनैव फलवत्त्वात्तदाह । प्रजाशासनलक्षणं स्वधर्मरूपमच्युतस्याराधनं नृप ईहमानः कुर्वन् स्वस्याघौघं प्रत्यवायसमूहं जहाति ॥ २३ ॥

यस्मादेवं मम त्वदुक्तं विपरीतं विभाति । तत्तस्मान्नरदेवोऽहमित्यभिमानेन यो मदो विभुमन्यत्वादिर्मिथ्यागर्वस्तेन तुच्छीकृता इमे किं जानन्तीत्यनादृताः सत्तमाः भवादृशा येन तस्य मे मैत्रीदृशं दुर्जीवोऽयं नरकेऽपि पतिष्यतीति विभाव्य स्नेहयुक्तां दृष्टिं कृपया कुरुतु यया सतामवज्ञारूपमंहस्तरिष्यामि ॥ २४ ॥

ननु त्वत्कृतेन तिरस्कारेणास्मादृशां दुःखं नोत्पद्यते कुतस्त्वत्राणिस्तत्राह । नेति । तत्रापि तव यद्यपीत्यर्थः तदपि मादृक् विनङ्क्ष्यति शूलपाणिसदृशोऽपि यदुक्तं स्थैर्यं महापुरुषपादपांशुभिर्निरस्ततेजःस्वित्यादि ॥ २५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

पञ्चमे दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इत्थं तत्स्वरूपं पृष्ट्वाथ यदुक्तं मम ब्रह्मात्मकत्वानुसन्धानवतः श्रमो नास्तीति तत्राह । दृष्ट इति । कर्मतः श्रमः सामान्यतः सर्वेषां दृष्टः अतः ब्रह्मात्मकत्वानुसन्धानवतोऽपि भर्तुर्वोढुः गन्तुर्भवतश्च भवतोऽपि अनुमन्ये यदुक्तं विशेषबुद्धेर्विवरं व्यवहारतोऽन्यं न पश्यामीति तत्राह । यथेति । व्यवहारमार्गः नरदेवः नरादिस्वस्वामिभावरूपः समूल इष्टः ब्रह्ममूल इत्यर्थः अतो यथा यथावदेव ब्रह्मविचारनद्वारत्वापि इत्यर्थः व्यवहारस्य निर्मूलत्वं तु न सम्भवतीति हेतुना साधयति । असता निर्मूलेन घटादिना उदानयनाद्यभावादिति ॥ २१ ॥

यच्चोक्तं स्थौल्यादयः देहात्ममानिनः सन्ति न त्वात्मविद इति तत्राह । स्थालीति । स्थाल्या अग्निना तप्तायास्तद्गतस्य क्षीरस्य तापस्तत्तापतस्तण्डुलगर्भस्य रन्धिः विक्लित्तिः एवं देहादिभिः सन्निकर्षात्संबन्धात् अनुरोधात्स्वस्वकर्मानुरोधात् तत्तस्य देहादिसंसर्गिणः अज्ञस्य ज्ञानिनश्च पुरुषस्य संसृतिः सुखदुःखाद्यनुभूतिर्भवति असवः प्राणाः आशयोऽन्तःकरणम् ॥ २२ ॥

यदप्युक्तमसौ विधिकृत्ययोगः अध्रुव इति तत्राह । अध्रुवत्वेऽपि यदा यो नृपतिः स प्रजानां शास्ता गोप्ता च भवत्येव यदुक्तं स्तब्धादेः शिक्षा पिष्टपेष इति तत्र स्तब्धादयो राज्ञा धृतदण्डाः स्वर्गं यान्ति राजा च निष्पापो भवतीत्याह । यो ऽच्युतस्य किङ्करः यथायथं प्रजाशासनेन आज्ञापालकः पिष्टं न पिनष्टि किन्तु प्रजां शोधयति स्वयं च प्रजाशासनाख्यस्वधर्मरूपमच्युतस्याराधनमीहमानोऽघौघं विजहाति ॥ २३ ॥

योगशास्त्रे राजशास्त्रे च स्वकौशलं प्रदर्श्यापराधनिवृत्त्यर्थं प्रार्थयते । तदिति । तत्तस्यासमीक्ष्यकारिणो मे नरदेवमदेन तुच्छीकृतः सत्तमो येन तस्य मैत्रीदृशं स्नेहदृष्टिं कृपाद्दृष्टिं करोतु यथा सदवध्यानमंहः महदवज्ञारूपं पापं तरे तरिष्यामि ॥ २४ ॥

विश्वस्य सुहृच्चासौ सखा च स तथा तस्य साम्येन सर्वत्र ब्रह्मात्मकत्वानुसन्धानेन वीता अभिगतिरुत्तमत्वाभिमानो यस्य तस्य तव यद्यपि विक्रिया नास्ति तथापि महतां विमानादवमानात् मादृक् नङ्क्ष्यति अदूरात् क्षिप्रं शूलपाणिरतिप्रबलोऽपीत्यर्थः ॥ २५ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

दशमाध्यायार्थप्रकाशः ॥ १० ॥

———

भाषाटीका ।

आपने जो कहा मेरे को श्रम नहीं है तिसमें हमारा कथन है कि मेरे को जैसे युद्धादिक करने से श्रम होता है तैसेही बोझा ढोने से तथा चलने से आपको भी होता होगा जैसे झूंठे घडा से जल नहीं लाया जाता है तैसे मिथ्या सब जगत् हो तो कोई व्यवहार नहीं होगा ॥ २१ ॥

जैसे कि बर्तनमें अग्नि के ताप लगने से जल तपता है तिसके तपने से चावल के भीतर का अंश पकजाता है तैसेही घामादिकों से देह तपता है फिर इन्द्रिय तपती हैं फिर प्राण फिर मन इसप्रकार आत्मा को संताप होना सत्य ही है ॥ २२ ॥

भाषाटीका ।

राजा तो प्रजों का शासन तथा रक्षा करनेवाला है सो ईश्वर की आज्ञा को करनेवाला है वह पीसे को नहीं पीसता है भगवान् की आज्ञा करना स्वधर्म है वही अच्युत का आराधन है जिसके करने से सब पाप दूर होते हैं ॥ २३ ॥

तिससे हे मुनिवर्य! नरदेव के अभिमान के मदसे आपसरीके महत्पुरुषों के तिरस्कार करनेवाले मेरेपर आप मित्रदृष्टी करो हे आर्तबन्धो ! जैसे सत्पुरुषों के अपमान के पापों से छूटें तैसा उपाय कीजिये ॥ २४ ॥

यद्यपि समदृष्टि होने से अभिमान के छोडने से सबके सुहृत सखा होने से आपके मन में कोई विकार नहीं है तथापि हम सरीका पुरुष तो महात्मों के अपमान करने से रुद्रके तुल्य हो तो भी शीघ्र ही नष्ट होजायगा ॥ २५ ॥

इति श्रीभागवत पञ्चमस्कन्ध दशमाध्यायका
भाषानुवाद लक्ष्मणाचार्य्यकृत
समाप्त ॥ १० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे दशमोऽध्यायः समाप्तः ॥ १० ॥



एकादशोऽध्यायः ।

ब्राह्मण उवाच

अकोविदः कोविदवादवादान् वदस्यथो नातिविदां वरिष्ठः ।
न सूरयो हि व्यवहारमेनं तत्त्वावमर्शेन सहामनन्ति (१) ॥ १ ॥
तथैव राजन्नुरुगार्हमेधवितानविद्योरुविजृम्भितेषु ।
न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो नु चकास्ति साधुः ॥ २ ॥
न तस्य तत्त्वग्रहणाय साक्षाद्वरीयसीरपि वाचः समासन् ।
स्वप्ने निरुक्त्या गृहमेधिसौख्यं न यस्य हेयानुमितं स्वयं स्यात् ॥ ३ ॥
यावन्मनो रजसा पूरुषस्य सत्त्वेन वा तमसा वानुरुद्धम् ।
चेतोभिराकूतिभिरातनोति निरङ्कुशं कुशलं चेतरं वा ॥ ४ ॥
स वासनात्मा विषयोपरक्तो गुणप्रवाहो विकृतः षोडशात्मा ।
बिभ्रत्पृथङ्नामभि रूपभेदमन्तर्बहिष्ट्वं च (२) पुरैस्तनोति ॥ ५ ॥
दुःखं सुखं व्यतिरिक्तं च तीव्रं कालोपपन्नं फलमाव्यनक्ति ।
आलिङ्ग्य मायारचितान्तरात्मा स्वदेहिनं संसृतिचक्रकूटः ॥ ६ ॥
तावानयं व्यवहारः सदाविः क्षेत्रज्ञसाक्ष्यो भवति स्थूलसूक्ष्मः ।
तस्मान्मनो लिङ्गमदो वदन्ति गुणागुणत्वस्य परावरस्य ॥ ७ ॥
गुणानुरक्तं व्यसनाय जन्तोः क्षेमाय नैर्गुण्यमथो मनः स्यात् ।
यथा प्रदीपो घृतवर्तिमश्नन् शिखाः सधूमा भजति ह्यन्यदा स्वम् ।
पदं तथा गुणकर्मानुबद्धं वृत्तीर्मनः श्रयतेऽन्यत्र तत्त्वम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एकादशे तु संपृष्टां रहूगणमहीभृता ।
उपादिशत्परं ज्ञानं स योगीति निगद्यते ॥ १ ॥

अकोविदोऽविद्वानपि त्वं कोविदानां वादा उद्रद्दणिकास्तत्सुल्यान् वादानेव वदसि अथ. अतः अत्यन्तं विदुषां मध्ये श्रेष्ठो न भवसि कुतः हि यस्मात् यं स्वामिभृत्यादिलौकिकव्यवहारं त्वं सत्यमात्थ एनं सूरयस्तत्त्वविचारेण सह न वदन्ति किन्त्वविचारसुन्दरं वदन्ति अतो न सत्यः ॥ १ ॥

वैदिकोऽपि कर्मव्यवहारो न सत्य इत्याह । तथैवेति । उरवो गार्हा गृहसम्बन्धिनो मेधा यज्ञास्तेषां वितानो विस्तारस्तद्विषयासु विद्यासु उरु अधिकं विजृम्भितेषु विलसितेषु वेदवादेषु तत्त्ववादो नु निश्चितं न चकास्ति न प्रकाशते तथाच श्रुतिः "नेह नानास्ति किञ्चन" इत्यादि शुद्धो हिंसादिशून्यः साधु रागादिशून्यश्च प्रायेणेतीश्वरार्पितकर्मणां परमार्थफलत्वाभिप्रायेणोक्तम् ॥ २ ॥

ननु श्रुतवेदान्तस्यापि पुंसः कर्मसु प्रवृत्तेः कथमसत्यता तत्राह । नेति । साक्षाद्यथावत्तत्त्वज्ञानाय वरीयस्योऽपि वेदान्तवाचस्तस्य न सम्यगासन् बभूवुः स्वप्ने या निरुक्तिस्तया स्वप्नदृष्टान्तेन दृश्यत्वादिहेतुना स्वयमेव हेयत्वेनानुमितं यस्य न स्यात् ॥ ३ ॥

एवं प्रपञ्चस्य सत्यत्वं तदुक्तं निराकृत्य संसारस्यापि तदुक्तां सत्यतां निराकर्तुं तस्य मनोनिमित्ततामाह । यावदित्यादिना यावत्समाप्ति । मनो यावद्रजआदिभिर्गुणैरनुरुद्धं वशीकृतं भवति तावत्तन्मनो निरङ्कुशं सत्पुरुषस्य कुशलं धर्ममितरमधर्मं वा आतनोति । कैः चेतोभिर्ज्ञानेन्द्रियैः आकूतिभिः कर्मेन्द्रियैश्च ॥ ४ ॥

(१) समामनन्तीति श्रीवीरराघवपाठः । (२) वयुनैरिति श्रीवीरराघवपाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका।

ततश्च धर्माधर्मवासनायुक्तं तदेवानेकदेहादिवैचित्र्यं करोतीत्याह। स इति। पुंस्त्वमात्मशब्दविशेषणत्वेन तन्मन इत्यर्थः वासनात्मक आत्मोपाधित्वादात्मा अतो विषयैरुपरक्तोऽनुषिक्तः अतो गुणप्रवाहो गुणैरितस्ततश्चाल्यमानः। अत एव विकृतः कामादिपरिणामवान् षोडशात्मा षोडशकलासु भूतेन्द्रियरूपासु मुख्यः पृथङ्नामभिः सह पृथग्रूपभेदं देवतिर्यगादिरूपं बिभ्रत्। अन्तर्बहिष्ट्वमुत्कृष्टत्वं निकृष्टत्वं च पुरैस्तैरेव देहैर्हेतुभूतैस्तनोति। नामभिरित्यत्र रेफलोपे दीर्घाभाव आर्षः ॥ ५ ॥

फलं च तदनुरूपं करोतीत्याह। दुःखं सुखं व्यतिरिक्तं च मोहं तीव्रं दुर्निवारं कालप्राप्तं सर्वतोऽभिव्यनक्ति सृजति ननु जडः कथं सृजति तत्राह। स्वदेहिनमालिङ्ग्य। आलिङ्गने कारणमाह। मायारचितोऽन्तरात्मा जीवोपाधिः। उपाधितामाह। संसृतिचक्रे कूटयति छलयतीति तथा यथा ग्रामकूटक इति ॥ ६ ॥

एवमयं मनोनिबन्धनः संसारो जीवे फलतीत्याह। तावदिति। आविः प्रकाशमानः सदा क्षेत्रज्ञस्य साक्ष्यो दृश्यो भवति। स्थूलसूक्ष्मो जाग्रत्स्वप्नस्वरूपः मनसः संसारहेतुत्वमुपसंहरन् मोक्षस्यापि तदेव कारणमित्याह। तस्मादिति। अतो मनः लिङ्गं कारणं गुणत्वं गुणाभिमानित्वमगुणत्वं तद्राहित्यं तदेव परमवरं च तस्य ॥ ७ ॥

कथमेकस्यैव विलक्षणयोः कारणावस्थाभेदादित्याह। गुणेति। नैर्गुण्यं निर्गुणमथो इति कार्त्स्न्येन दृष्टान्तेन स्फुटयति। यथेति। अन्यदा तु घृतक्षयं स्वं पदं शुक्लभास्वररूपं महाभूतात्मत्वं वा अन्यत्रान्यदा ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवं देहगतानां परिश्रमस्थौल्यादीनां सत्यानामेव देहात्मभ्रान्त्यात्मनि प्रतीयमानानामपि वस्तुत आत्मन्यभावे निराक्षेपं मयाभिहिते सत्ययं प्रपञ्चानित्यत्वं मिथ्यात्वं मयाभिहितमिति मन्यन् क्रियाकारित्वहेतुना घटादीनामिव तेषां सुखदुःखाद्यर्थक्रियाकारित्वेन सत्यतामुपपादयन्न कुशलः असत्यत्वेऽभिहिते सत्यत्वोपपादनं युक्तिमदन्यथान्यत्र गतानामन्यत्र प्रतीतिभ्रमरूपत्वे कथिते तेषां सत्यत्वोपपादनवैयर्थ्यात् तथा देहसम्बन्धादात्मनि तेषां प्रतीतिर्न वस्तुत इत्युक्तेः पुनर्देहादिसम्बन्धादात्मनि परिश्रमादिप्रयुक्तसुखदुःखादिप्रतीतिरिति वदन्नयं न निपुणः उक्तस्यैव पुनराक्षेपत्वेनोक्तेः तथा जीवानां मिथः स्वस्वामिभावस्यौपाधिकत्वे कथिते पुनस्तस्य स्वाभाविकत्वाभिमानेन स्वस्य दण्डनेतृत्वं साधयन्नयं न निपुण इत्यभिप्रायेणाह। अकोविद इति। विविक्तात्मपरमात्मयाथात्म्यज्ञानरहित एव त्वं कोविदवादवादान् कोविदवाक्यतुल्यानि वाक्यानि वदन्नपोऽस्यन्तविदुषां मध्ये श्रेष्ठो न भवसि कुतः हि यस्मादेतं व्यवहारं देहात्माभिमानस्वतन्त्रात्माभिमानप्रयुक्तं पीनत्वयुवत्वगुरुगन्तृत्वादिव्यवहारमात्मविषयं देहिनां परस्परं स्वस्वामिभावादिव्यवहारमन्यच्च सर्वं सूरयस्तत्त्वत्रययाथात्म्यविदः तत्त्वावमर्शेन तत्त्वविचारमूलकेन न समामनन्ति न सम्यग्वदन्ति न परमार्थत्वेन गृह्णन्तीत्यर्थः सहामनन्तीति पाठे तत्त्वविचारेण सह न वदन्ति किमर्थविचारितसुन्दरं वदन्ति सूरयो न समामनन्ति इत्यनेन निरन्तरमध्यात्मशास्त्रपरिशीलनवतामात्मपरमात्मयाथात्म्यज्ञाननिष्ठानां अस्मिन्देहात्मभ्रान्त्यादिमूले व्यवहारेऽपारमार्थ्यज्ञानं तद्विपरीतानां त्वस्मिन् पारमार्थ्याभिमानश्चेति सूचितम् ॥ १ ॥

तत्र तेषां तदभिमाने हेतुस्तत्त्वत्रयस्वरूपस्वभावप्रतिपादकवेदान्तशास्त्रार्थापरिशीलनमेवेति वक्तुं तावत् शास्त्रस्तुतये पूर्वभागस्यातत्त्वादकत्वमाह। तथैवेति। तथापि हे राजन्नुरवो बहवः गार्हमेधाः गृहमेधिसम्बन्धिनो वितानाः यज्ञादिकर्मविस्ताराः तत्प्रतिपादकविद्यया उरु भृशं विजृम्भितेषु विलम्बितेषु वेदवादेषु वेदरूपेषु उक्तेषु वेदपूर्वभागेषु तत्त्ववादः शुद्धो निर्गुणात्मकः अत एव साधुः प्रायेण न चकास्ति न प्रकाशते प्रायेणेत्यनेनेश्वराराधनत्वेन कर्म कुर्वतां रोचते एवेत्युक्तं देहातिरिक्तस्य फलभोक्तृत्वमात्रं ज्ञायते न तु स्वरूपं शोध्यते इत्यर्थः यद्वा तत्त्वस्य वाद उक्तिर्यस्मिन् स तत्त्ववादः तत्त्ववादीत्यर्थः एवं वेदवादेष्वित्यत्रापि वेदशब्दः तत्पूर्वभागपरः पूर्वभागतदर्थवादिषु उत्तरभागार्थवादी न सम्यक् प्रकाशत इत्यर्थः कर्मस्वेव रुचिमतो ज्ञाने रुचिं नोत्पादयितुं शक्नुयादिति भावः ॥ २ ॥

श्रुतवेदान्तस्याप्यविरक्तस्य न केवलतत्त्वावबोध इत्याह। नेति। स्वप्ने स्वाप्नपदार्थे निरुक्त्या व्याख्यानेन स्वप्नसुखस्याल्पास्थिरत्वावगमेनाप्यर्थात् गृहमेधिन ऐहिकामुष्मिकसुखं यस्य हेयत्वेनानुमितं न स्यात्तस्य सांसारिकदुःखनिवृत्तिविरहात् तत्र संसक्तस्य साक्षाद्यथावत्तत्त्वज्ञानाय वरीयसी वरीयस्यः गरीयस्योऽपि वेदान्तवाचः सम्यग्ज्ञानं वेदान्तैर्न तत्त्वावबोध इत्यर्थः स्वप्नदृष्टान्तेन गृहमेधिभोग्यस्य हेयत्वानुमानं तत्त्वावबोधकारणक्षुद्रसुखासक्तिमूलकमित्युक्तम् अनेन गृहस्थस्य हेयत्वाध्यवसाये तत्त्वज्ञानोदय इति फलितम् ॥ ३ ॥

तत्र गुणत्रयोपरागेण कुशलाकुशलकर्मोपादनद्वारेणावरदेहसम्बन्धमापादयन्मन एवाल्पास्थिरसुखासक्तिजननद्वारा तत्त्वज्ञानप्रतिबन्धकं संसृतिकारणं तदेव च गुणत्रयाकलुषितं सज्ज्ञानजननद्वारा मुक्तिहेतुश्चेत्याह। यावदिति सार्धैः पञ्चभिः। यावदस्य पुरुषस्य मनो रजआदिभिरनुपक्तम उपरक्तं भवति तावदसङ्कुशं सत्त्वादिगुणानुसारेण चेतो ज्ञानेन्द्रियव्यापारैराकृतिभिः कर्मेन्द्रियव्यापारैश्च हेतुभूतैः कर्मेन्द्रियकर्मभिः पुण्यापुण्यरूपैः कुशलमुत्कृष्टमितरं निहीनं वा देहमातनोति सम्पादयति ॥ ४ ॥

एतदेव प्रतिपादयति। स इति। पुंस्त्वमात्मशब्दविशेषणत्वेन तन्मन इत्यर्थः सवासनात्मा वासनाधीनस्वरूपः विषयोपरक्तः शब्दादिभिरुपरक्तः गुणैः सत्त्वादिभिः प्रवाहः प्रवृत्तिर्यस्य स गुणप्रवाहः पञ्चभूतैकादशेन्द्रियरूपषोडशद्रव्यस्वात्मा प्रधानः नामभिर्वाचकशब्दैः सह रूपभेदं देवमनुष्यत्वाद्यवयवसंस्थानरूपाकारभेदं बिभ्रद्देवमनुष्यत्वादिकमात्मनो वाहिर्यं चान्तर्गतं रागादिकं च गुणैः सङ्कल्पविकल्पात्मकैस्तनोति आत्मानं देवोऽहं मनुष्योऽहमिच्छामि द्वेष्मीत्येवं रूपबुद्धिविषयोपाध्याकारयुक्तं करोतीत्यर्थः। यद्वा गुणैः सङ्कल्पविकल्पात्मवृत्तिभेदैः रूपभेदमनेकरूपतां बिभ्रत्सवासनात्मान्तर्गतरागादिकं बहिर्गतदेहादिकं नामभिः सह तनोति अत्र पुरैस्तनोतीत्यपि पाठो दृश्यते तदायमर्थः पुरुषस्य मनो यावद्रजआदिभिरनुविद्धं सदसङ्कुशं यथा भवति तथा ज्ञानकर्मोभयेन्द्रियैर्गुणानुसारेण पुण्यापुण्यरूपव्यापारमापादयति तावदयं स्वतोऽविकृतोऽपि पुरुषः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सत्वामनाधीनस्वरूपान्तःकरणयुक्तः अत एव वासनावशाद्विषयैरुपरक्तः विषयासक्तः गुणप्रवाहः गुणैः प्रवाहः प्रवृत्तिर्यस्य गुणानुरूपप्रवृत्तिमान् ततः पञ्चभूतैकादशेन्द्रियरूपषोडशपदार्थानामात्मा धारकः सन् अचिन्मिश्ररूपसूक्ष्मदेह इत्यर्थः नामभिः सह देवमनुष्यादिरूपभेदं बिभ्रत्तैः पुरैः शरीरैः पुनरन्तर्गतरागद्वेषादिकं बाहिष्ठं बाह्यं च कर्म गुणानुसारेण पुण्यापुण्यरूपं करोति ॥ ५ ॥

तदनुरूपमीश्वरादिष्टं फलं च प्राप्नोतीत्याह । दुःखमिति । एवंविधं यत्संसृतिचक्रं तस्मिन्कूटवत् पर्वतशृङ्गवदविचाल्यतया वर्तमानः मायारचितान्तरात्मा प्रकृतिपरिणामरूपान्तःकरणवान् स्वदेहिनं स्वशरीरिणं परमात्मानमालिङ्ग्य तमविनाभूयैवान्तःकरणपारवश्यात्स्वदेहिनं परमात्मानमजानन्नपि तच्छरीरतया वर्तमान एवेत्यर्थः । यद्वा स्वः देहो यस्य स स्वदेहस्तमालिङ्ग्येत्यर्थः कालेन दैवादुपपन्नं प्राप्तं दुःखादिकं फलं कर्मफलमाव्यनक्ति आप्नोति व्यतिरिक्तं मोहं तीव्रं दुर्निवारमित्यर्थः अश्नुत इत्यर्थः ॥ ६ ॥

यावदेवं तावान् तत्पर्यन्तवानयं स्थूलसूक्ष्मो व्यवहारो व्यवहारस्य स्थूलत्वं सूक्ष्मत्वं च व्यवह्रियमाणाकारस्थूलत्वसूक्ष्मत्वे देवोऽहं मनुष्योऽहं स्थूलोऽहं कृशोऽहमित्यादिबाह्याकारविषयः स्थूलः इच्छामि द्वेष्मि सुख्यहं दुःख्यहमित्याद्यन्तराकारविषयः सूक्ष्मः सदाविः क्षेत्रज्ञसाक्ष्यो भवति सर्वदा स्वरूपेणातिरोहितजीवः साक्ष्यो विषयो यस्य तथाभूतो भवति कर्मणा स्वस्वभावसङ्कोचरूपतिरोधाने सत्यपि स्वरूपस्यातिरोधानात्सदाविरित्युक्तं सदा आविः स्वरूपेण भासमानो यः क्षेत्रज्ञो जीवः तद्विषय एवायं व्यवहारो देहात्माभिमानात् उक्तमर्थमुपसंहरन्मनस एव बन्धमोक्षकारणत्वं सदृष्टान्तमाह । तस्मादिति द्वाभ्याम् । तस्मान्मनसो गुणानुरक्तादुक्तविधसंसृतिचक्रापत्तेरनुरक्ताच्च तत्त्वज्ञानोदयादगुणागुणत्वस्य गुणागुणत्वयोः गुणत्रयसहितत्वतद्रहितत्वयोः संसारमोक्षयोरित्यर्थः "गुणवचनेभ्यो मतुपो लुगिष्टः" इति गुणशब्दो गुणिपरः लिङ्गं हेतुमपि तन्मनो वदन्ति तथा परावरस्य देवादिस्थावरान्तपरावरभावस्य च मन एव लिङ्गं वदन्ति यद्वा । परावरशब्दो व्युत्क्रमेण गुणागुणत्वविशेषणम् अवरं निकृष्टं यद्गुणसहितत्वं परमुत्कृष्टं यद्गुणराहित्यं तयोर्लिङ्गं मन इत्यर्थः ॥ ७ ॥

तद्विवृणोति । गुणानुरक्तमिति । गुणशब्दस्त्रिगुणपरः त्रिगुणानुरक्तं मनः जन्तोर्व्यसनाय संसाराय नैर्गुण्यममलं मनस्तु क्षेमाय मुक्तये स्यादित्यर्थः निर्गतं गुणेभ्यो निर्गुणं तदेव नैर्गुण्यं चातुर्वर्ण्यादेराकृतिगणत्वात्स्वार्थे ष्यञ् मनसो मलिनत्वे विमलत्वे च दृष्टान्तमाह । यथेति । घृतवर्ति घृतावसिक्तां वर्तिमश्नन् प्राप्नुवन् सधूमां शिखां भजति अन्यदा घृतानवसिक्तवर्त्तिगतः स्वं परं रूपं धूमानाविलं भजति तथा गुणकर्मानुबद्धं गुणानुसारिभिः पुण्यापुण्यकर्मभिः कलुषितं मनः प्रदीपस्थानीयं शिखास्थानीया धूमतुल्या रागद्वेषाद्यावृता वृत्तीर्भजते अन्यत्र गुणत्रयेणाकलुष्ये सति तत्त्वं स्वस्वभावं सत्त्वप्राचुर्यं तां श्रयते प्राप्नोति । यद्वा तत्त्वं श्रयते तत्त्वावभासस्तदा स्यादित्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मिन्नध्याये हेयत्वेन प्रथमतो वक्तव्यत्वेन संसारस्वरूपं निरूप्य तन्निवर्तकसाधनं निरूपयति प्रथमतस्तदुक्तमाक्षिपन्निवाह । अकोविद इति । राजंस्त्वमकोविदोऽपण्डितः कथं कोविदवादान्वदसि यत्कोविदानां पण्डितानां वादवद्वचनवदवभासमानान् वादान् वचनविशेषान् ब्रूष इति यस्मात्तस्मात्स्वधर्ममाराधनमच्युतस्येत्यादिवदतो ममापाण्डित्यं कथमत्राह । नातिविदामिति । भिक्षुकश्रुतगलोपरिवक्तृत्ववद्वक्तृत्वान्नातिविदां दृष्टकरतलामलकवत्तत्त्वज्ञानां मध्ये गणनीयत्वेन वरिष्ठः न हि हेतुवदाभासमानान् प्रपञ्चमिथ्यात्वे प्रयुक्तान् दृश्यत्वादिहेतून् प्रयुञ्जान आनुमानिकेषु कोविदो भवति कुतस्तरां वरिष्ठः कुतो वचसामाभासत्वमत्राह । न सूरय इति । सूरयः सर्वज्ञाः शब्दतत्त्वज्ञाः एनं व्यवहारं "भर्तुर्गन्तुर्भवतश्चानुमन्यं । शास्ताभिगोप्ता नृपतिः प्रजानां स्याच्चाश्रितापत्यसोऽभितापस्तत्तापतस्तण्डुलगर्भरन्धिः" इत्यादिलक्षणतत्त्वावमर्शेन यथास्थितवस्तुस्वरूपविचारेण सह नामनन्ति देहेन जातस्य हि मे न सन्ति विशेषबुद्धेर्विवरं मनाक् पश्यामीत्यादिग्रन्थस्यार्थापरिज्ञानाद्विजृम्भितमिति एतद्विशब्देनाह । अतः प्रेक्षावद्भिः कटाक्षेणाप्यनभिवीक्षितत्वादुपेक्षणीयस्त्वयं पक्ष इति ॥ १ ॥

ननु माभूत्सूरिभिरामननं वेदैः किं न स्यादिति तत्राह । तथेति । यथा सूरिसिद्धान्ते त्वद्व्यवहारो न चकास्ति सदोषत्वाज्जलदच्छन्नद्युमणिवदल्पबुद्धीनां वेदानां वादेषु मुख्यतः प्रतीयमानार्थप्रतिपादकलक्षणेषु वाक्येषु तत्त्ववादः परब्रह्मस्वरूपविषयज्ञानसिद्धान्तो नानु चकास्ति न प्रकाशते कथं न चकास्तीत्यत उक्तं शुद्ध इति । „स्वर्गकामो यजेत„ इत्यादिकर्मप्रतिपादकानां „ब्रह्मविदाप्नोति परम्" इति ब्रह्मज्ञानप्रतिपादकानां च वाक्यानां यथैकवाक्यत्वं तथा न प्रकाशत इत्यर्थः कस्मात्तथा न प्रकाशनमत्राह । उरुगार्हमेधेति । उरु विस्तीर्णं गार्हमेधं गृहस्थसम्बन्धिवितानं यज्ञकर्म तत्प्रतिपादकया विद्यया उरुधा विजृम्भितेषु सम्यग्बोधकेषु यतोऽल्पबुद्धीनां न प्रतीयते ततो महाबुद्धीनां प्रकाशत इत्यतो हीति "न वेदेष्वल्पबुद्धीनां ब्रह्म तत्त्वं समीक्ष्यते । महाबुद्धिस्तु वेदेषु पश्येद्ब्रह्मैव केवलम्" इति वचनात् अल्पबुद्धीनां बाहुल्याभिप्रायेण प्रायेणेति अयोग्यानामयमेवार्थ इत्यस्मिन्नर्थे एवशब्दः "वादो विपर्ययवक्तृत्वं मुख्यतो वचनं स्मृतम्„ इत्यभिधानं कर्मपराणां कर्मैव न तत्र विभाग इतरेषामितर एव शुद्धः किं न स्यादिति नेत्याह । साध्वीति । एकवाक्यत्वकरणमेव साधु नान्यदित्यर्थः ॥ २ ॥

पुरुषार्थबोधकत्वेन प्रवृत्तस्य वेदस्य सर्वस्य पुरुषार्थित्वेन सर्वसाधारणस्य केषांचित्तत्त्वप्रकाशकत्वं केषांचिन्नेति विशेषो वैषम्यादिदोषापत्तेरित्याशङ्क्य पुरुषदोषादिदमित्याह । न तस्येति । वरीयसीः वरीयस्योऽपौरुषेयत्वेन प्रशस्ता वेदान्तगता अपि वाचस्तस्य पुरुषस्य साक्षात्तत्त्वग्रहणाय पुरुषार्थोपयोगिब्रह्मज्ञानाय न समासन्न सम्यगभवन्नित्यन्वयः तच्छब्देनोक्तं यच्छब्देन विशिनष्टि । स्वप्न इति । यस्य पुरुषस्य गृहमेधिसौख्यं स्वप्ने निरुक्त्या स्वप्नदृष्टान्तेन स्वयमेव स्वत एव हेयत्वेनानुमितं न स्यादित्यन्वयः स्वप्नसुखवज्जाग्रत्सुखं हेयमिति लिङ्गज्ञानं न स्यादित्यर्थः अनेन विषयराग एव वेदान्तवाक्योक्ततत्त्वज्ञानानुदये कारणं नान्यदित्युक्तं भवति ॥ ३ ॥

ननु हेयानुमितत्वे किं कारणमित्यतो रहूगणस्याकोविदत्वव्यापनाय तन्निरूपितादन्यथा संसारस्वरूपं निरूपयति । यावदिति ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भवपुरुषस्य मनो रजआदिगुणैरनुरुद्धं गुणवशत्वेन स्थितं तावत्पर्यन्तं श्वेतोभिर्बुद्धिवृत्तिभिरेतच्छाकृतिभिर्विषयसुखेच्छाभिः पूर्वानुभवसंस्कारैर्वा निरङ्कुशः शास्त्रविधिमुत्सृज्य वर्तमानो यः पुरुषः कुशलाकुशलयोरेकतरमातनोतीत्यन्वयः ॥ ४ ॥

कुशलाकुशलकर्मभ्यां किं फलमापादयतीति तत्राह । स वासनात्मेत्यादिश्लोकद्वयेन । स मायारचितान्तरात्मा प्रकृतिनिमित्तं मनः पृथङ्नामभिः स्वपुरैः स्वस्य जीवस्य सुरनरतिर्यगादिदेहं रूपभेदं सुरनरतिर्यगादिदेहभेदं चित्रं बहुविधं तनोति अन्तरात्मानं विशिनष्टि । वासनात्मेति । नानाकर्मवासनामयः गुणानां प्रवाहो यस्मिन् स तथा षोडशात्मा दशेन्द्रियाणि पञ्च प्राणाः स्वयमेकं मन एवं षोडशभेदेन विकृतः अन्तर्बहिष्ठः वासनारूपेणान्तःस्थितं विषयरूपेण बहिःस्थितं संसृतिचक्रस्य कूटं राशिर्यस्मिन् स तथा तं स्वदेहिनमालिङ्ग्य वशीकृत्य सुखं दुःखं वा व्यतिमिश्रं सुखमिश्रं दुःखं दुःखमिश्रं सुखं फलं च व्यनक्ति व्यञ्जयतीत्यन्वयः ॥ ५—६ ॥

यावानहंममेत्यभिमानस्तावानयं व्यवहारः संसारः सुखदुःखलक्षणः अभिज्ञाभिवदनादिलक्षणो वा भवति ननु मनसः प्रवर्तकत्वाङ्गीकारे प्रवृत्तेर्भगवत्कर्तृकत्वं गतं स्यादिति तत्राह । क्षेत्रज्ञेति । क्षेत्रज्ञः श्रीनारायणः साक्षी प्राणः नाड्यां प्रेरितेन मनसा जीवः समारमनुभवतीत्यर्थः "क्षेत्रवित्तु हरिः प्राणः साक्षी नाड्यां पुमान्स्मरेत्" इति वचनादुक्त एवार्थः स्थूलसूक्ष्मदेहविषयः"मन एव मनुष्याणां कारणं बन्धमोक्षयोः"इत्यभिप्रेत्योपसंहरति । तस्मान्मन इति । यत एवं श्रीहरिकटाक्षचित्तमनसा संसारस्तस्मादिदं मनः परावरस्य पूर्वोत्तरकाले वर्तमानस्य गुणागुणस्य मुख्यकर्तृ हरेः प्रवृत्तौ गुणभूतस्य स्वतः सत्त्वादिगुणमुक्तस्याप्यस्य जीवस्य संसृतौ लिङ्ग हेतुं वदन्ति अयं व्यतीको नेत्याह । सदिति । वा इत्यनेन हेतुभूतं प्रमाणं सूचयति ॥ ७ ॥

एकस्योभयहेतुत्वं कथमत्राह । गुणेति । गुणानुरक्तं विषयाभिनिविष्टं गुणानां विषयाणां समुदायो गणयं निगतं विषयजातादत्यन्तनिर्गुणं ब्रह्म तत्सम्बन्धि नैर्गुण्यं "केवलो निर्गुणश्च,,इति श्रुतेः सत्त्वादिगुणरहितं तत्सम्बन्धि वा नैर्गुण्यं क्षेमाय मोक्षाय मनोनिमित्तं भवतीत्यर्थः उभयत्रापि दृष्टान्तमाह । यथेति । घृतेन सह वर्तमानां वर्तिमास्थितो अश्नमानः प्रदीपो यथा सधूमां स्थितिं शिखालक्षणां भजति धूमसाहित्येन सम्यक् ज्वलतीत्यर्थः अन्यदा घृतवर्त्यभावे स्वरूपं तेजोमात्रलक्षणं निजस्वरूपलाभेन सम्यक् प्रकाशितो भवति घृतवर्तिग्रासाभावे निर्मलीकस्वप्रकाशलक्षणं स्वरूपं व्रजतीति वा हिशब्देन लोकदृष्टं प्रमाणयति तथा सत्त्वादिगुणैः पूर्वसञ्चितैः कर्मभिश्चानुबद्धं पृष्ठबन्धनप्राप्तवीरवन्मनो बहिः (१) पदं विषयं शब्दादिलक्षणं श्रयते सेवते पुनः पुनरुत्पन्नप्रवृद्धरागादिदोषाभ्यीकृतमिदमेव श्रेयो नान्यदिति निश्चयं वर्तेत इत्यर्थः अन्यत्र तुच्छीकृतविषयसंपर्कत्वे तत्त्वमनारोपितं ब्रह्मस्वरूपं श्रयते निरस्तरागादिदोषत्वेन निर्मलं मनोऽनादिमत्परं ब्रह्मेति स्मृतिबलादिदमेवानादृत्य नश्वरं श्रेयोऽन्यदनश्वरं दुःखाकरमिति निश्चित्य तदेकनिष्ठं भूत्वा वर्तेत इति भावः अतो विरुद्धधर्माक्रान्तया त्वेकस्य मनसः उभयत्र प्रवृत्तिर्न घटत इति दोषो निरस्तो भवत्यनेनेति सिद्धम् ॥८॥

(१) पद्यत इति पदं विषयमित्यर्थः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वप्ने निरुक्त्येति । श्रवणात् पूर्वं व्यवहारवैराग्यं तर्कदृष्ट्यापेक्षन इत्यर्थः ॥ १—५ ॥

मायारचितान्तरात्मेति । श्रीवेदव्याससमाधिलब्धानुसारेण भयं द्वितीयाभिनिवेशतः स्यादित्याद्यनुसारेण च क्षेत्रज्ञ एता मनसोविभूतीत्यस्य वक्ष्यमाणवाक्यानुसारेण व्याख्याय प्रकरणस्यास्य सिद्धान्तक्रमः समाधेयः ॥ ६—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मनसैव हि संसारो यद्वृत्तीनामनन्तता ।

एकादशोऽत्र तेनैव मोक्षो भक्तियुजोदितः ॥

त्वं कोविदो न भवसि अथ च कोविदानां ये वादा उद्ग्राहास्तत्तुल्यानेव वादान् वदसि अतो अत एव अत्यन्तं विदुषां मध्ये श्रेष्ठो न भवसि । यतः सूरयः कोविदा एतं व्यवहारं व्यावहारिकं वस्तु च तत्त्वावमर्शेन तत्त्वविचारेण तत्त्ववक्तृता च सह न आमनन्ति दृष्टान्तादिना नाभ्यस्यन्ति । तयोः परस्परविरोधस्यात् तथाहि स्थालीतापात् पयस्तत्तापात्तण्डुलताप इति तण्डुलस्य जडस्य स्थाल्यादिभिर्जडैर्वह्निनापि जडेन यथा संसर्गस्तथा देहेन्द्रियादिभिर्जडैर्मुक्तजीवस्य चिद्रूपत्वेन संसर्गाभावादेव देहादिधर्मेण भ्रमः सिद्ध्यति । बद्धजीवस्य तु जडदेहाध्यासाज्जडत्वेन संसर्गस्य भ्रम इति बद्धजीवस्याभिमुक्तजीवानामस्माकं साहचर्यासम्भवादनुमानं न घटत इति ॥ १ ॥

ननु मीमांसकाः कर्मफलात् स्वर्गसुखादिमिच्छन्तः [illegible] न मन्यन्त इत्यतः किं तत्त्वादेनेति चेत् सत्यं [illegible] तत्त्वोपदेशो नैव सम्मत इत्याह । नैवेति । [illegible] स्थानां दृष्टफलेषु व्यवहारकर्मसु तथैव उक्तो [illegible] विस्तारकलितपराक्रम् [illegible] उत अधिकं विज्ञम्भितेव विलसितेषु [illegible] कर्मसु न निश्चितं तत्त्ववादो न चकास्ति न प्रकाशते [illegible] हिंसादिशून्यः साधुः रागादिशून्यश्चेति [illegible] त्यर्थः प्रायेणेति ईश्वरार्पितनिष्कामकर्मणां ज्ञानवैराग्यद्वारा परमार्थफलत्वाभिप्रायेणोक्तम् ॥ २ ॥

ननु कर्मिणस्तावत्तत्त्वं ज्ञास्यन्ति का चिन्ता [illegible] किम्वा तत्रोपविशाम इति केवलं प्रौढिवाद एवेत्यत आह । नेति । तस्य जनस्य साक्षाद्यथावत्तत्त्वग्रहणार्थं वरीयस्योऽपि वेदा स्तत्त्वाचः न सम्यगासन् न समर्था बभूवुः । स्वप्ने भोगानां स्वप्नकालमात्रस्थायित्वं स्वप्नस्य स्वतो विनाशित्वं मिथ्यात्वञ्च या निरुक्तिस्तया स्वप्नदृष्टान्तेनेत्यर्थः । स्वयमेव हेयत्वेनानुमितं यस्य न स्यात् कर्मिणां नश्वरमसामयिकं तुच्छं वैराग्यकमेव सुखं तथा वैषयिकं सुखं नात्मनो वस्तुतः सम्बन्धाभावात् तत् सुखमात्मनः शशस्य शृङ्गमिव मिथ्याभूतमित्याभि-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मात्मन्यनश्वरं सार्वकालिकं महद्ब्राह्मं सुखमिति बहुवाक्तरमित्येवं तत्त्वग्रहणे युक्तिरिति भावः ॥ ३ ॥

नन्वेवं सद्भिः प्रबोधिता अपि प्रायः सर्वे जना वैषयिके सुख एव प्रवर्त्तमानाः कथं दृश्यन्ते तत्राह । यावन्मनो रजआदिभिरनुरुद्धं संवद्धं भवति तावत्तन्मनो निरङ्कुशमत्तमतङ्गजोपमं सत् पुरुषस्य कुशलं धर्ममितरमधर्मं वा आतनोति कैः चेतोभिर्ज्ञानेन्द्रियैः आकूतिभिः कर्मेन्द्रियैश्च गुणमयं मन एव बलाद्विधेकादिकमपि निगीर्य पुण्यपापकर्मणोः प्रवर्त्तयति पुरुषस्य को दोष इति भावः ॥ ४ ॥

ततश्च सवासनात्मा पुण्यपापवासनायुक्त आत्मा मनः विषयैरुपरक्तोऽनुविद्धः अत एव गुणप्रवाहः गुणैरितस्ततश्चाल्यमानः अत एव विकृतः कामादिविकारवान् षोडशेषु भूतेन्द्रियेषु मुख्यः रूपभेदं देवतिर्यगादिशरीरभेदं बिभ्रत् दधत् पुरेभ्यैरेव शरीरैर्हेतुभिः अन्तर्बहिष्ट्वमुत्कृष्टत्वं निकृष्टत्वञ्च तनोति नामभिरिति रेफलोपे दीर्घाभाव आर्षः ॥ ५ ॥

फलञ्च तदनुरूपं सृजतीत्याह । दुःखं सुखं व्यतिरिक्तं मोहञ्च तीव्र दुर्निवारं व्यनक्ति सृजति ननु जडः कथं सृजति तत्राह । स्वदोहनं जीवात्मानमालिङ्ग्य आलिङ्गने कारणमाह । मायया रचितः अन्तरात्मा जीवोपाधिः उपाधिनामाह । संसृतिचक्रं कूटयति कलयतीति तथा यथा ग्रामकूटक इति ॥ ६ ॥

एवमयं मनोनिबन्धनः संसार एव व्यवहारपदवाच्य इत्याह । तावानिति । आभिः प्रकाशमानः सदा क्षेत्रज्ञस्य साक्ष्यो दृश्यः स्थूलो जागरः सूक्ष्मः स्वप्नश्च तत्त्वपदवाच्यमात्मसुखमपि मनोनिबन्धनमेवेत्याह । तस्माददो मन एव लिङ्गं कारणं कस्य गुणस्य संसारस्य अगुणत्वस्य मोक्षस्य च तौ च संसारमोक्षौ कस्य स्यातामित्यत आह । परावरस्य उत्कृष्टनिकृष्टजन्मकस्य पाठक्रमो नात्र विवक्षितः निकृष्टस्य संसारो भवति उत्कृष्टस्य तु मोक्ष इत्यर्थः ॥ ७ ॥

कथमेकमेव विलक्षणयोः कारणमवस्थाभेदादित्याह । गुणेति सार्द्धेन । नैर्गुण्यं निर्गुणमन्यदा घृतक्षये सति निर्वाणा सती स्वं पदं महाभूतात्मत्वं भजति अन्यत्र अन्यदा । यद्वा वर्त्तिमदनश्वेवाग्निः सधूमाः शिखा भजति अन्यदा काञ्चनपिण्डमदनेन्तु स्वपदं निर्धूमतेजःस्वरूपं तथैव मनोऽपि तत्त्वं भगवन्माधुर्यास्वादम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एकादशे रहूगणोक्तं बालभाषितमिवानादृत्य प्रसक्तो मुनिः बन्धमोक्षयोः कारणं मन एवेत्याह । अकोविद इति । अकोविदः सिद्धान्तानभिज्ञः कोविदवादाः यत् सर्वस्य ब्रह्मात्मकत्वानुसन्धानरत्वेन प्राधान्यं तद्विषयकाः शब्दास्तत्तुल्यान् वादान् शब्दान् वदसि अथो अतो विदां मध्ये अतिवरिष्ठो नासि एवं नरदेवनरादिस्वस्वामिभावरूपं व्यवहारं तत्त्वविमर्शेन ब्रह्मविचारेण सह न आमनन्ति ब्रह्मविचारवदादरणीयं न वदन्ति ॥ १ ॥

तमेतमात्मानं ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेति भगवत्या श्रुत्योक्तो यः परमानन्दसाधने कर्मकाण्डस्योपयोगस्तमृते सर्वोऽपि कर्मकाण्डोऽनित्यफलविषयः संसारहेतुर्नतु तत्त्वप्रस्तावे योजितुं योग्य इत्याह । तथैवेति । उरवो गाहाः गृहसम्बन्धिनो मेधा यज्ञास्तेषां वितानो विस्तारस्तद्विद्यासु विजृम्भितेषु बहुविलसितेषु वेदवादेषु तत्त्ववादः शुद्धः फलतः स्वरूपतश्च निर्दोषः साधुमुमुक्षूपादेयः नु निश्चितं न चकास्ति न प्रकाशते प्रायग्रहणं विविदिषावाक्योक्तप्रकारं विनेति द्योतयति ॥ २ ॥

नन्वध्ययनविध्युपात्ता वेदान्तवाचः सर्वेषां विविदिषोत्पादनाद्विना कुतो न तत्त्वज्ञानदाः स्युरित्यत आह । नेति । यस्य मन्दबुद्धेः स्वप्ने या निरुक्तिः नितरां क्रियमाणानित्यतोक्तिस्तया गृहमेधिसौख्यं हेयत्वेनानित्यत्वेन हेतुना अनुमितं न स्यात्तस्य साक्षाद्यथावत्तत्त्वग्रहणाय वरीयस्योऽपि वेदान्तवाचः न सम्यगासन् बभूवुः प्रयोगस्तु कर्मफलं गृहमेधिसौख्यमनुपादेयम् अनित्यत्वात् स्वप्नधनवदिति ॥ ३ ॥

ननु कस्यचिद्वरीयस्यो वाचस्तत्त्वग्रहणाय न समासन्नित्युक्त्या तस्य संसारित्वं दर्शितं तत्र कः संसारहेतुः अर्थात् यस्य तु तास्तत्त्वग्रहणाय स्युः स मुक्त्यधिकारी तत्र च को मुक्तिहेतुरित्याकाङ्क्षायां मन एवेत्याह । यावदिति सार्द्धैः पञ्चभिः । रजआदिभिः पुरुषस्य मनो यावदनुरुद्धं व्याप्तमत एव निरङ्कुशं दुर्निग्रहं सत् तावत् कुशलं धर्मं सत्त्वव्याप्तम् इतरमधर्मं तमोव्याप्तं चकाराद्रजोव्याप्तं यच्चश्चेतोभिर्ज्ञानेन्द्रियैः आकूतिभिः कर्मेन्द्रियैश्च आतनोति समन्ततो विस्तारयति ॥ ४ ॥

तदेवं धर्मादिवासनायुक्तं नानादेहप्रापकं भवतीत्याह । स इति । पुंस्त्वमात्मशब्दविशेषणत्वात् वासनानामात्माश्रयः धर्मादिवासनायुक्त इत्यर्थः विषयोपरक्तो विषयासक्तः गुणप्रवाहः गुणैश्चाल्यमानः विकृतः अनेकशाखः षोडशात्मा लिङ्गशरीरे मुख्यः पृथङ्नामभिः सह पृथक् रूपभेदं देवमनुष्यपश्वादिरूपभेदं बिभ्रत् अन्तर्बहिष्ट्वमुत्कृष्टत्वं निकृष्टत्वं च पुरैस्तैरेव देहैश्च तनोति विस्तारयति नामभिरित्यत्र "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इतिदीर्घाभाव आर्षः ॥ ५ ॥

दुःखादिकं फलं चाव्यनक्ति प्राप्नोति व्यतिरिक्तं मोहं तीव्रं क्रोधादिकं च ननु जडः कथमाप्नोति तत्राह । स्वदोहिनं जीवमालिङ्ग्येति यतः मायारचितः प्रकृतिपरिणामभूतः अन्तरात्मा अन्तःकरणमेवात्मा जीवेन मायामोहितेनात्मतयारोपितमित्यर्थः अत एव संसृतिचक्रं जन्ममरणचक्रं कूटयति देहाद्देहान्तरं गच्छन् छलयतीति तथा एकत्र स्थिरो न भवतीत्यर्थः ॥ ६ ॥

यावदयं तावान् अयं प्रसिद्धः व्यवह्रियते इति व्यवहारः संसारः क्षेत्रज्ञसाक्ष्यः जीवस्य दृश्यः जीवभोग्य इत्यर्थः स्थूलसूक्ष्मः सूक्ष्मसंहार्यरूपःकस्य चिन्मुमुक्षोर्मुक्तत्वेऽपि अनन्तबद्धजीवव्याप्तत्वात्सदाभिः सर्वदा प्रकाशमानः सृष्ट्यनन्तरस्थूलरूपेण प्रलयानन्तरं सूक्ष्मरूपेण च न केवलं मनः संसारकारणं किन्तु संसारमोक्षयोरुभयोः कारणमित्याह । गुणत्वमुपादेयत्वं मोक्षभावः अगुणत्वमनुपादेयत्वं संसारभावः तयोः समाहारद्वन्द्वः तस्य तद्द्वयं क्रमादाह । परावरस्येति । अदो मनः लिङ्गं कारणम् ॥ ७ ॥

गुणानुरक्तं विषयासक्तं व्यसनाय संसाराय निर्गुणं त्यक्तविषयं

एकादशासन्मनसो हि वृत्तय आकूतयः पञ्च धियोऽभिमानः ।
मात्राणि कर्माणि पुरं च तासां वदन्ति हैकादश वीर ! भूमीः ॥ ९ ॥
गन्धाकृतिः स्पर्शरसश्रवांसि विसर्गरत्यर्त्यभिजल्पशिल्पाः ।
एकादशं स्वीकरणं ममेति शय्यामहं द्वादशमेक आहुः ॥१०॥
द्रव्यस्वभावाशयकर्मकालैरेकादशामी मनसो विकाराः ।
सहस्रशः शतशः कोटिशश्च क्षेत्रज्ञतो न मिथो न स्वतः स्युः ॥ ११ ॥
क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः ।
आविर्हिताः क्वापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥ १२ ॥
क्षेत्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः ।
नारायणो भगवान् वासुदेवः स्वमाययाऽऽत्मन्यवधीयमानः ॥ १३ ॥
यथानिलः स्थावरजङ्गमानामात्मस्वरूपेण निविष्ट ईशेत् ।
एवं परो भगवान् वासुदेवः क्षेत्रज्ञ आत्मेदमनुप्रविष्टः ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मद्वत् नैर्गुण्यं स्वार्थे स्वस्य क्षेमाय परमपुरुषध्यानपूर्वकतत्पादप्राप्तिरूपमोक्षाय च मनः स्यात् निर्मलं मनः परमपुरुषध्यानार्हं भवति अनस्तस्य निर्मलं रूपं दृष्टान्तेन स्फुटयति यथा प्रदीपः घृतयुक्तां वर्तिमश्नन् सधूमाः शिखा भजति मलिनवृत्तिमान् भवतीत्यर्थः अन्यदा तु घृतवर्त्तिक्षये स्वं पदं महाभूतावस्थाख्यं शुद्धं रूपं प्राप्नोति एवं विषयसेवनार्थं कर्मासक्तं सत् मलिनाः वृत्तीर्भजते अन्यदा विषयपरित्यागे निर्मलं सत् परमपुरुषध्यानार्हं तत्त्वं शुद्धं निजरूपं भजते ॥ ८ ॥

———

भाषाटीका ।

ब्राह्मण श्रीभरतजी बोले तुम पण्डित नहीं हो परन्तु पण्डितों की सी बातें करते हो तिससे तुम ज्ञानियोंमें श्रेष्ठ नहीं हो जो विद्वान् हैं सो तो इस व्यवहार को तत्त्व विचार के साथ नहीं गिनते हैं ॥ १ ॥

हे राजन् ! इसी प्रकार गृहस्थों के करनेयोग्य जो यज्ञ हैं तिनके विस्तार से युक्त जो वेदवाद तिनमें तत्त्ववाद अति शुद्ध होने से भी अति उत्तम प्रायः नहीं प्रकाशित होता है ॥ २ ॥

जिस पुरुष को स्वप्न के तुल्य यज्ञादि जन्य सुख हेय नहीं है उस पुरुष को साक्षात् वेदवचन भी तत्त्व ग्रहण नहीं करा सकते हैं ॥ ३ ॥

जबपर्यन्त पुरुष का मन रजोगुण से अथवा तमोगुणसे या मिश्रित इन कर्मों को करता रहता है तबतक वह मन निरंकुश होकर ज्ञान कर्म इंद्रियोंसे पुण्य अथवा पाप करता है ॥ ४ ॥

वासना सहित वह मन गुणों के साथ बहता हुआ षोडश विकार वाला भिन्न रूपों को धारण करनेवाला होकर वैदिक अधिकारी अनधिकारी पुरुष को करदेता है ॥ ५ ॥

माया से रचित जो मन है सो जीव को आलिङ्गन कर के संसार चक्र में गत हुआ काल से प्राप्त सुख दुःख वा अतिरिक्त तीव्र मोह फल को प्रकट करता है ॥ ६ ॥

जबतक यह मन इस पुरुष को भ्रमाता है तभीतक जीव का हृदय यह स्थूल सूक्ष्म प्रपञ्च प्रकाशमान रहता है तिससे भली बुरी योनी का बन्ध मोक्ष का कारण मन ही है ऐसा महापुरुषों का कथन है ॥ ७ ॥

गुणों में आसक्त जो मन है वह बन्ध का हेतु है गुणरहित मन मोक्षका हेतु है जैसे दीपक घृतकी बत्ती के खाने से धुंआं सहित शिखा को निकालता है और खाली रहने से केवल अपने शुद्ध रूपमें रहता है ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

वृत्तीर्दर्शयति । एकादश वृत्तय आसन् । आकूतयः क्रियाकाराः पञ्च धियश्च ज्ञानाकाराः पञ्च अभिमानश्चेति हे वीर ! भूमीर्विषयान् ॥ ९ ॥

विषयानेवाह । गन्धादयः पञ्च ज्ञानेन्द्रियद्वारा धीवृत्तीनां विषयाः आकृतिः रूपम् । श्रवः शब्दः विसर्गादयः पञ्च कर्मेन्द्रियद्वारा कर्माकारवृत्तीनां विषयाः रतिः सम्भोगः अर्तिर्गतिः पुरस्याभिमानविषयत्वप्रकारमाह । एकादशं पुरम् । स्वीक्रियत इति स्वीकरणम् अयमर्थः शरीराभिमानस्य न ज्ञेयतया गन्धादिवद्विषयः नापि कार्यतया विसर्गादिवत् किन्तु ममेति भोगायतनत्वेन स्वीकार्यतया विषय इति । एके तु विवेकिनामेव पुरं ममत्वाभिमानविषयो न तु मूढानामतो मूढदृष्ट्या अहमहङ्कार द्वादशं वृत्यन्तरमाहुः । तस्य च पुरमेव शय्यामेकं द्वादशं विषयमाहुः । तत्र हि जीवोऽहङ्कारेण सह शेते यतः पुरि शयनात्पुरुष इत्युच्यते ॥ १० ॥

तासां वृत्तीनामवान्तरभेदहेतूनाह । द्रव्याणि विषयाः

श्रीधरस्वामिकृतभावार्थदीपिका।

स्वभावः परिणामहेतुः आशयः संस्कारः कर्म अदृष्टं कालः क्षोभकः नैर्निमित्तभूतैः प्रथमं शतशस्ततः सहस्रशस्ततः कोटिशः स्युर्न तु मिथः स्युर्न च स्वतः किन्तु क्षेत्रज्ञात् परमेश्वरात्। तस्य चानन्तशक्तित्वादनन्ताः स्युरित्यर्थः। यद्वा। तासां मिथ्यात्वमनेनोच्यते कोटिशो भवन्त्यनन्ताः क्षेत्रज्ञत एव स्युस्तत्सत्तयैव सत्तां लभन्ते न तु मिथो न च स्वत इति। यद्वा। क्षेत्रज्ञो जीवस्तस्माच्च स्युः तस्याविकारित्वात् न मिथः इतरेतराश्रयत्वापत्तेः न स्वतः आत्माश्रयत्वापत्तेः अतो मिथ्याभूता एव ॥ ११ ॥

तदेवं श्लोकत्रयेण गुणकर्मानुबद्धं मनो वृत्तीः श्रयत इति यदुक्तं तत्प्रपञ्चितम्। अन्यदा तत्त्व श्रयत इति यदुक्तं तदेव तत्त्वमाह। क्षेत्रज्ञ इति। जीवस्य जीवोपाधेः अविशुद्धकर्मणः मनसः नित्याः प्रवाहरूपेणाविच्छिन्ना जाग्रत्स्वप्नयोराविर्भूताः पश्यति क्वापि सुषुप्तौ तिरोभूताः पश्यति अवस्थात्रयसाक्षी क्षेत्रज्ञ आत्मा तत्त्वमित्यर्थः ॥ १२ ॥

क्षेत्रज्ञो द्विविधः। त्वंपदार्थो जीवः तत्पदार्थ ईश्वरश्च। तयाद्यो निरूपितः इदानीं तत्त्वाद्यमीश्वरं निरूपयति। क्षेत्रज्ञ आत्मा व्यापी। पुराणो जगत्कारणभूतः। पुरुषः पूर्णः साक्षादपरोक्षः। स च स्वयंज्योतिः ननु ज्ञानस्य विषयत्वेनाश्रयत्वेन वा परोक्षः अजो जन्मादिशून्यः परेषां ब्रह्मादीनामपि ईशः नारं जीवसमूहः सोऽयनं यस्य नियन्तुः भगवानैश्वर्यादिषड्गुणवान्। वासुदेवः सर्वभूतानामाश्रयः स्वाधीनया मायया आत्मनि जीवेऽवधीयमानोऽवस्थाप्यमानः। कर्मकर्तरि प्रयोगः। तन्नियन्तृत्वेन वर्त्तमान इत्यर्थः ॥ १३ ॥

एतत्सदृष्टान्तमाह। यथेति। आत्मस्वरूपेण प्राणरूपेण ईशो नियमयति। इदं विश्वम् ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

गुणकल्पस्य मनसो वृत्तीः प्रपञ्चयति। एकादशेत्यादिना। मनसः एकादशवृत्तयो वृत्तय आसन् ताः का इत्यत्राह। आकूतयः कर्मेन्द्रियाणां व्यापारविषयाः पञ्च धियः क्रियाकारा धियः ज्ञानेन्द्रियद्वारेण पञ्चवृत्तयो ज्ञानाकाराः एकादश सहाङ्कारा अहंममाद्यभिमानव्यवहारैकका संभूयैकादश हे वीर! तासां वृत्तीनां भूमीर्विषया मात्राणि पञ्च कर्माणि पञ्च पुरम् इत्येकामिति संभूयैकादशेति वदन्ति तत्त्वविदः तत्र मात्राणि गन्धादीनि ज्ञानाकाराणाम् वृत्तीनां विषयाः कर्माणि तु विसर्गादीनि क्रियारूपाणां पुरं त्वभिमानरूपाया इति विवेकः पुरमत्र शरीरं तस्याहंममाभिमानविषयत्वादिति ॥ ९ ॥

ज्ञानकर्मोभयेन्द्रियव्यापारविषयाणि मात्राणि कर्माणि प्रपञ्चयति गन्धेति। गन्धः घ्राणेन्द्रियवृत्तिविषयः आकृती रूपं चक्षुरिन्द्रियवृत्तिविषयः स्पर्शः त्वगिन्द्रियविषयः रसो रसनेन्द्रियविषयः श्रवः शब्दः श्रोत्रेन्द्रियस्य विषयः एवं पायूपस्थपादवाक्पाणिवृत्तीनां क्रमेण विसर्गादयः पञ्च विषयाः तत्र विसर्गः पुरीषोत्सर्गः रतिः संभोगः अतिर्गमनमभिजल्पो भाषणं शिल्पं आदानादिः गन्धादयः पञ्च ज्ञानेन्द्रियद्वारा मनोवृत्तीनामेव विषयाः तथा विसर्गादयः कर्मेन्द्रियद्वारा मनोवृत्तीनामेव पञ्चानां पञ्च विषया इति विवेकः पुरस्याभिमानविषयत्वप्रकारमाह। एकादशमिति। स्वीकरणं ममेदं शिरः ममाऽयं हस्त इत्याद्यभिमानेन स्वीकरणं स्वीकार्यं शरीरमभिमानस्य विषयः तदेकादशं वदन्ति अयमर्थः शरीरमभिमानस्य न ज्ञेयतया गन्धादिवद्विषयः नापि कार्यतया विसर्गादिवत्किन्तु ममेति स्वशेषतया स्वीकार्यत्वेन विषय इति विवेकिनामेव शरीरं ममाभिमानविषयमिति वदन्ति प्रायेण स्वीकरणं ममाभिमानस्य विषयत्वेनोक्तमविवेकिनां तु शरीरमहमभिमानविषयमिति तदभिप्रायेणाह। शय्यामहं द्वादशमेक आहुः इति। एके केचिदहमहङ्कारः अनात्मन्यात्मतादात्म्याभिमानरूपस्तं द्वादशीं वृत्तिं तस्या विषयभूतां शय्यां शरीरं द्वादशविषयम् चाहुरित्यर्थः जीवो यतः स्वस्वरूपव्यामोहेन शरीरं शेते वसतीति शरीरं शय्याशब्देनोच्यते ननु गन्धादीनां तद्विषयज्ञानानां च वृत्तिरूपाणां भेदाद्विषयविषयभाव उपपन्नः विसर्गादीनां कर्मेन्द्रियवृत्तित्वात्तेषामेव, पुनस्तद्विषयत्वमनुपपन्नमिति चेन्न विसर्गादीनां क्रियात्मकत्वात् क्रियायाश्च फलव्यापारभेदेन द्वैविध्यात्तत्र व्यापारांशस्य वृत्तित्वं फलांशस्य विषयत्वमिति भेदात् तथाहि उत्सर्गस्त्यागो विश्लेषस्तद्विषयः तदनुकूलो व्यापारो वृत्तिरेवं रत्यादिष्वपि बोध्यम् ॥ १० ॥

उक्तानामेकादशानां वृत्तीनामवान्तरभेदैरानन्त्यमाह। द्रव्यं पृथिव्यादिभूतपञ्चकं तेषामसाधारणो गुणः स्वभावस्तेषां परिणामस्वभावो वा तेषां विचित्रपरिणामहेतुर्वा आशयो वासना कर्माणि पुण्यपापानि एतैः पूर्वोक्ता एकादशवृत्तिरूपा मनसो विकाराः प्रथमं शतशस्ततः सहस्रशः ततः कोटिशश्च स्युः तेन विकाराः केवलस्य मनसः किन्तु क्षेत्रज्ञाधिष्ठितस्यैव भवन्तीत्याह। क्षेत्रज्ञाधिष्ठितस्य मनसो भवन्तीत्यर्थः क्षेत्रज्ञमनसोरपि परस्पराधिष्ठितयोर्न भवन्ति किन्तु क्षेत्रज्ञाधिष्ठितमनस एवेत्याह। न मिथ इति। तत्रापि न स्वतो भवन्ति किन्तु कर्मत इत्याह। न स्वत इति कर्माधीना इति भावः क्षेत्रज्ञशब्दोऽत्र जीवपरः तस्यैव मनोऽधिष्ठातृत्वात्सङ्कोचविकासवद्धर्मभूतज्ञानाश्रयत्वाच्च यद्यप्यत्र प्रकरणे क्षेत्रज्ञशब्दो नारायणवासुदेवभगवदादिसामानाधिकरण्येन प्रयुज्यमानः परमात्मपरोऽवगम्यते क्षेत्रं जानातीत्यवयवार्थपौष्कल्यञ्च तत्रैव तथाप्यत्र जीवपरः आश्रयणीय उक्तयुक्तेः क्षेत्रज्ञ एता मनसो विभूतीः क्षेत्रज्ञ आत्मा पुरुषः पुराण इत्यत्र तु परमात्मपरः यद्वात्रापि क्षेत्रज्ञशब्दः परमात्मपर एव तस्य सर्वोपादानतया चिदुपादानत्वाच्चेतनद्वारा तद्धर्मभूतज्ञानसङ्कोचविकासाश्रयत्वात् जीवद्वारा मनोऽधिष्ठातृत्वमस्मभवाच्च।

> अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधम्।
>
> विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्।

इति प्रयोजकतया दैवस्य परमात्मनोऽपि सर्वत्रान्वयस्मरणाच्च ११॥

तदेवं मनसो गुणत्रयोपरागानुपरागाभ्यां बन्धकत्वमोचकत्वे गुणोपरक्तस्य मनसः क्षेत्रज्ञस्याधिष्ठितस्य वृत्तयश्चाभिहिताः एवमचेतनतत्त्वं निरूपितमिदानीं चेतनतत्त्वं निरूपयिष्यन् तावत्प्रधानभूतं परमात्मतत्त्वं शोधयति। क्षेत्रज्ञ इति त्रिभिः। अत्र क्षेत्रज्ञशब्दो न जीवपरः किन्तु परमात्मपरः जीवस्येति पृथङ्निर्देशात् अविशुद्धकर्मकर्तुर्जीवस्य मनसः जीवाधिष्ठितस्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मनसः मायारचिताः प्रकृतिमूला एता उक्ताः तत्फलभोक्तुश्च विभूतीः वृत्तिविस्ताराभित्याः प्रवाहतो नित्याः कश्चिज्जाग्रदवस्थायामाविर्भूताः क्वापि सुषुप्तौ तिरोहिताश्च क्षेत्रज्ञः परमात्मा शुद्धवृत्त्या यतः सुखदुःखादिरूपमालिन्यरहित एव विचष्टे तथाच श्रुतिः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्यो अभिचाकशीति" इति मायारचितस्येति पाठे मनसो विशेषणं प्रकृतिपरिणामरूपस्य मनसः ॥ १२ ॥

एवं कर्मकर्तृतत्फलभोक्तृजीवसाक्षितया तदभोगेन स्वयंप्रकाशमानतया च वर्तमानः परमात्मेत्युक्तं भवति पुनः प्रकृतिपुरुषयोरसंभावितधर्मविशेषैस्तं विशिनष्टि । क्षेत्रज्ञ इति । अनेनाचेतनव्यावृत्तिर्जीवव्यावृत्तिश्च नहि जीवः क्षेत्रं यादृक् तत्स्वरूपं तथा जानाति किंतु ममेदमिति सामान्याकारेणात्मा प्रकृतिपुरुषयोरन्तः प्रविश्य नियन्तृत्वेन धारकः पुराणः पुरुषः न जगदादिकारणतया वर्तमानः पुरुषः साक्षात्स्वप्रकाशस्वरूपः स्वयंज्योतिष्ट्वं जीवेऽपि प्रसक्तं तद्व्युदासाय साक्षादित्युक्तं साक्षादपरोक्षं स्वयंज्योतिः नहि जीवस्वरूपं मनआदिभ्यो विविक्तं बद्धावस्थायामवभासते मुक्तावस्थायामपि तदवभासस्य परमात्मप्रसादायत्तत्वात् निरुपाधिकसाक्षादवभासमानत्वात्मकनिरुपाधिकसाक्षात्स्वयंज्योतिष्ट्वस्यैवात्राभिप्रेतत्वात् नित्यसिद्धानामपि तथात्वस्य परमात्मनो नित्येच्छायत्तत्वेन निरुपाधिकत्वाभावात् अजः स्वरूपेण स्वभावतश्चोत्पत्त्यादिविकाररहितः अचेतनस्वरूपस्वभावाभ्यामुत्पत्तिमतोः प्रकृतिपुरुषयोर्व्यावृत्तिः जीवस्यापि ज्ञानविकासरूपस्वभावोत्पत्तेः सत्त्वात् परेषां ब्रह्मादीनामपि ईश्वरः देवताविशेषनिश्चयायोक्तम् । नारायणो भगवान् वासुदेव इति । नारं जीवसमूहस्तस्यायनं प्राप्यं प्रापकमाधारश्चेत्येवं नारायणशब्दो यौगिकरूढिभ्यां विष्णोरेवासाधारणः अत्र निर्वचनानि पूर्वमेवोपन्यस्तानि एवं वासुदेवशब्दोऽपि "वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि" इति तत्रैव नियतः स्मर्यते भगवच्छब्दोऽपि भगवत्पराशरादिभिः "संहर्ता च तथा भर्ता" इत्यादिभिरेवं ततः समुदायरूपेण च तत्रैव नियतः स्मृतः अन्तरात्मतया सर्वव्यापकत्वेऽप्यत्कथमदर्शनमत आह । स्वमायया स्वाधीनमायया आत्मन् जीवे आत्मस्वरूपतया लुक् परमे व्योमनितिवत् व्यवधीयमानः तिरोधीयमानः प्रकृतिवशगैर्द्रष्टुमशक्य इत्यर्थः ॥ १३ ॥

न प्रकृतिवशगैर्दुर्दर्शत्वमात्रेण सर्वव्यापकत्वं भगवतः किन्तु वायुवदवश्य एव सर्वव्यापकतया नियमयतीत्याह । यथेति । यथानिलो वायुरात्मस्वरूपेण चराचरभूतानामन्तःप्रविष्ट ईष्टे प्रेरयति । एवं क्षेत्रज्ञः परमात्मा भगवान् वासुदेवोऽपीदं जगच्चेतनाचेतनात्मकमन्तर्नियन्तृतया प्रविष्टः भगवतो व्याप्तिद्वारा प्रेरकतया चेत्यनिलदृष्टान्तः ततः सिद्धः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रोत्रादीन्द्रियेषु सत्सु मनस एव प्राधान्यं कथमित्याशङ्क्य तत्तदिन्द्रियद्वारा तत्तद्विषयेषु मनसः प्रवृत्तेरित्याह । एकादशेति । अस्य मनस एकादशवृत्तयः तय आसन्नित्यन्वयः । अयमर्थः श्रोत्रादीनि दश एकं मनः स्वयमित्येकादशेन्द्रियाणि इन्द्रियद्वारेण बहिः रूपादिषु प्रवर्तमानस्य मनस एकादशवृत्तय इत्युच्यन्ते तदुक्तम् "एकादशेन्द्रियद्वारा स्युरेकादश वृत्तयः" इति अत्र काश्चिद्विभागोऽप्यस्ति एकादशधा विभक्तस्य मनस आकृतयः अहं शब्दं शृणवानीत्यादिविषयानुभवेच्छा पञ्चशब्दादीनां च तावत्त्वाश्रिभवलक्षणरूपान्तरमाश्रितस्य धियो बुद्ध्यपरपर्यायस्य मनसोऽभिमाना अहं मधुरं गृह्णामीत्यादिरूपाश्च पञ्च तदुक्तं "शब्दाद्याहृतयोऽभिमानास्तदिच्छाश्चैव पञ्चशः" इति कर्मेन्द्रियाणां स्पर्शान्तर्भावेण एकत्वेन पृथग्विषयाभावेन पञ्च पञ्च सङ्ख्यात्वोपपत्त्या एकादशधापि विभक्तस्य मनस एकादशाकृतयोऽप्यपेक्षिता इति दुराग्रहो निरस्तः "स्पर्शान्तर्भावितः कर्मणां नैव पृथग्गतिः" इति वचनात् । तर्हीन्द्रियचेष्टानामपि पञ्चत्वं स्यादित्याशङ्क्य विषयबाहुल्येन तावत्त्वं न घटत इत्यभिप्रेत्याह । मात्राणीति । मात्राणि श्रोत्रादिज्ञानेन्द्रियविषयाः शब्दादयः कर्माणि वागादिकर्मेन्द्रियविषया गमनादिव्यापाराः पुरं शरीरं चेत्येतन्मासामिन्द्रियवृत्तीनां भूमिमधिष्ठानमेकादश वदन्ति इत्यनेनेन्द्रियगणं च भूमिं वदन्ति तदुक्तम् ।

एकादशैव चेष्टाः स्युरिन्द्रियाणां पृथक् पृथक् ।
गोलकास्तदधिष्ठानं चैकादश निगद्यत इति ।

हे वीर ! ज्ञानप्रदर्शकलक्षणाध्यवसायान्तगामिन् ! मात्राणीत्यादिनोक्ता भूमीः पृथक् पृथक् निदर्शयति ॥ ९ ॥

गन्धेति । आकृती रूपं अर्तिरुपस्थविषयः शिल्पो हस्तविषयः । एकादशमधिष्ठानं ममेति स्वीकरणं सङ्कल्पविकल्पलक्षणं स्वीकारयोग्यमिन्द्रियगणं चाहुः । 'पुरि तनौ शेत' इति श्रुतेः हृदयलक्षणाधिष्ठानसम्भवात्कथमेकादशत्वमित्याशङ्क्य संख्यान्तरमाह । मायामिति । मायां नानाधिष्ठानभूतां नाहंमहमित्यभिमन्तव्यं मायां निश्चयज्ञानविपर्ययं वा तदुक्तम् "एवं संसृतिसम्भारा द्वादशैवाथ वा भवेत्" इति एकादशत्वं च प्रसङ्गाद्वक्ति "दशकं विषयाणां च म(१)माहमिति च द्वयम्" इति सर्वान्तर्भावेण द्वयमेव तत्कि द्वयमेव समाहर्तुमिति । मायामहमित्यनेनायमर्थो ध्वनितः तथाहि विषयाणां दशकं मायामित्येकमहमित्येकमिति द्वादशमित्यर्थः ममेति वृत्तिविशिष्टमन्तःकरणं मायामिति ज्ञातव्यम् । यद्वा द्वादशसङ्ख्याविशिष्टत्वेनोक्तमहमिति वृत्तिविशिष्टमन्तःकरणमेकमेव संसृतिकारणमिति शेषः तदुक्तं संसृतिस्त्वहमेव चेति ॥ १० ॥

गृह्णात्येकैकाभिव्यक्तिनिमित्तमाह । द्रव्येति । द्रव्यं देहादिः स्वभावो जीवस्यानादियोग्यता आशयः पूर्वानुभवसंस्कारः कर्म जन्मान्तरकृतं पुण्यपापलक्षणमदृष्टं कालः फलपाचकः एतैः कारणैर्विना अमी मनसः एकादश विकारा जायन्त इति शेषः न केवलं मनस एकादशैव विकाराः किन्तु मन्दमध्यमोत्तमादिभेदेन शतशः सहस्रशः कोटिशोऽपि विकाराः सन्तीत्याह । सहस्रश इति । क्रमभङ्गस्तु नियमभङ्गाय ननु देहादयश्चेषां यदि निमित्तं तर्हि जन्मादिसूत्रोक्तमनङ्गीकृत्य ब्रह्मकारणत्वमनर्थकं स्यादपि च ब्रह्मा वा एतैः कारणैः कारयतीति श्रुतिव्यापहारिणा स्यादिति तत्राह । क्षेत्रज्ञत इति । क्षेत्रज्ञतो ब्रह्मणो जीवान्तर्यामिणो हरेः एते विकाराः स्युर्जीवस्येति शेषः देहाद्यधिष्ठाय जीवान्तर्यामी हरिः जीवादृष्टमपेक्ष्य तद्भोगार्थमुत्पादयत्यतो देहादिः परम्परया कारणोऽपि न श्रुतिसूत्रे व्यर्थे इति भावः तन्वन्योऽन्याश्रयात्स्वभावादिराद्यव्यवस्थातो वेषामुत्पत्तिः किं न स्यात् किमनेन ब्रह्मकल्पनयेति तत्राह । न मिथ इति ॥ ११ ॥

(१) ममेति अहंकर्तेत्यभिमानद्वयम् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

नन्वेषां सत्यत्वे किं मानमिति तत्राह । क्षेत्रज्ञ इति । भोगयोग्यः क इत्यत उक्तं जीवस्येति । उपादानाभावेनेन्द्रजालसृष्टिवत् मिथ्याभूता इति नेत्याह । मायारचिता इति । मायया प्रकृत्या रचिताः "मायां तु प्रकृतिं विन्द्यात्" इति वचनात् नित्यत्वे कथं रचितत्वमित्यत उक्तमनित्या इति नित्यस्य जीवस्यानित्यानामनुभवः कथमित्यत उक्तमाविर्हिता इति जाग्रत्स्वप्नयोराविर्हिताः क्वापि सुप्तौ तिरोहिताः विचष्टे पश्यति दर्शनं साक्षित्वेन नत्वनुभवनम् "अनश्नन्न्यो अभिचाकशीति" इति श्रुतेः अपिशुद्धकर्तुरित्यनेन साक्षिणो हरेर्जीवं व्यावर्तयति॥१२॥

शुद्धाशुद्धत्वविशेषणाभ्यां वैलक्षण्ये ज्ञाते सन्दस्यैकमेव वस्तु शबलनिर्गुणभेदेनोच्यत इति शङ्का स्यादिति तत्परिहाराय क्षेत्रज्ञं विशिनष्टि । क्षेत्रज्ञ इति । आत्मा व्यापी "यश्चाप्नोति यदादत्ते महान्तं विभुमात्मानम्" इत्यादिश्रुतेः व्याप्तस्य नीरूपत्वेनाकाशवत्प्रतिपत्त्यनुपपत्तिरित्यतः पुरुष इति "सहस्रशीर्षा पुरुषः" इतिश्रुतेः पुरि शरीरे निषण्णो भवतीति निरुक्त्या पुरुषश्चेत्तत्परिमाणे तत्स्थस्यापि परिमाणप्रसङ्ग इत्यतः पुराण इति "शाश्वतोऽयं पुराणः" इति श्रुतेः कतिपयदिनस्थायित्वेनापि पुराणशब्दार्थोपपत्तिरित्यतः स्यादिति. जडप्रकृतेरपि साक्षात् पुराणत्वोपपत्तेरनादित्वादित्यतः स्वयंज्योतिरिति "अत्रायं पुरुषः स्वयंज्योतिर्भवति" इति श्रुतेः स्वयंज्योतिषोऽपि जीववत् जननं किं न स्यादित्यतोऽज इति "अजो नित्य" इति श्रुतेः नन्वयं हिरण्यगर्भः किं न स्यादित्यतः परेश इति । परो हिरण्यगर्भस्तस्येशः "यो ब्रह्माणं विदधाति पूर्वम्" इति श्रुतेः "ब्रह्मणोऽधिपतिः" इति श्रुतेः हिरण्यगर्भेशोऽपि पशुपतिः किं न स्यादित्यतो नारायण इति । नरसमुदायो नारः तस्याश्रय इति कस्यचिद्ब्रह्माधिपतेरपि नारायणत्वं स्यादित्यतो भगवानिति ।

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।

वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति इति स्मृतेः

त्रिविक्रमकालदर्शी स्यात्तस्मादीश्वरस्य भगवच्छब्दवाच्यत्वोपपत्तिरित्यतो वासुदेव इति । अत्र व्याख्यातिः पौराणिकरीत्योक्ता न तु न्यायशास्त्रीकिमवलम्ब्येति नोपहासविषयोऽयमिति ज्ञातव्यं नन्वेवंलक्षणकः क्षेत्रज्ञश्चेत्किमिति जनैर्न दृश्यत इत्यतः स्वमाययेति । स्वमायया स्वेच्छयात्मन्यात्मनि स्वस्मिन्नेव व्यवधीयमानः तिरोहितत्वेन स्थितः स्वात्माधारः स्वेच्छयैव जीवहृदि स्थितोऽहितः क्षेत्रज्ञ उच्यते विष्णुः जीवस्थः पुरुषोत्तम इति च अतो निर्वाच्याविद्ययाच्छाद्यमानो न स्यादित्यर्थः "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराण"मिति श्रुतेश्च॥१३॥

ननु क्षेत्रज्ञो मनसो विभूतीः पश्यतीत्युक्तं तत्र दर्शनं बहिः स्थित्वोतान्तः स्थित्वा नाद्यः बहिःस्थस्यान्तर्दर्शनायोगात् न द्वितीयः "असङ्गो ह्ययं पुरुष" इति श्रुतेरसङ्गस्य देहान्तः प्रवेशायोगात्तद्योग्यत्वे दुःखभोगप्रसङ्गश्चेत्याशङ्क्याह । यथानिल इति । यथानिल आत्मस्वरूपेण प्राणस्वरूपेण स्थावरजङ्गमानामन्तर्निविष्टः स्थावरजङ्गमानामीष्टे चेष्टालक्षणमीशनं करोति "अन्तःपर्यदृशं कर्माणि" इति द्वितीयार्थे षष्ठी तदा नवता वायोः सुखादिभोगः श्रुतचरः एवं क्षेत्रज्ञनामा वासुदेवो भगवानिदं जगदात्मस्वरूपेणान्तर्यामिरूपेणान्तः प्रविष्टः एता मनोविभूतीः पश्यतीति पूर्वेणान्वयः सर्वत्रोषित्वा क्रीडत इति वासुदेव इति वासुदेवपदप्रयोगेन दुर्भगशरीरयोग्यदुःखभोगाभावो जीवान्तःस्थत्वेन क्षेत्रज्ञशब्दार्थोऽपि दर्शितं इति ज्ञायते न निजः सङ्गो यस्यासावनिल इत्यतोऽसङ्गस्याप्यन्तःप्रवेशो युज्यत इति ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मात्राणि विवृणोति । गन्धाकृतीति । कर्माणि विवृणोति विसर्गेति ॥ ९—११ ॥

क्षेत्रज्ञ इति । यः शुद्धोऽपि मायारचितस्य वक्ष्यमाणसर्वक्षेत्रज्ञस्य मायया कल्पितस्य मनसोऽन्तःकरणस्यैताः प्रसिद्धा विभूतीर्वृत्तीर्विचष्टे विशेषेण पश्यति । पश्यंस्तत्राविष्टो भवति । स खल्वसौ जीवनामा स्वशरीरद्वयलक्षणक्षेत्रस्य ज्ञातृत्वात् । क्षेत्रज्ञ उच्यते इत्यर्थः तदुक्तं "यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम्" इत्यादि । तस्य मनसः कीदृशतया मायारचितस्य तत्राह । जीवोपाधितया जीवतादात्म्येन रचितस्य ततश्च तत्तत्पञ्चपर्वमायामयस्येत्यर्थः ततश्च कीदृशस्य । अविशुद्धं भगवद्बहिर्मुखं कर्म करोतीति तादृशस्य । कीदृशीर्विभूतीः । नित्या अनादित एवानुगताः । तत्र च कदा कीदृशीरित्यपेक्षायामाह । जाग्रत्स्वप्नयोराविर्भूताश्चेति ॥ १२ ॥

यस्तु पुराणः पुरुषः आद्योऽवतारः पुरुषः परस्येत्यादिना द्वितीयस्कन्धादौ प्रसिद्धः साक्षाद्देवं स्वयं ज्योतिः स्वप्रकाशः । ननु जीववद्व्यापकतया अजो जन्मादि शून्यः परेशो ब्रह्मादीनामपीश्वरः नारं जीवसमूहः स नियम्यत्वेनायनं यस्य भगवान् ऐश्वर्याद्यंशवान् भगवदंशत्वात् । स्वमायया स्वरूपशक्त्या । आत्मनि स्वरूपे । अवधीयमान इति । मायया मायिकेऽप्यन्तर्यामित्वेन प्रविष्टोऽपि स्वरूपशक्त्या स्वरूपस्थ एव न तु तत् संसक्त इत्यर्थः । वासुदेवत्वेन सर्वक्षेत्रज्ञातृत्वात् सोऽपरः क्षेत्रज्ञः आत्मा परमात्मेति । तदेवमपि मुख्यं क्षेत्रज्ञत्वं परमात्मन्येव । तदुक्तं । सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीड इति । तथा श्रीगीतोपनिषत्सु ।

इदं शरीरं कौन्तेय ! क्षेत्रमित्यभिधीयते ।

एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ।

क्षेत्रज्ञञ्चापि मां विद्धि सर्वक्षेत्रेषु भारत ! ।

क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम इति ।

अत्र खलु क्षेत्रज्ञञ्चापि मां विद्धीति सर्वेष्वपि क्षेत्रेषु माञ्च क्षेत्रज्ञं विद्धि न तु जीवमिव स्वस्वक्षेत्र एवेत्ययमर्थो वदति । न च जीवेशयोः सामानाधिकरण्येनाविशेष चिद्रूपत्वेन ज्ञेयतया निर्दिशति । सर्वक्षेत्रज्ञविलासस्य वैयर्थ्योपपत्तेः ज्ञेयं यत्तत् प्रवक्ष्यामीत्यादौ सर्वतः पाणिपादं तदित्यादिना सविशेषत्वस्यैव निर्दिष्टत्वात् । अमानित्वमित्यादिना ज्ञानस्य च तथोपदिष्टत्वात् । किञ्च क्षेत्रज्ञं चापीत्यत्र तत्त्वमसीतिवत् सामानाधिकरण्येन तन्निर्विशेषज्ञाने विवक्षिते क्षेत्रज्ञेश्वरयोर्ज्ञाने विवक्षिते क्षेत्रज्ञेश्वरयोर्ज्ञानमित्येवानूद्येत । न तु क्षेत्रक्षेत्रज्ञयोर्ज्ञानमिति । किन्तु क्षेत्रक्षेत्रज्ञयोरित्यस्यायमर्थः द्विविधयोरपि क्षेत्रक्षेत्रज्ञयोर्यज्ज्ञानं तन्मयैव ज्ञातं मतम् । "अन्यार्थस्तु परामर्शः" इति न्यायेन तज्ज्ञानैकतात्पर्यक-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मित्यर्थः । क्षेत्रस्यैकत्वेन निर्द्दिष्टत्वात् योग्यत्वाच्च । नच निरीश्वरसाङ्ख्यवत् क्षेत्रक्षेत्रज्ञमात्रविभागादत्र ज्ञानं मतं भातित्यनेनेश्वरस्यापेक्षितत्वात् । नच विवर्त्तवादवदीश्वरस्यापि भ्रममात्रप्रतीतिपुरुषत्वम् । तद्वचनलक्षणासंवद्गीतादिशास्त्राणामप्रामाण्याद्बौद्धवादापत्तेः तस्यां च सत्यां बौद्धानामिव विवर्त्तवादिनां तद्व्याख्यानायुक्तेः ॥ १३ ॥

यथेति । श्रुतिश्च

वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।

एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो

बहिश्चेति काठके ॥ १४—१७ ॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

वृत्तीर्दर्शयति । एकादश वृत्तयः इन्द्रियरूपाः तत्र पञ्च आकृतयः कर्माकाराः पञ्च धियः ज्ञानाकाराः एकोऽभिमानोऽहङ्कारः इत्येवमेकादश तासां वृत्तीनां भूमीर्विषयानप्येकादशैव वदन्ति वीर! हे ज्ञानवीर राजन्! मात्राणि गन्धादयः पञ्च ज्ञानेन्द्रियाणां विसर्गादिकर्माणि पञ्च कर्मेन्द्रियाणां पुरं देहगेहाद्येकम् अभिमानस्येत्येकादश ॥ ९ ॥

मात्रादीनि विवृणोति । गन्धेति । पञ्च नासिकादीनां ज्ञानेन्द्रियाणां विषयाः आकृतिः रूपं विसर्गादयः पञ्च पाय्वादीनां कर्मेन्द्रियाणामेवं दश अभिसर्गमनं स्वीक्रियत इति स्वीकरणम् एकादशं पुरमभिमानस्य विषयमाहुः । एके आचार्याः अभिमानस्य द्वैविध्यात् ममेति ममकारस्य शय्यां विषयं गेहादिकमेकादशम् अहमिति अहङ्कारस्य शय्यां देहं द्वादशमाहुः ॥ १० ॥

तासां वृत्तीनामवान्तरभेदैरानन्त्यमाह । द्रव्यादिभिर्भेदैर्मनोविकाराः वृत्तिरूपाः प्रथमं शतशः ततः सहस्रशः लक्षशः कोटिशश्च स्युः द्रव्याणां चन्दनकस्तूरीकुङ्कुमादीनां स्वर्णरजतप्रवालादीनाञ्चानन्त्यात् कोऽपि गन्धरूपादिः कस्मैचित् रोचत इति स्वभावानन्त्यात् आशयोऽन्तःकरणं तस्य शिष्टतादुष्टताभ्यां कर्म अदृष्टं तद्वशादपि कालो बाल्ययौवनादिस्तद्वशादपि प्रत्ये[...]ता एव गन्धादयः स्युरित्यर्थः नतु मिथः स्युर्नापि स्वतः स्युः किन्तु क्षेत्रज्ञतः परमेश्वरात् तस्य चानन्तशक्तित्वादनन्ताः स्युरित्यर्थः ॥ ११ ॥

क्षेत्रज्ञो हि द्विविधः परमात्मा जीवात्मा च तयोः प्रथमः पूर्वश्लोके उद्दिष्ट उत्तरश्लोके वक्ष्यते च द्वितीयश्च द्विविधः बद्धो मुक्तश्च तत्र मनसा आलिङ्गितः तदभिमानी बद्धः तेन अनालिङ्गितो निरभिमानी मुक्तः तयोः पूर्वो ह्यायत एव उत्तरः कीदृशः स्यादित्यपेक्षायामाह । क्षेत्रज्ञः एता मनसो विभूतीर्विविक्तः पश्यति जानाति केवलं नतु तदभिमानी सन् भुङ्क्ते । अत एव शुद्धः स्वमायातो मुक्तः अतस्त्वशुद्धः संसारीत्यर्थः मनसः कीदृशस्य जीवस्य जीवोपाधेः सतो मायया रचितस्य अत एवाविशुद्धं भगवद्बहिर्मुखं कर्म करोतीति तस्य । विभूतीः कीदृशीः नित्याः । अनादित एवानुगताः कथं तर्हि सदा न दृश्यन्त इत्यत आह ।

आविर्हिताः क्वापि जाग्रत्स्वप्नयोः तिरोहिताः क्वापि सुषुप्तिप्रलययोः ॥ १२ ॥

बद्धजीवस्य व्यवहार एव सदैवावधानविषयो यथा तथा मुक्तजीवस्यावधानविषयः क इत्यपेक्षायामाह । क्षेत्रज्ञः क्षेत्रस्य कात्स्न्र्येन ज्ञाता परमात्मेत्यर्थः । आत्मा व्यापकः पुराणो जगत्कारणभूतः पुरुषः पुरुषाकारः स्वयंज्योतिः स्वप्रकाशः अजो मायिकजन्मादिशून्यः परेषां ब्रह्मादीनामपीशः नारायणः कारणार्णवशायी भगवान् षडैश्वर्यपूर्णो वैकुण्ठनाथः वासुदेवो वसुदेवनन्दनः श्रीमथुराद्याधिपतिः । स्वदृक् स्वमायया हेतुना आत्मनि अवधीयमानः मुक्तजीवेन आत्मनि मनसि अवधानविषयीक्रियमाणः । यद्वा स्वमायया स्वरूपशक्त्या कृपया वा सहितः ॥ १३ ॥

स च भगवान् मुक्तजीवेन मुक्तश्च एवेति सदृष्टान्तमाह । यथेति । आत्मस्वरूपेण ईशात् ईशिता इदं विश्वम् ॥ १४ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वृत्तयस्तु आकृतयः क्रियाकाराः पञ्च धियश्च ज्ञानाकाराः पञ्च अभिमानश्चेत्येकादश आसन् विषयानाह । मात्राणीति । मात्राणि गन्धादीनि ज्ञानाकाराणां कर्माणि विसर्गादीनि क्रियाकाराणाम् पुरं शरीरमभिमानस्य एवमेकादश हे वीर! तासां वृत्तीनां भूमीः विषयान् वदन्ति ॥ ९ ॥

विषयानाह । गन्धेति । आकृतिः रूपमभिसर्गनिः गमनं स्वीक्रियत इति स्वीकरणं शरीरं केचित्तु अभिमानो द्विविधः त्रिरूपो मम देहः इति मूढानां नु देहोऽहमिति तत्र देहोऽहमित्यहङ्कारं द्वादशवृत्त्यन्तरमाहुः तस्य देहमेव शय्यां विषयमाहुः ॥ १० ॥

एकादशवृत्तीनामवान्तरभेदैर्बाहुल्यमाह । द्रव्येति । द्रव्याणि विषयाः स्वभावः परिणामहेतुः । आशयो वासना कर्म पुण्यादिकम् कालः क्षोभकः तैर्निमित्तभूतैः अमी पूर्वोक्ता एकादश मनसो विकाराः वृत्तयः प्रथमं शतशस्ततः सहस्रशस्ततः कोटिशस्ताः केवलात्मनसो न स्युस्तस्य करणत्वात् न च मिथो न च स्वतश्च स्युः नहि अचेतने करणे एकैकशः मिलित्वा वा वृत्तयो जायन्ते असम्भवात् अतः क्षेत्रज्ञतः मनसि जायन्त इति सिद्धान्तः ॥ ११ ॥

अथ गजनीयस्य मुक्तौ प्राप्यस्य भगवतः सर्वज्ञत्वादीन् गुणान् क्षेत्रज्ञादीनि बहूनि नामानि चाह । क्षेत्रज्ञ इति त्रिभिः । अविद्याकल्पितस्य जीवस्य सम्बन्धि तन्मनसस्य मायारचितस्य प्रकृतिकार्यस्य प्रवाहरूपेण नित्याः जाग्रत्स्वप्नयोराविर्भूताः क्वचित्सुषुप्त्यादौ तिरोहिताः एताः विभूतीर्वृत्तीः क्षेत्रज्ञः सर्वाधिष्ठानरूपः सर्वशरीरवित् शुद्धः स्वभावतोऽपास्तसमस्तदोषो भगवान् विचष्टे पश्यति ॥ १२ ॥

स्वमायया "मायादम्भे कृपायां च" इति विश्वः स्वकृपया आत्मनि जीवे अवधीयमानः प्रेरकतया वर्त्तमानः ॥ १३ ॥

यथा अनिलो वायुः आत्मस्वरूपेण प्राणरूपेण स्थावरजङ्गमानामन्तर्निविष्टः ईशात् प्रेरयति एवं भगवानपि इदं विश्वमनुप्रविष्टः ईशात् प्रेरयति ॥ १४ ॥

———

न यावदेतां तनुभृन्नरेन्द्र ! विधूय मायां वयुनोदयेन ।
विमुक्तसङ्गो जितषट्सपत्नो वेदात्मतत्त्वं भ्रमतीह तावत् ॥ १५ ॥
न यावदेतन्मन आत्मलिङ्गं संसारतापावपनं जनस्य ।
यच्छोकमोहामयरागलोभवैरानुबन्धं ममतां विधत्ते ॥ १६ ॥
भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः ।
गुरोर्हरेश्चरणोपासनास्त्रो जहि व्यलीकं स्वयमात्ममोषम् ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां जडभरतरहूगणसम्वादे
एकादशोऽध्यायः ॥ ११ ॥

भाषाटीका

मनकी वृत्तियां ग्यारह हैं जिनमें पांच क्रिया मय कर्मेन्द्रिय हैं पांच ज्ञानेन्द्रियहै एक अभिमान है हे वीर ! कर्मेन्द्रियों के पांच कर्म विषय हैं ज्ञानेन्द्रियों के पांच गन्धादिक विषय हैं मन अभिमान का विषय है ॥ ९ ॥

ज्ञानेन्द्रियों के विषय गन्ध रूप स्पर्श रस शब्द कर्मेन्द्रियोंके विषय मल त्याग रति चलना बोलना करना मेरा है ऐसा स्वीकार करना अभिमान का विषय है कोई लोग शरीर के अभिमान को बारहमा इन्द्रिय कहते हैं ॥ १० ॥

चन्दनादि द्रव्यों के रुचि के स्वभाव अन्तःकरण अदृष्टकाल्यादिकाल आदि के भेदों से मन के भिन्नतासे यही विकार सो हजार कोटि अनंत हो जाते हैं सो विकार न जीवसे हैं न परस्पर से हैं आपहीसे हैं किंतु वृत्ति से कल्पित हैं ॥ ११ ॥

अशुद्ध कर्मों के करनेवाले मनकी वृभूती जो कि जीव की माया से रचित हैं प्रवाह से नित्य जाग्रत अवस्था में प्रगट स्वप्नावस्था मे अप्रगट इन मनकी वृत्तियों का देखनेवाला जो शुद्ध है वही क्षेत्रज्ञहै ॥ १२ ॥

ईश्वर क्षेत्रज्ञका स्वरूप यह आत्मा है पुराण पुरुष है साक्षात् स्वयं ज्योति है परेश है नारायण भगवान् वासुदेव है जीवों के हृदय मे वर्तमान है ॥ १३ ॥

जिस प्रकारसे पवन बाहिर स्थितहोकर भी स्थावर जंगम प्राणियों के आत्मरूप होकर भीतरभी प्रेरक होता है तैसही भगवान् वासुदेव क्षेत्रज्ञहोकर जीवों के बाहिर भीतर व्याप्तहो रहे हैं ॥ १४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवमात्मनः शुद्धत्वं संसारस्य च मिथ्यात्वं प्रदर्शयंस्तन्निवृत्तिमाह । तनुभृद्देही वयुनोदयेन ज्ञानोत्पत्त्या यावन्मायां विधूयात्मतत्त्वं न वेद तावदिह भ्रमति ॥ १५ ॥

यावच्च विषयानुरक्तं मन एवानर्थहेतुरिति न वेद तावत्तद्वैदाभावात्परिभ्रमत्येवेत्याह । नेति । आत्मनो लिङ्गमुपाधिभूतं मनः संसारतापानामावपनं क्षेत्रं यावन्न वेद तावद्भ्रमतीत्यनुषङ्गः तापावपनत्वे हेतुः । यन्मनः शोकाद्यनुबन्धं ममतां च विधत्ते ॥ १६ ॥

तत्तस्मात् । भ्रातृव्यं शत्रुमध्येधितं संप्रवृद्धं अयं व्यलीकं मिथ्याभूतं तथाप्यात्मानं मुष्णातीति तथा तं गुरोरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि घातय ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं प्रकृतिपुरुषविलक्षणं परमात्मस्वरूपमुपदिश्य तदुपासनया तत्साक्षात्कारापन्नज्ञानपर्यन्तं संसारो न निवर्तत इत्याह । नेति । हे नरेन्द्र ! रहूगण ! तनुभृद्देही वयुनोदयेन ज्ञानोदयेन यावदेनां मायामहंममाभिमानरूपां विधूय निरस्य विमुक्तः सङ्गो देहगेहादिषु येन जिताः षट् सपत्नाः शत्रवो [illegible] इन्द्रियरूपाः येन तथाभूतः सन्नात्मनः परमात्मनः [illegible] तत्त्वं याथात्म्यं न वेद तावदिह संसारे भ्रमति ॥ १५ ॥

कदायं तनुभृदात्मतत्त्वं वेदेत्यत्राह । नेति । यदि जनस्य संसारतापानामाध्यात्मिकादीनामावपनं क्षेत्रमात्मनो जीवस्य लिङ्गं पूर्वोक्तरीत्या संसृतिमुक्त्योः कारणं मनो यावच्छोकादिकं ममतां च न विधत्ते तदा वेद । यद्वा यावच्छोकादिकं विधत्ते तावन्न वेदेत्यन्वयः तत्र मोहः प्रमादः आमयो रोगः वैरानुबन्धः वैरपूर्वकानुस्मरणं शोकादीनां समाहारद्वन्द्वः । यद्वा शोकादिरूपमनुबन्धमनुबध्यते पृष्ठतः सम्बध्यते इत्यनुबन्धः अग्रतो ममतां तत्पृष्ठभागेन शोकादिकं च यावन्न विधत्ते इत्यर्थः कदेदं मनः शोकाद्यविधायकमिति चेत्तदा न गुरुण-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गुरकं कदा गुणानुपरक्तमिति चेत् "आहारशुद्धौ सत्त्वशुद्धिः" इत्याद्युक्तसात्त्विकाहारसत्क्रियादिभिः सत्त्वप्रचुरमित्यन्वयेतत् ॥ १६ ॥

तस्मादेनमन्तःकरणरूपं भ्रातृव्यं सहजशत्रुमुपेक्षयानिग्रहेणात्यन्तमेधितं संवृद्धमत एवादभ्रमनल्पवीर्यं संसारयितृत्वरूपं यस्य अत एव व्यलीकमप्रियकारिणं तत्र हेतुः आत्ममोषमात्मापहारिणं त्वम् अप्रमत्तः अनलसः गुरोर्हरेः गुरुरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य तथाभूतः सन् जहि घातय सदाचार्यसेवादिप्रणाड्या स्ववशीकुर्वित्यर्थः ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं संसारबन्धस्य श्रीनारायणमाक्षिसिद्धत्वेन सत्यत्वं प्रमाध्याधुना श्रीहरिकटाक्षानुगृहीतस्वापरोक्षज्ञानमन्तरेण तन्निवृत्त्यनुपपत्तेस्तन्निवर्तकसाधनमाह । न यावदिति । तनुभृज्जीवो यावद्यावन्तं कालमहम्ममेति मनोनिगूढामेतां सर्वसाक्षिसिद्धां मायां भ्रान्ति वयुनोदयेन शास्त्रश्रवणजनितज्ञानोदयेन विधूय भ्रान्तिरेषेति निश्चित्यार्थतत्त्वं सकलवेदान्तविषयीभूतभगवत्स्वरूपं न वेद तावत्पर्यन्तमिह संसारे पूर्वोक्तप्रकारेण भ्रमति पुनः पुनः जननमरणावृत्त्या वर्तते इत्यन्वयः कीदृशस्येदं घटत इत्यत उक्तम् । विमुक्तेति । फलसंकल्परहितः अत्रापि किं कारणमित्यत उक्तम् । जितेति । जिताः षडिन्द्रियशत्रवो येन स तथा पुरुषार्थविरुद्धचेष्टाहेतुत्वादिन्द्रियाणां सपत्नत्वमन्यथा सुहृत्त्वमिति भावः ॥ १५ ॥

ननु भ्रान्तीनामनेकत्वेन प्रत्येकं तन्निवर्तनानुपपत्तेरतः क उपाय इति सुहृद्भावेन पृच्छन्तमाह । न यावदित्यादिश्लोकद्वयेन । यावन्तं कालं जनस्य यदेतन्मनो ममतां विधत्ते ममेदमहमित्यभिमानमुत्पाद्य स्वामिनं संसारयतीत्यर्थः तावन्तं कालं न निवर्तत इतिशेषः कीदृशमात्मलिङ्गमात्मनो योग्यताज्ञापकं संसारतापकं संसारताप उच्यतेऽनेनेति संसारतापावपनं कीदृशं तापं वपतीत्यत उक्तम् शोकेति । शोकादीनामनुबन्धो येन तत्तथा शोकादिजनकत्वेन तापावपनमित्यर्थः ॥ १६ ॥

हे राजंस्त्वमेनमात्मनो मनसः उत्पन्नं मोहं विपरीतज्ञानमत एव भ्रातृव्यं शत्रुं जहि नाशयेत्यन्वयः अल्पत्वेन स्वयमेव विरमतीत्यत उक्तमदभ्रेति । अदभ्रं महद्वीर्यं यस्य तत्तथा अदभ्रवीर्यत्वे हेतुमाह । उपेक्षयेति । अतिगर्हितेन पापेनैधितं वर्धितं शत्रुहननमश्रेष्ठेण भाव्यं किमत्रास्त्रमित्यत उक्तं गुरोरित्यादि । उपासनमेवास्त्रं यस्य स तथा प्रमादाद्वामस्य हनने अप्रमाद एव प्रथमसाधनमित्यभिप्रायेणोक्तम् । अप्रमत्त इति । गुर्वादिचरणसेवादावन्तरङ्गसाधनमनलीकत्वमित्यत उक्तम् । व्यलीकमिति । क्रियाविशेषणमेतत् आत्मनो मोहविशेषणं वा विविधवस्तुविषयमनेनानेकान्यथाज्ञानामीति सूचितं परकीयं खेदुःखसाधनं हननमत उक्तम् । स्वयमिति । स्वकीयमित्यर्थः अत्रेदमाकूतं द्विविधं मनः चिदचिद्भेदेन तत्र चिन्मनस्तु स्वरूपमभिन्नं मुक्तावानन्दानुभवसाधनं तन्नाशे स्वरूपनाश एव स्यात्तथा च "अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मा" इति श्रुतिव्याकोपः स्यादितरन्मन आदिमं प्रलये लिङ्गशरीरवत्सूक्ष्मं यावन्मुक्ति तदीयतया स्थितं सतत्सृष्टावुपचितं स्थूलशरीरवर्तिनश्चेतनस्य ममेदमहमित्यभिमानमुत्पाद्य संसारापादनपटु स्वामिनश्चिदानन्दलक्षणस्य दुःखापादकत्वेन वैरि मनो जहि हन तस्य हननेन तन्निमित्ताभिमानलक्षणमोहनाशेन, व्यलीकं विगतचिन्मनः संसर्गं स्वयं स्वरूपभूतं सचिन्मनः स्वयमिति चिरावर्तनीयं सुपूजितमिष्टप्रदं देवं श्रीनारायणाख्यं जहि गमयं तद्विषयं कुरु अत्रार्थद्वयाभिप्रायेण "हन हिंसागत्योः" इतिधातुः प्रयुक्त इति ज्ञायते मननार्हामत्यभिमानः संसारहेतुः तन्मूलाचिन्मनोनाशेन तदभावेन तदभाव इति परिहारः सूचित इति तदुक्तमभिमानादेव संसारोऽन्यथा नेति परिहार इति ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

एकादशोऽध्यायः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एवमविद्याक्लीणानां भगवद्ध्यानलक्षणं ज्ञानं शाश्वतिकमेवेत्युक्तम् । अविद्यापतितानां जीवानामप्यविद्यानिस्तारणे तदेव साधनमित्याह । नेति । वयुनोदयेन उक्तलक्षणज्ञानोत्पत्त्या विमुक्तसङ्गः सन् यावन्मायां विधूयात्मतत्त्वं न वेद तावदिह भ्रमति ॥ १५ ॥

मायाविधूननञ्च सम्यक्तया कथं ज्ञातव्यमिति चेत् यावद्विषयानुरक्तं मनस्तावन्मायाविधूननमात्मतत्त्वज्ञानञ्च न स्यादित्याह । नेति । आत्मनो लिङ्गमुपाधिभूतं मनः यावन्ममतां विधत्ते तावदात्मतत्त्वं न वेदेत्यनुषङ्गः । कीदृशं संसारतापानामावपनं क्षेत्रं तापानवाहि । यद्यतः शोकादीन्यनुबध्नातीति तस्तेदं मनः श्रयते अन्यत्र तत्त्वमिति यदुक्तं तत् क्षेत्रज्ञ एता इत्यादिश्लोकपञ्चकेन प्रपञ्चितम् ॥ १६ ॥

तस्मान्मन एव निग्रहीतव्यमित्याह । भ्रातृव्यं शत्रुम् उपेक्षयैव जहि निगृह्णाण तदुपेक्षणमेव तद्वध इति भावः । ननु तद्विषयभोगप्रदानलक्षणया अपेक्षया अनुगृह्णामीत्यर्थः । सर्वथैव तद्वधस्तन्नाभिप्रेत एव तस्मान्मनो लिङ्गमदो वदन्ति गुणागुणत्वस्य परावरस्येति श्रूयते अन्यत्र तत्त्वमितिच्च पूर्वोक्तेः दृष्टान्ते च भ्रातृव्यपुत्रस्यावध्यत्वात् । मनः कीदृशमपि कर्मापितं स्वबुद्धेः संश्रित्य संगृह्य ननु बलवन्तमिमं दुर्बलोऽहं कथं निगृह्णामीत्यत आह । गुरोः सकाशात् प्राप्तस्य मन्त्ररूपस्य हरेश्चरणयोरुपासना श्रवणादिनवविधभक्तिरेवास्त्रं यस्य सः । यद्वा गुरुरेव हरिस्तस्य चरणोपासनमेवास्त्रं यस्य सः । व्यलीकमपि च यतः स्वबुद्धित-

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सन्दर्शनया सम्मोह्य आत्मानं परमात्मरूपं सर्वज्ञमेव मुष्णातीति तं महाचौरमित्यर्थः ।

भक्त्यन्नेषा त्याजयित्वा विषयान् स्वमनो यतिः ।
स्वस्तावियोऽवभते यः कृष्णं मुक्तः स उच्यते ।
भक्त्यभावान्मनोवृत्तीराश्रयन्नासनामयम् ।
अविद्यां यस्य पुष्णाति स पुमान् बद्ध उच्यते ॥ १७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तनुभृत् जीवः मायैव मम संसारकारणमिति वयुनोदयेन ज्ञानोत्पत्त्या एतां मायां प्रकृतिं विधूय यावत् आत्मतत्त्वं पूर्वोक्तं भगवत्तत्त्वं न वेद तावत् इह संसारे भ्रमति ॥ १५ ॥

किञ्च यत् शोकाद्यनुबन्धं ममतां विधत्ते तदेतन्मनः लिङ्गं सूक्ष्मशरीरभूतं तत्र तदेव मुख्यत्वात् जनस्य देहिनः संसारतापानामाध्यात्मिकादीनामावपनं क्षेत्रं तनुभृत् यावन्न वेद तावदिह भ्रमतीत्यन्वयः ॥ १६ ॥

तस्मादेनं मनोरूपं भ्रातृव्यं शत्रुमध्येऽधितं प्रवृद्धं व्यलीकं तुच्छम् आत्मानं मुष्णातीति तम् श्रीगुरुरेव हरिः तस्य चरणोपास्त्यस्त्रेणास्त्रं यस्य तथाभूतः सन् जहि घातय ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकादशाध्यायार्थप्रकाशः ॥ ११ ॥

भाषाटीका ।

हे नरेन्द्र ! जब तक मनुष्य ज्ञान को उदय करके इस माया को दूर करके कामादि छः शत्रुओं को जीतकर निःसंक होकर तत्व को नहीं जानता है तबतक इस संसार में भ्रमता रहता है ॥ १५ ॥

जब तक आत्माके उपाधिरूप संसार तापों का बढानेवाला मनुष्य का मन शोक मोह रोग प्रीति लोभों की वृत्ति तथा ममता को धारण करता है तावत् मनुष्य भ्रमता है ॥ १६ ॥

तिस हेतु से बडे बलवाले शत्रु रूप इस मनका उपेक्षा करके बढेहुये इस मन को सावधान होकर श्रीहरि गुरु चरण की उपासना रूप अस्त्रको धारण करके आत्मा के नाश करनेवाले इस मनको नाश करो ॥ १७ ॥

इति श्रीभागवत पञ्चमस्कन्ध एकादशअध्यायका
भाषानुवाद ब्रह्मणाचार्यकृत
समाप्त ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे एकादशोऽध्यायः समाप्तः ॥ ११ ॥

द्वादशोऽध्यायः।

रहूगण उवाच।

नमो नमः कारणविग्रहाय स्वरूपतुच्छीकृतविग्रहाय।
नमोऽवधूत! द्विजबन्धुलिङ्गनिगूढनित्यानुभवाय तुभ्यम् ॥ १ ॥
ज्वरामयार्तस्य यथागदं सन्निदाघदग्धस्य यथा हिमाम्भः।
कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्! वचस्तेऽमृतमौषधं मे ॥ २ ॥
तस्माद्भवन्तं मम संशयार्थं प्रक्ष्यामि पश्चादधुना सुबोधम्।
अध्यात्मयोगग्रथितं तवोक्तमाख्याहि कौतूहलचेतसो मे ॥ ३ ॥
यदाह योगेश्वर! दृश्यमानं क्रियाफलं सद्व्यवहारमूलम्।
नह्यञ्जसा तत्त्वविमर्शनाय भवानमुष्मिन् भ्रमते मनो मे ॥ ४ ॥

ब्राह्मण उवाच।

अयं जनो नाम चलन् पृथिव्यां यः पार्थिवः पार्थिव! कस्य हेतोः।
तस्यापि चाङ्घ्र्योरधिगुल्फजङ्घाजानूरुमध्योरशिरोधरांसाः ॥ ५ ॥
अंसेऽधिदार्वी शिबिका च यस्यां सौवीरराजेत्यपदेश आस्ते।
यस्मिन् भवान् रूढनिजाभिमानो राजास्मि सिन्धुष्विति दुर्मदान्धः ॥ ६ ॥
शोच्यानिमांस्त्वमधिकष्टदीनान् विष्टया निगृह्णन्निरनुग्रहोऽसि।
जनस्य गोप्तास्मि विकत्थमानो न शोभसे वृद्धसभासु धृष्टः ॥ ७ ॥
यदा क्षितावेव चराचरस्य विदाम निष्ठां प्रभवं च नित्यम्।
तन्नामतोऽन्यद्व्यवहारमूलं निरूप्यतां सत्क्रिययाऽनुमेयम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

द्वादशे पुनरापृष्टः सन्देहेन महीभृता।
स योगी सर्वसन्देहानपानुददितीर्यते ॥ १ ॥

कारणमीश्वरस्तस्यैव लोकसंरक्षणार्थो विग्रहो देहो यस्य स्वरूपेण परमानन्दप्रकाशेन तुच्छीकृतो विग्रहो येन हे अवधूत! योगेश्वर! द्विजबन्धोर्लिङ्गेन वेषेण निगूढो नित्यानुभवो येन तस्मै नमः ॥ १ ॥

विशेषतः प्रष्टुं तद्वाक्यमभिनन्दति। ज्वर एवामयो रोगस्तेनार्तस्य यथा सम्यगगदमौषधम्। यथा च निदाघेन दग्धस्य सन्तप्तस्य हिमाम्भः शीतलमुदकं गङ्गोदकं वा तथा हे ब्रह्मन्! कुत्सिते देहे यो मानोऽहङ्कारः स एवाहिस्तेन विशेषेण दष्टा दृष्टिर्विवेकलक्षणा यस्य तस्य मे तवेदं वचोऽमृततुल्यमौषधम् ॥ २ ॥

मम संशयविषयमर्थं पश्चात्प्रक्ष्यामि अधुना तावत्त्वदुक्तं वचोऽध्यात्मयोगेन ग्रथितं दुर्बोधं सुबोधं यथा भवति तथा व्याख्याहि कौतूहलयुक्तं चेतो यस्य तस्य मम ॥ ३ ॥

त्वयोदितं न तत्त्वमित्याह यदाहेति। भारवहनादिक्रिया च तत्फलं च श्रमादि प्रत्यक्षादिभिर्दृश्यमानं सदप्यधिगममपि व्यवहारमात्रमूलम्। यतः। मनोऽध्यासितव्यवहारस्य मूलं कारणमपि नह्यञ्जसा तत्त्वविमर्शनाय क्षममिति भवान् यदाह। अमुष्मिन्नर्थे मम मनो भ्रमति ॥ ४ ॥

सर्वाभिमानमसिद्धमित्याह। हे पार्थिव! यः पार्थिवो विकारः स एव कस्य हेतोः कस्मात्कारणात्पृथिव्यां चलन्सन् भारवाहकादिर्जनो नाम प्रसिद्धः यस्तु न चलति स पाषाणादिः। इत्येतावानेव भेदः तस्य च जङ्गमस्य भारः श्रमश्च किञ्च। सर्वदैव यदि श्रमस्याश्रयो निरूप्येत नत्वेतदस्ति अवयव-

श्रीधरस्वामिकृतभावार्थदीपिका ।

व्यतिरेकेण भ्रमास्पदस्यावयविनोऽनिरूपणादित्याशयेनाह। तस्यापि पृथ्वीविकारस्यापि अङ्घ्र्योरध्युपर्युपरि गुल्फादयः उरसः सलोप आर्षः ॥ ५ ॥

शिबिकायामप्यवयवी नास्ति स्वय्यपि नास्ति तदाह । सौवीरराजेत्यपदेशो नाममात्रं यस्य स पार्थिवो विकार आस्ते राजेति सन्धिरार्षः यस्मिन् मन्यभिरूढात्माभिमानः सिन्धुषु राजास्मीति दुर्मदेनान्धः सन् ॥ ६ ॥

शोच्यानिमानिष्टच्या निगृह्णन्निष्कृपो वर्तसेऽतो मिथ्यैव गोमास्मीति श्लाघमानो महतां सभासु न शोभसे यतो धृष्टः ॥ ७ ॥

न चोत्तरोत्तरावयवभारः पूर्वपूर्वावयवानां भवेदिति चारूपम तेषामप्यनिरूपणादित्याशयेनाह । यदेति । निष्ठां नाशं प्रभवमुत्पत्तिं विदाम विद्मस्तत्र क्षितेरन्यस्य विकारस्याभावान्नाममात्रादन्यद्व्यवहारस्य मूलं कारणमर्थक्रियया स्यादित्यनुमेयं निरूप्यताम तथाच श्रुतिः "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम" इति ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कारणे परमात्मस्वरूपे चोपदिष्टे देहात्मनोरन्योऽन्यभेदं जिज्ञासुः प्रणत्या तदुक्ताभिनन्दनेन च तं प्रसादयन्पृच्छति रहूगणः। नमो नम इति चतुर्भिः । कारणविग्रहाय कारणस्य परमात्मनो विग्रहाय शरीरभूताय । यद्वा मादृशलोकरक्षणकारणेन विग्रहो देहो यस्य तस्मै "आचार्यदेवो भव देवमिवाचार्यमुपासीत आचार्यं मां विजानीयात्,, इति शास्त्रानुसन्धानकृतेनेश्वरभावेनैवमुक्तं स्वरूपानुसन्धानेन तुच्छीकृतो निरस्तो विग्रहो विरोधः कृतापराधेष्वपि मादृशेषु यस्य अवधूतः सर्वैः परिभाव्यवेषः द्विजबन्धोर्लिङ्गेन वेषेण निगूढो नित्यानुभवः नित्यस्य परमात्मनोऽनुभवः येन ततोऽवधूतशब्देन कर्मधारय एवं भूताय तुभ्यं नमः १॥

ज्वररूप आमयो रोगः तेनार्तस्य पीडितस्य यथा सद्भिषुजमगदमौषधं यथा वा निदाघेन ग्रीष्मतापेन तप्तस्य हिमाम्भः पीडानिवर्तकं च तथा हे ब्रह्मन् ! कुत्सितो यो देहस्तस्मिन्मानआत्माभिमानः स एवाहिः सर्पस्तेन विशेषेण दष्टा दृष्टिर्विवेकलक्षणा यस्य तस्य मम ते तव वचः अमृततुल्यमौषधम् ॥२॥

तस्माद्भवन्तं प्रति मम संशयार्थं संशयनिवृत्त्यर्थमर्थेशब्दोऽत्र निवृत्तिवाची मनाकार्थो भूय इतिवत् तं पश्चात्प्रक्ष्यामि अधुना तु यत्तव त्वया उक्तं तदध्यात्मयोगेन ग्रथितमतो दुर्बोधं सुबोधं यथा तथा कौतूहलचेतसः कौतूहलशब्दस्तद्युक्तपरः कौतूहलयुक्तं चेतो यस्य तस्य मे महामाख्याहि कथय॥३॥

तत्र दुर्बोधमर्थमनुवदति । यदाहेति । हे योगेश्वर ! भवान्प्रत्यक्षादिभिर्दृश्यमानं यत्क्रियाफलं दूरगमनक्रियाफलं खेदश्रमादिकं सद्व्यवहारमूलमबाधितव्यवहारहेतुकमुक्तवाञ्श्रान्तोऽसीत्यबाधितव्यवहारस्य मूलं नहि भवतीति यदुक्तवानाह तत्र मे मनः अञ्जसा सुखेन तत्त्वविमर्शनाय भ्रमते भ्राम्यते क्लिश्यति ॥ ४ ॥

तत्र क्रियाफलस्य बाधितव्यवहारमूलत्वं भवतु नहि स्थौल्यकार्श्यादिव्यवहारस्य स्वरूपेणासत्त्वमुक्तं देहविषयस्य तस्याबाधितत्वात् किन्त्वात्मनि यदुक्तवता परिश्रान्तोऽसि नातिपीवा शास्त्राधिगोप्ता पतिरिति व्यवहृतं तद्बाधितमित्युच्यते न च मदीयोऽपि व्यवहारः शरीरविषय एवेति बाधितत्वमहंत्वंशब्दयोरात्मविषयत्वादभिमुखी कर्तव्यतत्प्रतिसंबन्धित्वप्रत्यग्वस्तुनि च चेतने एव तयोर्वृत्तेः अचेतनाशिष्टाभिमुखाद्-चेतनविषयत्वेऽपि विशेष्यास्थौल्यादेर्बाधितत्वादिति देहात्मनोरत्यन्तभेदमाह ब्राह्मणः। अयमिति। हे पार्थिव!यः पार्थिवः पृथिव्या विकारः स एव कस्य हेतोः कस्माच्चित्कारणात्पृथिव्यां चलन्नयं भारवाहादिजनो नाम प्रसिद्धः यस्तु न चलति सपाषाणादिरित्येतावानेव भेदः कस्य हेतोरित्यनेन कश्चिज्जीवस्य कर्म शेष एव एतच्छरीरस्य चराचरत्वयोर्हेतुरित्यभिप्रेतं तस्यापि पृथिवीविकारस्याप्यङ्घ्र्योः पादयोः उपर्युपरि गुल्फादयः उरसः सलोप आर्षः शिरोधरा ग्रीवा अंसौ स्कन्धौ ॥५॥

अंसे च दारुमयी शिबिका तस्यां च सौवीराणां राजेत्यपदेशः अपदिश्यत इत्यपदेशः व्यवहर्तव्यः आस्ते सौवीरराजेति व्यपदेशो व्यवहारो यस्य स मांसपिण्ड आस्ते इति वा यस्मिन् सौवीरराजव्यपदेशे भवान् स्वरूपतः स्वभावतश्च ततोऽत्यन्तविलक्षणोऽपि भवानभिरूढतादात्म्याभिमानः सिन्धुदेशेषु राजास्मीति दुर्मदेनान्धः सन् अनेनात्मनि राजत्वबुद्धिभ्रान्तिरित्युक्तम ॥ ६ ॥

अत्यन्तं कष्टेन वहनादिजनितदुःखेन दीनानत एव शोच्यानिमान् विष्ट्या बलान्निगृह्णन्निरनुग्रहः निष्कृपो वर्तसे अनेनात्मनि राजत्वबुद्धिप्रयुक्तनिग्रहादिकर्तृत्वस्य च स्वरूपप्रयुक्तत्वबुद्धिभ्रान्तिरित्युक्तं जनस्य गोप्ता रक्षकोऽस्मीति कत्थमानस्त्वं वृद्धसभासु देहात्मविवेकिषु न शोभसे यतो धृष्टः देहात्मभ्रान्त्योद्धतः ॥ ७ ॥

अस्थिरेषु स्थिरबुद्धिश्च भ्रान्तिरिति दर्शयितुमस्थिरत्वमाह । यदेति । चराचरस्य देहजातस्य प्रभवमुत्पत्तिं निष्ठां नाशं च क्षितौ भूम्यामेव विदाम क्षितिशब्दो ब्रह्माण्डपरः "सभूमिं विश्वतो वृत्वा" इति श्रौतप्रयोगात् उत्पत्तिविनाशौ क्षिताविव पश्याम स्थिरत्वं पश्याम इति भावः तस्मादस्थिरत्वादागमत अनित्ये नित्यत्वाद्देहात्मभ्रान्तिमूलाक्रियत्वस्य बाधितत्वात्त्वदुक्तिमात्रादन्यसत्क्रियया अबाधितव्यवहारेणानुमेयव्यवहारस्यात्मनि राजत्वादिव्यवहारस्य मूलं निरूप्यतां तन्न किञ्चिदप्यस्ति उक्तत्रिविधस्य भ्रान्तिमूलत्वादित्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

जन्माद्यस्य यतोऽन्वयादित्यत्र कारणत्वं हरेरुक्तं तदधुना हरेरेव नान्यस्येति सयुक्तिकमस्मिन्नध्याये निरूप्येते तत्रादौ ब्राह्मणस्तुतिव्याजेन तदन्तर्यामिणं स्तौति । नम इति । लोकानुग्रहलक्षणकारणाद्विग्रहो यस्य स तथा, तस्मै अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनदानाय देहं धृतवत इत्यर्थः स्वरूपापरोक्षज्ञानदीपेन तुच्छीकृतो धिक्कृतो विग्रहः पाञ्चभौतिको देहो यस्य स तथा तस्मै किमर्थं तर्हि स्वसामर्थ्यं न प्रकाश्यत इति तत्राह । अवधूतेति । अवधूतश्चासौ द्विजबन्धुर्ब्राह्मणाभासः तस्य लक्षणेन निगूढः सम्वृतो नित्यानुभवः स्वरूपसामर्थ्यं यस्य सः तथा तस्मै अवधूतद्विजा एव बान्धवा येषां ते तथा तेषां विज्ञे-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति वा अवधूत! तुभ्यं नम इति वा तुभ्यं तथान्तर्यामिणे नमः किं विशिष्टाय कस्यानन्दस्याकरो धारणं विग्रहो यस्य कर्मैवाकरो विग्रहो यस्येति वा स तथा तस्मादानन्दमूर्तय इत्यर्थः क्षितिभारासुरनिरसनलक्षणकारणमुद्दिश्य विग्रहो यस्य स तथा असुरनिरासाय स्वीकृतदेहायेत्यर्थः "यदा यदाहि धर्मस्य ग्लानिर्भवति भारत" इत्यादेः. मायया कष्टा रचना येषान्ते कारणा असुराः तैर्विग्रहो विरोधो यस्य स तथा तस्मै "मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः अवदस्यूँरधूनुथा" इति श्रुतेः स्वरूपेण चिदानन्दलक्षणाकारेण दूरीकृतप्राकृतदेहाय द्विजबन्धिवति भावप्रधानो निर्देशः द्विजानां बन्धुः तस्य भावो द्विजबन्धुत्वं तदेव लिङ्गं यस्य स तथा नितरां गूढदक्षो लोकापेक्षया प्रकृत्याविहितो नित्यानुभवो यस्य स तथा द्विजबन्धुलिङ्गश्चायं निगूढनित्यानुभवश्च तस्मै ॥ १ ॥

किं फलरत्नमुपलभ्य स्तौषीति तत्राह । ज्वरेति । निद्राघेन औष्ण्येन दग्धस्य तप्तस्य कुदेहमानाहिसुनष्टदृष्टेरिति पाठः कुदेहाभिमानाख्यसर्पेण सम्यङ् नष्टज्ञानचक्षुषो मे अमृतममृतकल्पं सम्यग् उपो दाहो येषां ते औषधास्तान् दधाति पुष्णातीत्यौषधम् ॥ २ ॥

किमत इति तत्राह । तस्मादिति । यस्माद्भवद्वचनामृतं संसारार्णवरोगोन्मूलनकरं तस्मात्संशयार्थं कोटिद्वयारूढमर्थम् । यद्वा संशयनिवृत्त्यर्थं महाकार्यो भूम इति वत् वक्तव्यत्वे निमित्तमाह । पश्चादिति । अधुना त्वत्सन्निधौ सुबोधं पश्चात्तत्सन्निधिमन्तरेणासुबोधं ज्ञातुमशक्यं यस्मात्तस्मादितिशेषः किमुक्तार्थे प्रश्न उतार्थान्तर इतिविकल्पो मा भूदित्याह । अध्यात्मेति । अध्यात्मयोगेन परमात्मज्ञानेन ग्रथितं बद्धं यत्पुरा त्वयोक्तं वचनं तस्याभिप्रायं ममाख्याहि विस्तृत्य वदेत्यन्वयः ॥ ३ ॥

किं तदुक्तं तत्राह । यत्राहेति । हे योगेश्वर ! दृश्यमानं प्रत्यक्षादिप्रमाणैर्ज्ञायमानं क्रियाफलं भरणागमनक्रियाजनितं भर्तृत्वगन्तृत्वलक्षणं फलं लौकिकम् "अपाम सोमम्" इत्यादिना निरूप्यमाणं सोमपानादिक्रियाजातममृतत्वादिकं फलं वैदिकं च सद्व्यवहारमूलमबाधितामिश्रादिव्यवहारकारणमञ्जसा मुख्यया वृत्त्या तत्त्वविमर्शनाय तत्त्वनिर्णयाय न भवति स्थायित्वेनैकान्तिकं भवतीति यद्वचनं "भर्तुः स मे स्याद्यदि वीर ! भारः व्यवहारमेनं तत्त्वावमर्शेन सहामनन्ति" इति उरुगायेऽभ्यधितानविद्यैत्यादिरूपं भवानाह । अनुग्रहिन्नपि मे मनो भ्रमते अस्य वचनस्यार्थोऽयमेव नान्य इति स्थिरस्थितिं न लभते सा यथा स्यात्तथा स्याद्धीति भावः भ्रमत इत्यात्मनेपदप्रयोगेण मत्कृत्तिगादितनिगदाभिप्रायापरिज्ञाने नात्मनोऽनुत्तमाधिकारित्वं तत्त्वोपदेष्टृज्ञानिसद्भावे तस्मात् स्वयोग्यं सविशेषं ज्ञातव्यमन्यथानर्थः स्यादिति श्रोतृजनशिक्षार्थं चेति सूचयति ॥ ४ ॥

भर्तुः स मे स्याद्यदि वीर ! भार इत्यादिनोच्यमानं भरणादिकमन्तर्यामिहरिनियतमित्येवं मुमुक्षुणा स्मर्तव्यमेवं परो भगवानित्युक्तेः यत् "अक्षरमम्बरान्तधृतेः" य उत्तिष्ठातु पृथिवीमुन्द्यामेको दधार भुवनानि विश्वा आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चनमिषत्स ईक्षत लोकान्नुसृजत" इत्यादिनोच्यमानमूलकारणत्वं हरेरेव नहि मूलं विसृज्यान्यग्रहणं युक्तिमत् अनवस्थानापातात् कथं तदितिशङ्कित्वा विपक्षे बाधकमाह । अयं जन इति । हे पार्थिव ! यदि मूलकारणविवक्षा न स्यात्तर्हि यः पृथिव्यामुत्पन्नत्वात्तत्र विद्यमानत्वाद्वा पार्थिवो नाम सोऽयं जन्यत इति जनो देहो देही वा पृथिव्यामेव चलन् अस्मीति व्यवहारः कस्य हेतोः कुतो वर्तते प्रत्यक्षसिद्धं कथमपलापितुं शक्यत इति चेत्तत्राह । तस्यापीति । तस्य जनस्यापि पादाद्यवान्तराधाराः सन्तीति यस्मात्तस्मादस्यापि प्रामाणिकत्वात्पृथिव्यामिव पादादिष्वपि चलतीति कस्मान्न भवेत् चाभावोऽस्ति तस्मान्मूलकारणमेकमङ्गीकर्तव्यं तदनङ्गीकारे सर्वस्यापलापः प्रसज्यते अत्राधिशब्द उपर्युपर्यर्थवाचकः तथाह्यङ्घ्र्योरङ्घ्र्युपरि गुल्फौ तयोरुपरि जङ्घे इत्येवं योजना गुल्फौ च जङ्घे च जानुनी च ऊरू च मध्यं च उरश्च शिरोधरा च अंसौ च ते तथा ॥ ५ ॥

दार्वी दारुमयी यस्यां शिबिकायां सौवीरराजेत्यपदेशः शब्दमात्रं ननु रञ्जनाद्राजेत्यर्थो यस्य स तथा पिण्ड आस्ते यस्मिन् पञ्चभूतरचितं देहलक्षणो पिण्डे भवान्वर्तते कथंभूतो भवान् रूढो बद्धमूलो निजत्वेनाभिमानो देहे यस्य स तथा अत एव सिन्धुषु राजास्मीति दुष्टो मदोऽस्ति तेनान्धश्चक्षूरहितः ॥ ६ ॥

एतत्फलमाह । शोच्यानिति । तानिमान् वाहकानिवष्टया निग्रहं त्वयि त्वं निरनुग्रहोऽसि मधुरवचनाद्यनुग्रहरहितोऽसीति यस्मात्तस्मादिहामुत्र च तत्राभिरक्षकः स्यादित्यन्वयः यथा शिबिकाभर्तृत्वं मदन्तर्यामिमूलकारणनिष्ठमेवं जनस्य गोप्तास्मीति त्वयि कल्प्यमानं मूलगोप्तृत्वं च तदन्तर्यामिहरिनिष्ठमित्यभिप्रेत्याह । जनस्येति । वृद्धसभासु विकत्थमानेषु जनस्य गोप्तास्मीति विकत्थमानो बहुभाषमाणो दुष्टोऽयं तत्त्वं न जानातीति श्लाघ्यो न भवतीत्यर्थः ॥ ७ ॥

नन्वेवं तर्हि पृथिव्या मूलाश्रयत्वमापन्नं तथाहि यदि मूलाश्रयविवक्षा न स्यात्तर्हि पृथिव्यां चलतीति व्यवहारो न स्यान्न च तथा तस्मात्पृथिव्या मूलाश्रयत्वं विष्णुविवक्षायामप्यक्तं चेत्याशङ्क्य शाखाचन्द्रन्यायेनोक्तमिति परिहरति । यदीति । उत्पत्तिकिमत्या पृथिव्यां दर्शनात्तस्याः मूलकारणत्वमित्यतो वाह । यदीति । यदि चराचरस्य क्षितावेव निष्ठा स्थितिर्न तत्र एव प्रभवमुत्पत्तिं च विद्याम विद्मः अविचारदृष्ट्येति शेषः तथाप्यालोचने तत्रामतः प्रसिद्धक्षितिनाम्नोऽभ्युपगमव्यवहारमात्रं क्षितिशब्दव्यवहार्योऽयं नाम्नि-यया अधाधितार्थाश्रयया "क्षि निवासगत्योः" इति धातोः निवसत्येव स्यामीति गच्छत्यस्यामिति निवासगत्योरप्रतिहताश्रयभूतं यत्तदमेयं क्षितिशब्दमुख्यार्थमिति निरूपयतामित्यन्वयः "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तर" इति श्रुतेः क्षितिशब्दमुख्यार्थो हरिरन्यथाः पृथिव्यास्तद्विषयत्वेन तच्छब्दवाच्यत्वं" तदधीनत्वाद्र्पवत्" इतिस्मृत्यादिति सर्वान्तर्यामीत्यर्थः प्रथितत्वात्पृथुर्वाद्वा पृथिवीति पृथिव्यादिति शब्दवाच्यत्वं मुख्यं हरेरेवेति पृथिव्यां चलतीत्युक्तं ननु पृथिव्या मुख्याश्रयत्वविवक्षया अवान्तराश्रयत्वनिरासाय चेत्यतो नासदृ । द्वीपोऽयमिति उत्पत्तिस्थितो इन्द्रजालवत् यादृच्छिकयां किन्तु प्रमाणरूपेण सदातन इत्यतो नित्यमिति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वरूपेण तदनुभवेन तुच्छीकृतो दण्डरूपो विग्रहो येन ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

हे ब्रह्मन् ! ते तव वचः कुदेहाभिमानाहिदंशव्याप्तबुद्धि-पर्यन्तस्य ममौषधं तत्र दृष्टान्तः । जरतीति । कचिद्व्यभिचारतर्कात् पुनर्दृष्टान्तः । निदाघेति । तत्राप्यपरितोषात् अमृतमिति लुप्तोपमेयममृतमिवेत्यर्थः ॥ २—४ ॥

तत्र श्रीभगवद्वाक्यं तत्त्वमेव सर्वसाधकं स्वानन्द्येणा तु किमपि रूपयितुं न शक्यमित्याह । अयमिति सप्तभिः ॥ ५—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मिथ्यात्वेऽप्यस्य विश्वस्य सत्याः कृष्णस्य षड्गुणाः ।
द्वादशे कथिता धामभक्त्याद्या अपि ते ततः ॥

कारणमीश्वरस्तस्यैव लोकरक्षणार्थो नित्यो विग्रहो देहो यस्य तस्मै । स्वरूपेण स्वानन्दानुभवेन तुच्छीकृतविग्रहाः शास्त्रकृतां विवादा येन तस्मै हे अवधूत ॥ १ ॥

कुत्सिते देहे अभिमान एवाहिस्तेन विशेषतो दष्टा दृष्टिर्यस्य तस्य मम हे ब्रह्मन् ! ते वचः अगदमौषधं तत्र दृष्टान्तः । जरतीति । कचित्तद्व्यभिचारतर्कात् पुनर्दृष्टान्तः । निदाघेति । तत्राप्यपरितोषात् अमृतममृतमिवेत्यर्थः ॥ २ ॥

मम संशयविषयमर्थं पश्चात् प्रक्ष्यामि अधुना तावत् त्वदुक्तं वचः अध्यात्मयोगेन ग्रथितं दुर्बोधं सुबोधं यथा भवत्येवं व्याख्याहि कौतूहलयुक्तमनसो मम कृते ॥ ३ ॥

हे योगेश्वर ! यद्भवानाह । दृष्टः श्रमः कर्मत इत्यादि मदुक्तौ भारवहनादिक्रिया तत्फलञ्च श्रमादि प्रत्यक्षादिभिर्दृश्यमानं सत् विद्यमानं व्यवहारमात्रमूलं तत्त्वविमर्शनाय दृष्टान्तादिनापि तत्त्वज्ञानमुपकर्त्तुं न क्षममिति । अमुष्मिन् त्वद्वचने भ्रमतः पदस्याभिप्रायस्याप्राप्त्या मनो भ्रमति ॥ ४ ॥

पूर्वं स्वमतेन भङ्ग्या दत्तमप्युत्तरमबुद्धैव पुनः पृच्छन्तं राजानमवजानन्निव भो राजंस्तव व्यवहारोऽयमप्रमाण एवेति मतान्तरमाश्रित्य पुनः प्रत्याह । अयं जनो भारवाहकः नाम प्रसिद्धः पार्थिवः पृथिव्या विकारः कस्यापि हेतोर्व्रजन् भवति यस्तु न चलति स तु पाषाणादिरित्येतावानेव भेदः । तस्यापि पार्थिवस्य अङ्घ्री पृथिव्या उपरिस्थौ अङ्घ्र्योरधि उपर्युपरि गुल्फादयः ईरितः सङ्क्षेप आर्षः ॥ ५ ॥

अंसे स्कन्धे दार्वी दारुविकारः शिबिका यस्यां सौवीरराजः इत्यपदेशो नाममात्रं यस्य स पार्थिवो विकार आस्ते यस्मिन् भवान् राजाऽस्मीत्यभिमानेनैवास्ते नतु वस्तुतः । अत्र पृथिव्यादीनां शिबिकान्तानां भारवहनात् किं सर्वेषां श्रमः उत कस्यचित् कस्यचित् न तावत् सर्वेषां पृथिव्याः शिबिकायाश्च श्रमादर्शनात् अङ्घ्र्यादीनां श्रम उपलभ्यते इति चेन्न शिबिकाया अभावे गुल्फादिभारवाहिनामपि तेषां श्रमानुपलब्धेः अङ्घ्र्याद्यवयविनः शिबिका वहनात् श्रम इति चेत् अवयवेभ्यः पृथगवयविनः श्रमाश्रयस्यानिरूपणात् । नन्वस्तु मास्तु वा अवयवी भारवाहिनः श्रमदुःखमनुभूयत एवेति चेदेतदपि नैकान्तिकं अतिसुकुमार्या अपि रत्नालङ्कारान् वहन्त्याः स्वबालकं च वहन्त्याः श्रमदुःखानुपलब्धेस्तस्मादभिमानविशेषेणैव दुःखं सुखं च यथा राजाऽस्मीति दुर्मदेन दुरभिमानमत्ततया अन्धः किमपि न पश्यसीत्येतदेव तव सुखं निरभिमानानान्तु न दुःखसुखे इति भावः ॥ ६ ॥

ज्ञानाभावेऽपि राज्ञः प्रजाशासनं धर्म एवेति यदुक्तं तत्राह शोच्यानिति । विदुषा निगृह्णामीति इदृशमेव निर्दयस्य तव प्रजाशासनं धर्म इति धृष्ट एव तदप्यच्युतस्य किङ्करोऽस्मीति जिज्ञासुरस्मीति कत्थस इति भावः ॥ ७ ॥

मन्वभिमानशून्यस्य मुक्तस्यापि प्रारब्धसुखदुःखभोगश्रवणात् तदपि भारवहनक्रियाफलस्य श्रमस्य प्रत्यक्षादिभिर्दृश्यमानत्वेनाबाधितत्वाद्व्यवहारस्याप्रामाण्यं त्वदुक्तं न घटत इति चेत् सत्यं मुक्तानां मादृशानां बाधितानुवृत्त्यैव दुःखसुखाभासौ यथा स्वप्नात् प्रबुद्धस्य जनस्य स्वप्नदृष्टसर्पस्य मिथ्यात्वज्ञानेऽपि कियत्क्षणपर्यन्तं भयकम्पादिकिञ्चित्कार्यमेव अप्रबुद्धानान्तु स्वाप्निकः सर्पः सत्य एव भाति यथा युष्माकं व्यवहारस्तदपि व्यवहारस्यासत्यत्वं युक्त्या दर्शयामि शृण्वित्याह । यदेति । चराचरस्य जगतः क्षितावेव निष्ठां नाशं प्रभवमुत्पत्तिञ्च विदाम विद्मस्तस्मात् सर्वेषां विकाराणां क्षितिभिन्नत्वाभावात् नाममात्राद्व्यवहारस्य मूलं कारणमर्थक्रियया सदित्यनुमेयं निरूप्यतां यदि ते युक्तिः प्रतिभातीति भावः । तथा च श्रुतिः "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

द्वादशे रहूगणकृतान् संदेहान् मुनिरपानुदादिति वर्ण्यते हे अवधूत ! तुभ्यं नमः कारणमृषभादिपरमहंसमूर्तिर्विष्णुस्तस्यैव विग्रहो यस्य तस्मै स्वरूपेण भगवत्स्वरूपेण प्रत्यहं येन तुच्छीकृतो विग्रहो कृतापराधेष्वपि कलहो येन तस्मै द्विजबन्धोर्लिङ्गेन वेषेण निगूढो नित्यानुभवो येन तस्मै नमः ॥ १ ॥

कुत्सितः देहमानः देहात्माभिमानः स एवाहिस्तेन विदष्टा विवेकलक्षणा दृष्टिर्यस्य तस्य ॥ २ ॥

मम संशयविषयमर्थं पश्चात्प्रक्ष्यामि अधुनेदानीन्तु अध्यात्मयोगेन ग्रथितं दुर्बोधं त्वद्वचः सुबोधं यथा भवति तथा कौतूहलयुक्तचेतसो मे व्याख्याहि कथय ॥ ३ ॥

तदेव दुर्बोधमनुवदति । यदेति । अयं सुखी अयं दुःखी इत्यादिव्यवहारस्य मूलं निर्वाहकं क्रियाफलं पुण्यापुण्यकर्मजन्यं दृश्यमानम् अब्रह्मात्मकतया प्रत्यक्षप्रमाणावगतम् वोढृ वोढव्यादिकं सर्वं त्वयोदितं व्यक्तमित्यादिना भवान् सदेव ब्रह्मात्मकमेवाह । अमुष्मिन् त्वद्वचसि मे मनो भ्रमति अञ्जसा तत्त्वविमर्शनाय न भवति अतः यथा सर्वस्य ब्रह्मणि अन्तर्भावः स्यात्तथा आख्याहीति भावः ॥ ४ ॥

एवं साङ्ख्यतार्किकादिकुतर्कविमोहितेन अब्रह्मात्मकमिदमित्येवं मन्यमानेन राज्ञा पृष्टो मुनिस्तं वेदमार्गे प्रवर्तयन् सर्वस्य पदार्थजातस्य शक्तिमति वासुदेवे ब्रह्मणि कारणे अन्तर्भावमाह । अयमितिसप्तभिः । हे पार्थिव! पार्थिवः अन्नमयः कस्यचिद्धेतोः परमेश्वरांशभूतजीवसम्बन्धादित्यर्थः साङ्ख्यादितर्कमोहितो यथावज्जानाति न वा रहूगणः अतः कस्यचिद्धेतोरित्युक्तिः

एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात्परमाणवो ये ।
अविद्यया मनसा कल्पितास्ते तेषां समूहेन कृतो विशेषः ॥ ९ ॥
एवं कृशं स्थूलमणुर्बृहद्यदसच्च सज्जीवमजीवमन्यत् ।
द्रव्यस्वभावाशयकालकर्मनाम्नाऽजयाऽवेहि कृतं द्वितीयम् ॥ १० ॥
ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वबहिर्ब्रह्म सत्यम् ।
प्रत्यक्प्रशान्तं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ति ॥ ११ ॥
रहूगणैतत्तपसा न याति न चेज्यया निर्वपणाद्गृहाद्वा ।
न च्छन्दसा नैव जलाग्निसूर्यैर्विना महत्पादरजोऽभिषेकम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अयं वोढांशरूपः पृथिव्यां चलन् नाम प्रसिद्धः जनो भवान् तस्य पार्थिवस्यापि अङ्घ्रयोः अधि उपरि उपरि गुल्फादयः तदात्मका इत्यर्थः उरसः समीप आर्षः ॥ ५ ॥

शिबिकापदार्थश्च पार्थिव एव तत्र सिन्धुराजनामको देहश्च पार्थिव इत्याह । अंस इति । सौवीरराजेत्यत्र सन्धिरार्षः ॥ ६ ॥

जीवन्मुक्तसर्वात्मभूतवासुदेवज्ञानहीनः पार्थिवदेहात्माभिमानी अन्यांश्च तथा विधानुपतापयति सर्वात्मभूतवासुदेवज्ञानवांस्तु नोपतापयति नोपतप्यते चेत्याशयेनाह । शोच्यानिति ॥ ७ ॥

चराचरस्य जङ्गमस्य स्थावरस्य च पार्थिवमात्रस्य क्षितौ कारणभूतायां सत्यां क्रियया अन्नोपार्जनतद्भोजनपूर्वकगर्भाधानादिव्यापारेणानुमेयम् अन्नाद्भवन्ति भूतानीत्यादिवचनेन च प्रभवमुत्पत्तिं निधनं च प्रलयञ्च यदा विदाम तदा तन्नामतः क्षितिनामकात् कारणात् अन्यत् पृथक् व्यवहारमूलं क्षितिमयव्यवहारकारणं निरूप्यताम् ॥ ८ ॥

भाषाटीका ।

रहूगणजी बोले किसी कारण से देहधारण करनेवाले, स्वरूप के अनुभव से सब कलह को दूर करने वाले अवधूत के वेषमे ब्राह्मण के चिन्ह को गुप्त करने वाले नित्यस्वरूपके अनुभव स्वरूप आपको नमस्कार है ॥ १ ॥

हे ब्रह्मन् ! ज्वर रोग दुःखित पुरुष को जैसे औषध अच्छा होता है घाम में जलने वाले को जैसे बरफ का जल होता है इसी प्रकार खोटे देहके मान से ज्ञान नष्ट होनेवाले मेरे वास्ते आपका वचन अमृतमय औषधके तुल्य है ॥ २ ॥

तिससे अपने संशय अर्थ को तो मैं पीछे पूछूंगा इस वखत तो आपके कहे वचनों का जैसे अर्थ मालूम पड़े सो कहिये मेरे को बड़ा कौतुक है ॥ ३ ॥

हे योगेश्वर आपने जो कहा कि दृश्यमान किया फल वर्तमान है तो भी व्यवहार मात्र ही है किन्तु अनायास से तत्त्वज्ञान के रास्ते नहीं है सो इस बात में हमारा मन भ्रमता है ॥ ४ ॥

ब्राह्मण बोले हे पार्थिव सबही पृथिवी का विकार है तौभी किसी हेतु से यह पृथिवी में चलता हुआ पृथिवी का विकार पुरुषरूप है तिस पुरुष के भी पैरोंपर गुल्फ पींडुरी घोंटू जांघ कमर छाती कांधा गला शिर ये अवयव हैं ॥ ५ ॥

तिसी कांधेपर काठ की पालकी है जिसपर सौवीरदेश के राजा के नाम से प्रसिद्ध तुमारा शरीर है जिसपर मेरा ऐसा अभिमान करने वाले सिन्धु देश के हम राजा हैं ऐसा माननेवाले दुष्ट मद से अन्ध तुम बैठ रहे हो ॥ ६ ॥

अधिक कष्ट से दुःखित शोचने के योग्य इन मनुष्यों को बेगार में पकड़ने वाले तुम निर्दयी हो हम प्रजों के रक्षा करनेवाले हैं ऐसे गप्प मारने वाले धृष्ट हो सो वृद्धोंकी सभा में तुम नहीं शोभित होनेवाले हो ॥ ७ ॥

अब कि सब चर अचर की उत्पत्ति तथा नाश पृथिवीही में नित्य है तो फिर व्यवहार को छोड़कर क्रियामत् है ऐसा अनुमान करने के योग्य और क्या है सो कहो ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तर्हि क्षितेः सत्यता स्यात्तत्राह । एवं क्षितिशब्दस्यापि वृत्तं वर्तनमर्थं विनैव निरुक्तम् । यद्वा । क्षितिशब्दस्य वृत्तं यस्मिन्वर्तनमर्थं विनैव निरुक्तमित्यर्थः । कुतः । असत्सु सूक्ष्मेषु परमाणुषु स्वकारणभूतेषु निधानाल्लयात् अतः परमाणुव्यतिरेकेण क्षितिर्नास्तीत्यर्थः । परमाणवस्तर्हि सत्याः स्युः तत्राह । ये तु मनसा कार्यानुपपत्त्या वादिभिः कल्पिताः । कल्पनाबीजमाह । येषां समूहेन विशेषः कृतस्तेषां समूहः पृथ्व्यादिरूपत्वेनाभि-समूहत्वेनार्थः अवयविनो निरस्तत्वात्समूहग्रहणम् । तथापि सत्याः स्युः न अविद्यया प्रपञ्चस्य भगवन्मायाविलसितत्वादज्ञानेन कल्पिताः ॥ ९ ॥

एवमन्यदपि कृशत्वादिधर्मकं बुद्ध्या प्रतीतं द्वितीयं द्वैतं द्रव्यादिनामभिरुपलक्षितयाऽजया मायया कृतमित्याह । तत्र कृशं ह्रस्वं स्थूलं तत्प्रतियोगि । अणुबृहन्तौ पृथगुपादानात् असत्कारणं सत्कार्यं जीवश्चेतनम् अजीवं जडम् ॥ १० ॥

तर्हि किं सत्यं तत्राह । ज्ञानं सत्यं व्यावहारिकसत्यत्वं व्यावर्तयति परमार्थम् वृत्तिज्ञानव्यवच्छेदार्थानि चत्वारि विशेष-

श्रीधरस्वामिकृतभावार्थदीपिका ।

याति । विशुद्धं तत्त्वाधिष्ठकम् । एकं तत्तु नानारूपम् अनन्तरं स्वबाह्यिर्वाह्याभ्यन्तरशून्यं तत्तु विपरीतम् । ब्रह्म परिपूर्णं तत्तु परिच्छिन्नम् । प्रत्यक् तत्तु विषयाकारम् । प्रशान्तं निर्विकारम् तदेवं स्वरूपज्ञानं सत्यमित्युक्तम् । कीदृशं तत् । ऐश्वर्यादिषड्गुणत्वेन भगवच्छब्दः संज्ञा यस्य यत्र ज्ञानं वासुदेवं वदन्ति ॥ ११ ॥

एतत्प्राप्तिस्तु महत्सेवां विना न भवतीत्याह । हे रहूगण ! एतज्ज्ञानं तपसा पुरुषो न याति । इज्यया वैदिककर्मणा । निर्वपणाद्न्नादिसम्विभागेन । गृहाद्वा तन्निमित्तपरोपकारेण । छन्दसा वेदाभ्यासेन । जलाग्न्यादिभिरुपास्तिभिः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्थितावेवोत्पत्तिविनाशौ चराचरस्य विद्याम इत्यनेन क्षितेस्तु नित्यत्वं प्रतीतं तन्निराकुर्वन्नाह । एवमिति । असन्निधानमसतामनित्यानां कार्याणां निधानं लयस्थानं यतः क्षितिशब्दवृत्तं क्षितिशब्दस्य वृत्तं वृत्तिर्यस्मिंस्तत् क्षितिशब्दवाच्यं तदप्येवं निरुक्तं दर्शितं यत्र देहाद्युत्पत्तिः सा क्षितिरप्यनित्येत्यर्थः भूमेरनित्यत्वज्ञापनाय तत्राप्यवयवविभागमवयवानां चानित्यत्वमाह । परमाणव इति । ये परमाणवः भूतसूक्ष्माणि येषां परमाणूनां समूहेन विशेषः कृतः भूमण्डलं कृतं ते परमाणवः मनसाधिष्ठातुरीश्वरसङ्कल्पेनाविद्यया प्रकृत्या कल्पिता ईश्वराधिष्ठितप्रकृतिपरिणामरूपत्वादनित्या एवेति भावः । यद्वा ये परमाणवो नित्यास्ते मनसाविद्यया कल्पिताः शरीराकारेण संहिताः त एवाहंममेत्यविद्यया आत्मत्वेन कल्पिता इत्यर्थः वेदार्थोपबृंहणपरेऽस्मिन् प्रबन्धे परमाणुकारणवादायोगाद्वैशेषिकादिभिस्तेषामविद्याकल्पितत्वानभ्युपगमाच्च यथोक्त एवार्थः असन्निधानादित्यपि पाठो दृश्यते तत्रासत्स्वनित्येषु स्वकारणभूतेषु भूतसूक्ष्मेषु निधानात् लयात् क्षितिशब्दवृत्तमप्यनित्यमित्यर्थः ॥ ९ ॥

शरीरानित्यत्वं निगमयन्स्थौल्यादिकं तद्गतमेवेत्याह । एवमिति । एवं कार्श्यादिगुणयुक्तं सदसदात्मकं कार्यकारणात्मकमुत्कृष्टापकृष्टात्मकं वा जीवसजीवं जीवभेदभिन्नं चराचरात्मकं द्वितीयमात्मनो भिन्नं शरीरं द्रव्यादिनाम्ना ऽजया प्रकृत्या कृतमिति बुद्ध्या निपुणया विद्धि तत्र द्रव्यं पृथिव्यादिपञ्चभूतानि स्वभावस्तेषां परिणाम आशयोऽन्तःकरणं वासना वा कालः सत्त्वादिगुणक्षोभकः द्रव्यादीनां प्रकृतिप्रपञ्चत्वात् द्रव्यादिनाम्नेत्युक्तम् ॥ १० ॥

एवं देहस्यानात्मत्वमुक्त्वाथात्मस्वरूपं शोधयति । ज्ञानमिति । जडात्मवादव्युदासः विशुद्धं स्वतः कर्मसम्बन्धरहितं रागादिदोषरहितं वा परमार्थं पुरुषार्थभूतमेकं सर्वत्र ज्ञानैकाकारमनन्तरं न बहिरन्तर्बहिः प्रदेशभेदरहितं निरवयवत्वात् ब्रह्म गुणतो व्यापकं सत्यं नित्यं प्रत्यक् स्वस्मै भासमानं प्रशान्तमशनायापिपासाशोकमोहजरामृत्यूर्मिषट्करहितं साङ्ख्यमतव्यावृत्त्यर्थं ब्रह्मात्मकं सामानाधिकरण्येनाह । भगवच्छब्दसंज्ञं वासुदेवमिति । भगवच्छब्दः संज्ञा यस्य स भगवच्छब्दसंज्ञः

तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः ।
शब्दोऽयं नोपचारेण ह्यन्यत्र ह्युपचारतः ।

इत्युक्तरीत्या भगवच्छब्दो यत्र वासुदेवे मुख्यवृत्तस्तं वासुदेवं वसुदेवात्मजं वदन्ति कवयः आत्मयाथात्म्यविदो वदन्ति ॥ ११ ॥

अत्र विशुद्धं परमार्थमित्यादिविशेषणैरचेतनशरीरव्यावृत्तिः वासुदेवात्मकत्वकथनेन तत्सृज्यत्वपाल्यत्वनियाम्यत्वशेषत्वादिधर्मैः तत्तदाश्रितैस्ततो वैलक्षण्यं सूचितमेवम्भूतप्रकृतिविलक्षणस्वात्मपरमात्मयाथात्म्यज्ञानं कथं लभ्यतेत्यपेक्षायां नोपायान्तरैः किन्तु महत्सेवाभगवद्गुणानुश्रवणादिप्रणाड्यैवेत्याह द्वाभ्याम् । हे रहूगणैतदात्मपरमात्मयाथात्म्यज्ञानं महतां भागवतानां पादरजःसेवां विना तपआदिभिः स्वमनीषापूर्वकैर्न याति न प्राप्नोति तत्र तपः कृच्छ्रचान्द्रायणादिरनशनादिर्वा इज्या वैदिकं कर्म निर्वपणं सत्पात्रनिःक्षेपरूपं दानं गृहं गृहस्थधर्मः छन्दो वेदाभ्यासः एभिस्तपआदिभिस्तथोपासितैर्जलादिभिश्च न यातीत्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

फलितमाह । एवमिति । यथा प्रथितत्वयोगेन पृथ्वीशब्दवाच्यत्वं हरौ निर्णीयते एवमाश्रयत्वात्क्षितिशब्दवृत्तं क्षितिशब्दप्रवृत्तिनिमित्तमपि निरुक्तं निर्णीतं हरावेवेति शेषः क्षितिशब्दरूपं निर्वचनेन मुख्यं हरावेव दर्शितमिति वा प्रत्यक्षस्य क्षितेराश्रयत्वापलापे बाधकं किमित्याशङ्क्य परमाणूनामाश्रयाः पृथिव्या आधारत्वानुपपत्तिरेव बाधिकेत्यभिप्रेत्याह । असन्निधानमिति । ये परमाणवः पार्थिवा इति शेषः । येषां पार्थिवानां परमाणूनां समूहेन पुञ्जेन विशेषः पृथिवीलक्षणः पदार्थश्च कृतः ते परमाणवश्चराचरस्याश्रया इत्यसन्निधानं दूरे नन्वुक्तस्य चोद्यस्य परिहारः कथमागत इति तत्राह । अविद्ययेति । अविद्ययाऽज्ञानेन मनसा मनोरथेनाधारत्वेन कल्पिताः नतु मुख्याधारा इतिशेषः किमेकैके परमाणवश्चराचरस्याधारा उत मिलिता इत्युभयोरपीदमेवोत्तरमसन्निधानमिति ये पार्थिवाः परमाणवस्तेषां निधानं नितरां स्वातन्त्र्येण धानं धारणमसदनुपपन्नं येषां समूहेन विशेषः कृतस्तेषां चासन्निधानं सामर्थ्यं नास्ति ईश्वरनियतप्रकृतिमन्तरेणेति शेषः तत्कुत इत्यत उक्तम् । अविद्ययेति । मनसेश्वरेच्छाविशिष्टेन तदन्तःकरणेन नियतया अविद्यया प्रकृत्या ते परमाणव आधारत्वेन कल्पिताः नतु स्वतन्त्रा इति वा येषां परमाणूनां द्व्यणुकादिसमूहेनेति काणादाः पुञ्जेनेति बौद्धाः अविद्यया कल्पिता ये परमाणवस्तेषां समूहेनेति मायावादिनः तेषां सर्वेषां पक्षेऽपि तेषां परमाणूनां चराचरधारणासन्निधानं दूरीभूतमिति भाव इति वा ॥ ९ ॥

ननु क्षित्यादिशब्दानां मुख्यार्थोऽक्षरेश्चराचरस्योत्पत्त्यवस्थाने यदि स्यातां तर्हि जगत्यां जगत्पृथिवी वा "इदं सर्वम्" इत्यादिश्रुतेः प्रकृत्यादिवाच्याभावेनाप्रामाण्यमापन्नमिति तत्राह । एवमिति । असत्कारणं सत्कार्यं वाथवाकाशो वा पृथिव्यप्तेजांसि वा जीवं चैतन्यविशिष्टं वस्तु अजीवमन्यदस्वतन्त्रं जडमिति यावत् अन्यन्मिथो विष्णोश्च भिन्नमेवं विश्वं जगद्यथा हरिणाकृतं भूतं चैवमजया भगवन्नियतया प्रकृत्या द्वितीयकारणं भारणं च कृतमवेहीत्यन्वयः अत्रायमाशयः राजादीनां गोप्तृत्वे परमा-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भूमिश्राया भूमेराश्रयकारणत्वे च यो व्यवहारः स उपचारो यतो राजादीनामाश्रयो जनिकर्ता च ब्रह्मा तस्य प्रकृतिस्तस्याः नारायणो नान्याधारोऽतः सर्वाधारत्वादिकं मुख्यतः सर्वशब्दवाच्यत्वं च तस्यैव तदनुग्रहलेशेन प्रकृत्यादीनां तत्तत्कार्यकरत्वं तत्तच्छब्दवाच्यत्वं शिरआद्यवयवाधारत्ववदाधारत्वं चामुख्यमिति एतदभिप्रायेण ब्रह्मेत्यादिनान्येत्युक्तं चित्प्रकृतेर्ब्रह्माद्यभिमानित्वेनान्यस्याः तदात्मत्वेनेति शेषः

राजा गोप्ताश्रयो भूमिः कारणं चेति लौकिकः ।
व्यवहारो न तत्सत्यं तयोर्ब्रह्माश्रयो विभुः ॥
गोप्ता च तस्य प्रकृतिस्तस्या विष्णुः स्वयं प्रभुः ।
तव गोप्त्री तु पृथिवी न त्वं गोप्ता क्षितेः स्मृतः ॥
अतः सर्वाश्रयश्चैव गोप्ता च हरिरीश्वरः ।
सर्वशब्दाभिधेयश्च शब्दवृत्तेश्च कारणम् ।
सर्वान्तरः सर्वबाहिरक एव जनार्दनः ।
शिरसो धारता यद्वद्ग्रीवायास्तद्वदेव तु ॥
आश्रयत्वं च गोप्तृत्वमन्येषामुपचारतः ।

इत्येतद्वाक्यमस्मिन्नुक्तार्थं जागर्ति अत इदमेव ग्राह्यं नान्यत्स्वकपोलकल्पितमिति ज्ञायते ॥ १० ॥

ननु हन्त, प्रकृत्यादिसर्वजगत्प्रवर्तकस्य हरेः स्वरूपम् कीदृशं येन तदन्तःपतितस्यापि न तन्मलालेप इति तत्राह । ज्ञानमिति । "ज्ञानमनन्तं ब्रह्म" इति श्रुतेर्गुणगुणिनोरभेदाभिप्रायेण गुणव्यपदेशः वृत्तिज्ञानवद्विषयोपरक्तं नेत्याह । विशुद्धमिति । विशुद्धं विषयसंसर्गेऽपि तत्कृतदोषलेशस्पर्शो नास्तीत्यर्थः "असङ्गो ह्ययं पुरुष" इति श्रुतेः विशुद्धस्यापि कस्यचित्पादवद्व्यवच्छेदः किं न स्यादिति नेत्याह । परमार्थमिति । परमार्थम् उत्तमार्थमबाधितं वस्त्वित्यर्थः "वस्तु हेतुनिवृत्तिषु" इत्यभिधानात् तादृशमन्यदस्तीति नेत्याह । एकमिति । एकम् "आत्मा वा इदमेक एवाग्र आसीत्" इति श्रुतेः लोके साम्याधिक्यदर्शनात् कथमस्य तदभाव इति नेत्याह । अनन्तरमिति । अन्तः स्थित्वा प्रेरको नास्तीत्यनन्तरमन्तरभावे बहिः किं न स्यादिति नेत्याह । न बहिरिति । बहिरपि प्रेरको नेति घटादिवत्परिच्छिन्नं नेत्यतो वाह । अनन्तरं न बहिरिति । यस्मादन्तर्बहिश्च नास्तीति "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित" इति श्रुतेः "अणोरणीयान्महतो महीयान्" इति च किमस्य संकेतन उक्तम् । ब्रह्मेति । कस्मादस्यान्तर्बहिर्नास्तीत्यतो वाह । ब्रह्मेति । ब्रह्म पूर्णं निरुपमचरितमितिशेषः किमेक एव गुण इति नेत्याह । सत्यमिति । सत्यं साधु सुखादिगुणयुक्तं किमिदं चतुर्मुखाख्यमिति नेत्यतो वाह । सत्यमिति । "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः मुख्यं ब्रह्मेत्यर्थः गुणानां साम्येऽपि ज्ञानानन्दयोर्लोकापेक्षया प्राधान्यज्ञापनायावताराणां रामकृष्णयोरिवेत्यतो वाह । सत्यमिति । उत्कृष्टानन्दज्ञानम् ।

सच्चैव उत्तमं ब्रूयादानन्दन्तीति वै वदेत् ।
येति ज्ञानं समुद्दिष्टं पूर्णानन्दस्ततस्ततः ।

इति वचनात् एतद्वस्तु कुत्र सदिति तत्राह । प्रत्यगिति । जीवस्य हृदभिमुखं बिम्बरूपमिति यावत् "रूपं रूपं प्रतिरूपो बभूव" इति श्रुतेः कृष्णस्वभावं नेत्याह । प्रशान्तमिति । प्रशान्तम् निस्तरङ्गस्तिमितसमुद्रकल्पं "निष्कलं निष्क्रियं शान्तम्" इति श्रुतेः किमस्माकं कार्यमित्यत्राह । भगवच्छब्दवाच्यमिति । अस्माकं पूज्य इतिशब्देनोच्यते अत्र भगवानिति शब्दो बुधैः प्रयुज्यते "भगवान् पूज्य" इति हलायुधः तन्त्रस्य शब्दस्य नाममात्रेऽपि प्रयोगदर्शनात् कथं निर्णय इति तत्राह । यदिति । कवयो यद्भगवच्छब्दवाच्यं वस्तु क्रीडित्वा सर्वत्र वसनाद्वासुदेवनाम गृणन्ति तज्ज्ञानादिगुणपूर्णं ब्रह्म प्रकृत्यादिप्रेरकं जानीहीति वाक्यशेषः उक्तानामनुक्तानां सर्वेषां गुणानां कवलीकरणेनेति वा भगवच्छब्दवाच्यं तत्प्रतिपादनार्थं वासुदेवपदं चेति बलज्ञानानन्दादयो गृह्यन्ते अखिलेति शत्रुनिरासपटीयोवीर्यशौर्यौदार्यादयो देवेति क्रीडाजिगीषाकान्त्यादयः एते यत्र प्रत्येकं पूर्णतयान्योन्याविरुद्धतया च विहृत्य वसन्ति तद्वासुदेवसंज्ञं वदन्तीति समुदायार्थं इति वा अज्ञानामपि बुद्ध्यवतारार्थं वसुदेवपुत्रत्वाद्वासुदेवमित्युक्तमिति वा ॥ ११ ॥

एतादृशवस्तुज्ञानप्रापकः कोऽन्तरङ्गोपाय इत्याशङ्क्य वैराग्यरसायनसेवया प्रवृद्धबला भक्तिरेव सा च सुदृढातिविशाला महत्सेवामन्तरेण न स्यात्तपआदयस्तत्पूर्वाङ्गा एव तस्या निदानभूतास्तदर्थं तत्सेवैवावश्यं भाविनीत्यभिप्रेत्याह । श्रद्दधाना इति । यतिरत्र ज्ञानं गतिं च वक्ति विषया वाक्यविषयया कैवल्यया निर्मलं संन्यासः छन्दसा ब्रह्मचर्येण जलाग्निसूर्यैः संविनैरितिशेषः "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन" इत्यादिश्रुतेः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अविद्ययेति । यस्य समूहरूपस्य विशेषस्यान्यथानुपपत्त्या तद्धेतवः परमाणवः कल्प्यन्ते । तस्याप्यवयविनिरूपणाशक्यत्वात्तेऽप्यज्ञानेनैव कल्पिता इत्यर्थः ॥ ९—१० ॥

एवं तर्कमयज्ञानप्रकारणसमूहवादमायावर्णायकजयज्ञाय तर्कः प्रयोजितः अथ शब्दमयज्ञानस्थापनाय सर्वत्र परमात्मैकत्वावधारितं वदन्तत्र तात्पर्येण तत्त्वमाह । वदन्तीति । यदेव कवयः पूर्वोक्तनिर्दोषकतत्त्वादिभ्योऽपि शब्दप्रमाणं निपुणा भगवच्छब्दसंज्ञमाहुः श्रुत्या युक्त्या च सशक्तित्वेनैव सिद्धत्वात् । तथैव सर्वाश्रयत्वेन दर्शयति । वासुदेवमिति ॥ ११ ॥

एतद्भगवत्संज्ञं तत्त्वं छन्दसा ब्रह्मचर्येण गृहाद्गार्हस्थ्येन तपसा वानप्रस्थेन निर्विषयाद् संन्यासात् । इत्यन्या तत्र तत्र तत्तद्धर्मतापालनया तस्यामपि विशेषः जलाग्निसूर्यैरिति । महत्पादरजोऽभिषेकं विनेति । तस्यैव सर्वशुद्धिहेतुत्वेन योग्यताहेतुत्वात् ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तर्हि ज्ञिनेः सत्यता क्वाप्युक्ता । [illegible]
वर्त्तनं मत्ता नाममात्र एवे
गुणु स्वकारयेषु निधाना

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ध्वनिर्नास्तीत्यर्थः । परमाणवस्तर्हि सत्याः स्युस्तत्राह । अविद्यया अज्ञानेनैव हेतुना मनसा ते कार्यानुपपत्त्या कल्पिता वादिभिस्तेऽसत्या एवेत्यर्थः । कल्पनाबीजमाह । येषां समूहेन विशेषः पृथिवीशब्दवाच्योऽर्थः कृतः । अवयविनो निरस्तत्वात् समूहग्रहणम् ॥ ९ ॥

एवमन्यदपि कृशत्वादिधर्मकं द्वितीयं द्वैतं द्रव्यादिनाऽन्योन्यापेक्षितयाऽजया मायया कृतमवेहि तत्र कृशं सूक्ष्ममणुरतिसूक्ष्मं बृहत् अतिस्थूलम् असत् कारणं सत् कार्यं जीवं सचेतनम् अजीवमचेतनम् ॥ १० ॥

तर्हि किं सत्यमिति चेत् पूर्वोक्तं तत्त्वमेव शब्दप्रमाणवेद्यं तच्च तत्त्वं "वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्" इति प्रथमस्कन्धोक्तवदेवाह । ज्ञानं सत्यं कीदृशं विशुद्धं गुणातीतं परमोऽर्थो मोक्षादिको यस्मात्तत् एकमद्वयम् अनन्तरमबाह्यमाभ्यन्तरशून्यं व्यापकमित्यर्थः । तच्च ज्ञानं "ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" इत्युक्तवदेवाह । ब्रह्म ब्रह्मशब्दवाच्यं निर्विकल्पकं ज्ञानिनामुपास्यं प्रत्यक् प्रशान्तं परमात्मशब्दवाच्यं योगिनामुपास्यं प्रशान्तमिति जीवात्मव्यावृत्त्यर्थं भगवच्छब्दः संज्ञा यस्य तत् भक्तानामुपास्यं यत्त्रिरूपम् इदमपि वासुदेवं वसुदेवनन्दनं वदन्ति पूर्णं ब्रह्म सनातनमिति कृष्णाय परमात्मने इति ततस्तु भगवान् कृष्ण इत्यादिभ्यः तत्रापि ब्रह्मणो हि प्रतिष्ठाहमिति "विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति वासुदेवो भगवतामित्यादिभ्यो वसुदेवनन्दनस्यैव परमपूर्णत्वम् अत्र भगशब्दस्यैश्वर्यवाचित्वादैश्वर्यस्य चेशितव्यापेक्षितत्वादीशितव्यानां मायिकानाञ्चोक्तयुक्त्या मिथ्यात्वाद्भक्तास्तत्रासर्वास्सिन एव ईशितव्या नित्या भवगतास्तेषां तद्धामनश्च नित्यसत्यत्वं भगवत इव शब्दप्रमाणसिद्धमेव प्रथमस्कन्धादौ प्रपञ्चितमेव तथैव मत्सेवायां तु निर्गुणेति मन्निकेतन्तु निर्गुणमित्यादिभिरेकादशे भक्तिसम्बन्धिवस्तुमात्रस्यैव नित्यसत्यत्वं प्रपञ्चयिष्यते च प्रकरणाभिप्रायश्चायं भो राजन् ! युष्माकं प्रत्यक्षादिप्रमाणसिद्धस्यापि व्यवहारस्य मायाजीवस्य मायारचितस्य नित्याः आविर्हिताः क्वापि तिरोहिताश्चेत्यनेन स्वमतेन कालदेशादिपरिच्छिन्नत्वान्नश्वरत्वमङ्गीकुर्वता कालदेशाद्यपरिच्छिन्ने तत्त्वे चिद्घनवस्तुनि व्यवहारो वैजात्यादेव नार्थ्यते इत्युक्तं तदपि व्यवहारमेव पुनः पुनरत्थापयसि चेदेनमन्ये वादिनो मिथ्यैवाचक्षत इति तन्मतमुदाहृतम् । शब्दप्रमाणसिद्धे तत्त्वे तु तेऽपि न विप्रतिपद्यन्त इत्यन्तेन ज्ञानं विशुद्धमिति पद्यमुक्तमिति । ननु देहेन्द्रियादिव्यापारः श्रीकृष्णस्यैकनिष्ठा भक्तिरिति भक्तिर्लक्षिता । तस्याश्च सगुणां भक्तियोगस्य निर्गुणस्येत्युदाहृतमिति भगवदुक्तेर्निर्गुणत्वमवसीयते तत्र परिणामवादे कार्यस्य सत्त्वात् । प्राकृतदेहेन्द्रियादीनामेव भक्तिसंसर्गेणाप्राकृतत्वं स्पर्शमण्यायेनैव साधु बुद्ध्यामहे । विवर्त्तवादे न कार्यमात्रस्यैवासत्त्वात् देहेन्द्रियादीनां मिथ्याभूतत्वाद्भक्तेः स्थितिरेव नास्ति कुतस्तस्या निर्गुणत्वं घटतां तथाहि निर्गुणां भक्तिमयमुपदेष्टव्य इति गुरूपदेशकाले उपदेष्टव्यजनस्य मिथ्याभूतत्वावकाशेऽपि धीवरस्येव गुरूपदेश एव बाधक भवेत् । कुतः [illegible] कः कुतस्तरां तदभ्यासेन प्रेमोदयः कुतस्तमां तेन भगवद्वशीकार इति सत्यं महाचिन्त्यशक्तौ भगवति काप्यसम्भावना न भावनीया यदुक्तं स्वयं भगवतैव "एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् । यत् सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम्" इति । अस्यार्थः यत् यतः अनृतेन मिथ्याभूतेनापि मर्त्येन मर्त्यशरीरेण मामृतं सत्यं परमसत्यमिति प्राप्नोति । यद्वा मा मामृतं परमानन्दस्वरूपं सत्यमनृतेनापि मर्त्येन मरणधर्मवता देहेन्द्रियप्राणादिना पत्रपुष्पगन्धधूपदीपविविधनैवेद्यच्छत्रचामराद्युपचारेण च यदाप्नोति एषैव बुद्धिमतां बुद्धिरेषैव मनीषिणां परमपरामर्शवतां मनीषा विचार इति प्राप्तिप्रकारश्च स्वयं भगवतैवोक्तो यथा । "मर्त्यो यदा त्यक्तसमस्तकर्म्मा निवेदितात्मा विचिकीर्षितो मे । तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै" अस्यार्थः यदा मर्त्यस्त्यक्तसमस्तकर्मा गुरूपदेशकाले त्यक्तसमस्तवर्णाश्रमधर्मकामनः मयि श्रीगुरुरूपे निवेदितो आत्मानौ अहन्तास्पदममतास्पदे येन सः । "योऽहं ममास्ति यत् किञ्चिदिह लोके परत्र च । तत् सर्वं भवतो नाथ ! चरणेषु समर्पितम्" इति व्यवसायवान् भवति तदा स जनो मिथ्याभूतोऽपि मे मया विचिकीर्षितः स्यात् विशिष्टः कर्तुमिष्टः स्यात् निर्गुणो मदपाश्रय इति मदुक्ते निस्त्रैगुण्य एव स्यादित्यर्थः स हि मायाकार्यत्वाभ्न नश्वरः सत्यः नाप्यज्ञानकार्यत्वान्मिथ्याभूतः किन्तु स्वरूपभूतो मत्कार्यत्वान्निर्गुण एव स्यात् । किञ्च मायाविशिष्टः कृतः स्यादित्यप्रयुज्य विचिकीर्षित इति सन्प्रत्ययप्रयोगान्निर्गुणः कर्तुमारभ्यमाण एव स शनैः शनैर्भक्त्यभ्यासवान् निष्ठारुच्यासक्तिरतिभूमिकारूढ एव सम्यङ्निर्गुणः स्यात्ततो मिथ्याभूतवस्तुभिः सह तस्य व्यवहारो न स्यात् तत्पूर्वन्तु यथा योगं व्यवहारस्तैश्च सह लभ्यते । अयमर्थः अचिन्त्यशक्त्या भक्त्युपदेशकाल एव तस्य गुणातीतानि देहेन्द्रियमनांसि मया भक्तिमाहात्म्यदर्शनार्थमलक्षितमेव सृज्यन्ते मिथ्या भूतानि तान्यत्यलक्षितमेव क्षयं यान्ति । यथा "नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम् । चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम्" इति । अस्यार्थः एवंविधः प्रियव्रतकर्तृकसप्तसमुद्रनिर्माणप्रपञ्च इव पुरुषकारो न चित्रं चित्रं त्वेतदेव यद्विदूरविगतोऽन्त्यजोऽपि यस्योरुक्रमस्य नामधेयं सकृदप्याददीत अधुना तत्क्षण एव तन्धं तनुं विजहातीति तदानीं तनोर्दृश्यमानत्वेऽपि प्रारब्धकर्मसम्बलिततनुत्यागः अलक्षित एवेत्यर्थः । ततश्च तदा अमृतत्वं मरणधर्माभावं प्रतिपद्यमानः तदानीमेव प्राप्नुवन् मया सह आत्मभूयाय आत्मभावाय आत्मनः मस्य स्थित्यै कल्पते यत्राहं तिष्ठामि तत्रैव सोऽपि मत्सेवार्थं तिष्ठतीत्यर्थः । एवञ्च जगत्यस्मिन् यानि यानि वस्तूनि मिथ्याभूतान्युपलभ्यन्ते तेषामेव भक्तिसम्पर्कान्मिथ्याभूतत्वं प्रविलाप्य भगवता स्वभक्तेच्छानुकूलेन परमसत्यत्वमेव तत्क्षण एव सृज्यते किमशक्यमचिन्त्यशक्तेर्भगवत इत्यत एव मत्सेवायान्तु निर्गुणेति मन्निकेतन्तु निर्गुणमित्यादिकानि भगवद्वाक्यानि सङ्गच्छन्ते । "अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम्" इत्युपमपर्वचनं भाष्यकारेणापि धृतं तत्र भावा इति बहुवचनेनाद्वैतभङ्गो मध्यपदस्तेषामैक्यादिति सर्वमवदातम् ॥ ११ ॥

यत्रोत्तमश्लोकगुणानुवादः प्रस्तूयते ग्राम्यकथाविघातः।
निषेव्यमाणोऽनुदिनं मुमुक्षोर्मतिं सतीं यच्छति वासुदेवे ॥ १३ ॥
अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसङ्गबन्धः।
आराधनं भगवत ईहमानो मृगोऽभवं मृगसङ्गाद्धतार्थः ॥ १४ ॥
सा मां स्मृतिर्मृगदेहेऽपि वीर ! कृष्णार्चनप्रभवा नो जहाति।
अथो अहं जनसङ्गादसङ्गो विशङ्कमानोऽविवृतश्चरामि ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

एतत् प्राप्तिश्च महत्कृपाविर्भूतया भक्त्या विना न भवतीत्याह द्वाभ्याम्। हे रहूगण ! एतदुक्तलक्षणं त्रिविधं ज्ञानं तपआदिभिर्न प्राप्नोति तत्र तपांश्चैकाग्र्यमिज्या वैदिकं कर्म निर्वपणमन्नादिसंविभागः गृहं तन्निमित्तपरोपकारादि छन्दो वेदाभ्यासः। जलाग्निसूर्यास्तत्कारणकतपश्चरणानि ॥ १२ ॥

ज्ञानभक्तिभ्यां मुक्तो भवेति राजानं प्रत्याह। रहूगणोक्त्यारभ्य "असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तरातिपारम्" इत्यन्तेन महतां भागवतानां पादरजोऽभिषेकं विना तच्चरणसेवां विना एतत्सर्वात्मभूतं ब्रह्म पुरुषस्तपआदिभिर्न याति तपसा कृच्छ्रादिना इज्यया वैदिककर्मणा निर्वपणात् अन्नादिसंविभागात् गृहात्पुत्राद्युत्पादनेन छन्दसा वेदाभ्यासेन जलादिभिरुपासितैः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं पार्थिवानां देहादीनां पृथिव्यात्मकत्वं दर्शितम् अथ पृथिव्या भूतसूक्ष्मात्मकतां दर्शयति। एवमिति। क्षितिशब्दस्य वृत्तं वृत्तिर्यत्र तदपि भूतम् असत्तु भूतसूक्ष्मेषु स्वकारणेषु निधानात् लयात् निरुक्तं भूतसूक्ष्मात्मकत्वेन निरूपितं येषां समूहेन विशेषः भूमिपदार्थः कृतस्तानि भूतसूक्ष्माणि ये च परमाणवः अणुपरिमाणकाः प्राणाः एकादशेन्द्रियाणि च अविद्यया प्रकृत्याख्यया शक्त्या मनसा सङ्कल्पमात्रेणैव वासुदेवेन ब्रह्मणा परमकारणेन कल्पिता रचिताः तदात्मका इत्यर्थः ॥ ९ ॥

किंबहुना एवमन्यत् यत्कृशत्वादिधर्मकं द्रव्यादिनाम्ना उपलक्षितमजया प्रकृत्या सह द्वितीयं कृतं कार्यजातं च तत्सर्वं यद्वासुदेवाख्यं ब्रह्म कवयो वदन्ति तदेव हीत्यन्वयः "सदेव सोम्येदमग्र आसीत् ऐतदात्म्यमिदं सर्वं सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतिभ्यः।

न तदस्ति विना यत्स्यान्मया भूतं चराचरम्।
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते।
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव च ॥

इत्यादिस्मृतिभ्यः ॥ १० ॥

तदेव ब्रह्म विशिनष्टि। ज्ञानमिति। ज्ञानं "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः विशुद्धं हेयगुणशून्यं परमार्थं मुक्तोपसृप्यम् एकं समानातिशयशून्यम् अनन्तरं स्वबाह्यः सर्वसंनिहितं सर्वगतं च ब्रह्म बृहत्स्वरूपगुणशक्ति प्रत्यक् जीवः प्रशान्तो यस्मात्तत् भगवच्छब्दः संज्ञा यस्य तत् ॥ ११ ॥

अथ मम संशयार्थं पश्चात्प्रक्ष्यामीत्युक्तवता राज्ञानापृष्टोऽपि मुनिः स्वयं कृपया तद्भावार्थेषु तं विसंशयं कृत्वा हरि-

भाषाटीका

इसी प्रकार से पृथिवी शब्द के अर्थ की भी स्थिति है क्यों कि पृथिवी अपने परमाणुओं में लीन हो जाती है जो परमाणु होंगे सोभी नैयायिकोंने युक्तिसे नित्यरूप अज्ञान से कल्पना किये हैं उन परमाणुओं के समूह से ही पृथिवी बनी है ॥ ९ ॥

इसी प्रकारसे पतला मोटा छोटा बड़ा कारण कार्य जड़ चेतन और जो कुछ पृथिव्यादि द्रव्य स्वभाव संस्कार काल अदृष्ट इत्यादि नाम से जो पदार्थ प्रसिद्ध हैं वह सब व्यवहार के लिये भेद कल्पित करके बनाया गया है ॥ १० ॥

विशुद्ध अबाधित एक बाहिर भीतर रहित सत्य एक रस प्रकाशमान प्रशान्त भगवत शब्दवाच्य ज्ञान स्वरूप ब्रह्म जिस को कविजन वासुदेव कहते हैं सोई सत्य है ॥ ११ ॥

हे रहूगण ! इस आत्मतत्त्व को मनुष्य न तपस्या करने से न यज्ञादि कर्मों से न अन्नादि दान से न संन्यास से न वेदाध्ययन से न जल अग्नि सूर्यादिकों की उपासना से प्राप्त हो सकता है किन्तु महापुरुषों के चरण रजके स्नान होनेही से प्राप्त होता है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

महत्सेवायाः तत्प्राप्त्युपायतामाह। यत्र येषु महत्सु। ग्राम्यकथानां विघातो यस्मात् ॥ १३ ॥

विषयसङ्गस्तु योगभ्रंशक इति स्वकृतकर्मं निगूढश्चरसीति प्रश्नस्योत्तरमाह। अहमिति द्वाभ्याम्। विमुक्तो दृष्टश्रुताभ्यां सङ्गनिमित्तो बन्धो येन हतोऽर्थः प्रयोजनं यस्य ॥ १४ ॥

श्रीकृष्णार्चनं प्रकमप्युत्पन्नतीत्याह। सेति। जनसङ्गादिशङ्कमानः। अविवृतोऽप्रकटः ॥ १५ ॥

तस्मान्नरोऽसङ्गसुसङ्गजातज्ञानासिनेहैव विवृक्णमोहः ।
हरिं तदीहाकथनश्रुतिभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां ब्राह्मणरहूगणसंवादे
द्वादशोऽध्यायः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

असङ्गैर्महद्भिर्यः सुसङ्गस्तेन जातं ज्ञानमेवासिः खङ्गस्तेन छिन्नमोहः सन् अध्वनः संसारमार्गस्यातिशयितं श्रेष्ठं पारं हरिं याति । यद्वा । पारमति अतिक्रम्य हरिं याति । "अति-र्गतक्रमणे च" इति कर्मप्रवचनीयत्वाद्द्वितीया तस्य हरेरीहानां कथनश्रुतिभ्यां लब्धा स्मृतिर्येन सः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कथं महत्सेवया तथातीत्यत्राह । यत्र येषु महत्सु ... कथानामभिघातो यस्मात्स उत्तमश्लोकस्य भगवतो ... वादः प्रस्तूयते प्रस्तुयतां गुणानुवादः प्रकृते किमायातं ... अनुदिनं निषेव्यमाणो गुणानुवादः वासुदेवे सतीं मतिं ... यच्छति स्वात्मपरमात्मयाथात्म्यविषयं ज्ञानं ... त्यर्थः ॥ १३ ॥

एवं गृहमेधिसौख्यवैराग्यस्य ज्ञानहेतुत्वमभिधाय ... सङ्गस्य ज्ञानभ्रंशकरत्वं स्वदृष्टान्तेन वदन् कस्त्वं निगूढ ... दिप्रश्नस्योत्तरमाह । अहमिति द्वाभ्याम् । पुरा पूर्वे ... जन्मनि अहं भरतो नाम प्रसिद्धः राजाऽभूवं तत्र ... दृष्टेष्वैहिकसुखेषु श्रुतेष्वामुष्मिकेषु स्वर्गादिषु ... बन्धो येन तथाभूतः सन् भगवत आराधनं ... सङ्गाद्धतः विहतः आराधनलक्षणोऽर्थो यस्य ... मृगजन्मप्राप्तोऽभूवम् ॥ १४ ॥

हे वीर ! कृष्णार्चनप्रभावाद्भगवदा... षया स्मृतिः मृगदेहेऽपि मां न जहाति ... र्चन-प्रभावविषयको विस्मय अहो इति अधुना ... शङ्कमानः अत एवासङ्गः विवृतः ... प्रविष्टश्चरामि ॥ १५ ॥

तस्मात्सङ्गस्य बन्धकत्वान्नरः ... ज्ञानिषु सङ्गेन जातो यः ज्ञानरूपोऽसिः खङ्गस्तेन विवृक्णः ... छिन्नः सङ्गो-द्दहनदनुबन्धिषु येन तथाभूतः ... संसाराटव्यध्वनः पारमत्यन्तमवधिं हरिं भगवतः ... कथनश्रुताभ्यां भग-वदीहितकथनश्रवणाभ्यां कथनादिप्रमाणेत्यर्थः लब्धा स्मृतिर्भग-वद्विषया यस्य स याति प्राप्नोति ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत्र येषां महतां सकाशे प्रस्तूयते प्रसङ्गाने प्रकर्षेण स्तूयते वा ग्राम्यकथाविघातः विषयवार्ताप्रसङ्गनाशनः सेवा-फलमाह । निषेव्यमाणा इति । भक्तिशाणोल्लीढा सती मतिरुच्यते यच्छतिरत्र भक्तिनिशितज्ञानंदत्त्वा संसारोपरमं करोतीत्युप-गार्थः ॥ १३ ॥

इदानीं भरतः स्वोक्तार्थाभिज्ञानाय कुतस्त्य इतिचोद्यपरि-हाराय च स्वरूपं स्वचरितं च वक्ति । दृष्टेषु राजादिविभवेषु श्रुतेषु स्वर्गादिविषयेषु सङ्गबन्धः स्नेहबन्धः दृष्टश्रुतसङ्गबन्धः स विमुक्तो येन स तथा हतार्थः नष्टपुरुषार्थलक्षणप्रयोजनः ॥ १४ ॥

या पूर्वजन्मनि कृष्णार्चनजाता सा मां नो जहाति न त्यजति अधुनापि वर्तत इत्यर्थः अवधूतो ज्ञातविज्ञः दुःसङ्गात् संसारो भवतीति शङ्कया भियावधूतः कम्पितः इवबसारहित इत्यर्थ इति वा ॥ १५ ॥

उपसंहरति । तस्मादिति । यस्माद्भगवतः पूजैतादृशफला तस्मा-न्नरः पुरुषः संसारमतीत्याध्वनः संसारमार्गस्य अतिपारं तीरा-न्तरीभूतं हरिं यातीत्यन्वयः केन साधनेन असङ्गानां दुःसङ्ग-रहितानां सतां सुष्ठु सङ्गेन सेवालक्षणेन ज्ञानेन ज्ञानाख्यासि-पत्रिकया विवृक्णच्छिन्नः सङ्गः स्वर्गादिफलस्नेहो यस्य स तथा तस्य हरेरीहानां चरितानां कथनेन श्रवणेन च लब्धा स्मृति-र्यस्य स तथा संसाराध्वनः पारं विष्णोर्लोकमतियाति अतिक्रम्य यातीत्यर्थोऽनुपपन्नः हरिमित्यस्यान्वयानुपपत्तेरतोऽसङ्गतोऽय-मर्थ इति ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र विशेषमपि यदुक्तमस्यप्राप्तिसोपानमाह । यत्रेति । मुमुक्षोरन्यतिरिक्तसर्वपरित्यागेच्छोः ॥ १३—१६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ते च महान्तः कृष्णभक्ता एवेत्याभिव्यञ्जयति । यत्र महत्पादरजोऽभिषेके सति यत्र महत्सु वा गुणानां भक्तवात्सल्यादीनामनुवादः पुनः पुनःकथनं मुमुक्षोर्मोक्षकामस्यापि सतीं मोक्षेच्छाराहित्येन शुद्धां मतिं वासुदेवे वसुदेवनन्दने ॥ १३ ॥

महतां स्वापराधेन महापामरायाप्येवं ज्ञानमुपदिशन् परमकृप सुः को भवानित्यपेक्षायामाह । अहमिति । दृष्टे श्रुते च व्यवहारे सङ्गबन्धः आसक्तिबन्धो यस्तो विमुक्तो यत्नः तदपि देवाद्सावधानोऽभवमित्याह । मृग इति ॥ १४ ॥

श्रीकृष्णार्चनं [illegible] त्यादि । सोऽहं । अलसङ्गाद्विशङ्क[illegible] रः अविवृतोऽप्रकटः [illegible] ॥ १५ ॥

असङ्गो व्यवहारानासक्तिः सुसङ्गः साधुष्वासक्तिस्ताभ्यां जातं ज्ञानमेवासिः तेन छिन्नमोहः अध्वनः संसारमार्गस्य पारं हरिम् ॥ १६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

पञ्चमे द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र येषु महत्सु ग्राम्याणां या कथा सिश्नोदरनिमित्ता वार्त्ता तस्या विघातो यस्मात् स उत्तमश्लोकगुणानुवादः प्रस्तूयते ते महान्त इत्यन्वयः ॥ १३ ॥ १४ ॥ १५ ॥

यस्मात्प्राणिषु मोहः संसारहेतुस्तस्मात् असङ्गैर्महद्भिर्यः सुसङ्गस्तेन जातं ज्ञानमेवासिस्तेन इह गृहादौ विशेषतो वृक्णाच्छिन्नो मोहो येन सः तदीहाकथनश्रुताभ्यां हरिचेष्टितकीर्तनश्रवणाभ्यां लब्धस्मृतिः प्राप्तध्रुवास्मृतिः अध्वनः संसारमार्गस्य अतिपारमतिशयितं श्रेष्ठं पारं हरिं याति ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

द्वादशाध्यायार्थप्रकाशः ॥ १२ ॥

भाषाटीका ।

जिन महात्माओं में संसारी वार्त्ताओं का वध करनेवाला उत्तम श्लोक भगवान् का गुणानुवाद होता है उस गुणानुवाद के प्रतिदिन सेवन करने से वह गुणानुवाद मुमुक्षुपुरुष की भगवान् वासुदेव में सुन्दर मती को कर देता है ॥ १३ ॥

हम पूर्वजन्म में भरत नाम के राजा थे देखे सुने इस लोक परलोक के सङ्गों के बन्धों से छूटकर रहते थे फिर भगवान् का आराधन करते समय में मृग के साथ स्नेह करने से अपने स्वार्थ से नष्ट होकर मृग होगये ॥ १४ ॥

हे वीर ! श्रीकृष्ण भगवान् की पूजा के प्रभाव से मृग होनेपर भी वह स्मरण मेरे को बना ही रहा था इसी हेतु से सङ्ग से डर कर में अब भी छिपकर विचरता हूं ॥ १५ ॥

तिस हेतु से जो मनुष्य मन से विरक्त महापुरुषों के सङ्ग से उत्पन्न भये ज्ञान वैराग्य रूप खड्ग से मोह को छेदन करके भगवान् की कथा और स्मरण से आत्मज्ञान को लाभ होता है सो संसार से पार होकर श्रीहरि के शरण को प्राप्त होता है ॥ १६ ॥

इति श्रीभागवत पञ्चमस्कन्ध द्वादश अध्यायका

भाषानुवाद ब्रह्मणाचार्य्यकृत

समाप्त ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे द्वादशोऽध्यायः समाप्तः ॥ १२ ॥

॥ त्रयोदशोऽध्यायः ॥

——:o:——

ब्राह्मण उवाच ।

दुरत्ययेऽध्वन्यजया निवेशितो रजस्तमःसत्त्वविभक्तकर्मदृक् ।
स एष सार्थोऽर्थपरः परिभ्रमन्भवाटवीं याति न शर्म विन्दति ॥ १ ॥
यस्यामिमे षण्नरदेव दस्यवः सार्थं विलुम्पन्ति कुनायकं बलात् ।
गोमायवो यत्र हरन्ति सार्थिकं प्रमत्तमाविश्य यथोरणं वृकाः ॥ २ ॥
प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः ।
क्वचित्तु गन्धर्वपुरं प्रपश्यति क्वचित्क्वचिच्चाशुरयोल्मुकग्रहम् ॥ ३ ॥
निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावति भो ! अटव्याम् ।
क्वचिच्च वात्योत्थितपांसुधूम्रा दिशो न जानाति रजस्वलाक्षः ॥ ४ ॥
अदृश्यझिल्लीस्वनकर्णशूल उलूकवाग्भिर्व्यथितान्तरात्मा ।
अपुण्यवृक्षान् श्रयते क्षुधार्दितो मरीचितोयान्यभिधावति क्वचित् ॥ ५ ॥
क्वचिद्वितोयाः सरितोऽभियाति [illegible]रेतरं चालषते निरन्धः ।
आसाद्य दावं क्वचिदग्नितप्तो [illegible]र्विद्यते क्व च यक्षैर्हृतासुः ॥ ६ ॥
[illegible] शोचन्विमुह्यन्नुपयाति कश्मलम् ।
क्वचिच्च गन्धर्वपुरं प्रविष्टः प्रमो[illegible]ते निर्वृतवन्मुहूर्तम् ॥ ७ ॥
चलन्क्वचित्कण्टकशर्कराङ्घ्रिर्नगा[illegible]रुरुक्षुर्विमना इवास्ते ।
पदे पदेऽभ्यन्तरवह्निनार्दितः [illegible]टुम्बिकः क्रुध्यति वै जनाय ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोदशेऽविरक्ताय वृथा तत्त्वनिरूपणम् ।
इति वैराग्यदार्ढ्याय भवाटव्युपवर्ण्यते ॥ १ ॥

अध्वनः पारमित्युक्तं तमेवाध्वानं प्रसिद्धसार्थरूप[illegible] प्रपञ्चयति । दुरत्यये दुस्तरेऽध्वनि प्रवृत्तिमार्गे [illegible]तमःसत्त्वैर्विभक्तानि कर्माणि कार्यतया पश्यतीति तथा । स एष प्रसिद्धः सार्थो जीवसमूहोऽर्थपरः सुखार्थे [illegible] पथा वणिक्सार्थोऽर्थार्जनाय गच्छन्नटवीं याति तद्वत् ॥ १ ॥

अस्याध्यायस्य व्याख्यानरूप उत्तराध्याय[illegible] तथापि सुखप्रतिपत्त्यर्थं किञ्चित्किञ्चिद्व्याख्यायते । [illegible] भवाटव्याम् इमे इन्द्रियनामानः षड् दस्यवश्चौराः । कुत्सितो नायकः मनो[illegible] बुद्धिर्यस्य तं सार्थं विलुम्पन्ति यस्य [illegible] धनमुपभोगेन मुष्णन्तीत्यर्थः । गोमायवः [illegible] पत्न्यादयस्त्वं मे [illegible] प्रविश्य प्रमत्तं [illegible] सार्थे स्थितं हरन्ति [illegible] उरणं मेषम् ।

वीरुधो लतास्तृणानि च गुल्माश्च लतादिजालानि प्रभूतैरेतैर्गह्वरे दुष्प्रवेशे देशे कठोरैस्तीव्रैर्दंशैर्मक्षिकाविशेषैर्मशकैश्च यथा कश्चिदुपद्रुतो भवत्येवं कामकर्मादिभिर्गह्वरे गृहाश्रमे वर्तमानो दुर्जनैरुपद्रुतो भवतीत्यर्थः । गन्धर्वपुरवदघटमानमेव देहादिकं प्रकर्षेण सत्यमेवेदमिति पश्यति । क्वचित्क्वचिच्चापि आशुरयोऽतिवेगो य उल्मुकाकारो ग्रहः पिशाचस्तमप्युत्थं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः ॥ ३ ॥

निवासादिष्वात्मा स्वमानो यस्याः सा बुद्धिर्यस्य स ततस्ततो धावतीत्युभयत्र तात्पर्यार्थः । वात्या चक्रवातस्तया-मुत्थितः पांसुस्तेन धूम्रा दिशो रजस्वले रजोव्याप्ते अक्षिणी यस्य स यथा न जानाति तथा वात्येव भ्रमयन्ती या स्त्री तस्यामुत्थैः रागादिभिरप्रकाशमाना दिग्देवताः कर्मसाक्षिभूता न जानातीत्यर्थः ॥ ४ ॥

अदृश्यानां झिल्लीनां भृङ्गारिकासंज्ञानां कीटविशेषाणां स्वनैः कर्णयोः शूलं व्यथा यस्य उलूकाः घूकास्तेषां वाग्भिर्व्यथितान्तरात्मा मनो यस्य अत्र च परोक्षमप्रियवक्तारो द्विषो

श्रीधरस्वामिकृतभावार्थदीपिका ।

उलूकाः प्रत्यक्षमप्रियवक्तारो घूकतुल्याः येषां छायापि पापहेतुस्ते अपुण्यवृक्षास्तत्तुल्यानधार्मिकान्सेवते । मरीचितोयानिति । निष्फलत्वेन विज्ञातानपि विषयान् ॥ ५ ॥

वितोयासु सरित्सु पतितस्य गात्रभङ्गात्मको दुःखं भवति तथोदकलाभस्तद्वदिह च परत्र च दुःखदान्पाखण्डानभियाति याचते दायादादिभ्योऽन्नादि वाञ्छति । उभयत्रापि स एवार्थः । दावं दावाग्नितुल्यं दुःखदं गृहं प्राप्य शोकाग्निना तप्तो निर्विघ्नं विषीदति । तत्र च यक्षराक्षसतुल्यैः राजभिर्हृतमसुप्रष्ठं धनं यस्य स निर्विद्यते ॥ ६ ॥

अन्यैश्च शूरैर्हृतं स्वं वित्तं यस्य निर्विण्णां विषण्णां चेतो यस्य कश्मलं मूर्छाम् गन्धर्वपुरमिव मनोरथोपगतपितृपुत्रादिसमाजं प्रविष्टः सन् ॥ ७ ॥

कण्टकादिविक्षताङ्घ्रिरिव विघ्नैरभिभूतः सन्नगतुल्यं महत्कर्मारोढुं कर्तुमिच्छुर्विमना इव आस्ते पदे पदे क्षणे क्षणे अभ्यन्तरेण वह्निना जाठरेण ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं तत्त्वं निरूपितमव्यक्तविरक्तस्य न प्रतिष्ठितं भवतीति [illegible]श्रेयोऽवधाय संसाराध्वानं लोकप्रसिद्धदुर्गाध्वत्वेन संसारमह[illegible]त्वेन च रूपयति । दुरत्यय इति त्रयोदशेनाध्यायेन ब्राह्मणः । दुरत्ययं दुरतिक्रमेऽध्वनि कर्ममार्गेऽजया प्रकृत्या निवेशितः रजस्तमःसत्त्वैर्विभक्तानि कर्माणि कार्यतया पश्यन्निति तथा शुभाशुभमिश्ररूपकर्माणि दृष्टिमानित्यर्थः स एवः सार्थो जीवसमूहः अर्थपरः धर्मादिपुरुषार्थत्रयासक्तः भवाटवीं याति कर्मफलं तु प्राप्नोतीत्यर्थः शर्म सुखं न विन्दति न लभते यथा वणिक् अर्थार्जनाय गच्छन्नटवीं याति सुखं च न विन्दति तद्वदित्यर्थः ॥ १ ॥ ॥

यद्यप्युक्तस्याध्यायस्य व्याख्यानरूप उत्तराध्यायः प्रवृत्तस्तथापि सुखप्रतिपत्तये किञ्चिदत्रापि व्याख्यायते तदेवाह । यस्यामिति । हे नरदेव ! यस्यां भवाटव्यां षडिन्द्रियनामानः दस्यवो दुष्टजन्तवः चोराः कुत्सितः सन्मार्गानभिज्ञः नायकः बुद्धिरूपः नेता यस्य तं सार्थं जीवसमूहं विलुम्पन्ति जीवस्य भगवदाराधनरूपं धनं लुम्पन्तीत्यर्थः यत्र भवाटव्यां गोमायवः शृगालतुल्या दारापत्यादयः प्रमत्तमनवहितमार्थकं स्वं मे भर्तासि पितासीत्येवं प्रविश्य हरन्ति यथोरणं मेषं वृकाः हरन्ति तद्वत् "योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते" इत्युक्तरीत्या आत्मस्वरूपविस्मारकाभिमानजननद्वारा आत्मानमपहरन्तीत्यर्थः ॥ २ ॥

वीरुधो लता गुल्मानि च तैः गह्वरेऽरण्ये [illegible] कठोरैर्दंशमशकादिभिरिव दारैः [illegible] यथा कश्चिद्वने उपद्रुतो भवति तथा [illegible] राजभटादिभिरुपद्रुतो भवतीत्यर्थः क्वचिद्गन्धर्वपुरवदस्थिरं मनुष्यशरीरं स्थिरवत् पश्यति गन्धर्वाणां हि पुरं न चिरं [illegible] तस्यापि नित्यत्वमविद्यमानमपि पश्यतीत्यर्थः क्वापि क्वापि आशुरयः अतिवेगो य उल्मुकाकारो ग्रहः तत्तुल्यं सुवर्णमुपादेयत्वेन प्रपश्यतीत्यर्थः असुरोल्मुकग्रहमित्यपि पाठो दृश्यते तत्र [illegible]उल्मुकपिशाचतुल्यं परकीयं सुवर्णमुपादेयत्वेन अपहरतीत्यर्थः यथा पिशाचगतोल्काज्वलनं प्रकाशार्थं जिघृक्षन् यथा पिशाचहतो भवति एवं दुर्जनसम्बन्धि सुवर्णस्य स्वोपकारकत्वबुद्ध्या जिघृक्षुः दुर्जनैरुपद्रुतो भवतीत्यर्थः ॥ ३ ॥

पिपासतोयद्रविणात्मबुद्धिः पिपासाविषयं तोयं पिपासतोयं पीपासतोयं मृगतृष्णिका पिपासाशब्दस्य "क्षुधायां संज्ञाछन्दसो"रित्यादौ ह्रस्वः पिपासाविषयतोयतुल्यं द्रविणं वित्तं तस्मिन्नात्मबुद्धिः स्वबुद्धिर्यस्य तथाभूतः क्वचिन्निवासतोयद्रविणात्मबुद्धिरिति पाठस्तत्र निवासादिष्वात्मभावो यस्याः सा बुद्धिर्यस्येत्यर्थः अटव्यामितस्ततो धावति भ्रमति भो राजन् ! वात्या चक्रवातः तत्तुल्या नारी वात्या वात्यया प्रमदया उत्थितो रागादिदोषः पांसुस्तेन धूम्रा आविला दिशः धर्ममर्यादाः रजस्वलाक्षः रजोव्याप्तेक्षणो यस्य सः रजोगुणोपहतज्ञानः सन् न जानाति यथा चक्रवातोत्थितधूलिव्याप्तनेत्रः प्राच्यादिदिग्विभागांश्च जानाति तद्वत्कर्ममार्गान् स न जानातीत्यर्थः ॥ ४ ॥

कश्चिददृश्यानां झिल्लीनां भृङ्गारकासंज्ञानां कीटविशेषाणां स्वनेन ध्वनिना कर्णयोः शूलं व्यथा यस्य सः परोक्षप्रियशात्रविपुवाक्यश्रवणजनितकर्णव्यथायुक्तो भवति यथाटव्यां प्रविष्टोऽदृश्यझिल्लीस्वनव्यथितकर्णो इत्यर्थः तथा उलूकानां प्रत्यक्षमप्रियभाषिणां घूकसदृशानां राजभटादीनां वाग्भिर्व्यथितान्तरात्मा मनो यस्य तथाभूतः क्वचिद्वने यथारण्ये उलूकवाग्भिर्व्यथितहृदयो भीतहृदयो भवति इत्यर्थः क्वचित क्षुधा ऽशनायया अर्दितः पीडितः अपुण्यवृक्षान् विषवृक्षसदृशान् अनुपकारकर्माप्रतिष्ठाध्यवसान् श्रयते आश्रयति क्वचिन्मरीचितोयानि मरीचिकाजलवत्सुखाभासान् विषयाननुधावति भोग्यबुद्ध्याऽभिधावति मरीचितोयं दृष्ट्वा विषयाननुधावतीत्यर्थः ॥ ५ ॥

क्वचिद्वितोयाः जलरहिताः सरितः नदीरभिधावति तथावितोयासु सरित्सु पतितस्य गात्रभङ्गात्मको दुःखं भवति तथा रक्षणाभः तद्वदिह परत्र च दुःखदान् निष्फलान् पाषण्डाश्रमानभियाति आश्रयते क्वचिदिन्नः परस्परं दायादेभ्योऽन्नादिकं लिप्सते वाञ्छति पुत्रः पितृधनमिच्छति पुत्रार्थमिच्छति पिता निरीक्षतेत्यर्थः क्वचिद्दावं दावाग्नितुल्यं गृहमभिमतविषयशून्यं दुःखदं प्राप्तः अनिष्टः सम्प्रतप्तः शोकातुरो भवति क्वचिद्यक्षैर्यक्षप्रतिहर्तुमशक्यैः राजभिर्हृतासुरपहृतप्राणतुल्यधनः निर्विद्यः खिद्यते ॥ ६ ॥

तथा शूरैः राजभटादिभिर्हृतं स्वं धनं यस्य सः क्वचित् दुःखितो भवति हे नृप ! कश्च शोचन् विमुह्यत्र कश्मलं मूर्छां याति क्वचिद्गन्धर्वपुरमिवास्थिरं वस्तुवर्गं प्रविष्टः निर्वृतवत्सुखितवत् मुहूर्तमात्रं मोदते ॥ ७ ॥

क्वचिदगेषु कल्कषु पर्वतवत्दुरारोहयागादिकलापं [illegible] [illegible] गृहमार्गाश्च [illegible] यथा पर्वतारोहणं न शक्नोति तथा कण्टकादितुल्यैर्विघ्नैरभिभूतः [illegible] [illegible] सन् विमना इवास्तेऽभ्यन्तरेण [illegible] [illegible] वह्निना जाठराग्निना [illegible] [illegible] प्रति कुप्यति यतोऽयं कौटुम्बिकः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मिन्नध्याये संसारविरक्तस्य हरौ सुदृढा भक्तिः स्यात्तया तदपरोक्षज्ञानं जायते तेन स्वयोग्या मुक्तिः स्यादित्यतः संसारस्य हेयत्वज्ञानेन तत्र विरक्तिस्तदर्थं तत्स्वरूपं निरूपयति। दुरत्यय इत्यादिना। दुरत्यये हरिकटाक्षमन्तरेणात्येतुमशक्ये अजया प्रकृत्या रजस्तमःसत्त्वगुणैः विभक्तानि यानि कर्माणि तानि पश्यति ममाहमित्यभिमन्यते इति रजस्तमःसत्त्वविभक्तकर्मदृक् सार्थः परिवज्जनः वणिक् मार्गप्रदर्शपरः स्वप्रयोजनाभिनिविष्टबुद्धिः भवाटवीं ब्रह्मादिस्तम्बपर्यन्तं संसारवनं याति तत्र शर्म स्वाभिप्रेतसुखं न लभत इत्यन्वयः ॥ १ ॥

स्वार्थालाभे निमित्तमाह । यस्यामिति । षट् दस्यवः श्रोत्रादिज्ञानेन्द्रियाणि मनश्चेति स्वार्थं पुण्यलक्षणं विलुम्पन्ति विषयोपभोगद्वारेणापहरन्ति कुत्सितः कामादिर्नायको यस्मिंस्तत् तथा अन्तःशत्रूनुक्त्वा बाह्यानाह । गोमायव इति । गोमायव इति लुप्तोपमा गृगालसदृशाः पुत्रकलत्रादयः सार्थकं संपद्युक्तं कलभाषणादिना मन आविश्य उरणमजाम ॥ २ ॥

वीरुधो महत्यो गुल्मान्यणूनि अङ्कुरादीनि समूहवीरुत्तृणागुल्मवत्परिपक्वकामबीजः श्रौतस्मार्तकर्मभिर्गह्वरे गृहस्थाश्रमे वर्तमानः कठोरमशकदंशकल्पैः राजभटतस्करादिभिरुपद्रुतो बाधितः अपहृतहिरण्यशाल्यादिकः क्वचित्संसारस्थाने गन्धर्वैः कर्मभिः निर्मितपुरं मनुष्याद्यन्यतमं शरीरं दृष्ट्वाऽऽविश्य च कर्म भुङ्क्ते इत्यर्थः अस्थिरत्वात्प्रसिद्धगन्धर्वपुरसाम्यमस्येति प्राणहरः उल्मुकग्रहः उल्मुकपिशाचः तत्सदृशशब्दादिविषयं पश्यतीति शेषः ॥ ३ ॥

निवासतोऽसवः यत् यस्मिन्द्रविणे आत्मबुद्धिर्यस्य स तथा ततस्ततस्तत्र तत्र धावति धावनमेवावशिष्यते न तु काचित्कार्यसिद्धिरित्यर्थः अत्र काचिच्छन्दः अनवस्थानवाचका इति। वात्योत्थितसुधूम्राः ममडलवायुसदृशस्त्रीनिमित्तरागादिलक्षणपांसु [illegible] दिशन्ति स्वाभिमतं प्रयच्छन्तीति दिशः सूर्यादिदेवताः [illegible] अविवेकविज्ञानः ॥ ४ ॥

अतिगहनवनवासिन्यो झिल्ल्यः कीटविशेषाः [illegible] एव दृश्यन्ते न स्वरूपं दृश्यत इत्यदृश्यानां झिल्लीनां [illegible] महाराजचोरादिनिष्ठुरशब्दैः पूरितकर्णमूलः उलूक[illegible] तर्जनैः व्यथितान्तरात्मा परिखिन्नहृदयः कद[illegible] विषयतृष्णया क्लिष्टः अपुण्यवृक्षान् कारस्करा[illegible] फलशून्यपापयुक्तान्मरीचितोयानि मरीच्य[illegible] र्वात् ॥ ५ ॥

धितोया अधरामृतशून्याः सरितः पुंश्चली[illegible] पते स्वीकरोति पितृधनं पुत्रो लभते पुत्रधनं [illegible] भ्रात्रादिजनोऽन्योऽन्यं शब्दं कुरुते धनविषय इति [illegible] समादिपरिकरशून्यः दुर्नाटीति दावं प्रयोजक[illegible] वनसमं गृहं शोकाग्निना संतप्तः यत्प्रहस्तप्रब[illegible] [illegible] हृताद्युः अपहृतबहिः प्राणाख्यहिरण्यः तदुक्तं [illegible] हि मनुष्यस्य प्राणा एते बहिश्चरा,, इति ॥ ६ ॥

क्व च संसारे परस्पर[illegible] [illegible] निभिः हृतस्वः अपहृतद्रव्यः तेन विरक्तबुद्धि[illegible] मनाः शोकमोहाभ्यां कश्मलं कष्टावस्थां याति क्वापि कर्मविशेषात् गन्धर्वपुरं स्वर्गादिलक्षणलोकमाप्तो यावत्प्रारब्धसमाप्ति सुखमनुभवति पतनपर्यायवृत्तत्वादित्युक्तमाकस्मिकपितृपितामहादिसंयोगं वा ॥ ७ ॥

कण्टकशर्कराङ्घ्रिः कण्टकादिसन्नपाद इवाशक्यगन्तव्यकर्ममार्गः कण्टकादियुक्तमार्गगतिशील इव दुःसहकर्ममार्गो वा अङ्घ्रिरत्र गत्यर्थः क्वचिन्नगवत् दुर्गं निवृत्तिमार्गमारोढुमशक्तः सन् नष्टमना इव तिष्ठति अत्युच्छ्रितारोहाशक्यपर्वतसदृशवेदविहितानेककर्मसंपादनेच्छुस्तदशक्त इव वा अभ्यन्तरवह्निना जाठराग्निना ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

करिष्यन्ति नानुपहरकाम् यदाभियुङ्क्ते इति शेषः तेषामाभिमुख्येन युद्धोद्यमं करोतीत्यर्थः ॥ १—१३ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

[illegible]दृशो भवाटव्याः पारं प्रापयितुं नृपम् ।

[illegible]तां वर्णयित्वा वैराग्यहृदमारोहयन्मुनिः ॥

[illegible]: पारमित्युक्तं स भवाध्वा अध्वनीनश्च कीदृश इत्य[illegible]ह । दुरत्यये दुस्तरे अध्वनि प्रवृत्तिमार्गे अजया [illegible] रजस्तमःसत्त्वैर्विभक्तान्येव कर्माणि कार्यतया [illegible]ति स तथा एषः प्रासङ्गः सार्थः "सार्थो वणिक [illegible] स्यात्"इति मेदिनी । स इव अर्थपर एव जीवलोक [illegible] एतदादीनां व्याख्या उत्तराध्याय एवास्ति तदपि [illegible]ध्याये किञ्चिद्व्याख्यायते ॥ १ ॥

इमे [illegible]यनामानः कुत्सितो नायकः सारथिर्बुद्धिर्यस्य तं [illegible] भगवत्सेवार्थविनियुक्तमपि धनं स्वस्वविषय[illegible] मुष्णन्तीत्यर्थः गोमायवः शृगालतुल्या दारापत्या[illegible]: त्वं मे भर्ता पितेत्येवं सार्थिकं सार्थमध्यमधनमाविश्य[illegible] प्रमत्तं परमार्थदृष्टिविमुखमाविश्य तस्य गृह इवान्तः[illegible]ऽपि प्रविश्येत्यर्थः उरणं मेषम् ॥ २ ॥

प्रभूतवीरुधादिसदृशैः कामकर्मादिभिर्गह्वरे गृहाश्रमे दंशमशकतुल्यैर्दुर्जनैः गन्धर्वपुरवद्घटमानं देहगेहादिकम् प्रकर्षेण सत्यं स्थिरमेवेदमिति पश्यति क्वापि क्वापि आशुरयः अतिवेगो य उल्मुकाकारो ग्रहः पिशाचः तं तत्तुल्यं सुवर्णमुपादेयत्वेन पश्यति ॥ ३ ॥

निवासादिषु आत्मनो ममैवेदमिति बुद्धिर्यस्य तथाभूतः सन् ततस्ततस्तत्र तत्र धावतीत्युभयत्र पक्षे तावानेवार्थः वात्या चक्रवातरूपा या स्त्री तदुत्थितैः पांसुभिः कन्दर्पवेगैर्धूम्रा आच्छन्नीकृता दिशः दिग्देवताः कर्मसाक्षिभूता न जानाति रजस्वलाक्षः कामान्धः ॥ ४ ॥

अदृश्यानां झिल्लीनां भृङ्गारिकाख्यकीटविशेषाणामिव परोक्षमप्रियवक्तॄणां खलैः कटुभाषणैः कर्णयोः शूलं व्यथा यस्य सः उलूकानामिव प्रत्यक्षमप्रियवक्तॄणां वाग्भिः कटुभाषितैर्व्यथितमनाः येषां छायापि पापहेतुस्तान् अपुण्य-

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

कुत्रापि च अधार्मिकलोकान् भिक्षार्थं सेवते मरीचितोयतुल्यान् प्रदातृलोकानपि कांश्चिद्भिक्षार्थं गच्छति ॥ ५ ॥

विनोयासु सरित्सु पतितस्य गात्रभङ्गात् सद्यो दुःखं भवति न चोदकलाभस्तद्वदिह च परत्र च दुःखदान् पाखण्डानभियाति आश्रयते अभिजल्पति निरम्भ इति निरम्भोऽपि पाठद्वयमुभयत्र पक्षे साम्यं दावं दावाग्नितुल्यं दुःखदं गृहं प्राप्य शोकाग्निना तप्तो निर्विद्यते विषीदति । यक्षराक्षसतुल्यैः राजभिर्हृतम् असुवत् प्रेष्ठं धनं यस्य सः धिङ्मां धनरहितमिति निर्विद्यः। कदाचित् अन्यैः शूरैः संग्रामे विजयिभिश्च हृतधनः ॥ ६ ॥

गन्धर्वपुरमिव मनोरथोपलब्धं पुत्रकलत्रधनैश्वर्यं प्राप्तः प्राप्नुवन् ॥ ७ ॥

नगान् रुरुक्षुः नगं महापर्वतमिव कन्यापुत्रोद्वाहादिशः आरुरुक्षुः प्राप्तुमिच्छुर्विमनाः कथमेतत् पारं प्राप्स्यामीति विषण्णास्ते । यतः पादुकाद्यभावात् कण्टकादिविद्धाङ्घ्रिः पक्षे सहायाद्यभावात् विघ्नाभिभूतः अभ्यन्तरेण वह्निना जाठरेण ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अध्वनोऽनतिपारं हरिं यातीत्युक्तं तत्र हरिस्तु प्रागेव विवृतोऽथाध्वानं प्रसिद्धदुर्गमार्गरूपकेण वैराग्याय प्रपञ्चयति। दुरत्यय इति त्रयोदशेनाध्यायेन । दुरतिक्रमे अध्वनि प्रवृत्तिमार्गे अजया जीवमोहिन्या प्रकृत्या निवेशितः रजआदिभिर्विभक्तानि कर्माणि कार्यतया पश्यतीति तथा स एव प्रसिद्धो जीवसमूहः अर्थपरः त्रिवर्गासक्तः भवाटवीं याति शर्म सुखं च न विन्दति न लभते यथा वणिक् सार्थोऽर्थोपार्जनाय गच्छन् अटवीं याति सुखं च न विन्दति तद्वत् अयमध्याय उत्तराध्यायेन व्याख्यातस्तथापि सुखबोधाय किञ्चिद्व्याख्यायते ॥ १ ॥

इमे पञ्च ज्ञानेन्द्रियाणि मनश्च षट् कुत्सितो नायकः बुद्धिर्येषां तथाभूता मार्गे विलुम्पन्ति यस्य परमपुरुषाराधनलक्षणधर्मरूपं धनमुपभोगेन मुष्णन्ति गोमायवः तत्तुल्याः कौटुम्बिकाः सार्थिकं मार्गे स्थितं हरन्ति धर्ममार्गादपकर्षन्ति वृका उरणं मेषम् यथा आकर्षन्ति ॥ २ ॥

वीरुधो लताश्च तृणानि च गुल्मानि लतादिजालानि च प्रभूतैरेतैर्गह्वरे दुष्प्रवेशे कठोरदंशमशकैश्च यथा कश्चिदुपद्रुतो भवति तथा प्रदग्धवीजत्वेनत्यक्तकर्मक्षेत्रे गृहाश्रमे वर्त्तमानः दंशमशकसदृशैः मनुजापसदैरुपद्रुतोऽपि क्वचित्तु गन्धर्वपुरवदल्पकालस्थायि देहादिकं नित्यमिव प्रपश्यति क्वचिच्च आशुगयः अतिवेगः उल्मुकग्रहः उल्मुकसदृशः पिशाचः तत्सदृशं सुवर्णमुपादेयतया प्रपश्यति ॥ ३ ॥

निवासादिप्रलोभेन समाविष्टा यस्या सा बुद्धिर्यस्य सः वात्यायां चक्रवातेन उत्थितेन पांशुना धूम्रा दिशः रजस्वलं रजसा व्याप्तं अक्षिणी यस्य स न जानाति यथा तथा वात्यातुल्यायां प्रमदायामुद्धतेन रागादिना प्रकाशमाना दिशो यतः कर्मसाक्षिभूताः दिग्जाता देवता न जानाति रजोगुणावृतदृष्टिः ॥ ४ ॥

अदृश्यझिल्लीनिभाः परोक्षाप्रियवादिनस्तत्स्वनेन कर्णयोः शूलं पीडा यस्य उलूकनिभाः प्रत्यक्षाप्रियभाषितारः तत्तान्निभर्त्सयितोऽन्तरात्मा यस्य अपुण्यवृक्षनिभाः अधार्मिकास्तान् सेवते मरीचितोयवन्निष्फलतयावगतानपि विषयाभासान् अभिधावत्यन्वेषयति ॥ ५ ॥

वितोयसरिद्वन्मृषा क्लेशदान् पाषण्डानभियाति प्रयाति निरन्धो निषः परस्परमन्योऽन्यतः अन्नादिकमालपते वाञ्छति दावजालानिलनिभं गृहमासाद्याभिप्राय अग्नितप्तः अग्निवद्दुःसहशोकसंतप्तः निर्विद्यते विषीदति यद्वयक्षवद्दुर्निवार्यैः राजभिस्सुवद्दुस्त्यजं धनं यस्य सः निर्विद्यते ॥ ६ ॥

अन्यैश्च शूरैः राजभटादिभिः गन्धर्वपुरवदस्थिरं पितृपुत्रादिसमाजम् ॥ ७ ॥

कण्टकादितुल्यैर्विघ्नैः शिथिलक्रियः सन् नगवद्दुर्लङ्घ्यं महाकार्यं विभित्सुः पदे पदे प्रतिक्षणम् ॥ ८ ॥

भाषाटीका ।

आह्मण बोले रजोगुण सत्त्वगुण तमोगुण में दृष्टि रखनेवाला पुरुष अर्थों का अभिलाषी होकर स्वार्थी बनिया के समूह सरीका जन समुदाय भगवान् की माया से प्रवृत्तिरूप मार्गमें निवेशित हुआ है देवादियोनियों में घूमते २ भवाटवी को प्राप्त होता है सुख नहीं पाता है ॥ १ ॥

हे नरदेव ! जिस भवाटवी में ये छः इन्द्रियनाम के चोर हैं बुद्धिरूप खोटा जिनका नायक है तिस समूह को जबरदस्ती लूटते हैं जिस वन में पैठकर प्रमादी पुरुष को कुटुम्बी सब स्याल सरी के चारों ओर खेंचते हैं जैसे बकरी को भेड़िये खेंचते हैं ॥ २ ॥

बहुत से गुल्म लता तृणों (कर्मादिकों) से अति कठिन डांश मच्छरों (दुर्जनों) से उपद्रवयुक्त होता है कहींपर गंधर्व नगर (अलभ्य मनोरथों) को देखता है कहींपर बड़े वेगवाले अगिया बेताल (सुवर्ण) को देखता है ॥ ३ ॥

हे राजन् ! वासस्थान जल धन देह इन में लगी है बुद्धि जिस की ऐसा पुरुष वन में इधर उधर दौड़ता है कहींपर आंधी के उड़ने से धूल भरी नेत्रों (कामादि दृष्टि) से दिशों को भूल जाता है ॥ ४ ॥

कहींपर अदृश्यझिंगारी (खोटे वचन कहनेवाले मनुष्यों) के शब्द को सुनकर दुःखपाता है कहींपर घुग्घू [राजपुरुषों] के शब्द से दुःखित होता है कहींपर भूख के मारे बिना छाया के पेडों (पापी पुरुषों) का आश्रय करता है कभी मृगतृष्णा [निष्फल विषयों] पर दौड़ता है ॥ ५ ॥

कहींपर बिनाजल की नदी [पाखण्डमार्गों] का आश्रय करता है और अन्न नमिलने से परस्पर में चाहना करता है कभी दावाग्नि महादि प्राप्तहोकर नहीं गर्मी [शोकाग्नि] के मारे व्याकुल होता है कभी यक्ष [राजपुरुष] धन हरलेते हैं ॥ ६ ॥

कभी प्रबल लोग धन हरलेते हैं तब दुःखित होजाता है शोचकर के मोहित होकर मूर्छा को प्राप्त होता है कभी गन्धर्वपुर [मनोरथ] में प्रविष्ट होता है मूर्च्छित सरीका मुहूर्तभर आनन्दित होता है ॥ ७ ॥

क्वचिन्निगीर्णोऽजगराहिना [illegible] े किञ्चिद्विपिनेऽपविद्धः ।
दष्टः स्म शेते क्व च दन्दशू[illegible] े पतितस्तमिस्रे ॥ ९ ॥
कर्हि स्म चित्क्षुद्ररसान्वि[illegible]क्षिकाभिर्व्यथितो विमानः ।
तत्रातिकृच्छ्रात्प्रतिलब्धमा[illegible] लाद्विलुम्पन्त्यथ तं ततोऽन्ये ॥ १० ॥
क्वचिच्च शीतातपवातवर्षप्रति[illegible] कर्तुमनीश आस्ते ।
क्वचिन्मिथो विपणन्यच्च किञ्चि[illegible]कृच्छ्रत्युत वित्तशाठ्यात् ॥ ११ ॥
क्वचित्क्वचित्क्षीणधनस्तु [illegible] शय्यासनस्थानविहारहीनः ।
याचन्परादप्रतिलब्धकामः पारक्य[illegible]लभतेऽवमानम् ॥ १२ ॥
(१)अन्योऽन्यवित्तव्यति[illegible]वैरानुबन्धो विवहन्मिथश्च ।
अध्वन्यमुष्मिन्नुरुकृच्छ्[illegible]विहरन्विपन्नः ॥ १३ ॥
तांस्तान्विपन्नान्स हि [illegible] जातं परिगृह्य सार्थः ।
आवर्ततेऽद्यापि न कश्चि[illegible] वीराध्व पारमुपैति योगम् ॥ १४ ॥
मनस्विनो निर्जितदिग्गजेन्द्रा ममेति सर्वे भुवि बद्धवैराः ।
मृधे शयीरन्न तु तद्व्रजन्ति [illegible]दण्डो गतवैरोऽभियाति ॥ १५ ॥
प्रसज्जति क्वापि लताभुजा[illegible]याव्यक्तपदद्विजस्पृहः ।
क्वचित्कदाचिद्धरिचक्रतस्[illegible] विधत्ते बककङ्कगृध्रैः ॥ १६ ॥

भाषाटीका

कभी पर्वतोंपर चढने [शास्त्रोक्त कर्मों को कर[illegible]] [illegible] ताहै तब कांटे कंकडों (विघ्नों) के मारे दुःखित [illegible] कभी कभी जठराग्नि से पीडित होने से कुटुम्ब वाल[illegible] से अपने पुत्रादिकोंपर क्रोध करता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अजगराहिना निद्रारूपेण गिलितो न [illegible] [illegible]कः शव इव दन्दशूकैर्हिंस्रैर्दुर्जनैर्द[illegible] [illegible] कोऽन्धकूपे मोहे पतितस्तमिस्रे दुःखे शेते [illegible]

क्षुद्ररसान्मरणोपादीनि [illegible]चिन्वन्नवेषयं[illegible] [illegible]स्वामिभिर्विमानोऽवज्ञातस्ताडितः सन्व्य[illegible] [illegible]चित्तत्रातिक्लेशेन प्रतिलब्धमानः प्राप्त[illegible] [illegible]दन्येऽपहरन्ति तान्यदाऽभियुङ्क्ते तदा [illegible] ॥ १० ॥

यत्किञ्चिदल्पमपि मिथो [illegible] वित्तशाठ्याज्जनयञ्जनात् ॥ ११ ॥

शय्याविहीनः । आस्यतेऽ[illegible]ादि । स्थीयतेऽत्रेति स्थानं गृहम् । विहरन्त्य[illegible] यानादि । याचमानोऽपि यदा परस्मादप्र[illegible]ये वस्तुनि दृढ[illegible]भिलाषो यस्य सोऽवमा[illegible]

[illegible]वमन्योऽन्यं वित्तव्यतिषङ्गेण धनविनिमयेन विवृद्धो वैरानु[illegible] यस्य तथाविधोऽपि परस्परं विवहन्विवाहैर्विसम्बन्धं [illegible]गुरुभिः कृच्छ्रैः श्रमैर्वित्तबाधैरुपसर्गैश्च क्लेशादिभिर्विपन्नो [illegible]तप्रायो भवति ॥ १३ ॥

दुरत्ययत्वमध्वनो दर्शयति । तांस्तान्विपन्नान्मृतान्विहाय [illegible] जातं परिगृह्य विहरन्यतः प्रस्थितस्तं प्रति नावर्तते [illegible] ! अध्वनः पारं यो योगस्तं च नोपैति । अत्र सार्थे कश्चि[illegible]समर्थोऽपि ॥ १४ ॥

[illegible]वेवाह । मनस्विनः शूराः निर्जिता दिग्गजेन्द्रा यैः ममेयं [illegible]मिति भुवि निमित्तभूतायां बद्धं वैरं यैः न्यस्तदण्डः [illegible]न्यासी यद्विष्णोः पदमभियाति तत्तु न व्रजन्ति ॥ १५ ॥

सिंहावलोकनेन पुनर्भवाटवीमेवानुवर्णयति । प्रसज्जत्यासक्तिं करोति । कीदृशः । लतानां भुजाः शाखास्तद्वत्सुकुमारा ये स्त्रीणां भुजास्तदाश्रयः सन् । तदाश्रया अव्यक्तपदा अस्फुटा[illegible]राः कलभाषिणो ये द्विजाः पक्षिणस्तत्तुल्येषु स्त्रीसङ्गप्रसक्तेष्वपत्येषु स्पृहा यस्य तादृशो भूत्वा हरिचक्रं सिंहसमूहस्तत्तुल्यात्कालचक्रनिमित्ताज्जन्ममरणादेस्त्रस्तस्तत्परिहाराय कश्चित्प्रलोभितो बकादितुल्यकैः क्षुद्रैः क्रूरैश्च पाखण्डैः सह सख्यं करोति तेषु प्रविशति ॥ १६ ॥

(१) इतःपरं श्लोकत्र[illegible]र्थमते सटीकमष्टादशश्लोकानन्तरं विद्यते तथैवात्रापि टीका स्थापितास्ति अत्र तु प्रसज्जती-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

९ कश्चिदयं जनः अजगराहिना अजगराख्यसर्पेण [illegible] निगीर्णो ग्रस्तः किञ्चिदपि न वेत्ति यथा विपिनेऽरण्ये विसृष्टस्त्यक्तः शव इव क च दन्दशूकैः सर्पतुल्यैर्हिंस्रैर्दुर्जनैर्दष्टः पीडितोऽन्धो लुप्तविवेकः अन्धकूपे मोहे शरीरदुःखे वा पतितः तमिस्रे दुःखादिभिर्व्याप्ते ॥ ९ ॥

कर्हिचित् क्षुद्ररसान् विचिन्वन् तन्मक्षिकाभिः रसार्थाभिः स्वामिभिर्व्यथितः ताडितः विमानोऽवज्ञातो भवति यदि कथञ्चित् अतिक्लेशेन प्रतिलभ्यमानः प्राप्तपरदारादिर्भवति तदा तं वञ्चयित्वा बलादन्ये तान् क्षुद्ररसानपहरन्ति एवं तेभ्योऽन्येऽप्यपहरन्तीत्यर्थः ॥ १० ॥

कश्चिच्च शीतादीनां प्रतिक्रियां कर्तुं शीतादिनिहारकवस्त्रगृहादिकं संपादयितुमसमर्थस्तैर्दुःखित आस्ते कश्चिदथः यत्किञ्चिदत्यल्पमपि विपणान् क्रयविक्रयादिभिर्व्यवहारैर्धिया उपकुर्वन्नित्यर्थः वित्तशाठ्याज्जनवाञ्छया विद्वेषं प्राप्नोति ॥११॥

तस्मिन् संसाराध्वनि क्वचित् क्षीणं धनं यस्य सः [illegible] एव शब्दादिभिर्विहीनः रहितः भवति शेतेऽस्यामिति शय्या [illegible]दि आस्यतेऽस्मिन्नित्यासनं कम्बलादि स्थीयतेऽस्मिन्निति स्थानं [illegible]दि विहरन्त्यनेनेति विहारो यानादिः याचमानो यदा परस्मादप्राप्तधनः तदा परकीये वस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानमप्यां लभते ॥ १२ ॥

एवमन्योऽन्यं वित्तव्यतिषङ्गेण वित्तव्यत्यासेन वृद्धः वैरानुबन्धो यस्य सः मिथः विवादं कुर्वन् विवहन्निमध्येत्यपि पाठः तदाभावालब्धवित्तनियमव्यत्यासेन विवृद्धवैरानुबन्धः वैराविष्टचित्तः परस्परं विवाहं कुर्वन्नमुष्मिन् दुरत्ययेऽध्वनि उरुभिः कृच्छ्रैः श्रमैः वित्तनाशैरुपसर्गैश्च क्षुधादिभिर्विपन्नमृतप्रायो भवति ॥ १३ ॥

दुरत्ययत्वमध्वनो दर्शयति । तांस्तान् विपन्नान् मृतान् पित्रादीन् तत्र विहाय जातं सार्थं पुत्रादिकं परिगृह्यान्यत्रावर्तते भ्राम्यति हे वीर ! अध्वनः पारं योगं कश्चिदपि नोपैति अत्र [illegible] कश्चिदतिसमर्थोऽपि ॥ १४ ॥

तदेवाह । मनस्विनः शूरा निर्जिताः दिग्गजेन्द्रा यैस्ते ममेयं भूमिर्ममेयं भूमिरित्यभिमाननिमित्तभूतायां भुवि बद्धं वैरं यैस्ते मृधे युद्धे केवलं शरीरात्प्राणांस्त्यक्तवन्तः न तु तद्व्रजन्ति प्राप्नुवन्ति किं तत् यत्र व्रजन्ति मनस्विनस्तत्राह । न्यस्तदण्डस्त्यक्तभूतदण्डः त्यक्तभूतवैरश्च योगी यद्विष्णोः पदं याति तत्र व्रजन्तीत्यर्थः ॥ १५ ॥

सिंहावलोकनन्यायेन पुनर्भवाटवीमेवानुवर्णयति । प्रसज्जतीति । प्रसज्जत्यासक्तिं करोति कीदृशः लतानां भुजाः शाखाः ताना(?)श्रितः बालातुल्यकामिनीभुजाप्रधान इत्यर्थः तदाश्रयाः कामिनीजनाश्रया येऽव्यक्तपदाः स्वानभिव्यक्तवर्णमधुरवचोभाषिणो द्विजाः पक्षिसदृशाः शिशवः बालाः तेषु स्पृहा यस्य सः तादृशो भूत्वा प्रसज्जतीत्यर्थः कचित् हरिचक्रं सिंहसमूहस्तत्तुल्याद्धरिचक्राद्भगवत्सम्बन्धिनः कालचक्रात् त्रसन् बिभ्यत् कालचक्रनिमित्तजन्मजरामरणादेस्त्रसन् तत्परिहाराय कैश्चित्प्रलोभितः बकादितुल्यैः पाखण्डदैवतैः सह सख्यं विधत्ते तेषु भक्तिं करोतीत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अजगराहिना "अजगरः शयुः" इत्यभिधानान्निद्राशीलो महासर्पः सन्निद्रया कालसत्त्वेन वा पिबतेर्गतिकर्मणोऽर्थ्युपपदाया विपरीतार्थाया: श्रा (१) नोपरतिलक्षणारात्रिरित्यर्थः तत्रापविद्धः तिरश्चीनागतशरविद्ध इव दुःखितो दन्दशूकैः पुनः पुनरुपद्रवशीलैरसज्जनैर्दष्टोऽविविक्तमोऽन्धो विवेकशून्योऽन्धकूपसमानयोनिविशेषे तमिस्रे नरकवत् दुःखरूपे ॥ ९ ॥

परवनितासङ्गेन क्षुद्ररसानल्पानन्दान् विचिन्वन्नन्वेषयन् कुर्वंस्तन्मक्षिकाभिस्तासां वनितानां समानशीलैरन्योऽन्यवनितालोलैः स्वामिभिर्व्यथितस्ताडितो विमानो विगताभिमानस्तत्रापि परस्त्रीविषयेऽपि कृच्छ्रात्स्वामिवञ्चनायासेन प्रतिलब्धं स्त्रीधनादि अन्ये राजानो बलात् विलुम्पन्ति अपहरन्ति अथ ततः तेभ्यः अन्ये उपपतयस्तं स्त्रीजनमपहरन्तीत्येवमनवस्था विषयसुखस्य सुखं रान्तीति सुखाः अल्पत्वेनेति शेषः तान् क्षुद्ररसानन्नलक्षणान् विचिन्वंस्तन्मक्षिकाभिस्तदन्नदातृभिरन्नदानेन दुःखितो विमानोऽनाश्रयो भवति तत्र कश्चित्कालान्तरं अत्यायासेन प्रतिनिधिना स्वानुयुक्तकर्मकरणलक्षणेन लब्धं निष्पन्नमन्येऽन्नकाङ्क्षिणो याचका विद्याबलादपहरन्ति तेभ्यो याचकेभ्योऽन्ये ततोऽप्यधिकविद्याबलेन महामार्गे क्लृप्तं विप्रभोजनमपहृत्य भुञ्जत इति धर्मभोजनस्याप्यसिद्धिः अथ शब्दः आश्चर्यार्थे इति वा ॥ १० ॥

प्रतिक्रियां परिहारं प्रावरणाद्यभावेनेति शेषः विपणान् क्रयविक्रयलक्षणं व्यवहारं कुर्वन् यत्किञ्चिदपि विक्रेयं रसलवणादिकमपि अनृतानि प्राप्नोति ॥ ११ ॥

तस्मिन् व्यवहारे क्षीणधनः नष्टभोग्यः याचमानो दरिद्रः परं प्रार्थयते तदा परादन्यस्मादप्रतिलब्धकामः प्रतिग्रहादिधर्मेणाप्राप्तधनः परकीयदृष्टिः परकीयद्रव्यस्वीकारेच्छुर्भवति [illegible] अवमानं बन्धनताडनादिकम् ॥ १२ ॥

(२)लतावत्कोमलभुजाश्रयः अव्यक्तपदमव्यक्तस्य प्रकृतिसंज्ञस्य जनस्य पदं स्थानं प्रसज्जति प्रकर्षेण सक्तो भवति द्विजस्य कुले जातोऽपीति शेषः तदाश्रय इति हेतुगर्भं विशेषणं स्त्रीजनाश्रयत्वादिति ।

प्रभवति मनसि विवेको विदुषामपि शास्त्रसम्भवस्तावत् ।
निपतन्ति हरिणीदृशां यावन्नेन्दीवराक्षाणाम् ॥

इति प्रसिद्धेः इत्यनेनाह । हरिचक्रतः कालचक्रात् त्रसन् बिभ्यत् बकभक्षणे "कक लौल्ये" "गृधु अभिकाङ्क्षायां" बकवद्भिक्षुवद्भिक्षणशीलविप्रैरवश्यविषयैर्धृतत्वेन कङ्कवत्पशुमनोविषयसत्यभाषितया अधरामृताकाङ्क्षानस्त्रकारिरूपतया च सेवाख्या उपयोगम् ॥ ० ॥

वञ्चितो [illegible] धर्माद्यफलाभावादिति शेषः हंसकुलं

---

(१) [illegible]स्यार्थोयम् ।

(२) लताभुजः लतानां शाखाः तदाश्रयः । द्विजस्य पक्षिणस्त्वस्य यत् मध्य [illegible]माषितं । तदाश्रयः तत्रग्रामकश्चित्तः । प्रसज्जतिप्रकर्षेण [illegible]तीतिवर्णकरूपस्तु योज्यम् । [illegible] तु लतावत्कोमला [illegible] भुजौ तदाश्रयः [illegible] । द्विजस्य लताश्रितपक्षितुल्य[illegible]श्रितापत्यादेः यदव्यक्तं पदं कलभाषितं तदाश्रयः प्रकर्ष[illegible] ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आश्रमाकुलं संन्यासाश्रमं वा हंसानां शीजमुपनयनादि[illegible] श्रिपवयाश्वानभिक्षावृत्त्यादिकं वा न रोचयन् पथ्यं [illegible] मन्वानो वानरः वानेन हिंसया रमत इति शूद्र[illegible] हिंसालक्षणं वानेन रमत इति गमनागमनलक्षणं सेवां [illegible] शूद्रवत्सेवावृत्तिमुपजीव्य वर्तत इत्यर्थः तज्जातिरासेन शूद्रजाति[illegible] क्रीडारसेन सृष्टु निर्वृतानि प्रीतानीन्द्रियाणि यस्य स तथा परस्परास्त्रीक्षणाविस्मृतावधिः स्त्रीपुरुषयोरन्योऽन्यमुखनिरीक्ष-णेन विस्मृतोऽवहितकालमर्यादः ॥ ० ॥

ऐहिकफलभोगयोग्यलक्षणेषु गृहेषु रंस्यन् रतिं कुर्वन् सुन्दरीषु स्त्रिषु व्यवायेन मैथुनक्रियया दीनः शोच्यां दशामापन्नोऽत एव विवशो वने संसाराख्ये चरन् भवति ततः कदाचित् प्रमादाद्भगवन्महत्त्वापरिज्ञानाद्दारिद्र्यकन्दरवद्दुःखकूपनरके पतन्यत्रौ जन्मान्तरोपार्जितपुण्यकर्मलक्षणां पाशमवलम्ब्य गजभीतो भयङ्करमृत्युभीतोऽपि ॥ ० ॥

ततः आपदः कथञ्चिन्मुक्तो भूत्वा श्रद्धानः सार्थं मयूरा-चारोपेतवर्णाश्रमं स्थानं प्रविशति संसाराध्वनि प्रवेशस्य प्रधा-नकारणमिदमेवेत्याह । अध्वनीति ॥ ० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विपन्नः कश्चिन्मृतो भवति ॥ १४—२२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अजगराहिना निद्रारूपेण ग्रस्तावस्थः बन्धुभि[illegible] दन्दशूकैरिव दुर्जनैः पीडितः अन्धो विवेकहीनः । [illegible] मोहे तमिस्रे तमोवृते पतत् दुःखमये ॥ ९ ॥

क्षुद्रस्मान् परदारान् तन्मक्षिकाभिस्तद्भर्तृभिः[illegible] मानो विगतमानः कृतो व्यथितो भवति । यदि क[illegible] कृशेन धनव्ययादिना प्रतिलब्धमानः प्राप्तपरदार[illegible] तान् दारान् अन्ये विलुम्पन्ति ततोऽप्यधिकाधि[illegible] पात्यवम ॥ १० ॥

मिथो विपणान् विपणायन् क्रयविक्रयादिना [illegible] शाठ्यात् धनवञ्चनात् विद्वेषं प्राप्नोति ॥ ११ ॥

परात् परस्मात् याच्यमानादपि अप्राप्तधनो [illegible] परकीये वस्तुनि दृष्टिरभिलाषो यस्य सोऽवमानं प्रा[illegible]

एवमन्योऽन्यवित्तस्य व्यतिषङ्गेण [illegible] जितश्रद्धो विरुद्धो वैरानुबन्धो यस्य [illegible] निवहन् विवाहादिसम्बन्धं कुर्वन् [illegible] उरुभिः कृच्छ्रैर्वित्तक्षयोपसर्गैः [illegible] भवति ॥ १३ ॥

विपन्नान् मृतान् विहाय [illegible] चलन्नद्यापि [illegible] नानतो यतश्रान्तस्तस्य परं [illegible] तत्प्राप्तिसाधन-योगमुत्तमं भक्तिज्ञानादिकं [illegible] न उपैति अत्र साधनं मध्ये कश्चिदपि ॥ [illegible]

[illegible]वाह मनस्विनः शूरा निर्जितेत्यनिवृत्तवर्त्तिनो दिग्गजे-[illegible] निर्जयन्तिस्म न्यस्तातिनिकटवर्तिन एकादशेन्द्रियभटा[illegible] इति व्यवहार एव तेषां शौर्यं नतु परमार्थं इति भावः [illegible]ममेत्यादिपरमार्थतः शूरमाह । न्यस्तेति । गतवैरत्वेन न्यस्त-[illegible]वमेव शौर्यमिति भावः ॥ १५ ॥

सिंहावलोकेन पुनर्भवाटवीमेवानुवर्णयति । प्रसजतीति । [illegible]तां स्त्रीणां भुजान् स्पर्शसुखानाश्रयत इति सः तदाश्रयेषु [illegible]ष्वपि सुमत्त्वादव्यक्तपदेषु द्विजेषु पक्षिषु स्पृहा दिदृक्षा [illegible] सः । पक्षे भार्यात्मजवर्त्तिनि अस्फुटाक्षरभाषिणि द्वाभ्यां [illegible]ताभ्यां जातत्वात् द्विजे बालके दर्शनस्पर्शनादिस्पृहा यस्य [illegible] भूत्वा कदाचित् काले क्वापि देशे स्वयमेव वा कथमरे [illegible] तरिष्यसीति दैवात् पाखण्डानां वाक्येन वा हरिभक्तः [illegible]सिंहातुल्यात् कालचक्रात् त्रसन् त्रस्यन् तत्परिहाराय तेरेव, त्वगडैरेवं सुखेन तरिष्यसीति प्रशंसितो बकादिवद्वञ्चकैः [illegible]गिभिः क्रूरैस्तैरेव पाखण्डिभिः सह सख्यं करोति ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अजगराहितुल्यया निद्रया ग्रस्तः विपिने अपविद्धस्त्यक्त-[illegible] इव दन्दशूकैः सर्पसदृशैः हिंस्रैर्जनैः दष्टः मर्मसु वाक्-[illegible]स्ताडितः अन्धो नष्टविवेकः अन्धकूपे मोहे पतितः तमिस्रे [illegible]गर्ते शेते लीयते ॥ ९ ॥

क्षुद्रस्मान् तत्तुल्यान् परदारादीन् तन्मक्षिकाभिस्तत्स्वामिभिः [illegible] यथा भवति तथा प्रतिलब्धमानः प्राप्तपरदारादिभि-[illegible] तदा बलाद्विलुम्पन्ति तान्विलुम्पकान् अन्ये विलुम्पन्ति ॥१०॥

विपणान् व्यवहरन् ॥ ११ ॥

तस्मिन् भवाध्वनि शेतेऽस्यामिति शय्या आस्यतेऽस्मिन्नि-[illegible]त्यासनम् विहरत्यनेनेति विहारः यानादिः परात् याचन् याच-[illegible]नः अप्रतिलब्धकामः यदा भवति तदा पारक्ये परकीये [illegible]श्याद्ौ दृष्टिग्रहणे मतिर्यस्य स अवमानमत्रा प्राप्नोति ॥ १२॥

इत्थं परस्परं धनस्य व्यतिषङ्गेन विनिमयेन विवृद्धो [illegible]नुबन्धो यस्य स तादृशोऽपि व्यवहरन् नानाव्यवहारान् [illegible]न् अस्मिन् अध्वनि उरुकृच्छ्रैः नानाक्लेशैः वित्तबाधैर्धन-[illegible]शोरुपसर्गैर्दुःखादिभिश्च विपन्नो नष्टप्रायो भवति ॥ १३ ॥

हे वीर ! विपन्नात्मजान् पित्रादीन् विहाय जातान् पुत्रा-[illegible]दीन् आदाय अद्यापि अत्रैव भवाध्वनि परिवर्त्तते भ्रमति [illegible]योगं ज्ञानभक्तिलक्षणं साधनम् अध्वनः पारं हरिं च कश्चि-दपि प्रवृत्तिनिष्ठः नोपैतीत्यन्वयः ॥ १४ ॥

हरिं त्रैवर्गिका नैव यान्तीति वदन् तच्छरणा मुमुक्षवो यान्ती-त्याह । मनस्विन इति । मनस्विनस्त्रिवर्गेऽर्पितचित्ताः भुवि शयी-रन् प्राणांस्त्यक्ष्यन्तः तत्र ये च ममेति बद्धवैराः निर्जितदि-ग्गजेन्द्रा राजानः मृधे शयीरन् ते सर्वेऽपि तदध्वनः पारं हरिं न व्रजन्ति यत् यं हरिं न्यस्तदण्डः सर्वभूताभयप्रदः कृतापराधेऽपि गतवैरः हरिभक्तः याति "मद्भक्ता यान्ति मामपि" इति श्रीमुख-वचनात् ॥ १५ ॥

क्वापि कदाचित् यदा प्रसजति विषयासक्तिं करोति तदा लतायुक्ताः भुजा द्रुमशाखाः तत्सदृशा ये भार्याभुजास्तदा-

तैर्वञ्चितो हंसकुलं समाविशन्नरोचयञ्छीलमुपैति वानरान् ।
तज्जातिरासेन सुनिर्वृतेन्द्रियः परस्परोद्वीक्षणविस्मृतावधिः ॥ १७ ॥
द्रुमेषु रंस्यन्सुतदारवत्सलो व्यवायदीनो विवशः स्वबन्धने ।
क्वचित्प्रमादाद्गिरिकन्दरे पतन्वल्लीं गृहीत्वा गजभीत आस्थितः ॥ १८ ॥
अतः कथंचित्स विमुक्त आपदः पुनश्च सार्थं प्रविशत्यरिन्दम ! ।
अध्वन्यमुष्मिन्नजया निवेशितो भ्रमन् जनोऽद्यापि न वेद कश्चन ॥ १९ ॥
रहूगण ! त्वमपि ह्यध्वनोऽस्य संन्यस्तदण्डः कृतभूतमैत्रः ।
असज्जितात्मा हरिसेवया शितं ज्ञानासिमादाय तरातिपारम् ॥ २० ॥

राजोवाच ।

अहो नृजन्माखिलजन्मशोभनं किं जन्मभिस्त्वपरैरप्यमुष्मिन् ।
न यद्धृषीकेशयशःकृतात्मनां महात्मनां वः प्रचुरः समागमः ॥ २१ ॥
न ह्यद्भुतं त्वच्चरणाब्जरेणुभिर्हतांहसो भक्तिरधोक्षजेऽमला ।
मौहूर्तिकाद्यस्य समागमाच्च मे दुस्तर्कमूलोऽपहतोऽविवेकः ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथः सन् तदाश्रयाः अव्यक्तपदाश्च ये द्विजाः अवडजाः कोकिलावयस्तत्संसिद्धशेषु भार्यासङ्गसाध्येष्वपत्येषु स्पृहा यस्य स तथाभूतो भवति कश्चिच्च हरिचक्रतः सिंहसमूहसदृशात् कालचक्रतस्त्रसन् विघ्नस्तत्परिहाराय बकादितुल्यैः केवल-मुदरम्भरैः पाखण्डिभिः सख्यं विधत्ते तद्भक्तो भवतीत्यर्थः ॥ १८ ॥

भाषाटीका ।

कहींपर मनुष्य अजगर सर्प (निद्रा) से ग्रसित होता है फिर जङ्गल में छोडदिया जाताहै तब कुछभी नहीं जानताहै कहींपर सर्पों (क्रूरमनुष्यों) से पीडित होता है तब बिना पानी-के कुवे (मोह) में अंधेरे (दुःख) में पडता है ॥ ९ ॥

कभी क्षुद्ररस (परस्त्रीआदि) को ढूंढता है तब मधुमाखि (उन स्त्रियों के स्वामि) आदिकों से दुःखित होने से खिन्न हो जाता है यदि कदाचित् उसमें परदारादि प्राप्त होजावें तो तिस से बली उसको लूटकर लेजाते हैं ॥ १० ॥

कहींपर शीत पवन वर्षा इनके निवारण करने में असमर्थ होकर रहता है कहींपर आपसमें मोल लेता बेचता है धनकी शठता से थोडे में बहुत चाहता है ॥ ११ ॥

कहीं कहीं पर तिस वनमें शय्या आसन स्थान विहार से रहित होता है फिर दूसरे से मागता है तौभी कामना नहीं पूरी होतीहै पराई वस्तु में इच्छा करनेसे अपमानको प्राप्त होताहै॥१२॥

आपसमें धनके वदलावदली में वैरके बढने परभी विवाहा-दिक करता है इस मार्ग में घूमने में बडे कष्टोंसे धनकी बाधासे रोगों से विपत्तिको प्राप्त होता है ॥ १३ ॥

हे धीर ! उन उन दुःखिया मरे मनुष्यों को तहींपर छोडकर नयेको या पैदा होनेवाले को लेकर वह मनुष्य समूह चला जाता है इस प्रकार चलने में भी जहां से यह चलताहै वहां को नहीं जा सकता है और मार्ग के आनेके योगको भी नहीं प्राप्त होता है ॥ १४ ॥

बडे युद्ध के उत्साही दिग्गजों के जीतने वाले मरी है करके पृथिवी पर वैर बांधने वाले सब युद्धमें मरगये परन्तु सर्व भूतों के अभय देनेवाले जिस स्थान को जाते हैं तहां न आस-क्ते हैं ॥ १५ ॥

कहींपर लतासरीके स्त्रीभुजों का आश्रय करके उनके आश्रित अव्यक्त भाषण करने वाले पक्षि (पुत्रादिक) में इच्छा करते है फिर इनके पोषण में आसक्त होता है कभी कहींपर सिंहके समूह (जन्ममरणादि कालचकसे) डरकर बचने को बक काक गीध (पाखण्डी) इनके साथ मित्रता करता है ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तैर्वञ्चितस्तत्र फलाभावं ज्ञात्वा हंसानां ब्राह्मणानां कुलं पुनः प्रविशन्नेषां शीलं प्रायश्चित्तपूर्वकं पुनरुपनयनादि अरोचयन् निजपद्यन्यानरतुल्यान् भ्रष्टाचारान् शूद्रप्रायानुपैति । तज्जातिरासेन वानरजातिक्रीडया स्त्रिया मिथुनीभूय परस्पर-मुखावेक्षणेन विस्मृतो जीवितावधिर्मरणकालो येन ॥ १७ ॥ द्रुमवत्केवलस्थैर्येषु गृहेषु व्यवायदीनः सुरतेच्छया विवशः स्वं स्वस्य यद्बन्धनं तस्मिन् तस्मिन्विचरन् परिहर्तुमशक्तः मठान्तरं तु यत्र संसारे चरत्यर्थः । गिरिकन्दर पर्वतिभङ्गानि रोगादि-दुःखे पतन्कन्दरस्थगजात्मृत्योर्भीतः सन् वल्लीतुल्यां प्रार्थनां कर्मावलम्ब्यावस्थितो भवति ॥ १८

श्रीधरस्वामिकृतभावार्थदीपिका ।

सार्थं प्रविशति यथा पूर्वं प्रवृत्तिमार्गे रमते न वे[illegible] पुरुषार्थम् ॥ १९ ॥

त्वमपि अध्वनि निर्विशन इत्यनुषङ्गः । अतोऽस्याध्वनः [illegible] तितर । अनर्जितात्मा विषयेष्वनभिनिवेशितचित्तः सन् [illegible] सेवया शितं तीक्ष्णीकृतम् ॥ २० ॥

अखिलजन्मसु शोभनं नृजन्मैव न परं श्रेष्ठं येभ्यो दे[illegible] जन्मभ्यस्तैरपि किम् अमुष्मिन् स्वर्गेऽपि जन्मभिः किं न [illegible] येषु जन्मसु यत्र स्वर्गे वा वो महात्मनां समागमः [illegible] न भवति हृषीकेशस्य यशसा कृतः शोधित आत्मा येस्तेषाम् ॥ २१ ॥

सन्ततमुपासितैस्त्वत्पदाब्जरेणुभिर्हतमंहो यस्य तस्या[illegible] धोक्षजे निर्मला भक्तिर्भवतीति नैवाद्भुतं यस्य तव मुहूर्तमात्र[illegible] संगात् समागममात्रादपि कुतर्केण बद्धमूलोऽपि ममाविवेको नष्टः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नैर्वेञ्चितः स्वयं तान् वञ्चयंस्तैर्वञ्चितः फलाभावं ज्ञात्वा हंस[illegible] पुनर्निःशुक्लं ब्राह्मणकुलं समाविशन् प्रविशन् तेषां शीलं प्राप्[illegible] [illegible]पूर्वकं पुनरुपनयनाद्याचाररूपमरोचयन् पूर्वदुर्वासनया [illegible] [illegible]पियं पश्यन् वानरतुल्यान् भ्रष्टसदाचारान् शूद्रजात्यनुपतति तज्जाति[illegible] [illegible] [illegible]तिक्रीडया स्त्रिया मिथुनीभूय रहोभावनापूर्वक- [illegible] [illegible] [illegible]नेन विस्मृतः अवधिर्जीवनावधिर्मरणकाल[illegible] [illegible]

[illegible] केवलदृष्टार्थेषु गृहेषु रंस्यन् क्रीडिस्यन् व्यवायेन [illegible] [illegible]तः कृपणः सुतेषु दारेषु वत्सलः एवं स्वस्य गत्र- [illegible] [illegible]हरन् विवशः परिहर्तुमशक्तो भवति क्वचित्प्रमा[illegible] [illegible]रिन्द्रियवद्व्याघ्रकं रोगादिदुःखे वर्त्तमानः दूरस्थ[illegible] [illegible] मन् वल्लीं वल्लीतुल्यां प्राचीनवासनाम[illegible] [illegible]थनो [illegible]ति ॥ १८ ॥

[illegible] दुःखात् कथंचिदतिप्रयासेन विमुक्तः पु[illegible] [illegible] प्रविशति यथा पूर्वं प्रवृत्तिमार्गे रमते [illegible] [illegible] [illegible]त्यजया भगवन्मायया निवेशित[illegible] [illegible]पि पा[illegible] याति ॥ १९ ॥

[illegible] ! त्वमपि परित्यक्तः भूतदण्डो [illegible] [illegible] : निपयेष्वनभिनिवेशितः आत्मा [illegible] [illegible]शितः सत्वाऽत्र वर्णाश्रम[illegible] [illegible] ज्ञानं भगवदुपासना[illegible] [illegible] [illegible]तरुच्छेदनायेति भावः [illegible] सुहि[illegible] [illegible]ण दृढेन छित्वा इति [illegible] [illegible] अतितर अध्वन [illegible] [illegible]ने [illegible] [illegible]पारायणो [illegible] [illegible]समादाय [illegible] [illegible]र्थः ॥ २० ॥

[illegible]यथार्थ [illegible] सारासारत्वोप- [illegible]णो रहूगण [illegible]यतामाविः कुर्वन्

[illegible]ति तदुक्तीरभिनन्दन्नमस्करोति त्रिभिः श्लोकैः । अहो [illegible] अहो नृजन्म मनुष्यजन्म सुशोभनं परममुष्मिन्स्वर्गे [illegible] [illegible]दिजन्मभिरपि किं प्रयोजनं येषु देवादिजन्मसु हृषीके[illegible] [illegible] भगवतो यशसा कृतः शोधित आत्मा चित्तं येषां [illegible] [illegible]त्मनां त्वादृशानां समागमः प्रचुरो न भवति भागवत [illegible]र्हितैर्देवादिजन्मभिरपि किं व्यर्थान्येव तानीत्यर्थः ॥ २१ ॥

[illegible]रन्तरं त्वादृशानामुपासितयोश्चरणाब्जयो रेणुभिर्हतमंहः [illegible] यस्य तस्याधोक्षजेऽमला भक्तिर्भवतीति नैवाद्भुतं कुत [illegible] तव मौहूर्तिकान्मुहूर्तमात्रभवात्समागममात्रान्मे कुतर्केण [illegible]र्ऽविवेकोऽगहनः विनष्टोऽभवत् ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

[illegible] कथङ्कारमज्ञानमुत्पादयतीति तत्राह । अन्योऽन्येति । [illegible]गनिमित्तव्यतिषङ्गः परस्परद्रव्यदानादानसम्बन्धस्तेन वृद्धा [illegible]ः वैरपरम्परा यस्य स तथा मिथोऽधिवहन् कुटुम्बपोषणा[illegible] [illegible]र्त्मनि विहरन् क्रीडन्करुणा कृच्छ्रेणापि यद्वित्तं तस्य [illegible]र्गेनाशलक्षणापद्र्वैर्विपन्नो विपत्ति गतः ॥ ० ॥

[illegible]र्वविधस्तत्र तत्र मनुष्यादिजन्मनि तांस्तान्विपन्ना- [illegible]वदङ्गान्या पित्रादीन् स्वदेहान् वा विहाय जातं [illegible]मिन वं (१) परिगृह्याध्वन्यावर्तत इत्यन्वयः फलितमाह । न [illegible]ति । हे धीर ! संसाराध्वनः पारं युज्यतेऽनेनेति योगो हरि- [illegible]र्वीत्यन्वयः अत्र करतलामलकवदपरोक्षीकृतश्रीनारा- [illegible]स्वाङ्घ्रितद्येदृशं ज्ञानं युक्तं तदुक्तम् ।

ऋते हृदयवेन्यार्हानार्पभस्येह कः समः ।
यस्योपदेशात्सिन्धीशो ददर्श कपिलं प्रभुम् ॥

[illegible] नात्र शङ्का कार्येति ॥ ० ॥

[illegible]ध्वनः पारमाप्नोति । योगी परं स्थानमुपैति चाद्यम्" इत्यादेः [illegible] पारं नोपैति इति सर्वनिषेधः कथं युक्तमिति- [illegible] भक्तिहीनपुरुषविषयं मयोक्तमतोऽन्यत्र द्विषयं (२) ॥ [illegible]जयवत्साध्य इति भावेनाह । मनस्विन इति । मनस्विनोऽ- [illegible]र्या राजानः निर्जितादिग्गजेन्द्रा इत्यनेनानलभुजत्वं [illegible]र्पति । किमनेनेति तत्राह । ममेति । भुवि भूमिविषये ममेयं [illegible]ति [illegible]बद्धवैरा अत एव मृधे शया- [illegible]शरीराः पञ्चत्वमेवाश्नन्ति न तु मही मुञ्च- [illegible] एतं नष्ट व्रजन्ति चेत्को व्रजतीति तत्राह । यन्न्यस्त- [illegible] न्यस्तदण्डो वाग्विनिमित्तहिंसारहितो गतवैरः [illegible]सारेण निरस्तभूतवैरः पुरुषो हरेर्यत्पदमभियाति [illegible]र्थः ॥ ० ॥

[illegible]पवर्गिनसंसारनरकमूलनमसुकरमिति न मन्तव्यं यतो [illegible] निशितज्ञानासिनाद्वानस्य तव सुशकमित्याह । रहू- गणेति । "रहत्यागे" "गणसङ्ख्याने.. इति संसारं रहयन् गणो ज्ञानं यस्य स तथा तस्य सम्बुद्धिः हे रहूगणेति "यह प्रापणे" इत्य-

---

(१) शरीरं ।
(२) भक्तविषयं त्वन्यत् ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इमां दुरत्ययमहिषीशब्दवद्वयं वाच्यः संसारनदीं...तरन्... हरिसुहृदः संसारनदीं तरत्यन्वयः ...पतति ...बहुपदे पूर्वोक्तैव योजना ॥ २० ॥

सर्वेष्वपि जन्मसु नृजन्मैव श्रेयःसाधनमन्यानि भोगाधिष्ठानानीत्यभिप्रेत्याह । अहो इति । ननु सर्वस्मात् स्वर्गे जनन शोभनमिति तत्राह । किं जन्मभिरिति । कं गुणं निरीक्ष्यावृत्यत इति । तत्राह । अमुष्मिन्निति । अमुष्मिन्स्वर्गे हृषीकेशस्य यशसा ...शोधितः आत्मान्तःकरणं येषां ते तथा तेषां महात्मनां वो युष्माकं सङ्गमो न प्रचुर इति यस्मात्तस्मात् ॥ २१ ॥

नन्वसत्समागमेन तव किं फलमभूदिति तत्राह । नहीति । मे अभोक्तजेऽनन्या भक्तिरभूदित्येतद्धृत्तं नहीत्यन्वयः । ...नानुभाविकार्थमाह । कुत एतदिति । तत्राह । मौहूर्तिकादिति । यस्य तव मौहूर्तिकान्मुहूर्तकालभवात् समागमान्मे अविवेकोऽपहृतो नष्ट इत्ययमर्थो ममानुभाविक इत्यर्थः अस्मद्दृष्टसमीप- जीवनेनात्मीयच्छलतायोग्या एत इति दुस्तर्कः दुष्टा युक्तिर्मूलं यस्य स तथा दुस्तर्कं मूलयति प्रतिष्ठापयतीति वा "मूलप्रतिष्ठायाम" इति धातुः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तेष्वाश्रितत्वे फलाभावं ज्ञात्वा हंसानां ब्राह्मणानां कुलं प्रविशन् तेषां शीलं प्रायश्चित्तपूर्वकं पुनरुपनयनाद्याचार- मरोचयन् स्वानभीप्सितं जानन् वानरतुल्यान् अप्राच न् शूद्रप्रायान् लिङ्गिन उपैति तज्जातौ रमेन भोजनपानस्त्री- ...रादिस्वाच्छन्द्येन परस्परमुखाञ्चीत्य...विस्मृतो जीविता- वधिमरणकालो येन सः ॥ १७ ॥

कश्चिदन्यः सार्थो द्रुमतुल्येषु केवलदृष्टार्थेषु गृहे व्यवाय- हीनः सुरतेच्छुत्वात् स्त्रिया पादेन ताड्यमानः एवं स्वस्य यद् बन्धनं प्राप्तं तस्मिन् विवशः परिहर्तुमशक्तः चरन् वने इति पाठः गिरिकन्दरवदिति भयानकरोगादिषु दुःखे पतन् कन्दरस्थगज- तुल्यान्मृत्योर्भीतः सन् वल्लीतुल्यं प्राचीनकर्मावलम्ब्यावस्थितो भवति ॥ १८ ॥

पुनश्चेति । यथा पूर्वं प्रवृत्तिमार्गे रमते न चेद न परमध्वनं जानाति ॥ १९ ॥

त्वमप्यध्वनि निविशित इत्यन्वयः । अतोऽस्याध्वनः पारमति तर याहि ॥ २० ॥

कथमहमकस्मादेव कृतार्थोऽभूवमिति माश्चर्यं सविनर्कमाह । अखिलजन्मसु मध्ये अहोऽद्भुतेऽखिलान् मर्त्यलोके नृजन्मैव शोभ- नममुत्र स्वर्गे परं श्रेष्ठं येऽस्मर्देवादिजन्मभिः किं यत्रेषु वो महात्मनां समागमो न सम्भवेत् कीदृशानां हृषीकेशस्य स्वभक्त- सर्वेन्द्रियाधिकस्य हरेर्यशोभिरेव कृता निर्मिता आत्मानो देह- मनोबुद्धिप्रयत्नजीवात्मानो येषाम ॥ २१ ॥

ननु प्रचुर इत्युक्त्वा किं स्वल्पसङ्गस्यानर्थकत्वं ब्रूये सेवम- त्यौत्सुक्यान्वित एव तथा ब्रवीमीत्याह । नहीति । ब्रह्मेन्द्रादिभि- रपि दुर्लभा भगवत्यमला भक्तियुष्म- त्सङ्गमेनापि नाश्चर्यमाश्चर्यं मत्केवलं दुर्विज्ञत्वानामतिकुटिलांकधिपल्लुतधियां मौमुखीकरणां तव मौहूर्तिकादेव मम समागमस्य माहात्म्यं को वक्तुं क्षमेत कथमेव व्यञ्जितमिति भावः ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हंससमूहस्य सदृशं सारग्राहिभागवतजनसमूहम् यात- रात् तत्तुल्यान् दुराचारान् हरिविमुखान् ॥ १७ ॥

द्रुमेषु द्रुमवद्दृष्टार्थेषु गृहेषु रमयन् निहतः स्वबन्धं निहर्तव्ये त्वविवशः गिरिकन्दरे तक्षत्वरमात्मभयदे रोगादौ पतन गिरिकन्दरसंबन्धी गजतुल्यान्मृत्योः भीतः सन् वल्लीवत् देह- धारकं कर्मावलम्ब्य आस्थितो भवति ॥ १८ ॥

अतः आपदः कथञ्चिन्मुक्तः पुनः सार्थं प्रागिव जनं प्रविशति यथा पूर्वं प्रवृत्तिमार्गे रमते मायया संसाराध्वनि निवेशितोऽस्मीति न जानाति ॥ १९ ॥

हे रहूगण ! त्वमपि सत्यस्तदण्डः मय...त्यक्तभूतद्रोहः कृते प्राणिषु मैत्रं येन सः असञ्जितः विषयेषु मनो...निर्वेदित आत्मा मनो येन सः हरिसेविकोधिगम्यत्वादृक्...ज्ञाना- सिमादाय हरिसेवया शाणितं कृत्वा...अरुणध्वनः पारमति- तर भवाटवीमतिक्रम्य प्राप्नो...प्रजेत्यर्थः ॥ २० ॥

अखिलजन्मसु नृजन्मैव शोभनं न परं श्रेष्ठं स्वर्गादौ अपि अमुष्मिन् स्वर्गे देवादिजन्मभिः किं न किमपि हृषीक- यशसा कृतः शोधितः आत्मा मनो येषां तेषां वो युष्माकं महा- त्मनां यत्र स्वर्गे समागमः प्रचुरो न भवति तत्र महात्मानः धारादिषु विचरन्ति तत्रत्यस्वर्गमत्तदा विषयाहितमनसो हरिपूर्वकं प्रचुरं सङ्गं न कुर्वन्तीति भावः ॥ २१ ॥

...मूर्ध्नि...अधोक्षजे निर्मला भक्तिर्भवतीति नहि अद्भुतम यस्य तव मुहूर्त- मात्रभवसमागमात्रादपि दुस्तर्कः अप्रामाण्यकादिभवदादिस्तर्कः मूलं यस्य स मे मम अविवेकः अपहृतः ॥ २२ ॥

भाषा टीका ।

उन बन्दरों (पाखण्डियों) में जब ठगा जाता है तब हंसों (ब्राह्मणों) के समूह में जाता है फिर उन्हीं के पास आचारादिक के अच्छे नहीं लगने है तब बन्दरों (शूद्रों) के पास जाता है उन्हीं उनकी क्रीडा में आप ...एक स्त्री मुख के देखने से अपने मरण के काल को भूल जाता है ॥ १७ ॥

पेडों में (स्त्री. ...क सुखों) में क्रीडा करता हुआ पुत्र स्त्री इन पर मोह करता है मैथुन के वास्ते दुःखित रहता है जब कभी बंधन आने तब छुटनेमें असमर्थ

नमो महद्भ्योऽस्तु नमः [illegible] नमो युवभ्यो नम आवटुभ्यः ।
ये ब्राह्मणा गामवधूतलिङ्गाश्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् ॥ २३ ॥

श्रीशुक उवाच ।

इत्येवमुत्तरामातः ! स वै ब्रह्मर्षिसुतः सिन्धुपतय आत्मसतत्त्वं विगणयतः परानुभावः परमकारुणिकतयोपदिश्य रहूगणेन सकरुणमभिवन्दितचरण आपूर्णार्णव इव निभृतकरणोर्म्याशयो धरणिमिमां विचचार ॥ २४ ॥

सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व आत्मन्यविद्याऽध्यारोपितां च देहात्ममतिं विससर्ज एवं हि नृप ! भगवदाश्रिताश्रितानुभावः ॥ २५ ॥

राजोवाच

यो ह वा इह बहुविदा महाभागवत ! त्वयाऽभिहितः परोक्षेण वचसा जीवलोकभवाध्वा स ह्यार्यमनीषया कल्पितविषयो नाञ्जसाऽव्युत्पन्नलोकसमधिगमः अथ तदेवैतद्दुरवगमं समवेतानुकल्पेन निर्दिश्यतामिति ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां भवाटव्युपवर्णनं नाम
त्रयोदशोऽध्यायः ॥ १३ ॥

भाषाटीका।

रहता है कभी असावधानता से पर्वत की कंदरों (रोगों) में पडजाता है तब उहां के हाथी (मृत्यु) से डरकर [illegible] (निजकर्म) को आश्रय करता है ॥ १८ ॥

[illegible] ! इस आपत्ति से जब कभी [illegible] तो फिर उसी समूह (प्रवृत्तिमार्ग) में पैठता [illegible] मार्ग [illegible] के प्रवेश करने से घूमता हुआ [illegible] और अपने परम पुरुषार्थ मोक्ष को [illegible] है ॥ १९ ॥

हे [illegible] ! तुम भी इसी मार्ग में प्रविष्ट [illegible] तुम [illegible] भाव से मित्रता करके सब से [illegible] में आसक्ति न करके श्रीहरि सेवा [illegible] ज्ञान रूप [illegible] लेकर इस वन को काटकर [illegible] मार्ग [illegible] पार [illegible] जाओ ॥ २० ॥

[illegible] थोडे महा मनुष्य [illegible] जन्मों से [illegible] दूसरे देवादि जन्मों [illegible] है जिस [illegible] आचरण के यश में [illegible] आपसरीके [illegible] बहुत सुमागम [illegible] २१ ॥

[illegible] चरण रजसे [illegible] से श्रीनारायण [illegible] में मेरी [illegible] आश्चर्य नहीं है [illegible] जिन आपके मुहूर्त मात्र के समागम होने से बडी [illegible] से बधी जड बाबा मेरा अविवेक नष्ट होगया [illegible] २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ब्रह्मविदः केन रूपेण चरन्तीत्यज्ञानात्सर्वानमस्यति नम इति । ये बटवः क्रीडारतत्वादप्रज्ञेयधीरयास्तानप्यभिव्याप्य सर्वेभ्यो नम इत्यर्थः । स्वदृष्टान्तेन राज्ञां महदवज्ञां सम्भाव्याह । राज्ञां शिवमस्त्विति ॥ २३ ॥

उत्तरा माता यस्य हे उत्तरामातः ! विगणयतो न गणयतः अवमन्तर्यपि परमकरुणाकरत्वेन सिन्धुपतये आत्मतत्त्वमुपदिश्य । निभृताः शान्ताः करणानामूर्मयो यस्मिन् स आशयो यस्य ॥ २४ ॥

सुजनात्सम्यगवगतं परमात्मसतत्त्वं येन तथाभूतः संस्तदानीमेव देहे आत्ममतिं च विससर्ज हे नृप ! भगवदाश्रितो भरतस्तदाश्रितो रहूगणो यत्तस्यानुभावः सद्यो देहाहङ्कारत्यागः ॥ २५ ॥

परोक्षेण वणिक्सार्थरूपकेण आर्याणां विवेकिनां मनीषयैव दस्युस्थानीयानीन्द्रियाणि गोमायुस्थानीयान्यपत्यादीनीत्येवं कल्पितविषयः अव्युत्पन्नस्य तु लोकस्य जनस्य सम्यगधि-

श्रीधरस्वामिकृतभावार्थदीपिका ।

धर्मो न भवति । अथ अतस्मिंस्तदेव भवाध्वरूपं समवेतानुकल्पेन प्रस्तुते तत्तदनुरूपार्थोपकल्पनेन ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ज्ञानिनः केन रूपेण चरन्तीत्यज्ञानात्सर्वानमस्करोति । नम इति । महद्भ्यो नमः तत्रापि शिशुरूपेभ्यो नमः ये ज्ञानस्वादृशास्तेभ्योऽपि नमः आवटुभ्यः वटुपर्यन्तेभ्यः वटुर्माणवकः वटुत्वस्वमाहात्म्यानाविष्करणशीलपर्यन्तेभ्यः इत्यर्थः ज्ञानिनो हि स्वमाहात्म्यानाविष्कारेण तिष्ठन्ति "तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्„ इति श्रुतेः पाण्डित्यं नाम ज्ञाननिष्ठां निर्विद्य बाल्येन तिष्ठासेदित्यर्थः ये त्वादृशा ब्राह्मणा अवधूतवेषाः गां भूमिं चरन्ति तेभ्यः सकाशाद्राज्ञां मादृशानां कृताशांशिवमस्तु महतां निग्रहो माभूत् ॥ २३ ॥

सम्वादमुपसंहरति शुकः हे उत्तरामातः ! उत्तरा माता यस्य स उत्तरामाता परीक्षित्तस्येदं संबोधनमुत्तरामातरिति अविगणयते न विगणयत इत्यविगणयन् तस्मै अवमानं कुर्वाणाय सिन्धुसौवीरपतये रहूगणायाविगणितः परिच्छेत्तुमशक्यः परमानुभावः प्रभावो यस्य स वै ब्रह्मर्षिसुतः परमकारुणिकत्वेन हेतुना आत्मनस्तत्त्वं प्रकृतिविलक्षणब्रह्मात्मकात्वविशुद्धज्ञानानन्दस्वप्रकृतशान्त्यादियाथात्म्यमुपदिश्य सकरुणं सस्नेहं यथा भवति तथा रहूगणेनाभिवन्दितौ चरणौ पादौ यस्य सः आसमन्तात्पूर्णः समुद्र इव निभृतानि शान्तानि करणानि इन्द्रियाणि ऊर्मयः अशनायादयः आशयोऽन्तःकरणं वासना वा यस्य सः इमां धरणिं भूमिं विचचार ॥ २४ ॥

सौवीरपतिः रहूगणोऽपि सुजनाद्ब्रह्मर्षिसुतात्सम्यगवगतं परमात्मनस्तत्त्वं याथात्म्यं येन तथाभूतः सन् तदानीमेवात्मन्यविद्ययाज्ञानेनारोपितां देहात्माभिमतिं विससर्ज जहौ हे नृप ! भगवदाश्रिता भागवतास्तानाश्रिता भगवद्दासानुदासास्तेषां प्रभाव एवंविधो हि भवतीत्यर्थः ॥ २५ ॥

एवं नरमस्वादे उपवर्णिते वणिक्सार्थाध्वादिरूपेण प्रवृत्तानां परोक्षरूपाणामुक्तीनामाशयं जिज्ञासमयाह राजा परीक्षिच्छुकं प्रति य इति । हे महाभागवत ! शुक ! बहुविदा बहुज्ञेन त्वया यो जीवलोकस्य भवाध्वा पारोक्ष्यरूपेणाभिहितः कथितः स हि यस्मादार्याणां विवेकिनां मनीषया बुद्ध्या एव दस्युस्थानीन्द्रियाणि गोमायुस्थानीयान्यपत्यादीनीत्येवं कल्पितः विषयो ज्ञानं यस्य सः कल्पितपदार्थवान् अतोऽञ्जसा सुखेन व्युत्पन्ना विवेकिनो लोकास्तैः समधिगम्यः नत्वव्युत्पन्नमादृशसमधिगम्यः अथ तस्मात् दुरधिगमं दुःखेनाप्यवगन्तुमशक्यमेतत्परोक्षरूपमुक्तिजातं समवेतानुकल्पेन प्रकृतोपयुक्तार्थसमर्थनशब्दप्रयोगेण निर्दिश्यतां व्याख्यायतां शब्दार्थयोरपृथक्सिद्धत्वाभिप्रायेण समवेतशब्दः प्रयुक्तः । यद्वा एतत्प्रसिद्धाध्वरूपेण कथितं संसाराध्वरूपं समवेतानुकल्पेन प्रसिद्धा उत्पत्त्यध्वनि समवेताः समन्वितास्ते ये दस्युगोमायुप्रभृतयः ताननुसृत्य तद्धर्मसंबन्धेन कल्पाः कल्पाः तेयुक्तत्वेन निर्दिश्यतां कथ्यतामित्यर्थः ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अतिप्रशंसयास्मानपहससि त्वमित्याशङ्क्यापराधं शापयन्निव नमस्करोति । नम इति । आवटुभ्यः वटुपर्यन्तं णौ २१ राजभ्य इति चतुर्थीमप्रयुज्य राज्ञामित्यनया षष्ठ्यात्मन एवाशिमाकाङ्क्षत इति ॥ २३ ॥

रहूगणस्य सम्यगनुग्रहं कृत्वा ब्रह्मर्षिसुतेन किमकारीति तत्राह । इतीति । इति समाप्य परमात्मसतत्त्व परमात्मनां निर्दोषस्वरूपमविगणितो मञ्जुषातः परमानुभावो यस्य स तथा निभृतकरणोर्म्याशयः क्लिर्मितेन्द्रियाख्याभिप्रायः यद्वा निभृतेन्द्रियाख्यतरङ्गस्थानः अवशीभूतेन्द्रियतरङ्ग इत्यर्थः स्यामेऽभिप्राय आशय" इति ॥ २४ ॥

सुजनाज्ज्ञानिजनपूजितजन्मनो ब्राह्मणात्समवगतपरमात्मसतत्त्वः सम्यक् ज्ञातपरमात्मस्वरूपः आत्मनि क्वचित् परमात्मविषये वाऽविद्यया अज्ञानेन भगवद्भक्तानामपीदृशमाहात्म्यं किं पुनः श्रीनारायणस्येत्युपसंहारमुखेन नृपमभिमुखीकरोति । एवमिति २५॥

(१) माहात्म्योपवर्णनकीर्तिप्रथितान् श्लोकानित्यर्थमार्षभस्य ऋषभपुत्रस्य भरतस्यानुवर्त्म लोकशास्त्रयोरनुकूलमार्गम् ० ॥

१ दिस्पृशां हृदयङ्गमं मलवत् विहायत् ॥ ० ॥

हरिमाहात्म्यप्रकटनाय पुनरुक्तं करोति । यो दुस्त्यजानिति । एतत्सर्वं नैच्छदिति यत्तदुचितं तथाहि मधुद्विषो हरेः सायानुरक्तधियां महतामभवो मोक्षोऽपि फल्गुः अल्पं आशीर्वाणां भवतीत्यर्थः सेवायाः अनन्तसुखगोचरत्वात् अत्र तात्पर्यं तु "ततो हैहयवैन्यादीन्"इत्यादिप्रमाणेन पूर्वोक्त इति ॥ ० ॥

यज्ञाय इज्याय धर्मपतये सकलैरनुष्ठीयमानपुण्यस्य पतये विधिकर्मणि नैपुणाय कुशलबुद्ध्युपेताय योगाय कर्मकाण्डोपायाय साङ्ख्यशिरसे उत्तमज्ञानस्वरूपाय शिरसः पूर्वगामि

---

(१) तस्येमान् श्लोकान् गायन्ति ।
आर्षभस्येह राजर्षेर्मनसापि महात्मनः ।
नानुवर्त्माऽर्हति नृपो मक्षिकेव गरुत्मतः ॥ ० ॥
यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदिस्पृशम् ।
जहौ युवैव मलवदुत्तमश्लोकलालसः ॥ ० ॥
यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् । नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुः ॥ ० ॥
यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय । नारायणाय हरये नम इत्युदारं हास्यन्मृगत्वमपि यः समुदाजहार ॥ ० ॥
इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यमापवर्ग्यं वानुशृणोत्याख्यास्यत्यभिनन्दति च सर्वा एवाशिष आत्मन आशास्ते न काञ्चन परत इति ॥ ० ॥

(२) एते श्लोका अप्रसिद्धास्तथापि श्रीविजयध्वजतीर्थसंमत अत्रैव मूले वर्तन्ते ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृत्ना [illegible] नार्थत्वेनायमर्थः सिद्ध्यति [illegible] रुद्रादेरित्येयतः प्रकृतीश्वराय लक्ष्मी [illegible] हरये नम इति मन्त्रद्वयसुक्ता [illegible] परोक्षज्ञानिनो भरतस्य मृगत्वं [illegible] योगाय समुदाजहार उत्ससर्ज ॥ ० ॥

[illegible] सर्वो प्राणिन आयास्ते प्राप्तुमिच्छति प्राप्नोति [illegible] इतिशब्दो भरताख्यानसमाप्त्यर्थ इति ॥ [illegible]

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

[illegible] तत्वादजेयब्रह्मविद् इत्यर्थः ॥ २३ ॥

[illegible] विसर्गान्तपाठ आर्षप्रयोगो मन्तव्यः । [illegible] मातुर्मातआदेशविधानात् ततो [illegible] ॥ २४-२५ ॥

इति [illegible] ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
त्रयोदशोऽध्यायः ॥ १३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

[illegible] शिबिकां वहंस्तत्र भवान् खं यदि [illegible] का गतिरभविष्यदिति सभयं प्रणमति [illegible] ये बटवः क्रीडारतत्वादजेयब्रह्म [illegible] राज्ञां महदपराधं [illegible] ॥ २३ ॥

[illegible] महाभूरिभाग एव रहूगणो [illegible] तदनुमहामृत [illegible] विप्रगणे [illegible] न [illegible] विधीवन्तं राजानमाश्वासयति । [illegible] भो राजन् ! त्वन्मातुर्गर्भे [illegible] स्वयमेव त्वां रक्ष [illegible] अतेजसो रक्षितुं मामेतां [illegible] एतेषामपारकृपा [illegible] भाग- [illegible] पायय स एव [illegible] तस्माद्भरतात् [illegible] त्वदीयं [illegible] विधीयत्सीति [illegible] तिरस्कृतो [illegible] यस्मात् सः । [illegible] तस्मै [illegible] सरोदनं । [illegible] स आशयो यस्य

[illegible]नात् श्रीमद्भरतात् आत्मनि स्वस्मिन् या अविद्या अना- [illegible] प्रवृत्ता तया अध्यारोपितां देहे आत्ममतिमात्मबुद्धिं [illegible] भरतस्तद्वाश्रितो रहूगणः ॥ २५ ॥

[illegible] अतिविदुष एव मर्मोक्त्या उत्तमबुद्धया कल्पित [illegible] दस्युस्थानीयेन्द्रियगोमायुस्थानीयापत्यादयो यस्य सः । [illegible] दार्ष्टान्तिकानामनुक्तत्वात् समवेतेन समुचितेन अनु- [illegible] दार्ष्टान्तिकवाचकशब्देन ॥ २६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

त्रयोदशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible] अनेकैः रूपैर्विचरन्ति अतः सर्वानमस्यति । नम इति ॥ २३ ॥

[illegible] माता यस्य हे उत्तरामातः ! विगणयतः अपरा- [illegible] परमकारुणिकतया तस्मै कृतापराधायापि सिन्धुपतये [illegible] परमात्मतत्वमुपदिश्य रहूगणेन सकरुणं यथा [illegible] तथा वन्दितचरणः निभृताः शान्ताः करणानामूर्मयो [illegible] स आशयो मनो यस्य स महीं विचचार ॥ २४ ॥

[illegible] तस्मादेव समवगतपरमात्मसतत्वं येन सः अविद्यया [illegible] आत्मनि अध्यारोपितां देह एवात्मेत्येवं कल्पिताम् [illegible] मुनिस्तदाश्रितो रहूगणस्तस्यानुभावः तत्त्वग्रहण- [illegible] आत्ममतित्यागित्वम् ॥ २५ ॥

हे महाभागवत ! बहुविदा सर्वज्ञेन त्वया यो जीवलोकभवा- [illegible] वणिक्सार्थरूपेण अभिहितः कथितः स आर्याणां [illegible] मनीषयैव एष दस्युस्थानीयानीन्द्रियाणि गोमायुस्था- [illegible] अपत्यादीनीत्येवं कल्पितविषयः अव्युत्पन्नस्य लोकस्य जनस्य [illegible] सुदुर्विगम्यो न भवति अथ अतः तदेतदेव दुरवगमं [illegible] संसाराध्वस्वरूपं समवेतानुकल्पेन सम [illegible] इन्द्रियादौ दस्युत्वादिकल्पेन निर्दिश्यताम् ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोदशाध्यायार्थप्रकाशः ॥ १३ ॥

भाषाटीका ।

वृद्धों को नमस्कार है बालकों को नमस्कार है युवाओं को नमस्कार है ब्रह्मचारियों से लेकर सबको नमस्कार है जो ब्राह्मण अवधूत वेषसे पृथिवी में घूमते हैं उनको नमस्कार है जिससे कि सब राजों का कल्याण होवै ॥ २३ ॥

श्रीशुकदेवजी बोले हे उत्तरा के पुत्र परीक्षित! अपना अपमान करने वाले उस सिंधुपति रहूगण राजाको भी ब्रह्मर्षि पुत्र भरतजीने परमदयालु होने से इस प्रकार के आत्मतत्व का उपदेश किया फिर रहूगण ने बड़ी दीनता से उनके चरण में वन्दना की तब बड़े प्रभाव वाले समुद्र सरीखे ज्ञानसे पूर्ण सब इन्द्रियों की लहर जिसकी शांत हो गई हैं ऐसे अन्तःकरण वाले वह भरतजी इस पृथिवी में फिर विचरने लगे ॥ २४ ॥

भाषा टीका ।

सौवीर देशके राजा रहूगणभी सत्पुरुषसे परमतत्व के प्रसिद्दहोनेसे अज्ञानसे आत्मा में आरोपित जो देहात्मबुद्धि तिसको छोडते भये हे राजन्! परीक्षित्! इस प्रकार का भगवद् के आश्रय करनेवाले राजाका प्रभाव होगया ॥ २५ ॥

राजा परीक्षित् जी बोले हे महाभागवत! इहांपर बडे ही आपने बडे बुद्धिमानों के विषय कल्पना के योग्य जीवोंका भवाटवीमार्ग में छिपे हुये वचन से कथन किया है तिसो अनायास से अल्पज्ञ लोग नहीं जान सकते। तिस हेतुसे इस कठिन वचन को समझने लायक व्याख्या से आप कहिये ॥ २६ ॥

इति श्रीभागवत पञ्चमस्कन्ध त्रयोदश अध्यायका

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे त्रयोदशोऽध्यायः समाप्तः ॥ १३ ॥



॥ चतु[illegible] ॥

॥ [illegible] ॥

[illegible] देहात्ममानिनां सत्त्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मितविविधदेहाव-[illegible]गसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण तस्मिन्दुर्गाध्ववदसुगमेऽध्वन्यापतित [illegible]वतो विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा वणिक्सार्थोऽर्थपरः स्वदेहनिष्पा-[illegible]व: श्मशानवदशिवतमायां संसाराटव्यां [illegible]तो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपश-[illegible] चरणारविन्दमधुकरानुपदवीमवरुन्धे यस्यामु ह वा एते षडिन्द्रियनामानः कर्मणा दस्यव [illegible] ॥ १ ॥

[illegible] पुरुषस्य धनं यत्किञ्चिद्धर्मौपयिकं बहु[illegible]धिगतं साक्षात्परमपुरुषाराधनलक्षणो योऽसौ [illegible] साम्पराय उदाहरन्ति तद्धर्म्यं धनं [illegible]श्रवणास्वादनावघ्राणसङ्कल्पव्यवसायगृहग्राम्यो-[illegible]नाथस्याजितात्मनो यथा सार्थस्य [illegible]तात्मनो विलुम्पन्ति ॥ २ ॥

[illegible] च यत्र कौटुम्बिका दारापत्यादयो नाम्ना कर्मणा वृकसृगाला एवानिच्छतोऽपि कदर्यस्य [illegible] उरणकवत्संरक्ष्यमाणं मिषतोऽपि हरन्ति ॥ ३ ॥

[illegible] ह्यनुवत्सरं कृष्यमाणमप्यदग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवत्येव-[illegible]गृहाश्रमः कर्मक्षेत्रं यस्मिन्न हि कर्माण्युत्सीदन्ति यदयं कामकरण्ड एष आवसथः ॥ ४ ॥

[illegible] गतो दंशमशकसमापसदैर्मनुजैः [illegible]शकुन्ततस्करमूषकादिभिरुपरुद्ध्यमानबहिःप्राणः [illegible]वर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसाऽनुपपन्नार्थं नरलोकं गन्धर्वनगरमुपपन्न-[illegible]ति मिथ्यादृष्टिरनुपश्यति ॥ ५ ॥

[illegible] च क्वचिदातपोदकनिभान्विषया[illegible] पानभोजनव्यवायादिव्यसनलोलुपः ॥ ६ ॥

[illegible]चाशेषदोषनिषदनं पुरीषविशे[illegible]निर्मितमतिः सुवर्णमुपादित्सत्यग्निकामकातर इवो-[illegible]म् ॥ ७ ॥

अथ कदाचिन्निवासपानीयद्रविण[illegible]पजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः [illegible] ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका

[illegible] भवाटवीरूपकस्याकृतिः कृता [illegible] तस्य गोमायुमशकाद्यर्थकल्पम् ॥ [illegible] पृष्टः स श्रीशुक उवाच [illegible] [illegible] इति [illegible] [illegible]कथनेन [illegible] एष प्रसिद्धो [illegible] विष्णोर्मायया सुग-[illegible] स्वार्थी [illegible] पुरीषस्यार-[illegible] संपका[illegible] [illegible] गतिमार्ग-

मद्यापि नावरुन्धे न संप्राप्नोतीत्यन्वयः । मायायाः स्वकार्यद्वा-रेण संसारमार्गे पातहेतुत्वमाह । देहात्ममानिनां सत्त्वादिगुण-विशेषैर्विकल्पितानि विभक्तानि यानि कुशलाकुशलविमिश्र-कर्माणि तैर्विनिर्मिता विविधदेहावलिभिर्वियोगसंयोगादिर्यो-ऽनादिः संसारस्तदनुभवस्य द्वारभूतेन षडिन्द्रियवर्गेण तस्मिन् संसाररूपे दुर्गमार्गवदसुगमेऽध्वन्यापतितो यथा वणिजां सार्थः समूहोऽर्थार्जनपरः स्वदेहनिष्पादितानां कर्मणां फलहारेणानु-भवो यस्य विफलाश्च बहुप्रतियोगा बहुविघ्नाश्च [illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्य सः । तस्यां संसाराटव्यां ये तापास्तेषामुपशमनीं नाडा-
नीम् । यस्यामित्यादि व्याचष्टे । यस्यां भवाटव्याम् ॥ १ ॥

दस्युतुल्यं तेषां कर्म दर्शयति । तद्यथेति । धर्मौपयिकं धर्म-
कारणम् । तदेव स्वाभिप्रेतं धर्ममाह । साम्परायिकमिति । तं
साम्पराये परलोकार्थमुदाहरन्ति तत्सर्वं धर्मो हि धनं दर्शनादि-
पञ्चज्ञानेन्द्रियाणां वृत्तयः सङ्कल्पव्यवसायावन्तःकरणस्य प्र-
वृत्ते यो ग्राम्य उपभोगस्तेन कुनायस्य कुत्सितेश्वरस्या-
विलुम्पन्ति यथा चोराः कुपालकस्यानवहितात्मनः सार्थस्य
धनं हरन्ति तद्वत् ॥ २ ॥

गोमायवो यत्रेत्येतद्व्याचष्टे । अथ चेत्यर्थान्तरोपन्यासे । कृपणा
ते तु वृकाः शृगालाश्च कदर्यस्यातिलुब्धस्य ॥ ३ ॥

प्रभूतवीरुत्तृणगुल्मगह्वरेत्येतद्व्याचष्टे । यथाहीति । न दग्धानि
बीजानि यस्मिन् यद्यस्मादयोऽयमावसथ आश्रम एव कर्माशयो
करण्डः यथा कर्पूरभाजने कर्पूरक्षयेऽपि परिमलो न क्षीयते
एवमत्र वासनानामक्षीणत्वान्न कर्माण्युत्सीदन्तीत्यर्थः ॥ ४ ॥

दंशमशकतुल्यैरपसदैर्नीचैः शलभादिभिश्चोपरुध्यमानः पीड्य-
मानो बहिःप्राणो वित्तं यस्य तथाविधोऽप्यस्मिन्नध्वनि क्वचि-
द्भ्रमविद्यादिभिरुपरक्तेन मनसा गन्धर्वपुरतुल्यमघटमानं लौ-
किकं सत्यत्वेन मिथ्यादृष्टिरनुपश्यति ॥ ५ ॥

प्रपश्यतीति प्रथमसूचितमर्थान्तरं दर्शयति । तत्र च गन्धर्व-
पुरे कश्चिदातपोदकं मृगतृष्णाजलं तत्तुल्यान्विषयाननुधाव-
तीति ॥ ६ ॥

क्वचित्कश्चिच्चाशुरयोल्मुकग्रहमित्येतद्व्याचष्टे । क्वचिच्चाशेषाणां
दोषाणां निषदनं स्थानं पुरीषविशेषमन्नेषिष्टा तस्य पुरीष-
स्येव लोहितो वर्णो यस्य रजोगुणस्य तेन निर्मिता तद्वि-
धया मतिर्यस्य स सुवर्णमुपादातुमिच्छति अग्निकामेन कातरः
परवश उल्मुकसदृशं पिशाचमिव शीतातुरो हारयेऽग्निवज्ज्वा-
ज्वल्यमानं ततस्ततो धावन्तमुल्मुकपिशाचमग्निबुद्ध्याऽनुधावति
न तु तं प्राप्नोति कदाचित्प्राप्नोति तर्हि तेन भक्षितः सन् म्रियते
एवं सुवर्णमनुधावन्नपीत्यर्थः ॥ ७ ॥

निवासतोयद्रविणेत्येतद्व्याचष्टे । अथेति । निवासादिष्वनेके-
ष्वात्मन उपजीव्येष्वभिनिवेशो यस्य ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमापृष्टः शुकः समवेतानुकल्पेन निर्दिष्टांस्तावद्दुरत्यय
इति श्लोकं व्याचष्टे । य इति । य एष जीवलोकः ईश्वरस्य
भगवतो विष्णोर्वशवर्तिन्याऽधीनया माययाऽतिदुर्गाध्वनि असु-
गमे संसाराध्वनि कर्ममार्गे आपतितो मायायाः स्वकार्यद्वारेण
स्वमार्गपातहेतुत्वमाह । देहात्माभिमानिनां सत्त्वरजस्त-
मोगुणैर्विशेषेण कल्पितानि विभक्तानि सात्त्विकराजसताम-
सविभिन्नानि यानि कुशलानि सुखसाधनानि सात्त्विकानि
अकुशलानि दुःखसाधनानि राजसानि मिश्राणि प्रमादालस्या-
दिसाधनानि रजस्तमोमूलानि कर्माणि तैर्विनिर्मिताभिरापादिता-
भिर्विविधदेहावलिभिः ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ।
आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे ।

धनं रजः स्वभावेन दृश्याद्युपकरीया नियतदेहावृत्ति मनुष्या-
सुरादिदेहपङ्क्तिभिर्या वियोगसंयोगौ देहवियोगतत्संयोगौ आदिश-
ब्देन बाल्ययौवनस्थविरादिभावसङ्गः एतद्रूपोऽस्मादिः तारतम्य-
मुभयस्य द्वारभूतेन षडिन्द्रियवर्गेण स एतस्मिन् गोष्ठ्य-
सुगमे संसाराध्वनि कर्ममार्गे आपतितः यथा वणिक् सार्थः
समूहोऽर्थार्जनपरः तथा स्वदेहनिष्पादितानां पूर्वोक्त कर्मणां
फलद्वारेणानुभवो यस्य विफलाश्च बहुलप्रतियोगा दुर्भिक्षोप-
हता ईहाश्चेष्टा यस्य सः श्मशानवदमङ्गलरूपायां संसारा-
टव्यां गतोऽद्यापि तस्यां संसाराटव्यां ये तापा आत्मिकादय-
स्तेषां शमनीं हरिरेव गुरुस्तस्य हरिगुरोश्चरणारविन्दे ये मधु-
करा भ्रमरतुल्या भक्तास्तेषामनुपदवीं तैरनुष्ठितं भक्तिमार्गं नाव-
रुन्धे न प्राप्नोति ॥ १ ॥

यस्यामित्यादिश्लोकं व्याचष्टे । यस्यामुहन्नेति । यस्यां संसा-
राटव्यां ये षडिन्द्रियनामान एते कर्मणा दस्यव एव दस्युत्वा-
पादेन दस्युत्वेन पूर्वं निरूपिता इत्यर्थः इन्द्रियनामानः इत्य-
नेन केवलं नामभेद एव कर्मणा ते दस्यव एवेत्युक्तं दस्यूना-
मिन्द्रियाणां च धनापहारित्वरूपं कर्म तुल्यमिति दृष्टान्तदार्ष्टा-
न्तिकभावेन दर्शयति । यथेति । यथास्य पुरुषस्यानवहितात्मनः
सार्थस्य वणिजादेः धनं बहुकृच्छ्रेणातिदुःखेनार्जितं धौपयिकं
धर्मोपयोगार्हं धनस्य धर्म एवोपयोगः सफलो न तु काम इत्य-
भिप्रायेण धर्मौपयिकमित्युक्तं तथाचोक्तं प्रथमे ।

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ।
नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥

एवंविधं यत्किञ्चिद्धनं यथा दस्यवश्चोरा अपहरन्त्येव
पुरुषस्य यो भगवदाराधनरूपो धर्मस्तं साम्परायिकं परलो-
हितं धनमित्युदाहरन्ति तत्सर्वं धर्माद्यर्थं धर्मादिधर्मार्थं
धर्म्यं वर्णाश्रमादिधर्मयुक्तमित्यर्थः । धनं भगवदाराधनात्मकं
इन्द्रियाणि यद्यपि दर्शनादिभिः पञ्चभिर्ज्ञानेन्द्रियवृत्तिभिः सङ्कल्प-
व्यवसायाभ्यामन्तःकरणवृत्तिभ्यां चेत्येतैर्यो गृहेषु यः
सांसारिक उपभोगस्तेन कुनाथस्य कुबुद्धेरत एवाजितात्मनः
अजितेन्द्रियस्य वयास्य पुरुषस्य सम्बन्धि विलुम्पन्ति अपहरन्ति ॥ २ ॥

गोमायवो यत्रेति एतद्व्याचष्टे । अथ चेत्यर्थान्तरोपन्यासे
नाम्ना दाराः पत्यादयः कर्मणा तु वृकाः शृगालाश्च एते इत्यर्थः
वृकशृगालसधर्म्यमेवाह । अनिच्छत इति । कुटुम्बिनः पुत्रादयः
कदर्यस्यातिलुब्धस्यानिच्छतोऽपि आत्मापहारमितिशेषः क्वचिदिति
भावः मिषतः पश्यतः सतः संरक्ष्यमाणमुरणमिव हरन्ति
स्वशेषत्वेन धनं सन्तस्तत्स्वरूपं भगवच्छेषत्वैकरूपमपहरन्ती-
त्यर्थः ॥ ३ ॥

प्रभूतवीरुत्तृणगुल्मगह्वर इत्येतद्व्याख्यातुं तादृशगृहमस्य
प्रसिद्धक्षेत्रतुल्यतामाह । यथाहीति । अनुवत्सरं प्रतिवर्षं कृष्य-
माणं हलकर्षणपूर्वकं ... संस्कृतमपि क्षेत्रमदग्धानि न
दग्धानि बीजानि तृणमूलानि यस्मिन् तथाभूतं सत्पुनरावापकाले
बीजावापकाले यथा गुल्मादिभिः ... भवत्येवं गृहमरूपं

श्रीराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

...क्षेत्रतुल्यं कुतः हि यस्मात् यस्मिन् ... गतं मूषकैः नश्यन्ति कुतो ... कामकरण्डः कामानां करण्डः यथा ... परिमितो न हीयते एवमत्र कर्म... कामानां पेटिकेत्यर्थः तत्रैवंभूते ... दंशमशकतुल्यैरपसदैर्नीचैरुपद्रुत इति ... पच्यमानः पाच्यमानः बहिःप्राणाः धनधान्यादि... ...रपहृतसस्यधान्यधनवान् भवतीत्यर्थः ... धनस्य बहिःप्राणा इत्युक्तम् ॥ ४ ॥

...गन्धर्वपुरमित्युत्तरार्द्धं व्याचष्टे । कचिदिमं संसारं ... भ्राम्यन्नविद्यादिभिः यदुपरक्तं तेन मनसा ...भिमानकर्मविषयाभिलाषः कर्म पुण्यापुण्यकर्म ... स्वशरीरं पुत्रादिशरीरं गन्धर्वनगरवदनुपलब्ध... थः नित्यत्वरूपं वस्तु यस्य तं मिथ्यादृष्टि... मिथ्याभ्रमयुक्तः उपपन्नार्थं नित्यं पश्यतीत्यर्थः ॥ ५ ॥ ... प्रश्नाद्युचितमर्थान्तरमाह । तत्रेति । तत्र ... सदातपोदकं मृगतृष्णाजलं तत्तुल्यान्विषयान्प्रा... नयासक्तः मत्तुपभावत्यन्वेषयतीत्यर्थः ॥ ६ ॥

... व्याचष्टे । कचिच्चेति । कचिच्चाशेषाणां ... पुरीषविशेषमग्नेर्धिष्ठितस्य पुरीषस्यैव ... गुणस्य तेन निर्मिता पुरीषविषया मतिर्यस्य सः ... मिच्छति सुवर्णस्याग्नेः पुरीषत्वं च वित्त... ...सुर्मातरिश्वना समीध्यमान ओजसा पिबति ... ...दयं सुवर्णमिति वक्ष्यति तत्र दृष्टान्तः ... परवशः उल्मुकमहरं पिशाचमिवेति शीतातुरः ... जाज्वल्यमानं ततस्ततो धावन्तमुल्मुकपिशाचम... ...ति न तु तत्प्राप्नोति कथञ्चित् प्राप्तश्चेत्तं अर्जित... सुवर्णमनुधावन्नपीत्यर्थः ॥ ७ ॥

...ति व्याचष्टे । अथेति । निवासादिषु मनो... ...निवेशो यस्य तथाभूतस्ततोऽस्यां संसार... ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

...योक्तमेव प्रश्नपूर्वकं कथयति । यो ... ...मिति हरः ... वर्त्तीनि बहुवित्तेन सार्द्धं ... परोक्षविषयेण वाचो ... संसारमार्गः ... निर्णीतार्थः ... ...जनेन ... ...परोक्षप्रिया इव हि ... ...हवा इत्यनेनाह । एतदेवाह ... ...उक्तार्थस्य ... ...पुनः कथ... ॥ १ ॥ ...

...ष्टिता पृष्टः श्री... ...वाचेति ...

...श्रीविजयध्वज... ...त्यायान्तरयो यो हवा इति ... स्वयं ...

...कृपया उवाच (१) मून इति । सूतः किमुवाचेति तत्राह । सहो-... ...से श्रीशुकः राजप्रश्नपरिहाराय यदुवाच तदहमपि ... ...रार्थे वक्ष्यामीत्येतमर्थं हेत्यनेन सूचयति । दुरत्ययेऽध्वनीत्य-... ...प्रायं कथयति । य इति । य एव प्रसिद्धो जीवोऽसुगमे ...ऽध्वन्यापतित इत्यन्वयः अजयेत्यस्य विवरणं माययेति कस्य-... ...शङ्कानिवृत्तये ईश्वरस्येति आच्छाद्य निक्षिपति स्फुरदा-... ...त्मन्यात्मनानिरासार्थोक्तं वशवर्त्तिन्येति माया कथङ्कारं ...पपत्तिं दर्शयति । देहेति । देहात्ममानिनां देह एवा-... ...मन्यमानानां सम्बन्धिभिः सत्त्वादिगुणविशेषैर्विकल्पितानि ... यानि कुशलाकुशलमिश्राणि कर्माणि तैर्निमित्ताभि-... ...भिरुपलक्षितस्तासां संसारादिलक्षणोऽनादि-... ...री यस्तदनुभवस्य द्वारभूतेन श्रोत्रादिषडिन्द्रियवर्गेण द्वारेण ...ऽध्वन्यापतित इत्यर्थः समवहारो मिश्रं स्वदेहनिष्पादितकर्म-... ...लक्षणः सर्वेति व्याख्यातं न शर्म विन्दतीत्यस्यार्थमाह । ... हरिगुरुचरणारविन्दयोर्मधुकर इव निरन्तरसेवकाः ... ...मनुगमनयोग्यमार्गे सेवालक्षणं नाद्याप्यवरुन्ध ... ...विफलाश्च बहवश्च योगा उद्योगा ये तन्निमित्ततः ...तापानामुपशमनीं नाशकरीम् । यस्यामिमे षड्वित-... दर्शयति । यस्यामुहर्षेति ॥ १ ॥

...धर्ममाचरन् विलुम्पन्तीत्यन्वयः धर्मौपयिकं धर्म-... ...सांपरायिकं मोक्षोपयोगि । एतदेवाह । यत्परमेति कथं ...नेति सङ्कल्पो मनोरथः दर्शनादीन् । समवायेन ... ग्राम्योपभोगो यस्तेन ॥ २ ॥

...मायच अजत्यस्यार्थमाह । अथेति ॥ ३ ॥

...त्यस्यार्थमाह । यथा ह्यनुवत्सरमिति । आवपन-... ...बीजप्रक्षेपं ... य एव आवसथोऽपकानां कामानां करण्डः ...निमित्तपात्रविशेषः तत्रावसथे कचिच्च गन्धर्वपुरमित्य-... स्यार्थमाह । कचित्परिवर्त्तमान इति ॥ ४—६ ॥

कचिच्च कचिच्चासुहरोल्मुकग्रहमित्यस्यार्थमाह । कचिच्चेति । अशे-पदोषाणां निपदनं स्थानं (२) पुरुषविशेषं देहलक्षणं पुरुषाकार-विशिष्टस्य तस्य देहस्य वर्णगुणः कान्तिगुणस्तेन उल्मुकपि-शाचमुपादित्सति सुवर्णमिव पुरुषविशेषमुल्मुकपिशाचमुपादि-त्सतीति वा अग्निकामवत्कामः अशेषदोषाणां पात्रीभूतं पुरुष-विशेषाकारमुल्मुकपिशाचमग्निवज्ज्वाज्वल्यमानं दृष्टान्तिकमुपा-गम्य सुवर्णबुद्ध्योपादातुमिच्छति शीतार्त्तोऽग्निमिव दृष्टं दुःसहं शीतं स्यात्तदेव मुक्तिरिति भावः पुरुषविशेषं स्त्रियाख्यं प्राप्य भोगार्थं सुवर्णं स्वीकरोति अग्निसेवाकाम उल्मुकपिशाचमि-वेति वा ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्रेति । तद्वस्त्रं गन्धर्वेण इंद्यत इत्यर्थः बहुकृच्छ्राधिगतं यत्किञ्चित् पुरुषधनं वर्त्तते तस्मात्साम्परायिकं भवति कोऽसौ धर्मस्तत्राह । साक्षात् परमेवेति ॥ १—६ ॥

पुरीषविशेषं सुवर्णमुपादित्सतीत्यनेनाग्निकामेति दृष्टान्तेन न सुवर्णान्तरं अन्यार्थ्यं दर्शयति । तच्च श्रीभगवत्कृपयाद्भिमयं तेयं साम्परायिकमित्याद्युक्तत्वात् ॥ ७—८ ॥

---

(१) एतन्मतेऽत्र सूत उवाचेति वर्त्तते तदनुसारेणाह ।

(२) पुरुषविशेषमित्यन्मतेमूले ।

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

दस्युक्रोष्ट्रप्रभृतिभिरुक्तैः सह चतुर्दशे ।
देहेन्द्रियकुटुम्बाद्यास्तद्दृष्टान्ता निरूपिताः ॥

स श्रीशुको ह स्पष्टमुवाच स एष प्रसिद्धो जीवलोकः संसाराटव्यां गतः सन्नद्यापि हरिरूपस्य गुरोश्चरणारविन्दे ये मधुकरा गुरुभजनासक्ता इत्यर्थः । तेषामनुकूलां पदवीं नावरुन्धे न प्राप्नोतीत्यन्वयः । तेन श्रीगुरुचरणाश्रयं विना संसाराटव्यां भ्रमत्येवेति भावः । कीदृशः देहात्ममानिनामध्वन्यापतितः दुर्गाध्वात् प्रसिद्धदुर्गमार्गे इव सत्त्वादिगुणविशेषैर्विकल्पितानि विभक्तानि यानि कुशलाकुशलविमिश्रकर्माणि तैर्विनिर्मिताभिर्विविधदेहावलिभिर्वियोगसंयोगतदुत्थसुखदुःखरूपस्थानादेः संसारस्य योऽनुभवस्तस्य । ननु जीवसंसारस्य मायाकृतत्वात् तां मायादेवीमेव जीवः प्रपद्यतां सैव प्रसन्ना तं बन्धान्मोचयिष्यति । किं हरिगुरुचरणप्रपत्त्या तत्राह । विष्णोर्वशवर्त्तिन्या मायेति । संसारमोचने न तस्याः स्वातन्त्र्यमिति भावः । यदुक्तम् ।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।

इति गीतायामत्र श्लोके एवकारेण समुच्चयपक्षोऽपि निरस्तीकृतः विफलाश्च बहुविप्रतियोगा बहुविघ्नाश्च ईहाः चेष्टा यस्य सः ॥ १ ॥

यस्यामिमे इति व्याचष्टे । यस्यामुहेति । यथा पुरुषस्य बहुकृच्छ्राधिगतं धर्मोपयोगि धनं दस्यवो विलुपन्ति तत्तथा इन्द्रियनामानः षडेते कर्मणा स्वस्वव्यापारेण दर्शनादिना अजितात्मनो जनस्य धनं विलुम्पन्तीत्यन्वयः । तत्पदस्य वैयर्थ्याभावाय व्यवहितान्वयः बोद्धव्यः । धनमेव किमित्यपेक्षायामाह । साक्षादिति । साम्परायेऽपरलोकार्थं तद्धर्मं भगवत्सेवाहमित्यर्थः । सङ्कल्पो मनसः समवसायो व्यवसायः स च बुद्धेर्व्यापारः । यथा कुनाथस्य कुनायकस्य अजितात्मनः अवशीकृतात्मीयलोकस्य वणिक्सार्थस्य चौरा हरन्ति तथा ॥ २ ॥

गोमायवो यत्रेत्येतद्व्याचष्टे । अथ चेति । अपहरन्तश्चेत्यर्थः । संरक्ष्यमाणा अवरुद्ध्यादिभिस्तथा वयमनद्यं पाल्या एव भवामेति न्यायमिषेण अपहरन्तीत्यस्य कर्मपदं पूर्वोक्तं स्वार्थिकमन्नगुडघृतादिसम्पुटं ज्ञेयम् । अत्र वृकाणां गोमायूनाञ्च दुर्वारत्वस्याधिक्यन्यूनत्वाभ्यां भेदो ज्ञेयः ॥ ३ ॥

प्रभूतवीरुत्तृणगुल्मगह्वर इत्येतद्व्याचष्टे । यथेति । एष आवसथः आश्रमो यस्मात् कामानां करण्ड इति । यथा छिन्नत्वेऽपि गन्धो न क्षीयते एवमत्र वासनानामक्षीणत्वात् न कर्मगर्त्तान्निर्गन्तीत्यर्थः ॥ ४ ॥

कठोरदंशैरित्येतद्व्याचष्टे । अथेति । उपसर्गैरुपद्रूयमानः पीड्यमानो बहिःप्राणो वित्तं यस्य सः । क्वचिच्च गन्धर्वपुरं प्रपश्यतीत्येतद्व्याचष्टे । क्वचिदिति । परिवर्त्तमानः परावृत्य परामृशन् उपरक्तं यन्मनस्तेन न उपपन्नोऽर्थो वित्तं यत्र तं नरलोकं गन्धर्वनृपादिकं पश्यति ततश्च तदुपासनया वाञ्छितवित्तादिकमुपपन्नमिति गन्धर्वनगरमिव तमनुपश्यति । क्वचिच्च गन्धर्वपुरं प्रपश्यतीत्येतदुपलक्षितमर्थान्तरं दर्शयति । आतपोदकं मृगतृष्णाजलं तत्तुल्यान् विषयानुपधावति ॥ ५—६ ॥

क्वचित् कदाचिच्चासुरयोः सुवर्णमित्येतद्व्याचष्टे । क्वचिच्चेति । पुरीषविशेषमन्वेषति तस्य पुरीषस्येव लोहितो रूपं यस्य रजोगुणस्य तेन निर्मिता तद्विषया मतिर्यस्य सः । सुवर्णमिति परकीयद्रव्यगात्रस्योपलक्षणमादातुमिच्छति नरके पतितुमिच्छतीति भावः । शीतादित्राणार्थमरण्ये भ्रमन् अग्निकामेन तरौ यथा उल्मुकतुल्यं पिशाचमग्निबुद्ध्या धावति मर्त्तुमिति भ ॥ ७ ॥

निवासतोयद्रविणात्मबुद्धिरित्येतद्व्याचष्टे । अथ ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

समवेतानुकल्पेन निर्दिश्यतामित्यनेन प्रार्थितः स चतुर्दशेनाध्यायेन उवाचेति सूक्तोक्तिः । दुरत्ययेऽध्वनि निवेशित इति यदुक्तं तद्व्याचष्टे । य एषः प्रसिद्धो वणिक्सार्थोऽर्थपरः अर्थेन हेतुभूतेन अध्वनि दुर्गाध्वन्यापतितो भव यथा तथा अयामिति जीवलोकः भगवतो वशवर्त्तिन्या मायया हेतुभूतया श्मशानवदशिवतमायां संसाराटव्यां गतः श्रेयः तस्यां संसाराटव्यामाध्यात्मिकादयस्तापास्तेषामुपशमनीं हरिरेव गुरुस्तस्य चरणारविन्दे ये मधुकराः सेवकास्तेषां वर्त्मा हरिभक्तिद्वारा हरिप्राप्तिरूपामद्यापि नावरुन्धे न प्राप्तो कथम्भूतः जीवलोकः देहात्ममानिनां सत्त्वादिगुणविशेषेण कल्पितानि विभक्तानि यानि कुशलाकुशलमिश्राणि कर्माणि ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ।

इति श्रीमुखोक्तरीत्या विनिर्मिताभिर्विविधदेवमनुष्यादिदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारस्तदनुभवस्य ... हेतुभूतेन षडिन्द्रियवर्गेण दुर्गाध्ववदसुगमे संसाराटव्यन्तर्गते अपवर्गमार्गे पतितः पुनः कथम्भूतः स्वदेहानुष्ठापितानां कर्मणे फलभोगानुभवो यस्य सः पुनः कथम्भूतः विफलाश्च प्रतियोगाः बहुविघ्नाश्चेष्टा यस्य सः ॥ १ ॥

यस्यामित्यादि व्याचष्टे । ते लोके प्रसिद्धाः दस्यवः अजितात्मनः असंयतचित्तस्य कुनाथस्य कुबुद्धेः बहुकृच्छ्राधिगतं धर्मोपयोगि धनं कारणं यत्किञ्चिद्धनं संचितं तथा लुम्पति तथा अजितात्मनः साक्षात्परमपुरुषाराधनलक्षणो यः साम्परायः धर्मः तं तु साम्पराये मुक्तौ साध्ये साधनतया संहरन्ति तद्धर्मं स्वाश्रमधर्मानुष्ठापितं धनं तस्य भवन्ति येते षडिन्द्रियनामानः कर्मणा दस्यव एव दर्शनादिभिः आत्मीयमपि भोगस्तेन विलुम्पन्ति ॥ २ ॥

गोमायवो यत्र हरन्ति सार्थकमित्येतद्व्याचष्टे । नाम्ना दारादयः कर्मणा तु वृकादयः कदर्य्यस्य मांसलुब्धस्य ॥ ३ ॥

प्रभूतवीरुत्तृणगुल्मगह्वरे कठोरदंशैर्मशकैरुपद्रुतः क्वचित् गन्धर्वपुरं प्रपश्यतीत्येतद्व्याचष्टे । असुरतरं प्रति दग्धानि गुल्मतृणादिवीरुधानि यस्मिन् यस्मात् योऽयं गृहस्थाश्रमः एष कामानां करण्डो भाजनं विशेषः यथा कर्पूरच्छन्नेऽपि परिमलो न क्षीयते एवमत्र वासनाया नाशाभावान्न कर्मगर्त्तान्निर्गन्तीति भावः ॥ ४ ॥

तत्र गृहाश्रमे गतः पतितः दंशमशकसमाख्यैरुपसर्गैः ... अनाचारैश्च तैर्मनुजैः शालगोदुग्धिभिश्च कर्णोपकर्णभाषमाणाः ... वहिःप्राणाः धनधान्यादिकं येषां यस्य स तथा ...

क्वचि त्वात्यौपम्यया प्रमदयाऽऽरोहमारोपित... ...सा रजनीभूता इवासाधुमर्यादो रजस्वला-क्षोऽपि देवता अतिरजस्वलमतिर्न विजानाति ॥ ९ ॥ ...कृदवगतविषयवैतथ्यः स्वयं परा... ...विभ्रंशितस्मृतिस्तयैव मरीचितोयप्रायांस्ताने-...भिधावति ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

...पूर्वाध्यायार्थमनुवदन् अविद्यया देहगेहादिषु अहंममाभिमा-... ...पिता कर्मणा कर्मविवित्सया च उपरक्तेन ... तत्तुल्यं नरलोकं नरभोग्यं देहगेहादिकं ... उपपन्नो न भोक्तृनित्यतामुपगतोऽर्थः स्वरूपं ... त्यर्थः तथाप्युपपन्नं भोक्तृनित्यतामुपगतमि-... ...अनित्ये नित्यत्वदृष्टिः अनुपश्यति प्रपश्यतीति ... ...रमर्थान्तरमाह । तत्र च गन्धर्वनगरं कचिदातपोद-... ...मृगतृष्णाजलसदृशान् विषयान् पानादिलोलुपः सन् ... ५ ॥ ६ ॥

...धातुरयोल्मुकग्रहमित्येतद्व्याचष्टे । पुरीषविशेषम-... ...सुवर्णवर्णेन लोहितवर्णेन रजोगुणेन निर्मिता ... प्रवर्तिता मतिर्यस्य सः सुवर्णमुपादातुमिच्छति ... पिशाचमग्निकामेन कातरः परवश इव उल्मु-... ...अपधावतापि न लब्धः कथञ्चिल्लब्धस्तु नाशहेतु-... ...मिति भावः ॥ ७ ॥

...द्रविणेत्येतद्व्याचष्टे । निवासादिष्वनेकेषु आत्मनः ... ...भिनिवेशो यस्य सः एतस्यां भवाटव्यां परि-... ...भ्रमति ॥ ८ ॥

भाषाटीका ।

... श्रीशुकदेवजी बोले पहिले अध्याय का खुलासा अर्थ ... जैसे यह जीवलोक भगवान् ईश्वर विष्णु की बला-... माया से मोहित सुखार्थी अपने देहसे अर्जन किये ... तिनका अनुभव करनेवाला है उसकी बहुत विघ्नों-... देहात्ममानी पुरुषों के मोह करनेवाले जो सत्वादि-... ...गुण तिनसे जो भले बुरे मिश्रकर्म तिनसे प्राप्त जो ... तिनका जो संयोगवियोगरूप अनादि संसार ... अनुभव का द्वारभूत जो है इन्द्रियों का समूह तिससे ... संसारमार्गमें पड़ा हुआ वह जीव आजपर्यन्त भी ... की नाश करनेवाला जो श्रीहरि गुरुचरणारविन्द-... (भक्तों) का मार्ग तिसको नहीं ग्रहण करता है ... इन्द्रिय नामा वाले हैं सो कर्म से चोर हैं ॥ १ ॥

... प्रकार दुर्बुद्धिवाले पुरुष का साक्षात्कर्म का उपयोगी ... बहुत कष्टसे प्राप्त हुआ साक्षात् परमपुरुष भगवान् ... ...नरूप जो धर्म है तिसीको परलोक में कथन कहते ... धर्म के उपयोगी जो धन तिसको दर्शन स्पर्श श्रवण ... संकल्प निश्चय इनों से जो गृहोंका आश्र-... जिसके द्वारा खोटे नायकवाले साथै सरीके अजितेन्द्रिय-... धनको इन्द्रिय चोर सरीके लूटते हैं ॥ २ ॥

...और भी जिस संसार मार्ग में कुटुम्ब के नाम से जो स्त्री ... हैं कर्मसे वे केवल भेडिया स्यालआदीके माफिक के न ... ...जो अति लोभी कुटुम्बी के रक्षा करने पर भी उसके देखते ... को जैसे भेडिया लेजाता है तैसे धनको हरलेते हैं ॥ ३ ॥

... प्रतिवर्ष खोदने परभी बीज जिस मे नहीं दग्ध होते हैं ... फिरभी बोते समय में गुल्म तृण बीरुधों से गहनसरी-... ...जाता है तैसेही यह गृहाश्रम कर्मों का खेत है जिस मे कि ... नष्ट नहीं होते हैं क्योंकि यह घर कामनाओंकी पूरी एक ... है ॥ ४ ॥

...गृह मे डांस मच्छर के तुल्य नीच पुरुषों से टीडी ... और मूषा इत्यादि को से बाहिर के प्राण सरीका धन ... होजाता है कभी इसी मार्गमें घूमता हुआ अविद्या-... कर्मों से युक्त जो मन तिससे गन्धर्वनगरसरी-... ...स्थिर इस नरलोक को अपनी अज्ञान दृष्टि होने से सत्य-... देखता है ॥ ५ ॥

...कभी खाने पीने मैथुनादि विषयोंमें लोभी होकर मृगतृष्णा सरीके झूंठे विषयों पर दौडता है ॥ ६ ॥

कर्मों से पूर्ण दोषों का स्थान अग्नीका विष्ठा जो सुवर्ण तिसको रजोगुणी बुद्धिसे जैसे अग्नि को चाहनेवाला अगिया-वेताल को पकडता है तैसेही पराये सुवर्ण को ग्रहण करने चाहता है ॥ ७ ॥

तदनन्तर कभी निवास स्थान जल धन आदिक अनेक उपयोगी पदार्थों में अभिनिवेश करता हुआ इस संसार वनमें इधर उधर दौड़ता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कचिच्च वात्योत्थितेत्येतद्व्याचष्टे । कचिदिति । आरोहमङ्कम् तस्मिन्काले यद्रजो रागस्तेन स्वदृष्ट्यावरकेण रजन्यां रात्रौ भूता इव । इस्वपाठे रजनीभूतस्तमोमय इवातीव रजसाक्रान्त-मतिरत एव रजोव्याप्तचक्षुरिव दिक्षु स्थिता मर्यादातिक्रमसा-क्षिभूता देवता न जानाति ॥ ९ ॥

अनुपादेयमेवोपादेयतया गृह्णातीति प्रक्रमसङ्गत्यानुत्तर-श्लोकचतुर्थपादं प्रथमं व्याचष्टे । कचित्सकृदिति । कचिदातपो-दकनिभामित्यत्र मिथ्याविषयेषु लम्पटत्वमुक्तं निवासतोयेत्यत्र तदर्जनप्रयास उक्तः अत्र तु बाधितेष्वपि पुनः प्रवृत्तिरुच्यते,

क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं प्रत्यक्षमपरोक्षं वा रिपुराजकुलनिर्भर्त्सितेनातिव्यथित-कर्णमूलहृदयः ॥ ११ ॥

स यदा दुग्धपूर्वसुकृतस्तदा कारस्करकाकतुण्डाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान्-जीवन्मृतान् स्वयं जीवन्म्रियमाण उपधावति ॥ १२ ॥

एकदाऽसत्प्रसङ्गान्निकृतमतिर्व्युदकस्रोतःस्खलनवदुभयतोऽपि दुःखदं पाखण्डमभियाति ॥ १३ ॥

यदा तु परबाधयाऽन्ध आत्मने नोपनमति तदा हि पितृपुत्रबर्हिष्मतः पितृपुत्रान्वा स खलु भक्ष-यति ॥ १४ ॥

क्वचिदासाद्य दाववत्प्रियार्थविधुरमसुखोदर्कं शोकाग्निना दह्यमानो भृशं निर्वेदमुपगच्छति ॥ १५ ॥

क्वचित्कालविषमितराजकुलरक्षसाऽपहृतप्रियतमधनासुः प्रमृतक इव विगतजीवलक्षण आस्ते ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इत्यपौनरुक्त्यम् अयमेव सकृदवगतं विषयाणां वैतथ्यं [illegible]त्वं येन पराभिध्यानेन देहाभिनिवेशेन विभ्रंशिता स्मृतिर्यस्य तथैव विभ्रंशितया स्मृत्या स्मृतिभ्रंशादेव [illegible] ॥ १० ॥

अहृदयझिल्लीस्वनेत्येतद्व्याचष्टे । क्वचिदुलूकेति । अतिपरुषो रभस उत्साहस्तेनाटोपः । संभ्रमो यथा भवत्येवं रिपूणां राजकुलस्य च निर्भर्त्सितेनातिव्यथितं कर्णमूलं हृदयं च यस्य ॥ ११ ॥

अपुण्यवृक्षानित्येतद्व्याचष्टे । स यदेति । दुग्धमुपभुक्तं पूर्वसुकृतं येन तदा कारस्करो विषतिन्दुस्तत्प्रमुखा येऽपुण्यद्रुमास्तथाविधा लताश्च विषोदपानाश्च विषकूपास्तत्तुल्यान् दृष्टादृष्टप्रयोजनशून्यधनान् ॥ १२ ॥

क्वचिद्ध्रितोयाः सरित इत्येतद्व्याचष्टे । एकदा क्वचिदसतां प्रसङ्गान्निकृता वञ्चिता मतिर्यस्य सः निरुदकनदीगर्तपाते यथा सद्यः शिरः स्फुटति पश्चादपि तद्वेदनानुवर्तते एवमिह परत्र च दुःखदम् ॥ १३ ॥

परस्परं चाशपते निरन्ध इत्येतद्व्याचष्टे । यदा त्विति । अन्धोऽन्नं नोपनमति नोपतिष्ठति । पितृपुत्राणां बर्हिः कुशास्तद्वतः पितुः पुत्राणां वा कुशादितृणमात्रमपि येषु पश्यति तान् भक्षयति बाधत इत्यर्थः पितृपुत्रबर्हिष्मानिति तु पाठः सुगमः ॥ १४ ॥

आसाद्य दावमित्येतद्व्याचष्टे । क्वचिदासाद्येति ॥ १५ ॥

क च यक्षैर्हृतासुरित्येतद्व्याचष्टे । क्वचित्कालेन विषमितं प्रतिकूलतां नीतं यद्राजकुलं तदेव रक्षस्तेनापहृताः प्रियतमधनरूपा असवो यस्य विगतानि जीवलक्षणानि हर्षादीनि यस्य यक्षैर्हृतश्च इत्यप्यनेनैव व्याख्यातम् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कश्चिच्च वात्येत्यादि व्याचष्टे । क्वचिदेति । वात्योपमया चक्रवाततुल्यया प्रमदया स्त्रिया यथा वात्या रजःप्रक्षेपेणान्धीकरोत्येवं रजोगुणोत्कर्षकत्वेनान्धतामापादयन्ती तत्तुल्या प्रमदेति भावः आरोहमङ्कमारोपितः आरूढस्तस्मिन् काले यद्रजो रागस्तेन कथंभूतेन रजनीभूतेन रात्रिवदप्रकाशकेनाज्ञातमर्यादेत्यर्थः रजनीभूतइवेत्यपि पाठः तत्र तमोमय इवेत्यर्थः वीथ्ये रजन्यां रात्रौ भूता इवेत्यर्थः अतिरजसा अमतिरतीव रजसा पवासाधुमर्यादः अतो रजोव्याप्तचक्षुरिव दिक्षु स्थितान् [illegible] क्रमसाक्षीभूता देवता न जानात्यनुपादेयमर्थं पादेयतया [illegible] जानाति ॥ ९ ॥

प्रक्रमसाजात्यादुत्तरश्लोकचतुर्थपादं व्याचष्टे । क्वचिदिति । कदाचित्सकृदवगतं विषयेषु शब्दादिषु वैतथ्यं वैयर्थ्यं सुखार्थशून्यत्वं येन तथा भूतोऽपि पराभिध्यानेन देहचिन्तया विभ्रंशितस्मृतिर्विभ्रंशिता स्मृतिरात्मविषया यस्य तथैव विगलितस्मृत्या मरीचितोयप्रायान् मरीचितोयतुल्यान् अयथार्थरूपत्वेऽपि तत्त्वेनावभासमानान् तानेव विषयानभिधावति ॥ १० ॥

पूर्वार्धं व्याचष्टे । क्वचिदुलूकेति । उलूकझिल्ल्योः घूककीटयोर्ध्वनिवदतिपरुषो रभस उत्साहस्तेनाटोपः सम्भ्रमः [illegible] भवत्येवं रिपूणां राजकुलस्य च निर्भर्त्सितेनात्यन्तं व्यथितं [illegible] मूलं हृदयं च यस्य तथाभूत आस्ते तत्र प्रत्यक्षाप्रियवचनमुलूकस्थानीयं राजकुलं परोक्षाप्रियवाक्यकृत् झिल्लीस्थानीयं [illegible] कुलं विवक्षितम् ॥ ११ ॥

स इति । यथा दुग्धपूर्वसुकृतः अपूर्णपूर्वसुकृतहीन इत्यर्थः तथा कारस्करो विषतिन्दुः तत्प्रमुखा येऽपुण्यद्रुमाः तथाविधा लताश्च विषोदपाना विषकूपाश्च तत्तुल्यानुभयार्थशून्यत्वात् दृष्टादृष्टप्रयोजनशून्यानि द्रविणानि धनानि येषां तान् द्रविणं कीर्त्यर्थे दृष्टार्थे च न भवति ते उभयार्थशून्यद्रविणा अत एव जीवन्मृतान्स्वयंजीवन्नपि म्रियमाणः मृतप्रायः जीवन्मृतः उपधावति ॥ १२ ॥

क्वचिद्ध्रितोयाः सरित इत्येतद्व्याचष्टे । एकदेति । एकदाऽसतां वेदवेदबाह्यमार्गावलम्बिनां प्रसङ्गात्सङ्गान्निकृता वञ्चिता मतिर्यस्य सः व्युदकस्रोतःस्खलनवन्निरुदकनदीपतनवत् निर्जलनदीगर्ते पतितस्य न पिपासाशामकजललाभः प्रत्युत शिरःस्फुटनं च सद्यो भवति पश्चादपि तद्वेदनाद्युपलभ्यते एवमुभयत इह परलोके च दुःखदं पाषण्डं पाषण्डाभिमतं मार्गं याति प्राप्नोति स्वीकरोति । यद्वा पाषण्डकुलं प्राप्नोति तद्धर्मान् आचरतीत्यर्थः ॥ १३ ॥

परस्परं चाशपते निरन्ध इत्येतद्व्याचष्टे । यदेति । यदाऽन्नमुपनमति तदा

श्री...धवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

...मं ...स्मै नोपनमति नोपतिष्ठते परपीडयाप्य... ...तथा पितृपुत्रबर्हिष्ठान् पितृपुत्रादीनां बर्हिः कुशाः ...त्राणां कुशादितृणमात्रमपि येषु पश्यति तान् स ...त्यर्थः ॥ १४ ॥

...त्यतद्व्याचष्टे । कांश्चिदिति । कदाचिद्दावा... ...पदार्थरहितमसुखोदर्कं दुःखपरम्परायुक्तं गृहं ...इष्टालाभादिष्टानिवृत्तिजदुःखेन भृशं दह्यमानः ...मोहं मया सुकृतं न कृतमतो दुर्भगो मन्दभाग्यो- ...ति ॥ १५ ॥

...सुरित्येतद्व्याचष्टे । कश्चित्कालेन विपर्यमतं ...यद्राजकुलं तदेव रक्षस्तेनापहृताः प्रियतमध- ...प्राणा यस्य विगतानि जीवलक्षणानि हर्षा- ...एव मृतक इवास्तेऽवतिष्ठति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

...त्यस्यार्थमाह । अथेति । गृहाद्यनेकरूपैर्धका... ...नाक्रमति दुराग्रहवान् कश्चिच्च वात्योत्थितेत्यस्य... ...वात्येति । आरोहमक्षुं तत्कालरजसा विपर्यस्ते- ... ॥ ९ ॥

...) झिल्लीत्यस्यार्थमाह । कश्चिदुलूकेति । आटोपः

...नित्यस्यार्थमाह । स यदेति ॥ ११ ॥

...तोयान्यभिधावतीत्यस्यार्थमाह । कश्चित्सकृदिति ॥१२॥

...नीयाः सरित इत्येतद्विवृणोति । एकदेति । उभयत्र ...स्वस्रोतसश्चलनवत् मृगतृष्णिकाजलप्रवाहवत् ॥१३॥

...यत इत्येतत्प्रतिपत्तिः । यदा त्विति । भक्षयति ... ॥ १४ ॥

...सार्थमाह । कश्चिद्दासाद्येति ॥ १५ ॥

...विना कच यदैरिति विवृतं परैर्हतस्व इत्ये- ...व्याख्यातम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

...रजन्यां ये भूतास्ततुल्यक्रिय इत्यर्थः इवेन समा- ... ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

...वात्योत्थितेत्येतद्व्याचष्टे । वात्यया सहोपम्यमुपमा ...आरोहमक्षुं तस्मिन् काले यद्रजः रजस्तुल्यः काम- ...आच्छादकेन काष्ठा अपि दिग्देवता बहिस्सूर्याद्या ...अदृश्या इव रजस्वलास्त्रोऽन्ध इव रजस्वलमतिः कामा- ...पश्यन्तीरपि ताः न जानाति रजनीभूत इति पाठे ... ॥

...चित् क्रमश कश्चित् क्रमोल्लङ्घनेन कश्चित् पौनरुक्त्ये- ...यानं नाधगयाणीयं न हि महाटव्याः सर्व एव पन्था ...इति अत्र स्वप्रौढिमपहाय यथास्थितमेव व्या- ...मरीचितोयान्यभिधावति कश्चिदित्येनद्व्याचष्टे । कश्चि-

---

...श्रीधरस्वामिपाठापेक्षयापकश्लोकस्यक्रमवैपरीत्यं विद्यते

...देकवारमथमतं विषयाणां वैतथ्यं नैष्फल्यं येन स ...व विषयान् मरीचितोयप्रायान् पुनः पुनरभिधावति ...प...ध्यानेन देहाभिनिवेशेन विभ्रंशिता स्मृतिर्यस्य सः । तथैव ...तया स्मृत्या स्मृतिभ्रंशादेवेत्यर्थः ॥ १० ॥

...अदृश्यझिल्लीस्वनेत्येतद्व्याचष्टे । कश्चिदुलूकेति । प्रतिपरुषो ...स उत्साहस्तेनाटोपः सम्भ्रमो यत्र तद्यथा स्यात्तथा निर्भर्त्सं- ... ॥ ११ ॥

अपुण्यवृक्षानित्येतद्व्याचष्टे । स यदेति । पुण्यमुपभुक्तं पूर्वसुकृतं ...सः कारस्करो विषतिन्दुकः तत्प्रमुखा येऽपुण्यद्रुमास्तथा- ...लताश्च विषकूपास्तत्तुल्यान् दृष्टादृष्टप्रयोजनशून्यधनान् ॥१२॥

...कश्चिन्निरोयाः सरित इत्येतद्व्याचष्टे । एकदा असतां प्रसङ्गा- ...॥ वञ्चिता मतिर्यस्य सः निरुदकनदीगर्तपाते यथा सद्यः ...शिरः स्फुटति पश्चादपि वेदनानुवर्त्तते एवमिह च परत्र च दुःख- ... ॥ १३ ॥

...परस्वं आलप्सते नित्यत्र इत्येतद्व्याचष्टे । परबाधया परपीडन- ...प्रदया ये ...भिक्षया अन्धः असं नोपनमति नोपतिष्ठति पितुः पुत्राणां वा कुशादितृणमात्रमपि येषु पश्यति तान् अनुवर्तति राज...राति पदातिकानामिव पीडयति ॥ १४ ॥

...आसाद्य दावमित्येतद्व्याचष्टे । कश्चिद्दासाद्येति ॥ १५ ॥

कच यदैर्हतासुरित्येतद्व्याचष्टे । कश्चित्कालेति । विगतानि जीवनलक्षणानि हर्षादीनि यस्य सः शोकमूर्छितो वा ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कश्चिच्च वात्योत्थितेत्येतद्व्याचष्टे । तत्कालरजसा तात्का- लिकेन रागेण रजनीभूततमोमय इव अतिरजस्वलमतिः अतीव- रजोव्याप्तबुद्धिः असाधुमर्यादः दिग्देवताः दिक्षु स्थिताः मर्यादा- तिक्रमसाक्षिदेवता न जानाति यथा वात्योत्थितरजसाच्छन्ननेत्रो दिशो न जानाति तद्वत् ॥ ९ ॥

अदृश्यझिल्लीत्युत्तरश्लोकस्य मरीचितोयान्यभिधावति कश्चि- दिति चतुर्थपादं ...प्रथमं व्याचष्टे । कश्चित्स्वयमेव सकृदवगतं विषयेषु ...स्पर्शादिषु वैतथ्यं वैप- रीत्यममङ्गलत्वं ...अपि पराभिध्यानेन ...ध्यानेन विभ्रंशिता स्मृतिर्यस्य सः ...केषु अमङ्गलेषु विषयेषु पुनः सुखबुद्धिस्तथैव ...स्मृत्या स्मृतिभ्रंशादेव मरीचितो- यतुल्यान् ...भिधावति ॥ १० ॥

अदृश्यझिल्लीस्वनेत्येतद्व्याचष्टे । उलूकझिल्ल्योः स्वनवदतिपरुषा रभसः उत्साहस्तेनाटोपः ...यथा स्यात्तथा रिपूणां राजकु- लस्य च निर्भर्त्सितो ...कर्णामूलं हृदयं च यस्य सः तथा- भूतो भवति ॥ ११ ॥

अपुण्यवृक्षान् ...व्याचष्टे । स यदेति । स भवाटव्यां प्रविष्टः यदा पुण्यमुपभुक्तं पूर्वसुकृतं येन सः अवशिष्टेन दुष्कृतेन प्रवर्त्तितः कारस्करा ...दयो येऽपुण्यद्रुमाः नादृश्यो लताश्च विषोदपानाः ...तत्सादृश्यात् दृष्टादृष्टप्रयोजनव- र्जितवित्तानुपधावति ॥ १२ ॥

कश्चिन्निरोयाः सरित ...व्याचष्टे । एकदेति । एकदा कश्चित् असतां ...सङ्गाभिकृता वञ्चिता मतिर्यस्य सः ...यथा निर्जलनदीगर्ते न जललाभः प्रत्युत ...इति पश्चादपि तद्वेदनानुव-

कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सविति स्वप्ननिर्वृतिलक्षणमनुभवति ॥ १७ ॥

क्वचिद्गृहाश्रमकर्मचोदनातिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्षितमनाः कण्टकशर्कराक्षेत्रं प्रविशन्निव सीदति ॥ १८ ॥

क्वचिच्च दुःसहेन कायाभ्यन्तरवह्निना गृहीतसारः स्वकुटुम्बाय क्रुध्यति ॥ १९ ॥

स एव पुनर्निद्राजगरगृहीतोऽन्धे तमसि मग्नः शून्यारण्य इव शेते नान्यत्किञ्चन वेद शव इवापविद्धः ॥ २० ॥

कदाचिद्भग्नमानदंष्ट्रो दुर्जनदन्दशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञानोऽन्धकूपेऽन्धवत्पतति ॥ २१ ॥

कर्हि स्म चित्काममधुलवान्विचिन्वन्यदा परदारपरद्रव्याण्यवरुन्धानो राज्ञा स्वामिभिर्वा निहतः पतत्यपारे निरये ॥ २२ ॥

अथ च तस्मादुभयथापि हि कर्मास्मिन्नात्मनः संसारावपनमुदाहरन्ति ॥ २३ ॥

मुक्तस्ततो यदि बन्धाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यनवस्थितिः ॥ २४ ॥

श्री...कृतसिद्धान्तप्रदीपः ।

तेन तथेह ... स दुःखदे पाखण्डे पाखण्डिनां मार्गमभियाति ॥ १३ ॥

परस्परं चाल... इत्येतद्व्याचष्टे । यदा तु परबाधयापि अन्धः ... नोपतिष्ठति तदा पितृपुत्रसम्बन्धिभिर्हि कुशलमात्र...पि पितॄन् पुत्रांश्च भर्त्सयति पीडयतीत्यर्थः ॥ १४ ॥

आसाद्य दावमित्येतद्व्याचष्टे । प्रियार्थविधुरमनुकूलार्थरहितम् ॥ १५ ॥

क्वच यक्षैर्हृतासुरित्येतद्व्याचष्टे । क्वचिदिति । कालेन विषमितं प्रतिकूलतां नीतं यद्राजकुलं तदेव रक्षस्तेनापहृता प्रियतमाः प्रीतास्वः धनात्मकाः असवो यस्य सः विगतानि विनष्टानि जीवलक्षणानि हर्षादीनि यस्य सः प्रमृतक इवास्ते अनेनैव सुरैर्हृतस्व इत्यपि व्याख्यातम् ॥ १६ ॥

भाषाटीका ।

कहींपर चक्रवाकसरी की स्त्री जब उसको अपने अङ्कपर रखलेती है तब तिस ... के कामभंग से अन्धासा होकर साधु मर्यादा को छोड़कर अत्यन्त बुद्धि के नष्ट होजाने से सब दिशों की कर्म साक्षी देवतों को नहीं देखता है ॥ ९ ॥

कहींपर एक एक वखत विषयों की अभिलाषा जानने पर भी फिर आपही शरीर अभिमान से मतिके भ्रष्ट होने से उसी भ्रष्टमति से उन्हीं मृगतृष्णा सरीके विषयोंपर दौड़ता है ॥ १० ॥

कहींपर झिंगारी घुग्घू सरीके अति कठिन प्रत्यक्ष से अथवा अप्रत्यक्ष से शत्रों को सुनाकर अति सम्भ्रम को प्राप्त करादेने वाले शत्रु या राजपुरुषों के मर्मभेदी युक्त शब्दों को सुनकर कानों की तथा हृदय की पीड़ा को भोगता है ॥ ११ ॥

जब उसके पूर्व सुकृत सब नष्ट होजाते हैं तब पातकर काकतुण्ड नाम के कोई खोटे वृक्ष खोटी लता विषैले जल के कुआ जैसे खोटे हैं तैसे इस लोक परलोक दोनों के प्रयोजन से रहित धनी जो कि जीतही में मरे सरी के हैं उनके पास आप भी जीते ही मरा हुआ सरीका जाता है ॥ १२ ॥

कोई एक वखत असत्पुरुषों के संग से मोहित मति होने से बिना जल की नदी में गिर सरीका होकर दोनों लोकों में दुःखदायक पाखण्ड मत में चला जाता है ॥ १३ ॥

जब दूसरे की या काल की बाधा से अपने को नहीं मिलता है तब पिता अथवा पिता के पुत्रों की वस्तु की इच्छा से उनको पीड़ा देता है ॥ १४ ॥

कभी जंगल की अग्नि सरी के घरको प्राप्त होकर जिसमें कि प्रियवस्तु नहीं है पीछे भी सुख नहीं होता है तिसको देखकर शोकाग्नि से जलकर बड़े दुःख को प्राप्त होता है ॥ १५ ॥

कभी काल के विपरीत होने से कृपिन जो राजकुल सोई राक्षस सरीके होते हैं वे जब इसके अतिप्रिय धनरूप प्राणों को हर लेते हैं तब जीवित दशा से रहित मृतक सरीका होरहता है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्वचिच्च गन्धर्वपुरं प्रविष्ट इत्येतद्व्याचष्टे । कदाचिन्मनोरथप्राप्तं पित्राद्यसदेव सदिति मत्वा पूर्वं गन्धर्वपुरवत्क्षणदर्शनमुक्तमिदानीं तन्निमित्तसुखासक्तिरुच्यत इति भेदः ॥ १७ ॥

चलन् क्वचिदित्येतद्व्याचष्टे । क्वचिद्गृहाश्रमे याः ... माज्ञतासामतिभरोऽतिविस्तारः स एव गिरिस्तमारुरुक्षन् गन्तुमिच्छन् ॥ १८ ॥

[illegible]धरस्वामिकृतभावार्थदीपिका ।

[illegible] वह्निनेति व्याचष्टे । कश्चिच्च दुःसहेनेति ॥ १९ ॥

[illegible] इत्येतद्व्याचष्टे । स एवेति ॥ २० ॥

[illegible] शेते इति व्याचष्टे । कदाचिदिति । मानो गर्व एव [illegible] [illegible]त्वात् भग्ना मानदंष्ट्रा यस्य अत एव न लब्धो निद्राया [illegible] येन ॥ २१ ॥

[illegible] क्षुद्ररसानित्येतद्व्याचष्टे । कर्हिस्मिंश्चित्काममधु-[illegible] निहतो भवति तदा मद्य एव निरये पतति ॥ २२ ॥

[illegible]कस्य कर्मणः संसारहेतुत्वं स्फुटयति । अथ चेति। [illegible] अथ अनन्तरमेव उभयथा इह च परत्र [illegible] प्रवृत्तिमार्गे संसारस्याद्यपर्व जन्मक्षेत्रं कर्मोदाह-[illegible] ॥

[illegible] प्रतिलभ्यमान' इत्येतद्व्याचष्टे । मुक्त इति । यदि [illegible] भवति तर्हि ततः सकाशादन्यो हरति तस्मादप्यन्यः [illegible] [illegible] नत इत्यर्थः ॥ २४ ॥

[illegible]श्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

[illegible] इत्युत्तरश्लोकपूर्वार्धं व्याख्यातप्रायमित्य-[illegible] व्याचष्टे। कदाचिदिति। कश्चिद्सत्कालान्तरानव-[illegible] पुरुषान्तराननुभाव्यत्वेन चासत्स्वप्नद्रष्टृकानु-[illegible] कालमात्रावसायि चेति यावत् मनोरथेन मनोव्यापारेण [illegible]कल्पात्मकेन उपगतं प्राप्तं स्वप्रदृष्टकर्मानुसारिसङ्कल्प-[illegible]मनोरथानुसारिभगवत्सृष्ट्या प्राप्तमित्यर्थः ईदृशं [illegible] मन्यान इति शेषः कालान्तरावस्थायिपुरुषान्त-[illegible]तुल्यमतिरित्यर्थः स्वप्ननिर्वृत्ति स्वप्नपितृपुत्रा-[illegible] [illegible]मनुभवन्ति स्वप्नस्य गन्धर्वनगरतुल्यत्वं च [illegible]स्थायित्वेनान्यानुभाव्यत्वेन चात्र विवक्षितम् । [illegible]यतं चिरं न वसन्ति कश्चित् क्षणमवस्थितव-[illegible] तनस्तेषां निवासस्थानापरपर्यायं नगरं न [illegible]तरपुरुषानुभाव्यं चेति वदन्ति च ॥ १७ ॥

[illegible] पूर्वार्धं व्याचष्टे । कश्चिदिति । कदाचिद्-[illegible] कर्मणां चोदना विधयस्तासामतिभरो विस्तारः [illegible] आरोढुमिच्छन् तदन्तं गन्तुमि-[illegible] शरीरायासयज्ञादिकर्माण्यारभ्य यावत्समा-[illegible] लौकिकैर्लोकमत्रैर्व्यसनैर्दुःखैरन्तरायभूतैः पुत्र-[illegible] कर्षितमनाः पीडितचित्तः कण्टकशर्कराक्षेत्रं [illegible] मारुरुक्षन्मध्ये कण्टकैः शर्करादिभिः सूक्ष्मपा-[illegible] प्रविष्ट इव सीदति खिद्यति ॥ १८ ॥

[illegible] व्याचष्टे । कश्चिच्चेति । कदाचित् दुःसहेन सोढु-[illegible]भ्यन्तरवह्निना शरीरमध्यपरिवर्तिजाठराग्निना [illegible]तबलः कार्श्यं प्राप्तः स्वकुटुम्बाय भार्यायै [illegible]

[illegible] इत्यस्य पूर्वार्धं व्याचष्टे । स एवेति । स एव [illegible]माणा एव। यद्वा कुटुम्बाय क्रुध्यन्नेव निर्द्रव्याज-[illegible] अन्धे तमसि अन्धयतीत्यन्धं स्वपराप्रकाशं [illegible] [illegible]हिमग्नः शून्यारण्ये निर्जनेऽरण्य इव शेते-

[illegible]दपि न वेद किं स्वहमित्येतावन्मात्रमवभासते न तु [illegible]बाह्याकारं जानाति तात्कालिकमस्य देहं वक्ष्यति [illegible] शवः दूरतः परिहृतः शव इवेति ॥ २० ॥

[illegible] व्याचष्टे । कदाचिदिति । कश्चित् दुर्जना [illegible] [illegible]काः सर्पाश्चयो दशत्स्वभावास्तैर्भग्नो मानो गर्वः स [illegible] यस्यात एवालब्धो निद्रायाः क्षणो येन व्यथितं [illegible] तत्र क्षीयमाणं सङ्कोच्यमानं विज्ञानं यस्य सः [illegible] महति दुःखे पततीत्यर्थः ॥ २१ ॥

[illegible] कर्हिस्मांश्चित् क्षुद्ररसानिति श्लोकं व्याचष्टे । कर्हिचित्स्मेति । का[illegible] विषयोपभोगस्तेन ये मधुलवाः सुखलेशास्तान्विचिन्वन्नन्वे-षयन् यदा परदारान् परद्रव्याणि चावरुन्धानः श्रीकर्णुमारममाणः [illegible] स्वामिभिः परैर्वा निहतो भवति तदाऽपारे निरये नरक-प्राये कारागृहे निपतति राजादिभिर्निहतः कारागृहादिबद्धो भवतीत्यर्थः ॥ २२ ॥

मुक्तस्तु बन्धादित्युक्तेः प्रसक्तात्प्रवृत्तस्य कर्मणः संसारहेतुत्वं स्फुटयति । अथ चेति । यस्मादेवं तस्मादयमनन्तरमेव उभयथा इह [illegible] प्रवृत्तिमार्गे संसारस्याद्यपर्व जन्म क्षेत्रं कर्मोदा-हरन्ति ॥ २३ ॥

तत्रापि कृच्छ्रात्प्रति[illegible] इत्येतद्व्याचष्टे । मुक्त इति । यदि बन्धान्मुक्तो भवति तर्हि ततः [illegible] अन्य उपाधिकमपि अहरति तस्मादपि विष्णुमित्रोऽन्यो हरति इत्यनयार्थ [illegible]तिः नत्वसौ भोक्तुं लभत इत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कश्चिच्च गन्धर्वपुरमित्येतद्व्याख्याति । कदाचिन्मनोरथेत्या-दिना ॥ १७ ॥

कांश्चिद्गृहाश्रमेत्यादिना चलन् कश्चिदित्येतद्विव्रियते । गृहा-श्रमचोदितकर्मार्थयत्नातिभारा गिरयस्तानारुरुक्षन् ॥ १८ ॥

पदेपदेऽभ्यन्तरवह्निनेत्येतद्व्याख्यातम् । कश्चिच्च दुःसहेनेत्यादिना गृहीतसारः गतधैर्यः ॥ १९ ॥

कश्चिन्निगीर्णो [illegible] स एवेत्यादिना । क्वचित्स्म शेते इत्येतद्व्याख्याति । कश्चित्क्षणमात्र इत्यादिना निद्राक्षणाः निद्राव-क्षणावसरः ॥ २०—२१ ॥

कर्हिस्मिंश्चिदित्य[illegible] । कर्हिस्मिंश्चित्कामेत्यादिना । काममधुलवानिति [illegible] इति कामा विषयास्त एव मधुलवा मकरन्द[illegible] ॥ २२ ॥

तत्रापि कृच्छ्र[illegible] । अथ चेति ॥ २३ ॥ २४ ॥

श्रीमद्[illegible]सारार्थदर्शिनी ।

कश्चिच्च गन्ध[illegible]द्व्याचष्टे । कदाचिदिति । मनोरथप्राप्तं पित्र[illegible] सतु पुनः परलोकादा-गतमिति मत्वा [illegible] ॥ १७ ॥

चलन् कश्चि[illegible] गृहाश्रमे याः कर्मचोदना-स्ताभिः प्राप्तो यो[illegible] विवाहादिर्गिः स एव गिरि-स्तमारुरुक्षन् त[illegible] लोकानां प्रतिवेधिजनानां

कश्चिच्च शीतवाताद्यनेकाधिदैविकभौतिकात्मीयानां दशानां प्रतिनिवारणेऽकल्पो दुरन्तचिन्तया विषण्ण आस्ते ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

व्यसनं तादृशगृहकर्माशक्तिस्तेन कर्षितमनाः। एते सर्वे तिष्ठार्थं गृहकर्म कुर्वन्ति अहं कथं न करोमीति विक्षुब्धचित्तः ॥ १८ ॥

पदेपदेऽभ्यन्तरवह्निनेत्येतद्व्याचष्टे। कश्चिद्दुःसहेनेति। प्लुष्टः सारः दग्धधैर्यः ॥ १९ ॥

कश्चिन्निगीर्ण इत्येतद्व्याचष्टे। स एवेति। अपविद्धः त्यजनेस्थकः ॥ २० ॥

दष्टः स्म शेते इति व्याचष्टे। कदाचिद्भग्नेति ॥ २१ ॥

कर्हिस्मचित् क्षुद्ररसानित्येतद्व्याचष्टे। कर्हिस्मचित् कामेति ॥ २२ ॥

अथ चेति यस्मादेवं तस्मादुभयथापि पापप्रकारेण पुण्यप्रकारेण च कर्म अस्मिन् जगति ॥ २३ ॥

तत्रातिकृच्छ्रं प्रतिलब्धमान इत्येतद्व्याचष्टे। मुक्त इति। बन्धात् तत्स्वामिदत्तबन्धप्रहारादेर्यदि कथञ्चिद्धनेन मुक्तः सन् तद्धनात् सम्भोक्तुं प्राप्नोति तदा देवदत्तः अन्यः कश्चित्लुम्पटः तत आच्छिद्य भुङ्क्ते तस्मादप्यन्य इति न कोऽपि प्रकामं भोक्तुं लभते ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

कश्चिच्च गन्धर्वपुरं प्रविष्ट इत्येतद्व्याचष्टे। कदाचिदिति। मनोरथेन मनोव्यापारेण सङ्कल्पेनोपगतं नित्यं मनसि मत्पित्रादिकमस्तीत्येवं वर्तमानमित्यन्यथाभूतं यत् पितृपितामहादिसत्सुखकरं तद्विपरीतमसदपि सत्सुखकरमिति मत्वेति शेषः स्वप्ननिर्वृतिलक्षणं स्वप्नवन्निर्वृतिः सुखं यस्मात्तथाभूतम् ॥ १७ ॥

क्वचन कश्चित्कण्टकशर्कराक्षेत्रमित्येतद्व्याचष्टे। कश्चिदिति। गृहाश्रमे याः कर्मचोदनास्तासामतिभरोऽतिविस्तारः स एव गिरिस्तमारुरुक्षमाणः तदन्तक्लमुमिच्छन् लोकव्यसनैः क्षुद्रैर्लौकिकैः कार्यैः कर्शितं मनो यस्य सः कण्टकशर्कराक्षेत्रं प्रविशन् नगमारुरुक्षुर्यथा सीदति तद्वत्सीदति ॥ १८ ॥

पदेपदेऽभ्यन्तरवह्निनेति व्याचष्टे। कश्चिद्दुःसहेन सोढुमशक्येन कायाऽभ्यन्तरक्रोधाग्निना प्लुष्टः भस्मीकृतः सारो धैर्यं यस्य सः ॥ १९ ॥

कश्चिन्निगीर्ण इत्येतद्व्याचष्टे। स एवेति ॥ २० ॥

दष्टः स्म शेते क्व च दन्दशूकैरित्येतद्व्याचष्टे कदाचिदिति। मानो गर्वः एव दंष्ट्रा परपीडाकरत्वात् भग्ना मानदंष्ट्रा यस्य सः अत एव न लब्धा निद्राक्षणो येन सः अन्धकूपे दुःखरूपे गर्ते पतति यथान्धकूपेऽन्धः ॥ २१ ॥

कर्हिस्मचित्क्षुद्ररसानित्येतद्व्याचष्टे। कर्हिस्मचिदिति। कामो विषयोपभोगस्तेन ये मधुलवाः सुखलवास्तान् विचिन्वन् परदारादीन् अवरुन्धानः स्वीकुर्वाणः यदा तत्स्वामिभिः राज्ञा वा निहतो भवति तदापारे निरये कारागृहादौ पतति ॥ २२ ॥

प्रसङ्गात्प्रवृत्तं कर्म संसारहेतुरित्याह। अथेति। अथ च प्रवाहवत्ति प्रवृत्तिमार्गे उभयत्र इह च परं च संसारहेतुं जन्मवेत्तारः कर्मोदाहरन्ति ॥ २३ ॥

तत्रातिकृच्छ्रं प्रतिलब्धमान इत्येतद्व्याचष्टे। मुक्त इति। यदि मुक्तः कारागृहादितो मुक्तो भवति तर्हि ततः स एव देवदत्तस्तस्माद्विष्णुमित्र उपाच्छिनत्ति इत्यनवस्थितिरेव तस्मात् असौ भोक्तुं लभते इत्यर्थः ॥ २४ ॥

भाषाटीका।

कभी मनोरथ से आये हुये पिता पितामहादिकों को देखकर मरे हुओं को भी सच्चे आये सरी के आदर करता सरी का सुख भोगता है ॥ १७ ॥

कभी गृहस्थाश्रम के कर्मों के विधि के भार रूप पर्वतपर चढने चाहता है तब लौकिक विषयों की इच्छा से दुःखित होकर जैसे कांटे कङ्कड़ोंके खेत में पैठने से होवे तैसे दुःखित होता है ॥ १८ ॥

कहीं तो अतिकठिन पेटकी क्षुधा अग्नि से धैर्य के नष्ट होजाने से अपने कुटुम्ब के मनुष्योंपर कोप करता है ॥ १९ ॥

सो पुरुष निद्रारूपी अजगर से पकड लिया जाता है तब अज्ञानरूप अंधेरे में डूबजाता है शून्य जैसे अरण्य में तैसे सोता है मुरदा सरीका डारा हुआ कुछ नहीं जानता है ॥ २० ॥

कभी मान रूप दान्त के टूटने से दुर्जनरूपी सर्प से निद्रा के समय को नहीं पाता है तो दुःखित मनसे क्षण क्षीण होने से सूखे कुआ से महा मोह में पडता है ॥ २१ ॥

कभी कामनाओं के मीठे कणिकाओं को ढूंढता हुआ जब दूसरे की स्त्री दूसरे के धन को लेने चाहता है तब राजा के अथवा उसके मालिक के मारने से नरक में वा कैद में पडजाता है ॥ २२ ॥

इसी हेतु से पुण्य पाप दोनों प्रकार का कर्म इस संसार में आत्मा के जन्म मरण का हेतु है ऐसा वेद कहते हैं ॥ २३ ॥

उस राजादिबन्धन से यदि छूटता है तो उसको या धनको देवदत्त जबरदस्त लेजाता है उससे भी बली विष्णुमित्र लेजाता है इस प्रकार कोई ठीक नहीं सुख भोगने का होता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

कश्चिच्च शीतातपेत्येतद्व्याचष्टे। कश्चिचेति। शीतादयोऽनेकाधिदैविकाद्या या दशा दुःखावस्थास्तासाम् ॥ २५ ॥

...मिथो व्यवहरन् यत्किञ्चिद्धनमन्येभ्यो ... काकिणिकामात्रमप्यपहरन् यत्किञ्चिद्वा विद्वेषमेति वित्तशाठ्यात् ॥ २६ ॥

...न्यमुष्मिन्निम उपसर्गास्तथा सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्या... नक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः ॥ २७ ॥

...पि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्नविवेकविज्ञानो यद्विहारगृहारम्भाकुलहृदयस्तदा-... सुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदय आत्मानमजितात्माऽपारेऽन्धे तमसि प्रहि-... ॥ २८ ॥

...चिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाण्वादिद्विपरार्धापवर्गकालोपलक्षणात्परिवर्तितेन ...सा हरत आब्रह्मतृणस्तम्बादीनां भूतानामनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं काल-...युधं साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य पाखण्डदेवताः कङ्कगृध्रबकवटप्राया आर्यसमयपरिहृताः ...भिधत्ते ॥ २९ ॥

...पाखण्डिभिरात्मवञ्चितैस्तैरुरुवञ्चितो ब्रह्मकुलं ... शीलमुपनयनादिश्रौतस्मार्तक-... भगवतो यज्ञपुरुषस्याराधनमेव तदरोचयन् शूद्रकुलं भजते निगमाचारेऽशुद्धितो यस्य मिथु-... कुटुम्बभरणं यथा वानरजातेः ॥ ३० ॥

...पि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धिरन्योऽन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव विस्मृत-... ॥ ३१ ॥

...मुत्रवदैहिकार्थेषु गृहेषु रंस्यन् यथा वानरः सुतदारवत्सलो व्यवायक्षणः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

... इत्येतद्व्याचष्टे । क्वचिन्मिथो यत्किञ्चिद्धनं व्यवहर-... मात्रे विंशतिकपर्दकमात्रं ततोऽपि न्यूनं वा यत्कि-... ॥ २६ ॥

...कक्षवच्छायासपैरित्युक्तानुपसर्गान्प्रप-... मुष्मिन्निमे उरुकुकुक्षवच्छाया... तथा सुख-... ॥ २७ ॥

...मी: पुनरुक्तेश्च नानापाठैरतः परम् ।
...लोऽपि भवाध्वायं सम्प्रदायेन तीर्यते ॥

... कापीत्यादिना सिंहावलोकनन्यायेनोक्तमर्थमप-... क्रमेण व्याचष्टे । कापि देवमाययेति । प्रस्कन्नमपगतं ... यस्य यस्याः स्त्रिया विहारगृहं क्रीडागृहं ... हृदयं यस्य अनेन प्रसङ्गनीति व्याख्यातं ... व्याचष्टे । तस्या आश्रयेऽत्रसक्ताः संलग्नाः सुता ... च सैव स्त्री तेषां भाषितादिभिरपहृतं हृदयं ... प्रक्षिपति ॥ २८ ॥

...वदरिचक्रतस्त्रसन्नित्येतद्व्याचष्टे । कदाचिदीश्वर-... राद्यैः द्विपरार्धोऽपवर्गोऽन्तः तदेवोपलक्षणं यस्य ...लक्षणादिति पृथक्पदत्वेन पाठे कालचक्रपाद-...र्थः रंहसा शीघ्रेण परिवर्तितेन परिभ्रमणेन वयसा बाल्या-दिक्रमेण ब्रह्मादीनभिव्याप्य तृणस्तम्बादीनि भूतानि हरतश्च-क्रतः सकाशाद्वित्रस्तहृदयः सन् पाखण्डदेवता आभिमुख्येन धत्त इत्यन्वयः । अनिमिषतो निमेषमकुर्वतः अप्रमत्तादित्यर्थः । मिषतां प्रतिकर्तुमशक्तानामित्यर्थः । कर्मणि षष्ठ्यः कालचक्रं निजं निर्वि-मायुधं यस्य साक्षुल्येन ... पाखण्डागमैः ॥ २९ ॥

तैर्वञ्चित इत्येत... । ... । आत्मना वञ्चितैरुरु अधिकं वञ्चितः ... यच्छीलमुपनयनादि तदरोचयन् शूद्रवत्... अशुद्धितः ... शुद्ध्यभावात् यस्य ... मिथुनीभावः कुटुम्बभरणं च व्यापारो ... ॥ ३० ॥

तज्जातिरासेन... आपि निरवरोधः प्रतिबन्ध-रहितः स्वैरेण ... मृत्युकालः सन् ॥ ३१ ॥

द्रुमेषु रंस्यन्... वद्धुमर्वादिति । व्यवायक्षणो मैथुनोत्सवो भवति...

श्रीमद्वीर... कृतचन्द्रचन्द्रिका ।

क्वचिच्च शीता... चिच्चेति । शीतादयोऽनेका-धिदैविकानां भौति... दुःखावस्था आधिदैविका आभिभौतिका ... इत्यर्थस्तासां दशानां प्रति-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निवारणाय प्रतिक्रियायै अकल्पोऽसमर्थः प्रतिक्रियां कर्तुमसमर्थः अत एव विषण्णः दुःखितः अपारचिन्तायुक्त आस्ते ॥ २५ ॥

क्वचिन्मिथ इत्येतद्व्याचष्टे । कदाचित्परस्परं व्यवहरन् यत्किंचिदल्पमल्पेभ्यः सकाशात् काकिणिकामात्रं विंशतिकपर्दमात्रं ततोऽपि न्यूनं वा यत्किंचिदपहरन् वित्तशाठ्येन धनलोभेन विद्वेषं प्राप्नोति ॥ २६ ॥

(१) क्वचित्क्वचित् क्षीणधन इत्येतद्व्याचष्टे । क्वचित्क्षीणं धनं यस्मात् एव शयनासनाशनादिभिरुपभोगभोगोपकरणैर्विहीनः रहितः उपभोगशब्दो भोग्योपलक्षकः क्वचित् यदर्थाभावो भवति तदा यावदप्रतिलब्धमनोरथः अप्राप्तमनोरथः सम्पत्परत्वादानेऽव्यवहीयधनग्रहणे व्यवसितमतिः केनापि परमार्थेनाप्युपायेन तदीयं धनं ग्रहीतव्यमिति निश्चययुक्तः ततः परधनादिग्रहणाद्योगादपमानादीनि प्राप्नोति ॥ २७ ॥

अन्योऽन्यवित्तेति व्याचष्टे । एवं परस्परं वित्तस्य मायानुबन्धमहत्तमस्य व्यतिषङ्गेण व्यत्यासेन निबद्धारूढमूलं वैरं तदनुबन्धोऽप्रियकारित्वादिरूपश्च यस्यैवम्भूतोऽपि पूर्वं तथा आत्माभिमानप्रयुक्तया पूर्ववासनया मिथ उद्वहनं विवाहं कुर्वाणान्येव वैरविषयानेवोद्वहति । वैराणि एव साजात्याभिमानेन विवाहादिक्रियया सम्बध्नातीत्यर्थः ॥ २८ ॥

एतस्मिन् संसाराध्वन्येवमुक्तविधैर्नानाविधैः क्लेशरूपसर्गैर्वक्ष्यमाणैः सुखदुःखरागद्वेषादिभिश्च वितते विस्तृतेऽनन्तक्लेशोपसर्गयुक्ते इत्यर्थः आपन्नं आपदं प्राप्तस्तत्र यो या विपन्नः विपत्तिं प्राप्तः मृत इति यावत्तं तं विपन्नं पित्रादिरूपं विसृज्य जातं जातं पुत्रादिरूपमुपादायात्मीयाभिमतिं कृत्वा पुनर्जातविपत्तौ शोचन् तेन मुह्यन्विक्लवन्प्ररुदन् तत्र शोको मानसी व्यथा खेदो वाचिकी दैन्योक्तिरूपा प्ररोदः कायिकी अश्रुविमोचनादिरूपा जातान्पुनरन्यस्य जनने संहृष्यन् हाहादिभिरुच्चैर्ध्वनिं कुर्वन् बिभ्यत् जातादीनामागामिदुःखसम्भावनानिमित्तप्रतिकूलज्ञानप्रयुक्तः कदाचिज्जातादीनां गुणान् गायन्मुह्यमानः खेदं मोहं प्राप्तस्तेन साधुना कर्मणा वर्जितः नह्यमान इति पाठे बध्यमानः अद्यापि जीवसमूहः आरभ्य उपक्रान्तयोगः संसाराध्वनः पारं इतोऽस्मात्संसाराध्वनः सकाशात्तदध्वनः पारं प्रति नैवावर्तते नायाति न प्राप्नोतीत्यर्थः किं तदध्वनः पारं यस्मान्निवर्तते तत्राह । यदिदं योगानुशासनं नाम योगानुशासनमिति प्रसिद्धं तत्संसाराध्वनः पारमुपदिशन्ति तत्त्वविद इति शेषः योगस्याध्यात्मयोगकर्मयोगानुगृहीतभगवद्भक्तियोगस्यानुशासनं विविच्य ज्ञानं शिक्षणं वा तदनुष्ठानमिति यावत्तदेव संसाराध्वनः पारमित्यर्थः ॥ २९ ॥

मनस्विनो निर्जितेति श्लोकं व्याचष्टे । न वा इति । उपशम एव शीलं येषामुपरतः निगृहीतः आत्मा मनो यैस्ते मुनयो मननशीला न्यस्तदण्डाः निवृत्तभूतद्रोहाः सर्वेषां सुहृदः सन्त इत्यर्थः यच्छ्रेष्ठतमं निरतिशयसुखरूपं परमात्मप्रत्युपायं योगानुशासनमुपतिष्ठन्ति प्राप्नुवन्ति तच्छ्रेष्ठतमं निर्जितदिग्गजेन्द्रा अमनस्विनः अनिर्जितान्तःकरणा राजर्षयो नैवावरुन्धन्ते न प्रार्थयन्ति नैव च व्रजन्ति उपायानुष्ठानपूर्वकमुपेयं न यान्ति किमिति पृथिवीं ममेत्यभिमानेनैव प्रकृतवैरानुबन्धाः मृधे युद्धे शेरते केयं ममाभिमानविषयभूता तत्राह । यां पृथिवीं विसृज्य ह्युपसंहृता इत्यर्थः सिंहावलोकनन्यायेन बाधोपसर्गमित्यत्राभिप्रेतमुपसर्गशब्दार्थमाह । अध्वनीति । अस्मिन्नध्वनि संसाराध्वनि इत्येवमादयः उपसर्गा इत्यर्थः ॥ ३० ॥

प्रसज्जतीत्येतद्व्याचष्टे । क्वापीति । स्त्रीविषया देवमाया भगवन्मायया कर्त्र्या भुजलताभ्यामुपगूढः आलिङ्गितः नष्टं गतं विवेकात्मविज्ञानं यस्य । यद्वा । विवेको देहविलक्षणात्मविवेकः विज्ञानं भगवदुपासनात्मकं तद्रहितः यस्याः स्त्रियः विहारगृहं क्रीडागृहं तदारम्भे आकुलं हृदयं यस्य तस्मिन्नपि वनिताविहारगृहे आसक्ताः प्रसक्ताः सुतादयस्तेषां भाषितैरपहृतं हृदयं यस्य अत एवाजितेन्द्रियः अन्धे तमसि दुःखे नरके आत्मानं प्रहिणोति प्रक्षिपति ॥ ३१ ॥

पूर्वार्धं व्याख्यातमथोत्तरार्धं व्याचष्टे । कदाचिदिति । परमाणुरादिः परार्धेऽपवर्गोऽन्तः स एवोपलक्षणं यो कालोपलक्षणादिति पाठे तु परमाण्वादिपरार्धापवर्गरूपं कालस्योपलक्षणमुपलक्षयन् इत्युपलक्षणं स्वरूपं तस्माद्दिव्यः रंहसा शीघ्रेण परिवर्तितेन परिभ्रमणेन वयसा बाल्यादिक्रमेण ब्रह्मादीनामभिव्याप्य तृणस्तम्बादिभूतानां कालयमानानां अपेक्षया गण्यमानायुषामित्यर्थः मिषतां पश्यतामनिमिषतः निमेषमकुर्वत अप्रमत्तादिति वा हरतः आयूंषि छिन्दानात्तस्य चक्रस्य अनिमिषतः अकालयमानादिष्णोश्चक्रात् वित्रस्तहृदयो मरणमाशङ्कमान इति यावत् अमरत्वाय पाखण्डदेवताः साक्षाद्भगवतोऽभिमुख्येन धत्ते किं कृत्वा कालचक्रं निजं स्वीयमायुधं यस्य तमेव साक्षाद्भगवन्तं यज्ञपुरुषमनादृत्य पाखण्डदेवताः कथम्भूताः कङ्कगृध्रबकप्रायाः विश्वसन्त्योऽपि वञ्चयन्त्यः आर्याणां वैदिकानां समयात्सिद्धान्तादुद्वाहः कृताः साङ्कुर्त्येनेत्यनेन पाखण्डदेवताराधनं पाखण्डसङ्केतनिबन्धनं न तु वैधमित्युक्तम् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

क्वचिच्च शीतातपेत्यर्नातिवृणोति । क्वचिच्च शीतातपेत्यादिना ॥ २५ ॥

क्वचिन्मिथो विपण्याद्यत्यनातिवृणोति । क्वचिन्मिथ इत्यादिना । विपणिकः धणिक ॥ २६ ॥

(१) क्वचित्क्षीणधन इत्यस्यार्थमाह । क्वचिदित्यादिना ॥ २७ ॥

अन्योऽन्यवित्तेत्यस्यार्थमाह । एवं वित्तेति ॥ २८ ॥

यत आरब्धो नरलोकसार्थस्तमध्वरमध्वनः पारमुपदिशन्ति विद्वांसः ॥ २९ ॥

के तं गच्छन्तीति तत्राह । यदिदमिति । योगमनुशास्तीति योगानुशासनमेतच्छ्रेष्ठतमं शान्ततमं सुखतममुपशमशीला मुनयः उपतिष्ठन्ति प्राप्नुवन्तीत्यन्वयः ॥ ३० ॥

प्रसज्जतीत्यस्यार्थमाह । क्वापि देवमाययेति । प्रनष्टं ज्ञानः नष्टविवेकविज्ञानस्तस्याः स्त्रियाः विहारार्थं गृहारम्भ

(१) अत्रत्यं मूलं तु श्रीधरीयपाठक्रमेण पञ्चत्रिंशश्लोकानन्तरमेकोनचत्वारिंशत्पर्यन्तमस्ति अत्रत्यमष्टाविंशस्यैकोनत्रिं-

(१) श्रीवीरराघवव्याख्यानभूतटिप्पणीवदत्रापि श्लोकक्रमो

[illegible]ब्रजतीर्थकृतपदरत्नावली ।

सु[illegible]वचोकैर्विचेष्टितैश्चापहृतं हृदयं यस्य स [illegible] तमसि प्रहिणोति गमयति "हि गतौ" इति [illegible] ॥ ३१ ॥

क[illegible] इत्येतद्व्याख्याति । कदाचिदिति । कदाचि[illegible] विष्णुकथायामीश्वरस्य चक्रादित्रस्तहृदयस्तमी-[illegible] पाखण्डदेवता: साकल्येनाभिभजते भजतीत्यन्वय: [illegible] उपलक्ष्यतेऽनेनेति । तथोक्तम् । तेन [illegible] मिषतां जीवानां वय: आयुर्लवशं [illegible] परमाणुकाल आदिर्यस्य स तथा द्विप-[illegible] यस्य स तथा कथां मिषतामाब्रह्मस्तम्बा-[illegible] स्तम्बमुपक्रम्य वर्तमानानां कालचक्रं [illegible] तथा नम् ॥ ३० ॥

[illegible]मज्जीवगोस्वामिकृतक्रमसन्दर्भ: ।

[illegible] था शुद्धिस्तदकरणादित्यर्थ: ॥ ३०—३२ ॥

[illegible]विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

[illegible] पेत्येतद्व्याचष्टे । कश्चिच्च शीतेति । दशानां [illegible]नाम ॥ २५ ॥

[illegible] इत्येतद्व्याचष्टे । कश्चिन्मिथ इति । यत्किञ्चिदपि [illegible] व्यवहरन् वा काकिणिका विंशति-[illegible] यत्किञ्चित्ततोऽपि न्यूनं च अन्येभ्योऽपहरन् [illegible] ॥ २६ ॥

[illegible] मुनकृच्छ्रेति व्याचष्टे । अन्धन्यमुनिमभिम [illegible]

[illegible] व्याचष्टे । क्वापीति । देवमायारूपया स्त्रिया [illegible]मुपगूढ: सन् लुप्तविवेकविज्ञानो भवति । [illegible] क्रीडागृहारम्भे आकुलहृदयो भवेत्तस्या एव आश्र-[illegible]: सुता दुहितरश्च कलत्रं तत्सुतवधू: सा च [illegible]भिरपहृतं हृदयं यस्य स: ॥ २८ ॥

[illegible] कदाचिच्चरिचक्रतसमसिस्येतद्व्याचष्टे । कदाचिदी-[illegible] चक्रात् परित्रस्तहृदय: पाखण्डदेवता: साकल्येन [illegible] पाखण्डागमेन अभिभजते उपास्यतया व्याचष्ट इत्य-[illegible] द्विपरार्धापवर्गोऽन्तो यस्य तेन कालेनैव [illegible] लक्षणं यस्य तस्मात् द्विपरार्धापवर्गात् कालो-[illegible] काल स्वरूपादित्यर्थ: । कीदृशात् परिवर्ति-[illegible]त्यादिना रंहसा अतिशैघ्र्येण ब्रह्मादीनामप्यनि-[illegible] व्यवहारे प्रमत्तानां भूतानामिति कर्माणि [illegible] हरत इत्यर्थ: । यद्वा । आयुरित्यध्याहार्यं तेषामायु-[illegible] निमेषमप्यकुर्वत: अप्रमत्तादित्यर्थ: । आर्ष-[illegible] शिष्टाचाररहिता: ॥ २९ ॥

[illegible] इत्येतद्व्याचष्टे । यदा त्विति । आत्मनैव वञ्चितै: स्वक-[illegible]त्वात् तैरुपवञ्चित: कल्पितकिञ्चिन्मात्रापरा-

धमिषेण धनापहृत्य खगणादिभि: ताडित: निगमोक्ताचार-मध्ये या अशुचिरुच्यते तयैव यस्य मिथुनीभाव: विधवाया स्वयमागताया वा मूल्यादिप्रदानेन परिग्रह: ॥ ३० ॥

तज्जातिरासेनेत्येतद्व्याचष्टे । तत्रापि निरवरोध: धर्ममर्यादा-भिरनवरुध्यमान: विस्मृतमृत्युकाल: सन् विहरन् भवति ॥ ३१ ॥

द्रुमेषु रंस्यन्निति व्याचष्टे । कश्चिद्द्रुमेति । रंस्यन् रममाण: व्यवायसुखा: स्त्रीसङ्गलब्धोत्सव: ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीप: ।

कश्चिच्च शीतातपेत्येतद्व्याचष्टे । कश्चिच्चेति । शीतादीनामने-कानामाधिदैविकभौतिकानामात्मीयानां दशानां दु:खावस्था-नाम ॥ २५ ॥

[illegible] मिथ इत्येतद्व्याचष्टे । किञ्चिन्मिथ: यत्किञ्चिद्धनं व्यवहरन् अन्येभ्यो वित्तशाठ्यात् धनलोभात् काकिण्यकामात्रं [illegible] ततोऽपि न्यूनं वा यत्किञ्चिदपहरन् विद्वे-[illegible] ॥ २६ ॥

[illegible] पुमनकृ[illegible]वोपसर्गैरित्युक्तानुपसर्गान् प्रपञ्च-यति [illegible] संसारमार्गे इमे जकच्छ्रवि-त्ताभावादयस्तथा [illegible] किमुने-र्जीवोपसर्गसंस्मरणं [illegible] कारेऽ नलसत्वमधिकोक्तिश्च सर्वत्रार्थं द्योतयति ॥ २७ ॥

प्रसजतीत्येतद्व्याचष्टे । क्वापीति । [illegible] भुजलता-भ्यामुपगूढ: प्रस्कन्नमपगतं कार्याकार्यविवेक[illegible] भगवद्विष-यकं विज्ञानं यस्य स: यद्विहारगृहारम्भे यस्या: क्रीडा-गृहारम्भे आकुलं हृदयं यस्य स: तस्या: आश्रमे क्रीडागृहे अवसक्ता: उपश्रिता: सुताश्च दुहितरश्च कलत्राणि सुतादि-भार्यास्तेषां भाषितादिभिरपहृतं हृदयं यस्य स: अन्धे तमसि नरके आत्मानं प्रहिणोति प्रक्षिपति ॥ २८ ॥

कश्चित्कदाचिच्चरिचक्रतसमसिस्येतद्व्याचष्टे । कदाचिदिति । परमाण्वादिद्विपरार्धापवर्गात् परमाण्वादिद्विपरार्धान्तात् कालो-पलक्षणात् कालस्वरूपात् रंहसा शीघ्रेण परिवर्तितेन परि-भ्रमणेन वयसा बाल्यादिक्रमेण आब्रह्मतृणस्तम्बादीनामित्याद्या: प्रभुव: कर्माणि आब्रह्मतृणस्तम्बादीनि भूतानि हरत: संहरत: विष्णोश्चक्रात्त्रिस्तहृदय: [illegible]मनास्तथ पाखण्डदेवता: साकल्येन पाखण्डागमे[illegible]वय: अनिमिषत: निमे-षमकुर्वत: अप्रमत्तात् [illegible] प्रतिकर्तुमशक्यानाम् कथम्भूता: कङ्कादिमा[illegible]र्याणां वैदिकानां समया-रिसद्धान्तात्परिहृता: [illegible]

तैर्वञ्चित इत्येतद्व्याचष्टे [illegible] आत्मा वञ्चित: स्वेच्छा-चारेण नरकार्है: [illegible] वञ्चित: सन् ब्रह्मकुलं समावसंस्तेषां आ[illegible]नयना दृष्टैस्तस्मात्कर्मा-नुष्ठानेन यज्ञपुरुषा[illegible] ब्रह्मकुलं भजते निग-माचारे अशुचिन: [illegible] यस्य ब्रह्मस्य केवलं मिथुनीभाव: कुटुम्[illegible]: नाग्निहोत्रादि ॥ ३० ॥

तज्जातिरासेन[illegible]तद्व्याचष्टे । तत्रापि शूद्र-कुलसङ्गत्वात् [illegible]तिबन्ध: निरङ्कुश इत्यर्थ:

एवमध्वन्यवरुन्धानो मृत्युगजभयात्तमसि गिरिकन्दरप्राये ॥ ३३ ॥

क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां दुःखानां प्रतितिवारणेऽकल्पो दुरन्त[illegible] चिन्तया विषण्ण आस्ते ॥ ३४ ॥

क्वचिन्मिथो व्यवहरन्यत्किञ्चिद्धनमुपयाति वित्तशाठ्येन ॥ ३५ ॥

क्वचित्क्षीणधनः शय्यासनाशनाद्युपभोगविहीनो यावदप्रतिलब्धमनोरथोपगतादानेऽवसितमतिस्ततस्ततोऽवमानादीनि जनादभिलभते ॥ ३६ ॥

एवं वित्तव्यतिषङ्गविवृद्धवैरानुबन्धोऽपि पूर्ववासनया मिथ उद्वहत्यथापवहति ॥ ३७ ॥

एतस्मिन्संसाराध्वनि नानाक्लेशोपसर्गबाधित आपन्नविपन्नो यत्र यस्तमु ह वावेतरस्तत्र विसृज्य जातंजातमुपादाय शोचन्मुह्यन्बिभ्यद्विवदन्क्रन्दन्संहृष्यन्गायन्नह्यमानः साधुवर्जितो नैवावर्ततेऽद्यापि यत आरब्ध एष नरलोकसार्थोऽयमध्वनः पारमुपदिशन्ति ॥ ३८ ॥

यदिदं योगानुशासनं न वा एतदवरुन्धते यन्न्यस्तदण्डा मुनय उपशमशीला उप[illegible]रतात्मानः समवगच्छन्ति ॥ ३९ ॥

श्रीमच्छुकदेव[illegible]सिद्धान्तप्रदीपः ।

[illegible] [illegible] [illegible] विस्मृतः कालावधिरायुषोऽवसानं येन स आस्ते ॥ [illegible] ॥

[illegible] रंस्यचिरस्येनद्व्याचष्टे । क्वचिद्द्रुममवहिति । व्यवाये मैथुने [illegible]: उत्सवो यस्य सः ॥ ३२ ॥

भाषाटीका ।

कहीं पर शीत पवन आदि अनेक आधिदैविक आधिभौतिक आदि अपनी दशाओं के निवारण में असमर्थ होकर [illegible] आदि चिन्ता से खिन्न होरहता है ॥ २५ ॥

कभी आपस में व्यवहार करने में अथवा और से कौडीमात्रभी धन किसी से हरता है तो धनकी शठता से अथवा और किसी बातसे वैरको प्राप्त होजाता है ॥ २६ ॥

इस मार्गमें ये सब उपद्रव हैं जैसे कि सुख दुःख रागद्वेष मान अभिमान प्रमाद उन्माद [illegible]क मोह लोभ मात्सर्य ईर्षा अपमान क्षुधा प्यास मनके [illegible]:ख शरीरके दुःख जन्म बुढाई मरण आदिक ॥ २७ ॥

कहींपर देव की माया स्त्री [illegible] भुजारूप लता से लिपटा हुआ विवेक विज्ञान से नष्ट होजाता है जिस स्त्री के विहारघरके बनाने में इसका हृदय [illegible]कुल होजाता है फिर उस के आश्रय में लगे जो पुत्र पुत्री [illegible] इनके भाषण अवलोकन चेष्टाओं से उसका हृदय [illegible]हित होजाता है तब मनके न जीतने से आपको [illegible] में [illegible] है ॥ २८ ॥

कभी ईश्वर भगवान् [illegible] से लेकर द्विपरार्ध पर्यन्तरूप काल [illegible] [illegible] [illegible] तृणपर्यन्त सबकी आयु को बाल्यादि अवस्थाओं [illegible] सर्वदा घूमने वाला सब के देखते ही हर लेने वाला जो काल [illegible] के डरसे हृदय के कांपने से कालचक्र को अपने आयुध [illegible]रने वाले उन्हीं भगवान् ईश्वर यज्ञपुरुष को अनादर [illegible] गृध्रबकवट के तुल्य जो पाखण्डदेवता तिन्होंको [illegible] कि उत्तम मार्गसे परित्यक्त हैं तिनको संकुल के प्रन्थो [illegible] मानने लगता है ॥ २९ ॥

जब उन पाखण्डियों को आप धन नहीं दे सकता [illegible] और वह फिर इसको भुलाकर कुछ नहीं देते हैं तब [illegible] के समूह में वास करता है तब उसका जो [illegible] यज्ञोपवीतादि श्रौतस्मार्त कर्म का अनुष्ठान भगवान् [illegible] का आराधन तिससबको जब अच्छा नहीं मानता है तब [illegible]को भजता है जिनका कि स्वयं अशुद्ध होने से वेद [illegible] में अधिकार नहीं है केवल स्त्री पुरुष के साथ मैथुन और बानरजाति के तुल्य कुटुम्बका पोषणमात्र होता है ॥ [illegible] ॥

तहांपर भी अपनी इच्छासे विहारकरने में अतिक्षुद्र[illegible] लेसे आपसमें स्त्रीपुत्रादिको के मुखदेखनेमें कुत्सित भोगोंमें [illegible]को भूलजाताहै ॥ ३१ ॥

कभी वृक्ष सरीके इस लोकके भोगोंमें रमण कर[illegible] जैसे बन्दर होवे तैसे स्त्री पुत्रोंपर प्रेम करके मैथुन के [illegible] में समयको बिताता है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्वचित्प्रमादादित्येतद्व्याचष्टे । एवमध्वनि [illegible]न्धानो गिरिकन्दरप्राये तमसि रोगाद्यापदि पतमीति [illegible] ॥ [illegible] ॥

क्वचिच्छीतवातेत्यादिपूर्वस्माद्विशेषोक्तिः । रोगाद्यापाद्[illegible] तत्र शीतादिभिः क्लिश्यमानस्त इत्यर्थः ॥ ३४ ॥

यद्वा [illegible] दिगिभजयिनो यज्विनो ये वै राजर्षयः किन्तु परं मृधे शयीरन्नस्यामेव ममेयमिति कृतवैरानु [illegible]न्वा यां विसृज्य स्वयमुपसंहृताः ॥ ४० ॥

[illegible]धरस्वामिकृतभावार्थदीपिका ।

[illegible] श्लोकनम्यायेनोक्तमर्थं यथास्थानमपकृष्य व्याचयाय [illegible] पूर्वोक्तमेवानुवदति । कश्चिन्मिथ इति । [illegible] किञ्चिद्धनमुपयाति ॥ ३५ ॥

[illegible] ग्रहीयाधनमित्यादि व्याचष्टे । कश्चित्क्षीयाधन इति । [illegible] अन्योन्यमोरथेनोपगतं वाञ्छितं तस्यादाने स्वीकारे [illegible] ॥ ३६ ॥

[illegible] एवं वित्तव्यतिषङ्गेणेत्येतद्व्याचष्टे । एवं वित्तव्यतिषङ्गेति । [illegible] ॥ ३७ ॥

[illegible] इत्यादि व्याचष्टे । एतस्मिन्निति । आपन्नमापदं [illegible] वा यत्र यस्तमितरस्तत्रैव विसृज्य । नह्यमानो [illegible] जैतः साधुव्यतिरिक्तः ॥ ३८ ॥

[illegible] माह । यदिदमिति ॥ ३९ ॥

[illegible] इत्यादि व्याचष्टे । यद्यपीति । ये वै राजर्षयस्तेऽपि [illegible] परं केवलं मृधे शयीरन् ॥ ४० ॥

[illegible] वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

[illegible] इति । आत्मा वञ्चितो यैस्तैरुपवञ्चितः सन् [illegible] एषां ब्राह्मणानां श्रीखमिति प्रतीकोपादानं [illegible] एतद्व्याचष्टे उपनयनादीत्याराधनमेवेत्यन्तेन [illegible] मानः उपैति वानरानित्यस्य व्याख्यानं शूद्र- [illegible] इति तदुपपादयति । निगमोक्ते आचारेऽपरिशु- [illegible] शुद्ध्यभावात् यस्य शूद्रकुलस्य मिथुनीभावः [illegible] केवलदेहव्यापारश्रेत्येवं केवलग्राम्यसुखमेव नादृष्ं [illegible] इति तत्र दृष्टान्तः ॥ ३३ ॥

[illegible] इत्येतद्व्याचष्टे । तत्रापीति । शूद्रकुलेऽपि निरवरोधः [illegible] सेरया खेलतया युक्तदेशकालप्रतीक्षामन्तरेण [illegible] अत्यन्तं व्याकुला बुद्धिर्यस्य योषित्पुरुषयोः [illegible] रूपया ग्राम्यकर्मणैव विस्मृतः काला- [illegible] यस्य स आस्ते ॥ ३४ ॥

[illegible] इत्येतद्व्याचष्टे । कच्चिदिति । तृणतल्पेनलमैहिक- [illegible] गृहेषु द्रुमादिवत्केवलमिहैव युज्यन्ते न परत्रेति [illegible] । [illegible]वद्द्रुम इव यथा वानरः सुतदारवत्सलो [illegible] यस्य तथाभूतो भवत्येवमयमपि केव- [illegible] रंस्यन् सुतदारवत्सलो व्यवायक्षया: [illegible] भवतीत्यर्थः ॥ ३५ ॥

[illegible] इत्येतद्व्याचष्टे । एवमिति । संसारा[illegible] सुख- [illegible] अनुभवमानः मृत्युरेव गजस्तस्य भयाद्गिरि- [illegible] रोगाद्यापदि पतन् ततः पुनरप्येवं जीवन- [illegible] वल्लीमवलम्ब्य ततः आपदः रोगाद्युपद्रवरूपा- [illegible] प्रयासेन विमुक्तः पुनरप्येवमुक्तरीत्या संसारा- ध्वनि वर्तमानो नरलोकसार्थं नरशरीरजीवसमूहमुपयाती- त्येवमुपरि गतोऽपि लोकान्तरेषु विद्यमानो देवादिसमूहोऽपि संसाराध्वन्यटतीत्यर्थः तथाचोक्तं "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मृत्युलोकं विशन्ति" इति ॥ ३९—४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

(१)तैर्वञ्चित इत्येतद्व्याचष्टे । यदा तु नाभिरिति । यज्ञपुरुषाराधनं तेषां शीलं यस्तदरोचयन् अपथ्यं मन्वानः अनिगमपरिशुद्धं वेद- शुद्धिरहितं यस्य शूद्रकुलस्य मिथुनीभावः कुटुम्बभरणं नान्य- [illegible] निरवरोधः भार्यासहितः अनिवारणा इति वा ॥ ३३ ॥

[illegible] दर्शयति । क्वचिद्द्रुमवदिति । व्यवायो [illegible] कालो यस्य स तथा ॥ ३४ ॥

[illegible] । एवमध्वन्यवरुन्धान इति [illegible] ॥ ३५ ॥

[illegible] । यद्यपीति ॥ ३६ ॥

(२) [illegible] ॥ ३७ ॥

श्रीमज्जीवगोस्वामि[illegible]क्रमसन्दर्भः ।

गिरिकन्दरप्राये तमसि रोगाद्या यदि [illegible] मृत्युगजभया- द्वल्लीतुल्यप्राचीनकर्मावलम्ब्य स्थितो भवतीति [illegible] ॥ ३३-४५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

क्वचित् प्रमादादित्येतद्व्याचष्टे । एवमध्वनीति । मृत्युभया- त्तमसि महारोगाद्युपशमार्थं कुकर्मणि अवरुन्धानः आत्मानम- वरुणद्धि ॥ ३३ ॥

क्वचिच्च शीतानपेत्येतद्व्याचष्टे । कश्चिच्छीतवातेति ॥ ३४ ॥

कश्चिन्मिथ इति व्याचष्टे । कश्चिन्मिथ इति ॥ ३५ ॥

क्वचित् क्वचित् क्षीण[illegible] इत्येतद्व्याचष्टे । कश्चित् कश्चित् क्षीणधन इति । अन्योन्यमोरथे[illegible] वाञ्छितं धनादि तस्यादाने स्वीकारे निश्चितमतिः सन् ॥ [illegible] ॥

अन्योन्यवित्तव्यति[illegible] । एवामिति । मधापचहाति पुनरुद्वाहं त्यजति च ॥ [illegible] ॥

अध्वन्यमुष्मिन्नित्य[illegible] अस्मिन्निति । आपन्न आपदं प्राप्तः विपन्नो मृतः [illegible] इति । वैष्णवसङ्गे सति तरतीति भावः यतः [illegible] परमेश्वरं पारं पार- प्रापकं तत्र साधुषङ्ग [illegible] ॥ ३८ ॥

अनावृत्तौ हेतुमाह [illegible] । समवगच्छन्ति प्राप्नु- वन्ति ॥ ३९ ॥

मनस्विन इति [illegible] यद्यपि तदपि अस्यां

(१) [illegible] श्रीधरस्वामिपाठक्रमेण त्रिंशत आरभ्य चत्वारिंशत्- [illegible] व्याख्यानम मध्ये श्लोकास्तु पूर्वं व्याख्याता एव ।

(१) अत्रापि श्री[illegible] वर्तते

(२) अत्रत्या अ[illegible] गताः

कर्मवल्लीमवलम्ब्य तत आपदः कथञ्चिन्नरकाद्विमुक्तः पुनरप्येवं संसाराध्वनि वर्तमानो नरलोक-सार्थमुपयाति एवमुपरि गतोऽपि ॥ ४१ ॥

॥ तस्येदमुपगायन्ति ॥

आर्षभस्येह राजर्षेर्मनसाऽपि महात्मनः ।
नानुवर्त्माऽर्हति नृपो मक्षिकेव गरुत्मतः ॥ ४२ ॥

यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं हृदिस्पृशः ।
जहौ युवैव मलवदुत्तमश्लोकलालसः ॥ ४३ ॥

यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान् प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम् ।
नैच्छन्नृपस्तदुचितं महतां मधुद्विट्सेवानुरक्तमनसामभवोऽपि फल्गुः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पृथिव्यां यान्विद्वान् कीदृश्यां ममेयमिति कृतो वैरानुबन्धो यस्यां तस्याम् इमां विसृज्य स्वयमेव संहृताः मृताः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कश्चित्प्रमीयमाणोऽपि ... इत्याचष्टे । पचमप्यमीति असमर्थः ॥ ३३ ॥ ॥ ३४ ॥

यत्किञ्चिद्धनमुपयाति परेभ्य इति शेषः ॥ ३५ ॥

कश्चित्कश्चिच्छीयमान इत्येतद्व्याचष्टे । कर्चिच्छीयमान इति । अप्रतिलब्धमप्राप्तं यन्मनोरथेनोपगतं वाञ्छितं तस्यादाने सत्यादने ॥ ३६ ॥

अन्योऽन्यवित्तव्यतिषङ्गेत्येतद्व्याचष्टे । एवं वित्तेति । तथापि वित्तमुद्वहति गृह्णाति अपवहति अर्पयति ॥ ३७ ॥

अध्वन्यमुष्मिन्नित्यादि व्याचष्टे । एतस्मिन्निति । आपन्नविपन्नः आपद्ग्रस्तो मृतो वा यस्तांमतः विसृज्य जातं जातं पुत्रादिकमुपादाय नयमानः वध्यमानः यतः ब्रह्मणो भगवतः सकाशादारब्धः संसाराध्वा तमध्वनः पारमवधिभूतं संसारहेतुं भगवन्तं साधुवर्जितः साधुजनभिन्नः एव नियमवत्यैौव लमुद्रकः नरलोकसार्थः नैवाद्यर्थे नैव प्राप्नोति इत्युपदिशन्ति तत्वज्ञाः ॥ ३८ ॥

योगानुशासनं भगवत्प्राप्तिसाधनभूतज्ञानमक्त्याद्युपदेशामपि न गृह्णन्तीत्याह । यदिति । यत् यस्य ब्रह्मणो भगवतः ॥ ३९ ॥

मनस्विन इत्यादि व्याचष्टे । पर्त्तीति ॥ ४० ॥

भाषाटीका ।

इस प्रकार से इस प्रवृत्तिमार्ग में दुःखों को भोगता हुआ पर्वत कन्दरा सरी के संसार में पड़कर मृत्युरूपी हाथी से डरता रहता है ॥ ३३ ॥

कहींपर शीतपवन आदि अनेक दैविक भौतिक आध्यात्मिक दुःखों के निवारण में असमर्थ होने से दुःखित होकर रहता है ॥ ३४ ॥

कहींपर आपस में व्यवहार करने में कुछ धन को प्राप्त होता है सोभी धन की वञ्चना करने से ॥ ३५ ॥

कभी धन के क्षय होजाने से शयन आसन भोजन आदि भोगों से हीन होता है तब जबतक मनोरथ नहीं मिलता है तबतक उस के यत्न में बुद्धि रखता है तब तहां तहां मनुष्यों से अपमानादिकों को प्राप्त होता है ॥ ३६ ॥

इस प्रकार धन के अदले बदले में बैर के बढ़ने से भी फिरभी पूर्व की वासना से विवाहादि सम्बन्ध करता है फिर कभी छोड़ताभी है ॥ ३७ ॥

इस संसार मार्गमें नानाप्रकार के क्लेशों विघ्नों से बाधित होने से जो जहां मरे या दुःखीहो तिनको छोड़कर पैदा होनेवाले को लेकर शोचता हुआ मोहित होताहुआ डरता हुआ विषाद करता हुआ रोता हुआ हर्षित होता हुआ गाता हुआ बंधाहुआ सत्पुरुष से वर्जित ऐसा यह नरलोक समूह जब से आरम्भ हुआ है तब से अभीतक उधर को नहीं लौटा है कि जिस परमात्मा को संसार का पार कहते हैं ॥ ३८ ॥

जो योग भक्तियोगगम्य जिस को सन्यासी मुनि शान्तस्वभाव निवृत्तमानवाले जाते हैं तिस को नहीं प्राप्त होता है ॥ ३९ ॥

जोभी बड़े दिग्गजों को जीतनेवाले राजर्षि थेभी इसी पृथिवी में मेरी ऐसा वैरकर के न्यय काल के मारे संग्राम में मोजाता है पृथिवी को छोड़जाते हैं परन्तु उसपद को नहींजा सकते हैं ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्रागङ्गनीत्यादि गिरिकन्दर इत्यन्तमपकृष्य व्याख्यातं ग्रन्थमतिक्रम्य वल्ली गृहीत्वेत्यादि ग्रन्थं व्याचष्टे । कर्मवल्लीमिति । एवमुपरि स्वर्गं गतोऽपि नरलोकसार्थमेवोपयाति ॥ ४१ ॥

तदेवं भरतोक्ति व्याख्याय तच्चरितसंग्रहश्लोकानाह । तस्येदं कर्म श्लोकैरुपगायन्ति आर्षभस्य ऋषभपुत्रस्य अन्यो नृपोऽनुवर्त्माऽर्हति धर्मं अनुगन्तुं न शक्नोति ॥ ४२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तत्र हेतुः [illegible] । य इति । सुहृद्राज्ययोर्द्वन्द्वैक्यम् । यो दुस्त्य-
जान्दारादीन् [illegible] अहो तस्यार्षभस्येति सम्बन्धः दुस्त्य-
जत्वे हेतुः हृदि स्पृशो मनोज्ञान् त्यागे हेतुः उत्तमश्लोके
लालसा [illegible] यस्य ॥ ४३ ॥

नन्वेवं [illegible] न चित्रमित्याह । य एवं भूतोऽसौ
नृपः [illegible] यत्सदुक्तिनम् सदयावलोकां भर-
तस्य [illegible] यथा मनस्येवमवलोको यस्या इति परिजनाव-
लोकः श्रियामुपचर्यते यतो मधुद्विषः सेवायामनुरक्तं मनो
येषां तेषां महतामभवो मोक्षोऽपि फल्गुस्तुच्छ एव ॥ ४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पारोक्ष्यरूपमवधूतवृत्तो व्याख्याय तन्माहात्म्यप्रतिपाद-
कान् श्लोकानवतारयति । तस्येदं माहात्म्यमार्षभस्य ऋषभ-
पुत्रस्य महात्मनो महानुभावस्य राजर्षेर्भरतस्य मार्गं मनसाप्यनु
अवसर्तुमन्यो नृपो नार्हति यथा गरुडस्य गतिं मक्षिके-
त्यर्थः ॥ ४२ ॥

तत्रैव हेतुमाह । स आर्षभो राजर्षिः स्वाधीनः स्ववशः
मनोज्ञानत एव दुस्त्यजान् दुःखेनापि त्यक्तुमशक्यान् पुत्रान्
सुहृद्राज्ययोर्द्वन्द्वैक्यं युवैव सन्मलवद्विहासिन् अहासव्यासीत
त्यागे हेतुमाह । उत्तमश्लोके भगवति लालसः सस्पृहः आस-
क्तचित्त इति यावत् ॥ ४३ ॥

न केवलमत्यासीदेवापि तु नैच्छदित्याह । य इति । यो नृप
आर्षभः दुस्त्यजान् क्षित्यादीन् क्षितिर्भारतं वर्षं सुताः पुत्रा
अर्थ धनं दाराः स्त्रियः इमान् सुरवरैरिन्द्रादिभिश्च प्रार्थ्यां
श्रियं सम्पदं कथम्भूतां सदयावलोकां सदयया युक्तः अव-
लोको यस्यां तां दयया युक्तोऽवलोको मयि प्रस-
रत्विति प्रार्थयमानामिति भावः नैच्छत् क्षित्यादिषु रागमपि
नाकरोदित्यर्थः नैतच्चित्रं किन्तु युक्तं चैतदित्याह । तदुचित-
मिति । कुतः यतो मधुद्विषः सेवायामनुरक्तमनसां महतामभवो
मोक्षोऽपि फल्गुरल्पः भगवत्सेवापेक्षया मोक्षोऽप्यल्प इत्यर्थः॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वल्लीं गृहीत्वेत्यादि अवशिष्टं ग्रन्थं व्याचष्टे । कर्मवल्लीमव-
लम्ब्येति । एवमुपरि गतोऽपि स्वर्गी जनोऽपि संसाराध्वनि वर्त-
मानः ॥ ४१ ॥

भरतोपाख्यानमुपसंहृत्य तन्महिमानि प्राचां सम्मतिमाह।
तस्य इदं कर्म आर्षभस्य ऋषभपुत्रस्य अनुवर्त्म वर्त्मानुगन्तुं
नार्हति योग्यतामावाहितीति भावः । मनसा मनोरथेनापि किमुत
कर्मणा ॥ ४२ ॥

तस्य प्रेमानुभावमाह । य इत्यस्योत्तरत्राप्यन्वयात्तत्पदा-
पेक्षा श्रीधितं यदभिरामता । धिक इतिवद्दुस्त्यजत्वे हेतुः । हृदि
स्पृशः मनोहरान् सुहृद्राज्ययोर्द्वन्द्वैक्यं युवैवोत यावैकयेत्यागिष्यः

प्रियमत्रादिभ्योऽप्युत्कर्षः । मलवदिति । यथा मलस्य त्याग
एव निर्वृतिः त्यागाभावे कष्टं त्यक्तस्य तस्य स्मरणेऽपि निष्ठीवनमेव
वृगमस्तथैवेति त्यागेऽप्यन्येभ्यो वैलक्षण्यमुत्कर्षः। तत्र हेतुः उत्तमः
सर्वोत्कृष्टः रूपगुणलीलामाधुर्यैश्वर्यस्य सम्बन्धी श्लोको
यशो यस्य तस्मिन् लालसः दर्शनाद्यौत्सुक्यं यस्य सः । तेन
भगवत्सौन्दर्यास्वादविवशसर्वेन्द्रियाणां चिरकालं दारादयो न
मलतुल्या भवन्तीति भरतस्योत्तमभक्तत्वं ध्वनितम् ॥ ४३ ॥

उक्तमेवार्थमुल्लासेन पुनरपि स्पष्टीकृत्याह । य इति । सदया-
वलोकां भरतस्य दया यथा भवत्वेवमवलोको यस्या इति
परिजनावलोकः श्रियामुपचर्यते इति श्रीस्वामिचरणाः । यद्वा
भरतो वैराग्यार्थं शारीरकष्टं मा स्वीकरोतु मया लाल्यमानो
गृह एव तिष्ठत्विति सदयोऽवलोको यस्यास्तामभवो मोक्षोऽपि
फल्गुस्तुच्छस्तत्रापि विरज्यन्तीत्यर्थः ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible] व्याचष्टे । कर्मवल्लीमिति । एवमुपरि
स्वर्गे गतोऽपि [illegible] ॥ ४१ ॥

इत्थं [illegible] पूर्वेभि-
रुतान् दर्शयन् [illegible] भरत-
स्येदं कर्म श्लोक [illegible] अनुवर्त्म
नार्हति अनुष्ठितुं पार [illegible] ॥ ४२ ॥

यो दुस्त्यजान् हृदिस्पृशः मनो [illegible] तस्यार्ष-
भस्येति सम्बन्धः ॥ ४३ ॥

सदये दयानिधौ भरते अवलोको यस्यास्तां च यो नृपः
नैच्छत्तदुचितमेव यस्मान्मधुद्विषः सेवायां मनो येषां तेषामभवो
मोक्षोऽपि फल्गुरल्पः ॥ ४४ ॥

दुःख में या नरक [illegible] कर्मरूपी लता
को आश्रय करके [illegible] भी उस आफत में
से या नरक में से [illegible] इसी संसार मार्ग
में प्रवृत्त होता है [illegible] में जानेवाले कोभी
होता है ॥ ४१ ॥

उन भरतजी के [illegible] श्रेष्ठलोग गान करते
हैं ऋषभजी के पु[illegible] भरतजी के मार्गको
मनसेभी कोइ राज[illegible] सकताहै जैसे गरुडजी के
मार्गे मक्खी होवे ॥ ४[illegible]

जिनने युवाही [illegible] जो स्त्री पुत्रादि हृदय
के अत्यन्त प्रिय सु[illegible] भगवान् की लालसासे
मल मूत्र के तुल्य [illegible]

जिनने भी पु[illegible] जन धन स्त्री तथा
देवतोंकेभी प्रार्थना [illegible] सहित देवनेयोग्य जो
राज्यलक्ष्मी उस को [illegible] उनको उचितही है।

यज्ञाय धर्मपतये विधिनैपुणाय योगाय सांख्यशिरसे प्रकृतीश्वराय ।
नारायणाय हरये नम इत्युदारं हास्यन् मृगत्वमपि यः समुदाजहार ॥ ४५ ॥

य इदं भागवतसभाजितावदातगुणकर्मणो राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वाऽनुशृणोत्याख्यास्यत्यभिनन्दति च सर्वा एवाशिष आत्मन आशास्ते न काञ्चन परत इति ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां संहितायां वैयासिक्यां भरतोपाख्यानंनाम चतुर्दशोऽध्यायः ॥ १४ ॥

भाषाटीका ।

क्योंकि भगवान् की सेवा में निरत महापुरुषों को तो मोक्ष भी तुच्छ होता है तो फिर और क्या है ॥ ४४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य सेवानुरागमेवाह । यज्ञायेति । यज्ञरूपाय धर्मपतये यज्ञादिफलदाने विधौ नैपुण्यं यस्य तस्मै धर्मानुष्ठाने योगोऽ-ष्टाङ्गस्तस्मै सांख्यं नाम तच्छिरः प्रधानं फलं यस्य तस्मै योगाय प्रकृतीश्वराय मायानियन्त्रे अत एव नारं जीवसमूहः सोऽयनमाश्रयो यस्य सर्वजीवनियन्त्रे । एवं कर्मज्ञानदेवताकाण्डैः प्रतिपादिताय हरये नम इत्युदारमुच्चैर्यः सम्यगुच्चारितवान् मृगत्वं मृगदेहमपि हास्यन् त्यक्ष्यन् य एवम्भूतस्तस्य तदुचितमिति वा तस्यानुवर्त्म नार्हतीति वा सम्बन्धः ॥ ४५ ॥

भरतचरितश्रवणादिफलमाह । य इदमिति । भागवतैः सभाजिता अवदाताः शुद्धाः गुणाः कर्माणि च यस्य तस्य भरतस्यानुचरितं योऽनुशृणोति स आत्मन एव सकाशात् सर्वा आशिष आशास्ते स्वत एव प्राप्नोति न तु काञ्चिदपि परस्मादपेक्षत इत्यर्थः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य मधुद्विट्सेवानुरागातिशयमेवाह । यज्ञायेति । यज्ञानां भोक्त्रे प्रभवे च धर्मपतयेऽवतारैर्धर्माश्रमधर्माणां गोप्त्रे विधिनैपुणाय धर्मानुवर्त्तिनां रक्षाविधौ नैपुण्ययुक्ताय साङ्ख्यमात्मानात्मविवेकात्मकोऽध्यात्मयोगः स एव शिरः शिरोवत्प्रधानाङ्गं यस्य तस्मै योगाय विवेक साधनसप्तकानुगृहीतभक्तियोगगम्याय योगशब्दस्तद्गम्ये औपचारिकः प्रकृतीश्वराय मायानियन्त्रे नारं जीवसमूहः अयनमाश्रयो यस्य तस्मै अनेन चिद-चिच्छरीरकत्वमुक्तं हरये आश्रितबन्धहराय नम इत्युदारं मृगत्वमपि हास्यन् समुदाजहार उदाहृतवान् किं कर्त्तुमिच्छन् मृगत्वं हरिणशरीरमपि हास्यन् हातुमिच्छन् अत्र मृगत्वं हास्यन् समुदाजहारेति हासोदाहरणयोर्योगपद्यं प्रतीयते तथापि मृगजन्मनो वैकल्यदशायां समुदाहरणमत्र विवक्षितमन्यथा चरमदशायामुक्तनामग्रहणे तद्देहावसाने मुक्तेरस्मिन् प्रबन्धे बहुषु स्थलेषूक्तत्वेन पूर्वापरग्रन्थविरोधापत्तेः उदाहरणं चात्राव्यक्तोच्चारणं विवक्षितं मृगजन्मनस्तस्य व्यक्तोच्चारणासम्भवादन्यथा साङ्गभक्तियोगोपसंहारापत्त्या जन्मान्तरविलम्बायोगापत्तेः ॥ ४५ ॥

एतद्भरतचरितश्रवणादिफलमाह । य इदमिति । भागवतैः सभाजिताः संस्तुता अवदाताः शुद्धा गुणा अक्रोधादयः कर्माणि भूतहिताचरणादिरूपाणि च यस्य तस्य राजर्षेर्भरतस्यानुचरितं यशस्यं स्वस्त्ययनं मङ्गलावहमायुष्करं धन्यं धनप्रापकं स्वर्ग्यं स्वर्गसाधनमापवर्ग्यं मुक्तिसाधनं च योऽनुशृणोत्याख्यास्यति कथयति चाभिनन्दति अनुमोदते च स आत्मनः स्वत एव सर्वा ह्याशिषः समीहितान्याशास्ते प्राप्नोति न तु काञ्चिदप्याशिषं परस्मादपेक्षत इत्यर्थः चरितस्य स्वस्त्ययनादिकं च न स्वरूपेणापि तु श्रवणादिविषयत्वेनेति ख्यापनाय शृणोत्याख्यास्यतीत्युक्तं न केवलं स्वस्त्ययनादिकमेतस्य फलमपि त्वनुक्तमन्यत्सर्वमपीत्यभिप्रायेणोक्तं सर्वा ह्येवाशिष आत्मन आशास्ते इत्यादि ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

यज्ञायेति । धर्मरूपाय तत्पालकाय तत्प्रवर्त्तकाय ज्ञानसाधनरूपाय ज्ञानरूपाय मायानियन्त्रे सर्वजगदाश्रयाय ततोऽपि पराय हरये मनोहराय दास्येनात्मानं समर्पयामीत्यर्थः ॥४६॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यज्ञायेति त्रिभिः पादैः क्रमेण कर्मज्ञानभक्तिमार्गाणां यथोत्तरमुत्कर्षो व्यञ्जितः । विधर्यज्ञविधेर्नैपुण्यं यस्मात्तस्मै हास्यन् त्यक्ष्यन् तेन मरणकाले न उदाजहार तथासति जहद्दित्युच्येत भगवतैव स्वभक्त्युद्रेकार्थं पुनर्जनयिष्यमाणत्वादिति भावः ॥ ४५ ॥

भागवतैः श्रीभागवतेऽस्मिन् शास्त्रे वा सभाजिताः स्तुता अवदाताः शुद्धा गुणाः कर्माणि यस्य । आत्मन एवेति सर्ववाञ्छितानि तस्यानायासेनैव स्वतः प्राप्तानि भवन्तीत्यर्थः ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
चतुर्दशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ १४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य भगवत्सेवानुरागं स्फुटयति । यज्ञाय "यज्ञो वै विष्णुः"- इति श्रुतेः धर्मपतये धर्मगोप्त्रे विधेर्भक्त्याः नैपुण्यं यस्य तस्मै युज्यते भक्तेः स्वानुकूल्ये प्रवर्त्यते इति योगस्तस्मै भक्तवश्याय सम्यक् ख्यायन्ते प्रकथ्यन्ते तत्त्वान्यनया इति संख्या अध्यात्मविद्या तयावधारणीयानि चिदचिद्ब्रह्माख्यानि तत्त्वानि सांख्यानि तेषु शिरःप्रधानं ब्रह्म तस्मै सांख्यशिरसे प्रकृत्योः परापरयोः चेतनाचेतनरूपयोरीश्वराय नारस्य जीवसमूहस्यायनाय स्थितिप्रवृत्तिप्रदाय हरये भक्तक्लेशहारिणे नमः इत्युदारं परममङ्गलं वेदवेद्यत्वयज्ञमूर्तित्वधर्मगोप्तृत्वभक्त्यादिनैपुण्यहेतुत्वभक्तवश्यत्वसर्वतत्त्वप्रधानत्वादि भगवद्गुणविषयकवाक्यं मृगत्वं मृगभावं हास्यन् त्यक्ष्यन् यः समुदाजहार सम्यगुच्चारितवान् तस्यानुवर्त्म नार्हतीति सम्बन्धः ॥ ४५ ॥

भरतचरितश्रवणादिफलमाह । य इति । भागवतैः सभाजिताः संस्तुता अवदाताः शुद्धाः गुणाः कर्माणि च यस्य तस्य राजर्षेर्भरतस्य अनुचरितं योऽनुशृणोति आख्यास्यति अभिनन्दति च स आत्मनः सकाशात् सर्वा आशिषः पुरुषार्थान् आशास्ते प्राप्नोति ननु काञ्चन काञ्चिदपि परत अपेक्षते ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्दशाध्यायार्थप्रकाशः ॥ १४ ॥

भाषाटीका ।

[illegible] भगवान् धर्मपति विधिमें निपुण [illegible] नारायण हरि [illegible] मृगशरीर- [illegible] का त्याग [illegible] सकता- है ॥ ४५ ॥

भागवतजनों से पूज[illegible] वाले राजर्षि भरतजी के कल्याण आयु धन [illegible] देने वाले चरित्र को जो सुने कहै प्रशंसा करै उसको आपही सब संपत्ति मिलती है दूसरे से नहीं चाहना पडती है ॥ ४६ ॥

इति श्रीभागवत पञ्चमस्कन्ध चतुर्दश अध्याय[illegible]
भाषानुवाद [illegible]कृत
[illegible] ॥ १४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे चतुर्दशोऽध्यायः समा[illegible]

॥ पञ्चदशोऽध्यायः ॥

———:o:———

॥ श्रीशुक उवाच ॥

भरतस्यात्मजः सुमतिर्नामाभिहितो यमुह वाव केचित्पाखण्डिन ऋषभपदवीमनुवर्तमानं चानार्या अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या कलौ कल्पयिष्यन्ति ॥ १ ॥

तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रोऽभवत् ॥ २ ॥

अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः॥३॥

य आत्मविद्यामाख्याय स्वयं संशुद्धो महापुरुषमनुसस्मार ॥ ४ ॥

प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्निज्याकोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानावजनिषाताम् ॥ ५ ॥

भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसीद्विभुर्विभो रत्यां च पृथुषेणस्तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्त्वस्य कलात्मवत्त्वादिलक्षणेन महापुरुषतां प्राप्तः ॥ ६ ॥

स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मनाऽर्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितातिशुद्धमतिरुपरतानात्म्य आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोऽपि निरभिमान एवावनिमजूगुपत् ॥ ७ ॥

तस्येमां गाथां पाण्डवेय ! पुराविद उपगायन्ति ॥ ८ ॥

श्रीधरस्वामिकृता भावार्थदीपिका ।

एवमष्टभिरध्यायैर्भरतस्योदितम् ।
ततः पञ्चदशे तद्वंशजा नृपाः ॥ १ ॥

ऋषभपदवीं जीवन्मुक्तमार्गमनुवर्तमानं यं दृष्ट्वेति शेषः । यद्वा यं सुमतिमवेदसमाम्नातां देवतां कल्पयिष्यन्ति बुद्धोऽयं साक्षादवतीर्ण इति मंस्यन्त इत्यर्थः ॥ १ ॥ २ ॥

तत्तनयो देवताजितः पुत्रः ॥ ३ ॥

आत्मविद्यां बहुभ्य आख्याय व्याख्यानेनैव स्वयं संशुद्धोऽनुसस्मारापरोक्षतयाऽनुभूतवान् ॥ ४ ॥

प्रतिहर्ता प्रस्तोता उद्गातेति त्रयो यज्ञनिपुणाः सूनव आसन् अजनिषातां जातौ ॥ ५ ॥

हृदयजः पुत्रः जगतो दिरक्षिषया रक्षितुमिच्छया गृहीतं सत्त्वं येन तस्य विष्णोः कलांशः सन् ॥ ६ ॥

महापुरुषत्वमेवाह । स वै इति । धर्मस्तस्य द्विविधः अभिषिक्तत्वात्प्रजापालनादिरेकः पुरुषस्य परिचर्यादिश्चापरः । द्विविधोऽपि भगवति सर्वात्मनार्पितः सन् परमार्थलक्षणस्तेन परिभाविता संस्कृतातिशुद्धा मतिर्यस्य अत एवोपरतमनात्म्यं देहाद्यहंभावो यस्मिंस्तस्मिन्नात्मनि चित्ते स्वयमेवोपलभ्यमानं ब्रह्मात्मानुभवो यस्य तादृशोऽपि निरभिमान एवावनिमजूगुपत्पालयामास ॥ ७ ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भरतचरित्रमुपवर्ण्य तद्वंशमुपवर्णयति श्रीशुकः । भरतस्य सुमतिर्नामाभिहित आत्मजः यं सुमतिमृषभस्य पदवीं योगचर्यारूपामनुवर्तमानमवलोक्य केचित्पाखण्डिनोऽनार्याः कलौ पापीयस्या स्वमनीषया अवेदसमाम्नातामवेदोक्तां बौद्धदेवतां यावत् कल्पयिष्यन्ति बुद्ध एव साक्षात्सुमतिरूपेणावतीर्ण इति स्वकुमनीषया पश्यन्तीत्यर्थः ॥ १ ॥

तस्मात्सुमतेः वृद्धसेनायां भार्यायां देवताजिन्नामा पुत्र उत्पन्न आसुर्यां देवताजितो भार्यायां तत्तनयः देवताजित्पुत्रः देवद्युम्नो नाम्ना अभवत् ततो देवद्युम्नात्तद्भार्यायां धेनुमत्यां परमेष्ठीनाम सुतो जातः तस्य परमेष्ठिनस्तद्भार्यायां सुवर्चलायां प्रतीहाख्यः पुत्र उपजातः यः प्रतीहः बहुभ्यः आत्मविद्यामाख्याय उपदिश्या-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ध्यानेनैव स्वयं संशुद्धः निर्मलान्तःकरणः परमपुरुषमुपासितवान् अनुस्मृतिरत्र प्रत्यक्षतापन्नमुपासनं विवक्षितं भवति ॥२-४॥

प्रतीहात्सुवर्चलायां जातान्प्रतिहर्त्रादयः प्रतिहर्ता प्रस्तोता उद्गातेति । त्रयोऽपीज्याकोविदा यज्ञनिपुणाः सुनवः पुत्रा आसन् तत्र प्रतिहर्त्तुः स्तुत्यां भार्यायामजभूमानावजौ भूमेति च द्वौ पुत्रावजनिषाताम् उद्भूतां भूम्नोऽजानुजार्षिकुल्यायां भार्यायां उद्गीथाख्यः पुत्रः तत उद्गीथाद्देवकुल्यायां भार्यायां प्रस्ताराख्यः पुत्रः प्रस्तारान्नियुत्सायां भार्यायां विभुर्नाम हृदयजः पुत्र आसीत् विभो रत्यां भार्यायां पृथुषेणाख्यः पुत्रः तस्मात्पृथुषेणादाकूत्यां भार्यायां नक्तो नाम जज्ञे ततः नक्ताद्द्रुत्यां नाम कृतिपुत्रः कृतौ भार्यायां नक्तस्य भार्यायां पुत्र आसीदित्यर्थः गयं विशिनष्टि । राजर्षीणां मध्ये श्रेष्ठः उदारश्रवा विपुलकीर्त्तिर्जगतां रिरक्षिषया रक्षितुमिच्छया गृहीतसत्त्वस्य उपात्तशुद्धसत्त्वमूर्त्तेर्भगवतो विष्णोः कला अंशभूतः सन्नात्मवत्त्वं प्रशस्तमनस्कत्वं तत्प्रभृतिना लक्षणेन गुणेन लक्ष्यतेऽनेनेति लक्षणो धर्मः महापुरुषत्वं प्राप्तः ॥ ५ ॥ ६ ॥

महापुरुषत्वमेवाह । स वा इति । स वै गयः प्रजापरिपालनादिरूपेण स्वधर्मेण स्ववर्णधर्मेण तत्र पालनं भयात् पोषणमन्नपानादिना प्रीणनमर्थितप्रदानेन उपलालनं सुनयन् इत्याधनमनुशासनं दुर्मार्गान्निवारणं तथा इज्यादिना पञ्चमहायज्ञादिना स्वाश्रमधर्मेण च इज्याशब्दः पञ्चमहायज्ञपरः आदिशब्दो विवेकविमोकादीनामपि संग्राहकः चशब्द आत्मयाथात्म्यज्ञानयोगसमुच्चायकः इत्यादिकमाश्रमधर्मं विशिनष्टि । भगवति ब्रह्मणि परावरे महापुरुषे सर्वात्मना समर्पितपरमार्थलक्षणेनेति भगवति ब्रह्मणीति भगवद्ब्रह्मशब्दयोरेकविषयत्वमुक्तं भगवत्त्वे परावरत्वे हेतुः परे ब्रह्मादयोऽवरेऽवमा यस्मात्स परावरः तस्मिन् "यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति,, इति तत्क्रतुन्यायेनोपासितुर्महापुरुषत्वापादकं भगवदसाधारणमुपास्यं महापुरुषत्वमुक्तं महापुरुष इति सर्वात्मना सर्वप्रकारेण करणत्रयेणार्पितं समर्पितं परमार्थलक्षणं यत्फलस्वरूपं यस्मिंस्तेन अनभिसंहितफलत्वेनेत्यर्थः भगवत्परमार्थाभिलषितोऽर्थः फलमिति यावत् तल्लक्ष्यते येन सङ्गेनार्पितः परमार्थलक्षणः सङ्गो यस्येति ममेदं कर्म न भवतीति तदित्युक्तसङ्गेनेति वार्थः ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेनेत्यस्य तत्रायमर्थः अर्पितपरमार्थलक्षणेन अंगमित्यात्मानं युञ्जीतेत्युक्तविधात्मसमर्पणरूपशरणागतियोगाङ्गविशिष्टेनेति "तमेव शरणं गच्छ सर्वभावेन भारत ! मामेकं शरणं व्रज" इति भक्त्यङ्गतया शरणागतेः कर्तव्यताभिधानात् ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेनेत्यनेन भगवद्भक्तियोगोत्पत्तिः सत्सेवायत्तेत्युक्तं ब्रह्मविच्चरणानुसेवयेत्यनेन "देवीमवाचार्यमुपासीत आचार्यवान् पुरुषो वेद तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इत्यादिश्रुतिविहिताचार्यसम्बन्धोऽस्याभिहितः ब्रह्मविदित्यनेनाचार्यलक्षणमुक्तं गुरुसमाश्रयणमस्य सूच्यते स्वधर्मेणेत्यादिना ज्ञानकर्मयोगानुगृहीतेन न्यासयोगाङ्गेन भक्तियोगेनेत्युक्तं भवति उक्तविधेन भगवद्भक्तियोगेनाभीक्ष्णशः पुनः पुनः परिभाविता विशोधिताऽत एव विशुद्धा मतिर्यस्य सः अत एव उपरतमनात्म्यं देहात्मभ्रमो यस्य स निवृत्तदेहात्मभ्रम इत्यर्थः आत्मेतरशरीरमनात्मा एवम्भूते स्वात्मनि उपलभ्यमानमन्तरात्मतया साक्षात्क्रियमाणं ब्रह्म तदेवात्मा परमात्मा तस्यानुभवो यस्य सः । यद्वा स्वान्तरात्मभूतब्रह्मैव परमात्मा तस्यानुभव उपलभ्यते येन तथोक्तः य आत्मनि तिष्ठन्निति प्रकारेण जीवात्मन्यवस्थितं परमात्मानमुपलभ्यमानमित्यर्थः एवम्भूतोऽपि निरभिमान एव देहात्मभ्रमस्वतन्त्रात्मरहित एव इमां भूमिमजूगुपत् अरक्षत् इत्यर्थः ॥ ७ ॥

गयस्य माहात्म्यप्रतिपादिकां गाथामवतारयति । तस्येति । हे पाण्डवेय ! पुराविदः पूर्वकालिकवृत्तान्ताभिज्ञाः तस्य गयस्येमां माहात्म्यसूचिकां गाथामुपगायन्ति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

राजसन्ततौ विशिष्टराजज्ञानं भगवन्माहात्म्यज्ञानोपयोगीत्यतस्तज्ज्ञानायावशिष्टवंश्याननुक्रामत्यस्मिन्नध्याये । यमुहवावेति । उहवावेति चतुर्भिर्निपातैर्वैदिकमतस्य वैभाषिकादिचतुर्धा भेदः सूच्यते अवेदो वेदविरुद्धः आगमस्तत्र प्रतिपादितां पद्मावतीत्यादिना भगवतीम् ॥ [illegible] २ ॥

तस्य देवपादस्तन[illegible] ॥ ३ ॥ ४ ॥ ५ ॥

हृदयज औरसपुत्रः अभि[illegible] जगद्रक्षाकारणेन गृहीतसत्त्वगुणस्य कलाया अंशस्य आत्मव[illegible] मूर्त्तदेहवत्त्वेन प्रकाशमानं तस्याभिलक्षणेन विग्रहवत्कलांशेन [illegible]रणादिचकचिह्नेन संवर्ण्यमानत्वाद्गयः ॥ ६ ॥

स्वधर्मेणानिमजूगुपद्धं इत्यन्वयः स्वधर्मेणेत्येतत्स्पष्टयति ! प्रजापालनेति । सर्वात्मनेत्यादि च स्वधर्मेणेत्यस्य विशेषणं निर्व्याजेन सर्वसमर्पणाख्यचिह्नेन ब्रह्मविदां चरणादित्तरनिषेवया भक्तिसाधनमेतत् परिभावितं वशीकृतमत एव विशुद्धं सत्त्वमन्तःकरणं यस्य स तथा उपरतं निवृत्तमनात्म्यं देहधर्मो यस्मिंस्तथा तस्मिन् स्वात्मनि स्वहृदये उपलभ्यमान; अपरोक्षीक्रियमाणो ब्रह्मानुभावो यस्य स तथा अपीत्यनेन राज्यपालनं सम्भावितं न [illegible]ते तथापीत्यर्थं द्योतयति निरभिमान इत्यनेनानुपपत्ति[illegible] ॥ ७ ॥

तस्येमां गाथामित्यनेन [illegible]रयेति शब्दार्थं सूचयति पुराविदः पुरा[illegible] [illegible]क्षरगुरुपादोपेतां तथोदाहरन्ति ॥ ८ ॥

श्रीम[illegible]सन्दर्भः ।

कल्पयिष्यन्ति । [illegible] भविष्यति । तस्य कलेभूतत्वात् । तथा [illegible]भयोराकिंवृत्तेऽपि" इति ॥ १ ॥ २ ॥ ३ ॥ [illegible]

सर्व इति । उपल[illegible]भवोऽप्यजुगुपदित्यन्वयः तथापि गोपने हेतुः [illegible]मिति ॥ ७—१२ ॥

श्रीमद्विश्व[illegible]सारार्थदर्शिनी ।

अथ पञ्च[illegible]मोच्यते ।

यः प्रियव्र[illegible] विरजस्य च ॥

गयं नृपः कः प्रतियाति कर्मभिर्यज्वाऽभिमानी बहुविद्धर्मगोप्ता ।
समागतश्रीः सदसस्पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते ॥ ९ ॥
यमभ्यषिञ्चन् परया मुदा सतीः सत्याशिषो दक्षकन्याः सरिद्भिः ।
यस्य प्रजानां दुदुहे धराशिषो निराशिषो गुणवत्सस्नुतोधाः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कलौ तस्य चरितं श्रुत्वा तादृशाचारवन्तोऽस्माकं सुमतिरेव देवता यथा बुद्ध इति बौद्धसम्प्रदाया त्विच्छिद्य कल्पयिष्यन्ति ॥ १—३ ॥

अनुसस्मार अनुबभूव प्राप वा ॥ ४ ॥

प्रतिहर्ता प्रस्तोता उद्गातेति त्रयः यज्ञनिपुणाः सुता आसन् ॥ ५ ॥

इदयजः पुत्रः कला अंशांशः ॥ ६ ॥

पालनं विपक्षविमर्द्दनादिना पोषणं वृत्तिदानादिना अर्पितः सन् परमार्थलक्षणो भवति यः स्वधर्मस्तेन ... सर्वतो भावेन भाविता भावयुक्तीकृता विशुद्धा मतिर्येन सः । उपरतमनात्म्यं देहाद्यहंभावो यस्य सः ॥ ७—८ ॥

श्रीशुकदेवकृतसिद्धान्तप्रदीपः ।

भरतवंश्या नृपाः कीर्त्यन्ते । भरतस्यात्मजेति पञ्चदशेनाध्यायेन । यं सुमतिम् अवेदसमाम्नातां बुद्ध पदार्थमवतीर्णः इत्येवं बुद्धरूपां देवतां कल्पयिष्यन्ति ॥ १ ॥ २ ॥

तत्तस्य देवताजितः ॥ ३ ॥

आख्याय व्याख्याय तदधिकारिभ्यः ॥ ४ ॥

प्रतिहर्ता प्रस्तोता उद्गातेति त्रयः यज्ञनिपुणाः जातौ ॥ ५ ॥

कला अंशः ॥ ६ ॥

प्रजापालनादिलक्षणेनेज्या ... दादिना ब्रह्मविदश्चरणानुसेवया च विशेषतया सम्पादितभगवद्भक्तियोगेन कथम्भूतेन परं ब्रह्मादयोऽपि अवरे यस्मात्तस्मिन् सर्वात्मना अर्पितपरमार्थलक्षणेन निवेदितपरमप्रयोजनकपेक्षा पुंदेहाभिमानो विशुद्धा मतिर्यस्य सः अतः आत्मनि मनसि स्वयमेवोपलभ्यमाने ब्रह्मणि अंशिनि आत्मनः अंशस्य स्वस्य अनुभवो यस्य स तथाभूतोऽपि निरभिमानः एव अवनीम् गुपत् ॥ ७ ॥ ८ ॥

भाषाटीका ।

श्रीशुकदेवजी बोले भरतजी के पुत्र सुमति कहे हैं जिनको कोई पाखण्डी लोग ऋषभजी के मार्ग से चलते जानकर स्वयं आप कुबुद्धि होने से अपनी पापी बुद्धि से कलियुग में वेदों से बाह्य देवता मूर्ति कल्पना करेंगे ॥ १ ॥

उस सुमति से वृद्धसेना भार्या में देवताजित नाम का पुत्र भया ॥ २ ॥

तदनन्तर देवताजित्की आसुरी नाम भार्या में देवद्युम्न पुत्र भया तिस देवद्युम्न से धेनुमती भार्या में परमेष्ठी पुत्र भया उस परमेष्ठी से सुवर्चला भार्या में प्रतीह नाम का पुत्र भया ॥ ३ ॥

जिस प्रतीह ने बहुतों को आत्मविद्या का उपदेश किया फिर स्वयं शुद्ध होकर महापुरुष का स्मरण करने लगा ॥ ४ ॥

प्रतीह से सुवर्चला में प्रतिहर्त्रादिक तीन पुत्र यज्ञ में बडे निपुण भये प्रतिहर्ता से स्तुति भार्या में अज भूमा दो पुत्र भये ॥ ५ ॥

भूमासे ऋषिकुल्या में उद्गीथ भया उद्गीथ से देवकुल्या में प्रस्ताव पुत्र भया प्रस्ताव से नियुत्सा में विभु पुत्र भया विभुसे रति में पृथुषेन भया पृथुषेनसे आकूति में नक्तपुत्र भया नक्तसे द्रुति में गय नाम के पुत्र भये वे राजर्षियों में श्रेष्ठ हैं उदारयश वाले हैं जगत्की रक्षा करने के लिये सत्वगुण को धारण करने वाले साक्षात् भगवान् के अंशावतार हैं सो आत्म ज्ञानी होकर महापुरुषता को प्राप्त भये ॥ ६ ॥

सो गय महाराज अपने धर्म से प्रजा का पालन पोषण प्रीणन उपलालन अनुशासन रूप धर्म से और यज्ञादि से स्थूल सूक्ष्म रूप महा पुरुष परब्रह्म सर्वान्तर्यामी परमार्थस्वरूप भगवान् में सब कर्मों को अर्पण करके ब्रह्मज्ञानियों का चरण सेवन करके प्राप्त भया जो भगवद्भक्ति योग तिससे निरन्तर बुद्धिके शुद्ध होने से देहादि वस्तु रहित केवल आत्मा में अपने ब्रह्मानुभवको प्राप्त होकर भी निरभिमान से इस पृथिवी को पालन करते थे ॥ ७ ॥

हे पांडवेय ! परीक्षित् जी ! उन गय महाराज की इस स्तुति को प्राचीन कथा के जानने वाले गान करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्मभिर्गयं कः प्रतियात्यनुकरोति न कोऽपि । अत्र हेतुः । यज्ञादिरूपो भगवत्कलां गयमृतेऽन्यः क इत्यनुषङ्गः । अभिमानी सर्वेषां मानाास्पदं समागतश्रीः वा समागता सम्प्राप्ता श्रीर्येन सर्वाणि वा सतां सदसः सभायाः पतिः सतां सेवकः । यज्ञा । यज्ञादिरूपोऽपि भगवत्कलामृते गयं कोऽन्यः प्रतियातीत्यन्वयः ॥ ९ ॥

सतीः सत्यः सत्या आशिषो यासां ताः दक्षकन्याः श्रद्धामैत्रीदयन्याद्याः निराशिषोऽपि यस्य प्रजानामाशिषः कामान् धरा दुदुहे तस्य गुणा एव वत्सस्तेन स्नुतमूधो यस्याः पृथिव्याः यज्ञाद्दानां तं गयं कः प्रतियातीति सम्बन्धः ॥ १० ॥

छन्दांस्यकामस्य च यस्य कामान् दुदू[illegible]
प्रत्याश्रिता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परे[illegible] ॥
यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे ।
श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

छन्दांसि वेदास्तद्विहितकर्माणि च दुदुहुर्दुदुहुः युधि प्रत्यश्रिता वाणैः प्रतिपूजिता नृपा यस्य बलिमाजहुरर्पयामासुः । धर्मेण पालनेन दक्षिणादिभिश्च यदा प्रत्यश्रिता विप्रास्तदा परेत्य लोकान्तरे आशिषां धर्मफलानां षष्ठमंशमाजन्हुः । "पुण्यषड्भागमादत्ते न्यायेन परिपालयन्" इति स्मृतेः ॥ ११ ॥

उरुसोमपीथे बहुसोमपानेऽध्वरे मघोनि इन्द्रे माद्यति मदं प्राप्नुवति सति श्रद्धया विशुद्धो योऽचलो भक्तियोगस्तेन समर्पितामिज्याफलमाजहार । अर्हणामिव प्रत्यक्षतः स्वीकृतवानित्यर्थः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गाथामेवाह । गयमिति पञ्चभिः । गयं नृपं कः पुमान् कर्मभिः प्रतियाति तत्सजातीयकर्मभिः कोऽपि पुमाननुकर्तुं शक्नोतीत्यर्थः तत्कृतं कर्म पुनरन्यः कर्तुं न प्रभवतीति यावत् तत्र हेतुं वदन्प्रतियानाशक्यधर्मवत्तामाह । यज्वा यावच्छ्रुतिविहितयज्ञानुष्ठाता अभितो मानी सन् मानास्पदः बहुशः नर्णाश्रमधर्माणां गोप्ता समागता सम्प्राप्ता श्रीः सम्पच्चेन यस्मिन्निति वा सप्तमी सदसः सभायाः पतिः सतां सेवकश्चान्यो भगवत्कलां गयमृते यं विना यज्वादिगुणाश्रयः कोऽपि नास्तीत्यर्थः । यद्वा । यज्वत्वादिगुणाधिक्येऽपि भगवत्कलां गयमृते कोऽन्यः प्रतियातीत्यन्वयः अस्मिन् पक्षे भगवत्कलात्वमेव प्रतियानशक्यो धर्मः ॥ ९ ॥

सतीः सत्यः सत्या आशिषो यासां ताः दक्षकन्याः श्रद्धामैत्रीदयाकीर्तिश्रीस्मृतिमेधाधृतितितिक्षाक्षमाद्याः सरिद्भिः स्वतेजोभिः यमभ्यषिञ्चन् श्रेष्ठमकुर्वन् यस्य गयस्य निराशिषः निष्कामस्य प्रजानामाशिषः कामान् धरा दुदुहे धरा कथम्भूता तस्य गुणा एव वत्सास्तैः स्नुतमूधो यस्याः सा ॥ १० ॥

छन्दांसि च यस्य कामान्दुदुहुः नृपा युधि युद्धे प्रत्यश्रिताः बाणैः प्रतिपूजिता बलिमाजह्रुरर्पयामासुः तथा धर्मेण धर्मपरिपालनेन दक्षिणादिभिश्च प्रत्यश्रिता विप्राः परेत्य लोकान्तरे आशिषां धर्मफलानां षष्ठांशमाजह्रुः "पुण्यात्षड्भागमादत्ते राजा न्यायेन पालयन्" इति स्मृतेः ॥ ११ ॥

यस्य गयस्याध्वरे यज्ञे गयकर्तृके यज्ञ इत्यर्थः मघोनीन्द्रे उरुः सोमपीथः यस्य तस्मिन् बहुसोमपानेऽत एव माद्यति मदं प्राप्नुवति सति उरुसोमपीथे इत्यध्वरस्य विशेषणं वा अध्वरात्मा यज्ञशरीरकः स भगवान् श्रद्धया विशुद्धो निष्कपटो योऽचलोऽन्तरायानुपहतो भक्तियोगस्तेन समर्पितामिज्याफलमाजहार भक्तियोगोपपादितं प्रीतिरूपमिज्याफलमर्हणामिव प्रत्यक्षतः स्वीकृतवानित्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

गयमित्यादिना अन्यः कः कर्मभिः गयं नृपं प्रतियाति प्रतिनिधिर्भवति कीदृशः यज्वेत्यादिगुणकर्मवान् सतां सदसस्पतिः कोऽपि नास्तीति नेत्याह । भगवत्कलामिति । भगवतां ज्ञानभक्त्या भा[illegible] कर्मदेवानां कलामङ्गमेकमन्तरेण तदुक्तम् "प्रियव्रतो [illegible] समो गुणैः" इति ॥ ॥ ९ ॥

सतीः सत्यः [illegible] कीर्तिः श्रीर्वाक् स्मृतिर्मेधा धृतिः क्षमेत्याद्याः स्वयंगुण[illegible] स्नुतमूधो यस्याः [illegible] तथा सा धरा गयस्य राज्ञः सतीनां प्रजानां [illegible] आशिषो दुदुहे वा इत्यनेन सकल[illegible] मन्त्रसिद्धो गय इति सूच्यते ॥ १० ॥

वेदा अपि तदुक्तफलानिच्छन्तेऽपि सर्वार्थदान् दुदुहुरित्याह । छन्दांसीति । नृपान्विशिनष्टि । प्रत्याहृता इति । युद्धे पराजिता इत्यर्थः विप्रा धर्मं प्रत्याहृता धर्माभिमुखीकृताः प्रजाश्च यस्याशिषो धनवृष्ट्याः षष्ठमंशमाजन्हुरित्यन्वयः । अनुष्ठितपुण्यलक्षणाशिषो वा ॥ ११ ॥

उरुसोमपीथे बहुसोमपानेऽध्वरस्य सारमादत्ते, कर्तृभ्यः फलं ददाति चेत्यध्वरात्मा मघोनि देवेन्द्रे माद्यति मदं गच्छति सति श्रद्धया विशुद्धो योऽचलो भक्तियोगस्तेन समर्पितमिज्याफलं यागादिपूजालक्षणकर्मफलमाजहार ददौ ॥ १२ ॥

श्रीमद्विश्वनाथ[illegible]सारार्थदर्शिनी ।

प्रतियाति अनु[illegible] । [illegible] सर्वतो मानास्पदं मनस्वीति वा सतां यत्[illegible] भगवदंशं विना कोऽन्यो यज्वादिरूपोऽपि गयं [illegible] ॥ ९ ॥

सतीः सत्यः [illegible]याद्याः [illegible] आशिषः श्रद्धामैत्रीदयाद्यास्ते [illegible] यासां ताः । निराशिषो निष्कामस्यापि यस्य [illegible] धरा दुदुहे । गुणा एव वत्साः तेन स्नुतमूधो यस्या[illegible]

युधि प्रत्यश्रि[illegible]जिता नृपा बलिमाजह्रुः धर्मेण दक्षिणा[illegible] यदस्मै परेत्य लोकान्तरे आशिषां [illegible] षष्ठमंशमाजह्रुः । "पुण्यं षड्भागमादत्ते [illegible] इति स्मृतेः ॥ ११ ॥

यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिञ्च्यात् ।
प्रीयेत सद्यः स ह विश्वजीवः प्रीतः स्वयं प्रीतिमगाद्गयस्य ॥ १३ ॥

गयाद्गयन्त्यां चित्ररथः सुगतिरवरोधन इति त्रयः पुत्रा बभूवुश्चित्ररथादूर्णायां सम्राडजनिष्ट ॥ १४ ॥

तत उत्कलायां मरीचिर्मरीचेर्विन्दुमत्यां विन्दुमानुदपद्यत तस्मात् सरघायां मधुनामाऽभवन् मधोः सुमनसि वीरव्रतस्ततो भोजायां मन्थुप्रमन्थू जज्ञाते । मन्थोः सत्यायां भौवनस्ततो दूषणायां त्वष्टाऽजनिष्ट त्वष्टुर्विरोचनायां विरजो विरजस्य शतजित्प्रवरं पुत्रशतं कन्या च विषूच्यां किल जातम् ॥ १५ ॥

तत्रायं श्लोकः ।

प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः ।
अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां प्रियव्रतवंशानुकीर्तनं नाम
पञ्चदशोऽध्यायः ॥ १५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उरु सोमपीथे बहुसोमपानेऽध्वरे मघोनि इन्द्रे माद्यति सति आजहार अर्हणमिव प्रत्यक्षतः स्वीचकार ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवत्कलामृते यज्वादिरूपः कः नृपः गयं प्रतियाति अनुकरोति न कोऽपीत्यर्थः समागता संप्राप्ता श्रीर्येन तथाभूतोऽपि सतां सदसः सभायाः पतिः सतां सेवकोऽपि ॥ ९ ॥

सत्या आशिषो यासां ताः सतीः सत्यः दक्षकन्याः श्रद्धामैत्रीदयाकीर्तिस्मृतिमेधाद्याः सरिद्भिः सह यं मुदा अभ्यषिञ्चन् निराशिषः निष्कामस्यापि यस्य प्रजानामाशिषः कामान् गुणाः गयगुणाः एव वत्सास्तैः स्नुतमूधो यस्याः सा धरा दुदुहे तं कः प्रतियातीति सम्बन्धः ॥ १० ॥

यस्याकामस्यापि छन्दांसि वेदाः कामान् दुदुहुः सर्वे राजानः युधि प्रत्यर्चिताः धर्मयुद्धेन पूजिताः यस्य बलिमाजह्रुः विप्राः यद्वा दानमानैः प्रत्यर्चिताः तदा परेत्य लोकान्तरे आशिषां स्वपुण्यकर्मफलानां षष्ठमंशमाजह्रुः "पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन्" इतिस्मृतेः । यस्य गयस्य उरुसोमपीथे बहुसोमपाने अध्वरे यज्ञे. मघोनि इन्द्रे माद्यति मदाविष्टे सति अध्वरस्य आत्मा आश्रयः स्वामी "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति श्रीमुखवचनात् श्रद्धया विशुद्धो निर्मलोऽचलो दृढो यो भक्तियोगस्तेन समर्पितमिज्याफलमाजहार साक्षादाविर्भूय महतादरेण गृहीतवान् ॥ ११ ॥ १२ ॥

भाषाटीका ।

यज्ञ करनेवाला होवे बड़ा मानी होवे शास्त्रज्ञ होवे धर्मरक्षक होवे सब सम्पत्ति को प्राप्त होवे सभापति होवे सत्पुरुषोंका सेवक होवे तौभी कौन ऐसा राजा है जो कि भगवान् के अंशावतार के बिना गय महाराजकी तुलना को कर्मोंसे करसके ॥ ९ ॥

सत्य सम्पत्तिवाली सती दक्षकन्या श्रद्धा मैत्री आदिकों ने परम आनन्द से नदियों के जलों से जिनका अभिषेक किया है जिन गय महाराज के निष्काम होनेपरभी उनके प्रजाओं के मनोरथों को गुणरूपी बछड़ासे पिलाकर पृथिवी ने पूर्ण करदिये ॥ १० ॥

जिन राजाके निष्काम होने परभी वेदोंने सब मनोरथ पूर्ण करदिये और सब राजाओं ने युद्ध में सन्तुष्ट होकर भेट दे दिया और धर्म से प्रजापालन होनेसे ब्राह्मणादि प्रजोंने परलोक में धर्मका छठमां अंश दिया ॥ ११ ॥

जिनके यज्ञमें बड़े सोमके पान करने से इन्द्रके मद होनेपर यज्ञमूर्ति विष्णु भगवान् ने श्रद्धा से विशुद्ध अचल भक्ति भाव से अर्पण करे हुये यज्ञफल को साक्षात् ग्रहण किया ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्य भगवतः प्रीणनात् देवादीनां तृप्तिरित्यम । तत्सद्यः प्रीयेत प्रीतिं गच्छेत् स विश्वजीवः सर्वान्तर्यामी स्वयं प्रीतरूप

श्रीधरस्वामिकृतभावार्थदीपिका ।

एव बर्हिषि यज्ञे गयस्य ह स्फुटं प्रीतिमगात्तृप्तोऽस्मीति प्रत्यक्षं प्रीतिमाविष्कृतवानित्यर्थः ॥ १३ ॥ १४ ॥

सुमनसि स्त्रियाम् ॥ १५ ॥

कीर्त्या अतिशयेनालमकरोद्भूषितवान् ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीधरस्वामिकृतभावार्थदीपिकायाम्

पञ्चदशोऽध्यायः ॥ १५ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेव प्रपञ्चयति । बर्हिषि यज्ञे यत्प्रीणनाद्यस्य भगवतः प्रीणनादाचतुर्मुखं देवादि सद्यः प्रीयेत प्रीतं भवेत् देवादीनां कुतः हि यस्मात्स विश्वजीवः विश्वं जीवयतीति विश्वजीवः विश्वस्य प्राणभूतः एवम्भूतो भगवान् स्वयं प्रीतः निरतिशयप्रीतिविशिष्टः गयस्य प्रीतिमगात्प्राप्तः गयस्य प्रीतिविषयोऽभूदित्यर्थः अदादितिपाठे स्वयं गयविषयकनिरतिशयप्रीतियुक्तो भगवान् तस्यापि स्वविषयां प्रीतिं प्रीत्यात्मिकां बुद्धिमदादित्यर्थः

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
प्रदान्मे ज्ञानमैश्वर्यं स्वस्मिन् भावं च केशवः ।

इत्यादि वचनजातार्थोऽत्रानुसन्धेयः ॥ १३ ॥

एवं गयस्य महापुरुषतामुपपाद्य प्रस्तुतां सन्ततिमाह । गयादिति । गयाज्जयन्त्यां भार्यायां चित्ररथादयः त्रयः पुत्रा बभूवुस्तेषां मध्ये चित्ररथादूर्णायां भार्यायां सम्राडाख्यःपुत्रोऽजनिष्ट उत्पन्नस्ततः सम्राजः उत्कलायां भार्यायां मरीचिः मरीचेर्बिन्दुमत्यां बिन्दुमान्पुत्र उत्पन्नः तस्माद्बिन्दुमतः सुघेणायां भार्यायां मधुर्नामात्मजोऽभवत् मधोः सुमनसि भार्यायां त्वष्टा नाम पुत्रो जातः ततस्त्वष्टुर्विरोचनायां भार्यायां विरजोऽजायत जातः विरजस्य विरजाद्विषूच्यां भार्यायां शतजित्प्रवरो मुख्यो यस्य तत्पुत्राणां शतं जातं कन्या च जाता किलेति प्रसिद्धौ ॥ १४-१५ ॥

प्रियव्रतसन्तानमुपसंहरति । तत्रेति । तत्र प्रियव्रतसन्तानविषयेऽयं श्लोकः पठ्यते इति शेषः चरमोद्भवः चरमस्य पुत्रशतस्य शतजिदादेः उद्भवः उद्भवत्यस्मादित्युद्भवः जनको विरजः इममुक्तं प्रैयव्रतं वंशं कीर्त्याऽलमकरोदलङ्कृतवान् यथा विष्णुरुपेन्द्रः सुरगणमिन्द्रादिदेवतावर्गमिति ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां

पञ्चदशोऽध्यायः ॥ १५ ॥

———

यस्य हरे [illegible] स्वतः प्रीतः ॥ १३ ॥ १४ ॥

शतजिन्नामपुत्रः प्रवरो ज्येष्ठो यस्मात्तच्छतजित्प्रवरम् ॥ १५ ॥
अत्यलमतीवालमकरोत् ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

पञ्चदशोऽध्यायः ॥ १५ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

विश्वजीवः सर्वजीवनहेतुः । स्वयं प्रीतः सुखरूपोऽपि ॥ १३-१६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

पञ्चदशोऽध्यायः ॥ १५ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यस्य भगवतः प्रीणनात् देवादि [illegible] विश्वजीवैः सहित एव स्वयं प्रीतिरूपो [illegible] प्रीतिमाविष्कार ॥ १३—१६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमेऽयं पञ्चदशः सङ्गतः सङ्गतः सताम् ॥ १५ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्य भगवतः प्रीणनात् [illegible] आविरभ्यात् विरिञ्चिमभिव्याप्य देवादि सद्यः प्रीयेत [illegible] भवेत स विश्वजीवः सर्वान्तर्यामी स्वयं प्रीतः स्वभावतः प्रीतिरूप एव बर्हिषि यज्ञे गयस्य ह स्फुटं प्रीतिमगात् प्राप्तः गयं प्रति प्रसन्नोऽभूदित्यर्थः ॥ १३ ॥ १४ ॥

सुमनसि भार्यायाम् ॥ १५ ॥

विरजः प्रैयव्रतं वंशं कीर्त्या अतिशयेनालमकरोद्भूषितवान् विष्णुर्वामनः ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

पञ्चदशोऽध्यायः ॥ १५ ॥

जिन विष्णु [redacted] से यज्ञमें ब्रह्मा से लेकर देवतिर्यङ् मनुष्य [redacted] शीघ्र तृप्तहोजाते हैं सो विश्वके पालन [redacted] गय महाराज के यज्ञ में प्रसन्न होगये ॥ १[redacted]

● [illegible] तीन पुत्र भये विश्वस्[illegible] में [illegible] पुत्र पैदा भया ॥ १४ ॥

● सम्राट् से उत्कला में मरीचि पुत्र भया मरीचि से विन्दुमती में विन्दुमान् उत्पन्नभया विन्दुमान् से सरघा में मधुनामक भया मधुसे सुमना में वीरव्रत भया वीरव्रत से भोजा में मन्थु प्रमंथु दोभये मन्थु से सत्यामे भौवन भया भौवनसे दूषणा मे त्वष्टा भया त्वष्टासे विरोचना मे विरज भया विरजके विषूची में सौ पुत्र भये तिनमे बडा शतजित् भया ॥ १५ ॥

तिस विषय में यह श्लोकहै वंशके अन्त मे पैदा होने वाल विरजने प्रियव्रतके वंशको कीर्ति से ऐसा शोभित किया जैसे वामन भगवान् विराजमान होकर देवगणों को शोभित करते थे ॥ १६ ॥

इति श्रीमद्भागवत पञ्चमस्कन्ध पञ्चदशाध्यायका

भाषानुवाद ब्रह्मणाचार्यकृत

समाप्त ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पञ्चदशोऽध्यायः समाप्तः ॥ १५ ॥

॥ षोडशोऽध्यायः ॥

---:o:---

राजोवाच ।

उक्तस्त्वया भूमण्डलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमा वा सह दृश्यते ॥ १ ॥

तत्रापि प्रियव्रतरथचरणपरिखातैः सप्तभिः सप्त सिन्धव उपक्लृप्ता यत एतस्याः सप्तद्वीपविशेषविकल्पस्त्वया भगवन् ! खलु सूचित एतदेवाखिलमहं मानतो लक्षणतश्च सर्वं विजिज्ञासामि ॥ २ ॥

भगवतो गुणमये स्थूलरूप आवेशितं मनो ह्यगुणेऽपि सूक्ष्मतम आत्मज्योतिषि परे ब्रह्मणि भगवति वासुदेवाख्ये क्षममावेशितुं तदु हैतद्गुरोऽर्हस्यनुवर्णयितुमिति ॥ ३ ॥

ऋषिरुवाच ।

न वै महाराज ! भगवतो मायागुणविभूतेः काष्ठां मनसा वचसा वाधिगन्तुमलं विबुधायुषापि पुरुषस्तस्मात्प्राधान्येनैव भूगोलकविशेषं नामरूपमानलक्षणतो व्याख्यास्यामः ॥ ४ ॥

यो वाऽयं द्वीपः कुवलयकमलकोशाभ्यन्तरकोशो नियुतयोजनविशालः समवर्तुलो यथा पुष्करपत्रम् ॥ ५ ॥

यस्मिन्नव वर्षाणि नवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिः सुविभक्तानि भवन्ति ॥ ६ ॥

एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसहस्रं तावतान्तर्भूम्यां प्रविष्टः ॥ ७ ॥

उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पूर्वोक्तद्वीपसिन्ध्वादिमानचिह्नस्वरूपतः ।
स्पष्टं प्रवक्तुमारब्धा पञ्चाध्यायी ततः परम् ॥ १ ॥
षोडशेऽथ तथा चोर्ध्वं परितः सन्निवेशतः ।
मेरोः स्थितिर्मही कञ्जकर्णिका चोपवर्ण्यते ॥ २ ॥
प्रियव्रतचरित्रोक्ताबुक्ता द्वीपादिकल्पना ।
तद्विशेषविजिज्ञासुः कथान्ते परिपृच्छति ॥ ३ ॥

उक्त इति । किं पर्यन्तमुक्तस्तदाह । यावदादित्यस्तपति यत्र चासौ शुक्लकृष्णपक्षयोर्नक्षत्रगणैः सह चन्द्रमा वा दृश्यते तावत् ॥ १ ॥

यतो येभ्यः सिन्धुभ्यः एतस्या भुवः सूचितः संक्षेपतो दर्शितः ॥ २ ॥

जिज्ञासायाः [illegible] इति ॥ ३ ॥

या मायागुण[illegible] काष्ठामन्तं रूपं संनिवेशः लक्षणं चिह्नम् ॥ ४ ॥

कुवलयं [illegible] कमलं तस्य कोशाः सप्तद्वीपास्तेष्वभ्यन्तरको[illegible]द्वीपो नियुतयोजनविशालो लक्षयोजनविस्तीर्णः ॥ ५ ॥

नवयोजन[illegible] येषामायामोऽत्र विस्तारः एतच्च भद्राश्वकेतुमाल[illegible] । तयोश्चतुस्त्रिंशद्योजनसहस्रायामत्वा[illegible] संलग्नत्वात् समुद्रप्रवेशमङ्गीकृत्य तयोरपि [illegible] नवसहस्रायामत्वं सम्पादयन्ति संनिवेशश्च वायुनोक्तः ।

धनुर्वत्संस्थिते [illegible] द्वे वर्षे दक्षिणोत्तरे ।

[illegible]स्वामिकृतभावार्थदीपिका ।

[illegible] अत्र शेवादि चतुरस्रमिलावृतम् ॥

[illegible] ॥ ६ ॥

नाभ्यां [illegible] द्वीपस्यायामो लक्षयोजनप्रमाणो तावान् समु-
च्छ्राय उच्छ्रायो यस्य मूले षोडशयोजनसहस्रं प्रविष्टः तावता षोडशयोजनसहस्रमानेन चतुरशीतियोजनसहस्रमानेन च बहि-
र्दृश्यते एवं लक्षयोजनोत्साहः ॥ ७ ॥

उत्तरोत्तरेणेलावृतमिलावृतस्योत्तरोत्तरतः पर्यायेण क्रमेण नीलश्वेत-
त्रयो मर्यादागिरयः प्रागायताः पूर्वतो दीर्घाः आरोद एवाव-
धिर्येषां द्विसहस्रयोजनविस्तीर्णाः दशांशादीषदधिकां यांऽशस्तेन
दैर्घ्यं एव ह्रसन्ति नतूच्चत्वे पृथुत्वे वा यथोक्तं विष्णुपुराणे
"लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथा पर" इति एतच्च स्थूल-
दृष्टैवोक्तं तथापि यथावन्मध्यमत्वाभावेन लक्षप्रमाणत्वा-
भावात् ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भुवि प्रियव्रतसंतानतच्चरित्रो राजा प्रियव्रतचरित्रे संग्रहे-
णाभिहितायां द्वीपादिकल्पनायां विशेषं कथान्ते [illegible]पूर्वकं
पृच्छति । उक्त इति । भूमण्डलस्यायामविशेषः दैर्घ्यविशेषः विशा-
लेनेति यावत् उक्तः किंपर्यन्त उक्तस्तत्राह । यावदादित्यस्तपति
यत्र चासौ शुक्लकृष्णपक्षयोर्नक्षत्रगणैः सह चन्द्रमा वा दृश्यते
किंपर्यन्तमादित्यस्तपति चन्द्रमा वा दृश्यते तत्राह । यत्र भूम-
ण्डलविस्तारे [illegible] भुवः सप्तद्वीपानां जम्ब्वादीनां ये विशेषाः
नाममानलक्षणाद्यस्तेषां विकल्पः भेदो भगवन् ! त्वया सूचितः
संग्रहेणोक्तः एतदेव भूमण्डलमखिलं मानतो लक्षणतश्चाकारा-
णामतश्चाहं सर्वं विस्तरतो विजिज्ञासामि ज्ञातुमिच्छामि किं
तज्जिज्ञासयेत्यत्राह । भगवत इति । गुणमये सत्त्वादिगुणपरिणाम-
रूपे भगवतः स्थूलरूपे आवेशितं मनः हि यस्मादगुणे सत्त्वा-
दिगुणरहितेऽप्राकृत इति यावत् सूक्ष्मतमेऽङ्गुष्ठप्रमिते शुद्धसत्त्व-
मये रूपे तथात्मज्योतिषि स्वयं प्रकाशे परमात्मस्वरूपे
अपि भगवद्वासुदेवादिशब्दवाच्ये आवेशितुमासक्तं क्षममथ
भवितो जिज्ञासामि ततो मम जिज्ञासुत्वात्त्वं गुरो ! एतद्भूमण्डल
मानलक्षणादिभिरनुवर्णितुमर्हसि ॥ १—३ ॥

इत्यापृष्टो [illegible]भूतेरनन्तत्वात्कार्त्स्न्येन
वाङ्मनसयोरविषयतां वक्ष्यमाणादिभिर्भूमण्डलवर्णनं प्रतिजानीते ।
नवा इति । हे महाराज ! भगवतो मायागुणानां विभूतिः
सत्त्वादिगुणपरिणामानन्तब्रह्माण्डात्मिका लीलाविभूतिस्तस्याः
स्थानविशेषाणां विभूत्यन्तर्गतलोकानामित्यर्थः काष्ठामन्तं नाम-
रूपतः नामरूपाभ्यां मनसा वचसा वाऽधिगन्तुं ज्ञातुं वक्तुं
च पुरुषायुषेणापि पुरुषो नालं न प्रभुः स्थानविशेषाणामान-
न्त्यादिति भावः तस्मात् कार्त्स्न्येन वाङ्मनसाविषयत्वात्प्राधा-
न्येन भूगोलस्य विशेषमवान्तरभेदं नाममानलक्षणैः व्याख्या-
स्यामः प्रकटयिष्याम इति ॥ ४ ॥

तदेवाह । यो वा इति । प्रसिद्धोऽयं द्वीपो जम्बूद्वीपः कुव-
लयं भूमण्डलं तदेव कमलं तस्य कोशाः सप्तद्वीपाः तेभ्योऽभ्य-
न्तरः अन्तरवर्ती कोशः जम्बूद्वीप इत्यर्थः स नियुतयोजनवि-
शालः लक्षयोजनविस्तीर्णः समवर्तुलः समो वर्तुलश्च वर्तुलत्वेन
कोणाभावात्सर्वतः समपरिमाण इत्यर्थः यथा पुष्करस्य पत्रं
कमलपत्राणां समवर्तुलं तथेति यस्मिन् जम्बूद्वीपे वर्षाणि
प्रत्येकं नवयोजनसहस्रमायामो येषां तानि आयामोऽत्र विस्तार
एतच्च भद्राश्वकेतुमालव्यतिरेकेण द्रष्टव्यं तत्संनिवेशश्चाभ्यधायि
"धनुर्वत्संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे । दीर्घाणि तत्र चत्वारि
चतुरस्रमिलावृतम्,,इत्यादिना अष्टभिः समर्पितैः नीलश्वेत-
शृङ्गवन्निषधहेमकूटहिमालयमाल्यवद्गन्धमादनाख्यैः सुष्ठु विभ-
क्तानि असङ्कीर्णानि भवन्ति पर्यन्ते तेषां नवानां वर्षाणां
मध्ये इलावृतं नाम वर्षमभ्यन्तरमन्तर्विद्यते इत्यर्थः यस्य जम्बू-
द्वीपस्य इलावृतवर्षस्य वा नाभ्यां मध्येऽवस्थितः सौवर्णः सुव-
र्णमयः कुलगिरीणां राजा मेरुः द्वीपस्य जम्बूद्वीपस्यायामो
विस्तारः लक्षयोजनप्रमाणस्तावत्समुन्नाहः उच्छ्रायो यस्य तथा-
भूतः कुवलयं भूमण्डलमेव कमलं तस्य कर्णिकाभूत इव
स्थितः तस्य मेरोर्मूर्धा उपरिभागः द्वात्रिंशत्सहस्रयोजन-
विस्तीर्णः मूले षोडशसाहस्राणां योजनानां यस्य सः सुमे-
रुरिति विशेष्यानुषङ्गः योजनमिति नपुंसकपाठे तस्य मेरो-
र्मूले षोडशसहस्राणां योजनानां समाहारः षोडशसहस्रयोजनं
परिमाणं वेदितव्यमित्यर्थः [illegible] तावता
षोडशसहस्रमानेन भूम्यामन्तःप्रविष्टः एवं लक्षयोजनोत्साहः
सुमेरुरिति फलितम् ॥ ५ ॥ ६ ॥ ७ ॥

उत्तरेणेलावृतम् इलावृतवर्षस्योत्तरोत्तरं क्रमेण नीलश्वेत-
शृङ्गवत्संज्ञका रम्यकादीनां त्रयाणां वर्षाणां मर्यादागिरयः सीमा-
पर्वताः प्रागायताः पूर्वतो दीर्घाः उभयतः पूर्वपश्चिमयोः क्षारोदो
लवणसमुद्र एवावधिर्येषां ते लवणोदधिपर्यन्ता इत्यर्थः द्विसहस्र-
योजनविस्तीर्णा दशांशादधिको योंऽशस्तेन दैर्घ्य एव ह्रसन्ति न
तूच्चत्वपृथुत्वयोः नीलादिषु त्रिषु पूर्वपूर्वापेक्षया उत्तरोत्तरस्य
दैर्घ्यं दशांशादधिकांशेन न्यूनमित्यर्थः द्वीपस्य मण्डलाकारत्वा-
दिति भावः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भूवलयतद्विशेषज्ञानं श्रीनारायणमहिमोपलक्षणत्वात्तद्वा-
रेणकं मोक्षोपयोगीत्यनन्तरपरिमाणादि वर्णयति । पञ्चस्वध्यायेषु ।
तत्र परीक्षिद्विशेषतोऽपि ज्ञातुमुक्तानुवादपूर्वकं श्रीशुकं पृच्छति ।
इत्युक्त इति । आदित्यो यावत्पर्यन्तं तपत्यसौ चन्द्रमाश्च यत्र
ज्योतिषां नक्षत्राणां गणैः सह दृश्यते त्वया भूमण्डलायाम-
विशेषस्तावानित्युक्तः ॥ १ ॥

तत्र भूमण्डलेऽपि प्रियव्रतेत्यनेन यो वा इहेत्येतदनुवदति । यत
एतस्या इत्यनेन । यत एवं कृता इत्येतदनुवदति अयमाशयः प्रिय-
व्रतस्य रथचरणनेमिभिर्निशात्यपरिखाताः सप्त सिन्धव आसन्या-
स्तस्य रथचरणनिशितपर्यन्तसीतोरितपर्यन्तसमुद्रिताश्च वलयाकारा-
स्तत्परिखापर्यवान्तरप्रदेशावर्तिन्यस्ताः सप्त द्वीपा आसन् तेषां
नामानि कथितानीति सूचित इत्यनेन विशेषो नोक्त इति मनः
किं तत्राह । एतदिति । विवक्षुर्वेदितं यथा न भवति तथा
निखिलमन्तराले एतदुपयोग्येव नान्यदित्यर्थं एवशब्दः मानं
परिमाणं लक्षणं वर्तुलचतुरस्राकारादि न केवलमिदमेव किन्तु
यत्सप्तसागरादिभ्यः परस्तात्काञ्चनभूम्यादिकं तदपि न केवलं
तावतावमपि तु तत्रापि विद्यमानं सर्वमनुवर्णेत्येतदभिप्रा-
येण पुनश्च सर्वशब्दप्रयोग इत्यर्थः जिज्ञासामीत्यनेन
ज्ञानेच्छैव न तु विचार इत्यतः परस्मैपदप्रयोगः अहमित्यनेना-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न्येषां प्रयोजनसद्भावेऽपि ममातीव प्रयोजनमिति सूचयति । अन्यथा जिज्ञास्यामीति सामान्योक्त्यसम्भवात् ॥ २ ॥

किं तवतीव प्रयोजनमिति विवृत्य दर्शयति । भगवत इति । इतः पूर्वं गुणमये सत्त्वादिगुणविरचिते स्थूलरूपे पातालाद्यवयवविशिष्टे आवेशितं निधायाऽयत्नं विशेषस्मरणसमर्थं हि यत्तन्मनोऽगुणेऽपि सत्त्वादिगुणप्रवृत्तिशून्येऽपि सच्चिदानन्दाकारे अत एव सूक्ष्मे अनुग्रहमन्तरेणादृश्ये तर्हि किं तमोरूपं नेत्याह । आत्मज्योतिषि स्वयंप्रकाशे किंनामि परे ब्रह्मणि परब्रह्मसंज्ञे भगवति ऐश्वर्यादिगुणपूर्णे नैन्त्रिकमन्तरेण लौकिकं नाम किं तत्राह । वासुदेवाख्ये अनेनात्र किंवदन्तीप्रमाणमिति सूचितमावेशितुं क्षमं समर्थं तदेतदेव हेत्वेनमान्यत्र "नापृष्टः कस्यचिद्ब्रूयात्" इत्यनपेक्षामाह ॥ ३ ॥

मायागुणविभूतेः प्रकृतिगुणप्रवृत्तये यद्विविधं भवनं बहुरूपग्रहणं यस्य स तथा तस्य महिमागुणविभूतेर्वा काष्ठामवमानं पूर्णिलक्षणं विबुधायुषेण द्विपरार्धलक्षणेन ॥ ४ ॥

यो जम्ब्वाख्यः पूर्वपश्चिमाभ्यां दक्षिणोत्तराभ्यां पार्श्वाभ्यां समुद्रं जलं पिबतीति द्वीपः तत् (१) भावे तरणिकिरणसन्तापेन घर्मभावं मुक्त्वा परमाणवशेषेण द्वीपस्थितजनस्याधाराभावेन जलमज्जनेन सर्वनाशप्रसङ्गः स्यादीर्घः निपातनात्साधुरिति सोऽयं नियुतयोजनविशाल एकादशस्थानादिसंख्याक्रमेण नियुतसंख्यायाः लक्षसंख्यात्वं ज्ञायते तेन लक्षयोजनेन विस्तार इति परिमाणमुक्तं भवति शुकप्राहिकयैव तत्प्रकारं ज्ञापयति कुवलयं भूमण्डलं तदेव कमलं तस्य कोशस्येतरद्वीपलक्षणस्याभ्यन्तरकोशोऽन्तःस्थितकोशवद्वर्तमानः लक्षणमाह । समवर्तुलः अत्र दृष्टान्तमाह । यथा पुष्करपत्रम् अन्तरकोशदलाभ्यन्तराणि विरलानि भवन्ति न तथा पुष्करपत्रमेकत्वेन विच्छेदाभावाद्वित्यक्त्वा पद्मपत्रोदाहरणं वा इत्यमनेनेदमेव मानादिकं नान्यत्रोक्तमिति विशदयति ॥ ५ ॥

यस्मिन्द्वीपे ॥ ६ ॥

येषां वर्षाणां यस्येलावृतस्य नाभिस्थाने मध्य इत्यर्थः जम्बूद्वीपस्य यावान् लक्षयोजनपरिमित आयामस्तावान् समुन्नाह उच्छ्रायो यस्य स तथा लक्षयोजन उच्छ्रित इत्यर्थः मानमुक्त्वा लक्षणमाह । कर्णिकाभूत इति । भूमण्डललक्षणपद्मस्य कर्णिकास्थानीयः ननु नियुतयोजनविशालो द्वीपो द्वीपार्धमिति समुन्नाह इत्येतत्कथं विशदं स्यात् "चतुराशीति साहस्रयोजनानां समुच्छ्रय" इति पराशरवचनं जागर्तीति चेन्न तदीरणमिति ध्येयं न वाच्यं न च तर्क्यते "पश्यन्तोऽपि न जानन्ति मेरो रूपं विपश्चित" इति वचनात् पराशरस्याप्यधाज्ञानसम्भवादिन्द्रस्तु वर्तुलाकारं पद्मकोशं बृहस्पतिरितीन्द्रादीनामप्यज्ञानकथनाच्च "ऋषिस्त्रिकालदर्शी स्यात्" इतिवचनाद्भगवत्प्रसादापन्नज्ञानपराशरवचनस्यान्यथा ज्ञानमूलत्ववचनमिति साहसमिति चेन्न प्रामाणिकत्वात्परमात्मानमन्तरेणान्येषां तत्र तत्राज्ञानदर्शनाच्च मन्वेवं निराश्रवणाधैरमन्तरेणैकवाक्यत्वाङ्गीकारे महान्प्रहर्षः स्यादिति चेन्नैवं तर्हि शृणु प्रविष्टः षोडशाधस्तादिति योजनावगमात् ननु नावतान्तर्भूम्यां प्रविष्ट इति मेरोर्लक्षयोजनोच्छ्रायादाधिकपरिमाणोक्तेरिति चेन्न भूमिप्रविष्टरूपेण सह लक्षयोजनोच्छ्रायोपपत्तेः

वचनवाध[illegible]त्कत्वात् दूरस्थप्रह[illegible]तीत्यतु चतुरशीतीति वक्तव्यं [illegible]ति ज्ञायते स भागवतोक्त एव ग्राह्यः न ज्ञानापरि[illegible]व वचनस्यान्यथात्वं शक्याशङ्कं तथाच भागवतोक्तप्रक[illegible]रेण भुवनकोशादिकं ग्राह्यं तथाच[illegible] ।

यथा भागव[illegible]क्तं भौवनं कोशलक्षणम् ।
तस्य[illegible]तो योऽयं सर्वग्रन्थान्तरस्थितम् ॥
मण्डोदे पूरणं चैव व्यत्यासं क्षीरसागरे ।
राहुसोमरवीणाञ्च मण्डलाद्द्विगुणोक्तिताम् ॥
विनैव सर्वमुन्नेयं योजनाभेदतोऽत्र स्थिति ॥ ७ ॥

इलावृतात्खण्डादुत्तरोत्तरेण मृङ्गैः पूर्वस्यां दिशि मुञ्चावस्थिताः प्रागायताः द्विसहस्रपृथवः द्विसहस्रयोजनविस्ताराः दैर्घ्य एव ह्रसन्ति नोर्ध्वपृथुत्वे ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवतो गुणमयमित्यादौ भगवत्स्वन्तु गुणातीतमित्यायातम् ॥ १—४ ॥

नियुतशब्दोऽत्र दशलक्षवाचकोऽपि कथञ्चिदेकलक्षं वक्ति तत् सन्निहितत्वात् ॥ ५ ॥

टीका दर्शिता मतभेदाः सुष्टिभेदेन ज्ञेयाः ॥ ६—२६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

जम्बूद्वीपस्य वर्षाणां शैलानां मध्यवर्त्तिनः ।
सुमेरोश्च प्रमाणं यत् षोडशे तन्निगद्यते ।

प्रियव्रतचरिते श्रुतस्य द्वीपसमुद्रादेः प्रमाणादिकं तत्र कथाप्रकरणान्ते पृच्छति । उक्त इति । तपति प्रकाशयति तत्पर्यन्त इत्यर्थः यत्र यत्र चन्द्रमा दृश्यते तावत्पर्यन्तश्च तत्रापि तन्मध्य इत्यर्थः ॥ १ ॥

यतः सिन्धुभ्यः । एतस्या भुवः सप्तद्वीपानां ये विशेषास्तेषां विकल्पो भेदः प्रभेदः एतत् सिन्धुद्वीपादिकम् ॥ २ ॥

जिज्ञासायाः फलमाह । भगवत इति । अत्र मयेति कर्तृपदानुक्त्या तत्रस्थानां भक्तिमिश्रयोगवतां मनोभिधित्सानुरोधेनैव मयैतत् पृच्छ्यते मम तु त्वन्मुखकमलस्यन्दमानभगवत्कथारूपमकरन्दस्य कर्णाभ्यां पानमेव भगवत्प्राप्तिसाधनमिति द्योतितं किञ्च इह भगवतो गुणमये स्थूलरूप इति भेदबोधिकया षष्ठ्या अगुणे भगवतीत्यभेदबोधकेन सामानाधिकरण्येन च भगवद्रूपस्य गुणातीतत्वं बोधितम् । गुरो इति तव सर्वमुनिजनगुरुत्वादवश्यवक्तव्यमेवैतदिति भावः ॥ ३ ॥

काष्ठामन्तं रूपं सन्निवेशः । लक्षणं चिह्नम् ॥ ४ ॥

वै निश्चयेन कुवलयं भूमण्डलं तदेव कमलं तस्य कोशा मण्डलतया स्थिताः सप्तद्वीपास्तेष्वभ्यन्तरः कोशो योऽयं दृश्यमानो जम्बूद्वीपः स नियुतयोजनविशालः लक्षयोजनविस्तीर्णः ॥५॥

नवयोजनसहस्रमायामो येषां आयामोऽत्र विस्तारः अष्टभिर्हिमालयादिभिः सन्निवेशास्तु वायुनोक्तः ।

धनुर्वत्संस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे ।
दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम् इति ॥

---

(१) जलपानाभावे ।

[illegible] हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनो-त्सेधा हरि[illegible]किम्पुरुषभारतानां यथा संख्यम् ॥ ९ ॥

तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

दक्षिणोत्तरे भारतोत्तरकुरुवर्षे चत्वारि किम्पुरुषहरि-वर्षरम्यकहिरण्मयानि वर्षाणि नीलनिषधयोस्तिरश्चीनीभूय समुद्रप्रविष्टयोः संलग्नत्वमङ्गीकृत्य भद्राश्वकेतुमालयोरपि धनु-राकारत्वम्। अतस्तत्पार्श्वयत एव मध्ये सङ्कुचितत्वेन नवसह-स्रायामत्वम्। इलावृतस्य तु मेरोः सकाशात् चतुर्दिक्षु नवसह-स्रायामत्वं सम्भवेत् वस्तुतस्त्विलावृतभद्राश्वकेतुमालानां चतु-स्त्रिंशत्सहस्रायामत्वं ज्ञेयम् ॥ ६ ॥

नाभ्यां मध्ये द्वीपस्यायामो लक्षयोजनप्रमाणः। तावान् समु-न्नाह उच्छ्रायो यस्य सः षोडशसहस्रं वितत इति शेषः तावता षोडशसहस्रमानेन। अतश्चतुरशीतिसहस्रयोजनोच्छ्रितो भूमितो दृश्यते ॥ ७ ॥

उत्तरोत्तरेण इलावृतम् इलावृतस्योत्तरत उभयतः पूर्वपश्चि-मदिशोः पृथुर्विस्तारः एकैकस्मादिति नीलः किञ्चिन्न्यूनलक्ष-योजनो दैर्घ्येण तस्मात् श्वेतः शृङ्गवांश्च दशांशादीषदधिको दैर्घ्येणऽह्रस्तेन ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

प्रियव्रतचरित्रवर्णने संक्षेपेण द्वीपादिकं श्रुत्वा तद्विस्तरं श्रोतुं पृच्छति। उक्त इति। ज्योतिषां गणैः सह असौ चन्द्रमा दृश्यते ॥१॥

यतो येभ्यः सिन्धुभ्यः ॥ २ ॥

जिज्ञासाप्रयोजनमाह। भगवत इति। गुणमये स्थूलरूपे विराजि आवेशितं मनोऽगुणे प्राकृतगुणरहिते अप्राकृते रूपे तथा आत्म-ज्योतिषि प्राकृताप्राकृतविग्रहवति आवेशितुं क्षमं स्यात् ॥ ३ ॥

मायागुणविभूतिः भूगोलादिरूपा तस्याः स्थानविशेषाणां लक्षणमन्तम् ॥ ४ ॥

अयं प्रसिद्धो यो जम्बूद्वीपः सः कुवलयं भूमण्डलं तदेव कमलं तस्य कोशेषु सप्तद्वीपेषु अभ्यन्तरः कोशो नियुतयोजन-विशालः लक्षयोजनविस्तीर्णः ॥ ५ ॥

यस्मिन् जम्बूद्वीपे प्रत्येकं नवयोजनसहस्रमायामो येषां तानि नव वर्षाणि भवन्ति आयामशब्दोऽत्र विस्तारपरः एतच्च छत्र-न्यायेन बहुत्वेव द्रष्टव्यं तन्मध्यगतस्य सप्तमस्य वर्षत्रयात्मकस्य चतुस्त्रिंशद्योजनविस्तारयुक्तत्वं वर्षाणां वर्षाणां मर्यादागिरिसहि-तानां षट्षष्टियोजनविस्तारयुक्तत्वमेवं लक्षयोजनानि भवन्ति सन्निवेशस्तु वायुनोक्तः।

धनुःसंस्थिते ज्ञेये द्वे वर्षे दक्षिणोत्तरे।

दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम् इति ॥ ६ ॥

यस्य इलावृतस्य नाभ्यां मध्ये मेरुरवस्थितः द्वीपस्य जम्बूद्वीप-स्यायामो लक्षयोजनविस्तारः तावत्समुन्नाह उच्छ्रायो यस्य सः तावता षोडशसहस्रयोजनमानेन ॥ ७ ॥

उत्तरोत्तरेणेलावृतमिलावृतस्योत्तरोत्तरतः ॥ ८ ॥

भाषा टीका।

महाराज! परीक्षितजी बोले आपने भूमण्डल का विस्तार कहा जहां पर्यन्त सूर्यनारायण प्रकाश करते हैं और नक्षत्रादिकों के सहित जहां चन्द्रमा दीखता है ॥ १ ॥

तहांपरभी प्रियव्रतके रथ के पहियों से सात समुद्र कल्पित भये हैं जिससे इस पृथिवी के सातद्वीपों के विशेष का भेद भग-वन्! आपने सूचित किया है इसको हम प्रमाणसे और लक्षण से सब जानना चाहते हैं ॥ २ ॥

हे गुरो! गुणमय भगवान् के इस स्थूलरूप में प्रवेश किया जो मन है सोई मन सूक्ष्मतम आत्मज्योति परब्रह्म भगवान् वासुदेव मेंभी प्रवेश करा जासका है इस हेतुसे आप इसबात को वर्णन कीजिये ॥ ३ ॥

ऋषि श्रीशुकदेवजी बोले हे महाराज! मायागुण विभूति वाले भगवान् के अन्त को मनसे या वचनसे जानने को देवताओं के आयु से भी कोई समर्थ नहीं है तिस हेतु से प्रधानता से भूगोल विशेषको नामरूप प्रमाण लक्षणसे हम कहेंगे ॥ ४ ॥

जो यह जम्बूद्वीप है सो कमल रूपी पृथिवी के कली सरीके सात द्वीपों के मध्यमें कली सरीखा है सो लक्ष-योजन का चौडा है चारों तरफ से गोल है जैसे कमल का पत्र होता है ॥ ५ ॥

जिस द्वीप मे नौ वर्ष हैं सब नौ नौ हजार योजन के विस्तार वाले हैं आठ मर्यादा के पर्वतों से अलग विभाग किये गये हैं ॥ ६ ॥

इन वर्षों के मध्यमे इलावृत नामक बीच का वर्ष है जिसके नाभिमे स्थित चारों ओर से सुवर्णमय सब पर्वतों का राजा जम्बूद्वीप के विस्तारके बरोबर ऊंचा पृथिवी कमलका कर्णिका रूप मेरुपर्वत है शिखरपर बत्तीसहजार योजन चौडा है पृथिवीपर जडमे सोला हजार चौडा है सोला ही हजार योजन जमीन के भीतर पैठा है ॥ ७ ॥

उस सुमेरुके उत्तर मे इलावृत वर्षके आगे नील श्वेत शृङ्गवान् ये तीन पर्वत हैं सो रम्यक हिरण्मय कुरु इन वर्षों के मर्यादा सीमाके पर्वत हैं सो पूर्व पश्चिम दोनो ओर समुद्र पर्यन्त लम्बे हैं दो हजार योजन चौडे हैं परन्तु पहिले पर्वत से दूसरा तीसरा लम्बाई मे दशमा अंशमे से एक हिस्सा कम है ऊंचे तो सब दश हजार योजन के हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अयुतयोजन उत्सेध उच्छ्रायो येषाम् अयं चोत्सेधो नीला-दीनामपि द्रष्टव्यः नीलादिपृथुत्वं तेषामपि द्रष्टव्यं यथासंख्यं मर्यादागिरय इति शेषः ॥ ९ ॥

मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयो[illegible]
कल्पाः ॥ ११ ॥

चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इ[illegible]
स्तावद्विटपविततयः शतयोजनपरिणाहाः ॥ १२ ॥

ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ ! धारयन्ति ॥ १३

देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति ॥ १४ ॥

येष्वमरपरिवृढाः सह सुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति ॥ १५ ॥

मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आनीलनिषधायतौ उत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तं च दीर्घौ पश्चपुर्विस्तीर्णौ भवतः तावेव केतुमालभद्राश्वयोर्वर्षयोः सीमानं कुर्वाते नन्वेवं सति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्मध्ये ततः पूर्वापरतो गिरिद्वयं वर्षद्वयं च नातः किञ्चिदस्ति दक्षिणोत्तररेखायां तु तथैवेलावृतवेष्टितो मध्ये मेरुरुभयतस्त्रीणि वर्षाणि गिरयश्च षट् तत्कथं सर्वतो लक्षप्रमाणत्वं जम्बूद्वीपस्य । उच्यते मेरोः षोडशसहस्राणि सर्वतः स्थितत्वादिलावृतस्याष्टादश अन्येषां षण्णां चतुष्पञ्चाशत् गिरीणां षण्णां द्वादशेत्येवं दक्षिणोत्तररेखायां तावल्लक्षं पूर्वापररेखायामपि सुमेरोरिलावृतस्य चतुस्त्रिंशत् गिर्योश्चत्वारि शेषाणि द्विषष्टिसहस्राणि पूर्वापरवर्षयोरासमुद्रं दैर्घ्यं द्रष्टव्यान्यतो न विरोधः ॥ १० ॥

अयुतयोजनप्रमाणो विस्तारोत्साहो येषां विस्तीर्णमूर्ध्नो मेरोरवष्टम्भत्वात्पूर्वपश्चिमौ गिरी दक्षिणोत्तरविस्तारौ दक्षिणोत्तरौ च पूर्वापरविस्तारौ द्रष्टव्यौ सर्वतो दशयोजनसहस्रविस्ताराङ्गीकारे त्विलावृतस्योपात्पूर्वोत्तावृतमुत्क्रामयतीत्यादिविरोधः स्यात् ॥ ११ ॥

अधिसहस्रमेकादशशतानि उच्छ्रायो येषां तावत्प्रमाणा विटपविततिर्येषां शतयोजनं परिणाहो विस्तारो येषाम् ॥ १२ ॥

यदुपस्पर्शिनो यत्सेविनः ॥ १३—१४ ॥

ललामो भूषणं सुरजलनानां भूषणभूताः श्रेष्ठा याः स्त्रियस्तासां यूथस्य पतयः सह सम्भूय येषु विहरन्ति ॥ १५ ॥

एकादशशतयोजनमुत्तुङ्गो यो देवचूतस्तस्य शिरसः सकाशात् फलप्रमाणमुक्तं वायुपुराणे ।

अरत्नीनां शतान्यष्टावेकषष्ट्यधिकानि च ।
फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिः ।

इति ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं दक्षिणेनेलावृतमिलावृतवर्षस्य दक्षिणतः निषधादयस्त्रयः पर्वताः क्रमेण नीलादिभिः समपरिमाणा अयुतयोजन उत्सेध उच्छ्रायो येषां ते अयं चोत्सेधो नीलादीनामपि द्रष्टव्यः नीलादिषु पृथुत्वं चैषामिति द्रष्टव्यं हरिवर्षादीनां [illegible]णां यथासङ्ख्य मर्यादागिरयः ॥ ६ ॥

तथेलावृतमपरेणेलावृतस्यापरेण पश्चात्पूर्वेण पुरस्ताच्च माल्यवद्गन्धमादनावपरेण माल्यवान् पूर्वेण गन्धमादनः इत्येतौ पर्वतौ क्रमेणानीलनिषधायतौ उत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तं च दीर्घौ नीलनिषधपर्यन्तोत्तरदक्षिणप्रावित्यर्थः तावेव द्विसहस्रपृथू विस्तीर्णौ इत्यर्थः । तावेव केतुमालभद्राश्वयोर्वर्षयोः सीमानं मर्यादां विदधाते कुरुतः नन्वेवं सति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्मध्ये ततः पूर्वापरतो गिरिद्वयं वर्षद्वयं च नातः किञ्चिदस्ति दक्षिणोत्तरदिशायां च तथैवेलावृतवेष्टितो मेरुर्मध्ये उभयतस्त्रीणि वर्षाणि गिरयश्च तत्कथं सर्वतो लक्षप्रमाणत्वं जम्बूद्वीपस्य । उच्यते मेरोः षोडशसहस्राणि सर्वतः स्थितत्वादिलावृतस्याऽष्टादश अन्येषां षण्णां वर्षाणां चतुष्पञ्चाशद्गिरीणां द्वादश चेत्येवं दक्षिणोत्तरदिशि तावल्लक्षं पूर्वापररेखायामपि सुमेरोरिलावृतस्य चतुस्त्रिंशत् गिर्योश्चत्वारि शेषाणि द्विषष्टिसहस्राणि केतुमालभद्राश्वयोरित्येवं लक्षं सर्वतः स्थितत्वादिलावृतस्याष्टादश पूर्वापरवर्षयोरासमुद्रं दैर्घ्यं द्रष्टव्यं नातो विरोधः ॥ १० ॥

मन्दरादयश्चत्वारो गिरयः प्रागादिक्रमेण मेरोश्चतुर्दिशमवष्टम्भगिरयः मेखला इव अवष्टम्भन्ति प्रतिबध्नन्तीत्यवष्टम्भास्ते च ते उपक्लृप्ताः विन्यस्ताः कथम्भूताः अयुतयोजनौ प्रमाणौ विस्तारोच्छ्रायौ येषां तथाभूताश्चतुर्ष्वेतेषु मन्दरादिषु क्रमेणाम्रजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपश्रेष्ठाः पर्वतानां केतवो ध्वजा इवाधिसहस्रमेकादशशतान्युत्साहो येषां तावत्प्रमाणानां विटपानां शाखानां विततिर्येषां शतयोजनपरिणाहो विस्तारो येषां ते

[illegible]

[illegible] ॥ [illegible]

[illegible] क्षीरवल्लिकुरङ्गसुगन्धजलात्मकाः हृदिः [illegible] । तदुपस्पर्शिनः तज्जलस्पर्शिनः सिद्धादयः स्वाभाविकान्यष्ट महैश्वर्याणि हे राजन् ! धारयन्ति ॥ १३ ॥

देवोद्यानानि देववनानि क्रमेण नन्दनादीनि भवन्ति तान्येव विशिनष्टि । येषु देवोद्यानेषु सुरललनानां सुरस्त्रीणां ललाम भूषणं तद्रूपिण्यः सुरवनितानां श्रेष्ठा इत्यर्थः तासां यूथस्य पतयः ताभिः सह सम्भूय उपदेवगणैः उपगीयमानः महिमा येषां ते विहरन्ति देवानां क्रीडास्थानानीत्यर्थः ॥ १४ ॥ १५ ॥

चूतादिप्रभवा नदीराह । मन्दरेति । मन्दरशिखरस्याधस्तात्प्रदेशे एकादशशतयोजनमुत्तुङ्ग उन्नतो यो देवचूतः तस्य शिरसः सकाशाद्गिरिशिखरवत्स्थूलानि फलानि फलप्रमाणमुक्तं वायुपुराणे ।

अरत्नीनां शतान्यष्टौ एकषष्ट्यधिकानि च ।
फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिः इति ॥

अमृतकल्पानि अमृततुल्यानि फलन्ति फलानि फलन्तीति गौणं फलतीतिवत् क्रयार्थविशेषणस्यास्यार्थस्याविवक्षा बोध्या ग्राहकाभावात्पक्वानि भवन्तीत्यर्थः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवमिलावृतादर्वाग्भागेन निषधादयः यथा नीलादयो दैर्घ्येण ह्रसन्ति तथा निषधादयोऽपि अत्रायं विशेषः नीलनिषधौ लक्षप्रमाणावन्ये दशांशहीनाः । तदुक्तम् । "लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापर" इति वैष्णवे ।

जम्बूद्वीपप्रमाणेन निषधः परिकीर्तितः ।
तस्माच्च दशभागेन हेमकूटः प्रतीयत

इति वाराहे यथासङ्ख्यं मर्यादागिरय इति शेषः ॥ ९ ॥

तथैवेलावृतमिति । यथेलावृतादुत्तरदक्षिणतो नीलनिषधादयस्तथेलावृतस्यापरेण पश्चिमेन पूर्वेण च माल्यवद्गन्धमादनौ यथासङ्ख्यं स्त इति शेषः आनीलनिषधायतौ नीलनिषधपर्यन्तविस्तारौ तत्संबद्धावित्यर्थः सीमानमवधिम् ॥ १० ॥

अवष्टम्भगिरयः पीठस्थानीयपर्वताः ॥ ११ ॥

एतेषु मन्दरादिषु पर्वतकेतवः मन्दरादिपर्वतानां ध्वजा इव स्थिताः अधिसहस्रयोजनोन्नाहाः सहस्राधिकैकशतयोजनोच्छ्रायाः तदुक्तम् "एकादशशतायामाः पादपा गिरिकेतव" इति अत्रायामशब्देनोच्छ्राय उच्यते तावद्विटपविततयः यावदुच्छ्राययोजनसंख्यानं तावत्संख्याकशाखाविस्ताराः शतयोजनपरिणाहाः परितः शतयोजनस्थूलाः ॥ १२ ॥ १३ ॥

देवोद्यानानि देवानां क्रीडायोग्यस्थानानि अमरललनानां सुरस्त्रीणां मध्ये या ललामभूताः श्रेष्ठास्तासां यूथस्य पतयो याः स्त्रियस्ताभिः संहिताः सहामरललनाललामयूथपतयः अमरपरिवृढा देवश्रेष्ठाः ॥ १४ ॥ १५ ॥

मन्दरोत्सङ्गे मन्दरपर्वतस्याङ्कस्थानीये तटे देवोपभोगयोग्यत्वाद्देवचूतस्तस्य शिरसोऽग्रदेशात् ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अयुतयोजन उत्सेध उच्छ्रायो येषाम् । अयमेवोत्सेधो नीलादीनामपि द्रष्टव्यः । नीलादिवत् पृथुत्वं चैषां द्रष्टव्यम् । यथासंख्यं मर्यादागिरय इति शेषः ॥ ९ ॥

अपरेण पश्चिमस्यां दिशि पूर्वेण पूर्वस्यां दिशि आनीलनिषधायतौ उत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तमायतौ दीर्घौ । चतुस्त्रिंशत्सहस्रायामावित्यर्थः । एवञ्च दक्षिणोत्तररेखायां भारतकिम्पुरुषहरिवर्षाणां त्रयाणां सप्तविंशतिः सहस्राणि हिमालयहेमकूटनिषधानां षट्सहस्राणि । सुमेरोरिलावृतस्य च चतुस्त्रिंशत् रम्यकहिरण्मयकुरूणां सप्तविंशतिः नीलश्वेतशृङ्गवतां गिरीणां षडित्येवं लक्षयोजनप्रमाणः पूर्वपश्चिमरेखायां भद्राश्वस्य एकत्रिंशत् सुमेरोरिलावृतस्य चतुस्त्रिंशत् केतुमालस्यैकत्रिंशत् गन्धमादनमाल्यवतोश्चत्वारीत्येवं लक्षयोजनप्रमाणो जम्बूद्वीपोऽवगमितः ॥ १० ॥

अयुतयोजनप्रमाणौ विस्तारोन्नाहौ येषां ते विस्तीर्णमूर्त्तौ मेरोरवष्टम्भत्वात् "पूर्वपश्चिमौ गिरी दक्षिणोत्तरविस्तारौ दक्षिणोत्तरौ च पूर्वापरविस्तारौ ज्ञेयौ । विस्तारोऽत्र दैर्घ्यं सर्वतो दशयोजनसहस्राङ्गीकारे त्विलावृतलोपात् पूर्वेणेलावृतमुपक्लाप्यतीत्यादिविरोधः स्यात् चतुर्दिशं चत्वारो दिशोऽभिव्याप्य चतुर्दिक्षित्यर्थः ॥ ११ ॥

अधिसहस्रम् एकादशशतान्युन्नाहो येषां तावत्प्रमाणा विटपविततिर्येषां शतयोजनं परिणाहो विस्तारो येषाम् ॥ १२ ॥ १३ ॥ १४ ॥

परिवृढाः श्रेष्ठा ललामो भूषणम् ॥ १५ ॥

फलानीति फलप्रमाणमुक्तं वायुपुराणे ।
अरत्नीनां शतान्यष्टावेकषष्ट्यधिकानि च ।
फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिः इति ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं नीलादिवत् द्विसहस्रपृथवः निषधादयः हरिवर्षादीनां यथासङ्ख्यं मर्यादागिरयः इत्यन्वयः अयुतयोजन उत्सेधः उच्छ्रायो येषां नीलादयोऽपि अयुतयोजनोत्सेधा इति ज्ञेयम् ॥ ९ ॥

द्विसहस्रं पप्रथतुः विस्तीर्णौ भवतः विदधाते कुर्वाते ॥ १० ॥

किञ्च मन्दरादयश्चत्वारो गिरयः पूर्वादिक्रमेण मेरोश्चतुर्दिशमवष्टम्भगिरयः उपक्लृप्ता विन्यस्ताः अयुतयोजनप्रमाणौ विस्तारोन्नाहौ येषां तत्र मन्दरः पूर्वदिशि विन्यस्तः दक्षिणोत्तरविस्तारस्तद्वदन्येषामपि विस्तारो ज्ञेयो न तु सर्वतः अन्यथा इलावृतलोपो न भवति ॥ ११ ॥

शतयोजनं परिणाहो विस्तारो येषामधिसहस्रं शताधिकसहस्रमुन्नाहः उच्छ्रायो येषां तावत्प्रमाणा अधिसहस्रप्रमाणा विटपविततिर्येषाम् ॥ १२ ॥

ह्रदा उपक्लृप्ता इति शेषः ॥ १३ ॥ १४ ॥

सुरललनानां ललामभूताः भूषणभूताः याः स्त्रियस्तासां यूथस्य पतयः अमरपरिवृढाः देवश्रेष्ठाः सह सम्भूय विहरन्ति ॥ १५ ॥ १६ ॥

तेषां विशीर्यमाणानामतिमधुरसुरभिसुगन्धि [illegible] रान्निपतन्ती पूर्वेणेलावृतमुपप्लावयति ॥ १७ ॥

यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो [illegible] वासयति ॥ १८ ॥

एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बूनाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दयति ॥ १९ ॥

तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदाऽमरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति ॥ २० ॥

यदुह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेण खलु धारयन्ति ॥ २१ ॥

यस्तु महाकदम्बः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात्पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति ॥ २२ ॥

या ह्युपयुञ्जानानां मुखनिर्वासितो वायुः समन्ताच्छतयोजनमनुवासयति ॥ २३ ॥

एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात्पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति ॥ २४ ॥

भाषाटीका ।

इलावृत वर्षके दक्षिणकी ओर निषध हेमकूट हिमालय ए तीन पर्वत पूर्व पश्चिम में खारीसमुद्र तक लम्बे हैं दशहजार योजन ऊंचे हैं दो हजार योजन चौड़े हैं क्रमसे हरिवर्ष भारत वर्षों के मर्यादा करते हैं ॥ ९ ॥

तैसेही इलावृत वर्षके पूर्व तरफ माल्यवान् पश्चिम तरफ गन्धमादन ए दोनों पर्वत नील तथा निषध पर्वतसे लगेहुये हैं दो हजार योजन चौड़े हैं केतुमाल भद्राश्व दोनों वर्षोंके सीमा करते हैं ॥ १० ॥

मन्दर मेरुमन्दर सुपार्श्व कुमुद ये चारों दशहजार योजनके ऊंचे मेरुके चारों तरफ मेरुके सहारे के वास्ते रक्खे पर्वत हैं ॥ ११ ॥

इन चारों पर्वतों के ऊपर पर्वतों के ध्वजा सरीके बड़े भारी एक हजार एकसौ योजन ऊंचे उतनेही दूर उनकी शाखा हैं सौ योजन मोटे हैं ऐसे आम जामुन कदम्ब वट के चार पेड़ हैं ॥ १२ ॥

हे भारतश्रेष्ठ परीक्षित् ! उन चारों पर्वतोंपर दूध मधु इक्षु रस मीठे जलके चार हौद हैं जिनके स्नान पानादिक से वहांके उपदेवतागण स्वभावसिद्ध योग ऐश्वर्यों को धारण करते हैं ॥ १३ ॥

नन्दन चैत्ररथ वैभ्राजक सर्वतोभद्र नाम के चार देवतोंके विहार के वनभी उन चारों पर्वतोंपर हैं ॥ १४ ॥

जिन वनों में उत्तम देवगण देवस्त्रियों को साथ मे लेकर उपदेवगणों के किये अपनी महिमाके गान को सुनते हुये विहार करते हैं ॥ १५ ॥

मन्दराचलके ग्यारा हजार ऊंचे आम्र वृक्ष के ऊपर से पर्वतों के शिखर सरीके बड़े अमृत से मीठे आम के फल गिरते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अतिमधुरश्चासौ स्वतः सुरभिश्च सुगन्धिश्च नचान्येषां गन्धैरधिवासितः बहुलश्चारुणश्च रसः स एव उदमुदकं तेन ॥१७॥

यदुपजोषणात् यस्य रसस्य सेवनात् ॥ १८ ॥

अनस्थिप्रायाणामतिसूक्ष्मबीजानां यत्र निपतति ततआरभ्य आत्मनो दक्षिणतः सर्वमिलावृतं व्याप्य वहतीत्यर्थः ॥ १९ ॥

तावत् सर्वतः रोधसोस्तटयोः ॥ २०—२१ ॥

आयामोऽत्र व्यामः स च "व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्" इत्युक्तलक्षणः पञ्च व्यामाः परिणाहः स्थौल्यं यासामित्यर्थः । केचित्तु पञ्चव्यामपरिणाहा इत्येवं पठन्ति ॥ २२ ॥ २३ ॥

नीचीना अधोमुखाः ॥ २४—२६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेषां फलानां विशीर्णानामधःपातेन भिद्यमानानामतीव मधुरश्चासौ स्वतः सुरभिश्च सुगन्धिश्च न चान्येषां गन्धैरधिवासित इति उपरिष्टात् बहुलश्चारुणश्च रसः स पयोदकं तेनारुणोदानामकमी

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इति प्रसिद्धा नदी मन्दरशिखरान्निपतन्त्यधोऽधःस्यन्दमाना पूर्वेणेलावृतमिलावृतवर्षस्य पूर्वं प्रदेशमुपप्लावयति सिञ्चति आत्मानमुपस्यन्दयतीत्यर्थः ॥ १७ ॥

अरुणोदां नदीं विशिनष्टि । यदिति । यस्या अरुणोदाया उपजोषणाद्रसपानाद्भवान्या अनुचरीणां पुण्यजनानां यातुधानानां या वध्वः तासामवयवसंस्पर्शेन सुगन्धमुरभिर्वातो वायुः समन्तात्सर्वतो दिशं दशयोजनमनुवासयति सुरभीकरोति ॥ १८ ॥

एवं जम्बूफलानां मेरुमन्दरोत्सङ्गनिरूढजम्बूफलानामत्युच्चान्मेरुमन्दरात् यो निपातस्तेन विशीर्णानां भिन्नानामनस्थिप्रायाणामतिसूक्ष्मबीजानामिभकायनिभानां गजशरीरसदृशानां रसेन जम्बूनदीतिप्रसिद्धा मेरुमन्दरस्य शिखरादयुतयोजनोच्छ्रायाद्भूतले निपतन्ती दक्षिणेनेलावृतमिलावृतस्य दक्षिणभागं यावदिलावृतमात्मानमुपस्यन्दयति इलावृतस्य दक्षिणं भागं प्राप्य वहतीत्यर्थः ॥ १९ ॥

यावदिलावृतमुपस्यन्दयति तावत्पर्यन्तमुभयोरपि रोधसोः तटयोर्या मृत्तिका तद्रसेन तस्या नद्या रसेनानुविध्यमाना संयुज्यमाना वाय्वर्कसंयोगजो यो विपाकः परिणामस्तेन जाम्बूनदं नाम सुवर्णं सदा निरन्तरममरलोकानामाभरणोपयोगि भवति एतदेवाह । यत्सुवर्णं विबुधादयो युवतिभिः सह मुकुटाद्याभरणरूपेण धारयन्ति ॥ २० ॥ २१ ॥

यस्तित्वति । सुपार्श्वस्य पर्वतस्य यः पश्चिमो भागस्तत्र निरूढो यो महाकदम्बस्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः सकरयोर्बाह्वोः यत्तिर्यगन्तरं तद्व्यायामः पञ्चायामः परिणाहः स्थौल्यं यासां ताः पञ्च मधुधाराः सुपार्श्वशिखरात्पतन्त्यः अपरेणेलावृतस्य पश्चिमं भागं प्रत्यक्षमानमनुमोदयन्ति सुरभीकुर्वन्ति स्पन्दन्त इत्यर्थः धारा विशिनष्टि । यास्त्विति । उपयुञ्जानानां धारा उपभुञ्जानानां यो मुखनिर्वासितो मुखगन्धेन निर्वासितः नितरां सुरभीकृतो वायुः समन्ताच्छतयोजनं सुरभीकरोति निरतिशयसौरभ्ययुक्ता धारा इत्यर्थः ॥२२-२३ ।

एवं कुमुदपर्वते निरूढो यः शतवल्श इति प्रसिद्धो वटस्तस्य स्कन्धेभ्यो विनिर्गताः पयोदधिमधुघृतगुडान्नाद्यम्बरशय्यासनाभरणादीनि गुडान्नादीनि भक्ष्याणि अम्बराणि धार्याणि शय्यासनादीनि भोगस्थानानि आभरणानि च दुहन्तीति दुघाः स च नदाः कुमुदस्य पर्वतस्याग्रात्पतन्तस्तमुत्तरेणेलावृतमिलावृतस्योत्तरभागमुपजोषयन्ति प्रीणयन्ति इलावृतस्योत्तरभागस्थान् लोकान् सुखयन्तीत्यर्थः एतदेवाह । यासामुपजुषाणानां सेवमानानां प्रजानां वलयादयः तापविशेषा न भवन्ति किन्तु यावज्जीवं निरतिशयं सर्वोत्कृष्टं सुखमेव भवति वलिस्त्वग्गतो विकारः पलितं केशगतक्लमः श्रमः आमयो रोगः उपसर्गाः सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभमदमात्सर्येर्ष्यादयः प्रागुक्ता एषा इत्यर्थः ॥ २४ ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तेषां फलानामतिमधुरादिलक्षणेन रसोदेन रसाख्यजलेन पूर्वेणेलावृतमिलावृतवर्षस्य पूर्वप्रदेशमुपप्ला (१) वतीति कश्चित्तत्र "प्लुङ् गतिशुद्ध्योः" इति धातोः शुद्धं करोतीत्यर्थः स्वजलप्रवाहेणेति शेषः ॥ १७ ॥

उपजोषणाद्विशेषणात् अनुचरीणां दासीनामनुवासयति सौरभ्ययुक्तं करोति ॥ १८ ॥

अनस्थिप्रायाणां बहुत्वमनन्तबीजानामिभकायनिभानामिति । सुखग्रहणार्थमुक्तं नतु तावत्परिमाणाभिप्रायेण

अरत्नीनां शतान्यष्टावेकषष्ट्यधिकानि च ।
फलप्रमाणमाख्यातमृषिभिस्तत्त्वदर्शिभिः ॥

इति वायुपुराणवचनात् तत्प्रमाणमवगन्तव्यमयुतयोजनादिति । शिखरस्यैव तावत्त्वं न किन्तु शिखराद्यावितलान्तरालप्रदेशस्य तावत्त्वमित्यवगन्तव्यमिलावृतमात्मानं दक्षिणेन दिग्भागेन यावदुपस्यन्दयति तावत्स्थलमुभयोरोधसोस्तीरयोर्जम्बूफलरसेनानुविध्यमाना प्रतिहन्यमाना या मृत्तिका सा जाम्बूनदं नाम सुवर्णं भवतीत्यन्वयः तत्र हेतुर्वाय्वर्केति ॥ १९ ॥ २० ॥ २१ ॥

कोटरेभ्यः वृक्षविवरेभ्यः "व्यामो हस्तावधिः स्मृतः" इति हलायुधः अपरेण पश्चिमेन ॥ २२ ॥

मुखनिर्वासितः मुखनिर्गतः ॥ २३ ॥

इलावृतस्थजनानुपभोजयन्ति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अतः सुरभिश्चान्येषां गन्धैरधिवासितश्च ॥ १७—१८ ॥

अनस्थिप्रायाणामतिसूक्ष्मबीजानां दक्षिणेन दक्षिणस्यां दिशि यावदिलावृतं तावदात्मानं वर्षयन्तीति शेषः । नवयोजनसहस्रपर्यन्तं निःसृत्येत्यर्थः ॥ १९ ॥

तावत् पर्यन्तमेव उभयोरेव रोधसोस्तटयोरनुविध्यमाना युज्यमाना या मृत्तिकास्ताः सुवर्णं भवति ॥ २०—२१ ॥

आयामोऽत्र व्यामः स च । व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरमित्युक्तलक्षणः पञ्चभिर्व्यामैः परिमितः परिणाहः स्थौल्यं यासां ताः । केचित्तु पञ्चव्यामपरिणाहा इति पठन्ति अनुमोदयन्ति तत्र लोकप्रशंसाभिरात्मानं हर्षयन्ति ॥ २२—२३॥

शतवल्शः शतस्कन्धः नीचीनाः अधोमुखाः ॥ २४—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तेषां फलानामतिमधुरभासां सुरभिश्च सुगन्धिश्च गन्धान्तराणामधिवासितः बहुलश्चारुणश्च रसः स एवोदमुदकं येन हेतुनाऽरुणोदा नाम प्रसिद्धा नदी ॥ १७ ॥

यन्नस्य रसस्योपजोषणात्सेवनात् ॥ १८ ॥

अनस्थिप्रायाणामनस्थिप्रायाणाम् ॥ १९ ॥

तावत्सर्वेन: ॥ २०—२३ ॥

स्कन्धेभ्यो नीचीनाः अधः पतमानाः काम्यन्ते इति कामाः पदार्थास्तान् दुहन्तीति तथाभूताः के कामा इत्याकाङ्क्षायामाह । पय इति ॥ २४ ॥

भाषाटीका ।

उन आम फलों के गिरकर फटजाने से अत्यन्त मधुर सुरभि सुगन्धयाले लाल रस के जल से भई अरुणोदा नाम की नदी मन्दराचल पर्वत के शिखर से गिरती हुई पूर्वकी ओर इलावृतवर्षके मध्य में बहती है ॥ १७ ॥

(१) पाठान्तरम् ।

यानुपजुषाणानां न कदाचिदपि प्रजानां वलीप... पसर्गादयस्तापविशेषा भवन्ति यावज्जीवं सुखं निरतिशयमेव ॥ २५ ॥

कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिशिरपतङ्गरुचकनिषधशिनीवासकपिलशङ्खवैदूर्यजारुधि... नागकालञ्जरनारदादयो विंशतिगिरयो मेरोः कर्णिकाया इव केसरभूता मूलदेशे परित उपक्लृप्ताः ॥ २६ ॥

जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतावेवमुत्तरतस्त्रिशृङ्गमकरावष्टभिरेतैः परिस्तृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः ॥ २७ ॥

मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥ २८ ॥

तामनु परितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः ॥ २९ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां भुवनकोशवर्णनं नाम
षोडशोऽध्यायः ॥ १६ ॥

भाषाटीका ।

जिस नदी के जल के सेवन से पार्वतीजी की दासी यक्षोंकी स्त्रीजनों के शरीर का सुगन्धित पवन चारोंओर से दश योजन तक देश को सुगन्धित करता है ॥ १८ ॥

इसीप्रकार से बड़े ऊंचे से गिरने से फटे हुये विना गुठली प्राय हाथी के शरीर के बरोबर जामुन फलों के रस से भरी जम्बू नाम की नदी दश हजार योजन ऊंचे मेरु मन्दर पर्वत के शिखर से पृथिवीपर गिरतीहुई दक्षिण के तरफ इलावृत वर्ष में बहती है ॥ १९ ॥

तिस नदी के दोनों किनारों में जो मृत्तिका है उस नदी के जलसे भीगीहुई सूर्य पवन दोनों के संयोग से पकजाती है तब देवों के भूषण पहरनेलायक जाम्बूनद नाम का सुवर्णरूप होजाती है ॥ २० ॥

जिस सुवर्ण को देवादिक अपनी स्त्रियोंके सहित मुकुट कङ्कण कटि सूत्रादि भूषण बनाकर धारण करते हैं ॥ २१ ॥

सुपार्श्व पर्वतपर जमा जो महाकदम्ब का पेड़ उसके खोतरों से निकली पांच पुरुषमात्र चौडी पांच मधुकी धारा सुपार्श्व पर्वत के शिखर से गिरतीहुई हैं सो पश्चिम की तरफ इलावृत में बहती हैं ॥ २२ ॥

जिन नदियोंके सेवन करनेवाले जनों के मुखसे निकला पवन चारों ओर सौ योजन देश को सुगन्धित करता है ॥ २३ ॥

इसी प्रकारसे कुमुद पर्वतपर जमा जो शतवल्श नाम का वड़ है तिसके मध्य स्कन्धों से नीचे मुखवाले सब मनोरथों के देनेवाले दूध दही मधु घृत गुड अन्नादि वस्त्रादि शय्या आसन आभरण इनके बहानेवाले पांच नद कुमुद के ऊपर से गिरकर उत्तरकी तरफ इलावृत में बहते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चतुर्दिक्षु मेरुमूलाद्योजनसहस्रं त्यक्त्वामी परितः परिधय इव जठरदेवकूटादयस्तिष्ठन्ति अतोऽष्टादशयोजनसहस्रं प्रमाण-मत्रोक्तम् ।

वैष्णवादिपुराणेषु परिमाणादि यत्पुनः ।
अन्यथा वर्णितं तत्तु कल्पभेदाद्यपेक्षया ॥

द्विसहस्रं पृथू च तुङ्गौ च ॥ २७ ॥ २८ ॥

यथादिशं प्राच्यादिदिक्षु यथारूपमिन्द्रादिवित्तानतिक्रमेण तुरीयमानेन सार्धद्विसहस्रप्रमाणेन । नामानि पुराणान्तराज्ज्ञातव्यानि यथाक्रमम् ।

मेरौ नव पुराणि स्युर्मनोवत्यमरावती ।
तेजोवती संयमनी तथा कृष्णाङ्गना परा ॥
श्रद्धावती गन्धवती तथा चान्या महोदया ।
यशोवती च ब्रह्मेन्द्रवह्न्यादीनां यथाक्रमम् ॥

इति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कुरङ्गेति । कुरङ्गादयः पर्वताः कुवलयकमलकर्णिकाभूतस्य मेरोर्मूलदेशे केसरभूता इव परित उपक्लृप्ताः विन्यस्ता भान्तीति शेषः ॥ २६ ॥

तथा मेरोः पूर्वेण मेरोः पुरस्तान्मेरुमूलाद्योजनसहस्रं त्यक्त्वा जठरदेवकूटौ पर्वतावष्टादशयोजनसहस्रदीर्घौ द्विसहस्रयोजनपृथुतुङ्गौ च भवतः एवं मेरोरपरभागे पवनपारियात्रौ जठरदेवकूटाभ्यां तुल्यायामपृथुतुङ्गौ भवतः तथा मेरोर्दक्षिणतः कैलासकरवीरौ प्रागायतौ पूर्वतो दीर्घौ एवमुत्तरतस्त्रिशृङ्गमकरौ भवतः एभिः परिस्तृतोऽग्निरिवाष्टभिरेतैर्जठरादिभिः काञ्चनगिरिर्मेरुः परितश्चकास्तीति द्योतते ॥ २७ ॥

मेरोर्मूर्द्धन्युपरिभागे मध्यतः मध्यप्रदेशे उपक्लृप्तां भगवतः आत्मयोनेश्चतुर्मुखस्य पुरीमयुतयोजनविस्तारां समचतुरस्रां शातकौम्भीति प्रसिद्धां च वदन्ति तां शातकौम्भीं पुरीमनुसृत्य मेरोः परितोऽष्टदिक्षु यथादिशं पूर्वादिदिगनतिक्रमेणाप्यानामिन्द्रादीनां लोकपालानामष्टौ पुरः अमरावतीतेजोवतीसंयमनीकृष्णाङ्गनाश्रद्धावतीगन्धवतीमहोदयायशोवतीसंज्ञाः तुरीयमानेन अयुतस्य तुरीयभागेन उपक्लृप्ताः सार्द्धद्विशतसहस्रयोजनविशालाः कल्पिता इत्यर्थः ॥ २८ ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपसर्गो भूताद्युपद्रवः ॥ २५ ॥

कुरङ्गकुररादिपर्वताः मेरोर्मूलदेशे परित उपक्लृप्ताः भुवनपद्मकर्णिकायाः केसरा इव स्थिताः ॥ २६ ॥

अष्टादशयोजनसहस्रं दूरप्रदेशे मन्दरगिरिपूर्वभागे जठरदेवकूटौ स्थितौ भवतः उदगायतौ उत्तरदीर्घौ मेरुपूर्वतः इलावृतमेर्वोर्मध्ये अष्टादशयोजनसहस्रे इति स एवार्थो योजनाभेद इति वा एवमपरेण एवं मेरोः पश्चिमभागस्थितसुपार्श्वगिरेः पश्चिमभागे इलावृतमेर्वोर्मध्ये अष्टादशयोजनसहस्रे दूरे पवनपारियात्रौ गिरी तिष्ठतः तावप्युदगायतौ एवं मेरोर्दक्षिणतः कैलासकरवीरौ मेरुमन्दरगिरेरपि बहिर्भागे स्थितौ पूर्वपश्चिमायतौ एवं मेरोरुत्तरभागे कुमुदपर्वतादपि बहिर्भागे शृङ्गमकरौ नाम गिरी आस्ताम् अष्टादशयोजनानां सहस्राणीति सर्वत्र दैर्घ्यं तावपि प्रागायतौ द्विसहस्रपृथुत्तुङ्गत्वं च सर्वत्र समं यथा एभिः परिस्तृतोऽग्निरष्टभिरेतैरष्टभिः पर्वतैः परितः परिस्तृतोऽलङ्कृतश्चकास्ति काञ्चनगिरिरित्यर्थः एवमुक्तगिरिषु प्रागायतत्वादिकं लक्षणं द्विसहस्रपृथुत्तुङ्गत्वादिकमवगन्तव्यम् ॥ २७ ॥

मेरोर्मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततं तस्य मेरोर्मूर्ध्नो मध्ये आत्मयोनेर्विरिञ्चस्य शातकौम्भीं नाम पुरीं वदन्ति शातकौम्भीं सुवर्णमयीम् ॥ २८ ॥

तुरीयमानेन विरिञ्चिपुर्याश्चतुर्थांशप्रमाणेन सार्धद्विसहस्रयोजनप्रमाणेनेत्यर्थः पुरः पुर्यः तामनुपरित इत्यस्य विवरणं यथादिशमिति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षोडशोऽध्यायः ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
षोडशोऽध्यायः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यथादिशं प्राच्यादिदिक्षु । यथारूपमिन्द्रादिवर्णानतिक्रमेण तुरीयमानेन सार्द्धद्विसहस्रमानेन नामानि पुराणान्तरात् ज्ञातव्यानि । यथोक्तम्

मेरौ नव पुराणि स्युर्मनोवत्यमरावती ।
तेजोवती संयमनी तथा कृष्णाङ्गना परा ।
श्रद्धावती गन्धवती तथा चान्या महोदया ।
यशोवती च ब्रह्मेन्द्रवह्न्यादीनां यथाक्रमम् ।

इति ॥ २९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमे षोडशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥१६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

वलिस्त्वक्सङ्कोचः पलितं केशधावल्यं क्लमः कार्येषु श्रमः वलयादिनिमित्तं उपसर्गास्तदादयस्तापविशेषाः न कदाचित्कुर्वन्ति ॥ २५ ॥ २६ ॥

एतैः परिश्रितः आवृतः अग्निरिव चकास्ति ॥ २७ ॥

मध्यतः मध्यप्रदेशे ॥ २८ ॥

तां पुरीमनु अनुसृत्य परितः यथादिशं पूर्वादिदिगनतिक्रम्य यथारूपमिन्द्रादिवर्णानतिक्रमेण तुरीयमानेन सार्द्धद्विसहस्रप्रमाणेनाष्टौ पुरः उपक्लृप्ताः पुराणां नामानि पुराणान्तरात् ज्ञातव्यानि ।

मेरौ नव पुराणि स्युर्मनोवत्यमरावती ।
तेजोवती संयमनी तथा कृष्णाङ्गना परा ।
श्रद्धावती गन्धवती तथा चान्या महोदया ।
यशोवती च ब्रह्मेन्द्रवह्न्यादीनां यथाक्रमम् ।

इति ॥ २९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षोडशाध्यायार्थप्रकाशः ॥ १६ ॥

भाषाटीका

नरोंके जिन पदार्थोंके सेवन करने वाले पुरुषों के कभी भी वृद्धपना ग्लानि पसीना दुर्गन्धी केशों का पकना रोग मरण शीत उष्ण कुरूपना आदि उपद्रव ताप नहीं होते हैं सदाकाल अत्यन्त सुखही रहता है ॥ २५ ॥

कुरङ्ग कुरर कुसुम्भ वैकङ्क त्रिकूट शिशिर पितङ्ग रुचक निषध सिनीवास कपिल शङ्ख वैदूर्य जारुधि हंस ऋषभ नाग कालञ्जर नारद आदि बीस पर्वत मेरुके कर्णिका के केसरसरी के मूलदेश मे चारों ओर से कल्पित हैं ॥ २६ ॥

जठर देवकूट ए दोनों पर्वत मेरुके पूर्व तरफ अठारा हजार योजन उत्तर दक्षिणकी ओर लम्बे हैं दो हजार योजन मोटे तथा ऊंचे हैं इसी प्रकार पश्चिम के तरफ पवन पारियात्र दोनों पर्वत हैं दक्षिण मे कैलास करवीर दोनों पूर्व पश्चिम में लगे हैं ऐसे ही उत्तर मे त्रिशृङ्ग मकर दो पर्वत हैं इन आठ पर्वतों [illegible] पर्वत अग्नि के त [illegible]

मेरू के [illegible] ब्रह्माकी कल्पना की हुई अयुत हजार योजन [illegible] सुवर्ण की पुरी चारों ओरसे बरोबर मनोवती नामकी [illegible] महात्मा-जन कहते हैं ॥ २८ ॥

तिस पुरी के पीछे चारों ओर आठ लोकपालों की अपनी दिशा के नियम से यथायोग्य ब्रह्मपुरी के चतुर्थांश भाग विस्तार में आठ पुरी कल्पित हैं ॥ २९ ॥

इति श्रीमद्भागवत पञ्चमस्कन्ध षोडश अध्याय

का भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ १६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे षोडशोऽध्यायः समाप्तः ॥ १६ ॥

॥ सप्तदशोऽध्यायः ॥

———:०:———

श्रीशुक उवाच ।

तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणान्तःप्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजावनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघमलापहोपस्पर्शनाऽमला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्धन्यवततार यत्तद्विष्णुपदमाहुः ॥ १ ॥

यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानान्तर्हृदय औत्कण्ठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाऽभिव्यज्यमानरोमपुलककुलकोऽधुनापि परमादरेण शिरसा बिभर्ति ॥ २ ॥

ततः सप्तऋषयस्तत्प्रभावाभिज्ञा यां ननु तपस आत्यन्तिकी सिद्धिरेतावती भगवति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहन्ति ॥ ३ ॥

ततोऽनेकसहस्रकोटिविमानानीकसङ्कुलदेवयानेनावतरन्तीन्दुमण्डलमावार्य ब्रह्मसदने निपतति ॥ ४ ॥

तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्पन्दन्ती नदनदीपतिमेवाभिनिविशति सीताऽलकनन्दा चक्षुर्भद्रेति ॥ ५ ॥

सीता तु ब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्धसु पतित्वान्तरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥ ६ ॥

एवं माल्यवच्छिखरान्निष्पतन्ती ततोऽनुपरतवेगा केतुमालमभिचक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥ ७ ॥

भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधिमभिप्रविशति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ततः सप्तदशे गङ्गागमनं तच्चतुर्दिशम् ।
इलावृते च रुद्रेण सङ्कर्षणनिषेवणम् ॥ १ ॥

यज्ञलिङ्गस्य यज्ञैर्लिङ्ग्यते त्रिविक्रममूर्तेर्यस्य विक्रमतो दक्षिणेन पदा भुवं क्रान्त्वा वामपदमुत्क्षिपतो वामपादाङ्गुष्ठनखेन निर्भिन्नमूर्ध्वमुपरिभागो यस्याण्डकटाहस्य तस्य विवरेणान्तः प्रविष्टा या बाह्यजलधारा सा दिवो मूर्धन्यवततारेत्यन्वयः तस्य यच्चरणपङ्कजं तस्यावनेजनेन क्षालनेनारुणं ताम्रं कुङ्कुमं तदेव किञ्जल्कास्तैरुपरञ्जिता अत एवाखिलस्य जगतोऽघमलापहमुपस्पर्शनं यस्यास्तथाप्यमला तन्मलसङ्करशून्या साक्षाद्भगवत्पदीति यदनुपलक्षितं जाह्नवीभागीरथ्याद्युपलक्षणान्तररहितं वचो नाम तेनाभिधीयमाना तस्मिन् समये भगवत्पदी नाम पश्चान्नामान्तराणि जातानीत्यर्थः कोऽसौ दिवो मूर्धा तमाह यदिति ॥ १ ॥

किं तद्विष्णुपदं तदाह । यत्रेति । वीरव्रतो दृढसङ्कल्पः अस्मत्कुलदेवताया हरेश्चरणारविन्दोदकमिति हर्षेण परमादरेण बिभर्तीत्यन्वयः कथम्भूतः सन् प्रतिक्षणं वर्धमानेन भगवद्भक्तियोगेन दृढमत्यन्तं क्लिद्यमानमन्तर्हृदयं यस्य अत एवौत्कण्ठ्येन

श्रीधरस्वामिकृतभावार्थदीपिका ।

विवशमामीलितं यल्लोचनयुगलं तदेव कुड्मलं ताभ्यां विगलितममलं बाष्पं तस्य कलया सहाभिव्यज्यमानं रोमपुलकानां कुलं यस्य ॥ २ ॥

ततः सप्तऋषयस्तस्याः गङ्गायाः प्रभावाभिज्ञाः सन्तो यां जटाजूटैरुद्वहन्तीत्यन्वयः एतावत्येव नातोऽधिकाऽस्तीत्यभिप्रायवन्तः तत्र हेतुः भगवति सन्ततं भक्तियोगलाभेनैवोपेक्षिता अन्ये पुरुषार्था आत्मज्ञानं च यैः कामिव क इव धारयन्ति । प्रत्यक्षं मुक्तिमिव तामागतां मुमुक्षवो जना इव ते ॥ ३ ॥

ततोऽनेकसहस्रकोटीनां विमानानामनीकैः सङ्कुलेन देवयानेनाकाशमार्गेणावतरन्ती सप्तऋषिभ्योऽर्वागेव प्रायशः कर्मिणां गतिरिति ततोऽर्वागेव सङ्कुचत्त्वमुक्तम् आवार्य आप्लाव्य मेरुमूर्द्धस्थे ब्रह्मसदने निपतति ॥ ४ ॥

अभिस्यन्दन्ती अभितो गच्छन्ती ॥ ५ ॥

केसराचलानां मेरुसमानोच्छ्रायत्वात्प्रथमं तेषामादिशिखरेषु मुख्यशृङ्गेषु पतति ततस्तेभ्योऽधोऽधः प्रस्रवन्ती सती ॥ ६ ॥

माल्यवच्छिखरात्केतुमालाभिमुखं निष्पतन्ती चक्षुःसंज्ञा ॥ ७ ॥

गिरिशिखरादिति । कुमुदशिखरादुच्चलिता नीलशिखरं तत उच्चलिता श्वेतशिखरन्तद्वत्पतिहाय शृङ्गवतः शृङ्गादधः स्रवन्ती ॥ ८ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं जम्बूद्वीपवर्षतद्वर्षतत्परिमाणादिकमभिधायाथ गङ्गागमनकथनपूर्वकमिलावृतादिवर्षेषु रुद्रादीनां संकर्षणादिभगवन्मूर्त्युपासनाप्रकारमुपद्वीपविन्यासं चाह । सप्तदशादित्रिभिरध्यायैः । तत्र भगवत इति । यज्ञस्य लिङ्गस्य यज्ञमूर्तेस्तत्र भगवतः पूज्यस्य विष्णोर्वामनरूपस्य विक्रमतस्त्रिलोकीं पादत्रयेण क्रममाणस्य सतः तस्य वामपादाङ्गुष्ठनखेन निर्भिन्नमूर्ध्वमुपरिभागो यस्य तस्याण्डकटाहस्य विवरेण रन्ध्रेणान्तःप्रविष्टा या बाह्यजलधारा सातिमहता कालेन दिवो मूर्द्धन्यवततारेत्यन्वयः जलधारां विशिनष्टि । तस्य त्रिविक्रमस्य चरणपङ्कजं तस्यावनेजनेन क्षालनेनारुणं कुङ्कुमं तदेव किञ्जल्कास्तैरुपरञ्जितात एवाखिलस्य जगतोऽघं पापमेव मलं तदपहं निवर्तकमुपस्पर्शनं जलं यस्याः सा तत्र हेतुरमला स्वरूपतो दुरितनिरसनक्षमा यद्वा माखिलजगदघमलापहोपस्पर्शनाऽप्यमला अन्तर्मलसङ्गशून्या साक्षाद्भगवत्पदीति यदनुपलक्षितं जाह्नवी भागीरथीत्याद्युपलक्षणान्तररहितं वचो नामधेयं तेनाभिधीयमाना भूस्पर्शनात्पूर्वं जाह्नव्यादिनामान्तररहिता तथा केवलं भगवत्पदीति नामधेयेनाभिधीयमानेत्यर्थः कोऽसौ दिवो मूर्द्धा यत्रावतीर्णा तत्राह । यत्सादिति । यद्विष्णुपदमाहुस्तत्रेत्यर्थः ॥ १ ॥

किञ्च विष्णुपदं तत्राह । यत्रेति । ध्रुवमण्डले इत्यर्थः यत्र दिवो मूर्द्धनि वीरव्रतः दृढसङ्कल्पः भागवतश्रेष्ठः औत्तानपादिः ध्रुवः अस्मत्कुलदेवताया भगवतः चरणारविन्दोदकमिति हेतोः परमादरया यां धारामनुसवनं त्रिकालं शिरसाऽद्यापि बिभर्तीत्यन्वयः यद्वा अनुसवनं क्षणक्षणं वर्द्धमानो यो भगवद्भक्तियोगः तेन दृढमत्यन्तं क्लिद्यमानं प्रीयमाणमन्तःकरणं यस्यातएवौत्कण्ठ्येन विवशमामीलितं च यल्लोचनयुगलं तदेव कुड्मलं ताभ्यां

ततः सप्तर्षयः तस्या [illegible] तपः सिद्धिफलमियं विष्णुपदी [illegible] नास्तीत्येवं मन्वाना अद्यापि बहुमानं जटा एव [illegible] उद्वहन्तीत्यन्वयः तत्र दृष्टान्तः । मुमुक्षवो मुक्तिमिवागताम् इति । तत्र हेतुः सर्वात्मनि भगवति वासुदेवेऽविच्छिन्नभक्तियोगलाभेनैव उपेक्षिता अनादृता अन्यपुरुषार्था अर्थकामादय आत्मगतिः कैवल्यं च यैस्त इति सप्तर्षिविशेषणम् ॥ ३ ॥

ततोऽनेकसहस्रकोटीनां विमानानामनीकैः संघैः संकुलितेन देवयानेनाकाशमार्गेणावतरन्त्यधः स्रवन्तीन्दुमण्डलमावार्याप्लाव्य मेरुमूर्द्धस्थे ब्रह्मसदने निपतति ॥ ४ ॥

तत्र चतुर्धा विभज्यमाना सीतादिसंज्ञाश्चतस्रो धारा भूत्वा सीतादिनामभिरभिधीयमाना चतुर्दिशं नदनदीपतिं समुद्रमेवाभिनिविशति समुद्रे प्रविशति "अभिनिविशश्च" इत्याधारस्य कर्म संज्ञायाम् द्वितीया । नामान्याह । सीतेति ॥ ५ ॥

तत्र चतसृणां धाराणां मध्ये सीता प्राचीना धारा ब्रह्मसदनात्केसरादिशिखरेभ्यः केसराचलादीनि मेरुसमानोच्छ्रायत्वात्प्रथमं तेषामादिशिखरेषु मुख्यशृङ्गेषु पतति ततस्तेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनस्य मूर्द्धसूपरिभागे पतित्वान्तरेण भद्राश्ववर्षं भद्राश्ववर्षस्य मध्ये च स्यन्दमाना प्राच्यां दिशि क्षारसमुद्रे प्रविशति ॥ ६ ॥

तथा चक्षुःसंज्ञा प्रतीचीना धारा माल्यवच्छिखरे निपतित्वा ततोऽधः प्रस्रवन्ती अनुपरतः अप्रतिहतो वेगो यस्याः सा केतुमालं वर्षमभितो व्याप्य केतुमालस्य मध्ये स्रवन्तीत्यर्थः प्रतीच्यां दिशि सरितांपतिं समुद्रं प्रविशति आधारस्यैव कर्मत्वविवक्षयात्र द्वितीया एवमुत्तरत्राप्यभिनिविशश्चेत्यत्रोपसर्गसङ्घातपूर्वत्वस्यैव विवक्षितत्वात् ॥ ७ ॥

तथा भद्रासंज्ञा धारा उत्तरतो मेरुशिखरान्निपतन्ती गिरिशिखरात्कुमुदशिखरादुच्चलितोर्ध्वं गच्छन्ती नीलशिखरमुच्चलिता श्वेतपर्वतस्य शिखरमतिहायास्पृष्ट्वैव शृङ्गवतः पर्वतस्य शृङ्गे पतित्वा ततोऽधः स्यन्दमाना उत्तरान् कुरूनभितो व्याप्य उदीच्यां दिशि अर्णवमेवं प्रविशति ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अयत्नेन भागीरथीजलनिषेवया निर्मलान्तःकरणस्य पुंसो हरौ निरतिशयभक्तिः स्यादिति तन्महिमगर्भः तदवतारो निरूप्यतेऽस्मिन्नध्याये । तत्रेत्यादिना । या बाह्यजलधारा अण्डकटाहाद्बहिःस्थिता जलस्य निरन्तरसम्पातरूपा सा यत्तद्विष्णुपदं शिशुमारात्मनो हरेः स्थानमाहुः तत्र दिवोऽन्तरिक्षस्य मूर्द्धनि ध्रुवलोके अवततार प्रकाशितस्वरूपाभूदित्यन्वयः स्वतोऽमला धवला तथाप्यरुणेत्याह । तच्चरणेति । यस्य हरेश्चरणारक्तपद्मावनेजनेन प्रक्षालनेन चरणतलसम्परञ्जितत्वाद्रक्तकिञ्जल्करजसोपरञ्जिता रागीकृतेव तर्हि रक्तिमेत्थिता रागजनकत्वेन पापजननी स्यादित्यत उक्तमखिलेति अखिलजगतः पापमलापहमुपस्पर्शनं यस्याः सा तथा आचमनमात्रेण सर्वपापहर-

श्री[illegible]वैष्णवतोषणी ।

केरा किमुत [illegible]नादिभिरित्यर्थः नामकीर्तनादपि दुरितहरा किमुत स्पर्शनादिभिरिति भावेनाह । साक्षादिति । अनुपलब्धिमद्वचोभिः अन्वयव्यतिरेकवचोभिर्वेदपुराणगतैः शालग्रामशिलाभिषेकजलस्य पादोदकत्वमिवौपचारिकं न भवतीत्यतः साक्षादनुपलक्षितेति पदद्वयं कल्पभेदाद्वामपादेनि व्यत्ययस्योक्तं तत्रैकस्मिन् कल्पइति तदुक्तं "वाराहे वामपादं च तदन्येषु च दक्षिणम् । पादं कल्पेषु भगवानुज्जहार त्रिविक्रम" इति ॥ १ ॥

यत्र ध्रुवलोके ॥ २ ॥

ततो ध्रुवलोकात् उपेक्षिता अन्यार्था अन्यविषया आत्मगतिर्यैस्ते तथा ॥ ३ ॥

ततः सप्तर्षिलोकात् देवयानेन मार्गेण इन्द्रादिपुरसम्बन्धेन ब्रह्मसदने मेरुमध्यस्थिते शातकौम्भनाम्नि पुरे ॥ ४ ॥

तत्र ब्रह्मसदनाङ्गणे नदनदीपतिं समुद्रम् ॥ ५ ॥

चतुर्धा भिन्नाया गङ्गाया गतिभेदमाह । सीतेति । क्षारसमुद्रं लवणसमुद्रम् ॥ ६ ॥ ७ ॥

मेरुशिरसो व्योम्ना निपतन्ती नीलगिरिशिखरे पतित्वा ततो नीलगिरिशिखरादाकाशेन श्वेतगिरिशिखरमवस्यन्दमाना पुनस्तद्व्यतिहाय अतिक्रम्याकाशेन शृङ्गवतः शृङ्गं प्राप्ता ततोऽपि स्यन्दमानोत्तरकुरूनतिक्रम्य निषधस्य गिरेः बहूनि कूटानि शृङ्गाग्रयतिक्रम्याकाशेन हेमकूटहिमालययोर्गिर्योर्मध्ये व्योम्ना पतन्ती कूटान्यतिक्रम्य ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

युगसहस्रेत्यत्र युगं नाम ज्योतिःशास्त्ररीत्या पञ्चवर्षात्मकं ज्ञेयम् ॥ १—२ ॥

अद्यापि अवतारसमयानन्तरं सर्वदापीत्यर्थः ॥ ३—१३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

गङ्गागमागमं भूमौ भौमस्वर्गसुखं तथा ।
सङ्कर्षणस्य रुद्रेण सेवां सप्तदशोऽवर्णयत् ॥

सुमेरोः परितः केसराद्रिशोभां वर्णयित्वा सर्वशोभाभूतामणिमतिदीर्घतरशाखाशिखरहीरकमुकुटविशोभमानां तन्मूर्ध्नि विराजमानां श्रीगङ्गां वर्णयंस्तत्प्रादुर्भावप्रकारमाह । तत्र वामनावतारसमये विक्रमतः दक्षिणेन पदा भुवं क्रान्त्वा वामपादमुत्क्षिपतः "त्रिसाम्यसदनादुरुक्रमपादान्" इति ब्रह्मोक्तौ तस्य प्रकृत्यावरणपर्यन्तव्याप्तिश्रवणात् बाह्या पृथिव्याद्यावरणेभ्यो बहिर्भूता कारणार्णवसम्बन्धिनी चिन्मयी या जलधारा सा दिवो मूर्द्धनि ध्रुवलोकेऽवततारेत्यन्वयः । तच्चरणपङ्कजावनेजने क्षालनसमये अरुणाः चरणान्तःस्थारुणिमैव किञ्जल्कस्तेनोपरञ्जिता अखिलजगदघमलापहमुपस्पर्शनं यस्यास्तथाप्यमला तन्नामसङ्कीर्तना साक्षाद् भगवत्पदीति यदनुपलक्षितं तस्मिन् काले भागीरथीजाह्नवीत्याद्यन्यनामान्तररहितं वचो नाम तेनाभिधीयमाना यत् द्यौ दिवो मूर्द्धा तत्र अवततार ॥ १ ॥

यत्र विष्णुपदे वीरव्रतो दृढसङ्कल्पः । उत्कृष्यमाणेन प्रतिक्षणमुत्कर्षं प्राप्नुवता भक्तियोगेन अत एवौत्कण्ठ्येन विवशामामीलितं यल्लोचनयुगलं तदेव कुड्मलं ताभ्यां निर्गलितममलं बाष्पं तस्य कलया सह अभिव्यज्यमानं रोमपुलककानां कुलं यस्य सः ॥ २ ॥

एतावतीति । इतोऽधिकपरिमाणा सिद्धिः कापि नास्तीत्यर्थः भक्तियोगलाभेनैव उपेक्षिता अन्ये पुरुषार्था आत्मज्ञानं च यैरिति श्रीस्वामिचरणाः ॥ ३ ॥

देवयानेन आकाशमार्गेण सप्तर्षिभ्योऽर्वागेव प्रायशः कर्मिणां गतिरत एव ततोऽर्वागेव सङ्कुलत्वमुक्तम् । आप्लाव्य आप्लाव्य मेरुमूर्द्धस्थं ब्रह्मसदने ॥ ४ ॥ ५ ॥

केसराचलानां मेरुसमानोच्छ्रायत्वात् प्रथमं तेषामाद्रिशिखरेषु मुख्यशृङ्गेषु पतति ततस्तेभ्योऽधोऽधः प्रस्रवन्ती सती भद्राश्ववर्षस्य मध्ये पतित्वेति इलावृतमुल्लङ्घ्येत्यर्थः ॥ ६ ॥

केतुमालमभिलक्ष्य केसराचलात् तत्र पतित्वेत्यर्थः ॥ ७ ॥

गिरिशिखरादिति । केसराचलशिखरादुच्चलिता नीलशिखरं ततः श्वेतशिखरं तद्व्यतिक्रम्य शृङ्गादधः स्रवन्तीति इलावृतादिवर्षत्रयमुल्लङ्घ्येत्यर्थः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीगङ्गावतरणाभिलाषिणे श्रीसङ्कर्षणरुद्रयोः सेव्यसेवकसम्बन्धश्च वर्ण्यते । तत्रेति सप्तदशेनाध्यायेन । तत्र पुण्या गङ्गा आगतेति शेषः एतदेव भगवत इत्यादिना ब्रह्मसदने निपततीत्यन्तेन प्रपञ्चयति । बलियज्ञे लिङ्गं त्रिविक्रममूर्तिर्यस्य साक्षाद्भगवतः विक्रमतः दक्षिणेन पदा भुवं क्रान्त्वा वामपादमुत्क्षिपतो वामपदाङ्गुष्ठनखेन निर्भिन्नमूर्ध्वमुपरिभागो यस्याण्डकटाहस्य तस्य विवरेण छिद्रेणान्तर्ब्रह्माण्डमध्ये प्रविष्टा या बाह्यजलधारा सातिमहता कालेन दिवो मूर्द्धन्यवततारेत्यन्वयः तस्य विष्णोर्यच्चरणपङ्कजं तस्यावनेजनेन क्षालनेनारुणां कुङ्कुमं तदेव किञ्जल्कास्तैरुपरञ्जिता अत एवाखिलजगतः अघं पापमेव मलं तदपहं तन्निर्मोचकमुपस्पर्शनं यस्याः सा तथाप्यमला साक्षाद्भगवत्पदीति यदनुपलक्षितं जाह्नवीभागीरथीत्याद्युपलक्षणान्तररहितं वचो नामधेयं तेनाभिधीयमाना तदानीं भगवत्पदीत्येकेनैव नामधेयेन सङ्कीर्त्यमानेत्यर्थः दिवो मूर्द्धानं दर्शयति । यद्विति ॥ १ ॥

यत्र विष्णुपदे धीरे गरुडवाहने व्रतानि यस्य सः अस्मत्कुलदेवतायाः चरणारविन्दजलमिति हेतोः यामनुसवनं त्रिकालं परमादरेण शिरसा बिभर्ति कथम्भूतः उत्कृष्यमाणेन भक्तियोगेन दृढं यथा तथा क्लिद्यमानमन्तर्हृदयं यस्य सः अत एवौत्कण्ठ्येन विवशामीलितं यल्लोचनयुगलं तदेव कुड्मलं ताभ्यां विगलितस्यामलबाष्पस्य कलया सहाभिव्यज्यमानरोमपुलकानां कुलकं यस्य स एवं विध इत्यर्थः ॥ २ ॥

ततस्तदनन्तरं ननु अहो तपसः आत्यन्तिकी निरतिशया सिद्धिः एतावती का इयं विष्णुपदी इति एवं नमः प्रभावाभिज्ञा जटाजूटैरुपावहन्ति कथम्भूताः भगवत्यनुपरतभक्तियोगलाभेनैवोपेक्षिताः अन्यार्थात्मगतयः भक्तियोगतदन्यार्थविषयकमतिर्येषां येऽहन्ते ॥ ३ ॥

युगसहस्रसमावृत्त्याऽऽप्लाव्य ब्रह्मसदने मेरुमूर्द्धस्थे ॥ ४ ॥ ५ ॥

तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गि[illegible]भस-तररंहसा लुठयन्ती भारतमभिवर्षं दक्षिणस्यां दिशि ज[illegible]याम-च्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥ ९ ॥

अन्ये च नदा नद्यश्च वर्षे वर्षे सन्ति बहुशो मेर्वादिगिरिदुहितरः शतशः ॥ १० ॥

तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमानि स्वर्गपदानि व्यपदिशन्ति ॥ ११ ॥

एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देवकल्पानां नागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणां तत्र तु त्रेतायुगसमः कालो वर्तते ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

केसराचलाः केसरभूताः कुरङ्गादयः तेषां मेरुसमानोच्छ्रायत्वासद्वाद्यो येऽन्ये गिरयो मन्दरादयस्तेषां शिखरेभ्यः ॥ ६ ॥

एवं क्रमतो ब्रह्मसदनादधोऽधः प्रस्रवन्ती चक्षुःसंज्ञामाल्यवच्छिखरात्केतुमालाभिमुखं निष्पतन्ती प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥ ७ ॥

भद्रा च गिरिशिखराद्गलिता श्वेतशिखरं तदप्यतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना अधःस्रवन्ती उत्तरान् कुरून् अभितः प्राप्य लवणार्णवमभिप्रविशति ॥ ८ ॥

भाषा टीका ।

श्रीशुकदेवजी बोले तिस मेरुपर साक्षात् यज्ञमूर्ति वामन भगवान् विष्णु के पराक्रम करने के समय दहिने पाद से पृथिवी को आक्रमण करके वामपाद को ऊपर की तरफ फेंकने से अंगुष्ठ के नखसे अण्ड कटाह के उपरि भाग के फूट जाने से कारण-समुद्र की जो छिद्र में पैठी हुई बाहिर की जल धारा तिस से प्रक्षालन करनेसे लाल भया जो कुंकुम जल सोई कमल केसर भये तिनो से संयुक्त सब प्राणियों के पापरूपी मलको नाश करने वाला है स्पर्श जिसका ऐसी स्वयं निर्मल साक्षात् भगवत्पदी इस शब्द से युक्त है उपलक्षणरहित नाम से कथन करने के योग्य जो गंगाजी सो बडे हजारों युगों से उपलक्षित काल से आकाश के ऊपर ध्रुव लोक में उतरी है जिस स्थान को विष्णु पद करके कहते हैं ॥ १ ॥

जहां पर परम भागवत दृढ सङ्कल्प वाले उत्तानपाद के पुत्र परमभागवत ध्रुवजी हमारे कुल देवता के चरण कमल का जलहै करके निरंतर बढते हुये भगवद्भक्ति योग से अत्यंत हृदय के आर्द्र होने से उत्कंठाके परवश होने से किञ्चित दोनों लोचन कमल जिनके बंद होगये हैं तिनमें आसुओं की धारा गिरती है सब शरीर में रोमावली खडी होगई है सो ध्रुव जी अभी तक भी परम आदर से जिस गंगा को मस्तक से धारण करते हैं सो गङ्गा उतरी हैं ॥ २ ॥

तिसके पीछे श्रीगंगाजी के प्रभाव के जानने वाले सप्त ऋषि हैं निश्चित है कि तपस्या की सिद्धि इतनी ही है जो कि भगवान् वासुदेव सर्वात्मा के विषय निरंतर भक्ति योग के लाभ से उन सप्त ऋषियों ने और सब धर्म तथा ज्ञान मार्ग की भी उपेक्षा करके साक्षात् आई हुई मुक्ति सरीकी श्रीगङ्गाजी को मानकर मुमुक्षुसरीके स्वयं बडे आदर से अभी पर्यंत अपने जटों से श्रीगङ्गाजी को धारण किया है ॥३॥

फिर उस सप्तर्षि के स्थान से अनेक हजार विमानों के समूह से शोभित देवतों के मार्ग से उतरती हुई चन्द्र-मण्डल को पवित्र करती हुई ब्रह्माजी के स्थान में आती हैं ॥ ४ ॥

तहांपर चार भाग होकर चार नामों से चार दिशों को जाती हुई चारों समुद्रों में प्रविष्ट होजाती हैं सीता अलकनन्दा चक्षुः भद्रा एनाम है ॥ ५ ॥

सीता तो ब्रह्मस्थान से केसराचलादि पर्वतों के शिखर से नीचे नीचे गिरतीहुई गन्ध मादन पर्वत के मस्तकों में गिरकर भद्राश्ववर्ष के मध्यमें होकर पूर्वदिशा में क्षारीसमुद्र में मिलती है ॥ ६ ॥

ऐसेही चक्षुनदी माल्यवान् पर्वत के शिखर से गिरतीहुई बडे वेग से चलकर केतु मालवर्ष में होकर पश्चिम दिशा के समुद्र में प्रविष्ट होती है ॥ ७ ॥

भद्रा नदी उत्तर की तरफ मेरु के शिखर से गिरकर एक पर्वत शिखर से दूसरे शिखर जातीहुई शृङ्गवान् पर्वत के शृङ्गसे चलती हुई उत्तर कुरु देशों में होकर उत्तर दिशा के समुद्र में प्रविष्ट होती है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अभिरभसतररंहसा अत्यन्ततीव्रतरवेगेन ॥ ९ ॥

बहुशो बहुविधाः । मेर्वादिगिरीणां दुहितरस्तत्प्रसूताः ॥ १० ॥

दिव्यभौमबिलभेदात्त्रिविधः स्वर्गः तत्र भौमस्वर्गस्य पदानि स्थानानि व्यपदिशन्ति ॥ ११ ॥

अयुतं पुरुषमानेन आयुर्वर्षाणि येषाम् वज्रवद्दृढं संहननं शरीरं तस्मिन् बलवयोमोदास्तैः प्रमुदितानि यानि महासौरतानि मिथुनानि तेषां व्यवायापवर्गे सम्भोगावसाने एकवर्षशेषे आयुषि धृत एको गर्भो यैस्तादृशानि कलत्राणि येषां त्रेतायुगसमः त्रिवर्ष-

यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः सर्वर्तुकुसुमस्तवकफलकिसलयश्रिया नम्यमानविटपलताविटपिभिरुपशुम्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचविविधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुन्दरीणां कामकलिलविलासहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरन्ति ॥ १३ ॥

नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापि सन्निधीयते ॥ १४ ॥

इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्विशति भवान्याः शापनिमित्तज्ञो यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि ॥ १५ ॥

भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं मूर्तिं प्रकृतिमात्मनः सङ्कर्षणसंज्ञामात्मसमाधिरूपेण सन्निधाप्यैतदभिगृणन् भव उपधावति ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सुखोत्कर्षात् । कृतयुगे हि सर्वे ध्याननिष्ठाः । द्वापरादौ तु दुःखबहुलाः ॥ १२ ॥

यत्र ह येषु हि वर्षेषु देवपतयः स्वैः स्वैः सेवकगणेषु मुख्यैः कृतमहोपचाराः सन्तः स्वैरं विहरन्तीत्यन्वयः केषु स्थानेषु सर्वेषु ऋतुषु कुसुमस्तवकादीनां श्रिया समृद्ध्यात्यन्तं नम्यमाना विटपाः स्कन्धाश्रिता लताश्च येषु तैर्विटपिभिरुपशुम्भमानानि शोभमानानि रुचिराणि काननानि येषु तेष्वाश्रमायतनेषु वर्षगिरिद्रोणीषु च तथा अमलेषु जलाशयेषु विकचानि विकासीनि विविधानि नवानि च यानि वनरुहाणि नीरजानि तेषामामोदेन मुदितैः राजहंसादिभिर्मधुकरनिकराणां चाकृतिभिर्जातिविशेषैरुपकूजितेषु कामेन कलितैः भ्रूभिनैर्विलासादिभिराकृष्टं मनो दृष्टिश्च येषां ते ॥ १३ ॥

नवस्वपि वर्षेषु ये पुरुषास्तेषां तदनुग्रहाय स चासौ वक्ष्यमाणोऽनुग्रहस्तदर्थमात्मतत्त्वव्यूहेन स्वमूर्तिसमूहेन सन्निधीयते सन्निहितो भवति ॥ १४ ॥

अपरोऽर्वाचीनः पश्चान्नवमस्कन्धे ॥ १५ ॥

भवानी नाथः स्वामिनी येषां तैः स्त्रीगणानामर्बुदसहस्रैरवरुध्यमानः सर्वतः सेव्यमानः आत्मनः प्रकृतिं कारणमात्मानं समाधिध्यानं यस्य तेन रूपेण एतद्वक्ष्यमाणं मन्त्रादिकमभिगृणन् जपन् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथैवालकनन्दासंज्ञा धारा मेरौ ब्रह्मसदनाद्दक्षिणतः स्रवन्ती बहूनि गिरिशिखराण्यतिक्रम्य मध्यस्थपर्वतशिखराणि स्पृष्ट्वैव हेमकूटहिमवत्कूटानि हेमकूटहिमवत्पर्वतयोः शृङ्गाण्यतिरभसतररंहसा विस्फालितवेगेन लुठन्ती भिन्दन्ती भारतं वर्षमभिव्याप्य दक्षिणस्यां दिशि समुद्रमनुप्रविशति अन्ये च नदा नद्यश्च अन्ये चान्याश्चान्ये "पुमान् स्त्रिया" इत्येकशेषः मेर्वादिगिरीणां दुहितरः तत्प्रसूता वर्षे शतशः सन्ति ॥ ९ । १० ॥

तत्रापि जम्बूद्वीपेऽपि भारतं वर्षमेव कर्मक्षेत्रं कर्मणां सुखदुःखनिमित्तानां पुण्यापुण्यरूपाणां क्षेत्रमनुष्ठानस्थानं व्यपदिशन्तीत्युत्तरेणान्वयः अन्यानि त्वष्टौ वर्षाणि स्वर्गिणां पुण्यकर्मणां पुण्यशेषस्य भुक्तावशिष्टस्य पुण्यकर्मण उपभोगस्थानान्यत एव भौमानि स्वर्गपदानि व्यपदिशन्ति न तु तानि पुण्यापुण्यकर्मक्षेत्राणीत्यर्थः तत्र केवलेष्टापूर्तदत्तकर्मकारिणां धूमादिना पितृयानेन पथा चन्द्रमसं गतानां तत्र सुखानुभवक्षीणपुण्यकर्मणां पुनरत्रागमनं श्रुतं "यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते" इति सम्पतन्त्यनेन स्वर्गं लोकमिति संपातः कर्मोच्यते श्रुत्यन्तरं च ।

प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् ।
तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे

इति पुण्यापुण्यकर्मानुष्ठानायेत्यर्थः तत्कथं पुण्यशेषावस्थानं कथं तत्रास्तेषां तद्भोगस्थानत्वम् । उच्यते तावद्भवद्भ्यं भोगावशिष्टानामभुक्तफलानामकृतप्रायश्चित्तानां कर्मणां सद्भावो वक्तव्यः अन्यथेह कर्मनिमित्तस्य जन्मनोऽसम्भवात्पुनरवरोहणानुपपत्तेः तथा च श्रूयते "रमणीयचरणा रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा" इति स्मृतिरपि "वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवित्तसुखमेधसो जन्म प्रतिपद्यन्ते" इति एवं च भुक्तावशिष्टेन पुण्येन कर्मणा निशायावशिष्टभोगार्थं तद्देशोत्पत्तिः सम्भवतीति ॥ ११ ॥

तान्यष्टौ वर्षाणि वर्णयति । येष्विति । यत्र हेति च गद्यद्वयेन । येष्विति भारतभिन्नेषु वर्षेषु पुरुषाणां त्रेतायुगसमः कालो वर्तते सुखोत्कर्षात्त्रेतायुगसाम्यमुक्तं कृतयुगे हि सर्वे ध्याननिष्ठाः द्वापरादौ तु दुःखबहुलाः कथम्भूतानां देवतुल्यानां नागायुतबलानां पुरुषाणामयुतं पुरुषमानेनायुतवर्षाणि येषां वज्रवदृढं संहननं शरीरं तद्वन्तः बलवयोमोदादिकैः प्रमुदितानि यानि महान्ति सौरतानि येषां तानि मिथुनानि तेषां व्यवायापवर्गेऽवभोगावसाने एकवर्षावशिष्टे आयुषि धृत एको गर्भो येषां तादृशानि कलत्राणि येषाम् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यत्र वर्षे देवपतयः देवश्रेष्ठाः स्वैः स्वैः सेवकगणानां नायकैः- विहितमहार्हणाः कृतमहोपचाराः सन्तः स्वैरं विहरन्तीत्यन्वयः एतेषु स्थानेषु सर्वेषु सत्सु कुसुमस्तबकादीनां श्रिया समृद्ध्यात्यन्तं नम्यमानाः प्रह्वीभूताः शाखा लताश्च येषां तैर्विटपिभिर्वृक्षैरुपशोभमानानि रुचिराणि काननानि येषु तेष्वाश्रमायतनेषु गिरिद्रोणीषु च निर्यगन्तरान्तर्भूमिषु नद्यालयेषु जलाशयेषु च विकचानि विविधानि नवानि वनरुहाणि नीरजानि तेषामामोदेन प्रमुदितै राजहंसादिभिर्भृङ्गराणां चाकृतिभिः जातिविशेषैरुपकूजितेषु सत्सु तेषु जलक्रीडायां यैर्विविधा विनोदास्तैः सुललितानामतिसुन्दरीणां सुरस्त्रीणां कामेन कलिलैः क्षुभितैः विलासादिभिराकृष्टं मनो दृष्टिश्च येषाम् एवम्भूताः सन्तः स्वेच्छापूर्वकं विहरन्तीत्यर्थः ॥ १३ ॥

इलावृतादिषु नवस्वपि वर्षेषु भगवान्नारायणः महापुरुषेण तत्तद्वर्षपतिना सेव्यमानः पुरुषाणां तत्तद्वर्षपुरुषाणां वक्ष्यमाणानुग्रहाय पुरुषाननुग्रहीतुमात्मतत्त्वव्यूहेनात्मना विगत ऊहस्तर्कः व्यूह आत्मतत्त्वस्य जीवतत्त्वस्य व्यूहो यस्मिंस्तेन जीवैरेवंवस्तुसजातीयत्वेन विभक्तयितुमशक्येनात्मनेत्यर्थः । यद्वा । आत्मनः स्वात्मनः तत्त्वं तस्य भावस्तत्त्वं कल्याणगुणास्तेषां व्यूहः समूहो यस्य तेनात्मना समस्तकल्याणगुणविशिष्टेनात्मनेत्यर्थः नत्वात्मतत्त्वव्यूहेन सङ्कर्षणादिरूपेणेत्यर्थः हरिवर्षादिपूपास्यानां नरहर्यादिरूपाणां विभवत्वेन व्यूहत्वाभावात् नवस्वपि वर्षेष्वित्यनेन सह विरोधापत्तेः सन्निधीयते सन्निहितो भवतीत्यर्थः ॥ १४ ॥

तत्रेलावृतादिषु क्रमेणोपास्यमानरूपं तदुपासकं चाह । इलावृते वर्षे भगवान् भवो रुद्र एवैकः पुरुषो वसति नापरः पुरुषस्तत्र वसति तत्र हेतुः भवान्याः शापरूपं यन्निमित्तं स्त्रीत्वनिमित्तं तज्जानातीति तथा भवान्याः शापनिमित्तज्ञोऽपरः पुरुषस्तत्र न वसति यदि शापमजानन्नपि तत्र प्रविशति तर्हि स्त्रीत्वमाप्नोतीत्याह । यत्प्रविष्टस्य यत्रेलावृते प्रविष्टस्य स्त्रीभाव आपद्यते तत्र प्रविष्टस्य स्त्रीत्वनिमित्तं शापरूपं पश्चान्नवमस्कन्धे वक्ष्यामीत्यर्थः ॥ १५ ॥

तत्र भवानी रुद्राणी नाथः स्वामिनी ईश्वरी येषां तैः स्त्रीणामर्बुदसहस्रैरवरुध्यमानः सेव्यमानः भवो रुद्रः भवानीनाथ इति पृथक्पदं भवविशेषणं वा अनेन भवानीसामीप्यं विवक्षितम् आत्मनः स्वस्य प्रकृतिं कारणभूतां चतुर्मूर्तेर्वासुदेवादिरूपेणावस्थितस्य भगवतो महापुरुषस्य सङ्कर्षणसंज्ञां तुरीयां मूर्तिरूपामित्यर्थः वासुदेवप्रद्युम्नानिरुद्धसङ्कर्षणक्रमविवक्षया तुरीयामित्युक्तं क्रमानादरणात् तामसीं तमोऽभिमानिनीं तमःशब्देनात्र प्रधानं विवक्षितम् "तम आसीत्तमसा गूढमग्रे प्रकेतम् अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते" इति प्रयोगात् ज्ञानावरणाच्च तमसो नियन्त्रीमित्यर्थः आत्मनि चित्ते समाधिरेव रूपमाकारो यस्य तेन उपायेनेति शेषः सन्निधाप्य साक्षात्कृत्य एतद्वक्ष्यमाणं मन्त्रात्मकं वाक्यमनुगृणन् जपन्नुपधावति स्तौति भज इत्यादिभिरित्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

रभसनवः सम्भ्रमातिशयस्तस्य वेगेनोपर्यधःपाषाणशिखरेषु लुठन्ती स्खलिता परिवर्तमाना ॥ ९ ॥ १० ॥

न[illegible]र-
पापक[illegible]
पुण्यकर्मणा [illegible]नां
स्वर्गप्राप्त्यवशिष्टपुण्यानुभवस्थानानि [illegible]
मानीत्यत्राह । भौमानीति । भूमिसम्ब[illegible]या-
नानि ॥ ११ ॥

येषु वर्षेषु वसतां त्रेतायुगसमः कालो वर्तत इत्यन्वयः । नरवरावरोधे राजयोग्यगृहे मिथुनानां यो व्यवायः ग्राम्यधर्मलक्षणारतिस्तस्यापवर्गे अवसाने धृत एकगर्भो यैस्तानि धृतैकगर्भाणि तानि च कलत्राणि येषां ते धृतैकगर्भकलत्रास्तेषां वज्रवद्दृढं संहननं शरीरं बलं वयश्च मोदश्च साधारणं सुखं प्रमुदितं प्रमोदः विशिष्टसुखं च येषां ते तथा महत्सौरतं निरन्तरसुरतक्रिया तस्यां निरताश्च वज्रसंहननबलवयोमोदप्रमुदिताश्च महासौरतनिरताश्च नरवरावरोधमिथुनव्यवायापवर्गधृतैकगर्भकलत्राश्च ते तथा तेषां बहुगर्भधारणे देहशैथिल्यात् कलत्रलावण्यनाशात् सम्भोगानुपपत्तिभयात्तदवसाने सन्तत्यर्थमेकमेव गर्भं धारयन्तीति किंवदन्ती ॥ १२ ॥

यत्र येषु देवपतयः स्वैरं विहरन्ति किंवेत्यन्वयः । केषु स्थानेष्विति तत्राह । उपशोभमानेत्यादिना । सर्वर्तुसमुद्भूतानां पुष्पस्तबकानां फलानां किसलयानां च श्रिया सम्पदा आनम्यमाना भृशं नमन्त्यो विटपलता येषां ते तथा ते च शाखिविटपिनः भारतखण्डवृक्षविलक्षणा वृक्षा ये तैरुपशोभमानेषु रुचिरेषु काननलक्षणाश्रमेष्वायतनेषु वर्षमर्यादागिरीणां द्रोणीषु पार्श्वद्वयोन्नतमध्यनिम्नलक्षणप्रदेशेषु अमलजलाशयेषु निर्मलसरस्सु विकचानां विविधानां वनरुहाणां पद्मानामामोदजन्यमदेन मुदितैः राजहंसादिभिः भृङ्गाणामाकर्णितैः शब्दैरुपकूजितेषु शब्दितेषु सरोविशेषणमेतत् सुष्ठु शृङ्गारयुतसुरस्त्रीणां कामेन कलिलैर्विलासादिभिराकृष्टा मनोदृष्टयो येषां ते तथा मनांसि च दृष्टयश्च मनोदृष्टयः ॥ १३ ॥

न केवलं नववर्षस्थानां व्यवायादिक्रियया कालयापनमपि तु श्रीनारायणसपर्ययेति भावेनाह । नवस्विति । आत्मनः स्वस्य तत्त्वानामनारोपितरूपाणां व्यूहेन नवसङ्ख्याविशिष्टेन समूहेनात्मना सन्निधायैव पूज्यत इत्यर्थः वर्षस्थैः पुरुषैरिति शेषः ॥ १४ ॥

इलावृते तु विशेषोऽस्तीत्याह । इलावृत इति । तत्रेलावृतमारभ्य नववर्षसन्निहितरूपाणि तदुपासकाश्च क्रमेणोच्यन्त इत्याह । इलावृत इति ॥ १५ ॥

भवानी पार्वती नाथा येषां तानि तथा तैः अवरुध्यमानः परिश्रियमाणः वासुदेवादिचतुर्मूर्तेः तुरीयां चतुर्थीभूतां तामसीं संहारकारणतमोगुणप्रवर्तनीमात्मनः स्वस्य भवस्य प्रकृतिं प्रकृष्टकारणभूतामात्मसमाधिरूपेण मनस एकाग्रताकारणेन उपधावत्युपास्ते ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

नवस्वपीत्यादिना । सर्वेषामवताराणां नित्यप्राकट्यं दर्शितम् । तत्र चात्मनेति । स्वरूपेणैव नतु प्रतिमारूपेणेत्यर्थः । प्रद्युम्नादिभेदे गतिविलासादेरपि वर्णयिष्यमाणत्वात् । भवापि सन्निधीयत इति यथावसरं नित्यमेव ज्ञेयम् ॥ १४ ॥ १५ ॥

तामसीं तमोगुणप्रेरिकां प्रलयहेतुत्वात् ॥ १६ ॥

[illegible] लकनन्दाऽपिदक्षिणेनाऽऽपतति ।

दक्षिणेति [illegible] बहुकूटं गिरिशिखराद्गिरिशिखरे पतन्तीत्यर्थः । भारतमभिवहय पतितेति शेषः । अत्र द्वीपमध्यवर्तीनि [illegible] वर्षाणि उल्लङ्घ्योल्लङ्घ्यापि पतन्ती प्राच्यादिषु चतुर्षु समुद्रसमीपवर्तिष्वेव वर्षेषु कुलाचलादवरुह्य भूमौ यन्निपतति तत् खलु स्वपति समुद्रमभिवहय जलानप्रमुर्णा स्वमीयत्वं परिहरन्ती वेति ज्ञेयम् ॥ ९ ॥ १० ॥

दिव्यभौमबिलभेदात्त्रिविधः स्वर्गः । तत्र भौमस्वर्गस्य पदानि स्थानानि ॥ ११ ॥

अयुतं पुरुषस्य मनुष्यस्य मानेन आयुर्वर्षाणि येषां दृढं संहननं शरीरं तस्मिन् बलवयोमोदाद्यैः प्रमुदितानि यानि महासौरतानि मिथुनानि स्त्रीपुरुषयुगलानि तेषां व्यवायापवर्गे सम्भोगावसाने एकवर्षशेषे आयुषि धृतैकगर्भाणि कलत्राणि येषां तेषाम् । त्रेतायुगसम इति । विषयसुखोत्कर्षात् यतः कृतयुगे हि सर्वे ध्याननिष्ठाः द्वापरादौ दुःखबहुलाः ॥ १२ ॥

यत्र ह देवपतयः स्वैरं विहरन्तीत्यन्वयः । सर्वर्तुष्वेव ऋतुषु कुसुमादीनां श्रिया समृद्ध्या अत्यन्तं नम्यमाना विटपाः येषां तैर्नानाविटपिभिरुपशुम्भमानेषु शोभमानेषु रुचिरकाननादिषु तत्र वर्षगिरयो वर्षस्थानिकरपर्वता राजहंसादिभिर्मधुकरनिकराणां च आकृतिभिर्जातिविशेषैरुपकूजितेषु अधिकरणे निष्ठा पद्मवनाब्जाः ॥ १३ ॥

पुरुषाणां तदनुग्रहाय स चासौ वक्ष्यमाणोऽनुग्रहश्चेति तस्मै तदर्थम् आत्मतत्त्वव्यूहेन स्वमूर्तिसमूहेन सन्निधीयते सन्निहितो भवति । अत्र उपास्यदेवतावर्षेषु भगवन्मूर्तयः प्रायः प्रतिमारूपा एव ज्ञेयाः । आविरासीदित्येवेति प्रह्लादस्योपरिष्टादुक्तेः ॥ १४ ॥

पञ्चाशवमस्कन्धे ॥ १५ ॥

भवानी नाथा येषां तैः अवरुध्यमानः सर्वतः सेव्यमानः तामसीं तमःकार्यभूतस्य संहारस्य प्रवर्तयित्रीं वस्तुतस्तु तुरीयां तमोरजःसत्त्वेभ्योऽपि परां शुद्धाचिन्मूर्तिमित्यर्थः । न यत्र मायेत्यादिना त्रिभिर्विहीनामित्यादिना च तथा प्रतिपाद्यविषयमायात्वात् आत्मनः प्रकृतिमंशित्वात् कारणम् । आत्मनः समाधिध्यानं यत्र येन रूपेण आकारेण ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतिरभसतरंहसा अस्खलितातितरवेगेन लुठन्ती भिन्दन्ती ॥ ९—१० ॥

कर्मक्षेत्रं भोगमोक्षसाधनानुष्ठानस्थानं दिव्यभौमबिलभेदात्त्रिविधः स्वर्गस्तत्र भौमस्वर्गस्य पदानि स्थानानि व्यपदिशन्ति "पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु" इति कोशात् ॥ ११ ॥

एषु अष्टवर्षेषु पुरुषाणामयुतं पुरुषमानेन आयुर्येषां तेषां देवकल्पानां गजायुतबलानां वज्रवत्संहनने दृढे शरीरे ये बलवयोमोदाद्यैः प्रमुदितानि यानि महासौरतमिथुनानि महासम्भोगयुक्तस्त्रीपुरुषयुगलानि तेषां व्यवायापवर्गे सम्भोगान्ते धृत एको गर्भो यैस्तानि कलत्राणि येषां तेषां त्रेतायुगसमः कालो वर्तते विषयसुखाधिक्यात् कृतयुगे पुरुषाणां ध्यानसुखं द्वापरादौ दुःखाधिक्यमतस्त्रेतासमा इत्युक्तम् ॥ १२ ॥

यत्र येषु अष्टवर्षेषु स्वैः स्वैर्गणनायकैर्विहितानि रचितानि महार्हणानि महापूजनानि येषां ते देवपतयः सर्वर्तुषु कुसुमस्तबकादीनां श्रिया समृद्ध्या आनम्यमानाः विटपाः शाखातदाश्रिता लताश्च येषु तैर्विटपिभिः उपशुम्भमानानि शोभमानानि रुचिरकाननानि येषु तेषु आश्रमायतनेषु वर्षगिरिद्रोणीषु च विचित्रविनोदैः स्वैरं विहरन्ति तथैव विविधानि नवानि च वनरुहाणि जलजानि तेषामामोदेन प्रमुदितैः राजहंसादिभिः मधुकरनिकराणां च आकृतिभिर्जातिविशेषैः उपकूजितेषु अमलजलाशयेषु जलक्रीडादिभिश्च स्वैरं विहरन्ति कथम्भूताः सुभ्रूललितानां सुरसुन्दरीणां कामेन कलितैः स्मितविलासादिभिराकृष्टं मनो दृष्टिश्च येषां ते ॥ १३ ॥

पुरुषाणामुपासकानां स चासौ वक्ष्यमाणोऽनुग्रहस्तदर्थम् नवस्वपि वर्षेषु आत्मना स्वत एव कर्मकालयातायातयेत्यर्थः आत्मतत्त्वस्य व्यूहः सङ्कर्षणादिमूर्तिसमूहस्तेन संनिधीयते संनिहितो भवति ॥ १४ ॥

परो भगवान् उपास्यः श्रीमत्सङ्कर्षणः सङ्कर्षणापेक्षया अपरः उपासकरूपः भगवान्- भवः एक एव पुमान् अस्ति अन्यो भवान्याः शापनिमित्तको न निर्विशति पञ्चमस्कन्धे ॥ १५ ॥

अवरुध्यमानः परिसेव्यमानः आत्मनः प्रकृतिं कारणभूताम् तामसीं तमोऽधिष्ठात्रीमात्मानि समाधिध्यानं यस्य तेन रूपेण संनिधाप्य साक्षात्कृत्य एतद्वक्ष्यमाणं मन्त्राक्षरमभिगृणन् जपन् उपधावति स्तौति ॥ १६ ॥

भाषाटीका ।

तैसेही अलक नन्दा ब्रह्मस्थान से दक्षिण की तरफ बहुतसे पर्वत शिखरों को लांघकर हेमकूट में आकर फिर बडे वेगसे हिमालय के शिखरों पर गिरती हुई दक्षिण दिशा में भारतवर्ष के मध्य में होकर समुद्र में प्रवेश करती है जिस अलकनन्दा भागीरथी गंगा में स्नान के पास के वास्ते जानेवाले पुरुष को एक पगमें अश्वमेध राजसूय आदि का फल कुछ दुर्लभ नहीं है ॥ ९ ॥

और भी नद नदी सब वर्षों में बहुत मेरु आदि पर्वतों की पुत्री सैकडों हैं ॥ १० ॥

तिनों भी भारतवर्ष ही कर्म का स्थान है और आठ वर्ष तो स्वर्ग से गिरे जीवों के पुण्य शेष के भोगने के स्थान हैं पृथ्वी के स्वर्ग हैं ऐसा वर्णन किया है ॥ ११ ॥

उन वर्षों में दश हजार वर्ष की पुरुषप्रमाण आयुमवर्ष की आयु वाले पुरुष होते हैं देवतों के तुल्य हैं दश हजार हाथियों के बरोबर बल वाले वज्र सरीखे शरीर वाले यौवन अवस्था आनंद प्रमोद महासौरत वाले जो स्त्री पुरुषों के जोडा तिनके मैथुन करने के अन्तमें एक वर्ष की अवस्था बाकी रहने पर पुत्रको धारणकरने वाली स्त्री होती हैं तहांपर त्रेतायुग के समान काल सदा रहता है ॥ १२ ॥

श्रीभगवानु[illegible]

ॐ नमो भगवते महापुरुषाय सर्वगुणसंख्यानायानन्तायाव्य[illegible]

भजे भजन्यारणपादपङ्कजं भगस्य कृत्स्नस्य परं परायणम् ।
भक्तेष्वलम्भावितभूतभावनं भवापहं त्वा भवभावमीश्वरम् ॥ १८ ॥
न यस्य मायागुणचित्तवृत्तिभिर्निरीक्षतो ह्यण्वपि दृष्टिरज्यते ।
ईशे यथा नोऽजितमन्युरंहसां कस्तं न मन्येत जिगीषुरात्मनः ॥ १९ ॥
असद्दृशो यः प्रतिभाति मायया क्षीबेव मध्वासवताम्रलोचनः ।
न नागवध्वोऽर्हण ईशिरे ह्रिया यत्पादयोः स्पर्शनधर्षितेन्द्रियाः ॥ २० ॥

भाषाटीका ।

जिन वर्षों में सब ऋतुओं में फूलों के गुच्छे फल पत्ता कोमल डालियों की शोभा से झुकी हुई शाखाओं में लिपटी लता वाले वृक्षों से शोभायमान सुन्दर वनवाले स्थानों में नदियों के मर्यादा वाले पर्वतों की कन्दरों में निर्मल जल वाले खिले हुये नाना प्रकार के कमल वाले सरोवरों का जो सुगन्ध जिससे आनन्दित जो राजहंस जलमुरगा कारण्डव सारस चकवाचकवी आदि पक्षि भौंरा आदि शब्द कर रहे हैं उन सरोवरों में जल क्रीडा के करने से नाना प्रकार के विनोदों से सुन्दर मनोहर जो देवस्त्री तिनका जगा हुआ जो कामदेव तिससे उत्पन्न हुई क्रीडा और हासलीला में जो अवलोकन तिससे जिनका मन और दृष्टि मोहित होगई है ऐसे जो देवतों के पति अपने गण देवतों के श्रेष्ठों के द्वारा पूजित होकर इच्छा पूर्वक विहार करते हैं ॥ १३ ॥

सबही वर्षों में भगवान् महापुरुष नारायण भक्तपुरुषों के अनुग्रह के वास्ते आत्मगुण के समूह से मूर्ति धारण करके अभीभी विराजते हैं ॥ १४ ॥

इलावृत में तो भगवान् महादेवजी एकही पुरुष हैं दूसरा नहीं है भवानी के शापका कारण जानकर वहां दूसरा कोई नहीं जाता है जिस स्थानमें प्रवेश होने से स्त्री स्वरूप होजाता है इसका वृतान्त पीछे हम कहेंगे ॥ १५ ॥

पार्वतीजी जिनकी स्वामिनी हैं ऐसी दशहजार से अधिक स्त्रीजनों से सेवित होकर श्रीमहादेवजी चतुर्व्यूह मूर्त्तिवाले भगवान् महापुरुष नारायण की चौथी तामसी मूर्ति महादेव जी की कारणरूप संकर्षण नामक मूर्तिको आत्माकी समाधि लगाकर प्रसन्नकरके आगे के मन्त्रको कहते हुये स्तुति करते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सर्वेषां गुणानां संख्यानं प्रकाशो यस्मात् स्वयं त्वव्यक्तायाप्रमेयाय ॥ १७ ॥

हे भजन्य ! भजनीय त्वां त्वा परेमश्वरं भज इत्यन्वयः अरणं शरणं पादपङ्कजं यस्य कृत्स्नस्य भगस्यैश्वर्यादिषाड्गुण्यस्य परमयनमाश्रयं भक्तेष्वलमत्यर्थं भावितं प्रकटितं भूतभावनं स्वरूपं येन भवापहं संसारहरणं भक्तेष्वित्यनुषङ्गः भवस्भावयतीति तथा तम् अर्थाद्भक्तेष्विति द्रष्टव्यम् ॥ १८ ॥

ईश्वरत्वमुपपादयंस्तामसत्वेन प्रसक्तमनादरं वारयति । न यस्येति । यस्य निरीक्षमाणस्यापि दृष्टिर्मायागुणैर्विषयैश्चित्तवृत्तिभिः कारणैश्चाणवपीषदपि नाज्यते न लिप्यते । किमर्थं निरीक्षमाणस्य ईशे ईशनाय नियमनाय ईशनमीट् सम्पदादित्वात्क्विप् अत्र वैधर्म्ये दृष्टान्तः यथा अजितक्रोधवेगानां नोऽस्माकं दृष्टिरज्यते न तथेति । अत आत्मन इन्द्रियाणि जिगीषुर्जेतुमिच्छुर्मुमुक्षुस्तं को न मन्येत नाद्रियेत ॥ १९ ॥

ननु सुरामदाभ्यां मत्तस्य कुतो दृष्टिर्नाज्यते तत्राह । असती दृष्टिर्यस्य तस्य स्वमायया क्षीबो मत्त इव यो भयङ्करः प्रतिभाति मध्वासवाभ्यां ताम्रलोचन एव च । नागवधूविमोहनेन तथा प्रतिभानं युक्तमित्याह । नेति । यदार्चने यस्य पादयोः स्पर्शनेन धर्षितं मोहितमिन्द्रियं मनो यासां ता ह्रिया लज्जया भुजाद्यर्हणे न ईशिरे न शेकुः कस्तं न मन्येतेति पूर्वेणैवान्वयः ॥ २० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जप्यमन्त्रमाह । ओं नम इति । ओमिति प्रणवो निर्देशः "ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत,, इति वचनात्स्वव्यतिरिक्तं चिदचिदात्मकं सर्वं जगन्नित्यविभूतिं च स्वशेषतया स्वभावेनैव स्वीकृतवत इत्यर्थः भगवत इत्यनेन पूर्णषाड्गुण्यं विवक्षितं महापुरुषायेत्यनेन निखिलजगदुदयविभवलयलीलत्वमभिप्रेतं महापुरुषशब्दस्य "वेदाहमेतं पुरुषं महान्तम" इति पुरुषसूक्तार्थतत्त्वनिश्चायकत्वात् तत्र च तस्माद्विराडजायतेत्यादिना कृत्स्नजगत्कारणत्वप्रतिपादनात् अद्भ्यः सम्भूत इत्यनुवाकोऽप्यत्र प्रत्यभिज्ञायते तत्रापि महापुरुषशब्दश्रवणात् अद्भ्यः सम्भूत इत्यनुवाकस्य हिरण्यगर्भः समवर्तताग्र इत्यनेनाप्यर्थेन महाद्भ्यः सम्भूतब्रह्मा गर्भः इत्यप्यादित्यैकवाक्यत्वप्रतिपादनाद्धिरण्यगर्भादिकारणत्वच्छायानुकारिणामपि वैदिकवाक्यानां महापुरुषपरत्वमवगतं सर्वगुणानां चेतनाचेतनयोरसम्भावितानां जगत्का-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रत्नत्वीपविकानामाश्रयत्वसौकर्यापादकानामाश्रितकार्यापादकादीनां च सत्यत्वसर्वशक्तित्वघात्सल्यसौशील्यसौलभ्यज्ञानशक्तिपूर्तेः प्राप्त्यादीनां सङ्ख्यानं कथनं श्रुतिगणेन यस्मिंस्तस्मै अनेन "सर्वे वेदा यत्पदमामनन्ति" इति श्रुत्यर्थो विवक्षितः सर्वगुणानां सङ्ख्यानं च न परिच्छिन्नत्वेन क्रियते अपि त्वानन्त्येन स्वरूपतो गुणतश्चानन्त्याभिप्रायेणानन्तायेत्युक्तमनेनोपास्यत्वप्राप्यत्वादिकं च विवक्षितम् एवम्भूत तत्प्राप्त्युपायस्तदुपासनं तच्चरणावरणा एव नान्य इति पुरुषसूक्तार्थप्रत्यभिज्ञानादेव स्फोरितस्तत्र "तमेव विद्वानमृत इह भवति नान्यः पन्था" इति वेदनातिरिक्तोपायान्तरनिषेधात् तदेव शब्दतो व्यञ्जयन्नाह । अव्यक्तायेति । व्यक्तैरिन्द्रियादिभिर्न व्यज्यते न गृह्यते इत्यव्यक्तः न चक्षुषा गृह्यते नापि वाचेत्यादिश्रुत्यर्थोऽनुसन्धेयः एवंभूताय नमः नतिर्नमस्कारोऽत्र तत्पूर्वकोपासनोपलक्षकः तदेव नमः मन्त्रस्यैवोपाय इत्यर्थः ॥ १७ ॥

तत्प्रतिरूपान् श्लोकानाह । भज इत्यादिना । ईश्वरं त्वां भज इत्यन्वयः तमीश्वरं विशिनष्टि । भजन्त्यारण्यपादपङ्कजं भजन्यं भजनीयमुपास्यमरण्यं प्राप्यं पादपङ्कजं यस्य तं भनीयर इकारलोप आर्षः भजन्येति पृथक् पदं सम्बुद्ध्यन्तं वा यद्वा भजनं कुर्वाणाः भजनः भजनशब्दात्तद्वान्माचष्टे करोतीति वयन्तात् कृतटिलोपात्कर्तरि क्विप् तान् याति प्राप्नोति तेषां सन्निहितो भवति इति भजन्य इति व्युत्पाद्यते भजन्शब्देनान्ते कर्मण्युपपदे "आतोऽनुपसर्गे कः" ३ । २ । ३ । टिलोपस्य स्थानिवत्वान्न लोपः कृत्स्नस्य समग्रस्य भगस्यैश्वर्यादिवर्गस्य परं केवलं परायणमाश्रयं भक्तेष्वलमत्यर्थं भावितं प्रकटीकृतं भूतभावनं भूतानि भाव्यन्ते उत्पाद्यन्ते येन तत्तथा निखिलभूतकारणं स्वस्य रूपं येनेत्यर्थः यद्वा भूतभावनं भूतानामभ्युदयहेतुं भक्तेषु भवापहं भवनाशनमित्यर्थः भवभावं संसारस्य प्रवर्तकं स्वसङ्कल्पायत्तजीवसम्बन्धिबन्धमोचकमित्यर्थः ॥ १८ ॥

एवमुपास्यत्वप्राप्यत्वप्राप्यत्वपूर्वकमभ्युदयहेतुत्वं बन्धमोक्षकारणत्वादिभिर्धर्मैश्चिदचिद्वैलक्षण्यमुक्तम् । तदेव वैधर्म्यं दृष्टान्तेन विशदयति । न यस्येति । यस्य निरीक्षतः सर्वं स्वतः पश्यतः ईशइति पाठे यन्त मीश्वरस्येत्यर्थः दृष्टिमात्रं मायागुणचित्तवृत्तिभिः प्रकृतिगुणकार्यैरागद्वेषादिचित्तवृत्तिभिरणवप्यल्पमपि नाज्यते नानुविध्यते अजितमन्युरंहसामजितक्रोधवेगानां नोऽस्माकं यथेति वैधर्म्यदृष्टान्तः ईशे इति पाठे ईशा ईशनं नियमनं तस्मै निरीक्षत इत्यन्वयः तमेवंभूतं भगवन्तमात्मन इन्द्रियाणि देहान् वा तदुपलक्षितं संसारं जिगीषुर्जेतुमिच्छुः कोनाम पुमान्नानुमन्येत नाद्रियेत सर्वोऽपि मुमुक्षुस्त्वां सेवत इत्यर्थः ॥ १९ ॥

रागद्वेषादिभिर्वृत्तिभिर्दृष्टिर्नाज्यते इत्युक्तं तत्कथं तामसत्वेन प्रतीयमानस्य रागादेरनुदय इत्याशङ्क्याह । असदृश इति । असद्दृशः अपरमार्थदृष्टेः असति देहे दृष्टिरात्मनोऽभिमानो यस्य तस्येति वा जनस्य माययाविद्ययाज्ञानेन मध्वासवः मादक आसवः मद्यं तेन मध्वासवाभ्यां वा ताम्रे रक्ते लोचने यस्य तथाभूतो यः क्षीबः मत्तः स इवेति प्रतिभाति यो भवान् यो भवान् विवेकी इत्यत्र सन्धिरार्षः परमार्थतस्तु शुद्धसत्त्वमयाप्राकृतस्वेच्छोपात्ताकर्मवश्यकल्याणविग्रह इत्यर्थः अत एव हि नागवध्वो नागानां स्त्रियः नागकन्यकाः यस्य तव पादपद्मयोः स्पर्शनेन धर्षितं व्याकुलितमिन्द्रियं मनो यासां ताः कामाग्निपारवश्या वयं रागादिप्रतिभाः शुद्धसत्त्वमूर्तेः पादौ कथं स्प्रष्टुं प्रभवाम इति धर्षितेन्द्रियाः सत्यः अर्हणां पूजां न ईशिरे न समर्था बभूवुः निःशङ्कं कर्तुमिति शेषः एवंभूतं को नानुमन्येतेति पूर्वेणान्वयः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ज्ञानादिसर्वगुणैः समभेदेन ख्याताय "विज्ञानमानन्दं ब्रह्म" इति श्रुत्यादिषु प्रख्याताय अनन्तायेत्यनेन शेषाख्ये स्थितस्तत्रामा विष्णुस्तेन सह शिवेनोपास्यत इति ध्वनयति तदुक्तम् ।

अनन्तान्तः स्थितो विष्णुरनन्तश्च सहामुना ।
इज्यते गिरिशेनेश इलावृतगतेन तु

इति ननु यदि विष्णुना सह शेषोऽप्युपास्यते शिवेन तर्हि कथं भवापहमित्यादिगुणाः शेषे युज्यन्त इतीयमाशङ्का

जीवरूपापेक्षया चैव तथान्तर्याम्यपेक्षया ।
भिन्नास्तु स्तुतयो ज्ञेया विष्णोरन्यत्र केवलम् ॥

इत्यनेन परिहर्तव्येति ॥ १७ ॥

भजन्यं भजनीय चारुणं च पादपङ्कजं यस्य स तथा तं हे भक्तेष्वलंभावित ! अत्यर्थे ध्यात ! वशीकृतेति वा नित्यतृप्ततया स्थितेति वा भवं संसारमपजहाति त्यजतीति भवापहः नित्यमुक्त इत्यर्थः भक्तसंसारं नाशयतीति वा तं भवस्य पुण्यलक्षणस्य भद्रस्य भव उत्पत्तिः यस्मात्स तथा तं कृत्स्नस्य भगस्य ऐश्वर्यादिगुणसामग्र्याः परम्परायणमत्युत्तमाश्रयं सर्वस्योत्पादकमीश्वरमिति सर्वसमर्थनशीलम् । "स्थेशभासपिसकसोवरच्" ३।२।१७५ इति ताच्छील्यसूत्रात् अनेन शेषान्तर्यामिणो हरेः स्तुतिं ध्वनयति तथाहि भक्तेषु स्वात्संबन्धेषु अलंभावितसंपूर्णानुग्रहलक्षणविलक्षणवृत्तमत्यारब्धदन्तर्यामिणं भज निषेवस्व हे भजन्या-रुणपादपङ्कजम् इलंवर्मीस्तया भजनीयरक्ततलाङ्घ्रिपद्मं कृत्स्नस्य भगस्य सौभाग्यस्य परम्पराया आश्रयमनेन ब्रह्मादिसकलचेतनराशिसमवेतसौभाग्यस्य परम्परायास्तारतम्योपेतायाः अगर्भामित्युक्तं भवति भूतभावनमतीतानागतवर्तमानजगज्जनकं भवति प्रभवत्युत्पद्यत इति भवो जगत्तस्यापहर्तारं संहर्तारं न केवलमुत्पादकं संहर्तारमपीत्यर्थः हरतीणलोपेनापहेतिरूपं साधु शिवं समम् "इः स्मरः प्रोच्यते प्राज्ञैरीर्लक्ष्मी रुद्र उः स्मृतः" इत्यभिधानम् ॥ १८ ॥

ननु जगदुत्पत्तौ वर्तमानस्य हरेः सकलजगदाश्रयत्वं कथं घटते मायागुणसंपर्कगाणीशत्वापत्तेरस्मदादिरिति तत्राह । नेति प्रकृतिगुणनिर्मितशब्दादिषु गतचित्तवृत्तिभिः सर्वं निरीक्षतो यस्य ते दृष्टिस्वरूपज्ञानं मायागुणचित्तवृत्तिभिः प्रकृतिगुणसंपर्कचित्तव्यापारैरणनपीयदपि नाज्यते न लिप्यते दृष्टेर्गुणसंबन्धाभिभवो नास्तीत्यर्थः ईशशब्द एवार्थे तत्र हेतुमाह । ईश इति । 'ईश ऐश्वर्ये' इति धातोर्निरुपपदादपि क्विप्प्रत्ययेन ईडिति शब्दरूपं सिध्यति तेनेश इति षष्ठी ईडुपाद्यपैलपनिवारणे निरतिशयेन समर्थत्वादित्यर्थः अत्र व्यतिरेकदृष्टान्तमाह । यथेति । अजितं मन्युरंहः क्रोधवेगो यैस्तै तथा तेषां नोऽस्माकं ज्ञानं यथा अभिभूयते तथा नाज्यत इत्यर्थः आत्मन इति कर्मणि षष्ठीतिवचनादात्मानं मनो जिगीषुः पुरुषः त्वां न मन्येत श्रोत्रादीन्द्रियेषु सन्निधाय शब्दादिषु प्रयोज्य तज्ज्ञानमुत्पाद्य सुखसंपादनेनात्यन्तोपकारकं त्वां कृतघ्नमन्तरेण स्वमहः को न सेवेत सेवेतैवेत्यर्थः आत्मनः स्वरूपमिति वा । १९ ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सर्वान्तर्यामित्वेनातिनिकटवर्तिनो हरेः स्वरूपज्ञानं सम्यग्ज्ञानिन एव नान्यस्येत्याशयवानाह। असदृशा इति। यो मायया-च्छादकशक्त्यामंदृशः सम्यग्ज्ञानरहितस्य पुंसः वृक्षकोटरजन्यं मधु नारिकेलादिपुष्पजन्य आसवस्तयोरेकतरपानेन ताम्रे लोचने यस्य स तथा दुःशास्त्रश्रवणजनितान्यथाज्ञानलक्षणपरिणामविषयमायामधुरसुरासेवानष्टज्ञानस्य स्वयमपि तादृशः क्षीवेव मत्त इति प्रतिभाति अत्र विभ्रमविपरिणामेनार्थकथनं द्रष्टव्यं मध्वासवनाम्रविलोचनस्य मत्तस्यासंदृशः पुंसो मध्वासवताम्रविलोचनो मत्त इव प्रतिभाति दुष्टेन्द्रियस्य पुंसः स्थाणुः पुरुष इव यथा आभाति तथेति क्षीवेति प्रयोगस्तु छन्दोभङ्गभयाद्वैदिकत्वाद्वा दर्शित इति ज्ञातव्यम्"न संदृशे तिष्ठति रूपमस्य" इति श्रुतेः "त्रिचक्षुर्भवश्चैव केशवं वेदनातेवत,,इति स्मृतेश्च इदानीं हेतुकथनव्याजेन मिश्रस्तुतिमाह। न नागेति। इन्द्रियधर्षणप्रवृत्तिमत्त्वान्मत्तत्वमिति अर्हणां पूजां कर्तुं नेशिरे इत्यन्वयः॥ २०॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

श्रीभावोऽयं दास्यभक्त्योपास्य इत्याह। श्रीभगवानुवाचेति। सङ्कर्षणस्यैव प्रथमपुरुषत्वात्। तद्रूपेणैव स्तौति। ओं नम इति॥ १७॥

भक्तेषु निमित्तेषु अलमत्यर्थम्। भावितं कृतं भूतानां भावनं जननं पालनं वा येन तम्॥ १८॥ १९॥

तत्र पातालस्थसङ्कर्षणो सन्दिह्य सिद्धान्तयति। असदिति। वस्तुतस्तु क्षीवत्वादिकं न सुरामधाभ्याम्‌ नागपत्नीषु भयङ्करत्वेनास्फूर्तेर्रूपकतया सावधानत्वेन स्फूर्तेश्च। किन्तु नित्यानन्दविशेषेणैव तासां प्रेममोहादित्याह। न नागवध्व इति॥२०॥२१॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सर्वेषां गुणानां सङ्ख्यानं प्रकाशो यस्मात्तस्मै स्वयन्तु अव्यक्ताय अप्रमेयाय॥ १७॥

नितरामासन्नमेव शरणं शरणं पादपङ्कजं यस्य तं भजे भजे इति हर्षात् द्विरुक्तम्। भगस्य षडैश्वर्यस्य। भक्तेषु अलमलङ्कारवद्वर्त्तमानम्। भावितः सृष्टः ध्यानं कारितो वा भूतभावनो ब्रह्मा येन तं त्वा त्वां भवस्य मत्कर्त्तृकदास्यस्य भावः प्रेमा यत्र तम्॥ १८॥

अचिन्त्यमैश्वर्यं निरूपयति। न यस्येति। निरीक्षमाणस्यापि यस्य दृग्मिर्मायागुणवृत्तिभिर्मायागुणरूपाभिरिन्द्रियवृत्तिभिर्विषयैर्नाञ्ज्यते न लिप्यते। किमर्थं निरीक्षमाणस्य ईशे ऐश्वर्याय ईशनमीट् सम्पदादित्वात् भावे क्विप् तस्मै वैधर्म्ये दृष्टान्तः यथा अजितक्रोधेन्द्रियाणामस्माकं दृष्टिरज्यते न तथेति। आत्मनो जिगीषुरन्तःकरणानि वशीकर्तुमिच्छुः कस्तं न मन्येत नाद्रियेत॥ १९॥

ननु मदिरामत्तस्य कुतो दृष्टिर्नाञ्ज्यते तत्राह। असद्दृशः कुबुद्धीन् प्रति यो मायया क्षीव मत्त इव भाति। यथान्धः क्षीवा मध्वासवाभ्यां ताम्रलोचनः विवेकहीनो भवति तथैवेत्यर्थः। वस्तुतस्तु भवान् तथाभूतः किन्तु नित्यानन्दसद्विवेक इति भावः। सौन्दर्येण नारीगणमोहनतामाह। अर्हणे चरणपूजायां न

ईशिरे न शेकुः स्पर्शक्षुभितेन्द्रियाः ह्रियेति ह्रियमाकमन्तःक्षोभं सर्वज्ञत्वादयं जानातीत्यतः सम्प्रति कथं सेवेमहीति भावः॥२०॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

जप्यं मन्त्रमाह। ओमिति। सर्वेषां गुणानां सङ्ख्यानं यः सर्वज्ञ इत्यादिवेदकर्त्तृकं कथनं यस्मिन् तस्मै॥ १७॥

स्तोत्रं दर्शयति। भजे इति। हे भजनीय! शरणं शरणं पादपङ्कजं यस्य तम्। भगस्यैश्वर्यादिषाड्गुण्यस्य परमुत्कृष्टमयनमाश्रयम्। भावितम् आविष्कृतं भूतभावनं भूतकारणं रूपं येन तम्। भवापहं संसारघ्नम्। भवं मां भावयति उत्पादयतीति तं त्वा त्वां भजे॥ १८॥

यथा नो मीलितनेत्राणामप्यस्माकं मायागुणेषु विषयेषु याभिश्चक्षुरादिवृत्तिभिः दृष्टिः अज्यते तत्र हेतुः अजितमन्युरंहसामिति। तथा यस्य तव भगवतस्तु ईशे ईशनाय जननियमनाय निरीक्षतोऽपि मायया ईषदपि दृष्टिर्नाज्यते न लिप्यते तत्र हेतुः आत्मनः सर्वात्मन इति तं त्वां जिगीषुः संसारं जेतुमिच्छुः को न मन्येत उपास्यतया को नाद्रियेत॥ १९॥

अज्ञस्य तु रागादियुक्त एव भवान्भातीत्याह। असदृशा इति। असती स्वस्वरूपगुणादिज्ञानरहिता दृष्टिर्यस्य तस्य जनस्य मायया अविद्यया मध्वासवाभ्यां ताम्रे लोचने यस्य तथाभूतः क्षीवो मत्त इव यो भाति स्वभावत एवायमेवंविधाद्भुतरूप इत्यसदृक् न जानातीत्यर्थः। अत एव तथाविधं भगवतो रूपं सूचयति। नागवध्वः यस्य पादयोः स्पर्शनेन धर्षितमिन्द्रियं मनो यासां ताः ह्रिया लज्जया भुजाद्यर्हणे न ईशिरे न समर्था बभूवुः तं को न मन्येत इति पूर्वेणान्वयः॥ २०॥

भाषाटीका

भगवान् महादेवजी बोले महापुरुष सर्व गुणों के प्रकाश करने वाले अनन्त अव्यक्त भगवान् के अर्थ नमस्कार है॥१७॥ आपका चरण कमल भजने वालों का रक्षक है आप भजने के योग्य हो ऐश्वर्यादि छैगुणों के आप आश्रय हो भक्तों के वास्ते अतिशय करके आपने स्वरूप प्रकट किया है आप संसार के छुड़ाने वाले हो जगत्‌के पालने वाले हो ऐसे आपको हम भजते हैं॥ १८॥

मायाके गुण जिसकी दृष्टिसे देखतेभी जिनकी अणुमात्र दृष्टि लिप्त नहीं होय है जैसे हमलोग क्रोध के वेगको जीतने की सामर्थ्य नहीं रखते इस कारण हमको इस संसार सागर से बचना कठिन है आपही अपनी आत्माको जीतकर वशमें रखते हैं इस कारण जो अपनी आत्माको जीतकर मोक्ष की इच्छा करतो वह कौन पुरुष आपका भजन न करे अर्थात् आपही का करे॥ १९॥

अज्ञानी पुरुषों को आप मदमत्त के समान भयदायक मदिरा और आसव से लाल नेत्र किये मायाद्वारा प्रतीत होते हो कारण कि आपके चरणारविन्द के स्पर्श करने से कम्पर्पके वश

यमाहुरस्य स्थितिजन्मसंयमं त्रिभिर्विहीनं यमनन्तमृषयः।
न वेद सिद्धार्थमिव क्वचित्स्थितं भूमण्डलं मूर्द्धसहस्रधामसु ॥ २१ ॥
यस्याद्य आसीद्गुणविग्रहो महान्विज्ञानधिष्ण्यो भगवानजः किल।
यत्सम्भवोऽहं त्रिवृता स्वतेजसा वैकारिकं तामसमैन्द्रियं सृजे ॥ २२ ॥
एते वयं यस्य वशे महात्मनः स्थिताः शकुन्ता इव सूत्रयन्त्रिताः।
महानहं वैकृततामसेन्द्रियाः सृजाम सर्वे यदनुग्रहादिदम् ॥ २३ ॥
यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनोऽयं गुणसर्गमोहितः।
न वेद निस्तारणयोगमञ्जसा तस्मै नमस्ते विलयोदयात्मने ॥ २४ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां सङ्कर्षणस्तोत्रकथनं नाम
सप्तदशोऽध्यायः ॥ १७ ॥

भाषाटीका।

होने से लज्जित होकर नागोंकी स्त्रियां आपके पूजन में भी असमर्थ होजाती हैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अस्य विश्वस्य स्थितिजन्मसंयमहेतुं यमाहुः। अत एव त्रिभिः स्थित्यादिभिर्विहीनमनन्तं च यमाहुः। ऋषयो मन्त्राः छन्दोऽनुरोधेन दीर्घपाठे ऋकारो देवमाता लक्ष्मीः सा च ऋषयश्चेत्यर्थः। अनन्तत्वं दर्शयति। मूर्द्धसहस्रमेव धामानि स्थानानि तेषु क्वचिदेकदेशस्थितं भूमण्डलं यो न वेद। सिद्धार्थं सर्षपमिव। तस्मै नम इति चतुर्थेनान्वयः ॥ २१ ॥

तत्र जन्महेतुत्वं महदादिद्वारेण प्रपञ्चयति। यस्य गुणनिमित्तो महान्नाम विग्रह आसीत्। विज्ञानं सत्त्वं धिष्ण्यमाश्रयो यस्य सः तस्य चित्तरूपत्वेन सत्त्वप्रधानत्वात्। स एव किलाधिदैवो वासुदेवाभेदविवक्षया भगवानजो ब्रह्मा। यत्सम्भवो यस्माद्ब्रह्मणः सम्भूतोऽहं रुद्रः। त्रिवृता त्रिगुणेन स्वतेजसा स्वविभूतिरूपेण ऽहङ्कारेण वैकारिकं देवतावर्गं तामसं भूतवर्गमैन्द्रियमिन्द्रियवर्गं च सृजे सृजामि ॥ २२ ॥

किञ्च एते वयं महदादयः सर्वे यस्यानुग्रहादिदं ब्रह्माण्डं सृजामः। कथम्भूताः। यस्य महात्मनो वशे स्थिताः सन्तः यतः सूत्रेण क्रियाशक्त्या यन्त्रिताः प्रोताः शकुन्ताः पक्षिण इव लौकिकेन सूत्रेण वयमित्युक्तं तानेवाह। महानहङ्कारश्च वैकृतादयः पूर्वोक्ताः वर्गाश्च ॥ २३ ॥

स्थितिजन्महेतुत्वं दर्शयन्प्रणमति। येन निर्मितामेतां मायामेवायं जनोऽञ्जसा वेद न तु तन्निस्तारणयोगमुपायं कर्हिचिदपि वेदेति स्थितिहेतुत्वं दर्शितम्। कीदृशीं कर्माण्येव पर्वाणि अन्ययस्थानानि तर्याति ज्ञापयतीति तथा ताम्। प्रलयहेतुत्वमाह। विलीयतेऽस्मिन्निति विलयः उदेत्यस्मादित्युदयः विलयश्चोदयश्च आत्मा स्वरूपं यस्य तस्मै नमः ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

पुनरैश्वर्यमेव व्यञ्जयन्नाह। यमिति चतुर्भिः। अस्य चिदचिन्मिश्रस्य जगतः स्थितिजन्मसंयमं स्थित्युत्पत्तिसंहारकारणम् ऋषयो वेदान्ता यमाहुः ऋषय इति दीर्घ आर्षः कारणत्वेऽपि त्रिभिर्गुणैः सत्त्वादिभिर्विहीनं त्रैगुण्यापरवशमनन्तं स्वरूपतः स्वभावतश्च देशकालवस्त्वपरिच्छिन्नमाहुः "स देव सोम्येदमग्र आसीदेकमेवाद्वितीयम् अस्थूलमनण्वह्रस्वं सत्यं ज्ञानमनन्तम्" इत्यादयः श्रुतयोऽत्र ऋषिशब्दविवक्षिताः अनन्तत्वमेवाह। यो मूर्द्धभूतानि सहस्रसंख्याकानि धामानि फणारूपाणि तेषु मध्ये क्वचित् सिद्धार्थमिव सर्षपमिव स्थितं भूमण्डलं न वेद भारत्वेन नानुसन्धत्ते न जानाति वा यच्छब्दानां कस्तं न मन्येतेति पूर्वेणान्वयः ॥ २१ ॥

यस्येति। अपादानस्य सम्बन्धमात्रविवक्षया षष्ठी यस्मात् महाशरीरेषु महत्त्वाभिमानी विज्ञानधिष्ण्यः जगन्निर्माणाद्युपयुक्तज्ञानाश्रयः गुणविग्रहः रजःप्रचुरविग्रहः आद्यः कल्पाद्यपेक्षया आदौ जातः भगवानजो ब्रह्मा आसीत् यत्सम्भवः यस्माद्ब्रह्मणः सकाशात्सम्भवोऽहं रुद्रः किमर्थं त्रिवृता त्रिविधाहङ्कारेण अभ्यधनेन वसतीनिषत फलस्यैव हेतुत्वविवक्षया तृतीया देहेषु त्रिविधाहङ्कारप्रवृत्त्यर्थं जातोऽहमित्यर्थः स्वतेजसा स्वस्य तेजसा स्वस्वात्मना अहङ्कारप्रवर्तनोपयुक्तेन ज्ञानेन वैकारिकं सात्त्विकं तामसमैन्द्रियकं राजसं सृजे देहेषु त्रिविधाहङ्कारं प्रवर्तयामीत्यर्थः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एत इति महान्महत्तत्त्वम् अहमहङ्कारस्तत्त्रिधाभेदमाह वैकृततामसैन्द्रियाः सात्त्विकाहङ्कारो वैकृतः तामसो भूतादिः ऐन्द्रियो राजसः सर्वे ब्रह्मादयो वयं यस्य महात्मनो भगवतो वशे सूत्रे रज्वां यन्त्रिताः बद्धाः शकुन्ता इव सन्तो यस्य भगवतोऽनुग्रहादिदं ब्रह्माण्डं तदन्तर्वर्तिवस्तुजातं च व्यष्टिसमष्ट्यात्मकं यथायथं सृजामः ॥ २३ ॥

एवं सर्वजगत्कारणत्वसत्यज्ञानानन्तत्वसर्वान्तरत्वसर्वाधिपतित्वादिगुणविशिष्टं स्तुत्वा "प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः" इति बन्धमोक्षहेतुत्वेन स्तुवन्नमस्करोति । यन्निर्मितामिति । येन भगवता निर्मितां कर्मपर्वणीं कर्माख्यग्रन्थिमतीं मायां प्रकृतिं गुणमयसर्गेण गुणपरिणामात्मकदेहेन्द्रियादिसम्बन्धेन मोहितः स्वात्मपरमात्मयाथात्म्यज्ञानरहितोऽब्रह्मात्मकत्वस्वतन्त्रात्मत्वादिभ्रमयुक्तो जनो जन्ममरणादिकसांसारिकधर्मभाक् जीवः न वेद मायास्वरूपमेव न वेद किं तन्निस्तारणोपायं न वेदेति वक्तव्यमित्याह । तन्निस्तारणयोगं मायानिस्तारणोपायमञ्जसा सुखेन न वेद तस्मै तद्विलयोदयात्मने तद्विलयः प्रकृतिसंबन्धविलयस्तदुदयः प्रकृतिसंबन्धः तदुभयापादनोपयुक्तमात्मज्ञानं यस्य तस्मै नम इति ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीं भगवद्विज्ञानाय तल्लक्षणान्याह । यमाहुरिति । यस्य जगतः स्थितिजन्मसंयमकारणं यतस्तज्ज्ञाने स्थित्यादीनि लक्षणानि इति ज्ञातव्यं स्वयमेतद्यथावत्कथनेन तल्लक्षणे ज्ञेय इत्यत उक्तम् । त्रिभिरिति । त्रिभिः स्थित्यादिभिर्विहीनं विरहितं जाग्रदाद्यवस्थाविशेषैर्वा कालत्रये अपरिच्छिन्नमहिमत्वाद्युक्तभावेनाह । अनन्तमिति । तदपि कथमत उक्तमीश्वरमिति ईश्वरत्वं विशदयति । न वेदेति । य इत्यध्याहृत्यान्वेतव्यं मूर्धसहस्रधामसु मध्ये कस्मिंश्चिदेकस्मिन्मूर्धनि सिद्धार्थं सर्षपमिव स्थितं भूमण्डलं न वेद गुरुत्वाभावादित्यन्वयः लाघवात्तद्गरिमाणं न जानातीत्यनेनान्तःस्थितानन्तनाम्नो हरेर्महिम्ना शेषस्यापि भूमण्डलधृतिसामर्थ्यमिति ज्ञातव्यम् ॥ २१ ॥

पूर्वोक्तसृष्टेः क्रममाह । यस्येति । यस्य तव सकाशात् अजो ब्रह्माद्यः सृज्यपदार्थानामाविर्भूत आसीत् प्रकृतिसृज्यवस्तुषु महत्तत्त्वस्यादित्वात्तदभिमानित्वेन ब्रह्मणा आदित्वं युक्तमिति भावेनोक्तम् । महानिति । निर्देहस्याभिमानित्वं कथमित्यत उक्तं गुणविग्रह इति । रजोगुणेन निर्मितो विग्रहो यस्य स तथा देहित्वेऽपि ज्ञानलोपोऽस्य नास्तीत्यभिप्रेत्याह । विज्ञानेति । विज्ञानस्य धिष्ण्यं निधानस्थानं धिष्ण्य इति पाठे विज्ञानमेव स्वरूपं यस्य स तथेत्यर्थः महत्तत्त्वस्य सृष्ट्या सृष्टिक्रमः कथं ज्ञायत इत्यत उक्तं यत्संभव इति । यस्मान्महत्तत्त्वात्संभवो यस्य स तथा अहं त्रिवृता वैकारिकादिभेदेन त्रिधा वर्तमानेन स्वतेजसा स्वरूपमहिम्ना वैकारिकादिकं तदभिमानिदेवादिकं च सृज इत्यन्वयः ॥ २२ ॥

अस्मत्सर्जनञ्च श्रीनारायणानुग्रहेण न स्वातन्त्र्येणेत्याह । एत इति । वयमिति के इति तत्राह । महानिति । अहंप्रभृतय इत्यर्थः सूत्रयन्त्रिताः सूत्रबद्धाः शकुन्ताः पक्षिणः वैकृता वैकारिकदेवाः तामसाः पञ्चभूतदेवाः ऐन्द्रिया इन्द्रियाभिमानिनो देवाः शब्दाद्यभिमानिदेवताश्च ॥ २३ ॥

व्यतिरेकमुखेन संसारतरणोपायमाह । यन्निर्मितामिति । अयं जनो येन भवता जनं मोहयिष्यतीति विनिर्मितां कल्पितां कर्मपर्वणीं विहितनिषिद्धलक्षणानि कर्माणि पर्वाणि यस्याः सा तथा तां मायां बन्धकशक्तिमासाद्य कदापि कदापि मायाया निस्तारणोपायमञ्जसा न वेद तत्र किं कारणमिति तत्राह । गुणैरिति । गुणेन सर्गो येषां ते गुणसर्गाः शब्दादिविषयास्तैर्मोहितः शब्दादिनिमित्तान्यथाज्ञानं कारणमित्यर्थः अनेन तत्कर्तृज्ञानपूर्वकं तज्ज्ञानं संसारतरणोपाय इति ध्वनितमिति इदमेव भगवत्प्रीतिकरं सर्वसाधारणमयत्नसाध्यं साधनमिति भावेनोपसंहरति । तस्मा इति । तद्विलयोदयात्मने तस्या मायाया निवर्तकज्ञानस्वरूपाय अनेन प्रणतिप्रसन्नश्रीनारायणस्वरूपज्ञानं मायानिवर्तकमिति सूचितमतो मुमुक्षुणा तज्ज्ञानमापाद्यमिति भावः ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
सप्तदशोऽध्यायः १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

महान् महत्तत्त्वं चित्ताख्यं गुणमयो विग्रहोऽधिष्ठानं स एव विज्ञानधिष्ण्यः बुद्धिरूपः स एव किल क्रमेण भेदविवक्षया भगवान् वासुदेवः अजो ब्रह्मा च । सृजे सर्गोपयोगितां प्राप्नोमीत्यर्थः । अग्निरन्नं पचतीतिवन्मत्कर्तृकमिति भावः । २२-२४ ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
सप्तदशोऽध्यायः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

जगत्कारणत्वमाह । यमिति । स्थित्यादिहेतुम् अथ च त्रिभिर्गुणैर्हीनमत एव तत्त्वज्ञानादनन्तं न वेदेति य इति शेषः ऋषयः "ऋकारो देवमाता स्यात्" इत्यभिधानात् देवमातरश्च ऋषयश्च ते सिद्धार्थं सर्षपमिव क्वचित् कस्मिंश्चिन्मूर्ध्नि एकदेशे स्थितमिति यद्यपि चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटियोजनप्रमाणस्य भूमण्डलस्य अधस्तादेव स्थितत्वात् तस्मात् सकाशात् तन्मूर्ध्नां तावद्विस्ताराधिक्यं न युज्यते । तदपि तत्र गतैर्जनैस्तच्छ्रीयाचिन्त्यशक्त्यैव तन्मूर्ध्नो प्रमाणापरिच्छेद्यत्वं भूमण्डलस्य च सर्षपमात्रत्वं दृश्यते तच्च वास्तवमेव न तु मायिकमित्येतदप्येकमद्भुतमनन्तस्येति तथोक्तम् ॥ २१ ॥

तत्र स्वजन्महेतुत्वं महदादिद्वारेण प्रपञ्चयति । यस्याद्यः प्रथमो गुणमयविग्रहो महान् महत्तत्त्वनामा तेन सङ्कर्षणः स्वयन्तु,

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

गुणात्मनि विग्रह इत्यर्थः। विज्ञानं सत्त्वं धिष्ण्यमाश्रयो यस्य स एवांशो ब्रह्मा यत्सम्भवो यद्रूपश्चाऽहमहङ्कारात्मको द्वितीयो रुद्रः त्रिवृता सत्त्वादिवृत्तित्रयेण स्वतेजसा स्वशक्त्यैवाहं वैकारिकं देवसर्गं तामसं भूतवर्गमैन्द्रियमिन्द्रियवर्गञ्च सृजामि ॥ २२ ॥

सर्वनियन्तृत्वमाह। यत इति। सूत्रयन्त्रिताः सूत्रप्रोताः शकुन्ताः पक्षिणः शाकुनिकाधीना इवेत्यर्थः। वयमेव के तानाह। महानिति। वैकृतत्रयः पूर्वोक्ता वर्गाः ॥ २३ ॥

दुर्ज्ञेयत्वं कैमुत्येनाह। येन निर्मितां प्रापितां मायामेवायं जनो न वेद किमुत त्वां कर्मपर्वणीं कर्मग्रन्थिप्रणीतां तस्या अञ्जसा ऽऽऽऽयेण निस्तारणोपायं भक्तियोगं च न वेद तस्या मायाया विलयो भक्तेषु उदयस्त्वभक्तेषु यतः तस्मै आत्मने परमात्मने ॥ २४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
पञ्चमेऽयं सप्तदशः सङ्गतः सङ्गतः सताम् ॥ १७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सर्वहेतुत्वेन सर्वात्मत्वं दर्शयति। अस्येति। अस्य चिदचिदात्मकस्य विश्वस्य स्थित्यादि यस्मात्तं तथा तमाहुः। त्रिभिः। स्थित्यादिभिर्विहीनमनन्तं कालाद्यपरिच्छिन्नं चाहुः ऋषय इति दीर्घश्छन्दोऽनुरोधात् मूर्द्धसहस्रमेव धामानि स्थानानि तेषु कचिदेकत्र स्थितं भूमण्डलं सिद्धार्थं सर्षपमिव यो न वेद तं को न मन्येतेति पूर्वेणैवान्वयः ॥ २१ ॥

विश्वहेतुत्वेन स्तुत्वा ब्रह्मादिजनकत्वादिना भगवन्तं स्तुवन् ब्रह्मादीनां भगवज्जन्यत्वं तदधीनत्वं तन्मायामोहितत्वं च दर्शयन् नमस्करोति। यस्येति त्रिभिः। यस्येति पञ्चकमर्थे षष्ठी यस्मात् आद्यः अस्मदादिभ्यः पूर्वः अजः ब्रह्मा आसीत् कथम्भूतः गुणविग्रहः रजोगुणप्रधानशरीरः महान् महत्तत्त्वरूपः बुद्ध्यधिष्ठातुर्ब्रह्मणो बुद्धिकारणेन महत्त्वेन सहाभेदोक्तिः। विज्ञायते अनेनेति विज्ञानं शब्दब्रह्म धिष्ण्यमाश्रयो यस्य सः यत्सम्भवः यस्माज्जात सम्भूतः अहङ्काररूपः रुद्रः अन्तःकरणभेदरूपाहङ्काराधिष्ठातुः रुद्रस्यान्तःकरणभेदरूपाहङ्कारकारणेन सहाभेदोक्तिः। त्रिवृता त्रिगुणेन तेजसा स्वविभूतिरूपेण वैकारिकं देवतावर्गं तामसं भूतवर्गम्। ऐन्द्रियकमिन्द्रियवर्गम् सर्गं सृजामि तस्मै ते नम इत्यग्रिमेण सम्बन्धः ॥ २२ ॥

तथाच महान् अस्मत्पिता ब्रह्मा अहं च सर्वे ब्रह्मपुत्राः मरुद्गणाश्च वैकृतादयः एते वयं यस्य वशे स्थिताः इदं यथावत् सृजामः तस्मै ते नमः ॥ २३ ॥

गुणसर्गेण मायागुणकार्येण देहगेहादिना मोहितः जनः कर्माणयेव पर्वाणि ग्रन्थयस्तानि तयमीति तथा तां येन निर्मितां देहेन्द्रियादिरूपेण रचितां मायां तन्निस्तारणयोगं च कश्चिदपि न वेद यदनुग्रहं विना न जानातीत्यर्थः तस्मै ते विलीयते अस्मिन्निति विलयः विश्वप्रवेशस्थानम्। उदेत्यस्मादित्युदयः विश्वनिर्गमनस्थानं स च स च तथा तस्य प्रकृत्यादेः कारणभूतस्य आत्मा कारणं तस्मै ते नमः ॥ २४ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
सप्तदशाध्यायार्थप्रकाशः ॥ १७ ॥

भाषाटीका।

श्रुति और वेदमन्त्र या विश्व की उत्पत्ति पालन नाश करने वाले आपको अनन्त और उत्पत्ति पालन प्रलय से रहित कहते हैं सहस्रों मस्तकों में से किसी एक मस्तक पर सरसों के समान आप भूमण्डल को धारण करते हैं और उसके बोझको कुछ नहीं जानते हैं ऐसे आपके निमित्त नमस्कार है ॥ २१ ॥

जिनके आद्य सत्त्वगुणी महाविज्ञानरूप से वासुदेव होते भये उन से भगवान् ब्रह्मा भये जिनसे हम रुद्र भये हैं मैं त्रिगुणात्मक अहंकार से देवता पञ्च महाभूत और इन्द्रियवर्ग को प्रकट करता हूं ॥ २२ ॥

जैसे कि विहङ्ग रस्सी से बंधकर पराये वश में होजाते हैं इसी प्रकार आपके वश में होकर यह हम सब महत्तत्त्व देवताभूत और इन्द्रियगण होरहे हैं जिनके अनुग्रह से हम सब ब्रह्माण्ड को सृजते हैं और आपको सृजने वाले कहते हैं ॥ २३ ॥

जिनकी कोइई कर्मों की पर्व रूप धारिणी माया के गुण सर्गों से मोहित होय ये जन अनायास से निस्तारण योग को नहीं जानते ऐसे उत्पत्ति पालन नाश कर्त्ता भगवान् के अर्थ नमस्कार है ॥ २४ ॥

इति श्रीभागवत पञ्चमस्कन्ध सतरहवां अध्यायका
भाषानुवाद ब्रह्मण्याचार्यकृत समाप्त ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे सप्तदशोऽध्यायः समाप्तः ॥ १७ ॥

———○:०:○———

॥ अष्टादशोऽध्यायः ॥

———:०:———

श्रीशुक उवाच।

तथा च भद्रश्रवा नाम धर्मसुतस्तत्कुलपतयः पुरुषा भद्राश्ववर्षे साक्षाद्भगवतो वासुदेवस्य प्रियां तनूं धर्ममयीं हयशीर्षाभिधानां परमेण समाधिना सन्निधाप्येदमभिगृणन्त उपधावन्ति ॥ १ ॥

॥ भद्रश्रवस ऊचुः ॥

ओं नमो भगवते धर्मायात्मविशोधनाय नम इति ॥ २ ॥

अहो विचित्रं भगवद्विचेष्टितं घ्नन्तं जनोऽयं हि मिषन्न पश्यति।
ध्यायन्न सद्यर्हि विकर्म सेवितुं निर्हृत्य पुत्रं पितरं जिजीविषति ॥ ३ ॥
वदन्ति विश्वं कवयः स्म नश्वरं पश्यन्ति चाध्यात्मविदो विपश्चितः।
तथापि मुह्यन्ति तवाज! मायया सुविस्मितं कृत्यमजं नतोऽस्मि तम् ॥ ४ ॥
विश्वोद्भवस्थाननिरोधकर्म ते ह्यकर्तुरङ्गीकृतमप्यपावृतः।
युक्तं न चित्रं त्वयि कार्यकारणे सर्वात्मनि व्यतिरिक्ते च वस्तुतः ॥ ५ ॥
वेदान् युगान्ते तमसा तिरस्कृतान् रसातलाद्यो नृतुरङ्गविग्रहः।
प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्ते वितथेहिताय ते इति ॥ ६ ॥

हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्ते इदं चोदाहरति ॥ ७ ॥

ओं नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख! वज्रदंष्ट्र! कर्माशयान् रन्धय रन्धय तमो ग्रस ग्रस ओं स्वाहा अभयमभयमात्मनि भूयिष्ठा ओंक्ष्रौम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अष्टादशे ततो मेरोः पूर्वादिक्रमतस्त्रिषु।
त्रिषु चोत्तरवर्षेषु सेव्यसेवकवर्णनम् ॥ १ ॥

भद्रश्रवा वर्षपतिः तस्य कुलपतयः सेवकमुख्याश्च ॥ १ ॥

भद्रश्रवस ऊचुरिति। प्राग्भूत उपधावन्तीति लक्षणया तद्योगाद्गणेषु लिङ्गसमवायन्यायेन बहुवचनम् ॥ २ ॥

अयं जनो मिषन्नपि पश्यन्नपि घ्नन्तं हिंसन्तं न पश्यति नालोचयतीति भगवद्विचेष्टितमेव तच्च विचित्रम्। अदर्शने लिङ्गम्। पुत्रं बालं पितरं वृद्धं मृतं निर्हृत्य दग्ध्वा स्वयं तदुभयधर्मैर्जिजीविषति जीवितुमिच्छति। पाठान्तरे तु छन्दःसामञ्जस्यम्। किं धर्माद्यर्थम् न यर्हि यतोऽसत्सुखं विषयसुखं सेवितुं विकर्म पापमेव ध्यायन् ॥ ३ ॥

नन्वविद्वांस पश्यन्ति किमत्र चित्रं तत्राह। नश्वरं वदन्ति स्म शास्त्रतः पश्यन्ति च समाधौ। हे अज! तथापि मायया मुह्यन्ति एतच्च तव कृत्यं चेष्टितं सुविस्मितमतिचित्रमतः शास्त्रादिश्रमं विहाय तं त्वामजं नतोऽस्मि ॥ ४ ॥

इदमपरं चित्रवत्प्रतीयमानमपि त्वयि न चित्रमित्याह। विश्वोद्भवादिकर्माकर्तुरप्यपगता आवृतावरणा यस्मात्तस्य तथाभूतस्यापि तेऽङ्गीकृतं वेदैः। त्वयि तन्न चित्रम्। यतो मायया सर्वात्मनि कार्यस्य कारणे त्वयि कर्म युक्तम्। वस्तुतः सर्वव्यतिरिक्ते निरुपाधावनावृतत्वमकर्तृत्वं च युक्तम् ॥ ५ ॥

परमेश्वरत्वेन स्तुत्वा प्रस्तुतावतारचरितमाह। वेदानिति। तमसा दैत्यरूपेण तिरस्कृतानपनीतान् यो नृ च तुरङ्गश्च नृतुरङ्गौ तद्रूपो विग्रहो यस्य कवये ब्रह्मणे तदर्थमर्थितवते हिताय सत्यसङ्कल्पाय ॥ ६ ॥

उत्तरत्र प्रह्लादचरित्रे महापुरुषस्य गुणानां भाजन आश्रयः दैत्यदानवकुलस्य तीर्थीकरणं शीलमाचरितं च यस्य फल-

श्रीधरस्वामिकृतभावार्थदीपिका ।

रूपेण व्यवधानशून्यश्चासावनन्यश्चाव्यभिचारी यो भक्तियोगस्तेनोपास्ते सेवते ॥ ७ ॥

तेजसामपि तेजसे आविराविः प्रकटो भव वीप्सा वा कर्माशयान् कर्मवासनाः कर्माश्रयानिति पाठे रागादीन् रन्धय निर्दह भूयिष्ठा भूयः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिलावृते उपास्यं रूपम् उपासनम् उपासनप्रकारं चाभिधाय भद्राश्ववर्षादिषु तानाह तावद्ग्रन्थेन । तथा चेति भद्रश्रवा नाम धर्मसुतो भद्राश्ववर्षाधिपतिः तस्य कुलपतयः कुलश्रेष्ठाः सेवकमुख्या उपासकमुख्याश्च भद्रश्रवसः पुरुषा भद्राश्ववर्षे मेरोः पूर्वस्मिन्साक्षाद्भगवतो वासुदेवस्य साक्षाच्छब्दः यस्मात्तादृशपरोक्षाद्ब्रह्मेत्यादाविव ब्रह्मशब्दस्य भगवच्छब्दस्य च पौष्कल्येन प्रवृत्तिनिमित्तवत्परत्वसूचनार्थः प्रियामिति वासुदेवकथनं ननु रामकृष्णादितनुभ्योऽस्या हयशीर्षाभिधानायाः प्रीत्यतिशयद्योतनार्थं धर्ममयीं यज्ञोपासनादिधर्मविदकवेदप्रचुरामित्यर्थः ईदृशधर्ममयत्वं रामादिष्वप्यविशिष्टं तथापि प्राधान्येन विवक्षितवेदाहरणतदुपदेशार्थत्वादस्यास्तन्वा धर्ममयीमित्युक्तं हयग्रीवाख्यां तनुं परमेण साक्षात्कारपर्यन्तकाष्ठां गतेन समाधिना सन्निधाप्य साक्षात्कृत्येदं वक्ष्यमाणं मन्त्रवचः अभिगृणन्तो जपन्त उपधावन्ति वक्ष्यमाणश्लोकैः स्तुवन्तीत्यर्थः ॥ १ ॥

ओंकारार्थः पूर्ववद्भगवच्छब्दार्थश्च धर्माय पूर्वोत्तरभागात्मकवेदावेद्यप्रमेयो धर्मस्तत्र पूर्वभागस्याराध्यस्वरूपशोधनप्रकारावेदकत्वेनाराध्यतात्पर्यकत्वात् ।

ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ।
ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ॥

इत्युक्तरीत्या भगवत एव पूर्वभागप्रमेयत्वम्, उत्तरभागप्रमेयं तु स्पष्टमेवेति । धर्मायेत्यस्य पूर्वोत्तरभागप्रमेयायेत्यर्थः आत्मविशोधनाय आत्मान्तःकरणं जीवो वा शोध्यते येन स आत्मविशोधनस्तस्मै यत्प्रसादादन्तःकरणं जीवो वा शुद्धिं रजस्तमोभ्यामनभिभवरूपां, प्रकृतिसम्बन्धराहित्यद्वारा ब्रह्मप्राप्तिरूपां शुद्धिं च प्राप्नोति स तथोच्यते अत्र धर्मायेत्यनेन प्रापकव्यापकपरत्वपरतायामुपायत्वमुच्यते आत्मविशोधनायेत्यनेन , प्राप्यत्वमुक्तं भगवच्छब्देन तदुभयोपयुक्तगुणवत्त्वं विवक्षितम् ॥ २ ॥

स्तुतिरूपान् श्लोकानाह । अहो इति । तावद्भगवन्मायाया दुरत्ययत्वद्योतनाय विस्मयमाना आहुः । प्रन्तं मृत्युं पित्रादिदृष्टान्तेनायं जनो मिषन् पश्यन्नपि न पश्यति नात्मनोऽनुसंधत्त इत्येतद्भगवद्विचेष्टितं भगवन्मायावैभवरूपम् एतच्छब्दार्थोऽत्र चित्रं विस्मयनीयम् अहो चित्रमिति निपातसंघात आश्चर्यद्योतकः कथम्भूतो न पश्यति पुत्रं पितरं च मृतं निर्हृत्य दग्ध्वा स्वयं तदुपार्जितैर्जिजीविषुर्जीवितुमिच्छुः किमर्थमपत्युच्छं विषयसुखं सेवितुं किंकुर्वन् यर्हि यदा विकर्म विरुद्धं कर्मोपायं ध्यायन् ॥ ३ ॥

नन्वविद्वांस पश्यन्ति किमत्र चित्रमत्राह । वदन्तीति । कवयः अधीतवेदान्तविद्या विश्वं जगत् नश्वरं केवलं वदन्ति न त्वनुसन्दधते नन्वात्मयाथात्म्यविदोऽनुसन्दधत एव तत्राह । अध्यात्मविदः अधीतवेदान्तविद्याः विपश्चितः उपासितस्वात्मपरमात्मानः यद्यपीदं विश्वं नश्वरं वदन्ति तथापि हे अज ! तव मायया मुह्यन्ति मोहं प्राप्नुवन्ति विपश्चितामपि पुत्रमरणादिनिमित्तशोकदर्शनादिति भावः अत इदं कृतं भगवद्विचेष्टितं सुविस्मयं विस्मयनीयम् ईदृशमोहनिवृत्तये केवलं त्वां प्रपन्नयामहे इत्याहुः अजं जन्ममरणादिसंसारधर्मप्रतिभटम् त्वां नतोऽस्मि कर्तरि क्तः नमस्कृतवानस्मि प्रत्येकाभिप्रायमेकवचनम् ॥ ४ ॥

ननु किं यदेतच्चित्रं यज्जीवमोहनानुकूलमायाप्रेरणमिति ततोऽप्येतच्चित्रतरमकर्तुर्मम विश्वसृष्ट्यादिकर्तृत्वमस्ति तच्चाबन्धकं चेत्यत्राहुः । विश्वोद्भवेति । अकर्तुः ।

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥

इत्युक्तरीत्या चातुर्वर्ण्यचातुराश्रम्यादिव्यवस्थयातिविचित्रजगत्सृष्ट्यादिकर्तृत्वेऽपि तत्तत्कर्मायत्तदेवादिवैचित्र्यादकर्तुस्ते तव कर्तारि षष्ठी त्वयेत्यर्थः विश्वस्य जगतः उद्भवस्थाननिरोधकर्म सृष्टिस्थितिप्रलयरूपं कर्म अङ्गीकृतं स्वीकृतमिति यत्तद्युक्तमेव ननु त्वयि विचित्रं जीवस्यैव न बन्धकमित्यभिप्रायः कुतः यतस्त्वमपावृतः कदाचिदपि पुण्यपापाख्यकर्मणा ज्ञानसङ्कोचरहितः जीवानां तु "अनृतेन हि प्रत्यूढाः तेषां सत्यानां सतामनृतमपिधानम्,, इति कर्माख्याविद्यया ज्ञानसङ्कोचरूपावरणसद्भावात् अविद्यावृतज्ञानैरनुष्ठितानां पूर्वपूर्ववासनानुरूपाणां सुखदुःखादिजननद्वारा बन्धकत्वं युक्तं भगवतो निरस्तनिखिलदोषस्य सार्वज्ञादिगुणविशिष्टस्य जगदुदयविभवलयलीलस्य विश्वसृष्ट्यादि कर्म न बन्धकमित्यभिप्रायः अपावृत अपगतावरणः अविद्याकृतावरणानभिभूतस्तस्यापावृतस्य तवेति षष्ठ्यन्तत्वेन व्याख्येयम् अपावृतमिति पाठे विश्वोद्भवादिकर्माङ्गीकृतमनावरकं तिरोधानद्वारा न बन्धकमिति युक्तं जीवस्येवेत्यर्थः । आवरणद्वारा धर्मभूतज्ञानसंकोचनद्वारा पापावहं नेति वेत्यर्थः कुतो मम विश्वोद्भवादि कर्म नावरकं तत्राहुः । कार्यकारणं कार्यकारणरूपं स्थूलसूक्ष्मावस्थचिदचिद्वस्तुशरीरकत्वेन तद्रूप इत्यर्थः कार्यकारणरूपत्वं च न तादात्म्यनिबन्धनं किं त्वात्मा देवो जात इत्यादितद्वस्तरात्मप्रयुक्तमित्याशयेन सर्वात्मनीत्युक्तम् एवंभूतोऽपि वस्तुतः प्रकृतिपुरुषाभ्यां विविक्तस्वरूपतः व्यतिरिक्तः साक्षात्कार्यकारणात्मोभयावस्थाव्यवहितं त्वयि न हि कर्तृत्वमात्रेण कर्मणां बन्धकत्वमपि तु कर्माधीनकर्तृत्वेन अन्यथा मुक्तानामपि जगदादिकर्तृत्वस्य बन्धकत्वापत्तेः अयं भावः यद्यपि विश्वसृष्ट्यादिकर्तृत्वेन विश्वोपादानत्वेन च विश्वगतावस्थान्तराश्रयत्वाद्विश्वोद्भवादि कर्म तव बन्धकमिति मन्तव्यं तथापि विश्वोद्भवादिकर्मणो लीलारूपत्वेन कर्माधीनत्वाभावात् स्वरूपान्यथाभावस्वभावान्यथाभावरूपविकाराश्रयप्रकृतिपुरुषशरीरकस्यैव कार्यकारणोभयावस्थाश्रयत्वात्स्वरूपेण कारणस्थाश्रयत्वेऽपि साक्षात्तदवस्थाश्रयत्वाभावाच्च न विश्वोद्भवादि कर्म बन्धकं यथा जीवस्य शरीराधिष्ठातृत्वमात्रेण शरीरगतकौमारयौवनाद्याश्रयत्वमित्यर्थः ॥ ५ ॥

एवं विचित्रानन्तशक्तिमत्त्वेन भगवन्तं स्तुत्वा अथैतद्रूपाराधनमभिप्रेत्य मत्स्यकूर्मावतारवत् नमस्कुर्वन्ति । वेदानिति । युगान्ते कस्मिंश्चिदुद्दैत्यप्रलये तमसा दैत्यरूपेण तिरस्कृतानपनीतान् वेदान् नृतुरङ्गविग्रहः ना च तुरङ्गश्च नृतुरङ्गौ विग्रहो यस्य स नृतुरङ्गविग्रहः हयशिरोमूर्तिर्यो भगवान् आनयत्तान् कवये चतुर्मुखाय प्रत्यावृत्य प्रत्यर्पितवान् तस्मै तेऽवितथेहिताय अमोघचेष्टाय ते तुभ्यं नमः नमस्करामीति ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ हरिवर्षे नरहरिविग्रहं उपास्योपासकोपासनाप्रकारानाह । हरिवर्षे चेति । नरहरिरूपेण नृसिंहरूपेणास्ते सन्निहितो भवति तन्नृसिंहरूपपरिग्रहे निमित्तमुत्तरत्र सप्तमस्कन्धे वक्ष्यामः तत्प्रियतमं रूपं प्रह्लादस्तद्रूपपुरुषैः सह अव्यवधानानन्यभक्तियोगेन अव्यवधानः अविच्छिन्नः विघ्नानुपहतः अनन्यः न विद्यतेऽन्यत्फलं यस्य सोऽनन्यः प्रयोजनान्तररहितः तेन भक्तियोगेन उपास्ते आराधयतीत्यर्थः । प्रह्लादं विशिनष्टि । महापुरुषो भगवांस्तस्य ये गुणास्तेषां भाजनमाश्रयः भगवद्गुणात्ममानगुणक इत्यर्थः महाभागवतो भागवतश्रेष्ठः दैत्यानां दानवानां च यत्कुलं तत्पवित्रीकरणेऽनेनेति दैत्यदानवकुलतीर्थीकरणाम एवंभूतं शीलमाचरितं शीलरूप आचारो यस्य । यद्वा उक्तविधं शीलं सद्वृत्तिः शौचाचमनसंध्योपासनादिरूपमाचरितमाचारो यद्वा दोहादिरूपश्च यस्य इदं वक्ष्यमाणमुदाहरति जपति ॥ ७ ॥

इदमादिमन्त्रमाह । ओमिति । ओं भगवच्छब्दार्थो पूर्ववत् तेजसामपि तेजसे तेजोऽन्तरैरप्रकाश्याय सर्वतेजसां प्रकाशायेत्यर्थः तथा च श्रुतिः ।

न तत्र सूर्यो भाति न चन्द्रतारकम् ।

नेमा विद्युतो भान्ति कुतोऽयमग्निः ।

तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ।

इति कठवल्लीष्वाम्नायते तद्रूपमेव चाथर्वणो परं ब्रह्माधिकृत्य श्रूयते अतोऽत्र परं ब्रह्मत्वं विवक्षितम आविराविर्भव आविर्भवावितेव आविः शब्दो निपातः प्राकट्यद्योतकः तस्य द्विर्वचनं पुनः पुनः प्रकटीभवेत्यर्थः । अत्र वज्रनखदंष्ट्रेति सम्बोधनं कर्माशयान् कर्मवासनाः रन्धय रन्धय निर्दहेति द्विर्वचनं ये भूयिष्ठा बहुलास्तान् कर्माशयानित्याशयविशेषणमध्याहारणीयमिति बोध्यम आत्मने मह्यमभयं भयप्रतिभटं यथा तथाविर्भवेत्यनुषङ्गः । यद्वा भूयिष्ठा इति विभक्तिप्रतिरूपकमव्ययं भूयसार्थकं भूयः अभयमाविर्भवेत्यर्थः अथवाभयं यथा यथाभावं यथा तथा भूयिष्ठाः भूयांसोऽभयं बहुधा वयं भवामेत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अन्तर्गतविराशेः स्वर्गावनानुसारिणा पूज्या हरेरनन्ताः प्रादुर्भावविशेषाः सन्तीति दर्शयितुमिलावृतवर्षमवैः पूज्यां देवतां निगद्यावशिष्टवर्षगवैः पूज्या देवताः क्रमेणाध्यायाभ्यां निरूपयति । तत्रात्रेत्यादिना । तस्य भद्रश्रवसः कुलपतयः धर्ममयीं ज्ञानोपदेशेन सर्वजगद्धारणप्रधानभूताम "हयगतो" इतिधातोः हयन्ति अवगच्छन्ति बुध्यन्ते सर्वमिति हयाः सर्वज्ञा ब्रह्मादयस्तेषां शीर्षः प्रधान इति हयशीर्षः ॥ १ ॥

ध्यानं कृत्वात्मानं शोधयतीत्यात्मशोधनस्तस्मै ॥ २ ॥

आत्मशोधनपदार्थमाह । अहो इति । अयं जनो घ्नन्तं स्वमृत्युमिवन् पश्यन्नपि न पश्यति हि यस्मात्तस्मात्तद्विचित्रं भगवद्विचेष्टितमहो कालात्मनो मृत्योरनिशं निद्रालोरिव पश्यतोऽप्यदर्शने किं कारणमिति तत्राह । ध्यायन्निति । शाश्वतोऽसत्कर्मकृत्तं शब्दादिविषयजातं ध्यायन् निकर्म सेवते यर्हि यस्मात्तस्माद्

पापलक्षणाज्ञानप्रतिबद्धचक्षुर्न पश्यतीत्यर्थः अत्र तुलोपममाह । निहृत्येति । पुत्रो मृतं पितरं निहृत्य दहनादिपितृमेधक्रियां कृत्वा जिजीविषुः स्वजीवनमेवेच्छन्नपितृमरणवन्ममापि मरणं भवेदिति युक्तिबलादिच्छन्नपि स्वात्मनो मृत्युं न चिन्तयति यथा तथायं जन इति अतस्तव प्रसादेन शुद्धान्तःकरणस्य पुरुषस्य करतलामलकवद्विश्वं प्रकाशत इति भावः ॥ ३ ॥

न केवलं प्राकृतजनमोहकस्त्वं किं तु कवीनामप्यतो निरतिशयमहिम्नस्तव चरितं चित्रमित्यत्यन्तमेव त्वत्प्रसत्तौ प्रभातं नान्यदित्याशयवानाह । वदन्तीति । अनेन कवीनां परोक्षज्ञानिनां वचनगम्यात्मविद्यामपरोक्षज्ञानिनां दर्शनश्च जगत्प्रवाहानित्यत्वे प्रमाणमुक्तं भवति तथापि ज्ञानसामर्थ्येऽप्यसौ त्वदनुग्रहमन्तरेण तद्विषये मुह्यन्ति अनेन मुह्यन्ति ये सूरय इत्येतद्विवृतं भवति सुष्ठु विगतः स्मयाख्यो दोषो यस्मात्स तथा सुविस्मयो यथा भवति तथेति क्रियाविशेषणं वा यत एवं ज्ञानिनोऽपि कर्तव्यं त्वन्मायया न जानन्ति अतो भवानेक एव तज्ज्ञ इत्याह । कृत्यविदमिति ॥ ४ ॥

इदं चास्माकं तव चरितं चित्रमित्याह । विश्वेति । जगत्सर्जनादिलक्षणं कर्तव्यं त्वयैव कर्तव्यं नान्येनेति यदतस्त्वमेव तदभिज्ञ इत्यतो ये तत्प्रतिपादयन्ति विश्वेति "न तस्य कार्यं करणं च विद्यते" इति श्रुतेः कार्यकारणादिरहितस्य हरेः प्रपञ्चनिर्माणादिकं कथं घटत इत्याशङ्क्य महाशक्तित्वादित्यतो वाह । विश्वेति । अपिशब्द एवार्थे हिशब्दः अकर्तुः कर्तृत्वघटकद्योतकः हे हरे ! अकर्तुस्तव जगत्सर्जनादिकर्माङ्गीकृतमेव नैतद्भ्रमपावृतं वेदादिषु प्रकाशितं मृदग्न्यादिवत्वादिविकारसिद्धं मृदादिवत्कृत्वं युक्तिविरुद्धत्वाद्यथा नाङ्गीक्रियते तथात्रापीति तत्राह । युक्तमिति । न हरेः कर्तृत्वमात्रं निषिध्यते किन्त्वायासेन, अप्रयासेन कर्तृत्वमकर्तृत्वमिहोच्यते "महाशक्तित्वतस्तस्य युज्यते परमस्य तु" इति मृदादीनां चक्रत्वस्य प्रत्यक्षतोऽदर्शनात्प्रत्यभिग्राहकप्रमाणाभावादनुपपत्त्या तन्नाङ्गीक्रियते अत्र तु ज्ञानिप्रत्यक्षसिद्धत्वाच्छैदिकत्वाच्च युक्तं हीत्यभिप्रायः तथापि निर्विकारस्य हरेर्मायाकर्तृत्वमन्तरेण नास्त्यकर्तृत्वाङ्गीकरणं चित्रमिति तत्राह । ज्ञा चित्रमिति । ज्ञानदौर्बल्यादस्माकमेव चित्रं त्वयि न चित्रं कुतो न चित्रं कार्यकारणोऽप्याश्रयलक्षणकार्यस्यापि कारणत्वात् इतोऽपि नेत्याह । सर्वात्मनीति । सर्वस्वामिनि ननु कार्यकारणत्वे मृदादिवत्सर्वात्मकत्वमापद्यामिति तत्राह । व्यतिरिक्त इति । निमित्तकारणत्वेन तद्भिन्नत्वं युक्तमिति चशब्देन ध्वनयति तर्हि लोकविलक्षणाऽचिन्त्यकल्प इति तत्राह । वस्तुनीति ॥ ५ ॥

धर्मोर्यीति एवम्व्याभिप्रायत्वाह । वेदानिति । तमसा मधुनाम्ना दैत्येन तिरस्कृतानपहृतान् प्रत्याहृत्य सृष्टौ दत्तान् पुनश्च तानेव दैत्यापहृतान् दत्तवानित्यर्थः कवये ब्रह्मणे अवितथहितायेत्यनेन भगवन्त इत्यस्यार्थ उक्तः नैश्वर्यादिगुणानामभीमत एव सत्यकर्मत्वोपपत्तेः "अशक्ताः सत्यसृष्टौ हि मायासृष्टिं वितन्वत," इत्यादेः ॥ ६ ॥

वीर्यशौर्यादयो भक्तिज्ञानादयो वा महापुरुषगुणास्तेषां भाजनं पात्रं महापुरुषगुणभाजनः पुल्लिङ्गस्तु छान्दसः तान् भजतीति वा प्रकृष्टो हावः शान्त्यादिगुणो यस्य स तथा दैत्यदानवकुलस्य तीर्थीकरणं शीलं वाचरितं च यस्य स तथा

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

फलकामलक्षणान्यप्रधानरहितश्चानन्यः असदृशभक्तियोगस्तेन॥७॥

सूर्यादितेजोऽप्यधिकतेजोरूपाय तमो दैत्यमज्ञानं वा ग्रस सैहरेदं भूयिष्ठा इत्यन्वयं भाग्य ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

भद्रश्रवसस्तु अद्भुतमयभक्तिरसेनोपासत इत्याह । भद्रश्रवस इति । समाधिना तदेकावेशेन सन्निधाप्य साक्षात्कृत्य पश्यन्तीति द्रष्टुं प्रवर्त्तन्त इत्यर्थः न त्विच्छामात्रादिनित्यशक्त्येति भावः श्रीप्रह्लादस्तु वीरकरुणाशान्तादिमयभक्तिरसेनोपास्त इत्याह । ओं नम इत्यादि ॥ १—६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

अष्टादशे तु भद्राश्वादिषु षट्सु निरूप्यते ।
भद्रश्रवःप्रभृतिभिर्हयशीर्षादिसेवनम् ॥

भद्रश्रवा नाम वर्षपतिस्तस्य कुलपतयः सन्तानमुख्याः ॥ १ ॥

भद्रश्रवःशब्देनाजहत्स्वार्थलक्षणया तद्गणोऽप्युच्यते अतः प्राणभूतः उपदधातीतिवल्लिङ्गसमवायन्यायेन बहुवचनम् अस्मनो जीवस्याविद्यामालिन्यदूरीकरणाद्विशोधनाय ॥ २ ॥

घ्नन्तं हिंसन्तं मृत्युं मिषन् पश्यन्नपि न पश्यति यतः पुत्रं स्वेन जनितं पितरं स्वस्य जनकञ्च निहत्य मृतं दग्ध्वा तन्मध्यवर्ती जनको जीवितुमपि सन् तद्भयचनैर्जीवितुमिच्छति मृत्युर्मां कथं हास्यतीत्यपि नानुसन्धत्त इत्यतिमौढ्यमिति भावः ननु पञ्चषानपि वासरान् जिजीविषा भगवद्भक्त्यर्थं तादृशस्यापि न विगीतेत्यत आह । विकर्मसेवितुं स्त्रीसङ्गादिसुखं कर्त्तुम असत् स्वविवाहादिकं ध्यायन् वर्द्धीति तत्रापि यर्हि पुत्रादिकं निहत्य विश्रामयति तर्ह्येवेत्याश्चर्यातिशयं जिजीविषतीति पाठः छन्दोभङ्गाभावादतिसमञ्जसः । ननु भद्राश्वादिवर्षाणां भौमस्वर्गरूपत्वात्तद्वासिनां युगपदेव पितुः पुत्रस्य च मृत्युदर्शनं न घटते सत्यं सर्वा एव वाचो भारतभूमिवर्त्तिनां जनानामुद्देश्येनोच्यन्ते । यतः ... अन्याः स्वकर्मफलं भुञ्जानाः । अत्र भद्राश्वादिवर्षे यन्मन्महे ये स्वतिधन्या अपवर्गसाधने भारतभूमण्डले लब्धजन्मानः श्वपचादिजातयोऽपि यत्रानायासेनैव वैकुण्ठपदमपि साधयन्ति तत्रापि कथमेवं मुह्यन्तीति रीत्या ॥ ३ ॥

नन्वविद्वांस पश्यन्ति किमत्र चित्रं तत्राह । वदन्तीति । अतस्तव स्तुविस्मितमत्याश्चर्यमित्यन्वयः । अतः शास्त्रादिश्रमं विहाय तं त्वामजं नतोऽस्मि त्वां भजन्त एव विद्वांस इति भावः ॥ ४ ॥

ननु विद्वांसोऽपि ममैव मायया मुह्यन्ति चेत्तर्हि मय्येव दोषं प्रसञ्जयसीति तत्र मायायास्तत्कार्यस्य च त्वदीयत्वेऽपि त्वं ततः पृथगेव वर्त्तस इत्याह । विश्वोद्भवेति । अकर्तुरिति गुणानामेव कर्तृत्वादिति भावः । अङ्गीकृतमुक्तं वेदेनेति त्वय्युपचारादिति भावः । न च जीववत् कर्तृत्वाभिमानादित्याह । अपावृतः त्वं गुणैरावृतो न भवसीत्यर्थः । अपगता आवृत्तावरणं यस्य तस्येति वा

एतच्च त्वयि युक्तमेव न तु चित्रं मायायास्तवच्छक्तित्वात् तत्कार्याणां कारणे अतः सर्वात्मनि सर्वेश्वरे मायायाः स्वरूपशक्तित्वाभावात् सर्वतोऽतिरिक्ते चेति ॥ ५ ॥

प्रस्तुतावतारचरित्रमाह । वेदानिति । तमसा दैत्य रूपेण तिरस्कृतान् अपनीतान् । ना च तुरङ्गश्च तद्रूपो विग्रहो यस्य सः कवयं ब्रह्मणे तदर्थमविनर्थहिताय सत्यसङ्कल्पाय ॥ ६ ॥

उत्तरत्र । समग्रस्कन्धे तीर्थीकरणं शीलमाचारश्च यस्य सः ज्ञानकर्मादिमिश्रत्वादन्यप्रधानः अन्यदेवोपासनासाहित्याभावादनन्यश्च यो भक्तियोगस्तेन ॥ ७ ॥

तेजसामपि तेजसे । कर्माशयान् कर्मवासनाः । कर्माश्रयानिति पाठे रागादीन् रन्धय निरेहि अभयं यथा स्यात्तथा आत्मनि नमनाम भूयिष्ठाः भूमाः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अष्टादशे भद्राश्वादिषु षट्सु भगवन्मूर्त्तयस्तत्सेवकसहिता निरूप्यन्ते । तथा चेति । भद्रश्रवाः तत्कुलपतयः पुत्रादयः पुरुषाः सेवकमुख्याश्च भगवत इदं मन्त्ररूपमभिगृणन्तः तनुं सन्निधाप्य उपधावन्ति स्तुवन्ति ॥ १ ॥

भद्रश्रवसः राज्ञः पुत्रादयः सेवकमुख्याश्च तदीयत्वात्तद्गणयोगाश्च तच्छब्देन गृह्यन्ते अतो भद्रश्रवस ऊचुरिति बहुवचनम् भद्रश्रवःप्रधानाः ऊचुरित्यर्थः ॥ २ ॥

घ्नन्तं मृत्युम् निहत्य दग्ध्वा तद्भयवनेन जिजीविषति जीवितुमिच्छति किं कुर्वन् असदनित्यं विषयसुखं सेवितुं विकर्म विविधं कर्म ध्यायन् एतज्जगन्निर्वाहितं चित्रमत्यद्भुतमित्यन्वयः ॥ ३ ॥

किञ्च विपश्चितो विवेकिनः अध्यात्मविदः आत्मानात्मपरमात्मस्वरूपादियाथात्म्यविदः कवयः क्रान्तदर्शिनः विश्वं नश्वरमनित्यं वदन्ति पश्यन्ति च तथापि हे अज! तव मायया गुणमय्या मुह्यन्ति नित्यसुखे त्वयि प्रेम न कुर्वन्ति किन्तु देहगेहादिरूपायां भवदीयमायायामासक्ताः भवन्ति एतच्च तव कृत्यं विचेष्टितं सुष्ठु चित्रमित्यन्वयः त्वत्कृपां विना शास्त्रश्रमादिभिरपि त्वयि भक्तिर्न जायते इति भावः तथाह भगवान् पूर्वाचार्यः "कृपास्य दैन्यादियुजि प्रजायते यया भवेत्प्रेमविशेषलक्षणा भक्तिर्ह्यनन्याधिपतेर्महात्मन" इति अतस्त्वं त्वामजं नतोऽस्मि एकवचनमत्र भद्रश्रवसो मुख्यत्वाभिप्रायेण प्रत्येकाभिप्रायेण वा ॥ ४ ॥

सर्वादिनो विषयप्रायमयभगवच्छरीरमुक्तत्वादि कथश्रोतमूचनाय एवं जीवानां स्वभावमुक्त्वाथ भगवद्गुणगणं वर्णयन्तस्तत्स्वभावमाहुः । विश्वोद्भवेति । तत्स्वतः अनन्तशक्तियुक्तनिजस्वरूपत्वेन तत्त्वान्याश्रयेण विश्वोद्भवादिकं ते कर्म "तदात्मानं स्वयमकुरुत" इति श्रुतेः अतोऽनन्यनिरपेक्षत्वविश्वजन्मादिहेतुत्वादयो गुणा दर्शिताः कथंभूतस्य अकर्तुः नास्ति कर्ता यस्य स तथास्य अतोऽनन्यत्वादिकृत्वनिःसमानातिशयत्वादयो गुणा दर्शिताः सदा स्वरूपमात्रेणैव विश्वजन्मादिहेतुत्वात् भोगार्थकर्तृत्वशून्यत्वात् अकर्तुरिति अनेन सत्यसङ्कल्पत्वनित्यानन्दानिधिमत्त्वादयो गुणा दर्शिताः पुनः कथंभूतस्य अपावृतः अपगतः आवृदावरणं यस्मात्तस्य अनेन स्वरूपतो गुणतश्चापरिच्छिन्नत्वं दर्शितम् तच्च विश्वोद्भवादिकर्म बुभुक्षुभोगार्थं मुमुक्षुमुक्त्यर्थञ्च वेदेनाङ्गीकृतं गीतमित्यनेन सर्वोपकारित्व-

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया ।
मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी ॥ ९ ॥
माऽगारदारात्मजवित्तबन्धुषु सङ्गो यदि स्याद्भगवत्प्रियेषु नः ।
यः प्राणवृत्त्या परितुष्ट आत्मवान् सिद्ध्यत्यदूरान्न तथेन्द्रियप्रियः ॥ १० ॥
यत्सङ्गलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसम् ।
हरत्यजोऽन्तः श्रुतिभिर्गतोऽङ्गजं को वै न सेवेत मुकुन्दविक्रमम् ॥ ११ ॥
यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुराः ।
हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कारुण्यवात्सल्यादयो गुणा द्योतिताः तच्च कर्म त्वयि युक्तं न च त्वयि चित्रमित्यनेनोक्तकर्मणोऽन्यत्रासंभवत्वं भगवति किञ्चिन्मात्रत्वं च दर्शितं भवति कथंभूते कार्यकारणे कार्याणि महदादितृणान्तानि तेषां कारणे पूर्वपूर्वरूपेण तत्तज्जनके प्रकृतिमधिष्ठाय महत्तत्त्वमुत्पादयति तदधिष्ठायाहङ्कारमित्येवमुत्तरोत्तरं बोध्यम् अनेन सर्वान्तर्यामित्वादयो गुणा दर्शिताः सर्वात्मनि सर्वेषां चेतनाचेतनपदार्थानामात्मन्याश्रये । ननु सर्वात्मत्वे संसारित्वजडत्वादीनां भगवति प्रसक्तिः स्यादत्राहुः । व्यतिरिक्ते चेति। सर्वचेतनाचेतनात्मत्वेऽपि संसारित्वाल्पज्ञत्वादिभिश्चेतनधर्मैर्जडत्वादिभिरचेतनधर्मैश्चास्पृष्ट इत्यर्थः अनेन दोषास्पृष्टत्वमुक्तम ॥ ५ ॥

तमसा दैत्यरूपेण तिरस्कृतान् लोपितान् ना च तुरङ्गश्च नृतुरङ्गौ तयोरिव विग्रहो यस्य सः कवयं चतुर्मुखाय यः आदरं प्रत्यर्पितवान् तस्मै ते अवितथेहिताय सत्यचेष्टाय नमः ॥ ६ ॥

उत्तरत्र ! सप्तमे स्कन्धे वर्णितं प्रियतमम् महापुरुषगुणभाजनः सद्गुणाश्रयः दैत्यदानवकुलस्य तीर्थीकरणं शीलमाचरितं च यस्य सः भक्तभानः निरन्तरश्चासावनन्योऽव्यभिचारी च यो भक्तियोगस्तेन उपास्ते आराधयति ॥ ७ ॥

तेजस्तेजसे तेजसामपि तेजसे "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इतिश्रुतेः आविराविर्भव प्रकटो भव प्रकटो भवेत्यर्थे द्विरुक्तिरादरविनिपातस्य हे वज्रनख ! हे वज्रदंष्ट्र कर्माशयान् कर्मवासनाः रन्धय रन्धय निर्दह निर्दह तमोऽज्ञानं ग्रस आत्मनि अभयमभयं भूयिष्ठाः भूयात् मन्त्रस्य आदौ मध्ये अन्ते च बीजानि गङ्गाद्यर्थानि ॥ ८ ॥

भाषाटीका

श्रीशुकदेवजी बोले तैसेही भद्राश्ववर्ष में भद्रश्रवानाम का धर्मपुत्र है उसके सन्तान महा पुरुष साक्षात् भगवान् वासुदेवकी धर्ममयी प्रियतनु हयशीर्षनाम की मूर्ति को परम समाधि से सन्निधान करके यह मंत्र बोलते हुये स्तुतिकरतेहैं । १ ।

भद्रश्रवा बोले आत्मा के शुद्ध करनेवाले धर्मरूप भगवान् आप के अर्थ नमस्कार है ॥ २ ॥

अहो भगवान् का चरित्र बडा विचित्र है जोकि यह संसारी जीव मारते हुये मृत्यु को देखता हुआ भी नहीं देखता है जिससे कि असत् पदार्थ का स्मरण करके पाप ही करना चाहता है और अपने पिता तथा पुत्र दोनों को मरने पर जलाकर भी आप जीने चाहता है ॥ ३ ॥

कविलोग संसार को नाशमान् कहते हैं और ज्ञानी पुरुष जगत्को नश्वर देखतेभी हैं तौभी हे अज ! आप की माया से मोहित होजाते हैं ऐसा विस्मयकारक आपका कार्य है आप अजहो आपको मै नमस्कार करता हूं ॥ ४ ॥

आप माया के आवरण से रहित हो अकर्ता हो आप का जो जगत् का उत्पत्ति आदि अन्त ये वेदने कहा है तिस में कुछ आश्चर्य नहीं है क्योंकि सर्वात्मा होने से आप जगत्के कारण भी हो जगत् रूप कार्य भी हो वस्तुतः सब से अलग भी हो ॥ ५ ॥

जिन आपने प्रलय काल मे ब्रह्मा के निद्रा होने से मधुकैटभ दैत्य के लेगयेहुए वेदों को पाताल से लाकर मागने वाले ब्रह्मा को देदिया तिन सत्य संकल्प आपको नमस्कार है ॥ ६ ॥

हरिवर्ष में भी भगवान् नृसिंहरूप से हैं तिन के अवतार की हेतु आगे कहेंगे उस अत्यंत प्रिय रूप को दर्शनकरके "महापुरुषों के गुणवाले महाभागवत दैत्यदानवों के कुल के पवित्र करने योग्य शीलस्वभाव वाले प्रह्लाद जी निरन्तर अनन्य भक्तियोग से उस वर्ष के पुरुषों के सहित उपासना करते हैं और इस मन्त्र को जपते हैं ॥ ७ ॥

अग्नि आदिकों के प्रकाशक भगवान् नरसिंह जी आप के अर्थ नमस्कार है हे वज्र सरीके नखोंवाले ! भगवन् ! आप प्रकट होवो कर्म वासनाओं का नाश करो अज्ञान को दूर करो तिस से जैसे सब आत्मा में अभय हों तैसे आप होजावो आप में सब कर्मों को समर्पण करते है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विश्वस्य स्वस्तिप्रार्थने खलस्यापि भवेत्तच्च साधुपीडां विना न स्यात् । अन्योऽन्यममङ्गलं ध्यायतां च भूतानामन्योन्यघातं विना न भवेदित्याशङ्क्याह । खलः प्रसीदतां प्रसीदतु,

हरिर्हि साक्षाद्भगवान् शरीरिणामात्मा झषाणामिव तोयमीप्सितम् ।
हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दम्पतीनाम् ॥ १३ ॥
तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम् ।
हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतोभयमिति ॥ १४ ॥

केतुमालेऽपि भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषायुषाहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्वेजितमनसां विध्वस्ता व्यसवः सम्वत्सरान्ते विनिपतन्ति ॥ १५ ॥

अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किञ्चिदुत्तम्भितसुन्दरभ्रूमण्डलसुभगवदनारविन्दश्रिया रमां रमयन्निन्द्रियाणि रमयते ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कौर्यं त्यजतु । भूतानि च मिथः शिवमेव ध्यायन्तु तेषां मनश्च भद्रमुपशमादिकं भजतु नोऽस्माकमपि मतिः अपिशब्दाद्भूतानां च मतिरहैतुकी निष्कामा सती ॥ ९ ॥

नः सङ्गः क्वापि मा स्यात् । यदि कथञ्चित्स्यात्तर्ह्यगारादिषु मा स्यात्किन्तु भगवत्प्रियेष्वेव अगारादिसङ्गे दोषमाह । य इति । इन्द्रियप्रियो गृहाद्यासक्तः ॥ १० ॥

भगवत्प्रियसङ्गे गुणमाह । येषां भगवत्प्रियाणां सङ्गाल्लब्धं मुकुन्दविक्रमं श्रुतिभिः श्रवणादिभिः संस्पृशतां सेवमानानां पुंसामन्तर्गतोऽज्जो मानसं मलं हरति कथम्भूतं विक्रमम् निजमसाधारणं वीर्यवैभवं प्रभावातिशयं यस्य तीर्थन्तु गङ्गादि मुहुः संस्पृशतामङ्गजं मलं केवलं हरति नतु वासनाः तान् को वै न सेवेतेत्यन्वयः ॥ ११ ॥

मानसमलापगमफलमाह । यस्येति । अकिञ्चना निष्कामा मतःशुद्धौ हरेर्भक्तिर्भवति ततश्च तत्प्रसादे सति सर्वे देवाः सर्वैर्गुणैर्धर्मज्ञानादिभिः सह तत्र सम्यगासते नित्यं वसन्ति गृहाद्यासक्तस्य तु हरिभक्त्यसम्भवात्कुतो महतां गुणा ज्ञानवैराग्यादयो भवन्ति असति विषयसुखे मनोरथेन बहिर्धावतः ॥ १२ ॥

नतु हरिविमुखस्य गृहाद्यासक्तस्यापि लोके महत्त्वं दृश्यते सत्यं दृश्यते तत्तूपहासास्पदमिति महत्त्वकमाह । हरिर्हीति । यथा झषाणां मीनानामीप्सितं तोयमेवात्मा तेन विना जीवनाभावात् महानतिप्रसिद्धोऽपि गृहे यदि सज्जते तदा दम्पतीनां मिथुनानां क्षुद्रादिष्वपि प्रसिद्धं वयसैव केवलं यन्महत्त्वं तदेव तस्य भवति नतु ज्ञानादिना मिथुनेषु पूज्यमानेषु स्त्रीभ्यः पुंसां महत्त्वं बालमिथुनेभ्यश्च वृद्धमिथुनानां महत्त्वं यथेत्यर्थः ॥ १३ ॥

यस्मादेवं तस्माद्गृहं हित्वाकुतोभयं नृसिंहपादं भजतेत्यसुरानुपदिशति कीदृशं गृहं रजस्तृष्णा रागोऽभिनिवेशः रजआदीनां मूलं कारणमत एव संसृतीनां जन्ममरणादीनां चक्रवालं मण्डलमविच्छेदो यस्मात् ॥ १४ ॥

केतुमालेऽपि कामदेवस्वरूपेणास्त इति शेषः । किमर्थमास्तेऽत आह । लक्ष्म्या इति । प्रजापतिः सम्वत्सरः "सम्वत्सरो वै प्रजापतिः" इति श्रुतेः तस्य दुहितरो रात्र्यभिमानिन्यो देवताः पुत्रा दिवसाभिमानिनो देवास्तेषां च प्रियचिकीर्षया पुरुषायुषा वर्षशतेन यान्यहोरात्राणि तैः परिसङ्ख्यानं गणना येषां षट्त्रिंशत्सहस्राणामित्यर्थः यासां दुहितॄणां महापुरुषस्य महास्त्रं चक्रं तस्य तेजसा ॥ १५ ॥

रमां रमयन् स्वीयानीन्द्रियाणि रमयते केन साधनेन रमयंस्तदाह । अतीव सुललितया गत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो मन्दस्मितं तत्सहितोऽवलोक एव लीला तया किञ्चिदुत्तम्भितमुत्तुङ्गितं सुन्दरं यद्भ्रूमण्डलं तेन सुभगं यद्वदनारविन्दं तस्य श्रिया ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

श्लोकानाह । स्वस्तीति । विश्वस्य जगतः स्वस्ति मङ्गलं भूयात् । ननु विश्वस्य स्वस्तिप्रार्थने खलस्यापि भवेत्तच्च साधुपीडां विना न स्यादन्योऽन्यमङ्गलम् ध्यायतां भूतानां परस्परं घातं विना न भवेदित्याशङ्क्याह । खलः प्रसीदतां खलो दुर्मतिः प्रसन्नो भवतु क्रौर्यादिकं परित्यज्य सुमतिर्भवत्वित्यर्थः भूतानि मिथः परस्परं केवलं शिवमेव धिया सुमत्या ध्यायन्तु तेषां भूतानां मनश्च भद्रमुपशमादिकं भजतु नोऽस्माकं मतिरपिशब्दाद्भूतानां च मतिः अहैतुकी फलाभिसंधिरहिता सत्यधोक्षजे भगवत्याविद्यतामावेशिता भवतु भगवत्प्रवणा भवत्वित्यर्थः ॥ ९ ॥

मेति । नोऽस्माकं सङ्ग आसक्तिः क्वापि मा न स्यात् यदि क्वापि कथञ्चित्स्यात्तर्ह्यगारादिषु न स्यात्किन्तु भगवत्प्रियेषु भागवतेष्वेव स्यात्तत्रागाराणि गृहाः अगारादिष्वासक्तिस्तत्र को दोष इत्याशङ्कायां भागवतसङ्गगृहादिसङ्गयोर्गुणदोषावाह । यः पुमानात्मवान् भगवत्प्रियसङ्गेन समाहितमनाः प्राणवृत्त्या प्राणधारणमात्रोपयुक्तवस्तुपरिग्रहेण परितृप्तः यथा सिध्यति भगवत्कथाश्रवणाचार्योपसत्त्यादिश्रवणाद्या दूराद्राशु मुक्तो भवति न तथा इन्द्रियप्रियः इन्द्रियपोषणप्रियः शब्दादिविषयप्रवणचित्तः सिध्यतीत्यर्थः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुनः सत्सङ्गतेः सिद्धिहेतुत्वमेव प्रपञ्चयति । सत्सङ्गेति । येषां भगवत्प्रियाणां ज्ञानिनां सङ्गेनैव लब्धं प्राप्तं निजवीर्यवैभवं यस्मि-न्नस्य भगवद्ध्यानसामर्थ्यं भगवत्प्रियसङ्गेनैव मया लब्धमित्यर्थः तथा हि तीर्थं गङ्गादितीर्थं तत्पावित्ररूपं भगवद्यशः मुहुः संस्पृ-शतां सत्कर्णेन्द्रियगतानां मानसं श्रुतिभिः श्रोत्रेन्द्रियैरन्तःप्रवि-ष्टो भगवानङ्गजमन्तर्गतमलं हरति निर्मलं च मनः तद्ध्या-नसमर्थमिति भावः अतः ईदृशं मुकुन्दस्य विक्रमं यशः को वै पुमान् सेवेत मुकुन्दविक्रमसेवा च भगवत्प्रियसङ्गादेवेति सङ्ग-मेव प्रार्थयते इति भावः । यद्वा । येषां भगवत्प्रियाणां सङ्गा-ल्लब्धं प्राप्तं निजवीर्यवैभवं निजशब्दो भगवत्परः भगवद्वीर्यवै-भवं मुहुः संस्पृशतां पुंसां श्रुतिभिः श्रोत्रेन्द्रियव्यापारैः श्रवणा-दिभिरन्तःप्रविष्टो भगवान्मानसं मनःसम्बन्धिमलं हरति तत्र दृष्टान्तः यथा भगवच्चरणाम्बुजातं गङ्गादितीर्थं संस्पृशता-मङ्गजं शारीरमलं हरतीति शेषः पूर्ववत् अथवा यत्सङ्गलब्धं निजवीर्यवैभवं निजासाधारणं वीर्यवैभवं प्रभावातिशयो यस्य तथाभूतं मुकुन्दस्य विक्रमं मुहुः संस्पृशतां श्रुतिभिरन्तर्गतोऽङ्गजो मानसं मलं हरति यथा तत्पादाम्बुजतीर्थमङ्गजं मलमिति वा योजना अत्र न सेवेतेत्यत्र तं मुकुन्दविक्रममित्यध्याहारः तस्य संस्पृशतामित्यनेनान्वितत्वादावृत्तिर्वा मुकुन्दविक्रमामित्यस्याद्ययो-जनायां तु तीर्थपदस्य गौण्या वृत्त्या भगवद्यशसि वृत्तिः सङ्ग-शब्दस्य मनःपरत्वं च द्वितीययोजनायां तु न कोऽपि दोषः एतत्सङ्गेन भगवद्यशःश्रवणं ततो मनोमलं नश्यति तस्य भग-वद्ध्यानसामर्थ्यं ततश्च भगवदुपासना ततोऽपि च सिद्धिरिति प्रणाडी दर्शिता भवति ॥ ११ ॥

इदानीं भगवद्भक्तिं प्रस्तौति । यस्येति । अकिञ्चना नास्ति किञ्चन यस्याः सा अकिञ्चना किञ्चिदैहिकामुष्मिकं च फलमनवलम्बमाना भगवति भक्तिर्यस्य पुंसोऽस्ति तत्र भगवद्भक्ते सर्वे देवा इन्द्रादयः सर्वैर्गुणैर्धर्मा-दिभिः शमदमादिभिश्च सह सम्यगासते तमेवानुवर्तन्त इत्यर्थः एवं भक्तस्य महद्गुणाश्रयत्वमुक्त्वाभक्तस्य तदभावमाह । हराविति । हरौ भगवत्यभक्तस्यात एवासति शब्दादौ मनोरथेन बहिर्धा-वतः विचिन्वतः महद्गुणा महतां भगवद्भक्तानां ये गुणा उक्तास्ते कुतः कस्मात्कारणात् भवेयुः अतोऽभक्तस्य न महद्गुणा-श्रयत्वमित्यर्थः ॥ १२ ॥

ननु विषयासक्तोऽपि कश्चिल्लोके महानेव दृश्यतेऽत आह । हरिरिति । यथा झषाणां मीनानामीप्सितं तोयं जलमिवात्म-धारकं तेन विना जीवनाभावात् तथा शरीरिणां देहिनां साक्षाद्भगवानेवात्मा धारकः तथाच श्रुतिः "को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्,,निरतिशयानन्दरूप आकाशः सर्वप्रकाशकः परमात्मा यदि न स्यान्नोपासितः स्यात्तदा को ह्यन्य ऐहिकामुष्मिकसुखसम्पादनेन जीवयेत् को वा प्राणयेदापवर्गिकसुखसम्पादनेनोज्जीवयेत्,,इति श्रुत्यर्थः तथाच स्मरति भगवान् वाल्मीकिः ।

न च सीता त्वया हीना न चाहमपि राघव !

मुहूर्तमपि जीवावो जलान्मत्स्याविवोद्धृतौ ।

इति हि यस्मादेवं तस्मात्तं भगवन्तं महान्तमपि वयोरूपधनक-पुत्रधनादिसमृद्धोऽपि हित्वा यदि गृहे सज्जते आसक्तो भवति महान्तमिति पाठे महत्पुरुषं भगवन्तं विहायेत्यर्थः तदा दम्पतीनां वयसा महत्त्वं नतु ज्ञानादिभिरित्यर्थः मिथुनीभूतानां वयस्य-आदिभिर्निर्वृत्तः क्षणिकोऽन्ततो निरतिशयदुःखहेतुः सुखलेशः तत्कृतमेव तेषां माहात्म्यं न तु निरतिशयानन्दापादकस्वात्मपर-मात्मयाथात्म्यानुभवकृतमिति भावः ॥ १३ ॥ "

तस्मादिति । तस्माद्भगवद्भक्तेर्निरतिशयसुखहेतुत्वाद्विषयासक्ते-र्निरतिशयदुःखहेतुत्वाच्च रजआदीनां मूलं [illegible] कालं संसारपरिवृत्तिहेतुं गृहं संसृतिर्जन्ममरणरूपा तस्याश्चक्रवालं मण्डलमविच्छेदो यस्मात् गृहं हित्वेत्यर्थः नृसिंहस्य पादं भजतां कुतो भयं दुःखं न तु कुतोऽपि भयमित्यर्थः तत्र रजः कामः विषयाभिलाषरूपः रागः क्रोधः विषयानुभवविरोधिविषयः विषादः विषयविहतिनिमित्तः शोकः मानोऽहङ्कारः महाजनाव-मानहेतुः मन्युस्तज्जन्यः क्रोधः स्पृहा परदारधनादिषु लिप्सा भय-माणामिदुःखं हतुदर्शनमानजं तज्जं दैन्यं मनसोऽप्रसादः आधिरन्त-स्कृता मनःपीडा ॥ १४ ॥

अथ केतुमाले वर्षे उपास्योपासकावाह । केतुमालेऽपीति । भगवान्कामदेवरूपेण प्रद्युम्नरूपेण केतुमाले वर्षे आस्त इति शेषः किमर्थं लक्ष्म्याः प्रियं कर्तुमिच्छया किं च प्रजापतेः संवत्सरस्य "संवत्सरो वै प्रजापतिः" इति श्रुतेः तस्य दुहितरो रात्र्यभिमानिन्यो देवताः पुत्रा अहरभिमानिनो देवाः केतुमालवर्षाधिपतयः तासां तेषां च पुरुषायुषा अहोरात्रसंख्यानानां पुरुषस्यायुः पुरुषायुषम् अचतुरविचतुरेत्यादिना निपातनात्समासान्तोऽच्प्रत्ययः एकं पुरुषा-युषं वर्षशतमहोरात्रमहोरात्रस्थानीयं परिसंख्यानं गणनं येषां ते तथोक्ताः अहश्च रात्रिश्चाहोरात्रः"अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः" इति समासान्तोऽच्प्रत्ययः पुरुषायुषपरिमाणकमहोरात्रं येषामित्यर्थः षट्त्रिंशत्सहस्रपरिमितायुषामिति । यावत् तेषां प्रियचिकीर्षया च यासां प्रजापतेर्दुहितॄणां रात्र्यभिमानि-नीनां देवतानां कथंभूतानां महापुरुषस्य भगवतो महास्त्रस्य चक्रराजस्य तेजसा उद्वेजितं भीतं मनो यासां तासां गर्भाः संवत्सरान्ते गर्भाधानादारभ्य तत्संवत्सरान्ते विध्वस्ता विस्रस्ता अत एव व्यसवः विगतप्राणाः सन्तो निपतन्ति ॥ १५ ॥

अतीवेति । तत्र रमां लक्ष्मीं रमयन् स्वीयानीन्द्रियाणि रमयते केन साधनेन रमयन् तदाह । अतीवसुललितया सुन्दरया गत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो मन्दस्मितं तत्सहितोऽवलोक एव लीला तया किञ्चिदुत्तम्भितमुत्तुङ्गितं सुन्दरं यद्भ्रूमण्डलं तेन सुभगं यद्वदनारविन्दं तस्य श्रिया शोभया भगव-तस्तन्मायामयं मायाप्रचुरमात्मीयसङ्कल्पेन परिगृहीतमित्यर्थः ज्ञानपर्यायोऽत्र मायाशब्दः रमां लक्ष्मीं देवीं देवस्य भगवतः सम्बन्धिनीं "पुंयोगादाख्यायाम्" इति ङीप् सम्वत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिः रात्र्यभिमानिनीभिर्देवताभिरुपेता सती संवत्सरस्याहस्सु च तद्भर्तृभिः रात्र्यभिमानिदेवताभर्तृभिर्दिवा-भिमानिभिर्देवैरुपेता परमेण समाधियोगेन उपास्ते ॥ १६ ॥ १७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विश्वस्यार्थे स्वस्त्यस्तु नृसिंहः प्रसीदतां हे हरिवर्षजनाः ! भद्राणयुद्दिश्य नृहरिं ध्यायन्तु शिवं नित्यशुद्धं मनोधिया शास्त्रमननेन उपासनालक्षणध्यानेन च मनश्च भद्रं सकल-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निर्गुणरूपं हरिं भजतात् नोऽस्माकं मतिरधोक्षजे आविश्यताम् अहैतुकी फलाभिसन्धिरहिता ॥ ९ ॥

• अनन्यादेर्हरेर्यैकविषयत्वं इत्थंभावलक्षणं साधनमाह । मागारेति । गृहादिषु सङ्गो माभूत् यदि सङ्ग आवश्यकस्तर्ह्यस्माकं भगवत्प्रियेषु स्यात् ननु गृहादिसङ्गाभावे जीवनाभावे कथं पुरुषार्थः स्यादिति तत्राह । य इति । यः प्राणवृत्त्या प्राणधारणलक्षणजीवनस्थितिमात्रेण परितुष्टः स आत्मवान् वशीकृतमना अदूराच्छीघ्रं सिद्ध्यति संसारमुक्तो भवति यथा मुक्तसङ्गस्तथेन्द्रियप्रियो मुक्तो न स्यादित्यर्थः ॥ १० ॥

महात्मनां सङ्गात्किं फलं स्यात्तत्राह । यत्सङ्गेति । येषां भगवत्प्रियाणां सत्सङ्गलक्षणसङ्गात् हरेर्निजसंस्पर्शि वीर्यं माहात्म्यं वैभवं विभुत्वं व्याप्तिलक्षणं च यस्मिन् तीर्थे तत्तथा तादृशं तीर्थं वेदान्तशास्त्रं मुहुर्निरन्तरं संस्पृशतां श्रवणादिनाऽभ्यस्यतां पुंसां मानसं विषयसंसर्गजनं मनोगतमंहो हरति अजः कथं श्रुतिभिः श्रवणेन्द्रियद्वारेणान्तर्गतः हृदयं प्रविष्टः ततः किं बत एवंविधफलमतः को वै मुकुन्दविक्रमं न सेवेत रसज्ञ इति शेषः । यद्वा यस्य हरेः श्रीपादसङ्गालब्धं यस्य तीर्थस्य निजवीर्यवैभवं तादृशं गङ्गादितीर्थं मुहुः संस्पृशतां दर्शनस्पर्शनादिना सेवमानानां पुंसां मानसमंहः सोऽजो हरति हि यस्मात्तस्मान्मुकुन्दस्य गृहीतवामनाद्यवतारस्य विक्रमं त्रैलोक्यविक्रमणलक्षणं चरितं कः पुरुषो न सेवेत यद्यपि बाह्यं स्नानादिना हरत्यान्तरमंहः कथमित्यत उक्तम् । अन्तरिति । बहुवारं श्रोतव्यमित्यभिप्रायेण श्रुतिभिरित्युक्तमिति ॥ ११ ॥

भक्तैरिन्द्रियाधीनत्वेनेन्द्रियाणां च स्वाभिमानिदेवताधीनत्वेन तत्प्रसादमन्तरेण इन्द्रियाणामात्माधीनत्वेन भगवत्कथानुपपत्तिरित्याशङ्क्य भगवद्भक्त्या देवप्रीतिरपि तदधीनानुवृत्तिभावेनाह । यस्येति । व्यतिरेकमपि हरौ भक्तिः काऽपीत्याह । हरावित्ति । महतां गुणा असत्यसङ्गे बहिःशब्दादिविषये धावतो नैवावशिष्यते तस्मान्मनुष्यैरित्यतो भावत इति ॥ १२ ॥

• भगवद्भक्त्याभिमानिदेवप्रीतिमुपपादयति । हरिर्हीति । आत्मा जीवनः अत्रापि व्यतिरेकमाह । हित्वेति । महान्तमनात्मानमात्मीयं हरिं हित्वा यदि गृहे सज्जते बहुकालं जीवति तदा वयसा आयुषा दम्पतीनां महत्त्वं न गुणतः गुणानां महत्त्वं हरिभक्त्यैवेत्यर्थः ॥ १३ ॥

उपसंहरति । तस्मादिति । यस्मादिदं रजोगुणादिमूलं तस्मान्नृसिंहपादं भजतेत्यन्वयः संसृतिचक्रवालं संसारप्रवृत्तिहेतुभूतम् ॥ १४ ॥

कामदेवस्वरूपेण कामदेवसन्निहितगृहस्थात्मरूपेण प्रजापतेर्दुहितृणां केतुमालवर्षपतीनां लक्ष्म्याश्च प्रियचिकीर्षयेत्यनेन हरेर्भक्तवत्सलत्वेन प्रयोजनं नान्यदिति दर्शितं एकपादुपादानवर्षसङ्ख्यानेन यानि अहोरात्राणि तैः षट्त्रिंशत्सहस्रैः परिसङ्ख्यातं गमनं यासां तास्तथा तासां महापुरुषो हरिरस्त्रस्य महास्त्रं तस्मै सुदर्शनचक्रतेजसा व्यसवः गतप्राणाः ॥ १५ ॥

उत्तम्भितमूर्ध्वं नीतं सुभगं सुन्दरमिन्द्रियाणि रमयते हृषीकाणामिति शेषः ॥ १६ ॥

—————

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मागारेति । तदेवोपपादयति । यः प्राणवृत्त्यादिलक्षणः स यथा सिध्यति तथेन्द्रियप्रियता न सिध्यति तद्वत् तारतम्ये सत्यपि यदि नः सङ्गः स्यात् तद्गृहादिष्वन्येषु च सर्वथा मा स्यात् किन्तु भगवत्प्रियेषु स्यादेवेत्यर्थः । प्राणवृत्त्या क्षुत्तृष्णाप्रशान्त्येत्यर्थः । आत्मवान् सङ्गरहितः ॥ १० ॥

यत्सङ्गलब्धं तीर्थभूतं मुकुन्दविक्रमं संस्पृशतां श्रवणेन्द्रियैरन्तर्गतोऽजः मानसं मलं हरति । अपि च श्रवणकथ्यादेशैनाकर्षति । अन्यत् टीकया च समम् अङ्गजं कामं च हरति भगवत्येत्यन्वयः ॥ ११ ॥

किञ्च । यस्येति । सुरा भगवदादयः सर्वैर्गुणैरिति यदृच्छयैवेत्यर्थः । समासते वशीभूय तिष्ठन्ति ॥ १२ ॥

हित्वेत्ययमर्थः तं हित्वा यदि गृहे सज्जते तदा यदि महानुच्यते तदा दम्पतीनां कामार्थे युग्मीभूतस्त्रीपुंसानां वयसा यौवनमात्रेणापि महत्त्वमादरो दृश्यते । द्वयोर्भूतोः परस्परमादरः स्यात् एकत्र तु एकत्रैवेति अर्थान्तरे तु नृणामादरमात्रेणैव चरितार्थता स्यात् किं दम्पतीग्रहणेन दम्पत्योः पुरुषमहत्त्वं च वयसेत्यनन्वितं स्यात् ॥ १३ ॥ १४ ॥

लक्ष्मीस्तु दास्यसम्बलितशुद्धिरसेन स्तौतीत्याह । केतुमाल इत्यादिना । एवमग्रेऽप्यनुसन्धेया तत्र पुरुषायुषेति कथनसमकालकलियुगापेक्षयोक्तम् ॥ १५ ॥ १६ ॥

— ——

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मन्त्रं जपित्वा प्रार्थयते । स्वस्तीति । विश्वस्य स्वस्तिप्रार्थनेन खलस्यापि भवेत् । तच्च साधुपीडां विना न स्यादित्यत आह । खलः प्रसीदतां क्रौर्यं त्यजतु साधुसर्वाद्युतानामपि परस्परवैराणां भूतानां परस्परमत्यं विना स्वस्ति न भवेदित्यत आह । ध्यायन्विति । तदपि विषयासक्तिमतां विषयभोगं विना स्वस्ति न स्यादित्यत आह । मनश्चेति । अतुमनासक्तिः तदपि भक्तिं विना अभद्रमत्याहेत्यत आह । मयीति । श्रीकृष्णे नो सम्बन्धिनां निष्कामानामेव मतिरहैतुकी निष्कामा सती आविशतां ननु तिष्ठतामेवेत्यर्थः । अत्र अधोक्षज इति पदोपन्यासाभावात् अधोक्षजात् अन्यः भगवान् नृसिंहादिरित्युक्तेर्न च सर्वभूतो ब्रह्मसूत्राणां अन्यत्वप्रसङ्ग इति वाच्यम् । अधोक्षजे भागवतत्वादित्यतस्तदा तदैव तावतामनन्तानामप्येषां जीवानां प्रसन्नादिति ॥ ९ ॥

अत्रापत्यदारासक्तेश्च यद्यपि सत्सङ्गं सङ्गः स्वाभाविकस्तदपि सत्सङ्गस्य भावत्वात् तत्रापि सति दुःसङ्गः क्व पलायेतेत्याह । मेति । नोऽस्माकं यदि भगवत्प्रियेषु सङ्गः स्यात्तदा अगारादिषु नैव स्यात् स्नात एव निष्कामानां अवश्यमायाणामित्यर्थः । तत्रागारादिरहितस्य जीविका क्व इति चेत् तत्र नेत्याह । य इति । प्राणवृत्त्या निर्वाहादिकेनैव सन्तुष्टः सन् आत्मवान् प्रशान्तिमान् । अदूरादिति । इन्द्रियप्रियतया निर्व्यूढमेवेत्यर्थः । यथा यदि भगवत्प्रियेषु सङ्गः स्यात्तदा अगारादिषु सङ्गो मास्तु । यतो भगवत्प्रियसङ्गे सति जीविका न स्यादिति प्राप्ताऽतीत्याह । य इति । यद्वा अगारादिषु सङ्गो मास्तु यदि भगवत्प्रियेषु

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सङ्गः स्यात्तदैव । भगवत्प्रियसंगाभावे सति भक्त्यमिद्धा असंगस्य ज्ञानजनकस्यापि वैफल्यमेवेति भावः । ननु तर्ह्यलमसंगेन केवलः साधुसंग एव प्रार्थ्यतां सत्यं तदपि असङ्गरहितः साधुसङ्गः शीघ्रफलप्रदो भवतीत्याह । न इति । लब्धभगवत्प्रियसङ्गः किञ्च यदि सङ्गः स्यात्तदा अगारादिषु मा स्यात् किन्तु भगवत्प्रियेषु स्यादिति व्याख्याने असङ्गादपि भगवत्प्रियसङ्गस्यापकृष्टत्वे व्यञ्जनयावगमिते भक्तिसिद्धान्तापगम उत्तरश्लोकार्थस्यासङ्गतिस्तुलयाम लवेनापीत्यादि वचनञ्च विरुद्ध्यत इत्याद्यवधेयम् ॥ १० ॥

भगवत्प्रियसङ्गस्य माहात्म्यमाह । येषां सङ्गादेव लब्धं निजवीर्यैभवं श्रीगोवर्द्धनधारणादिप्रभावोत्कर्षं सत्त्वशोधकत्वात्तीर्थं श्रुतिभिः संस्पृशतां कर्णगतस्यतां जनानां मानसमङ्कजं मनःसम्यन्धिनं कामं वासनामयमजः श्रीकृष्णो हरति दूरीकरोति अंशेन मानसं मनश्चाकर्षति । कीदृशः सन् श्रुतिभिः श्रवणेन्द्रियैरेव अन्तर्गतः सन् । अतः को मुकुन्दस्य विक्रमं गोवर्द्धनोद्धारणादिवीर्यं न सेवेतेति तस्य च मुकुन्दविक्रमस्य भगवत्प्रियसङ्गं विना दुर्लभत्वात्तस्यैवोत्कर्षः ॥ ११ ॥

मुकुन्दविक्रमसेवनस्य भक्तित्वात्तस्याश्च साधुसङ्गलभ्यायाः परमोत्कर्षत्वात्तद्वतो भक्तस्याप्युत्कर्षमाह । यस्येति । अकिञ्चना निष्कामा सर्वधर्मज्ञानवैराग्यादिभिः सह तत्रैव सम्यक्तया आसते वसन्ति सर्वदेवमयः स एव स्यात्तत्सेवैव सर्वदेवसेवेति भावः । यद्वा । सुरा इन्द्रियाधिष्ठातारो रुद्रादयः सर्वगुणैरेव सह नतु दोषैः सहेत्यर्थः । तेन तस्याहङ्कारादीनामिन्द्रियाणां दुरभिमानादयो दोषा नैव भवन्तीति भावः । अभक्तस्य तु महद्गुणा महतो भक्तिसमर्थस्य ये निर्दोषा गुणास्ते कुतः यदि च शास्त्रज्ञत्वादयो गुणाः स्युस्तदा स्वल्पेर्ष्यामत्सरादिदोषसहिता एव स्युः । कुतः असति सद्भिर्निन्द्ये अविद्यमाने वा बहिर्लाभप्रतिष्ठादिसुखे मनोरथेनापि धावतः । यद्वा । समासते इति सुरा इन्द्रियाधिष्ठातारोऽन्यत्र सांसारिकलोके संसारप्रवर्त्तकत्वेन दोषैरेव सहासते ज्ञानिलोके नित्यमध्यात्मादिलयभावनायैव न सम्यगासते किन्तु अस्मत्त एव ज्ञानमवाप्य पुनरस्मानेव संजिहीर्षोरस्मिन् कृतघ्ने पुंसि स्थिता वयमद्य श्वो वा मरिष्याम एवेति सत्रासोत्कम्पमेवासते भक्तजने तु प्रतिदिनं भगवन्माधुर्यं पश्यत्स्वात्मोदर्कं संचारयति सति सर्वगुणैरेव समासते यथं कृष्णाय सजातयः प्राकृता अप्यप्राकृताः कृष्णस्पर्शसंयोगात् कालयोः प्रातादिव्यजातिरूपगुणा नित्यमेव भगवन्माधुर्यामृते विहरन्तोऽत्र पुंसि नूतनातिमृत्यवो भवामेति सानन्दचमत्कारं निश्चली-भवन्तीत्यर्थः अन्यत् समानम् ॥ १२ ॥

ननु भक्तिराहित्यादेव गृहे सज्जतां शास्त्रज्ञत्वादिगुणवतां लोके महत्त्वं दृश्यते सत्यं तत्तु वस्तुत उपहासास्पदमेवेति महतकमाह । हरिर्हीति । तोयमिश्रितमितिकश्चित् झषजातिर्यथा तोयमपि हित्वा वाहित्रादिषु सृष्टार्थं प्रवेश्य जीवन्मृतो भवति तथैव हरिविमुखो जीवन्मृत एव स न तु महानिति भावः । तदपि यदि लोके महान् स्यात्तदा वयसा यौवनेनैव दम्पतीनां यथा महत्त्वं तथा गुणोदयस्योऽधेषा परस्परमादरस्तथा न तु गुणेनापि बालयोः दर्शनपूजायाश्च यौवनविशिष्टावेव दम्पती वस्त्रालङ्कारादिभिरधिकं पूज्येते तथा वृद्धाविति ॥ १३ ॥

रजस्तृष्णा रागोऽभिनिवेशः । संसृतेश्चक्रवालं मण्डलरूपं गृहमध्य एव संसृतिस्तिष्ठतीति भावः । भजतेत्यसुरान् प्रत्युपदेशः ॥ १४ ॥

कामेन कन्दर्पविलासेन दीव्यतीति कामदेवस्तत्स्वरूपेण भगवानास्त इति शेषः । "सम्वत्सरो वै प्रजापतिः" इति श्रुतेः प्रजापतिः सम्वत्सरात्मकः कालस्तदभिमानी देव एव तस्य दुहितृणां पुत्राणाञ्च रात्रिदिवसाभिमानिनां देवानां प्रियचिकीर्षया पुरुषायुर्वेति कथनसमकालकलियुगापेक्षयोक्तेर्वर्षशतेन यान्यहोरात्राणि तैः परिसङ्ख्या गणना येषां षट्त्रिंशत्सहस्राणामित्यर्थः । यासां पतिमतीनां दुहितृणां दिवससहितानां रात्रीणामित्यर्थः । महास्त्रतः कालचक्ररूपात् गर्भाः क्षणलवाद्यात्मकाः कालाः । यद्वा । वर्षशोऽज्यानि लोकानां प्रारब्धकर्मफलान्येव ता रात्रीर्निमित्तीकृत्योद्भूतत्वात्तासामेव गर्भा इत्युत्प्रेक्षन्ते तथा तेषां सम्वत्सरात्मकस्थूलकालान्ते भोगेन क्षय एव गर्भपातत्वेनोत्प्रेक्षितः । अहोरात्राभिष्ठात्र्यो देवतास्ताः प्राकृतलोकवर्तिन्यो भगवन्तमुपास्य वैकुण्ठ एव तद्भक्तानामनश्वरप्रेमसेवासुखनिमित्तरूपा भविष्यन्तीत्युपासनाफलञ्च द्रष्टव्यम् ॥१५॥

अतीव सुललितो यो गतिविलासः विशेषेण लसितोऽतिकमनीयो रुचिरहासलेशयुक्तोऽवलोकश्च ताभ्यां या लीला तया कीदृश्या किञ्चिदुत्तम्भितेन सुन्दरचक्रमण्डलेन सुभगं यद्वदनारविन्दं तस्यापि श्रीर्यतः तया स्वीयया रमां रमयन् रमासम्बन्धिन्या च तया इन्द्रियाणि स्वीयानि रमयते ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

खलः प्रसीदतां खलतां त्यजतु भूतानि शिवं मङ्गलं परस्परं ध्यायन्तु तेषां मनः भद्रं कल्याणं भजताद्भजतु नोऽस्माकं मतिः अहैतुकी फलाभिसन्धिरहिता सती अधोक्षजे त्वय्येव आवेश्यताम् प्रविष्टा भवतु ॥ ९ ॥

प्राणावृत्त्या यथा जाभेन ॥ १० ॥

यत् येषां भगवत्प्रियाणां सङ्गाल्लब्धं निजमसाधारणं मुकुन्दसाक्षात्कारकरं वीर्यं बलमेव धैभवं सामर्थ्यं यस्य तन्मुकुन्दविक्रमं श्रुतिभिः श्रुतिः श्रवणं बहुवचनेन वागादिसङ्ग्रहः श्रवणवर्णनमननादिभिः संस्पृशतां सेवमानानां जनानाम् अन्तर्गतः हृद्गतोऽजः श्रीमुकुन्दः मानसम्मनोगतं सर्वाशुभबीजभूतम्मलं हरति तीर्थजलादिरूपन्तु मुहुः संस्पृष्टामङ्गजम्मलं केवलं हरति तान् भगवत्प्रियान् को न सेवेत ॥ ११ ॥

अकिञ्चना भगवदितरफलविषयरहिता भगवद्भक्तिरस्ति तत्र तस्मिन् भगवद्भक्ते सर्वधर्मज्ञानादिसाधनसहितैर्गुणैः फलैः सह सर्वे सुराः फलदाः सम्यगासते सानुकूला भवन्ति असति ...शे स्वप्नादौ बहिर्जागरे धावतः हरावभक्तस्य तु महान्तो गुणा येभ्यस्ते सुराः सर्वगुणैः सह सानुकूलाः कुतः ॥ १२ ॥

झषाणां तोयमिव शरीरिणां हरिरात्माश्रयस्तं हित्वा महानपि यदि गृहे सज्जते तदा दम्पतीनां मिथुनानां क्षुद्रादीनामिव वयसा महत्त्वं तस्यापि भवति नतु हेयोपादेयविवेकादिना ॥ १३ ॥

तद्भगवतो मायामयं रूपं परमसमाधियोगेन रमा देवी सम्वत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताऽहस्सु च तद्भर्तृभिरुपास्ते इदं चोदाहरति ॥ १७ ॥

ॐ ह्रां ह्रीं ह्रुं ॐ नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय छन्दोमयायान्नमयायामृतमयाय सर्वमयाय सहसे ओजसे बलाय कान्ताय कामाय नमस्ते उभयत्र भूयात् ॥ १८ ॥

स्त्रियो व्रतैस्त्वा हृषिकेश्वरं स्वतो ह्याराध्य लोके पतिमाशासतेऽन्यम् ।
तासां न ते वै परिपान्त्यपत्यं प्रियं धनायूंषि यतोऽस्वतन्त्राः ॥ १९ ॥
स वै पतिः स्यादकुतोभयः स्वयं समन्ततः पाति भयातुरं जनम् ।
स एक एवेतरथा मिथो भयं नैवात्मलाभादधिमन्यते परम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

असुरानुपदिशति । तस्मादिति । रजआदिमूलं गृहं हित्वा अकुतोभयं नृसिंहपादं भजेतेति ॥ १४ ॥

लक्ष्म्याः प्रियचिकीर्षया कामदेवरूपेण आस्ते इतिशेषः "सम्वत्सरो वै प्रजापतिः" इति श्रुतेः प्रजापतेः सम्वत्सरस्य दुहितृणां राऽयभिमानिनीनां देवतानाम् पुत्राणां दिनाभिमानिनां च प्रियचिकीर्षया यासां दुहितृणाम् महाश्चर्यं चक्रम ॥ १५ ॥

अतीव सुललितगत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो मन्दस्मितं तेन सहितोऽवलोक एव लीला तया किञ्चिदुत्तम्भितेन सुन्दरभ्रूमण्डलेन सुभगस्य वदनारविन्दस्य श्रिया रमां रमयन् इन्द्रियाणि रमयते ॥ १६ ॥

भाषाटीका ।

सब संसार का मङ्गल होवै दुष्ट की बुद्धि निर्मल होवै सब प्राणिआपस में मन से सब का भला चाहैं हे अधोक्षज ! हमारा मन शान्ति को प्राप्त होवै हमलोगों की बुद्धि निष्काम होकर परमेश्वर में लगै ॥ ९ ॥

हम लोगों का सङ्ग कभी स्त्री पुत्र धन आदि में मत होवै यदि होवै तो भगवद्भक्तों के साथ होवै जो ऐसा विरक्त है वह प्राणवृत्ति भोजनादि मात्र से सन्तुष्ट होकर आत्मज्ञानी होने से थोड़े दिन में सिद्ध होजाता है इन्द्रियों की प्रीतिवाला कभी नहीं सिद्ध होता है ॥ १० ॥

जिन महा पुरुषों के सङ्ग से प्राप्त भगवत चरित्र को बारम्बार चिंतन करने वालों के मन को साक्षात् भगवान् कर्णों के द्वारा हृदय में आकर पवित्र कर देते हैं वह मुकुन्द भगवान् का चरित्र उत्तमतीर्थ है तिसको कौन नहीं सेवन करेगा और पुष्करादि तीर्थ तो देह के मल को ही बारम्बार सेवने से छुटाते हैं ॥ ११ ॥

जिस पुरुष की भगवान् में निष्काम भक्ति है तिसके ही पास सबगुणों के सहित सब देवता रहते हैं जो हरि का भक्त नहीं है बाहिर के असत् पदार्थों में मनोरथ को दौड़ाता है उस के पास महापुरुषों के गुण कहां से आवेंगे ॥ १२ ॥

हरिभगवान् तो सब प्राणियों के जीवन के हेतु हैं जैसे कि मछलियों को जलअति प्रिय है सब महात्मा होकर भी उन परमात्मा को छोड़ कर यदि गृहादि में आसक्त होजावें तो उन स्त्री पुरुषों का केवल अवस्थाही से बड़ापन है और गुण कुछ नहीं होंगे ॥ १३ ॥

तिस कारण से अनुराग दुःख क्रोध मान इच्छा भय दीनता मनचिन्ता इन सबों का कारण संसार बढ़ानेवाला जो घर तिस को छोड़कर सबप्रकार से निर्भय श्रीनृसिंहजी के चरण को भजो इस प्रकार स्तुति करते हैं ॥ १४ ॥

केतुमाल वर्ष में भी लक्ष्मी की प्रसन्नता के वास्ते और प्रजापती के पुत्र तथा पुत्री जोकि उसवर्ष के छत्तीसहजार संख्या वाले हैं श्रीनारायण के अस्त्र कालचक्र से मन में डर होने से जिन के गर्भ ध्वस्त होकर मरकर सम्वत्सर के पीछे गिरते हैं ऐसे जो रात्रि दिन तिन के वास्ते भी भगवान् कामदेव रूप से विराजते हैं ॥ १५ ॥

अति सुन्दर जो चाल का क्रीड़ा तिस से जो मनोहर हास का लेश तिस के सहित जो देखना तिस की लीला से कुछ उठाया हुआ जो सुन्दर भ्रूमंडल तिस से सुन्दर जो वदनारविन्द तिस की शोभा से लक्ष्मी को प्रसन्नकरते हुये भगवान् अपनी इन्द्रियों कोभी तृप्त करते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तद्भर्तृभिर्दिवसाभिमानिभिरुपेता ॥ १७ ॥

सर्वगुणविशेषैः श्रवणमननादिभिर्विलक्षितो लक्ष्यीकृत आत्मा यस्य आकूतीनां क्रियाणाम् । चित्तीनां ज्ञानानाम् । चेतसां सङ्कल्पाध्यवसायादीनाम् । विशेषाणां तत्तद्विषयाणां षोडशकला अंशा एकादशेन्द्रियपञ्चविषयलक्षणा यस्य । छन्दोमयाय वेदोक्तकर्मप्राप्याय । अन्नमयायाऽनेनोपष्टम्भत्वात् । अमृतमयाय परमानन्दाविष्कारत्वात् सर्वमयाय सर्वविषयत्वात् । सहसे ओजसे बलाय तद्रूपत्वात् ॥ १८ ॥

त्वत्कामेनैव त्वत्सेवकत्वादहं कृतार्थोऽस्मि । अन्यकामनया तु त्वामर्चन्त्यो न परिपूर्णमनोरथाः स्युरित्याह । स्त्रिय इति । स्वत एव हृषीकाणामीश्वरं पतिं सन्तं त्वामाराध्य याः स्त्रियोऽन्यम्

या तस्य ते पादसरोरुहार्हणं निकामयेत्साखिलकामलम्पटा ।
तदेव रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाच्ञा भगवन् ! प्रतप्यते ॥ २१ ॥
मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यन्त उग्रं तप ऐन्द्रियेधियः ।
ऋते भवत्पादपरायणान्न मां विन्दन्त्यहं त्वद्धृदया यतोऽजित ! ॥ २२ ॥
स त्वं ममाप्यच्युत ! शीर्ष्णि वन्दितं कराम्बुजं यत्त्वदधायि सात्वताम् ।
बिभर्षि मां लक्ष्म वरेण्य ! मायया क ईश्वरस्येहितमूहितुं विभुरिति ॥ २३ ॥

रम्यके च भगवतः प्रियतमं मात्स्यमवताररूपं तद्वर्षपुरुषस्य मनोः प्राक्प्रदर्शितं स इदानीमपि महता भक्तियोगेनाराधयतीदं चोदाहरति ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पतिं प्रार्थयन्ते परिकामानां हि कामाराधनं व्रतेषु प्रसिद्धम् तासामपत्यादीनि ते पतयो न पातुं शक्ताः ॥ १९ ॥

अतस्ते पतय एव न भवन्तीत्याह । स वा इति । स चैवम्भूतः पतिर्भवानेव यः स्वयं नार्तो यो भवानात्मलाभात्परमन्यदधिकं न मन्यते । इतरथान्यापेक्षितत्वेन न स्वतन्त्रता । स्वतन्त्रत्वाभावे च भगवल्लेखवर्णानामिव मिथो भयं स्यादित्यर्थः ॥ २० ॥

किञ्च । निष्कामभजनेऽप्रार्थिता एव सर्वे कामा भवन्ति सकामभजने तु कामितमात्रमनित्यं चेत्याह । या स्त्री तस्यो-फलस्वरूपस्य तव पादसरोरुहस्यार्हणं पूजामेव कामयेत फला-न्तरं साखिलेषु कामेषु लम्पटा सर्वान्कामान्प्राप्नोतीत्यर्थः । ईप्सित-मीप्सितः फलान्तरमात्रमपेक्षितः सन्नर्चितस्तर्हि तदेवैकं रासि ददासि । किञ्च । यद्यतः फलभोगानन्तरं भग्ना याच्ञा याचितोऽर्थो यस्याः सा प्रतप्यते दुःखं प्राप्नोति तदेव रासि ननु नित्यम् ॥ २१ ॥

ननु समाराधितः कुतः सर्वकामप्राप्तिस्त्वमेव कामार्थिभिः सेव्यसेऽत आह । मत्प्राप्तये ब्रह्मादयस्तपस्तप्यन्ते कुर्वन्ति । कथं-भूताः । ऐन्द्रियेधियः भोगेषाम् अलुब्धमनसः तथापि भवत्पा-दपरायणात्ते मां न विन्दन्ति मत्कटाक्षनिलमिता विभूतीर्न लभन्त इत्यर्थः । यतस्त्वय्येव हृदयं यस्याः साऽहं त्वत्परतन्त्रत्वा-त्त्वदनुवर्तिनामेव निजं कथयामि नान्यमित्यर्थः ॥ २२ ॥

ममापि कृपा यायते । स त्वमिति । मद्भजनं विना न कश्चि-त्पुरुषार्थः स त्वं … इति त्वया यत्कराम्बुजं सात्वतां भक्तानां शीर्षण्यधायि कृपया न्यस्तं तन्ममापि शीर्ष्णि निधेहीति शेषः । कथंभूतम् । वन्दितं सर्वकामवर्षित्वेन सद्भिः स्तुतम् न च मयि तवानादरः यतो हे वरेण्य ! मां वक्षसि लक्ष्म बिभर्षि । अहो चित्रंमतत् मयि केवलमादरमात्रं भक्तेषु तु परमा कृपाऽत ईश्वरस्य तव यन्मायया ईहितं तत्को वितर्कयितुं समर्थः ॥ २३—२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इदं वक्ष्यमाणमन्त्रवाक्यं चोदाहरन्ति जपन्ति बहुवचनं सम्व-त्सरदुहितृतत्पुत्राभिप्रायकं जप्यं मन्त्रमाह । ॐ भगवद्धृषीकेशार्थः पूर्ववत् हृषीकाणामिन्द्रियाणामीशाय नियन्त्रे सर्वैः प्रकृतिपुरुष-योरसम्भावनीयैर्गुणविशेषैः सत्यज्ञानादिभिः गाम्भीर्यादिभिः "सर्व-कर्मा सर्वकामः सर्वगन्धः सर्वरस" इत्यादिश्रुतिप्रसिद्धैर्विशेषैर्वि-नमाश्रयत्वेन वक्तुं प्रतिपादयितुमिष्टमात्मस्वरूपं यस्य तस्मै कल्याणगुणाश्रयत्वेन वेदान्तैः प्रतिपाद्यमानायेत्यर्थः सर्वत्राधि-करणार्थोऽत्रानुसन्धेयः आकृतीनां क्रियाणां चित्तीनां ज्ञानानां चेतसां सङ्कल्पाध्यवसायादीनां कर्मेन्द्रियज्ञानेन्द्रियमनोव्यापा-राणां विशेषः पृथिवी बहुवचनमाकाशाद्यभिप्रायकं पृथिवी-प्रभृतिपञ्चमहाभूतानां चाधिपतये नियन्त्रे इदं चाधिपत्यं न सत्यपि पृथग्भावे भृत्यनिरूपितनियन्तृभावस्य राज्ञ इव अपि-त्वात्मत्वप्रयुक्तमिति द्योतयितुं शरीरात्मभावनिबन्धनसामानाधि-करण्यमाह । षोडशकलायेति । षोडशकलाः पञ्चभूतानि मनः सहि-तान्येकादशेन्द्रियाणि एतत्स्वरूपाय तच्छरीरकत्वेनावस्थितायेत्यर्थः षोडशकला अंशा मूर्तयो यस्येति बहुव्रीहिर्वा एकादशेन्द्रियाणि च जगत्कारणत्वमाह । छन्दोमयाय छन्दः-प्रचुराय "तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद्" इति श्रुत्यर्थोऽत्र विवक्षितः एवं समष्टितत्त्वशरीरकत्वमभिधाय व्यष्टितत्त्वात्मकत्वमाह । अन्नमयाय अन्नमयशब्दोऽत्र व्यष्ट्यवस्था-तत्त्वसंघातात्मकदेहपरः तद्रूपाय व्यष्टिशरीरकायेत्यर्थः एवं व्यष्टि-समष्ट्यात्मकतत्त्वात्मकत्वमभिधाय … अधिकरणत्वेनाभिधत्ते । अमृतमयायेति । अमृतशब्दोऽत्र जीववाची परमात्मपर्यन्तः अमृतशरीरकायेत्यर्थः उत्क्रान्तिकालाद्यनवरा-तत्त्वादिप्रायेणाह । सर्वमयायेति । सर्वात्मकायेत्यर्थः किं बहुना तत्तद्वस्तुगतशक्तिरूपस्त्वमेवेत्याह । महसे मनःसामर्थ्यरूपाय ओजसे इन्द्रियशक्तिरूपाय बलाय देहशक्तिरूपाय सहसेऽदेहे-न्द्रियादाः तादात्म्यव्यपदेशः कान्ताय निरतिशयप्रीतिविषयाय कामाय स्त्रीषु निरतिशयप्रीतिविशिष्टाय ते तुभ्यमुभयत्र पुरस्तात्पृष्ठतश्च नमो नमः भूयादित्यर्थः ॥ १८ ॥

एवमिमं मन्त्रमुदाहरन्ती इति पत्नी लक्ष्मीः पतिशब्दप्र-वृत्तिनिमित्तपौष्कल्यविशिष्टत्वमाह । स्त्रिय इति । स्वतः हृषीकाणामिन्द्रियाणामधीश्वरमधिपतिं स्वतःशब्देनाधिपत्यस्य निरुपाधिकत्वं व्यज्यते एवंभूतं त्वां व्रतेनाराध्य लोके संसारे स्त्रियः अन्यं पतिमाशासते कामयन्ते ते चाशास्यमानाः पतयः तासां कामयमानानां स्त्रीणां प्रियं प्रीतिविषयमात्मा-पत्यधनायूंषि च न परिपान्ति न रक्षन्ति पातुमसमर्थत्वादिति॰

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जीवः तत्कुतः यतस्ते पतयः अन्यतन्त्राः कर्मवश्याः तेषां पतित्वं हि कर्मायत्तं न हि कर्मपरवशाः कर्मनिर्हरणे समर्था इति भावः एवं निरुपाधिकरक्षकत्वस्यैव पतिशब्दप्रवृत्तिनिमित्तत्वात्ते ते पतय एव न भवन्तीत्यभिप्रायः १९ ॥

एवमन्यत्र पतिशब्दोऽमुख्यवृत्त इत्युक्तं भगवति तु मुख्यवृत्त इत्याह । स वा इति । सः मन्त्रोक्तगुणसम्पन्नः भवान्पतिर्वै वैशब्दोऽवधारणे भवानेव पतिरित्यर्थः तथा च श्रुतयः ।

एष सर्वेश्वरः एष भूताधिपतिरेष भूतपालः ।

पतिं विश्वस्यात्मेश्वरं न तस्य कश्चित्पतिरस्ति लोके ।

इति सूत्रं चैतद्विषयकम् "अनन्याधिपतिः" इति कुतो मम निरुपाधिकपतित्वं तत्राह । अकुतोभयः नास्ति कुतोऽपि भयं यस्य सोऽकुतोभयः अकर्मवश्यत्वेन कर्मकृतपारतन्त्र्याभावान्निरुपाधिकरक्षकत्वं त्वय्येवेति भावः अत एव भयातुरं जनं समन्ततः पाति सर्वेभ्योऽपि भयेभ्यस्त्रायते स च निरुपाधिकपतिर्भवानेक एव इतरथा ईश्वरबहुत्वे मण्डलेश्वराणामिव मिथोऽन्योऽन्यं भयं स्यात् यतो भवानेक एव पतिरत एव भवानात्मलाभात्परमन्यदपि अधिकं न मन्यते आत्मनो लाभः परमात्मशेषत्वज्ञानं तस्मिन्नेव हि सत्यात्मनः सत्ता इतरथासत्प्रायतैव तन्मात्रमेव चेतनसंरक्षणे भवानपेक्षते न तु ततोऽन्यदित्यर्थः ॥ २० ॥

तदेव प्रपञ्चयति । येति । अखिलेषु कामेषु पत्यपत्यधनायुरादिषु लम्पटा आसक्ता सती या स्त्री तस्योक्तविधस्य ते तव पादसरोरुहयोरर्हणमाराधनं न कामयेत कुर्यात्तस्यास्तदेवेप्सितं पत्यपुत्रादिकं क्षुद्रं फलमर्चितस्त्वं रासि ददासि "रा दाने" इति धातुः कथंभूतः त्वमीप्सितः प्रीतिविषयः पुरुषार्थरूपः सर्वविधपुरुषार्थरूपं त्वामपुरुषार्थरूपं मत्वा त्वत्तोऽन्यं यत्किञ्चित्पुरुषार्थत्वतः प्रार्थयते तस्यास्तदेव पुरुषार्थाभासं ददासि न तु स्वात्मानमित्यभिप्रायः यतस्त्वत्तोऽन्यत्पुरुषार्थरूपमत एवमज्ञा याच्ञा याचितार्थो यस्यास्तथाभूता सती हे भगवन् ! कामदेव ! प्रतप्यते दुःखिता भवति न तु लब्धात्माहमिति नितरां सुख्यतीत्यभिप्रायः ईप्सितार्चितामिति पाठान्तरं तदा इष्टत्वेन पूजितं प्रकृतमीप्सितमिति यावत् तुच्छपुरुषार्थरूपमपि निरतिशयपुरुषार्थरूपत्वेन मन्यमानं पत्यपत्याद्यन्यतमं सांसारिकमेव फलं रासीत्यभिप्रायः ॥ २१ ॥

ननु लक्ष्मीर्हि लोके पुरुषार्थत्वेन प्रसिद्धा नत्वहं तत् कथमेवमुच्यते तत्राह । मत्प्राप्तय इति । ऐन्द्रियं शब्दादौ धीर्येषां तथाभूताः कण्ठे कालवदलुक्समासः अजो ब्रह्मा ईशो रुद्रः सुरा इन्द्रादयः असुराश्च ये यद्यपि मत्प्राप्तये मां प्राप्तुं भवत्पादपरायणादृते भवत्पादारविन्दशरणवरणं विनान्यदुग्रं तपः तप्यन्ति पाकं पचतीतिवन्निर्देशः तपः कुर्वन्तीत्यर्थः तथापि मां न विन्दन्ति न प्राप्नुवन्ति कुतः हे अजित ! यतोऽहं त्वद्धृदया तव हृदया हृत्मया प्राप्ता त्वद्धृताहं त्वदपृथक्सिद्धत्वेन मम त्वदन्तर्गतत्वेनैव पुरुषार्थरूपत्वं नतु पृथगित्यर्थः यद्वा । त्वन्निरतिशयपुरुषार्थरूपा त्वं हृदये हृद्गतो यस्यास्तथाभूताहं त्वय्येव हृदयं यस्याः सेति निरतिशयपुरुषार्थरूपस्य तव नित्यं मद्धृदयत्वेनाहमपि पुरुषार्थरूपा भवामि नतु स्वत इत्यर्थः अतो ये भवत्पादारविन्दपरायणास्तानेवाहमनुवर्तेयामीत्यभिप्रायः ॥ २२ ॥

इदानीं तत्कृपां प्रार्थयते । स त्वमिति । यः पुरुषार्थरूपः स त्वं हे अच्युत ! वन्दितं सर्वपुरुषार्थप्रदत्वेन स्तुतं तत्करामबुजं मम शिरसि निधेहि कथंभूतं यत्स्मात्घतामेकान्तिनां शीर्ष्णि अधायि कृपया निहितं मत्पूर्णकृपाविषया त्वमप्यपूर्वं किमिदं प्रार्थयसे तत्राह । हे वरेण्य ! मायया मायामयरूपेण श्रीवत्सेन सह मां चिन्हं वक्षसि बिभर्षि चिन्हरूपेण बिभर्षीत्यर्थः श्रीवत्सस्य प्रधानात्मकत्वं "श्रीवत्सस्थानमपरमनन्तेन समाश्रितम् । प्रधानबुद्धिरप्यास्ते गदारूपेण माधवम्" इति भगवता पराशरेणोक्तं माययेति दृष्टान्तार्थः यथा श्रीवत्सं तथा लक्ष्म तथाहमपि लक्ष्म अतः सात्वतस्य शिरसि कृपास्त्येवेत्यभिप्रायः "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः । ज्ञानी त्वात्मैव मे मतम्" इत्युक्तभगवदभिप्रायमालोच्य शीर्ष्णि सात्वतां यदधायीत्युक्तम् अत्र कारणं न कोऽपि वक्तुं प्रभुरित्याह । ईश्वरस्य तवेहितं चेष्टितमभिप्रेतं वा ऊहितुं कथयितुं को वा प्रभुः समर्थः न कोऽपीत्यर्थः ॥ २३ ॥

एवं केतुमाले उपास्योपासकादिकमुक्त्वा रम्यके तदाह । रम्यके चेति । प्रागयुगान्तसमये मनो रम्यकवर्षाधिपतेः प्रदर्शितं यन्मात्स्यं रूपं भगवतः प्रियतमं तदेव रूपं स एव मनुः रम्यके वर्षे इदानीमपि महताविच्छिन्नेन भक्तियोगेनाराधयन्नास्ते ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मायामयमिच्छामयं रमा देवी भगवतो रूपमुपास्त इत्यस्येदं तात्पर्यमवगन्तव्यं रतिसन्निहिता रमा देवी कामान्तःस्थितं हरेः रूपमुपास्ते रतिस्तु विष्णोः प्रतिमास्थानीयं कामदेवम्

कामदेवस्थितं विष्णुमुपास्ते श्री रतिस्थिता

कामदेवं रतिश्चापि विष्णोस्तु प्राकृतां तनुम्

इति स्मृतेः अनेन मायामयमित्यस्य प्राकृतमित्यर्थः सूच्यते सम्वत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरहस्सु तासां भर्तृभिरुपेता ॥ १७ ॥

ये ये सर्वे विशेषा व्यावर्तकधर्मास्तांस्तान् विदन्तीति सर्वविशेषविदो ब्रह्मादयस्तेषां क्षेत्रमावासस्थानमात्मा देहो यस्य स तथा तस्मै आकूतीनामभिप्रायाणां पूर्वानुभवसंस्काराणां वा चित्तानां स्मरणाकारणानामन्तःकरणविशेषाणां चेतसां बुद्धिवृत्तानां वृत्तिविशेषाणां चाधिपतये सर्वमयाय सर्वोत्तमाय ऊर्ध्वान्तर्बहिश्च भूयाद्रत्ताया इति शेषः ॥ १८ ॥

लोके विद्यमानाः स्त्रियो नानाव्रतैरिन्द्रियस्वामिनं त्वामाराध्य त्वत्तोऽन्यं पतिमाशासते प्रविशन्ति प्राप्नुवन्तीत्यर्थः त्वमेतेन व्रतलक्षणाराधनेन हेतुना तासामपत्यं प्रियं सतोरमुपभोगसाधनं धनान्यायुष्यहोरात्रगमागमलक्षणानि रक्षसि कुतस्ताः स्त्रियः पतित्वेन वृताः पुरुषाश्चास्वतन्त्रास्तत्पालने शक्तिहीना यतोऽतस्तत्पतित्वं व्यावहारिकमित्यर्थः ॥ १९ ॥

तर्हि मुख्यपतिः क इति तत्राह । स वा इति । यः स्वयमकुतोभयः सन् भयातुरं जनं समन्ततः पाति स वै स एक पतिः स्यात् नन्वेवं तर्हि बहवः किं न स्युरिति तत्राह । एक इति । भवानिति शेषः इतरथा बहूनां पतित्वे मिथोऽन्योऽन्यं भयं स्यान्मण्डलेश्वराणामिवेति शेषः अतस्त्वमेक एव पतिरित्यर्थः इतोऽपि त्वल्लाभ

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एव पुरुषार्थं इत्याह । भजन्निति । त्वां भजन्पुरुष आत्मलाभात् त्वल्लाभात्परमन्यमभ्यधिकं नैव मन्यते अभावादिति शेषः "एकमेवाद्वितीयम्" इतिश्रुतेः ॥ २० ॥

अतोऽन्यस्यैव पुरुषार्थप्राप्तिहेतुत्वादित्याह । य इति । निरुपमचरितपतिर्यस्तस्य ते तव यः पादसरोरुहयोरर्हणां पूजनं नितरां कामयेत्सोऽखिलकामलम्पटः अपरिचिताशेषपुरुषार्थप्राप्तिपटुतरः हे ईप्सितप्रद ! अतस्त्वदर्चितमेवाभीप्सितं नान्यदर्चनं विशिष्टफलहेतुत्वात् व्यतिरेकमुखेन निर्धारयति । यद्यपीति । अयं भावः यत्कामोऽन्यपादार्चनं करोति तस्मात्फलानुदयात् प्रतप्यत इति यद्यस्मात्तस्मादिति चशब्देन पूर्वमर्चितमिदानीमर्च्यते उत्तरत्रार्चिष्यत इति सूचयति ॥ २१ ॥

अन्यपादार्चकस्य भग्नयाच्ञात्वमत्र द्रष्टव्यमित्याह । मत्प्राप्तय इति । ये पेन्द्रियधियः इन्द्रियविषये धीर्येषां ते तथा शब्दादिविषयरागान्धीभूतबुद्धयः ससुरासुरादय उग्रं तपस्तप्यन्ते ते मां न विन्दन्ति मत्तोऽभीष्टफलं न विन्दन्तीत्यत्र कारणमाह । ऋत इति । भवत्पादपरायणमर्चनमृते त्वच्चरणार्चनाभावः कारणं हेत्वन्तरमाह । अहमिति । अजित ! अहं त्वद्धृदया यतस्तस्मादिति शेषः त्वयि हृदयं यस्याः सा तथा यस्त्वत्पादार्चकस्तस्य मत्प्रसादः यो न तस्य नास्तीति अयं भावोऽसंप्रज्ञातस्त्वया मया ज्ञायत इति ॥ २२ ॥

स्वशिरसि नित्यधृतकराम्बुजत्वेऽपि भगवत्पूजकैरेवं प्रार्थनीयमित्याशयवत्याह । स त्वमिति । यत्कराम्बुजं सात्वतां शीर्ष्णामिति शेषः शिरस्स्वधायि येन त्वया स त्वं मम मूर्द्धन्यपि तत्कुर्वित्यन्वयः । किञ्च सर्वस्मान्मयि तव प्रसादाधिक्यमस्तीति द्योतयति । बिभर्षीति । हे वरेण्य ! त्वद्वक्षसि मा मां लक्ष्म चिन्हं बिभर्षि यदतो मायेश्वरस्य ईहितमूहितुं को विभुर्न कोऽपि समर्थः ॥ २३ ॥

मनोर्वैवस्वतस्य ॥ २४ ॥ २५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मायामयं कृपाप्रचुरम् ॥ १७ ॥

षोडशशक्त्यधिष्ठात्रे वेदाधिष्ठात्रे पार्थिवबलदायकभोज्यशक्त्यधिष्ठात्रे दिविजबलदायकभोज्यशक्त्यधिष्ठात्रे किं बहुना सर्वशक्त्यधिष्ठात्रे अत एव सर्वसहमाद्यधिष्ठात्र इति क्रमेण ॥ १८ ॥

आत्मनस्तस्य स्वरूपस्यैव लाभात् । परमन्यत् सेवादिकं नाधिकं मन्यते । यथाह श्रीप्रह्लादः । "यस्त आशिष आशास्ते न स भृत्यः स वै वणिक्" इत्यादौ "नान्यथेहावयोरर्थो राजसेवकयोरिव" इति ॥ १९ ॥ २० ॥

अखिलकामलम्पटेति सर्वकामस्यापि कामनीयार्थस्य प्रतिष्ठा हि त्वत्पादसरोरुहमिति ॥ २१ ॥

यद्यजादयोऽपि विषयधियो भूत्वा मत्प्राप्तये मदंशभूतप्राकृतसम्पत्तये तप्यन्ते तदा मां मदंशभूतां सम्पत्तिं न विन्दन्ति किन्तु प्राकृतीमेव विन्दन्तु नामेत्यर्थः । ऋत इति । यदि तेषु कोऽपि त्वत्पादपरायणो भवति तदा तु स विन्दत्येवेत्यर्थः । त्वत्हृदयेति गर्द्धातेः ॥ २२ ॥

स त्वमिति । देव्योक्तिः यस्त्वया यत् कराम्बुजं स्वीकारव्यञ्जकं सात्वतानां शीर्ष्णि अधायि तन्ममापि तादृशभक्तिहीनायाः शीर्ष्णि अधायीत्येकमाश्चर्यम् । किञ्च । स तादृशस्त्वं मायया कृपया मा मां वक्षसि लक्ष्मरूपत्वेन बिभर्षीति ततोऽपि परमाश्चर्यम् । तस्मात् क ईश्वरस्येति । मत्स्यत्वेनानुवर्णयिष्यति प्रत्याह । प्रियतममिति । तदपि भगवतः परमस्वरूपमेव 'जानीया'दित्यर्थः । अथाप्यात्मना सन्निधीयत इति सामान्योक्तेराराधयतीत्यत्र "सन्निहितं सन्तमिति ज्ञेयम् ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

मायामयं कृपामयं मायाया जीवाविद्याया आमयो रोगो यतस्तमिति वा रात्रिषु प्रजापतेर्दुहितृभिः राज्यभिमानिनीभिर्देवताभिः सह अहःसु तासां राज्यभिमानिदेवतानां पतिभिर्दिवसाभिमानिभिर्देवैः सहितेत्यर्थः ॥ १७ ॥

कृपामयत्वमेव विवृणुती मन्त्रं जपन्ती एतन्मन्त्रोपासकोऽन्योऽप्येवं स्वसम्बन्धेन मन्त्रार्थं भावयेदिति व्यञ्जयन्ती प्रणमति कान्ताय मत्पतये कामाय नम इत्यन्वयः । देवपदानुक्तिः पत्युः सम्पूर्णनामोच्चारणानौचित्यात् । अन्यस्तु लक्ष्म्या दासीभावेनैवात्मानं ध्यात्वा मन्त्रमिममुच्चारयेदिति सम्प्रदायः । हृषीकेशाय स्वसौन्दर्यादिना मन्नेत्रादीन्द्रियाकर्षकाय मन्नेत्रादीन्द्रियमाधुर्यसम्भोक्त्रे इति वा स्वस्य तथा योग्यतायां हेतुः । सर्वगुणविशेषैरप्राकृतैर्गुणैर्धिलक्षिता विलक्षणीकृता आत्मानो देहमनोबुद्ध्यादयो भवन्ति यतस्तस्मै हृषीकेशत्वं विवृणोति । आकूतीनां मम कर्मेन्द्रियाणां चित्तीनां ज्ञानेन्द्रियाणां चेतसां चित्ताहङ्कारबुद्धिमनसां विशेषाणां तत्तद्वृत्तीनां तत्तद्विषयाणां वा अधिपतये स्वामिने तत्तन्माधुर्यास्वादिने अन्योपासकपक्षे अधिष्ठात्रे तेषामप्राकृतीकरणात् स्वयमेवाधिष्ठाता न तु दिगादिदेवसमूह इति भावः षोडशकलाय राकाचन्द्रतुल्यत्वात् पूर्णाय छन्दोमयाय वेदरूपेण स्वभक्त्युपदेष्ट्रे अन्नमयाय अन्नरूपेण साधकभक्तप्रतिपालकाय अमृतमयाय अमृतवदास्वाद्यरूपगुणलीलादिकाय मोक्षरूपाय च सर्वमयाय मम सर्वस्वरूपाय सहसे ओजसे बलाय त्वत्सेवायां मदीयेन्द्रियदेहसामर्थ्यप्रदाय उभयत्र इह लोके परलोके च ॥ १८ ॥

स्वयं निष्कामा सकामभक्तिमतीरन्याः स्त्रीः शोचति । स्त्रिय इति । स्वत एव हृषीकाणामीश्वरं पतिमपि त्वा त्वामाराध्य अन्यम् ॥ १९ ॥

पतिशब्दार्थमेव ता न जानन्तीत्याह । स वा इति । पातीति पतिर्यश्चात्मानमपि पातुं न शक्नोति स कथमन्यान् पातीत्यर्थः अतः प्रथममकुतोभयः स्यात् स च एको भवानेव इतरथा प्रकारान्तरेण पतिशब्दव्याख्यायामित्यर्थः । यद्वा । सप्तम्यर्थे एव षष्ठीप्रत्ययः इतरत्र मण्डलेश्वराणामिव स्वप्रजापालकानामपि मिथो भयं ततश्च प्रजानामपि भयमिति तत्पालनमेव वस्तुत इत्यर्थः अत एवात्मनः परमात्मनस्तव लाभात् आधि अधिकं परं वस्तु न मन्यते शास्त्रज्ञोऽपीति शेषः । त्वत्प्राप्तेः सकाशात् अन्यप्राप्तेर्नैवाधिकेति त्वमेव वस्तुतः पतिशब्दवाच्य इत्यर्थः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किञ्च निष्कामभजने अप्रार्थिता एव सर्वे कामा भवन्ति सकामभजने तु कामितमात्रमनित्यञ्चेत्याह । या स्त्री तस्य उक्तलक्षणस्य तव पादपद्मपूजामेव नितरां कामयेत् न तु फलान्तरं साखिलेषु कामेषु लम्पटा सर्वानेव कामान् प्राप्नोतीति अथ च निष्कामपदवाच्या भवेत् । यथा तु ईप्सितं प्रति ईप्सितः फलान्तरं प्राप्तुमपेक्षितः सन् अर्चितो भवसि । तस्यै तदेवैकं रासि ददासि यद्यतः फलभोगानन्तरं भग्ना याच्ञा याचितोऽर्थो यस्याः सा प्रतप्यते दुःखं प्राप्नोतीत्यतः सैव निष्कामापि सकामपदवाच्या भवेदित्यतो भगवन्तं कामयमाना भक्ता नैव सकामशब्देन वाचनीया इति सिद्धान्तो व्यञ्जितः अत्र ईप्सितान्तरकामायाः परितापः स्वस्वभावः प्रातिकूल्यदृष्ट्यैव लक्ष्म्या नामधिक्षिपन्त्यैवोक्तः । वस्तुतस्तु सकामभजनादपि कृतार्थत्वमुपरिष्टाद्वक्ष्यते ॥ २१ ॥

केचित् सकामास्तु त्वामप्यपहाय मामेव भजन्ते तेऽपि धूलिमेव लभन्त इति तान् निन्दन्त्याह । मत्प्राप्तये ब्रह्मादयस्तपस्तप्यन्ते कुर्वन्ति । ऐन्द्रिये विषयसुखे एव धीर्येषाम् अलुक्समासः तदपि भवत्परायणात् ऋते विना मां मत्कटाक्षविलासितां सम्पत्तिरूपां लक्ष्मीं न लभन्ते भवत्परायणाः प्रह्लादध्रुवादय एव विन्दन्ति या तु त्वद्भक्तेष्वपि देवासुरादिषु सम्पद्दृश्यते सा तु गुणमयी प्रतिस्वकर्मफलरूपा मायाशक्तेर्दुर्गाया एव प्रसादाद्या कामादितरङ्गजनिका कादाचित्की न तु त्वत्स्वरूपभूताया ममेति मम मायात्वाभावात् मत्प्रसादोत्थायाः सम्पत्तेरपि त्वद्वैमुख्यापादकत्वाभावास्तत्र हेतुः । त्वद्धृदया त्वन्मनस्का त्वन्मनस्कानेवावलोकयामि नान्यमित्यर्थः ॥ २२ ॥

तदेवं ब्रह्मादीनामाराध्यापि तव भार्याप्यहं निष्किञ्चनो भक्तो यथा त्वत्तः सौभाग्यं लभते तथा नाहं लभे एवं मे ललाटमित्याह स मद्धृदयनित्यविहारोऽपि त्वं ममापि शीर्ष्णि कराम्बुजं धेहीति शेषः । त्वत् त्वया यत् सात्वतां शीर्ष्णि अधायि । वन्दितं कृपासौभाग्यवर्धित्वेन सद्भिः स्तुतम् । ननु त्वत्सौभाग्यं सर्वतोऽप्यधिकं यतस्त्वामहं हृदये एव नित्यं दधामीति तत्र सत्रपं साञ्चलमुखाच्छादनं सहुङ्कारं नीचैराह । बिभर्षीति । हे वरेण्य ! मा मां लक्ष्म कनकरेखाचिन्हतया यद्बिभर्षि दधासि तन्माययैव मद्भक्तसौभाग्यं दृष्ट्वा निर्बुद्धिरेषा मय्यसूयां माकार्षीदिति कपटेनैव । ननु कोऽप्येवं न ब्रूते तत्राह । कः खल्वीश्वरस्य तव ईहितमूहितुं वितर्कितुं क्षमः यतः "न च सङ्कर्षणो न श्रीर्नैवात्मा च यथा भवान्" इति तव भक्तं प्रति निभृतोक्तिमहमश्रौषमेवेति ध्वनिः । प्राणिनि चाक्षुषमन्वन्तरान्ते प्रलये स वैवस्वतो मनुः ॥ २३ ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

माया वयुनं । सङ्कल्पस्तन्मयं स्वसङ्कल्पेनाविष्कृतमित्यर्थः "माया च वयुनं ज्ञानम्" इति कोशात् उदाहरन्तीति बहुवचनं प्रजापतिपुत्र्यादिअभिप्रायेण ॥ १७ ॥

सर्वैर्गुणविशेषैः "एष सर्वेश्वरः" इत्यादिश्रुतिप्रोक्तैस्तदसाधारणैः सर्वेश्वरत्वादिभिर्विवक्षितः वर्णयितुमिष्ट आत्मा यस्य तस्मै आकूतीनां ज्ञानेन्द्रियव्यापाराणां चेतसामन्तःकरणव्यापाराणां विशेषाणां तत्तद्विषयाणां चाधिपतये षोडशकलाय सूक्ष्मशरीरात्मने छन्दोमयाय वेदात्मने अन्नमयाय स्थूलशरीरात्मने अमृतमयाय नित्यपदार्थात्मने महसे मनःसामर्थ्यात्मने ओजसे इन्द्रियसामर्थ्यात्मने बलाय देहसामर्थ्यात्मने किं बहुना सर्वमयाय सर्वात्मने "ऐतदात्म्यमिदं सर्वम्" इतिश्रुतेः कान्ताय प्रियाय काम्यत इति कामः ईप्सिताय भगवते अन्तर्बहिश्च नमः ॥ १८ ॥

त्वत एव हृषीकाणामीश्वरं पतिं सन्तं त्वामाराध्य अन्यं पतिमाशासते कामयन्ते याः स्त्रियः तासां ते अपत्यादिकं न परिपान्ति रक्षन्ति अतस्ते पतयो नेति फलितोऽर्थः ॥ १९ ॥

कस्तर्हि पतिरत आह । स इति । यः आत्मलाभात्परमन्यदधिकं नैव मन्यते स पतिः स्यात् स च भवानेक एव "एष सर्वेश्वरः एषः भूताधिपतिः प्रधानक्षेत्रज्ञपतिः" इत्यादिश्रुतेः इतरथा अनेकभ्वराङ्गीकारे मिथो भयं स्यादित्यन्वयः ॥ २० ॥

या ते पादसरोरुहयोः अर्हणमर्चनमेव निकामयेत् नान्यत साऽखिलकामानां लम्पटा वशीकरणे कुशला ईप्सितमभीप्सितः पत्यपत्यादिकं प्राप्तुमपेक्षितः सन् अर्चितस्त्वं तदेव रासि ददासि यद्यतः भग्ना याच्ञा याचितोऽर्थो यस्याः सा प्रतप्यते ॥ २१ ॥

ऐन्द्रिये मत्प्रसादलब्धविभूतिसुखे धीर्येषां ते कण्ठे काल इति वदलुक्समासः भवत्पादः परायणं यस्य तस्मादृते मां न विन्दन्ति विभूत्यर्थं मामनुकूलयितुं न शक्नुवन्ति भवत्पादपरायणास्तु मां विन्दन्ति मम पुत्रत्वात् यतोऽहं त्वद्धृदया त्वं हृदये यस्याः सा तथा अत्र गूढोऽभिप्रायः भवदीयाः भवत्पादध्यानामृततृप्ताः ध्यानविच्छेदकरीं मद्दत्तां विभूतिं न वाञ्छन्ति किन्तु मम हृदयस्थं त्वां लब्धुं परां मातरं मद्भावेन मां भजन्ति अहं च तान् पुत्रवत्सला कदाचिदपि न त्यजामि एवं ते मां विन्दन्तीति ॥ २२ ॥

हे वरेण्य ! स उक्तप्रकारस्त्वं मां लक्ष्म वक्षसि बिभर्षि कृतार्था यद्यप्यहमिति भावः तथाप्यनुग्रहविशेषं कुर्वित्याह । त्वत् इति पञ्चमी तृतीयार्थे त्वया यत्कराम्बुजं सात्वतां भक्तानां शीर्ष्णि मायया कृपया अधायि न्यस्तम् तन्ममापि शीर्ष्णि हे अच्युत ! कृपया निधेहि अत्र हेतुं दर्शयितुं कराम्बुजं विशिनष्टि वन्दितं परानन्ददत्वेन सद्भिः स्तुतम् अथ किमर्थं तवेहितस्य दुष्पारत्वादित्याह । ईश्वरस्य तवेहितं चेष्टितमूहितुमेतावदिति वितर्कयितुं कः विभुः समर्थः न कोऽपीत्यर्थः ॥२३-२४॥

भाषा टीका ।

भगवान् के उस माया मयस्वरूप को लक्ष्मी देवी संवत्सर प्रजापति के पुत्रिरात्रियों में दिनों में उन दोनों के देवतों के सहित सेवा करती हैं और यह मन्त्र बोलती हैं ॥ १७ ॥

भगवान् हृषीकेश सब गुण विशेषों से युक्त स्वरूपवाले वागादिकर्मेन्द्रियों के चक्षु आदि ज्ञानेन्द्रियों के अन्तःकरणों के पृथिव्यादि द्रव्यों के पति षोडशकला वाले वेद स्वरूप मनुष्यों

ओं नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणायौजसे सहसे बलाय महामत्स्याय नम इति ॥ २५ ॥

अन्तर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः ।
स ईश्वरस्त्वं य इदं वशेऽनयन्नाम्ना यथा दारुमयीं नरः स्त्रियम् ॥ २६ ॥
यं लोकपालाः किल मत्सरज्वरा हित्वा यतन्तोऽपि पृथक्समेत्य च ।
पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते ॥ २७ ॥
भवान्युगान्तार्णव ऊर्मिमालिनि क्षोणीमिमामोषधिवीरुधां निधिम् ।
मया सहोरुक्रमतेऽज ओजसा तस्मै जगत्प्राणगणात्मने नम इति ॥ २८ ॥

हिरण्मयेऽपि भगवान्निवसति कूर्मतनुं बिभ्राणस्तस्य तत्प्रियतमां तनुमर्यमा सह वर्षपुरुषैः पितृगणाधिपतिरुपधावति मन्त्रमिमं चानुजपति ॥ २९ ॥

ॐ नमो भगवते अकूपाराय सर्वसत्त्वगुणविशेषणायानुपलक्षितस्थानाय नमो वर्ष्मणे नमो भूम्ने नमोनमोऽवस्थानाय नमस्ते ॥ ३० ॥

यद्रूपमेतन्निजमाययार्पितमर्थस्वरूपं बहुरूपरूपितम् ।
संख्या न यस्यास्त्ययथोपलम्भनात्तस्मै नमस्ते व्यपदेशरूपिणे ॥ ३१ ॥
जरायुजं स्वेदजमण्डजोद्भिदं चराचरं देवर्षिपितृभूतमैन्द्रियम् ।
द्यौः खं क्षितिः शैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेय एकः ॥ ३२ ॥

भाषाटीका ।

का भोज्य अन्न देवों का भोज्य अमृत तद्रूप सर्व स्वरूप अन्तःकरण इन्द्रिय देहसामर्थ्यरूप सब के पति आप के अर्थ इस लोक तथा परलोक में नमस्कार होवै ॥ १८ ॥

जगत् मे सब स्त्रियां व्रतों से स्वयं हृषीकेश आपकी आराधन करके अन्यपति को चाहती हैं वे अन्यपति उन स्त्रियों के प्रिय पुत्र धन आयु इन का नहीं रक्षा कर सके हैं जिस से कि वे स्वतन्त्र नहीं हैं ॥ १९ ॥

जो सर्वथा निर्भय है वही पति सब प्रकार से प्रजाओं के भय से रक्षा कर सक्ता है सो आपही हो जोकि आत्मलाभ से अन्य को अधिक नहीं मानते हो अन्यको तो आत्मलाभ न होनेसे सुख नहीं है ॥ २० ॥

जो स्त्री सब कामों की इच्छावाली होकर भी आपके चरण कमल मात्रको चाहती है उसको आप सब देते हो जो अन्य पदार्थों को चाहती है उसको वही चीज देते हो जिसके नाश होने पर फिर दुःख पाती है ॥ २१ ॥

हे अजित ! इन्द्रिय के विषयों में जिनकी बुद्धि है ऐसे ब्रह्मा महादेव देवादिक सब यद्यपि मेरे प्राप्ति होने के वास्ते उग्र तपस्या करते हैं तौ भी आपके चरणारविन्द के आश्रय के बिना मेरे को नहीं प्राप्त होते हैं क्यों कि मे तो आप मे मन लगाने वाली हूं ॥ २२ ॥

हे अच्युत ! सब लोगों के प्रशंसा करने योग्य जो आप का हस्त कमल जिसको कि आपने सात्वतयादवों के वा भक्तों के मस्तक पर रक्खा है तिसहस्तको मेरे मस्तक पर रक्खो हे वरेण्य ! आप मेरा चिन्ह मात्र बनाकर वक्षस्थल में धारण करते हौ आपकी चेष्टाको जानने को कौन समर्थ होसक्ता है ॥ २३ ॥

रम्यक वर्ष में भी भगवान् की अति प्रिय मूर्ति जो कि उस वर्ष के पति मनु को पहिले दिखाई थी वही मनु इस समय पर भी बडे भक्ति योग से आराधन करते हैं और इस मन्त्र को पढते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सत्त्वाय सत्त्वप्रधानाय । मुख्यतमाय प्राणाय सूत्रात्मने ॥२५॥

उरुः स्वनो वेदात्मको नादो यस्य । य इदं विश्वं ब्राह्मणादिनाम्ना विधिनिषेधालम्बनभूतेन वशेऽनयन्नियमितवानस त्वमीश्वरः । तथाच श्रुतिः ।"तस्य वाक्तन्तिर्नामानि दामानि" इति ॥२६॥

नन्विन्द्रादयो वशं नयन्ति लोकपालत्वात्कुतोऽहं तत्राह । यमिति । मत्सर एव ज्वरो येषां ते । यं हित्वा द्विपदश्चतुष्पदः सरीसृपं जङ्गमं स्थाणु स्थावरं च यदत्र दृश्यते तत्किञ्चिदपि पातुं न शक्ताः स त्वमेव प्राणरूपेण पालक ईश्वर इत्यर्थः । तथाच श्रुतिः । "ता अहिंसन्नाहमुक्थमस्म्यहमुक्थमस्मि" इत्यादि ॥ २७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

मत्स्यावतारचरितमाह। भवानिमां क्षोणीं मया मनुना सह मत्समाहितां धृतवानित्यध्याहारः। ऊर्मिमालावति प्रलयार्णवे ओजसा क्रमते विचरति। यद्वा। पातुमित्यस्यानुषङ्गः क्षोणीं पातुं क्रमते उत्सहत इत्यर्थः। यतोऽजः कीदृशीम्। ओषधीनां वीरुधां च निधिमाश्रयभूताम्। तस्मै नमः जगतो यः प्राणगणस्तस्यात्मने नियन्त्रे॥ २८॥

तत्प्रियतमां तां प्रियतमाम्॥ २९॥

अकूपाराय कूर्माय। सर्वः सम्पूर्णः सत्त्वगुणो विशेषणं यस्य न उपलक्षितं स्थानं यस्य वारिचरत्वात्। वर्ष्मणे वर्षीयसे कालानवच्छिन्नाय भूम्ने सर्वगताय अवस्थानायाधाराय॥ ३०॥

निजमाययार्पितं प्रकाशितमेतदर्थस्वरूपं दृश्यं पृथिव्यादि यस्यैव रूपं यतः पृथङ्नास्ति। कथम्भूतम्। बहुभीरूपं रूपितं निरूपितम्। यस्य च सङ्ख्या नास्ति। कुतः। अयथा मिथ्यैवोपलम्भनात्। न हि मरीचिजलमेतावदिति सङ्ख्यातुं शक्यते अव्यपदेशरूपिणे निरुक्तगपञ्चाकाराय॥ ३१॥

बहुरूपत्वं दर्शयंस्तस्येश्वरादव्यतिरेकमाह। जरायुजमिति। द्वीपग्रहर्क्षमित्यभिधेयस्त्वमेवैको न त्वद्व्यतिरिक्तोऽस्ति। "सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतेरित्यर्थः॥ ३२॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

मन्त्रमाह। ओमिति। सत्त्वाय शुद्धसत्त्वमूर्तये मुख्ये भवः मुख्यः तस्मै प्रथमावतारायेत्यर्थः प्राणाय जीवायैव प्राणाद्यन्तरात्मने वा ओजसे इन्द्रियशक्त्यधिष्ठात्रे बलाय शरीरशक्त्यधिष्ठात्रे तत्तदवतारासाधारणगुणाः सर्वत्रोपासनार्थं मन्त्रयुक्ताः एवम्भूताय महते इष्टविसजातीयमत्स्याय नमः॥ २५॥

कृत्स्नचिदचिदात्मकजगन्नियन्तृत्वरक्षकत्वविशिष्टं स्तुवन्ति। अन्तर्बहिरिति। लोकपालैरन्तर्बहिरदृष्टं रूपं यस्य उर्वधिकः स्वनो वेदात्मको नादो यस्य तथाभूतस्त्वमीश्वर एव कोऽसावीश्वर इत्यत्राह। य इदं विश्वं चिदचिदात्मकं कृत्स्नं जगद्विधिनिषेधावलम्बनभूतेन ब्राह्मणादिनाम्ना वशेऽनयन्नीतवान् नयनं चात्र नियमनपूर्वकं रक्षणं यथा दारुमयीं दारुणा चित्ररूपां स्त्रियं स्त्रीप्रतिकृतिं नरः स्ववशीकृत्य नाटयति तर्षति अनेन कृत्स्नजगन्नियन्तृत्वकथनेन कारणत्वमप्युक्तं कारणत्वनियन्तृत्वयोरेकगतत्वात् "एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः" इतिश्रवणात् सर्वभूतान्तरात्मेत्यनेन नियन्तृत्वोक्त इत्यनेन कारणत्वञ्चोक्तम् "एको ह वै नारायण आसीत्" इत्यनेन सम्वादादित्यर्थः॥ २६॥

इदञ्च जगन्नियन्तृत्वादिकमनितरसाधारणमित्याह। यमिति। मत्सरज्वरं मत्सरः परैश्वर्यासहिष्णुत्वं स एव ज्वरस्तं हित्वापि पृथक् मिलित्वा सम्भूयापि वा यमन्तोऽपि लोकपाला इन्द्रादयो यं प्रपञ्चं पातुं रक्षितुं न शेकुः न प्राभवन् प्रपञ्चं विशिनष्टि। यत्रोक्तादादिरूपं चरिष्णु स्थास्नु पवित्रात्ररूपस्थावरजातं च अत्र प्रपञ्चे इदं तं त्वं तु रक्षितवानित्यर्थः॥ २७॥

भवानिति। ऊर्मिमालिनि उच्चतरतरङ्गपङ्क्तियुक्ते युगान्तार्णवे कस्मिंश्चिद्दैनन्दिनप्रलयार्णवे ओषधीनां वीरुधां गुल्मानां च निधिमाश्रयभूतामिमां क्षोणीं भूमिं मया मनुना सह धृत्वोति

शेषः यो भवानोजसा उर्वधिकं विक्रमते विचरति। यद्वा। पातुमित्यस्यानुषङ्गः क्षोणीं पातुं क्रमते उत्सहत इत्यर्थः यतोऽजस्त्वम्। यद्वा। हे उरुक्रम! तत्र ओजसा तेजोरूपेण सङ्कल्परूपज्ञानात्मकेन ओजसा बलेन नतु साधनान्तरेणेमां क्षोणीं रक्षितवानित्यध्याहारः उवाह धृतवानित्यर्थः तस्मै जगत्प्राणगणात्मने तुभ्यं नमः जगत्प्राणगणाः प्रतिशरीरं प्राणव्यष्टिगणाः तदन्तरात्मन इत्यर्थः जगत्प्राणगुणात्मन इति पाठे तु जगत्प्राणरूपगुणस्वभावायेत्यर्थः॥ २८॥

अथ हिरण्मयवर्षे उपास्योपासनादीन्याह। हिरण्मय इति। भगवान् कूर्मरूपं बिभ्राणो हिरण्मये वर्षे निवसति तस्य भगवतस्तां प्रियतमां कूर्मतनुं पितृगणानामधिपतिरर्यमा तद्वर्षस्थैः पुरुषैः सहोपधावति अनुवर्तते उपास्ते इत्यर्थः शेषं पूर्ववत्॥ २९॥

अकूपाराय कूर्मरूपाय कुत्सिताः स्वल्पा आपो यस्मिंस्तत्कूपं स्वाश्रयतया तत्रात्यादधाति स्वीकरोतीति कूपारः स न भवतीत्यकूपारः सर्वं सत्त्वा जन्तवः गुणास्तद्गता हेयाः कल्याणाश्च ज्ञानशक्तिबलैश्वर्यादयः ते विशेषणानि सञ्चारकाणयद्वारकाणि च प्रकारभूतानि यस्य तस्मै तत्र सर्वसत्त्वानां कल्याणगुणानां च साक्षाद्विशेषणत्वं सत्त्वगतगुणानां सत्त्वद्वारा विशेषणत्वमिति विवेकः अनुपलक्षितस्थानायान्तःसमुद्रे मन्दरमूले स्थितायेत्यर्थः अवर्ष्मणे प्राकृतदेहरहिताय वर्ष्मणे इत्यप्राकृतविग्रहाय वर्ष्मशब्दो देहपर्यन्तवृत्तिः वर्ष्मणे श्रेष्ठायेति वा वरीयसे वा गरीयस्त्वं च कालानवच्छिन्नत्वं भूम्ने महिमवतेऽवस्थानायाधारभूताय अविकरणे ल्युट् गुणभेदाभिप्रायाय नमः पदावृत्तिः॥ ३०॥

विश्वरूपत्वानन्तत्वादिगुणविशिष्टं स्तौति। यद्रूपमिति। एतत् जगत् यस्य रूपं शरीरं तस्मै व्यवसायरूपिणे नम इत्यन्वयः व्यवसायरूपिणे सम्यग्ज्ञानप्रवर्तकायेत्यर्थः। यद्वा। व्यवसायोऽत्र नित्यासंकुचितापरिच्छिन्नं ज्ञानं तदेव रूपमाकारस्तदस्यास्तीति तथा तस्मै नमस्ते व्यपदेशरूपिणे इति पाठान्तरं तत्र व्यपदेशरूपिणे व्यपदिश्यते इति व्यपदेशः वाग्व्यवहारार्हः देवमनुष्यादिनामरूपात्मकः प्रपञ्चः स जगदेव रूपं तदस्यास्तीति तथा न च यद्रूपमित्यनेन पौनरुक्त्यं व्यपदेश्यरूपिण इत्यस्यैवोपपादकत्वात् अथोक्तस्यैव अव्यपदेशरूपिणे इति वा छेदः अव्यपदेशं चेतनसजातीयत्वेन व्यपदेष्टुमशक्यं रूपं तदस्यास्तीति तथा तस्मै पराक्षदर्निर्दिष्टं जगद्विशिनष्टि। निजमाययार्पितं प्रकृत्या निर्मितम् अर्थरूपं सत्यत्वेन प्रतीयमानं बहुरूपरूपितं जातिगुणादिनिकायम् एवंविधं जगत् यस्य रूपं यस्य च संख्यापरिच्छेदो नास्ति कुतः अयथोपलम्भनात् यथावत् साकल्येन उपलम्भाभावात् यद्वा अयथा जगद्वा परामृश्यते यस्य जगतः संख्या प्रकारो नास्ति कुतः अयथोपलम्भनाद्ब्रह्मात्मकत्वेनोपलम्भात् यद्यपि जगत्प्रतीयते एव तथाप्यविकृताब्रह्मात्मकत्वेन तत्प्रतीत्यभिप्रायेण संख्या न यस्यास्तीत्युक्तम्। यद्वा। यस्य जगतः अयथोपलम्भनात्संख्यापरिच्छेदो नास्ति [illegible] "कोटिशो ह्यण्डराशय" इति जगतोऽव्यवस्थितिः [illegible] यद्वास्य जगतः अयथोपलम्भनात् [illegible] सम्भवात् संख्याप्रकारो नास्ति जगत [illegible] प्रसङ्ग इत्यर्थः॥ ३१॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं विश्वरूपत्वमनन्तत्वञ्चोक्तं यतो विश्वरूपस्त्वमत एव द्यौः खमादिशब्दैः भवानेवाभिधीयत इत्याह । जरायुजमिति । हे देव ! चराचरभेदेन द्विविधं पुनर्जरायुजादिभेदेन चतुर्विधमेतज्जगत् तव विभूतिभेदं विभूतिविशेषरूपमित्यर्थः अत एव द्यौः खमित्याद्यवमभिधेयस्त्वमेक एव द्यौरादिशब्दैरभिधीयमानस्त्वमेवेत्यर्थः "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवत्" इति श्रुत्युक्तविधया नामरूपवद्वस्तूनां परमात्मपर्यन्तत्वाभिसन्धेः द्यौरादीनां परमात्मशरीरत्वाच्छरीरवाचिनां शब्दानां शरीरिपर्यन्ताभिधानस्य गवादिशुक्लादिजातिगुणादिशब्दानां व्यक्तिगुण्यादिपर्यन्ताभिधानवदाकृत्यधिकरणन्यायसिद्धत्वाच्च द्यौः खमित्येवं रूपेण त्वमेव वाच्यो बोध्यश्चेत्यभिप्रायः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उरुगुरुः यो भः परापुरुषः इदं जगद्वशे नयतीतयान् स त्वमीश्वरः सात्त्वतारायणः आत्मा स्वामी । यद्वा । य आत्मा आदानसमर्थः इदं जगद्वशे नयन् वर्तते स त्वमीश्वर ऐश्वर्यादिगुणसमुद्र इति ॥ २६ ॥

लोकपालादिविश्वस्यैश्वरत्वेशत्वे तद्रूपत्वं कथमस्येत्याशङ्क्य स्पर्द्धाहेतोरिति भावेनाह । यमिति । चशब्दो विकल्पार्थे यं त्वां हित्वा लोकपालाः पृथग्वा समेत्य वा यतन्तोऽपि द्विपदश्चतुष्पद इत्यादि यत्सर्वभूतस्थास्नुचराचरमत्र दृश्यते श्रुतिदृष्टिविषयं तत्पातुं न शेकुरित्यन्वयः अशक्तत्वे निमित्तमाह । मत्सरेति । मात्सर्यापस्मारग्रस्तत्वादित्यर्थः "वार्तासम्भावयोः किल" इति वचनादिदं स्पर्द्धालक्षणं मात्सर्यं सम्भावनामात्रं नतु मुख्यमाज्ञानिमित्तं दैत्यावेशनिमित्तं वेति गमयितव्यं तदुक्तम् ।

स्पर्द्धन्त इव देवास्तु हरिणा यत्र कुत्रचित् ।
हरेरेवाज्ञया क्वापि दैत्यावेशादथापि वा ॥

इति अनेन स्पर्द्धाया अन्यनिमित्तत्वेन पालनाशक्तिः स्वरूपकृतेति ज्ञातव्या ॥ २७ ॥

यद्यप्यस्तु मूलरूपस्य हरेर्जगत्पालनशक्तिः स्वरूपभूता तथाप्यवताराणां सा न समास्तीत्याशङ्क्य द्वयोरपि कोऽपि माहात्म्यविशेषो नास्तीति भावेनाह । भवानिति । भवान् युगान्तार्णव इमां क्षोणीमूहे उवाहेत्यन्वयः तस्मै जगत्प्राणगुणात्मने जगज्जेष्ठकगुणस्वरूपाय मत्स्याय हरये नम इत्यन्वयः ॥ २८ ॥ २९ ॥

न कूपे भारो गमनं यस्य स तथा तस्मै महासमुद्रनिवासायेत्यर्थः सर्वसत्त्वगुणाः पराक्रमगुणा एव विशेषणं यस्य स तथा तस्मै सर्वसत्त्वगुणा ज्ञानानन्दादिगुणा इति वा नोपलक्षितस्थानाय अज्ञानस्वरूपाय वर्ष्मणे भक्ताभीष्टवर्षणशीलाय प्रमाणाय सम्यग्वक्त्रे वा "प्रमाणं बोधनेयत्ता मर्यादा शास्त्रहेतुषु सम्यग्वक्तरि चाथ स्यात्प्रयाणमरणे गतौ" इति यादवः "वर्ष्म देहप्रमाणयोः" इति च अनेन दिव्यतिर्यग्योनेरपि सम्यग्वक्तृत्वमाहात्म्यं सूचितम् भूयसे महते "महतो महीयान्" इति श्रुतिः अनवस्थानाय जगत्स्थितिहेतवे ॥ ३० ॥

मन्त्रसूचितगुणविशिष्टत्वेन श्रीहरिं स्तौति । यद्रूपमिति । यद्रूपमेतद्विश्वं निजमायया तव स्वरूपेच्छयार्पितं मदाधारतया तिष्ठत्विति मायेत्युक्त्यानिर्वाच्याविद्याकल्पितं किं न स्यादित्यतोऽर्थेति मत्राधितरूपं जरायुजादिबहुरूपेण रूपितं शब्दितं यस्य यत्तेति सङ्ख्या च नास्ति "परमाणुप्रदेशेऽपि ह्यनन्ताः प्राणिराशयः" इति वचनात् यथोपलम्भनादयथा अत्र यथा दृश्यते ध्वस्तथा न निवृत्ति विकारित्वात् उर्वारुकफलादेरन्यथा दर्शनाच्च तावता ध्वंतध्यं "विश्वं सत्यम्" इत्यादिश्रुतेः अतः प्रवाहरूपेण नित्यमित्येव्यमित्यर्थः रूपं सन्निधानयोग्यप्रतिमास्थानीयमित्यर्थः तस्मै तुभ्यं नम इत्यन्वयः न व्यपदेशो यस्य तद्व्यपदेशं तादृशं रूपमस्यास्तीति अव्यपदेशरूपी तस्मै वाङ्मनसागोचररूपत्वादित्यर्थः अनेन सर्वसत्त्वविशेषणाय नोपलक्षितस्थानायेति पदद्वयं विवृतम् ॥ ३१ ॥

सन् घटः सन् पटः इति सदनुविद्धत्वेन प्रतीयमानत्वात् "सर्वं खल्विदं ब्रह्म" इति श्रुतेश्च विश्वस्य ब्रह्मात्मकत्वं मुख्यं किं न स्यादित्याशङ्क्य तत्सृष्ट्वा तदेवानुप्राविशदित्यादेः ।

सर्वान्तर्यामिकत्वात्तु सर्वनामा हरिः स्वयम् ।
नतु सर्वस्वरूपत्वाद्रूपत्वं तूपचारतः ॥

इति स्मृतेश्च सर्वान्तर्यामित्वेन तत्तत्सत्ताप्रदत्वेन तच्छब्दप्रवृत्तिनिमित्तस्य तदधीनत्वेन तत्तन्नामत्वं हरेरित्यभिप्रेत्याह । जरायुजमिति । देवादीनां भेदो यस्मिंस्तत्तथा इतिशब्द आदिवचनः ऋक्षादिनामवानेक एवेत्यनेन "यो देवानां नामधा एक एव" इति श्रुतिं सूचयति "नमो वर्ष्मणे नमो भूयसे" इति मन्त्रावयवस्याभिप्रायः सूचित इति ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

मुख्यतमायेत्यपि पूर्ववत् । सत्त्वादिपरमाश्रयत्वात् सत्त्वादिरूपाय ॥ २५ ॥ २६ ॥

यमित्यस्य टीकायां मत्सर एवेत्यत्र परस्परमिति ज्ञेयम् । ता देवताः अहिंसन्त समत्सरा बभूवुः । तत्र प्रत्येकं मामिमानमाहुः । कमाश्रित्याहमस्मि अपि तु न कमपीति श्रुतेरर्थः ॥ २७ ॥

युगान्तोऽत्र मन्वन्तरान्तः क्षोणीमिति धृतनौकारूपामित्यर्थः "नाव्यारोप्य महीमय्याम्" इत्युक्तेः ॥ २८—३० ॥

यस्य तवैतत् कूर्माकारं रूपं निजेषु भक्तेषु मायया कृपया अर्पितं प्रकाशितम् अयथोपलम्भनात् यथावदुपलब्धुमशक्यत्वात् वाङ्मनसातीतत्वादित्यर्थः । यस्य च तव सङ्ख्या नास्ति अव्यपदेशं वक्तुमशक्यं रूपं नित्यमेव विद्यते यस्य तस्मै ॥ ३१ ॥

पूर्ववत् बहुरूपत्वं दर्शितम् । तच्च जरायुजेत्यादिना किञ्चित् सङ्ख्यातम् । यत्तु न यस्य सङ्ख्यास्तीत्युक्त्वा तदेकत्वान्नामरूपादीनामसङ्ख्यत्वमानीतं तेषां स्वरूपसिद्धत्वं दर्शयन् सङ्ख्याता नामारोपितत्वमाह ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

मुख्यतमाय सत्वाय शुद्धसत्त्वस्वरूपायेत्यर्थः प्राणादिनियन्तृत्वात् प्राणादिकाय ॥ २५ ॥

सर्वत्रैवान्तर्वहिरपि चरसि। अथ च लोकपालैरपि अदृष्टरूपः किमुतान्यैः ननु तर्हि ममास्तित्वमेव मास्तु तत्राह। उरुर्वेदात्मकः स्वनो यस्य सः। वेद एव तवास्तित्वं प्रतिपदमुद्घोषयति इत्यर्थः। अत एव य इदं विश्वं ब्राह्मणादिनाम्ना त्रिविधवैभावाश्रयभूतेन वशे अनयन्नियमितवान् स त्वमीश्वरः। तथा च श्रुतिः। "तस्य वाक् तन्तिर्नामानि दामानि" इति। स्वियं पाञ्चालिकाम् अतो विश्वस्य पारतन्त्र्यादपि स्वतन्त्र ईश्वरस्त्वमनुमानेनापि ज्ञायस इति भावः ॥ २६ ॥

नन्विन्द्रादयो वशं नयन्ति लोकपालकत्वादीश्वराः स्वतन्त्राश्च कुतोऽहं तत्र तेषां लोकपालकत्वादिकं सर्वमौपचारिकमित्याह। यं हित्वा पृथग्भूता वा समेत्य मिलित्वा वा द्विपदः चतुष्पदः सरीसृपं जङ्गमं स्थास्नु स्थावरञ्च यद्यदत्र दृश्यते तत् पातुं न शक्ताः अतो मत्सरज्वराः। तथा च श्रुतिः"ता अहिंसन्ताहमु कमस्म्यहमु कमस्मीति"अस्यार्थः। ता देवता समत्सरा बभूवुः। अहम् उ गोः कमाश्रित्य अस्मि वर्त्ते अपि तु न कमपीत्यर्थः। इत्थमिति स त्वमेव प्राणरूपेण पालक ईश्वरश्चेत्यर्थः ॥ २७ ॥

भक्त्या तु त्वं दृष्टरूपः प्रत्यक्षतयाप्युपलभ्यसे तत्र भक्ताभासोऽहमेव प्रमाणमित्याह। भवानिति। इमां महीं मया सह धृत्वेति शेषः हे अज! युगान्तार्णवे भवान् क्रमते विहरति जगतां यः प्राणगणस्तस्यात्मने नियन्त्रे ॥ २८ ॥

सा चासौ प्रियतमा चेति ताम् ॥ २९ ॥

अकूपाराय कूर्माय। सर्वः सम्पूर्णः सत्त्वगुणो यत्र तथाभूतं विशेषणमप्रकारो यस्य तस्मै शुद्धसत्त्वमूर्त्तये इत्यर्थः। न उपलक्षितं सर्वैरदृष्टं वैकुण्ठाख्यं स्थानं यस्य तस्मै वर्ष्मणो महाप्रमाणाय भूम्ने व्यापकाय अवस्थानाय आधाराय ॥ ३० ॥

एतद्विश्वं यस्य तवैव रूपं किन्तु मायाशक्त्या अर्पितं न तु स्वरूपभूतमित्यर्थः। अर्थस्वरूपं वस्तुस्वरूपं न त्ववस्तुभूतं बहुभिरङ्गोपाङ्गुपलक्षितत्वादिरूपे रूपितं निरूपितं किन्तु सङ्ख्या यस्य नास्ति कुतः अयथोपलम्भनात् यथावदुपलब्धुमशक्यत्वात् यैः प्रकारैरिदं विश्वमभूत्तेषामुपलम्भनाशक्यत्वादित्यर्थः। तथा ह्येकस्य स्थूलस्य नरजातेरेव प्रतिशरीरं वर्णस्वभावकण्ठस्वरादिभेदादनन्तप्रकारा ज्ञातुमशक्याः सूक्ष्माणां स्वेदजोद्भिज्जादीनां का वार्त्तेत्यनन्तस्य तत्र शक्तिकार्यस्याप्यानन्त्यमिति भावः। अतस्तव स्वरूपभूतस्य रूपस्य सर्वागम्यत्वे कैमुत्यमेवेत्याह। अव्यपदेश्यं वक्तुमशक्यं नित्यं रूपं यस्य तस्मै ॥ ३१ ॥

तदेवमनन्तभेदस्यापि विश्वस्य त्वदेककारणत्वादेकविधत्वमपीत्याह। जरायुजेति। अहर्त्स्यार्थम इत्यर्थाभिकस्त्वमेवाभिधेयः। तथा च श्रुतिः "सर्वं खल्विदं ब्रह्म"इति ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

मुख्यतमाय सर्वश्रेष्ठाय ॥ २५ ॥

अन्तर्यामिरूपेणान्तर्नानावतारैर्बहिरपि विचरसि तथापि अदृष्टरूपोऽयं परमात्मेति न दृष्टं निश्चितं रूपं यस्य सः। उरुर्विपुलः स्वनो वेदरूपो नादो यस्य सः ॥ २६ ॥

कुतस्तैरदृष्टरूपोऽस्मीत्यत्राह। मत्सरज्वरा इति। मत्सरः परोत्कर्षासहनं स एव ज्वरो येषां ते अत एव हित्वा साक्षाद्रूपेण सन्तमप्यनादृत्य द्विपदादि यदत्र दृश्यते तत् किञ्चिदपि पातुं न शेकुः ॥ २७ ॥

मया सह क्षोणीं पातुमित्यनुषङ्गः अजः भवान् उरु ओजसा क्रमते विचरति जगत्प्राणगणस्य आत्मने आश्रयाय ॥ २८ ॥

तस्य भगवतः तत् तां प्रियतमाम् ॥ २९ ॥

अकूपाराय कूर्माय सर्वः सम्पूर्णः सत्त्वगुणाः नियम्यभूतः विश्वपालनादिहेतुर्विशेषणमितरव्यावर्त्तकं यस्य तस्मै वर्ष्मणा वर्षीयसे कालानवच्छिन्नाय अवस्थानाय आधाराय ॥ ३० ॥

स्वपरादिदोषनिवृत्तिपूर्वकभजननिष्ठामिच्छये विश्वरूपेण भगवन्तं वर्णयति। बहुभि रूपैर्भिर्दंष्ट्रादिभि रूपितं निरूपितम् अर्थस्वरूपम् अर्थः दृश्यमानः पृथिव्यादिपदार्थः स्वरूपं मूर्त्तिर्यस्य तत् निजमायया प्रकृत्या स्वशक्त्या अर्पितं स्थापितम् एतद्विश्वम् यस्य रूपं शरीरं यस्य च यथावदुपलम्भाभावात्संख्यायान्तरावयवगणना नास्ति तस्मै अव्यपदिश्यते इदमित्येवं वर्ण्यते इति व्यपदेशः दृश्यपदार्थः स एव रूपं यस्य तस्मै नमः ॥ ३१ ॥

अत एव जरायुजादि तथाशीलम्भवितस्मतुद्रगीपमहत्वाभिधेयस्त्वमेवैकः सर्वस्य त्वदात्मकत्वात् सर्वनामा सर्वरूपः "सर्वं खल्विदं ब्रह्म" इत्यादिश्रुतेः ॥ ३२ ॥

भाषाटीका

भगवान् सब इन्द्रियों के नियन्ता सत्व गुण प्रधान सूत्रात्मा मन बल इन्द्रिय बल देहबल के हेतु महामत्स्य आप के अर्थ नमस्कार है ॥ २५ ॥

आप वही ईश्वर हो जिनने ब्राह्मणादि नामों के कर्मोंसे इस जगत्को वश कर रक्खा है जैसे कि मनुष्य लकड़ी की पुतली को वशमें रखै आपको सकल लोकपाल नहीं देखते हैं तौभी आप वेद के बड़े शब्द को करते हुये विचरते हो ॥ २६ ॥

जिन आप को छोड़कर मत्सर के ज्वर से युक्त सब लोकपाल एक एक या मिलकर द्विपाद चतुष्पाद सर्प स्थावर रूप इहां जो यह जगत् दीखता है तिसके रक्षाकरने में समर्थ नहीं होसके ॥ २७ ॥

जो आप प्रलयकाल के लहरों वाले बड़े समुद्र में सब औषधियों की आधाररूप इस पृथिवी को लेकर बड़े वेग से मेरे को साथमें लेकर विचरते थे तिन जगत्प्राणरूप आप के अर्थ नमस्कार है ॥ २८ ॥

हिरण्मय वर्ष में भी कूर्ममूर्ति को धारण करके भगवान् निवास करते हैं उन की उस अति प्रिय मूर्ति को वहां के वर्षपुरुषों के सहित अर्यमा पितृगणों का पति स्तुति करता है इस मंत्र को जपता है ॥ २९ ॥

कूर्म रूप सबप्राणियों से विशिष्ट प्रत्यक्षस्थान से अलक्षित अतिश्रेष्ठ सर्वगत सब के आधाररूप भगवान् आप के अर्थ नमस्कार है ॥ ३० ॥

यस्मिन्नसङ्ख्येयविशेषनामरूपाकृतौ कविभिः कल्पितेयम् ॥
सङ्ख्या यया तत्त्वदृशापनीयते तस्मै नमः साङ्ख्यनिदर्शनाय त इति ॥ ३३ ॥

उत्तरेषु च कुरुषु भगवान् यज्ञपुरुषः कृतवराहरूप आस्ते तं तु देवी हैषा भूः सह कुरुभिरस्खलित-भक्तियोगेनोपधावति इमां च परमामुपनिषदमावर्तयति ॥ ३४ ॥

ओं नमो भगवते मन्त्रतत्त्वलिङ्गाय यज्ञक्रतवे महाध्वरावयवाय महापुरुषाय नमः कर्मशुक्लाय त्रियुगाय नमस्ते ॥ ३५ ॥

यस्य स्वरूपं कवयो विपश्चितो गुणेषु दारुष्विव जातवेदसम् ॥
मथ्नन्ति मथ्ना मनसा दिदृक्षवो गूढं क्रियार्थैर्नम ईरितात्मने ॥ ३६ ॥

भाषाटीका।

जिन आप का रूप यह जगत् अपनी माया से युक्त है यथार्थ रूप है नानाप्रकार का है यथार्थ विदित न होने से जिसकी संख्या नहीं हो सकती है ऐसे निर्देश के योग्यरहित रूपवाले आप के अर्थ नमस्कार है ॥ ३१ ॥

[जरायुज] मनुष्यादि (स्वेदज) खटमल आदि [अण्डज] पक्षि आदि [उद्भिज] वृक्षादि [स्थावर] पर्वतादि (जङ्गम) गउ आदि देवता ऋषि पितर भूत इन्द्रिय समूह स्वर्ग आकाश पृथिवी पर्वत नदी समुद्र द्वीप ग्रह तारा नक्षत्र इन नामों के प्रधान वाच्य अर्थ आपही हो और सब आपके शरीर होने से गौण वाच्य हैं इसीप्रकार तत्त्व मसि के अर्थ में भी ईश्वर जीव का अभेद शरीर शरीरि भाव से यथार्थही है ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

सप्रपञ्चतामनूद्य तन्निरासेन प्रणमति। यस्मिन्निति। असंख्येया अनन्ता विशेषा येषां तानि नामानि रूपाण्याकृतयश्च यस्य तादृशे यस्मिंस्त्वयि कविभिः कपिलादिभिरियं चतुर्विंशत्यादिसंख्या कल्पिता सती यया तत्त्वदृशा येन तत्त्वज्ञानेनापनीयते तस्मै ते साङ्ख्यसिद्धान्तरूपाय नमः परमार्थज्ञानरूपायेति वा ॥ ३३ ॥

एषा भूरुपधावति इत्यन्वयः ॥ ३४ ॥

मन्त्रैस्तत्त्वेन लिङ्ग्यत इति तथा तस्मै। यज्ञा अयूपाः क्रतवः सयूपास्तद्रूपाय अत एव महान्तोऽध्वरा अवयवभूता यस्य। कर्मणा शुक्लाय शुद्धाय यज्ञानुष्ठात्रे। त्रियुगाय कृतयुगे यज्ञाभावात्। यद्वा। कलियुगे छन्नत्वात् ॥ ३५ ॥

कवयो विद्वांसो विपश्चितो निपुणा गुणेषु देहेन्द्रियादिषु मथ्नन्ति विचिन्वन्ति। मथ्ना विवेकसाधनेन मनसा। क्रियार्थैः कर्मभिस्तत्फलैश्च गूढमप्रकाशमानं दिदृक्षवः। एवं मथने ईरितः प्रकटित आत्मा स्वरूपं यस्य तस्मै नमः ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एवमनन्तविविधविचित्रविभूतिमत्त्वमुक्तम्। ननु सङ्ख्या न यस्यास्तीत्यानन्त्यमुक्तं तदयुक्तं पृथिव्यादितत्त्वानां चतुर्विंशत्यादिसङ्ख्यावच्छिन्नत्वादत आह। यस्मिन्निति। असङ्ख्येयान्यनन्तत्वात्परिच्छेत्तुमशक्यानि विशेषणानि विलक्षणानि देवादिनामानि रूपाणि चाकृतयश्च यस्य रूपशब्देन पृथिव्यादिद्रव्यं विवक्षितं तत्सङ्घातगतसंस्थानमाकृतिशब्देन तद्वाचकशब्दो नामशब्देन विवक्षितः असङ्ख्येया विशेषा येषामिति पूर्ववद् बहुव्रीहिः उक्तानि नामानि रूपाण्याकृतयश्च यस्येति वा एतादृशे प्रकृतिपुरुषकालशरीरकेऽसङ्ख्येयवैभवे त्वयि इयं चतुर्विंशतिः पञ्चविंशतिरित्यादिरूपा सङ्ख्या कविभिः कपिलादिभिः पृथिव्यादितत्त्वयाथात्म्यविद्भिः कल्पिता मन्दबुद्धीनां सुखग्रहणाय सङ्कलय्य संगृह्य प्रदर्शिता वस्तुतः पृथिव्यादीनामचेतनतत्त्वानामनन्तावान्तरभेदानां च चेतनानां च परमात्मनश्चानन्त्यादसङ्ख्येयत्वमेवेति भावः। एवं कल्पिता सङ्ख्या यया तत्त्वदृशा यद्विषयया तात्त्विकबुद्ध्यानन्तवैभवत्वयाथात्म्यबुद्ध्यापनीयते सपनुद्यतेऽसङ्ख्यातविभूतित्वात्तस्मै साङ्ख्यनिदर्शनाय संख्या बुद्धिर्व्यवसायात्मिका प्रकृतिपुरुषेश्वरयाथात्म्यविषया सैव साङ्ख्यं नितरां दृश्यतेऽनेनेति निदर्शनं यस्य साङ्ख्यज्ञानगम्यायेत्यर्थः। ननु भगवद्विभूतिभूतस्य जगत आनन्त्ये कथं भगवत्स्वरूपस्यानन्त्यं प्रकृतिपुरुषादिनिरूप्यं हि तस्यानन्त्यं प्रकृतिपुरुषपरत्वमेव न घटते नान्यथा अभोच्यते देशकालवस्तुपरिच्छेदराहित्यरूपं हि तावदानन्त्यं तदेव त्रिविधमानन्त्यं परमात्मनि सुस्थम् इहमत्रास्त्यत्र नास्तीदमिदानीमस्ति कालान्तरे नास्ति इति देशकालपरिच्छेदयोरभावादिदमिदं न भवतीति वस्तुपरिच्छेदस्यापि सर्ववस्तुसामानाधिकरण्याभावरूपस्याभावाद्ब्रह्मणः सर्वात्मकत्वेन सर्ववस्तुसामानाधिकरण्यव्यपदेशविषयत्वात् जीवानां त्वणुपरिमाणविषयत्वेऽपि तेषामानन्त्याद्धर्मभूतज्ञानस्य संसारदशायां कर्मसङ्कुचितत्वेऽपि वस्तुतस्तदभावान्मुक्तिदशायाम् सद्भावाच्चानन्त्याद कल्प्यते "इत्यानन्त्याय कल्पते" "अनेन जीवेनात्मनानुप्रविश्य" इति। अतस्तज्जीवस्वरूपस्य नित्यत्वाच्च तेषामप्यानन्त्यं देशतः कालतश्चास्त्येव अचेतनस्यापि कारणावस्थायां निरतिशयसूक्ष्मदशापन्नत्वेऽपि कार्यावस्थायामानन्त्यमस्त्येव तर्हि प्रकृतिपुरुषापेक्षया परमात्मन आनन्त्ये को

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

विशेष इति चेदियांस्तु विशेषः यत्कार्यावस्थायां कारणावस्थायाञ्च स्वरूपेण गुणैश्चानन्यमितरयोस्तु देशतः कालतश्च धर्मकृतं कालकृतं मुक्तावस्थाकार्यावस्थयोरिति। ननु ब्रह्मणः स्वरूपस्य सर्वात्मकत्वेन सर्ववस्तुसामानाधिकरण्यात्मकवस्तुपरिच्छेदसत्त्वेऽपि कथं तद्गुणानां वस्तुपरिच्छेद इति चेदेवं तर्हि वस्तुपरिच्छेदः यद्गुणनिकर्षः तद्यथा दशावर्णास्वर्णापेक्षया नववर्णास्वर्णस्य पवित्रत्वो-ज्ज्वलत्वगुरुत्वादिभिर्गुणैर्निकर्षस्तदपेक्षया च कलधौतस्यैवं गुणनिकर्षाभावो वस्तुपरिच्छेदो बोध्यः ॥ ३३ ॥

अथोत्तरेषु कुरुषूपास्यादिकमाह । उत्तरेष्विति । कृतं धृतं वराहरूपं येन तादृशो भगवान् षाड्गुण्यपूर्णः यज्ञपुरुषः यज्ञशरीरकः तदाराध्यस्तत्फलदश्चास्ते तं तु वराहरूपं भगवन्तमेषा भूर्देवी कुरुभिः कुरुवर्षस्थैः पुरुषैः सहास्खलितभक्तियोगेनाविच्छिन्नभक्तियोगेनोपधावत्यनुवर्तते भक्तियोगेनाराधयतीत्यर्थः इमां वक्ष्यमाणां परमां श्रेष्ठामुपनिषदमावर्तयति जपति ॥ ३४ ॥

ओं भगवत इत्यर्थो पूर्ववत् मन्त्रतत्त्वलिङ्गाय मन्त्रप्रतिपाद्यं वस्तु तदेव लिङ्गं शरीरं यस्य। यद्वा। मन्त्रतत्त्वस्य स्वरूपस्य लिङ्गं ज्ञापको यस्य मन्त्रतत्त्वं मन्त्रतत्प्रतिपादितं लिङ्गं शरीरं ज्ञापकं वा यस्येति वा। यद्वा। मन्त्रगतानि तत्त्वानि इन्द्राद्यर्थस्वरूपाणि तानि लिङ्गानि शरीराणि यस्य तस्मै यज्ञक्रतवे असोमकाः यागाः यज्ञाः ससोमाः क्रतवः तदुभयाय तदन्तरात्मत्वात्तदाराध्यत्वात्तत्फलदत्वाच्च तत्तादात्म्यं विवक्षितं महान्तोऽध्वरा अवयवभूता यस्य। यज्ञाध्वरस्यावयवाः स्रुक्स्रुवेडादयः महान्तः अध्वरा अवयवाः स्रुगादयो यस्य स्रुगादिरूपेण षड्भिरनुसन्धेया यस्य तस्मै इत्यर्थः तथा चोक्तं तृतीये "स्रुक्तुण्ड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरन्ध्रे" इत्यादिना महापुरुषाय "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्" इति पुरुषसूक्तप्रतिपाद्यजगत्कारणत्वाद्यनन्तकल्याणमहागुणार्णवाय पुरुषाय सर्वान्तरात्मने कर्मशुक्लाय कर्मणा शुक्लाय विशुद्धाय विशुद्धकर्मणे संसृतिप्रतिभटकर्मणा इति यावत् तु कर्मरहितायेत्यर्थः "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः" इति देवमनुष्यादिसजातीयविजातीयाबन्धकसर्वकर्माश्रयत्वश्रवणात् "निष्क्रियं निष्कलम्" इत्यनेन बन्धककर्मानाश्रयत्वमुच्यते त्रियुगाय कर्मशुक्लायापि त्रियुगाय षाड्गुण्यपूर्णाय त्रीणि युगानि ज्ञानशक्त्यादीनि यस्य तस्मै यद्यपि भगवन् इत्यनेनापि षाड्गुण्यपूर्णतोक्ता कर्मशुक्लायेत्यनेन क्रियाश्रयत्वकथनप्रयुक्तं जीवस्येवाज्ञानादिकं वारयितुं त्रियुगायेत्युक्तमतो न पौनरुक्त्यमरुणाय अरुणवर्णाय श्वेतवराहरूपत्वेऽपि चक्षुषोररुणवर्णत्वात्तदभिप्रायेणारुणायेत्युक्तं भवतीति मन्त्रार्थो ज्ञेयः ॥ ३५ ॥

सर्वान्तरात्मत्वमुमुक्षूपास्यत्वादिकमनुसन्दधाना नमस्करोति। यस्येति। कवयः प्रकृतिपुरुषेश्वरयाथात्म्यविदः यस्य विपश्चितः सर्वज्ञस्य तव विविधं पश्यन्तीति विपश्चित् पृषोदरादित्वात् पश्यच्छब्दस्य स्थाने पकारादेशः "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति विपश्चिच्छब्दो ब्रह्मणि प्रयुक्तः स्वरूपम् 'सत्यं ज्ञानमनन्तं ब्रह्म' इतिलक्षणलक्षितं गुणेषु गुणपरिणामरूपेषु देवादिशरीरेन्द्रियसंसृष्टेषु भूतेषु क्रियार्थैर्गूढं क्रियार्थैः कर्मफलैर्गूढं तिरोहितं जीवसम्बन्धिक्रियाफलैस्तेषां गूढम् "तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्" इति जीवानां कर्मभिः परमात्मस्वरूपस्य तिरोहितत्वश्रवणात् दिदृक्षवो द्रष्टुं साक्षात्कर्तुमिच्छवः दारुषु जातवेदसमिव मथ्ना विवेकसाधनेन मनसा मथ्नन्ति विविच्यन्ते पञ्चविंशतितत्त्वेभ्यः पृथक्कृत्य पश्यन्तीत्यर्थः दारुष्विव जातवेदसमित्यनेन दृष्टान्तेन सर्वान्तरात्मत्वमुक्तं दिदृक्षवः कवय इत्यनेनोपास्यत्वमुक्तमीरितात्मने कर्तरि क्तः ईश्वराय परमात्मने नमः ईरितात्मन इति पाठे ईरिताः प्रेरिताः नियमिता आत्मानो जीवा यस्य तस्मै इत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

असङ्ख्येया निःशेषाः व्यावर्तकधर्मा असङ्ख्येयानि नामानि नारायणादीनि शुक्लादीनि रूपाणि यस्याः सा तथा तादृशी आकृतिर्विग्रहो यस्य स तथा तस्मिन्नेवंविधे यस्मिन् त्वयि दशावतारा इत्यादिकेयं सङ्ख्या कविभिः कल्पिता जगत्स्थितिलक्षणरक्षणायेति शेषः नेयं सङ्ख्या तात्त्विकीत्याह। यथेति। यथा दशावतारा इत्यादिकया सङ्ख्यया भवांस्तत्त्वदृशा वस्तु याथात्म्यं पश्यता ज्ञानिवचनं विनीयते विशेषेण नीयते शिष्यप्रशिष्यादिषूपदिश्य प्रथ्यते इति अनेन यथाहं कथयन्तः कवयो न भवन्ति किन्तु अपरोक्षं पश्यन्त इत्युक्तं नचेदं वृत्तिज्ञानं सङ्ख्याप्रणयनस्य विशेषग्रहणस्य व्यर्थत्वापातादतः स्वरूपज्ञानमनाङ्गीकर्तव्यम आचार्यैरप्येतदभिप्रायेणोक्तं तज्ज्ञानं तद्रूपमेव इति जीवस्य तिरोहितं स्वरूपज्ञानं च श्रीनारायणप्रसादेनाभिव्यक्तीत्यभिप्रायेण तं श्रीहरिं विशिनष्टि। साङ्ख्यनिदर्शनाय साङ्ख्यं यथार्थज्ञानं स्वरूपविषयं निदर्शयति सम्यग् ज्ञापयति प्रदीपप्रहितवत् इति साङ्ख्यनिदर्शनः तस्मै

बलमानन्द ओजश्च सहोज्ञानमनाकुलम्।

स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोः।

इति वचनात् स्वरूपज्ञानमस्तीत्यत्र किं निदर्शनमित्यतो वा तत्कथनमाह। साङ्ख्येति। ईशज्ञानं यथा तद्रूपमेवं जीवज्ञानमित्यर्थः "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः इदं च भगवत्पादाभिप्रेतमिति ज्ञायते तज्ज्ञानं तद्रूपमेवेति अनेन यथा ब्रह्मज्ञानं ब्रह्मस्वरूपं तथा जीवज्ञानं जीवस्वरूपमेव तत्र ब्रह्मज्ञानं नित्यं प्रकाशितं जीवज्ञानं स्वादृष्टेन तिरोहितं श्रीहरिप्रसादेन प्रकाशितं भवतीति विशेषं हिशब्देन प्रथयति ॥ ३३ ॥

उपनिषदं परकर्णागोचरं मन्त्रम ॥ ३४ ॥

मन्त्रतत्त्वलिङ्गाय मन्त्रतत्त्वमूर्तये मन्त्रार्थज्ञापनाय वा यज्ञक्रतवे यज्ञकाङ्क्षितपवित्रयाय कर्मणा क्रियया परफलत्यागाय शुक्लाय शुद्धाय त्रिषु युगेषु अवतारो यस्यासौ त्रियुगस्तस्मै ॥ ३५ ॥

वनगोचरस्य वराहस्य मन्त्रतत्त्वलिङ्गादिकं कथमुपपद्यत इत्याशङ्क्य प्रेक्षावद्भिर्विमृग्यरूपत्वेन पुरुषोत्तमत्वाद्वराहावतारत्वेनोपपद्यत इत्याह। यस्येति। काव्यकर्तृत्वेन कवय इति नतु वेदान्तवेद्यवस्तुज्ञत्वेनेत्यन्यथा प्रतीतिनिरासाय विपश्चित इति गुणेषु सत्त्वादिकार्येषु शरीरेन्द्रियादिषु नियामकत्वेन सन्निहितं यस्य तव स्वरूपं विपश्चितः कवयो मनसा मथ्ना योनिषु काष्ठेषु जातवेदसमग्निमिव मथ्नन्ति आलोडयन्ति विचारयन्तीत्यन्वयः शरीरादौ सन्निहितश्चेत्कुतो न प्रकाशत इति तत्राह । गूढमिति । "एको देवः सर्वभूतेषु गूढः विद्वं ज्योति-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हृदय आहितं यत्,, इत्यादिश्रुतिः क्रियार्थैर्यज्ञविषयैरिन्द्राग्न्यादिनामभिरीरितात्मने प्रतिपादितस्वरूपाय ॥ ३६

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यस्मिन्निति । इयं सङ्ख्या जरायुजादिरूपा कल्पिता । प्रथमोपासनार्थं स्वद्रूपत्वेनारोप्यैषोपदिष्टा । ययापनीयते तस्मै तदेकगम्यायेत्यर्थः । साङ्ख्यानां साङ्ख्यविदां तेषां निदर्शनाय सिद्धान्तरूपाय ॥ ३३—३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च । विश्वस्यास्य नश्वरत्वाज्ज्ञानिभिरनुपादेयत्वमाह । यस्मिन्निति । असङ्ख्येया अनन्ता विशेषा येषां तानि नामानि रूपाण्याकृतयश्च यस्य तत्र इयमुक्तलक्षणा जरायुजादिरूपा सङ्ख्या कल्पिता सती यया तु तत्त्वदृशा येन तत्त्वज्ञानेनापनीयते तस्मै ते साङ्ख्यनिदर्शनाय ज्ञानस्वरूपाय नमः ॥ ३३ ॥ ३४ ॥

मन्त्रैरेव तत्त्वेन लिङ्ग्यते ज्ञायते यस्तस्मै । यज्ञा सयूपाः क्रतवः सयूपास्तद्रूपाय महान्तोऽध्वरा अवयवभूताः यस्य । कर्मभिः स्वीयचरित्रैः सह शुक्लाय शुद्धसत्त्वस्वरूपाय । त्रियुगाय सत्यादियुगत्रय एव प्राकट्यात् कलौ छन्नत्वात् । यद्वा । त्रीणि युगानि युगलानि यस्य तस्मै । षडैश्वर्यायेत्यर्थः ॥ ३५ ॥

कवयो विद्वांसः विपश्चितः भक्तिचतुराः यस्य गुणेषु शब्दरूपादिषु कृष्णरामेति नीलोत्पलदूर्वादलश्यामेत्यादिषु मनसा मन्था मथनसाधनेन यस्य स्वरूपं दिदृक्षवो मथ्नन्ति दारुष्विव जातवेदसमिति यथा मथनेनैव जातवेदा वह्निः प्रत्यक्षीभवति तथैवात्र यस्य नामरूपादिषु पुनः पुनर्मनोनिधानमेव मथनं तेनैव यत्स्वरूपं प्रत्यक्षीकुर्वन्तीत्यर्थः । कीदृशं क्रियार्थैः कर्मभिस्तत्फलैश्च गूढं भक्त्यैव नैष्कर्म्ये सत्येव द्रष्टुं शक्यमित्यर्थः । एवमेव ईरितः कथितः आत्मा स्वभावो यस्य यत्नो वा यत्र तस्मै । यद्वा गुणेषु श्रोत्रवागादीन्द्रियेषु यस्य स्वरूपं स्वरूपभूतं नामगुणलीलादिश्रूयमाणकीर्त्यमानादि मनसा मन्था मथ्नन्ति मनःसहितश्रवणकीर्तनादिदृढाभ्यासेनैव यं प्रत्यक्षीकुर्वन्तीत्यर्थः । अन्यत् समानम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु नानापदार्थानामेकत्वं कथं घटेतेत्यत्र कार्यदृष्ट्या नानात्वं कारणमात्रदृष्ट्यैकत्वं च सुघटमेवेति "उभयव्यपदेशात्त्वहिकुण्डलवत्" इतिन्यायेन जगद्ब्रह्मणोः स्वाभाविकभेदाभेदसम्बन्धमाह । यस्मिन्निति । यस्मिन् कविभिः क्रान्तदर्शिभिर्वेदैः यया तत्त्वदृशा सर्वात्मभूतब्रह्मविषयिण्या दृष्ट्या इयं नाना संख्या अपनीयते "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" इत्येवमपसार्यते तयैव तत्त्वदृशा "यतो वा इमानि भूतानि जायन्ते" इत्येवं कल्पिता तस्मै अत एवासंख्येया विशेषाः येषां तानि नामानि रूपाणि आकृत-

यश्च यस्य तथाभूताय सांख्यनिदर्शनाय सांख्यं सम्यक् ख्यायते प्रकाश्यते ब्रह्म अनयेति संख्या उपनिषत् तयावधारणीयं सांख्यं तथाभूतं निदर्शनं ज्ञानं यस्य तथाभूताय ते तुभ्यं नमः इत्यन्वयः ॥ ३३ ॥

एवा भूर्भूत्यधिष्ठात्री देवता ॥ ३४ ॥

मन्त्रा एव तत्त्वलिङ्गानि स्वरूपज्ञापका यस्य तस्मै यज्ञा अयूपाः क्रतवः सयूपाः तद्रूपाय महान्तो महाध्वराः अवयवा यस्य तस्मै कर्मणा भुवः उद्धरणे शुक्लाय प्रकाशमानाय त्रियुगाय त्रीणि युगानि ।

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।

वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ।

इतिस्मृतिप्रोक्तानि यस्मादुपासकानां स तथा यदुपासनया जीवोऽप्युक्तषाड्गुण्ययोगाद्भगवान् भवति तस्मै इत्यर्थः ॥ ३५ ॥

यस्य विपश्चितः सर्वज्ञस्य "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति श्रुतिप्रसिद्धस्य ते स्वरूपं क्रियार्थैर्गूढं जीवस्य स्वकृतकर्मफलैः सङ्कुचितज्ञानस्य दुष्प्रकाशमानं गुणेषु स्वकार्यभूतचतुर्विंशतिप्राकृततत्त्वसहितेषु जीवसहितेषु चाष्टाविंशतिपदार्थेषु वक्ष्यमाणेषु एकोनत्रिंशं मथ्नन्ति विचिन्वन्ति दारुषु जातवेदसमग्निमिव मन्था विवेकसाधनेन मनसा इत्थंकृते यत्ने ईरितः प्रकटितः आत्मा स्वरूपं यस्य तस्मै नमः ॥ ३६ ॥

भाषाटीका ।

जिन आप के असंख्य नामरूप आकृति हैं तिन आप के कवियों की वर्णन करी जो चतुर्विंशति तत्त्व की संख्या जिस तत्त्वदृष्टि के होने से दूर होजाती है तिन सांख्य प्रतिपादित आप के अर्थ नमस्कार है ॥ ३३ ॥

उत्तर कुरु वर्ष में वराह रूपवाले भगवान् यज्ञ पुरुष हैं उन को यह भूमी देवी अचलभक्ति योग से आराधन करती है इस उपनिषद् मन्त्र को आवर्तन करती है ॥ ३४ ॥

मन्त्रों से तत्त्वों से जानने योग्य यज्ञरूप क्रतुरूप महा अध्वर अवयव वाले महापुरुष कर्मों के शुद्ध फलरूप ऐश्वर्यादि छै गुणों वाले भगवन् आप के अर्थ नमस्कार है ॥ ३५ ॥

कवि विद्वान् आपके जानने की इच्छाकरनेवाले पुरुष कर्मफलों से गुणोंमें गुप्त जिन आपके स्वरूप के साधन भूत निर्मल मनसे निश्चित करते हैं जैसे विवेकी पुरुष काष्ठमें से मथनसे अग्नि पैदा करते हैं इस प्रकार जिनका आत्मा प्रगट है उन आपके अर्थ नमस्कार है ॥ ३६ ॥

द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ।
अन्वीक्षयाङ्गातिशयात्मबुद्धिभिर्निरस्तमायाकृतये नमो नमः ॥ ३७ ॥
करोति विश्वस्थितिसंयमोदयं यस्येप्सितं नेप्सितमीक्षितुर्गुणैः ।
माया यथाऽयो भ्रमते तदाश्रयं ग्राव्णो नमस्ते गुणकर्मसाक्षिणे ॥ ३८ ॥
प्रमथ्य दैत्यं प्रतिवारणं मृधे यो मां रसाया जगदादिसूकरः ।
कृत्वाग्रदंष्ट्रे निरगादुदन्वतः क्रीडन्निवेभः प्रणताऽस्मि तं विभुमिति ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां संहितायां वैयासिक्यां भुवनकोशवर्णनं नाम अष्टादशोऽध्यायः ॥ १८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मथनमेव दर्शयन्त्याह । द्रव्येति । द्रव्यं विषयः क्रिया इन्द्रियव्यापारः हेतुर्देवता अयनं देहः ईशः कालः कर्ताहङ्कारः एतैर्मायागुणैः कार्यैरुपलक्षणैर्वस्तुत्वेन निरीक्षितो य आत्मा तस्मै अन्वीक्षया विचारेणाङ्गैर्यमनियमादिभिरतिशयात्मा निश्चयवती बुद्धिर्येषां तैर्निरस्ता मायानिमित्ता आकृतिर्यस्मात्तस्मै ॥ ३७ ॥

तदेवं निर्गुणरूपेण नत्वा परमेश्वररूपेण प्रणमति । करोतीति । यस्येक्षितुर्जीवार्थमीप्सितम् । अत्यन्तानिच्छायामीक्षणायोगात् स्वार्थं तु नेप्सितम् । विश्वस्थित्यादिस्वगुणैर्माया करोति तस्या जडत्वेऽपीश्वरसन्निधानात्प्रवृत्तिं दृष्टान्तेनाह । यथायो लोहं ग्राव्णोऽयस्कान्तात्सन्निधानाद्भ्रमति तदाश्रयं तदभिमुखं सत् गुणानां कर्मणां जीवादृष्टानां च साक्षिणे तस्मै ते नमः ॥ ३८ ॥

अवतारचरितमाह । प्रमथ्येति । यो जगतामादिः कारणभूतः सूकरो मां पृथ्वीमग्रदंष्ट्रे दंष्ट्राग्रे कृत्वा रसातलादारभ्योदन्वतः प्रलयाम्बुधेर्विभो गज इव निरगात् ततश्च प्रतिगजतुल्यं दैत्यं प्रमथ्य च क्रीडन् स्थितस्तं विभुं प्रणतास्मीत्यन्वयः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

गुणत्रयोपलक्षितचिदचिदात्मकजगदन्तरात्मत्वेन तद्वैलक्षण्यमुक्तं तदेव विशदयन्नमस्करोति । द्रव्येति । अङ्गेत्यभिमुखीकरणं हे भगवन्नतिशयात्मबुद्धिभिरतिशयितात्मपरमात्मविषयबुद्धिमद्भिः पुरुषैरन्वीक्षया निपुणनिरूपणेन वस्तुतः परमार्थतः प्रकृतिपुरुषविलक्षणत्वेनेति यावत् निरीक्षितः आत्मा स्वरूपं यस्य निरस्तमायाकृतये निरस्ता मायाकृतिः प्रकृतिकार्यं यस्मात्तस्मै ते नमो नम इत्यन्वयः कैः सह कुत्र निरीक्षणं तत्राह । द्रव्यं भूतपञ्चकं क्रियाक्रियाहेतुर्वागादिकर्मेन्द्रियमयनं ज्ञानेन्द्रियमीयतेऽनेनेति ज्ञानसाधनत्वाच्चक्षुरादेर्ज्ञानेन्द्रियस्य एषां समाहारद्वन्द्वः एतत्सङ्घातरूपं शरीरं तत्कर्तृभिः सपरिच्छदैः मायागुणैः सह निरीक्षितात्मने नमः देहभूतेन्द्रियगुणत्रयजीवात्मभिः सह विविच्य निरीक्षितायेत्यर्थः अनेन पूर्वश्लोके गुणपदं देहाद्युपलक्षकजीवोपलक्षणमित्यावेदितुम् अन्यथास्मिन् श्लोके जीवोपस्थापककर्तृपदासङ्गतिः स्पष्टैव पद्यश्च गुणपदेन देहमात्रमभिप्रेत्य तत् जीवमात्रवाचकत्वेन वदन्तीति न भ्रमितव्यम् ॥ ३७ ॥

निरस्तमायाकृतय इत्यनेन मायाकार्यदोषप्रतिभटत्वमुक्तं तदुपपत्तये मायाया ईश्वराधीनतामाह । करोतीति । हे भगवन् यस्य भगवतस्य गुणैः सत्त्वादिभिः प्रधानाभिप्रायेण बहुवचनं तत्सम्बन्धिनिर्देशः विश्वस्य स्थितिसंयमोदयं स्थितिलयोदयं करोति कथं भूतमीप्सितं धर्मार्थकाममोक्षार्थतनुभुवनादि साधनोपयुक्तकरणकलेवरादिप्रदानेन जीवानुग्रहार्थत्वाज्जगत्सृष्ट्यादेस्तत्संसिद्धमिष्टं जीवार्थत्वेनेप्सितमिति यावत्स्वार्थत्वेनानीप्सितमित्यर्थः तत्कार्यस्वीक्षितुः सङ्कल्परूपज्ञानवतस्तस्य ततः माया सत्त्वादिगुणात्मिका त्वत्सङ्कल्पोपरिभूता माया यथा ग्राव्णोऽयस्कान्तात्तदाश्रयं तदभिमुखं सदयो लोहं भ्रमति तथा त्वत्सङ्कल्पानुगुणकारिणी भ्रमतीति भावः यद्वा ईक्षितुः "तदैक्षत बहु स्यां प्रजायेय" इत्युक्तविचक्षणवतः तस्य तव माया यस्येति षष्ठी शरीरशरीरिभावसम्बन्धे त्वच्छरीरभूता माया । यद्वा । तादर्थ्ये षष्ठी दृष्टान्तस्य सामर्थ्यात्त्वदधीना माया त्वदाहितशक्तिर्विश्वस्य सृष्ट्यादि करोति इत्यर्थः स्वतोऽशक्ता या कथमनुप्रवेशमात्रेण शक्तिमती स्यात्तत्राह । "यथायो भ्रमते तदाश्रयं ग्राव्णः" इति विश्वसृष्ट्यादिकर्तृत्वस्य परमात्मधर्मत्वेन माया करोतीत्युक्तमिति तदुच्यते भगवदवताररूपाणां ब्रह्मादीनां सृष्ट्यादिकर्तृत्वस्य रजआदिमायागुणप्राचुर्यप्रयुक्तत्वान्माया विश्वसृष्ट्यादिकं करोतीत्युक्तमिति नेप्सितमित्यनेन विश्वस्थित्यादिकं न भगवतो भोगार्थमित्युक्तम् ईप्सितमित्यनेन जीवानुग्रहार्थं लीलार्थं चेति सूचितम् । ननु विश्वस्थित्यादिकं न जीवानुग्रहार्थं किन्तु गर्भजन्मजरामरणादिदुःखहेतुत्वेन जीवनिग्रहार्थमेव स्यात् किञ्च हितकरणाहिताकरणविप्रयुक्तवैषम्यनैर्घृण्यं च भगवतः प्रसज्येत तत्राह । नमस्त इति गुणकर्मसाक्षिणे इति गुणानां मायागुणानां सत्त्वादीनां कर्मणां पुण्यपापरूपाणां चादृष्टानां साक्षिणे साक्षाद्द्रष्ट्रे ते नमः जीवगुणकर्मानुसारित्वात् हिताकरणादिनं वैष-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

स्यत्वेनैर्घृण्यप्रसक्तिरिति भावः तथा च सूत्रम् "वैषम्यनैर्घृण्ये न सापेक्षत्वात्। न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च" इति अयं भावः भगवान् जगदादौ स्वस्मिन्नुपसंहृतचिदचित्तत्त्वः सर्वज्ञः सर्वशक्तिः परमकारुणिकोऽवाप्तसमस्तकामः स्वस्मिन् प्रलीनमसत्कल्पं चेतनवर्गमालोक्य सर्वेषां सामान्येन धर्मादिपुरुषार्थसाधनत्वाराधनोपयुक्तकरणकलेवराणि प्रदायाराधनप्रकारावबोधि वेदाख्यं शास्त्रं च प्रदर्श्य स्वयं जगत्सृष्ट्यादिकृदास्ते ततस्ते जीवाः करणकलेवराणि परिगृह्य प्राचीनकर्मवासनानुसारेण साध्वसाधुकर्माणि कुर्वन्तः स्वस्वकर्मानुसारेण ईश्वरादिष्टं फलं भुञ्जते इति नेश्वरस्य वैषम्यादिप्रसक्तिरिति ॥ ३८ ॥

प्रकृतावतारचरित्रं वदन्तो नमस्करोति। प्रमथ्येति। यो जगतामादिः कारणभूतः सूकरः मां पृथ्वीं दंष्ट्राग्रे कृत्वा निधाय रसातलादारभ्य उदन्वतः प्रलयार्णवादिभो गज इव निरगात् तत्र च प्रतिवारणं प्रतिगजतुल्यं दैत्यं हिरण्याक्षं प्रमथ्य हत्वा क्रीडन् स्थितः तं विभुं प्रणतास्मि ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

शरीरादिगुणेश्वरसद्भावे ब्रह्मादिप्रत्यक्षं च प्रमाणमित्याह। द्रव्येति। द्रव्यक्रियाहेत्वयनेशाश्च कर्तारश्चेति तथा ईशशब्दः प्रत्येकमभिसम्बध्यते हेतुः कारणमयनमाधारः द्रव्यादीनामीशाः शङ्करगरुडब्रह्मवायुभिर्जगत्कर्तृभूतैर्मायागुणैर्हरीच्छानुसारिभिर्यस्तु यथा तथा निरीक्षितात्मने साक्षात्कृतस्वरूपाय त्वत्प्रसादबलात्स्वसाक्षात्कारे बुद्धिपाटवं चैषामस्तीत्याह। तत्रेति। तत्र तव स्वरूपे यथा शक्त्यखिलविशेषदर्शनपटुतरबुद्धिभिः यदुच्यते ब्रह्मविवर्तवादिभिर्मायारूपमेव गृह्यते न तात्त्विकमिति तत्राह। निरस्तेति। शङ्करादीनां द्रव्यादीशत्वम्

द्रव्येशः शङ्करः प्रोक्तः क्रियेशो गरुडः स्मृतः।
कारणेशस्तथा ब्रह्मा वायुराधारवान् स्मृतः।

इति वाक्यात्सिद्धं येषां वस्तुनिरीक्षणं शक्यते। तथेति। एवं त्वादृशानामेषामेतादृशशक्तिं निवारयति ॥ ३७ ॥

ब्रह्मादीनामपि त्वत्कटाक्षलेशमन्तरेण स्वज्ञानादौ पाटवं नास्ति अतो निर्मातृत्वं च मुख्यं तवैवेत्यभिप्रेत्याह। करोतीति यो विश्वस्य स्थित्यादिकं करोति ब्रह्मादयश्च यस्य तत्रेप्सितमीक्षितुं नेशते सत्त्वादिगुणैर्मोहितत्वादिति शेषः ब्रह्मादीनामपि तदीप्सितज्ञानशक्त्यभावोऽस्तु लक्ष्म्याः मास्तु तदनुवर्तमानत्वादित्याशङ्क्याह। मायेति। यदाश्रया यत्समाश्रया यस्याः सा तथा माया लक्ष्मीर्भ्रमति अनन्तत्वात्स्वरूपं न परिच्छिनत्ति अनुवृत्तिरपि न स्वाधीना किन्तु हर्यधीनेत्यत्र दृष्टान्तमाह। यथेति। अयस्कान्तस्य सन्निधानाद्यथाऽयो भ्रमति चेष्टते तथैवमपि त्वत्सन्निधानात्त्वामनुवर्तत इत्यर्थः त्वत्सन्निधानाभावे जडप्रायेति द्योतनायायोनिदर्शनमिति भावः अनेन त्वत्सन्निहितलक्ष्मीसान्निध्याज्जडप्रकृतिकार्येषु प्रवर्तते तत्रेदं निदर्शनमिति चोक्तं भवति तथा च योजना यस्य तदाश्रया माया जडप्रकृतिर्भ्रमतीति अयस्कान्तस्यायश्चेष्टकत्वशक्तिरीश्वरनियतेति ज्ञापनाय यदाश्रयेति अत एव प्राच्या इति अयस्कान्ते सन्निधाय द्रव्यान्तरचेष्टाशक्तिप्रदत्वाद्भ्रमिस्पत्वाद्वा तच्छब्दवाच्याय एतदेव सूचितं गुणकर्मेति। चेतनाचेतनाश्रयगुणकर्मणोः साक्षिणे कर्तृत्वेनेति शेषः ॥ ३८ ॥

प्रतिवारणं प्रतिगजस्थानीयं निरस्तनिवारणं वा अग्रदंष्ट्रे दंष्ट्राग्रे जगदादिः श्रीनारायण एव सूकरः जगदादिश्चायं सूकरश्च सुष्ठु करोतीति सूकर एव सूकरः घुमित्यनुकारं शब्दं करोतीति सूकरो वराहः "घर्घौ शसाविति प्राच्या" इति सूत्रात् शसयोरभेदः ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

द्रव्यादिभिर्मायागुणैरुपलक्षितं यद्वस्तु शुद्धजीवतत्त्वं तत्रापि निरीक्षितो य आत्मा परमात्मा तत्स्वरूपाय। अन्वीक्षादिभिर्निरस्ता प्रत्याख्याता माया यतस्तथाभूताकृतिर्यस्य तस्मै ॥ ३७ ॥

तत्स्थापनाय वशीभूतमायां स्वरूपशक्तिं योजयति। करोतीति ॥ ३८ ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

एवं स्थूलसूक्ष्ममायिकदेहद्वयसद्भावे एव मन्थनं सम्भवेत् मन्थने च सति तत्स्वरूपं दृश्यं स्यादित्याह। द्रव्यं शब्दादि क्रिया इन्द्रियव्यापारः हेतुर्देवता अयनं देहः ईशः कालः कर्ता अहङ्कारः। एतैर्मायागुणैः श्रवणकीर्तनपरिचरणादिभिर्भजनसाधकैरन्वीक्षया मनःकृतेन पुनः पुनः परामर्शेन च अङ्गानां श्रवणकीर्तनादीनामतिशये आत्मा यत्नो बुद्धिश्च येषां तैर्वस्तुत्वेन निरीक्षित आत्मा स्वरूपं यस्य तस्मै। तच्च ते स्वरूपं चिन्मयमेवेत्याह। निरस्ता माया यत्र तथाभूता आकृतिराकारो यस्य तस्मै। श्लेषेण निरस्ता माया भक्तस्याप्याकृतिर्यतस्तस्मै ॥ ३७ ॥

ननु सत्कार्यत्वाद्यद्यपि जगत्सत्यमेवाकारणं मृद्घटादिवत्तत्र जगदिदं न वस्तुतस्त्वत्कार्यं किन्तु मायाकार्यमित्याह। करोतीति। यस्येप्सितुर्जीवार्थमीप्सितमत्यन्तानिच्छायामीक्षणयोगात् स्वार्थं तु नेप्सित विश्वस्थित्यादिस्वगुणैर्माययैव करोति। तस्या जडत्वेऽपि ईश्वरसन्निधानात् प्रवृत्तिं दृष्टान्तेनाह। यथा लोहं ग्राव्णोऽयस्कान्तादन्तिके भ्रमति तदाश्रयं तदभिमुखं सत् अतो गुणानां कर्मणां जीवादृष्टानाञ्च साक्षिणे तस्मै तुभ्यं नमः ॥ ३८ ॥

अवतारचरित्रं ब्रुवतो स्वस्मिन् कृपातिशयं द्योतयति। प्रमथ्येति। प्रतिवारणं प्रतियोद्धारं हस्तिनमिव इभो हस्ती रसाया रसातलोपलक्षितात् गर्भोदात् जगदादिर्जगत्कारणभूतः सूकरः। उदन्वतः उदन्वति प्रलयार्णवे ॥ ३९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
पञ्चमेऽष्टादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

पूर्वश्लोकं विवृणोति। द्रष्टेति। अन्वीक्षया विचारेण अङ्गैर्यम-नियमादिभिः अतिशयात्मा निश्चयवती बुद्धिर्येषां तैर्दिदृक्षुभिः द्रष्ट्यादिभिः पञ्चविंशतितत्त्वैः सह त्रिभिर्मायागुणैश्च सह वस्तुनो याथात्म्येन निरीक्षितो य आत्मा एकोनत्रिंशः परमात्मा तस्मै नमो नमः तत्र द्रष्टव्याणि महाभूतानि पञ्च क्रियाशब्देन कर्मे-न्द्रियाणि पञ्च हेतवः प्रकृतिमहदहङ्काराः पञ्चतन्मात्राणि चेत्यष्टौ प्रकृतयः अयनानि ज्ञानायनानि पञ्च ज्ञानेन्द्रियाणि ईशः इन्द्रियेशः मनः कर्ता जीवः एतैर्मायागुणाः सत्त्वरजस्तमांसि तैश्च सहित इत्यर्थः कथम्भूताय निरस्ता मायानिमित्ता आकृति-र्यस्मात् तस्मै अप्राकृताकृतय इत्यर्थः ॥ ३७ ॥

एवं चेतनाचेतनब्रह्माख्यानि त्रीणि तत्त्वान्युक्तानि तत्र से-श्वरसाङ्ख्यपक्षे प्रकृतिर्यथेश्वरादत्यन्तभिन्नातः सैव जगत्कर्त्रीति शङ्का प्राप्ता, तां वारयन् ब्रह्मणो जगत्कारणत्वमाह। करोतीति यस्य जगत्कारणस्य ईक्षितुः "तदैक्षत बहुस्याम्" इत्यादि श्रुति-प्रसिद्धस्यैव सम्बन्धिनी शक्तिभूतैव माया न तदत्यन्तपृथग्भूता मा-यास्तीति "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" इति श्रुतेः उपलक्षणमेतज्जीवादेरपि न ब्रह्मात्मकत्वेनतो ऽचेतनश्च कश्चित्पदार्थोऽस्ति "सर्वं खल्विदं ब्रह्म तज्जलानिति" इति श्रुतेः सा च माया ब्रह्माधीनस्थितिप्रवृत्तिमतीति दृष्टान्तेनाह। यथा अयो लोहं ग्रावणोऽयस्कान्तात्संनिधितः स्वयं तदभिमुखं भ्रमति तद्वन्मायापि स एव मायेशः ईप्सितं बुभुक्षोर्जीवस्य भोगार्थं मुमुक्षोर्मोक्षार्थं स्वार्थं तु नेप्सितं विश्वस्थित्यादिकं गुणैः स्वमायागुणैः करोति तस्मै ते जीवस्य गुणानां सात्त्विकत्वा-दीनां कर्मणां च गुणानुरूपाणां साक्षिणे नमः ॥ ३८ ॥

प्रतिवाक्यं विरोधिनमिभमिभ इव मृधे युद्धे दैत्यं प्रमथ्य रसायाः रसातलात् अग्रदंष्ट्रे दंष्ट्राग्रे मां कृत्वा उद्गच्छतः प्रल-यार्णवात् क्रीडन्निव निरगात् तं प्रणतास्मि ॥ ३९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
अष्टादशाध्यायार्थप्रकाशः ॥ १८ ॥

भाषा टीका

विचार सहित यम नियमादिक अङ्ग इनों से अतिशय शुद्ध स्वरूपवाली बुद्धिवाले पुरुषोंने विषय इन्द्रिय व्यापार इन्द्रिय देवता देह ईश्वर काल कर्ता माया के गुण इनोंसे जिनके स्वरूप को देखा है ऐसे आत्ममाया को दूर करनेवाले आप के अर्थ नमस्कार है ॥ ३७ ॥

जो आप गुण कर्मों के साक्षी हैं नहीं इच्छा करनेवाले भी जिन आपकी इच्छा गुणों से संसार के उत्पत्ति स्थिति प्रलय को करती है जैसे कि चुम्बक पत्थर के पास में रहने से लोहा घूमता है ऐसी शक्तिवाले आप के अर्थ नमस्कार है ॥ ३८ ॥

जो आप जगत् के आदि में कारण सूकररूप होकर रसातल में गई पृथिवी को दन्त के अग्र भाग में रखकर प्रलय समुद्र के जलमें से निकल आये जैसे कि हस्ति कमल के नाल को लेकर आवे तैसे फिर दूसरे हस्तिसदृश के हिरण्याक्ष दैत्य को युद्ध में मारकर स्थित हैं उन प्रभु को मैं नमस्कार करती हूं ॥ ३९ ॥

इति श्रीभागवत पञ्चमस्कन्ध अठारहमे अध्यायका
भाषानुवाद समाप्त ॥ १८ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे अष्टादशोऽध्यायः समाप्तः ॥ १८ ॥



॥ ऊनविंशोऽध्यायः ॥

——:०:——

॥ श्रीशुक उवाच ॥

किंपुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसन्निकर्षाभिरतः परमभागवतो हनुमान् सह किंपुरुषैरविरतभक्तिरुपास्ते ॥ १ ॥

आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति स्वयं चेदं गायति ॥ २ ॥

ओं नमो भगवते उत्तमश्लोकाय नम आर्यलक्षणशीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय महापुरुषाय महाराजाय नम इति ॥ ३ ॥

यत्तद्विशुद्धानुभवमात्रमेकं स्वतेजसा ध्वस्तगुणव्यवस्थम् ।
प्रत्यक् प्रशान्तं सुधियोपलम्भनं ह्यनामरूपं निरहं प्रपद्ये ॥ ४ ॥
मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः ।
कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि व्यसनानीश्वरस्य ॥ ५ ॥
न वै स आत्मात्मवतां सुहृत्तमः सक्तस्त्रिलोक्यां भगवान् वासुदेवः ।
न स्त्रीकृतं कश्मलमश्नुवीत न लक्ष्मणं चापि विहातुमर्हति ॥ ६ ॥
न जन्म नूनं महतो न सौभगं न वाङ् न बुद्धिर्नाकृतिस्तोषहेतुः ।
तैर्यद्विसृष्टानपि नो वनौकसश्चकार सख्ये बत लक्ष्मणाग्रजः ॥ ७ ॥
सुरोऽसुरो वाऽप्यथवा नरो नरः सर्वात्मना यः सुकृतज्ञमुत्तमम् ।
भजेत रामं मनुजाकृतिं हरिं य उत्तराननयत्कोसलान् दिवमिति ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ऊनविंशे किंपुरुषे भारते चोपवर्ण्यते ।
सेव्यसेवकभावश्च भारतश्रैष्ठ्यमेव च ॥ १ ॥ २ ॥

भर्ता चासौ भगवांश्च तस्य कथाम् ॥ २ ॥

आर्याणि लक्षणानि शीलं व्रतं च यस्मिन् । उपशिक्षितात्मने संयतचित्ताय उपासितोऽनुसृतो लोको येन । साधुवादः साधुत्वप्रसिद्धिस्तस्य निकषणाय निकषाश्मवत्परीक्षास्थानाय परमसीम्न इत्यर्थः ॥ ३ ॥

श्रीरामं परमार्थरूपेण प्रणमति । यदेकं वेदान्तेषु प्रसिद्धं तत्त्वं तत्प्रपद्ये तत्स्वरूपभूतम् । विशुद्धश्चासावनुभवश्च स एव मात्रा स्वरूपं यस्य विशुद्धत्वे हेतुः प्रशान्तं तत्रापि हेतुः स्वतेजसा स्वरूपप्रकाशेन ध्वस्ता गुणानां त्रिविधा जाग्रदाद्यवस्था यस्मिन् अनुभवमात्रत्वे हेतुः प्रत्यक् दृश्याद्व्यावृत्तं ततः अनामरूपम् । ननु वस्तुत एवम्भूतस्यापि जीवस्योक्तसर्वविपर्ययो दृश्यते तत्राह । निरहम् । अहङ्काराभावान्न तथा वैपरीत्यमित्यर्थः । ननु श्रीरामस्य स्वरूपं नैवं प्रतीयते तत्राह । सुधिया पुंसा उपलभ्यते इत्युपलम्भनं शुद्धचित्तेन ब्रह्मत्वेनैवोपलभ्यत इत्यर्थः ॥ ४ ॥

कथं तर्हि दशरथपुत्रत्वं तत्राह । विभोर्मर्त्यावतारस्तु रक्षसां रावणस्य वधाय तस्य मनुष्यादन्यतोऽवध्यत्वात् न केवलमेतावत्किन्त्विह संसारे स्त्रीसङ्गादिकृतं दुःखं दुर्वारमिति मर्त्यानां शिक्षणं च शिक्षार्थमपीत्यर्थः । अन्यथा स्वे स्वरूपे रममाणस्य जगदात्मनः सीताविरहकृतानि व्यसनानीति कुतः स्यात् ॥ ५ ॥

विषयासक्त्यभावेन व्यसनानर्हत्वमुपपादयति । न वै स भगवांस्त्रिलोक्यां क्वापि सक्तः यत आत्मवतां धीराणामात्मा सुहृत्तमश्च अतो न स्त्रीकृतं मोहं प्राप्नुयात् न लक्ष्मणं चेति देवदूतेन श्रीरामं संगत्यागतेन विज्ञापितमनागतस्त्वया वध्य इति तदैव द्वारि स्थितं लक्ष्मणं दुर्वाससमागमं विज्ञापयितुं प्रविष्टं हन्तुमुद्यतो वसिष्ठवाक्यात्तत्याज तच्च न युज्यतेत्यर्थः ॥ ६ ॥

अतः श्रीराम एव सर्वैः सेव्य इति वक्तुं न तस्य तोषहेतुः सत्कुलजन्मादि किन्तु भक्तिरेवेत्याह । न जन्मेति । महतः पुरुषा-

श्रीधरस्वामिकृतभावार्थदीपिका ।

जन्म महतः श्रीरामस्येति वा । सौभगं सौन्दर्यम् आकृतिर्जातिः यद्यस्मात्तैर्जन्मादिभिर्विसृष्टांस्त्यक्तानपि नो वनचरान् बत अहो लक्ष्मणस्याग्रजोऽपि सखित्वे कृतवान् ॥ ७ ॥

तस्मात्सुरो वासुरो वा यः कोऽपि श्रीराममेव सर्वप्रकारेण भजेत् । सुकृतमल्पीयस्यपि भजने बहुमानिनम् उत्तरान् कोसलानयोध्यावासिनः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिलावृतादिषु वर्षेषु तत्तदुपास्यादिकमुक्तमनन्तरं किंपुरुषे भारते च वर्षे तद्वर्षस्थानां मध्ये भारतवर्षश्रैष्ठ्यं चाहैकोनविंशेन । तत्रादौ किंपुरुषे उपास्यं भगवन्तं तदुपासकं जप्यं मन्त्रं चाह । किंपुरुष इति । आदिपुरुषं जगत्कारणभूतं परमपुरुषं लक्ष्मणस्य सौमित्रेरग्रजं सीताया मैथिल्या अभिराममनुरूपं रामं दाशरथिं रामम् ।

रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥

इति निरुक्तरामशब्दपुष्कलप्रवृत्तिनिमित्ताश्रयं तस्य श्रीरामस्य यौ चरणौ तयोः सन्निकर्षः सान्निध्यं भजनमिति यावत्तदभिरत आसक्तो महाभागवतो हनुमानाञ्जनेयः किंपुरुषवर्षस्थैः सहाविरता अविच्छिन्ना भक्तिर्यस्य तादृश उपास्ते ॥ १ ॥

भगवतो भर्तुः श्रीरामस्य कथां गन्धर्वैरुपसमीपे गीयमानां आर्ष्टिषेणेन किंपुरुषवर्षस्थपुरुषश्रेष्ठेन सह सम्यगुपशृणोति स्वयमिदं वक्ष्यमाणमुपांशु गायति जपति ॥ २ ॥

ओंभगवच्छब्दार्थौ पूर्ववत् उत्तमैर्ब्रह्मादिभिः श्लोक्यते स्तूयते उत्तमःनिरतिशयः श्लोकः यशो यस्येति वा तस्मै आर्याणां लक्षणानि व्रतानि च शीलानि यस्मिन् उपशिक्षितः संयतः आत्मा चित्तं येन उपार्जितः लोको येन साधुवादः साधुत्वभिज्ञः तस्य निकषणाय निकषाश्मवदभिज्ञापनस्थानाय ब्रह्मणो कुले साधुः ब्रह्मण्यः तत्र साधुरिति यत्प्रत्ययः "ये चाभावकर्मणोः" इति प्रकृतिभावान्न टिलोपः ।

अप्यहं जीवितं जह्यां त्वां वा सीते ! सलक्ष्मणाम् !
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥

इत्युक्तरीत्या ब्राह्मणसंरक्षणार्थकदीक्षत्वमेवात्र ब्रह्मण्यत्वं स चासौ देवः स्वतेजसा दीप्यमानः अस्पष्टप्राकृतदोषस्तस्मै । यद्वा । ब्रह्म वेद तत्र साधुः सम्यक् प्रतिपाद्यः स चासौ देवस्तस्मै महापुरुषाय पुंसूक्तप्रतिपाद्यजगत्कारणत्वोपयुक्तकल्याणगुणविशिष्टाय परमपुरुषाय महाराजाय ।

राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान् ।
ईश्वरं तं विजानीध्वं स पिता सप्रजापतिः ।

इत्युक्तमहाराजाय नमः पदावृत्तिर्गुणभेदाभिप्राया ॥ ३ ॥

प्रकृतिपुरुषविलक्षणपरमात्मस्वरूपं विशोध्य तच्छरीरकरूपेणावस्थितं नमस्करोति । यदिति । विशुद्धं रागाद्यकलुषितं तदनुभवैकमात्रं ज्ञानैकस्वरूपं मात्रया कश्चिदन्यजडस्वरूपत्वं विवक्षितं विशुद्धानुभवैकमात्रमनेन स्वरूपं निर्दिश्यते स्वतेजसा स्वप्रकाशेन नित्यासङ्कुचितानन्दस्वरूपविषयकधर्मभूतज्ञानेन ध्वस्ता नित्यं निरस्ता गुणा रजआदयः तत्कृताश्च उत्पत्तिस्थितिमरणभूता अवस्था यस्य स्वतेजसा ध्वस्तगुणव्यवस्थमित्यनेन प्रकृतिसंसृष्टचेतनव्यावृत्तिः सह ध्वस्तगुणाऽपवस्थः प्रशान्तमशनायापिपासाशोकमोहजरामृत्युरूपोर्मिषट्करहितानन्दस्वरूपम् । यद्वा । विशुद्धशब्देनेन्द्रियकानुभवव्यावृत्तिः प्रशान्तशब्देन नित्यं रागाद्यकलुषितत्वमुक्तं तेनानेन मुक्तचेतनव्यावृत्तिः स हि बद्धावस्थायां रागादिभिः कलुषितः प्रत्यक् स्वस्मै भासमानमनेन पराचोऽचेतनस्य व्यावृत्तिः न ह्यचेतनं स्वस्मै अवभासते किन्तु परस्मै एव सुधिया सत्त्वगुणेनोपलम्भनमुपलभ्यते इत्युपलम्भनम् "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः हृदा मनीषा मनसाभिक्लृप्तः" इतिश्रुत्युक्तयोगपरिशुद्धबुद्ध्योपलभ्यमानमित्यर्थः अनेनैव तत्कारणत्वमप्युपलक्षितम् "कारणं तु ध्येयः कारणं तु ध्येय" इति ध्येयत्वकारणत्वयोरैकाधिकरण्यश्रवणात् यदि कारणं तर्हि कारणत्वस्य भावव्यवस्थाविशेषवतः प्रागवस्थायां नामरूपस्थाद्वयादिनामरूपाश्रयत्वं स्यात्तच्च "सत्यं ज्ञानमनन्तं निष्क्रियं निष्कलम्" इत्यादिनिर्विकारत्वश्रवणविरोधस्तत्राह । अनामरूपमिति । न विद्येते स्वमात्रनिष्ठे देवादिनामरूपे यस्य प्रकृतिपुरुषविशिष्टस्यैव कारणत्वाद्देवादिनामरूपयोः स्वविशेषणीभूतप्रकृतिपुरुषगतत्वात्तद्द्वारा सनामरूपत्वेऽपि साक्षादनामरूपमित्यर्थः एवम्भूतं यद्वेदान्तेषु प्रसिद्धं तत्परब्रह्मस्वरूपं नरहरिं पुरुषार्थेषु पुरुषोत्तममिति यावत् एवं च "द्वाविमौ पुरुषौ लोके" इत्यारभ्य "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः" इति भगवद्गीतोक्तनित्यमुक्तबद्धत्रिविधचेतनव्यावृत्तस्वरूपं विवक्षितं तत्र हि कूटस्थशब्देन मुक्तो नित्यसिद्धश्च चेतन उभयोरपि प्रकृतिविकाररहितत्वेनाक्षरकूटस्थशब्दवाच्यत्वात् यद्यपि प्रशान्तशब्देन मुक्तव्यावृत्तिरुक्तापि नित्यसिद्धव्यावृत्त्यर्थं नरहरिमित्युक्तं निरहमिति पाठे त्वनामरूपत्वे निरहं हेतुः अहमभिमानः अहंशब्देनाहङ्कारः प्रकृतिपरिणामविशेषः अविद्योच्यते आत्मनोऽन्यस्मिन्नहमर्थत्वात्तच्च निरहं प्रकृतिपुरुषगतविकाररहितं हि यतस्तस्मादनामरूपमिति योजना बोध्या एवंभूतं प्रपद्ये उपासनविषयभावेनाध्यवस्यामीत्यर्थः ॥ ४ ॥

ननु स्वरूपतः परस्य ब्रह्मणोऽनामरूपत्वं श्रीरामस्य त्वनामरूपत्वमित्ययुक्तं तस्य मनुष्यनामरूपभाक्त्वात्तत्राह । मर्त्येति । विभोः परस्यैव ब्रह्मण इह लोके श्रीरामरूपेण मर्त्यावतारः मनुष्यावतारः अवतारो नामाजहत्स्वभावस्यैव रूपान्तरपरिग्रहः एवञ्च परब्रह्मणस्तत्स्वभावमेव मनुष्यसजातीयरूपं परिगृहीतवानिति भावः किमवतारप्रयोजनं तत्राह । मर्त्यशिक्षणं मर्त्यानां संसारदोषज्ञापनेन धर्मसंस्थापनं साधुपरित्राणं प्रयोजनमिति भावः । ननु मर्त्यशिक्षणं नावतारप्रयोजनं किन्तु रावणादिरक्षोवध एवेत्यत्राह । रक्षोवधार्थं न केवलमिति । विभोरवतारो न केवलं रक्षोवधार्थमपि तु मर्त्यशिक्षणमेव तस्य प्रधानं प्रयोजनमित्यर्थः तथा चोक्तं भगवता ।

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

इति विनाशाय चेत्यत्र चशब्दोऽन्वाचयपरः शिक्षणादिसामान्येऽपि यत् दुष्कृतविनाशनमानुषङ्गिकं प्रयोजनमित्यर्थः धर्मा न म[illegible]सानुवर्गस्य रावणस्य [illegible] मन्वादिः तस्य संस्थापनं संसारदोषज्ञापनेन शिक्षणं दुष्कृतविनाशनं तु सङ्कल्पमात्रेणाप्युपपद्यते सन्मार्गं शरणागतजनोज्जीवनमपि भगवता सह वर्तमानानां तं विना क्षणमात्रमपि कल्पसहस्रं मन्यमानानां दर्शनस्पर्शनसम्भाषणादिभिः परित्राणं सुखीकरणं धर्मसंस्थापनञ्च सङ्कल्पमात्रेणाप्युपपद्यत

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इति भावः यदुक्तं मर्त्यशिक्षणार्थमेवावतार इति तदाहितमेवावतारे निदर्शयति । कुत इत्यादिना । अन्यथावतारस्य मर्त्यशिक्षणार्थत्वाभावे ईश्वरस्य ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।

इत्युक्तसर्वनियन्तुः दुरापहतॄणाद्युत्तरात्मतया द्वारापहरणादिक्कारयितुः स्वे स्वस्मिन्निरतिशयापरिच्छिन्नानन्दस्वरूपे आत्मनि रमतः उक्तविधस्वस्वरूपानुभवेन नित्यसन्तुष्टस्य विषयासक्तिरहितस्य सीताकृतानि सीताविश्लेषादिभिः कृतानि कश्मलानि दुःखानि कुतः कस्मात्कुतो वा स्यात् प्रत्येकाभिप्रायं स्यादित्येकवचनं कुतोऽन्यथा स्युः रमत इति पाठस्तु सुगमः सर्वनियन्तुः सर्वान्तरात्मनः स्वानुभवसन्तुष्टस्य श्रीरामस्वरूपेणावस्थितस्य परब्रह्मणः सीताविश्लेषादिकृतकश्मलानुकरणं निरतिशयदुःखावहः संसार इति लोकस्य प्रदर्शयितुमेवान्यथोक्तविधस्य तस्य सीताकृतकश्मलानि न घटन्त इति भावः ॥ ५ ॥

एतदेवोपपादयति । नेति । स श्रीरामरूपेणावस्थितः परमात्मा आत्मवतां प्रशान्तमनसां निर्धूतनिखिलसांसारिकधर्माणां सनकादीनामात्मा सुहृत्तमः स्वाश्रितेषु निरतिशयसौहार्दनिष्ठः आश्रितानां निरतिशयप्रीतिविषयश्च भगवान् ज्ञानशक्तिबलैश्वर्यादिषाड्गुण्यपूर्णः वासुदेवः ।

सर्वत्रासौ समस्तञ्च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वद्भिः परिकीर्तितः ।

इत्युक्तरीत्या सर्वत्रावस्थितोऽपि तत्तद्दोषैरसंस्पृष्टः सर्वं स्वधार्यत्वेन स्वशेषत्वेन च परिगृहीतवांश्च त्रिलोक्यां कृत्स्नजगदन्तर्भूते कस्मिंश्चिदपि शब्दादिविषयभूते वस्तुनि न सक्तः वैशब्दोऽवधारणे न सक्त एवेत्यर्थः यतो न सक्तः अत एव स्त्रीकृतं स्त्रीविश्लेषादिकृतं कश्मलं दुःखं नाऽन्वविन्दत् अवतारस्य मर्त्यशिक्षणार्थत्वाभावे स्त्रीकृतं कश्मलमेवम्भूतो न प्राप्नुयादेवान्यथेत्यस्य सर्वत्रानुषङ्गः तथा लक्ष्मणं चशब्दात्सीतां च विहातुं त्यक्तुं नार्हति निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणाद्युपयुक्तशरीरभेदैः शेषत्वं गतस्य भगवतो नित्यानपायिनो न तस्यावतारकृपम् ।

भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते ।
अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ।
कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते ॥
कृतार्थोऽहं भविष्यामि तव चार्थः प्रकल्पते ।

इति सर्वावस्थोचिताशेषशेषतैकरतिकृतनित्यकिङ्करतां प्रार्थयमानं लक्ष्मणम् ।

नित्यैवैषा जगन्माता लक्ष्मीर्नित्यानपायिनी ।
राघवत्वे भवेत्सीता रुक्मिणी कृष्णजन्मनि ।
अन्येष्वप्यवतारेषु विष्णोरेषानपायिनी ।

इत्युक्तविधां नित्यानपायिनीं लक्ष्म्यवताररूपां भगवतीं सीतां च मर्त्यशिक्षणमन्तरेण ।

प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।
मित्रभावेन संप्राप्तं न त्यजेयं कथञ्चन ।
अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ।

इति वदन् कथं त्यक्तुमर्हति अतः केवलं मर्त्यशिक्षणार्थं सांसारिकपुरुषचेष्टामनुसृतवानित्यर्थः सीतालक्ष्मणयोस्त्यागस्तु श्रीरामायणे उत्तरकाण्डे प्रसिद्धः अथात्मवतामात्मेत्यनेन "अमृतत्वस्य तु नाशास्ति वित्तेन आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति वीतरागोपास्यत्वप्रतिपादकश्रुत्यर्थप्रत्यभिज्ञानात्तस्य स्त्र्यादिभिरकालुष्यं सूचितम् अत एव स्त्रीसंयोगवियोगकृतसुखदुःखाद्यभावश्चोक्तः अतः भगवानित्यनेन षाड्गुण्यपूर्णत्वोक्त्यावाप्तसमस्तकामत्वोक्तेः लाभात् स्त्रीसङ्गादिनिमित्तसुखाभावश्चोक्तः सुहृत्तम इत्यनेन ।

न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥
कथञ्चिदुपकारेण कृतेनैकेन तुष्यति ।

इत्युक्तरीत्या दोषानवेक्ष्य तारतम्यमनालोच्य उपकाराभासमवलम्ब्य स्वाश्रितत्वमात्रेणापरित्यजतो निरतिशयसुहृत्तमस्य मर्त्यशिक्षणमन्तरेण नित्यानपायिनोः सीतालक्ष्मणयोस्त्यागो न घटत इत्युक्तं भवति ॥ ६ ॥

तारतम्यमनादृत्य यस्याश्रितत्वमात्रेण निरतिशयप्रीतिविषयत्वरूपं तद्विमानमेवावतारे दर्शयति । नेति महतः शरणागतशब्दभाजं निहीनजन्मादिविशिष्टं पापीयांसमपि रक्षितुं बद्धदीक्षितस्य गुणावस्थितस्य ब्रह्मणः जन्म विप्रादिजन्म न तोषहेतुः तथा सौन्दर्याध्ययनबुद्धिजातयो न तोषहेतवः तिर्यक्ष्वपि तस्यानुग्रहदर्शनादिति भावः तथाहि निरश्रोभावः नैवं श्रं तिर्यक्त्वं तेन सुग्रीवादीन् वनौकसः वनस्थानस्मान् कपीन् प्रतिलक्ष्मणाग्रजः पूर्वोक्तविधानन्तावताररूपलक्ष्मणाग्रजो नित्यं तत्सहचरः श्रीरामः सख्यं चकार वतेत्याश्चर्यं सख्य इति पाठे सख्ये विषये नश्चकारेत्यर्थः तैर्यक्षमृगानिति पाठे यत् यस्मात्तैर्जन्मसौभगादिभिः विसृष्टान्परित्यक्तानपि नोऽस्मान् सख्यं चकार जन्मादिकतारतम्यमनवेक्ष्य संश्रयमात्रेणास्माभिर्हीनैः सख्यं कृतवान् बताहोऽस्य सुहृत्तमत्वमेवंविधमिति निर्वक्तुमशक्यमित्यर्थः ॥ ७ ॥

यत एवं निरतिशयसुहृत्तमस्ततस्तं मनुजाकृतिं मनुष्याकारं श्रीहरिं सुकृतमुपकाराभिज्ञम्

मय्येव जीर्णतां यातु यत्त्वयोपकृतं कपे ! ।
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति ।

इति मां प्रत्युक्तविधोपकाराभिज्ञं पुरुषोत्तमं श्रीरामं सुरासुरनराणां मध्ये यः कश्चित्सर्वात्मना सर्वप्रकारेण केनापि मदीयतासम्पादनप्रकारेणापि यावत् भजेत सेवेत कथं तन्मात्रेणैव तमनुगृह्णातीत्यत्राह । यः श्रीरामः उत्तरकोसलानुत्तरकोसलस्थान् लोकान् तरुगुल्मलतादींश्च स्वदेशवासित्वमात्रमवलम्ब्य दिवं स्वर्गमनयत् प्रापितवान् न केवलं ज्ञानक्रियाभक्तियोगानेवापेक्ष्यानुगृह्णात्यपि तु यत्किञ्चिद्व्याजमात्रमवलम्ब्यानुगृह्णात्ययं श्रीराम इति भावः तथा चोक्तम् श्रीवत्साङ्कमिश्रैः ।

त्वामामनन्ति कवयः करुणामृताब्धे !
ज्ञानक्रियाभजनलभ्यमलभ्यमन्यैः ॥
एतेषु केन वरदोत्तरकोसलस्थाः पूर्वम्
सदूर्वमभजन्त हि जन्तवस्त्वाम् ॥

इति ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सीतामभिरामयतीति सीताभिरामस्तम् ॥ १ ॥
भगवत्कथामित्युक्तेः कस्याचित्पूज्यस्य कथामिति तद्व्यावृत्त्यर्थं

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मर्मीति "सतां सन् भ्रिमायां बिभर्ति" इति श्रुतेरपि सङ्गृहीतानेनेति ज्ञातव्यम् ॥ २ ॥

अर्पितस्य हरेर्लक्षणं शीलं नित्यनिर्दोषत्वं सत्यजगत्स्रष्टृत्वादि व्रतं च यस्य स तथा तस्मै "विश्वं सत्यं मघवानायुधोऽरिद्वापश्च न प्रमिनन्ति व्रतं वाम्" इति श्रुतिः उपासितात्मना आत्मानो जीवाः यस्य स तथा तस्मै लोकानुग्रहायाङ्गीकृताविग्रहायेति वा उपासित उपासना युक्तो लोको यमुद्दिश्य स तथा तस्मै साधुरयमिति वादस्य वचनस्य निकषणाय सम्यग्विचारकाय । यद्वा । साधूनां वादस्य विवादस्य विरोधस्य निकषणाय परिहारकाय ॥ ३ ॥

अहं तं त्वां शरणं प्रपद्य इत्यन्वयः यत्तव स्वरूपं विशुद्धानुभवमात्रं प्रकृतिप्राकृतवैकृतसम्बन्धरहितज्ञानात्मकेन्द्रियादिमत्स्वतेजसा स्वरूपसामर्थ्येन ध्वस्ता निरस्ता गुणाः सत्त्वादयश्च तत्कार्या आत्मन्यवस्थाश्च येन स तथा तं ध्वस्ता गुणानिमित्ता: … येन स तथा तं वा प्रत्यग् जीवाभिमुखावस्थितं प्रशान्तं प्रकृष्टसुखपूर्णं प्रसन्नाकारं वा सुधिया शोभनबुद्ध्योपलक्ष्यत इति सुधियोपलम्भनं प्रत्यक्षपदार्थवत् प्रत्यक्षप्रमाणेन नोपलक्ष्यते प्राकृतनामरूपरहितत्वादित्याह । अनामरूपमिति । अत एव निरहमहङ्कारशून्यम् ॥ ४ ॥

ननु श्रीरामस्य विशुद्धानुभवादिविशेषणानि कथं सङ्गच्छन्ते सीतावियोगादिना दुःखाज्ञानादिप्रदर्शनादिति तत्राह । मर्त्येति । विभोर्ईशस्य हरेर्मर्त्यावतारः मर्त्याकाररूपग्रहणं रक्षोवधायैव न केवलं तावन्मात्रं न भवति किन्तु मर्त्यशिक्षणं यमुद्दिश्य गुरोराज्ञाकरणं शरणागतपालनमभीष्टदानमित्यादिमर्त्यैः कर्तव्यमिति एतत्कुतोऽनेन कृतमिति ज्ञायते इत्याशङ्क्य दशरथाज्ञाकरणवनाभियानसीतान्वेषणाभिप्रायमठ्यसनशरणागतसुग्रीवाभीष्टकरणविभीषणराज्यदानादिभ्योऽवगम्यत इत्याह । कुत इति । स्वे आत्मनि स्वस्वरूपे रमतो रममाणस्य भगवतः "कस्मिन्प्रतिष्ठित इति स्वे महिम्नि" इति श्रुतेः ॥ ५ ॥

ईश्वरत्वेन दुःखानुभवी तदनुभवी चेन्नेश्वर इति तत्राह । नवा इति । स आत्मा इति पदद्वयेन । "आत्मा वा इदमेक एवाग्र आसीत्" इति श्रुतिं परामृशति वा इत्यनेन "निरञ्जनो निरवद्य" इति श्रुतिं प्रमाणयति हिशब्दो हेत्वर्थः कश्मलं सुरतलक्षणमपि पदेन १ सीतामपीत्याह । अतो भक्तानुकम्पया कृतावतारस्य श्रीरामदेवस्य दुःखभोगाभावेनेश्वरत्वाविरोधात् भक्तिज्ञाने एव तत्प्रीतिजनके न जन्मादिकं वानरासुरादिपापयोनिजातस्यापि भक्तिज्ञानसद्भावे मोक्षस्य सुनियतत्वात्तदुक्तम्

यस्य सम्यग् भगवति ज्ञानं भक्तिस्तथैव च ।

निश्चितस्तस्य मोक्षः स्यात्सर्वपापकृतोऽपि तु ।

यो ममत्वादिना दोषस्तत्स्वाम्यविषयः स्मृतः

इत्यभिप्रेत्याह । न जन्मेति । अन्यविषयस्तत्राश्रितदृष्टजीवविषय इत्यर्थः महतो महात्मनो मुक्तियोग्यस्य भक्तस्य अभीर्ष्णया ! कस्माज्जन्मादिस्तोषहेतुर्न भवतीति तत्राह । तैर्यग्विसृष्टानिति । तिर्यक्त्वस्याभ्यासी विसृष्टान् जातान् वनचरादियोनिवानरयोनिनिकृष्टत्वद्योतनाय वनौकस इति एतद्वचनापिपदेन गर्हितत्ववाचिना सखशब्देन कृपाशीलत्वमेव प्रयोजनमित्याह ॥ ६—७ ॥

अतः पुरुषार्थी भक्तिज्ञानाभ्यां श्रीराममेव भजेतेत्याह । सुरोऽसुरो वेति । यो मुमुक्षुः स पुरुषः श्रीराममेव भजेतेत्यन्वयः असुरादिजातेर्ममत्वादिदोषसम्भवेन रामभजनं कथं सङ्गच्छत इति चेत्र तस्य मुक्तयोग्यासुरजातिविषयत्वाद्योग्यस्य तज्जात्वेऽपि तदभावात् "यो ममत्वादिना दोषः स स्वाम्यविषयः स्मृत" इति स्मृतेश्च "महद्भ्यामामसुरत्वमेकम्" इति श्रुतेः मुक्तियोग्यानामसुरजातित्वमस्तीति ज्ञायते इत्यभिप्रायेणासुर इति । न तु तमोयोग्यजात्यभिप्रायेणेति न केवलं मूलरूपस्यैव मोक्षदातृत्वशक्तिरपि त्ववतारस्यापि दत्तास्तीति भाशयेनाह । य इति । उत्तरान् कोसलानयोध्यावासिनो दिवं वैकुण्ठम् ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मर्त्यैर्भगवत्कथामिति । मर्त्यत्वादिमननविशेषेण सुखवैशिष्ट्यं दर्शितम् ॥ १ ॥ २ ॥

नमो भगवते इति । अत्र भगवत इत्यैश्वर्यमुक्तम् श्लोकार्थेति माधुर्यञ्च दर्शितम् । आर्यत्वं पूज्यत्वम् ॥ ३ ॥

स्वरूपज्ञानमाह । यत्तदिति । यत्तत् प्रसिद्धं श्रीरामचन्द्रस्य दूर्वादलश्यामलं रूपम् । अत्र प्रकाशैकलक्षणवस्तुनः सूर्यादिज्योतिषः प्रकाशकत्वं शौक्ल्यादिमत्त्वमित्यादि धर्मवत् गुणरूपादिसत्त्वेऽपि तत्स्वरूपधर्मस्यापि तदात्मकत्वदृष्ट्या तन्मात्रत्वमुक्तं य एव धर्मस्वरूपशक्तिरिति भगवत्सन्दर्भादौ स्थापितम् अत एवैकमपि तस्याश्च शक्तेर्मायातिरिक्तत्वमाह । स्वतेजसा ध्वस्तगुणव्यवस्थमिति । स्वरूपशक्त्या दूरीभूता त्रैगुण्यात्मिका मायाशक्तिर्यस्मादतः प्रशान्तं सर्वोपद्रवरहितम् । अनुभवमात्रत्वे हेतुः । प्रत्यक् दृश्यादन्यत् "न चक्षुषा पश्यति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इति श्रुतेः । तत् कुतः अनामरूपम् "एतास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति प्रसिद्धप्राकृतनामरूपरहितं तत्र हेतुर्निरहमिति । आत्मशब्देन हि भूतावस्था परमात्मनो जीवाख्यशक्तिरूपोऽंश उच्यते । अनेनेति । पृथक् निर्देशात् तद्रूपस्य च प्रवेशो नाम देवताशब्दवाच्यतेजोवारिमृल्लक्षणोपाध्यभिनिवेशः । स च तस्य जीवस्य तस्य तत्राहम्भावाध्यासादेव भवति । ततोऽन्तर्यामिरूपेण स्वयं तत्र स्थितस्यापि तदध्यासाभावात्तदुपाधिकृतनामरूपराहित्यं युक्तमेवेत्यर्थः । सर्वेणाहङ्कारराहित्यं सति व्याकरवाणीति प्रयोगस्यानहन्त्वादिति भावः । ननु श्रीरामरूपं न सर्वैरेव प्रतीयते तत्राह । सुधियोपलम्भनं शुद्धचित्तेन स्वरूपतयैवोपलभ्यत इत्यर्थः । नातः परम्परम् । यद्भवतः स्वरूपमित्यादि श्रीब्रह्मवाक्यात् ॥ ४ ॥

नन्वेवं भूतस्य मर्त्येषु प्राकट्ये किं प्रयोजनम् उच्यते गौणमप्यपि प्रयोजनान्तरं मुख्यं तु भक्तेषु लीला माधुर्याभिव्यञ्जनमेवेत्याह । मर्त्येति । तु शब्द आशङ्कानिवृत्त्यर्थः । मर्त्यलोके योऽवतार आविर्भावः स तु साधुजनोद्वेजकरक्षोवधायैव केवलं न भवति किन्तु मर्त्यशिक्षणमपि मर्त्येषु शिक्षणं तत्तत्कथाप्रकाशनं यत्तन्मयमपि तत्र बहिर्मुखेषु विषयासक्तिदुर्गतिप्रकाशनमानुषङ्गिकमुद्दिश्य स्वभक्तिमत्सु विप्रलम्भाकारविरहसंयोगमयनिजलीलाविशेषमाधुर्यप्रकाशनम् । तत्कृतस्तदर्थमेवेत्यर्थः । अन्यथा यदि केवलं तद्वधायैव स्यात्तदा आत्मनः

* (१) तं जहातीत्यन्वयः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

परमात्मत्वेन परिपूर्णस्य ईश्वरस्य सर्वान्तर्यामिणः स्वे स्व-स्वरूपे तदेकरूपे वैकुण्ठे च रममाणस्य सीताकृतव्यसनानीति कुतः स्यात् मनसैव तद्वधे सङ्कल्पात्तद्वधनानामसम्भवाच्च । निज-माधुर्यप्रकाशनपक्षे तु तत्तत् सम्भवत्येवेति भावः । अत्र कृपा-रूपं नरलीलारूपञ्च माधुर्यमधिकं श्लाघितम् । तत्र श्रीसीता-वियोगदुःखञ्च लीलामाधुर्यान्तर्गतमेवेति न दोष इत्यपि दर्शितम् ॥ ५ ॥

नरलीला च न प्राकृतवत् कामादिमत्तया किन्तु स्वजनविशेषविषयककृपाविशेषमयीत्याह । न वै इति । स वै खलु त्रिलोक्यां न सक्तः तत्र हेतुः आत्मा परमात्मा भग-वान् परिपूर्णैश्वर्यादिः वासुदेवः सर्वाश्रयश्चेति । किन्तु आत्म-वतामात्मा स्वयमेव नान्यत्वेन विद्यते येषां तेषां स्वविषयक-ममताधारिणां भक्तविशेषाणामित्यर्थः । तेषामेव सुहृत्तमः । तस्माद्यथान्ये स्त्रीकृतं स्त्रीहेतुकं कश्मलमश्नुवते तथा नासावश्नुवीत । अतस्तस्या आत्मवत्त्वेनैव तादृशकश्मलहेतु-तत्प्रीतिविषयतापीति भावः । तथा देवदूतसमयातिक्रमेण आत्मवतोऽपि लक्ष्मणस्य परित्यागो यः स खल्वात्यन्तिक इत्याह । न लक्ष्मणमिति । विहातुमपि नार्हति न शक्नोति अनन्तरं श्रीमत्त्वेन स्वर्गस्थतया स्वागमनं प्रतीक्षमाणस्तत्रादिभिः सह स्वाधिष्ठान-मारोहात् अधुनापि तेन सीतादिभिश्च सहैवास्मिन् किंपुरुष-वर्षेऽस्यास्माभिर्दृश्यमानत्वात् । ततो मर्यादारक्षार्थमेव किञ्चित्तद-नुकरणमिति भावः ॥ ६ ॥

पूर्वार्थमेव स्थापयितुं भक्तैकाकारणकारुण्यप्रमुखपरम-माधुर्यं सर्वोत्कर्षमाह । द्वाभ्याम् । महतः पुण्याज्जन्म सौभगं सौन्दर्यं आकृतिर्जातिः यद्यस्मात् तैः जन्मादिभिर्विसृष्टान् त्यक्तान् नोऽस्मान् तदीयपरमभक्तश्रीसीतान्वेषणादिभक्तितुष्टत्वेन अहो बत लक्ष्मणस्य सर्वसद्गुणालङ्कृतस्य श्रीसुमित्रानन्दनस्या-ग्रजोऽपि सख्यत्वं कृतवान् शाखामृगैरपि सह विहारादिना सखी-निव स्वीकृतवानित्यर्थः सुग्रीवमुपलक्ष्य वा तथोक्तम् । तस्मात् सुर इति । पूर्वं स्वरूपज्ञानमयभक्त्या मनुजाकृतावेव परमस्वरूपं दर्शितवान् । सम्प्रति माधुर्यज्ञानमयभक्त्यापि विशिष्य तामेवा-वधारयति । मनुजाकृतिं हरिमिति । तत्रापि श्रीकपिलादिकं व्याव-र्तयति । राममिति । उत्तमश्लोकगुणां सुकृतज्ञं स्वल्पयापि भक्त्या सन्तुष्यन्तम् ॥ ७ ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रामः किंपुरुषे नारायणः सेव्यश्च भारते ।

सर्वतो भारतश्रेष्ठ्यमूनविंशे निरूप्यते ॥ ० ॥

भर्तुरेव भगवतः कथामित्यनेन नारदादिरिव नावतारान्तर-कथायामनुरज्यतीति द्योतितम् ॥ १ ॥ २ ॥

आर्यामि सर्वैः शिरोधार्याणि लक्षणानि चरणतलगतध्वज-वज्रादीनि आजानुबाहुत्वादीनि च शीलानि धीरोदात्तादीनि व्रतानि धर्मनिष्ठत्वादीनि यस्य तस्मै उपशिक्षितात्मने गुरुब्राह्म-णादिशिक्षाग्राहिणे उपासितलोकायेति स्वस्य ब्रह्माद्युपास्य-त्वेऽपि मयास्वाचरणेन रजकपर्यन्ता अपि लोकाः प्रसादनीया इति विचारवत्त्वाल्लोकानां तदुपासितत्वं साधुवादानां ब्रह्मण्यत्व-सत्यसन्धत्वकृपालुत्वादीनां निकषणाय परमोत्कर्षप्राप-णाय लोका हि साधुवादैरुत्कृष्यन्ते । रामं प्राप्य साधुवादा अत्युत्कृष्टा भवन्तीत्यर्थः । यथा परमोत्कृष्टस्यापि कनकस्य निकषं प्राप्तस्यैवोत्कर्षो लोके प्रमाणीभवति तद्वदित्यर्थः ॥ ३ ॥

ननु शङ्खचक्रादिमत्त्वगरुडवाहनत्वाद्यैश्वर्याणामविष्कारादर-वतारस्यास्य ब्रह्मत्वे केचित् संशेरते तत्र ये संशेरते ते संशेरतां नाम अहन्तु साक्षादिमं परब्रह्मरूपमेवानुभवामीत्याह । यदिति विशुद्धो मायासम्बन्धशून्यो योऽनुभवस्तन्मात्रमेकं केवलं यत्तु देवमिमं प्रपद्ये । ननु शुद्धजीवोऽप्येवं भवति तत्राह । स्वतेजसा स्वरूप-शक्त्या दूरीभूता गुणव्यवस्थानरूपा माया शक्तिर्यस्मात्तत् अत एव प्रत्यक् हृदयादन्यत्र "न चक्षुषा पश्यति रूपमस्य यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम्" इति श्रुतेः । यतः प्रशान्तं सर्वोपद्रवरहितम् । ननु श्रीरामस्य रूपं नैवं प्रतीयते तत्राह । सुधियैव पुंसा उपलभ्यत इत्युपलम्भनं यतो नामरूपम् "एतास्ति-स्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति" प्रसिद्धप्राकृतनामरूपरहितम् । श्रुतौ निरुक्त इति तेजोवारिमृदः निर्दिश्यतेनाहं प्रपद्ये । यद्वा । अहङ्काररहितं यथा स्यात्तथा तत्प्रपत्तिरपि कृपया तेनैव कारितेति बुद्ध्येत्यर्थः ॥ ४ ॥

ननु तर्हि प्रपञ्चलोके कथमेवं प्रकटीभवतीति तत्राह । मर्त्या-वतारः मर्त्याकारस्य प्रपञ्चलोके प्राकट्यं न केवलं रक्षसो राव-णस्यैव वधाय किन्तु मर्त्यशिक्षणं मर्त्यशिक्षणार्थोऽपि इत्यर्थः । मर्त्या द्विविधाः धर्मवन्तो भक्तिमन्तश्च तेभ्यः क्रमेण स्वस्य धार्मि-कत्वप्रेमवश्यत्वयोः प्रदर्शनया धर्मशिक्षणार्थं प्रेमशिक्षणार्थञ्चे-त्यर्थः । अन्यथा स्वे स्वरूप एव रममाणस्य परमात्मनः सीताविरह-कृतानि व्यसनानि दुःखानि कुतः स्यात् स्युः किन्तु साध्वी स्वभार्या धार्मिकैः सर्वथैव नोपेक्षितव्या तदर्थं प्राप्तानि दुःखान्यपि सह तैरेवेति शिक्षणार्थं स्वस्मिन्न सन्त्यपि दुःखानि दर्शितानीति प्रथमे पक्षे द्वितीये तु सीताविरहकृतानि विषादादीनि कुतो दुःखानि किन्तु प्रेम्णः स्थायिभावस्य विप्रलम्भरसास्वादनजनि-तानि दुःखत्वेन भासमानानि परमसुखान्येव न तु दुःखानीत्यर्थः । आत्मारामत्वदुःखित्वयोर्युगपदेकत्र विरोधात् न च सीतायां रममाणस्य कुत आत्मारामत्वमिति वाच्यं सीतायाः स्वरूपशक्ति-त्वेनात्मभूतत्वात् । ननु सीतायाः स्वरूपभूतत्वे कथं तद्विरहः सम्भवेत् उच्यते एकमेव परमतत्त्वं चिच्छक्तिवृत्तिभेदेन महा-सारेण प्रेमाख्येनानादित एव द्विधा विभक्तं तिष्ठति ह्लादषडैश्वर्य-मयं केवलं ह्लादमयं च प्रथमं परमेश्वराख्यं द्वितीयं भक्त्याख्यं पुनश्च तेनैव प्रेम्णा स्वस्य चतसृभिर्वृत्तिभिर्द्वितीयं तत्त्वं चतुर्धा विभक्तं दाससखिपित्रादिप्रेयस्याख्यं प्रथमस्य तदेव तत्त्वस्य दास्यादिभावमाश्रितत्वं व्यवस्थापितं प्राकृतेष्वपि जीवेषु पर-चक्रगतादृशभक्तिमाश्रितवत्सु भक्तिपरिपाके स्वयमाविर्भूय तत्त-त्तुल्यभावेष्य तेऽपि दासादित्वेन यथाकालं प्राप्य चतुष्केण तेन समनुगम्यते पुनरपि तेनैव प्रेम्णा स्थायिभावतां प्राप्तेन स्वशक्त्यै-वाभिर्भावितामिर्विभावादिभिः सरसरूपीकृत्य तदेव तत्त्वयुगलं स्वस्य विषयाश्रयीभावभावितं कृत्वा स्वाधीनीकृत्य योगवियो-गाभ्यां सुखदुःखायितं स्वमाधुर्यमसाधारणमपारमास्वादयता

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सोऽप्यानन्दचमत्कार एव तद्विदां निष्पाद्यते अतद्विदां तु केषाञ्चित् रामकृष्णादीनामप्येनावद्दुःखमनिर्वाच्यमिति केषांचिज्जीव-दुर्दर्शनार्थे अनुकृतमित्यर्थं ज्यायानाह एव ॥ ५ ॥

तस्य प्रेमवश्यत्वसत्यप्रतत्वब्रह्मण्यत्वादिभिरप्राकृतैर्गुणैरेव एतदुपपद्यते नान्यथेत्याह । नेति । स वै खलु त्रिलोक्यां न सक्तः यत आत्मा परमात्मा तदपि आत्मतत्वानात्मा सेव्यत्वेन सर्वेत येषां तेषां दासादीनां सुहृत्तमः यतो भगवान् पूर्णषडैश्वर्यः अतः प्रेमवश्यत्वानङ्गीकारे प्राकृतानामिव स्त्रीकृतं कश्मलं मोहं नाऽन्वभवेत न प्राप्नुयात् तथैव सत्यव्रतत्वब्रह्मण्यत्वाद्यनङ्गीकारे लक्ष्मणमपि त्यक्तुं नार्हेत् । तथाहि देवदूतेन श्रीरामं सम्भाषता विज्ञापितम् । अत्रागतस्त्वया वध्य इति तदैव द्वारि स्थित लक्ष्मणो दुर्वाससं विज्ञापयितुं प्रविष्टं हनुमन्तो वशिष्ठवाक्यात्तत्याजेति तस्मादेतादृश्या लीलया प्रेमाणं धर्मं च शिक्षयामासेति युक्तमुक्तं मर्त्य-शिक्षणमिति ॥ ६ ॥

तत्तत्सर्वगुणाकरस्य तस्य कृपया निरुपाधि त्वं शिक्षयाह । न जन्मेति । महता वंशाज्जन्म महतः श्रीरामस्येति वा । तैः सज्जन्मादिभिर्लक्षणस्य सर्वमलक्ष्म परिपूर्णस्य सुमित्रासूनोरप्रजोऽप्रजत्वेन तमपि दास्ये विदधानोऽस्मान् सर्वसल्लक्षणरहितानपि सख्ये चकारेति सुग्रीवमुखलक्ष्योक्तिः ॥ ७ ॥

तस्मादुक्तीर्णेषु सर्वेष्ववतारेषु मध्ये राम एव कृपासिन्धुरतिशयेन भजनीयो यद्भजने सर्व एवाविशेषेणाधिकारीत्याह । सुर इति । यः कोऽपि सर्वात्मना सर्वप्रकारेण उत्तरान् कोसलान् अयोध्यावासिनः सशरीरानेव दिवं वैकुण्ठम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एकोनविंशे किंपुरुषे भारते च सेव्यसेवकभावः भारतश्रेष्ठ्यं च वर्ण्यते । किंपुरुषवर्षे इति ॥ १ ॥

आर्ष्टिषेणो गन्धर्वमुख्यस्तेन राजर्षिरष्टिषेणस्तस्यां दिशि श्रीभारते प्रसिद्धस्तेन सह वा भर्ता चासौ भगवांश्च तत्कथाम ॥ २ ॥

आर्याणि उत्तमानि लक्षणानि शीलं व्रतञ्च यस्मिन् तस्मै उपशिक्षितानां सदनुशिष्टानामात्मोपासकस्तस्मै उपासितः धर्मशिक्षार्थमनुसृतो लोको येन तस्मै साधुवादस्य साधुस्वरूपनिकषणाय परीक्षास्थानाय धर्मधुरन्धरशिरोभूषणायेत्यर्थः ॥ ३ ॥

उक्तगुणगणनिधिं वेदान्तैकवेद्यं श्रीरामाख्यं ब्रह्मैव मुमुक्षुध्येयमित्याह । यदिति । यदुक्तं निःसमानातिशयं वस्तु तत्प्रपद्ये कीदृशं विशुद्धानां स्वानुगाणामनुभवो ययोस्ते मात्रे नामरूपे यस्य तत् अप्राकृतनामरूपमित्यर्थः स्वतेजसा स्वस्ता हेयाः गुणाः रागादयः विविधा अवस्था च यस्मात्तत् प्रत्यग् जीवः शान्तः यस्मात् स्मरणात्तत् सुधिया उपलभ्यते इत्युपलम्भनम् । अनामरूपं प्राकृतनामरूपशून्यम् अहमेवंभूतोऽस्मीत्यभिमानशून्यम् ॥ ४ ॥

एवंभूतस्य मर्त्येषु अवतारस्तु रक्षोवधाय न केवलं मर्त्यशिक्षणमपि तु मर्त्यचेष्टानुकरणेन मर्त्यैरेवं यथाशक्ति गुर्वाज्ञानुपालनकृतदारसन्तोषधार्मिकाधार्मिकजनानुग्रहादिकं कर्तव्यमिति शिक्षार्थमित्यर्थः अन्यथा मर्त्यानुकरणं विना आत्मनः सर्वात्मनः स्वे स्वासाधारणे निजानन्दे रमतः सीताविरहकृतानि व्यसनानि कुतः स्युः ॥ ५ ॥

एतदेवोपपादयति । नेति । त्रिलोक्यामनित्यविभूतौ न सक्तः यतो वासुदेवो भगवान् अत एव स्त्रीकृतं स्वपार्षदाकृतं कश्मलं सीताविरहादिरूप नाऽन्वभवेत लक्ष्मणं विहातुं च नार्हति एवं हि श्रीरामायणे कथा एकदायोध्यायां यथासुखं वर्तमाने श्रीरामेकान्ते सम्भाषता देवदूतेन विज्ञापितमत्रागतस्त्वया वध्य इति तदैव द्वारि स्थितं लक्ष्मणं दुर्वाससमागतं विज्ञापयितुं प्रविष्टं दृष्ट्वा सत्यप्रतिज्ञः प्राणादपि प्रियतरं भ्रातरं हनुमुखमन्त्रिणा बन्धुपरित्यागोऽपि वध एवेति लक्ष्मणं त्यक्त्वा सत्यपालनं धर्मेति सर्वसमयकथास्तत्याज तदुभय नरचेष्टानुकरणमन्तरेण न घटेतेत्यर्थः ॥ ६ ॥

सौभगं सौन्दर्यम् आकृतिर्जातिः तैर्जन्मादिभिः स्वप्रस्थत्वात् ॥ ७ ॥

अतः सुरादिः यः कश्चिन्नरो वा राममेव भजेतेत्याशयः उत्तरान् कोसलान् अयोध्यावासिनः ॥ ८ ॥

भाषाटीका

श्रीशुकदेवजी बोले किंपुरुष वर्षमें आदि पुरुष भगवान लक्ष्मणजी के बड़े भ्राता सीताजी के रमाने वाले श्रीरामचन्द्रजी को उनके चरणारविन्द के समीप में निरत परम भागवत श्रीहनुमानजी किंपुरुषों के साथ में निर्विघ्न भक्ति से उपासना करते हैं ॥ १ ॥

गन्धर्वों की गाई अपने पति श्रीरामजी की कथा को आर्ष्टिषेण के साथ सुनते हैं आप स्वयं इस स्तुति का गान करते हैं ॥ २ ॥

भगवान् उत्तमश्लोक श्रेष्ठों के लक्षणों से शील आचारों से युक्त अपने मन को वश करने वाले उत्तम लोकों के अनुसरण करने वाले सत्पुरुषों के वाद के परमसीमा ब्रह्मण्यदेव महापुरुष महाराज श्रीरामजी के अर्थ नमस्कार है ॥ ३ ॥

जो वह विशुद्ध अनुभव स्वरूप तत्व है अपने तेज से गुणों की नाना अवस्थाओं का नाश करने वाला है साक्षी स्वरूप शान्त स्वरूप शुद्ध बुद्धि से प्राप्त होने योग्य प्राकृत नाम रूप अहङ्काररहित सो आप हैं जिनके मैं शरणागत हूं ॥ ४ ॥

आपका जो मनुष्य अवतार है सो केवल राक्षसों के वध के ही लिये नहीं है किन्तु मनुष्यों के शिक्षा के अर्थ है ऐसा न होता तो स्वयं आत्मस्वरूप में रमने वाले ईश्वर को सीताजी के वियोग के दुःख क्यों होवें ॥ ५ ॥

मनुष्य लीला न होती तो आत्मज्ञानियों के भी आत्मा अति सुहृत वे भगवान् वासुदेव तीनों लोकों में कहीं आसक्त होने वाले नहीं हैं तो सीताजी के वियोग के दुःख को न प्राप्त होते लक्ष्मणजी को भी नहीं छोड़ने को योग्य हैं ॥ ६ ॥

श्रीरामचन्द्रजी महापुरुष के सन्तोष का हेतु एक प्रेम छोड़कर न उत्तम जन्म है न सुन्दरता है न वचन की चतुरता है न उत्तम जन्म है न उत्तम बुद्धि है न उत्तम जाति है क्योंकि

भारतेऽपि वर्षे भगवान्नरनारायणाख्य आकल्पान्तमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोप-
लम्भनमनुग्रहायात्मवतामनुकम्पया तपोऽव्यक्तगतिश्चरति ॥ ९ ॥

तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभिर्भगवत्प्रोक्ताभ्यां साङ्ख्ययोगाभ्यां भगवदनुभा-
वोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्तिभावेनोपसरति इदं चाभिगृणाति ॥ १० ॥

ॐ नमो भगवते उपशमशीलायोपरतानात्म्याय नमोऽकिञ्चनवित्ताय ऋषिऋषभाय नरनाराय-
णाय परमहंसपरमगुरवे आत्मारामाधिपतये नमो नम इति ॥ ११ ॥

गायति चेदम् ॥ कर्तास्य सर्गादिषु यो न बध्यते न हन्यते देहगतोऽपि दैहिकैः ।
द्रष्टुर्न दृग् यस्य गुणैर्विदूष्यते तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥ १२ ॥

इदं हि योगेश्वर ! योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ।
यदन्तकाले त्वयि निर्गुणे मनो भक्त्या दधीतोज्झितदुष्कलेवरः ॥ १३ ॥

यथैहिकामुष्मिककामलम्पटः सुतेषु दारेषु धनेषु चिन्तयन् ॥
शङ्केत विद्वान् कुकलेवरात्ययाद्यस्तस्य यत्नः श्रम एव केवलम् ॥ १४ ॥

तन्नः प्रभो ! त्वं कुकलेवरार्पितां त्वन्माययाहंममतामधोक्षज ! ।
भिन्द्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावमिति ॥ १५ ॥

भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवो मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः
कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमानृक्षगिरिः पारि-
यात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च
शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसङ्ख्याताः ॥ १६ ॥

भाषाटीका ।

श्रीलक्ष्मणाग्रजने जो इन सब गुणों से हीन वानरों को सखा बनाया है ॥ ७ ॥

इस हेतु से देवता हो अथवा मनुष्य हो अथवा दूसरी योनि का हो जो जीव अतिकृतज्ञ मनुष्यरूपी सब कोसलवासी जीवों को वैकुण्ठ को लेगये हैं तिन श्रीरामजी को अवश्य भजे ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उपचितैर्धर्मादिभिरात्मोपलक्ष्यते येन तत्तपश्चरति तत्रो-पशम इन्द्रियाणां संयमः उपरमो निरहङ्कारता आत्मवता-मनुग्रहाय न स्वार्थमीश्वरत्वात् ॥ ९ ॥

भगवदनुभाव उपवर्ण्यते येन पञ्चरात्रेण तत्सावर्णेर्मनोः उपसरति सेवते ॥ १० ॥

उपरतानात्म्याय निरहङ्काराय ॥ ११ ॥

असक्तश्चासौ विविक्तश्च साक्षी च तस्मै नमः असक्तत्वं दर्शयति । अस्य विश्वस्य सर्गादिषु कर्तापि यो न बध्यतेऽहं-कर्तेति न मन्यते । विविक्तत्वमाह । देहगतोऽपि दैहिकैः क्षुत्पि-पासादिभिर्यो न हन्यते नाभिभूयते साक्षित्वमाह । यस्य द्रष्टुरपि सतो दृग्गुणैर्दृश्यैर्न विदूष्यते न विक्रियते ॥ १२ ॥

योगकौशलं निरूपयन् योगं प्रार्थयते । इदमिति त्रिभिः हे योगेश्वर ! हिरण्यगर्भो यद्योगनैपुणं जगाद इदमेव तत् किम् जन्मप्रभृति भक्त्यान्तकाले पुमांस्त्वयि मनो धारयेदिति यत् कथंभूतः सन् उज्झितं दुष्कलेवरं तदभिमानो येन ॥ १३ ॥

अन्यथा तस्य शास्त्राभ्यासादिश्रमो व्यर्थ इत्याह । यथैहिकामुष्मिककामेषु लम्पटो मूढः सुतादिषु योगक्षेमं चिन्तय-न्कुत्सितस्य कलेवरस्यात्ययान्मृत्योः शङ्कते तथा विद्वानपि सन् यः शङ्केत तस्य यत्नः शास्त्रश्रवणादिः श्रम एव ॥ १४ ॥

यस्माद्विदुषोऽपीयमेव दशा तस्मात्त्वं प्रभो! अधोक्षज! त्वमेव नो योगं विधेहि । कीदृशम् । त्वयि स्वभावं सहजप्रेमलक्षणम् येन योगेन वयं त्वन्मायया नः कुकलेवरेऽर्पितामहंममतां शीघ्रं भिन्द्याम त्यजेम । सुदुर्भिदामुपायान्तरैः सर्वथा त्यक्तुमशक्याम् ॥ १५ ॥

इलावृतवदस्मिन्नपि वर्षे सरितः शैलाश्च सन्ति नितम्बप्रभवा-स्तटेभ्यः सम्भूताः ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ भारते वर्षे उपास्यं भगवद्रूपम् उपासकं अध्यमानं मन्त्रं स्तोत्रं चाह । भारतेऽपीति भारतेऽपि वर्षे भगवान्नारायणाख्यो बदरिकाश्रमे । आकल्पान्तं कल्पपर्यन्तमव्यक्तगतिरेतद्वक्ष्यमाणमेवं करोतीतीतरैरविज्ञातचेष्टस्तपश्चरति कथंभूतम् उपचिताः प्रवृद्धा धर्मादयो येन तदुपचितधर्मज्ञानवैराग्यैश्वर्ययोगोपरमात्मोपलम्भनमात्मा उपलभ्यते साक्षात्क्रियते येन तदात्मोपलम्भनं ततः कर्मधारयः तत्र धर्मः कर्मयोगः ज्ञानमात्मयाथात्म्यज्ञानयोगः वैराग्यं मनोनिग्रहः ऐश्वर्यमणिमादीनि योगः प्राणजयः उपरमो बाह्येन्द्रियजयः किमर्थमेवमनीश्वरवत्तपश्चरतीत्यत्राह । आत्मवतामनुग्रहायात्मवतोऽनुग्रहीतुं मुमुक्षव एवंविधं तपः कुर्युरित्येवं शिक्षयाताननुग्रहीतुमिति यावत् आत्मवत्स्वनुग्रहे तस्य कृपैव कारणमित्याशयेनाह । अनुकम्पयेति । ॥ ९ ॥

तं श्रीमन्नारायणं भगवान् षाड्गुण्यपूर्णः नारदः वर्णाश्रमवतीभिर्वर्णाश्रमधर्मानुवर्तिनीभिः भारतीभिर्भारतवर्षवासिनीभिः प्रजाभिः सह साङ्ख्यमात्मयाथात्म्यज्ञानयोगः योगोऽमङ्गवर्णाश्रमोचितपञ्चमहायज्ञादिरूपः कर्मयोगः आभ्यां भगवत्प्रोक्ताभ्यां भगवता गीताचार्येण प्रोक्ताभ्याम् "अशोच्यानन्वशोचस्त्वम्" इत्यारभ्य "एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु" इत्यारभ्य चोक्ताभ्यां गीताया वेदवदनादित्वादेवमुक्तं परमभक्तिभावेन परमभक्तिरूपेण भावेनाभिप्रायेण उपसरति अनुवर्तते कर्मयोगज्ञानयोगानुगृहीतनिरतिशयभक्तियोगेनानुवर्तत इत्यर्थः कथंभूतः भगवतोऽनुभवः उपवर्ण्यते येन पञ्चरात्रेण तद्भगवदनुभवोपवर्णनं तत्पञ्चरात्रं सावर्णिमनोरुपदेक्ष्यमाणः इदमुदाहरति ॥ १० ॥

मन्त्रमाह । ओमिति । ओं भगवच्छब्दार्थौ पूर्ववत् परमं निरतिशयं शीलं स्वभावो यस्य तस्मै सौशील्यविशिष्टायेत्यर्थः महतो मन्दैः सह नीरन्ध्रेण संश्लेषस्वभावत्वं सौशील्यम् अयमाश्रयणसौकर्यापादको गुणः इदं वात्सल्यसौलभ्यस्वामित्वानामप्याश्रयणसौकर्यापादकानामुपलक्षणमुपरतानात्म्यायानात्मा देहेन्द्रियादिः तस्य भावः प्रकारः धर्मः अशनायादिषडूर्मिवर्गः उपरतं निरस्तमनात्म्यं यस्मात्तेन वा तस्मै अकिञ्चनवित्ताय नास्ति किञ्चन प्रार्थनीयं येषां तेऽकिञ्चना निष्कामा मुमुक्षवस्तेषां वित्ताय निधयं नरनारायणरूपेणावतीर्णाय परमहंसाय परं उत्कर्षं मा न भवति हंसो जीवो यस्मात् पृषोदरादित्वात् माशब्दस्य हस्वः यद्वा । हन्ति निरस्यति निखिलान् दोषानिति हंसः पृषोदरादित्वात् साधुः "नवेर्णागमात्हंस" इत्यानुशासनिकस्मरणात् परमश्चासौ हंस इति कर्मधारयः परमः निरतिशयकल्याणगुणगणः हंसो निरस्तनिखिलदोषः तस्मै परमगुरवे निरतिशयहितोपदेष्ट्रे आत्मारामाय नित्यासङ्कुचितापरिच्छिन्नानन्दरूपस्वात्मानुभवपरायाधिपतये भूतानामधिपतये "एष भूताधिपतिः" इति श्रवणात् नमस्कारोऽयमसौ गुणभेदाभिप्रायकः ॥ ११ ॥

इदं वक्ष्यमाणश्लोकचतुष्टयं स्तुतिरूपं गायति पठतीत्यर्थः यद्वा । इदं वक्ष्यमाणं गुणजातं गायति तानज्जगत्कारणं चिदचिद्विलक्षणं निरस्तनिखिलदोषं निरस्तसाम्याभ्यधिकं सर्वज्ञं नमस्करोति । कर्तेति । अस्य कृत्स्नस्य चिदचिदात्मकस्य जगतः सृष्ट्यादौ कर्तापि यो न बध्यते नाभिमन्यते

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्"

इति भगवदुक्तरीत्या कृत्स्नजगत्स्रष्टारमात्मानं तद्गुणकर्मवत्त्वेन मनुष्यपशुपादपतारतम्येन कर्तारं न मन्यते सृज्यानां देवादिपदार्थानां देवत्वमनुष्यत्वादिनानाविधसर्गकर्मणि सृज्यगतानामेव गुणकर्मणां प्रधानकारणत्वादात्मानं गुणकर्मानुगुणकर्तारं मन्यते न तु साक्षाद्वैचित्र्यं प्रतिहन्तुं मन्यत इत्यर्थः तथा देहगतोऽपि अन्तरात्मतया देवादिदेहस्थोऽपि दैहिकैर्देहसम्बन्धप्रयुक्तैः सुखदुःखादिभिर्यो न हन्यते नाभिभूयत एवं द्रष्टुर्जीवस्य यद्दृश्यमचेतनं प्रधानं तस्य गुणैः रजआदिभिर्यो न हन्यते न संकुचितज्ञानो भवति कर्तृत्वेऽपि मोहाभावात् देहस्थत्वेऽपि दुःखाभावात् त्रिगुणात्मकप्रधानशरीरकत्वेऽपि गुणकृतज्ञानसङ्कोचाभावाच्च जीवाद्वैलक्षण्यमुक्तं द्रष्टुर्जीवस्य गुणैः संसारित्वादिभिर्देहस्य गुणैर्जात्यादिभिश्च न दूष्यत इति वा योजना एवं चिदचिद्वैलक्षण्यमुक्तमत एवासक्तो रागादिरहितो विविक्तोऽसहायः स्वतुल्याधिकद्वितीयवस्तुरहितः साक्षी सर्वस्य चेतनाचेतनात्मकस्य जगतः द्रष्टा चेत्यसक्तविविक्तसाक्षी तस्मै ते नमः "कर्तास्य सर्गादिषु यो न बध्यते" इत्यपि पाठः तत्रास्य जगतः सर्गादौ सृष्टिस्थितिलयेषु कर्तापि न बध्यते अनकस्मात्जीवस्तु स्वगुणानुगुणपरमात्मायत्तः कर्ता स्वकर्मायत्तभोगसङ्गात् स्वातन्त्र्येण कर्ताहमित्यभिमानेन बध्यते संसारी भवति परमात्मा जगत्सर्गादौ निरपेक्षः कर्तापि न बध्यते जगद्व्यापारस्य लीलारूपत्वेन सुखदुःखादिफलभोगार्थत्वाभावात्तत्रासक्त्यभावादिति भावः तथा देहगतोऽपि दैहिकैः देहसम्बन्धप्रयुक्तैः सुखदुःखादिभिर्न हन्यते नाभिभूतो भवति कुतः विविक्तत्वात्निरस्तनिखिलदोषतया समस्तकल्याणगुणाकरतया च जीवपर्यन्तेभ्यो देहेन्द्रियादिभ्यो विलक्षणत्वादविलक्षणस्वरूपावलोकनशीलत्वादिति भावः तथाच शारीरकं सूत्रम् । न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ३।२।११ इति सर्वत्रावस्थानतोऽपि न परस्य ब्रह्मणोऽपुरुषार्थगन्धः सम्भवति कुतः सर्वत्र श्रुतिस्मृतिषु परं ब्रह्मोभयलिङ्गमुभयलक्षणं निरस्तनिखिलदोषमनन्तकल्याणगुणाकरमभिधीयत इति तदर्थः "अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प" इत्यादयः श्रुतयः ।

समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशावृतभूतवर्गः ।
परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे ॥

इत्यादयः स्मृतयः अयं भावः जीवस्य कर्मवश्यत्वात्तत्कर्मानुगुण्येन तत्तद्वस्तुसम्बन्धोऽपुरुषार्थं एव स्यात्परस्य तु ब्रह्मणः स्वाधीन स एव सम्बन्धस्तद्विचित्रनियमनरूपत्वात्लीलारूपत्वाय स्यादिति दिक् । तथाच श्रुतिः "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" इति तथा द्रष्टुः स्वकर्मानुगुणज्ञानाश्रयस्य "अनृतेन हि प्रत्यूढा" एषां सत्यानां सतामनृतमपिधानम्" इति श्रुत्युक्तरीत्या कर्मणा तिरोहितज्ञानस्य जीवस्य यद्दृश्यं कर्मायत्तदर्शनविषयं यत्प्रधानं तस्य गुणैः रजआदिभिर्न दूष्यते च गुणपरवशो न भवति कुतः साक्षित्वात्साक्षाद्द्रष्टृत्वात् "साक्षाद्द्रष्टरि संज्ञायाम्" इति साक्षिशब्दो व्युत्पादितः साक्षिशब्दोऽव्ययवृत्त्या समुदायशक्त्या च भगवत्येव मुख्यवृत्तः अव्ययः पुरुषः साक्षीति भगवन्नामसहस्रपाठात् अतः संज्ञायामित्यस्य न विरोधः

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्रष्टुरिति दृष्टान्तार्थं यथा द्रष्टा दृश्यगुणैर्दुष्यते तथा साक्षी परमात्मा न दुष्यत इति अयं भावः जीवस्य स्वकर्मानुगुणमेव दृश्यदर्शनं न तु साक्षात्साकल्येनेति गुणैर्दुष्यतां परमात्मनस्तु निरुपाधिकं साक्षाद्दृश्ययाथात्म्यदर्शनमिति न गुणवश्यता किन्तु गुणानामेव परमात्मवश्यतेति एवं भूताय असक्तसाक्षिणे नम इत्यर्थः ॥ १२ ॥

एवं जीवपरयोर्हेयास्पदत्वतत्प्रत्यनीकत्वे उक्ते इदानीं जीवस्य हेयनिरसनोपायो देहाद्यनासक्त्या परमात्मनस्तव भक्तिरेव सैव पुरा चतुर्मुखेन महामतिहितेत्याह । इदं हीति । हे योगेश्वर ! हिरण्यगर्भः योगे यन्नैपुणं कौशलं जगाद तदिदमेव किन्तदित्यत्राह । उज्झितदुष्कलेवरः उपेक्षितशरीरः कलेवरशब्दः तदनुबन्धिनामप्युपलक्षकः उपेक्षितदेहानुबन्धी पुमान् भवात् प्रभृति अन्तकाले अन्तकालपर्यन्तं भक्त्या ध्यानयोगेन त्वयि मनो धारयेत्स्थिरं कुर्यादिति यत् ॥ १३ ॥

एवं देहाद्युपेक्षया परमात्मभक्तिरेव जीवस्यानर्थपरिहारिणीत्युक्तमिदानीमुक्तविधभक्तिरहितस्य केवलशास्त्राध्ययनादिप्रयासो निष्फल इत्याह । यदेति । ऐहिकेषु पशुपुत्रादिष्वामुष्मिकेषु स्वर्गादिषु कामेषु लम्पटः आसक्तः सुतादिषु विषयेषु चिन्तयन् तेषामनपायोपेयत्वं चिन्तयन्नित्यर्थः विद्वानधीतशास्त्रोऽपि कुत्सितस्य कलेवरस्यात्ययान्मृत्योः शङ्केन बिभीयात् तस्य यो यत्नः शास्त्राध्ययनादिरूपः स केवलं श्रम एव निष्फल एव मरणभीतस्य शास्त्रश्रमो निष्फल इत्यर्थः ॥ १४ ॥

यतो विदुषोऽप्येवंविधा दशा तत्तस्मात्प्रभो ! हे अधोक्षज ! त्वमेव नो योगं विधेहि सम्पादय त्वत्प्रसादादेव नो योगसिद्धिरिति भावः ईदृशं योगं त्वयि स्वभावजं निरुपाधिकं कामानुपहतमिति यावत् येन योगेन वयं त्वन्मायया नः कुत्सिते कलेवरेऽर्पितामाहितां सुदुर्भिदामुपायान्तरैः सर्वथा त्यक्तुमशक्यामहंममतामहङ्कारममकाररूपामविद्यामाशु भिन्द्याम त्यजेम त्वत्प्रसादायत्तत्वद्भक्तियोग एवानर्थनिवर्तक इति भावः ॥ १५ ॥

एवं भारते उपास्यभगवद्रूपादिकमुक्त्वाथास्मिन्नेव वर्षे प्राधान्येन पुण्यतमान् पर्वतान्नदींश्चाह । तत्र प्रथमं पर्वतान् संग्रहेणाह । भारतेऽपीत्यपिशब्दाद्वर्षान्तरेऽप्यनुक्ताः पर्वता नद्यश्च सन्तीति सूचितम् सरितः शैलाश्च सरिच्छैलाः बहवः सन्ति तावच्छैलानुद्दिशति । मलय इत्यादिना । कामगिरिरित्यन्तेन अन्ये च बहवः सन्तीत्याह । अन्ये च शतशः सहस्रशः शैलाः सन्तीत्यनुषङ्गः नदीर्वक्ष्यमाणास्तासामुत्पत्तिस्थानं प्रभवमाह । तेषामिति । तेषां शैलानां नितम्बेभ्यस्तटेभ्यः प्रभवाः सम्भूताः नद्यः प्रायेण पश्चिमाभिमुखाः न पूर्वाभिमुखा असङ्ख्याताः सन्ति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपशमोऽधिकमनर्ग्लनिष्ठा उपरमो मनआदीन्द्रियनिग्रहस्तपश्चरतामेवमपेक्षितमिति दर्शयितुं न तु स्वस्य नित्यनिगृहीतेन्द्रियत्वात् आत्मनः स्वरूपस्योपलम्भो नित्यापरोक्षता यस्य स तथा ॥ ९ ॥

साङ्ख्ययोगाभ्यां यथार्थज्ञानतत्साधनाभ्यां भगवतो हरेरनुभावस्य माहात्म्यस्योपवर्णनं प्रतिपादनं यस्मिंस्तत्तथा तत्प्(१) अत्रात्र सावर्णेर्मनोः उपसत्त्युपास्ते ॥ १० ॥

उपरतानात्म्याय निवृत्तदेहादिधर्माय आत्मारामाणामधिपतये ॥ ११ ॥

सर्गादिषु कर्ता तथापि देवदत्तवद्यो न बध्यते देहगतोऽपि दैहिकैर्देहसम्बन्धिभिर्दोषैः यो न हन्यते न पीड्यते द्रष्टुर्यस्य दृग् गुणैर्दर्शनयोग्यरूपादिभिः न दुष्यते दर्शननिमित्तपापैर्न सम्बध्यते तस्मै नमः अत्र हेतुगर्भविशेषणमाह । असक्तेति । असङ्गत्वात् विलक्षणत्वात् साक्षित्वात् बन्धनादिदोषाभाव इत्यर्थः ॥ १२ ॥

बहुजन्मार्जितधर्माद्युपायपाटवमिदमित्याह । इदं हीति । हिरण्यगर्भो योगनैपुणं योगपाटवमिदमेव जगाद इदं किं तत्राह । यदिति । निर्गुणो त्वयि भक्त्यान्तकाले मनो निधाय दुष्कलेवरमुज्झतीति यत्तदिदमिति भावः "यस्य सम्यक् भगवति ज्ञानं भक्तिस्तथैव च" इत्यादिवाक्यमत्रापि प्रमाणमिति बोद्धव्यम् ॥ १३ ॥

यत एवं सर्वमनित्यं तस्माद्विदुषाऽवद्यदेहत्यागादौ शङ्का भयं न कार्यमित्याह । यथेति । यथैहिकामुष्मिककामेषु लम्पटो रागी सुतादौ नाशं चिन्तयन् शङ्केत मयि मृते सुतादयो नाशं गमिष्यन्तीति तथा विद्वानपि यदि कुशरीरत्यागाच्छङ्केत तर्हि तस्य यः शास्त्रश्रवणादौ प्रयत्नः स केवलं श्रम एव न किञ्चित्फलमित्यर्थः अतो न शङ्कितव्यमित्यर्थः ॥ १४

यतस्त्वदनुगृहीतमेव सफलमत इमं त्वदनुग्रहजनकमुपायमस्मभ्यं वदेत्याह । तन्न इति । योगं ज्ञानं ध्यानमुपायं वा येन योगेन अहंममतासम्भूतदोषस्य मुक्तिपरिपन्थित्वात्तन्नाशः प्रार्थ्यते तदुक्तम् । "यो ममत्वादिना दोषः स त्वस्य (१) विषयः स्मृत" इति ॥ १५ ॥

इदानीमस्मिन् भारतवर्षे पर्वतास्तत्तटजा नदीः प्राधान्येन वक्ति । भारत इति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नरनारायणाख्य इति द्वयोरभेदो दर्शितः । आत्मवतामात्मा स एव भगवान् नाथत्वेन विद्यते येषां तेषां भक्तानामनुकम्पया हेतुना तद्विषयकानुकम्पाधीनः सन् तेषां मङ्गलार्थं स्वयमेव तपश्चरतीत्यर्थः । अहो एतावानपि तदनुकम्पापरिणाम इति भावः तमेव दर्शयति । उपचितेति । स्वयमेव कृतैस्तैस्तैरङ्गैस्तत्स्वात्मनो भगवतः स्फूर्तिहेतुकमित्यर्थः । तर्हि लोकैस्तथा नावगम्यते तत्राह । अव्यक्तगतिरिति । ईश्वरस्य स्वार्थं तदसम्भवात् । व्यक्तगतिरिति वा ॥ ९ ॥

प्रजाभिः सह ताश्च मुनिरूपा एव न तु सर्वाः । भगवता नरनारायणाख्येन प्रोक्ताभ्यां साङ्ख्ययोगाभ्यां सारासारविवेकभगवन्निष्ठाभ्यां भगवदनुभवोपवर्णनं तत्सावर्ण्ये प्रत्युपदेक्ष्यति यः स इत्यर्थः ॥ १० ॥ ११ ॥

---

(१) परोक्षज्ञानविषयः ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्य परमहंसत्वं दर्शयन् गुरुत्वं योजयति । कर्त्रेति । देहगतोऽन्तर्यामिरूपेण द्रष्टुः परमसाक्षिणः ॥ १२ ॥

अनासक्तत्वं कैमुत्येन स्थापयन् विशेषतो ज्ञेयस्य योगस्य सामान्यतो ज्ञानं तत्कारणञ्चाह । इदं हीति । उज्झितदुष्कलेवर इति । पवित्रकलेवरस्य शोभनत्वमुपादेयत्वं च बोधयति ॥ १३ ॥

तज्ज्ञानयोग्यत्वापादकं सारासारविवेकमपि सामान्यतो निवेदयति । यथेति ॥ १४ ॥

अभीष्टमाह । तत्र इति । कुकलेवरेति । इतरेषां कलेवरापेक्षया प्रोक्तम् ॥ १५ ॥

कोषः कोशक इति पाठौ । गोवर्धनोऽयं शास्त्रलोकप्रसिद्धः श्रीवृन्दावनगतः श्रीकृष्णक्रीडत्वेन तमनु रैवतोऽपि पठ्यते । अधुना तस्य स्वल्पत्वादिदृष्टिः काले कालेऽन्तर्धानात् ॥ १६—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उपचितैर्धर्मादिभिः सहित आत्मा त्वंपदार्थ उपलभ्यते येन तत्तपश्चरति तत्र उपशमः इन्द्रियाणां संयमः उपरमो निरहङ्कारिता आत्मवतां ज्ञानिनामनुग्रहाय तपःशिक्षणरूपायेति तपसि प्रयोजनमनुकम्पयेति तत्र कारणमित्यपौनरुक्त्यम् ॥ ९ ॥

भगवदनुभावो वर्ण्यते येन तद्भगवदनुभाववर्णनं पञ्चरात्रशास्त्रं साङ्ख्ययोगाभ्यां सह सावर्णेः सावर्णिम ॥ १० ॥

उपरतानात्म्याय न विद्यते आत्मा आत्मीयत्वेन यस्य सः अनात्मा अनात्मनो भावः आनात्म्यमुपरतमनात्म्यं यस्मात्तस्मै ॥ ११ ॥

आत्मारामचूडामणित्वमाह । कर्त्रेति । न निबध्यत इत्यतस्तेऽसक्ताय । दैहिकैः क्षुत्पिपासादिभिर्न हन्यते नाभिभूयते इत्यतो देहाद्विविक्ताय द्रष्टुरपि सतो दृग् दृष्टिः गुणैर्दर्शनैर्न दूष्यते अत एव असक्तश्चासौ विविक्तसाक्षी अलिप्तसाक्षी चेति तस्मै ॥ १२ ॥

योगाभ्यासिनां रहस्यमाह । इदमिति । यदिति । शश्वत्तम् अन्तकाले यत् गच्छत् चपलमिति यावत् मनस्त्वयि दधीत स्थिरीकुर्यादित्यर्थः उज्झितेति वर्त्तमाने निष्ठा ॥ १३ ॥

अन्यथा योगाभ्यासो व्यर्थ एवेत्याह । यथेति । चिन्तयन् चिन्तां कुर्वन् कुकलेवरात्ययात् शङ्केत । मयि मृते सति मत्सुतादयः कथं वर्त्तेरन्निति भावयेत् तथैव विद्वानपि यः शङ्केत तस्य यत्नः श्रम एव ॥ १४ ॥

तस्माद्व्यावेशं त्याजयित्वा त्वयि मनसोऽभिनिवेशं त्वमेव कृपया देहीत्याह । तत्र इति । योगं विधेहि योग एव कस्तत्राह । त्वयि नोऽस्माकं स्वस्यात्मनो भावं रतिं यद्वा । यथा विषयेषु स्वभावस्तथैव त्वयि स्वभावो निसर्गोऽस्त्वित्यर्थः ॥ १५ ॥

अपीति । यथा द्वापरे तथा अस्मिन्नपि वर्षे इत्यर्थः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उपचितैः समृद्धैर्धर्मादिभिः आत्मा परमेश्वर उपलभ्यते येन तत्तप 'आकल्पं कल्पपर्यन्तं चरति आत्मवतामात्मा विद्यते उपास्यत्वेन येषां तेषामनुग्रहाय शिक्षार्थे न च स्वार्थमीश्वरत्वात् उपशमो निरहङ्कारता उपरमः इन्द्रियसंयमः ॥ ९ ॥

भगवदनुभाव उपवर्ण्यते येन तत्पञ्चरात्रं शास्त्रं सावर्णिरुपदेक्ष्यमाणः भगवत्प्रोक्ताभ्यां साङ्ख्ययोगाभ्याम् ।

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ।

इति श्रीमुखवचनात् साङ्ख्यमात्मज्ञानं योगो निष्कामकर्मयोगस्ताभ्यां समर्जितेन परभक्तिभावेन प्रजाभिः सह उपसरति सेवते इत्यन्वयः ॥ १० ॥

परमहंसानां परमगुरवे उपरतानात्म्याय निरहङ्काराय ॥ ११ ॥

देहगतोऽपि देहेषु अन्तर्यामिरूपेण संस्थितोऽपि दैहिकैः क्षुत्पिपासादिभिः असक्तः सर्वदा पूर्णकामत्वात् विविक्तः सर्वदा सर्वदोषास्पृष्टत्वात् साक्षी सर्वदा सर्वदर्शी स च सः तस्मै ॥ १२ ॥

ज्ञानस्य देहादिविरक्तिपूर्वकं भगवति मनोनिश्चलत्वं फलमन्यथा ज्ञानयत्नः केवलं श्रमोऽतस्तं ज्ञानयोगं नो विधेहि येन त्वयि मनोनिश्चलत्वं भवेदित्याह । इदमिति त्रिभिः । हे योगेश्वर ! हिरण्यगर्भः योगनैपुणं योगस्य ज्ञानयोगस्य नैपुण्यं यत् जगाद तदिदमेव किमुज्झितकुष्कलेवरः त्यक्तपुत्रजनदेहसङ्गः सन् भक्त्या त्वयि मनो दधीत धारयेत् किं अधुना अन्तकालेऽपि इतियत् ॥ १३ ॥

यदि यथा ऐहिकामुष्मिककामलम्पटः अनिज्ञान् सुतादिषु चिन्तयन् योगक्षेममिति शेषः कुकलेवराणां स्वकीयदेहस्य सुतादिदेहानां च अत्ययाद्नाशात् शङ्केत तथा विद्वानपि सन् यः शङ्केत तर्हि तस्य यत्नः विद्यायत्नः श्रम एव ॥ १४ ॥

तत्तस्मात् हे प्रभो ! अधोक्षज ! त्वं तद्योगं तादृशं ज्ञानयोगं नो विधेहि येन त्वयि स्वभावं स्वकीयं भावं मनोनिश्चलत्वलक्षणं ध्रुवास्मृत्याख्यं प्राप्नुयाम इति शेषः येन च योगेन वयं त्वन्मायया नः कलेवरे अर्पितामहंममतां शीघ्रं भिन्द्याम ॥ १५—१६ ॥

भाषाटीका ।

भारतवर्ष में श्री नरनारायणबदरीनारायणनाम के भगवान् कल्पपर्यन्त की इच्छा से आत्मज्ञानियों की कृपा से अनुग्रह करने को आप अव्यक्त मार्गवाले होने से भी वृद्धि को प्राप्त आत्मा के लाभ के हेतु धर्म ज्ञान वैराग्य ऐश्वर्य शान्ति के हेतु तपस्या को करते हैं ॥ ९ ॥

भगवान् श्रीनारदजी भगवान्का कहा जो सांख्य तथा योग उन दोनों से भगवान् के चरित्र को सावर्णि मनु को उपदेश करने को स्थित हैं वर्णाश्रम धर्म वाली भारत की प्रजाओं को साथ में लेकर परम भक्ति भाव से बदरीनारायणजी का अनुसरण करते हैं इस वचन को उच्चारण करते हैं ॥ १० ॥

उपशम स्वभाव वाले अहंतादि दुर्गुणों से रहित निर्धन पुरुषों के धनरूप ऋषियों में श्रेष्ठ नर नारायण परम हंसों के परमगुरु आत्मारामों के अधिपति आपके अर्थ नमस्कार है ॥ ११ ॥

इस स्तोत्र का गानभी करते हैं आप इस जगत् के कर्ता हो तो भी सृष्टि आदि कों के कर्मों में नहीं बन्धते हो देह में स्थित होकर भी दैहिक धर्मों से बाधित नहीं होतेहो द्रष्टा होने

एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति ॥ १७ ॥

चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी, शर्करावर्ता तुङ्गभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धुरन्धः शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुषोमा शतद्रूश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥ १८ ॥

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते यथा वर्णविधानमपवर्गश्चापि भवति ॥ १९ ॥

योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्गः ॥ २० ॥

एतदेव हि देवा गायन्ति ।

अहो अमीषां किमकारि शोभनं प्रसन्न एषां स्विदुत स्वयं हरिः ।
यैर्जन्म लब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः ॥ २१ ॥
किं दुष्करैर्नः क्रतुभिस्तपोव्रतैर्दानादिभिर्वा द्युजयेन फल्गुना ।
न यत्र नारायणपादपङ्कजस्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात् ॥ २२ ॥
कल्पायुषां स्थानजयात्पुनर्भवात्क्षणायुषां भारतभूजयो वरम् ।
क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं पदं हरेः ॥ २३ ॥
न यत्र वैकुण्ठकथासुधापगा न साधवो भागवतास्तदाश्रयाः ।
न यत्र यज्ञेशमखा महोत्सवाः सुरेशलोकोऽपि न वै स सेव्यताम् ॥ २४ ॥

भाषाटीका ।

पर भी आपकी दृष्टि गुणों से दूषित नहीं होती है ऐसे अखिल निर्मल साक्षी आपके अर्थ नमस्कार है ॥ १२ ॥

हे योगेश्वर ! ब्रह्माजीने हमको उपदेश किया है सो योगकी निपुणता यही है जोकि अन्तकाल में पुरुष अहन्ता आदि शरीर वासनों को छोडकर भक्ति से प्राकृत गुण रहित आप में मनको लगा देवें ॥ १३ ॥

जिस प्रकार इस लोक के पदार्थों में लंपट पुरुष पुत्र स्त्री धन की चिन्ता से मरण समय में शोका करता है तैसे ही विद्वान् होकर भी खोटे शरीर के नाश होने की शंका करे तो उसके सब साधन श्रम व्यर्थ ही हैं ॥ १४ ॥

हे प्रभो ! हे अधोक्षज ! जिस हेतु से इस खोटे शरीर में अर्पित हमारी इस अति दुस्तर अहंता ममता रूप माया को जिस योगसे हम शीघ्रही दूर करें ऐसे स्वाभाविक आप के विषय के प्रेमभक्ति योगका विधान करो ॥ १५ ॥

इस भारतवर्ष में भी बहुत नदी तथा पर्वत हैं जैसे कि मलय मङ्गलप्रस्थ मैनाक त्रिकूट ऋषभ कूटक कोल्लक सह्य देवगिरि ऋष्यमूक श्रीशैल वेंकट महेन्द्र वारिधार विंध्य शुक्तिमान् ऋक्षगिरि पारियात्र द्रोण चित्रकूट गोवर्धन रैवत ककुभ नील गोकामुख इन्द्रकील कामगिरि और भी सैकडों हजारों पर्वत हैं तिनके नीचे से होने वाले नद नदी असंख्य हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मना च देहेनाप्युपस्पृशन्ति ॥ १७ ॥ १८ ॥

लब्धं जन्म यैस्तैः पुरुषैः । सात्त्विकादिना स्वकृतेन कर्मणा दिव्यादिगतय आत्मनो विधीयन्ते साध्यन्ते । हि यस्मात् सर्वा एव गतयः कर्मानुसारेण सर्वेषां भवन्ति यस्य यथांस्य यद्विधानं गोत्रप्रकारः संन्यासननकथत्वादिस्तदनतिक्रमेणास्मिन्नेव वर्षे नृणामपवर्गश्च भवति । एतच्च कर्मादिबहुसाधनसम्भवाभिप्राये-

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्लोकं नरकस्यत्रापवर्गाभावेन । तदुपर्यपि बादरायणः सम्भवात् १ । ३ । २६ । इति देवानामपि मोक्षस्य सूचितत्वात् ॥ १९ ॥

अपवर्गस्वरूपमाह । योऽसाविति । अनात्म्ये आत्मनि भवमात्म्यं रागादि तद्रहिते । अनिरुक्ते वाचामगोचरे । अनिलयनेऽनाधारे । अनन्यनिमित्तोऽहैतुकी भक्तियोग एव लक्षणं स्वरूपं यस्य कथं भवति नानागतीनां निमित्तं यो विद्याग्रन्थिस्तस्य रन्धनं छेदनं तद्द्वारेण महापुरुषपुरुषा विष्णुभक्तास्तैः प्रकृष्टः संयोगो यदा भवति तदा ॥ २० ॥

एतदेव मानुष्यमेव सर्वपुरुषार्थसाधनं गायन्ति । अमीषामेभिः उत स्वित् अथवा स्वयमेव साधनं विनैव हरिरेषां प्रसन्नोऽभूत् एवम्भूतस्य पुण्यस्य दुष्करत्वात् भारताजिरे भारताङ्गणे नः केवलं स्पृहैव यत्र तन्मुकुन्दसेवौपयिकं नृषु जन्म यैर्लब्धम् ॥ २१॥

स्पृहामेवाहुः । किमित्यादिसप्तभिः । दुष्करैः क्रत्वादिभिर्नः फल्गुना तुच्छेन द्युजयेन स्वर्गप्राप्त्या किं न किञ्चित्फलम् । कुतः । यत्र नारायणपादपङ्कजस्मृतिर्नास्ति । प्रत्युतातिशयितादिन्द्रियाणामुत्सवाद्भोगात्प्रमुष्टाऽभूत् ॥ २२ ॥

क्षणमल्पमेवायुर्येषाम् परत्वे हेतुः मर्त्येनापि देहेन क्षणेनैव कालेन कृतं कर्म संन्यस्य हरेः पदं समयान्ति ॥२३॥

अतो यत्र वैकुण्ठकथामृतनद्यो न सन्ति तदाश्रयाः कथाप्रवाहाश्रयाः महान्तो भृत्याद्युत्सवा येषु तादृशा यज्ञेशस्य मखाश्च पूजाः स सुरेशस्य ब्रह्मणोऽपि लोको न सेव्यताम् ॥२४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतासां नदनदीनाम् आपो जलानि भारत्यः भारतवर्षस्थाः प्रजाः कर्म पूर्वसवर्णादीर्घाभाव आर्षः नामभिरेव पुनन्ति नामभिरेव पवित्रयन्ति हि ।

गङ्गागङ्गेति यो ब्रूयाद्योजनानां शतैरपि
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ।

इत्याद्यभियुक्तस्मरणमत्रानुसन्धेयं या आपो नामभिरेव पुनन्ति प्रजास्ता अपः प्रजा आत्मना देहेनापि स्पृशन्ति यद्वा । भारत्यः भरतवर्षस्थपुण्याश्चापो नामभिरेव प्रजाः पुनन्ति तावत् आपः प्रजा आत्मना देहेनापि स्पृशन्तीत्यन्वयः नदीर्नदिशति । चन्द्रवसेत्यादिना । त्रिश्वेत्यन्तेन सिन्धुः शोणश्च नदावित्याह । सिन्धुः शोणश्च नदाविति । कावेर्याः पृथगुक्तत्वात्सकृद्गीतत्वान्तरपदः गौयल्ली वदन्यायात् गङ्गा तु पूर्वं प्रपञ्चितैवेत्यत्रानुक्तेति बोध्यम् ॥ १७ ॥ १८ ॥

अस्य भारतवर्षस्य प्राशस्त्यप्रतिपादनपरानभियुक्तैर्गीतान् श्लोकाननुवक्ष्यन्नस्य प्राशस्त्यं कारणमाह । अस्मिन्नेवेत्यादिना । प्रसङ्ग इत्यन्तेन गद्येन अस्मिन्नेव वर्षे भारते लब्धं जन्म विप्रादिजन्म यैस्तैः पुरुषैः शुक्ललोहितकृष्णवर्णेन सत्त्वरजस्तमोगुणकल्पितकुशलाभिश्ररूपेण स्वारब्धेन स्वकृतेन कर्मणा बहवः दिव्यादिगतयः तत्र शुक्लकर्मणा दिव्यगतिः रजःकर्मणा मनुष्यलोकगतिः तामसकर्मणा नारकगतिः तथा च भगवता गीतम् ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥

इति अत्रापि तृतीये उक्तम् ।

आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे ।
धरां रजःस्वभावेन" इत्यादिना ।

एवं दिव्यादिगतय आत्मनः स्वस्य विधीयन्ते सम्पाद्यन्ते हि यस्मात्सर्वा एव गतयः आनुपूर्व्येण कर्मानुसारेण सर्वेषां भवन्ति सर्वेषामविशेषेण त्रैगुण्यवश्यत्वाद् गुणानां ह्रासोल्लासादिभिः कृतानि कर्माणि दिव्यादिगतीः सर्वाः सर्वेषामापादयन्तीत्यर्थः एवमस्मिन्नेव वर्षे यथावर्णविधानं यस्य ब्रह्मक्षत्रियादेः यद्विधानम् ।

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥

इत्यादिविधानं गुर्वनलशुश्रूषा पञ्चमहायज्ञादिरूपविधानं च तदनतिक्रम्य यथावर्णविधानमनभिसंहितफलस्वस्ववर्णाश्रमोचितकर्मानुष्ठानानुगृहीतभक्तियोगेनेत्यर्थः अपवर्गो मोक्षश्च भवति एतच्चात्र वर्षे मोक्षसाधनबहुधर्मानुष्ठानसम्भवाभिप्रायेणोक्तं नरकान्यत्रापवर्गसाधनधर्मानुष्ठानासम्भवाभिप्रायेण । तदुपर्यपि बादरायणः सम्भवात्" इत्युपरितनलोकस्थस्यापि ब्रह्मविद्याधिकारस्य भगवता बादरायणेनैव सूत्रितत्वात् सूत्रे तदुपर्यपीति रम्यकादिवर्षाणामप्युपलक्षणम् ॥ १९ ॥

ननु यथा वर्णविधानं कदापवर्गो भवति को वा स्ववर्णाश्रमोचितो धर्मः साक्षादपवर्गसाधनमुत कस्यचिदनुग्राहकः अनुग्राहकश्चेत् कोऽसावनुग्राह्यः कथं वा अनुग्राहकः अनुग्राह्यश्च कीदृशः अनुग्राह्यविषयश्च कीदृश इत्याशङ्क्याह । योऽसाविति । यदा त्वविद्याग्रन्थिरन्धनद्वारेणाविद्यापुण्यपापात्मकं कर्म भक्तियोगोत्पत्तिविरोधिप्राचीनकर्म तद्रन्धनद्वारेण तन्निरसनद्वारेण महापुरुषो भगवान् तस्मिन् प्रसक्तो भवति तदा यथाविधानमपवर्गश्च भवतीत्यन्वयः "धर्मेण पापमपनुदति कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते" इतिश्रुतिस्मृत्युक्तरीत्या स्वस्ववर्णोचितानभिसंहितफलकर्मानुष्ठानेनाविद्याग्रन्थिनिरसनं तद्द्वारेण महापुरुषे प्रसङ्गः प्रकृष्टः सङ्गः विजातीयप्रत्ययान्तरान्तरितो ध्यानरूपो मनोव्यापारो भवति तदापवर्गो भवतीत्यर्थः अविद्याशब्दोऽत्र पुण्यपापात्मककर्मपरः तदेव कर्म ।

अविद्यया मृत्युं तीर्त्वा विद्यया मृतमश्नुते ।
इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः ॥
ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया ।

इत्यादिषु मृत्युशब्देनाभिधीयते अविद्यया मृत्युमित्यत्राविद्याशब्देनाभिसंहितफलं वर्णाश्रमोचितं कर्मोच्यते विद्यान्तरद्वन्ध्यया मृत्युतरणोपायत्वश्रवणाद्विरोधात्त्वाविद्याशब्दस्थानीयोऽत्र यथावर्णविधानशब्दः तत्रत्यमृत्युशब्दस्थानीयोऽत्राविद्याशब्दः अविद्याशब्दो हि विद्येतरदविद्याकर्मेत्यर्थं कर्ममात्रे वर्तमानो वर्णोचितं काम्यदनभिसंहितफलं वर्णाश्रमोचितं विहितं कर्माभिदधाति काम्यकृत्यकं कर्मेति विवेकः महापुरुषप्रसङ्गं विशिनष्टि । अनानागतिनिमित्तः नानागतिः स्वर्गनरकादिगतिस्तन्निमित्तो न भवतीत्यनानागतिनिमित्तः स्वर्गादिगतिनिवारकः मोक्षसाधनमिति भावः निमित्ताविद्याग्रन्थीतिपाठे नानागतिनिमित्तेति छेदः स्वर्गनरका-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

दिनानागतिनिमित्तभूता याविद्या तद्रूपो यो ग्रन्थिस्तस्य रन्धनद्वारेणेत्यर्थः ग्रन्थिशब्देनाविद्याया दुर्मोचनीयत्वमभिप्रेतं न विद्यते अन्यदैहिकामुष्मिकरूपं निमित्तं फलं यस्य अनन्यनिमित्तः निष्काम इत्यर्थः सचासौ भक्तिलक्षणो भक्तिरूपश्चेति कर्मधारयः एवं यदार्हेत्यस्योत्तरमुक्तं वर्णाश्रमधर्मस्य भक्तियोगानुग्राहकत्वं तत्प्रकारश्चोक्तः अविद्याग्रन्थिरन्धनद्वारेणेत्यनेन महापुरुषप्रसङ्ग इत्यनेन चानुग्राह्यं चोक्तम् अनन्यनिमित्तभक्तियोगलक्षणा इत्यनेनानुग्राह्याकारश्चोक्तः महापुरुष पुरुषप्रसङ्ग इतिपाठे महापुरुषाणां प्रकृष्टः सङ्गो यस्य सः भक्तियोगलक्षणा इत्यर्थः अथानुग्राह्यविषयं महापुरुष इत्यनेनाभिप्रेतं दर्शयति । सर्वभूतात्मनेत्यादिना । यद्यपि सर्वभूतात्मवासुदेवशब्दयोस्तुल्यार्थता तथापि देवताविशेषं निर्दिधारयिषया वासुदेव इत्युक्तं वासुदेवशब्दावयवार्थप्रदर्शनाय सर्वात्मनीत्युक्तम् । इत्यतो न पौनरुक्त्यं भक्तियोगविषयं चिदचिल्लक्षणत्वेन विशिष्टमनात्म्ये इति आत्मनो भावः प्रकारः अपृथक्सिद्धविशेषणं शरीरमात्म्यं ततोऽन्यस्मिन् स किं जीवः नेत्याह । अनिरुक्ते देवमनुष्यादिनामरूपाभ्यामनिरुक्ते अनात्म्ये इत्यनेनतद्व्यावृत्तिः अनिरुक्त इति बद्धजीवव्यावृत्तिः स तर्हि किं मुक्तजीवो नेत्याह । अनिलयने आधारान्तरानपेक्षाय अनेन मुक्तजीवव्यावृत्तिः तेषां हि भगवानाधारः "ब्रह्मभूयाय कल्पते ब्रह्मणो हि प्रतिष्ठाहम्"इत्युक्तत्वात् अत्र ब्रह्मशब्दो मुक्तजीवपर औचित्यात् स तर्हि नित्यसिद्धः नेत्याह । परमात्मनीति । अक्षरशब्दवाच्याभ्यां मुक्तनित्यसिद्धाभ्यां क्षरशब्दवाच्याद्बद्धचेतनाच्च योऽन्यस्तेन गीतः परमात्मा ।

> द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
> क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ।
> उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।

इति तस्मिन्नित्यर्थः । एवंविधे भगवति षाड्गुण्यपूर्णे निरस्तनिखिलदोषे योऽसावनन्यनिमित्तभक्तियोगलक्षणा इत्यन्वयः ॥ २० ॥

एवं स्वर्गापवर्गसाधनभूतबहुविधधर्मानुष्ठानोपयुक्तप्रदेशत्वादस्य सर्वस्य प्राशस्त्यम् अथैतत्प्राशस्त्यप्रतिपादनपरान् श्लोकान् नक्तं तेषामविगीततां दर्शयति । एतदेव हीति । एतद्वर्षप्राशस्त्यं गायन्ति देवा इति शेषः श्लोकानेवाह । अहो इत्यादिना । अमीषामेभिः कर्तुः सम्बन्धविवक्षया षष्ठी किं शोभनं सुकृतमकारि अहो अपिस्वित् किं स्वयं साधनं विनैव हरिर्भगवान् प्रसन्नः किं निरतिशयसुकृतमेवमेभिः कृतं किम्वा स्वयमेवैषां भगवान् प्रसन्न एवं रूपस्य धर्मस्य दुष्करत्वादिति वितर्कयते क इमे इत्यत्राह । यैर्जातैः भारताजिरे भरतवर्षाङ्गणे भारतप्रदेश इत्यर्थः एतस्मिन्भारताजिरस्य तत्रापि नृजन्मनश्च प्राशस्त्यमुक्तं तत्र कारणं मुकुन्दसेवौपयिकमित्युक्तम् ॥ २१ ॥

वर्षान्तरस्थानां लोकान्तरस्थानां मनुष्याणां भगवत्सेवानुपयुक्तिं वदन्तस्ताभिन्दन्ति त्रिभिः । किमिति । दुःखेनापि कर्तुमशक्यैः क्रतुभिस्तपोव्रतैः तपः सहिष्णुता व्रतः तपः कृच्छ्रचान्द्रायणादिरूपं व्रतं प्राजापत्यादिकं दानं पात्रेषु द्रव्यत्यागात्मकं क्रत्वादिभिस्तत्साध्येन फल्गुनाल्पास्थिरफलेन लब्धेन स्वर्गप्राप्त्या वा किं न किञ्चित्फलं कुतः यत्र स्वर्गादौ श्रीमन्नारायणस्य पादपङ्कजस्य स्मृतिर्नास्ति अत्युर्जितातिशयितादिन्द्रियाणामुन्मदात् सुखात् स्मृतिः प्रणष्टाभूत् अधिकेन्द्रियोत्सव एव भगवत्सेवाविरोधीतिभावः ॥ २२ ॥

कल्पमायुर्येषां पुनर्भवः जन्म यस्य तस्मात्स्थानजयात्तु पारितनलोकप्राप्तेः आकल्पानुभाव्यसुखोपरिलोकापेक्षयेत्यर्थः क्षणमल्पमायुर्येषां तेषां भारतभूजयः भारतवर्षप्राप्तिर्जिजये जय उत्कर्षप्राप्तिः ऊर्ध्वस्थानेषु सुखोत्कर्षप्राप्त्यपेक्षया भारतवर्षे जन्मलाभरूपोत्कर्षप्राप्तिरूपो जयो वरं श्रेष्ठ इत्यर्थः भारतभूजयश्रेष्ठ्ये हेतुमाह । अस्थिरेण मर्त्येन मरणशीलेन शरीरेण कृतं क्रियाजातं संन्यस्य भगवति समर्प्य मनस्विनः प्रशस्तमनसः भगवदुपासकाः सन्तः हरेरभयं न विद्यते भयं कालकृतं जन्मजरामरणादिनिमित्तं यस्मिन् तत्पदं स्थानं श्रीवैकुण्ठरूपं यान्ति कल्पायुषस्तु कल्पानन्तरं पुनर्भवमेव यान्तीत्यर्थः ॥ २३ ॥

अतो यत्र वैकुण्ठस्य भगवतः कथारूपाः सुधापगा अमृतनद्यो न सन्ति तदाश्रया भगवत्कथामृतनदीसेवापराः साधवः साधूनां लक्षणलक्षिता भागवताश्च न सन्ति यत्र च महान्तो नित्यपक्षमाससम्वत्सरायनाद्युत्सवा येषां ते यज्ञेशमखाः यज्ञेशस्य भगवतः"अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेवच"इति भगवदुक्तेः"इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः"इति श्रुतेश्च तस्य मखा आराधनरूपा यज्ञाः न सन्ति स सुरेशस्य ब्रह्मणो लोकोऽपि सेव्यतां प्राप्यतां न याति प्राप्यो न भवतीत्यर्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आत्मना कायेनान्तरेण उपस्पृशन्ति आचमनस्नानाभ्यामिति शेषः ॥ १७ ॥ १८ ॥

पुण्यपापार्जनं च सत्त्वादिगुणैः क्रियते तत्फलभूताः स्वर्गादिगतयोऽपीत्याह । अस्मिन्नेवेति । शुक्ललोहितकृष्णवर्णेन सात्त्विकराजसतामसभेदभिन्नेन स्वारब्धेन स्वफलदानार्थेपक्वान्तेन स्वर्गादिगतय आनुपूर्व्येण पर्यायेणात्मनः परमात्मनः प्रेरणया सर्वेषां विधीयन्ते यथावर्णविधानं वर्णाश्रमविहितानुसारेण तनुभारतीनां प्रजानां यदि निस्रो गतयस्तर्हि निजानन्दाविर्भावलक्षणो मोक्षो दुरवस्थः किमिति तत्राह । अपवर्गश्चेति । न केवलं स्वर्गादिगतयोऽपि तु संसारदुःखनिवारणसमर्थो मोक्षश्चेति च शब्दार्थः ॥ १९ ॥

अपिशब्दाद्यदा महतां पुरुषाणां श्रीनारायणपरायणानां सङ्गतिस्तदा योऽसौ भगवत्यनन्यनिमित्तभक्तियोगलक्षणा उपायो भवतीत्यन्वयः न अन्यदैश्वर्यादिप्राप्तिनिमित्तं यस्य सोऽनन्यनिमित्तः तादृशो भक्तियोगलक्षणस्तस्मात्स्वरूपानन्दाविर्भावलक्षणो मोक्षो भवतीति ज्ञातव्यं केन प्रकारेण तदुच्यते नाना गतीति पूर्वोक्तानां नाना गतीनां निमित्तहेतुभूतो यः अविद्याग्रन्थिस्तस्य रन्धनद्वारेण दहनप्रकारेण भक्तियोगोऽप्येवं प्रकारेणोत्पादनीय इति दर्शयति सर्वभूतात्मनि भूतभवद्भविष्यत्सर्वजगदन्तर्यामिणि अनात्म्ये जीवधर्मरहिते अनिरुक्ते वेदैरपि सर्वात्मना निर्वक्तुमशक्ये अनिलयने अनन्याधारे परा प्रकृष्टा मा श्रीर्येषां ते परमा मुक्तास्तेषामप्यानन्ददानादिकर्तरि संज्ञामाह । वासुदेव इति । अवतारूपाणामपि मुक्तिदानसामर्थ्यमस्तीति द्योतयितुं वा वासु-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देव इति द्विशब्दो भक्त्युत्पत्तौ भक्तसङ्गतिः प्रयोजिकेति दर्शयति भक्त्या मुक्तिर्भवतीत्येतदेव गायन्ति विद्वांसः ॥ २० ॥

एषामिति षष्ठी तृतीयार्थे किं शोभनं कर्म उत स्वित् किं भारतेऽजिरे भारताख्यप्राङ्गणे मुकुन्दसेवायामौपयिकं जन्म-लक्षणोपायस्तत्र स्पृहात्मभिरिच्छामनस्कैः ॥ २१ ॥

द्युजयेन स्वर्गजयेन यत्र स्वर्गे श्रीनारायणपादपद्मस्मृतिः प्रमुष्टा कुतः अतिशयेन्द्रियोत्सवाद्विषयभोगातिरेकात् स्वर्गस्थान् कर्मिण उद्दिश्येदं वचनं न देवान् तेषां सन्ततहरिस्मरणस्य प्रमाणसिद्धत्वात् ॥ २२ ॥

भारतलब्धजन्मनामपि पुनर्जन्मसम्भवात् कथं भारतभू-जयो वर इति प्रशस्यत इति तत्राह । क्षणेनेति । मर्त्यस्वनः क्षणकालेन मर्त्येन नश्वरेण देहेन कृतं कर्म हरौ संन्यस्य हरेरभयं पुनर्जन्मभयरहितं पदं संयान्तीति यस्मात्तस्मादिति शेषः कल्पायुषामित्यनेन महरादिलोकस्था लक्ष्यन्ते "कल्पायुषां विबुधा य" इति स्वोक्तेः ॥ २३ ॥

महरादिलोके विशिष्टभोगसम्भवात् कथं नीचीक्रियते भार-तखण्डादिति तत्राह । न यत्रेति । यत्र महर्लोकादिषु सदाभयाः श्रीनारायणचरणसरसिजस्मरणजनकाः साधवो रागद्वेषादि-दोषलेशशून्या भागवता न सन्ति यत्र हीति एव वैकुण्ठकथामृता-पगा अपि न सन्ति एव विष्णुविषययज्ञाश्च न सन्ति तैः प्राप्यफलाभा-वात् पूर्वार्जितकर्मफलभोगात्मत्वेन गच्छत्कालत्वेनावसराभावान्नि-गमस्तुत्यभावाच्च "ध्यायन्तीव देवमनुष्या" इति श्रुतेः सुरेशस्वामिलोको महरादिः सेव्यतां न याति प्राप्यफलान्तरत्वेनेति शेषः ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यथावर्णविधानमिति स्वस्वधर्माङ्गाविककर्मणेत्यर्थः । एतच्च प्रायिकं यदा हि महापुरुषपुरुषप्रसङ्ग इत्यस्यैव मुख्यत्वेन वक्ष्य-माणत्वाच्च श्रीनारदजन्मवत् । प्रथम एव तत्प्रसङ्गेन तत्प्रवृत्तेः भक्तियोगलक्षणोऽप्यपवर्गो भवति । किमुतान्य इत्यर्थः ॥२०॥

अहो इति । कृत्रिमन्यायेन प्राचुर्येणेति नियम । तज्जन्मन्यपि केषा-ञ्चिद्दुष्कर्मत्वेन प्रमादादिविषयत्वदर्शनात् । किं दुष्कृतं इत्यादि-वक्ष्यमाणाच्च । स्वयमिति यदाहीति पूर्वोक्तरीत्या स्वपुरुषानुस-रणस्वभावेन स्वेनैव साधनेनेत्यर्थः ॥ २१ ॥ २२ ॥

संन्यस्य हरावर्पयित्वा ॥ २३ ॥

न यत्रेति । भगवद्भक्तौ भारत भूमिनियमोऽपि स्वाधिकतः तत्-ह्रासवे सर्वस्यापि लोकस्य स्तुत्यत्वेनाभिप्रेतत्वात् । किन्तु भार-तभूमौ तत्प्राचुर्यमस्तीति प्रस्तुता स्तुतिरेव ॥ २४ ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मना देहेन च ॥ १७ ॥

अन्धो ब्रह्मपुत्रः ॥ १८ ॥

अस्मिन्नेव वर्षे नान्यत्र तत्रापि सहस्रयोजनप्रमाणे प्रदेशे एवेति ज्ञेयम् । यदुक्तं विष्णुपुराणे ।

> भारतस्यास्य वर्षस्य नव भेदान्निशामय ।
> इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् ।
> नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ वारुणः ।
> अयन्तु नवमस्तेषां द्वीपः सागरसम्भृतः ।
> योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ।

सागरसम्भृत इति समुद्रप्रान्तवर्तीति श्रीस्वामिव्याख्या नवमस्यास्य पृथङ्नामाकथनात् सोऽपि नवद्वीपोऽयमिति गम्यते विशेषश्च तत्रैव ।

> पूर्वे किराता यस्यान्ते पश्चिमे यवनाः स्मृताः ।
> पूर्वे वैशालिकाश्चैव कामरूपनिवासिनः ।
> औड्रा कलिङ्गा मगधा दाक्षिणात्याश्च कृत्स्नशः ।

सौरका मालवाश्च ।

> इत्यादिचत्वारि भारते वर्षे युगान्यत्र महामुने ! ।
> कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित् ।

इति वायवीये च ।

> भारतस्यास्य वर्षस्य नव भेदान्निबोधत ।
> सागरान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम् ।

इति । शुक्लोहितकृष्णावर्णेन सात्त्विकराजसतामसेन कर्मणा क्रमेण दिव्यादिगतयो बह्व्यः आत्मनः स्वस्य निर्धार्यन्ते साध्यन्ते हि यस्मात् सर्वा एव गतयः सर्वेषां यथावर्णविधानमिति वर्णानां धर्मस्य अधर्मस्य च करणं सम्भवेदिति तद्गतिकस्य आनुपूर्व्येण निर्धार्यन्ते । वेदेनेति शेषः तथा अपवर्गश्चेति तस्य विधानुसरण-कथनात् स स्वयमेव भवतीति चकारेणापवर्गस्य धरत्वं द्योति-तम् ॥ १९ ॥

ननु किंस्वरूपोऽपवर्गः कदा वा भवेदित्यपेक्षायामाह । योऽसा-विति । भगवति परमकल्याणसौन्दर्यादिगुणाश्रये अत एव सर्व-भूतानामात्मा मनो यत्र माधुर्येण सर्वभूतचित्ताकर्षक इत्यर्थः । अत एवानात्म्ये आत्मनो भाव आत्म्यं न युज्यते प्राप्यत्वेन आत्म्यं आत्मत्वं यत्र तस्मिन् यत्र आत्मसेव्यत्वमेव युज्यते न तु आत्म-त्वमात्मैक्यमित्यर्थः । यस्मादात्म्यं प्राकृतगणैर्गुणैर्निर्धेयं तदा-कारेणेत्याह । अनिरुक्ते महाप्रलयेऽपि यद्रूपगुणादिनाशस्याभाव इत्याह । अनिलयने न विद्यते प्राकृतानां तत्त्वानामिव निलयनं लयो यस्य तस्मिन् सर्वेषामात्मा ह्यतिप्रमास्पदं ततोऽपि परमत्वात् परमात्मनि विशेषेण लेभे जनीयत्वातिशयो व्यञ्जितः । वासुदेवे वसुदेवनन्द-नेऽनन्यनिमित्तोऽहैतुको भक्तियोग एव लक्षणं स्वरूपं यस्य सः । नन्वपवर्गशब्देन रूढ्या मोक्ष एवोच्यते सत्यमविद्याध्वंसरूपस्य मोक्षस्य भक्त्यावान्तरभावात् भक्तियोगोऽपि मोक्षाविशेषत्वादेव इत्याह । नाना गतीनां निमित्तं योऽविद्याग्रन्थिस्तस्य रन्धनं ध्वंस स्तद्द्वारेण तद्धेतुत्वेनैव अपवर्गसंज्ञ इत्यर्थः । कदा महापुरुषस्य विष्णोः पुरुषा भक्तास्तैः प्रकृष्टः सङ्गो यदा तदैव नान्यदा ॥ २० ॥

अमीषाममीभिः शोभनं सुकृतमुत स्विदथवा स्वयमेव साधनं विनैव हरिरेषां प्रसन्नोऽभूदिति एतदाभाग्यस्य पुण्यजन्यत्वाभावा-दिति भावः । भारताजिरे भारताङ्गणे । ननु दुरात्मनामपि तत्र जन्म दृश्यते इत्यतो विशिंषन्ति । मुकुन्दसेवौपयिकं हि यस्मात्तोऽस्माकं केवलं स्पृहैव यत्र न तु प्राप्तिः ॥ २१ ॥

ननु भवद्भिरपि भारते जन्म प्राप्यैव सत्कर्मभिरेभिर्वै सुख-सुपभुज्यते इति चेदस्माकं तज्जन्म धिक् नाति कर्मागतमपि धिक् तत्प्राप्यं दिव्यमपि धिक् अमरत्वं सुखमपि धिगित्याभिव्यञ्ज-यन्त आहुः । किमिति द्युजयेन स्वर्गप्राप्त्या किं न किञ्चिदपि फल

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

कुतः यत्र दिवि नारायणपादपङ्कजस्मृतिर्नास्ति। प्रत्युत अतिशयितादिन्द्रियाणामुत्सवाद्भोगात् स्मृतिः प्रमुष्टा ॥ २२ ॥

ब्रह्मलोकादपि सकाशात् भारतभूमेरुत्कर्षः खल्वपूर्व एवेत्याह। कल्पायुषामिति। ब्रह्मलोके द्विपरार्द्धपर्यन्तनिवासादपि सकाशात् भारतभूमौ क्षणमात्र वासोऽपि श्रेष्ठ इत्यर्थः। तत्र हेतुः पुनर्भवात् ब्रह्मलोके तावान् वासोऽपि पुनर्भवप्रद इत्यर्थः भारते तु मर्त्येन मरणधर्मणापि देहेन क्षणेन क्षणमात्रकालेनापि मनस्विनो भगवच्चरणादत्तमनसः हरेः पदमभयं वैकुण्ठं ब्रह्मलोकमूर्द्ध्न्यपि पादौ निधाय यान्ति कृतं शुभाशुभं सर्वमेव कर्म संन्यस्य परित्यज्य ॥ २३ ॥

तस्माद्विवेकिनामयमेव विवेक इत्याहुः। न यत्रेति। वैकुण्ठकथासुधैव सर्वत आधिक्येन स्वाद्वी तदापगैव श्रेयसी न तु ज्ञानयोगादिकथैव श्रव्या कल्पीयसी च। भागवता भगवदालम्बिनः तदाश्रयाः नामैवाश्रयन्तः न तु परमात्मालम्बिनः ज्ञानादिसिद्ध्यर्थं तां किञ्चिन्मात्रीमपेक्षमाणाः यज्ञानां ब्रह्मयज्ञादीनामाङ्गिरसबृहस्पतिसवादीनामप्यन्येषां चेशस्यापि हरेर्मखाः "यज्ञैः सङ्कीर्त्तनप्रायैर्यजन्ति हि सुमेधस" इति प्रमाणोक्तलक्षणाः सङ्कीर्त्तनबहुलाः परिचरणादिरूपाः महान्तः उत्सवा गीतनृत्यवाद्यभक्ताराधनाद्या येषु ते यत्र न सन्ति सः सुरेशस्य ब्रह्मणोऽपि लोकः न सेव्यतां नाश्रीयताम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

नामभिः पुनन्तीनामर्थात् हे गङ्गे! हे यमुने! इत्येवं नामोच्चारणमात्रेणैव पवित्रीभूताः प्रजाः अपः आत्मना च देहेनाप्युपस्पृशन्ति ॥ १७-१८ ॥

अस्मिन्नेव वर्षे लब्धजन्मभिः शुक्लादिवर्णेन स्वारब्धेन स्वकृतेन कर्मणा आनुपूर्व्येण स्वकर्मानुसारेण दिव्याद्या गतयः सर्वा एव आत्मनो विधीयन्ते साध्यन्ते किञ्च सर्वेषां वर्णानां यथावर्णविधानं यस्य ब्राह्मणादिवर्णस्य यद्विधानं मोक्षोपायविधानं तदनतिक्रमेणापवर्गो मोक्षश्चापि भवति अस्मिन् वर्षे मोक्षसाधनप्राशस्त्यमिति भावः मुक्त्यधिकारस्तु देवानामपि दर्शितः। तदुपर्यपि बादरायणः सम्भवात् इति १-३-२६-३ ॥१९॥

भगवन्! कोऽसौ उपायः तज्ज्ञानं स्वयमेव कृपया कुरु इत्यत्र मोक्षोपायमाह। य इति। नानागतिनिमित्तायाः

> अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते।
> यया क्षेत्रज्ञशक्तिः सा वेष्टिता नृप! सर्वगा।

इतिस्मृतिप्रसिद्धायाः पुण्यपापरूपायाः अविद्यायाः ग्रन्थिरन्धनकारेण भगवति योऽसौ अनन्यनिमित्तो निष्कामः भक्तियोगलक्षणः इत्यन्वयः कथम्भूते तस्मिन् आत्मनि आत्मभूते रागद्वेषादि यस्माद्वर्जनीयात्तस्मिन्ननिरुक्ते एतावानित्येवं वाचामगोचरे अनिलयने स्वाश्रये स भक्तियोगः यदा महापुरुषस्य भगवतः पुरुषैर्दासैः प्रकृष्टः सङ्गो भवेत्तदा भवति ॥ २० ॥

एतदेव। भरतखण्डजानां कृतार्थत्वम् अहोऽमीषामेभिः ॥ २१ ॥

फल्गुना तुच्छेन अतिशयेन्द्रियोत्सवात् हेतोः प्रमुष्टा अभूत् अतः नारायणपादपङ्कजस्मृतिरप्यत्र नास्ति २२ ॥

क्षणायुषामल्पायुषां क्षणेनाल्पेनायुषा मर्त्येन देहेन कृतं कर्म संन्यस्य अभयमपुनर्भवम् ॥ २३—२४ ॥

भाषा टीका।

ये नदी नामही लेने से मनुष्यों को पवित्र करनेवाली हैं तहां पर भी भारतवासीजन इनके जलों से स्नानपानादि करते हैं ॥ १७ ॥

उन के नाम चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणी पयस्विनी शर्करावर्ता तुङ्गभद्रा कृष्णा वेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्मदा चर्मण्वती सिन्धु अन्ध शोणानद महानदी वेदस्मृती ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयू रोधस्वती सप्तवती सुसोमा शतद्रू चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वा ए सब महानदी हैं ॥ १८ ॥

इसी भारतवर्ष मे जिनपुरुषों के जन्म भये हैं उनहीं को अपने प्रारब्ध के अनुसार सात्त्विक राजस तामस कर्म से देवता मनुष्य नारकी गति सबों को सब क्रम से विधान की जाती हैं और वर्णाश्रम के अनुसार धर्मों से मोक्ष भी उन का होता है ॥ १९ ॥

जब कभी भागवतों के सङ्गहोने से सर्वभूतों के आत्मा देह दोष रहित वचन के अगोचर सर्वाधार परमात्मा भगवान् वासुदेव मे नाना प्रकार की गतियों के निमित्त अज्ञान ग्रन्थि का नाश करने वाला निष्काम भक्तियोगरूप भजन होता है वही मोक्ष है दूसरा मोक्ष नहीं ॥ २० ॥

इसी बात को देवता गान करते हैं अहो इन जीवों ने क्या पुण्य किया है किम्वा इन से उपर हरि भगवान् प्रसन्न हैं जिन ने भारत भूमी मे प्राप्त होकर मनुष्यों मे जन्म लिया है जोकि जन्म भगवान् की सेवा के योग्य है जिसमे हम लोगों की इच्छा होती है ॥ २१ ॥

हम लोगों के बड़े कठिन यज्ञों मे तपसे व्रतों से अथवा दानादिकों मे अतिक्षुद्र स्वर्ग मे जय के क्या प्रयोजन है जहां पर की श्रीनारायण चरणारविन्द की स्मृति नहीं होती है उलटा और बड़े इन्द्रियों के आनन्द से नारायण स्मरण नष्ट होगया है ॥ २२ ॥

कल्पपर्यन्त आयुवाले ब्रह्मादिकों के स्थान के प्राप्त होने से तो भारत भूमी का प्राप्त होना अच्छा है क्योंकि ब्रह्मादिकस्थानों से तो फिर संसार में आना पड़ता है और इस भारत भूमी में तो उत्साही पुरुष क्षणभङ्गुर मनुष्य शरीर से सब कर्मों को परमात्मा में समर्पण करके क्षणमात्र ही में अभय पुनरावृत्ति रहित श्रीहरि के स्थान वैकुण्ठ को चले जाते हैं ॥ २३ ॥

जहां पर श्रीनारायण कथा रूपी अमृत की नदी नहीं वहती हैं अथवा जहां पर भगवान् के आश्रय करने वाले भागवत साधु नहीं हैं जहांपर बड़े नाम संकीर्तनादि उत्सव वाले श्रीभगवान् के पूजनादिक नहीं होते हैं ऐसा तो यदि ब्रह्मलोक या इन्द्र लोक होवे तो उसमे नहीं रहना चाहिये ॥ २४ ॥

प्राप्ता नृजातिं त्विह ये च जन्तवो ज्ञानक्रियाद्रव्यकलापसंभृताम् ।
न वै यतेरन्नपुनर्भवाय ते भूयो वनौका इव यान्ति बन्धनम् ॥ २५ ॥
यैः श्रद्धया बर्हिषि भागशो हविर्निरुप्तमिष्टं विधिमन्त्रवस्तुतः ।
एकः पृथङ्नामभिराहुतो मुदा गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥ २६ ॥
सत्यं दिशत्यर्थितमर्थितो नृणां नैवार्थदो यत्पुनरर्थिता यतः ।
स्वयं विधत्ते भजतामनिच्छतामिच्छापिधानं निजपादपल्लवम् ॥ २७ ॥
यद्यत्र नः स्वर्गसुखावशेषितं स्विष्टस्य सूक्तस्य कृतस्य शोभनम् ।
तेनाजनाभे स्मृतिमज्जन्म नः स्याद्वर्षे हरिर्यद्भजतां शं तनोति ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अमुमुक्षून्नरान्निन्दन्ति । प्राप्ता इति । ज्ञानञ्च तदर्थाः क्रियाश्च तदर्थानि द्रव्याणि च तेषां कलापेन सम्भृतां पूर्णामपुनर्भवाय मोक्षाय वनौका इव वनौकसः पक्षिणो यथा लुब्धकान्मुक्ता अपि पुनर्यदि तस्मिन्नेव वृक्षे प्रमत्ता विहरन्ति तर्हि यथा बध्यन्ते तद्वत् ॥ २५ ॥

अहो भारतवासिनां भाग्यमित्याहुः । यैरिति । "अग्नये जुष्टं निर्वपामि इन्द्राय जुष्टं निर्वपामि" इत्येवं भागशो निरुप्तं पृथक् कृतं कथं विधिना प्रकारेण मन्त्रेण च वस्तुतश्चरुपुरोडाशादिभेदेन चेष्टं देवतामुद्दिश्य त्यक्तं निरुप्तं च ममेदमिति स्वीकृत्य त्यागानन्तरमश्नातीत्यर्थः पृथगिन्द्रादिनामभिराहुत आहूतः आशिषां प्रभुः स्वयं पूर्णोऽपि हरिः ॥ २६ ॥

तत्रापि निष्कामाः कृतार्था इत्याहुः । सत्यमिति । प्रार्थितः सन्नर्थितं ददातीति सत्यं तथापि परमार्थदो न भवत्येव यस्मात् यतो दत्तादनन्तरं पुनरप्यर्थिता भवति । ननु नार्थितश्चेत्किमपि न दद्यादित्याशङ्क्याहुः । अनिच्छतां निष्कामानां तु इच्छानां पिधानमाच्छादकं सर्वकामपरिपूरकं निजपादपल्लवं स्वयमेव सम्पादयति ॥ २७ ॥

स्विष्टस्य सम्यग्यजनस्य सूक्तस्य प्रवचनस्य कृतस्यान्यस्यापि कर्मणः स्वर्गसुखादुपभुक्तादवशेषितं यदि किञ्चिदस्ति तेनाजनाभे वर्षे नोऽस्माकं जन्म स्यात् कीदृशं स्मृतिमत् हरिरेव सेव्य इत्यनुसन्धानयुक्तम् । यतो हरिर्भजतां शं सुखं तनोति ॥ २८—२९—३०—३१ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं भारतवर्षेऽन्तरस्थान् विनिन्द्याधुना भारतवर्षस्थानपि नरानमुमुक्षून्निन्दन्ति । प्राप्ता इति । इहास्मिन् भारते वर्षे ये च जन्तवो जीवाः नृजातिं मनुष्यजन्म प्राप्ताः कथम्भूतां द्रव्यक्रियाज्ञानकलापसम्भृतां द्रव्यं भूतपञ्चकं क्रिया कर्मेन्द्रियाणि ज्ञानं ज्ञानेन्द्रियाणि च एतेषां कलापेन सङ्घातेन च संस्कृतां पूर्णां भगवद्गुणकीर्तनार्चनपदप्रक्रमणगुणश्रवणविग्रहावलोकनसमर्पितफलस्याघ्राणानोपयुक्तस्रग्गन्धवासोऽलंकारचार्चितोच्छिष्टभोजनादिरूपसर्वविधभगवत्सेवोपयुक्तज्ञानकर्मेन्द्रियतदाश्रयभूतसङ्घातपूर्णामित्यर्थः एवंविधां नृजातिं प्राप्ता अपि यद्यपुनर्भवाय मुक्तये न यतेरन् यत्नं न कुर्युस्तर्हि भूयः पुनः वनौका इव वने स्थिता ओकाः शकुन्ता इव "ओकः शकुन्तवृषलौ" इति कोशः "उच समवाये" इत्यस्माद्धातोः कप्रत्यये गुणः कुत्वं च "ओकउचः क" इति सूत्रेण निपात्यते कप्रत्ययस्तु "इगुपधज्ञाप्रीकिरः कः" इत्यधिकारे "घञर्थे कविधानम्" इति वचनेन यद्यपि घञ्यपि तद्रूपसिद्धिस्तथाप्यन्तोदात्तार्थमिदं निपातनं घञि सति ञित्स्वरेणाद्युदात्तः स्यात् दिवौकसः जलौकस इत्येवमादौ तु असुप्रत्यये "उणादयो बहुलम्" इति वचनात्कुत्वं द्रष्टव्यं यथा शकुन्ता लुब्धकान्मुक्ता अपि पुनर्यदि तत्रैव प्रमत्ताः विहरन्ति तर्हि पुनर्यथा बध्यन्ते तद्वत् ॥ २५ ॥

अहो भारतवासिनां भाग्यमित्याहुः । यैरिति । यैर्भारतवासिभिर्नरैः बर्हिषि यज्ञे श्रद्धया विधिना प्रकारेण मन्त्रेण वस्तुतश्चरुपुरोडाशादिभेदेन चेष्टं देवतोद्देशेन त्यक्तं तथा भागशः "अग्नये त्वा जुष्टं निर्वपामि" इत्येवं भागशो निरुप्तं च हविः अग्नीन्द्रादिरूपेणैक एव स्थितः पृथग्नामभिरग्नीन्द्रादिनामभिराहुतः हुत इति दीर्घाभाव आर्षः पूर्णः स्वतोऽवाप्तसमस्तकामः अविजिघत्सोऽपि इति यावत् हविर्गृह्णातीत्यर्थः पूर्णः किमर्थं गृह्णाति तत्राह आशिषां प्रभुरिति । यत आशिषां पुरुषार्थानां प्रभुर्दाता अतो यष्टॄणामाशिषः प्रदातुं तत्कृताराधनं परिगृह्णातीत्यर्थः तदुक्तं भगवता "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति ॥ २६ ॥

आशिषां प्रभुरित्यनेन धर्मादिचतुर्विधपुरुषार्थेभ्यो मुमुक्षुभिर्भगवान् भारते वर्षे आराध्य इत्युक्तं तत्रापि केवलममुमुक्षून् स्तुवन्ति । सत्यमिति । अर्थितस्तत्तत्पुरुषार्थकामिभिः प्रार्थितः सन् भगवानर्थितं याचितं तं पुरुषार्थं दिशति ददातीति सत्यं तथापि नैवार्थदः न परमपुरुषार्थदः अस्थिराल्पपुरुषार्थदो न तु नित्यनिरतिशयमोक्षरूपार्थप्रदोऽभूदित्यर्थः अर्वाचीनपुरुषार्थदानानन्तरमप्यर्थितुर्याञ्चाया अनिवृत्तेरर्थितं दिशन्नपि न दत्तवानिति भावः एतदेवाह । यतः अल्पपुरुषार्थोऽपि यद्यतः पुरुषार्थान्तरं पुनरीश्वरं प्रत्यर्थिता याचिता एवमितरपुरुषार्थेभ्यो नृणां नित्ययाचकत्वात्नित्यदारिद्र्यमुक्तं तथा च वक्ष्यत्येकादशे "दरिद्रो यस्त्वसन्तुष्टः" इति अथानिच्छतां मुमुक्षूणां सर्वपुरुषार्थानां मोक्षान्तर्भावादानुगुण्यमाहुः अनिच्छतामकामयमानानां भजतां जनानाम्

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इच्छापिधानम् इच्छायाः पिधानमाच्छादकं स्वकीयं पादपल्लवं स्वयमेव विधत्ते समस्तपुरुषार्थरूपं स्वात्मानमेव ददातीत्यर्थः ॥ २७ ॥

एवं भारते मुमुक्षून् प्रस्तुत्याथ स्वमनीषितमाविष्कुर्वन्तस्तमेव भारतं स्तुवन्ति । यद्यत्रेति । यदि नः अस्माकं कृतस्य स्विष्टस्य सम्यग्यजनस्य सूक्तस्य प्रवचनस्य स्वर्गसुखावशेषितं स्वर्गसुखानावशेषितम् अस्माभिः कृतं यागादिरूपं स्वर्गादिसुखं सम्पाद्य किञ्चिच्छोभनं सुकृतमुपभुक्तावशिष्टमस्ति चेदस्तीत्यर्थः तेन आचरितेन शुभेन कर्मणा नोऽस्माकमजनाभे भारते वर्षे भगवद्विषयकस्मृतिमज्जन्म नृजन्म स्यात् नृजन्मन्येव भगवद्विषयकस्मृतिसम्भवात् सम्भावितस्मृतिमात्रजीवजन्मना किं स्यादित्यत्राहुः । यतः स्मृतिवशाद्भजतां हरिः शं सुखं मोक्षरूपं सुखं तनोति ददातीत्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतोऽपि भारतं पुण्यक्षेत्रमाहुरित्याह । प्राप्ता इति इह भारते ये जन्तवः प्राणिमात्रनामानोऽपुनर्भवाय मोक्षाय न यतेरंश्चेत्ते भूयो वनौका इव निरयगामिन एव न चैषां पुनरुत्थितिरित्याह । यान्तीति "वनन्तु नरकं विन्द्याद्भजनं" इत्यभिधानं ये च नृजातिपुरुषत्वेन जननं प्राप्ताः "जातिः सामान्यजन्मनोः" इत्यभिधानं मुक्तये न यतेरंश्चेत्ते सुतरां भूयो वनौका महातमःस्थानयोग्याः एवशब्दवदोकशब्दोऽकारान्तः नानार्थेषु शब्दानामनेकान्तत्वेन पाठात् "बर्हिर्नाम्नि नपुंसक" इत्यादिषु ये च नृनय इतिधातोर्ज्ञानकर्मयोग्यविप्रजातिं प्राप्तास्तेनतोऽपि भूयो वनौकाः ॥ २५ ॥

अशेषसाधनत्वेन भारतस्योत्तमत्वमितरखण्डेभ्यो यतोऽत्र क्रियमाणकर्म यज्ञादिलक्षणं श्रीहरिप्रीतिजनकमतः स्तुवन्तीत्याह । यैरिति । भारतवर्षासिभिर्यैः श्रद्धया बर्हिषि यज्ञे निरुप्तं हविराशिषां प्रभुरेकः स्वयम्मुदा गृह्णाति । कथं निरुप्तं विधिमन्त्रवस्तुतो भागश इष्टं इन्द्राय निर्वपामि प्रजापतये निर्वपामि, इति पृथङ्निरुप्तम् "इन्द्रं यजाग्निं यज" इति पृथगिष्टं विधिमन्त्राणामिन्द्रादिविषयत्वेन सिद्धत्वात् कथमेको हरिर्गृह्णातीत्युच्यत इति तत्राह । नामभिरिति । इन्द्रादिनामभिराहुतः विप्रेश्वरादिवत्प्राप्तव्यफलापेक्षी नेत्याह । पूर्ण इति । कुतः आशिषां प्रभुत्वात् ॥ २६ ॥

न केवलं हविरादाय तूष्णीमास्ते हरिः फलं च प्रयच्छतीत्याहुरित्याह । सत्यमिति । अर्थितो हरिस्तेषां यज्वनां नृणाम् अर्थितं स्वर्गादिकं दिशतीति सत्यं शपथेन प्रतिजानीते प्राप्तस्वर्गार्थितोऽपि पुनः फलं नैव दिशतीति इदञ्च सत्यम् अर्थिनो मदो भवतीति यद्यस्मात् "अपाम सोमम्" इत्यादेः तस्मात् पुनरर्थितं प्राप्य पुनः प्रार्थयमानस्य प्रार्थितो न दिशतीति । अमद इति । यदिति वा तर्ह्यत्यानां स्वर्गादिकमेव दिशति न मोक्षमित्याशङ्का माभूदित्याहुरित्याह । स्वयमिति । इच्छाया विधानं यस्मात्तदिच्छाविधानम् अभीष्टं निजपादपल्लवम्भजतां फलमनिच्छतां भक्तिमन्तरेण तेषां स्वयमात्मानं विधत्ते ददाति ॥ २७ ॥

स्वाभिप्रेतमाहुरित्याह । यद्यत्रेति । यत्र यस्मिन् भारतेऽपि वर्षे हरिर्निजपादपद्मं भजतां शं सुखं तनोतीति यद्यस्मात्तस्मान्नः स्विष्टादेः स्वर्गसुखावशेषितं स्वर्गसुखमनुभूयावशिष्टं यच्छोभनं तेन पुण्येन नोऽस्माकमजनाभस्मृतिनिमित्तं जन्म स्यादिति प्रार्थयामहे । तदुक्तम् ।

अनधिकारिणो देवाः स्वर्गस्था भारतोद्भवम् ।
वाञ्छन्त्यात्मविमोक्षार्थमुद्रेकार्थेऽधिकारिणः ।

इति वेदैर्गीतमिति ज्ञायते अनेन शास्त्रतात्पर्यार्थोऽपि निःसंदिग्ध इति बोद्धव्यम् ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इयं पर्यामेव दर्शयति । यैर्नृभिरिष्टं देवतामुद्दिश्य त्यक्तं यत्तदेव भागशस्तत्तद्देवतामुद्दिश्य निरुप्तं पृथक् कृतं सत् पृथगिन्द्रादिनामभिरप्याहूत एक एव मुदा गृह्णाति तमुद्दिश्यैव तत्तन्नाम्ना त्यक्तत्वादिति भावः ॥ २६ ॥

सत्यमिति । अर्थितः प्रार्थितः सन् नृणामर्थितं सत्यमेव ददाति न तत्र कदाचिदपि व्यभिचार इत्यर्थः । किन्तु तथापि तन्मात्रेणार्थदो न भवति । तन्मात्रं दत्त्वा निवृत्तो न भवतीत्यर्थः । यत उपाभक्तस्तत्रापूर्णत्वाद्भोगक्षये सति यदेव पुनरप्यर्पिता भवति "न जातु कामः कामानामुपभोगेन शाम्यति" इत्यादेः । तदेवमभिप्रेत्य स तु परमकारुणिकस्तत् पादपल्लवमाधुर्यदानेन तदनिच्छतामपि भजतामिच्छापिधानं सर्वकामसमापकं निजपादपल्लवमेव विधत्ते तेभ्यो ददातीत्यर्थः । यथा माता चर्व्यमाणां मृत्तिकां बालकमुखादपसार्य तत्र खण्डं ददाति तद्वदिति भावः । एवमप्युक्तम् "अकामः सर्वकामो वा मोक्षकाम" इत्यादौ तीव्रत्व भक्तेः । तथोक्तं गारुडे ।

यद्दुर्लभं यदप्राप्यं मनसो यन्नगोचरम् ।
तदप्यप्रार्थितं ध्यातो ददाति मधुसूदनः इति ॥ २७—३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तादृशं भारतं प्राप्ता अप्यकृतार्था अतिशयेन शोच्या एव यथा लब्धचिन्तामणयोऽपि पूर्ववत् कृपणा एवेत्याहुः । प्राप्ता इति । ज्ञानमधिदैवं क्रिया अध्यात्मं द्रव्यमधिभूतं तेषां समूहैः संभृतां पूर्णां श्रवणादिसर्वेन्द्रियैः पूर्णामिति हरिनामश्रवणकीर्तनादिसम्भवेऽपीति भावः । अपुनर्भवाय भक्तियोगाय वनौका इव वनौकसः पक्षिणो यथा लुब्धकान्मुक्ता अपि पुनर्यदि तस्मिन्नेव वृक्षे प्रमत्ता विहरन्ति तर्हि यथा बध्यन्ते तद्वत् ॥ २५ ॥

अत्र भारते "एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्" इत्यादिश्रीभगवदुक्तां भगवद्विभूतिबुद्ध्या विश्वरूपोपासनामपि कुर्वाणा धन्या एवेत्याहुः । यैरिति । बर्हिषि यज्ञे विधिना प्रकारेण मन्त्रेण वस्तुना च हविर्यज्ञीयद्रव्यमिष्टं शुद्धं भागशः इन्द्राय स्वाहा अग्नये स्वाहा इत्यादि पृथक् कृतं निरुप्तं दत्तं पूर्णोऽपि आशिषां प्रभुः हरिस्तेषां भक्त्या गृह्णाति एकोऽपि पृथगिन्द्रादिनामभिराहुतः आहूतः ॥ २६ ॥

शुद्धां भक्तिं कुर्वाणास्तु सकामा अपि कृतार्था निष्कामभक्ततुल्या एव भवन्तीत्याहुः । सत्यमिति । नृणां भजतामर्थितं कामितं पदार्थं नैरर्थितः सन् दिशति ददातीति सत्यं किन्तु यद्यथा पुनरर्थिना भोगान्ते याचकत्वं स्यात्तथा नैवार्थदः कथमेतदवगतमित्यत आह । यतः निजपादपल्लवमनिच्छतामपि भजतां स्वयमेव ध्रुवादीनामिव इच्छापिधानं सर्वकामाच्छादकं

श्रीशुक उवाच ।

जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् ॥ २९ ॥

तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दरहरिणः पाञ्चजन्यः सिंहलो लङ्केति ॥ ३० ॥

एवं तव भारतोत्तम ! जम्बूद्वीपवर्षविभागो यथोपदेशमुपवर्णित इति ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां
संहितायां वैयासिक्यां जम्बूद्वीपवर्णनं नाम
एकोनविंशतितमोऽध्यायः ॥१९ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

तदेव निजपादपल्लवं विधत्ते कृपया ददाति निजपादपल्लवं स्वयमेव बलाद्दत्त्वा इच्छायाः पिधानमाच्छादनं विधत्ते करोतीति वा । ततश्चानभीप्सितामपि सितशर्करां पितुः सकाशात् प्राप्य शिशवो यथा मृदि स्पृहां त्यजन्ति तथैव कामानपीत्यर्थः । अत एव "अकामः सर्वकामो वा" इत्यादौ तीव्रेण ज्ञानकर्माद्यमिश्रेण भक्तियोगेन यजेतेत्युक्तम् । अत्र निष्कामाणां सकामानाञ्च भक्तानामनन्तैः पादपल्लवप्राप्तावपि नैव सर्वथा ऐकरूप्यं भावनीयम् । न हि जात्यैव शुद्धं बलात् शोधितञ्च वस्तुतुल्यमूल्यं भवत्यतो ध्रुवादिभ्यः सकाशादनुमदादीनामुत्कर्षः परम एव दृश्यत इति ॥ २७ ॥

अत एव प्रार्थयन्ते । यद्यत्रेति । स्विष्टस्येति स्विष्टादिजन्यात् स्वर्गसुखादुपभुक्तादवशेषितं शोभनं सुकृतमस्ति तेन हेतुना अजनाभे भारते जन्म स्यात् स्मृतिमत्त्वादर्शोत्सुक्यस्मरणायुक्तम् । ततश्च तत्र साधुसङ्गं कृत्वा हरिं भजिष्यामः यद्यस्माद्भजतां हरिः शं तनोत्येव ॥ २८—३१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नित्यवद्धाग्निरिन्द्रन्ति । प्रायाः इति । ज्ञानश्च तत्पूर्विका क्रिया वासुदेवाराधनं तदर्थानि द्रव्यायायागाधनोपकरणानि च तेषां कलापेन संभृतां पूर्णां वनौका वनौकसः ॥ २५ ॥

सकामानामपि भगवद्भक्तानां भारतवासिनामहोभाग्यमित्याहुः । यैरिति । बर्हिषि यज्ञे यैः भारतवासिभिः "अग्नये जुष्टं निर्वपामि इन्द्राय जुष्टं निर्वपामि" इत्येवं भागशो नियतं पृथक् कृतम् श्रद्धया विधिना प्रकारेण च मन्त्रेण वस्तुतश्च चरुपुरोडाशादिभेदेन हवं देवतोद्देशेन त्यक्तं पृथगिन्द्रादीनां नामभिः आहुतः आहुतः आशिषां प्रभुः स्वयं पूर्णोऽपि भगवानेक एव हविः गृह्णाति "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति श्रीमुखवचनात् ॥ २६ ॥

निष्कामभक्तास्तु कृतार्था इत्याहुः । सत्यमिति । अर्थितः प्रार्थितः अर्थितं याचितं पुरुषार्थं ददातीति सत्यमथापि अर्थदः परमपुरुषार्थदो न भवति यद्यस्माद्यतो दत्तानन्तरं पुनरर्थिता इच्छा भवति अनिच्छतां निष्कामानां भजतां तु इच्छानां पिधानमाच्छादकं सर्वकामपरिपूरकं निजपादपल्लवं स्वयमेव विधत्ते ददाति ॥ २७ ॥

यदि नोऽस्माकं स्विष्टस्य सम्यग्यजनस्य प्रवचनस्य कृतस्य अन्यस्यापि तपोव्रतादेरनुष्ठितस्य स्वर्गसुखादुपभुक्तादवशेषितं शोभनं पुण्यं यत्किञ्चिदस्ति नहि तेन शोभनेन अजनाभे वर्षे नोऽस्माकं जन्म स्यात् कीदृगत्र वर्षे हरियजतां भजतां शं सुखं तनोतीति स्मृतिमत् ॥ २८ ॥

भाषाटीका ।

जो जन्तु इस भारतवर्ष में ज्ञानेन्द्रिय कर्मेन्द्रिय पञ्च भूतसमूह रूप मनुष्यजाति को प्राप्त होकरभी मोक्ष के वास्ते यत्न नहीं करते हैं वे लोग वन के पक्षी के तुल्य फिर बन्धन में ही प्राप्त होते हैं ॥ २५ ॥

जिन भारत वासिमनुष्यों के विधिपूर्वक मन्त्रों से यज्ञों द्वारा यज्ञ में पृथक् भाग से प्रदान किये हवि को स्वयं चारों पुरुषार्थों के पति भी एकहोकर भी भगवान् भिन्न नामों से देने परभी परिपूर्ण होकर भी बुलाने पर बड़े हर्ष से ग्रहण करते हैं ॥ २६ ॥

यद्यपि भगवान् उन सकाम पुरुषों को देते हैं सो ठीक है परन्तु तोभी वह देना ठीक नहीं होता है क्योंकि उस के भोग होजाने पर फिर मांगना पड़ता है और निष्काम भक्त जो इच्छा नहीं करते हैं तोभी सब इच्छाओं के दूरकरने वाले अपने चरण के स्मरण को भगवान् दे देते हैं जिस से फिर चाहना नहीं होती है ॥ २७ ॥

यदि यहां पर स्वर्ग सुख से शेष सुन्दर यज्ञ का या वेदाध्ययन का या सुकृत का कुछ पुण्य होवे तिस से भारत वर्ष में हरिस्मरण सहित हमारा जन्म होवे जहां पर कि भजन करने वालों का भगवान् कल्याण करते हैं ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।
इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम
ऊनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं नवखण्डात्मकं जम्बूद्वीपं ससंस्थानं सपर्वतनदिं सवर्णाश्रमधर्मवन्मनुजमुपवर्ण्याथजम्बूद्वीपस्योपद्वीपानष्टौ आह । जम्बूद्वीपस्येति । हे राजन्! एके अभिमुक्ता अष्टा जम्बूद्वीपस्योपद्वीपान् उपदिशन्ति ते जम्बूद्वीपाः न प्रियव्रतस्य रथचरणनेमिना परिक्लप्ता इत्याह । सगरात्मजैः यागीयाश्वस्यान्वेषणसमये इमां जम्बूद्वीपात्मिकां पृथिवीं तत्र निखनद्भिरवदारयद्भिरुपकल्पिताः ॥ २९ ॥

तेषामुद्देशं प्रतिजानीते । तद्यथेति । तानुद्दिशति स्वर्णप्रस्थ इत्यादिना ॥ ३० ॥

एवं सोपद्वीपं जम्बूद्वीपमुपवर्ण्योपसंहरति। एवमिति। हे भारतोत्तम! जम्बूद्वीपस्य ये वर्षा इलावृतादयस्तेषां विभागो यथोपदेशं यथाक्रममनुवर्णितः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एक इति विशेषणाद्विशेषविवक्षयोऽष्टावुपद्वीपानुपदिशन्ति । सामान्यविवक्षवस्तान् समुद्रैकदेशानिति ॥ २९ ॥ ३० ॥ ३१ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
एकोनविंशोऽध्यायः ॥ १९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
ऊनविंशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ १९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

इमां महीं निखनद्भिरित्यनेन नवसहस्रयोजनविस्तारो भरतखण्डस्तत्र भूखननजलप्रवेशादिनाल्पविस्तारोपलब्धिर्न विरुध्यते इति सूचितम् ॥ २९—३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
ऊनविंशाध्यायार्थप्रकाशः ॥ १९ ॥

भाषाटीका ।

श्री शुकदेव जी बोले हे राजन्! कोई मुनि जम्बूद्वीप के आठ उपद्वीप हैं ऐसा कहते हैं जिन को कि घोडा के ढूंढने समय मे सगर के पुत्रों ने पृथिवी के खोदने से बनाये हैं ॥ २९ ॥

सो जैसे स्वर्णप्रस्थ चन्द्रशुक्ल आवर्तन रमणक मन्दरहरिण पाञ्चजन्य सिंहल लङ्का इनके नाम हैं ॥ ३० ॥

हे भारत! इस प्रकार से जम्बूद्वीपवर्षोंका विभाग जैसा सुना है तैसा तुम से हमने वर्णन करदिया है ॥ ३१ ॥

इति श्रीभागवत पञ्चमस्कन्ध उन्नीसमे अध्यायका
भाषानुवाद लक्ष्मणाचार्य कृत
समाप्त ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे ऊनविंशोऽध्यायः समाप्तः ॥ १९ ॥

॥ विंशोऽध्यायः ॥

———:०:———

॥ श्रीशुक उवाच ॥

अतः परं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते ॥ १ ॥

जम्बूद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्ब्वाख्येन लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन प्लक्षो जम्बूप्रमाणो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वस्तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्त वर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ॥ २ ॥

शिवं यवयसं सुभद्रं शान्तं क्षेममममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः ॥३॥

मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुपर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः अरुणा नृम्णाङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरा इति महानद्यः यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्ध्वायनसत्याङ्गसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसंदर्शनप्रजननाः स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते ॥ ४ ॥

प्रत्नस्य विष्णो रूपं यत्सत्यस्यर्तस्य ब्रह्मणः । अमृतस्य च मृत्योश्च सूर्यमात्मानमीमहीति ॥५॥

प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविशेषेण(१) वर्तते ॥ ६ ॥

प्लक्षः स्वसमानेनेक्षुरसोदेनावृतो यथा तथा द्वीपोऽपि शाल्मलो द्विगुणविशालः(१)समानेन सुरोदेनावृतः परिवृङ्क्ते ॥ ७ ॥

यत्र ह वै शाल्मली प्लक्षायामा यस्यां वाव किल निलयमाहुर्भगवतश्छन्दःस्तुतः पतत्रिराजस्य सा द्वीपहूतये उपलक्ष्यते ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विंशे प्लक्षादिषड्द्वीपस्थितिमाह सहार्णवैः ।
लोकालोकस्थितिश्चान्तर्बहिर्भागादिमानतः ॥ १—१ ॥

तावता लक्षविस्तारेण परिमितः परिवेष्टितः । उपास्ते निमृति आकलय्य समर्प्य ॥ २ ॥

अभिज्ञाताः प्रसिद्धाः सप्तैव अन्ये च पर्वता नद्यश्च सहस्रशः सन्तीत्यर्थः । मानसोत्तरस्य मण्डलाकारत्वात्केतेषु प्लक्षादिपञ्चद्वीपेषु वर्षाद्रयस्तिर्यक्प्रम्बाकारा उभयतोऽब्धिस्पृश इति गम्यते अन्यथा सप्तभिः सप्तवर्षविभागासम्भवात् वर्णितं वर्षाणां पूर्वादिक्रमोक्तेश्च ॥ ३ ॥

जलोपस्पर्शनेन विधूतं रजस्तमश्च येषां हंसादयो ब्राह्मणादिस्थानीयाः विबुधोपमं संदर्शनं क्रमस्वेदादिरहितं रूपं प्रजननमपत्योत्पादनं च येषाम् ॥ ४ ॥

त्रिगीता अपि द्वीपमन्त्रा व्याख्यायन्ते प्रत्नस्य पुराणपुरुषस्य विष्णोर्यद्रूपं तं सूर्यमीमहि शरणं व्रजेम कथंभूतम् सत्यादीनामात्मानमधिष्ठातारं तत्र सत्यमनुष्ठीयमानो धर्मः ऋतं प्रतीयमानो धर्मः ब्रह्मणस्तत्प्रतिपादकस्य वेदस्य । अमृतस्य शुभफलस्य मृत्योरशुभफलस्य ॥ ५—६—७ ॥

"सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिर" इत्यादिश्रुतेर्यद्वचोभिः स्वावयवभूतैः श्रीविष्णुं स्तौतीति छन्दःस्तुत् तस्य गरुडस्य निलयनं स्थानं सा शाल्मली द्वीपस्य हूतये व्यपदेशाय ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं जम्बूद्वीपः सप्रपञ्चमुपवर्णितः अथ प्लक्षादीनां द्वीपानामुपवर्णनं प्रतिजानीते शुकः । अतः परमिति । प्लक्षादीनां ये वर्षा-

परिवृक्तेनेति श्रीविजयध्वजतीर्थपाठः । (१) समानेनेति श्रीवीरराघवाचार्यपाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेषां विभागः प्रमाणं परिमाणं लक्षणं तेषु वसतामायुरिन्द्रियौजःसहोबलबुद्धिविक्रमादीनां स्वभावतो वर्धकत्वरूपं संस्थानमितरासाधारणाकारः परिरूपवर्ण्यते ॥ १ ॥

तावत् प्लक्षद्वीपमुपवर्णयति । जम्बूद्वीप इत्यादिना जम्ब्वाख्येनेत्यन्तम । दृष्टान्तार्थं यथा जम्बूद्वीपो यावद्विस्तारः लक्षयोजनविशालः । तावता लक्षयोजनविस्तीर्णेन क्षारोदधिना लवणसमुद्रेण परितो वेष्टित आवृतः यथा च मेरुर्द्वीपमध्यस्थो जम्ब्वाख्येन द्वीपेन परिवेष्टित इत्यनुषङ्गः तथा लवणोदधिरपि ततः लवणोदधेर्द्विगुणविशालेन द्विलक्षयोजनविस्तीर्णेन प्लक्षाख्येन परितः अभितः क्षिप्तः आवृतो जम्बूद्वीपस्याप्यन्तत्वैः साकल्येनादृष्टत्वात् अप्रसिद्धत्वात् दृष्टान्तान्तरमाह । यथा परिखा बाह्योपवनेन परिक्षिप्तेति लिङ्गपरिणामेनानुषङ्गः द्वीपमध्यस्थः प्लक्षो वृक्षः जम्बूप्रमाणः जम्बूवृक्षतुल्यौच्छ्रायः द्वीपस्य आख्यानिदानं यत् प्लक्षेति नामधेयं तत्कर आपादकः हिरण्मयः प्रकाशबहुलः उत्थित ऊर्ध्वं स्थितः यत्र यस्मिन् प्लक्षवृक्षमूले सप्त जिह्वाः ज्वाला यस्य तादृशोऽग्निरुपास्ते तिष्ठति तस्य द्वीपस्याधिपतिरधिपतिरित्यनेन चिरं तद्द्वीपाधिपत्यं कृतवानिति गम्यते प्रियव्रतस्यात्मज आग्नीध्रानुज इध्मजिह्वः तं प्लक्षद्वीपं सीमाबन्धनेन सप्तवर्षात्मकं विभज्य सप्तानां वर्षाणां नामानि तान्येव नामानि येषां तेभ्यः पुत्रेभ्यः सप्त वर्षाण्ययाकलय्य समर्प्य स्वयमात्मयोगेन भगवदुपासनात्मकभक्तियोगेनोपररामोपरतः संसारान्मुक्तोऽभूदित्यर्थः ॥ २ ॥

पुत्रनामानि वर्षाणि निर्दिशति । शिवमित्यादिना । तान्पुत्रानाकलय्येति पूर्वेणान्वयः तेषु वर्षेषु गिरयो नद्यश्च सप्त सप्तैवाभिज्ञाताः प्रसिद्धा आसन्नित्यर्थः तावत्पर्वतान्नामभिर्निर्दिशति । मणिकूट इति मेघमाल इत्यन्तेन । एते एव वर्षाणां मर्यादागिरय इत्याह । सेतुशैला इति । नदीर्निर्दिशति नामभिः अरुणेत्यादिना विश्वम्भरेत्यन्तेन । इतिशब्दैरेतैरेव नामभिस्तत्र तत्र शिवादिवर्षे व्यवह्रियन्त इति सूच्यते नदीर्विशिनष्टि । महानद्य इति । स्वच्छत्वपवित्रत्वविस्तृतत्वादिमहागुणाश्रया इत्यर्थः ॥ ३ ॥

पुनस्ता एव नदीर्विशिषंस्तेषु प्लक्षद्वीपवर्षेषु चतुरो वर्णान्नामभिर्निर्दिशंस्तेषामायुःपरिमाणमुपास्यञ्चाह । यासामिति । यासामरुणादिनदीनां जलस्योपस्पर्शेन स्नानपानादिना विधूतं रजस्तमश्च येषां ते चत्वारो वर्णा हंसादिसंज्ञाः ब्राह्मणादिसंज्ञास्थानीया हंसादिसंज्ञाः सहस्रं वर्षाण्यायुरेषां ते तादृशाः विबुधोपमं संदर्शनं सौन्दर्यं येषां तानि प्रजननान्यपत्यानि येषामेवम्भूताः सन्तस्त्रय्या विद्यया वेदविद्यया वेदोक्तकर्मयोगादिभिः तन्मूलस्मृत्याद्युक्तमार्गैश्च यथायोग्यं त्रयीमयम् ऋग्यजुरादिवेदप्रवरं तद्वाचकत्वात् तदध्यापयितृत्वात्तत्प्रतिपाद्यत्वाच्च तत्प्राचुर्यं योग्यं स्वं स्वशरीरकमात्मानं परमात्मानं यजन्ते आराधयन्ति ॥ ४ ॥

तेषां जप्यमानमन्त्रमाह । प्रत्नस्येति । प्रत्नस्य पुराणस्यानादेर्जगत्कारणस्येति यावत् सत्यस्य निर्विकारस्य प्रत्नस्येत्यनेन समष्टिजीवव्यावृत्तिः तस्य सादित्वात् सत्यस्येत्यनेन व्यष्टिचेतनाचेतनव्यावृत्तिः तयोर्विकारित्वात् ऋतस्य निरतिशयसुकृतफलस्य धर्मात् प्राचीनसुकृतफलप्रदस्येत्यर्थः ऋतस्य तदधीनत्वादुपचारस्तदभेदेन निर्देशः ऋतशब्दो हि सुकृतफलपरः "ऋतं पिबन्तौ सुकृतस्य लोके" इति श्रौतप्रयोगात् । यद्वा । ऋतशब्दः पुण्यस्य कर्मणो वाचक उपचारात्तदन्तरात्मतया तत्कारयितरि प्रयुज्यते पुण्यस्य कर्मणः कारयितुरित्यर्थः तत्कारयितृत्वञ्च श्रुतेः "एष एव साधु कर्म कारयति यमुन्निनीषति" इति ऋतशब्दो हि पुण्यस्य कर्मणोऽपि वाचकः "यथा पुण्यस्य कर्मणो दूराद्गन्धो वाति" इति पुण्यं कर्म प्रस्तुत्य तत्प्रतिसम्बन्धिनो पुण्यस्य कर्मण एवम् "अनृतादात्मानं जुगुप्सेत" इत्यनृतशब्देन निर्देशात्पुण्यस्य कर्मणः ऋतशब्दो वाचक इत्यवगम्यते तथा अमृतस्य च मृत्योश्चेत्यमृतमृत्युशब्दावपि बन्धमोक्षवाचकौ उपचारात्तद्धेतौ प्रयुक्तौ भगवतश्च बन्धमोक्षहेतुत्वञ्च श्रुतम् "संसारमोक्षस्थितिबन्धहेतुः" इति "उतामृतत्वस्येशानो यदन्नेनातिरोहति" इति च एवम्भूतस्य ब्रह्मणो विष्णोर्यद्रूपं शरीरभूतं तत्सूर्याख्यमात्मानं जीवविशेषमीमहि शरणं व्रजेम प्रतर्दनविद्यान्यायेनात्र सूर्यजीवशरीरकपरमात्मोपासनमुक्तमित्यवगन्तव्यम् ॥ ५ ॥

प्लक्षादिषु पञ्चसु द्वीपेषु अविशेषेण सामान्येन सर्वेषां पुरुषाणामायुराविरूपा सिद्धिरौत्पत्तिकी जन्मसिद्धा वर्तते अत्रेदमवगन्तव्यं मानसोत्तरगिरेर्मण्डलाकारत्वोक्तेरेतेषु प्लक्षादिषु पञ्चसु द्वीपेषु वर्षाद्रयस्तिर्यक्त्वाकारा उभयतोऽब्धिस्पृशः अन्यथा सप्तभिः सप्तवर्षाणां विभागासम्भवाच्च श्रीविष्णुपुराणे वर्षाणां पूर्वादिक्रमेणोक्तेश्चेति ॥ ६ ॥

एवं प्लक्षद्वीपः सवर्षपर्वतनदीसवर्णाश्रमपुरुष उपवर्णितः अथ तद्दृष्टान्तेन शाल्मलीद्वीपमनुवर्णयति । प्लक्ष इति । यथा प्लक्षद्वीपः समानेन स्वतुल्यविशालेनेक्षुरसोदेन द्विलक्षयोजनविशालेनावृतस्तथा शाल्मलीद्वीपोऽपि द्विगुणविशालः प्लक्षद्वीपापेक्षया चतुर्लक्षयोजनविशाल इत्यर्थः स्वमानेन चतुर्लक्षयोजनविशालेन सुरोदधिनाभितो वृत्तेनाकारेणावृतः परिवेष्टितः ॥ ७ ॥

यत्र द्वीपे शाल्मली प्लक्षद्वीपसमानविस्तार आस्ते तां विशिनष्टि । यस्यां शाल्मल्यां वाऽऽकिलशब्दो निपातसमुदायः प्रसिद्धिद्योतकश्छन्दस्तुतः छन्दोभिः "सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दांस्यङ्गानि धिष्ण्याः शफा यजूंषि नाम" इत्यादिभिः छन्दोऽवयवत्वेन स्तूयते इति छन्दस्तुत् आर्षत्वात्कर्मणि क्विप् तस्य छन्दसामक्षरेयत्तारूपपरिमाणात्मकानां गायत्र्यादीनां तच्चक्षुराद्यवयवत्वं तेषां तच्चक्षुराद्यवयवदृष्ट्योपासनानिबन्धनमित्यवगन्तव्यम् । यद्वा छन्दः सुपर्णोऽसीत्यादिरूपं स्तुत्यं यस्य गायत्र्याद्यवयवकत्वेन स्तावकं यस्येत्यर्थः एवम्भूतस्य पतत्त्रिराजस्य पक्षिराजस्य गरुत्मतः सौपर्णस्य निलयनं नीडमाहुः विपश्चित इति शेषः सा शाल्मली द्वीपहूतये हूतिर्व्यवहारः शाल्मलीद्वीप इति व्यवहारायेत्यर्थः उपलभ्यते उपलक्ष्यते दृश्यत इत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्लक्षादिद्वीपप्रमाणादिज्ञानेन श्रीनारायणमाहात्म्यमेव आख्यतेऽस्मिन्नध्याये प्रमाणमियत्ता "प्रमाणं बाधनेयत्तामर्यादाशास्त्रहेतुषु" इति यादवः लक्षणमेतावद्भिरिति परिच्छिन्नं वृत्तं संस्थानं वर्तुलचतुरस्रत्वादिस्वरूपप्रकारः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तावता विस्तारेण लक्षयोजनप्रमाणेन ततो जम्बूद्वीपात् प्लक्षाख्येन बहिःस्थितेन तत्र दृष्टान्तो यथेति। यत्र द्वीपे प्लक्ष उत्थितः असौ प्लक्षः जम्बूप्रमाणः द्वीपाख्यातिकरश्च जम्बूं प्रमाणीकरोति अधिसहस्रयोजनोत्साह इति वा यत्र-त्युत्तरत्रापि सम्बन्धनेन श्रीहरिर्मितिशेषः आकलय्य दत्त्वा ॥ २ ॥

अभिज्ञाताः प्रसिद्धाः प्रधाना वा ॥ ३ ॥

सेतुशैलाः मर्यादागिरयः विबुधोपमसंदर्शनं प्रजननं सुरतबलञ्च येषां ते तथा सूर्यात्मानं सूर्यस्वरूपम् ॥ ४ ॥

प्रत्नस्य पुरातनस्य विष्णोर्व्याप्तस्य हर्यदूपं प्रतिमास्थानीयं यच्च सत्यतस्य वाचिककायिकसुकृतप्रेरकस्य ब्रह्मणो ब्रिश्चिस्य रूपं साक्षात्कारनिमित्तं यच्चामृतस्यामरसमूहस्य मृत्योर्मारकस्य महेश्वरस्य रूपम् एवं त्रिमूर्तिनिवासयोग्यं तं सूर्यमात्मानमीमहि शरणं प्राप्नुम इति मन्त्रार्थः। ननु सूर्यान्तः स्थितं हरिं शरणं प्रपद्यामह इति व्याख्यानं किं प्रमाणकं प्रतीतार्थं परित्यज्यान्यार्थाङ्गीकारस्य प्रमाणसापेक्षत्वादितीयमाशङ्का।

सूर्यसोमाग्निवारीशविधातृषु यथाक्रमम्।
प्लक्षादिद्वीपसंस्थासु स्थितं हरिमुपासते ॥

इत्येतेन परिहर्तव्येति ॥ ५ ॥ ६ ॥

परिवृत्तेन वर्तुलेनस्थेनतत्सर्वद्वीपसमुद्रेष्वनुसन्धेयम् ॥ ७ ॥

यत्र शाल्मली समुत्पन्ना स द्वीपः शाल्मलः प्लक्षायामेनेन शाल्मल्याः परिमाणं सम्यक् न ज्ञातं स्यादित्यतः साध्यर्थेति "सुपर्णोऽसि गरुत्मान्" इत्यादिच्छन्दोभिर्वेदैः स्तूयत इति छन्दःस्तुतः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

परिवृङ्क्त इति "वृजी वर्जने" रुधादिरुदात्तेत आत्मनेपदमार्षं पृथग् वर्तत इत्यर्थः ॥ १—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

प्लक्षद्वीपादिवर्षाद्रिनदीशैलज्यदेवताः।
लोकालोकाचलश्चापि विंशे प्रोक्ता यथा स्थितम् ॥ ० ॥ १ ॥

परिक्षिप्तः परिवेष्टितः उप आधिक्येनास्ते आकलय्य दत्त्वा ॥ २ ॥

गिरयो हि वर्षसीमाभिव्यञ्जका उभयतोऽब्धि स्पृशन्तस्तिर्यक्प्राकाराः ॥ ३ ॥

हंसाद्या ब्राह्मणादिस्थानीयाः विबुधोपमं सन्दर्शनं रूपं प्रजननमपत्योत्पादनञ्च येषां ते ॥ ४ ॥

प्रत्नस्य पुराणपुरुषस्य यद्रूपं तं सूर्यमीमहि शरणं व्रजेम। कीदृशं सत्यादीनामात्मानमधिष्ठातारं सत्यमनुष्ठीयमानो धर्मः ऋतं प्रतीयमानो धर्मः ब्रह्मणस्तद्बोधकस्य वेदस्य। अमृतस्य शुभफलस्य मृत्योरशुभफलस्य "सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिर" इत्यादिश्रुतेश्छन्दोभिः स्वावयवभूतैर्विष्णुं स्तौतीति छन्दस्तुत् तस्य सा शाल्मली द्वीपस्य हेतवे नाम्ने ॥ ५—११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

जम्बूद्वीपं निरूप्य ततः परितः संस्थितान् क्षारोदादीन् समुद्रान् प्लक्षादीन् द्वीपांश्च वर्णयति भगवान् शुकः विंशेनाध्यायेन ॥ १ ॥

तावता लक्षयोजनविस्तारेण क्षारोदधिना स्वयं वेष्टितः परिक्षिप्तः परितः आवृतः द्वीपाख्याकारः प्लक्षद्वीपसंज्ञासम्पादकः जम्बूप्रमाणः जम्बूद्वीपसमानविस्तारः सप्तजिह्वः सप्तार्चिः उपास्ते तिष्ठति आकलय्य समर्प्य आत्मनि परमात्मनि यो योगो ध्यानयोगस्तेनोपरराम संसारान्मुक्तोऽभूदित्यर्थः ॥ २ ॥

अभिज्ञाताः प्रसिद्धास्तु सर्वेऽपि अप्रसिद्धाः सहस्रश इति भावः ॥ ३ ॥

हंसादयः ब्राह्मणादिस्थानीया वर्णाः विबुधोपमं सन्दर्शनं प्रजननञ्च येषां ते सहस्रायुषः सहस्रं संवत्सरा आयूंषि येषां ते स्वर्गद्वारं स्वर्गप्रापकं त्रय्यामयं त्रय्यभिमानिनं सूर्यात्मानं सूर्यरूपमात्मानं भगवन्तं त्रय्या विद्यया वेदत्रयोक्तकर्ममार्गेण यजन्ते आराधयन्ति ॥ ४ ॥

प्रत्नस्य पुरातनस्य जगत्कारणस्य विष्णोर्यद्रूपं तं सूर्यमात्मानं परमात्मानमीमहि शरणं व्रजेम विष्णोः सर्वात्मत्वमाहुः। सत्यस्य समदर्शनरूपस्य ऋतस्य सत्यवचोरूपस्य ब्रह्मणः शब्दब्रह्मरूपस्य अमृतस्य जीवनहेतोः मृत्योर्मरणहेतोः चकारात्सर्वचराचररूपस्येत्यर्थः ॥ ५ ॥

औत्पत्तिकी सहजा ॥ ६ ॥ ७ ॥

प्लक्षायामः प्लक्षद्वीपवदायामो विस्तारो यस्याः सा सत्र यस्यां विपुलविस्तारायां पतत्त्रिराजस्य निलयं नीडमाहुः प्राज्ञाः कथम्भूतस्य "सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुस्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञा यज्ञीयं पुच्छं छन्दांस्यङ्गानि" इत्यादिश्रुतेः छन्दोभिः स्वावयवभूतैः श्रीविष्णुं स्तौतीति छन्दस्तुतस्य द्वीपस्य हूतये व्यपदेशाय संज्ञासिद्धये इत्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥

भाषा टीका

श्रीशुकदेवजी बोले इस के अनन्तर प्लक्षादिद्वीपों का प्रमाण लक्षण स्थितिसे वर्षों का विभाग वर्णन किया जाता है ॥ १ ॥

यह जम्बूद्वीप जितना चौड़ा है उतनेही चौड़े खारी समुद्र से चारों तरफ घिरा है जैसे जम्बूद्वीप से मेरु घिरा है खारी समुद्र भी उस से द्विगुणा प्लक्षनामा द्वीप से घिरा है जैसे खाई उपवन से घिरी होवे प्लक्ष गूलरका पेड़ जामुन के पेड़ के बराबर ऊंचा है द्वीप के नाम करनेवाला है जहांपर ऊपर को उठा हुआ सात जिह्वा वाला अग्नि स्थित है उस द्वीप का पति प्रियव्रतका पुत्र इध्मजिह्व जो है तिसने अपने द्वीपके सात वर्ष विभाग करके सात वर्षों के नामवाले पुत्रोंको देकर स्वयं आत्म योगसे निवृत्ति मार्गके ग्रहण किया ॥ २ ॥

शिव यवयस सुभद्र शान्त क्षेम अमृत अभय य वर्ष है तिनोंमेंपर्वत नदीभी सातही हैं मणिकूट वज्रकूट इन्द्रसेन ज्योति-

तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहुः स्वसुतेभ्यः सप्तभ्यस्तन्नामानि सप्त वर्षाणि व्यभजत् सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥ ६ ॥

तेषु वर्षाद्रयो नद्यश्च सप्तैवाभिज्ञाताः स्वरसः शतशृङ्गो वामदेवः कुन्दो मुकुन्दः पुष्पवर्षः सहस्रश्रुतिरिति(१) अनुमतिः सिनीवाली सरस्वती कुहू रजनी नन्दा राकेति ॥ १० ॥

तद्वर्षपुरुषाः श्रुतधरवीर्यधरवसुन्धरेषन्धरसंज्ञा भगवन्तं वेदमयं सोममात्मानं वेदेन यजन्ते ॥ ११ ॥

स्वगोभिः पितृदेवेभ्यो विभजन् कृष्णशुक्लयोः ।
प्रजानां सर्वासां राजान्धः सोमो न आस्त्विति ॥ १२ ॥

एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्याकरो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति ॥ १३ ॥

तद्द्वीपपतिः प्रैयव्रतो राजन् ! हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तवामदेवनामभ्यः ॥ १४ ॥

तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्त सप्तैव चक्रश्चतुःशृङ्गः कपिलश्चित्रकूटो देवानीक ऊर्ध्वरोमा द्रविण इति रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति ॥ १५ ॥

यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवन्तं जातवेदसरूपिणं कर्मकौशलेन यजन्ते ॥ १६ ॥

भाषा टीका ।

स्मान् सुपर्ण हिरण्य ष्ठीव भयमाल ये सब सेतु पर्वत हैं अरुणा नृम्णा अङ्गिरसा सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरा ए महानदी हैं जिन नदियों के जलके स्नानपानादि से रजोगुण तमोगुणके छूटजाने से निर्मल मनवाले हंसपतङ्ग ऊर्ध्वायन सत्य संज्ञक चारवर्ण हजारवर्ष की आयुवाले देवता सरीका जिन का दर्शन और प्रजा हैं सो लोग स्वर्ग के द्वार भूत वेद त्रय प्रतिपाद्य भगवान् आत्मा सूर्यनारायण को वेदत्रयी से आराधन करते हैं ॥ ४ ॥

क्रियमाणधर्म प्रतीयमाणधर्म वेद शुभफल अशुभफल रूपपुराण पुरुष साक्षात् विष्णु के रूप सूर्यात्मा भगवान् को हम शरण प्राप्त होते हैं ॥ ५ ॥

प्लक्षादिक पांच द्वीपों मे पुरुषों की आयु इन्द्रिय देहबल इन्द्रियबल मनोबल बुद्धि पराक्रम सब लोगों को स्वभावही से सिद्धि समान रूप से रहती है ॥ ६ ॥

प्लक्षद्वीप अपने बरोबर इक्षु के रस के समुद्र से घिरा है उससे तैसेही शाल्मल द्वीप भी दोगुण विस्तार है अपने बरोबर मदिरा के समुद्र से घिरा हुआ प्रकाशित होरहा है ॥ ७ ॥

जिस द्वीप मे प्लक्ष के बरोबर विस्तार वाली शाल्मली का पेड है जिस मे कि वेदों से विष्णु की स्तुति करने वाले भगवान् पक्षिराज गरुड जीका स्थान है ऐसा कहते हैं वह शाल्मली का पेड उस द्वीप के शाल्मलीद्वीपनाम जानने के वास्ते लक्षित होता है ॥ ८ ॥

(१) सेतुशैलाइत्यधिकः पाठः श्रीवीरराघवाचार्यमते ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वगोभिः स्वरश्मिभिः । अन्धोऽन्नं सोमो नो राजा भास्तु आभिमुख्येन भवतु हस्वपाठे त्वविवक्षया सन्ध्यभावः ॥ १२ ॥

एवं सुरोदाद्बहिर्घृतोदेनावृतः कुशद्वीप इत्यन्वयः । स्वशष्पाणि स्वकोमलशिखास्तेषां रोचिषा ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्य द्वीपस्य शाल्मलस्याधिपतिः चिरं कृताधिपत्यो यज्ञबाहुः प्रियव्रतस्यात्मजः सप्तभ्यः स्वसुतेभ्यः तन्नामानि स्वपुत्रतुल्यनामानि सप्त वर्षाणि व्यभजद्विभज्य ददावित्यर्थः ॥ ९ ॥

पुत्राणां वर्षाणां च साधारणनामभिर्वर्षाणि निर्दिशति सुरोचनमित्यादिना । तेषु सुरोचनादिषु वर्षेषु शैलाः सप्त नद्यश्च अभिज्ञाताः प्रसिद्धाः अन्ये च शैला नद्यश्च सन्तीत्यर्थः तावत्सप्त शैलानाह । स्वरस इत्यादिना । सेतुशैलाः मर्यादागिरयः नदीराह । अनुमतिरित्यादिना ॥ १० ॥

तद्वर्षपुरुषाणां चतुर्णां वर्णविभागं तेषामाराध्यं भगवद्रूपं जप्यमानमन्त्रञ्चाह । तद्वर्षेत्यादिना । श्रुतधरादिशब्दाः संज्ञा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नामानि येषां ते वेदमयं वेदप्रचुरं भगवदात्मकं सोमाख्यं सोमाख्यमात्मानं औषधिविशेषं वेदेन वेदोक्तेन तन्मूलमन्त्रस्मृत्यायुक्तेन स्वस्ववर्णोचितस्वधर्मेण यजन्ते आराधयन्ति ॥ ११ ॥

स्वगोभिः स्वकिरणैः शुक्लकृष्णयोः पक्षयोः पितृदेवेभ्योऽन्धमन्नं शुक्लपक्षे देवेभ्यः कृष्णे पितृभ्यश्चान्नं विभजन् स्वगोभिश्चन्द्रस्य शुक्लकृष्णपक्षविभाजकत्वाभावे उचितकाले पित्रादीनां स्वधास्वाहापूर्वकं हविर्दानमेव न स्यादिति भावः यत एव पित्रादीनामप्यसाङ्कर्येणान्नस्य विभागेन प्रदापयिताऽतो नोऽस्माकं सर्वासां प्रजानां राजा चन्द्रः सोमः अमृतमस्तु सुखकरोऽस्त्विति यावत् ॥ १२ ॥

एवं शाल्मलीद्वीपं उपवर्णितः अथैतद्दृष्टान्तेन कुशद्वीपमनुवर्णयति । एवमिति । यथापूर्वः शाल्मलः तथा कुशद्वीपोऽपि सुरोदधेर्बहिः द्विगुणमानेनाष्टलक्षयोजनविशालेन घृतोदधिना परिवेष्टितः स्वयमप्यष्टलक्षयोजनविशालः यस्मिन् कुशद्वीपे द्वीपस्य कुशद्वीपस्य व्यपदेशकरः अपरोऽग्निरिव प्रकाशबहुलः देवेन भगवता ब्रह्मणा निर्मितः स्वशष्पाणां स्वावयवानां कोमलतृणानां रोचिषा दिशो दश विराजयति प्रकाशयति ॥ १३ ॥

तस्य कुशद्वीपस्याधिपतिः हिरण्यरेतोनाम प्रियव्रतस्य पुत्रः स्वीयं सप्तभ्यः स्वपुत्रेभ्यो वस्वादिवर्षनामभ्यः यथाभागं विभज्य स्वयं तपआनिष्ठत तपसा युक्तोऽभूदित्यर्थः ॥ १४ ॥

वर्षनाम्नः सप्तपुत्रान्निर्दिशति । वस्वित्यादिना । वस्वादीनामितरेतरयोगद्वन्द्वः तेषां वर्षेषु तत्तुल्यनामसत्सीमा गिरयः सप्त तथा नद्यश्च सप्त बभूवुः शैलान्निर्दिशति । चक्र इत्यादिना । सेतुशैला मर्यादा गिरयः ॥ १५ ॥

नदीराह । रसकुल्येत्यादिना । नदीर्विशिनष्टि । महानद्य इति । पुनर्नदीर्विशिंषन् तद्द्वीपस्थानां पुरुषाणां चतुर्णां वर्णविभागं तेषामुपास्यं भगवद्रूपं जप्यमानं मन्त्रश्चाह । यासामिति । यासां रसकुल्यादिनदीनां पयोभिर्जलैर्विधूतमलाः कुशद्वीपो नीडः स्थानं येषां ते कुशलकोविदादिसंज्ञाः जातवेदसरूपिणं जातवेदा एव जातवेदसः प्रज्ञादित्वात् स्वार्थिकोऽणप्रत्ययः स अग्निरेव रूपं शरीरं जातवेदस्स्वरूपं तदस्यास्तीति तथा तं भगवन्तं कर्मनैपुणेन यजन्ते आराधयन्ति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शुक्लकृष्णयोरुभयोः पक्षयोरपि स्वगोभिः सुधालक्षणैः पितृदेवानुद्दिश्य सोमलक्षणमन्धोऽन्नं विभजन् राजा चन्द्रान्तर्यामी सर्वासां प्रजानां नोऽस्माकञ्च राजा रञ्जकोऽस्त्विति प्रजानां नोऽन्धो विभजन् पित्रादिभ्यः सोमं विभजन् राजा नः सोमं सुखमस्त्विति वा ॥ १२ ॥

सङ्ख्यया कुशद्वीपसमानेन यथापूर्वः शाल्मलः सुरोदेनावृतस्तथा स्वशष्पाणां निजबालतृणानां तेजसा ॥१३॥१४॥१५॥१६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

स्वगोभिः स्वरश्मिभिः । अन्धोऽन्नम् । सोमो नो राजा आभिमुख्येनास्तु । इत्थपाठे स्वविवक्षया सन्ध्यभावः ॥ १२ ॥

सुशष्पाणि सुकोमलशिखा इतेषां रोचिषा ॥ १३--१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्धः अन्नं नोऽस्माकं राजा सः आभिमुख्येन अस्तु ॥ १२ ॥

स्वशष्परोचिषा स्वगतबालतृणकान्त्या ॥ १३-१६ ॥

भाषाटीका

उस द्वीपका पति प्रियव्रत का पुत्र यज्ञबाहुने अपने सात पुत्रोंको उनहीं नामवाले वर्षोंका विभाग करके दीदिया जिनके सुरोचन, सौमनस्य, रमणक, देववर्ष, पारिभद्र, आप्यायन, अविज्ञातय नाम हैं ॥ ९ ॥

उन वर्षोंके मर्यादा पर्वत तथा नदी भी हैं स्वरस शतशृङ्ग वामदेव कुन्द मुकुन्द पुष्पवर्षा सहस्रश्रुति ये पर्वत हैं अनुमति सिनीवाली सरस्वती कुहू रजनी नन्दा राका ये नदी हैं ॥ १० ॥

उन वर्षके श्रुतधर वीर्यधर वसुंधर इषंधर संज्ञावाले पुरुष वेदमय सोम आत्मा भगवान को वेदोक्त कर्मसे पूजन करते हैं ॥११॥

उसका मन्त्र अपने किरणोंसे शुक्ल कृष्ण दोनों पक्षों में सब प्रजों के अन्नरूपसे पोषण करनेवाले सोमराजा हमारे ऊपर प्रसन्न होवें ॥ १२ ॥

इसी प्रकार मदिरा समुद्र से बाहिर अपने दुगुण प्रमाण घृतके समुद्र से घिरा हुआ कुशद्वीप पहिले सरीका है जिस द्वीप में उस द्वीप के नामको करने वाला परमेश्वर का रचित अग्नि सरीका प्रकाशमान अपने घासोंकी दीप्तिसे सब दिशों को प्रकाश करता हुआ कुशका गुच्छा है ॥ १३ ॥

उस द्वीप के अधिपति हिरण्यरेत नामा राजा प्रियव्रत के पुत्र ने अपने द्वीपको सात अपने पुत्रों को यथा योग्य विभाग देकर आपनी तपस्या में निष्ठा करलीनी ॥ १४ ॥

उनके नाम वसु वसुदान दृढरुचि नाभि गुप्तस्तुत्य व्रत विविक्त नामदेव हैं उनवर्षों में मर्यादाके पर्वत तथा नदी भी सात सात हैं जिनके नाम चक्र चतुःशृङ्ग कपिल चित्रकूट देवानीक ऊर्ध्वरोमा द्रविण ये हैं ॥ १५ ॥

रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमाला ये नदियों के नाम हैं जिनके जलों से कुश द्वीपके वासिजन कुशल कोविद अभियुक्त कुलक संज्ञावाले अग्निरूपी भगवान् को कर्मों की निपुणतासे आराधन करते हैं ॥ १६ ॥

परस्य ब्रह्मणः साक्षाज्जातवेदोऽसि हव्यवाट्।
देवानां पुरुषाङ्गानां यज्ञेन पुरुषं यजति ॥ १७ ॥

(१) तथा घृतोदाद्बहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तो वृतो यथा कुशद्वीपो घृतोदेन यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिर्वर्तक आस्ते ॥ १८ ॥

योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव ॥ १९ ॥

तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः (२) स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान्वर्षपान्निवेश्य (३) स्वयं भगवान् भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम ॥ २० ॥

आमो (४) मधुरुहो मेघपृष्ठः सुधामा (५) भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुतास्तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः शुक्लो वर्धमानो भोजन (६) उपबर्हिणो नन्दो नन्दनः सर्वतोभद्र इति अभया अमृतौघा आर्यका तीर्थवती (७) वृत्तिरूपवती शुक्लेति ॥ २१ ॥

यासामम्भः (८) पवित्रममलमुपयुञ्जानाः पुरुषऋषभद्रविणदेवकसंज्ञा वर्षपुरुषा (९) आपोमयं देवमपां पूर्णेनाञ्जलिना यजन्ते ॥ २२ ॥

आपः! पुरुषवीर्याः स्थ (१०) पुनन्तीर्भूर्भुवः सुवः।
ता नः (११) पुनीतामीवघ्नीः (१२) स्पृशतामात्मना भुव इति ॥ २३ ॥

एवं पुरस्तात्क्षीरोदात्परित (१३) उपवेशितः शाकद्वीपो द्वात्रिंशल्लक्षयोजनायामः समानेन च दधिमण्डोदेन परितो यस्मिन् शाको नाम महीरुहः स्वक्षेत्रव्यपदेशको यस्य ह (१४) महासुरभिगन्धस्तं द्वीपमनुवासयति ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

हे जातवेदस्त्वं साक्षात्परस्य ब्रह्मणो हरेर्हव्यवाडसि अतो देवानां यज्ञेन पुरुषं हरिमेव यज। अङ्गानां नाम्ना दत्तमङ्गिने समर्पयेत्यर्थः ॥ १७ ॥

उपक्लृप्तो वेष्टितः। यथा कुशद्वीपो घृतोदेन वृतः ॥ १८ ॥

गुहस्य कार्तिकेयस्य प्रहरणेनायुधेनोन्मथिता नितम्बाः कुञ्जाश्च यस्य ॥ १९ ॥

स्वयं भगवान् ज्ञानी परमकल्याणं यशो यस्य ॥ २० ॥ २१ ॥

आपोमयमम्भोमयम् ॥ २२ ॥

हे आपः! पुरुषवीर्या ईश्वराल्लब्धसामर्थ्याः स्थ भवथ अतएव भूर्भुवः स्वस्त्रैलोक्यं पुनन्त्यस्ता भवत्यो नोऽस्माकं स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनन्तु। यत आत्मना स्वरूपेणामीवघ्नीः पापहन्त्र्यः ॥ २३ ॥

दध्नो मण्डं रसः सः पयोदकं यस्य। यस्य पर्णान्यन्तः खरस्पर्शानि बहिर्मृदुस्पर्शानि स शाको नाम वृक्षः ॥ २४—२७ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

हे जातवेदः! त्वं साक्षात्परस्य ब्रह्मणोऽसि तदीयोऽसि तच्छरीरभूतोऽसीत्यर्थः तथा हव्यवाडसि हव्यमिन्द्रादीनां भगवदात्मकानां यज्ञियं हव्यं वहति प्रापयति इन्द्राद्यन्तर्यामिणं भगवन्तं प्रतीति तथा तथाभूतोऽसीत्यर्थः अतो देवानां पुरुषस्य परमपुरुषस्याङ्गानां शरीरभूतानाम् "स आत्मा अङ्गान्यन्या देवताः„ इति श्रुतेरात्मशब्दप्रतिसम्बन्धि अङ्गं शरीरमेव भूतानामिन्द्रादीनां सम्बन्धिना भगवदात्मकेन्द्राद्याराधनभूतेन यज्ञेन तदन्तरात्मानं परमपुरुषं यज्ञमाराधय तत्प्रीतिं जनय अङ्गेभ्यः समर्पितं हविरङ्गिने समर्पयेत्यर्थः ॥ १७ ॥

(१) तथा बहिः क्रौञ्च द्वीपः कुशद्वीपाद्द्विगुणस्वमानेन (२) सप्तद्वीपवर्षाणि सप्तधा विभज्य (३) स्वयंभगवतः परमकल्याणस्य (४) मजयो (५) ऋजिष्ठो (६) उपबर्हण उपभोजनो (७) रूपवती पवित्राशुक्लेति (८) पवित्रमुपयुञ्जानाः गुरुऋषभ (९) अम्मयं (१०) वीर्याश्च (११) पुनीयुरघघ्नीः (१२) संस्पृशतात्मना भवः (१३) परितउपक्लृप्तः (१४) महान्सुरभिगन्धः इति श्रीविजयध्वजतीर्थपाठः।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतद्द्वीपवदन्तेन क्रौञ्चद्वीपमनुवर्णयति । तथेति । यथा कुशद्वीपः घृतोदेन स्वसमविशालेन वेष्टितस्तथा कुशद्वीपाद्बहिः क्रौञ्चद्वीपोऽपि द्विगुणः कुशद्वीपाद्द्विगुणः षोडशलक्षयोजनविशालः स्वमानेन षोडशलक्षयोजनविशालेन दधिमण्डोदेन मथितदधिसमानोदकेन समुद्रेणाभित उपक्लृप्तः परिवृतः यस्मिन् क्रौञ्चे द्वीपे द्वीपस्य नाम क्रौञ्च इति संज्ञा तन्निर्वर्तकः क्रौञ्चो नाम पर्वतश्रेष्ठः आस्ते ॥ १८ ॥

क्रौञ्चपर्वतं विशिनष्टि । य इति । योऽसौ क्रौञ्चो गिरिः पूर्वं गुहस्य कार्त्तिकेयस्य प्रहरणेनायुधेन उन्मथिता नितम्बाः कुञ्जानि च यस्य तथाभूतः पश्चाद्दधिमण्डोदेनाभिषिच्यमानः दधिमण्डोदे लीनः पश्चाद्भगवता वरुणेनाभिगुप्तः अभयप्रदानेनाभिरक्षितः निरस्तभयो बभूव ॥ १९ ॥

तस्मिन्नपि क्रौञ्चद्वीपेऽपि प्रियव्रतात्मजो घृतपृष्ठो नामाधिपतिः सप्तधा वर्षाणि विभज्य तेषु पुत्रतुल्यनामसु सप्तसु वर्षेषु रिक्थादान् दायादान् सप्त पुत्रान् वर्षाणामधिपतीन्निवेश्य प्रतिष्ठाप्य स्वयं परमकल्याणं निरतिशयमङ्गलरूपं यशो यस्य तस्यात्मभूतस्य स्वान्तरात्मनो भगवतः हरेर्भक्तहारिणश्चरणारविन्दं जगाम भक्त्या प्राप्तः ॥ २० ॥

घृतपृष्ठसुतानाह । आमोद इत्यादि । तेषामामोदादीनां यानि वर्षाणि आमोदादीनि तेषां गिरयो मर्यादा गिरयः सप्त तथा नद्यः सप्तैवाभिख्याताः अन्ये च ते ताश्च सन्तीति भावः गिरीनाह । शुक्ल इत्यादि । नदीराह । अभयेत्यादिना ॥ २१ ॥

ता विशिनष्टि तद्वर्षस्थानां चतुर्धा वर्णविभागं भजनीयं भगवद्रूपं मन्त्रं चाह । यासामिति । यासामभयादीनां निर्मल पवित्रमम्भ उपयुञ्जानाः स्नानाद्युपयुक्तं कुर्वाणा गुर्वादिचतुर्वर्णनामानः पुरुषाः आपोमयमब्दैवतकं देवं भगवन्तं पूर्णेनापामञ्जलिना जलाञ्जलिना आराधयन्त्यर्घ्यादिप्रदानेनेति भावः ॥ २२ ॥

हे आपः ! यूयं पुरुषस्य भगवतो वीर्याः शक्तिरूपाः तदपृथक्सिद्धविशेषणभूताः तच्छरीरभूता इति यावत् स्थ भवथ तथा भूर्भुवः स्वः इति भूरादिलोकत्रयं पुनन्त्यः पवित्रयन्त्यः स्थेत्यनुषङ्गः यत एवमतः स्पृशताममीवघ्नीः पापहराः आत्मनो भुवः परमात्मन उत्पन्नाः ताः युष्मान् स्पृशत इति शेषः नोऽस्मान् पुनन्तु भगवत्य इत्यर्थः आत्मना भुवामितिपाठे आत्मना देहेन स्पृशताममीवघ्नीर्युष्मान्स्पृशतां नोऽस्माकं भवं जन्म पुनन्त्वित्यर्थः ॥ २३ ॥

एतद्वृत्तान्तेन शाकद्वीपमनुवर्णयति । एवं यथा क्रौञ्चस्तथेत्यर्थः दधिमण्डोदात्परतः बहिः उपवेशितः विन्यस्तः शाकद्वीपः द्वात्रिंशल्लक्षयोजनविशालः समानेन द्वात्रिंशल्लक्षयोजनविशालेन क्षीरोदधिना परिवेष्टितः यस्मिन् शाकद्वीपे शाकाख्यो महीरुहः स्वकीयस्य क्षेत्रस्य व्यपदेशकः नामनिर्वर्तकः आस्त इति शेषः तं विशिनष्टि यस्येति । यस्य शाकस्य वृक्षस्य महासुरभिर्गन्धः निरतिशयसुगन्धः । कृत्स्नं शाकद्वीपमनुवासयति सुरभीकरोति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे जातवेदः ! सर्वज्ञ ! त्वं साक्षात्परस्य ब्रह्मणः श्रीनारायणास्यार्थे हव्यवाडसि हव्यवहनलक्षणहविषो नेतासि तथा पुरुषशब्दवाच्यस्य हरेरङ्गभूतानां देवानाञ्च हव्यवाडसि स त्वमस्मत्सन्निहितो भूत्वा यज्ञलक्षणेन कर्मणा पुरुषं यज्ञनामानं श्रीहरिं यज याजयास्माभिरिति शेषः ॥ १७ ॥

क्षीरोदेन मण्डोदेन ।
मण्डोदं पूरणार्थे च त्यक्त्वार्थे क्षीरसागरं ।
राहुसागरवर्णाश्च मण्डलाद्विगुणोक्तिताम् ॥
विनेय सर्वमुश्रयं योजनाभिदेताश्च तु ॥

इति वचनाद्धयसामा क्षालनम: ॥ १८ ॥

गुहस्य षण्मुखस्य प्रहरणेन शक्त्याख्येनोन्मथिताः पीडिता नितम्बाश्च कुञ्जलतादिपरिहितोदरा अत्युन्नता गिरिनिवेशा मिथुनानां क्रिडागेहाश्च यस्य स तथा क्षीरोदेन मण्डोदेनाभिषिच्यमानः ॥ १९ ॥

रिक्थादान् दायादान् पुत्रानित्यर्थः ॥ २० ॥ २१ ॥

अम्मयं जलाधिदैवतं देवं क्रीडादिगुणसम्पन्नम ॥ २२ ॥

या आपः पुरुषवीर्याः श्रीनारायणस्य रेतोभूताः "आपो नारा इति प्रोक्ता आपो वै नरसूनव." इति स्मृतेः भूर्भुवः स्वः एवं त्रैलोक्यमपि पुनन्तीः पुनन्त्यः ताश्चामीवघ्नीः पापहराः अतं सर्वार्थ शुद्धिलक्षणसुखार्थमात्मना देहेन चान्तरेण च स्पृशतेन ता आपः पुनीयुः पुनन्त्वित्यन्वयः ॥ २३ ॥

दधिमण्डोदेन "मनाक्स्तन्न दधि क्षीरं क्षीरं सान्द्रं तथा दधि" इत्यभिधानात् क्षीरोदार्थे दधिमण्डोदशब्दः ॥ २४—२७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्मिन्नपीति । स्वगमुपतगामित्यन्वयः । स्वयं भगवत इति वा भगवान् उत्पत्तिं प्रलयञ्चेत्यादिलक्षणज्ञानवान् ॥ २०—२३ ॥

तं द्वीपमनुवासयति । तद्द्वीपस्थस्वावासस्वगन्धविशेषमित्यर्थः । सर्वानुवासनेत्यत्रापि तत स्यात ॥ २४—२७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हे जातवेदस्त्वं साक्षात् परस्य ब्रह्मणो हरेर्हव्यवाडसि । अतो देवानां यज्ञेन पुरुषं हरिमेव यज । अङ्गानां तास्ता दक्षतांके समर्पयेत्यर्थः ॥ १७ ॥

उपक्लृप्तः वेष्टितः वृत इति परत्रान्वितम ॥ १८ ॥

गुहः कार्त्तिकेयः विभयः विगतभयः ॥ १९ ॥

भगवान् उत्पत्त्यादिज्ञानवान् ॥ २० ॥ २१ ॥

आपोमयम् अम्मयम् ॥ २२ ॥

हे आपः ! पुरुषवीर्या ईश्वरात्तुल्यसामर्थ्या भवथ । अत एव भूर्भुवः सुवः त्रैलोक्यं पुनन्त्यस्ता यूयं नोऽस्माकं स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनीत यत आत्मना स्वरूपेणैव अमीवघ्नीः पापहन्त्र्यः ॥ २३ ॥

दध्नो मण्डं रस एव उदकं यस्य ॥ २४ ॥ २७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे जातवेदः ! देवानां परस्य आत्मनः "स आत्मा अङ्गान्यन्या देवताः,, इति श्रुतेः साक्षाद्ब्रह्मणः हव्यवाडसि देवानामङ्गभूतानां

तस्यापि प्रैयव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥ २५ ॥

एतेषां वर्षमर्यादागिरयो नद्यश्च सप्त सप्तैव ईशान उरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति अनघाऽऽयुर्दा उभयस्पृष्टिरपराजिता पञ्चपदी सहस्रस्रुतिर्निजधृतिरिति ॥ २६ ॥

तद्वर्षपुरुषा ऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो भगवन्तं वाय्वात्मकं प्राणायामविधूतरजस्तमसः परमसमाधिना यजन्ते ॥ २७ ॥

अन्तः प्रविश्य भूतानि यो बिभर्त्यात्मकेतुभिः ।
अन्तर्यामीश्वरः साक्षात्पातु नो यद्वशे स्फुटम् ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नाम्ना दत्तं गृहीतं हव्यं तस्मै वहसि अतो यज्ञेन पुरुषं सर्वदेवाङ्गिन यज तन्नाम्ना दत्तं तस्मै समर्पयेत्यर्थः ॥ १७ ॥

उपक्लृप्तो वेष्टितः ॥ १८ ॥

गुहप्रहरणेन कार्त्तिकेयायुधेनोन्मथिता भग्नाः नितम्बाः कुञ्जानि च यस्य सः ॥ १९ ॥

भगवान् ।

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ।
इति स्मृत्युक्तविश्वोत्पत्त्यादिज्ञानवान् स्वयं भगवतः ।
ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चापि षण्णां भग इतीङ्गना ।

इतिस्मृत्युक्तषड्गुणाश्रयस्य हरेर्महापुरुषस्य चरणारविन्दमुपजगाम प्राप्तवान्मुक्तोऽभूदित्यर्थः ॥ २०—२१ ॥

आपोमयमप्मयम् । अपां पूर्णेनाञ्जलिना देवं भगवन्तं यजन्ते "जलं ब्रह्मोपासीत" इतिश्रुतेः ॥ २२ ॥

हे आपः ! पुरुषवीर्याः परमपुरुषशक्तिरूपाः स्थ भवथ अत एव भूर्भुवः स्वः लोकत्रयं पुनन्तीः पुनन्त्यः ताः भवत्यो नोऽस्माकं स्पृशतां स्पर्शनं कुर्वतां भुवः शरीराणि पुनीत पुनन्तु यतः आत्मना स्वाभयेण पुरुषेण हेतुभूतेन अमीवघ्नीः पापहन्त्यः ॥ २३ ॥

दधिमण्डोदेन दध्नो मण्डं रसः पयोदमुदकं यस्य तेन २४।२७

भाषाटीका ।

मंत्र हे अग्निदेव ! आप साक्षात् परब्रह्म विष्णुके हवि ग्रहण करने वाले मुख रूप हो तिससे परमात्मा के अङ्गभूत जो देवता तिनके यज्ञ में परमात्मा का यजन करो ॥ १७ ॥

तिसी प्रकार से घृत समुद्र के बाहिर अपने से दुगुणे दुग्ध समुद्र से घिराहुआ क्रौञ्चद्वीप कल्पना किया है जैसे कि कुशद्वीप घृत समुद्र से घिरा है जिसमें क्रौञ्च नामक पर्वतों का राजा है सो द्वीप के नामको जनाता हुआ है ॥१८॥

जिस पर्वत के कार्तिक स्वामी के शक्ति आयुध से सब तट और कुञ्जगी फूट टूट गये तौभी क्षीरसमुद्र के जलसे सिंचजाने से भगवान् वरुणजी रक्षा करने से अभय होकर रहाहै ॥ १९ ॥

तिस मेंभी प्रियव्रत का पुत्र घृतपृष्ठ नाम के मालिक हैं वे भी अपने द्वीप में पुत्रों के तुल्य नाम वाले सात द्वीपों को उनको विभाग से देकर सातों को धन के मालिक बना स्थापन करके आप सब समर्थ होने पर भी परम कल्याण यशवाले अपने आत्मा गुरु श्रीहरि भगवान् के चरण कमल को प्राप्त होगये ॥ २० ॥

आम मधुरुह मेघपृष्ठ सुधामा भ्राजिष्ठ लोहितार्ण वनस्पति ए घृतपृष्ठ के पुत्र हैं तिन के वर्ष मर्यादा पर्वत सात हैं सातही नदी भी हैं शुक्ल वर्धमान भोजन उपबर्हण नन्द नन्दन सर्वतोभद्र ए पर्वत हैं अभया अमृतौघा आर्यका तीर्थवती वृत्तिरूपवती पवित्रवती शुक्ला ये नदी हैं ॥ २१ ॥

जिन नदियों के निर्मल पवित्र जल को सेवन करते हुये पुरुष ऋषभ द्रविण देवक संज्ञावाले उस वर्ष के पुरुष आपोमयदेव को जलों की भरी अंजुली से यजन करते हैं ॥ २२ ॥

मंत्र हे जलदेव ! आप पुरुषके वीर्यरूपहो परमेश्वरसे सामर्थ्यको प्राप्त भये हो सब के पापों के नाश करनेवाले हो सो भूः भुवः स्वः तीनों लोकों को पवित्र करते हुये आप तुमारे स्पर्श करनेवाले हम लोगों के शरीरों को पवित्र करो ॥ २३ ॥

इसी प्रकार क्षीर समुद्र से परे चारों ओर से स्थापित शाकद्वीपभी बत्तीस लक्ष योजन चौडा है अपने बराबरहि मागड के समुद्रमें घिरा हुआ है जिसमें शाक नाम का पेड अपने द्वीप के नाम करने वाला है जिसका कि महासुगन्धि सुगन्ध उस द्वीप को सुगन्धित करता है ॥२४॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मकेतुभिः प्राणादिवृत्तिभिः ॥ २८ ॥

एवमेव दधिमण्डोदात् परतः पुष्करद्वीपस्ततो द्विगुणायामः समन्तत उपकल्पितः समानेन स्वादूदकेन समुद्रेण बहिरावृतो यस्मिन् बृहत् पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं[1] भगवतः कमलासनस्याध्यासनं परिकल्पितम् ॥ २९ ॥

तद्द्वीपमध्ये मानसोत्तरनामैक एवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुतयोजनोच्छ्रायायामो यत्र तु चतसृषु दिक्षु चत्वारि पुराणि लोकपालानामिन्द्रादीनां यदुपरिष्टात् सूर्यरथस्य मेरुं[2] परिभ्रमतः सम्वत्सरात्मकं[3] चक्रं देवानामहोरात्राभ्यां परिभ्रमति ॥ ३० ॥

तद्द्वीपस्याप्यधिपतिः प्रैयव्रतो वीतिहोत्रो नामैतस्यात्मजौ रमणक[4] धातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्भगवत्कर्मशील एवास्ते ॥ ३१ ॥

तद्वर्षपुरुषा भगवन्तं ब्रह्मरूपिणं[5] सकर्मकेन कर्मणाराधयन्तीदं चोदाहरन्ति ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ज्वलनशिखावदमलानां कनकपत्राणामयुतानामयुतानि यस्य तत् ॥ २९ ॥

देवानामहोरात्राभ्यामुत्तरदक्षिणायनाभ्यामित्यर्थः ३० ॥ ३१ ॥

ब्रह्मरूपिणं कमलासनमूर्तिं सकर्मकेन ब्रह्मसालोक्यादिसाधनेन ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्यापि शाकद्वीपस्याप्यधिपतिर्मेधातिथिर्नाम प्रियव्रतात्मज एव सोऽपि पुत्रतुल्यनामानि वर्षाणि विभज्य तेषु वर्षेष्वात्मजान् पुरोजवादिसंज्ञानभिधाय प्रतिष्ठाप्य स्वयमनन्तेऽपरिच्छिन्नानन्दस्वरूपे भगवत्यावेशिता निहिता मतिर्येन तादृशस्सन् पावनं तपसो योग्यं वनं प्रविवेश तपसा सिद्धोऽभूदित्यर्थः ॥ २५ ॥

अथ शाकद्वीपवर्षविभागं पुत्रनामपूर्वकं पर्वतान्नदीश्चाह । एतेषामिति । तेषु पुरोजवादिषु वर्षेषु सप्त सीमापर्वताः तथा नद्यश्च सप्तैवासन् पर्वतान्नदीश्चाह । ईशान उरुशृङ्ग इति । अनघेत्याभ्यां गद्याभ्याम तद्वर्षस्थाः पुरुषाः ऋतव्रतादिचतुर्वर्णात्मकाः वाय्वात्मकं वायुशरीरकं भगवन्तं परमसमाधिना निरतिशयध्यानयोगेन यजन्ते आराधयन्ति कथम्भूताः सन्तः प्राणायामैः समन्ताद्विधूतं निरस्तं रजस्तमश्च येषां तादृशाः सन्तः ॥ २६ ॥ २७ ॥

यो वायुशरीरकः परमात्मान्तः प्रविश्य मुख्यप्राणरूपेणान्तः प्रविष्टः सन्नात्मनः स्वस्य चिह्नभूताभिः पञ्चभिः प्राणापानादिभिर्वृत्तिभिः "यः प्राणेन प्राणिति योऽपानेनापानिति" इत्यादिश्रुतिः भूतानि बिभर्ति स साक्षादीश्वरोऽन्तः प्रविश्य नियन्ता नः अस्मान् पातु यस्य प्राणशरीरकस्य भगवतः वशे इदं जगद्वर्तते भगवतो वायुशरीरकत्वादन्तर्यामीश्वरसामानाधिकरण्यम् ॥ २८ ॥

अथ पुष्करद्वीपमनुवर्णयति । एवमिति । क्षीरोदधेः परस्तात्पुष्करद्वीपः ततः शाकद्वीपाद्द्विगुणायामः द्विगुणविशालः चतुःषष्टिलक्षयोजनविशालः समन्ततश्चतसृषु दिक्षु उपकल्पितः ईश्वरेणेति शेषः । यद्वा । प्रियव्रतरथचरणनेमिनेति शेषः स्वसमानविशालेन चतुःषष्टिलक्षयोजनविस्तीर्णेन शुद्धोदकेन शुद्धोदकसमुद्रेण बहिः समन्ततः पिहितः परिवृतः यस्मिन् पुष्करद्वीपे बृहद् विपुलं पुष्करं कमलं ज्वलनशिखावदमलानां प्रकाशमानानां कनकपत्राणामयुतानामयुतानि यस्य तद्भगवतः कमलासनस्य चतुर्मुखस्याध्यासनं परिकल्पितं तत्कर्णिकामध्यगतत्वेन तद्वर्षस्थाः पुरुषाः चतुर्मुखमुपासत इत्यर्थः ॥ २९ ॥

अस्मिन् द्वीपे मर्यादागिरिर्मानसोत्तरनामा एक एवेत्याह । तद्द्वीपमध्य इति । पुष्करद्वीपमध्ये एक एव मानसोत्तराख्योऽयुतयोजनानि उच्छ्राय औन्नत्यमायामो विस्तारश्च यस्य सः अर्वाचीनपराचीनयोरन्तर्बहिर्वर्तिनोर्वर्षयोर्मर्यादागिरिः यत्र मानसोत्तरे गिरौ चतसृषु दिक्षु इन्द्र प्रभृतीनां तेषामिन्द्राग्नियमवरुणकुबेराणां लोकपालानां पुराणि सन्ति यस्य मानसोत्तरगिरेः उपरि स्थितेन्द्रादिलोकपालपुराणामुपरि मेरुं परिक्रमतः परितो भ्रमतः सूर्यरथस्य यच्चक्रं सम्वत्सरात्मकं तद्देवानामहोरात्राभ्यामुत्तरायणदक्षिणायनाभ्यां स्वावयवाभ्यां चक्रवत् लौकिकरथचक्रवत्परिभ्रमति ॥ ३० ॥

तस्य पुष्करद्वीपस्यापि पतिर्वीतिहोत्राख्यः प्रियव्रतात्मज एव तस्य वीतिहोत्रस्यात्मजौ पुत्रौ रमणधातकाख्यौ रमणधातकयोर्वर्षयोः पतीकृत्येत्यर्थः अयं वीतिहोत्रः पूर्वजवन्मेधातिथिवद्भगवदाराधनरूपकर्मशील एवाकृत आसीदित्यर्थः ॥ ३१ ॥

तत्पुष्करद्वीपवर्षपुरुषाः ब्रह्मरूपिणं चतुर्मुखशरीरकं भगवन्तं कर्मणा कर्मयोगविशिष्टेन कर्मणा मनोव्यापाररूपेण भगवदुपासनयोगेन कर्मशब्दो हि मनोव्यापाररूपोपासनायोगेऽपि वर्तते प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ३।२।२५ इति सूत्रप्रयोगात् प्रकाशादिवत् ज्ञानानन्दादिस्वरूपमनुभूतामूर्तप्रपञ्चविशिष्टतया अपि ब्रह्मगुणत्वादवैशेष्यं प्रतीयते "तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च" इत्यादिब्रह्मस्वरूपमूर्तप्रकाशानन्दादिवच्च तेषां वामदेवादीनां संराधनात्मकं कर्मण्यभ्यासात्प्रलभ्यते तद्वाऽव्यक्तसंराधनानां तेषां मूर्तामूर्तादिना विशिष्टत्वमप्यविशेषेण प्रतीयते इति तदर्थः तथा च ।

(१) पत्रयुतं । (२) परिचङ्क्रमतः । (३) चक्रमहो० इति श्रीविजय० पाठः । (४) रमण इति श्रीधर० विजयध्वजपाठः ।
(५) रूपिणमकर्म० इति श्रीविजय० पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका

वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्।
शरीरजैः कर्मदोषैर्याति स्थावरतां नरः॥

इतिभगवता मनुनापि मानसैः कर्मदोषैरिति मनोव्यापारे कर्मशब्दः प्रयुक्तः अकर्मणा इतिपाठे अकर्मणो कर्मबन्धनिरासाय कर्मणा स्वस्ववर्णाश्रमोचितकर्मणेत्यर्थः॥ ३२॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

आत्मकेतुभिः आत्मस्वरूपैः प्राणादिभिर्वृत्तिभेदैर्वा॥ २८॥

दधिमण्डोदात् क्षीरोदात् ज्वलनशिखावदमलानां कनकपत्राणामयुतं यस्य तत्तथा अर्वाचीनपराचीनयोर्बाह्याभ्यन्तरप्रदेशस्थितयोर्यस्य मानसोत्तरपर्वतस्य

अहस्त्रिनाभिः सूर्यस्य एकचक्रस्य वै स्मृतम्।
अराः संवत्सराः पञ्च तेभ्यः षड् ऋतवः स्मृताः।

इति मत्स्यपुराणे चक्रस्य संवत्सरात्मकत्वमुक्तम् "त्रिणाभिचक्रमजरमनर्वं पञ्चारं चक्र" इत्यादि च॥ २९—३१॥

अकर्मकेण ध्यानलक्षणेन कर्मणा ध्यानस्य चित्तनिरोधलक्षणकर्मसाध्यत्वात् फलाभिसन्धिरहितेन वा॥ ३२॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

जम्बूद्वीपदक्षिणदिक्स्थितानामेवोद्देशावगमादन्तः प्रविश्यति स्फुटं व्यक्तं जगदिति यावत्॥ २८—३१॥

सकर्मकेणेति। क्रियते साध्यते इति कर्मफलं तेन सहवर्त्तमानेन ब्रह्मलोकयादिसाधनेनेत्यर्थः॥ ३२॥

———

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

आत्मकेतुभिः प्राणादिवृत्तिभिः॥ २८॥

ज्वलनस्य तेजसः शिखाभिरमलानि यानि कनकवर्णानि पत्राणि तेषामयुतायुतं यस्य॥ २९॥

तद्द्वीपमध्य इति। मानसोत्तरस्य मण्डलाकारत्वात्तत्पार्श्वद्वयवर्त्तिनी द्वे वर्षे अपि मण्डलाकारे एव ज्ञेये इत्याह। अर्वाचीनेति। देवानामहोरात्राभ्यामुत्तरदक्षिणायनाभ्यामित्यर्थः॥ ३०—३१॥

सकर्मकेण। यतः कर्मणः कर्माण्येवोद्भवन्ति न तु कर्मक्षयः तेन सकामेनेत्यर्थः॥ ३२॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

आत्मकेतुभिः प्राणापानादिवृत्तिभिः॥ २८॥

ज्वलनोऽग्निस्तच्छिखावदमलानां कनकपत्राणामयुतानामयुतानि यस्य तत्॥ २९॥

अहोरात्राभ्यामुत्तरदक्षिणायनलक्षणाभ्याम्॥ ३०। ३१॥

भगवन्तं वासुदेवम् ब्रह्मरूपिणं सकर्मकेण कर्मयोगसहितेन कर्मणा वन्दनस्तवनादिरूपेण आराधयन्ति साक्षाद्वासुदेवं न जानन्तीति भावः॥ ३२॥

———

भाषा टीका।

उस द्वीपका भी पति प्रियव्रत का पुत्र मेधातिथि नामका है सोभी अपने पुत्रों के नाम वाले सातवर्षों का विभाग कर के तिनमें पुरोजव मनोजव पवमान धूम्रानीक चित्ररेफ बहुरूप विश्वधार संज्ञक अपने पुत्रों को राजा करके आपने अनन्त भगवान् में मनको लगाकर तपोवनको चलागया॥२५॥

इनके वर्ष मर्यादा पर्वत नदी भी सातही स्थान हैं ईशान उरुशृङ्ग बलभद्र शतकेसर सहस्रस्रोत देवपाल महानस ए पर्वतों के नाम हैं अनघा आयुर्दा उभयस्पृष्टि अपराजिता पञ्चपदी सहस्रस्रुति निजधृति ये नदी हैं॥ २६॥

उस वर्षमें पुरुष ऋतव्रत सत्यव्रत दानव्रत अनुव्रत नाम वाले हैं सो प्राणायामों से रजोगुण तमोगुण को दूर करके वायु रूप भगवान् को समाधि से यजन करते हैं॥ २७॥

मंत्र जो सब भूतों के भीतर प्रविष्ट होकर अपनी प्राणादि वृत्तियों से सबको पालन करते हैं सबके अन्तर्यामी साक्षात् ईश्वर हैं जिनके वशमें सब जगत् है सो हमारी रक्षा करें॥२८॥

ऐसेही दहीमण्डके समुद्र से परे पुष्कर द्वीप है उससे द्विगुण विस्तार चारों ओर से कल्पित हैं अपने समान स्वादजल के समुद्र से वाहिर से घिराहै जिसमें बड़ा भारी कमल अग्निकी शिखा सरीके निर्मल सुवर्ण के अयुत पत्रों वाला है वह श्रीभगवान् ब्रह्माजी के आसन रूपसे कल्पित है॥२९॥

उस द्वीप के मध्यमें मानसोत्तर नाम का एकही पर्वत है पूर्व परके वर्षों का मर्यादा गिरि है दशहजार योजन लम्बा ऊंचा है जहां चारों दिशों में चारों इन्द्रादि लोकपालों के पुर बने हैं जिस के ऊपर मेरुके चारों ओर घूमने वाले सूर्य के रथका सम्वत्सररूप चक्र देवतों के अहोरात्र में घूमताहै॥३०॥

इस द्वीप का भी पति प्रियव्रतका पुत्रवीतिहोत्र नामक है उसके रमणक धातकि नामक दो पुत्र हैं उन दोनों को वह वर्ष पति बनाकर आप पूर्वज सरीका भगवान् के सेवा मे तत्पर होकर रहा है॥ ३१॥

उस वर्ष के पुरुषभी ब्रह्मरूपी भगवान् को अनेक जन्मार्जित कर्मवाले कर्म से आराधन करते हैं और इस मन्त्रको पढ़ते हैं॥ ३२॥

———

यत्तत् कर्ममयं लिङ्गं ब्रह्मलिङ्गं [1] जनोऽर्चयेत् ।
[2] एकान्तमद्वयं शान्तं तस्मै भगवते नम इति ॥ ३३ ॥

ऋषिरुवाच ।

ततः परस्ताल्लोकालोकनामाचलो लोकालोकयोरन्तराले परित उपक्षिप्तः [3] ॥ ३४ ॥

यावन्मानसोत्तरमेर्वोरन्तरं तावती भूमिः काञ्चन्यन्यादर्शतलोपमा यस्यां प्रहितः पदार्थो न कथञ्चित् पुनः प्रत्युपलभ्यते तस्मात् सर्वसत्त्वपरिहृतासीत् ॥ ३५ ॥

लोकालोक इति समाख्या यदनेनाचलेन [4] लोकालोकस्यान्तर्वर्तिनावस्थाप्यते ॥ ३६ ॥

स लोकत्रयान्ते परित ईश्वरेण विहितो यस्मात् सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां गभस्तयोऽर्वाचीनांस्त्रीँल्लोकानावितन्वाना न कदाचित् पराचीना भवितुमुत्सहन्ते तावदुन्नहनायामः ॥ ३७ ॥

एतावाँल्लोकविन्यासो मानलक्षणसंस्थाभिर्विचिन्तितः कविभिः स तु पञ्चाशत्कोटिभिः [5] गणितस्य भूगोलस्य तुरीयभागो [6] ऽयं लोकालोकाचलः ॥ ३८ ॥

तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाऽधिनिवेशिता ये द्विरदपतय ऋषभः पुष्करचूडो वामनोऽपराजित इति सकललोकस्थितिहेतवः ॥ ३९ ॥

तेषां स्वविभूतीनां [7] लोकपालानां च विविधवीर्योपबृंहणाय भगवान् [8] परममहापुरुषो महाविभूतिपतिरन्तर्याम्यात्मनो विशुद्धसत्त्वं धर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणं विष्वक्सेनादिभिः स्वपार्षदप्रवरैः परिवारितो निजवरायुधोपशोभितैर्निजभुजदण्डैः संधारयमाणस्तस्मिन्गिरिवरे समन्तात् सकललोकस्वस्तय आस्ते ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कर्ममयं कर्मफलरूपम् । ब्रह्म लिङ्ग्यते यस्मात् । एकस्मिन्नेव परमेश्वरेऽन्तो निष्ठा यस्य तदत एव वस्तुतोऽद्वैतम् ॥ ३३ ॥

ततः शुद्धोदात्परस्तात् । लोकः सूर्याद्यालोकवान् देशः अलोकस्तद्रहितस्तयोरन्तराले मध्ये । तयोर्विभागार्थमित्यर्थः ॥ ३४ ॥

ततः परस्तादित्युक्तं तदेव कियतान्तरेणेत्यपेक्षायां तदन्तर्वर्तिनीं भूमिमाह । यावन्मानसोत्तरमेर्वोरन्तरं सार्धसप्तलक्षोत्तरसार्धकोटिपरिमितं तावती भूः शुद्धोदात्परास्ति तत्र च प्राणिनोऽपि सन्ति ततः काञ्चनी भूमिरन्यास्तीत्यर्थः । सा चैकोनचत्वारिंशल्लक्षोत्तरकोट्यष्टकपरिमिता ज्ञेया एवं हि सति मेरुलोकालोकयोरन्तरं सार्धद्वादशकोटिपरिमितं वक्ष्यमाणमुपपन्नं भवति एतदेव शैवतन्त्रेऽप्युक्तम् ।

कोटिद्वयं त्रिपञ्चाशल्लक्षाणि च ततः परम् ।
पञ्चाशच्च सहस्राणि सप्तद्वीपाःससागराः ॥
ततो हेममयी भूमिर्दशकोट्यो वरानने ! ।
देवानां क्रीडनार्थाय लोकालोकस्ततः परम् ॥

इति अत्र च दशकोटित्वं पूर्वोक्तभूम्या सह द्रष्टव्यम् । सर्वसत्त्वपरिहृतेति देवव्यतिरिक्तेति विज्ञेयं देवानां क्रीडनार्थायेत्युक्तत्वात् ॥ ३५ ॥ ३६ ॥

लोकत्रयस्यान्ते परितो मर्यादारूपो विहितः । यस्मात्प्रतिबन्धकात् । सूर्यमारभ्य येषां ध्रुवोऽपवर्गोऽन्तो येषाम् । आवितन्वानाः समन्तात्प्रकाशयन्तः परतो गन्तुं न शक्नुवन्ति तावदुन्नहनमुत्सेधस्तदनुरूप आयामश्च विस्तारो यस्य । ध्रुवादर्वाक्कृतत्रिलोकीमर्यादाभूत इत्यर्थः ॥ ३७ ॥

सोऽयन्तु लोकालोकाचलस्तुरीयभागश्चतुर्थोंऽशः सार्धद्वादशकोट्यः मेरोरित इति द्रष्टव्यम् ॥ ३८ ॥

आशासु दिक्षु येऽधिनिवेशितास्ते आसते ॥ ३९ ॥

तेषां दिग्गजानां स्वविभूतीनां स्वांशभूतानां महेन्द्रादीनाञ्च विविधवीर्योपबृंहणाय सकललोकस्वस्तये च भगवांस्तस्मिन्नास्त इत्यन्वयः । किं कुर्वन् । आत्मनः स्वस्य यद्विशुद्धं सत्त्वं तत्संधारयमाणः आविष्कुर्वन् । कीदृशं धर्मज्ञानाद्यष्टमहासिद्धयश्चोपलक्षणं यस्य तत् । कीदृगेवंरूपलक्षितः सन्महाविभूतेः परमैश्वर्यस्य पतिः आदिकर्ता मूर्त्या समन्तादास्ते ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वेदेन वर्णाश्रमवेदनोपलक्षितो जनः यद्ब्रह्मणः परस्य लिङ्गं शरीरभूतम् । यद्वा । ब्रह्म वेदस्तेन लिङ्गं ज्ञापकं यस्य तद्ब्रह्मलिङ्गं वेदावबोध्यं कर्ममयं जगत्सृष्ट्यात्मककर्मप्रचुरमादि-

(१) जनोऽर्चति (२) वेदनैकान्तमद्वैतं (३) उपक्लृप्तः (४) लोकालोकावन्तर्वर्तिना (५) गुणितस्य (६) यावान् (७) महेन्द्रादीनां (८) परमपुरुष इति श्रीविजयध्वज श्रीवीरराघव पाठः ।

न्तु त्रयाणां ब्रह्मणः परमात्मनो लिङ्गं शरीरमवधेदाराधयेत् कथमद्वैतमिति क्रियाविशेषणं देवमनुष्यादिकार्यवर्गं प्रति ब्रह्मणः समष्टिरूपत्वात्कार्यकारणयोरभेदाध्यवसायादद्वैतं यथा भवति तथार्चयेदित्यर्थः यद्वातुर्मुखरूपं केवलवद्वावबोध्यं व्यष्टिसृष्ट्यात्मककर्मप्रचुरं ब्रह्मणः परस्य शरीरभूतमद्वैतं यथा तथार्चयेदिति यावत् तर्पकान्तमित्यपि क्रियाविशेषणमेकान्तमव्यभिचारितं यथा तथार्चयेदिति तस्मै भगवते हिरण्यगर्भाय ते नमः ॥ ३३ ॥

एवं शुद्धोदधिपर्यन्तं सप्तद्वीपात्मकं भूमण्डलमनुवर्ण्याथ ततः परमनुवर्णयति । तत इति । ततः शुद्धोदात्परस्ताद्बहिर्लोकालोकाख्यः पर्वत आस्ते इति शेषः तस्य लोकालोक इति नाम्नि प्रवृत्तिनिमित्तमाह । यतो लोकालोकयोरन्तराले मध्ये उपकल्पितः ॥ ३४ ॥

ननु ततः परस्तादित्युक्तं तदेव कियतान्तरेणेत्यपेक्षायां तदन्तर्वर्तिनीं भूमिमाह । मानसोत्तरमेर्वोरन्तराले मध्ये यावती भूमिरास्ते मेरोर्मध्यादारभ्य मानसोत्तरपर्यन्तं सार्धसप्तलक्षोत्तरसार्धकोटियोजनपरिमिता भूमिरास्ते तावती भूमिः शुद्धोदात्परतोऽस्तीत्यर्थः ततोऽन्यामेकोनचत्वारिंशल्लक्षोत्तराष्टकोटियोजनमितां भूमिमाह । काञ्चनीति । काञ्चनी स्वर्णमयी आदर्शतलोपमा दर्पणोदरतुल्या निर्जना भूमिर्लोकालोकशुद्धोदयोरन्तराले वर्तते इत्यर्थः ततस्तां विशिनष्टि । यस्यां लोकालोकान्तरालवर्तिन्यां सार्धसप्तलक्षोत्तरसार्धकोटियोजनात्मिकायां शुद्धोदाद्बाह्यायां भूमेः परस्ताद्वियमानायामेकोनचत्वारिंशल्लक्षोत्तराष्टकोटिपरिमितायां भूम्यां निहितः कश्चित्पदार्थः पुनर्नोपलभ्यते दर्पणोदरतुल्यत्वात्तस्या इति भावः । न हि दर्पणोदरे निहितमापादिस्मिन्प्रतीति लोकालोकाद्बाह्यमाह । तस्मादिति । तस्माल्लोकालोकपर्वताद्बहिः सर्वैः सत्त्वैर्जन्तुभिः परिहृता रहिता आसीद्भूमिरित्यनुषङ्गः अलोका भूमिरास्त इत्यर्थः इदमेव हि पर्वतस्य लोकालोकसमाख्यायां निमित्तमित्याह । लोकेत्यादिना । स्वपर्यन्ताया अन्तर्भूम्या लोकशब्दवाच्यत्वात्स्वस्माद्बाह्याया अलोकशब्दवाच्यत्वाच्चोभयोरन्तराल वर्तिनानेन पर्वतेन स्वनिष्ठान्तरालवर्तित्वेन धर्मेण हेतुना स्वस्मिँल्लोकालोक इति समाख्या व्यवस्थाप्यते व्यवहृतसमाख्योऽयं पर्वतो भवतीत्यर्थः पर्वतं विशिनष्टि । स इति । लोकालोकः भूरादिलोकत्रयमन्तरमन्तर्गतं यस्य तस्मिन्विषये ईश्वरेण परिवृताकारेण निहित इत्यर्थः गर्भस्थलोकत्रयत्वेन लोकालोकयोर्मर्यादात्वेन ईश्वरेणायमचलो निहित इत्यर्थः एतदेव प्रपञ्चयति । यस्मादिति । सूर्यप्रभृतीनां ध्रुवपर्यन्तानां ज्योतिर्गणानां गभस्तयो मरीचयः त्रिलोकान् भूरादीनर्वाचीनानधःस्थान् वितन्वानाः समन्तात्प्रकाशयन्तो यस्माल्लोकालोकपर्वतरूपात्प्रतिबन्धात्कदाचिदपि पराचीनाः परितो व्याप्ताः पर्वताद्बहिः प्रकाशमाना भवितुं नोत्सहन्ते न शक्नुवन्ति तावदुन्नहनमौन्नत्यं तदनुरूप आयामो विस्तारश्च यस्य सः ध्रुवादप्युन्नतत्वादुद्भेरुर्गलतोऽर्कीत्वाच्च लोकालोकयोर्मर्यादारूपः इत्यर्थः पर्वताद्बहिः सूर्यादिप्रकाशाद्बाह्यो लोक आलोकस्तद्वान् लोकः आलोकरहितोऽलोक इति च लोकालोकशब्दयोः प्रवृत्तिनिमित्तमुक्तं भवति ॥ ३५ ॥ ३६ ॥ ३७ ॥

तावदुन्नहनायाम इत्युक्तमौन्नत्यं कियद्योजनपरिमितमित्यपेक्षायां तदुक्तुं तस्य कृत्स्नभूमण्डलपरिमितेः कथनापेक्षत्वात्तत्परिमाणमाह । एतावानेवेति । लोकस्य कृत्स्नभूमण्डलस्य विन्यासः संस्थानमानादिभिरेतावानिति पञ्चाशत्कोटियोजनपरिमित इति कविभिः भूमण्डलयाथात्म्यविद्भिः चिन्तितः सम्यग्ज्ञातः पर्वतस्यौन्नत्यपरिमितिमाह । स त्विति । पञ्चाशत्कोटियोजनविस्तृतस्य भूगोलस्य यस्तुरीयो भागः सार्धद्वादशकोटियोजनात्मकः तत्परिमितौन्नत्यवान् तदनुगुणायामश्चेत्यर्थः ॥ ३८ ॥

तस्य लोकालोकस्य गिरेरुपरिष्टाच्चतसृष्वाशासु पूर्वादिषु दिक्षु अखिलजगद्गुरुणा आत्मयोनिना ब्रह्मणा ऋषभादिसंज्ञाश्चत्वारो द्विरदपतयः गजश्रेष्ठा ये निवेशितास्ते सकललोकानां स्थितिहेतवः क्षेमहेतवः आसते ॥ ३९ ॥

तेषां द्विरदपतीनां स्वांशभूतानामिन्द्रादिलोकपालानाञ्च नानाविधसामर्थ्याभिवृद्धये सकललोकस्वस्तये भगवान् तस्मिन्पर्वते आस्ते इत्यन्वयः कथम्भूतः परमः सर्वोत्कृष्टः निरतिशयकल्याणगुणाश्रयः पुरुषः विभूतिद्वयाधिपतिः सर्वान्तरात्मा आत्मनः स्वस्य यद्विशुद्धं सत्त्वं तद्धारयमाणः शुद्धसत्त्वमयाकर्मवश्यं दिव्यमङ्गलविग्रहं बिभ्राण इत्यर्थः कथम्भूतं शुद्धसत्त्वं धर्मादयः उपलक्षणानि दर्शनसाधनानि यस्य तद्धर्माद्युपलक्षणं तत्र धर्मो वर्णाश्रमोचितकर्मयोगः ज्ञानं प्रकृतिविविक्तात्मज्ञानयोगः वैराग्यमन्तर्बाह्येन्द्रियनियमः ऐश्वर्यादयः अष्टौ सिद्धयः अणिमादयो योगसिद्धयः एभिरुपलक्ष्यते कर्मयोगज्ञानयोगानुगृहीतेनाणिमाद्यष्टैश्वर्यसिद्धिपर्यन्तेनोपासनेनोपलक्ष्यमित्यर्थः स्वपार्षदश्रेष्ठैर्विष्वक्सेनप्रभृतिभिः परिवृतः स्वकीयैः श्रेष्ठैश्चक्रादिभिरायुधैरुपशोभिताः दोष्णः भुजा दण्डाकारास्तैरुपलक्षितः तस्मिल्लोकालोके गिरिवरे सर्वत्र सकलजगतां स्वस्तय आस्ते इत्यर्थः कियन्तं कालमास्त इत्यत्राह । आकल्पमिति । एष भगवानात्ममायया विरचितो विविधो यो लोकः तस्य यात्रा जीवनं तस्या गोपीथाय रक्षणाय चाकल्पमेवंभूतं वेषं लीलया प्राप्य आस्त इत्यर्थः एवं जम्बूद्वीपादीनां परिमाणकथनेन शुद्धोदधिपर्यन्तभूमण्डलस्य मेरोर्मूलस्य मध्यादारभ्याभितः शुद्धोदधिपर्यन्तमृजुगमने पञ्चशतसहस्राधिकत्रिपञ्चाशल्लक्षोत्तरकोटिद्वययोजनात्मकं परिमाणमुक्तं भवति तथा चोक्तमन्यत्रापि

कोटिद्वयं त्रिपञ्चाशल्लक्षाणि च ततः परम् ।
पञ्चाशच्च सहस्राणि सप्तद्वीपाः ससागराः ॥
ततो हेममयी भूमिर्दशकोट्यो वरानने ! ।
देवानां क्रीडनार्थाय लोकालोकस्ततः परम् ।

इति एवं शुद्धोदधेर्बाह्यायाः काञ्चनीभूमेर्गर्भभूतायाः परिमाणमपि यावन्मानसोत्तरमेर्वोरन्तरा तावती भूमिरित्यनेन सार्धसप्तलक्षोत्तरसार्धकोटियोजनात्मकमुक्तं यद्यप्यादर्शभूमेर्विशिष्य परिमाणं नोक्तं तथापि कृत्स्नभूमण्डलस्य पञ्चाशत्कोटियोजनपरिमितत्वोक्तेस्तत्र सप्तद्वीपससागरात्मकस्य परिमाणोक्तेरलोकस्य लोकसमानपरिमाणस्य वक्ष्यमाणत्वाच्च “ततो हेममयी भूमिर्दशकोट्यः„ इति वचनान्तरानुरोधाच्च परिशेषादेकोनचत्वारिंशल्लक्षोत्तराष्टकोटियोजनात्मकं परिमाणं वेदितव्यं हेमभूमेर्दशकोटियोजनपरिमितत्वकथनं पूर्वोक्तसार्धसप्तलक्षोत्तरसार्धकोटियोजनसङ्ख्यया पूर्वोक्तभूम्या सह किञ्चिदूनमस्तीत्यभिप्रायेणेति द्रष्टव्यम् ॥ ४० ॥ ४१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हे भगवन्! यत्तव लिङ्गं सर्वलक्षणसंपन्नं स्वरूपं कर्मणा यज्ञलक्षणेन मीयते ज्ञायत इति कर्ममयं वेदप्रतिपाद्येषु प्रधानं वा ब्रह्मा चतुर्मुखो लिङ्गं प्रतिमा यस्य तत्तथा जनोऽर्चति कथं भेदेन विरिञ्चात्सर्वजगतश्च वैलक्षण्येन एकान्तं नियमेन अद्वैतं स्वगतभेदवर्जितं "यस्तस्मै भगवते तुभ्यं नम इति मन्त्रार्थः विरिञ्चस्य यत्तल्लिङ्गं शरीरं पुण्यकर्मनिर्मितं ब्रह्मणो हरेर्लिङ्गं विशेषसन्निधानयोग्यमेकान्तमवसाने प्रलये केवलं निर्व्यापारम् "एके मुख्यान्यकेवला" इत्यभिधानमद्वैतं मुक्तौ संसारे च श्रीनारायणमत्यभेदेन प्रवर्तमानं "गच्छामि विष्णुपादाभ्याम्"इत्याद्यनुसन्धानवचनात् मुख्याद्वैतं किं न स्यादत्राह । भेदेनेति । विरिञ्चपरमात्मनोर्भेदेन जनः पूजयति तस्मै भगवते पूज्याय विरिञ्चाय नम इति वा ॥ ३३ ॥

ततः परस्ताद्बहिः ॥ ३४ ॥

मानसोत्तरमेर्वोः पर्वतयोरन्तरमन्तरालं स्थलं यावद्योजनं षोडशलक्षाधिकदशकोटिप्रमितमस्ति तावती भूमिः काञ्चनी ततो हिरण्मयी भूमिरित्यन्यत्र प्रसिद्धिः ।

> ततो हेममयी भूमिर्दशकोट्यां वरानने ! ।
> देवानां क्रीडनार्थाय लोकालोकस्ततः परः ।

इति एतावानितरमिति कश्चिदादर्शतलोपमा दर्पणतलसदृशी देवतदनुगव्यतिरिक्तसर्वसत्त्वपरिहृता द्विगुणा काञ्चनी भूमिः सर्वसत्त्वविवर्जितत्यत्र पूर्वभूमेः सकाशात्काञ्चन्या भूमेर्द्विगुणासुखहेतुत्वं देवान् प्रत्युच्यते न पुनः सङ्ख्याया द्विगुणत्वं ग्रन्थान्तरविरोधात् ॥ ३५ ॥

लोकालोक इति समाख्या सम्यगाख्या अन्वर्थसंज्ञा तत्कथमिति तदाह । यदिति । अनेनाचलेन लोकश्चालोकश्च व्यावर्त्येते विविच्य ज्ञाप्येते अन्तर्वर्तिना लोकालोकयोर्मध्यवर्तिनेति यद्यस्मात्तस्मादिति शेषः असौ लोकालोकाचल इति ॥ ३६ ॥

स लोकालोकाचलो लोकत्रयान्ते लोकत्रयमुत्पत्त्यनन्तरं मर्यादासिद्ध्यर्थं परितः उपक्लृप्तः केन परमेश्वरेण अथवा लोकत्रयान्ते लोकत्रयावसाने । किञ्च लोकत्रयं योजनत एकपञ्चाशल्लक्षतया यावदुक्तं तावानयं लोकविस्तृतत्वे सार्धपञ्चाशल्लक्ष इति शेषः तावदुत्सेधायाम इति वचनञ्च आयामे कथञ्चिदेव नावाप्नोति ज्ञातव्यं स पञ्चाशत्सहस्रश्चेति वचनात् ध्रुवोऽपवर्गे अन्ते येषां ते ध्रुवापवर्गाः तेषां पराचीना उपरिवर्तमानाः ॥ ३७ ॥

एतावाँल्लोकविन्यासः देवमनुष्यादिव्यवहारयोग्यं लोक इत्युच्यमानप्रदेशस्य स्वरूपस्थितिपरिमाणमेतावत् सार्धत्रिकोटियोजनात्मकं स लोकविन्यासश्च पञ्चाशत्कोटिगणितस्य पञ्चाशत्कोटिविस्तारयोजनात्मकस्य भूगोलकस्य ब्रह्माण्डतलस्थस्य तुरीयभागेन चतुर्थांशेन निष्ठति ब्रह्माण्डप्रदेशं चतुर्धा विभक्त एकांशः सर्वस्मात्प्रान्ते विद्यमानो घनोदकाख्यः द्वितीयस्तत आरभ्यमर्वोऽर्वाक्तम आख्यः तृतीयो लोकालोकाचलाख्यः चतुर्थस्तु काञ्चनीं भूमिमारभ्य मेरुपर्यन्तप्रदेशः अयं चतुर्थभागो लोकशब्दितः अयञ्च यावल्लोकालोकः यत्र लोकालोकाचलोऽस्ति तावत्पर्यन्तत्वेन विद्यते योऽन्तर्विस्तारः लोकालोकाचलाद्यर्वाक्लोकपरिमाणं सार्धत्रिकोटियोजनात्मकमनेन परिमाणेनालोकपरिमाणं व्याख्यातं भवति लोकालोकाचलाद्बहिः स्थलं तस्यालोकशब्दवाच्यस्य लोकपरिमाणेन व्याख्यातमित्यर्थः । योगेश्वराणामणिमादिसिद्धानां गतिमदाहरन्ति ॥ ३८–४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

लिङ्गं मूर्तिस्तस्मै चिह्नरूपाय । तेषामिति धर्माद्यष्टमहासिद्धयः उपलक्ष्यन्ते प्रकाश्यन्ते येन तत् ॥ ३३—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कर्ममयं "स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति" इत्युक्तेः कर्मप्राप्यं लिङ्गं मूर्तिं ब्रह्म लिङ्ग्यते ज्ञायते येन तत् । भेदेन सेव्यसेवकभावेन अर्चयेत् । एकस्मिन्नेव परमेश्वरे अन्तो भक्तिनिष्ठा यस्य तत् । अत एवाद्वैतं "यो यच्छ्रद्धः स एव सः" इति न्यायेन परमेश्वरादभिन्नम् ॥ ३३ ॥

ततः शुद्धोदाल्लोकः सूर्याद्यालोकवान् देशः अलोकस्तद्रहितः तयोरन्तराले मध्ये तयोर्विभागार्थमित्यर्थः परितोऽष्टदिक्षु मण्डलाकारतयेत्यर्थः ॥ ३४ ॥

ततः परस्तादित्युक्तं तदेव कियदन्तरमित्यपेक्षायामाह । यावन्मानसोत्तरमेर्वोरन्तरं मानसोत्तरमध्यान्मेरुमध्यपर्यन्तं स्थलमित्यर्थः । सार्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनपरिमितं तावती भूमिः शुद्धोदात् काञ्चनी ततः परत्र लोकालोको वर्तत इत्यर्थः । सर्वैः सत्त्वैः प्राणिमात्रैरेव परिहृता त्यक्ता ॥ ३५ ॥

समाख्या निरुक्तिः अनेन अन्तर्भवता मध्यवर्तिनाचलेन लोकः आलोकमयो देशः अलोक आलोकाभावमयो देशः व्यवस्थाप्यते तुल्यप्रमाणत्वेन ज्ञाप्यते ॥ ३६ ॥

लोकत्रयं भूर्भुवः स्वस्तदन्ते परितोऽष्टदिक्षु तर्हि तस्य कियानुच्छ्रायो विस्तारश्चेत्यपेक्षायामाह । यस्मात् प्रतिमन्त्रकाशयतोः सूर्यादीनां ध्रुवान्तानां गभस्तयः किरणास्त्रीँल्लोकान् व्याप्य आवितन्वानाः समन्तात् प्रकाशं विस्तारयन्तः परतो गन्तुं न शक्नुवन्ति । तावानायामसहनाद्यामौ उच्छ्रायविस्तारौ यस्य सः ध्रुवादप्युच्छ्रितस्त्रैलोक्यमर्यादाभूत इत्यर्थः ॥ ३७ ॥

स तु लोकालोकस्तु भूगोलकस्य भूमण्डलाख्यगोलकस्येत्यर्थः सूर्यस्येव भुवोऽप्यण्डगोलकयोर्मध्यवर्तित्वात् खगोलमिव भूगोलमपि पञ्चाशत्कोटियोजनप्रमाणं तस्य तुरीयभागः सार्धद्वादशकोटियोजनविस्तारोच्छ्राय इत्यर्थः । भूस्तु चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटियोजनप्रमाणा ज्ञेया । यथा मेरुमध्यान्मानसोत्तरमध्यपर्यन्तं सार्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनप्रमाणं मानसोत्तरमध्यात् स्वादूदकसमुद्रपर्यन्तं एकषष्टिलक्षयोजनप्रमाणं ततः काञ्चनी भूमिः सार्धसप्तपञ्चाशल्लक्षोत्तरकोटियोजनप्रमाणा एवमेकतो मेरुलोकालोकयोरन्तरालमेकादशलक्षाधिकचतुष्कोटिपरिमितमन्यतोऽपि तथेत्यतो लोकालोकालोकपर्यन्तं स्थानं द्वाविंशतिलक्षाधिकाष्टकोटिपरिमितं लोकालोकाद्बहिरप्येवमतः एतावदेव अन्यतोऽप्येतावदेव । यद्वक्ष्यते "योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणञ्च व्याख्यातं यद्बहिर्लोकालोकाचलात्" इति एकतो लोकालोकः सार्धद्वादशकोटियोजनप्रमाणः अन्यतोऽपि स तथैवेत्येवं चतुस्त्रिंशल्लक्षोनपञ्चाशत्कोटिप्रमाणा भूः साष्टद्वीपपर्यन्ता ज्ञेया । अत एवाण्डगोलकात् सर्वतो दिक्षु सप्त

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दशलक्षयोजनावकाशे वर्त्तमाने सति पृथिव्याः शेषभागेन धारणं दिग्गजैश्च निश्चलीकरणं सार्थकं भवेदन्यथा तु व्याख्यान्तरे पञ्चाशत्कोटिप्रमाणत्वाद्ब्रह्माण्डगोलकलग्नत्वे तत्तत् सर्वमकिञ्चित्करं स्यात् चाक्षुषे मन्वन्तरे चाकस्मान्मज्जनं श्रीवराहदेवेनोत्थापनञ्च दुर्घटं स्यादित्यादिकं विवेचनीयम् ॥ ३८ ॥

येऽधिनिवेशितास्ते आसते ॥ ३९ ॥

स्वविभूतीनां स्वांशभूतानां हस्तिनामुपबृंहणं वर्द्धनं तदर्थं धर्माद्युपलक्षयतीति तादृशं शुद्धसत्त्वं धारयमाणः सकललोकस्वस्तये च ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कर्ममयं कर्मसाध्यं लिङ्गं फलं ब्रह्मलिङ्गं वेदज्ञाप्यमेकस्मिन् प्रजोत्पादने अन्तो निष्ठा यस्य तद्ब्रह्मयमस्माकमुपासकानामुपास्यान्तरस्याभावाद्यत्तदादिशब्दैर्वेदे वर्णितं तस्मै भगवते नमः॥३३॥

ततः शुद्धोदात् लोकः सूर्यादिप्रकाशितदेशोऽलोकस्तमोव्याप्तो देशस्तयोः ॥ ३४ ॥

शुद्धोदलोकयोरन्तर्गतं भूमण्डलं द्वेधा विभज्य दर्शयति । यावदिति। यावन्मानसोत्तरमेर्वोरन्तरमन्तराले भूमण्डलं तयोरप्यर्द्धमादायेति बोध्यं सार्द्धसप्तलक्षाधिकसार्द्धकोटियोजनपरिमितमित्यर्थः तावती भूरेव सामान्यतोऽस्ति तस्यां केषाञ्चत्प्राणिनां संस्थितिरप्यस्ति "स्वादूदकस्य परितः दृश्यते लोकसंस्थितिः" इति विष्णुपुराणात् एवं सति पञ्चदशलक्षोत्तरयोजनकोटित्रयं भवति सर्वाशिष्टपुष्करद्वीपस्वादूदकगता पराणावतिलक्षयोजनपरिमिता एवं स एकादशलक्षोत्तरयोजनकोटिचतुष्टयं भवति तदनन्तरमन्या काञ्चनी भूमिरस्ति सा च "द्विगुणा काञ्चनी भूमिः सर्वसत्त्वविवर्जिता" इति श्रीविष्णुपुराणात् एवं सति अधिकत्रिशलक्षोत्तरद्वादशकोट्यः स्युः ततोऽयुतयोजनविस्तारः लोकालोकाचलः "लोकालोकाचलः शैलो योजनायुतविस्तरः" इति श्रीविष्णुपुराणवचनात् काञ्चन्याः परिमाणमत्र नोक्तं तेनायुतानसप्तदशलक्षयोजनपरिमितभूमिलाभः तदित्थं सलोकालोकाचलायाः सार्द्धद्वादशकोटियोजनायामत्वं ज्ञेयं ततः परितः सार्द्धद्वादशकोटियोजनपरिमिता तमोव्याप्ता ज्ञेयेति सर्वं समञ्जसं न प्रत्युपलभ्यते काञ्चनभावं गतत्वात्तस्मात्सर्वैः सत्त्वैः परिहृता परिवर्जिता ॥ ३५ ॥ ३६ ॥

लोकत्रयस्यान्ते मर्यादारूपः परितो विहित उपक्लृप्तः यस्माल्लोकालोकात्प्रतिबन्धात्सूर्यादीनां ध्रुवापवर्गाणां ध्रुवान्तानां गभस्तयः भावितन्वानाः समन्तात्प्रकाशयन्तः कदाचिदपि पराचीनाः पर्वताद्बहिर्गमनशीलाः भवितुं नोत्सहन्ते स तावदुच्चहनायामः तावदुच्चहनमुत्सेधः तदनुरूपः आयामश्च यस्य सः ॥ ३७ ॥

तावदुच्चहनायाम इत्युक्तं तत्रायामः पूर्वत्र प्रतिपादित उच्चहनमाह । स त्विति । तुरीयभागः सार्द्धद्वादशकोटियोजनोच्छ्राय इत्यर्थः ॥ ३८ ॥

आशासु दिक्षु अधिनिवेशितास्तिष्ठन्तीति शेषः ॥ ३९ ॥

तेषामृषभादीनां स्वविभूतीनां स्वांशानां महेन्द्रादीनां च विविधवीर्योपबृंहणाय नानासामर्थ्यवृद्धये सकललोकस्वस्तये च भगवांस्तस्मिन् गिरिवरे आस्ते किं कुर्वन् आत्मनः स्वस्य यद्विशुद्धमप्राकृतरूपं श्रीमन्मङ्गलविग्रहं सन्धारयमाणः कीदृशं धर्मज्ञानादीनि अष्टमहाविभूतयश्चोपलक्षणं यस्य तत् । ननु प्राकृतलोकादन्योऽप्राकृतलोकः कस्य यत्रत्यं विग्रहमाविष्कुर्वन् तस्मिन् गिरौ आस्ते इत्यत आह । महाविभूतिपतिरिति । महाविभूतिः परमव्योमविष्णुपदादिशब्दवाच्यं परमं धाम । तदधिपतिः "योऽस्याध्यक्षः स परमे व्योमन्" इति श्रुतेः वनपर्वणि मुद्गलोपाख्याने ।

> ब्रह्मणः सदनादूर्ध्वं तद्विष्णोः परमं पदम् ।
> शुद्धं सनातनं ज्योतिः परब्रह्मेति यद्विदुः ॥

इति स्मृतेश्च विस्तरस्तु वेदान्तकौस्तुभे सूत्रभाष्ये द्रष्टव्यः दोर्दण्डैः उपलक्षितः सन् ॥ ४० ॥

भाषाटीका

यह कर्मनिष्ठावाला ब्रह्म का जनाने वाला एक परमेश्वर मे निरत सर्वोत्तम शान्तरूप है जिसका मनुष्य अर्चन करते हैं तिस मूर्तिवाले भगवान् ब्रह्माजीके अर्थ नमस्कार है ॥ ३३ ॥

ऋषि श्रीशुकदेवजी बोले उसके परे लोकालोक नाम पर्वत है लोक अलोक दोनों के मध्य मे चारों ओर से स्थापित है ॥ ३४ ॥

मानसोत्तर पर्वत तथा मेरु इन दोनों के बीचमे जितनी भूमि है उतनी ही भूमि शुद्धोदक समुद्र के आगे है सब सुवर्णमयी दर्पण के समान है जिसमें डाला हुआ पदार्थ फिर किसी प्रकार से मिल नहीं सकता है तिससे सब जन्तुओं से वह भूमि रहित होगई है ॥ ३५ ॥

लोकालोक इसका नाम है जिससे कि बीचमे रहने वाले इस पर्वत से लोक अलोक दोनों की व्यवस्था होती है ॥ ३६ ॥

परमेश्वरने उस पर्वत को तीनों लोकों के अन्तमें चारों ओर से विधान किया है सूर्य से लेकर ध्रुवपर्यन्त जितने तेज वाले हैं तिनके किरण उस पर्वत के इसी तरफके लोकों मे प्रकाश करते हैं कभी भी उसके दूसरी तरफ को नहीं जाते हैं इतना चौडा ऊंचा पर्वत है ॥ ३७ ॥

इतना लोकों का विभाग प्रमाण लक्षण स्थितिसे कविजनों ने निश्चित किया है सो पञ्चाशत् कोटि गणित भूगोल का चौथा हिस्सा केवल लोकालोक पर्वत है ॥ ३८ ॥

तिस के ऊपर चारों दिशों में सब जगत्के गुरु आत्मयोनि ब्रह्माजी के स्थापन किये ऋषभ पुष्करचूड वामन अपराजित नाम के चार हाथी सब लोक की धारणा के हेतु हैं ॥ ३९ ॥

परमैश्वर्य के पति अन्तर्यामी परममहापुरुष भगवान् नारायण धर्मज्ञान वैराग्य ऐश्वर्यादि अष्ट महासिद्धियों से उपलक्षित अपने विशुद्ध सत्त्व मूर्त्ति को धारण करके अपने पार्षदों में श्रेष्ठ विष्वक्सेनादिकों के सहित अपने आयुधों में श्रेष्ठ सुदर्शनादि सहित भुजदण्डों से सुशोभित होकर उस पर्वत के उपर अपनी विभूति लोकपाल तथा हस्ति इनों के विविध पराक्रमों को बढाने तथा सबलोकों के कल्याण करने को विराजमान हैं ॥ ४० ॥

---

(१) आकल्पमेवं वर्षं गत एष भगवानात्मयोगमायया विरचितविविधलोकयात्रागोपीथायेत्यर्थः (२) ॥ ४१ ॥

(३) योऽन्तर्विस्तार एतेन ह्यलोकपरिमाणं च व्याख्यातं यद्बहिर्लोकालोकाचलात् ततः परस्ताद्योगेश्वरगतिं विशुद्धामुदाहरन्ति ॥ ४२ ॥

अण्डमध्यगतः सूर्यो द्यावाभूम्योर्यदन्तरम् ।
सूर्याण्डगोलयोर्मध्ये कोट्यः स्युः पञ्चविंशतिः ॥ ४३ ॥

मृतेऽण्ड एष एतस्मिन् यदभूत्ततो मार्तण्ड इति व्यपदेशः ।
हिरण्यगर्भ इति यद्धिरण्याण्डसमुद्भवः ॥ ४४ ॥

सूर्येण हि विभज्यन्ते दिशः खं द्यौर्मही भिदा (४) ।
स्वर्गापवर्गौ नरका रसौकांसि च सर्वशः ॥ ४५ ॥

देवतिर्यङ्मनुष्याणां (५) सरीसृपसवीरुधाम् ।
सर्वजीवनिकायानां सूर्य आत्मा दृगीश्वरः ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे भुवनकोशवर्णने
समुद्रद्वीपवर्षसन्निवेशपरिमाणलक्षणो
विंशतितमोऽध्यायः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्वन्तर्यामिणान्तःस्थेनैव सर्वं कर्तुं शक्यं किं तस्य बहिः समन्तादवस्थानेनेत्याशङ्क्य तदर्थं स्वयमेव व्याचष्टे । आत्मनो योगमायया विरचिता या विविधलोकयात्रा तस्या गोपीथाय रक्षणाय एष भगवानेवम्भूतमाकल्पं वर्षं गतो लीलया प्राप्त इति समन्तादास्त इत्यस्यार्थः ॥ ४१ ॥

अलोकपरिमाणं च मेरोरेकतः सार्धद्वादशकोट्यः । ततो लोकालोकात् अलोकाख्यात् परस्तात् विशुद्धां द्विजपुत्रानयनेऽर्जुनस्य श्रीकृष्णेन प्रदर्शिताम् ॥ ४२ ॥

विस्तरेणोक्तं ब्रह्माण्डमानं सर्वतोऽपि निरूपयति । अण्डमध्यगतः किं तन्मध्यं तदाह । द्यावाभूम्योः पूर्वोत्तरकपालयोर्यदन्तरं मध्यस्थानं सर्वतः पञ्चविंशतिकोट्यः ॥ ४३ ॥

अण्डमध्यावस्थाने कारणं तन्नाम निर्वचनेनाह । मृतेऽचेतने एव सूर्यो वैराजरूपेण यस्मात्प्रविष्टः ॥ ४४ ॥

किञ्च । सूर्येणैव विभज्यन्ते दिशः खमन्तरिक्षं भिदा अन्योऽपि विभागः स्वर्गापवर्गौ भोगमोक्षदेशौ रसौकांस्यतलादीनि ॥ ४५ ॥

उपासनार्थमाह । देवादीनां सूर्य आत्मा दृगीश्वरो नेत्राधिष्ठाता च ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
विंशोऽध्यायः ॥ २० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं लोकालोकपर्यन्तस्य लोकस्य मेरोरारभ्य सार्धद्वादशकोटियोजनपरिमाणमुक्त्वाथालोकपरिमाणमाह । अथेति । ननु हे राजन् ! तेन लोकालोकान्तर्वर्तिनः परिमाणकथनेन लोकालोकाद्बहिर्यो देशः तस्य लोकस्य परिमाणमपि व्याख्यातम् अलोकोऽपि लोकेन तुल्यपरिमाणः सार्धद्वादशकोटियोजनपरिमाण इत्यर्थः अत्रेदमवगन्तव्यं पञ्चाशत्कोटियोजनात्मकभूमण्डल मेरुर्मध्ये वर्तते तस्मादारभ्य चतुर्दिक्षु अण्डभित्तिपर्यन्तमृजुगमनेन पञ्चविंशतिकोटियोजनानि भवन्ति दक्षिणाण्डभित्तिमारभ्योत्तरभित्तिपर्यन्तमृजुगमने तु पञ्चाशत्कोटियोजनानि भवन्ति एवं पश्चिमत आरभ्य पूर्वभित्तिपर्यन्तेऽपि द्रष्टव्यं तत्र मेरो-

(१) आकल्पमेवं भगवान् इति श्रीविजयध्वज पाठः । (२) इत्यर्थ इति नास्ति श्रीवीर० पाठे । (३) अथ ननु इत्यधिकः श्रीवीर० (४) तथेति । (५) सरीसृपनगवीरुधाम् इति श्रीविजय० पाठः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रारभ्याण्डभित्तिपर्यन्ते पञ्चविंशतिकोटियोजनात्मके भूभागे जम्बूद्वीपविभागः पञ्चाशत्सहस्रयोजनात्मकः ततो लवणोदध्यादयः समुद्राः प्लक्षादयो द्वीपाश्च यथोक्तयोजनपरिमाणाः एवं पञ्चाशत्सहस्रोत्तरपञ्चाशल्लक्षाधिककोटिद्वययोजनपरिमिता सप्तसागरसप्तद्वीपात्मिका भूमिः शुद्धोदधेर्बाह्यभूमिः सार्धसप्तलक्षोत्तरसार्धकोटियोजनपरिमिता बाह्या आदर्शभूमिरेकोनचत्वारिंशल्लक्षोत्तराष्टकोटियोजनपरिमिता सङ्कलय्य गणनया सार्धद्वादशकोटियोजनानि भवन्ति ततो लोकालोकात्परालोकभूमिः सार्धद्वादशकोटियोजनपरिमितेति तत्र न लोकानां सञ्चार इत्याह । ततः परस्तादिति । ततो लोकालोकाद्बहिर्विशुद्धां योगप्रभावसिद्धां योगेश्वराणामेव गतिं सञ्चारमुदाहरन्ति कथयन्तीत्यर्थः वस्तुतस्तत्र शुद्धोदधेः पुरस्तात्काञ्चनभूम्यतिरिक्ता भूमिर्न प्रतीयत एव किन्तु काञ्चन्या एव भूमेर्मेरुमानसोत्तरमध्यस्य भूपरिमाणं गण्यते अत एव हि श्रीविष्णुपुराणे "स्वादूदकस्य पुरतः दृश्यते लोकसंस्थितिः । द्विगुणा काञ्चनी भूमिः सर्वजन्तुविवर्जिता" इति काञ्चनभूमिरेवोक्ता अत एव हि "ततः काञ्चनभूमिस्तु दशकोट्यो वरानने"। इति वचनान्तरमप्युपपन्नं तथायमर्थः अत्रालोकपरिमाणमाह । अथेति । ननु योऽन्तर्विस्तारः लोकालोकपर्यन्तवर्तिनो भूमण्डलस्य विस्तारः कथित इति शेषः एतेनान्तर्वर्तिनः परिमाणकथनेनालोकस्य लोकालोकपर्यन्ताद्बाह्यवर्तिनोऽपि परिमाणमाख्यातं कथितप्रायं पञ्चाशत्कोटियोजनपरिमिते भूमण्डले लोकालोकान्तर्वर्तिनो विस्तारे कथितेऽवशिष्टस्यालोकस्य परिमाणमपि कथितप्रायमित्यर्थः अत्रेदमवगन्तव्यं पञ्चाशत्कोटियोजनपरिमितं भूमण्डलं मेरोर्मूलमध्यादारभ्याभितश्चतुर्ष्वण्डगोलपर्यन्तं विभजनीयमेवं विभक्ताश्चत्वारो भागा अल्पमूला विपुलाग्रभागास्त्रिकोणाकारा भवन्ति यथा मेरोरारभ्य लवणोदधिविभक्ता भागाः तत्रैकैकस्मिन्भागे मेरोरारभ्याण्डभित्तिपर्यन्तमृजुगमने पञ्चविंशतिकोटियोजनानि भवन्ति तेषामेव भागानामाद्यन्तभागयोः समीकरणेन गणनायां सार्धद्वादशकोटियोजनानि भवन्ति यथा च मेरोरारभ्य लवणोदधिपर्यन्तेषु चतुर्षु भागेष्वेकैकस्मिन् भागे मेरुमूलादारभ्य ऋजुगमनेन शुद्धोदधिपर्यन्तं पञ्चाधिकसहस्राधिकत्रिपञ्चाशल्लक्षोत्तरकोटिद्वययोजनात्मकः शुद्धोदादारभ्य लोकालोकपर्यन्तं सार्धसप्तलक्षोत्तरसार्धकोटियोजनपरिमितः लोकालोकादारभ्याण्डभित्तिपर्यन्तो लोकभागः एकोनचत्वारिंशल्लक्षाधिकाष्टकोटियोजनपरिमितः मिलित्वा सार्धद्वादशकोटियोजन एकैको भागो भवति चतुर्णां भागानां सकलेऽण्डभित्तेर्दक्षिणत आरभ्योत्तरभित्तिपर्यन्तमृजुगमने पञ्चाशत्कोटियोजनानि भवन्ति एवं पाश्चात्याण्डभित्तेरारभ्य पूर्वभित्तिपर्यन्तं गमनेऽपीति बोध्यम । भागानां समीकारेण गणनायां स्वल्पमेव परिमाणं भवतीति अयमप्यपरो विशेषः सार्धद्वादशकोट्यात्मके एकैकस्मिन् भागे योऽयं शुद्धोदधिपर्यन्तः पञ्चाशत्सहस्राधिकत्रिपञ्चाशल्लक्षोत्तरकोटिद्वययोजनपरिमित एकैकभागस्तस्मिन्नपि भागे मेरोर्मूलादारभ्य ऋजुगमने लवणोदधिपर्यन्तो जम्बूद्वीपविभागः पञ्चाशत्सहस्रयोजनपरिमितः ततो लवणोदधिभागोऽपि ऋजुगमनेन लक्षयोजनपरिमितः ततः प्लक्षद्वीपो द्विलक्षयोजनात्मकः तत इक्षुरससमुद्रोऽपि द्विलक्षयोजनात्मकः एवं ततः शाल्मलादयो द्वीपाः सुरोदादयश्च समुद्राः चतुर्लक्षादिरूपयथोक्तपरिमाणा एव वेदितव्याः एवं शुद्धोदधिपर्यन्तं सङ्कलय्य गणनायां पञ्चाधिकसहस्राधिकत्रिपञ्चाशल्लक्षोत्तरकोटिद्वययोजनात्मकोक्तसङ्ख्या सम्पन्ना भवतीति ततः काञ्चनी भूमिः सार्धसप्तलक्षोत्तरसार्धकोटियोजनपरिमिता ततो "द्विगुणा काञ्चनी भूमिः" इति (।) श्रीविष्णुपुराणवचनं पूर्वोक्तशुद्धोदधिपर्यन्तया भूम्या सह पञ्चाशल्लक्षन्यूनद्विगुणत्वेन तात्पर्यकं दशकोट्य इति वचनान्तरं तु लोकादारभ्य पुनर्लोकालोकपर्यन्तमृजुगमनेन चतुर्दशलक्षोत्तरदशकोटियोजनप्रमिता भूमिर्भवतीत्येतदभिप्रायकं द्विगुणत्वदशकोटित्वकथनं न्यूनाधिकभागागणनादित्युक्ततो न विरोध इति ततो लोकालोकाचलः ततोऽन्धकारभूमिः सा च पारिशेष्यादष्टाविंशतिकोटियोजनपरिमिता एवञ्च मेरोरारभ्य पञ्चविंशतिकोटियोजनानि भवन्तीति द्रष्टव्यम् ॥ ४२ ॥

एवं मेरुमध्यस्थमवधीकृत्य भूमण्डलस्य परिमाणमुक्तमथ ब्रह्माण्डस्य कियत्परिमाणकं वावधीकृत्य परिमातव्यमित्यपेक्षायामाह । अण्डमध्यगत इति । अण्डमध्यगतः अण्डमध्ये स्थितः सूर्यः यथा भूमण्डलस्य मध्ये मेरुः स्थितस्तद्वदित्यर्थः किं तन्मध्यं यत्र स्थितः सूर्यस्तत्राह । द्यावाभूम्योर्यदन्तरमिति । द्यावाभूम्योरूर्ध्वाधःकपालयोर्यदन्तरं मध्यस्थानमित्यर्थः अनेन सूर्यमवधीकृत्याण्डस्य परिमाणं कार्यमेवेत्युक्तं भवति सूर्याण्डभित्त्योर्मध्ये पञ्चविंशतिकोट्यः स्युरित्यर्थः सूर्यमवधीकृत्याण्डभित्तिपर्यन्तमूर्ध्वमधस्तात्पार्श्वतश्च पञ्चविंशतिकोटियोजनानि भवन्तीत्यर्थः ॥ ४३ ॥

अण्डप्रसङ्गात्सूर्यचतुर्मुखादीनामण्डसम्बन्धादेव मार्तण्डहिरण्यगर्भादिनामत्वमित्याह । मृतेऽण्ड इति । मृते नश्वरे एतस्मिन्नण्डे यतः स्थितः ततोऽसौ सूर्यो मार्तण्ड उच्यते मृतञ्च तदण्डं च मृताण्डं मृताण्डे भवः मार्ताण्डः शकन्ध्वादित्वात्पररूपे मार्तण्ड इत्यपि साधुः यद्यस्माद्धिरण्ये हिरण्मये समुद्भवो यस्य स ब्रह्मा हिरण्यगर्भ इत्युच्यते हिरण्याण्डस्य गर्भभूतत्वाद्धिरण्यगर्भ इत्युच्यत इत्यर्थः । यद्वा । हिरण्यगर्भ इति सूर्यस्यैव कश्चिद्व्यपदेशनिर्वाहार्थमेव ॥ ४४ ॥

यदुक्तमण्डपरिमाणे सूर्यस्यावधित्वं तदेव न केवलं किन्तु दिगादिविभागेऽप्यवधित्वं सूर्यस्यास्तीत्याह । सूर्येणेति । दिशः पूर्वादयः एवं समन्तारिक्षं द्यौः स्वर्लोकः मही भूमिः भिदान्योऽपि विभागः स्वर्गापवर्गौ भोगमोक्षदेशौ नरकाः रसौकांसि अतलादीनि च सर्वशः कृत्स्नशः सूर्येणैव विभज्यन्ते ज्ञायन्त इत्यर्थः ॥ ४५ ॥

न केवलं दिगादिविभाजक एव सूर्यः किन्तु देवादीनां चक्षुरिन्द्रियाधिष्ठाता चेत्याह । देवेति । आत्मा भगवदात्मकः सूर्यः देवादीनां सर्वेषां जीवनिकायानां जीवसमूहानां दृगीश्वरः दृगधिष्ठाता अगानां स्थावराणां वीरुधाञ्च चक्षुरिन्द्रियस्यानभिव्यक्तस्य भासकत्वाच्च चक्षुरिन्द्रियाधिष्ठातृत्वमप्युक्तम् ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

विंशोऽध्यायः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पञ्चाशत्कोटिगुणितो ब्रह्माण्डकटाह इत्युक्तं तस्य दशदिगपेक्षया मध्यप्रदेशः कियानिति तत्राह। अण्डेति। द्यावापृथिव्योर्यदन्तरमन्तरिक्षं तस्मिन् यत्र स्थितः सूर्यः अण्डमध्यगतः अन्तरिक्षप्रदेशे यत्र सूर्यमण्डलसञ्चारः सोऽण्डमध्यप्रदेशः सर्वदिगपेक्षया सूर्याण्डगोलयोर्मध्ये सर्वदिक्ष्वपि सम्भूय पञ्चविंशतिकोटियोजनानि स्युरित्यर्थः ॥ ४३ ॥

एष सूर्य एतस्मिन् मृते जीवरहिते अचेतन इति यावदण्डे अभूदचेतनब्रह्माण्डमध्ये वर्तत इति यस्मात्तस्मान्मार्तण्ड इति व्यपदेशः तथा हिरण्याण्डसम्भवो विरिञ्चो हिरण्यगर्भ इत्युच्यते तथेति ॥ ४४ ॥

सूर्यान्तर्यामित्वात्तदन्तर्यामिन्याख्य सर्वस्तेन हरिणा दिगादयो विभज्यन्ते यदतः सूर्य आत्मा श्रीनारायणः सर्वेषां दृग् द्रष्टेति कथितः ॥ ४५ ॥ ४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

विंशोऽध्यायः ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

आकल्पं प्रलयपर्यन्तमेवं समन्तात् स्थितिप्रकारेण गतस्तत्र प्राप्त इत्यर्थः । इति स एव मर्यादापूर्वोक्तस्याभिप्राय इत्यर्थः ॥ ४१ ॥

योऽन्तर्वर्तीति । लोकालोकस्तु लोकमलोकं चार्द्धेनार्द्धेन व्याप्य स्थितः अतः काञ्चन्या भूमेः परभागमाक्रान्तः शिवतन्त्रे च "लोकालोकं ततः परम्" इत्युक्तम् । अन्यथा ब्रह्माण्डगर्भस्य पञ्चाशत्कोट्यतिक्रमः स्यादिति विशुद्धान्तर्गतामिति विशुद्धगतिहेतुत्वात् ॥ ४२ ॥ ४३ ॥

एष सूर्य इत्यन्तर्याम्यभेदविवक्षया ॥ ४४—४६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
विंशोऽध्यायः ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु किं तस्यैतावता प्रयोजनेत्यतः सकललोकस्वस्त्यय इत्येतत् स्वयमेव व्याचष्टे । आकल्पं कल्पपर्यन्तम् एवमनेन प्रकारेण गतः लोकालोकं प्राप्तः साकल्येन प्राप्त इति वा आत्मनो योगमायया विरचिता या विविधलोकयात्रा तस्या गोपीथाय रक्षणाय तस्यैव शक्त्या रचितं विश्वं स चेन्न पालयेत्तर्हि कः पालयेदिति भावः ॥ ४१ ॥

अलोकपरिमाणं द्वाविंशतिलक्षोत्तरं कोटिद्वयं बहिः सर्वदिक्षु योगेश्वराणामावरणादेकं विभिद्य मुमुक्षूणाम् । यद्वा । नारदादीनाम् ॥ ४२ ॥

विस्तरेणोक्तमण्डगोलकमानमूर्द्धाधोऽपि निरूपयति । अण्डमध्यगत इति। कियत्पर्यन्तं तदाह। द्यावाभूम्योः भुवर्लोकभूर्लोकयोर्यन्मध्यमतः सूर्यश्च अण्डगोलकश्च तयोर्मध्ये सूर्यादूर्ध्वगोलकपर्यन्तं यथा पञ्चविंशतिकोट्य तथा अधोगोलकपर्यन्तमित्यर्थः उपपत्तिस्तु पूर्वविष्णुवाक्येन ॥ ४३ ॥

अण्डमध्यावस्थाने कारणं नाम निर्वचनेनाह । मृते अचेतने एव सूर्योऽभूत् प्रविष्टः ततो मार्तण्डः स एव क इत्यत आह । हिरण्यगर्भसमष्टिजीवसूक्ष्मोपाधिकः यतन एव हिरण्याण्डस्य तदीयस्थूलदेहस्य सम्भवः समुत्पत्तिमानता ॥ ४४ ॥

भिदा अन्योऽपि विभागः स्वर्गापवर्गभोगमोक्षदेशो दृश्यो कांस्य नरकादीनि ॥ ४५ ॥

सूर्य आत्मा आत्मत्वेनोपास्यः ॥ ४६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
विंशोऽध्यायः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूर्ववाक्यार्थं व्याचष्टे । एष महाविभूतिपतिः आत्मयोगमायया कृतया शक्तिविशेषरूपया विरचिता विविधलोकयात्रा तस्याः गोपीथाय रक्षणायैवमाकल्पं येन गतः प्राप्तो भवतीत्यर्थः ॥ ४१ ॥

अन्तर्विस्तारः सार्द्धद्वादशकोटियोजनपरिमितः लोकालोकमहितो मेरोरूक्ततः एतेनालोकपरिमाणं व्याख्यातमलोकमेवाह । यल्लोकालोकाद्बहिरिति । ततो लोकालोकात् ॥ ४२ ॥

विस्तरेणोक्तं परिमाणं संक्षिप्यानुवदति । अण्डस्य मध्ये सूर्यो गतः प्रविष्टः किं तन्मध्यमित्यत आह । द्यावाभूम्योः पूर्वोत्तरकपालयोर्यदन्तरं मध्यं स्थानं तदेवभूतस्य सूर्याण्डस्य प्रकाशकतया सर्वतस्थितः अण्डस्य लोकाचलमण्डलस्य गोलयोरुभयपार्श्वयोर्मध्ये पञ्चविंशतिः कोट्यः स्युः योजनानामिति शेषः । लोकालोकविस्तारोऽप्यत्रैव शेषः पूर्वोक्तनिर्णयबलात् ॥ ४३ ॥

अण्डप्रसङ्गान्मार्तण्डनामान्तरमाह । मृतेऽण्डे प्रकाशशून्ये एषः सूर्यो यतोऽभूदतो मार्तण्डः मृतश्च तदण्डं च मृताण्डं तत्सम्बन्धादित्वात् परूपं तत्सृष्टो मार्तण्डः इति व्यपदेशः हिरण्यस्य हिरण्याण्डस्य गर्भभूतत्वाद्धिरण्यगर्भ इति व्यपदेशः यद्वा एव हिरण्याण्डे समुद्भवतीति हिरण्याण्डसमुद्भव इति च व्यपदेशः ॥ ४४ ॥

समन्तरिक्षं महीभिदा अन्योऽपि भोगभागः स्वर्गापवर्गेन रक्षाः भोगमोक्षयातना रसातलनरकादीनि ॥ ४५ ॥

देवादीनां यथा सम्भवमुपकारकर्तृत्वादात्मा आश्रयः दृगीश्वरः दृगधिष्ठाता च ॥ ४६ ॥

इतिश्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
विंशाध्यायार्थप्रकाशः ॥ २० ॥

भाषा टीका

अपनी योगमाया से रचित नाना प्रकार के लोकों के रक्षा करने के वास्ते भगवान् कल्पपर्यन्त इस वेषको प्राप्त होकर रहते हैं ॥ ४१ ॥

मेरुसे लेकर लोकालोकपर्वत के मध्यमे जो विस्तार है उतनाहीं उधर अलोकस्थान का भी विस्तार है जो कि स्थान उसके आगे योगीश्वरों की विशुद्धगति का है ऐसा कहते हैं ॥ ४२ ॥

अण्डके मध्यमे सूर्य प्राप्त है आकाश भूमिका जो अन्तर सोई मध्य है सूर्य तथा अण्डगोल के मध्यमें पच्चीसकोटि योजन का विस्तार है ॥ ४३ ॥

जिस हेतुसे अचेतन इस अण्ड मरेमें सूर्य भये हैं इसीसे मार्तण्ड इनका नाम है हिरण्य अण्डके सम्भव होने से हिरण्यगर्भ ऐसा नाम हुआ है ॥ ४४ ॥

दिशा आकाश पृथिवी और सब भेद स्वर्ग मोक्ष नरक पाताल के स्थान ए सब विभाग सूर्य से ही होते हैं ॥ ४५ ॥

देवता मनुष्य तिर्यग् जन्तु सर्पादिक लतादिक और सब जीवसमूह तथा सब के नेत्र इनके अधिष्ठाता ईश्वर श्रीसूर्यनारायण ही हैं ॥ ४६ ॥

इति श्रीभागवत पञ्चमस्कन्ध बीसमे अध्यायका

भाषानुवाद ब्रह्मण्याचार्य कृत

समाप्त ॥ २० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे विंशोऽध्यायः समाप्तः ॥ २० ॥



एकविंशोऽध्यायः ।

—:०:—

॥ श्रीशुक उवाच ॥

एतावानेव भूवलयस्य सन्निवेशः प्रमाणलक्षणतो व्याख्यातः ॥ १ ॥

एतेन हि दिवो मण्डलमानं तद्विद उपदिशन्ति । यथा द्विदलयोर्निष्पावादीनां ते अन्तरेणान्तरिक्षं तदुभयसन्धितम् ॥ २ ॥

यन्मध्यगतो भगवांस्तपतां पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्यात्मभासा स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मान्द्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषु यथासवनमभिपद्यमानो मकरादिषु राशिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ ३ ॥

यदा मेषतुलयोर्वर्तते तदाहोरात्राणि समानानि भवन्ति यदा वृषभादिषु पञ्चसु च राशिषु चरति तदाहान्येव वर्धन्ते ह्रसति च मासि मास्येकैका घटिका रात्रिषु ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवमध्यायविंशत्या भूमर्यादा निरूपिता ।
अतः परं द्युमर्यादापादनं त्रिभिरुच्यते ॥ १ ॥
एकविंशे रवेः कालचक्रेण भ्रमतोऽन्वहम् ।
गत्या राशिसञ्चारैर्लोकयात्रा निरूप्यते ॥ २ ॥

एतावानिति विस्तारेण कोट्यः पञ्चाशत् । उत्सेधेन पञ्चविंशतिः ॥ १ ॥

द्विदलयोर्मध्ये यथैकस्य मानेनापरस्य मानमुपदिश्यते तद्वत् । ते अन्तरेण तयोर्मध्ये तदुभयसन्धितं ताभ्यामुभयतः संबद्धम् ॥ २ ॥

उदगयनादिसंज्ञाभिर्मन्दक्षिप्रसमगतिभिर्यथाकालमारोहणादिस्थानेष्वारोहणाद्यभिपद्यमानो मकरादिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते ॥ ३ ॥

तत्प्रपञ्चयति । यदेति । अत्यन्तवैषम्याभावात्समानानीत्युक्तं न सर्वथा साम्यं त्वेकस्यैवाहोरात्रस्य यद्यपि वृषभमिथुनयोरेवाह्नां वृद्धिः कर्कटादिषु ह्रासस्तथापि राश्यपेक्षयाधिकत्वाद्वर्धन्त इत्युक्तम् । एवं रात्रिवृद्धावपि दिनापेक्षया ह्रसतीत्युक्तम् । एकैकेति स्थूलदृष्ट्योक्तम् । वृद्धिह्रासयोः प्रतिमासवैषम्यात् ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं कृत्स्नस्य भूमण्डलस्य सन्निवेशं तत्परिमाणञ्चाभिधायाथ दिवोमण्डलपरिमाणं सूर्यगतिञ्च विवक्षुर्वक्ष्यमाणस्योक्तसापेक्षत्वादुक्तमनुवदति त्रिभिरध्यायैः । एतावानेवेति । भूमण्डलस्य सन्निवेशः संस्थानं प्रमाणादिभिरेतावानेव पञ्चाशत्कोटियोजनपरिमित एवमाख्यातः एवकारेण उक्ताधिकपरिमाणव्यावृत्तिः वक्ष्यमाणमवतारयति । एतेन । भूमण्डलपरिमाणेन दिवो मण्डलस्यापि मानं परिमाणं तद्विदः दिवो मण्डलमपि पञ्चाशत्कोटियोजनपरिमितमित्येवोपदिशन्ति कथयन्तीत्यर्थः कथमन्यस्य परिमाणकथनेनान्यस्यापि परिमाणं ज्ञातुं शक्यमित्यपेक्षायां दृष्टान्तमाह । यथा द्विदलयोर्निष्पावादीनामिति । निष्पावो गोधूमादिधान्यानि चूर्णयितुं शिल्पिभिर्निर्मितः द्विदलात्मकः पाषाणविशेषः बाह्वद्वयदलविशिष्टो धान्यविशेषो निष्पूयते सूर्पादिभिरिति निष्पावः "निरभ्योः पूल्वोः" इति घञ् निष्पावप्रभृतीनां द्वयोर्दलयोर्मध्येऽधःस्थितस्य दलस्य परिमाणे कथिते उपरितनदलमपि तत्तुल्यपरिमाणमिति कथितं भवति तथेत्यर्थः अस्तु दिवो मण्डलं भूमण्डलेन तुल्यपरिमाणं किन्तद्भूमण्डलद्युमण्डलयोर्मध्यं यत्र स्थितं सूर्यमवधीकृत्य परिच्छेदः कार्य इत्युक्तं तत्राह । तयोरिति । तयोर्भूमण्डलद्युमण्डलयोरन्तरेण मध्येऽन्तरिक्षमन्तरिक्षलोकमुपदिशन्तीत्यनुषङ्गः कथम्भूतं तदुभयसन्धितं ताभ्यां भूमण्डलद्युमण्डलाभ्यामुभयतः अध ऊर्ध्वञ्च सन्धितं संलग्नं सम्बद्धमित्यर्थः यस्यान्तरिक्षस्य मध्यगतो मध्ये स्थितो भगवांस्तपतां पतिः तापं कुर्वतां पतिः तप्यादीनां मध्ये पतिः अंशुः तपनः सूर्य आतपेन त्रिलोकीं भूर्भुवः सुव इत्यात्मिकां प्रतपति प्रकाशयत्यात्मनः स्वस्य भासा कान्त्या त्रिलोकीमवभासयति प्रकाशयति स्वस्वकर्मार्हां प्रवृत्तां करोतीत्यर्थः किमयं सूर्य एकत्र स्थित एव त्रिलोकीं प्रतपत्यवभासयति उताटन्नेव यद्यटन्नेव तर्हि मन्दरूपेणाटति उत कदाचित्त्वरया कदाचिच्छनैः कदाचित्समं किमूर्ध्वमेवाटति अथवा अधः आहोस्विदुभयतः केषु स्थानेष्वटति कथम्वा तदानीकृतो भवत्यहोरात्रपरिमाणविभाग इत्याद्यपेक्षायामाह । स एष इति । स एष अन्तरिक्षमध्यगतः सूर्य उदगयनादिसंज्ञाभिर्मान्द्याद्विगतिभिरारो-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हणादिस्थानेषु यथाकालमारोहणादिक्रममभिपद्यमानः मकरादिषु राशिषु वर्तमानः अहानि रात्रीश्च दीर्घह्रस्वसमानानि विधत्ते कुरुते मार्गस्य अल्पाधिक्यं तावत् "अशीतिमण्डलशतं काष्ठयोरन्तरं द्वयोः। आरोहणावरोहाभ्यां भानोरब्देन या गतिः" इति श्रीविष्णुपुराणोक्तरीत्या शतम्‌ऽशीतिर्नाराश्च यदन्तर्मध्यबहिर्वलयत्रयाकारं अशीतिशतकुण्डलाकारं रेखामयं अत्याकाशिरस्कदक्षिणावर्तकुण्डलीभूतसर्पाकारं भगवदात्मकं शिशुमाराख्यं कालचक्रेऽभिभ्रमत्यारोहणावरोहणावस्थानेष्वन्तर्वलयबाह्यवलयमध्यमवलयरूपदगयनादिसंज्ञासमान्याधिगतिभिर्यथा सवत्सरोऽश्वरात्रकालमनतिक्रम्याभिपद्यमानः प्रातः सन्मकरादिषु शिशुमाराख्यस्य मकाराद्याकारेखामयमण्डलेषु नक्षत्राभिमुखतया चरन्नहरादीनि ह्रस्वानि दीर्घाणि समानानि च कुरुते तत्र बहिर्वलयादन्तर्वलयगमनमारोहणं तदेवोदगयनमारोह च चिरगतिर्मार्गस्य राशिकृतभूयस्त्वादन्तर्वलयाद्बहिर्वलयगमनमवरोहणं तदेव दक्षिणायनमवरोह च ह्रस्व इति गतेर्मार्गस्य राशिकृतस्याल्पीयस्त्वात् समस्थानशब्दनिर्दिष्टेषु मध्यमवलये गमनं समवस्थितिः तदेव विषुवत्स्थितिः तत्र समगतिर्मार्गस्य राशिकृतस्य साम्यात् आरोहणादिक्रम" "ध्रुवेण मुच्यमानेन पुरा रश्मिगुणेन तु । तस्यैव बाह्यतः सूर्यो भ्रमते मण्डलानि च" इति आरोहणे चिरगत्यैव दिनवृद्धिरल्पहासश्च भवति अवरोहणे द्रुतगमनेऽहां ह्रासः निवृद्धिश्च समगतिगतावहोरात्रस्य साम्यमितिभेदः ॥ १—३ ॥

(१) एतदेव श्रीधरस्वामिपादाशयानुक्तानन्तरं राशिषु चरन्नहोरात्रस्य सामर्थिकं निधत्ते इतिशङ्कायामहोरात्रकृतसाम्याधिक्यविभागमाह । यदेति । यदा वृषभादिषु वृषभ आदिर्यासां तासु वृषभमिथुनकर्कटसिंहकन्यासु राशिषु पञ्चसु यदा चरति तदाहान्येव वर्द्धन्ते नतु रात्रय इत्यर्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"चतुर्भिः साकं नवतिश्च नामभिश्चक्रं न वृत्तं व्यतीं रवीविपत् भीषाऽस्माद्वातः पवते भीषोदेति सूर्य" इत्यादिश्रुतेरखण्डस्वामिनो हरेराज्ञया स्वाधिकारेषु प्रवर्तमानानामिष्टदेवतात्वेन लोकैर्निरूप्यमाणानां तस्यैव विशेषनिवासस्थानानां सूर्यादीनां स्वरूपज्ञानमपि भगवज्ज्ञानोपयोगीत्यभिप्रायेण तन्निरूपयत्यस्मिन्नध्याये। तत्रातीताध्यायार्थानुवादमुखेनैतमध्यायमवतारयति। एतावानिति। भूवलयस्य लोकात्मकस्य सन्निवेशः विस्तारविशेषः ॥ १ ॥

द्विदलनिष्पावादीनां निष्पावराजमाषद्विदलानां सर्वप्रकारेण परिमाणतः समत्वमेवं भूवलयस्य सर्वस्य परिमाणतः समत्वेन यस्यान्तरिक्षस्य मध्यगतस्तदन्तरिक्षं तयोर्द्यावापृथिव्योरन्तरेण मध्य उपसन्धितं स्थापितम् ॥ २ ॥

आत्मनः परमात्मनो भासा "यदादित्यगतं तेज" इत्यादेः एष सूर्य उदगयनमुत्तरायणं तत्संज्ञया गत्या आरोहणसंज्ञेषु मकरादिमिथुनान्तेषु राशिषु यथासवनं तत्तन्मकरादिमासकाल-

(१) इतः परन्दशश्लोकपर्यन्तं श्रीधरस्वामिपाठापेक्षया श्लोकानां क्रमवैपरीत्यं वर्तते तदनुसारेणैव टीकास्ति ।

मनतिक्रम्य तत्तन्नक्षत्रैश्चोदयमभिपद्यमानो दक्षिणायनसंज्ञया गत्यावरोहणसंज्ञकेषु कर्कटादिधनुःपर्यन्तेषु राशिषु तत्तत्कर्कटादिमासकालमनतिक्रम्य तत्तन्नक्षत्रैश्चोदयमभिपद्यमानस्तथा वैषुवसंज्ञया गत्या समस्थानसंज्ञयोर्मेषतुलयोरादयोस्तन्नक्षत्राभ्यामुदयं प्राप्नुवन्नहोरात्राणि दीर्घह्रस्वसमानानि करोति ॥ ३ ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भूवलयस्येति भुवः पर्यन्त कथितानां देशानां ग्रहणम् ॥ १ ॥

ते अन्तरेणान्तरिक्षमिति सूर्यमण्डलस्य दलप्रमाण एव देशो ज्ञेयः ॥ २—६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एकविंशे रवेरुक्तं राशिगत्ययनादिकम् ।
उदयास्तमनादीनां व्यवस्था च गतेर्मितिः ॥ ० ॥

एतेन भूगोलकमानेन निष्पावः शुक्शिम्बी तदादीनामित्यतद्गुणसंविज्ञानबहुव्रीहिणा कलायादीनामित्यर्थः । तेषां यथा अर्धविदलयोर्मध्ये एकस्य मानेनापरस्य मानमुपदिश्यते तथैव भूगोलकखगोलकयोर्विस्तारेण तुल्यमेव मानमित्यर्थः ते अन्तरेण तयोर्मध्ये अन्तरिक्षं लक्षद्वयप्रमाणं तदुभयसन्धितं ताभ्यामुभयतः संलग्नम् । यस्य अन्तरिक्षस्य मध्यगतः स सूर्यः मान्द्यशैघ्र्यस्वार्थ्यवच्छन्ते उदगयननाम्न्या गत्या मन्दया गत्या आरोहणस्थाने यथा सवनं समयमनतिक्रम्य अभिपद्यमानश्चलन् मकरादिषु षट्सु राशिषु अहानि क्रमेण दीर्घाणि रात्रीस्तु ह्रस्वा विधत्ते दक्षिणायननाम्न्या क्षिप्रगत्या अवरोहणे कर्कटादिषु षट्सु राशिषु अहोरात्रान् ह्रस्वदीर्घान् विधत्ते । वैषुवतसंज्ञया उत्तरायणदक्षिणायनमध्यवर्तिन्या समा समानया गत्या मेषतुलयोः अहोरात्रान् समानान् विधत्ते अभिपद्यमानश्चलन् ॥ १ ॥ २ ॥ ३ ॥

एतत् प्रपञ्चयति। यदेत्यादिना । अत्यन्तवैषम्याभावात् समानानीत्युक्तम् । सर्वथा साम्यं त्वेकस्यैवाहोरात्रस्य यद्यपि वृषभमिथुनयोरेवाहो वृद्धिः कर्कटादिषु ह्रासस्तथापि रात्र्यपेक्षया आधिक्यत्वात्तथोक्तम् इत्युक्तम एवं रात्रिवृद्धावपि दिनापेक्षया ह्रसतीत्युक्तं वस्तुतस्तु मकरादिषु अहां वृद्धिप्रक्रमः कर्कटादिषु ह्रासप्रक्रम इत्यग्रे स्पष्टं वक्ष्यते। एकैकेति। स्थूलदृष्ट्योक्तं वृद्धिह्रासयोः प्रतिमासं वैषम्यात् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं भूर्लोकः वर्णितः

पादगम्यं तु यत्किञ्चिद्वस्त्वस्ति पृथिवीमयम् ।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः ।

इति श्रीविष्णुपुराणात् तदुपरि लोकाः सन्ति तत्र भूर्लोकात् सूर्यलोकपर्यन्तो भुवर्लोकः

भूमिसूर्यान्तरं यत्तु सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ! ।

इति तत्रैवोक्तत्वात् तदुपरि सूर्यमण्डलाद्ध्रुवपर्यन्तः स्वर्गलोकः तदुपरि कोटियोजनोच्छ्रायो महर्लोकः तदुपरि द्विगुणोच्छ्रायो जनलोकः तदुपरि चतुर्गुणोच्छ्रायस्तपोलोकः तदुपरि द्वात्रिं-

यदा वृश्चिकादिषु पञ्चसु वर्तते तदाऽहोरात्राणि विपर्ययाणि भवन्ति ॥ ५ ॥

यावद्दक्षिणायनमहानि वर्द्धन्ते यावदुदगयनं रात्रयः ॥ ६ ॥

एवं नव कोटय एकपञ्चाशल्लक्षाणि योजनानां मानसोत्तरगिरिपरिवर्तनस्योपदिशन्ति तस्मिन्नैन्द्रीं पुरीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम तासूदयमध्याह्नास्तमयनिशीथानीति भूतानां प्रवृत्तिनिवृत्तिनिमित्तानि समयविशेषेण मेरोश्चतुर्दिशम् ॥ ७ ॥

तत्रत्यानां दिवसमध्यङ्गत एव सदादित्यस्तपति सव्येनाचलं दक्षिणेन करोति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कोट्यष्टकायः सत्यलोकः ततो यथा सप्तमं तमस्ततो गर्भोदकं ततोऽण्डकटाहः एवं सर्वादित्य तमः गर्भोदकञ्च परितो ज्ञेयं तत्परितोऽण्डकटाहः तमसः परिमाणं प्रागुक्तं गर्भोदककटाहमानम्

समस्तसागरमानस्तु गर्भोदस्तदनन्तरम् ।
कोटियोजनमानस्तु कटाहः सर्वतः स्थितः ।

इत्यादिवचनादूह्यम् तथा कटाहादुपरि दशगुणोत्तराणि जलावरणानीति संक्षेपः तत्र भुवर्लोकस्वर्गयोः स्थितिमाह । एतावानित्यन्यायत्रयेण सन्निवेशः संस्थानमेतावानेव पञ्चाशत्कोटियोजनपरिमितः ॥ १ ॥

निष्पूयते वाय्वादिनेति निष्पावो द्विदलयुक्तोऽन्नविशेषः "निष्पावः पूल्वौ" इति घञ् निष्पावस्यान्नविशेषत्वं मार्कण्डेयपुराणे प्रसिद्धम् ।

व्रीहयश्च यवाश्चैव गोधूमाः कंगुणास्तिलाः ।
प्रियङ्गवः कोविदाराः कोरदूषाः सचीणकाः ।
माषा मुद्गा मसूराश्च निष्पावाश्च कुलत्थकाः

इति एतदादीनां द्विदलानां मध्ये यथैकस्य मानं वर्णितं अपरस्य मानं वर्णितं भवति तद्वत् ते अन्तरेण तयोर्मध्ये तत्तदवयवमुभयतः सन्धितं खगम ॥ २ ॥

तपनः सूर्यः स एव सूर्यः उदगयनादिसंज्ञाभिर्मान्द्यादिगतिभिः आरोहणादिस्थानेषु यथासम्भवं यथाकालमारोहणादिकर्माभिगच्छमानः मकरादिष्वहोरात्राणि दीर्घह्रस्वसमानानि विधत्ते करोति ॥३॥

समानानि भवन्ति अत्यन्तवैषम्यरहितानि भवन्तीत्यर्थः एकमहोरात्रं तु समं भवति वृषभमिथुनयोरह्नां वृद्धिः कर्कटादिषु तु ह्रासः तथापि अह्नां रात्रिभ्योऽधिकत्वाभिप्रायेण पञ्चसु वर्द्धन्ते इत्युक्तं रात्रिषु एकैकाघटिका मासि ह्रसतीति स्थूलदृष्ट्योक्तम् । प्रतिमासं वैषम्यात् ॥ ४ ॥

भाषाटीका ।

श्रीशुकदेव जी बोले इतनी ही पृथिवी मण्डल की रचना प्रमाण लक्षण से कही गई है ॥ १ ॥

इतनेही से आकाश का प्रमाण भी उसके ज्ञाता लोग कहते हैं जैसे चनाआदिकोंके दो दल बराबर होते हैं। उन दोनों के मध्यमें दोनों से मिलाहुआ अन्तरिक्ष लोक है ॥ २ ॥

जिन दोनोंके मध्यमें रहकर सब तेजवालों के पति भगवान् सूर्य अपने तेज से तीनों लोकों को तपाते हैं और अपने प्रकाश से सब को प्रकाशित करते हैं सो यही सूर्यदेव मन्द शीघ्र समान गतियों से उत्तरायण दक्षिणायन वैषुवत मण्डलों से ऊपर को जाना नीचे को आना बीचमें रहना इन क्रियों से यथा काल चलते हुये मकरादिक राशियों में अहोरात्रों को बडा छोटा मध्यम करते हैं ॥ ३ ॥

जब मेष और तुला राशिपर रहते हैं तब अहोरात्र बरोबर होते हैं जब वृषादि पांच राशियों में घूमते हैं तब दिन ही बढते हैं रातों में एक एक घडी कम होती जाती है ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विपर्ययाणीति अहानि न्यूनानि रात्रयोऽधिका इत्यर्थः ॥ ५ ॥

तद्वृद्धिह्रासकालमाह । यावदिति ॥ ६ ॥

एवं मन्दादिगतिभिः नव कोटय इति मेरोरुभयतो मानसोत्तरस्यान्तर्विस्तारेण पञ्चदशलक्षाधिककोटित्रयपरिमितमेवं परिमण्डलमपिमुष्यमेवं पञ्चदशभिर्घटिकाभिरित्यादिष्वपि त्रैराशिकगणितेन तत्तन्मानमुन्नेयम् । मतान्तरचिन्तने विशेषः पुराणान्तरादवगन्तव्यः । तथाऽरोहणादिस्थानानि वायुपुराणे दर्शितानि ।

सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः ! ।
स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम् ॥
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ।

इति तदेव मध्योत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैर्नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् आर्षभी गोवीथी जारद्गवी चेति वैषुवते मध्यमार्गे वीथीत्रयम् । अजवीथी मृगवीथी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रयं तदप्युक्तं तत्रैव ।

अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता ।
रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥
पुष्याश्लेषा तथादित्या वीथी चैरावती स्मृता ।
एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥
तथा द्वे चापि फाल्गुन्यौ मघा चैवार्षभी मता ।
हस्तश्चित्रा तथा स्वाती गोवीथीति तु शब्दिता ।
ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता ।
एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दिता।
श्रवणं च धनिष्ठा च मार्गी शतभिषक् तथा॥
वैश्वानरी भाद्रपदे रेवती चैव कीर्तिता।
एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते॥

इति याम्या भरणी आदित्या अदितिदेवताका पुनर्वसुः मार्गी मृगशीर्षा एवं स्थिते उत्तरायणे ध्रुवेण युगान्तकोटिनिबद्धवायुपाशद्वयाकर्षणे रथस्यारोहणं तदाऽभ्यन्तरमण्डलप्रवेशो गतेः मान्द्यं चेति दिनवृद्धी रात्रिह्रासश्च दक्षिणायने च पाशप्रसारणादवरोहणे बहिर्मण्डलप्रवेशो गतिशैघ्र्यं चेत्यहोरात्रयोर्विपर्ययः वैषुवते तु पाशमध्यस्थसमावस्थाने मध्यमण्डलप्रवेशो गतिसाम्यश्चेत्यहोरात्रयोः साम्यमिति तथाच पुराणान्तरम्।

आकृष्येते यदा तौ तु ध्रुवेण समधिष्ठितौ।
तदाऽभ्यन्तरतः सूर्यो भ्रमते मण्डलानि तु॥
ध्रुवेण मुच्यमानेन पुना रश्मियुगेन तु।
तथैव बाह्यतः सूर्यो भ्रमते मण्डलानि च॥

इति तदेतदुक्तम्। यदा मेषतुलयोरित्यादिना। उदयास्तादिकं वक्तुमाह। तस्मिन्मानसोत्तरे मेरोः पूर्वेण ऐन्द्रीं पुरीमुपदिशतीत्यनुषङ्गः तासु पुरीषूदयादीन्युपदिशन्ति चतुर्दिशमित्युक्तेः ये मेरोर्दक्षिणे देशे तेषामैन्द्रीमारभ्य पूर्वादयः ये पश्चिमे तेषां याम्यामारभ्य ये उत्तरे तेषां वारुणीमारभ्य ये पूर्वे तेषां सौम्यामारभ्य॥ ७॥

तत्रत्यानां मेरुस्थानाम्। सव्येनेति। नक्षत्राभिमुखतया अगत्या मेरुं वामतः कुर्वन्नपि प्रदक्षिणावर्तप्रवहाख्यवायुभ्राम्यमाणज्योतिश्चक्रवशात्प्रत्यहं दक्षिणतः करोति अतश्चक्रगतिवशादतिदूरतो भूमेलग्नस्येव दर्शनमुदयः आकाशमारूढस्येव दर्शनं मध्याह्नः भूमिं प्रविष्टस्येव दर्शनमस्तमयः ततोऽतीव दूरगमने निशीथ इति समुद्रतीरस्थप्रथा च "अग्निर्वा एष प्रातरुदेत्यपः सायं प्रविशति" इति श्रुतिव्यवहारो न वस्तुतः तदुक्तं वैष्णवे।

उदयास्तमये चैव सर्वकालं तु संमुखे।
दिशास्वशेषासु तथा मैत्रेय! विदिशासु च॥
यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः।
तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः॥
नैवास्तमनमर्कस्य नोदयः सर्वदा सतः।
उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः॥
शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम्।
विकोणौ द्वौ विकोणस्थस्त्रीन् कोणान् द्वे पुरे तथा॥

इति अत एव तत्रैवोक्तम्।

तस्माद्दिश्युत्तरस्यां वै दिवारात्रिः सदैव हि।
सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतः स्थितः॥

इति यतो यत्र यः पश्यति सैव तस्य प्राची तस्य च वामतो मेरुस्तिष्ठतीति॥ ८॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

यद्यपि वृषभमिथुनयोरेवाह्नां वृद्धिः कर्कटादिषु ह्रासस्तथापि दक्षिणायनेऽप्याधिक्याद्वर्द्धन्त इत्युक्तं ह्रसन्ति चेति मासि मासि रात्रिषु एकैका घटिका ह्रसति अहस्सु एकैका घटिका वर्द्धत इत्यर्थः वृश्चिकधनुर्मकरकुम्भराशिषु पञ्चसु वर्तते चरति तदाहोरात्राणि विपर्ययाणि रात्रयो वर्द्धन्तेऽहानि ह्रसन्तीत्यर्थः पूर्वोद्दिष्टमासेष्वत्र ह्रासो बोध्यः अत्राप्येकैका घटिका रात्रिषु वर्द्धतेऽहस्सु ह्रसतीत्यवगन्तव्यमिदं च स्थूलदृष्ट्योक्तं वृद्धिह्रासयोः प्रतिमासवैषम्यादथ वास्तविकं वृद्धिह्रासमाह। यावदिति। दक्षिणायनपर्यन्तमहानि वर्द्धन्ते रात्रयो ह्रसन्ति तत उत्तरायणपर्यन्तमहानि ह्रसन्ति रात्रयो वर्द्धन्त इत्यर्थः एतदेव प्रपञ्चितं श्रीवैष्णवे।

अयनस्योत्तरस्यादौ मकरं याति भास्करः।
ततः कुम्भं च मीनं च राशेराश्यन्तरं द्विज!॥
त्रिष्वेतेषु च भुक्तेषु ततो वैषुवतीं गतिः।
प्रयाति सविता कुर्वन्नहोरात्रं ततः समम्॥
ततो रात्रिः क्षयं याति वर्द्धतेऽनुदिनं दिनम्।
ततश्च मिथुनस्यान्ते परां काष्ठामुपागतः॥
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम्।
कुलालचक्रपर्यन्तो यथा शीघ्रं प्रवर्त्तते॥
अतिवेगितया कालं वायुवेगबलाच्चरन्।
तस्मात् प्रकृष्टां भूमिं तु कालेनाल्पेन गच्छति॥
सूर्यो द्वादशभिः शैघ्र्यान्मुहूर्तैर्दक्षिणायने।
त्रयोदशार्द्धमृक्षाणां ह्रासमाचरते द्विज!॥
मुहूर्त्तैस्तावदृक्षाणि नक्तमष्टादशैश्चरन्।
कुलालचक्रमध्यस्थो यथा मन्दं प्रवर्त्तते॥
तथोदगयने सूर्यः सर्पते मन्दविक्रमः।
तस्माद्दीर्घेण कालेन भूमिमल्पां च गच्छति॥
अष्टादशमुहूर्तं तु उत्तरायणपश्चिमम्।
अहो भवति तत्रापि चरते मन्दविक्रमः॥
त्रयोदशार्द्धमह्ना वै ऋक्षाणां चरते रविः।
मुहूर्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन्॥
अतो मन्दतरं नाभ्यां चक्रं भ्रमति वै यथा।
कुलालचक्रनाभिस्तु यथा तत्रैव वर्तते॥
ध्रुवस्तथा हि मैत्रेय! तत्रैव परिवर्तते।
उभयोः काष्ठयोर्मध्ये भ्रमते मण्डलानि तु॥
दिवा नक्तं च सूर्यस्य मन्दा शीघ्रा च वै गतिः।
एवं प्रमाणमेवैष मार्गं याति दिवाकरः॥
अहोरात्रेण यो भुङ्क्ते समस्ता राशयो द्विज!।
षडेव राशीन् यो भुङ्क्ते रात्रावन्यांश्च षड्दिवा॥
राशिप्रमाणजनिता दीर्घह्रस्वात्मता ततः।
तथा निशायां राशीनां प्रमाणैर्लघुदीर्घता॥
दिनान्ते दीर्घह्रस्वत्वं तद्भागेनैव जायते।
उत्तरे प्रक्रमे शीघ्रा निशि मन्दा गतिर्दिवा॥
दक्षिणे त्वयने सैव विपरीता विवस्वतः।

इति यदा मेषतुलयोर्वर्तते तदाहोरात्राणि समानानि भवन्ति इत्यनेन उत्तरायणे मेषमासे साम्यमहोरात्रस्य दक्षिणायने तुलामासे साम्यमित्युक्तमेतदेव श्रीवैष्णवेऽप्युक्तम्। "तुलामेषगते भानौ समं रात्रिदिनं तु तत्" इति। एवं सूर्यस्य मन्दादिगतिभिरहोरात्रपरिमाणविभाग उक्तः अथाहोरात्रविभागादपरिमाणविभागार्थम् मानसोत्तरे मेरुं परिभ्रमता सूर्येण

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कति योजनानि परिभ्रमितानि भवन्तीत्यपेक्षायामाह । एवमिति । एवं मन्दादिगतिभिर्मानसोत्तरगिरिपरिवर्त्तमानस्य मानसोत्तरे मेरुपरिवर्त्तमानस्य योजनानां तेन परिभ्राम्यमाणानां योजनानां नवकोट्य एकपञ्चाशल्लक्षाणि चेत्युपदिशन्ति इत्यर्थः अथोदयास्तमयादिस्वरूपं विवक्षुस्तदुपोद्घातं प्रपञ्चयति । तस्मिन्नित्यादिना विभावरीनामेत्यन्तेन । तस्मिन्मानसोत्तरगिरौ पूर्वक्रमात्पूर्वस्मिन् दिशि देवधानीं नाम पुरीं दक्षिणादिशि नाम्ना संयमनीं पुरीं पश्चिमे वारुणीं नाम वरुणाधिष्ठितां निम्लोचनीं नाम उत्तरतः सौम्यां सोमाधिष्ठितां विभावरीं नाम पुरीमुपदिशन्तीति पूर्वेणान्वयः । ऐन्द्रीमिति । इन्द्राधिष्ठितामिन्द्रेण रक्ष्यमाणामित्यर्थः तथा याम्यामिति यमेन पाल्यमानामिति ज्ञेयम अथोदयादिक्रममाह । तास्विति । तासु देवधान्यादिचतसृषु पुरीषु मेरोश्चतुर्दिशं चतुर्दिक्षु समयविशेषेण कालविशेषेण भूतानां भूमण्डलस्थानां प्रवृत्तिनिवृत्तिनिमित्तानि व्यापारतदभावनिमित्तानि उदयादीनि भवन्ति तत्रास्तमयान्तानि प्रवृत्तिनिमित्तानि उदयादीनि प्रवृत्तिनिमित्तानि निशीथादीनि निवृत्तिनिमित्तानि तदा भूतानां सुषुप्त्यादिरिति विवेकः आदिशब्दात्पूर्वोत्तरराश्रयणा विवक्षिताः मेरोश्चतुर्दिशामित्यस्यायं भावः यानि मेरोर्दक्षिणतः भूतानि तेषामैन्द्रीमारभ्य पूर्वादयो दिशस्तु क्रमेण उदयादयस्त्वत्र अर्थान्ति यानि पश्चिमतः तेषां याम्यामारभ्य यान्युत्तरतस्तेषां वारुणीमारभ्य यानि पूर्वतस्तेषां सौम्यामारभ्येति ज्ञेयमिति मेरौ स्थितानां तु नोदयादिकमस्तीत्याह । तत्रत्यानामिति । तत्रत्यानां मेरौ स्थितानां भूतानामादित्यः विषमं मध्यं गतः एव मध्याह्नगत एव सदा विद्यमानः व्यापारयन् तपति प्रकाशते किञ्च सर्वेषां द्वीपवर्षाणां मेरुमुत्तरं करोतीत्याह । सव्येनेति । आदित्यं पश्यतां सव्येन स्थितं मेरुमारभ्य स्वदक्षिणभागे स्थितं करोतीत्यर्थः यत्र यः पश्यत्यादित्यं सैव तत्र प्राची तस्य च वामतो मेरुस्तिष्ठतीति भावः समयविशेषेत्यस्यायमभिप्रायः "उदयास्तमने चैव सर्वकालं तु सम्मुखे । दिशास्वशेषासु तथा मैत्रेया ! विदिशासु च । यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः । तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः । नैवास्तमनमर्कस्य नोदयः सर्वदा सतः । उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः । शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् । विकोणौ द्वौ विकोणस्थस्त्रीन् कोणान् द्वे पुरे तथा" । इति विष्णुपुराणोक्तरीत्या दक्षिणावर्त्तप्रवहाख्यवायुना भ्रममाणज्योतिश्चक्रवशाद्दूरतो भूतलप्रदेशे कालविशेषे दर्शनमुदय आकाशमारूढस्यैव दर्शनं मध्याह्नः भूमिप्रविष्टस्येव दर्शनमस्तमयः ततोऽतिदूरगमने निशीथ इति कालविशेषकृताविर्भावादिकमेवोदयादिकमिति एवम "अहृतो वा एष प्रातरुदेति अपः सायं प्रविशति" इति श्रौतव्यवहारोऽपि समुद्रतीरस्थदृष्टिकृतः मानसोत्तरे भ्रमतो रवेरप्सु प्रवेशासम्भवादिति भावः ॥ ५--८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव विविच्य दर्शयति । यदेति । वृषभादिकन्यान्तेषु वृद्धिश्च मेषश्च भवतः तौ कियन्तावित्ति तत्राह । मासीति वर्द्धते ह्रसति चेति शेषः अत्र वृद्धिह्रासयोरेकैका घटिकेति नियमो नास्ति त्रिचतुरादिवृद्धिदर्शनात्तर्हि मुहूर्तानामपि वृद्धि-ह्रासौ स्यातामिति नेत्याह । तुल्यं दिनमिति । त्रिंशन्मुहूर्तमेव दिवसमाहुरित्यर्थः कथं तुल्यत्वमिति तत्राह । वर्द्धमानानीति । वर्द्धमानान्यहानि भवन्ति तावत्यस्तावन्त्यो वर्द्धमाना रात्रयश्च संक्षीयमाणाः ह्रसन्त्यश्च याभ्यः समुत्कृत्य घटिकाभिरेकीकृत्य त्रिंशन्मुहूर्तान्यहोरात्राणि समानानि भवन्ति वृश्चिकादिषु मीनान्तेषु अहोरात्राणि विपरीतानि अहानि ह्रसन्ति रात्रयो वर्द्धन्ते ॥ ५ ॥

मकरादिषु वृश्चिकादिषु मेषतुलयोरित्येषु कथितं सङ्ख्याह । यावदिति । अथवा आवहप्रवहोद्वहसंवहविवहपरिवहपरावहनामानः सप्त वायवो ज्योतिश्चक्रस्य प्रवर्तकास्तत्र ज्योतिश्चक्राधिपत्यादित्यगमनस्य तिस्रो वीथ्यो मध्यमोत्तरा दक्षिणा च तदुक्तम

सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः ! ।
स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम ।
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ॥

इति तत्र वीथीत्रयमेकैकं त्रिधा भवति अश्विन्यादिनक्षत्राणां त्रिभिस्त्रिभिर्नक्षत्रैर्नागवीथी गजवीथ्यैरावतीवीथीत्युत्तरमार्गे वीथीत्रयम् आर्षभी गोवीथी जारद्गवी चेति एवं मध्यमार्गे वीथीत्रयं अजवीथी मृगवीथी वैश्वानरी चेति दक्षिणमार्गे वीथीत्रयम एतद्वायुपुराणे कथितम

अश्विनी कृत्तिका याम्या नागवीथी तु शब्दिता ।
रोहिण्यार्द्रा मृगशिरो गजवीथ्यभिधीयते ॥
पुष्याश्लेषा तथादित्या वीथी चैरावती मता ।
एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते ॥
तथा द्वे चापि फाल्गुन्यौ मघा चैवार्षभी मता ।
हस्तश्चित्रा तथा स्वाती गोवीथीति तु शब्दिता ॥
ज्येष्ठा विशाखानुराधा वीथी जारद्गवी मता ।
एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥

याम्या भरणी आदित्या अदितिदेवताका पुनर्वसुः मार्गी मृगवीथी तत्र च युगाक्षकोटिसम्बद्धवायुपाशद्वयस्य ध्रुवेणाकर्षणं यदा तदाऽभ्यन्तरमण्डलगमनाय रथस्यादित्यारोहणं वायुपाशशैथिल्ये च बहिर्मण्डलगमनार्थमवरोहणम ।

आकृष्येते यदा तौ तु ध्रुवेण समधिष्ठितौ ।
तदाऽभ्यन्तरतः सूर्यो भ्रमते मण्डलानि तु ॥
ध्रुवेण मुच्यमानेन पुना रश्मियुगेन तु ।
तथैव बाह्यतः सूर्यो भ्रमते मण्डलानि च ॥

इति तत्र बाह्यवीथ्यां गतस्य शीघ्रगतित्वादिनह्रासो रात्रिवृद्धिश्च अभ्यन्तरवीथ्यां गतस्य मन्दगतित्वाद्रात्रिह्रासो दिनवृद्धिश्च मध्यवीथ्यां गतस्य समानगतित्वादहोरात्रसाम्यमित्यादित्यस्योपस्तु कालविशेषविशेषो भवतीत्यत इति तदधिकारिभिः कस्मादित्यत्र यत्नो न क्रियत इति ॥ ६ ॥

इदानीमेकाहोरात्रगन्तव्यमार्गसङ्ख्यामाह । एवमिति । एवं त्रिविधगतिभिः त्रिविधराशिषु वर्तमानस्यादित्यस्य रथचक्रस्यैकस्मिन्नहोरात्रे मानसोत्तरशिखरे यत्परिवर्तमानं परितो भ्रमणं तस्य मार्गमेकपञ्चाशल्लक्षाधिकनवकोट्य इति व्यपदिशन्ति तन्मार्गज्ञा इति शेषः तस्मिन्मानसोत्तरपर्वते पूर्वस्मान्मेरोः पूर्वदिक्सूत्रनिपाते दक्षिणात आदित्यरथं सौम्या सोमस्य

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विद्यमाना तासु पुरीषु तत्पुरस्थितस्यावस्थितस्य यानि गगनाग्रदृगा-दिसंज्ञानि स्युः समयविशेषेण सङ्क्रान्तिविशेषेण न हि सर्वदा मध्य-न्दिनः उदयादिकमस्ति मेरोश्चतुर्दिशि स्थितानां भूतानां प्रवृत्तिनिवृ-त्तिनिमित्तानि तत्रोदयमध्याह्न प्रवृत्तिनिमित्ते अस्तङ्गमनमा-त्रनिवृत्तिनिमित्तम् निशीथमतिरहितः संसरमाणानां सम्यक् निवृत्तिनिमित्तमुक्ता निशीथगन्तराग्रम् ॥ ७ ॥

तत्रत्यानामित्यादिस्वरूपदर्शनाभिमतं सव्येनाचलमचलस्य मेरु-नाम्नो वामपार्श्वतो गच्छन्नचलं दक्षिणेन स्वस्य दक्षिणतः सर्वदा करोति "सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतः स्थित" इति न्यायेन सर्वदिक्स्थस्यापि मेरोः पूर्वाभिमुखत्वात् सर्वत्र गच्छन् सव्येनैव गच्छत्यादित्य इत्यर्थः गतिघटनोपरि वक्ष्यते च ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एकपञ्चाशल्लक्षाणि चेति विचार्यम् । मण्डलत्रिगुणेन पञ्चत्रयस्त्रिंशल्लक्षाधिकत्वमेव स्यात् किन्तु मूलगतं मानसोत्तरः पुष्कर-द्वीपार्द्धमितकस्य लक्षद्वययोजनोपरि स्यात् । टीकायां वायु-पुराणमतेन वीथीगणना न तु नक्षत्राणामवस्थितिक्रमेण तेषा-मन्यत्रान्यत्र दृश्यमानत्वात् । न च भौमक्रमेण । तथा च सति आरोहावरोहाभ्यां रेवत्याश्विन्योरव्यवहितवीथ्योरव्यवहितवीथ्यो-श्चित्राश्विन्योश्चैकत्वमेव वीथ्यां गणना स्यात् । ततस्तेषां नक्ष-त्राणां तत्र तत्र सम्बन्धः कथञ्चित् प्रकारान्तरेणैव स्यात् । तत्र तासां तत्तद्वीथ्यधिष्ठातृदेवतात्वेनैवेति ज्ञेयम् । तथा टीकायामेव तदाभ्यन्तरमण्डलान्तरगो गतिमान्द्यञ्चेति । अन्तर्मण्डलस्य स्वल्पभूमित्वात् परिवर्त्तस्य बहुंशेऽपि सूर्यादिदृष्टिविषयो भवति । सोऽपि मान्द्यकृद्वृत्तभवत्वेनैव मान्द्यं भवतीत्यर्थः । मण्डलश्रेणी-तत्पर्यायेण गच्छति । उत्तरायणमध्याह्ने मूर्द्धन्येव सूर्यो दृश्यते इति । एवं बहिर्मण्डलस्य बहुभूमित्वादन्तमारभ्य परिवर्त्तस्य स्वल्पांश एव सूर्यादिर्दृश्यते । सोऽपि विप्रकृष्टवृत्तभवत्वेनैव शैघ्र्यं भवतीत्यर्थः ॥ ७ ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

विपर्ययणानि । महानि न्यूनानि रात्रयोऽधिका इत्यर्थः ॥ ५ ॥

यावद्दक्षिणायनमिति । उत्तरायणाद्दक्षिणायनपर्यन्तमित्यर्थः एवमग्रेऽपि ॥ ६ ॥

नवकोट्य इति । मेरोरुभयतो मानसोत्तरस्यान्तर्विस्तारो यस्तस्य परिमाणं पञ्चाशल्लक्षाधिककोटित्रयं सूर्यरथवर्त्मनश्च लक्षद्वयमित्येवं सपादशतलक्षोत्तरकोटित्रयेण त्रिगुणीकृतेनैतत्-परिमण्डलमानमुक्तं मेरोः पूर्वस्मात् पूर्वस्यां दिशि यन्मानसो-त्तरं तस्मिन्नैन्द्रीं पुरीमुपदिशन्तीत्यनुषङ्गः तासु पुरीषूदया-दीन्युपदिशन्ति । चतुर्दिशमित्युक्तेर्ये मेरोर्दक्षिणा देशे वर्त्तेरन् तेषामैन्द्रीमारभ्य पूर्वोदयः ये पश्चिमे तेषां याम्यामारभ्य ये उत्तरे तेषां वारुणीमारभ्य ये पूर्वे तेषां सौम्यामारभ्य अत एव "सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतः स्थित" इति वैष्णवोक्तिः ॥ ७ ॥

तत्रत्यानां मेरुस्थानां सव्येनेति नक्षत्राभिमुखतया स्वगत्या मेरुं वामतः प्रकुर्वन्नपि प्रदक्षिणावर्त्तप्रवर्त्तकप्रवहाख्यवायुना भ्राम्यमाणज्योतिश्चक्रवशात् प्रत्यहं दक्षिणतः करोति । अतश्चक्र-गतिवशादतिदूरतः भूमेस्तमस्त्वेन दर्शनमुदयः आकाशमध्य-मारूढत्वेन दर्शनं मध्याह्नः भूमिप्रविष्टत्वेनादर्शनमस्तमयः । ततोऽतिदूरगमने निशीथ इति अत एव समुद्रादुद्यन्निव दृश्यते च "सद्रूपं वा एष पातरुदेति सायं प्रविशति" इति श्रुतिरपि व्यवहारतो न तु वस्तुतः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विपर्ययणानि रात्रयो वर्द्धन्ते अहःसु एकैका घटिका ह्रसति अत्रापि रात्रीणां वृद्धिः मासि मासि घटिका ह्रासश्च पूर्ववदेव ॥ ५ ॥ ६ ॥

एवं मन्दादिगतिभिः मानसोत्तरगिरिपरिवर्त्तनस्य नव कोटयः एकपञ्चाशल्लक्षाणि चेत्युपदिशन्ति तस्मिन्मानसोत्तरे मेरोः पूर्वतः ऐन्द्रीं देवधानीं नामोपदिशन्तीत्यनुषङ्गः मेरोश्चतुर्दिशं तासु पुरीषु समयविशेषेण कार्यप्रवृत्तिनिवृत्तिकालभेदेन भूतानां कार्यप्रवृत्तिनिवृत्त्योः निमित्तानि उदयादीन्युपदिशन्ति चतुर्दिश-मित्यनेन मेरोर्दक्षिणादिदेशस्थानामैन्द्र्यादिषु क्रमेणोदयादीनि स्यु-रित्युक्तम् । यथोक्तं श्रीविष्णुपुराणे ।

यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ।
तिरोभावं च यत्रैति तत्रैवास्तमनं रवेः ।

इति ॥ ७ ॥

मेरुस्थानां तूदयादिकं नेत्याह । तत्रत्यानामिति । सव्येनाचलं दक्षि-णेन करोतीति नक्षत्राणामभिमुखतया स्वगत्या मेरुं सव्येन कुर्वन्नपि प्रदक्षिणावर्त्तप्रवहाख्यवायुप्रचालितज्योतिश्चक्रगतिवशा-द्दक्षिणेन करोति दक्षिणतः करोति ॥ ८ ॥

भाषा टीका ।

जब वृश्चिकादि पांच राशियों में रहते हैं सूर्य तब रातदिन बढ़ने घटने में विपरीत होजाते हैं ॥ ५ ॥

जब तक दक्षिणायन होता है तबतक दिन बढ़ते हैं जब तक उत्तरायण होता है तबतक रात्री बढ़ती हैं ॥ ६ ॥

इस प्रकार से एक कोटि एक पंचाशल्लक्षयोजन मान-सोत्तर पर्वत का परिमाण कहते हैं तिस मानस पर्वत में मेरु से पूर्व देवधानी नामक इन्द्र की पुरी है दक्षिण में संयमनी नामक यम की पुरी है पश्चिम में निम्लोचनी नाम की वरुण की पुरी है उत्तर में विभावरी नाम की कुबेर की पुरी है उन पुरियों में सूर्य का उदय मध्यान्ह अस्त अर्धरात्र क्रमसे समय विशेष से मेरु के चारों दिशों में होते हैं जिनसे कि सब प्राणियों की प्रवृत्ति औ निवृत्ती होती हैं ॥ ७ ॥

मेरुमे रहनेवालों को मध्य दिनहीमें सदा सूर्य प्रकाशित होते हैं बाये तरफके मेरु को भी सूर्य दाहिने तरफ करते हैं ॥ ८ ॥

यत्रोदेति तस्य ह समानसूत्रनिपाते निम्लोचति यत्र क्वचन स्यन्देनाभितपति तस्य हैष समानसूत्रनिपाते प्रस्वापयति तत्र गतं न पश्यन्ति ये तं समनुपश्येरन् ॥ ९ ॥

यदा चैन्द्र्याः पुर्याः प्रचलते पञ्चदशघटिकाभिर्याम्यां सपादकोटिद्वयं योजनानां सार्द्धद्वादशलक्षाणि साधिकानि चोपयाति ॥ १० ॥

एवं ततो वारुणीं सौम्यामैन्द्रीं च पुनस्तथाऽन्ये च ग्रहाः सोमादयो नक्षत्रैः सह ज्योतिश्चक्रे समभ्युद्यन्ति सह वा निम्लोचन्ति ॥ ११ ॥

एवं मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते पुरीषु ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यथोक्तमुदयास्तमनादिनियमं दर्शयति । यत्रोदेतीत्यादिना । स्यन्देन स्वेदोद्गमेन । प्रस्वापयति निशीथं करोति । ये तं समनुपश्येरन् प्रस्वापसमानसूत्रस्थाः ॥ ९ ॥

साधिकानि पञ्चविंशतिसहस्राधिकानि ॥ १० ॥

सह वा सहैव यद्यपि वस्तुतः सूर्यस्यापि नक्षत्रैः सहैवोदयास्तमयौ तथापि तस्य तत्साहित्यादर्शनात्सोमादीनामेव तत्साहित्यमुक्तम् ॥ ११ ॥

त्रयीमय इत्याद्युपासनार्थम् ॥ १२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यथोक्तमस्योदयास्तमनादेर्नियमं दर्शयति । यत्रोदेतीत्यादिना । यत्र पैन्द्र्यादिपुरे उदेति उदयं प्राप्नोति दृष्टो भवतीति यावत् तस्य उदयस्थानस्य समानसूत्रनिपाते वारुण्यां निम्लोचत्यस्तं गच्छति न नियतदर्शनं प्राप्नोतीत्यर्थः यत्र हि याम्यादौ पुरि स्यन्देनाभितपति स्वेदोद्गमेनाभितपति मध्याह्नस्थितो भवतीति यावदेव भगवान् सूर्यस्तस्य समानसूत्रनिपाते न्यूनाधिकदेशे सौम्यादौ पुरे स्थितो प्रस्वापयति याम्यादिदिक्स्थितानां अर्धरात्रं करोतीत्यर्थः ये याम्यादिदिक्स्थिताः अस्तं गतं सूर्यमनुपश्येरन् ते तत्र गतं सौम्यादिगतं न पश्यन्ति एवं याम्यादिषु पुरीषु उदयादिनियमो द्रष्टव्यः ॥ ९ ॥

एवमुदयादिदेशनियम उक्तः अथैन्द्र्यादिपुर्याः याम्यादिपुरीं कियता कालेन कति योजनानि गच्छतीत्यपेक्षायामाह । यदेति । यदा ऐन्द्र्यादिपुर्याः प्रचलति निष्क्रान्तो भवति तदा पञ्चदशघटिकात्मकेन कालेन त्रैराशिकगणितेन योजनानां सार्द्धद्वादशलक्षाणि साधिकानि पञ्चविंशतिसहस्राधिकानि सपादकोटिद्वयं पञ्चविंशतिलक्षाधिककोटिद्वयं चातिक्रम्यति शेषः याम्यां पुरीमुपयाति ॥ १० ॥

एवं ततो याम्यायाः प्रचलति एवमुक्तकालेन उक्तयोजनानि वारुणीं पुरीं गच्छति एवमुत्तरत्रापि योज्यमेवं सूर्यस्योदयास्तमयादिरूपं तद्देशनियमं कालपरिमाणं योजनपरिमाणं चाभिधायाथ सोमादीनामपि ग्रहाणामभ्युदयादिकमाह । तथेति । ज्योतिश्चक्रे तारागणेन सह वर्तमाना अन्ये सोमादयो ग्रहा अपि नक्षत्रैरश्विन्यादिभिः सह तथा सूर्यवदैन्द्र्यादिपुरीषु गमनं प्रत्यभ्युद्यन्ति उद्गच्छन्ति उदयं प्राप्नुवन्ति सहैव निम्लोचन्त्यस्तं प्राप्नुवन्तीत्यर्थः यद्यपि वस्तुतः सूर्यस्यापि नक्षत्रैः सहैव उदयास्तमयौ तथापि तत्साहित्यादर्शनात्सोमादीनामेव तत्साहित्यमुक्तमिति भावः ॥ ११ ॥

पञ्चदशघटिकाभिः सपादकोटिद्वयं साधिकानि सार्द्धद्वादशलक्षाणि योजनानि गच्छतीत्युक्तं तत्रैकेन मुहूर्तेन कति योजनानि गच्छतीत्यपेक्षायामाह । एवमिति । त्रयीमय इत्युपासनार्थमुक्तं वेदरूपेणोपास्यः सौरो रथ एकमुहूर्तेनाष्टशताधिकचतुस्त्रिंशल्लक्षयोजनानि चतसृष्वैन्द्र्यादिषु पुरीषु परिभ्रमति कोऽसौ सौरो रथः एकेन मुहूर्तेन यः परिभ्रमति तत्राह । यस्येति । यस्य सौररथस्यैकं चक्रं संवत्सरात्मकं समामनन्त्युशन्ति चक्रं विशिनष्टि । द्वादशारं द्वादश मासा अरा यस्य षड्नेमि ऋतवो यस्य त्रीणि चातुर्मास्यानि नाभयो यस्य इदमप्युपासनार्थमेवोक्तं मासाद्यारादिरूपेण संवत्सररूपेण चोपास्यमानमित्यर्थः सौरो रथः परिवर्तत इत्युक्तं स किं निरालम्ब एव भ्रमतीत्यत्र विशिनष्टि । यस्येति । यस्य रथस्याक्षो मेरुमूर्धनि कृतमूलः अक्षशब्दोऽत्रोपमानादानिश्चलनायां भुवि धमनं एवं छिन्नोऽक्ष इत्यत्रापि यत्र रथो मानसोत्तरे कृतोत्तरभागः मानसोत्तरगिरौ तत्राक्षोपरि वायुचक्रभूमौ कृतोत्तरभागः वायुना निबद्धोत्तरभागः अन्यथा युनाक्षमात्रचक्रगत्वान्मानसोत्तरगिरिसंस्थितु कोटिसमीपस्थितयोजनोच्छ्रायस्याद्रेरतस्य साम्यानुपपत्तेः कोऽसावितरभागो यो मानसोत्तरे कृतमूलः तत्राह । यस्मिन्निति । यत्र इतरभागे प्रोतं सद्वितीयचक्रं तैलयन्त्रचक्रवत् मानसोत्तरगिरौ परितो भ्रमति ॥ १२ ॥ १३ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत्रोदेति । तत्समानसूत्रनिपाते पश्चिमभागे निम्लोचति दक्षिणायने किञ्चित्किञ्चिद्दक्षिणभागादन्ये सति किञ्चित्किञ्चिद्दक्षिणभागे पश्चिमे निम्लोचति एवमुत्तरायणे किञ्चित्किञ्चिदुत्तरतः उदयनिम्लोची याति एवमुद्यन्नादित्य उदयप्रदेशस्थस्तत्र निपातं विहाय यत्र क्वापि न स्पन्दते न चलति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्योदयस्थस्य समानसूत्रनिपाते विभावरीपुरि द्वारि स्थितोऽस्यजनान् प्रस्वापयति निद्रितान् करोति उन्नतशृङ्गच्छायापिहितं तत्र विभावर्यां गतं न पश्यन्ति जना इति शेषः ॥ ९ ॥

सार्धद्वादशलक्षाणि साधिकानीति । पञ्चविंशतिसहस्राधिकानि सार्धद्वादशलक्षाणीत्यर्थः ॥ १०—११ ॥

देवधान्या निर्गत्य संयमनीं प्रवेक्ष्यन् पञ्चदशघटिकाभिः कालात्ययैः पादोनार्धत्रिंशल्लक्षोत्तरकोटिद्वयमतिक्रम्य प्रविशति तपनः एवं चतुर्गुणितान्येतानि योजनानि सैकपञ्चाशल्लक्षनवकोटिसङ्ख्यानीति सर्वात्मना ज्ञातव्यम् ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

यत्रेति । यद्दीध्यर्थं गतदेश इत्यर्थः ॥ ९—११ ॥

मुहूर्तेन चतुस्त्रिंशदिति मानसोत्तरमानं नत्वन्यत्र एवं पूर्वत्र यत्तु ज्योतिःशास्त्ररीत्या तत्तद्देशे रव्युदयक्रमविचारेण रविपरिक्रमणीयं मण्डलमिदं स्वल्पमेव प्रतीयते तत् खलु चलना विदूरस्य स्वल्पस्यापि वृक्षादेः समसूत्रता बहुलदेशेन नैव स्यक्तुं शक्यते तथातिदूरं व्योमगतेनापि रविणा स्वल्पभूमिसमसूत्रतेति रविचलनस्य स्वल्पत्वव्यवहाराच्च विरुद्धं न च दृष्टिभ्रममात्रमिदं छायापि दृश्यमानतद्गतिमान्द्यमनुकरोति इति ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उदयास्तमयमध्याह्ननिशीथानां वर्षभेदेन व्यवस्थामाह यत्रेति । "यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृत" इति वैष्णवोक्तेः सूर्यस्य प्रथमदर्शनमेवोदयः निम्लोचस्तत्तं गच्छति उदयानन्तरत्रिंशद्घटिकान्ते स्पन्देन आकाशमध्यस्थः सन् प्रक्षेदोद्गमेन तस्य देशस्य समानसूत्रपातविषयीभूते देशे त्रिंशद्घटिकानन्तरं गतः सन्निति शेषः । प्रस्वापयति निशीथं करोति ये अस्तमुदयञ्च अनुपश्येरंस्ते जनास्तत्र गतं सूर्यं न पश्यन्त्यत एव स्वपन्ति तेन च मेरोर्दिक्चतुष्टये स्थितेषु मध्ये यदा यत्र सूर्यस्योदयो दृश्यते तदैव तस्मात् पूर्वे वर्षे मध्याह्नः पश्चिमे वर्षे निशीथः उत्तरवर्षे निम्लोचो ज्ञेयः । एवं मध्याह्नदर्शनसमय एव पूर्ववर्षे निम्लोचः पश्चिमवर्षे उदयः उत्तरवर्षे निशीथश्च ज्ञेयः । अस्तदर्शनसमय एव पश्चिमवर्षे मध्याह्नः पूर्ववर्षे निशीथः उत्तरवर्षे उदयश्च ज्ञेयः । तदेवं सर्ववर्षस्था अपि मेरोर्दक्षिणदेशस्थानेवात्मनो मन्यमानाः स्वस्वे वर्षे सूर्यस्योदयमध्याह्ननिम्लोचान् पश्यन्त एवान्येषु तान् पूर्वोक्तविवेकेन जानन्तीति संक्षेपः । विष्णुपुराणे स्थितोऽपि विशिष्योक्तम् ।

> शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् ।
> विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोणान् द्वे पुरे तथा ॥

इति अस्यार्थः शक्रादन्यतमस्य पुरे तिष्ठन् पुरत्रयं युगपत् स्पृशति द्वौ विकर्णौ कोणौ च । तथा हि शक्रपुरे तिष्ठन् शक्रदिग्वर्षे मध्याह्नं दक्षिणदिग्वर्षे उदयमुत्तरदिग्वर्षे अस्तमनं करोतीति पुरत्रयस्पर्शः अग्निकोणवर्षे प्रथमं याममीशानकोणवर्षे तृतीयं यामं करोतीति विकर्णद्वयस्पर्शः । विकर्णस्थः अन्यान्यतमकोणस्थः संस्त्रीन् कोणान् द्वे पुरे द्वे दिशौ च स्पृशति । तथा हि अग्निकोणे तिष्ठन् अग्निकोणवर्षे मध्याह्नं नैर्ऋतकोणवर्षे उदयमीशानकोणे अस्तमनं करोतीति कोणत्रयस्पर्शः । तथा दक्षिणदिग्वर्षे प्रथमो यामः पूर्वदिग्वर्षे तृतीयो यामः इति पुरद्वयस्पर्शः दिग्द्वयस्पर्शश्च । एवमन्येषु कोणेषु पुरेष्वपि द्रष्टव्यम् ॥ ९ ॥

साधिकानि पञ्चविंशतिसहस्राधिकानि ॥ १० ॥

सह वा सहैव ॥ ११ ॥

त्रयीमय इत्युपासनार्थम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र स्थाने उदेति उदितो दृष्टो भवति तस्योदयस्थानस्य समानसूत्रनिपाते निम्लोचति अदृष्टो भवति न च प्रातरधः स्थानादुद्गच्छति सायं चाधः स्थाने प्रविशतीति मन्तव्यम् "अङ्गयो वा एष प्रातरुदेत्यपः सायं प्रविशति" इति भगवती श्रुतिस्तु द्रष्टृजनमत्यनुसारिणीति भावः यत्र क्वचनजनविषये एव सूर्यः स्पन्देन स्वेदोद्गमेन प्रतपति मध्याह्नं करोति अभि आभिमुख्येन समानसूत्रनिपाते प्रस्वापयत्यर्धरात्रं करोतीति यावत् ये अस्तं गतं सम्यक् अनुपश्येरन् ते एव तत्रस्थाने स्थिताः न पश्यन्ति सूर्यस्तु सदा वर्तत एव तथाह भगवान् पराशरः ।

> नैवास्तमनमर्कस्य नोदयः सर्वदा सतः ।
> उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः ॥

इति ॥ ९ ॥

अधिकेन पञ्चविंशतिसहस्रात्मकेन सहितानि ॥ १०-११ ॥

एकेन मुहूर्तेन कतियोजनानि गच्छतीत्यत आह । एवमिति । त्रयीमयः वेदत्रयीरूपेणोपास्यः ॥ १२ ॥

भाषाटीका

जहां पर सूर्य देव उदित होते हैं तिसी के सामने अस्त होते हैं जहां पर मध्याह्न करते हैं तिसके सामने ही अर्धरात्र करते हैं तब उहां जाने से जो लोग उनको देखते थे सो नहीं देखते हैं ॥ ९ ॥

जब इंद्र की पुरी से सूर्य चलते हैं तब से पंद्रह घड़ी में सवा दो करोड़ साढ़े बारा लक्ष पचीस हजार योजन दूर दक्षिण संयमनी पुरी को जाते हैं तिसके पीछे वरुणपुरी कुबेरपुरी इंद्रपुरी को जाते हैं ॥ १० ॥

और सोमादिक सब ग्रह नक्षत्रों के ज्योतिश्चक्र में साथ ही उदित होते हैं साथ ही अस्त होते हैं ॥ ११ ॥

इस प्रकार से एक मुहूर्त में चौंतीस लाख आठ सौ योजन पर्यंत वेदत्रयीमय सूर्य का रथ चारों पुरों में घूमता रहता है ॥ १२ ॥

यस्यैकं चक्रं द्वादशारं षण्नेमि त्रिणाभि सम्वत्सरात्मकं समामनन्ति तस्याक्षो मेरोर्मूर्धनि कृतो मानसोत्तरे कृतेतरभागो यत्र प्रोतं रविरथचक्रं तैलयन्त्रचक्रवद्भ्रमन्मानसोत्तरगिरौ परिभ्रमति ॥ १३ ॥

तस्मिन्नक्षे कृतमूलो द्वितीयोऽक्षस्तुर्यमानेन सम्मितस्तैलयन्त्राक्षवद्ध्रुवे कृतोपरिभागः ॥ १४ ॥

रथनीडस्तु षट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान्रविरथयुगो यत्र हयाश्छन्दोनामानः सप्तारुणयोजिता वहन्ति देवमादित्यम् ॥ १५ ॥

पुरस्तात्सवितुररुणः पश्चाच्च नियुक्तः सौत्ये कर्मणि किलास्ते ॥ १६ ॥

तथा वालखिल्या ऋषयोऽङ्गुष्ठपर्वमात्राः षष्टिसहस्राणि पुरतः सूर्यं सूक्तवाकाय नियुक्ताः संस्तुवन्ति ॥ १७ ॥

तथाऽन्ये च ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त चतुर्दश मासि मासि भगवन्तं सूर्यमात्मानं नानानामानं पृथङ्नानानामानः पृथक्कर्मभिर्द्वन्द्वश उपासते ॥ १८ ॥

लक्षोत्तरं सार्द्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
ज्योतिश्चक्रसूर्यरथमण्डलवर्णनं नामैक-
विंशतितमोऽध्यायः ॥ २१ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादश मासा अरा यस्य । षडृतवो नेमयो यस्य । त्रीणि चातुर्मास्यानि नाभयो यस्य । कृत इतरभागो यस्य । मानसोत्तरगिरौ लग्नाक्षाग्रमुपरि वायुचक्रभूमाविति द्रष्टव्यं चक्रं वा तावदुच्छ्रितमिति मन्तव्यम् अन्यथायुतमात्रोच्छ्रायत्वान्मानसोत्तरस्य मेरोश्चतुरशीत्युच्छ्रायत्वाच्चतस्य साम्यानुपपत्तेः ॥ १३ ॥

तस्मिन्नक्षे चक्रप्रान्ते कृतमूलो निबद्धपूर्वभागः, प्रथमाक्षो मेरुमानसोत्तरायतः सार्धसप्तलक्षाधिकसार्धकोटिप्रमाणस्तस्य तुर्यमानेन सार्धसप्तत्रिंशत्सहस्राधिकैकोनचत्वारिंशल्लक्षमानेन ध्रुवे कृतो वायुपाशेन निबद्ध उपरिभागो यस्य ॥ १४ ॥

नीडं उपवेशस्थानं गायत्र्यादिच्छन्दोनामानः अरुणेन योजिताः सन्तो देवं वहन्ति ॥ १५ ॥

पुरस्तात्स्थितोऽपि पश्चात्प्रत्यङ्मुख आस्ते । यद्वा । यत्सूर्यस्य पुरस्तात्तस्यैव पश्चिमत्वात्पश्चादित्युक्तम् । अश्वस्थानं च वायुनोक्तम् ।

सप्ताश्वरूपच्छन्दांसि वहन्ते वामतो रविम् ।
चक्रपक्षनिबद्धानि चक्रे चाक्षः समाहितः ।

इति ॥ १६ ॥

सूक्तवाकाय सुभाषिताय ॥ १७ ॥

एकैकशश्चतुर्दश द्वन्द्वशः सप्त गणाः सन्तो मासि मास्युपासत इत्यन्वयः ॥ १८ ॥

गव्यूतिः क्रोशद्वयं सगव्यूत्युत्तरं यथा भवति तथा ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तस्मिन्नक्षे चक्रप्रान्ते कृतमूलः निबद्धपूर्वभागः द्वितीयोऽक्षः प्रथमोऽक्षः मेरुमानसोत्तरायतः सार्धसप्तलक्षोत्तरसार्धकोटियोजनप्रमाणः तस्य तुर्यमानेन सार्धसप्तत्रिंशत्सहस्राधिकैकोनचत्वारिंशल्लक्षयोजनमानेन संमितः परिमितः ध्रुवे कृतः वायुपाशेन बद्ध उपरिभागो यस्य तथाभूतः तं निर्दिशति । तैलयन्त्राक्षवत्तैलयन्त्राक्षदृष्टान्तेन ज्ञातव्य इत्यर्थः ॥ १४ ॥

रथनीडादेः परिमाणमाह । रथनीड इति । नीडो रथिन उपवेशस्थानं षट्त्रिंशल्लक्षयोजनायामः तुरीयभागविशालः नवलक्षयोजनविशालः रविरथयुगोऽपि तावान् षट्त्रिंशल्लक्षयोजनायामः तुरीयभागविशालः । युगं विशिनष्टि । यत्र युगेऽरुणेन युक्त

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

योजिताः सप्त हया गायत्र्यादिच्छन्दोनामानः देवं द्योतमानमादित्यं वहन्ति गन्तव्यदेशं प्रापयन्तीत्यर्थः अश्वनामानि श्रीवैष्णवे पुराणे उक्तानि ।

हयाश्च सप्तच्छन्दांसि तेषां नामानि मे शृणु ।
गायत्री च बृहत्युष्णिग् जगती त्रिष्टुबेव च ॥
अनुष्टुप्पङ्क्तिरित्युक्ताः छन्दांसि हरयो रवेः ।

इति । नन्वेवम् "एकोऽश्वो वहति सप्तनामा" इति श्रुतिविरोध इति चेदुच्यते एक इत्यनेनैकसूर्यं उच्यते अश्व इति आत्माभिप्राय एकवचननिर्देशः "एको व्रीहिः सुसम्पन्नः" इत्यादिवत् सप्तनामेत्यादि सप्तनामान इत्युच्यते तथा चैकरूपा गायत्र्यादिसप्तनामानोऽश्वा वहन्तीति श्रुत्यर्थः उपबृंहणानुसरणादेव हि श्रुत्यर्थनिर्णय इति तेषां गायत्र्यादिनामकत्वं तद्रूपेणोपासनार्थमुक्तम् ॥ १५ ॥

अरुणायोजिता देवं वहन्तीत्युक्तं कुत्र स्थितोऽश्वान् योजयति इति आह । पुरस्तादिति । सवितुः पुरस्तात्पुरःस्थितोऽरुणः सौत्ये अश्वयोजनरूपे कर्मणि याहनं इत्यर्थः पुरस्तात्स्थितोऽपि किं सवितुरभिमुखतो वर्तते नेत्याह । पश्चाच्च नियुक्तः पुरस्तात्स्थितोऽपि प्रत्यङ्मुख आस्ते यद्वा । यत्सूर्यस्य पुरस्तस्यैव पश्चिमत्वादित्युक्तमेवं वालखिल्या ऋषयोऽपि षष्टिसहस्रसंख्याका अङ्गुष्ठपर्वप्रमिताः सूर्यस्य पुरतो ऽपि स्थिताः सूक्तवाकाय वाक उक्तिः सूक्तरूपो वाकः सूक्तवाकः स्तौ सुभाषितरूपोक्तौ संस्तुतये इति यावन्नियुक्ताः आदिष्टाः सन्तः सूर्यं संस्तुवन्ति ॥ १६ ॥ १७ ॥

तथान्ये ऋष्यादयः सप्त गणा एकैकशः चतुर्दश चतुर्दश एकशः मासे मासे पृथङ्नामभिरादित्यमुपासत इत्यन्वयः तत्र ऋषयो यत्ताः कथंभूतमादित्यमात्मानं स ... दिगधिष्ठातृत्वात्मानं भगवदात्मकत्वादात्मानं ... मासभेदभिन्ननामानं कथं भूता पृथङ्नामानः ... वपाख्य ... इक्षरविलक्षणनामानः पृथक्कर्माणि श्रीभागवते ... "स्तुवन्ति ऋषयस्तत्र गन्धर्वैर्गीयते पुरः । नृत्यन्त्यप्सरसो यान्ति तस्य चानु निशाचराः । वहन्ति पन्नगा यक्षैः क्रियतेऽभीषुसङ्ग्रहः । वालखिल्यास्तथैवैनं परिवार्य सहासत" इत्यादिना यद्यप्यत्र मासि चतुर्दश चतुर्दश उपासत इति उक्तम् श्रीवैष्णवे तु सप्त सप्तेति तथाहि ।

सप्ताश्चिर्ऽपुञ्जौ देवैरादित्यो मुनिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥
धाता कृतस्थली चैव पुलस्त्यो वासुकिस्तथा ।
रथकृद्ग्रामणीर्हेतिस्तुम्बुरुश्चैव सप्तमः ॥
एते वहन्ति वै चैत्रे मधुमासे सदैव हि ।
मैत्रेय ! स्यन्दने भानोः सप्त मासाधिकारिणः ॥
अर्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थली ।
प्रहेतिः कच्छनीरश्च नारदश्च रथे रवेः ।
माधवे निवसन्त्येते शुचिसंज्ञे निबोध मे ।
मित्रोऽत्रिस्तक्षकः रक्षः पौरुषेयोऽथ मेनका ॥
...हाहारथस्वनश्चैव मैत्रेयैते वसन्ति वै ।

इत्यादि तथात्रैकैकस्मिन्मासाधिकारिणि गणे प्रधानभूताः सप्त श्रीवैष्णवे कथिता इत्यतो न विरोधः ॥ १८ ॥

पूर्वं मानसोत्तरं परिवर्तमानस्य सार्धनवकोटियोजनानि भवन्ति इत्युक्तं भवति कियता कालेन कति योजनानि गच्छतीत्यत्र उक्तमेव मुहूर्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानीति इदानीं क्षणेन कति योजनानि गच्छतीत्यत्राह । लक्षोत्तरमिति । नव कोट्येकपञ्चाशल्लक्षयोजनपरिमितं सूर्यपरिभ्रमणमार्गं भूमण्डलं तस्य भूवलयस्य क्रोशद्वयाधिकद्विसहस्रयोजनानि स सूर्यः क्षणेन कालेन भुङ्क्ते गच्छतीत्यर्थः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यस्य रविरथस्यैकमेव चक्रं द्वादशमासाभिमानिदेवताभिमन्यमाना द्वादशाराः यस्य तत्तथा षड् ऋत्वभिमानिदेवताभिमन्यमानाः षण्नेमयो यस्य तत्तथा चातुर्मास्याभिमानिदेवताभिमन्यमानास्त्रिनाभयो यस्य तत्तथा स्वयं संवत्सराभिमानिदेवताभिमन्यमानं तस्य रथस्यासप्रमाणं सार्धकोटिद्वयं सप्तलक्षाधिकम् ।

सार्धं कोटिद्वयं प्रोक्तं सप्त लक्षाधिकं तथा ।
रथाक्षस्य रवेर्मेरोर्मानसोत्तरवर्तिनः ॥

इति यच्चतुरंशे त्रिरथचक्रं प्रोतं यः सूर्यरथाक्षप्रोतेतरभागो मेरुमूर्ध्नि प्रोतैकभागः ॥ १३ ॥

तस्मिन् दीर्घाक्षे चक्रप्रोतैकभागस्तस्मिन् दीर्घाक्षे चक्रप्रोतदेशे कृतमूलः कीलितपृष्ठभागस्तुरीयमानेन संमितः दीर्घाक्षचतुर्भागसमानः द्वितीयाक्षोऽस्ति स तु ध्रुवलोके कृतोपरिभागः रथनीडः सूर्यस्य पीठस्थानीयः तुरीयभागविशालो नवलक्षविस्तारस्तावान् रविरथयुग इति पूर्वप्रस्तुतदीर्घाक्षसमानः प्रकृते सम्बन्धाभावात् दूरस्थपरामर्शः प्रमाणान्तरसिद्धत्वाच्च ।

अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्धयोः ।
ह्रस्वाक्षस्तु युगार्धेन ध्रुवाधारो रथस्य सः ।

इति अक्षप्रमाणमनयोः दीर्घाक्षह्रस्वाक्षयोः परिमाणमुभयोर्युगार्धयोर्युगं च तदर्धं च युगार्धे तयोर्युगार्धयोर्यथाक्रमं प्रमाणं युगस्योत्तरभागोऽश्वस्कन्धे निवेशितः दक्षिणभागस्तु ध्रुवस्थानादवलम्बमानो वायुपाशेन बद्धः युगार्धस्त्वश्वस्कन्धाद्विनिर्गतयुगाग्रे कीलितः चक्रप्रोतदीर्घाक्षाग्रे कीलितापरभागः तत्र रथस्य यो ह्रस्वाक्षस्तेनैव कीलितस्तेन युगार्धेन सह ह्रस्वाक्षः ध्रुवाधारो भवति उत्तानपादपुत्रलोके वायुपाशेन बद्ध इत्यर्थः अश्वास्थित्या [illegible]

सप्ताश्व[illegible]तो वामतो धुरम् ।
चक्रपक्षा[illegible]क्षः समाहितः ॥

इति रविरथनी[illegible] इति काश्चित् तत्क्रमतो विजानाति [illegible]पि तदनुसारेणोत्प्रेक्षणीयं युगमध्ये निर्गता[illegible] ॥ १५ ॥

सवितुः पुर[illegible] ॥ १६-१७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

ग्रामण्यस्तन्नाम्यः "ग्रामाधिपे तत्श्रेष्ठे च ग्रामणीः परिकीर्तितः" इति यादवः ॥ १८-१९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

एकविंशोऽध्यायः ॥ २१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

[illegible] इत्यत्र टीकायां चक्रं वा ग्रावचुम्बितमिति पक्षे युगपद्गतिद्वयी न सम्भवति वैपरीत्येनाश्रययोः परस्परस्तम्भभावात् अश्वानां बद्धत्वेऽपि वायुचक्रस्यैव रथमतिक्रम्य किञ्चिद्विक्रमः स्यात् । न तु रथस्य प्राच्याः ततो रथस्य नक्षत्रान्तरप्राप्तौ सम्भवन्त्यामपि देशान्तरप्राप्तिर्न सम्भवति चन्द्रादौ तु प्रत्यहं देशान्तरप्राप्तिश्च दृश्यते कुलालचक्रपिपीलिकादृष्टान्तेन च सा लभ्येत इति विचार्य ततो मानसोत्तरोपरि वायुचक्रभूमिरेव एव पर्यवसितेषु मेरोरुपर्यपि तज्ज्ञेयं किन्तु मानसोत्तरस्योपरि नवतिसहस्रात्मकं मेरोस्तु षोडशसहस्रात्मकमिति ॥ १३ ॥

तस्मिन्नक्षे रविरथस्यैव चक्रप्रान्ते तुर्यमानेन चतुर्थांशेन सम्मितः सम्पातितः अधिक इत्यर्थः ॥ १४ ॥

रथनीडोऽत्र रथाश्रयो रथानुगतवायुमयभूमिः न तु सूर्योपवेशार्थमध्यपीठं रथस्याल्पप्रमाणत्वात् । यथैव वैष्णवे । "योजनानां सहस्राणि भास्करस्य रथो नव" इति । एवमेव हि दशसहस्रयोजनात्मकं वक्ष्यमाणं तन्मण्डलं घटत इति ॥ १५ ॥

पुरस्तात् पश्चाच्च नियुक्त इति कायव्यूहेनापि घटते ॥ १६ ॥

ऋषयश्चतुर्दश गन्धर्वाश्चतुर्दशेत्येवमेकैकशश्चतुर्दश द्वन्द्वशो मिलित्वेत्यर्थः । समासवाचिद्वन्द्वशब्दवत् तथा सप्त गणाः मासि मास्युपासत इत्यन्वयः ॥ १७ ॥ १८ ॥

वर्षेषु भूवलयस्वस्त्यन्तकं गतः स सूर्यः ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य

एकविंशोऽध्यायः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यस्य रथस्य द्वादश मासा अरा यस्य षड्ऋतवो नेमयो यस्य त्रीणि चातुर्मास्यानि नाभयो यस्य मेरोर्मूर्धनि मूलाधः प्रदेश इत्यर्थः । तेनायनत्रीयाक्षस्य तथा दृढः । मानसोत्तरे बध्नांतुपरि वायुचक्रभूमाविति श्रीस्वामिचरणाः ततो मानसोत्तरस्यायतमात्रोच्छ्रायत्वात् षट्सहस्रोपरि वर्तमानः स च किञ्चिन्न्यूनसप्तपञ्चाशल्लक्षाधिककोटिप्रमाणः ॥ १३ ॥

तस्मिन्नक्षे चक्रप्रान्तवर्तिनि कृतमूलः निबद्धपूर्वभागो द्वितीयोऽक्षः । तुर्यमानेन प्रथमाक्षस्य चतुर्थांशमानेन सार्धत्रिंशत्सहस्राधिकोनचत्वारिंशल्लक्षमानेन सम्मित इत्यर्थोऽयं अत्रायामागत्समानमूलपाते प्रथमाक्षप्रदेशो भणित इति ज्ञेयम् । द्वितीयाक्षस्य प्रथमाक्षाद्दृष्टपूर्वमाक्षपादस्य कृतः वायुपाशेन निबद्ध उपरिभागो यस्य सः ॥ १४ ॥

रथस्य नीडोऽन्तर्गृहं षट्त्रिंशल्लक्षयोजनोच्छ्रितो नवलक्षयोजनविस्तारः । चक्राच्चत्वारिंशत्सहस्रोपरितने स्थाने नीडमध्ये सूर्य उपविष्टो ज्ञेयः । गायत्र्यादिच्छन्दोनामानः अरुणेन सारथिना योजिताः ॥ १५ ॥

पुरस्तात् स्थितोऽपि पश्चात् प्रत्यङ्मुख आस्ते प्रश्नस्यान्ते वायुनोक्तम् ।

सप्ताश्वरूपच्छन्दांसि वहन्ते वामतो रविम् ।

चक्रपक्षनिबद्धानि चक्रे वाक्षः समाहित इति ॥ १६ ॥

सूक्तवाकाय सुभाषिताय ॥ १७ ॥

मासि मासि एकैकस्मिन् मासि द्वाभ्यां द्वाभ्यामृष्यादिभ्यां सप्त गणा भवन्तः । एकैकशः एकेनैकेन ऋष्यादिना तु चतुर्दश गणा भवन्तो मासि मासि उपासत इत्यन्वयः ॥ १८ ॥

गव्यूतिः क्रोशयुगं स सूर्यः गव्यूति उत्तरं यथा स्यात्तथा ॥ १९ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

एकविंशः पञ्चमस्य सङ्गतः सङ्गतः सताम् ॥ २१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अस्य रथस्यैकं चक्रं संवत्सरात्मकमाम्नन्ति उपासनार्थं कथम्भूतं द्वादश मासा अरा यस्य तत् षड् ऋतवो नेमयो यस्य तत् त्रीणि चातुर्मास्यानि नाभयो यस्य तत् यस्य रथस्य अक्षः मेरोर्मूर्धनि कृतः उत्तरभागो यस्य सः तथा मानसोत्तरे कृत इतरभागो यस्य सः अयुतयोजनोच्छ्रायमानसोत्तरोपरि रविरथचक्रमत्युच्छ्रितं मन्तव्यमन्यथा-ऽसाम्यानुपपत्तेः ॥ १३ ॥

तस्मिन्मेरुमानसोत्तरायते सार्धसप्तकोटिसार्धकोटियोजनदीर्घे कृतमूलो द्वितीयाक्षः पूर्वाक्षस्य तुर्यमानेन सार्धसप्तत्रिंशत्सहस्रोत्तरैकोनचत्वारिंशल्लक्षमानेन सम्मितः ध्रुवे कृतो वायुपाशेन मानसोत्तरगताक्षाग्रबद्धेन निबद्ध उपरिभागो यस्य सः अत्रेदं बोध्यम् "भूमेर्योजनलक्षं तु सौरं मैत्रेय ! मण्डलम्" इति श्रीपराशरवचनात् लक्षयोजने भूमण्डलतो रविस्ततो वक्ष्यमाणप्रकारेणाष्टत्रिंशल्लक्षयोजनान्तरं विष्णुपदं तत्र ध्रुवः एवं सति द्वितीयाक्षस्य यत्किञ्चिदाधिक्यं तद्यथासम्भवमुपपत्त्या संगतमिति ॥ १४ ॥

गायत्र्यादिच्छन्दोनामानः ॥ १५ ॥

अरुणः सौत्ये सारथ्ये नियुक्तः सवितुः पुरस्तात्स्थितोऽपि पश्चात्प्रत्यङ्मुखः सवितुरभिमुखमास्ते ॥ १६ ॥

सूक्तः सुभाषितः वाको वचनं स्तोत्रमित्यर्थस्तस्मै ॥ १७ ॥

एकैकशश्चतुर्दश द्वन्द्वशः ऋषयो गन्धर्वा अप्सरसः नागाः ग्रामण्यः यातुधाना देवा इति सप्त गणाः पृथक्कर्मभिः पृथङ्नामानं सूर्यं तत्र भगवद्रूपासनार्थमात्मानं सर्वात्मानं मासि मासि उपासते इत्यन्वयः ॥ १८ ॥

क्षणेन कति योजनानि गच्छतीत्याकाङ्क्षायामाह । लक्षोत्तरमिति तत्र स सूर्यः स गव्यूत्युत्तरं यथा भवति तथा द्विसहस्रयोजनानि क्षणेन भुङ्क्ते गच्छति ॥ १९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

एकविंशाध्यायार्थप्रकाशः ॥ २१ ॥

भाषा टीका

जिस सूर्यदेव के रथ का द्वादश अरा वाला है नेमिवाला तीन नाभि वाला संवत्सर रूप एक चक्र है ऐसा कहते हैं उस चक्र का धुरा मेरु के मस्तक पर रखा है उसका दूसरा भाग मानसोत्तर पर्वत पर है जिस धुरे में पोहाहुआ सूर्य के रथ का चक्र तेल के कोल्हू सरीका मानसोत्तर पर्वत पर घूमता है ॥ १३ ॥

उस धुराकाष्ठ के ऊपर मूल से रखा हुआ दूसरा अक्ष चालीस लक्ष साढे सैंतीस हजार योजन का लंबा है उसका दूसरा भाग ध्रुवजी में लगा हुआ है ॥ १४ ॥

रथ का नीचा बैठक छत्तीस लाख योजन लंबा नौलाख योजन चौडा है सूर्य के रथ का जुआ भी नौलाख योजन लंबा है जिस जुआ में अरुण के जोडे हुये वेद नाम के सात घोडे सूर्य नारायण को होते हैं ॥ १५ ॥

सूर्य के सामने सारथि के कार्य में नियुक्त अरुण हैं सूर्य के सामने मुख करके बैठे हैं ॥ १६ ॥

तैसे ही अंगुष्ठ पर्व के बरोबर साठ हजार बालखिल्य ऋषि सूर्य के आगे वेद पाठके वास्ते नियुक्त हैं सो सूर्य की स्तुति करते हैं ॥ १७ ॥

तैसे ही और भी ऋषि गन्धर्व अप्सरा नाग ग्रामणी यातुधान देवता ये सब सात गण चौदह चौदह वाले हैं महिना महिना में सब नाना नाम वाले भगवान् सूर्य को भिन्न नाम वाले होकर साथ में मिलकर सेवन करते हैं ॥ १८ ॥

साढे नौ किरोड एक लाख इतने भूमण्डल में एक क्षण में दो हजार दो कोश योजन प्रमाण से आदित्य चलते हैं ॥ १९ ॥

इति श्रीभागवत पञ्चमस्कन्ध बीसमे अध्यायका
भाषानुवाद ब्रह्मण्याचार्य कृत
समाप्त ॥ २१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे एकविंशोऽध्यायः समाप्तः ॥ २१ ॥



॥ द्वाविंशोऽध्यायः ॥

॥ राजोवाच ॥

यदेतद्भगवत आदित्यस्य मेरुं ध्रुवं च प्रदक्षिणेन परिक्रामतो राशीनामभिमुखं प्रचलितं चाप्रदक्षिणं भगवतोपवर्णितममुष्य वयं कथमनुमिमीमहीति ॥ १ ॥

॥ स होवाच ॥

यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमानत्वादेवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुं च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात् ॥ २ ॥

स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयं कर्मविशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिषु ऋतुषु यथोपजोषमृतुगुणान् विदधाति ॥ ३ ॥

तमेतमिह पुरुषास्त्रय्या विद्यया वर्णाश्रमाचारानुपथा उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्च श्रद्धया यजन्तोऽञ्जसा श्रेयः समधिगच्छन्ति ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वाविंशे सोमशुक्रादेः स्थानमाहोपरि क्रमम् ।
तत्तद्गत्यनुमानं च दृष्टान्तेन तथा नृणाम् ॥ १ ॥

राशीनामभिमुखमप्रदक्षिणं चोपवर्णितं सव्येन चलन् दक्षिणेन करोतीति वदता अमुष्य वयं कथमनुमिमीमहि एतत्कथं जानीमो विरुद्धत्वादित्यर्थः ॥ १ ॥

चक्रवदाश्रितस्य गतिद्वयमविरुद्धमिति दृष्टान्तार्थः ॥ २ ॥

तत्तत्कालनियमेन कर्मणां विशुद्धेः सादृगुण्यस्य निमित्तभूतमात्मानं विभज्य विजिज्ञास्यमानो विचार्यमाणः । यथोपजोषं यथाकर्मभोगमृतुगुणान् शीतोष्णादीन् ॥ ३ ॥

वर्णाश्रमाचारानुवर्तिनः पुरुषास्त्रय्या आम्नातैः कर्मभिरग्निहोत्रादिरूपैः योगवितानैश्च ध्यानादिभिः सर्वात्मकं यजन्तः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पूर्वमादित्यो नक्षत्राभिमुखं मकरादिषु राशिषु चरतीत्युक्तं तथा मेरुं ध्रुवं च परिवर्तत इति चोक्तं तदिदं गतिद्वयं युगपदेकस्याघटमानमुक्तानुवादपूर्वकं पृच्छति राजा । यदिति । यदेतदित्यादिनोपवर्णितमित्यन्तेनोक्तस्यानुवादः अमुष्येत्यादिना प्रश्नः भगवता त्वया यदुपवर्णितं कि[illegible] ध्रुवं च प्रदक्षिणेन परिभ्रमतो भगवत आदित्यस्य पुनः राशीनामभिमुखं नक्षत्राभिमुखतया राशिषु प्रचलनमित्येतत् द्वयं विरुद्धममुष्य सूर्यस्य कथमनुमिमीमहे कथमुपपन्नं भवतीति विश्वसिम इत्यर्थः ॥ १ ॥

एवमापृष्टो बादरायणिराहेत्याह सूतः । स होवाचेति । शुकोक्तिमाह । यथेत्यादिना राश्यन्तरे चोपलभ्यमानत्वादित्यन्तेन । विरुद्धमप्येकस्य गतिद्वयमुपपन्नमिति सदृष्टान्तमाह । यथेति । भ्रमता कुलालचक्रेण सह भ्रमतां कुलालचक्राश्रयाणां पिपीलिकादीनां गतिरन्यैव दृश्यते दृष्टान्तेऽपि कथं तत्राह । प्रदेशान्तरे चक्रस्यैव प्रदेशान्तरे उपलभ्यमानत्वात् पिपीलिकादीनामित्यनुषङ्गः यदि गतिरनन्या तर्हि प्रदेशान्तरे नोपलभ्येरन् अत उपलम्भाद्गतिरन्यैवेत्यर्थः एवं दृष्टान्ते प्रदर्शितं गतिद्वयं दार्ष्टान्तिके साधयति । एवमिति । एवं तथा नक्षत्रै राशिभिश्च उपलक्षितेन [illegible]यायां नक्षत्रादीनामवस्थानात्तदाश्रयं कालचक्रमनुमीयत इत्यभिप्रायेण उपलक्षितेनेत्युक्तं मेरुं ध्रुवं च प्रदक्षिणेन परिभ्रमता कालचक्रेण शिशुमारेण परिभ्रमतां तदाश्रयाणां कालचक्राश्रयाणां सूर्यादीनां ग्रहाणां नक्षत्राभिमुखतया राशिषु गतिरन्यान्या उपपद्यते एव कुतः नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वादित्यन्वयः ॥ २ ॥

एवं प्रश्नस्योत्तरमभिधायाथ सूर्यरूपेणावस्थितस्य भगवतस्त्रय्याश्रमधर्माराध्यत्वं जगत्यां संवत्सरायणर्तुमासपक्षदिवानक्तादिरूपेण कालविभाजकत्वं चाह । स इति । भगवानादि-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुरुषः जगत्कारणभूतो नारायण एव स सूर्यरूपेणावस्थितः "अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत" इति सूर्यस्य भगवदात्मकत्वश्रवणात् शरीरात्मभावनिबन्धनं स एव नारायण इति सामानाधिकरण्यम् एवमादित्यरूपो भगवान्नारायणो लोकानां स्वस्तये त्रयीमयं तत्कालनियमनेन कर्मणां विशुद्धेः सादृगुण्यस्य निमित्तं सादृगुण्यार्थमात्मानं द्वादशधा विभज्य वसन्तादिषु [illegible] यथोपजोषं यथाकर्मभोगमृतुगुणान् शीतातपवातवर्षा[illegible] करोतीत्यन्वयः तत्र द्वादशधा विभागो नामादित्यावयवे[illegible] मासमृतुगुणविधानोपयुक्तसङ्कल्परूपज्ञानेनानुप्रवेशः ।

मासि मासि रविर्यो यस्तत्र तत्र हि सापरा ।
त्रयीमयी विष्णुशक्तिरवस्थानं करोति वै ॥
विष्णुशक्तिरवस्थानं सदादित्ये करोति सा ।
न केवलं रवेः शक्तिर्वैष्णवी सा त्रयीमयी ॥
एवं सा सात्त्विकी शक्तिर्वैष्णवी या त्रयीमयी ।
अतः सप्तगणोपेतं स्वस्थान्तर्भानिष्ठानि ॥
तथा चाधिष्ठितः सोऽपि जाज्वलीति स्वरश्मिभिः ।
ततः समस्तजगतां नाशं नयति चाखिलम् ॥

इति श्रीवैष्णवपुराणोक्तेः त्रयीमयत्वं नाम प्रा[illegible] त्र्यधात्मत्वं तदपि चोक्तं तत्रैव "ऋचः स्तुव[illegible] पूर्वाह्णे मध्याह्ने च यजूंषि च । बृहद्रथन्तरादीनि सामान्याहुः [illegible] रवेः । त्रयमेषा त्रयी विष्णोः ऋग्यजुः सामसंज्ञिता" इति कथम्भू[illegible] विदधाति वेदेन तज्ज्ञैः कविभिश्च जिज्ञास्यमानो वेदैर्बोध्यमान[illegible] कविभिरुपास्यमान इत्यर्थः एतदेवोपपादयति । तमिति । तमेतमादित्यरूपेणावस्थितं भगवन्तमिह लोके पुरुषा वर्णाश्रमाचारानुवर्तिनः त्रय्या विद्यया भक्त्या यजन्तः त्रय्या यजनमेव प्रपञ्चयति उच्चावचैः कर्मभिराम्नातैर्योगवितानैश्चेति उच्चानुच्चैर्नानाविधैराम्नातैर्वैदिकैः कर्मभिर्यज्ञादिभिः योगवितानैः उपासनविस्तरैश्च आम्नातैरिति पूर्वोत्तराभ्यां सम्बध्यते वैदिकैरुपासकैश्चेत्यर्थः यजन्त आराधयन्तोऽञ्जसा सुखेन आशु वा श्रेयः स्वर्गमोक्षादिरूपं सम्यक् प्राप्नुवन्तीत्यर्थः ॥ ३ ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कलैवाध्यायसङ्गतिः राशीनां प्रचलनमपि प्रदक्षिणत इति । यस्मात्तस्मादेतस्यादित्यस्य राशीनामभिमुखप्रचलनमप्रदक्षिणागमनं घटते तदनुपपन्नं भगवता तदभिमुखप्रचलनमुपवर्णितं यस्मात्तस्मादमुष्यादित्यस्याभिमुखतया गमनस्य राशीनां प्रचलनस्याभिप्रायं कथमनुमिमीमहि युक्तिपूर्वकं बुध्यामह इति ॥ १ ॥

प्रदक्षिणतो भ्रमता कुलालचक्रेण सह प्रदक्षिणीक्रियमाणा अपि तद्गताः पिपीलिकादयो यथा स्वप्रयत्नसाध्यगत्या विपरीतं गच्छन्त्येवं प्रदक्षिणेन भ्रमता ज्योतिश्चक्रेण सह प्रदक्षिणीक्रियमाणोऽपि सविता स्वगत्या पूर्वापरीभावतया शीघ्रमन्दमध्यभेदेन राशीनामभिमुखं चलतीत्यभिप्रायः राश्यादयः प्रत्यादित्यं अपृष्ठतो गच्छन्तीत्यत्र बिम्बप्रतिबिम्बवत् ॥ २ ॥

वसन्तादिष्वृतुषु क्रियमाणानां कर्मणां विशुद्धेर्निमित्तं तदपेक्षत्वेनेति शेषः कविभिः भूतभविष्यद्वर्तमानज्ञैः प्रज्ञावद्भिः यथोपजोषं यथाक्रमम् ॥ ३ ॥

द्वादशधा विभक्तेः कारणमाह । तमेतमिति । वर्णाश्रमाचारमनुपथन्ति अनुगच्छन्तीति वर्णाश्रमाचारानुपथाः "पथनतौ" इति धातोः योगवितानैरीश्वरार्पणबुद्धिलक्षणोपायविस्तारैः आम्नातैः प्रतिपादितैः ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

[illegible]भिमुखमत्र प्रदक्षिणमित्यर्थः ॥ १ ॥ २ ॥

[illegible]नारायणः सूर्यरूपो विष्णुः ॥ ३—४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

[illegible]विशे चक्रसूर्ययोर्गतिभेदव्यवस्थितिः ।
[illegible]णां स्थानमेषाञ्चप्रत्यानिष्टत्वमीर्यते ॥

[illegible] सव्येन चलन् दक्षिणेन करोतीत्यत्र संशयानः [illegible] पृच्छतीति । प्रदक्षिणेन परिक्रमत इति प्रत्यहं दृश्यमान[illegible] राशीनामभिमुखं तु अप्रदक्षिणं प्रचलनमन्यस्य तथा [illegible]तत्कथमनुमिमीमहि जानीमो विरुद्धत्वादित्यर्थः ॥ १ ॥

[illegible] स्पष्टमुवाच । सह भ्रमतां चक्रवेपरीत्येन चलतां [illegible]श्चेति गतिद्वयमविरुद्धमिति वाक्यार्थः ॥ २ ॥

[illegible] एष कालरूपी भगवान् कर्मणां विशुद्धेर्निमित्तं [illegible]नियतत्वादित्यर्थः । द्वादशधा विभज्य ऋतु[illegible]भज्य यथोपजोषं यथा कर्मभोगम् ऋतुगुणान् [illegible] ॥

[illegible]र्तिनः त्रय्या आम्नातैः कर्मभिरेनं सूर्यमेव [illegible]नैश्चाप्यन्तर्यामिरूपं च यजन्तः ॥ ४ ॥

[illegible]शुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible] स्थानानि वर्णयति । तत्र तावत्सव्येनाचलं [illegible]शुकं गतिद्वयं तत्पृच्छति । यदेतदिति । [illegible] [illegible]क्रामतः आदित्यस्य पुनः राशीनामभिमुखं [illegible]णं च प्रचलितं प्रचलनं भगवतोपवर्णितम् [illegible] सूर्यस्य वयं कथमनुमिमीमहि जानीमो विरुद्ध[illegible]

[illegible]चक्रतः [illegible]

फलितोऽर्थः [illegible]

सू[illegible]शिनोर्भेदामेदसम्बन्धाभिप्रायेण च साक्षान्नाराय[illegible] कर्मणां तत्तत्काले क्रियमाणानां विशुद्धेर्निमि[illegible]धा विभज्य यथोपजोषं प्राणिनां कर्मभोगमनति[illegible]गुणान् शीतोष्णादीन् विदधाति करोति ॥ ३ ॥

कर्मभिः पुरुषा [illegible]यजन्तः श्रेयः स्वर्गसुखं योगवितानैः ज्ञानभक्त्यादिभिः [illegible]न्तो भगवद्दृष्ट्या यजन्तो मुमुक्षवः श्रेयो मोक्षं सम[illegible] ॥

अथ स एष आत्मा लोकानां द्यावापृथिव्योरन्तरेण नभोवलयस्य कालचक्रगतो द्वादशमासान् भुङ्क्ते [1] राशिसंज्ञान् सम्वत्सरावयवान् [2] मासः पक्षद्वयं [3] दिवा नक्तं चेति सपादर्क्षद्वयमुपदिशन्ति यावता षष्ठमंशं भुञ्जीत स वै ऋतुरित्युपदिश्यते सम्वत्सरावयवः ॥ ५ ॥

अथ च यावतार्धेन नभो [4] वीथ्यां प्रचरति तं कालमयनमाचक्षते ॥ ६ ॥

अथ च यावन्नभोमण्डलं सह द्यावापृथिव्योर्मण्डलाभ्यां कार्त्स्न्येन स ह [5] भुञ्जीत तं कालं सम्वत्सरं परिवत्सरमिडावत्सरमनुवत्सरं वत्सरमिति भानोर्मान्द्यशैघ्र्य [6] समगतिभिः समामनन्ति ॥ ७ ॥

एवं चन्द्रमा अर्कगभस्तिभ्य उपरिष्टाल्लक्षयोजनत उपलभ्यमानोऽर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं सपादर्क्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रुततरगमनो भुङ्क्ते ॥ ८ ॥

अथ चापूर्यमाणाभिश्च [7] कलाभिरमराणां [8] क्षीयमाणाभिश्च कलाभिः पितॄणामहोरात्राणि पूर्वपक्षापरपक्षाभ्यां वितन्वानः सर्वजीवनिवहप्राणो जीवश्चैकमेकं नक्षत्रं त्रिंशता [9] मुहूर्तैर्भुङ्क्ते ॥ ९ ॥

य एष षोडशकलः पुरुषो भगवान् मनोमयोऽन्नमयोऽमृतमयो देवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधां प्राणाप्यायनशीलत्वात्सर्वमय इति वर्णयन्ति ॥ १० ॥

तत [10] उपरिष्टात्त्रिलक्षयोजनतो नक्षत्राणि मेरुं दक्षिणेनैव कालायन ईश्वरयोजितानि सहाभिजिताष्टाविंशतिः ॥ ११ ॥

तत उपरिष्टादुशना द्विलक्षयोजनत [11] उपलभ्यते पुरतः पश्चात्सहैव वार्कस्य शैघ्र्यमान्द्यसाम्याभिर्गतिभिरर्कवच्चरति लोकानां नित्यदानुकूल एव प्रायेण [12] वर्षयंश्चारेणानुमीयते स वृष्टिविष्टम्भग्रहोपशमनः ॥ १२ ॥

भाषाटीका

राजा श्रीपरीक्षितजी बोले यह जो आपने कहा कि भगवान् आदित्य मेरु और ध्रुव को दक्षिण तरफ से जब परिक्रमा करते हैं तब राशियों के सन्मुख चलना फिर बायें तरफ कर देना सो इस विरुद्ध कथन को हम कैसे अनुमान करके ठीक समझेंगे ॥ १ ॥

सो श्रीशुकदेवजी बोले जैसे कुम्हार के चक्रके घूमते समय उसके ऊपर रहने वाले घूमते ये चींटी आदि जीवों की चाल दूसरी ही होती है क्यों कि दूसरे ठिकाने फिर वे दीखते हैं इसी प्रकार से नक्षत्र राशियों करके उपलक्षित काल चक्र के साथ भी तथा मेरु की परिक्रमा क्रमसे कालचक्र के साथ घूमनेवाले तिसके आश्रय रहने वाले सूर्यादिग्रहों की चाल दूसरी ही होती है क्यों कि वे सूर्यादिक दूसरे नक्षत्र में दूसरे राशिमेंभी दीखते हैं ॥ २ ॥

वैसेही आदिपुरुष भगवान् नारायण लोकों के कल्याण के वास्ते सूर्यरूप में अपने स्वरूप को बारह प्रकार के विभाग कर के कर्मों के शुद्धि के निमित्त त्रयीमय जो आत्मा वेदों करके कवियों करके गाया गया है जिज्ञासित भया है तिसी आत्मा से वसन्तादि ऋतुओं को विधान करते हैं ॥ ३ ॥

इन आदित्य को वर्णाश्रम आचारों के मार्ग में चलने वाले मनुष्य नाना प्रकार के कर्मों में वैदिक योगादिकों से श्रद्धायुक्त होकर यजन करते हैं तब अनायास से सब पुरुषार्थों को प्राप्त होते हैं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

स एव क्रमगत्या मासादिव्यवहारकारणमित्याह । स एव लोकानामात्मा द्यावापृथिव्योरन्तरेण मध्ये यन्नभोवलयमन्तरिक्षं तस्य मध्ये यत्कालचक्रं तद्गतः । राशिभिर्मेषादिभिः संज्ञा येषाम् । चैत्रादिसंज्ञास्तु चान्द्रमासानां मासमाह । पक्षद्वयं मास इति । चान्द्रेण मानेन सपादं महानक्षत्रद्वयं सौरेण दिवा नक्तं चाहोरात्रमिति पित्र्येण षष्ठमंशं राशिद्वयम् ॥ ५ ॥ ६ ॥

---

(१) तानेव इति वि० (२) मासाः (३) दिवानक्तञ्चेति वि० नास्ति (४) नभोवीथ्या (५) सह इति वि० नास्ति (६) समानगतिभिः (७) रूपचीयमानाभिः वि० म (८) ममराणांक्षीयमाणाभिर वि० नास्ति (९) त्रिंशन्मुहूर्तैः (१०) उपरिष्टाल्लक्षयोजनतः (११) द्विलक्षयोजनादुपलभ्यते (१२) वर्षयंस्थितिद्वारेण।

श्रीधरस्वामिकृतभावार्थदीपिका [illegible]

मण्डलाभ्यां सह भुञ्जीत । स ह स[illegible] प्रतिपदि संक्रान्तिर्भवति तदा सौरचा[illegible] भवति स सम्वत्सरः ततः सौरमानेन [illegible] चान्द्रमानेन पद् ह्रसन्तीति द्वादशदिन[illegible] द्भावो भवति एवं पञ्च वर्षाणि गच्छन्ति [illegible] भवतः ततः पुनः षष्ठः सम्वत्सरो भवति[illegible] सम्वत्सरादिपञ्चकं समामनन्ति ॥ ७ ॥

सोमादीनामपि स्थानं कार्यं चाह । प[illegible] अर्कगभस्तिभ्यां मण्डलरूपेभ्यः । सपादद्व[illegible] नक्षत्रेण ॥ ८ ॥

सर्वेषां जीवनिवहानां प्राणः अन्नमयत्वा[illegible] अत एव जीवनं हेतुत्वाज्जीवश्च ॥ ९ ॥

तदेवाह । य एष इति ॥ १० ॥

दक्षिणेनैव न तु तेषां पृथगन्या गतिरस्तीत्यर्थः । [illegible] कालचक्रे उत्तराषाढाश्रवणसन्धावभिजिन्नक्षत्रं प[illegible] पृथक्कल्पितं तेन सह । तथा च श्रुतिः । "अभिजिन्नाम [illegible] रिषाढाषाढानामधस्ताच्छ्रोणाया,, इति ॥ ११ ॥

पुरतः सूर्येण भोक्ष्यमाणे नक्षत्रे पश्चाद्भुङ्क्ते । सहैव [illegible] चारेण क्रमस्थनक्षत्रानतिक्रमेण । वृष्टेर्विष्टम्भः स्तम्भनं य[illegible] हात्तमुपशमयतीति तथा ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ ननु लोकानामन्तरात्मा भगवानेव आदित्यरूपेणाव- स्थितो द्यावापृथिव्योर्मध्ये यन्नभोवलयमन्तरिक्षं तस्य मध्ये यत्कालचक्रं शिशुमारं कालचक्रस्थमेषादिराशिषु नक्षत्राभिमुखं चरन्नित्यर्थः द्वादश मासान् भुङ्क्ते सम्वत्सरावयवान् मासाख्यान् द्वादश भुङ्क्तेऽनुभवति मकरादिषु राशिषु द्वादशस्वादित्येषु चरत्सु सत्सु द्वादशमासा भवन्तीत्यर्थः । यानेवादित्यो द्वादश सम्वत्सरावयवान् भुङ्क्ते तानेव राशिसंज्ञान मेषादिराशिसञ्चार- निमित्ता मासादिसंज्ञाः येषां तान् सम्वत्सरावयवान् मासादीन्मानभे- देनवदन्ति तत्र चान्द्रेण मानेन मासः पक्षद्वयमिति वदन्ति तेषा- मेव चित्रादिनक्षत्रयुक्तपौर्णमासीयुक्तत्वाच्चैत्रादिसंज्ञा भवन्ति सौरेण मानेन सपादमहानक्षत्रद्वयमिति वदन्ति पित्र्येण मानेन दिवा- नक्तमहोरात्र इति वदन्तीत्यर्थः । एतद्द्वादशभागात्मकस्य सम्वत्सरस्य यावता भागेन मासद्वयात्मकेन षष्ठमंशं राशिद्वयं भुञ्जीत चरेत आदित्य इति कर्तृपदाध्याहार्यं स वै तावान् काल ऋतुरित्युच्यते स च सम्वत्सरस्य षष्ठोंऽश इत्यर्थः अथ संम्वत्सरस्य यावता षण्मासात्मकेनार्द्धेन कालेन नभोवीथ्यां कालचक्रस्य राशिषट्के प्रचलति तं कालमयनमाचक्षते यावता कालेन मकरादिराशिषट्कं संचरितं भवति तावन्तं कालमयनमाचक्षत इत्यर्थः । अथवा द्यावापृथिव्योर्मण्डलाभ्यां सह सन्धितमिति शेषः यावन्नभोमण्डलं द्वादशराश्यात्मकं कार्त्स्न्येन यावता कालेनायनद्वयात्मकेन भुञ्जीत द्वादशराश्यात्मकं कृत्स्नं नभोमण्डलं भानोर्मन्द्रादिगतिभि- र्यावता कालेन सञ्चरितं भवति तं कालं सम्वत्सरादिकमिति समामनन्ति इत्यर्थः अत्रेदमवधेयं यदा शुक्लप्रतिपदि संक्रान्तिर्भ- वति तदा सौरचान्द्रमानयोर्युगपदुपक्रमो भवति स सम्वत्सरः सौरमानवर्षे षड् दिनानि वर्द्धन्ते चान्द्रमानेन पद् ह्रसन्तीति द्वादश दिनव्यवधानादुभयोरप्यब्दाद्भावो भवति एवं पञ्च वर्षाणि गच्छन्ति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः षष्ठः सम्वत्सरो भवति तदेवमवान्तरभेदेन सम्वत्सरपरिवत्सरेडावत्सरानुवत्सरादिकमेव समामनन्तीति ॥ ५ ॥ ६ ॥ ७ ॥

एवं सूर्यस्य गतिभेदस्तत्कृतः कालविभागश्चोक्तः अथ सोमश- शुक्रादीनां स्थानानि तद्गतिभेदान् तत्कृतशुभाशुभादिकार्यं चाह । [illegible]मित्यादिना यावदध्यायम् । अर्कगभस्तिभ्यां मण्डलरूपेभ्यः लक्ष- [illegible]जनतः उपरिष्टादुपलभ्यमानः द्रुततरगमनोऽत एव उग्रं चरती- [illegible]चारी सम्वर्कस्य या सम्वत्सरभुक्तिः सम्वत्सरेण द्वादशरा- [illegible]श्यात्मिका भुक्तिः तां पक्षाभ्यामेव भुक्तं करोति एवमर्कस्य [illegible]सभुक्तिः तां सपादर्क्षाभ्यां पादाधिकाभ्यां नक्षत्राभ्यां स- [illegible]नक्षत्रद्वयाभिमुखगमनेनैव मासेसर्गसरपादमुहूर्तात्मकका- [illegible] यावत् पक्षभुक्तिं दिनेनैव त्रिंशन्मुहूर्तात्मककालेनैव [illegible]र्थः ॥ ८ ॥

[illegible] राजन् ! पूर्यमाणाभिः शुक्लपक्षेऽपक्षीयमाणाभिः कृष्ण- [illegible]भिः विभक्ताभ्यां पूर्वपक्षापरपक्षाभ्यां शुक्लकृष्णपक्षाभ्यां [illegible]रात्रागयहोरात्रात्मकमेकं दिनं कुर्वाणः सर्वेषां [illegible] प्राणः प्राणाप्यायनकरः अत एव जीवः जीव- [illegible] जीवनहेतुः एवंभूत एकमेकं नक्षत्रं त्रिंशता मुहू- [illegible]कला यस्य स एव पुरुषश्चन्द्रशरीरको भग- [illegible]नसाभिदेवतात्वात्मनोमयः ओषधीशत्वादमृतमयः [illegible]तुत्वाद्देवादीनां ये प्राणास्तेषामाप्यायनस्वभावै- [illegible] वर्धयन्ति तत्स्वरूपश्च इति शेषः ॥ ९ ॥ १० ॥

[illegible]ण्डलस्योपरिष्टात्त्रिलक्षयोजनतः अभिजिता [illegible]णि भवन्ति तथा च श्रुतिः कालायने काल- [illegible]भूतेन चोदितानि प्रेरितानि मेरुं प्रदक्षि- [illegible]दिवत् पृथगन्या गतिरस्तीत्यर्थः उत्तरा- [illegible]ज्ञामनक्षत्रं फलविशेषेण पृथक्कल्पितं तेन [illegible] भवन्ति तथा च श्रुतिः "अभिजिन्नाम नक्षत्र[illegible],,इति ॥ ११ ॥

तत[illegible]लक्षयोजनत उपर्युशना शुक्रः उपल- भ्यते [illegible]भात् पुरतः सूर्येण भोक्ष्यमाणं नक्षत्रं पश्चा[illegible]मे तु नक्षत्रे शैघ्र्यादिगतिभिरर्कवद- र्तते [illegible]कूल एव वर्तते यस्य शुक्रस्य चारेण [illegible]ण प्रायशो यं वृष्टिरनुमीयतेऽतः स वृष्टि[illegible]विष्टम्भस्तम्भनं यस्माद्ग्रहात्तमुपश- मयतीति [illegible]रेणेति प्रकारेण बुधोऽपि बुधग- तिरपि [illegible] पुरः पश्चात्सहैव वा चर- तीति [illegible]विशेषमाह । तत इत्यादिना । ततः शुक्रस्[illegible]उपरि सोमस्य सुतो बुधः उपलभ्यमानः[illegible]कृत दुःकृत अशुभकृत्त्वमे- वाह । यदा[illegible]ह न चरति तदातिवातः अभ्रप्रायं मेघ[illegible]र्षं भयमाशंसते सूचयति ॥ १२ ॥ १३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अथ स इति तच्छब्देन सूर्यान्तर्यामी नारायणः परामृश्यते प्रस्तुतत्वाल्लोकानामात्मेत्युक्तेश्च अथशब्दान्नारायणाधिष्ठानभूतः सूर्यो वा द्यावापृथिव्योरन्तरेण मध्ये स्थितस्य नभोवलयस्य मध्यवर्ती कालचक्रगतः भुङ्क्ते वर्तयति राशीनां संज्ञा येषां मासानां ते तथा तान् मेषवृषादीनित्यर्थः सम्वत्सरस्य द्वादशांशो मास इति ज्ञापनाय सम्वत्सरावयवानिति विशेषणं पक्षद्वयमित्यनेन मासपरिमाणं सपादर्क्षद्वयमित्यनेन नक्षत्रनिमित्तमासपरिमाणं तिथ्यात्मककालांशभोक्तृत्वं चेत्यनेनोक्तं कृत्तिकापादयुक्ताश्विनीभरण्यो मेष इत्यादिक्रमेण बोद्धव्यं पक्षद्वयात्मककालभोगेन सह सपादर्क्षद्वयात्मकस्य भुज्यमानत्वादुभयं च युज्यत इत्यर्थः सम्वत्सरस्य षष्ठमंशं मासद्वयं यावता कालेन नभोवीथ्या अर्केन प्रचरति तं कालमयनमाहुः। दक्षिणायनमुत्तरायणमुत्तरायणे मन्दगतिर्दक्षिणायने त्वरिता गतिर्विषुवे समा गतिरिति ॥ ५ ॥ ६ ॥

द्यावापृथिव्योर्मण्डलाभ्यां सह नभोमण्डलं प्रचरति तं कालं सम्वत्सरादिपञ्चभेदेन सूर्यस्य मन्दादिगतिभेदात् ते तज्ज्ञा इति शेषः ॥ ७ ॥

अर्कस्य सम्वत्सरभुक्तिं द्वादशराशिप्राप्तिं पक्षाभ्यां शुक्लकृष्णासंज्ञाभ्यां भुङ्क्ते मासभुक्तिं सपादर्क्षाभ्यां सकृत्तिकाश्विनीभरणीभ्यामित्यादिक्रमेण प्राप्नोति पक्षभुक्तिमेकनक्षत्रसम्मितां दिनेनैव भुङ्क्ते चन्द्र इत्यर्थः अत्र हेतुमाह। अग्रचारीति। नक्षत्राणामग्रणीत्वमग्रचारित्वम् ॥ ८ ॥

सर्वजीवराशिश्चेष्टकः जीवश्च प्राणधारकश्च द्विमे पक्षभुक्तिं स्पष्टयति। एकमिति। त्रिंशन्मुहूर्तैस्त्रिंशद्भिर्मुहूर्तैः ॥ ९ ॥

सर्वजीवनिवहप्राण इत्युक्तं स्पष्टयति। देवेति। उपजीव्यप्रधानत्वात्सर्वमय इत्यर्थः ॥ १० ॥

कालायनं तादर्थ्ये सप्तमी कालज्ञापनार्थमीश्वरनियुक्तानि कालचक्र इति वा अभिजिदुत्तराषाढाश्रवणयोः संयोगः अश्विनीरेवत्योः सन्धिरिति केचित् ॥ ११

यस्योशनसः स्थितिद्वारेण वृष्टिविष्टम्भप्रतीकारकः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

पक्षद्वयं मास इत्युपदिशन्ति। चान्द्रेण मानेन दिवा नक्तं चेत्युपदिशन्ति पैत्र्येण सपादर्क्षद्वयश्च मास इत्युपदिशन्ति सौरेण ॥ ५—७ ॥

उग्राचरणशीलत्वादेव द्रुततरगमनः ॥ ८—१७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

सूर्यगत्यैव मासादिव्यवहार इत्याह। अथेति। द्यावापृथिव्योर्मध्ये यन्नभोवलयं तस्य कालचक्रगतः तत्सम्बन्धिज्योतिश्चक्रस्थितः मास एव कस्तत्राह। पक्षद्वयं मास इति। चान्द्रेण मानेन दिवा नक्तमिति पैत्र्येण सपादनक्षत्रद्वयं सौरेण। अयनस्य नभोमण्डलस्य यावता द्वादशांशं भुङ्क्ते सः स कालो मासः अत्रानुक्तोऽपि ज्ञेयः षष्ठांशं मासद्वयम् अर्द्धेन अर्द्धं मासषट्कं भुङ्क्ते इत्यर्थः ॥ ५ ॥ ६ ॥

द्यावापृथिव्योरिति द्युमण्डलपृथिवीमण्डलयोर्मध्यवर्तिना नभोमण्डलेन तुल्यत्वमेव ज्ञापितं तत्तन्मध्याधिक्यं सम्वत्सरादिनामभेदः सौरचान्द्रादिकृत्योपयोगित्वेन तृतीयस्कन्ध एव विवृतः ॥ ७ ॥

चन्द्रादीनामपि स्थानं कार्यमाह। अर्कगभस्तिभ्योऽर्कमण्डलं ततः लक्षेति भूतलाद्द्विलक्ष इत्यर्थः। सपादर्क्षाभ्यां सपाददिनद्वयेन दिनेनैवेति। यद्यग्रचारी कदाचित्स्यात् तदा द्रुततरगमनः सन् दिनेनैव पक्षभुक्तिं भुङ्क्ते अन्यथा तु सार्द्धसप्तघटिकान्तरेण दिनेन ॥ ८ ॥

आपूर्यमाणाभिरिति शुक्लकृष्णपक्षाभ्यां देवानामहोरात्रौ। शुक्लकृष्णपक्षाभ्यां पितॄणामिति देवपितृपूजार्थं देवपित्रहोरात्रव्यवस्थेत्यर्थः। ओषधीशत्वेनान्नमयत्वात् प्राणः। "अन्नं हि प्राणिनां प्राणाः" इति स्मृतेः। अत एव जीवनहेतुत्वादमृतमयत्वाच्च जीवः ॥ ९ ॥

मनसोऽधिष्ठातृत्वान्मनोमयः ॥ १० ॥

त्रिलक्षेति भूतलात्तु पञ्चलक्षतः दक्षिणेनैवेति तेषां पृथग्गत्यभावात्। कालायने कालचक्रे सहाभिजितेति "अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानामवस्तात् श्रोणायाः" इति श्रुतेः। "उत्तराषाढाशेषार्द्धात् श्रवणादौ लिप्तिकाचतुष्कं च अभिजित्" इति ज्योतिषाच्च लिप्तिका दण्डः ॥ ११ ॥

द्विलक्षेति। भूतलात्तु सप्तलक्षतः चारेण सञ्चारेण वृष्टिविष्टम्भः स्तम्भनं तस्मात्तमरिष्टमुपशमयतीति सः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

सूर्य एव स्वगत्या मासादिव्यवहारहेतुरित्याह। अथेति। लोकानामात्मा परमपुरुषतयोपास्यत्वाद्द्यावापृथिव्योरन्तरेण मध्ये यन्नभोवलयमन्तरिक्षं तस्य मध्ये यत्कालचक्रं तत्सद्भिराशिभिः संज्ञा येषां तान् मासान् भुङ्क्ते चैत्रादिसंज्ञास्तु चान्द्रमासानां मासमाह। पक्षद्वयं मास इति। चान्द्रेण मानेन सपादं महानक्षत्रद्वयं मास इति सौरेण मानेन दिवा नक्तमहोरात्रं मास इति च पैत्र्येण मानेनोपदिशन्ति मासज्ञाः षष्ठमंशं राशिद्वयं भुञ्जीत चरेत् ॥ ५—६ ॥

स हि सूर्यः द्यावापृथिव्योर्मण्डलाभ्यां सह सम्मितं नभोमण्डलं कार्त्स्न्येन यावद्भुङ्क्ते तं कालं भानोरेव मन्दादिमतिशिघ्रवान्तरभेदवशात् संवत्सरादिपञ्च समामनन्तीत्यन्वयः। यदा शुक्लप्रतिपदि संक्रान्तिर्भवति तदा सौरचान्द्रयोर्मासयोर्युगपदुपक्रमो भवति स सम्वत्सरः ततः सौरमानेन वर्षे षड् दिनानि वर्धन्ते चान्द्रमानेन षड् दिनानि ह्रसन्तीति द्वादशदिनव्यवधानादुभयोरग्रपश्चाद्भावो भवति एवं पञ्च वर्षाणि गच्छन्ति तन्मध्ये द्वौ मलमासौ भवतः ततः पुनः पूर्वः सम्वत्सरो भवति तदेवमवान्तरभेदेन सम्वत्सरादिपञ्चसमा भवन्ति ॥ ७ ॥

अर्कगभस्तिभ्यो मण्डलरूपेभ्यः सपादर्क्षाभ्यां पादाधिकाहिनयुग्मेन ॥ ८ ॥

आपूर्यमाणाभिः शुक्लपक्षे अपक्षीयमाणाभिः कृष्णपक्षे पितृरूपाणाममराणां देवानामहोरात्राणि वितन्वानः सर्वेषां जीवन-

उशनसा बुधो व्याख्यातस्तत [illegible]रिष्टाद्द्विलक्षयोजनतो बुधः सोमसुत उपलभ्यमानः प्रायेण शुभकृद्यदा (१) काद्व्यतिरि[illegible]भ्रप्रायानावृष्ट्यादिभयमाशंसते ॥ १३ ॥

अत (२) ऊर्ध्वमङ्गारको[illegible]द्वितय उपलभ्यमानस्त्रिभिस्त्रिभिः (३) पक्षैरेकैकशो राशीन् द्वादशानुपभुङ्क्ते यदि न [illegible]र्तते प्रायेणाशुभग्रहोऽघशंसः ॥ १४ ॥

तत उपरिष्टाद्द्विलक्षयोजना[illegible] बृहस्पतिरेकैकस्मिन् राशौ परिवत्सरं चरति यदि न वक्रः स्यात् प्रायेणानुकूलो ब्राह्मण[illegible] ॥

तत उपरिष्टाद्योजनलक्षद्वयात् [illegible]श्चर एकैकस्मिन् राशौ त्रिंशन्मासान्विलम्बमानः सर्वानेवानुपर्येति तावद्भिरनुवत्सरैः प्राय[illegible]शान्तिकरः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः । [illegible]

ग्रहाणां प्राणाः अन्नमयत्वादमृतमयत्वाच्च अत ए[illegible] जीवः ॥ ९ ॥ १० ॥

कालायने कालचक्रे सहाभिजितेति उत्तराषाढाश्रवण[illegible] विशेषार्थं पृथक्कल्पितेनाभिजिन्नक्षत्रेण सहाष्टाविंशति[illegible] श्रुतिः ।

"अभिजिन्नाम नक्षत्रमुपरिष्टादाषाढानामधस्ताच्छ्रोणा[illegible]" इति ॥ ११ ॥

चारेण क्रमव्युत्क्रमात्यतिक्रमेण प्रायेण वर्षयन् वृष्टिं प्र[illegible] लोकानामनुकूलोऽनुमीयते निश्चीयते अत एव स शुक्रः वृष्टिवि[illegible] स्तम्भनं यस्माद्ग्रहात्तमुपशमयतीति तथा ॥ १२ ॥

भाषा टीका ।

इस के अनन्तर यही सब लोकों के आत्मा भगवान् सूर्य आकाशपृथिवी के मध्यमे खगोल के काल चक्र मे प्राप्त होकर सम्वत्सर के अवयव राशि संज्ञक बारा महिनों को भोगते हैं महीना पक्ष दिन रात सवादो नक्षत्र जिस मे भोग होते हैं जितने काल मे वर्ष के छठे अंश को भोगते हैं सो काल सम्वत्सर का अव यव ऋतु कहाता है ॥ ५ ॥

और जितने वर्ष के अर्धभाग से आकाश मार्ग मे सूर्य विचरते हैं तिस काल को अयन कहते हैं ॥ ६ ॥

और जितने काल मे आकाश पृथिवी के सहित खगोल को भोगते हैं उस सम्पूर्ण भोग के काल को सम्वत्सर कहते हैं तिसम सूर्य के मन्दशीघ्र समान गति के भेद से संवत्सर परिवत्सर इडावत्सर अनुवत्सर वत्सर ऐसे पांच भेदों का कथन करते हैं ॥ ७ ॥

इसी प्रकार सूर्य के किरणों से ऊपर लाख योजन दीखता हुआ चंद्रमा सूर्य के वर्ष के भोग के काल को दो [illegible] मे मास के भोग को सवादो दिनों में पक्ष के भोग [illegible]क दिन में भोगता हुआ जलदी चलने से आगे चलते [illegible] भोग करता है ॥ ८ ॥

[illegible] भी पूर्ण होती हुई कलाओं से पहिले शुक्ल पक्ष मे [illegible] अहोरात्र चन्द्रमा भोग करते हैं औ क्षय होती कलाओं [illegible] पक्ष मे पितरों के अहोरात्र को विधान करते हैं [illegible] सब के जीवन हेतु चन्द्रमा जीवरूप होकर एक [illegible] को तीस मुहूर्त मे भोगते हैं ॥ ९ ॥

[illegible] षोडश कलावाला चन्द्रमा है सो भगवान् [illegible] अन्नरूप अमृत रूप देवता पितर मनुष्य [illegible] सर्प लता इन सबों के पोषण करने मे तत्पर [illegible] सर्व मय कहते हैं ॥ १० ॥

[illegible] तीन लक्ष योजन पर नक्षत्र हैं मेरु के [illegible] चक्र मे ईश्वर के नियोजित हैं सो [illegible] अट्ठाइस हैं ॥ ११ ॥

[illegible] लाख योजन मे शुक्र दीखता है सो [illegible]ति के भेद से कभी सूर्य के साथ कभी [illegible] सरीका चलना है सो वृष्टि के [illegible] नाश करने वाला होने मे वृष्टि कर[illegible] अनुकूल रहता है नक्षत्रों की गति ने [illegible] ॥

[illegible]भावार्थदीपिका ।

बुधो [illegible]त्सहैव वा चरतीति किञ्चि-द्विशेष [illegible]माशंसते सूचयति ॥ १३ ॥

अघशंस[illegible]दि न वक्रेणाभिवर्तते तर्हि-त्रिभिस्त्रिभि[illegible]

यदि न [illegible]म ॥ १५ ॥ १६ ॥ १७ ॥

(१) यदार्कमतिरिच्येत (२) ततः (३) त्रिभिःना० (४) वक्रोऽतिवर्तते (५

तत उत्तरस्मात्सप्त एकादशलक्षयोजनान्तर उपलभ्यन्ते य एव (१) लोकानां शमनुभावयन्तो भगवतो विष्णो[illegible] प्रदक्षिणं प्रक्रमन्ति ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
ज्योतिश्चक्रसूर्यरथमण्डलवर्णनं नाम
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततो बुधमण्डलाद्विलक्षयोजनतः उपरिष्टादङ्गारक उपलभ्यमान एकैके राशौ पक्षत्रयेण भुङ्क्ते यदि न वक्रेणाभिवर्तते त्रिभिस्त्रिभिः पक्षैर्यदि न वक्रस्यः स्यात्तर्हि द्वादशराशीन् क्रमेण भुङ्क्ते इति पूर्वेणान्वयः अयं प्रायेणाशुभग्रहोऽघशंसः दुःखसूचको बेत्यर्थः । यद्वा । यदि न वक्रेणाभिवर्तते तदानुकूल इति शेषः यदि वक्रेणाभिवर्तते तदाघशंसोऽपीत्यन्वयः ॥ १४ ॥

ततोऽङ्गारकमण्डलाद्विलक्षयोजनानामन्तर उपरि तेन परि मार्गं गतो भगवान् बृहस्पतिरेकैकस्मिन् राशौ परिवत्सरं परिचरति सोऽपि यदि न वक्रः स्यात्तर्हि ब्राह्मणकुलस्य प्रायेणानुकूलः ततो बृहस्पतिमण्डलाद्योजनानां लक्षद्वयादुपरि शनैश्चरः प्रतीयमान [illegible] एकैकस्मिन् राशौ त्रिंशन्मासान् विलम्बमानः [illegible] सर्वानेव द्वादश राशीन् उपर्येति क्रमेण सञ्चरति [illegible] त्रिंशद्भिर्वत्सरैः प्रायः सर्वेषामशुभ[illegible] ॥ १५ ॥ १६ ॥

ततः शनैश्चरमण्डलादुत्तरस्मादुपरिष्टादेकादशलक्षयोजनानामन्तरे देशे सप्तर्षय उपलभ्यन्ते के ते ये ऋषयः लोकानां शं सुखमेवानुभावयन्तः सम्पादयन्तः विष्णोर्यत्परमं स्थानं परमसुखरूपं ध्रुवमण्डलं तत्प्रदक्षिणं यथा तथा परिक्रमन्ति विक्रमन्ति ॥ १७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे,
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्योपशान्तिकृत् शुभग्रहसंयोगे शुभसूचकोऽन्यथाघशंसो दुःखसूचक इत्यतः प्रायेणाशुभग्रह इति ॥ १४—१५ ॥

त्रिंशद्भिस्त्रिंशद्भिरनुवत्सरैः सर्वराशीननुपर्येति राशिषु विलम्ब्य सञ्चरणाच्छनैश्चर, इति नाम प्रायेणोक्तो शुभकरत्वात् ॥ १६—१७ ॥ (१)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
द्वाविंशोऽध्यायः ॥ २२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उशनसा बुधो व्याख्यात इति पुरतः पश्चात् सहैव वा चरतीत्यंशेन तत्तुल्यः द्विलक्षेति भूतलात्तु नवलक्ष इत्यर्थः ॥ १३ ॥

अङ्गद्वितीय इति भूतलादेकादशलक्ष । यदि न वक्रेणेति पूर्वेणान्वयः । अघशंसः दुःखसूचकः ॥ १४ ॥

द्विलक्षेति । भूतलात्तु त्रयोदशलक्ष यदि न वक्र इति पूर्वेणान्वयः ॥ १५ ॥

योजनलक्षद्वयादिति । भूतलात्तु पञ्चदश लक्षे ॥ १६ ॥

एकादशलक्ष इति । भूतलात्तु षड्विंशलक्षे परमं पदं ध्रुवलोकम् ॥ १७ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वाविंशः पञ्चमेऽध्यायः सङ्गतः सङ्गतःसताम् ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

उशनसोपमानभूतेनोपमेयतया बुधः अर्कस्य पुरतः पश्चात्सहैव चरतीति व्याख्यातः किंञ्चिद्विशेषं दर्शयति । तत इति । माशंसते द्योतयति ॥ १३ ॥

अघशंसो दुःखद्योतकः यदि वक्रेण नाभिवर्तेत अभिवर्तेत तदा त्रिभिः त्रिभिः पक्षैः पक्षैकशो राशीन् भुङ्क्ते ॥ १४ ॥

यदि वक्रो न स्यात्तदा परिवत्सरम् ॥ १५—१७ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वाविंशाध्यायार्थप्रकाशः ॥ २२ ॥

भाषाटीका ।

शुक्र के कथन से बुधका भी कथन होगया जिसके ऊपर दो लाख योजन में जो दीखते हैं सो बुध चन्द्रमा के पुत्र हैं सो प्रायः करके सबको शुभ कारक हैं जब सूर्य के सङ्ग में छूटजाते हैं तब अतिचार होनेसे अतवृष्टि अथवा अनावृष्टि आदि भयको जनाते हैं ॥ १३ ॥

---

(१) श्रीविजयध्वजतीर्थमते अध्यायान्तसमाप्तिर्नास्ति किन्तु द्वितीयाध्यायान्ते एव ।

(१) एवाभिति

भाषाटीका

इसके ऊपर मङ्गलभी दोलक्ष योजनके [illegible] पक्षों से एक एक राशी को भोगता हुआ वारा [illegible] है यदि वक्री होकर न चले तो वह गति है प्रा[illegible] है पाप का सूचक है ॥ १४ ॥

उस के दो लक्षयोजन में प्राप्त भगवान् [illegible] राशि में एक परिवत्सर चलते हैं यदि वक्र [illegible] प्राय करके ब्राह्मण कुलके अनुकूल हैं ॥ १५ ॥

तिसके ऊपर दो लक्ष योजन ऊपर प्रतीत [illegible] है सो एक एक राशि मे तीस महिना तक विलम्ब करता हुआ उतने अनुवत्सरों में सबके ऊपर चलता है प्रायः करके सबको अशान्ति करने वाला है ॥ १६ ॥

तिसके उत्तर में एकादश लक्षयोजन में ऋषिगण दीखते हैं जो ऋषि सब लोगों के कल्याण करते हुवे जो विष्णुका परमपद है तिसकी प्रदक्षिणा करते हैं ॥ १७ ॥

इति श्रीभागवत पञ्चमस्कन्ध बाइसमे अध्याय का

भाषानुवाद लक्ष्मणाचार्यकृत

समाप्त ॥ २२ ॥

इति श्रीमद्भागवते महापु[illegible]विंशोऽध्यायः समाप्तः ॥ २२ ॥

त्रयोविंशोऽध्यायः ॥

—:०:—

श्रीशुक उवाच

अथ तस्मात्परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति यत्र ह महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाणः इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः ॥ १ ॥

स हि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते ॥ २ ॥

यथा मेढीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिस्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्त्येवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवावलम्ब्य वायुनोदीर्यमाणा आकल्पान्तं (१) परिचङ्क्रमन्ति नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तन्ते एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्मनिर्मितगतयो भुवि न पतन्ति ॥ ३ ॥

केचनैतज्ज्योतिरनीकं (२) शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति ॥४॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोविंशे ध्रुवस्थानं ज्योतिश्चक्राश्रयं ततः ।
शिशुमारस्वरूपेण हरेश्च स्थितिरुच्यते ॥ ॥

यत्तत्प्रसिद्धं विष्णोः पदं यत्र ध्रुव उपास्ते तिष्ठतीत्यन्वयः समकालमेव युज्यन्त इति तथा तैर्नक्षत्ररूपैः ॥ १, २ ॥

मेढीस्तम्भे बद्धा धान्याक्रमणपशवो बलीवर्दाः कर्म सारथिः सहायो येषाम् ॥ ३ ॥

ईश्वराधारत्वात्पतनशङ्कैव नास्तीति वा मतान्तरमाह । केचनेति । ज्योतिरनीकं ज्योतिश्चक्रं योगधारणायां स्थितमिति शेषः ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सूर्यादीनां गतिविशेषास्तत्स्थानविशेषाः कार्यविशेषाश्चोक्ताः अथ ध्रुवस्य स्थानं व्यापारं चाह । अथेति । तस्मात्सप्तर्षिमण्डलात्परतस्त्रयोदशलक्षयोजनानां परस्तात्प्रसिद्धं विष्णोः परमपदमामनन्ति विष्णोरभिव्यक्तिस्थानत्वात्परमं पदमित्युक्तं किन्तत्परमं पदं तत्राह । यत्रेति । यत्र परमे पदे महाभागवतो औत्तानपादिः उत्तानपादपुत्रः अग्न्यादिभिः सबहुमानं प्रदक्षिणतः क्रियमाणः उपास्ते तिष्ठति तस्य ध्रुवस्यानुभावः प्रभावः उपवर्णितश्चतुर्थस्कन्धे इति शेषः ॥ १ ॥

स हि ध्रुवः भगवदात्मकेनानिमिषकवेगेन कालचक्रेण भ्राम्यमाणानां ग्रहाणां सूर्यादीनामश्विन्यादिनक्षत्राणां च सर्वेषां स्थाणुरिव निश्चलोऽवष्टम्भोऽवलम्बः ईश्वरेण विष्टम्भत्वेन विहितः स्थापितः शश्वत् सदा एकत्रैवावभासते ॥ २ ॥

स्थाणुरिवावष्टम्भ इत्येतद्दृष्टान्तेनोपपादयति । यथा मेढीस्तम्भः त्रिभिस्त्रिगुणितैः सूत्रैः संयोजिता बद्धा धान्याक्रमणपशवो बलीवर्दाः मेढीस्तम्भमवलम्ब्यैव मण्डलानि पार्श्वविक्षेपस्थानानि चरन्त्येवं नक्षत्रगणाः सूर्यादयो ग्रहाश्च एतस्मिन् कालचक्रे अन्तर्बहिर्योगेन आयोजिताः केचिदन्तर्योजिताः केचिद्बहिर्योजिताः सन्तो ध्रुवमवलम्ब्यैव वायुना वायुपाशैरुदीर्यमाणाः भ्राम्यमाणा आकल्पान्तं परितः भ्रमन्ते कर्मवशाद्वायुपाशबद्धत्वात् ध्रुवावलम्बत्वाच्च भुवि न पतन्तीति भावः एतदेव दृष्टान्तेन स्पष्टयति । नभसीति । यथा मेघाः श्येनादयः पक्षिणश्च वायुपाशवशाः कर्मसारथयः कर्मावलम्बाः नभसि परिवर्तन्ते न तु भुवि पतन्ति एवं ज्योतिर्गणा अपि प्रकृतिपुरुषयोः संयोगः सम्बन्धः कर्मायत्तः तेनानुगृहीताः नक्षत्रादिरूपतां प्राप्ता जीवा एव कर्मायत्तप्रकृतिसम्बन्धवशान्नक्षत्रादिशरीरभाज इत्यर्थः अत एव कर्म निमित्तं यासां ता गतयो येषामिति तथा केवलनभःसञ्चारापादककर्मायत्तनभोमात्रगतयो भुवि न पतन्ति कर्मणां तत्परिणामानां च वैचित्र्यात्प्रकृष्टजवनवद्धार्यान्तर्गतिवत्प्रभमि भ्रमणं भुव्यपतनं च उपपद्यत इति भावः ॥ ३ ॥

एवं ज्योतिर्गणानां कर्मायत्तो नभस्सञ्चार उक्तः अथ सर्वाधारस्य भगवत एव शिशुमाराकारेणावस्थितत्वात्तदाश्रयाणां पतनशङ्कैव नास्तीत्यभिप्रयन् ज्योतिर्गणस्य शिशुमाराश्रयत्वं योगिनामुपासनेन सम्पादयति । केचिदिति । शिशुमारसंस्थानस्य शिशुमारशरीरस्य भगवतो वासुदेवस्य कृत्स्नचिदचिदात्मकजगद्धारकस्य योगधारणायां वासुदेवोपासकमन

---

(१) परिच[illegible] (२) शिशुमारसंस्थानेन । इति श्रीवि० पाठः

भाषाटीका [illegible] का।

[illegible] धारणायामेवैतज्ज्योतिरनीकं [illegible] भागे योगिनो वर्णयन्ति ज्योतिरनीकाश्रयं [illegible] पादेन बोधयन्तीत्यर्थः ज्योतिरनीकाश्रयं शि[illegible] विषयीकुर्वन्तीति वार्थः ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नाव[illegible]

ध्रुवेण समकालं सायुज्यभाग्भिरुपास्ते श्रीह[illegible]

आनिमिषेणोन्मीलितनेत्रेणानेनाक्रमणापरवः प[illegible] यदा मेढीस्तम्भे बद्धास्तामभितो भ्रमन्त इत्यर्थः [illegible] शैच्यमान्द्यमगमनशरैर्यथास्थानं विहिताद्न्यथा [illegible] र्गन्ति भ्रमणमण्डलानि मेढीस्तम्भं परितः स्थानानि [illegible] हीतास्तारकाः काश्चिद्ध्रुवस्यान्तर्योगेन काश्चिद्बाह्ययोगेन [illegible] त्यर्थः आवहादिशब्दवाच्येन वायुनोदीर्यमाणाः [illegible] नन्वेते निरालम्बाः कथं न पतन्तीति तत्राह । यथेति । [illegible] क्षणां कर्मैव सारथिर्येषां ते तथा औत्पत्तिकवेगाख्य[illegible] वा अदृष्टं वा स्त्रीपुरुषसंयोगेनानुगृहीतैरापादितैर्मनःस[illegible] हेतुभूतैः कर्मभिर्निमित्तगतित्वात् ॥ २ ॥ ३ ॥

शिशुमारसंस्थानस्य शिशुमारावयवोपेतस्य योगबलेन [illegible] शक्तिमायां स्थितिमनुवर्तयन्ति ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्रिभिः सवनैः पूर्वमध्यापराह्णेषु कृषककर्तृकपरिवर्तनेने-त्यर्थः प्रकृतिपुरुषसंयोगानुगृहीताः पुरुषाधिष्ठितमायावशीकृता ॥ १ ॥ २ ॥ ३ ॥

शिशुमारसंस्थानेनोपलक्षितं योगधारणायां विराड्वदुपासनावेशार्थं यथेष्टकल्पनामात्रमयं तस्यामित्यर्थः । अत एव मनसि चन्द्र इति वक्ष्यमाणेन मनोऽपि कल्पयिष्यते स्पष्टमपि वक्ष्यते यत्तदुद्देशेति ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ध्रुवलोके त्रयोविंशे प्राह विष्णुपदाभिधम् ।
शिशुमाराकारतया ज्योतिश्चक्रञ्च दर्शितम् ॥ ० ॥

यस्योदयेति । भूतलादेकोनचत्वारिंशल्लक्षे समकालमेव युज्यन्त इति तैरमर्यादिभिर्नक्षत्ररूपैः ॥ १ ॥

स्थाणुरिवेति श्लेषेण कालचक्रेण चालयितुमशक्यत्वात् स एवैकः स्थिर इत्यर्थः । प्रत्युत कालचक्रस्यावष्टम्भः । तेन सर्वकालचक्राधीनाः ध्रुवस्तु कालचक्रमप्यधीनीकरोतीति ध्वनिः । ईदृशी योग्यता तस्य कथमभूत्तत्राह । ईश्वरेण कर्तुमकर्तुमन्यथा कर्तुमपि समर्थेन विहितः स्तम्भकोऽकर्षव्यापनार्थमिति भावः ॥ २ ॥

धान्याद्याक्रमणापशवो [illegible] [illegible] डी तत्र संयोजिताः कृषीबलेनेत्यर्थः । त्रिभिः सवनैर्[illegible]

निकटमध्यदूरवर्तिभिर्विभागैः यथास्थानं स्वस्वस्थानस्थितिमनतिक्रम्य चरन्ति दार्ष्टान्तिके त्रिभिः सवनैरुत्तरायणैर्दक्षिणायनैः समयैः । अन्तरधोऽधः स्थले बहिरुपर्युपरितनं स्थलं तत्र योगेन स्थित्या कालचक्र एव योजिताः । यथा सप्तर्षीणामधोऽधः स्थित्या आयोजिताः शनैश्चरादयः तथा सूर्यादीनामुपर्युपरि स्थित्या आयोजिताः सोमादयः तत्र तत्र आयोजिताः ईश्वरेणैव वायुना नुद्यमाणा आकल्पमानाः । ननु कथन्तेऽन्तरिक्षात्र पतन्ति तत्राह । यथेति । कर्मसारथयः कर्मसहायाः ॥ ३ ॥

ज्योतिरनीकं ज्योतिश्चक्रम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

[illegible] विंशे ध्रुवस्थानं शिशुमारचक्रं च वर्णयति । अथेति । [illegible] परं स्थानं यदग्नि तदस्ति अग्न्यादिभिः समकालं [illegible] समकालयुजन्तेनत्स्वरूपं बहुमानं यथा भवति तथा [illegible] गमानाः यत्र विष्णुपदे उपास्ते तिष्ठति इह अस्मि[illegible] पवर्णितः चतुर्थस्कन्धे उक्तः ॥ १ ॥ २ ॥

[illegible] पशवो धान्याक्रमणापशवो बलीवर्दाः कर्म सारथिः [illegible] तथा प्रकृतिः कार्यकारणरूपा पुरुषो जीवस्तयो[illegible] हीताः प्रकृतिगुणानां परिणामदेहेन्द्रियादियुक्ताः [illegible] इत्यर्थं कर्मनिमित्तं यासां ताः गतयो [illegible] न्ति ॥ ३ ॥

[illegible] नाक्नीत्याह । केचिदिति । केचित्सिद्धान्तिन [illegible] ज्योतिश्चक्रं शिशुमारसंस्थानेन शिशुमाराख्य[illegible] ण्या तस्यां स्थितमिति शेषः अनुवर्ण्य-

---

भाषाटीका ।

[illegible] फिर तिस के ऊपर तेरा लाख योजन [illegible] है जिस को विष्णु का परमपद कहते [illegible] के पुत्र महाभागवत ध्रुवजी हैं अग्नि [illegible] धर्म ये सब एकही साथ मिलकर [illegible] की प्रदक्षिणा करते हैं वे ध्रुव जी कल्प [illegible] होकर अभीभी विराजमान हैं उन के [illegible] वर्णन कर आये हैं ॥ १ ॥

जिस [illegible] है जिस का वेग अगाध हैं ऐसे भग[illegible] ज्योतिर्गण ग्रहनक्षत्रादिक घुमाये जाते [illegible] होनेवाला स्तम्भरूप ध्रुव जी को ईश्वर [illegible] किया है सो प्रकाशमान हैं ॥ २ ॥

जैसे धानादिक [illegible] हुये धान में घुमाने के पशु तीन तीन का [illegible] से घूमते हैं इसी प्रकार सूर्यादिक भगण [illegible] चक्र में युक्त होकर ध्रुवही को अवलम्ब [illegible] होते हैं तो भी कल्प पर्यन्त घूमते रहते हैं [illegible] आदि पक्षि वायु [illegible]

यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितस्तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयस्तस्य दक्षिणावर्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयन्ति। दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः ॥५॥

पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषे च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामयोर्नासिकयोर्यथासंख्यं श्रवणपूर्वाषाढे दक्षिणवामयोर्लोचनयोर्धनिष्ठामूलं च दक्षिणवामयोः कर्णयोर्मघादीन्यष्ट नक्षत्राणि दक्षिणायनानि वामपार्श्ववङ्क्रिषु युञ्जीत तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत् ॥६॥

उत्तराहनावगस्तिरधराहनौ यमो मुखेषु चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयो राहुर्गले केतवः सर्वाङ्गेषु रोमसु सर्वे तारागणाः ॥ ७ ॥

एतदु हैव भगवतो विष्णोः सर्वदेवतामयं रूपमहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत नमो ज्योतिर्लोकाय कालायनायानिमिषां पतये महापुरुषायाभिधीमहीति ॥ ८ ॥

ग्रहर्क्षताराममयमाधिदैविकं पापापहं मन्त्रकृतां त्रिकालम्।
नमस्यतः स्मरतो वा त्रिकालं नश्येत तत्कालजमाशु पापम् ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां संहितायां
वैयासिक्यां शिशुमारसंस्थानवर्णनो नाम
त्रयोविंशोऽध्यायः ॥ २३ ॥

भाषा टीका

ज्योतिर्गण प्रकृति पुरुष के संयोग से युक्त होकर कर्म की गति के अनुसार पृथिवी में नहीं गिरते हैं ॥ ३ ॥

कोई महापुरुष इस ज्योतिर्गणको शिशुमार संज्ञा से भगवान् वासुदेव के योगधारणा में स्थित है ऐसा कहते हैं ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

लाङ्गूले अग्रादधोभागे उदगयनान्यभिजिदादीनि पुनर्वस्वन्तानि चतुर्दश दक्षिणपार्श्वे दक्षिणावर्ताः पुष्यादीन्युत्तराषाढान्तानि चतुर्दश वामपार्श्वे ॥ ५ ॥

तदेव स्थानविशेषेण विभज्य दर्शयति। पुनर्वसुपुष्यावित्यादिना। पुनर्वसुरुदगयनान्त्यं नक्षत्रं पुष्यो दक्षिणायनस्याद्यमार्द्राश्लेषे तयोर्निरन्तरे अभिजिदुत्तराषाढे च दक्षिणायनयोराद्यन्तनक्षत्रे श्रवणपूर्वाषाढे तयोरुत्तरपूर्वे धनिष्ठामूलं च तयोरप्युत्तरपूर्वे मघादीनि यान्यनुराधान्तानि दक्षिणायनान्यष्ट तानि वामपार्श्ववङ्क्रिषु वामपार्श्वास्थिषु [illegible] नि प्रातिलोम्येन पूर्वाभाद्रपदान्तानि यान्यु[illegible] दक्षिणपार्श्ववङ्क्रिषु।

शतभिषग्ज्येष्ठे उत्तरदक्षिणायनयोर्वे अवशिष्टे ते स्कन्धयोः ॥ ६ ॥

यमो नक्षत्ररूपः तथा नारायणोऽश्विनौ च ककुदि गजपृष्ठशृङ्गे ॥ ७ ॥

ज्योतिषो लोकायाश्रयाय कालायनाय कालचक्ररूपाय नमोऽभिधीमहीति मन्त्रेणोपतिष्ठेत ॥ ८ ॥

मन्त्रकृतां पूर्वोक्तं मन्त्रं जपताम् ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

एतदेव प्रपञ्चयति। यस्येत्यादिना। यस्य भगवदात्मकस्य कुण्डलीभूतदेहस्य सर्पवत्कुण्डलीभूतो वलयीभूतो देहो यस्य अवाक्शिरसो यस्य अनेनोर्ध्वपुच्छत्वमवगम्यते तस्य शिशुमारस्य पुच्छाग्रे ध्रुव उपकल्पितः उपास्यः योगिभिरिति शेषः शिशुमारावयवेषु यत्र यत्रावस्थानं नक्षत्रादीनां तत्र तत्र तस्यावस्थोपासनं कृतं कैश्चित्तथैवाधुनापि कर्तव्यं तेषामवस्थि

उक्तमित्यर्थः हरे रूपं शिशुमारं त्रिकालं नमस्यतः नमस्कुर्वतः स्मरतो वा त्रिकालं मन्त्रकृतां उक्तमन्त्रं जपतां वा तत्कालजं पापमाशु शीघ्रं नश्येत नष्टं भवेदित्यर्थः तत्कालज-मित्यनेन तत्तद्भूतभविष्यद्वर्त्तमानकालजं विवक्षितम् ॥ ९ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे

श्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिकायाम्

त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

...भूतदेहस्य वक्रीकृतशरीरस्य पुच्छाग्रे उपकल्पितो ...अग्रव्यतिरिक्ते स्थले लाङ्गूले पुच्छमध्ये इत्यर्थः याम्यु... ...आदेर्दक्षिणे मघादीनीत्यादिः प्रातिलोम्येन पूर्वाभाद्र... ...मृगशीर्षान्तानीति ॥ ५—७ ॥

... देवानेषां नाथाय क्विप्प्रत्ययान्तत्वेनानिर्मीरिति- ... ॥ ८ ॥

...महाप्रयोजनमाह । ग्रहेति । मन्त्रकृतो जपतो ...रं कुर्वतः पुंस इति शेषः प्रातरादित्रिकालं ...र्माऽऽत्मना नश्यते इत्यन्वयः वा इत्यनेन "नारा- ...रायाम"इत्यादिवाक्यं प्रमाणयति ॥ ९ ॥

...भागवते महापुराणे पञ्चमस्कन्धे

...ध्वजतीर्थकृतपदरत्नावल्याम्

...विंशोऽध्यायः ॥ २३ ॥

...स्वामिकृतक्रमसन्दर्भः ।

...र्वतः न तु पृष्ठतः क्रोडतो वा अत एव दक्षिण... ...न्तव्यानि अत्र यद्वैपरीत्यं दृश्यते तत्तु ... ...शो बहुधा वक्रत्वं मन्तव्यम् । अतो नारायणा... ...रमिति । अजवीथी दक्षिणमार्गस्य प्रथमो भागः ... ...षाढा अजवीथीति शब्दिता" इति तत्रोक्तेः ... ...दो स्थितिर्लक्ष्यते तत्र तत्रापि तत्तदङ्गस्थ... ...आकाशगङ्गायाश्च क्रोडसंस्थत्वं तत्रागमना...

मङ्गारका... ...त्वेऽपि तत्तदङ्गस्थितत्वमङ्गा-नाञ्चलनत्वमा...

इति ... ...राणे पञ्चमस्कन्धे

... ...क्रमसन्दर्भस्य

... ॥ २३ ॥

मघादीनि ... ...का ।

... तत्र ... प्रतिपादिते पुच्छाग्रे ... तथाच श्रीवैष्णवे पुराणे ।

उत्तानपादपुत्रस्तु तमाराध्य ...

सतारशिशुमारस्य ध्रुवः पुच्छे ...

इति तस्य शिशुमारस्य लाङ्गूले पुच्छाग्रे ... ...दयश्चत्वारो व्यवस्थिताः अतः प्रजापत्याद्या... ...पासनं कर्तव्यमित्यर्थः एवमुत्तरत्रापि द्रष्टव्यम् ... धात्रा विधात्रा चोपकल्पित इत्यनुषङ्गः कट्यां ... ...त्रापि प्रजापत्यादयश्चत्वारो व्यवस्थिताः लाङ्गूले प्रजा... ...रधस्तादग्निस्ततोऽधस्तादिन्द्रः ततोऽप्यधो धर्म इति ... ...वलंकुण्डलीभूतशरीरस्य दक्षिणपार्श्वे याम्युदगयनना... ...जिवादीनि पुनर्वस्वन्तानि चतुर्दश उपकल्पयन्ति उप... दक्षिणायननक्षत्राणि पुष्यादीन्युत्तराषाढान्तानि च ... ...पार्श्वे उपकल्पयन्ति एतदेव स्थानविशेषेण विभज्य ... दक्षिणोत्तरपार्श्वयोरवयवसाम्यं तावदाह । यस्येति । ... ...लाकारः सर्पाकारः सन्निवेशो यस्य तस्य शिशुमारस्य ... ...योरपि पार्श्वयोर्येऽवयवाः समसङ्ख्या भवन्ति तस्य ... ...रजवीथी नाम सूर्यस्य दक्षिणायनाख्या शीघ्रगतिर्मार्गविशेषः ... आकाशगङ्गा उपकल्पिता आर्द्रेत्यादि युञ्जीत ॥ ५ ॥

स्थानविशेषेणोभयनक्षत्राणां स्थानविभागकल्पनामाह । पुनर्व... ...क्षित्यादिना । पुनर्वसुरुदगयनान्त्यं नक्षत्रं पुष्योदक्षिणायनस्या-... ...यस्तावुभौ क्रमेण दक्षिणवामयोः श्रोणयोरुपकल्प्यौ आर्द्रेत्या-... ...दियुञ्जीतानुसन्दधीत उत्तरायणनक्षत्रेष्वभिजिदादिषु पुनर्व-... ...स्वन्तेषु पुनर्वस्वार्द्राभिजिच्छ्रवणधनिष्ठा दक्षिणश्रोणिपादना-... ...सिकालोचनकर्णनाभिकास्थानेषु ज्ञेयाः मृगशीर्षरोहिणी-... ...कृत्तिकाभरण्यश्विनीरेवत्युत्तराभाद्रपूर्वाभाद्रपद अष्टौ नक्षत्राणि दक्षिणपार्श्वेऽवगन्तव्यानि शतभिषग्दक्षिणस्कन्धे दक्षिणायनन-... ...क्षत्रेषु पुष्यप्रभृत्युत्तराषाढान्तेषु पुष्याश्लेषोत्तराषाढापूर्वाषाढामू-... ...लाख्यानि पञ्च नक्षत्राणि पादनासिकालोचनकर्णस्थानेषु योज्यानि मघादीन्यनुराधान्तानि क्रमेणाष्टौ नक्षत्राणि वाम-... ...पार्श्वे योज्यानि ज्येष्ठाख्यं वामस्कन्धे योज्यं हनुः कपोलप्रान्त-... ...देशः अगस्त्ययमावपि नक्षत्ररूपेण वर्तेते इत्यभिप्रायः बृहस्पतिः ककुदि गलपृष्ठे केनम इति बहुवचनं केत्वाकारनक्षत्राणां तारा-... ...सद्भावाभिप्रायेण प्रयुक्तं शेषं स्पष्टम् ॥ ६--७ ॥

एवं प्रतिनियतस्थानग्रहनक्षत्रतारामयं शिशुमारचक्रं नित्य-... ...मुपास्यमित्याह । एतदिति । एतदुहैव एतद्वै सर्वदेवतामयं भगवतो विष्णो रूपं शरीरं शिशुमारचक्रम् अहरहः सन्ध्यायां प्रयतः ...समाहितचित्तो वाग्यतो मौनी सन्निरीक्षमाण उपतिष्ठेत वक्ष्य-... ...माणमन्त्रेण स्तुवीत मन्त्रमेवाह । नम इति । ज्योतिषां लोकाय ...संश्रयणाय कालस्याश्रयभूताय कालचक्रस्वरूपाय वा अनि-... ...मिषां ब्रह्मादीनामपि पतये तेषामपि कालवश्यत्वान्महापुरु-... ...षाय परमपुरुषात्मकाय नमः अभिधीमहीति उक्तरूपं महापुरुषं ध्यायेम इत्यर्थः ॥ ८ ॥

एवं शिशुमाराकृतेर्भगवतोऽनुसन्धाननमस्कारयोः फलमाह । ग्रहेति । ग्रहनक्षत्रतारामयमाधिदैविकमधिदैवे वर्त्तमानं देवेभ्यः

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

उदगयनानि अभिजिदादीनि पुनर्वस्वन्तानि चतुर्दश दक्षिणपार्श्वे दक्षिणायनानि पुष्यादीनि उत्तराषाढान्तानि चतुर्दश वामपार्श्वे अजवीथी दक्षिणमार्गस्य प्रथमो भागः ॥ ५ ॥

उक्तान्येव नक्षत्रस्थानानि विशेषेण विभज्य दर्शयति । पुनर्वसुपुष्यावित्यादिना । वामपार्श्वस्य वक्षिपु अस्थिषु प्रातिलोम्येन मृगशिरारोहिणीकृत्तिकेत्येवं व्युत्क्रमेण पूर्वभाद्रपदान्तान्यह दक्षिणपार्श्वास्थिषु ॥ ६-८ ॥

मन्त्रकृतां पूर्वोक्तमन्त्रं जपतां पापापहमाधिदैविकं परमेश्वरस्य रूपमिदं नमस्कृतः स्मरतो वा पुंसः पापं नश्यतेत्यन्वयः अत्र सूर्यमण्डलादूर्ध्वं त्रिशल्लक्षे ध्रुवः ध्रुवात् कोटियोजने महर्लोकः महर्लोकात् कोटिद्वये जनलोकः जनलोकात् कोटिद्वये तपोलोकः ४ तपोलोकाद्द्वादशकोटिषु सत्यलोकः । एवं सूर्यात् सत्यलोकपर्यन्तमष्टत्रिंशल्लक्षोत्तरत्रयोविंशतिकोट्यः सत्यलोकद्विपञ्चोत्तरायां कोटौ वैकुण्ठस्ततोऽण्डगोलक इति श्रीविष्णुपुराणे दर्शितया दिशा सूर्यात् पञ्चविंशतौ कोटिषु कटाहः । एवं सूर्यात्लक्ष भूतलं ततः सप्तसप्ततिसहस्रे सप्त पातालानि तदधस्त्रिंशत्सहस्रेषु शेषः एवं सूर्यात्लक्षद्वये गर्भोदः स च लक्षत्रयन्यूनपञ्चविंशतिकोटिपरिमितः एवं मिलित्वा ऊर्ध्वाधः पञ्चाशत्कोटि प्रमाणमण्डगोलकमिति ॥ ६ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमस्य त्रयोविंशः सङ्गतः सङ्गतः सताम् ॥ २३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यस्य शिशुमारस्य लाङ्गूले पुच्छाग्रादधोमुखे । तस्य दक्षिणपार्श्वे अभिजिच्छ्रवणधनिष्ठाशतभिषापूर्वाभाद्रपदोत्तराभाद्रपदरेवत्यश्विनीभरणीकृत्तिकारोहिणीमृगशिरआर्द्रापुनर्वसवो यान्युदगयनानि चतुर्दश नक्षत्राणि कल्पयन्ति सव्ये वामपार्श्वे तु पुष्याश्लेषामघापूर्वाफाल्गुन्युत्तराफाल्गुनीहस्तचित्रास्वातिविशाखानुराधाज्येष्ठामूलपूर्वाषाढोत्तराषाढाख्यानि दक्षिणायनानि चतुर्दश नक्षत्राणि शिशुमारस्योभयोः पार्श्वयोरवयवा यथा भवन्ति तथा कल्पयन्ति तज्ज्ञा उदरतः उदरे ॥ ५ ॥

उदगयनदक्षिणायननक्षत्राणां स्थानानि विभज्य दर्शयति । पुनर्वसुपुष्यावित्यादिना । पुनर्वसुपुष्यावुदगयनान्त्यं नक्षत्रं पुष्यो दक्षिणायनान्त्यम् । आर्द्राश्लेषे तयोर्निरन्तरे इत्यत्रवोरिति सूच्यमानपादद्वयापेक्षया पश्चिमयोः पादयोः अभिजिदुत्तराषाढे उदगयनदक्षिणायननक्षत्रगणयोरादान्त्ये नक्षत्रे श्रवणपूर्वाषाढे तयोरव्युत्तरपूर्वे धनिष्ठामूलं च तयोरप्युत्तरपूर्वे पुनर्वस्वार्द्राभिजिच्छ्रवणधनिष्ठा पञ्च नक्षत्राणि दक्षिणाश्रोणिपाद्नासिकाक्षोचनकर्णेषु पुष्यादीनि पञ्च वामश्रोण्यादौ च यथासङ्ख्यं कर्णेषु पुष्यादीनि पञ्च वामश्रोण्यादौ च यथासङ्ख्यं युञ्जीतेत्यर्थः मघादीनीनि मघापूर्वाफाल्गुनी उत्तराफाल्गुनी हस्तचित्रास्वातिविशाखानुराधाख्यानि अष्ट नक्षत्राणि वामपार्श्ववङ्क्रिषु वामपार्श्वास्थिषु युञ्जीत अनुराधातः आरभ्य मघादीनि प्रातिलोम्येन पूर्वाभाद्रपदान्तानि मृगशिरःप्रभृतीनि दक्षिणपार्श्वस्थभरण्यश्विनीरेवत्युत्तराभाद्रपदपूर्वा... वङ्क्रिषु अस्थिषु ... ... शिरं दक्षिणांसे तथैव वामस्कन्धे न्यसेत् ॥ ६ ॥

यमो ... बृहस्पतिः ककुदि गलपृष्ठशृङ्गे ॥ ७ ॥

एतच्छिशुमाराख्यं विष्णोः रूपमुपतिष्ठेतानन्तरमन्त्रेण स्तुवीत मन्त्रमाह । नम इति । ज्योतिषां लोकाय कालस्थानाय कालरूपाय कालचक्ररूपाय नमोऽभिधेयमर्हाति ॥ ८ ॥

ग्रहर्क्षताराभयं ग्रहाद्याश्रयमत एवाधिदैवकर्माधिदैवलिङ्गरूपं शिशुमारचक्रं नमस्यतः स्मरतः मन्त्रकृतामुक्तमन्त्रं जपतो च पापमाशु नश्येत ॥ ६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
त्रयोविंशोऽध्यायः ॥ २३ ॥

भाषा टीका ।

उस शिशुमार चक्र का नीचे को मुख है कुण्डलाकार गोल उसका शरीर है उसके पुच्छ के अग्र भाग में ध्रुव कल्पित हैं उसके लांगूल में प्रजापति हैं अग्नि इन्द्र धर्म ए तीनों पुच्छ के मूल में धाता विधाता दोनों कमर में सप्त ऋषि भी उसके दहिने आवर्त कुण्डलाकार देह में उत्तरायण के नक्षत्र दाहिने पार्श्व में कल्पित हैं दक्षिणायन के जो नक्षत्र हैं कुण्डलाकार के बांये भाग में हैं ऐसे कल्पना करने से दोनों ओर अवयव समान संख्या के होजाते हैं पीठ में अजवीथी है उदर में आकाश गङ्गा है ॥ ५ ॥

पुनर्वसु पुष्य दोनों दहिने बांये में हैं आर्द्रा अश्लेषा दोनों कटि पार्श्व में हैं दहिने बांये दोनों पादों में अभिजित् उत्तराषाढ़ा हैं दहिने बांये नासिका में क्रम से श्रवण पूर्वाषाढ़ा दहिने बांये दोनों नेत्रों में धनिष्ठा मूल हैं दहिने बांये दोनों कानों में मघादिक आठ नक्षत्र दक्षिणायन के हैं बांये पार्श्व के अस्थि में युक्त करे ते से ही मृगशिर आदि उत्तरायण नक्षत्रों को दहिने पार्श्व के अस्थि में प्रतिलोमता से युक्त करे शतभिषा ज्येष्ठा दोनों को दहिने बांये स्कन्ध में न्यास करे ॥ ६ ॥

ऊपर के हनु में अगस्ति हैं नीचे के हनु में यम हैं मुखों में मङ्गल हैं उपस्थ में शनैश्चर हैं गलपृष्ठ में बृहस्पति हैं वक्षस्थल में आदित्य हैं हृदय में श्रीनारायण हैं मन में चन्द्रमा हैं नाभि में शुक्र हैं स्तनों में अश्विनी कुमार हैं प्राण अपान में बुध हैं गले में राहु हैं सब अङ्गों में केतु हैं रोमों में सब तारागण हैं ॥ ७ ॥

यह श्रीविष्णु भगवान् का सर्व देवता मय रूप है इस को प्रतिदिन सायंकाल में सावधान से मौन होकर दर्शन करता रहता हुआ स्तुति करे यह मन्त्र पढ़े ज्योतियों

[illegible] सूर्यादारभ्य ध्रुवपर्यन्तं वि[illegible]
सूर्यादधस्तात्स्वर्भान्वादिमण्डलमनुवर्ण[illegible]
सूर्यस्याधस्ताद्योजनानामयुते स्वर्भानु[illegible]
वदन्ति तं विशिनष्टि । योऽसाविति । सोऽ[illegible]
मरत्वं ग्रहत्वं चालभत लेभे केवल[illegible]
त्वादौ हेतुः न तु तस्य तद्योग्यतास्तीत्याह [illegible]
कायाः पुत्रः राहुरसुराधमः अत एवामरत्व[illegible]
भगवत्कृपाविषयत्वोपपादकमित्याह । तद्यदि[illegible]
कर्माणि च उपरिष्टादष्टमस्कन्धे वक्ष्याम [illegible]
स्फुटीभविष्यतीति नात्रावसर इति भावः ॥ १ [illegible]

राहुप्रसङ्गादुपरागस्वरूपं वक्तुमाह । यदद [illegible]
स्तरयोः सूर्यस्य यदद‌ः यत्तत्प्रसिद्धं मण्डलं तद्विस्तार[illegible]
युतमयुतयोजनविस्तृतमाचक्षते ततः सूर्यमण्डल[illegible]
सोममण्डलं द्वादशसहस्रयोजनविस्तृतं सूर्यमण्डला[illegible]
राहोर्मण्डलं तु त्रयोदशसहस्रयोजनविस्तृतमतः सूर्यम[illegible]
लाभ्यां स्वर्भानोर्मण्डलस्य विस्तृतत्वात्कदाचित्सूर्यसोमम[illegible]
माच्छादकत्वं सम्भवतीति भावः । यः स्वर्भानुस्तद्द्वयध्या[illegible]
भूतपातदशायां तयोः सूर्याचन्द्रमसोरभिमुखं धावति ताभ्यां क[illegible]
हायाभिमुखं गच्छतीत्यर्थः ॥ २ ॥

तदभिधावनं निशम्य दृष्ट्वा भयेऽपि रक्षणाय भगवता परम-
पुरुषेण भागवतं भगवत्सम्बन्धि तत् सुदर्शनाख्यमस्त्रं तेजसा दुर्वि-
षहं दुःखेनापि सोढुमशक्यं मुहुर्मुहुः परिभ्रममाणं प्रति मुहूर्त-
मभिमुखतयावस्थितो राहुरुद्विजमानो भयमापन्नश्चकितहृदय-
श्चकितश्च आराद्दूरादेव निवर्तते तदेवोपरागो ग्रहण-
मिति जनाः वदन्ति अभिधावनदशायां यत्स्वमण्डलेन सूर्या-
चन्द्रमसोर्मण्डलाच्छादनं तदेव ग्रहणमिति जना उपरागस्वरू-
पाभिज्ञा वदन्तीत्यर्थः । तत्र क्षुतुपर्कस्थितिश्यामग्रासग्रासो-
न तु वस्तुतो ग्रासोऽस्तीति दूराद्दूरत्वात् ॥ ३ ॥

ततः स्वर्भानोरधस्तात्तावन्मात्र एवायुतयोजनान्तर एव सिद्धादीनां
सदनानि स्थानानि ततोऽधस्तात्सिद्धादिसदनेभ्योऽधस्तात् यक्षा-
दीनां विहाराजिरं विहारस्थानमन्तरिक्षं गृहहीनं वर्तते तस्या-
वधिमाह । यावद्वायुः प्रधावति भृशं धावति तस्याप्यवधि-
माह । यावन्मेघा उपलभ्यन्त इति ततो यक्षादीनां विहा-
रान्तरिक्षादधस्ताच्छतयोजनान्तरेऽयं पृथिवी भूर्लोको वर्तते
पृथिव्या उपरि भूर्लोकस्यावधिमाह । यावदिति ! यावद्धंसादयः
पक्षिश्रेष्ठा बलिनः उत्पतन्त्युपरुच्छन्ति तावद्भूर्लोकमित्यर्थः ॥ ४ ॥
॥ ५ ॥ ६ ॥

भूमण्डलं तु सप्रपञ्चमुपवर्णितं प्रागित्याह । उपवर्णित-
मिति । यद्भूमेः सन्निवेशनावयवविन्यासेनावस्थानं तद्यथा तदु-
पवर्णितमेव ध्रुवमण्डलादारभ्य भूपर्यन्तो लोकसन्निवेश उक्तः
अथ भूमेरधस्तनानां लोकानां सन्निवेशमाह । अधस्तादपीत्यादिना
[illegible]राध्यायान्तेन ग्रन्थेन अवनेर्भूर्लोकादधस्तात् सप्तभूविवरा भूम्या-
[illegible]विवराः सन्ति ते एकैको योजनानामयुतं तेनान्तरा मध्य
[illegible]च्छिन्नं भावे क्तः उच्छ्रायः औन्नत्यं योजनायुतान्तरोच्छ्रितमायामो
[illegible]र्घ्य विस्तारश्चायुतयोजनपरिमितस्तेषां समाहारद्वन्द्वः तेन
[illegible]जनायुतान्तरोच्छ्रितायामविस्तारेण उपक्लृप्ताः [illegible]

भूमेः योजनायुतोच्छ्रितस्तथा विवरानामायामो विस्तारश्चायुतयो-
जनपरिमित इत्यर्थः तारतम्येन भोगतारतम्येन चोपक्लृप्ताः भूमौ
कल्पिताः विवरेषु ओगाधिक्यमस्तीत्यर्थः विवराणि सप्त निर्दि-
शति । अतलमित्यादिना । पातालमित्यन्तेन ग्रन्थेन ॥ ७ ॥

तारतम्येनोक्तेनदेव सप्तविवरसाधारण्येन दर्शयति । एते-
ष्वित्यादिना अथातल इत्यतः प्राक्तनेन ग्रन्थेन । एतेषु बिल-
स्वर्गेषु दैत्यादयो निवसन्तीत्यन्वयः कथम्भूतेषु स्वर्गादप्यधिकः
कामभोगश्चैश्वर्यानन्दः ऐश्वर्यप्रमुक्तिसन्तोषश्च भूतिः सम्पत्तिश्च
[illegible]भूतिरिशितः [illegible] निवसापेक्षत्वात् समासः
[illegible]भितः सुसमृद्धानि भवनान्यागाराणि उद्यानानि क्रीडा-
[illegible]नानि विहारस्थानानि च येषु यत्र क्रीडा खेलनं विहारः
[illegible] कथम्भूताः नित्यप्रमुदिता अनुरक्ताः कलत्रादयो
[illegible]तथाभूताः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

[illegible] श्रीनारायणमाहा-
[illegible] निरूपयति । तत्रादौ शनैश्चरपर्यन्तानां
[illegible] राहोः स्थितिः किमिति न निरूपितेति
[illegible] निरूप्य सूर्यादीनां मण्डल-
[illegible]ति । अधस्तादिति । एके पौराणिकाः स्वर्भानुर्न-
[illegible] मेरुं परितः प्रादक्षिण्येन चरतीति
[illegible] मानसोत्तराद्बहिर्भूतप्रान्तभूमिगत्त
[illegible] भूमावेवास्तिमित्वा पातालविवरमध्य एव
[illegible] बहिः प्रान्तभूमेरेव पूर्वस्यां दिशि
[illegible] भूमावेवास्तमेतीत्येवं सङ्गिरन्ते अत
[illegible] च भाषन्ते अपरे मेरोरपा-
[illegible] पश्चिमत उदेत्य पूर्वस्यां दिश्यस्तं
[illegible] अमरत्वायोग्यः ॥ १ ॥

[illegible]योजनविस्तृतं ततो द्विगुणं सोमम-
[illegible]जनविस्तृतं द्वादशसहस्रं त्रिदशसहस्राणि-
[illegible]गुणं चत्वारिंशत्सहस्रयोजनेन विस्तृत
[illegible]मित्यनेन त्रिदशेति युक्त्या त्रिंशत्संख्या
[illegible] सोममण्डलाद्द्विगुणोक्त्या कुत एवं
[illegible]नामन्तरेणेति चेन्न ।
[illegible] तु मण्डलाद्द्विगुणोक्तिताम् ।
[illegible] इति वचनात् ॥ २ ॥

[illegible] "तदस्य प्रियम्,, इत्यस्मिन्नर्थे अणप्र-
[illegible]मिति शेषः चक्राभिमुखमवस्थितः
[illegible] दूरात् दूरात् ॥ ३ ॥
[illegible] ॥ ४—५—६ ॥
[illegible]तारतम्येनोपक्लृप्ताः सुखादिसा-
[illegible] ॥ ७ ॥
[illegible]तितरपरं समृद्धभवनोद्याना-
[illegible] तेष्वाक्रीडः मिथुनक्रीडायो-
[illegible]दविलक्षणवादिभिराच्छिन्न-
[illegible] ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एक इति । स्वमते तु सर्वहास्यवायुवाह्यभूतत्वात्सत्वप्रचराणां नास्ति । किन्तु स्वगत्यैवेति ॥ १ ॥

सरयोर्मण्डलं रथनीडाऽभ्यन्तरस्थितं तेजश्चक्रम् ॥ २—७ ॥

ईश्वरात् समर्थादपि ॥ ८—१८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सूर्यादधोऽधः स्वर्भानुसिद्धादीनां स्थितिं भुवः ।
अतलादीनि सप्तापि चतुर्विंशेऽवदन्मुनिः ॥

न तदमरत्वं ग्रहत्वञ्चार्हतीति सः ॥ १ ॥

ग्रहणं वक्तुमाह । यदद इति । पर्वणि अमावास्यापौर्णमास्योः तमोभूतस्वस्थजनचक्षुषां व्यवधानं कर्तुममृतपाने मध्यप्रवेशे तयोर्व्यवधानं पूर्वं कृतवानित्यतः ताभ्यां सूचितत्वात् वैरं अनुबध्नातीति स यथा ॥ २ ॥

उभयत्र सूर्ये चन्द्रेऽपि तत् प्रसिद्धं चक्रं परिभ्रमत् दृष्ट्वेति शेषः । आभि अभिमुखगतस्थितं सत् तदवस्थानमेवोपरागं वदन्ति । तत्र च भुजुवक्रगतिरूपा सर्वग्रासार्द्धग्रासौ न तु वस्तुतो ग्रासोऽस्ति अयुतयोजनान्तरत्वात् ॥ ३ ॥

तावन्मात्रे योजनायुते ॥ ४ ॥ ५ ॥

पृथिव्या उपरि भूर्लोकात्वधिमाह । यावद्धंसाद्यः पार्थिवा विकाराः ॥ ६ ॥

अधस्तात् अधोऽधश्चपार्श्वेष्वित्यर्थः । भूविवरा भुवो विवरभूताश्चैवातलादीनीत्यर्थः । योजनायुतान्तरेण योजनायुतावधाविलर्थः । "अन्तरमवकाशावधि" इत्यमरः । भूतलायोजनायुतावधौ अतलं तस्माद्योजनायुतावधौ वितलमित्येव आयामविस्तारेणापि योजनायुतावधिना उपक्लृप्ताः दैर्घ्यविस्ताराभ्यां समा एवेत्यर्थः । उच्छ्रितत्वं तु यथा सम्भवं ज्ञेयम् ॥ ७ ॥

सामान्येन त्रिवराणां वर्णयति । एतोप्यस्मिन्निमा । भूतिःप्रभावः विभूतिः सम्पत्तिः । ईश्वरादिग्भ्रादेरपि ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अथ सूर्यादधः स्वर्भान्वादिस्थितिमतलादिस्थितिं चाह । अधस्तादित्यादिभिस्त्रिभिरध्यायैः । "भूमेर्योजनलक्षे तु सौरं मैत्रेय मण्डलम्" इति श्रीपराशरोक्तिः तत्र सवितुरधस्तात् योजनायुते स्वर्भानु राहुः असदर्होऽपि भगवदनुकम्पया अमरत्वं ग्रहत्वं चावभत लेभे उपरिष्टादष्टमे स्कन्धे ॥ १ ॥

अदो जगत् प्रतपतस्तरणेर्यत्प्रसिद्धं मण्डलं तद्विस्तरतो योजनायुतं योऽमृतपाने मध्यप्रवेशेन तयोः सूर्याचन्द्रमसोर्व्यवधानं करोतीति तथा अत एव ताभ्यां सूचितत्वात् वैरमनुबध्नातीति वैरानुबन्धो यः स पर्वणि सूर्याचन्द्रमसावभिधावति ॥ २ ॥

तदभिधावन्तं निशम्य [illegible] प्रियतमं भागवतं अस्त्रीयं दुर्विषहं सुरासुरैर्दुःखेन [illegible] महाचक्रं सुदर्शनं नामास्त्रमुभयत्र उभयोः [illegible] अनुक्रमत एव परिवर्तमानं परिभ्रमत् [illegible] तेजसा मुहुर्मुहुः [illegible] अभि तयोरभिमुखे मुहूर्तमवस्थितः आराद्दूरादेव निवर्तते इतीदमभिमुखावस्थानमेवोपरागं लोकाः वदन्ति तत्र [illegible] समविषमावस्थितिभ्यां सर्वग्रासार्द्धग्रासौ प्रतीयेते ॥ ३ ॥

तत स्वर्भानोः तावन्मात्रे योजनायुते ॥ ४ ॥

[illegible]: सिद्धादिसदनमर्यादाह: [illegible] सूर्यभूम्योरन्तरस्य योजनलक्षपरिमितत्वं मन्तव्यम् ॥ ५ ॥ ६ ॥

एकैकशो योजनायुतान्तरेण योजनायुतोच्छ्रायेण आयामविस्तारेण वैपुल्यस्य तावता विस्तारेण च उपक्लृप्ताः उपव्यस्ताः ॥ ७ ॥

अतलादिसाधःस्थानगुणान् दर्शयति । एतेष्विलस्थादिमा । अभिकं काम्यन्ते इति कामाः भोग्यपदार्थास्तेषां भोगश्च ऐश्वर्यानन्दश्च भूतिरनुभूतिर्भोग्यपदार्थसंपत्तिश्च तैः समृद्धा भवनादयो येषु नित्यप्रमुदिता अनुरक्ताश्च कलत्रादयो येषां ते ईश्वराल्लोकेश्वरादिभ्यश्चापि न प्रतिहतः कामो येषां ते मायया आविद्याकौशलेन विनोदो येषां ते दैत्यादयो निवसन्ति ॥ ८ ॥

भाषाटीका ।

श्रीशुकदेव जी बोले सूर्य देव के नीचे दश हजार योजन पर राहु नक्षत्र सरीका घूमता है ऐसा कोई कहते हैं जोकि स्वयं असुरों में अधम है सो भी सिंहिका का पुत्र भगवान् की कृपा से अमर तथा ग्रह होगया है तात ! इस का जन्म कर्म सब आगे हम कहेंगे ॥ १ ॥

जो यह तपने वाला सूर्य देव का मण्डल है तिस को विस्तार मे दशहजार योजन कहते हैं बारा हजार योजन चन्द्रमा मण्डल है तेरा हजार योजन राहुका मण्डल है वह राहु समुद्रमन्थन पर अमृत के बाटते सूर्य चन्द्र के बीच में छिपा तब उनने विष्णु को बतादिया था तिस का वैर बान्धकर पूर्णिमा अमावास्या को चन्द्रमा सूर्य दोनों पर दौड़ता है ॥ २ ॥

इस बात को जानकर चन्द्र सूर्य दोनों की रक्षा करने की इच्छासे छोड़ा हुआ जो भगवान् का अति प्रिय भागवत सुदर्शनचक्र अस्त्र तिसके तेजसे बार बार घूमने से दुःसह तेजको जानकर मुहूर्त भर बड़े उद्वेगको प्राप्त होकर बड़े चकित हृदय से शीघ्रही निवृत्त होजाता है तिसीको सब लोग ग्रहण कहते हैं ॥ ३ ॥

तिसके नीचे सिद्ध चारण विद्याधरों के स्थान उतनेही दूरपर हैं ॥ ४ ॥

तिसके नीचे जहांतक वायु चलता है जहां तक मेघ मालूम पड़ते हैं तहांपर यक्ष राक्षस पिशाच प्रेत भूत गणों के विहारका चौगान अन्तरिक्ष लोक है ॥ ५ ॥

तिसके नीचे सौ योजन पर यह पृथिवी है जहां कि हंस भास बाज सुपर्ण आदि बड़े पक्षी उड़ते हैं ॥ ६ ॥

भूमी के व्यापन की स्थिति वर्णन करते हैं पृथिवी के नीचे सात भूछिद्र हैं एक एक दश हजार योजन के दूर लंबे चौड़े भूमिके बिल हैं अतल वितल सुतल तलातल महातल रसातल पाताल ये सात विवर हैं ॥ ७ ॥

ताः पुरो नानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकार-
पारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहो--

उद्यानानि चातितरां ... कुसुमफलस्तबकसुभगकिसलयावनतरुचिरविटपवि-
टपिनां लताङ्गालिङ्गितानां श्रीभिः ... विहङ्गमजलाशयानाममलजलपूर्णानां झषकुलोल्ल-
ङ्घनक्षुभितनीरनीरजकुमुदकुवलयकह्लार ... कृतशतपत्रादिवनेषु कृतनिकेतनानामेकविहारा-
कुलमधुरविविधस्वनादिभिरिन्द्रियोत्सवै ... तिशयितानि ॥ १० ॥

यत्र ह वाव न भयमहोरात्रादिभिः ... लक्ष्यते ॥ ११ ॥

यत्र हि महाहिप्रवरशिरोमणयः ... ॥ १२ ॥

भाषाटीका ।

इनमें बिलस्वर्गों में स्वर्ग से भी अधिक काम भोग ... आनन्द विभूतियों से युक्त बडे भारी मकान बगीचा विहार ... में नित्य मुदित अनुरक्त स्त्री पुत्र बन्धु सुहृद ... के सहित मालिक होकर ईश्वर से भी जिनको शंका ... है ऐसे माया में विनोद करने वाले दानव दैत्य काद्रवेय ... सब निवास करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च । हे महाराज ! येषु मयेन निर्मिताः पुरश्च चकासती-त्यन्वयः । कथम्भूताः नाना ये मणिप्रवरास्तेषां प्रवेका मुख्यास्तै-र्विरचितैर्विचित्रैर्भवनादिभिस्तथा विवरेश्वराणां गृहोत्तमैश्च सम-लङ्कृताः । कीदृशैर्गृहोत्तमैः नागाश्चासुराश्च मिथुनभूताः पाराव-ताद्यश्च तैराकीर्णाः कृत्रिमा भूमयो येषु तैः । पाठान्तरे नाना स्वनत्वं मिथुनविशेषणम् ॥ ९ ॥

उद्यानानि चातितराममरलोकश्रियमतिशायितानि येषु चकासती-त्यन्वयः । काभिः श्रीभिः । केषां तेषां कुसुमफलस्तबकाश्च सुभ-गकिसलयानि च तैरवनता रुचिरा विटपा येषां विटपिनां लता-नामङ्गैरालिङ्गितानां श्रीभिः तथा समिथुनाश्चक्रवाकादिमिथुन-सहिता ये विविधा विहङ्गास्तद्युक्तानां जलाशयानां च श्रीभिः कीदृशानाम् अमलजलैः पूर्णानां पुनरपि केरतिशयितानि झष-कुलोल्लङ्घनेन क्षुभितं यज्जलाशयानां नीरं तस्मिन् यानि नीरजा-दीनि तेषां वनेषु कृतं निकेतनं यैस्तेषामर्थात् पक्षिणामेकोऽस्खण्डो यो विहारस्तेनाकुलाश्च ते मधुराश्च विविधाः स्वनादयस्तैर्ये इन्द्रियोत्सवास्तैश्च । यद्वा । समिथुनेत्यादेरुत्तरेणैव संबन्धः । मन-इन्द्रियानन्दिभिरिति स्वनादीनां विशेषणं तत्र नीरजं सामा-न्येन कमलं लोहितं शतपत्रं तद्विशेषः ॥ १० ॥

... अहोरात्रादिभिर्यद्भयं तन्नोपलक्ष्यते सूर्याद्यभावात् ॥ ११-१२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च हे महाराज ! येषु बिलस्वर्गेषु मायाविनासुरेण मयेन निर्मिताः पुरः पुराणि चकासति इत्यन्वयः कथम्भूता ... ना ये मणिप्रवरास्तेषां प्रवेका मुख्यास्तैर्विरचितैर्विचित्रैर्भ-... तथा विवरेश्वराणां गृहोत्तमैश्च समलङ्कृताः कथम्भूतैः ... नागाश्चासुराश्च मिथुनीभूताः पारावतादयश्च तैराकीर्णाः ... कृत्रिमा वेदिकाविरूपा भूमयो येषु तैः नानास्वन-... पाठे नानास्वनत्वं मिथुनीभूतपारावतादिविशे-... ॥

... लताभिरालिङ्गितानां संश्लिष्टानां कुसुमस्तबकैः फल-... किसलयैश्चावनता नम्रा रुचिरा विटपाः शाखा येषां ... उद्यानानि क्रीडावनानि मनस इन्द्रि-... आनन्दकारिणीभिः श्रीभिर्विवरेश्वरश्रीभि-... शयितानि अतिक्रान्तानि येषु विवरेषु चका-... अमरलोकश्रियमतिशयितान्युद्यानानि, चका-... पूर्णानां समिथुनानां चक्रवाकादिभिर्मिथु-... विहङ्गास्तेषां कुलं समूहस्तस्य कोला-... जलाशयानां सम्बन्धिझषसमूहस्योल्लङ्घनेन ... नीरं जलं तस्मिन् यानि नीर-... निकेतनं स्थानं येषां पक्षिणामिति ... हारेणाकुला मधुरा ये विविधाः स्वराः ... आदयो विवक्षिताः तैः कथम्भूतैः इन्द्रियाणां ... भिरिति यावत् उक्तविधविटपिना-मुक्तविधानां ... आनन्दिभिः श्रीभिरिन्द्रियोत्सवैः उक्तविधानां ... स्वरादिभिश्चामरलोकश्रियमति-शयितान्युद्यानानि ... येषु चकासतीत्यर्थः ॥ १० ॥

यत्र ह वाव येषु ... कालावयवैः अहोरात्रादि-भिर्भयं नोपलक्ष्यते ... भूयस्त्वादिति भावः यत्र येषु विवरेषु ये महा... तेषां ये शिरोमणयः फणामणयः ते ... अन्धकारं प्रबाधन्ते निरस्यन्ति ॥ ११ ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

येषु विवरेषु पुरः ... चकासति विलसन्तीत्यन्वयः मायया आर्यक्रियाकरणात् ... मयेन निर्मिताः नाना-मणीनां प्रवेकैः श्रेष्ठैः ... विरचिताः एवं

न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभि[illegible]
यश्च देहवैवर्ण्यदौर्गन्ध्यस्वेदक्लमग्लानिरिति वयोऽवस्थाश्च भवन्ति ॥ १३ ॥
न हि तेषां कल्याणानां प्रभवति कुतश्चन मृत्युर्विना भगवत्तेजसश्चक्रापदेशात् ॥ १४ ॥
यस्मिन् प्रविष्टेऽसुरवधूनां प्रायः पुंसवनानि भयादेव स्रवन्ति पतन्ति च ॥ १५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवालयमायतनं पाषाणबद्धवृक्षमूलस्थानं नाना स्वनैः मिथुनतो वर्तमानैः पारावतादिभिराकीर्णाः कृत्रिमभूमयो येषु ते तथ तैर्विवरेश्वराणां गृहोत्तमैरन्तःपुरश्चैः ॥ ९ ॥

येषु विवरेषूद्यानानि चकासति विटपिनां वृक्षाणां मन-आदीन्द्रियानन्दहेतुभिर्विटपैः शाखाभिः कुनाभिः श्रीभिः समृद्धिभिः कनकेति वृक्षविशेषणममृतजलपूर्णानां समिथुनानां विहङ्गकुलानां कोलाहलशब्दयुक्तानां जलाशयानां सरसां सम्बन्धिनां मत्स्यकुलानामुल्लङ्घनेनोत्पत्य पतनेन क्षुभितनीरचञ्चलनीरजादिसमुदायेषु कृतनिवासानामनेकविहाराकुलानां मधुकराणामिन्द्रियोत्सवैर्मधुकरस्वनादिभिः स्वर्गश्रियमतिशायितानि अतिशयोपेतान्युद्यानानीति सम्बन्धः नीरजं सामान्येन कमलं कह्लारं सौगन्धिकं शतपत्रं रक्तकमलम् आदिशब्देन पुण्डरीकादयो गृह्यन्ते "पुण्डरीकं सिताम्बुजम्", इत्यभिधानम् ॥ १०—११ ॥

(१) शार्वरं शर्वरीजन्यमित्र स्थितं तमः ॥ १२॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

येषु पुरश्चकासतीत्यन्वयः । कीदृश्यः नानाभूतेषु मणिप्रवरे-ष्वपि ये प्रवेका मुख्याः तैर्विरचिता विचित्रा ये भवनादयस्तै-र्गृहोत्तमैश्चालङ्कृताः कीदृशैः नागाश्च मनुष्याः मिथुनभूताः पारावतादयश्च तैराकीर्णाः कृत्रिमा भूमयो येषु तैः नाना स्वन इति पाठः सुगमः ॥ ९ ॥

यासु उद्यानानि अमरलोकश्रियमतिशयितानि अतिक्रान्तानि चकासतीत्यन्वयः । काभिः कुसुमादिभिरवनता रुचिरा विटपा येषां तेषां विटपिनां श्रीभिः मनइन्द्रियानन्दिभिरिति पुंस्त्व-मार्षम् । तथा समिथुनाः सस्त्रीपुंसा विविधा विहङ्गमा येषु तेषां जलाशयानां झषकुलोल्लङ्घनैः क्षुभितेषु नीरेषु यानि नीरजादि-वनानि तेषु कृतनिकेतनानामर्थात् पक्षिणामेकोऽखण्डो यो विहारस्तेनाकुला मधुरा विविधाः स्वनादयस्तैर्ये इन्द्रियोत्सवा-स्तैश्च अत्र लोहितं शतपत्रञ्च नीरजविशेषौ लौहित्यबलशत-पत्रत्वाभ्याम् ॥ १०—१२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

हे महाराज ! येष्वतलादिषु मायाविना आश्चर्यप्रकाशका-सुरीविद्यावता मयेन विनिर्मिता नानाविधानां मणिप्रवराणां प्रवेकैर्मुख्यैर्विरचितानि यानि विचित्राणि भवनादीनि तैः नागा-सुरैर्मिथुनभूतैः पारावतादिभिराकीर्णाः कृत्रिमा भूमयो येषु तैर्विवरेश्वरगृहोत्तमैश्च समलङ्कृताः पुरः इत्यादि चकासति ॥९॥

[illegible] । येषु कुसुमफलस्तबकैः सुभगकिसलयैश्चावनता रुचिरा विटपा येषां विटपिनां लतानामङ्गैरालिङ्गितानां श्रीभिः तथा अमलजलपूर्णानां समिथुनाः चक्रवाकादिमिथुनसहिता ये विविधा विहङ्गास्तद्युक्तानां जलाशयानाञ्च श्रीभिः झषकुलो-ल्लङ्घनक्षुभितेषु नीरेषु यानि नीरजादीनि तेषां वनेषु कृतनिके-तनानामर्थाद्भ्रमरादीनामेकोऽखण्डो यो विहारस्तेनाकुलाश्च ते मधुराश्च विविधस्वनादयस्तैर्मनइन्द्रियानन्दिभिः ये इन्द्रियो-त्सवास्तैश्च अतितराममरलोकश्रियमतिशयितानि उद्यानानि चका-सति यत्र येषु अहोरात्रादिभिर्भयं तन्नोपलक्ष्यते सूर्याद्य-भावात् ॥ १०—११ ॥

तर्हि कुतस्तत्र प्रकाश इत्यत आह । यत्रेति ॥ १२ ॥

भाषाटीका

हे महाराज ! परीक्षित्‌जी जिन भूमि बिलों में माया जाननेवाले मयदैत्य के बनाये पुर हैं सो नानाप्रकार के मणियों में श्रेष्ठ मणियों से रचित विचित्र घर दीवाल गोपुर सभा आयतन गृह अंगना चैत्य इत्यादिकों से युक्त हैं नाग असुर स्त्रियों सहित उनमें हैं कबूतर तोता मैना इनोंसे वे स्थान भरे हैं अच्छी बनी हुई जहां-पर जमीन हैं उहां के मालकों के अच्छे घर है इन सबों से पाता-लादिक शोभित होरहे हैं ॥ ९ ॥

जिनों में अत्यन्त मन इन्द्रियों के आनन्द देनेवाले फूलों के गुच्छे सुन्दर कोमलडाली इनों से झुकते हुये मनोहर शाखा वाले पेड़ हैं जो कि लताओं के अंगों से आलिंगित हैं और स्त्रियों के सहित नाना प्रकार के पक्षि जिन में हैं ऐसे ताला-वों के निर्मल पूर्णजलों की शोभा से वे स्थान युक्त हैं मछलियों के कूदने से चञ्चल जो तलावों का जल तिसमें जो कमल तिनके वनोंमें स्थान करने वाले पक्षियों का एक अखण्ड जो विहार तिस मे व्याकुल जो भौंरा तिन के जो नाना प्रकार के शब्द तिनोंसे जो इन्द्रियों के आनंद तिनों से देवतों की संपत्ति को जीत जाने वाले बगीचा उहां पर लगे हुये हैं ॥ १० ॥

जहांपर सूर्य के विना रात दिन न होने से काल के बीतनेका भय नहीं जाना जाता है ॥ ११ ॥

जहां पर बड़े भारी सर्पों के मणियों से सब अन्धकार का नाश होजाता है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्लमः श्रमः ग्लानिरनुत्साहः ॥ १३ ॥

कल्याणानां मङ्गलरूपाणाम् ॥ १४ ॥

यस्मिन् भगवत्तेजसि प्रविष्टे पुंसवनानि गर्भाः "आचतुर्थात्भवेत्स्रावः पातः पञ्चमषष्ठयोः" इति स्रावपातौ ज्ञेयौ ॥ १५ ॥

(१) शार्वरन्तम इति मूले ।

[illegible] येन हवा इह सृष्टाः षण्णवतिर्मायाः काश्चनाद्यापि मायाविनो धारयन्ति यस्य च जृम्भ[illegible] स्त्रयस्त्रीगणा उदपद्यन्त स्वैरिण्यः कामिन्यः पुंश्चल्य इति या वै बिलायनं प्रविष्टं पुरुषं [illegible] साधयित्वा स्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिः स्वैरं किल रमयन्ति [illegible] पुरुष ईश्वरोऽहं सिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानः कत्थते मदान्ध [illegible]

ततोऽधस्तान्महातले हरो भगवा[illegible] पार्षदभूतगणावृतः प्रजापतिसर्गोपबृंहणाय भवो भवान्या सह मिथुनीभूत आस्ते यत[illegible] सरिद्वरा हाटकी नाम भवयोर्वीर्येण यत्र चित्रभानुर्मातरिश्वना समिध्यमान ओजसा पिबति [illegible] हाटकाख्यं सुवर्णं भूषणेनासुरेन्द्रावरोधेषु पुरुषाः सह पुरुषीभिर्धारयन्ति ॥ १७ ॥

ततोऽधस्तात् सुतल उदारश्रवाः पुण्य[illegible] विरोचनात्मजो बलिर्भगवता महेन्द्रस्य प्रियं चिकीर्षमाणेनादितेर्लब्धकायो भूत्वा वटुवामन[illegible] क्षिप्तलोकत्रयो भगवदनुकम्पयैव पुनः प्रवेशित इन्द्रादिष्वविद्यमानया सुसमृद्धया श्रिया[illegible] धर्मेणाराधयंस्तमेव भगवन्तमाराधनीयमपगतसाध्वस आस्तेऽधुनापि ॥ १८ ॥

नो एवैतत् साक्षात्कारो भूमिदानस्य यत्तद्भगवत्य[illegible] देहिनिकायानां जीवभूतात्मभूते परमात्मनि वासुदेवे तीर्थतमे पात्र उपपन्ने परया श्रद्धया परम[illegible] समाहितमनसा संप्रतिपादितस्य साक्षादपवर्गद्वारस्य यद्बिलनिलयैश्वर्यम् ॥ १९ ॥

यस्य हवाव क्षुत्पतनप्रस्खलनादिषु विवशः सकृन्नाम[illegible] पुरुषः कर्मबन्धनमञ्जसा विधुनोति यस्य हैव प्रतिबाधनं मुमुक्षवोऽन्यथैवोपलभन्ते ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सवर्णे रताः स्वैरिण्यः कामिन्यस्त्वसवर्णेऽपि तत्राप्यतिचञ्चलाः पुंश्चल्यः । बिलायनं बिलायतनम् । साधयित्वा सम्भोगसमर्थं कृत्वा । स्वे ये असाधारणा विलासास्तत्पूर्वकोऽवलोकस्तेनानुरागयुक्तं स्मितं तेन संलाप उपगूहनं च तदादिभिः यस्मिन् हाटकाख्ये रसे उपयुक्ते संविते ॥ १६ ॥

भवयोर्भवस्य भवान्याश्च चित्रभानुरग्निस्तेन निष्ठ्यूतं फूत्कृत्य त्यक्तम् असुरेन्द्राणामवरोधेष्वन्तःपुरेषु पुरुषीभिः स्त्रीभिः ॥ १७ ॥

सुतले बलिरधुनाप्यास्त इत्यन्वयः कथम्भूतः महेन्द्रस्य प्रियं कर्तुमिच्छता भगवता प्रथमं पराक्षिप्तमपहृतं लोकत्रयं यस्य सः । पुनर्भगवतोऽनुकम्पयैव तत्र प्रवेशितः सन् कीदृशेन [illegible]ोऽदितेः सकाशाद्भूत्वा वटुवामनरूपेण लब्धकायस्तेन ॥ १८ ॥

केचित्तस्य सुतलराज्यं भूमिदानफलं मन्यन्ते तन्निराकरोति । [illegible]ो एवैतदिति । यद्बिलनिलये बिलरस्थाने ऐश्वर्यमेतद्भूमिदानस्य साक्षात्कारः फलं न भवत्येव कुत इत्यपेक्षायामवम्भूतस्य दानस्य [illegible]ाह । यत्तत्प्रसिद्धं दानं तस्य तदेवाह । भगवत्यशे[illegible] जीवभूतश्चासावात्मभूतश्च सर्वजीवनियन्ता वासु[illegible] तस्मिन् सम्प्रतिपादितस्य ॥ १९ ॥

किञ्च [illegible] ादिषु च विवशोऽपि सकृदपि गृणन् कर्मबन्धं विधुनोति । कथम्भूतं यस्य प्रतिबाधनं निवृत्तिः मुमुक्षवोऽन्यथैवोपलभन्ते यत्निवृत्त्यर्थं योगसाङ्ख्यादिक्लेशाननुभवन्तीत्यर्थः तं [illegible] ॥ २० ॥

श्री[illegible]कृतभागवतचन्द्रचन्द्रिका ।

एतेषु [illegible]यो मनःपीडा व्याधयो रोगाः वलिस्त्वग्गता [illegible] केशेषु शौक्ल्यमेतदुभयमूलभूता जरा [illegible] हाने तथा देहस्य वैवर्ण्यं रूपान्तरं दुर्गन्ध [illegible]ः क्लमः श्रमः ग्लानिरनुत्साह इति एते [illegible] रसायनपानैर्दिव्यैरन्नस्नानादिभिश्च न भव[illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तथा तेषां विवरस्थानां कल्याणानां निर्दुःखानां कस्मादपि मृत्युर्न हि प्रभवति कोऽपि नाप्मारयितुं समर्थो न भवतीत्यर्थः भवतीति पाठे मृत्युर्मरणं कुतश्चिदपि तेषां नास्तीत्यर्थः तर्हि मरणस्ते किं तत्राह । विनेति । चक्रापरेशाख्यकर्मसंज्ञाद्भगवत्तेजसोऽस्त्ररूपाद्विना सुदर्शनाख्याद्विनाऽन्यस्मात् मृत्युस्तस्मात्त्वस्त्येवेत्यर्थः ॥ १४ ॥

तदेवाह । यस्मिन् सुदर्शनाख्ये विवरेषु प्रविष्टे सत्यसुरवधूनां पुंसवनानि गर्भाः प्रायेण चक्रभयात् प्रस्रवन्ति पूर्णाश्च्यवन्तीत्यर्थः ॥ १५ ॥

एवं सामान्यतो विवरानुवर्णयित्वाथ विशेषेण विवर्णयिषुस्तावदतलं विवरमनुवर्णयति । अधेति । अतलाख्ये विवरे मयस्य पुत्रो बलो नाम निवसति तं विशिनष्टि । येनेति । येन बलेनैव सृष्टा इह षण्णवतिसंख्याका मायाः तासां मायानां मध्ये काश्चन माया अद्यापि कैश्चिन्मायाविभिर्धार्यन्ते यस्य बलस्य विजृम्भमाणस्य सतः तन्मुखात्त्रयः स्त्रीणां गणा उद्बभूवुः गणानेवाह । स्वैरिण्यः कामिन्यः पुंश्चल्य इति सवर्णरताः स्वैरिण्यः कामिन्यस्त्वसवर्णरताः तत्रापरतिचञ्चलाः पुंश्चल्यः विविधास्ता विशिनष्टि । या वै स्वैरिण्यादयः स्त्रियो विलासिनं विवरं प्रविष्टं पुरुषं हाटकाख्येन रसेन रसायनेन साधयित्वा स्ववशीकृत्य बलायनमिति पाठे तत्र प्रविष्टं पुरुषं रसेन बलाधनं साधयित्वा सम्भोगसमर्थं कृत्वा स्वेऽस्मादारमन्ति विलासावलोकनतपूर्वको योऽवलोकः अनुरागयुक्तं यत् स्मितं संलापो रहोभाषणमुपगूहनमालिङ्गनमेवमादिभिः स्वैरं रमयन्ति किञ्च हाटकाख्यं रसं विशिनष्टि । यस्मिन्निति । यस्मिन् रसे उपयुक्ते सेविते सत्युपयोक्ता पुरुषः आत्मानमयुतमहादिग्गजबलं मन्यमानो मदान्ध इवाहमीश्वरः सिद्धोऽहमिति कथते श्लाघते ॥ १६ ॥

एवमतलाख्यो विवर उपवर्णितः । अथ वितलं वर्णयति । तत इति । ततोऽतलादधस्ताद्वितलं विवरे भगवान् हरो रुद्रः हाटकेश्वरः स्वपार्षदैर्भूतगणैः प्रमथगणैः परिवृतः प्रजापतिसर्गः प्रजापत्यादिः सर्गस्तस्योपबृंहणाय वृद्धये भवान्या सह मिथुनीभूयास्ते यदुक्तं हाटकेश्वर इति नाम तन्निमित्तं स्पष्टयति यत इति । भवानीभवयोर्मिथुनीभूतयोर्वीर्येण हाटकीत्याख्या सरित्प्रवरा यतः प्रवृत्ता तस्माद्भवो हाटकस्य सुवर्णस्य ईश्वर उत्पादकत्वाद्धाटकेश्वर इत्युच्यते इति भावः । ननु हाटकीत्याख्यसरित्प्रवरायाः प्रभवत्वेऽपि न हाटकप्रभवत्वं तत्राह । यत्र हाटक्यां सरित्प्रवरायां चित्रभानुरग्निः मातरिश्वना वायुना समिध्यमानः सम्यग्दीप्यमानः ओजसा बलेनाविवत् हाटकीं पीतवान् तेनाग्निना निष्ठ्यूतं फूत्कृत्य त्यक्तं हाटकाख्यं सुवर्णमसुरेन्द्राणां विवरवासिनामवरोधेष्वन्तःपुरेषु पुरुषा पुरुषीभिः स्त्रीभिः सह भूषणमाभरणेन धारयन्ति भूषणानि कारयित्वा धारयन्तीत्यर्थः हाटक्या अन्ततो हाटकाख्यसुवर्णरूपेण परिणामात्तत्प्रभवोऽपि हाटकेश्वर इति भावः ॥ १७ ॥

अथ सुतलं वर्णयति । तत इति । ततो वितलादधस्तात्सुतले विवरेऽद्युकथवा विपुलकीर्तिः पुण्यश्लोकः स्मरतां पुण्यापादकयशाः सम्पन्नः महाभागवतो [illegible] भगवत्प्रियः विरोचनस्यात्मजो बलि[illegible] [illegible]भूतः महेन्द्रस्य प्रियं कर्तुमिच्छ[illegible] [illegible] [illegible] कायो देहो [illegible] भगवता प्रथमं परोक्षितमपहृतं [illegible] यस्य तथाभूतः पुनर्भगवतोऽनुकम्पयैव सुतले विवरे प्रवेशितः इन्द्रादीनामपि दुर्लभया सुसमृद्धया श्रिया सम्पदा जुष्टः सेवितः भयरहितः तमेव भगवन्तं स्वधर्मेण स्वोचितधर्मेणाराधयन् ॥ १८ ॥

[illegible] सर्वसम्पत्समृद्धं सुतलाधिपत्यं तद्भूदानफलमिति न मन्तव्यमित्याह । नो एवेति । यद्बलनिलयं विवरस्थानं ऐश्वर्यं [illegible]तद्भूमिदानस्य साक्षात्कारः फलं न भवत्येव कुत इत्यपेक्षायामेवं भूतस्य दानस्य साक्षादपवर्गहेतुत्वादित्याशयेन भूमिदानं विशिनष्टि । भगवति वासुदेवपूर्णोऽशेषभूतजातानां ये जीवभूताः प्रत्यगात्मानस्तेषामप्यात्मभूते परमात्मन्यन्तःप्रविश्य धारके वासुदेवे तीर्थतमे पावनतमे पात्रे उपपन्ने समीपं प्राप्ते सति तस्मिन् परया निरुपाधिकया श्रद्धया कर्तव्यविषयत्वया समाहितं मनोऽभिमतं येन तेन बलिना सम्प्रतिपादितस्य कृतस्य साक्षादपवर्गसाधनभूतस्य भगवतस्तीर्थतमत्वमेवोपपादयति । यस्येति । यस्य हि भगवतो नाम सकृदपि विवशोऽपि क्षुत्पतनस्खलनादिष्ववस्थास्वपि गृणान् पुरुषः कर्मरूपबन्धनमञ्जसा सुखेन विधुनोति निरस्यति सकृत् स्मरणमात्रेणापि समस्तदुर्जननिरासनाननामवतो भगवतस्तीर्थतमत्वं कैमुत्यन्यायसिद्धमिति भावः कर्मबन्धं विशिनष्टि । यस्य इदमिति । यस्य हि कर्मबन्धस्य प्रतिबाधनं निरसनोपायमिह मुमुक्षवोऽन्यथा कर्मयोगादिरूपेण उपलभन्ते जानन्ति तत् कर्मबन्धनं धुनोतीति पूर्वेणान्वयः प्रतिसाधनमिति पाठे प्रतिक्षेपसाधननिरसनोपायमित्यर्थः यथा कर्मयोगादिकं भगवद्भक्तियोगोत्पत्तिप्रतिबन्धकप्राचीनकर्मबन्धनिरसनद्वारा भक्तियोगानुग्राहकत्वेन भक्तियोगद्वारा कृत्स्नपूर्वोत्तराघनिवर्तकमेवं नामस्मरणमपीत्यभिप्रेतोऽर्थः अन्यथा भक्तियोगानर्थक्यापत्तेरित्यवगन्तव्यम् एवं तीर्थतमे सर्वेषामात्मनि भागवतानामात्मदे आत्मपर्यन्तप्रदात्रे आत्मतमे निरतिशयप्रियतमे भगवति विनियुक्तस्य लोकत्रयस्य न विलासिनमनैश्वर्यं फलमिति पूर्वेणान्वयः ॥ १९—२१ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पापसहितज्ञानात् आधयो मनोदुःखानि ग्लानिर्मनोबलक्षयः क्लमः शारीरबलक्षयः वयोऽवस्थाः शैशवादिवयोऽवस्थाः ॥ १३ ॥ १४ ॥

यस्मिन्नर्भकं पुंसवनानि गर्भाः ॥ १५ ॥

एवं सामान्येन विवरलक्षणमुक्त्वा विशेषमाह । अधेति । नाम्ना बलः तासु काश्चन मायाः त्रयो जातिभेदेन स्वैरिण्य स्वेच्छानुवृत्तयः कामिन्योऽन्तर्गतकामोद्रेकाः पुंश्चल्यः पुरुषमात्रेण सुरतमाकांक्षमाणाः पुरुषदर्शनमात्रेण परिप्लुतेन्द्रिया वा सर्वा अपि नियतपुरुषा न भवन्तीत्याह । या इति । विलासयतं विलासस्थानं संलापं मिथोभाषणमुपगूहनमालिङ्गनं चुम्बनादिकमादिपदगृहीतम ॥ १६ ॥

यस्मिन् रसे भवपार्वतीपरमेश्वरयोर्वीर्यमुदीर्य चित्रभानुरिध्यमानो वर्धमानः अवरोधा अन्तःपुराणि तेषु पुरुषीभिः पुरुषसहलापेताभिः स्त्रीभिः ॥ १७ ॥

उरुणः बहुनः शाखस्य अवः भवर्या यस्य स तथा प

...कृष्ट स्थानीनि लोकत्रयं यस्य स... अयोध्य प्रतिवत्सरं क्रियमाणापूजायामिति...

सर्वस्य जीवराशेराधिक्यं बलेरैश्वर्य... तस्य फलं मुक्तिरेव किन्तु पूर्वजन्मार्जितकि... मर्हतीत्याह । अधुनापीति । अधुनापि बलेर्वि... यदैश्वर्यमेतद्भूमिदानस्य साक्षाद्धरो नो एव मु... नेति तत्राह । भगवतीति । परमात्मनि सम्यक्... स पात्रं न चेत्कथं तदिति तत्राह । पात्र इति । पात्र... तम इति । अतिशयेन शुचे अनो युक्तमित्याह... अन्येषु महात्मसु सत्स्वपि सर्वेषां पपत्तिः कथमिति त... केषामत्राह । अशेषेति । जीवभूतस्ते दुःखितेनाशुद्धिरापन्ने... आत्मभूत इति । सदा स्वामिनि इदं स्वामित्वं न लोके... सदातनमित्यतो भूत इति स्वतन्त्रत्वाद्दुःखनिवारणसमर्थ... आत्मवन्सर्वभूतप्रेष्ठ इति वा तर्हि किं तस्य फलमत्राह... दिति । ननु "अश्रद्धया हुतं दत्तम" इत्यादेः श्रद्धया सहितेन द... सङ्कल्पपश्चाद्दस्यापि तथात्वेन कथं मुक्तिद्वारत्वमिति तत्राह... येति । प्रत्यक्षफलदर्शनाद्धायमेव पात्रभूत इत्याह । यस्येति" नि... विष्णुनाऽनेन यथेष्टं पदमागतम्" इत्येतद्दस्मिन्नर्थे प्रमाणमित्या... हेति । यथा नामसङ्कीर्तनात् कर्मबन्धविध्वंसो भवत्येवं बलेरपि... यस्मिन्नर्थे नेति"वा विकल्पोपमानयोः"इत्यमरः आदिशब्दात् अमा... द्भयदर्शन इति गृह्यते "तमेवं विद्वानमृत इह भवति" इति श्रुते... नामम् न्यतरेण नास्तः कर्मबन्धहानिः कथमत्राह । यस्येति । प्रतियो... ग्यं ज्ञानं नाम सङ्कीर्तनलक्षणकर्मद्वारा ज्ञानं भवति "कर्मणा ज्ञानमाप्नोति"इति श्रुतेरित्येतद्वेलनेनाह । अविगानेन सर्वेषां चेतनामात्मन्तरं ज्ञानजननद्वारा सायुज्यफलप्रदं यद्यस्मात्तद्गुणनाम मुमुक्षुभिरभ्यसनीयमेवेत्याह । यस्तदिति । तस्मिन् वासुदेव इति पूर्वेणान्वयः ॥ १८—१९—२०—२१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नो एवैतदेतावन्मात्रमित्यर्थः ॥ १९ ॥ २० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

एतेषु वसतां दिव्यौषधिरसरसायनयोरशनादेव हेतोरपानादिभिरप्याधिव्याधयो न भवन्ति तथा हि द्विविधा वयोऽवस्थाश्च न तत्र प्रथमा वलिप्रभृतयश्चरमाः द्वितीया देहवैवर्ण्यवयोऽञ्चरमाः क्लमः श्रमः ग्लानिर्हर्षक्षयः ॥ १३ ॥ १४ ॥

पुंसवनानि गर्भाः "आचतुर्थाद्भवेत् स्रावः पातः पञ्चमषष्ठयोः"इति स्रावपातौ ज्ञेयौ सवर्णो रताः स्वैरिण्यः कामिन्यस्तस्वर्णोऽपि । तत्रापतिश्चक्षाः पुंश्चल्यः बिलायने स्वबिलरूपमायतनं साधयित्वा स्वसम्भोगसमर्थं कृत्वा यस्मिन् रसे उपयुक्ते सेविते ...ति चित्रभानुरग्निः पिबति संशोष्य कठिनीकरोति तेन अग्निना ...च्युतं दाहोत्तीर्णीकृतम । यद्वा । ताभ्यां भवभवानीभ्यां फूत्कृत्य ...कम । भूषणेन रत्नाङ्कुरेणा सह भत्यादरात ॥ १५—१७ ॥

...अतो यतः अत एव पुण्यश्लोकः श्लोका वर्णनार्थकपद्यानि ...यस्य सः प्रवेशित इति सुतलमेवेति शेषः ॥ १८ ॥

कैश्चित्तस्य तावदविकलस्वर्गभोगमात्रसिद्धिर्भूमिदानफलं मन्यते तन्निराकरोति । नो एवैतदिति । यद्विस्मितिरैश्वर्यमेतद्भूमिदानस्य साक्षात्कारः फलं न भवति बद्धभूमिदानं तदिति प्रसिद्धमित्यन्वयः अत्र भूमिपदेन त्रिभुवनमेवोपलक्षितम् । अत्र वेदविशद्धाद्यमात्रे एव भूप्रदेशदानादक्षयः प्रसिद्धस्वर्गभोगो लभ्यते इति शास्त्रं भवत्यात्र भवति त्रिभुवनदानजन्यफलस्य सुतलैश्वर्यभोग एवह पर्याप्तिरसम्भावितत्वादपवर्गस्यैव फलत्वं किन्त्वास्यानुषङ्गिकस्यापि सुतलैश्वर्यभोगस्य सर्वस्वर्गभोगेभ्योऽपि परम एवोत्कर्षो ध्वनितः । ...मिदानस्य कथम्भूतस्य भगवति वासुदेवे प्रतिपादितस्य जीव...वो जीवनरूपो य आत्मा अन्तर्यामी तद्रूते परमात्मनि "विष्ट...मिदं कृत्स्नमेकांशेन"इत्युक्तेरन्तर्यामिनामप्यंशित्वात् परमः ...ष्टश्चासावात्मा चेति तस्मिन्नुपपन्ने परमसमुचिते तीर्थे...सम्पादने फलं न भवतीत्यत्र हेतुः । साक्षादपवर्गेति । पत्र...नस्याप्यपवर्गफलत्वादत्रातिकैमुत्यमेवेति भावः ॥ १९ ॥

...दानस्य का वार्त्ता भक्त्या पत्रपुष्पाद्यर्पणमपि दूरे ...आसोऽपि सुकृतिभिर्दुर्वारं कर्मबन्धमपि अनायासेनैव ...। यस्येति । न च कर्म बन्धोऽपि सुगमप्रतीकार इत्याह ...स्य प्रतिबाधनं सर्वथा ध्वंसनं मुमुक्षव एव न तु ...कुतकोटिमन्तोऽपि अन्यथैवेति यशिक्षयर्थमथाङ्...ध्यानानुभवन्तीत्यर्थः ॥ २० ॥

...शुकदेवकृतसिद्धान्तप्रदीपः ।

...: व्याधयः देहव्यथाः वली त्वग्विकारः पलि...मः श्रमः ग्लानिरनुत्साहः ॥ १३ ॥

...कानुरूपमङ्गलरूपाणाम ॥ १४ ॥

...आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः" इति ...१५ ॥

स्वैरि...यः तत्र कामिन्यो मदनमोहिताः तत्रापि पुं... भ्रममायाः निर्मर्यादा इत्यर्थः साधयित्वा... यस्मिन् रसे उपयुक्ते सेविते सति ॥ १...

भवयोः ...भवस्य च मातरिश्वना वायुना समिध्यमानः चित्रभानुरग्निस्तेन चित्रभानुना निष्ट्यूतं फूत्कृत्य त्यक्तमसुरेन्द्राणामधरोधस्वन्तःपुरेषु ॥ १७ ॥

ततो वितलादधस्तात् सुतले बलिरधुनाप्यास्ते इत्यन्वयः कीदृशः अदितेर्महेन्द्रस्य च प्रियं चिकीर्षमाणेन वटुवामनरूपेण भगवता प्रथमं परा...त्रिलोकत्रयं यस्य स लब्धः नागपाशैर्गृहीतः ...स्य सः पुनश्च भगवतानुकम्पयैव तत्र प्रवेशितः ...अपगतसाध्वसो भूत्वा तमेव आधमेणाराधयन्...

ननु ...भोगार्थं तत्र प्रवेशितः किमित्यत्राह । नो ए...तलाख्ये विवरस्थाने ऐश्वर्यमेतद्भूमिदानस्य... नो एव तत्र हेतुं वदन् भूमिदाने विशिन... तस्मिन् सर्वलोकवेदप्रसिद्धे सर्वजीवनिका...ां ...ानां ...तानां क्षेत्राणां

(१) तद्भक्तानामात्मवतां सर्वेषामात्मन्यात्मद आत्मतयैव ।

न वै भगवान्नूनममुष्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्यमेवातनुतेति ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मभूते उपपन्ने योग्यतातिशयेन प्राप्ते पात्रे श्रद्धादिना सम्प्रतिपादितस्य सम्यगर्पितस्य अत एव साक्षादपवर्गद्वारस्य ॥ १९ ॥

किञ्च । यस्य नाम क्षुदादिषु विवशः ज्वरमरणादिकालेऽपि सकृदपि गृणान् कर्मबन्धनमञ्जसा अनायासेन विधुनोति मुक्तो भवतीत्यर्थः यस्य कर्मबन्धस्य प्रतिबाधनमन्यथा नामोच्चारणादिहरिभजनव्यतिरिक्तं कर्म चित्तवृत्तिनिरोधप्रकृतिपुरुषविवेकादिकं मीमांसकपातञ्जलसांख्यादय उपलभन्ते न तु परमपुरुषाराधने परमानन्दसाधने रुचिं कुर्वन्तीत्यर्थः ते मायामोहिता इति भावः ।

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥

इति श्रीमुखवचनात् ।

येऽन्येऽरविन्दाक्ष ! विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधो नादृतयुष्मदङ्घ्रयः ।

इति तेषामधः पतनार्हतायाः वक्ष्यमाणत्वात् ।

निराशैः कर्मभिः कैश्चित् कैश्चिच्छून्यसमाधिना ।
पुंप्रकृत्योर्विवेकेन मन्यन्ते कृतकृत्यताम् ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
इत्येवं वादिनो दासा वयं त्वर्जुनसारथेः ॥ २० ॥

भाषा टीका ।

इन लोकों मे निवास करने वालों को दिव्य ओषधि रस आदिकों के रसायन वाले अन्नपानादिकों के करने से कोई आधि व्याधि वृद्धपना बालकपना देह का विवर्ण होना दुर्गंध पसीना श्रम उत्साह नाश अवस्था का बदलना इत्यादिक कुछ नहीं ... हैं ॥ १३ ॥

एक ... नारायण के सुदर्शन चक्र के बिना और किसी हेतु से उन मंगलरूपी पुरुषों का मृत्यु नहीं होता है ॥ १४ ॥

उन सुदर्शन जीके तो उसदेशमे प्रवेश होते मात्र भय के मारे असुरों की स्त्रियों के गर्भ स्रवित होजाते हैं गर्भ गिरजाते हैं ॥ १५ ॥

इस के अनन्तर अतल लोक में मय का पुत्र बल असुर निवास करता है जिसकी सृजी हुई छयानवे मायाओं को कोई माया वी लोग अवतक भी धारण करते हैं जिसके जमुहाई लेते समय मुखमें से तीन स्त्रीगण उत्पन्न भये हैं स्वैरिणी कामिनी पुंश्चली ये उनके नाम हैं जो भी लोग बिल में प्रविष्ट होने वाले पुरुष को हाटक नामक रस से पुष्ट करके अपने विलास अवलोकन अनुराग मन्दहास बोलन आलिङ्गन आदि क्रीडों से यथेच्छ रमण कराती हैं उस रस के सेवन करते मात्र पुरुष अपने को दशहजार की हाथियों के बल वाला मान कर मदसे अन्धा होकर अभिमान की बातों को करने लगता है ॥ १६ ॥

तिस के नीचे वितल मे हाटकेश्वर नामक भगवान् हरजी अपने भूतगण पार्षदों के सहित विराजते हैं प्रजापति के सर्ग की वृद्धि के वास्ते भवजी भवानी के साथ संयुक्त होकर रहते हैं जहांसे भव भवानी दोनो के वीर्य से हाटकी नाम की प्रवृत्त हुई श्रेष्ठनदी बहती है जहां पर पवन से बढाया हुआ अग्नि उस नदी के जल को अपने तेज से पान करता है उस के थूक देने से थूक का हाटक नामक सुवर्ण होता है जिस का भूषण बनाकर पुरुष लोग असुरों के अन्तःपुरमे स्त्रियों के सहित आपभी रमण करते हैं ॥ १७ ॥

तिस के नीचे सुतल मे उदार कीर्ति वाले पुण्यश्लोक विरोचन के पुत्र बली महाराज हैं जिनके तीनो लोकोंके ऐश्वर्य को भगवान् ने इन्द्र को प्रसन्न करने की इच्छा से अदिती के यहां अवतार लेकर बटुवामन रूप से मांग कर हरण कर लिया फिर उन्हीं भगवान् ने कृपा से इन्द्रादिकों को भी दुर्लभ सम्पत्ति देकर सुखी किया है फिर वे बली महाराज पूजनीय उन्ही भगवान् को पूजन करते हुये अभी पर्यन्त निर्भय होकर रहते हैं ॥ १८ ॥

यह कुछ भूमिदान का फल नहीं है जो कि सब भूतों के समूह के जीवों के अन्तर्यामी परमात्मा सर्व जीवों के नियन्ता आत्माराम परमदान पात्र भगवान् वासुदेव के प्राप्त होने पर बडी श्रद्धासे परम आदर से सावधान चित्त होकर समर्पण किया हुआ जो दान सोतो साक्षात् मोक्षका द्वार है तिससे सुतलका ऐश्वर्य मिलनां ही फल होगा यह कुछ बलीको बडी बात नहीं है ॥ १९ ॥

जिन भगवान् के नाम को किसी कष्ट मे परवश हो कर एक वखत भी उच्चारण करने से पुरुष मात्र अनायास मे संसार बन्ध को नाश कर सकता है जिस संसार बन्ध के छुटाने के वास्ते मुमुक्षु लोग कर्म ज्ञान योगादिक बडे साधनों को करते हैं ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नत्वस्मिन् भगवति भक्तानां ज्ञानिनां च यथायथमात्मन्यात्मदे आनन्दे चात्मतयैव समर्पितस्य भूमिदानस्य न तत्फलमिति पूर्वेणैव सम्बन्धः ॥ २१ ॥

किञ्च । नैवं भगवदनुकम्पाफलमपि किन्त्वेकान्तभक्तस्य तस्यान्तरायमात्रमित्याह । नेति । भगवानमुष्य अमुं नैवानु-

(१) तद्भक्तानामात्मवतां ... आत्मने च इति श्रीमज्जीवगोस्वामिपाठः ।

[illegible] छलेनापहृतस्वशरीरावशेषितलोकत्रयो वरुणपाशैश्च सम्प्रतिमुक्तो गिरिदर्यां चापविद्ध इति [illegible] ॥

नूनं बतायं भगवानर्थेषु न [illegible] योऽसाविन्द्रो यस्य सचिवो मन्त्राय वृत एकान्ततो बृहस्पतिस्तमतिहाय स्वयमुपेन्द्रेणात्मानम[illegible] शिषो नो एव तद्दास्यमतिगम्भीरवयसः कालस्य मन्वन्तरपरिवृत्तं कियल्लोकत्रयमिदम् ॥ [illegible] ॥

यस्यानुदास्यमेवास्मत्पितामहः [illegible] न तु स्वपित्र्यं यदुताकुतोभयं पदं दीयमानं भगवतः परमिति भगवतोपरते खलु स्वपितरि [illegible] ॥

तस्य महानुभावस्यानुपथममृजितकषायः को [illegible] स्मद्विधः परिहीणभगवदनुग्रह उपजिगमिषतीति ॥ २६ ॥

अथ तस्यानुचरितमुपरिष्टाद्विस्तरिष्यते यस्य [illegible] स्वयमखिलजगद्गुरुर्नारायणो द्वारि गदापाणिरवतिष्ठते निजजनानुकम्पितहृदयो येनाङ्गुष्ठेन [illegible] कन्धरो योजनायुतायुतं दिग्विजय उद्घाटितः ॥ २७ ॥

ततोऽधस्तात्तलातले मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोकीशं चिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्यो [illegible] देवेन परिरक्षितो विगतसुदर्शनभयो महीयते ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

गृहीतवान् । तत्र हेतुः । बतुतेति । आत्मन ईश्वरस्यानुस्मृतिं मुष्णातीति तथा । तदुक्तम् । "वासुदेवे मनो यस्य अपहोमार्चनादिषु । तस्यान्तरायो मैत्रेय ! देवेन्द्रत्वादिकं फलम्" इति ॥ २२ ॥

तस्यैकान्तभक्तिं सप्रपञ्चामाह । यत्तदिति प्रसिद्धमिति वक्ष्यमाणामुवाच हेत्यन्वयः । कथम्भूतः । अनधिगतोऽन्य उपायो येन तेन भगवता याच्ञाच्छलेनापहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य । सम्यक् प्रतिमुक्तो बद्धः अपविद्धः प्रक्षिप्तोऽपि सन् ॥ २३ ॥

बतेति खेदे । भगवान्विद्वानपि योऽसाविन्द्रो यस्यैकान्तेन बृहस्पतिः सचिवः सहायो यतो मन्त्रार्थं वृतः सोऽपि पुरुषार्थेषु नूनं न निष्णातो न निपुणः यत उपेन्द्रेण द्वारभूतेन तमुपेन्द्रं विहायात्मानं मां लोकत्रयमयाचत तं मन्त्रप्रदं बृहस्पतिमनतिहायेति वा । तस्मिन् प्रसङ्गे स एव वरणीयो न लोकत्रयं यतस्तद्दातितुच्छमित्याह । अतिगम्भीरमनन्तं वयो [illegible] यस्य तस्य कालस्य यन्मन्वन्तरं तेन परिवृत्तं विपर्यस्तं लोकत्रयमिदं कियत् ॥ २४ ॥

प्रह्लादस्त्वेक एवार्थे निष्णात इत्याह । यस्यानुदास्यमिति । स्वपितरि उपरते मृते सति स्वपित्र्यं पदं भगवता दीयमानमपि भगवतः खलु परमन्यदिति कृत्वा नतु जग्राहेत्यर्थः ॥ २५ ॥

ननु त्वमतिधीरः कुतस्तमेव बहुमन्यसे तत्राह । तस्यानुपथमनुवर्त्म । अमृजिता अक्षीणाः कषाया रागादयो [illegible] [illegible] भगवदनुग्रहो यस्य । स को वा उपगन्तुमिच्छति [illegible] ॥

[illegible] एवम्भूतश्चेद्बलिस्तर्हि तस्यैव चरितं विस्तरेण [illegible] तत्राह । तस्य बलेरनुचरितमुपरिष्टादष्टमे विस्तरिष्यते [illegible] अवतिष्ठते निजजनेष्वनुकम्पितं कृतानुकम्पं हृदयं यस्य । [illegible] कर्म दर्शयति । येन श्रीनारायणेन [illegible] दशकन्धर उद्घाटितः । केन । पद्भ्यां तत्राप्यङ्गुष्ठेन ॥ २७ ॥

यथा हरिणा [illegible] बलिः सुतले निहितः सुखमास्ते एवं महादेव [illegible] मयस्तलातले सुखमास्त इत्याह । तत इति । लब्धं पदं स्थानं येन महीयते पूज्यते ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु यद्येतद्दानमपवर्गद्वारं यदि वा बलिर्महाभागवतः यदि वा भगवानात्मदस्तर्हि तस्यापवर्गमेव प्रदाय किं नानुजग्राहेत्यपेक्षायामभ्युपगतप्रारब्धस्य [illegible] विना ऽवश्यावश्यानुभाव्यत्वादेनमपवर्गदानेन [illegible] ग्राहेत्य किं त्वभ्युपगतप्रारब्धफलबिलनिवर्तनैश्वर्यमनुगृहीतवान् [illegible] इति । भगवानमुष्य बलेर्निजग्राह तदेवानुग्रहं कृतवान् [illegible] स्मृतिमोषणीं स्वविषयस्मृतिघातकां स्वमायया [illegible] मैश्वर्यं भोगनिमित्तं वा ऐश्वर्यं बिलनिलयेश्वर्यं [illegible] ने दत्तवानित्यर्थः ॥ २२ ॥

महाभागवत [illegible] ये एवाभिव्याप्तिं विवक्षितं तत्तस्य तदुक्तं [illegible] यदिति । यत्तत्प्रसिद्धमिति

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रिवमायमुपायेत्यन्वयः कथम्भूतः अनधिगतः अलब्ध अन्यः याच्ञेतरः उपायो येन तेन भगवता बलेर्भागवतत्वाद्वधमनर्हे-त्वात्तदीयान्तरामावादनधिगतान्योपायेनेत्युक्तम् एवंभूतेन भगवता याच्ञाव्याजेनापहृतं स्वशरीरमात्रावशेषितमुर्वरितस्वशरीरमात्रं यल्लोकत्रयं तद्यस्य तथाभूतः स्वव्यतिरिक्तभगवदपहृतलोकत्रय इत्यर्थः वरुणपाशैश्च प्रतिमुक्तः प्रतिश्रुतार्थन्यूनतायां वरुणप्राप्तैः प्रतिबद्ध इत्यर्थः गिरिदर्यामपविद्धः प्रक्षिप्तोऽपि सन् ॥ २३ ॥

उक्तिमेवाह । नूनमिति । बतेति खेदे भगवान् विद्वानप्ययमिन्द्रः पुरुषार्थेषु नूनं न निष्णातः न कुशलः पुरुषार्थेषु तारतम्यानभिज्ञ इत्यर्थः यस्यैकान्तेन बृहस्पतिः सचिवः सहायो मन्त्रावलोचनाय वृतः सोऽपि पुरुषार्थेषु नूनं न निष्णातः अनिष्णातत्वमेवाह । तमिति । यतस्तं पुरुषार्थरूपं भगवन्तमतिहाय तद्दास्यमयाचतेत्यर्थः तं मन्त्रमदं बृहस्पतिमतिहायेति वा उपेन्द्रेणेन्द्रावरजरूपेण श्रीवामनेन द्वारभूतेनेन्द्र एवात्मानं मामाशिषः स्वस्याशिषः लोकत्रयरूपा याः आशिष अयाचत याचितवानत्वेतस्य भगवतो दास्यमयाचतेत्यर्थः तस्मिन् प्रसन्ने सदास्यमेव याचितव्यं नत्वितरदल्पमित्याह । अतिगम्भीररंहसः निरतिशयगम्भीरवेगस्य कालस्य वश्यामिदं मन्वन्तरपरिवृत्तं मन्वन्तरपर्यन्तवर्तिलोकत्रयं लोकत्रयाधिपत्यं कियदल्पमेतदित्यर्थः अल्पतमं याचितव्यमिति भावः अत इन्द्रः पुरुषार्थेषु न निष्णातः ॥ २४ ॥

अस्मत्पितामहस्तु प्रल्हादः एक एव पुरुषार्थेषु निष्णात इत्याह । यस्येति । अस्मत्पितामहः प्रल्हादो यस्य भगवतोऽनुदास्यं दासानुदासत्वमेव वृतवान्किल नतु स्वपितुर्हिरण्यकशिपोः सम्बन्धि ऐश्वर्यम् अवरणहेतुं तस्याभिप्रायं प्रकाशयति । वकुतेति । भगवता नृहरिणा स्वपितरि हिरण्यकशिपौ उपरते हते सति भगवता दीयमानमपि स्वपित्र्यं न वव्रे कुतः यदस्मात्परिमितमिति परिमितत्वात्पित्र्यं न वव्रे उतापि त्वकुतोभयं पदं वव्रे स्वयं देहावसाने मुक्तिं याचितवानित्यर्थः भगवतः परमिति पाठे भगवतोऽन्यदिति पित्र्यं न वव्रे इत्यर्थः ॥ २५ ॥

मादृशकेव गरुत्मतो गतिं को वा तस्य प्रल्हादस्य पन्थानमनुसर्तुं शक्नोतीत्याह । तस्यात । को वै अमृदिता अनुपहताः कषायाः कर्मबन्धा येन परिक्षीणा अपसृतः भगवदनुग्रहो यस्य तथाविधोऽस्मद्विधो मादृशः पुमान् तस्य महानुभावस्य प्रल्हादस्यानुपथं पन्थानमुपजिगमिषति उपगन्तुमिच्छति इति ॥ २६ ॥

नन्वेवम्भूतश्चेद्बलिस्ततस्तस्यैव चरितं विस्तरेणोच्यतां तत्राह । तस्य बलेरनुचरितमुपरिष्टादष्टमे विस्तरिष्यते विस्तरेण कथयिष्यत इत्यर्थः कार्त्स्न्येन तत्प्रभावः केनापि वर्णयितुं न शक्य इत्यभिप्रायेण पुनस्तमेव विशिनष्टि । यस्येति । यस्य बलेर्द्वारि भगवानवतिष्ठते कथम्भूतः स्वयमखिलजगतां गुरुः अनेन द्वारपालकत्वानर्हता सूच्यते नारायणः सर्वेशत्वी अनेनापि तदेव सूच्यते एवंभूतो हाश्रितवात्सल्यवशो गदापाणिः, सन् गदापाणिं तं भगवन्तं विशिनष्टि । येन गदापाणिना बलिद्वारःस्थेन भगवता कर्ता अङ्गुष्ठेन पदा पादावयवेनाङ्गुष्ठेन दिग्विजयसमये स्वसमीपमागतो दशकन्धरो रावणो योजनायुतानामयुतम् उत्पाटितः उत्पाटनं प्रापितः दिग्विजयं कुर्वन् [illegible] कदाचिद्बलेर्द्वारि

विचाद् प्राप्त [illegible] भगवता [illegible] रामावतारो [illegible]

एवं सुतल [illegible] तदातनं वर्णयति । तत इति । ततः सुतलाख्ये [illegible] विवरे महात्मनो दानवेन्द्रः न्यवसत् तदातनत्वेन [illegible] इत्यर्थः कथंभूतः प्रथमं त्रिपुराधिपतिर्भूत्वा त्रिलोक्या [illegible] सुखं कर्तुमिच्छता भगवता त्रिपुरारिणा रुद्रेण निर्दग्ध पुरत्रयं यस्य तस्य पुरारेः प्रसादाल्लब्धं पदं तदानतनत्वं विरुद्धं यस्य स मायाविनामाचार्यो मयासुरस्तोपदेष्टा महादेवेन कृत्वा परिरक्षितो विगतं सुदर्शनाद्भयं यस्य तथाभूतः सन् सुदर्शनभक्तिमता महादेवेन परिरक्षितत्वाद्विगतसुदर्शनभय इत्युक्तम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवन्नामात्मदं चेतनाम जापिनो मनुष्यान् किमिति नानुजग्राह भगवानित्याशङ्क्य भक्तिमात्रातिशयाभावादित्यभिप्रेत्याह । न वा इति । नूनशब्दसामर्थ्यादत्र मनुष्यशब्देन नृनियोग्या गृह्यन्ते मनुष्यानुद्दिश्य नानुजग्राह प्रत्युतास्मदर्शनादैश्वर्यमितिशेषः तह्यात्मदानलक्षणमाराधनमनुजग्राह किमेत्याह । यदिति । पूर्ववाक्यस्थितनञ अध्याहारः कर्तव्यः यत्पुनरात्मानुसंस्मृतिमोक्षणं तत् "यद्यागता अपि सन्देहे का कुन्दस्य तु का कथा,, इति तथानुजग्राहेति किमुत तर्हि तद्वामोपासनं कथं किमिति नेत्याह । मायामयेति । मायामयं प्रकृतिनिर्मितं नश्वरं नावनश्वरमित्येवार्थः ॥ २२ ॥

इतो भक्त्यातिशय एवैश्वर्ये निमित्तं यतो राज्यापहरणादिलक्षणापकारिणि हरौ भक्त्यतिशयो दर्शयते बलेर्वरीवत्वकारागृहे निवसतस्तेन वरुणप्रमुक्तस्य नहि मनुष्याणामितादृशमापद्येनादृशी या भक्तिः समस्तगुणोत्कर्षसूयिनामित्याशयवानाह । यत्त्विति । न अधिगतो भिक्षाव्यतिरेकेणान्यः सुखसाध्य उपायो येन स तथा तेन भगवता याच्ञाव्याजेनापहृतं स्वशरीरावशेषितं लोकत्रयं यस्य स तथा भगवदाज्ञया गरुडेन प्रथमं वरुणपाशैर्बद्धश्च शब्दाद्ब्रह्मादीनां याच्ञया पश्चान्मुक्तः पुनश्च त्वया प्रतिश्रुतं दत्तमेव गन्तव्यमिति तेन कारागृह इति गिरिदर्यामपविद्ध इव निरुद्धो बलिरिति वक्ष्यमाणप्रकारेण जगाद हेत्वनेन प्राणात्ययेऽपि भगवद्भक्तिं न मुञ्चामीत्यभिसन्धिं दर्शयतीति यद्यस्मात्तस्मान्मनुष्यान्नानुजग्राहेत्युच्यते ॥ २३ ॥

इन्द्रस्य सचिवो बुद्धिसहायभूतो यदा योऽस्मै बृहस्पतिरस्मत्सन्धानार्थमिन्द्रेण प्रोक्त एकान्ततो मन्त्राय वृतः स चस्तदा तमप्यतिहाय सन्धानात्पूर्वमेव समागत्य ममार्थेषु कपादर्शनार्थाभिप्रायेण निष्णातत्वमनादिकमेव दातुमुद्युक्तोऽहं भगवान् स्वयमुपेन्द्रेण वटुवामनरूपेणात्मने स्वर्गं त्रीणि पदान्यनर्हं याचनायोग्यं मामयाचत नो एवाशिष इति यत्तस्यायमभिप्रायः इदं लोकत्रय चतुर्दशभुवनापेक्षया कियदल्पं हि तदपि कालग्राहग्रस्तमित्याह । गम्भीरवेगस्य महतः कालस्य मन्वन्तरलक्षणावयवमितमत एवानित्यं तस्मादैश्वर्यनिमित्तमदान स्यादित्यस्मै यतये राज्यं न दास्यामीति क्षिपदच्छलेनापहृतं नूनं निश्चितं यत भक्ते मय्यनुकम्पया "यस्यानुग्रहमिच्छामि हरिष्ये तद्धनं शनैः" इत्यादि स्ववचनात् ॥ २४ ॥

[illegible] …याह। [illegible] …वता [illegible] …त- [illegible] …यं [illegible]

संवादयमेव वव्रे कोऽसावित्यस्मत्पितामहः [illegible] महदन्तरमस्तीत्याह। तस्येति। तस्य प्रह्लाद [illegible] तुमस्मादृशः पुरुषः को वालं न कोऽपीत्यर्थः [illegible] भगवदनुग्रहो यस्य स तथा अमृदितकषायं [illegible] मिति किं वक्तव्यमित्यर्थः इतिशब्दो वाक्यसमाप्तौ [illegible]

तस्य प्रह्लादस्य उत्तरस्मात् सप्तमे इदं श्रीम [illegible] हरेर्भक्तानुकम्पितत्वमाह। यस्येति। वामनाख्यो नारा [illegible] वरात्तथावस्थानमिति द्योतयितुमत्रातिष्ठत इति [illegible] योगः अखिलजगद्गुरुत्वमुपपन्नं तस्यापि स्वपादप्रणा [illegible] त्वेनेत्यभिप्रेत्याह। येनेति। रावणस्य दिग्विजये उत्पाटित [illegible] दूरीकृत इत्यर्थः एवंविधस्य हरेर्भक्तजनप्रयोजनार्थितया [illegible] न्द्रस्य राज्यदानेच्छयास्मद्राज्यापहरणलक्षणं कार्यं नान्यदिति वाक्यशेषः ॥ २७ ॥

यं सुखं महीयते अभूस्त्वैरितिशेषः ॥ २८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तद्भगवतामिति। तत्तु तस्य दानं न चान्यस्मिन् फले निमित्ते तत्र सर्वेषामात्मनि परमात्मनि तथापि ज्ञानिनां विविक्ततया तत्ता-स्फुरणादात्मतमे भक्तानां त्वात्मदे वशवर्त्तितया स्फुरतीति सर्वथा सर्वेषु परमोपकारकस्वभावत्वं दर्शितम्। ततस्तेनैतादृशातुच्छ-फलदानं न सम्भवतीत्यर्थः। तत्र परमतमनूद्य खण्डयति। न वै इति। यन्मायामयं भोगैश्वर्यमतनु तेनि नैवामुं बलिं प्रत्यनुजग्राहेति न किन्तु स्वसान्निध्यदानादिनैवेत्यर्थः तत्र हेतुः आत्मानुस्मृतिमोष-णामिति। यद्वा। तत्रेन्द्रानुग्रहवादं खण्डयति। न वै इति। अमुष्य इन्द्रस्य तं प्रतीत्यर्थः॥ २१ ॥ २२ ॥

तत्र श्रीबलिवाक्यमेव प्रमाणयति। यत्तादिति गद्यपञ्चकेन यत्तदिति प्रसिद्धम्। इति एतदुवाच श्रीबलिः ॥ २३ ॥

तमुपेन्द्रमतिहाय पुरुषार्थत्वेनानभिलष्य त्वयमुपेन्द्रेणैव द्वारभूतेन आत्मानं मां परमक्षुद्रं लोकत्रयमयाचत। मनुदास्यं नय मां निजभृत्यपार्श्वमित्यनेन तद्दामदास्यम् ॥ २४ ॥

स्वापिदं त्रैलोक्यराज्यं यत्तु त अकुतोभयं पदं मोक्षं तत्तु वव्रे। कथं भगवतः परमन्यद्ददामिति कृत्वा तदंशाभास तदंशमात्रात्मकत्वात्तयोः कदैवं व्यवहृतमित्याशङ्क्याह। भगवतेति ॥ २५ ॥

परिसर्वतो भावेन हीनस्त्यक्तो नात्याहतो भगवदनुग्रहो येन सः। अनुग्रहः प्रार्थनादिबन्धनान्तः ॥ २६ ॥ २७ ॥

मयस्तु मायावीति महेशप्रसादाभासेन तलातले व्यवहार-मात्रसुखेन तिष्ठन्नपि न तु श्रीबलिवत् परमार्थसुखसम्पन्न इति दर्शयितुमाह। ततोऽधस्तादिति। त्रिगतेति। महादेवस्य महाभाग-तस्यानुरोधादिति भावः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

तत्तस्मात् सर्वेषामात्मनि परमेश्वरे प्रतिपादितस्य भूमिदानस्य न तत्फलमिति पूर्वेणैवान्वयः। कथम्भूते भगवतां नारदादीनां भक्तानामात्मदे वशीभूयात्मानमपि ददति आत्मवतां सनकादीनां ज्ञानिनामात्मतमे परमात्मानुभवरूपे इति क्रमेण प्रेमानन्दब्रह्मानन्ददायिनस्तस्य तद्विषयानन्दमात्रफलदायित्वं कथं घटतामतो बलिराजाय स्ववशीकारमयप्रेमानन्दं खलु भूमिदानस्य फलं ददौ यतः स्वभक्तस्य तस्य स्वयं द्वारपालो बभूवेति भावः ॥ २१ ॥

वस्तुतस्तु भोगैश्वर्यमेकान्तभक्तस्यान्तराय एवेति न तद्भगवदनुकम्पाफलमतो भोगैश्वर्यदानादेवेन्द्रस्यैकान्तिकभक्त्यभावोऽनुमीयत इत्याह। नेति। अमुष्यामुमिन्द्रं तदुक्तम्।

वासुदेवे मनो यस्य जपहोमार्चनादिषु ।
तस्यान्तरायो मैत्रेय ! देवेन्द्रत्वादिकं फलम् ॥

[illegible] वस्तुतस्त्वेकान्तभक्तं बलिमेवानुजग्राहेति भावः ॥ २२ ॥

[illegible] ऐकान्तिकी भक्तिर्भगवदनुग्रहप्राप्तिश्च तद्वचनेनैव व्य-[illegible]त्याह। यद्यस्मात्तदतिप्रसिद्धमिति बह्वयमाधामुवाच हेल-[illegible] अधिगतः अन्य उपायो येन तेन भगवता याच्ञाच्छलेन [illegible] रमात्रावशेषितं लोकत्रयं यस्य सः। प्रति मुक्तो बद्ध [illegible] पिनद्धापिनद्धवत्,, इत्यमरः। अपविद्धः प्रक्षिप्तः [illegible]

[illegible] विद्वानपि यस्य सचिवो बृहस्पतिः सोऽपि पुरुषा-[illegible] अस्मादिन्द्रं प्रति युक्तं नोपदिदेशेति भावः। यत [illegible]भूतेन आत्मानं मां लोकत्रयमयाचत तमुपेन्द्रं विहा-[illegible]याचत यद्ययाचिष्यत तदा किं स दातुं नापा-रयिष्यत् [illegible] कथमकरोदिति भावः। तत्राप्यात्मन [illegible] परममोहान्ध इव स इति भावः। यद्वा तं बृह[illegible]स्पतिं प्रेषयित्वा तेनैव कथं मां नायाचत यदि [illegible]याचिष्यत तदा तस्मै ब्राह्मणाय त्रिलोकीं किं नादास्यं कथं स्वयमेवं तं याचकमकरोदिति भावः कामितस्य वस्तुनस्तुच्छत्वमाह। अतिगम्भीरमनन्तं रयो वेगो यस्य तस्य कालस्य यन्मन्वन्तरं तेन परिवृत्तं पर्यन्तं लोकत्रयमिदं कियत् ॥ २४ ॥

किञ्चात्र जगत्येकः प्रह्लाद एव परमार्थे निष्णात इत्याह। यस्येति। उपरते मृते सति ॥ २५ ॥

ननु त्वमपि प्रह्लाद सदृश एवेति तत्र सत्रपं सदैन्यमाह। तस्येति। अनुपथमनुरूपं वर्त्म ॥ २६ ॥

तस्य बलेः ॥ २७ ॥

महीयते पूज्यते ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

तत्तस्मिन् सर्वेषां चेतनाचेतनानां पदार्थानामात्मनि स्थितिप्रवृत्त्यादिमूले विशेषतो भगवताम्।

उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

इतिस्मृत्युक्तानां सर्वेषां कथम्भूतानामात्मवतामात्मा उपास्यत्वेन विद्यते येषां तेषामेवंभूतानां ज्ञानभक्तिसम्पन्नानां महानुभावानामात्मपर्यन्तसर्वस्वप्रदे आत्मतमे च वासुदेवे स्वम

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

स्थितस्य भूमिदानस्य त्रिलोकैश्वर्यं फलं न भवतीति पूर्वेणो-न्वयः ॥ २१ ॥

• त्रिलोकैश्वर्यं भगवदनुकम्पाफलमपि न भक्तस्य बलेरन्त-रायमात्रमित्याह । नेति । भगवानमुष्य अमुं नैवानुगृहीतवान् कर्मणः सम्बन्धमात्रविवक्षया षष्ठी यद्यस्मान्मायामयं भोक्तृव्यामो-हकत्वादनित्यत्वादिदोषयुक्तम् । किञ्च । आत्मस्मृतिं भगवद्विषयकं ज्ञानं मुष्णातीति तथा तथैवाह भगवान् पराशरः ।

वासुदेवे मनो यस्य जपहोमार्चनादिषु ।

तस्यान्तरायो मैत्रेय ! देवेन्द्रत्वादिकं फलम् इति

यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः ।

इत्यादिभगवद्वचनमप्यत्रानुसन्धेयम् ॥ २२ ॥

बलेरेकान्तभक्तत्वं वर्णयति । यत्तदित्यादिना । यद्यदा तत्ते नैव अनधिगतः अन्य उपायो येन तेन भगवता याच्ञा-नापहृतं स्वशरीरमात्रावशेषितं लोकत्रयं यस्य सः सम्प्रति : सम्यग्बद्धोऽपि गिरिदर्यामपविद्धः प्रक्षिप्तोऽपि सन् इ स्फु-। इति वक्ष्यमाणमुवाच ॥ २३ ॥

बतेति खेदे भगवान् बहुविदपि अयं प्रसिद्धो योऽद्धाविन्द्रः स्यैकान्तेनाव्यभिचारिप्रयत्नेन बृहस्पतिः सचिवः ब्यांका-पकः यतो मन्त्राय वृतः सोऽप्यर्थेषु कार्य्योकार्येषु नूनं निश्चितं न निष्णातः न कुशलः यतस्तं बृहस्पतिमतिहायोल्लङ्घ्य उपेन्द्रेण इन्द्रस्योपरि वर्त्तमानेन भगवता भक्तवत्सलेन द्वार-भूतेन आत्मानं मां लोकनाथमात्मनः आशिषः लोकानयाचत नो एव तस्योपेन्द्रस्य दास्यमतिगम्भीरमनन्तं वयो यस्य तस्य कालस्य मन्वन्तरं तेन परिवृत्तं विपर्यस्तं लोकत्रयमिदं कियत् कियदपि सातिशयत्वादनित्यत्वादिदोषयुक्तत्वादनुपादेयमिति भावः ॥ २४ ॥

• अस्मत्पितामहः प्रह्लादः स्वपितरि हिरण्यकशिपौ उपरते मृते सति स्वपित्र्यं पदमनुपादेयमिति हेतोः इतिशब्दः हेतुवाचकः, न वव्रे भगवतः पदमकुतोभयं धामापि भगवता दीयमानमपि न वव्रे किन्तु यस्य भगवतोऽनुदास्यमेव वव्रे स अर्थेषु निष्णात इति भावः ॥ २५ ॥

तस्य प्रह्लादस्य अनुपथमनुवर्त्म अमृजिताः कषायाः रागादयो यस्य परिहीणो भगवदनुग्रहो यस्य सः को वा उपजिगमिषति उपगन्तुमिच्छति इतिशब्दो बलिवाक्य-समाप्तिपरः ॥ २६ ॥

तस्य बलेः उत्तरस्मादष्टमस्कन्धे वक्ष्य बलेः येन भगवता दिग्विजये प्रवृत्तो बलिद्वारि प्रविशन् दशकन्धरो रावणः पदा तत्राप्यङ्गुष्ठेनैव ॥ २७ ॥

लब्धपदः प्राप्तस्थानः महीयते पूज्यते ॥ २८ ॥

भाषा टीका

तिस हेतु से आत्मस्मृति भूलों को आत्मा को देने वाले सब प्राणियों के [illegible] भगवान् की आत्मता जो अपेक्षा किया [illegible] है ॥ २१ ॥

वस्तुतः भगवान् ने इन बलि महाराज के ऊपर अधि अनुग्रह नहीं किया जो कि आत्मा के स्मरण के ना करने वाले मायामय वैभव को दिया है ॥ २२ ॥

जिन बलि महाराज को छलने का और उपाय नहां जानकर मागने के छलसे भगवान् ने तीनों लोक के ऐश्वर्य को हरण करलिया केवल शरीर मात्र बाकी छोडा फिर वरुण पाशों से बांध दिया पर्वत के कन्दरा में डार-दिया तो भी यह वचन बोले ॥ २३ ॥

यह बात निश्चित है कि इन्द्र भगवान् प्रयोजन मे चतुर नहीं हैं और जो बृहस्पति जी उनके मन्त्री भये वे भी प्रयोजन में अत्यन्त चतुर नहीं है जिनोंने कि इन्द्र के सहित मेरा जीतना और धन सम्पत्ति इन सब बातों को माँगा परन्तु भगवान् के दास भाव को नहीं माँगा और यह लोक त्रय का वैभव तो बड़े गंभीर वेगवाले काल का मन्वन्तर मात्र ही रहने वाला है इसमें क्या सार है ॥ २४ ॥

जिन भगवान् के दास भाव को हमारे पितामह प्रह्लाद जी ने मांगा है और जो निर्भय अपने पिता का राज्य भगवान् का दिया हुआ भी अपने पिता के मरने के पीछे नहीं ग्रहण किया उनने समुझा कि भगवान् से परे यह नहीं है ॥ २५ ॥

उन महानुभाव प्रह्लाद जी के सदृश करने वाला पाप रहित ऐसा हम सरीका पुरुष भगवान् की कृपा से रहित कौन होगा जो उनके मार्ग में चलने की इच्छा करेगा ॥ २६ ॥

अब उनका चरित्र आगे के अष्टम स्कन्ध में विस्तार से कहेंगे उन बलि महाराज के दरवाजे में सब जगत् के गुरु भगवान् नारायण गदा को हाथ में लेकर अपने भक्त के ऊपर कृपा करके स्थित हैं जिन भगवान् ने दिग्विजय करने समय आये हुए रावण को अपने पावके अंगूठे से अयुत योजन पर्यन्त दूर फेंकदिया था ॥ २७ ॥

तिसके नीचे तलातल में मय नामक दानवोंका राजा रहता है तीन पुरों का मालिक होकर है तीनों के कल्याण की इच्छा करने वाले भगवान् महादेवजी ने उसके तीनों पुर जलादिये थे फिर कृपा करके उसको स्थान दे दिया है सब माया वालों का गुरु है श्री महादेव जी उसकी रक्षा करते हैं जिससे श्री सुदर्शन चक्र का भय से रहित होकर रहता है ॥ २८ ॥

[illegible] सर्पाणां नैकशिरसां क्रोधवशोनाम गणः कुहकतक्षककालिय-
[illegible] महाभोग[illegible]धिपतेः पुरुषवाहादनवरतमुद्विजमानाः स्वकलत्रापत्यसुहृ-
[illegible] कचित्[illegible] ॥ २९ ॥

[illegible] दैतेया दानवाः पणयो नाम निवातकवचाः कालेया हिरण्यपुरवासिन इति विबुधप्रत्यनीका उत्पत्त्या महौजसो महासाहसिनो भगवतः सकललोकानुभावस्य हरेरेव तेजसा प्रतिहतबलावलेपा बिलेशया इव वसन्ति ये वै सरमयेन्द्रदूत्या वाग्भिर्मन्त्रवर्णाभिरिन्द्राद्बिभ्यति ॥ ३० ॥

ततोऽधस्तात्पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति येषामुह वै पञ्चसप्तदशशतसहस्रशीर्षाणां फणासु विरचिता महामणयो रोचिष्णवः पातालविवरतिमिरनिकरं स्वरोचिषा विधमन्ति ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पारमहंस्यां संहितायां
वैयासिक्यां राह्वादिस्थितिबिलस्वर्गमर्यादानिरूपणं नाम
चतुर्विंशतितमोऽध्यायः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नैकशिरसामनेकफणानां गणोऽस्ति । प्रपञ्चयति । कुहकेति । महाभोगवन्तो महाकायाः पुरुषवाहाद्गरुडाद्विद्विजमानाः ॥ २९ ॥

विबुधप्रत्यनीका देवशत्रवः सकलेष्वपि लोकेष्वनुभावो यस्य तस्यैव तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यमदो येषां बिलेशयाः सर्पा इव इन्द्रदूत्या प्रयुक्ताभिर्मन्त्ररूपाभिर्वाग्भिः एवं हि वैदिकमाख्यानं पणिभिरसुरैर्निगूढा गामन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितां सन्धिमिच्छन्तः पणयः प्राहुः । किमिच्छन्ती सरमेत्यादि सा च सन्धिमनिच्छन्तीन्द्रस्तुतिपूर्वकं तान्प्रति परुषमाह । "हता इन्द्रेण पणयः शयध्वम्" इत्यादि ते च तच्छ्रुत्वा बिभ्यतीति ॥ ३० ॥

महाभोगिनो महाफणाः महानमर्षः क्रोधो येषां पञ्चादिसङ्ख्यानि शीर्षाणि येषां शीर्ष्णामिति वक्तव्ये शीर्षाणामित्यार्षः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ महातलमनुवर्णयति । तत इति । ततः तलातलादधस्तान्महातले विवरे नैकं शिरो येषां तेषामनेकशिरसामित्यर्थः काद्रवेयाणां कद्रोरपत्यभूतानां सर्पाणां गणः क्रोधवशसंज्ञकोऽस्ति । गणो कांश्चित्प्रधानान्निर्दिशन्विशिनष्टि । कुहकेत्यादिना । कुहकादयः प्रधानाः मुख्या येषां ते महाभोगवन्तः दीर्घकायाः महापुरुषस्य भगवतो वाहनभूतात्पक्षिराजानामप्यधिपतेर्गरुत्मतोऽनवरतं निरन्तरं उद्विजमाना बिभ्यतः स्वकलत्रादिरूपकुटुम्बासक्तया प्रमत्ताः सन्तः कचिद्विहरन्ति ॥ २९ ॥

अथ रसातलमनुवर्णयति । ततो महातलादधस्ताद्रसातले विवरे दैतेयदानवाः दितेः पुत्राः दनुपुत्राश्च पणय इति प्रसिद्धास्ते च निवातकवचाः कालकेया हिरण्यपुरवासिन इति त्रिविधाः विबुधानां देवानां प्रत्यनीकाः प्रतिपक्षिणः उत्पत्त्यैव महौबलशालिनः महान्तश्च ते साहसिकाः सहसा दर्पेण चरन्तीति साहसिकाः तथाभूताः सन्तः सर्वेषु लोकेष्वनुभावो यस्य तस्य भगवतो हरेस्तेजसैव सुदर्शनाख्येन प्रतिहतः बलावलेपः बलनिमित्तो गर्वो येषां ते तादृशा बिलेशया इव सर्पा इव वसन्ति तानेव विशिनष्टि । य इति । ये वै पणयः इन्द्रदूत्या सरमया देवशुन्या प्रयुक्ताभिर्मन्त्रवर्णाभूताभिर्वाग्भिरिन्द्राद्बिभ्यति भयं प्राप्नुवन्ति । एवं हि वैदिकमाख्यानं पणिभिरसुरैर्निगूढा गामन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितां सन्धिमिच्छवः पणयः प्राहुः किमिच्छन्ती सरमे ! इत्यादिना सा च सन्धिमनिच्छन्ती इन्द्रस्तुतिपूर्वकं तान्प्रति भर्त्सयामाह "हता इन्द्रेण पणयः शयध्वम्" इत्यादि ते च तच्छ्रुत्वा बिभ्यतीति ॥ ३० ॥

एवं रसातलमनुवर्ण्याथ पातालमनुवर्णयति । तत इति । ततो रसातलादधस्तात्पाताले विवरे नागलोकानां सर्परूपाणां जनानां पतयो वासुकिः प्रमुखः प्रधानो येषां ते शङ्खादयो महाभोगिनः फणिनः महाफणिनः महानमर्षः क्रोधो येषां महाक्रोधाः निवसन्ति तानेव विशिनष्टि । येषामुह वै येषां हि पञ्चादिसं-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्थानि शीर्षाणि येषां शीर्ष्णामिति वक्तव्ये शीर्षाणामित्यार्षं तेषां सर्पाणां फणानां फणासु आधारस्य सम्बन्धमात्रविवक्षया षष्ठी विरचिता भृता ये महामणयो रोचिष्णवः सदा प्रकाशनशीलाः तेषां स्वरोचिषा पातालविवरं पातालविवरसम्बन्धितमोजालं विधमन्त्यपनुदन्तीति ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

महाभोगवन्तः स्थूलशरीरवन्तः पुरुषोत्तमस्य वाहो वाहनं तस्मात् ॥ २९ ॥

पणयो दैत्या दानवा निवातकवचाः कालकन्यापुत्राः कालकेयाः विष्णुप्रत्यनीका देवशत्रवः प्रतिहतावलेपा विनाशितगर्वाः योगबलाद्बिलेशयाः सर्पाकारा ये पणय इन्द्रदूत्या सरमया शुन्योक्ताभिर्मन्त्रवर्णाभिर्वाग्भिः "इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधी च,, इत्यादिमन्त्रवर्णात्मकगीर्भिः श्रुताभिरिन्द्राद्बिभ्यति भीतास्तिष्ठन्तीति यस्मात्तस्माद्बिलेशयाकारा निवसन्तीत्यर्थः "सरमा त्वं दूरादध्वनो बहिर्गताभिर्जिह्वाभिर्जगुरिः किमपि निगरन्ती किमिच्छन्त्यत्र प्रानट् प्रायासीः" हिगताविति धातोः अस्यास्तव अस्मे अस्मासु हितिर्गतिः का किं कार्यमुद्दिश्यात्रागमनं ते तव कापरितक्मूया तस्यार्थे दूतस्यार्थे दूतक्रियासीत् त्वं रसायाः पयांसि कथमतर इति पणिभिः पृष्टा सरमा ब्रूते अहमिन्द्रस्य दूती तेन प्रेषिता चराम्यागतास्मि "व्यत्ययो बहुलम्,, इति सूत्रात् किमिच्छन्तीत्यस्य परिहारमाह । हे पणयः ! वो महोऽत्र वणनिधीनिच्छन्ती अपहर्तुमिति शेषः नोऽस्माकमतिस्कन्धोऽभियसा स्वामिनो भयेन तत्तदावत् आवामागमं तथा तस्माद्रसायाः पयांस्यतरामिति सरमायाः पणीन्प्रति परिहारवचनमिति मन्त्रवर्णार्थः ॥ ३० ॥

महाभोगिनः स्थूलशरीरा बहुभोगयुक्ता वा शीर्ष्णामिति वक्तव्ये शीर्षाणामितीतरपुरुषशिरोबलत्वद्योतनाय विगतं रचितं रचनं येषां ते तथा औत्पत्तिका इत्यर्थः विधमन्ति निरस्यन्ति ॥ ३१ ॥ (१)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

शीर्षस्य "शीर्षश्छन्दसि,, इति भगवान् पाणिनिः ॥ २९—३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
चतुर्विंशोऽध्यायः ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नैकशिरसाम् [illegible]नाम् । एतत् प्रपञ्चयति । पुरुषवाहात् हरेर्वाहनात् ॥ २९ ॥

दैतेयादयोऽसुरभेदाः प्रत्यनीकाः शत्रवः इन्द्रदूत्या प्रयुक्ताभिर्मन्त्ररूपाभिर्वाग्भिः । एवं हि वैदिकमाख्यानं पणिभिरसुरैर्निगूढां गामन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितां सन्धिमिच्छन्तः पणयः प्राहुः । किमिच्छन्ती सरमेत्यादि सा च सन्धिमनिच्छन्ती इन्द्रस्तुतिपूर्वकं नाम प्रतिपरुषमाह "हता इन्द्रेण पणयः पलायध्वम्" इत्यादि ते च तच्छ्रुत्वा बिभ्यतीति ॥ ३० ॥

महाभोगिनो महाफणाः ॥ ३१ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमस्य चतुर्विंशः सङ्गतः सङ्गतः सताम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

महाभोगवन्तो महाकायाः ॥ २९ ॥

तेजसा सुदर्शनेन प्रतिहतो बलावलेपो वीर्यगर्वो येषां ते बिलेशयाः सर्पा इव ये पणयः सरमया प्रयुक्ताभिः "हता इन्द्रेण पणयः शयध्वम्" इत्यादिमन्त्रवर्णाभिः बिभ्यति ॥ ३० ॥

महाभोगिनो बृहत्कायाः महासर्पाः अतिक्रोधवन्तः येषां वासुकिप्रमुखानां पञ्चादिसङ्ख्यानि शीर्षाणि येषां तेषां पञ्चादिशीर्ष्णाम् शीर्षाणामित्यार्षः प्रयोगः ॥ ३१ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
चतुर्विंशाध्यायार्थप्रकाशः ॥ २४ ॥

भाषा टीका ।

तिस के नीचे महातल में अनेक मस्तकवाले काद्रवेय नामक सर्पों का क्रोधवश नाम का गण है कुहक तक्षक कालिय सुषेण आदि बड़े शरीर वाले ये सर्प हैं नारायण के वाहन पक्षिराज गरुड़ जी से डरते हुये भी अपने स्त्री पुत्र मित्रों के सहित कहींपर प्रमादी हो कर विहार करते हैं ॥ २९ ॥

तिस के नीचे रसातल में दैतेय दानव पणिनाम वाले निवात कवच कालेय हिरण्यपुरवासी इन नामों वाले देवतों के शत्रु उत्पत्ति सेही बड़े तेजवाले बड़े साहसवाले केवल सकल लोक विदित प्रभाववाले हरिभगवान् के तेजस से श्री सुदर्शनचक्र सेही डर कर सर्प सरीके वास करते हैं जोकि इन्द्र की दूती सरमा की मन्त्र वर्ण रूपावाणी सुनने से इन्द्र से डरते हैं ॥ ३० ॥

---

(१) अत्र श्रीविजयध्वजतीर्थमतेऽध्यायसमाप्तिर्नास्ति ।

[illegible] टीका। [illegible]

[illegible] वासुकि [illegible] कुलिक [illegible] शंख-चूड़ [illegible] क्रोधवाले निवासकरते हैं वे कोई पांच फणा वाले [illegible] सात फणा वाले कोई सौ फणा वाले कोई हजार फणा वाले हैं इनों के फणों में स्थित जो महामणि हैं सो बडे प्रकाशमान हैं वे मणि अपने प्रकाश से पाताल विवर के सब अन्धकार को वारण करते हैं॥ ३१॥

इति श्रीभागवत पञ्चमस्कन्ध चौवीसमे अध्याय का
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ २३॥

———

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे चतुर्विंशोऽध्यायः समाप्तः ॥ २४ ॥

——○:०:○——

॥ पञ्चविंशोऽध्यायः ॥

——:०:——

॥ श्रीशुक उवाच ॥

तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तर आस्ते या वै कला भगवतस्तामसी समाख्यातानन्त इति (१) सात्वतीया द्रष्टृदृश्ययोः सङ्कर्षणमहमित्यभिमानलक्षणं यं सङ्कर्षणमित्याचक्षते ॥ १ ॥

यस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः सहस्रशिरस एकस्मिन्नेव शीर्षणि ध्रियमाणं सिद्धार्थ इव लक्ष्यते ॥ २ ॥

यस्य ह वा इदं कालेनोपसञ्जिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरन्तरेण साङ्कर्षणो नाम रुद्र एकादशव्यूहस्त्र्यक्षस्त्रिशिखं शूलमुत्तम्भयन्नुदतिष्ठत् ॥ ३ ॥

यस्याङ्घ्रिकमलयुगलारुणविशदनखमणिषण्डमण्डलेष्वहिपतयः सह सात्वतर्षभैरेकान्तभक्तियोगेनावनमन्तः स्ववदनानि परिस्फुरत्कुण्डलप्रभामण्डितगण्डस्थलान्यतिमनोहराणि प्रमुदितमनसः खलु विलोकयन्ति ॥ ४ ॥

यस्यैव हि नागराजकुमार्य आशिष आशासानाश्चार्वङ्गवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तम्भेष्वगुरुचन्दनकुङ्कुमपङ्कानुलेपेनावलिम्पमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणावलोकनयनवदनारविन्दं सव्रीडं किल विलोकयन्ति ॥ ५ ॥

स एव भगवाननन्तोऽनन्तगुणार्णव आदिदेव उपसंहृतामर्षरोषवेगो लोकानां स्वस्तय आस्ते ॥ ६ ॥

ध्यायमानः सुरासुरोरगसिद्धगन्धर्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्ति ॥ ७ ॥

य एष एवमनुश्रुतो ध्यायमानो मुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयं हृदयग्रन्थिं सत्त्वरजस्तमोमयमन्तर्हृदयङ्गत आशु निर्भिनत्ति तस्यानुभावान् भगवान् स्वायम्भुवो नारदः सह तुम्बुरुणा सभायां ब्रह्मणः संश्लोकयामास ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पञ्चविंशे ततोऽधस्तादाह शेषस्य संस्थितिम् ।
सञ्जिहीर्षोरिदं काले यत्र रुद्रसमुद्भवः ॥ १ ॥

तस्य पातालस्य क्रोडेऽस्त्यावनन्तः सात्वतीयाः सात्वततन्त्रनिष्ठाः चतुर्व्यूहोपासने सङ्कर्षणमित्याचक्षते तथाख्याने हेतुः द्रष्टृदृश्ययोः सम्यक्कर्षणमेकीकरणं येन, तत्कृतः अहमित्यभिमानो लक्षणं लिङ्गमधिष्ठानं यस्य अहङ्काराधिष्ठानेन द्रष्टृदृश्यसङ्कर्षणात् सङ्कर्षण इत्यर्थः ॥ १ ॥

अनन्तत्वमाह । यस्येदमिति । यच्छब्दानां स एव भगवाननन्त इत्युत्तरेणान्वयः ॥ २ ॥

तामसत्वमाह । यस्येदं विश्वमुपसंहर्तुमिच्छतः अमर्षेण विरचिते कुटिलीकृते रुचिरीकृते भ्रमन्त्यौ भ्रुवौ तयोर्मध्ये उत्तम्भयन्नुन्नमयन् ॥ ३ ॥

(१) प्रमातारः सात्वतीया इति श्रीवीरराघवाचार्यपाठः ।

[illegible] नखा [illegible] परिस्फुरतां कुण्डलानां प्रभया [illegible] ॥ ४ ॥

चारुवलयकङ्कणवलये विलसिताश्च ते विशदाश्च विपुलाश्च धवलाश्च सुभगाश्च रुचिराश्च भुजा एव रजतस्तम्भास्तेष्वगुरुचन्दनकुङ्कुमानां पङ्क एवानुलेपस्तेनावलिम्पमानास्तेषामभिमर्शेनोन्मथिते हृदये मकरध्वजस्यावेशेन रुचिरं च ललितं च स्मितं यासां ताः तस्यानुरागेण मदेन च मुदितं च तन्मदेन विघूर्णिते प्रचलिते च आ ईषदरुणे करुणावलोकयुक्ते नयने यस्मिंस्तद्वदनारविन्दं विलोकयन्ति ॥ ॥ ५ ॥

अमर्षोऽसहनं रोषः क्रोधः उपसंहृतस्तयोर्वेगो येन ॥ ६ ॥

उपासनार्थमाह । सुरादिभिर्ध्यायमानैर्ध्यायमानः अनवरतं मदेन मुदितश्चासौ विकृतविह्वललोचनश्च, सुललितेन मुखरिकामृतेन वचनामृतेन स्वपार्षदान् विबुधयूथपानां पतींश्चाप्याययमानो हर्षयन्नीले वाससी यस्य एकमेव कुण्डलं यस्य हलस्य ककुदि पृष्ठे कृतो न्यस्तः सुभगश्च सुन्दरश्च भुजो यन उदारा लीला यस्य सः न परिम्लानो रागः कान्तिर्यस्यास्तस्या नवतुलसिकाया आमोदमध्वासवेन सुरभिमधुरसेन माद्यतां मधुकराणां ये व्रातास्तेषां मधुरगीतेन श्रीर्यस्यास्तां वनमालां वहन् वरन्नास्ते ॥ ७ ॥

संश्लोकयामास वर्णयामास ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं पातालान्तान् भूविवरानुवर्ण्याथ पातालपर्यन्तस्य भूमण्डलस्य धारकं रसाया मूले स्थितमनन्तमनुवर्णयति पञ्चविंशेन। तस्य पातालस्य मूलदेशेऽधस्तात्त्रिंशद्योजनसहस्रान्तरे आस्ते का सा या चास्ते तत्राह । या वा इति । अनन्त इति समाख्याता प्रसिद्धानन्तसंज्ञिकेत्यर्थः तामसी तामसाहङ्काराधिष्ठात्री या भगवतः कला अंशरूपा सा इत्यर्थः सैव सङ्कर्षण इत्युच्यते तदाह । प्रमातार इति । सात्वतीयाः सङ्कर्षणप्रोक्तसात्वताख्यपञ्चरात्रनिष्ठाः प्रमातार उक्तभगवत्कलायाथात्म्यविदस्तमनन्तं सङ्कर्षण इत्याचक्षते किमिदं सङ्कर्षणनामाश्वकर्णादिवत्केवलरूढं किम्वा पङ्कजादिवद्योगरूढमित्यपेक्षायां योगरूढमित्याह । द्रष्टृदृश्ययोरिति । यतोऽयमनन्तः द्रष्टृदृश्ययोर्ज्ञातृज्ञेययोः सन्निकर्षणं सन्निकृष्यते विषयीक्रियतेऽतीन्द्रियार्थोऽनेनेति सन्निकर्षणमतीन्द्रियार्थविषयकज्ञानसाधनं स्वयं यथातीन्द्रियार्थविषयकज्ञानवानेवमितरेषामप्यतीन्द्रियार्थविषयकज्ञानापादक इत्यर्थः यत एवमनन्तस्ततस्तं सङ्कर्षण इत्याचक्षते सङ्कर्षणत्वमेव स्पष्टयति । अहमित्यभिमानलक्षण इति । अहमिति प्रतीयमानोऽतीन्द्रियो यो जीवस्तद्विषयकोऽभिमानः अहमिति प्रतीतिस्तस्य लक्ष्यतेऽनेनेति लक्षणं कारणं हेतुरिति यावज्जीववर्गाभिमानिदेवतात्वात्तेषामहमिति बुद्धिवृत्तिहेतुरित्यर्थः ॥ १ ॥

एवमनन्तशब्दोऽपि तस्मिन् योगरूढ इत्याह । यस्येति । यच्छब्दार्थः स एव भगवाननन्त इत्युत्तरेणान्वयः यस्य भगवतः सहस्रशिरसः अनन्तमूर्तेरेकस्मिन्नेव शीर्षणि ध्रियमाणं धार्यमाणमिदं कृत्स्नभूमण्डलं सिद्धार्थ इव श्वेतसर्षप इव लक्ष्यते दृश्यतेऽतोऽपरिच्छिन्नत्वादनन्त इत्युच्यत इति भावः ॥ २ ॥

यदुक्तं तामसीति तामसाहङ्काराधिष्ठातृत्वं तद्विशदयति । यस्य ह वेति । कालेन द्विपरार्धावसानरूपकालेनेदं कृत्स्नं जगत् संजिहीर्षतः संहर्तुमिच्छतः यस्य सङ्कर्षणस्यामर्षेण क्रोधेन विरचिते कुटिलीकृते रुचिरे भ्रमन्त्यौ भ्रुवौ तयोरन्तरेण मध्ये साङ्कर्षणाख्य एकादशानां व्यूहः गण एकादशरुद्रसमुदायरूपः कथम्भूतस्त्र्यक्षः त्रीण्यक्षीणि यस्य स त्र्यक्षः तिस्रः शिखा यस्य तादृशं शूलमुद्यम्यन्नूर्ध्वं धारयन्नुदतिष्ठदुद्बभूव तामसाहङ्काराधिष्ठातृत्वाज्जगत्संहर्तृतामसरुद्रगणोत्पादक इत्यर्थः ॥ ३ ॥

सुभगत्वमाह । यस्येति । अहीनां पतयः सात्वतश्रेष्ठैः सह यस्य सङ्कर्षणस्याङ्घ्रिकमलयुगलेऽरुणा विशदा नखा एव मणयस्तेषां षण्डस्तस्य मण्डलेषु एकान्तभक्तियोगेनाव्यभिचरितभक्तियोगेनावनमन्तः प्रणमन्तः उक्तविधेषु नखमणिमण्डलेषु प्रतिबिम्बितानि अतिमनोहराणि परितः स्फुरतां कुण्डलानां प्रभया मण्डितानि गण्डस्थलानि येषु तानि स्ववदनानि प्रमुदितं मनो येषां तादृशाः सन्तः मुखं विलोकयन्ति खलु नूनम् ॥ ४ ॥

तथा नागराजानां कुमार्यः आशिषः पुरुषार्थानाशासानाः कामयमानाः यस्य सङ्कर्षणस्य चारुभिः सुन्दरैरङ्गदैर्वलयैश्च विलसिताः प्रकाशिताश्च ते विशदा निर्मलाश्च विपुला दीर्घाः सुभगाः कोमलाश्च रुचिराः सुन्दराश्च भुजास्त एव रजतस्तम्भास्तेष्वगरुकुङ्कुमचन्दनानाम्पङ्कश्चानुलेपस्तेनावलिम्पमाना लेपनं कुर्वाणास्तेषां भुजानामभिमर्शेन स्पर्शेन उन्मथिते हृदये मकरध्वजस्य कामस्यावेशेन रुचिरं च ललितं च यत्स्मितं तद्वन्त्यः तथाभूताः सत्यः तस्य सङ्कर्षणस्यानुरागमदमुदितमदविघूर्णिताऽरुणकरुणावलोकनयनवदनारविन्दं सव्रीडं यथा तथा विलोकयन्ति आश्रितेषु मदेन स्वानुभवजनितेन च मुदिते तन्मदेन विघूर्णिते प्रचलिते च ईषदरुणे करुणावलोकनयने यस्मिन् तद्वदनारविन्दमिति तस्यार्थः ॥ ५ ॥

स उक्तविध एव सङ्कर्षणाख्योऽनन्तस्त्रिविधपरिच्छेदरहितः अनन्तकल्याणगुणार्णवः जगत्कारणभूतो देवः स्वतेजसा दीप्यमानः उपसंहृतः अमर्षरोषयोर्जगत्संहारविषययोरसहनक्रोधयोर्वेगो येन तथाभूतः लोकानां साधुजनानां स्वस्तये सुखायास्ते तिष्ठतीत्यर्थः ॥ ६ ॥

पुनः कथम्भूतः सुरादीनां गणैर्ध्यायमानः अनवरतं मदेन स्वानुभवजनितमदेन मुदितः स चासौ विकृतविह्वललोचनः विकृते घूर्णिते विह्वले परवशे इव स्थिते लोचने यस्य सः सुललितेन सुन्दरेण भावगर्भेण मितेन मुखरिकामृतेन वचनामृतेन स्वपार्षदान् स्वविबुधयूथानां पतींश्चाप्याययमानः हर्षयन् अपरिम्लानः अम्लानः रागो रक्तिमा यस्यास्तस्या नवतुलसिकाया नूतनकृष्णतुलस्या आमोदः मधुरूपः आसवश्च तयोः समाहारस्तेन माद्यतां मधुकराणां व्रातास्तेषां मधुरगीतेन श्रीर्यस्यास्तां स्वामसाधारणीं वैजयन्त्याख्यां वनमालां दधदिति शेषः बिभर्तीत्यनेन वान्वयः नीले वाससी यस्य एकमेव कुण्डलं यस्य हलस्य ककुदि पृष्ठे कृतो न्यस्तः सुभगः सुकुमारश्च सुन्दरो भुजो येन एवम्भूतो भगवान् सङ्कर्षणः माहेन्द्रः महेन्द्रसम्बन्धी वारणेन्द्र इव ऐरावत इव शुभ्रः उदारा लीला यस्य

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

सः काञ्चनीं स्वर्णमयीं कक्ष्यां रसनां बिभर्ति कक्षे भवा कक्ष्या वरत्रा स्यात् चर्ममयी वर्भिका "नध्री वध्री वरत्रा स्यात्,, इत्यमरकोशोक्ता तामध्यस्य जान्वोश्चावष्टम्भार्थां योगपट्टिकाख्यां स्वर्णमयीं बिभर्ति इत्यर्थः ॥ ७ ॥

एवं सङ्कर्षणं उपवर्णित इदानीमुक्तविध उपास्यमान उपासकानामन्तर्हृदयं गतः प्रकृतिसम्बन्धं निरस्यतीत्याह। य एष इति। एष भगवाननन्तः एवमनुश्रुतः उक्तविधत्वेन गुरुमुखाच्छ्रुतः अभिध्यायमानः "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः,, इति श्रुत्यर्थोऽत्र प्रत्यभिज्ञातः अतः सामर्थ्याच्छ्रवणानन्तरमत इति लभ्यते मुमुक्षूणां संसारादात्मानं मोक्तुमिच्छतामनादिकालप्रवृत्ताभिः कर्मवासनाभिर्ग्रथितं सन्दर्भितमविद्यामयं देहात्मभ्रान्तिस्वतन्त्रात्मभ्रान्तिरूपाज्ञानमयं ग्रन्थिं ग्रन्थिवद्दुर्मोच्यं सत्त्वरजस्तमोमयं सत्त्वादिगुणप्रचुरं गुणत्रयसम्बन्धप्रयुक्तानादिकालप्रवृत्तकर्मवासनाविद्याग्रन्थिरूपं संसारमित्यर्थः ध्यानेन मुमुक्षूणामन्तर्हृदये सन्निहितः आशु भिनत्ति नितरां निरस्यतीत्यर्थः तस्य भगवतः सङ्कर्षणस्यैवमुक्तमनुभावं प्रभावं तुम्बुरुणा सह स्वयम्भुवः पुत्रो नारदो ब्रह्मणश्चतुर्मुखस्य सभायां संश्लोकयामास वर्णयामास ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

तस्य पातालस्य तामसी तमोगुणप्रवर्त्तनी अनन्तस्य यत्स्वरूपं द्रष्टुश्चेतनस्य दृश्यस्य शरीरस्य सन्निकर्षेण सामीप्यापादकमभेदग्राहकं कथं देहोऽहमिति तर्हि इदं सत्यं किं नेत्याह। अभिमानलक्षणां भ्रान्तिप्रत्यापादकमित्यर्थः तत्स्वरूपं सङ्कर्षणमित्याचक्षते ॥ १ ॥

सात्वतः गुरुतरक्षितिमण्डलं सर्षपलाघववद्धारयतो ऽपरिमितबलत्वेनानन्तत्वं युक्तमित्याभिप्रेत्याह। तस्येति। सिद्धार्थः सर्षपः॥२॥

एकादशव्यूहः एकादशधा विभक्तरूपविशेषः उत्तम्भयन्नुत्कम्पयन् ॥ ३ ॥ ४ ॥

तदभिमर्शनेन भुजस्पर्शनेन सव्रीडमिति क्रियाविशेषणम् ॥ ५॥

शृङ्गाराद्यनन्तगुणार्णवः ॥ ६ ॥

अपरिम्लानो रागः कान्तिर्यस्याः सा तथा आमोदमध्वासवेन सौरभरूपमधुरसेन हलस्य निजायुधस्य ककुदग्रे कक्ष्यामुदरबन्धम् ॥ ७ ॥

संश्लोकयामास पद्यलक्षणवाक्यैः कथयामास ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तामसीति तमोगुणाधिष्ठातृरुद्रस्यान्तर्यामित्वात्। "मूर्त्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धम"इत्यादिविरोधात् ॥ १ ॥ २ ॥

अमर्षकारणन्तु प्रायः सर्वेषां युगपज्जगद्बहिर्मुखत्वं ज्ञेयम् ॥ ३—६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

पञ्चविंशे तु वर्णितास्तले शेषस्य भूभृतः।
जगत्संहर्तृरुद्रस्याप्यंशिनो वर्णिता गुणाः ॥ ० ॥

तामसी तमःकार्यसंहारप्रवर्त्तयित्री ननु तमोमयी "मूर्त्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धम"इत्यादिविरोधात् सात्वतीयाः सात्वततन्त्रनिष्ठाः द्रष्टृदृश्ययोर्भोक्तृभोग्ययोः सम्यक्कर्षणात् अतः सङ्कर्षण इति तत्र कर्षणमहमस्य भोक्ता इदं मे भोग्यमित्यभिमानलक्षणमेव अभिमन्तुरहन्ताममतयोः शुद्धयर्थं तदधिष्ठातृत्वेन यं ध्यायन्तीति भावः ॥ १ ॥ २॥

उपसंजिहीर्षन् इति। यद्येवं जगदाधिक्येन संहर्तुमिच्छन्स्तदैव मायायास्तदिच्छाधीनत्वात्तदीयतमःकार्यरोषात्मको रुद्रो भ्रूमध्ये प्रादुरभूदभवदिति विराचित इति रुद्रस्य विशेषणं सुलोपः आर्षः। यथा स्वयम्भूर्द्वितीयपुरुषस्य नाभिमध्ये रजोगुणात्मकं पद्मं प्रादुर्भवति तद्वत् ॥ ३ ॥

लावण्येन मनोहरत्वमाह। यस्येति। नखमणीनां षण्डः समूहस्तस्य मण्डलेषु दर्पणायमानेष्वित्यर्थः ॥ ४ ॥

यस्य चारुणा अङ्गदवलयं अङ्गदमण्डलं विलसितादिविशेषणविशिष्टा ये भुजरजतस्तम्भास्तेषु अगुर्वादिपङ्कः एवानुलेपः अनुलेपसाधनं तेन अवलिम्पन्त्यः तदभिमर्शनं तत्समय एव यत्तदङ्गस्पर्शस्तेन उन्मथिते हृदये यो मकरध्वजावेशस्तेन रुचिरं भावसूचकं स्मितं यासां ताः तस्यानुरागमदः स्वाहजिको भक्तविषयकस्तेन मुदिते मदविघूर्णिताअरुणे च नागकुमारीविषयककरुणावलोकविशिष्टे नयने यत्र तद्वदनारविन्दं सव्रीडं हन्त हन्तास्मद्धृदयविकारं प्रभुरयं ज्ञातवानिति लज्जापर्याकुलं यथा स्यात्तथा ॥ ५ ॥

उपसंहरतेति। स्थितिकाले सम्प्रति रोषस्यानौचित्यादिति भावः। अमर्षोऽसहिष्णुता तदुत्थो रोषः क्रोधः ॥ ६ ॥

सुललितेन मुखरिकामृतेन वचनामृतेन कक्ष्यां वरत्राम् ॥ ७ ॥

संश्लोकयामास पुनश्चावतारत्वेन श्लोकैस्तुष्टाव ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

श्रीमत्सङ्कर्षणवैभवं वर्णयति पञ्चविंशेनाध्यायेन। तस्येति। तामसी प्रलयनिमित्तभूतरुद्रादिनियन्त्री सात्वतीयाः वेदार्थभूतभगवत्प्रोक्तसात्वततन्त्रनिष्ठाः श्रीमन्नारदादयश्चतुर्व्यूहोपासने यमनन्तं सङ्कर्षण इत्याचक्षते तद्व्याख्याने हेतुं दर्शयंस्तमेव विशिनष्टि। द्रष्टृदृश्ययोः सम्यक्कर्षणमेकीकरणं येन तं पुनः कीदृशमहमित्यभिमानलक्षणं लक्षणं स्वरूपं यस्मात्तम् ॥ १ ॥

यस्येत्यादियच्छब्दानां स एव भगवानित्यग्रिमेणान्वयः ॥ २ ॥

इदं विश्वमुपसंहर्तुमिच्छतः अमर्षेण विरचिते कुटिलीकृते रुचिरे भ्रमन्त्यौ भ्रुवौ तयोरन्तरेण मध्ये एकादशव्यूहः एकादशभेदवान् रुद्रः शूलमुत्तम्भयन्नभ्युदतिष्ठत् ॥ ३ ॥

सात्वतर्षभैः सह अहिपतयः अव्रनमन्तः यस्य सङ्कर्षणस्य अङ्घ्रिकमलयुगलं अरुणाश्च विशदाश्च नखा एव मणयस्तेषां षण्डः समूहस्तस्य मण्डलेषु परिस्फुरतां कुण्डलानां प्रभया मण्डितानि गण्डस्थलानि येषु तानि वदनानि विलोकयन्ति ॥ ४ ॥

उत्पत्तिस्थितिलयहेतवोऽस्य कल्पाः सत्त्वाद्याः प्रकृतिगुणा यदीक्षयासन्।
यद्रूपं ध्रुवमकृतं यदेकमात्मन्नानाधात्कथमु ह वेद तस्य वर्त्म ॥ ९ ॥
मूर्तिं नः पुरुकृपया बभार सत्त्वं संशुद्धं सदसदिदं विभाति यत्र।
यल्लीलां मृगपतिराददेऽनवद्यामादातुं स्वजनमनांस्युदारवीर्यः ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

किञ्च यस्य सङ्कर्षणस्य आशिषः सम्पद आशासानाः चारूणि यान्यङ्गवलयान्यङ्गदानि तद्विलसिताश्च ते विशदा विपुलाश्च धवलाः सुभगाश्च रुचिराश्च भुजा एव रजतस्तम्भास्तेषु अगर्वाविपङ्क एवानुलेपस्तेनाङ्गलिम्पमानास्तेषामभिमर्शेनोन्मथिते हृदये मकरध्वजस्यावेशेन रुचिरं च ललितं च स्मितं यासां ताः तस्यानुरागमदेन भक्तविषयकस्नेहजानितेन मदेन मुदिते च मदविघूर्णितं स्वानन्दमदेन प्रचलिते च आ ईषद्रुणे च करुणावलोकयुक्ते नयने यस्मिन् तच्च तद्वदनारविन्दं विलोकयन्ति ॥ ५ ॥

अपराधासहनममर्षः अपराधिद्मनचेष्टा रोषः उपसंहृतस्तयोर्वेगो येन ॥ ६ ॥

सुरादिभिर्ध्यायमानः अनवरतमदेन नित्यनिरूढानन्दद्योतकस्वाकृचेष्टाविशेषेण मुदितश्चासौ विकृतविह्वललोचनश्च सुललितेन मुखरिकामृतेन वचनामृतेन स्वपार्षदादीन् आप्याययमानः संहर्षयन् नीले वाससी यस्य एकमेव कुण्डलं यस्य हलस्य ककुदि पृष्ठे कृतो न्यस्तः सुभगश्चासौ सुन्दरो भुजो येन उदारलीलः रुचिरक्रीडः न परिम्लानो रागः कान्तिर्यस्यास्तस्याः नवतुलसिकाया आमोदमध्वासवेन सुरभिमधुररसेन माद्यतां मधुकराणां व्रातास्तेषां मधुरगीतेन श्रीर्यस्यास्तां बिभर्ति कक्षां वरत्रां वारणेन्द्र ऐरावत इव ॥ ७ ॥

तुम्बुरुणा गन्धर्वेण सह संश्लोकयामास ॥ ८ ॥

भाषा टीका।

श्रीशुकदेवजी बोले उस पाताल के नीचे तीस हजार योजन के अनन्तर भगवान् की तामसी कला अनन्त नाम से प्रख्यात है तिस को पञ्चरात्र तन्त्रवाले आचार्य चेतन अचेतन दोनों के मिश्रभाव करने से अहं ऐसा अभिमान का लक्षण होने से सङ्कर्षण करके कहते हैं ॥ १ ॥

जिन अनन्त मूर्ति भगवान् के हजारों मस्तकों के मध्य मे किसी एक मस्तक में रक्खा हुआ यह भूमण्डल सरसों के तुल्य प्रतीत होता है ॥ २ ॥

प्रलय काल मे इस जगत्को संहार करने की इच्छा वाले जिन के क्रोध से रचित भ्रूमण्डल के मध्य मे से एकादशव्यूह वाले तीन नेत्र वाले तीन शिखा के शूल को उठाते हुये साङ्कर्षण नाम के रुद्र प्रगट भये हैं ॥ ३ ॥

जिन सङ्कर्षण भगवान् के चरण कमल दोनों के लाल उज्ज्वल नखों के मणियों के समूह के मण्डलों के समीप मे बड़े सर्प सात्वतों मे श्रेष्ठ पुरुषों के सहित एकान्त भक्तियोग से नमस्कार करते हुये चारों तरफ मे प्रकाशमान जो कुण्डलों की प्रभा तिस का जो मण्डल तिस मे शोभायमान गण्डस्थलों वाले जो अपने मनोहर वदन तिन को बड़े आनन्दित मन से देखते हैं ॥ ४ ॥

नागराजों की कुमारी अपने मनोरथों की चाहना करने वाली होकर उन अनंतजी के मनोहर शरीर मंडल मे शोभायमान अति निर्मल बड़े सपेद सौभाग्य वाले सुंदर चांदी के खंभासरी के भुजाओं मे अगुरु चंदन कुङ्कुम के पंकका लेपन को लगाती हुई लगाते समय मे शरीर के स्पर्श से हृदय के क्षुभित होने से कामदेव के वेग से अति सुंदर विलास युक्त मुख वाली होकर इनके अनुराग को जानकर मदसे मुदित मदसे घूमते हुये कुछलाल वर्ण वाले अवलोकन से युक्त भगवान् संकर्षणजी के मुखारविंदको वे नाग कन्या देखती रहती हैं ॥ ५ ॥

सोइ अनंत गुणों के समुद्र भगवान् अनंतजी आदि देव सब क्रोध अमर्ष के वेगको समेटकर सबलोगों के कल्याणके वास्ते स्थित हैं ॥ ६ ॥

सुर असुर उरग सिद्ध गन्धर्व विद्याधर मुनि गण निरन्तर उनका ध्यान करते हैं सर्वदा मदसे मुदित होने से विकार युक्त विह्वल नेत्रों से अनन्तजी हैं सुन्दर मुख भाषण के अमृत से देवताओं के पति अपने पार्षदों को आनन्दित करते हैं नील वस्त्रको धारण किये हैं एक कुण्डल धारण किये हैं हलके पृष्ठ भाग में सुन्दर सुभग भुजों को स्थापन किये हैं कभी म्लान नहीं होने वाली माला चन्दन लेप तुलसी इनके मधुर सुगन्ध के मदसे मतवाले भौरों के समूह के मधुर गानकी शोभा से युक्त अपनी वनमाला को धारण किये हैं उससे भगवान् ऐसे शोभित होते हैं जैसे कि मनोहर लीलावाला महेन्द्रका हस्ती सुवर्ण की कोंधनी को धारण करा होवै ॥ ७ ॥

इस प्रकार श्रवण किये हुये ध्यान किये भये संकर्षण भगवान् मुमुक्षु जनों की अनादि काल की जो कर्म वासना रूप ग्रन्थि है जोकि अविद्या से भई है सत्व रज तमो मय है तिस ग्रन्थि को हृदय मे प्रवेश होकर शीघ्र ही भेदन कर देते हैं जिनके प्रभाव को ब्रह्माके पुत्र नारद भगवान् तुंबुरु मुनि के सहित ब्रह्माजी के सभा मे श्लोक बनाकर गान करते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अस्य जगत उत्पत्त्यादिहेतवो गुणा यदीक्षया कल्पाः स्वस्वकार्यसमर्था आसन् यस्य तु रूपं ध्रुवमनन्तमकृतमनादि तत्र हेतुः यदेकमेव सदात्मन्यात्मनि नानाकार्यप्रपञ्चमधात्

यन्नाम श्रुतमनुकीर्तयेदकस्मादार्तो वा यदि पतितः प्रलम्भनाद्वा ।
हन्त्यंहः सपदि नृणामशेषमन्यं कं शेषाद्भगवत आश्रयेन्मुमुक्षुः ॥ ११ ॥
मूर्द्धन्यर्पितमणुवत् सहस्रमूर्ध्नो भूगोलं सगिरिसरित्समुद्रसत्त्वम् ।
आनन्त्यादनिमितविक्रमस्य भूम्नः को वीर्याण्यधिगणयेत् सहस्रजिह्वः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य ब्रह्मरूपस्य वर्त्म तत्त्वं जनः कथमिह वेद नैव वेदेत्यर्थः ॥ ९ ॥

तर्हि कथमसौ मुमुक्षुभिः सेव्यते तत्राह । मूर्तिमिति । यत्रेदं सदसद्विभाति स नोऽस्माकं भक्तानां बहुकृपया संमुखं सत्त्वं मूर्तिं बभार स्वजनानां मनांस्यादातुं वशीकर्तुं कृतां यस्य लीलां मृगपतिः सिंह आददे अशिक्षत । यतः उदाराणि वीर्याणि यस्य तस्मादन्यं मुमुक्षुः कमाश्रयेदित्युत्तरेणान्वयः यद्वा । कृपयेत्यत्र हेतुः । यद्यस्मात्स्वजनानां मनांस्यादातुं लीलामाददे मृगपतिरिवोदारवीर्यः । यद्वा । मृग्यन्त इति मृगाः कामप्रदास्तेषां पतिर्मुख्यः ॥ १० ॥

किञ्च । आस्तां तस्य कृपया वपुर्धारणं तद्भजनं वा तन्नाम्नौदार्यमेवातिचित्रमित्याह । यस्य नाम यदि पतितो महापातक्यप्यनुकीर्तयेत्तर्हि स शुद्ध्येदिति किमु वक्तव्यं यतोऽन्यासामेव नृणामशेषमंहः सद्यो हन्ति । कथमनुकीर्तयेत् । अन्यतः श्रुतं वा कस्माद्वा आर्तो वा सम्प्रलम्भनाद्वा परिहासात् तस्माच्छेषाद्धन्यम् ॥ ११ ॥

गिर्यादिसहितं भूगोलं सत्त्वानि प्राणिनः सहस्रजिह्वोऽपि को गणयेत् ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रथमं तद्ध्याने स्वस्यानधिकारद्योतनाय तत्स्वरूपस्य दुर्ज्ञेयत्वमभिप्रयन्कारणत्वेन तमुपलक्षयति । उत्पत्तीति । अस्य जगतः उत्पत्त्यादिहेतुभूताः सत्त्वाद्याः प्रकृतिगुणाः सत्त्वरजस्तमोगुणाः क्रमोऽत्राविवक्षितः रजःसत्त्वतमोगुणाः क्रमेण जगदुत्पत्त्यादिहेतुभूता यस्य भगवत ईक्षया सिसृक्षया कल्पाः सृष्ट्यादिसमर्था आसन् बभूवुः गुणत्रयात्मिका प्रकृतिः स्वयं महदादिकार्यवर्गहेतुभूतापि स्वयमसमर्था सती यस्य सिसृक्षारूपेक्षया सृष्ट्यादिसमर्थाभूदित्यर्थः अनेन जगन्निमित्तकारणत्वमुक्तम् "तदैक्षत बहु स्याम" इति श्रुतस्य कर्तृत्वस्यात्र प्रत्यभिज्ञानात् निमित्तकारणत्वं नाम स्वशरीरभूतप्रकृतिपुरुषकालानां स्वकार्याकारेण परिणामोपयुक्तप्रवर्तनाश्रयत्वं यथा कुलालादेः स्वकार्यमृत्पिण्डादेर्घटादिरूपपरिणामोपयुक्तप्रवर्तनाश्रयत्वम् अथोपादानकारणत्वेन वर्णयति । यद्रूपमिति । आत्मन्यात्मनि स्वस्मिन्नेव देवादिनामरूपाद्यभावादविभागेन स्थितं ध्रुवं नित्यम् "प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि" इति गीतोक्तेः कारणावस्थायामेवम्भूतं यद्रूपं प्रकृतिपुरुषात्मकं शरीरं तत्सिसृक्षानन्तरमात्मनि नानाकृतं देवादिनामरूपविभागविभक्तं कृतमभाकृतवान् तस्य भगवतः वर्त्म स्वरूपं लोकविलक्षणं कथमिह कथं हि वेद तादृशः इति शेषः पूर्वमात्मन्यविभागेन स्थितमात्मनि नानाकृतं रूपमधादित्यनेनैकत्वनानात्वे आत्मपर्यन्त इति विज्ञायते इदमेव हि तस्य उपादानत्वं यत्प्रकृतिपुरुषगतदेवादिविभागस्य स्वशरीरभूतप्रकृतिपुरुषद्वारा आत्मपर्यन्तत्वमिति । यद्वा । पूर्वमेकत्वेनात्मनि स्थितं पश्चान्नानाकृतमात्मन्यधादित्यन्वयः धारणं चात्र अन्तः प्रविश्य प्रशासनेन इदमेव हि परमात्मनः कारणता कार्येता च यदविभक्तनामरूपप्रकृतिपुरुषनियमनं विभक्तनामरूपावस्थप्रकृतिपुरुषनियमनं चेति ज्ञातव्यम् ॥ ९ ॥

यद्यप्येवं दुर्ज्ञेयं स्वरूपं तथापि भक्तानुजिघृक्षयैवं साकृ-षेणं रूपं कृतवानिति कतिपयधर्मैर्धारयितुं शक्य इत्याह । मूर्तिमिति । यत्र यस्मिन् भगवतीदं परिदृश्यमानं सदसदाद्यवस्थात्मकं जगद्विभाति स भगवान्नोऽस्माकं कृपयास्मासु कृपयेत्यर्थः संमुखं रजस्तमोभ्यामभिभूतं यत्सुखं सत्त्वं तन्मूर्तिं बभार दिव्यमङ्गलविग्रहरूपेण धृतवानित्यर्थः भक्तानां नोऽनुग्रहार्थमेव निरतिशयकृपया मूर्तिमिमां बभारेति भावः कथमितिशायन इत्यत आह । यदिति । यद्यस्मान्मृगपतिः सिंह इवोदारवीर्यः । यद्वा । मृग्यन्तेऽन्विष्यन्त इति मृगा ब्रह्मादयो देवास्तेषामपि पतिः "तं देवतानां परमं च दैवतं पतिं पतीनां परमं परस्तात्" इति श्रुतेः ब्रह्मादीनामप्यन्वेषणीय इति भावः अनेन परत्वं सूच्यते उदारवीर्यः जगत्कर्तृत्वादिसामर्थ्ययुक्त एवम्भूतोऽपि स्वजनानामस्माकं मनांस्यादातुं ग्रहीतुं स्ववशीकर्तुमिति यावत् सनत्कुमारकर्मनिर्मितां लीलामहिपतिः सात्वतर्षभः नारदात्मजकुमार्यादिमुख्यागाध्यः सात्वततन्त्रं प्रणयन् भूमण्डलधारणादिरूपां लीलामाददे परिगृहीतवान् सात्वततन्त्रप्रणेतृत्वं महाभारते उक्तम् ।

सात्वतं विधिमास्थाय गीतः सङ्कर्षणेन यः ।
तस्मात् प्रवक्ष्यते धर्मान् मनुः स्वायम्भुवस्तथा । इति ॥

लीलामाददे इत्यनेन सौलभ्यं सूच्यते अनेनैव तद्ध्याने मादृशानामधिकार इति तात्पर्यम् ॥ १० ॥

एवं परत्वसौलभ्ययोगः समाश्रयणीयत्वहेतुरुक्तः अथ नामप्रभावपर्यालोचनयापि स एव समाश्रयणीय इत्याह । यन्नामेति । आर्तः रोगादिपीडितः महापातक्यपि यस्य भगवतोऽनन्तस्य नाम यद्यनुकीर्तयेदकस्माद्वा प्रलम्भनाद्वा परिहासाद्वा यस्य नाम यदि श्रुतं च वा स्यादार्तेन पतितेन वा तर्हि स एव पतितादिः स्वपापनित्यादिभिर्विमुक्त इतरेषामपि नृणामात्मानं स्मरतामशेषमंहो दुरितं हन्ति अतः मुमुक्षुः परम्परात्पापशेषदुरितनिरसनक्षमनामधेयाच्छेषादन्यं कमाश्रयेदित्यर्थः शेषपदेन स्वाश्रितमिति नामनिर्वचनमभिप्रेतम् ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात् ।
मतिक्षयान्निवर्तन्ते न गोविन्दगुणक्षयात् ॥

इत्युक्तरीत्या अनन्तकल्याणगुणगणराशेरनन्तस्य साकल्येन कल्याणगुणान् वर्णयितुं कः प्रभुरित्याशयेनाह । मूर्द्धनीति । गिरिभिः पर्वतैः सहिताः सरितः समुद्राः सत्त्वा जन्तवः यस्मिंस्तद्भूमण्डलं यस्य सहस्रशिरसोऽनन्तस्य मूर्द्धन्यणुवदर्पितं तस्य भूम्नोऽपरिच्छिन्नस्यानन्त्यादेवेतरैरियत्तयाविदितः विक्रमः प्रकारो यस्य तस्यानन्तस्य वीर्याणि कल्याणगुणरूपाणि सहस्रजिह्वोऽपि को वा गणयेदेतावन्तीति गणयेद्गणानां करोतीति भावः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरेश्चनन्तेषु मूर्तिषु द्वितीयमूर्तेः शेषे विशेषसन्निधानात्तस्योपपन्नान् गुणांश्छेषस्यैव कीर्तयति । उत्पत्तीति । अस्य जगतः उत्पत्त्यादिहेतवः सत्त्वाद्याः प्रकृतिगुणा यदीक्षया कल्पाः समर्था आसन्नुत्पत्त्यादाविति शेषः । नन्वचेतनस्य स्वतः प्रवृत्त्यनुपपत्तेस्तत्सम्बन्धेन प्रवृत्तौ तस्यापि तद्विकारापत्तिरिति तत्राह । यद्रूपमिति । ध्रुवं शश्वदेकप्रकारं कुतः अकृतमकृत्रिमत्वात् नित्यस्यापि जीवस्य शरीरसम्बन्धेन विकारादकृतस्यापि प्रधानस्य कार्यरूपेण तु तत्त्वदर्शनादस्याकृतत्वमौपचारिकं किं न स्यादिति तत्राह । यदेकमिति । यदेकं केवलं कार्यात्मना तत्सङ्गेन वा विकारि न भवति "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति श्रुतेः कार्यत्वश्रुतेः कथं न तन्मुख्यं स्यादित्यत्राह । आत्मन्निति । आत्मन्यात्मनि स्वाधारतया नानाविधं जगद्धारयतु तद्रूपत्वेन "य उ त्रिधा तु पृथिवीमुत द्याम्" इति श्रुतेः किञ्चाचिन्त्यमहिमत्वात्तत्स्वरूपं दुर्ज्ञेयमित्यभिप्रेत्य यत्तदौ सम्बध्नाति । कथमिति । तस्य शेषान्तर्यामिणः सङ्कर्षणनामधेयस्य हरेर्वर्त्म वर्तनं कथमुह वेद न कथमपीत्यर्थः "मुह्यन्ति यं सूरयः" इति स्वोक्तिं हत्यनेन स्मारयति ॥ ९ ॥

आत्मन्नानाधादित्येतत्सङ्क्षिप्याह । मूर्तिमिति । सत्त्वं बलज्ञानसमाहारलक्षणमत एव संशुद्धं लोकदया मूर्तं परिमितं यत्र रूपे इदं सदसत्कार्यकारणात्मकमधिकरणाधेययोर्नामभेदः शङ्कनीयः मृगपतिः सिंहो यस्य लीलां शौर्यादिलक्षणामादधे अशिक्षत लीलाकरणप्रयोजनमाह । आदातुमिति । अनेनात्मन्नानाधादित्यत्र स्वाभिन्ना मत्स्यादिनानावतारा अप्यकृता इति ज्ञायते ॥ १० ॥

यन्नामस्मरणमात्रेणाशेषजन्मार्जितपापक्षयश्रवणात्तन्नामकीर्तनेनाघक्षयो भवतीति किं वक्तव्यमित्यभिप्रेत्य स्तुवता शेषान्तर्यामी श्रीनारायण एव स्तूयते अजामिलादौ दर्शनाच्चान्यनामकीर्तनेन तादृक्फलादर्शनाच्चेति भावेनाह । यन्नामेति । शेषान्तर्यामिणो हरेरन्यं कं पुरुषं मुमुक्षुरित्यनेन "अहं भोगप्रदो वत्स! मोक्षदस्तु जनार्दनः" इत्युक्तिं स्मारयति ॥ ११ ॥

गुरुगिर्यादिभरभराणोलभृतिरपि शेषस्य हरिसन्निधानादेवान्यकृता नेति भावेनाह । मूर्द्धनीति । विक्रमाणामानन्त्यात्साकल्येनाज्ञातपराक्रमस्य सहस्रजिह्वः शेष इत्यनेन स्पष्टयते ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

मृगपतिः श्रीवराहदेवः जहास चाहो वनगोचरो मृग इति । तत्रापि मृगशब्दप्रयोगादस्य लीलां पृथिवीधारणलक्षणामादधे स्वीकृतवानिति परममाहात्म्यं दर्शितम् ॥ १० ॥ ११ ॥

भगवद्विग्रहस्य मध्यमपरिमाणायमानत्वेऽपि विभुत्वाद्भूमण्डलस्याणुत्वम् ॥ १२—१५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कल्पाः स्वस्वकार्यसमर्थाः यदीक्षयैव आसन् यावत्पुरुषस्य प्रकृतावीक्षणं नासीत्तावत् प्रकृतिगुणाः सत्त्वाद्या महत्तत्त्वादीनामुत्पत्त्यादिषु न समर्था अभूवन्नित्यर्थः । यस्य रूपमाकारः ध्रुवं नित्यं यतोऽकृतमकृत्रिमं चिन्मयत्वादित्यर्थः । किञ्च । यदेकमेव आत्मनि स्वदेहरोमकूपप्रदेशेषु नानाकार्यप्रपञ्चमधाद्दधार पुपोष तस्य वर्त्म तत्त्वं तत्प्राप्तिमार्गं वा को वेद ॥ ९ ॥

रामकृष्णाद्यवतारत्वेन स्तौति मूर्त्तिं बभार । ननु किं प्रकृतिं न हि न हि संशुद्धं सत्त्वमत एव यत्र यस्यां चिन्मय्यां मूर्त्तौ सदसदिदं जगद्विभाति श्रीव्रजेश्वर्यापि दृष्टत्वादिति भावः । यद्यथा मूर्त्या मृगपतिः सिंह इव अनवद्यां लीलामादधे "कदाचिद् हसन्मुग्धबालसिंहावलोकनः" इत्युद्धवोक्तेः किमर्थं स्वजनानां मनांसि हस्तिन इव आदातुमाकृष्य ग्रहीतुं य एव उदारवीर्यः गिरिधरधारणादिपराक्रमवान् ॥ १० ॥

यन्नामापि पतितपावनमिति किं वक्तव्यं यतः पतितमपि पावनीकरोतीति वदन्नेव शेषरूपत्वेनापि स्तौति । द्वाभ्यां यस्य नाम सङ्कर्षण इति । पतितो महापातक्यपि यद्यनुकीर्तयेत्तर्हि संशुद्ध्येदिति किं वक्तव्यं यतोऽसावेव स्वदर्शनदानादिना नृणामशेषमंहः सद्यो हन्ति कथमनुकीर्तयेदन्यतः श्रुत्वा अकस्माद्वा आर्त्तो वा सन् प्रलम्भनात् परिहासाद्वा किं पुनः श्रद्धाभक्तिभ्याम् ॥ ११ ॥

मूर्द्धनि एकस्मिन्नेव भूगोलमणुवत्तिष्ठति सत्त्वानि प्राणिनः सहस्रजिह्वः सन्नपि को गणयेत् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य विश्वस्योत्पत्त्यादिहेतवः सत्त्वाद्या गुणा यस्य सङ्कर्षणस्येक्षयैव कल्पाः स्वकार्ये समर्थाः आसन् यस्य रूपं मूर्त्तिः ध्रुवं नित्यं यतोऽकृतमनादिसिद्धं यदेकमन्यनिरपेक्षं सत् आत्मन्नात्मनि विश्वाधारे नानाकार्यजातं बिभ्रदधात् तस्य वर्त्म कथं वेद जन इति शेषः यदनुग्रहं विना न वेदेत्यर्थः ॥ ९ ॥

नन्वेकस्य स्वरूपमात्रस्य ब्रह्मणः सदानन्दमयस्य मूर्तिधारणो मत्स्यादिना विश्वसृष्ट्यादिलीलायां च किम्प्रयोजनमत्राह । मूर्तिमिति । यत्र भगवति इदं सदसत् स्थूलसूक्ष्मरूपं विश्वं विभाति स नोऽस्माकमुपासकानां पृथक्कृपया विपुलकरुणया सम्यक् शुद्धं प्राकृतसत्त्वादिसंसर्गरहितं सत्त्वमप्राकृतं सत्त्वं मूर्त्तिं बभार दधार स्वजनानां मुमुक्षूणां मनांसि आदातुं विश्वसृष्ट्यादिलीलामादधे विश्वसृष्ट्यादिलीलाभावे मुमुक्षूणां मनांसि

एवं प्रभावो भगवाननन्तो दुरन्तवीर्योरुगुणानुभावः ।
मूले रसायाः स्थित आत्मतन्त्रो यो लीलया क्ष्मां स्थितये बिभर्ति ॥ १३ ॥

एता ह्येवेह नृभिरुपगन्तव्या गतयो यथाकर्म विनिर्मिता यथोपदेशमनुवर्णिताः कामान् कामयमानैः ॥ १४ ॥

एतावतीर्हि राजन् ! पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय उच्चावचा विसदृशा यथाप्रश्नं व्याचख्ये किमन्यत् कथयाम इति ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
भूविवरविध्युपवर्णनं नाम
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ध्याने निगृहीतानि न भवेयुरित्यर्थः कथम्भूतामनवद्यां स्वभावतः समस्तदोषशून्याम । किञ्च । मृगाः मुमुक्षवो जीवा अत्र मृगशब्दवाच्याः तेषामपि पतिः यत् यस्य एव तद्योगसिद्धयेऽपि विश्वसृष्ट्यादिलीलामावहन्नेवमुदारवीर्यः तस्मादन्यं मुमुक्षुः कमाश्रयेदित्युत्तरेण सम्बन्धः ॥ १० ॥

किञ्च । यन्नामेति यस्य नाम श्रुतं गुर्वादितः अकस्माद्वा आर्तो वा सन् प्रलम्भनात्परिहासाद्वा पतितो महापातक्यपि यदि कीर्त्तयेत्तर्हि अशेषमंहो हन्ति तत्रापि सपद्येव न च केवलमात्मन एवांहो हन्ति किन्तु नृणां स्वकीयानामन्येषामपि तस्माच्छेषादन्यं मुमुक्षुः कमाश्रयेत् स्वयं भगवतः उपासनायाः परमपुरुषार्थत्वे का कथा यदंशः सङ्कर्षणो यदंशः शेषस्तन्नामोच्चारणमात्रेणापि पतितोऽपि कृतार्थो भवतीति फलितोऽर्थः ॥ ११ ॥ १२ ॥

भाषा टीका ।

उत्पत्तिस्थिति के हेतु जो सत्त्वादिक प्रकृति के गुण जिन आप के देखने से समर्थ भये हैं जिन आप का रूप ध्रुव है विना बना है जो पहिले एकही रहा है अपने स्वरूप में जिनने नाना कार्य को धारण किया है तिनके मार्ग को कोई कैसे जान सकता है ॥ ९ ॥

आपने हमलोगों पर कृपा कर के शुद्धसत्त्वमय मूर्त्ति को धारण किया है जिसमें यह स्थूल सूक्ष्म जगत् प्रकाशित होता है अपने जनों के मन को वशकरने को जिन आपकी लीला को उदार वीर्य वाले सिंहने सीखा है ॥ १० ॥

दुःखी पुरुष जिन आप के नाम को सुनकर अकस्मात् यदि कीर्तन करै गिरपड़नेपर करै अथवा वन्दना से करै तब वह नाम मनुष्यों के सब पापों को नाश करता है तिन शेषजी से और कौन के शरण में मुमुक्षु प्राप्त होवैगा ॥ ११ ॥

हजार मस्तक वाले जिन भगवान् के मस्तक में पर्वत नदी समुद्र सब जीवों सहित सब भूगोल अणु सरीका रहता है अनन्त होने से जिनकी महिमा नहीं जानी जाती है ऐसे विभु आपके वीर्य पराक्रमों को हजार जिह्वा वाला होने से भी कौन गिनती कर सकता है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दुरन्तं वीर्यं बलं यस्य उरवो गुणा अनुभावश्च यस्य स च स च रसाया भूमेर्मूले स्थितस्तिष्ठति आत्मतन्त्र आत्माधारः ॥ १३ ॥

उक्तस्य लोकविभागस्योपयोगं वदन्नुपसंहरति । एता ह्येवेह कामान्कामयमानैर्नृभिरुपगन्तव्या इत्यन्वयः ॥ १४ ॥

तस्य प्रपञ्चः । एतावत्यो विपाकगतयः फलभूता गतयस्ता व्याचख्ये व्याख्यातवानस्मि ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किमिदं भूमण्डलं कर्मवशाद्बिभर्तीत्यत्याह । एवमिति । एवं प्रभावः उक्तविधापरिच्छिन्नप्रभावः अत एवानन्तः अनन्तपदं पुष्कलप्रवृत्तिनिमित्ताभयं दुरन्तमपारं वीर्यं बलं यस्य उरवो गुणाश्चेषामनुभावः प्रभावो यस्य स भगवान् सङ्कर्षण आत्मतन्त्रः स्वतन्त्रः अकर्मवश्य एव लीलया स्थितयेऽवस्थानाय पालनायेति यावत् पृथ्वीं बिभर्ति ॥ १३ ॥

उक्तमुपसंहरति । एता इति । कामान् कामयमानैर्नृभिरुपगन्तव्याः प्राप्याः तत्तत्कर्मानुसारेणाश्रवेण सृष्टाः गतयः फलरूपा लोका इह ब्रह्माण्डे एता एवेतावत्य एव नान्या यथोपदेशं सम्प्रदायागतोपदेशमनतिक्रम्यानुवर्णिताः ॥ १४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमुक्तमुपसंहृत्य राज्ञः प्रश्नावसरप्रदानाय उक्ता गतयो नृभिर्धर्मैः प्राप्या इति पुनरुपसंहरति । एता इति । हे राजन् ! पुंसः संसारिणः प्रवृत्तिरूपस्य सकामस्य धर्मस्य विपाकगतयः फलरूपा गतयो नानाविधा विसदृशाः सुखदुःखतारतम्येन व्यवस्थिताः एतावत्य एव ताश्च यथाप्रश्नं व्याख्याताः वर्णिता मयेति शेषः ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शेषे त्वसम्भावितगुणकर्मकथनपूर्वकं स्तवनमुपसंहरति । एवमिति । दुरन्तवीर्य इत्यनेनानन्तनाम हरेरेव मुख्यं नान्यस्य "अतोऽनन्तेन लिङ्गमप्यनन्तः" इत्यादिसूत्रस्मृती प्रमाणमिति दर्शयति । स्वगुणानेवानुभवति भुङ्क्त इति कर्मणयणप्रत्ययः देहिदेहस्थितत्वेन दुःखानुभवस्यापि सम्भवात्कथं स्वगुणभोग इत्यत उक्तं आत्मतन्त्र इति भारस्य भर्तुः श्रमदर्शनादौपचारिकमिदं स्वातन्त्र्यं किं न स्यादित्यत उक्तं यो लीलयेति ॥ १३ ॥

परीक्षित्प्रश्नपरिहारार्थमुपसंहरति।एता हीति। गम्यन्त इति गतयो लोका उपगन्तव्या धर्मफलत्वेन यथा कर्मनिर्मितास्तारतम्येनेति शेषः एवशब्देन निषिद्धकर्मप्राप्यस्थानमन्तरेणान्यव्यवच्छेदः क्रियते हिशब्दः प्रमाणप्रसिद्धिं वक्ति मुक्तिगतेरन्यस्याः विद्यमानत्वात् कथमेतावत्य इतीयत्तेति तत्राह । कामानिति । मुक्तेरपीच्छाविषयत्वादित्यतः सामान्येनोक्तं विशिनष्टि । प्रवृत्तिलक्षणस्येति । उच्चावचानां सालक्षण्यं नास्तीत्याशयेनोक्तं विसदृशा इति यथाप्रश्नं व्याख्याताः इत्यनेनान्योऽपि वक्तव्यांशोऽस्तीति ज्ञायते तत्र वक्तव्यांशा बहवः सन्ति तेषु किं वक्तव्यं तदाख्याहि तस्यापि परिहारं कथयाम इत्याशयेनाह । किमन्यदिति ॥ १४—१५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
त्रयोविंशोऽध्यायः ॥ २३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य
पञ्चविंशोऽध्यायः ॥ २५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दुःशब्दो नञर्थः ॥ १३ ॥
कामान् कामयमानैर्नृभिः ॥ १४ ॥ १५ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
पञ्चमे पञ्चविंशोऽयं सङ्गतः सङ्गतः सताम् ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

दुरन्तमनन्तं वीर्यं बलं यस्य उरवो गुणाः अनुभावाश्च यस्य सच सच रसाया भूमेर्मूर्ध्नि आत्मतन्त्रः स्वाधीनः सन् इमां बिभर्ति ॥ १३ ॥

उक्तलोकविभागमीश्वरकृतं सोपयोगं सम्प्रदायतो मयोक्तमित्याह। एता इति । एताः गतयः विनिर्मिताः कर्मणेति शेषः कामान् कामयमानैर्नृभिर्यथाकर्म उपगन्तव्याः यथोपदेशं मया चानुवर्णिताः नतु स्वबुद्धिमात्रेण ॥ १४ ॥

लोकविभागमुपसंहरति । एतावती एतावत्यः पुंसः प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतयः फलभूमयः सन्ति याः व्याचख्ये व्याख्यातवानस्मि ॥ १५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चविंशाध्यायार्थप्रकाशः ॥ २५ ॥

भाषा टीका

ऐसे प्रभाव वाले अनन्त पराक्रम वाले बड़े प्रभाव वाले अनन्त भगवान् स्वतन्त्र होकर रसातल के नीचे स्थित हैं जो कि अनायास से जगत्के पालन के वास्ते पृथिवी को धारण करते हैं ॥ १३ ॥

इतनी ही कर्मों के अनुसार निर्मितमनुष्यों के जाने की गति हैं जो सकाम करने वालों को प्राप्त होती हैं सो मैंने जैसी सुनी हैं तैसी वर्णन करदी हैं ॥ १४ ॥

हे राजन् ! पुरुषके प्रवृत्ति मार्ग वाले धर्मके परिपाककी ऊंच नीच अनेक प्रकार की इतनी ही गति हैं सो कहिदीनी हैं अब और क्या कहैं जो पूछोगे सो सब कहेंगे ॥ १५ ॥

इति श्रीमद्भागवत पञ्चमस्कन्ध पचीसमे अध्यायका
भाषानुवाद लक्ष्मणाचार्यकृत
समाप्त ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे पञ्चविंशोऽध्यायः समाप्तः ॥ २५ ॥

———○:०:○———

॥ षड्विंशोऽध्यायः ॥

——:०:——

॥ राजोवाच ॥

महर्ष एतद्वैचित्र्यं लोकस्य कथमिति ॥ १ ॥

॥ ऋषिरुवाच ॥

(१)त्रिगुणत्वात् कर्तुः श्रद्धया कर्मगतयः पृथग्विधाः सर्वा एव सर्वस्य तारतम्येन भवन्ति ॥ २ ॥

(२)अथेदानीं प्रतिषिद्धलक्षणस्याधर्मस्य तथैव कर्तुः श्रद्धाया वैसादृश्यात् कर्मफलं विसदृशं भवति या ह्यनाद्यविद्यया कृतकामानां तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्तास्तासां (३) प्राचुर्येणानुवर्णयिष्यामः ॥ ३ ॥

॥ राजोवाच ॥

नरका नाम भगवन् ! किं देशविशेषा अथवा बहिस्त्रिलोक्या आहोस्विदन्तराल इति ॥ ४ ॥

॥ ऋषिरुवाच ॥

अन्तराल एव त्रिजगत्यास्तु दिशि दक्षिणस्यामधस्ताद्भूमेरुपरिष्टाच्च जलाद्यस्यामग्निष्वात्तादयः पितृगणा दिशि स्वानां गोत्राणां परमेण समाधिना सत्या एवाशिष आशासाना निवसन्ति ॥ ५ ॥

यत्र ह वाव भगवान् पितृराजो वैवस्वतः स्वविषयं प्रापितेषु स्वपुरुषैर्जन्तुषु सम्परेतेषु यथाकर्मावद्यं दोषमेवानुल्लङ्घितभगवच्छासनः सगणो दमं धारयति ॥ ६ ॥

तत्र हैके नरकानेकविंशतिं गणयन्ति अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः तामिस्रोऽन्धतामिस्रो रौरवो महारौरवः कुम्भीपाकः कालसूत्रमसिपत्रवनं सूकरमुखमन्धकूपः कृमिभोजनः संदंशस्तप्तसूर्मिर्वज्रकण्टकशाल्मली वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति किञ्च क्षारकर्दमो रक्षोगणभोजनः शूलप्रोतो दन्दशूकोऽवटनिरोधनः पर्यावर्तनः सूचीमुखमित्यष्टाविंशतिर्नरका विविधयातनाभूमयः ॥ ७ ॥

तत्र यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते अनशनानुदपानदण्डताडनसन्तर्जनादिभिर्यातनाभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादित एकदैव मूर्च्छामुपयाति तामिस्रप्राये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षड्विंशे तु ततोऽधस्तान्नरकस्थितिरुच्यते ।
पापिनो यत्र दह्यन्ते यमदूतैर्यथायथम् ॥ १ ॥

पुंसो गतय उच्चावचा विसदृशा इति भोगवैचित्र्यमुक्तं तदेतत्कुत इति पृच्छति । महर्ष इति ॥ १ ॥

कर्मणः समानत्वेऽपि श्रद्धावैचित्र्यात्फलवैचित्र्यमिति परिहरति । त्रिगुणत्वादिति । सात्त्विकया श्रद्धया कर्तुः सुखित्वं राजस्या सुखित्वं दुःखित्वं च तामस्या दुःखित्वं मूढत्वं च । तत्रापि तासां श्रद्धानां तारतम्यात्सुखादितारतम्यं सर्वेषामित्यर्थः ॥ २ ॥

प्रतिषिद्धं प्रतिषेधः स एव लक्षणं प्रमाणं यस्याधर्मस्य कर्तुः श्रद्धावैसादृश्यं तमसस्तारतम्यात् तत्रापि कारणं

(१) बहुगुणत्वात इतिश्रीविज० । (२) अथेदानीमिति श्रीवीर० । (३) तास्ताः इतिश्रीवीरराः० श्रीविज० पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

दर्शयन्नाह । अनाद्यविद्याकृतानां कामानां याः सृतयो नरकास्तासां ताः । अथेदानीं ताः प्राचुर्येणानुवर्णयिष्यामः इत्यन्वयः ॥ ३ ॥

किं भूमावेव देशविशेषाः त्रिलोक्या ब्रह्माण्डाद्बहिर्वा आवरणेषु मध्येऽन्तराले वा भूमिव्यतिरिक्ते ॥ ४ ॥ ५ ॥

कर्मशेषमनतिक्रम्य शेषमेव दमं पापफलं दण्डं करोति न उल्लङ्घितं भगवच्छासनं येन ॥ ६ ॥

मतान्तरेणाष्टाविंशतिमाह । किंत्विति ॥ ७ ॥

पापभेदेन च तत्तन्नरकयातनाभेदं प्रपञ्चयति । तत्र यस्त्वित्यादिना । यात्यमानः पीड्यमानः । एकदैव तदैव ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रवृत्तिलक्षणस्य धर्मस्य विपाकगतय इत्यनेनासां पुण्येन प्राप्यत्वोक्तेः केवलापुण्यगम्या अन्ये लोकाः सन्ति नरका इति सूचितं तानेव पिपृच्छिषुस्तावदुक्तमेष्वपि लोकेषु सुखदुःखयोर्न्यूनाधिकभावलक्षणं वैचित्र्यमुच्चावचा विसदृशा इति तत्र कारणं पृच्छति राजा । महर्ष इति । हे महर्षे ! त्वया यद्वैचित्र्यं सुखदुःखयोर्न्यूनाधिकभावलक्षणमेषु लोकेषु जीवलोकस्य व्यवस्थितमुक्तं तद्वैचित्र्यं कथमुपपद्यते को वा तत्र वैचित्र्ये हेतुरेकरूपेणानुष्ठितेन प्रवृत्त्याख्येन धर्मेण भूरादिलोकान् प्राप्तेषु केषाञ्चित्सुखमेव केषाञ्चिद्दुःखमेवान्येषां तु मिश्रमित्येतद्वैचित्र्ये किं कारणमिति प्रश्नाशयः ॥ १ ॥

सर्वेषां भूरादिलोकप्रापकधर्मस्य समानत्वेऽपि कर्तृवैचित्र्याच्छ्रद्धावैचित्र्याच्च सुखादिफलवैचित्र्यमित्युत्तरमाह । त्रिगुणत्वादिति । कर्तुर्जीवस्य त्रिगुणत्वात्सत्त्वादिगुणत्रययुक्तत्वाच्छ्रद्धया सत्त्वादिगुणभेदभिन्नया त्रिविधया श्रद्धया कर्मणां गतयः फलानि पृथग्विधाः सर्वाः श्रद्धादितारतम्यनिमित्ततारतम्येनैव भवन्ति अत्रेदमवगन्तव्यम् ।

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ॥

इत्युक्तरीत्या सर्वेषां गुणत्रययोगाद्गुणानां ह्रासोल्लासादिरूपेण परिणामेनाविशिष्टे सति प्राचीनकर्मवासनानुगुणगुणत्रयपरिणामवशात् सात्त्विकादिभेदेन धर्मस्य कर्तारो बुद्धयः श्रद्धाः तन्निमित्तानि कर्माणि च त्रिधा भिद्यन्ते तथा च गीतं भगवता ।

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ॥
रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥
प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ ! सात्त्विकी ॥
यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ ! राजसी ॥
अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ ! तामसी ॥
त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥

इत्यारभ्य ।

यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥

इति श्रद्धायास्त्रैविध्यमुक्तं सात्त्विकाः सात्त्विकया श्रद्धया युक्ताः

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥
यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥
अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥

इति एवं स्थिते यः सात्त्विकः कर्ता सात्त्विकाभ्यां बुद्धिश्रद्धाभ्यां धर्माननुतिष्ठति सोऽनन्तसुखं मोक्षाख्यं तारतम्यरहितं प्राप्नोति यश्च राजसो राजसीभ्यां बुद्धिश्रद्धाभ्यां धर्माननुतिष्ठति स भूरादिलोकाननुप्राप्य परिमितसुखं प्राप्नोति तत्रापि श्रद्धातारतम्यकृतं सुखतारतम्यमेव भवति यस्तु तामसः इमान् लोकान् प्राप्यापि केवलं दुःखमेव प्राप्नोति भूरादिलोकप्रापकः प्रवृत्त्याख्यो धर्मस्तु राजसतामसयोः कर्त्रोः समानो भवतीति ॥ २ ॥

एवं धर्मस्य कर्त्रादितारतम्यमधर्मदृष्टान्तेनाह । यथेति । यथा धर्मस्य श्रद्धादितारतम्यनिमित्तं सुखरूपफलतारतम्यं तथा प्रतिषिद्धलक्षणस्य प्रतिषिद्धरूपस्याधर्मस्य कर्तुः श्रद्धायाः अधर्मनिमित्तभूतायाः केवलतामस्याः श्रद्धायाः वैसादृश्यात्तारतम्यात्कर्मफलं दुःखरूपं विसदृशं तरतमं भवति श्रद्धावैसादृश्ये कारणं वदन्कर्मफलवैसादृश्यमेवोपपादयति । अनाद्यविद्येति । अविद्या कामशब्दः फलकामनापरः कर्मशब्दः तद्वासनापरः फलकामनायाः अज्ञानफलत्वात् । यद्वा । रागादिरविद्या तत्प्रयुक्तानि यानि कामकर्माणि फलकामनापूर्वकमनुष्ठितानि पापानि वासनारूपेणावस्थितानि तेषां वैसादृश्यादित्यनुषङ्गः तेषां नानात्वेनावस्थितत्वाच्छ्रद्धावैसादृश्यं ततः सृतयो गतयः फलरूपाणि दुःखानीति यावत् तत्परिणामलक्षणाः अविद्याकामकर्मपरिपाकस्वरूपाः सहस्रशः आनन्त्येनावान्तरतारतम्येन च प्रवृत्ता मनुभाव्याः सन्तीत्यर्थः एवमुक्ते सति तद्वानन्त्येन प्रवृत्ताः सृतयस्तदनुभवस्थानानि च साकल्येन वर्णनीयानीति राज्ञः प्रश्नोद्योगमालोच्य केवलतमोगुणमूलकानाद्यज्ञानप्रयुक्तकामकर्मरूपाणां पापानामवान्तरभेदानानन्त्यात्तत्फलरूपाणां दुःखात्मनां गतीनामानन्त्यात्तदनुभवस्थानान्यपि बहूनि सन्तीति तेषां साकल्येन वर्णयितुमशक्यत्वात्तत्र प्रभूतदुःखरूपा गतीस्तत्स्थानानि च कानिचिद्वर्णयिष्यामीत्याह । तावताः प्राचुर्येणानुवर्णयिष्याम इति ॥ ३ ॥

एवमुक्ते राजा कार्त्स्न्येन तद्वर्णनप्रश्नं विहायाधर्मफलभूतदुःखानुभवस्थानानि नरकाः किं भूमेरेव देशविशेषा उत त्रिलोक्याः बहिर्वर्तन्ते उतान्तराले कयोश्चिल्लोकयोरन्तराले वर्तन्ते इति पृच्छति । नरका इति । हे भगवन् ! त्रिलोक्या बहिः ब्रह्माण्डाद्बहिरावरणेष्वेव ॥ ४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ब्रह्माण्ड एव वर्तन्त इत्याह। अन्तराल एवेति। त्रिजगत्या ब्रह्माण्डस्यैवान्तराल एव गर्भ एव तत्रापि कस्यां दिशि दक्षिणस्यां तत्रापि कुत्र भूमेरधस्तादण्डजलादुपरि वर्तन्त इत्यर्थः तां दक्षिणां दिशं विशिनष्टि। यस्यामित्यादिना गद्यद्वयेन। यस्यां दक्षिणस्यां दिश्यग्निष्वात्तादयः पितृणां गणाः परमेण समाधिना ध्यानयोगेन स्वानां गोत्राणां सत्या आशिष आशासानाः कुर्वाणाः एव पाकं पचतीनिवर्त्तिदेशः निवसन्ति ॥ ५ ॥

यत्र ह यस्यां हि दिशि पितृराजः पितृणामधिपतिः वैवस्वतो यमः सम्परेतेषु मृतेषु स्वपुरुषैर्दूतैः स्वविषयं स्वदेशं प्रापितेषु जन्तुषु जीवेषु अनुल्लङ्घनमनतिक्रान्तं भगवतो नारायणस्य शासनं येन तथाभूतः सन् सगणः स्वकीयदूतगणसहितः यथाकर्मावद्यं दोषमवद्यं जुगुप्सितं कर्मेव कर्मावद्यं बहुलप्रहणादिशेष्यस्य पूर्वनिपातः यथा कर्मावद्यमिति पदत्रयं वा अवद्यं वेदशास्त्रजुगुप्सितं कर्म प्रतिषिद्धं हिंसादिकर्म यथा जन्तुभिर्निबन्धादिना यथा कृतं तदनुसारेणैव दोषं प्रति दमं दण्डं धारयति कारयति जुगुप्सितकर्मरूपदोषानुसारेणैव दण्डयतीत्यर्थः ॥ ६ ॥

तत्र नरकाः कतीत्यपेक्षायामेके नरकानेकविंशतिं गणयन्तीत्याह। तत्रेति। के त इत्यपेक्षायां तान्नामरूपलक्षणैः क्रमेण गणयामीत्याह। हे राजन्! तान्नरकान्नामादिभिः तेऽनुक्रमिष्यामः तत्र नामानि वाचकाः शब्दा रूपाणि परस्परविलक्षणदुःखजनकस्वाकाराः लक्षणानि चिह्नानि तत्तत्कर्मादिकर्माणि यानि प्राणिनिर्बन्धादीनि तादृशनिर्बन्धादिरूपचिह्नानि एभिरनुक्रमिष्यामः एभिः सह क्रमेण तुभ्यं वर्णयिष्याम इत्यर्थः। तानेव क्रमेण गणनया दर्शयति। तामिस्र इत्यादिना अयःपानमित्यन्तेन गद्येन। तत्र वज्रकण्टकशाल्मलीति एको नरकः तथा अवीचिरित्येकः एवमेकविंशतिनरका भवन्ति केचिदित्यत्राऽरुचिबीजं तन्मते परेषां सद्भाव इति। पुनस्तानेव निर्दिशति। किञ्चेत्यादिना सूचीमुखमित्यन्तेन एते सप्तपूर्वोक्तैस्तामिस्रादिभिः सहाष्टाविंशतिर्भवन्ति एते नरका विविधयातनाभूमयः दुःखानुभवभूमयः ॥ ७ ॥

तानेकैकशस्तदनुभवनिमित्तानि पापानि च वर्णयति। यस्त्विहेत्यादिना यावदध्यायसमाप्ति। यो जन्तुरिह लोके परस्य वित्तादीन्यपहरति स हि यमदूतैरतिभयङ्करैः कालपाशेन, यमपाशेन बद्धो बलात्तामिस्राख्ये नरके निपात्यते तामिस्रं विशिनष्टि। तामिस्रप्राये तमःप्रचुरे यत्र तामिस्रे निपात्यमानः जन्तुरनशनापानजुष्टे प्रहारभर्त्सनादिभिर्यातनाभिः यात्यमानः पीड्यमानः कश्मलं दुःखमासादितः प्राप्त एकदैव मूर्च्छां प्राप्नोति तामिस्रप्राये इत्यनेनैषां तामिस्रादिनामानि योगरूढानीति ज्ञापितम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अतिबहुलदुःखभोगस्थानत्वेन नरकलोकस्य हेयत्ववर्णनेन संसारस्यापि हेयत्वेन वैराग्यस्य दार्ढ्यातिशयो जायत इति तन्निरूपयत्यस्मिन्नध्याये। तत्रादौ पूर्वोक्तार्थे प्रश्नमुत्थाप्य परिहृत्य वक्तव्यार्थं प्रतिजानीते। महर्ष इति। अयमर्थः लोकस्य स्वर्गादिपातालान्तस्य स्थानस्य विशेषास्तत्स्थस्य जनस्यैतत्प्रत्यक्षेण स्वद्रव्यानादागमेन च सिद्ध्यत् प्रत्यक्षवदेतदित्युच्यते वैचित्र्यं कस्यचित्सुखित्वं कस्यचिद्दुःखित्वं कस्यचिदुभयरूपत्वं कथं घटते सुखादिसामान्यानिशेषहेतुत्वं च सुखे दुःखे चाल्पमहत्त्वभेदेन तारतम्यं च कथमिति किञ्चैता गतयः सर्वाः सर्वेषां भवन्ति किञ्चैकैकस्यैकैका गतिरुतैकस्यानेका गतिरित्येतत्सर्वं परिहरति। त्रिगुणत्वादिति। अयमर्थः कर्तुः श्रद्धाया "एवमितः प्रेत्याभिसम्भवितास्मि" इति बुद्धिलक्षणाया त्रिगुणात्वाद्बुद्धिभेदात्तद्युक्तसत्त्वादिगुणवैचित्र्येण निर्मितत्वाल्लोकवैचित्र्यं यस्मात्सर्वाः कर्मगतयः सर्वस्य भवन्ति ॥ १—२ ॥

अथ तस्मात्कर्माज्ञाननिषिद्धस्याधर्मस्य तथैव कर्तुः श्रद्धायाः वैसादृश्यादिरूपस्वरूपत्वात्कर्मफलमपि विरुद्धं ततः किं तत्राह। यानीति। अनाद्यविद्यया विलसितकामानां प्राणिनां तत्परिणामलक्षणास्तेषामनाद्यविद्याकामानां परिपाकनिमित्तपापकर्मनिकारलक्षणा याः सृतयो गतयः सहस्रशः प्रवृत्तास्ताः प्राधान्येनानुवर्णयिष्याम इत्यन्वयः ॥ ३ ॥

पृष्टेनोत्तरं वाच्यमित्यतः पर्युपपृच्छति। नरका इति। किं केवलं देशविशेषाः उत महादुःखानुभवलक्षणाशब्दवाच्याः प्रथमे ते त्रैलोक्याद्बहिरन्तर्वा द्वितीये कस्यां दिशि किमधस्तात्किमुपरीति ॥ ४ ॥

परिहरति। अन्तराल इति। दुःखानुभवसद्भावेऽपि नरकशब्दवाच्याः किन्तु तदधिकरणदेशविशेषास्त्रैलोक्यान्तराले तत्रापि भारतवर्षाद्दक्षिणस्यामपि भूमेरधस्तादण्डजलाशयस्य गर्भोदकराशेरुपरिष्टाद्दक्षिणस्यां दिशि निस्सारणार्थमेतद्वचनम् ॥ ५ ॥

यथाकर्मनिर्मितपापमनुल्लङ्घनमनतिक्रान्तं भगवतो हरेः शासनमाज्ञा येन स तथा ॥ ६ ॥

तस्यां दिशि विद्यमानान्नरकानेकविंशतिं संख्याति। तत्र हेति। तत्र इत्यनेन सप्त प्रधानाः सन्तीति स्मृतिप्रसिद्धिं द्योतयति। तेनावता समाप्तिः किं तथापि सन्तीत्याह। किञ्चेति। तान्देशान्निर्दिशति। विविधयातनाभूमयः नानाविधदण्डस्थानविशिष्टाः "यातना तीव्रवेदना" इति वचनाद्दुःखाभिमतप्रदेशाः इत्यर्थः ॥ ७ ॥

तत्तन्नरकेषु तत्तत्कर्मनिमित्तदुःखविशेषानाह। तत्रेति। यात्यमानो दुःखानुभवो क्रियमाणः कश्मलं बहुदुःखं सङ्कटेन विशेषणात्कदाचिन्मूर्च्छां न यातीति विशेषो ज्ञायते यातनाभिः पर्यायेण पीड्यमानत्वादित्यर्थः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

असमानत्वे तावत् फलवैचित्र्यं भवत्येव समानत्वेऽपि तदित्याह। त्रिगुणत्वादिति ॥ १ ॥ २ ॥

प्रतिषिद्धलक्षणस्याधर्मस्य यः कर्ता तस्य तथैव पूर्वोक्तप्रकारेणैव श्रद्धा वैसादृश्यादधर्मलक्षणस्य कर्मणः फलं विसदृशं भवति। तत्र निषेधे प्रतीतावपि सत्यां प्रमादेन तत्करणात्तमसोऽल्पत्वं मोहेन मध्यमत्वं नास्तिकतायां तु पूर्णत्वं ज्ञेयम्। अनादि हेतोस्तत्परिणामलक्षणाः सृतयः सहस्रशः प्रवृत्ताः सन्ति ताः प्राचुर्येण तु वर्णयिष्यामः। कामादिकारणाणां सम्बन्धवस्ता इत्यपेक्षायामाह। अनादीति ॥ ३ ॥ ४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वानां गोत्राणामिति तत्तदभिमानादेव तत एव यत् किञ्चित्कृत्रिमं भवतीति सत्या एवाशिष इत्युक्तम् ॥ ५ ॥

दोषमेव दण्डरूपेण परिणमयतीत्यर्थः । अनुल्लङ्घितेति । भगवानत्र यथा तथा शासनञ्च बिभीषिकयापि जीवान् भगवदन्तर्मुखीकर्तुमिति ज्ञेयम् । यद्वा । भगवच्छासनशब्दे नात्र वेद एवोच्यते ॥ ६ ॥ ७ ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भुवोऽधस्ताज्जलादूर्ध्वं नरकस्थानमुच्यते ।
षड्विंशे यत्र दण्ड्यन्ते पापिनो यमकिङ्करैः ॥

पुंसो गतय उच्चावचा विसदृशा भोगवैचित्र्यमुक्तं तदेतत् कुत इति पृच्छति । महर्षे ! इति ॥ १ ॥

श्रद्धावैसादृश्यात् फलवैचित्र्यमाह । त्रिगुणत्वादिति । सात्त्विक्या श्रद्धया धर्म एव भवेत्तस्माच्च कर्तुः सुखमेव राजस्या धर्माधर्मौ ताभ्यां सुखदुःखे तामस्या अधर्म एव तस्माच्च दुःखमोहौ तत्रापि तासां श्रद्धानां तारतम्यात् सुखादितारतम्यं सर्वस्य सर्वा इति नहि कश्चित् सर्वदैव सात्त्विकश्रद्धावानेव तिष्ठति राजसतामसश्रद्धावानेव वा अतः कालभेदेन सर्वविधस्यैव जीवस्य सर्वविधा गतयः ॥ २ ॥

तत्र शास्त्रविहितस्य धर्मस्य फलभूतानि भौमदिव्यबिलस्वर्गसुखानि दर्शितान्यत एवाधर्मस्यापि फलभूतानि नरकदुःखान्यपि विवक्षितव्यानीत्यत आह । अथेति । प्रतिषिद्धं प्रतिषेधकत्वेन लक्षणा प्रमाणं यस्य तस्य तथैवेति । धर्मस्य कर्तुर्यथा तथैवाधर्मस्यापि कर्तुरित्यर्थः । श्रद्धाया वैसादृश्यादिति । श्रद्धावैसादृश्येऽपि तमस्तारतम्यमेव कारणं तथा हि प्रमादेनाधर्मकरणात्तमसोऽल्पत्वं ज्ञानेन मध्यमत्वं तथापि नास्तिकत्वेन पूर्णत्वं ज्ञेयं तमस्त्रैविध्यस्यापि कारणं दर्शयन्नाह । या इति । अनाद्यविद्यासम्बन्धो जीवस्य कदा कथं वेति वक्तुमशक्तेः अनादिर्या तमआदित्रैविध्यमयी अविद्या तया कृतानां जीवस्यान्तस्थत्वेनोपपादितानां कामानां वासनानां याः सृतयः कोटिशस्तेषां कामानां परिणामलक्षणाः तासां मध्ये प्राचुर्येण नरकानिति शेषः ॥ ३ ॥ ४ ॥

भूमेः सप्तपातालवत्या अधः जलादूर्ध्वं भावात् ॥ ५ ॥

स्वविषयं स्ववशं कर्मावद्यं कर्मदोषमनतिक्रम्य दोषं दोषरूपदमं दण्डं तादृश्या बिभीषिकयापि जीवान् भगवतोऽन्तर्मुखीकर्तुमिति भावः ॥ ६ ॥

तामिस्रादयः एकविंशतिर्नरकाः मतान्तरेण पूर्वैर्मिलिताना अष्टाविंशतिमाह । किञ्चेति ॥ ७ ॥

यात्यमानः पीड्यमानः तामिस्रप्रायेऽन्धकारबहुले ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

षड्विंशे नरकस्थितिनिर्णयेन धर्मस्य उच्चावचविसदृशविपाकगतय इत्युक्ते भोगवैचित्र्ये कारणं पृच्छति । महर्षे इति ॥ १ ॥

कर्तुर्जीवस्य त्रिगुणत्वात्त्रयो गुणा बन्धनभूताः यस्य स त्रिगुणस्तत्त्वं तस्मात्कर्तृश्रद्धया तत्तद्गुणानुरूपया हेतुभूतया कर्मगतयः सात्त्विकादिकर्मविपाकभूमयः पृथग्विधा बोध्याः ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥

इति श्रीमुखवचनात्तत्रापि गुणवृत्तितारतम्यात्सर्वा गतयः सर्वस्य कर्तुर्भवन्ति ॥ २ ॥

प्रतिषिद्धं प्रतिषेधः ब्राह्मणो न हन्तव्यः आचारादप्रमादितव्यमित्यादि तदेव लक्षणं ज्ञापकं यस्य तस्याधर्मस्य कर्तुः श्रद्धाया वैसादृश्यात्तमोवृत्तिभेदेन श्रद्धाया अपि अनेकविधत्वात् कर्मणोऽधर्मस्य फलं विसदृशं भवति तत्र अनाद्यज्ञानेन कृतानां सम्पादितानां कामानां रूपाणां याः सृतयस्तासां द्वितीयार्थे षष्ठी ताः अथेदानीं प्राचुर्येण प्राधान्येनानुवर्णयिष्याम इत्यन्वयः ॥ ३ ॥

नरकान् वर्णयितुं प्रवृत्तं मुनिं नरकाः कुत्र सन्तीति पृच्छति । नरका नामेति । भूमावेव देशविशेषाः त्रिलोक्याः ब्रह्माण्डाद्बहिर्वा अन्तराले ब्रह्माण्डमध्ये वा ॥ ४ ॥

अन्तराले त्रिजगत्या इति ब्रह्माण्डमध्ये इत्यर्थः अधस्ताद्भूमेः जलाद्गर्भोदात्तथाह भगवान् पराशरः

अतलं वितलं चैव नितलं च गभस्तिमत् ।
महाख्यं सुतलं चापि पातालञ्चापि सप्तमम् ॥
ततश्च नरका विप्र ! भुवोऽधः सलिलस्य च ।

इति तेभ्योऽप्यधस्तमस्ततो गर्भोदकं ततोऽण्डकटाह इत्याहुः ॥ ५ ॥

यथाकर्मावद्यं कर्मदोषमनतिक्रम्य दोषं यातनालक्षणं दमं दण्डं धारयति योजयति ॥ ६ ॥

मतान्तरेणाष्टाविंशतिर्नरका इत्याह । किञ्चेति । त्रिविधानां यातनानाम् "यातना तीव्रवेदना" इति कोशात्तीव्रवेदनानां भूमयः ॥ ७ ॥

यात्यमानः पीड्यमानः एकवैव तत्क्षणमेव ॥ ८ ॥

भाषा टीका

राजा परीक्षितजी बोले हे महर्षे यह विचित्रता लोक की कैसे होती है ॥ १ ॥

ऋषि शुकदेवजी बोले कर्ता तीन गुणों वाले होते हैं तिस से श्रद्धा के अनुसार कर्मों की गति अनेक प्रकार की होती है सबगती सबों को कमती बढ़ती से होती है ॥ २ ॥

और भी निषिद्ध धर्म करने वाले कोभी कर्ता की श्रद्धा के अनुसार भेद होने से कर्म का फल भी भिन्नही होता है जो कि अनादि काल के अज्ञान से सकाम पुरुषों को उन कर्मों के परिणाम रूप मार्ग हजारों प्रवृत्त हैं तिनमें जो प्रधान अधर्मों की गती हैं तिनको हम कहेंगे ॥ ३ ॥

राजा बोले हे भगवन् ! नरक नाम जो लोक सो किस देश में हैं क्या पृथिवी ही में कोई देश है अथवा तीनों लोकों के बाहिर हैं अथवा भीतरही हैं ॥ ४ ॥

ऋषि बोले त्रिलोकी के मध्यही में नरक हैं परन्तु दक्षिण दिशा में सप्त पाताल वाली भूमी के नीचे गर्भोद

एवमेवान्धतामिस्रे यस्तु वञ्चयित्वा पुरुषं दारादीनुपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति ॥ ९ ॥

यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुम्बमेवानुदिनं प्रपुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति ॥ १० ॥

ये त्विह यथैवामुना विहिंसिता जन्तवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव विहिंसन्ति तस्माद्रौरवमित्याहुः रुरुरिति सर्पादतिक्रूरसत्त्वस्यापदेशः ॥ ११ ॥

एवमेव महारौरवो यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहम्भरः ॥ १२ ॥

यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरन्धयति तमपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति ॥ १३ ॥

यस्त्विह पितृविप्रब्रह्मध्रुक् स कालसूत्रसंज्ञके नरके अयुतयोजनपरिमण्डले ताम्रमये तप्तखले उपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां च दह्यमानान्तर्बहिःशरीर आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति च यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि ॥ १४ ॥

यस्त्विह वै निजवेदपथादनापद्यपगतः पाखण्डं चोपगतस्तमसिपत्रवनं प्रवेश्य कशया प्रहरन्ति तत्र हासावितस्ततो धावमान उभयतो धारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदे पदे निपतति स्वधर्महा पाखण्डानुगतं फलं भुङ्क्ते ॥ १५ ॥

यस्त्विह वै राजा राजपुरुषो वा अदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान्नरकेऽमुत्र सूकरमुखे निपतति तत्रातिबलैर्विनिष्पिष्यमाणावयवो यथैवेहेक्षुखण्ड आर्तस्वरेण स्वनयन् क्वचिन्मूर्च्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः ॥ १६ ॥

भाषा टीका।

जल से ऊपर हैं जिन मे अग्निष्वात्तादिक पितृगण उस दिशा में हैं परम समाधि से भगवान् का ध्यान करते हैं अपने गोत्र वालों को सत्य आशीर्वाद देते हुये निवास करते हैं ॥ ५ ॥

जहां पर वैवस्वत भगवान् पितृराज मरनेपर अपने पुरुष जिन जन्तुओं को अपने पुरमे पहुचादेते हैं तिन को भगवान् की आज्ञा को उलंघन नहीं करके कर्म के अनुसार अपने गणों के सहित दण्ड देते हैं तहां पर कोई नरकों की एक बीस गिनती करते हैं ॥ ६ ॥

हे राजन्! अब उन सबों को आप से नाम रूप लक्षण से कथन करेंगे तामिस्र अन्धतामिस्र रौरव महारौरव कुम्भीपाक कालसूत्र असिपत्रवन सूकरमुख अन्धकूप कृमिभोजन सन्दंश तप्तसूर्मि वज्रकण्टकशाल्मली वैतरणी पूयोद प्राणरोध विशसन लालाभक्ष सारमेयादन अवीचि अयःपान क्षारकर्दम रक्षोगणभोजन शूलप्रोत दन्दशूक अवट निरोधन पर्यावर्तन सूचीमुख ए अठाईस (२८) नरक नाना प्रकार के दुःखों की भूमि हैं ॥ ७ ॥

तिस में जो दूसरे के धन स्त्री पुत्रों को हरता है तिसको काल पाश में बांधकर अति भयानक यमपुरुष लेजाते हैं तामस नरक में जबरदस्ती डारदेते हैं तर्जना करते हैं बड़ा यातना देते हैं उस पर वह जन्तु मोह को प्राप्त होकर तामिस्र में एक साथ ही मूर्छित होजाता है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

पुरुषं पतिं वञ्चयित्वा ॥ ९ ॥

एतच्छरीरमहमिति इदं धनादि ममेति मत्वा स्वं च कुटुम्बं च पुष्णाति तेनाशुभेन ॥ १० ॥

रुरवो भूत्वेति। कर्माण्येव तथा परिणामं प्राप्येत्यर्थः अतिक्रूरस्य भारङ्गाख्यस्य सत्त्वस्यापदेशः संज्ञा ॥ ११ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्रव्येण निमित्तेन मांसार्थमित्यर्थः ॥ १२ ॥

प्राणान: सजीवान् उपरन्धयति पचति अपकरुणां निष्कृपम ॥१३॥

खलं समे देशे ॥ १४ ॥

स्वधर्महा धर्मत्यागी ॥ १५ ॥

स्तनयन् रुदन्कश्मलं मोहमुपगतो भवति अदृष्टदोषास्तेनोपरुद्धाः सन्तो यथा कश्मलमुपगतास्तद्वत् ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिति । यथा तामिस्रे तद्दुःखानुभवः एवमन्धतामिस्रेऽपीत्यर्थः तदनुभवनिमित्तं पापमाह । यस्त्विति । यस्तु जन्तुः पुरुषं पतिं वञ्चयित्वा तद्दारादीनादिशब्दाद्वित्तापत्यादीनि च उपयुङ्क्ते स्वोपयुक्तान् कुरुते तस्यैवमेवेति पूर्वेणान्वयः तर्हि तामिस्रान्धतामिस्रे को विशेष इत्यपेक्षायां तामिस्रान्तं विशिनष्टि । यत्रेति । यत्रान्धतामिस्रे शरीरी देही विनिपात्यमानः यातनाभिस्तीव्राभिः पीड्यमानः तीव्रवेदनया नष्टा मतिर्यस्य नष्टा दृष्टिश्च यस्य तादृशो भवति वृश्च्यमानं छिद्यमानं मूलं यस्य तादृशो वनस्पतिर्यथा पततीति दृष्टान्तः अस्मात्कारणात्तमन्धतामिस्रमित्युपदिशन्तीत्यर्थः ॥ ९ ॥

रौरवानुभवनिमित्तं पापं तञ्च वर्णयति । यस्त्विह वावेति । यस्तु शरीरी इह लोके एतच्छरीरमहमेतदपत्यकलत्रादिकं ममेत्येवंरूपाभ्यामहङ्कारममकाराभ्यां केवलम्भूतद्रोहेणैव स्वकुटुम्बमेवानुदिनं प्रपुष्णाति स इह लोके तत्स्वकुटुम्बं विहाय स्वयमेक एव तेन पूर्वाचरितेनाशुभेन पापेन रौरवाख्ये नरके निपतति अमुना तेन निपातितेन पूर्वमिह लोके ये च जन्तवो यथा येन प्रकारेण विहिंसितास्त एव जन्तवः रुरवः रुरुसंज्ञका जन्तवो भूत्वा तेनैव प्रकारेण परत्र रौरवे नरके यातनामुपगतं तमेव विहिंसन्ति यतस्तत्र गतं रुरवो हिंसन्त्यतस्तं नरकं रौरवमित्याहुरित्यर्थः के ते रुरवः यत्र गतं हिंसन्ति इत्यत्राह । रुरुरिति । सर्पादप्यतिक्रूरस्य भूरिशृङ्गाख्यस्य सत्वस्य जन्तोः रुरुरिति व्यपदेशो व्यवहार इत्यर्थः ॥ १० ॥ ११ ॥

महारौरवमनुवर्णयति । एवमेवेति । यथा रौरवे निपतितं रुरवो हिंसन्ति तथा महारौरवेऽपीत्यर्थः प्रथमान्तपाठे रौरवसदृश एव महारौरव इत्यर्थः सादृश्यं च रुरुभिर्हिंसनेन इयांस्तु ततो विशेष इत्याह । यत्रेति । यत्र महारौरवे निपतितं पुरुषं देहिनं क्रव्यं निपतितस्य मांसमदन्तीति क्रव्यादास्तथाभूताः सन्तो रुरवः क्रव्येण निमित्तेन घातयन्ति निपातितपुरुषस्यापि मांसं भक्षयन्तीत्यर्थः तं क्रव्येणेति विभक्तिव्यत्यय आर्षः अन्यथा "आदिखाद्योर्न" इत्यणौ कर्तुरणौ कर्मत्वनिषेधात्तेनेति तृतीया क्रव्यमिति द्वितीया च स्यात् क्रव्येण निमित्तेन तं खादयन्तीत्यर्थस्त्वसङ्गतः स्यात् क्रव्यादा इत्यनेन पौनरुक्त्यात्तथा क्रव्यादाः क्रव्यादनस्वभावा अत एव क्रव्येण फलस्यैव हेतुत्वविवक्षया तृतीया क्रव्यार्थं तं खादयन्ति "निर्देर्निवृत्तप्रेषणात्" इति दंशनपरः खादयन्ति तं दशन्तीत्यर्थः अनेन पूर्वोक्तनिर्वाहः सूचितः अथ कुम्भीपाकं तदनुभवनिमित्तं पापं च वर्णयति । य इति । यः केवलं देहम्भरः शरीरपोषणमात्रपरः यश्चेह लोके उग्रः क्रूरः पशून् पक्षिणः प्राणतः सजीवान् उपरन्धयति पचति तमपकरुणं निष्कृपं पुरुषादैः राक्षसैरपि विगर्हितममुत्र कुम्भीपाके नरके यमानुचरास्तप्ततैले उपरन्धयन्ति पचन्ति तत्र तैलकुम्भ्यां पच्यन्ते यत्र स कुम्भीपाक इत्यवयवार्थो विवक्षितः ॥ १२ ॥ १३ ॥

अथ कालसूत्रस्थनरकानुभवनिमित्तं दुरितं तञ्च वर्णयति । यस्त्विह वा इति । पितृहन्ता ब्रह्मघ्नश्च स कालसूत्राख्ये नरके अयुतं योजनानि परितो मण्डलं यस्य तस्मिंस्ताम्रविकारे खले खलमसदेशे खलो नाम धान्यानि वितुषीकर्तुं कृतः कृत्रिमो भूमिविशेषः उपर्यधस्तादग्न्यर्काभ्यामधस्ताद्वह्निना उपर्यर्केण चाभितप्यमानेऽभिनिवेशितः परितः पातितः क्षुत्पिपासाभ्यामन्तर्बहिश्च दह्यमानं शरीरं यस्य सः दह्यमानशब्दस्य पूर्वनिपातः । यद्वा । शरीराद्बहिः शरीरं "अपपरिबहिरञ्चवः पञ्चम्या" इति समासे बहिःशब्दस्य उपसर्जनत्वात्पूर्वनिपातः अत एव समासविधानाज्ज्ञापकादन्तर्बहिःशब्दयोः सम्बन्धसामान्ये पञ्चमी भवति शरीरसम्बन्धिबहिःप्रदेश इत्यर्थः अन्तःशब्देन सन्निधानात् शरीरान्तःप्रदेश एव उच्यते दह्यमानमन्तःशरीरान्तःप्रदेशः बहिःशरीरं च यस्येत्यर्थः एवम्भूतः ताम्रमये फलके उपवेश्यमानो याचनादि करोति याच्ञा चात्र हा हतोऽहं मां त्रायस्वेति प्रार्थना एवं यावन्ति पशोः रोमाणि तावत्सङ्ख्यानि वर्षाणां सहस्राणि तत्रास्ते इत्यर्थः एवं भूयान् दुःखानुभवः कालः सूच्यते ज्ञायते यस्मिन् स कालसूत्र इत्यवयवार्थोऽत्राभिप्रेतः ॥ १४ ॥

एवं कालसूत्रमभिधायासिपत्रवनं नरकं तत्प्राप्तिनिमित्तं च वर्णयति । यस्त्विह वा इति । यस्तु देही निजवेदपथात्स्वधर्माश्रमोचिताद्वेदविहिताद्धर्मादनापद्यपगतः अतिक्रान्तः आपदत्र देशकालवैपरीत्यप्रयुक्ता रोगादिनिमित्ता शक्तिः अनापद्यपगत इत्यनेनापदि स्वधर्मत्यागो न दोषावह इति सूचितं पाषण्डमनैर्वैदिकमन्मार्गं च केवलं स्वमनीषया कल्पितमत एव कुपथं कुत्सितं मार्गमाभासधर्ममुपगतस्तं देहिनमसिपत्रवनाख्यं नरकं प्रवेश्य प्रविष्टं कृत्वा कशया प्रहरन्ति यमभटा इति शेषः कशा हि नामाश्वादीनां ताडयितुं निर्मितो दण्डाकारो रज्जुविशेषः एवं कशया ताडितः तत्रासिपत्रवने आसमाद्धि इतस्ततो धावमानः तीव्रदण्डमसहमानो द्रुततरं गच्छति उभयतो धारैः पार्श्वद्वयेऽपि धारायुक्तैः खड्गस्य त्वेकस्मिन्नेव पार्श्वे धारा एभिस्तूभयतोधारैरित्यर्थः तालवनस्यासिपत्रैः खड्गसदृशैः छिद्यमानानि सर्वाण्यङ्गानि यस्य तादृशः हाहाकारपूर्वकं हतोऽस्मीति वदन् परमया तीव्रया वेदनया पदे पदे मूर्च्छां प्राप्नोति पतति एवं स्वधर्महा स्वधर्मत्यागी पाषण्डानुगतं पाषण्डधर्माभासानुगुणं फलं दुःखमनुभवति असिसदृशानि पत्राणि येषां वृक्षाणां वनमसिपत्रवनमित्यवयवार्थः ॥ १५ ॥

अथ सूकरमुखाख्यनरकं तत्प्राप्तिनिमित्तं पापं चानुवर्णयति । यस्त्विहेति । इह लोके राजा वा राजपुरुषो वा कश्चिददण्ड्यं दण्डनानर्हं दण्डं दण्डनं प्रणयति कारयति दण्ड्योऽपि ब्राह्मणो शरीरदण्डं वा कारयति ।

वपनं द्रविणादानं स्थानान्निर्यापणं तथा ।

एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ।

इत्युक्तरीत्या दण्ड्योऽपि ब्राह्मणो देहदण्डानर्हो यः शरीरं दण्डं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

(?)रयतीत्यर्थः स पापीयान् सूकरमुखे नरके निपतति तत्र नरके सूकरस्येव मुखं येषां तैर्जन्तुभिः नितरां पीड्यमाना अवयवा यस्य तादृशः यथा इमेन गजेनेक्षुदण्डः पीड्यते तद्वदार्तस्वरेण स्वनयन् रुदन्मूर्च्छितः कश्मलं मोहमुपगतो भवति यथा पूर्वमिहादृष्टदोषा दोषरहितास्तेन उपरुद्धाः पीडिताः सन्तः कश्मलमुपगतास्तद्वदित्यर्थः अवयवार्थस्तु सुव्यक्तः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दृश्यमानमूलच्छिद्यमानशिफः यस्मात्पतति तस्मादन्ध-तामिस्रमन्धत्वापादकान्धकारयुतमित्यर्थत्वानुपदिशन्ति मूर्च्छया बुद्धिनाशात्तामिस्रे अन्धतामिस्रे तु चाक्षुषज्ञानस्य सर्वात्मना नाशादुभयोः सामान्यविशेषसद्भावाद्विशेषः ॥ ९ ॥

एतच्छरीरमहमिदं क्षितिमण्डलं ममेति भ्रान्त्या तुवै महा-रौरवस्यद्योतकौ इतिशब्दौ प्रत्येक रौरवप्राप्तिनिमित्तं भवत इति द्योतयतः ॥ १० ॥

प्रकारान्तरेण रौरवं निर्वक्ति । ये त्विति । एवं द्वयं कर्मम्नरव्या-वर्तकं रुरवः मृगाः किंलक्षणाः । रुरुरिति । रुरुरित्यपदेशो व्यपदेशः "मृगा नानाविषमुखा रुरवः परिकीर्तिताः" इत्यभिधानम् ॥ ११॥

रौरवाद्विशेषमाह । यत्रेति । देहम्भरस्तथा पततीति शेषः ॥ १२॥

उपरुन्धयन्ति अशक्यश्वासमोक्षं यथा भवति तथोपरोधं कारयन्तीत्यर्थः ॥ १३ ॥

• अधस्तादग्निरुपर्यर्कः खले धान्यादिशोषणस्थलस्थानीये न केवलं पित्रादिभुक् चतुष्पाद्धिंसकोऽप्येवमित्याह । यास्त्वितीति ॥१४॥

असिपत्रेति विशेषणादापदि कश्चनानुग्रहं सूचयति "धारा-ग्रेऽम्बुसन्तत्यां सैन्याग्रेऽश्वगतिष्वपि" इत्यभिधानात् धाराशब्देन निशितप्रान्तभाग उच्यते तालवनस्य तालसमूहस्यासिवत्तीक्ष्ण-तधारपत्रैः स्वधर्मः स्ववर्णादिविहितः ॥ १५ ॥

अदण्ड्ये दण्डनायोग्ये शरीरदण्डस्ताडनादिरुपरुद्धः कारा-गृहे शृङ्खलायां वा निवेशितः इष्टो दोषश्चौर्यादिलक्षणो यस्य स तथा स दण्ड्यते यथा तथेति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवमिति । यस्तु तस्यैवमेव भवतीत्यर्थः ॥ ९ ॥ १० ॥

ये त्विति । त एव तद्धिंसाजातकर्माधयेवेत्यर्थः रुरुशब्दस्य स्वयं श्रीशुकेन टीकाविधानाल्लोकेऽप्रसिद्धोऽयं जन्तुविशेष इति सूच्यते ॥ ११—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पुरुषं पतिम् ॥ ९ ॥

एतच्छरीरमहमिति इदं धनादिकं ममेति मत्वा भूतद्रोहेणेति भूतद्रोहं विना तु केवलाहंममकाराभ्यां न रौरवे निपततीति बुध्यते ॥ १० ॥

रुरवो भूत्वेति कर्माणयेव तथा परिणामं प्राप्येत्यर्थः अतिक्रूरस्य भारशृङ्गाख्यसत्त्वस्य सपदेशः संज्ञेति श्रीस्वामिचरणाः रुरुशब्दस्य स्वयं मुनिनैव टीकाविधानाल्लोकेऽप्रसिद्ध एवायमिति सन्दर्भः ॥ ११ ॥

क्रव्यादा निमित्तेन मांसार्थमित्यर्थः केवलमिति भूतद्रोह-योगीति शेषः ॥ १२ ॥

प्राणान् उपरुन्धयन्ति सप्राणान् पचतीत्यर्थः ॥ १३ ॥

खले समे देशे ॥ १४ ॥ १५ ॥

स्वनयन् रुदन्नदृष्टदोषा निर्दोषा उपरुद्धा दण्डिताः ॥१६॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुरुषं दारादिस्वामिनम् ॥ ९ ॥

इह कर्मभूमौ एतच्छरीरमहमिति इदं कुटुम्बादिकं ममेति मोहेन स्वेन देहेन सहितं कुटुम्बमेव केवलं प्रपुष्णाति स तदुभयमिहैव विहाय तेनाशुभेन ॥ १० ॥

ते एव रुरवो भूत्वेति रुरवः यातनानिमित्तानि सर्पा-दतिक्रूरसत्त्वानि भूत्वेत्यर्थः अतिक्रूरस्यातिभयङ्करस्य सत्त्वस्य सपदेशः संज्ञा ॥ ११ ॥

यत्र महारौरवे क्रव्यादा मांसेन निमित्तेन ॥ १२-१३ ॥

खले समस्थाने ॥ १४ ॥

स्वधर्महा निजधर्मत्यागी ॥ १५ ॥

स्वनयन् रुदन् यथा तेनोपरुद्धाः कश्मलमुपगतास्तद्वत् ॥ १६ ॥

भाषा टीका ।

इसी प्रकारजो अपने मालिक से छिपाकर उस की स्त्री आदि को भोगता है सो अन्धतामिस्र नरक में डाला जाता है जिसमें डाला हुआ शरीरधारी जीव कष्ट के मारे होश को भूलजाता है उस की दृष्टि मारीजाती है जैसे कि जड़ के कटने से पेड़ होता है तैसा दुःखित होजाता है तिसी से उस नरक को अंधतामिस्र कहते हैं ॥ ९ ॥

जो मनुष्य इस संसार में यह चीज मेरी है मैं इसका मालिक हूँ ऐसी बुद्धि से प्राणियों का द्रोह करके केवल अपने कुटुम्ब को प्रति दिन पालता है सो उन चीजों को यहां पर छोड़कर उसी पापसे आपही रौरव में गिरता है ॥ १० ॥

जिस मनुष्यने यहां पर कोटि जंतु मारे हैं वे जंतु उसके मरे पीछे यमयातना में जाने पर तिसी हेतु से रुरु होकर तिसी प्रकारसे उसी पुरुष को मारते हैं तिस हेतु से उस नरक को रौरव कहते हैं रुरुनाम से सर्पसे भी बड़ा क्रूर जंतु का व्यवहार होता है ॥ ११ ॥

इसी प्रकार महा रौरव है जो केवल देह मात्र का पोषक है तिसको उहां डालते हैं जहां गिरते पुरुष को क्रव्यादनामके जंतु मांस खाने के वास्ते उस को मारते हैं ॥ १२ ॥

जो पुरुष इहांपर बड़ा उग्र होकर पशु वा पक्षियों को प्राण से मारता है यह निर्दयी असुर भी उसकी निन्दा करते हैं उस को परलोक में यम के दूत कुम्भीपाक नरक में गर्म तेल में पकाते हैं ॥ १३ ॥

यस्त्विह वै भूतानामीश्वरोपकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपमशकयूकामत्कुणमक्षिकादिभिर्ये केचाभिद्रुग्धास्तैः सर्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः ॥ १७ ॥

यस्त्विह वा असंविभज्याश्नाति यत्किञ्चनोपनतमनिर्मितपञ्चयज्ञो वायससंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति तत्र शतसहस्रयोजने कृमिकुण्डे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनो यावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते ॥ १८ ॥

यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्नादीनि ब्राह्मणस्य वापहरत्यन्यस्य वानापदि पुरुषस्तममुत्र राजन् ! यमपुरुषा अयस्मयैरग्निपिण्डैः संदंशैस्त्वचि निष्कुषन्ति ॥ १९ ॥

यस्त्विह वा अगम्यां स्त्रियमगम्यं वा पुरुषं योषिदभिगच्छति तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति स्त्रियं च पुरुषरूपया सूर्म्या ॥ २० ॥

यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्तमानं वज्रकण्टकशाल्मलीमारोप्य निष्कर्षन्ति ॥ २१ ॥

ये त्विह वै राजन्या राजपुरुषा वा अपाखण्डा धर्मसेतून् भिन्दन्ति ते सम्परेत्य वैतरण्यां निपतन्ति भिन्नमर्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन कर्मपाकमनुस्मरन्तो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते ॥ २२ ॥

ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्यां चरन्ति ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णार्णवे निपतन्ति तदेवातिबीभत्सितमश्नन्ति ॥ २३ ॥

ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नन्ति तानपि संपरेताँल्लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यन्ति ॥ २४ ॥

भाषा टीका ।

जो पुरुष यहां पिता ब्राह्मण वेद इनोंका द्रोह करता है सो दशहजारयोजन कालसूत्र संज्ञक नरक मे डाला जाताहै उहां पर गरम करेहुये ताम्बेके खंड मे डाला जाता है ऊपर नीचे सूर्य अग्नि से तपायमान होता है फिर उसी मे डार देते हैं क्षुधा प्याससे बाहिर भीतर शरीर उस का जलता रहता है सोता है चलता है खड़ा होता है दौड़ता है जितने मारे हुये पशुओं के रोम हैं उतने हजार वर्ष तक उहां दुःख भोगता है ॥ १४ ॥

जो पुरुष यहांपर अपने वेदमार्ग से छूटकर पाखण्ड मतमें विना आफत के समय में भी प्रविष्ट होजाता है तिसको असिपत्र वनमे बैठाकर चाबुक से मारते हैं वहांपर वह इधर उधर दौड़ता है तब दोनों तरफ धारवाले तरवार सरीके तालों के वन हैं जिससे उसके सब अङ्ग कटते हैं तहां हायमरा ऐसा पुकारता है बडी पीड़ा से मूर्छित होकर पैंड पैंड मे गिरताहै अपने धर्म के नाश करने वाले पाखण्ड मतके फलको भोगता है ॥ १५ ॥

जो कोई राजा या राजपुरुष विना दंड के योग्य को दण्ड देता है अथवा ब्राह्मण को शरीर दण्ड देता है वह बड़ा पापी सूकरमुख नरक में गिरता है उहां पर दंड वलिष्ठों से उसके शरीर के सब अवयव पिसजाते हैं जैसे कि ऊंखका दंडा पेडने से होजाता है तब आर्त होकर चिल्लाता है कहीं मूर्छित होकर मोहको प्राप्त होकर रहता है जैसे कि विना दोष वाले पुरुष उसके दण्ड देने से मूर्छित होते थे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता विज्ञाता परव्यथा यैरविवेकिभिस्तेषां पुरुषस्य ब्राह्मणादिभावेन विधिनिषेधपूर्वकमुपकल्पिता वृत्तिर्यस्य विविक्ता परव्यथा येन विवेकिना अभिद्रुग्धा हिंसिताः विहता निद्रारूपा निर्वृतिर्यस्य न लब्धमवस्थानं येन स तमसि परिक्रामति ॥ १७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्किञ्चन भक्ष्यादिकमुपन्नं प्राप्तं तदसंविभज्य न निर्मिताः पञ्चयज्ञा येन अत एव वायसैः संस्तुतः समत्वेन वर्णितः कृमिभोजनः कृमीनेव भुञ्जानः यावन्तयावन्ति योजनानि तत्कृमिकुण्डं तावन्ति वर्षाणि यावत् तत्पातुकमित्यर्थः अप्रत्तमसंविभक्तमप्रहुतं प्राश्नोति तथा सः आत्मवैशसकृतप्रायश्चित्तम् ॥ १८ ॥

निष्कुषन्ति छिन्दन्ति ॥ १९ ॥

तिग्मया तप्तया सूर्म्या प्रतिमया ॥ २० ॥

सर्वाभिगमः पश्वाद्युपगन्ता ॥ २१ ॥

अपाखण्डाः मत्कुलीनाः सन्तः द्वितीयान्तपाठे सेतुविशेषाणां नदीं विशिनष्टि । विण्मूत्रेति ॥ २२ ॥

पशुचर्यां स्वेच्छाचारम् ॥ २३ ॥

अतीर्थे विहितादन्यत्र विध्यन्तीति प्राणनिरोधो दर्शितः ॥२४॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथान्धकूपं तत्प्राप्तिनिमित्तं पापं च वर्णयति । यस्त्विह वा इति । यस्तु देही इह लोके ईश्वरेणोपकल्पिता मनुष्यरक्तपानादिरूपा वृत्तिर्येषामविदिता परस्य व्यथा यैरविवेकिभिस्तेषाम-ज्ञातपरकृततदुःखानां वा भूतानां मत्कुणमशकादीनां व्यथामाचरति करोति कथम्भूतः स्वयं पुरुषोपकल्पितवृत्तिः परमेण परमपुरुषेण उपकल्पिता वर्णाश्रमादिविभागेन विधिनिषेधपूर्विका कल्पिता वृत्तिर्यस्य विविक्ता विविच्य ज्ञाता परस्य व्यथा येन विवेकी सन्नित्यर्थः स एवम्विधो भूतध्रुक् तदभिद्रोहेण भूतद्रोहेण निमित्तेनान्धकूपाख्ये नरके निपतति तत्रान्धकूपे हेति खेदेऽसौ पतितस्तैस्तैः पूर्वं हिंसितैर्जन्तुभिः कांश्चित्तान् दर्शयति । पश्विल्यादिना । तेषामानन्त्यात्सङ्कुल्याह । ये केचाभिद्रुग्धा हिंसितास्तैः सर्वैः पश्वादिरूपतामापन्नैः सर्वतोऽभिद्रुह्यमाणस्तैरेव विहता निद्रा निर्वृतिः निद्रासुखं यस्य तथा न लब्धमवस्थानं येन तथाभूतस्तमस्यन्धकारे परिभ्रमति । तत्र दृष्टान्तः यथेति कुशरीरे व्याध्याद्युपहते सञ्चारासमर्थे शरीरे जीवो यथाऽलब्धनिद्रः खिद्यति तथेत्यर्थः अन्धकारावृतकूपोऽन्धकूप इत्यन्वयार्थः ॥ १७ ॥

अथ कृमिभोजनं तदनुभवहेतुं पापं च वर्णयति । तु यस्त्विह वा असंविभज्येति यस्तु देही इह लोके यज्ञभागादिकं दैवादुपनतं प्राप्तमप्यन्नमसंविभज्यातिथिभ्योऽप्रदायेत्यर्थः अश्नाति स्वयं भुङ्क्ते यश्चानिर्मितपञ्चयज्ञः अननुष्ठितपञ्चमहायज्ञः स वायससंस्तुतः, वायसैः समत्वेन वर्णितः परत्र परलोके कृमिभोजनाख्ये नरकाधमे निपतति तत्र शतसहस्रयोजनपरिमिते कृमिकुण्डे स्वयमपि कृमिभूतः कृमिभिरेव भक्ष्यमाणः कृमिभोजनः कृमीनेव भुञ्जानः यावद्यावन्ति योजनानि कृमिकुण्डं तावन्ति वर्षाण्यात्मानं यातयते दुःखयति कथम्भूतं अप्रत्ताप्रहुतादः अप्रत्तं दत्तावशिष्टं प्रहुतं यज्ञावशिष्टं प्रत्तं च प्रहुतं च प्रत्तप्रहुते न प्रत्तप्रहुते अप्रत्ताहुते ते अत्तीति अप्रत्तप्रहुतादः एवम्भूतोऽहमित्यकृतनिर्वेशः परितापो येन तमात्मानम् ॥ १८ ॥

अथ संदंशाख्यं नरकं पापं च वर्णयति । यस्त्विह वै स्तेयेनेति । इह यो देही स्तेयेन चौर्येण वा अनापदि ब्राह्मणस्यान्यस्य वा हिरण्यरत्नादीन्यपहरति तं देहिनं परत्र संदंशाख्ये नरके हे राजन् ! यमभटाः अग्निवर्णैः सन्तापेनाग्निवर्णतामापन्नैरयस्मयैः लोहमयैः संदंशैः संदशन्त्येभिरिति संदंशाः तैश्छेदनसाधनैः शूलैः निष्कुषन्ति छिन्दन्ति संदंशैः संदशन्ति यत्रेति संदंश इत्यन्वयार्थः ॥ १९ ॥

अथ तप्तसूर्मिं तत्प्राप्तिहेतुं दुरितं चानुवर्णयति । यस्त्विह वा अगम्यामिति । यस्तु देही स्वयं पुरुषः सन्नगम्यामनुपेयां स्त्रियमभिगच्छति स्वयं योषित् स्त्री सती अगम्यमुपेतुमयोग्यं पुरुषं चोपगच्छति तं देहिनममुत्र सूर्म्याख्ये नरके कशया ताडयन्तः लोहमय्या तिग्मया तप्तया सूर्म्या स्थूणा सैव स्त्रीरूपेण पुरुषरूपेण चोत्कीर्णा तया सूर्म्या प्रतिमया पुरुषं पापिनमालिङ्गयन्ति स्त्रियं पापिनीं पुरुषरूपया सूर्म्यालिङ्गयन्ति तप्ता सूर्मिर्यस्मिन् स तप्तसूर्मिरित्यन्वयार्थः ॥ २० ॥

अथ वज्रकण्टकशाल्मलीमाह । यस्त्विह वै सर्वाभिगम इति । सर्वाभिगमः लोभादसंव्यसेवी पश्वाद्युपगन्तेति केचिदन्याचक्षते तं सर्वाभिगममिमुत्र निरयं वज्रकण्टकशाल्मलीसंज्ञके वर्तमानं पतितं वज्रमयानि कण्टकानि यस्य तं शाल्मलीं वृक्षमारोप्याग्रतो निष्कुषन्तीत्यर्थः वज्रकण्टकशाल्मलिर्यस्मिन् स इत्यन्वयार्थः ॥ २१ ॥

वैतरणीं वर्णयति । य इति । राजन्याः क्षत्रियास्तेषां पुरुषाः राजपुरुषा वापाखण्डान्वैदिकान् धर्मसेतून् धर्ममर्यादान् भिन्दन्ति नाशयन्ति कथम्भूताः भिन्नमर्यादा अतिक्रान्तधर्ममर्यादाः ते राजन्यादयः अस्यां वैतरण्यां नरकस्य परिखाभूतायां नद्यां यादसाङ्घ्रौ रितस्ततो भक्ष्यमाणा अपि आत्मना देहेन न वियुज्यमाना अत्यक्तदेहा इत्यर्थः तत्र हेतुः असुभिः प्राणैरुह्यमानाः कर्मणः कर्तृत्वविवक्षायां तृतीया-कृतप्राणा इत्यर्थः तत्रापि हेतुमाह । स्वाघेनेति स्वकीयदुरितेनेत्यर्थः स्वकीयदुरितेन कर्मपाकं स्वकीयपापकर्मफलमिदमित्येवं स्मरन्त उपतप्यन्ते क्लिश्यन्ति नदीं विशिनष्टि । विण्मूत्रेति । पूयं दुर्गन्धिविण्मूत्ररूपं पूयं विड्वादीनां वाहिन्यां विडादीनां वाहः प्रवाहः सोऽस्या अस्तीति तथा तस्यां वा नदीरूप एवायं नरक इत्यन्वयार्थोऽभिप्रायः ॥ २२ ॥

अथ पूयोदमनुवर्णयति । ये त्विहेति । ये देहिनो इह वृषलीपतयः ब्राह्मणादयः सन्तः शूद्रायाः पतयो नष्टाः त्यक्ताः शौचादयो यैस्ते तत्र शौचं स्नानपर्यन्तं सत्कर्म आचारः सन्ध्योपासनादिनियमः भक्ष्याभक्ष्यादिनियमः अत एव त्यक्ता लज्जा यैस्ते पशुचर्यां स्वेच्छाचारं कुर्वन्ति पाकं पचन्तीतिवाभिदेशः तेऽपि प्रेत्य मृत्वा विडादिभिः पूर्णे अर्णवप्रस्तरे ह्रदे निपतन्ति तदेव विडादिकमेवातिहेयमश्नन्त्यदन्ति पूयमुदमुदकं यस्मिन्नित्यन्वयार्थः ॥ २३ ॥

अथ प्राणनिरोधं सपापं वर्णयति । ये त्विह वै श्वगर्दभपतय इति । शुनां गर्दभानां च पतयः पालकाः ब्राह्मणा मृगयेन विहारो येषां तेऽतीर्थे मृगान्निघ्नन्ति अतीर्थेषु लोकरक्षणार्थेत्वाभावात्प्राणिवधो दोषावहस्तीर्थे तु प्राणिवधः आगाय कृतो दुष्प्रसक्तवधो न दोषाय भवति यज्ञस्तस्मादुर्नार्थे इत्युक्तं तानपि श्वगर्दभपतीनपि अदर्शनात् मृतान्वैशसने प्राणांल्लक्ष्यभूतांल्लक्ष्यीकृत्येत्यर्थः इषुभिर्यमभटा विध्यन्ति ताडयन्ति विध्यन्तीत्यनेन प्राणनिरोधनिमित्ता व्यथाभिप्रेतातोऽस्य नरकस्य प्राणनिरोध इति संज्ञा प्राणानां निरोधो यस्मिन्नित्यन्वयार्थः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अविदितपरव्यथानामज्ञातपरक्लेशानामीश्वरेण विधात्रा कल्पिता सहजत्वेन वृत्तिः मनुष्यादिशरीरभक्षणलक्षणा येषाम्मत्कुणादीनां तानि तथा तेषामपकल्पितवृत्तिः तद्वृत्तिकल्पनासमर्थः पुरुषेण श्रीहरिणोपकल्पिता प्रावरणादिलक्षणा वृत्तिर्यस्य स तथापीति वा यूकाः शूलमुखाः आदिशब्दात्स्वेदजादयः प्राणिविशेषाः शिरआदिनिलया गृह्यन्ते कुशरीरे कुष्ठादिदूषितदेहे ॥ १७ ॥

यस्तु यत्किञ्चन प्राप्तमन्नफलादिकमसंविभज्यातिथिभृत्यबालवृद्धादीनभोजयित्वा स्वयं भुङ्क्ते स च यश्चानिर्वृत्तयज्ञोपायमकृतदेवतापूजापञ्चयागादिश्रेयःसाधनं तदन्नमश्नाति स च यश्चासंस्कृतयाज्याद्युपस्कारेण शून्यं तदन्नमश्नाति सोऽपि कृमिभोजननाम्नि निकृष्टनरके पतति कृमय एव भोजनं यस्य स तथा यावद्यावानप्रमत्तस्यातिथिदेवतादिभ्योऽप्रदत्तस्याकृतस्यासंस्कृतस्य प्रारब्धापरिसमाप्तस्य कर्मणो वा निर्वेशः प्रायश्चित्तलक्षणाप्रतिक्रिया तत् तावतात्मानं नरकाद्यातयति उद्धारयति अप्रमत्तेति पाठे यावदप्रमत्तं बुद्धिपूर्वमकृतो निर्वेशो येन स तथा तावत्तमात्मानं नरके पातयति प्रापयतीति वक्ष्येतत्सर्वत्रानुकर्षणीयम् ॥ १८ ॥

संदंशैः सूचीविशेषैस्त्वचि निष्काशयन्त्युद्घाटयन्ति ॥ १९ ॥

सूर्म्या लोहादिमयपुत्तल्या ॥ २० ॥

सर्वाभिगमः सर्वाभिः स्त्रीभिः कृतसौरतः सम्वादाभावेऽपि बलाद्गमनमभिगमः शाल्मली कण्टकतरुः ॥ २१ ॥

आत्मना देहेन स्वासुभिः स्वप्राणैश्च ओघेन निरयप्रवाहेण उह्यमाना अपि वियुज्यमाना अपि ते योगं प्राप्यमाणा अम्रियमाणा इत्यर्थः विषमूत्राद्यात्मना स्यन्दमानायाम् ॥ २२ ॥ २३ ॥

अतीर्थे अपात्रमुद्दिश्याविहितकाले वा ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कुशरीरे तिर्यगादिलक्षणे ॥ १७—३८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

ईश्वरेण कल्पिता मनुष्यरक्तपानादिलक्षणा वृत्तिर्येषां मत्कुणादीनां न विविक्ता न ज्ञाता परेषां व्यथा यैस्तेषां पुरुषोपकल्पितवृत्तिरीश्वरेणैव विहितानिषिद्धजीविकः । मनुष्यत्वाद्विज्ञातान्यव्यथः ॥ १७ ॥

यत् किञ्चन भक्ष्यभोज्यादिकमुपनतं प्राप्तं तदसंविभज्य वायसैः संस्तुतः समतया वर्णितः वायसतुल्यैर्वा स्तुतः कृमिभोजनः कृमीनेव भुञ्जानः । अप्रत्तमसंविभक्तमप्रहुतं चास्तीति तथा सः । यत् पापं यावत्तावदित्यर्थः । अनिर्वेशमकृतप्रायश्चित्तम् ॥ १८ ॥

निष्कुषन्ति कृन्दन्ति ॥ १९ ॥

निगमया तप्तया सूर्म्या प्रतिमया ॥ २० ॥

सर्वाभिगमः पश्वादीनप्यभिगच्छति ॥ २१ ॥

आत्मना देहेन ॥ २२ ॥

विषमूत्रेति नदीविशेषणम् ॥ २३ ॥

अतीर्थे विहितादन्यत्र ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

न विविक्ता न ज्ञाता परव्यथा यैस्तेषामसिद्ध्रुग्धाः पीडिताः विहता विनष्टा निद्रारूपा निर्वृत्तिः सुखं यस्य सः ॥ १७ ॥

उपनतं लब्धं वायसैः संस्तुतःसमत्वेन वर्णितः यावत्तद्यावत्पापं तावत् कृमिकुण्डे अप्रत्तमसंविभक्तमप्रहुतं चाश्नातीति तथा अनिर्वेशमकृतप्रायश्चित्तमात्मानं यातयते ॥ १८ ॥

निष्कुषन्ति छिन्दन्ति ॥ १९ ॥

सूर्म्यां प्रतिमया ॥ २० ॥

सर्वाभिगमः पश्वाद्युपगन्ता ॥ २१—२२ ॥

पशुचर्य्यो पशुवत्स्वेच्छाचारम् ॥ २३ ॥

अतीर्थे शास्त्रोक्तप्रकारादन्यत्र इषुभिर्विध्यन्ति प्राणरोधं कुर्वन्तीत्यर्थः ॥ २४—२५ ॥

भाषा टीका

जो पुरुष यहां पर ईश्वरने जिन की जो वृत्ति कल्पना कर दी है और वे लोग दूसरे के कष्ट को नहीं जानते हैं ऐसे जो कोई हिंसक भी जंतु हैं तिनको देखकर 'आप मनुष्य होकर परकी पीडा को भी जानने वाला होकर जो पीडा देता है वह मरे पीछे उस द्रोह से अंधकूप नरक में गिरता है उहां पर वे जन्तु पशु मृग पक्षि सर्प मच्छर जुआं खटमल मक्खि और जिनोंको उसने दुख दिया है वेजनावर सब प्रकार से उसको दुःख देते हैं औ अंधेरे में पडा रहता है कभी निद्राका सुख उसको नहीं होता है कभी ठीक स्थिति भी नहीं उसकी होती है जैसे खोटे शरीर में जीव घूमा करते हैं तैसे घूमता रहता है ॥ १७ ॥

जो पुरुष घरमें किसी पदार्थ के आने से सबको नहीं देकर खाता है अथवा पञ्चयज्ञ विना किये खाता है वो कौवा के तुल्य है वह मरने पर कृमिभोजन अधम नरक में गिरता है उहां पर सौ हजार योजन के कृमि कुण्ड में कीडा होकर स्वयं कीडों से भक्षित होकर कीडों को खाता हुआ जब तक वे अन्न नहीं देने से होम नहीं करने से प्रायश्चित्त न करने से पाप रहते हैं तब तक उन दुःखों को भोगता है ॥ १८ ॥

जो इहां पर चोरी से या जबरदस्ती सुवर्ण रत्नादिक अथवा ब्राह्मण की कोइभी चीज को हरता है अथवा दूसरे की चीज विना आफतके हरता है ऐसा जो कठोर है हे राजन् उसके मरे पीछे यमके पुरुष अग्नि में गरम करे हुये लोहा के गोलों से और चीमटों से उसके शरीर मे लगाकर चींथते हैं ॥ १९ ॥

जो इहां पर अगम्य स्त्री को पुरुष गमन करता है अथवा अगम्य पुरुष को स्त्री गमन करती है उन दोनों को उहां पर चाबुकों से मारते हुये बडी गरम करी हुई स्त्री की मूर्त्ति

ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति तानमुष्मिँल्लोके वैशसे[1] नरके पतितान्निरयपतयो यातयित्वा विशसन्ति ॥ २५ ॥

यस्त्विह वै सवर्णां भार्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः सम्पाययन्ति ॥ २६ ॥

ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुम्पन्ति राजानो राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः सप्तशतानि विंशतिश्च सरभसं खादन्ति ॥ २७ ॥

यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित् स वै प्रेत्य नरकेऽवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायाद्गिरिमूर्ध्नः संपात्यते यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत्तिलशो विशीर्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति ॥ २८ ॥

यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतस्तेषां निरयं नीतानामुरसि पदाक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं निषिञ्चन्ति ॥ २९ ॥

अथ च यस्त्विह वा आत्मसम्भावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहुमन्येत स मृतक एव मृत्वा क्षारकर्दमे निरयेऽवाक्शिरा निपातितो दुरन्ता यातना ह्यश्नुते ॥ ३० ॥

ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ते पशव इव निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनावदायासृक् पिबन्ति नृत्यन्ति च गायन्ति च हृष्यमाणा यथेह पुरुषादाः ॥ ३१ ॥

ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रम्भकैरुपसृतानुपविश्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया यातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः क्षुत्तृड्भ्यां चाभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्यमाना आत्मशमलं स्मरन्ति ॥ ३२ ॥

भाषा टीका ।

लोहा की बनाई पुरुष के शरीर में चिपटाते हैं और स्त्री के शरीर में लोहा के पुरुष को चिपटाते हैं ॥ २० ॥

जो कि इहां पर पशु आदि सबका गमन करने वाला है उसको नरक में जाने पर वज्रसे कांटे वाले सेमरके पेड में लगाकर खैंचते हैं ॥ २१ ॥

जो इहां राजवंशी अथवा राजपुरुष आस्तिकवंश मे होकर भी धर्म मर्यादों को तोडते हैं वे लोग मरे पीछे भिन्न मर्यादावाले वैतरणी नदीमें गिरतेहैं यह नदी नरककी खाई है उंहां जलजन्तुओं से इधर उधर से भक्षित होते हैं और प्राण नहीं छूटते हैं शरीर भी नहीं छूटताहै पाप से चलते रहते हैं कर्म फल को स्मरण करके दुखित होते रहते हैं विष्ठा मूत्र रक्त केश नख हाड मेद मांस वसा उस नदी मे बहतें हैं तिनमे बडेही दुःख पाते रहते हैं ॥ २२ ॥

जो इहां शूद्र स्त्रियों के पति हैं शौच आचार नियमों को छोडे हैं लज्जा को भी छोडे हैं पशुओं के आचरण करते हैं वे भी मरे पीछे पीव विष्ठा मूत्र श्लेष्म से भरे समुद्र में गिरते हैं उन्ही खराब चीजों को खाते हैं ॥ २३ ॥

जो इहां कुत्ता गधे इन के पति हैं ब्राह्मणादि हो कर भी सिकार खेलने वाले हैं विना यज्ञ के मृगों को मारते हैं उन को भी मरने के पीछे उन पियों को लक्ष्य बना कर यमराज के पुरुष बाणों से वेधन करते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निरयपतयो यमपुरुषाः ॥ २५ ॥

वालामन्त्रमाह । यस्त्विति । रेतःपानं कारयन्ति ॥ २६ ॥

यमदूता ये श्वानः सरभसं ससम्भ्रमम् ॥ २७ ॥

द्रव्यविनिमये क्रयविक्रयादौ निरवकाशे निरालम्बे अवीचिशब्दार्थमाह । यत्रेति । वीचिस्तरङ्गस्तद्रहितत्वादवीचिः ॥ २८ ॥

यो विप्रस्तत्कलत्रं वा सुरां पिबत्यन्योऽपि वा व्रतस्थः सन् राजन्यो वैश्यो वा सोमपीथः कृतसोमपान इत्यन्वयः तयोः सोमपाने फलश्रवणविधानात्सोमपाननिषेधाच्च तथा च श्रुतिः

---

(१) वैशसे इति श्रीवीरराघवाचार्यपाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

"न्यग्रोधस्तम्भीराहृत्य ताः सम्पिष्य दधन्युपमृज्य तमस्मै भक्षं सम्प्रयच्छेन्न सोमम्" इति ॥ २९ ॥

स पूर्वमपि मृतक एव सम्मृत्वा ॥ ३० ॥

पुरुषस्य मेधेन हिंसया भैरवादीन् यजन्ते याश्च स्त्रियो नरमांसम्भक्षयन्ति कामरूपा रक्षोगणा भूत्वा यथेह ते पुरुषादाः सन्तः पूर्वमनृत्यन्त तद्वत् ॥ ३१ ॥

वैश्रम्भकैर्विश्वासोपायैरुपाविश्रम्भय्य विश्वास्य ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ सपापं विशसनं वर्णयति । ये त्विह वै दाम्भिका इति । इह लोके ये वै देहिनः दाम्भिका लोकवञ्चका दम्भयज्ञेषु वयमपि यज्ञानुष्ठानपरा इति लोकान् प्रलोभयितुमारब्धेषु दम्भार्थयज्ञेषु पशून् विशसन्ति हिंसन्ति तान् दाम्भिकानमुष्मिन् वैशसनामाख्ये नरके निपतितान्निरयपतयः यमपुरुषाः घातयित्वा दुःखयित्वा विशसन्ति विहिंसन्ति यस्मिन् स विशसनः विशसन एव वैशसन इत्यवयवार्थः ॥ २५ ॥

सपापं लालाभक्षमनुवर्णयति । यस्त्विह वै सवर्णामिति । इह लोके यो वै द्विजः कामेन मोहितः सवर्णां भार्यां रेतः स्वरेतः पाययति पानं कारयति तं द्विजं पापकृतं रेतःकुल्यायां पातयित्वा रेतः सम्पाययन्ति यमपुरुषा इति शेषः लाला रेतः तस्य भक्षणं यस्मिन् स लालाभक्ष इत्यवयवार्थः ॥ २६ ॥

अथ सारमेयादनं सपापमनुवर्णयति । ये त्विह वै दस्यव इति । इह ये दस्यवो दुष्टसत्वाः के ते अग्निदा गृहादीनां दाहका ये च गरदाः विषदाः ये वा राजभटा पुराकरग्रामान् पुराकरग्रामस्थान् आकरः खनिः सार्थान् जीवसमूहान् वा विलुम्पन्ति छिन्दन्ति हिंसन्तीत्यर्थः तान् सम्परेतान् ये वज्रवन्निष्ठुरा दंष्ट्रा येषां ते यमदूताः श्वानः विंशत्यधिकसप्तशतसङ्ख्याकास्ते सरभसं संभ्रमं खादयन्ति खादन्तीत्यर्थः निवृत्तप्रेषणात् खादेर्णिच् सारमेयाणां शुनामदनं सारमेयकर्तृकमदनं यस्मिन्नित्यवयवार्थः ॥ २७ ॥

अथावीचिमन्तं सपापं वर्णयति । यस्त्विह वा अनृतामिति । यस्त्विह लोके देही साक्ष्यः कर्म साक्ष्यं तस्मिन् द्रव्यविनिमये वा क्रयविक्रयादिरूपे वाणिज्ये वानृतमसत्यं वदति स वै प्रेत्य कथञ्चिदत्यन्तदुःखेनावीचिमति नरके निरवकाशे निरालम्बे योजनशतपरिमितोच्छ्रायाद्युन्नतदेशाद्गिरिमूर्द्धसु पर्वतशिखरेष्वधःशिराः निपात्यते अवीचिमच्छब्दस्यावयवार्थमाह । यत्रेति । यत्र नरकेऽश्मपृष्ठरूपं स्थलं जलमिवावभासते तदवीचिमद्वीचिस्तरङ्गः तदस्यास्तीति वीचिमज्जलं न विद्यते वीचिमद्यस्मिन् सोऽवीचिमज्जलरहितमप्यश्मपृष्ठं जलमिवावभासते तदवीचिमदित्यर्थः एवं निपात्यमानः पापी तिलप्रमाणशः विशीर्यमाणं शरीरं यस्य तथाभूतोऽपि न म्रियमाणः मरणमप्राप्तः पुनरपि तथैवारोपितो निपतति ॥ २८ ॥

अथ सदुरितमयःपानं वर्णयति । यस्त्विह वै विप्र इति । यो विप्रस्तत्कलत्रं वा सुरां पिबत्यन्योऽपि वा व्रतस्थः राजन्यो वै वैश्यो वा प्रमदात्सोमपीथः कृतसोमपान इत्यन्वयः तयोः सोमस्थाने फलचमसविधानात्सोमपाननिषेधाच्च तथा च श्रुतिः "न्यग्रोधस्तोमिनीराहृत्य ताः सम्पिष्य दधन्युपमृज्य तमस्मै भक्ष्यं प्रयच्छेन्न सोमम्" इति स्तोमिनीः फलानि दधनि दधि तेषां विप्रादीनां निरयं प्रापितानामुरसि पदा पादेनाक्रम्य द्रवमाणमत्यन्ततापेन द्रवीभूतं कार्ष्णायसमयो विशेषं तेषामास्ये मुखे निषिञ्चन्ति अयसः पानं यस्मिन्नित्यवयवार्थः ॥ २९ ॥

अथ सपापं क्षारकर्दममाह । यस्त्विह वात्मसम्भावनेति । यो वै देहीह लोके स्वयं जन्मादिभिरधमः निकृष्ट आत्मनः स्वस्य सम्भावनेनोत्कृष्टत्वापादनेन जन्मादिमतः अत एव वरीयसः श्रेष्ठान्न बहुमन्येत किन्त्ववमन्येतेत्यर्थः स पूर्वं मृतकप्राय एव मृत्वा क्षारकर्दमे नरकेऽवाक्शिरा अधःशिराः निपातित अपारयातना अश्नुतेऽनुभवति क्षारः कर्दमो यस्मिन्नित्यवयवार्थः ॥ ३० ॥

अथ रक्षोगणभोजनं सदुरितमाह । ये त्विह वै पुरुषा इति । ये चेह पुरुषाः पुरुषस्य मेधेन हिंसया भद्रकाल्यादिदेवता यजेरन् याश्च स्त्रियः मन्त्राख्यान् शास्त्रविहितान्पुरुषरूपान्पशून् घातयन्ति ताश्च ताश्च तान् "पुमान् स्त्रिया" इत्येकशेषः तांश्च पुरुषान् ताश्च स्त्रीरित्यर्थः नृपशवस्तैर्निहतास्ते सर्वे यमसदने रक्षोगणा भूत्वा घातयन्ति दुःखयन्ति सौनिका इव सूना नाम पशूनां वधस्थानं तत्र भवाः सौनिका "दृगयज्ञात्साहाय्यैक्ष्यप्रथमाध्वरपुरश्चरणनामाख्याताट्ठञ्" इति प्रत्ययः स्वधितिना स्वायुधेन विदार्य छित्त्वासृग्रक्तं पिबन्ति यथेह ते पुरुषादा हन्यमानाः सन्तः पूर्वमनृत्यन् जगुश्च तद्वन्नृत्यन्ति गायन्ति च रक्षोगणानामसृग्भोजनं यस्मिन्नित्यवयवार्थः ॥ ३१ ॥

अथ शूलप्रोतं तत्प्राप्तिहेतु दुरितं च वर्णयति । ये त्विह वा अनागस इति इह ग्रामेऽरण्ये वा अनागसो निरपराधान् जीविजुमिच्छून् जन्तून् ये वै देहिनो वैश्रम्भकैर्विश्वासोपायैरुपविश्रम्भय्य विश्वास्य शूलसूत्रादिषु प्रोतान् संलग्नान् कृत्वेत्यर्थः क्रीडनकतया क्रीडार्थं घातयन्ति दुःखयन्ति तेऽपि च यमयातनासु प्रेत्य सूत्रशूलादिषु प्रोताः संलग्ना आत्मानः देहा येषां ते क्षुत्पिपासाभ्यां पीडिताश्च तिग्मतुण्डैः सूचीमुखवत्तीक्ष्णानि तुण्डानि मुखानि येषां तैः काकादिभिरितस्ततो हन्यमाना आत्मशमलं स्वीयं पापम् अहो एवम्बिधमस्मीत्येवं स्मरन्ति शूले शूलादौ प्रोता यस्मिन्निति शूलप्रोतमित्यवयवार्थः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दाम्भिका धर्मध्वजिनः विशसन्ति खण्डशः खण्डयन्ति ॥ २५ ॥

सवर्णा स्ववर्णसमानवर्णाम् ॥ २६ ॥

सार्थान् पान्थान् जनान् ॥ २७ ॥

द्रव्यविनिमये वाणिज्यव्यवहारे साक्ष्ये साक्षित्वे वक्तव्ये अवीचिमज्जलं यत्तदश्मपृष्ठस्थलं दूरादर्शने जलमिव दृश्यते तस्मिन्नवीचिमति जलशून्ये पाषाणपृष्ठे निरवकाशे निरालम्बे ॥ २८ ॥

सोमपीथाः कृतसोमपानाः विप्राणां नित्यनिषिद्धं राजन्यतद्भार्याणां सोमपानानन्तरं पूर्वं वीर्यपानलक्षणं सुरापानसम्भवात्तद्भार्याणां सुरते मधुपानादीनां च पूर्वोक्तपतिव्रतादिस्मृतिनिमित्तदीक्षालक्षणव्रतस्थानां वेत्यादिविशेषोऽवगन्तव्यः ॥ २९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वरीवसः बहुमानयोग्यान् पुरुषान्मृतकः जीवन्मृतः क्षार-कर्दमे क्षारात्मकपङ्के दुरन्तयातना अनवसानदुःखानि ॥ ३० ॥

पुरुषमेधेन पुरुषहत्यालक्षणयागेन यमसादने नरके स्वधितिना विशसनखड्गेनावदाय अवखण्डयित्वा सौनिका हिंसकाः पशुमारा, इत्यर्थः ॥ ३१ ॥

वैश्रम्भकैः विश्वासोपायैः उपविश्रम्भय विश्वास्य आविद्धाङ्गुपातनं क्रीडनतया लीलाकरणभावेन यमयातनासु यमेनाधिकृतनरकेषु बलाका दीर्घतुण्डाः श्येनविशेषा दन्दशूकाः सदा दंशनशीलाः सर्पाः उद्वेजयन्ति भयमुत्पादयन्ति उपसृज्य प्राप्य इह लोके यथा बिलेशया अजगराः "बिलेशयस्त्वजगरः शयुरुक्तो मनीषिभिः" इति ॥ ३२—३३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विशसन्ति घ्नन्ति ॥ २५ ॥

रेतः पाययति वशीकरणकर्मणो विशेषार्थं रेतःपानं कारयति ॥ २६ ॥ २७ ॥

निरवकाशे निरालम्बे अवीचिमन्नार्थमाह । यत्रेति । अवीचिस्तरङ्गहीनं तत्र ॥ २८ ॥

सोमपीथः कृतसोमपानः वह्निना द्रवत् कालायसं लोहम् ॥२९॥

आत्मसम्भावनेन मिथ्याहङ्कारेण ॥ ३० ॥ ३१ ॥

वैश्रम्भकैर्विश्वासोपायैः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

वाचामसुमाह । यस्त्विहेति ॥ २६ ॥

सरभसं ससम्भ्रमम् ॥ २७ ॥

वीचिस्तरङ्गस्तद्रहितत्वादवीचिमद् स्थलं तदेवावीचिसंज्ञो नरकः ॥ २८ ॥

सोमपीथः सोमस्य पीतं पानं यस्य स एवम्भूतो यो विप्रस्तत्कलत्रं वा सुरां पिबति अन्योऽपि वा व्रतस्थो राजन्यो वैश्योऽपि वेत्यन्वयः तयोः सोमस्थाने फलचमसविधानात् सोमपाननिषेधाच्च तथा च श्रुतिः "न्यग्रोधस्तिमीराहृत्य सम्पिष्य दध्नयुपसृज्य तमस्मै भक्षं प्रयच्छेन्न सोमम्„ इति ब्राह्मणस्य तु अव्रतस्यापि सुरापाननिषेध आदिपर्वणि ।

यो ब्राह्मणोऽद्यप्रभृतीह कश्चिन्मोहात्सुरां पास्यति मन्दबुद्धिः ।
अपेतधर्मा ब्रह्महा चैव स स्यादस्मिँल्लोके गर्हितः स्यात्परे च इति॥२९॥

एवं विंशतिनरकानुक्त्वा सप्त नरकानाह । अथेत्यादिना ॥ ३० ॥

रक्षोगणभोजनमाह । ये इति । यथेह ये पुरुषाः पुरुषादाः सन्तः मेधेन हिंसया भैरवादीन् यजन्ते सौनिका इव नृपशून् याश्च स्त्रियः खादन्ति तान् ताश्च ते च ते पशवः रक्षोगणा भूत्वा यातयन्तः असृक् पिबन्ति ॥ ३१ ॥

वैश्रम्भकैर्विश्वासोपायैः ॥ ३२ ॥

भाषा टीका

जो कोई इहां दम्भ करने वाले दम्भ के यज्ञों मे पशुओं को मारते हैं उन लोगों को उस लोक में वैशस नरक में डाल कर नरक अधिकारी लोग मार करके दुखित करते हैं २५

जो इहां पर अपनी जात की स्त्री को किसी निमित्त से काम से मोहित होकर अपने वीर्य का पान कराता है उस पापी को पर लोक मे रेतः कुल्या नदी में डालकर वीर्य का पान खूब कराते हैं ॥ २६ ॥

जो इहां पर चोर वृत्ति से आग लगाते हैं विष देते हैं ग्रामों को जन समूहों को लूटते हैं सो राजा हों या राज पुरुष हों उनको भी मरने पर यमदूत वज्र सरी के दांत वाले सात सौ बीस कुत्ता से बड़ी जल्दी से कटवाते हैं ॥ २७ ॥

जो इहां गवाही देने मे धनके व्यवहार मे दानमे किसी प्रकार झूठ कहता है सो मरे पीछे अवीची मान् नरक में नीचे को मुख करके बिना आधारके दश हजार योजन ऊंचे पर्वत के मस्तक पर से गिराया जाता है जहां पर की पथरों का स्थान जल सरीका दीखता है अवीचिमान् नरक मे तिल सरीके उस के शरीरके टुकडे होजाते हैं मरता नहीं है फिर वहां पर चढाया हुआ गिरता है ॥ २८ ॥

जो इहां पर ब्राह्मण अथवा उसकी स्त्री यज्ञव्रत मे स्थित होकर सुरा पान करता है अथवा क्षत्रिय वैश्य होकर यज्ञ मे सोमपान करता है प्रमाद से भी वे नरक से डरते हैं तौभी यम दूत उन के छाती पर पग रख कर उन के मुख मे गला हुआ गरम लोहा डालते हैं ॥ २९ ॥

और भी जो इहां अपने बडे अभिमान से आप अधम होकर भी जन्म तप विद्या आचार वर्णाश्रम वाले श्रेष्ठ पुरुषों को अच्छी तरह नहीं मानता है सो मराही सा है तौभी मरने पर क्षार कर्दम नरक मे नीचे को मस्था करके डाला जाता है फिर कठिन कष्टों को भोगता है ॥ ३० ॥

जो पुरुष इहां पुरुष मेधयज्ञ करते हैं भैरवादिकों के अर्पण करके मनुष्य पशुओं को खाते हैं वे मरनेपे पशु यम पुर मे जाकर रक्षोगण होकर घातक सरीके होकर हथियारों से इस को काट कर उसके रक्त को पीते हैं जैसे वह पुरुष करता था तैसे दर्पित होकर नाचते हैं गाते हैं ॥ ३१ ॥

जो इहां वन में या ग्राम मे विश्वास के उपायों से आये हुये उन जीवों को विश्वास देकर जीने की इच्छा वालों को शूलादिको मे रख कर खेल के तरै से पीडा देते हैं वे भी पीछे यमयातना मे शूलादिकों मे चढाये जाते हैं क्षुधा तृषा से दुःखित होते हैं कङ्कवट आदि पक्षी इधर उधर से खेंचते हैं चोंचों से वे मारे जाते हैं तब अपने पापों को स्मरण करते हैं ॥ ३२ ॥

ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्बणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये निपतन्ति यत्र नृप ! दन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृत्य ग्रसन्ति यथा बिलेशयान् ॥ ३३ ॥

ये त्विह वा [1] अन्धावटकुसूलगुहादिषु भूतानि निरुन्धन्ति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति ॥ ३४ ॥

यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्राः कङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति ॥ ३५ ॥

यस्त्विह वा आढ्याभिमतिरहंकृतिस्तिर्यक्प्रेक्षणः सर्वतोऽभिविशङ्की अर्थव्ययविनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे नरके निपतति यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बिलेशयान् मूषकान् ॥ ३३ ॥

सगरेण सविषेण ॥ ३४ ॥

अतिथयोऽज्ञातपूर्वाः अभ्यागता ज्ञातपूर्वास्तान् पापेन वक्रीकृतेन ॥ ३५ ॥

आढ्याभिमतिर्धनगर्वितः अहङ्कृतिः श्रेष्ठोऽहमिति मानी तिर्यक्प्रेक्षणं यस्य सर्वतो गुर्वादेरपि धनं चोरयिष्यन्तीति विशङ्कमानः परिशुष्यमाणं हृदयं वदनं च यस्य अनवगतोऽप्राप्तः तस्यार्थस्योत्पादनादिभिः शमलं गृह्णातीति तथा परिवयन्ति सूत्रप्रोतं कुर्वन्ति ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ दन्दशूकं सपापमाह । ये त्विह वै भूतानीति । ये च जना अत्युल्बणस्वभावाः अत्युग्रस्वभावाः यथा दन्दशूकाः सर्पास्तद्वद्भूतानि उद्वेजयन्ति भीषयन्ति तेऽपि प्रेत्य दन्दशूकाख्ये दन्दशूकसंज्ञके नरके निपतन्ति दन्दशूकं विशिनष्टि । यत्रेति । हे नृप ! दन्दशूके दन्दशूकाः सर्पाः पञ्च मुखानि सप्त मुखानि येषां तादृशाः उपसृत्य समीपमागत्य ग्रसन्ति यथा बिलेशयान् मूषकान् ग्रसन्ति तद्वद्दन्दशूका अस्मिन् सन्तीत्यवयवार्थः अर्शआदेराकृतिगणत्वान्मत्वर्थीयोऽच्प्रत्ययः ॥ ३३ ॥

अथ सपापमवटं वर्णयति । ये त्विह वा बालानिति । इह ये देहिनो बालानन्धान् काणानन्यानि वा बलहीनानि भूतान्यवटादिषु अवटो गर्तः यथा निरुन्धन्ति तथा सम्परेतानमुत्रावटनिरोधाख्ये नरके तेष्वेवावटादिष्वेव उपवेश्य सगरेण विषयुक्तेन वह्निना धूमेन वह्निसम्बन्धिना धूमेन निरुन्धन्ति अवटो निरोधोऽस्मिन्नित्यवटनिरोधः निरुध्यते जन्तवोऽस्मिन्निति निरोधः अवटो निरोधो यस्मिन्निति वाक्यार्थः ॥ ३४ ॥

अक्षिपर्यावर्तं सदुरितमाह । यस्त्विह वा अतिथीनिति । यश्चेह लोके स्वयं गृहस्वामी सन्नतिथीनज्ञातपूर्वानभ्यागतान् ज्ञातपूर्वानसकृदुपगतमन्युः सञ्जातक्रोधः दग्धुमिच्छुरिव पापेन तिरश्चीनेन चक्षुषा निरीक्षते तस्य च पापदृष्टेः प्रेतस्य निरयेऽक्षिपर्यावर्ताख्येऽक्षिणी वज्रे वज्रं तुण्डं येषां ते काकादयः प्रसह्य बलादुत्पाटयन्ति अक्ष्णोः पर्यावर्तनमुत्पाटनमस्मिन्नित्यवयवार्थः ॥ ३५ ॥

सूचीमुखं सपापमाह । यस्त्विह वा आढ्याभिमतिरिति । यश्चेह लोके आढ्योऽहमित्यभिमतिरभिमानो यस्य स धनगर्वशालीत्यर्थः अहङ्कृतः श्रेष्ठोऽहमिति मानी तिर्यक् प्रेक्षणं यस्य सर्वतः गुर्वादेरपि शङ्की धनं चोरयिष्यतीति शङ्कमानः व्ययो विनियोगिनार्थव्ययः विनाशः समूलतः क्षयः तद्विषयया चिन्तया परिशुष्यमाणं हृदयं वदनं यस्य अतः निर्वृतिं सुखमनुपगतः अप्राप्तः ग्रह इव पिशाच इवार्थं वित्तमभितो रक्षति स चापि प्रेत्य तस्यार्थस्योत्पादनादिभिः शमलं पापं गृह्णातीति तथा उत्पादनं प्रथमतो मूलद्रव्यसम्पादनमुत्कर्षणं तस्य पश्चाद्वृद्ध्यादिना वर्धनं रक्षणं पालनम् एतत्प्रयुक्तशमलग्रह इत्यर्थः सूचीमुखाख्ये नरके निपतति सूचीमुखं विशिनष्टि । यत्र हेति । तं वित्तग्रहं धनपिशाचमत एव पापपुरुषाकृतिं पापं धर्मराजस्य यमस्य पुरुषाः तन्तुवायका इव सूत्रयुक्तसूच्या वस्त्रविरेधकारिण इव सर्वेषु अङ्गेषु सूत्रैः परिवयन्ति सूत्रप्रोतान् तस्यावयवान् कुर्वन्तीत्यर्थः नरकावयवार्थः स्पष्ट एव ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अवटं निरुच्छ्वासबिलं कुसूलं व्रीहिगतं गृहं कारागृहम् आदिशब्दात्तज्जलमज्जनं दारुपात्रं वा सगरेण विषसहितेनाग्निना कृन्तनम् ॥ ३४ ॥

पापचक्षुषा तिरश्चीनेन नेत्रेण ॥ ३५ ॥

अर्थेषु अभिमतिरभिमानो यस्य स तथा अहङ्कृतिरहङ्कारस्वरूपः व्ययविनाशयोश्चिन्तया ग्रहः ब्रह्मराक्षसादिलक्षणो यथा निधिमन्येभ्योऽभिरक्षति तथेति शेषः तस्यार्थस्य सम्पादने अर्जने उत्कर्षणे वृद्धीकरणे संरक्षणे च यच्छमलं तद्-

---

[1] बालान्धानिति श्रीधर० ।

एवम्विधा नरका यमालये सन्ति शतशः सहस्रशस्तेषु सर्वेषु च सर्व एवाधर्मवर्तिनो ये केचिदिहोदिता अनुदिताश्चावनिपते ! पर्यायेण विशन्ति तथैव धर्मानुवर्तिन इतरत्र इह तु पुनर्भवे त उभयशेषाभ्यां निविशन्ति ॥ ३७ ॥

निवृत्तिलक्षणमार्ग आदावेव व्याख्यातः ।

एतावानेवाण्डकोशो यश्चतुर्दशधा पुराणेषु विकल्पित उपगीयते यत्तद्भगवतो नारायणस्य साक्षान्महापुरुषस्य स्थविष्ठं रूपमात्ममायागुणमयमनुवर्णितमादृतः पठति शृणोति श्रावयति स उपगेयं भगवतः परमात्मनोऽग्राह्यमपि श्रद्धाभक्तिविशुद्धबुद्धिर्वेद ॥ ३८ ॥

श्रुत्वा स्थूलं यथा सूक्ष्मं रूपं भगवतो यतिः ।
स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धिया नयेदिति ॥ ३९ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

गृह्णातीति तत्सम्पादनोत्कर्षणासंरक्षणाशामलग्रहः वित्तग्रहमर्थलुब्धपिशाचं वायकाः पटकारैः कन्थानिर्माणनिपुणाः क्षुरधारानिशितैः सूत्रैः परिवयन्ति ओतप्रोतक्रियया विद्ध्यन्ति ॥ ३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

विलेशयान् मूषकान् ॥ ३३ ॥ ३४ ॥

अतिथयोऽज्ञातपूर्वा अभ्यागता ज्ञातपूर्वाः ॥ ३५ ॥

आढ्याभिमतिर्धनगर्वितः। अहङ्कृतिरहङ्कारी सर्वतो गुर्वादिभ्योऽपि धनं मे ग्रहीष्यन्तीत्यभिशङ्की परिवयन्ति सूत्रप्रोतान् कुर्वन्ति इतरत्र स्वर्गे इह भारतभूमौ पुनरपि धर्माधर्मयोर्मध्ये उत्पत्तिर्वेतस्तस्मिन् उभयोर्धर्माधर्मयोः शेषाभ्याम् ॥ ३६ ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

विलेशयान् मूषकान् ॥ ३३—३४ ॥

पर्यावर्तनमाह। अज्ञातपूर्वा अतिथयः ज्ञातपूर्वाः अभ्यागताः ॥ ३५ ॥

तस्यार्थस्योत्पादादिभिः शमलं पापं गृह्णातीति तथा ॥ ३६ ॥

भाषा टीका।

जो इहां सब प्राणियों को उद्वेग करते हैं ऐसे जो क्रूर स्वभाव वाले मनुष्य जैसे कि सर्प होते हैं वे लोग दन्दशूक नामा नरक में गिरते हैं हे राजन् ! जहां पर पांच मुखवाले सर्प हैं सात मुख वाले हैं आकर ग्रास करते हैं जैसे मूषों को ग्रास करैं तैसे ॥ ३३ ॥

जो इहां अंधेरे गढे कोठी गुफादिकों में किसी प्राणिकों रोकते हैं तैसे यमपुर में उन्ही में रखकर विष के सहित आग से धुआं में वे रोके जाते हैं ॥ ३४ ॥

जो इहां पर घरका मालिक होकर अतिथि अभ्यागतों को वारंवार क्रोध करके जलाने सरीका पापी नजर से देखता है उस पापी पाप दृष्टि वालेके आंखोंको नरक में वज्र चोंचवाले गीध कङ्क काक वटादिक जबरदस्ती उपाडते हैं ॥ ३५ ॥

जो इहां पर धनी बुद्धिसे अहङ्कार से तेढा देखता है अर्थके नाश होने की चिन्ता से सबसे शङ्का रखता है उसके हृदय मुख सूख जाते हैं कभी सुख नहीं पाता है ग्रह सरीका धन की रक्षा करता है सो भी मर कर उसके उत्पादन रक्षण के मोहमें पडके सूची मुख नरक में गिरता है उहांपर धन ग्रह पापी पुरुष को धर्मराज के पुरुष दरजी सरी के सब अंगों में सूतों से सीते हैं ॥ ३६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

इतरत्र स्वर्गादौ इह मर्त्यलोके पुनर्भवे पुनर्जन्मनिमित्तम्। उभयोर्धर्माधर्मयोः शेषाभ्याम् ॥ ३७ ॥

आदावेव द्वितीयस्कन्धे "वैश्वानरं याति" इत्यादिना उपगेयमौपनिषदं रूपं श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य ॥ ३८ ॥

यथा यथावत्क्रमेण ॥ ३९ ॥

भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था ॥
गीता मया तव नृपाद्भुतमीश्वरस्य स्थूलं वपुः सकलजीवनिकायधाम ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां पञ्चमस्कन्धे नरकवर्णनं नाम
षड्विंशोऽध्यायः ॥ २६ ॥

॥ समाप्तोऽयं पञ्चमस्कन्धः ॥

॥ श्रीकृष्णार्पणमस्तु ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथम्भूता संस्था सकलानां जीवनिकायानां धाम आश्रयभूतं वपुः ॥ ४० ॥

पञ्चमस्कन्धसम्बन्धिपदभावार्थदीपनैः ।
प्रीयतां परमानन्दनृहरिर्बालभाषितैः ॥ १ ॥
इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षड्विंशतितमोऽध्यायः ॥ २६ ॥
समाप्तेयं पञ्चमस्कन्धव्याख्या । ॥ ५ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इदं नरकवर्णनं पापवर्णनं च दिङ्मात्रमित्याह । एवम्विधाः उक्तविधा नरकाश्च शतशः सहस्रशो यमालये सन्ति तेषु नरकेषु सर्व एवाधर्मवर्त्तिन अत्रानुक्तबहुविधाधर्मपरा ये चेहोदिता उक्ता अधर्मवर्त्तिनः उक्तेषु नरकेषु निपतेयुस्तेऽपि पर्यायेण तथैव विशन्ति यथोक्तेषु नरकेषु विशन्ति तथा तेष्वपि विशन्तीत्यर्थः । यद्वा । तथेत्युत्तरान्वयी यथा धर्मानुवर्त्तिनां नरकेषु विशन्त्येवं धर्मानुवर्त्तिनः स्वर्गादौ विशन्तीत्याह । तथैवेति । इतरत्र स्वर्गादौ इह लोके विशन्तीत्यत्राह । इह त्विति । पुनर्भवे पुनः पुनः भवो जन्म यस्मिंस्तस्मिन्निह मर्त्यलोकादौ उभयशेषाभ्यां धर्माधर्मशेषाभ्यां भुक्तावशिष्टाभ्यामित्यर्थः विशन्ति आयन्ति इत्यर्थः एवं प्रवृत्तिधर्मवर्त्तिनां मार्गः कथितः । अथ निवृत्तिधर्मवर्त्तिनः क विशन्तीत्यत्राह । निवृत्तिलक्षणमार्ग इति । निवृत्तिधर्मप्राप्तेः मार्गः आदावेव द्वितीयस्कन्ध एव "वैश्वानरं याति विहायसा गतः सुषुम्णया ब्रह्मपथेन„ इत्यारभ्य कथित इत्यर्थः एवं नरकेष्वण्डकोशान्तर्भूतत्वेनैवोपवर्णितेषु सत्सु तर्हि महर्जनादिभुवनानि क सन्तीति राज्ञः प्रश्नोद्योगमन्वीक्ष्याह । एतावानिति । अण्डकोश एतावानेवोक्तविधत्रिलोक्यात्मक एवेत्यर्थः तर्हि चतुर्दशभुवनात्मकः त्रिलोक्यां व्यवहारः कथमिति शङ्कां निराकुर्वन्नण्डकोशं विशिनष्टि । य इति । योऽण्डकोशः त्रिलोक्यात्मकः पुराणेषु चतुर्दशधा चतुर्दशभुवनात्मकत्वेन विकल्पितः विभेदितः उद्गीयते अतलादीनि भुवनानि भूलोके महरादीनि विष्णोमण्डलेऽन्तर्भाव्यान्तरिक्षमण्डलेन सह त्रिलोक्यात्मकाण्डकोशोऽत्रानुवर्णितः अवान्तरभिदामाश्रित्य पुराणान्तरेषु चतुर्दशधोपवर्ण्येत इत्यर्थः एतदण्डकोशवर्णनश्रवणपठनादिफलमनुवर्णयति । य एतदिति । महापुरुषस्य भगवतो नारायणस्य यत्स्थविष्ठं स्थूलतमं रूपमात्ममायागुणमयं प्रकृतिगुणप्रचुरमनुवर्णितं तदादृतो यः तद्वर्णनरूपमिमं प्रबन्धमादरपूर्वकं यः पठति यश्च शृणोति श्रावयति वा सोऽयमेव परमात्मन उपगेयमुपनिषद्गम्यमणिष्ठं सूक्ष्मं सर्वत्र व्यापनस्वभावं दिव्यमङ्गलविग्रहविशिष्टं दिव्यात्मस्वरूपमपि श्रद्धाभक्तिभ्यां विशुद्धा बुद्धिर्यस्य तथाभूतः सन् वेद स्थूलरूपज्ञानं सूक्ष्मरूपज्ञानफलकमिति स्थूलरूपज्ञानसम्पादकमेतत्प्रबन्धपठनादिकं परम्परया सूक्ष्मरूपविषयकज्ञानफलकमित्यर्थः ॥ ३७ ॥ ३८ ॥

स्थूलरूपज्ञानस्य सूक्ष्मरूपज्ञानसाधनत्वेमवाह । श्रुत्वेति भगवतः स्थूलसूक्ष्मे उभे अपि रूपे यथावच्छ्रुत्वा गुरुमुखात्पूर्वं स्थूलरूपे निर्जितमात्मानं चित्तं शनैः सूक्ष्मधिया उक्तविधदिव्यात्मस्वरूपविषयकज्ञानात्मकधिया उक्तविधदिव्यात्मस्वरूपं नयेदित्यर्थः एवं सति प्रपञ्चस्यापि भगवद्रूपत्वेनानुसंहितत्वात्कचिदपि व्याप्रियमाणं चित्तं भगवत्येव विशेष्यभूते व्यवस्थितं भवति इति तत्साधनत्वमिति भावः ॥ ३९ ॥

किं तद्भगवतः स्थूलरूपं यदुपेयत्वेनोच्यते इत्यपेक्षायां तद्वर्णितमुपसंहरति । भूद्वीपेति । भुवः तदवान्तरभेदानां द्वीपवर्षाणां भूमिष्ठानां सरितां नदीनामद्रीणां तथा नभसोऽन्तरिक्षस्य समुद्राणां पातालपर्यन्तानां भूविवराणां दिशां नरकाणां भागणलोकस्य नक्षत्रगणलोकस्य ध्रुवमण्डलस्य च मध्यस्य दीर्घं भावः संस्थाः विन्यासविशेषाः हे नृप ! मया तव तुभ्यं गीताः कथिताः एतदेव क्ष्मादिभगणलोकपर्यन्तं जगत्सकलजीवसमूहस्य धाम आश्रय-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भूतस्य भगवतः अद्भुतं विचित्रं स्थूलं वपुः शरीरं भवतीत्यर्थः ॥ ४० ॥

इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसादसमुत्पन्नस्थिति-समधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघवविदुषा कृतायां श्रीमद्भागवतचन्द्रचन्द्रिकाख्यायां श्रीभागवतव्याख्यायां पञ्चमस्कन्धे षड्विंशोऽध्यायः ॥ २६ ॥

श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ॥

समाप्तेयं पञ्चमस्कन्धव्याख्या ॥५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न इयन्त एव नरकाः किन्त्वेतादृशा अन्ये नरका असङ्ख्याताः सन्तीत्याह । एवम्विधा इति । उत्तरत्र स्वर्गादौ इह मनुष्यलोके पुनर्भवे पुनरुत्पत्तौ उभयशेषाभ्यां धर्माधर्मशेषाभ्याम् ॥ ३७ ॥

चतुर्दशधा लोकप्रकारेण स्थविष्ठं स्थूलतममणिष्ठं सूक्ष्मतमम् ॥ ३८ ॥

उभयो रूपयोः कस्मिन् रूपे प्रथमप्रतिपत्तिरिति क्रममाह । श्रुत्वेति । आत्मानं मनः सूक्ष्मधिया सूक्ष्मरूपोपासनया ॥ ३९ ॥

उक्तार्थमुपसंहरन् प्रतिपत्त्यर्थं सङ्कलय्याह । भूद्वीपेति । सकलजीवानां निकायस्य धाम य आश्रयस्तस्य सकलजीवनिकायो धाम यद्रूप स तथा वा तस्येश्वरस्याद्भुतं स्थूलं वपुर्मया तव गीतमित्यन्वयः कीदृशं भूद्वीपादिलोका एव संस्था अवयवाः यस्य तत्तथा तत् ॥ ४० ॥

वारिजवासावारिजयोनित्रिनयनशतमखमुखसुरमुकटश्रेणि-निषण्णश्रीपदपीठं सर्वार्जिलसर्वार्जिलदर्गातदर्चिर्लचरम् ॥
मृदुहासेन्द्वानन्दितलोकं दारितदितिसुततिमवगिरिशिखरम्
कृष्णमकृष्णं चिन्तय चेतः शुचितरमतिगुणयदुकुलतिलकम् ॥१॥
विजयध्वजतीर्थार्थं रचिता प्रीतये हरेः ।
पदरत्नावली नाम पञ्चमस्कन्धसङ्गता ॥ २ ॥

इतिश्रीमन्महेन्द्रतीर्थपूज्यपादशिष्यविजयध्वजभट्टारककृत-श्रीमद्भागवतटीकायां पदरत्नावल्याम् पञ्चमस्कन्धे चतुर्विंशोऽध्यायः ॥ २४ ॥ (१)

समाप्तेयं पञ्चमस्कन्धव्याख्या ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

यथा स्थूलं श्रुत्वा तथा सूक्ष्मञ्च श्रुत्वा स्थूले रूपे आत्मानं निर्जितं कृत्वा शनैः क्रमेण सूक्ष्मं प्रति धिया अवसायात्मिकया बुद्ध्या नयेदित्यन्वयः । पाठान्तरन्तु सुगमं सूक्ष्मञ्च भक्तिनाच गम्यं रूपं"यावन्न जायेत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोग„ इति द्वितीयोक्तेः ॥ ३९ ॥ ४० ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भस्य षड्विंशोऽध्यायः ॥ २६ ॥

इति श्रीभागवतक्रमसन्दर्भे पञ्चमस्कन्धस्य क्रमसन्दर्भः समाप्तः
श्रीमद्भागवतं महामृतनिधिं संमथ्य सन्दर्भतः ।
कृष्णं पूर्णतमं प्रकाश्य शशिनं हस्तामलक्याविवत् ॥
यो जानाति तमो विधूय विधिवत् सन्दर्शयन् ज्ञापिताद्
जीवाद् जीवतीति सद्गुणमयं तं जीवमीशं भजे ॥

समाप्तेयं पञ्चमस्कन्धव्याख्या ॥५॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आदावेव । द्वितीय तृतीयादिषु"वैश्वानरं याति„इत्यादिभिःउपनेयमौपनिषदं रूपं ग्रहीतुमशक्यम् ॥ ३८ ॥

यथा यथावत् स्थूले रूपे निर्जितं वशीकृतमात्मानं मनः ॥३९-४०॥

सहिष्णुतादिव्यसुधाप्रवाहान् साधून् समाकर्ण्य जिजीविषामि ।
अधार्यपुर्वीरभुजङ्गदष्टस्याहो गतिर्मे कथमन्यथा स्यात् ॥
इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षड्विंशः पञ्चमे स्कन्धे सङ्गतः सङ्गतः सताम् ॥ २६ ॥
पञ्चमस्कन्धटीका श्रीराधाकृष्णसरस्तटे ।
कृष्णपक्ष्यामपूरीयं फाल्गुणे भौमवासरे ॥ १ ॥

समाप्तेयं पञ्चमस्कन्धव्याख्याः ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

तथैव धर्मतारतम्यतः इतरत्र स्वर्गादौ पुनर्भवे पुनर्जन्मनि उभयोः धर्माधर्मयोः शेषाभ्याम् ॥ ३७ ॥

आदौ द्वितीये स्कन्धे "वैश्वानरं याति विहायसा गतः„ इत्यादिना भूद्वीपादिमयभगवद्रूपश्रवणादिफलं दर्शयन्नुक्तार्थमुपसंहरति । यत्तदित्यादिना । उपनेयं शास्त्रगम्यमपि रूपं वेद ॥ ३८—३९ ॥

कथम्भूता भूद्वीपादिसंस्था ईश्वरस्य स्थूलं वपुः ॥ ४० ॥

इतिश्रीमद्भगवन्निम्बार्कचरणाब्जमधुकरशुकसुधीप्रणीते पञ्चमस्कन्धीये श्रीमद्भागवतप्रदीपे षड्विंशाध्यायार्थप्रकाशः ॥ २६ ॥

समाप्तेयं पञ्चमस्कन्धव्याख्या ॥ ५ ॥

भाषा टीका ।

इस प्रकार के नरक यम पुर मे सैकड़ों हजारों हैं उन सबों मे सबही अधर्मी जो इहां कहे न कहे हैं हे राजन् ! क्रम से जाते हैं तैसेही धर्मात्मा दूसरे ठिकाने जाते हैं वे दोनों शेष कर्म से इस संसार मे फिर आते हैं ॥ ३७ ॥

(१) अस्वेऽध्यायद्वयस्थानेऽध्यायद्वयमेव वर्तत इति टिप्पण्यामुक्तमतोऽत्रचतुर्विंशतिरध्यायाः सन्ति ।

भाषा टीका।

निवृत्ति लक्षण का मार्ग तो पहिले ही कह दिया है इतना ही अण्डकोश है जिस का चौदह प्रकार से पुराणों में भेद गाया जाता है जो वह साक्षात् महापुरुष भगवान् नारायण का स्थूल रूप आत्ममाया गुण मय वर्णन किया है जो इस को आदर से पढ़े सुने सुनावे सो ज्ञान करने योग्य भगवान् के अग्राह्य पद को भी श्रद्धा भक्तियुक्त होने से जान जावेगा ॥ ३८ ॥

भगवान् के स्थूल तथा सूक्ष्म रूप को सुन कर त्यागी होवे स्थूल में पहिले मन को स्थिर कर के फिर सूक्ष्म में प्रवेश करे ॥ ३९ ॥

हे नृप! भूमी द्वीप वर्ष नदी पर्वत आकाश समुद्र पाताल दिशा नरक ज्योतिर्गण लोक स्थिति मैंने तुम्हारे गाये हैं यह ईश्वर का स्थूल शरीर है सम्पूर्ण जीवों समूह का स्थान है ॥ ४० ॥

॥ दोहा ॥

रामानुज पद वंदि करि कृष्ण चरण चित लाय।
भाषा पंचम की लिखी लक्ष्मणदास बनाय ॥ १ ॥

इतिश्री भागवत पंचमस्कन्ध छब्बीसमे अध्याय का भाषानुवाद लक्ष्मणाचार्य्य कृत समाप्त ॥ २६ ॥

इति श्रीमद्भागवते महापुराणे पञ्चमस्कन्धे षड्विंशोऽध्यायः समाप्तः ॥ २६ ॥

स्कन्धश्च समाप्तः ॥

श्रीभक्तश्चास्य ग्रन्थरत्नस्य वृन्दावननिवासि लक्ष्मणाचार्यः ॥

व्याख्यानयुग्मागवतप्रचारी नित्यस्वरूपः किल ब्रह्मचारी।
विद्वद्वरोप्यञ्जलिबन्धधारी चैतत्समाप्तेर्विनिवेदकारी ॥ १ ॥

श्री १०८ श्रीराधारमणो जयति।

द्वादशस्कन्धः

महर्षिप्रवर श्रीकृष्णद्वैपायनप्रणीतम्

श्रीमद्भागवतम्।

श्रीश्रीपादश्रीधरस्वामिकृतभावार्थदीपिका, श्रीमद्विशिष्टाद्वैतसिद्धान्तनिर्वाहकाचार्यप्रवर श्रीसुदर्शन-सूरिकृतशुकपक्षीयसमाख्याटीका, तदनुगामिश्रीमद्वीरराघवाचार्य्यकृतभागवतचन्द्रचन्द्रिका, श्रीमन्मध्वसिद्धान्तधुरन्धर श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली, श्रीमद्विष्णुस्वामिसिद्धान्त-निर्वाहकाचार्यप्रवरश्रीमद्वल्लभाचार्य्यकृतसुबोधिनी, श्रीगौडीयवैष्णवाचार्य्यप्रवरश्रीमज्जीव-गोस्वामिकृतक्रमसन्दर्भाख्यटीका, तदनुगामिश्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थ-दर्शिनी, श्रीनिम्बार्कसम्प्रदायि—श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपाख्यटीका इत्यष्टभिर्व्याख्याभिर्भाषानुवादेन च समलङ्कृतम्।

तदिदम्

परमहंसपरिव्राजकाचार्यपूज्यपादश्रीमत्स्वामिप्रकाशानन्दसरस्वतीप्रवरशिष्येण,

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम्।

वङ्गदेशान्तर्गत ताडास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षिराय-

"श्रीवनमालिराय बहादुरस्य"

सम्पूर्णसाहाय्येन

प्रकाशितञ्च।

तथ

श्रीवृन्दावन श्रीरङ्गमन्दिरस्थ पं० भागवताचार्य द्वारा

तथा

काञ्चीमण्डलान्तर्वर्त्ति 'कान्दूर' प० श्रीरङ्गाचार्यद्वारा च संशोध्य

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन" यन्त्रालये

मुद्रापितम्।

सम्वत् १९६४



श्रीमद्भागवतम् ।



द्वादशस्कन्धः ।

प्रथमोऽध्यायः ।

ॐ नमो भगवते वासुदेवाय ।

राजोवाच ।

स्वधामानुगते कृष्णे यदुवंशविभूषणे ।
कस्य वंशोऽभवत्पृथ्व्यामेतदाचक्ष्व मे मुने ! ॥ १ ॥

श्रीशुक उवाच ।

योऽन्त्यः पुरञ्जयो नाम भविष्यो बारहद्रथः ।
तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजम् ॥ २ ॥
प्रद्योतसञ्ज्ञं राजानं कर्ता यत्पालकः सुतः ।
विशाखयूपस्तत्पुत्रो भविता राजकस्ततः ॥ ३ ॥
नन्दिवर्द्धनस्तत्पुत्रः पञ्च प्रद्योतना इमे ।
अष्टत्रिंशोत्तरशतं भोक्ष्यन्ति पृथिवीं नृपाः ॥ ४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रीगणेशायनमः ।

श्रीगुरुं परमानन्दं वन्दे स्वानन्दविग्रहम् ।
यस्य सन्निधिमात्रेण चिदानन्दायते वपुः ॥
जयन्ति श्रीपरानन्दकृपापाङ्गकलादृशः ।
या नित्यमनुवर्तन्ते सम्पदो विगताशयः ॥
एकत्रयोदशाध्यायैर्द्वादशे त्वाश्रयः सतः ।
अधिष्ठानावधित्वाभ्यामाश्रयश्चेश्वरः सतः ॥
उक्तो लयावधित्वेन प्राकृतात्यन्तिके लये ।
अधिष्ठानतया चोक्तो महापुरुषवर्णने ॥
तत्रादौ षड्भिरध्यायैः शुकः प्राह परीक्षिते ।
शेषैस्तत्राखिलान्याह सूतः पृष्टोऽथ सत्रिभिः ॥
आश्रयश्रवणे कार्यो न विलम्बो मनीषिणा ।
इत्येनं तरकालं वैराग्यं चतुर्भिस्तावदुच्यते ॥
तत्र तु प्रथमे भाविमागधान्वयभूमिपान् ।
कलिप्रमादतः प्राह सङ्करादिमर्शभसान् ॥
एवम्भूते सोमवंशे मुकुन्दः स्वैरक्रीडां वर्णितोऽयं स एव ।
वंशो भावी वर्ण्यते कृष्णभक्तिमुक्त्या मुक्त्यै यस्मै नास्तीति वक्तुम् ॥

तदेवं वैवस्वतमनुवंशे सोमवंशप्रस्तावेन श्रीकृष्णावतारचरितानि सप्रपञ्चमनुवर्णितानि; अथेदानीं भावी सोमवंशः कलौ विजातीयसङ्करादिमर्शमयो वैराग्यद्वारा श्रीकृष्णैकभक्तिनिगमनायानुवर्ण्यते तत्र तु सोमवंशशाखासु चिरकालानुवर्तितया मागधवंशोऽनुक्रम्यते—तत्र पूर्ववंशे उपरिचरवसुसुतस्य बृहद्रथस्तस्य जरासन्धस्तस्य सहदेवः पुत्रोऽभूदित्युक्तं नवमस्कन्धे, तत्रैव सहदेवान्मार्जारिस्ततः श्रुतश्रवा इत्यादयो रिपुंजयान्ता विंशतिर्भाविनो राजानो निरूपिताः तत्र राजा पृच्छति—स्वधामेति ॥ १ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं तदुपरितनं वंशं सङ्करादिदोषैः प्रपञ्चयति—योऽन्त्य इति । रिपुञ्जय एव पुरञ्जयः स्वामिनं पुरञ्जयम् हत्वा स्वपुत्रं प्रद्योतसंज्ञम् राजानं करिष्यति यस्य पालको नाम सुतो भविष्यति ॥ २ ॥ ३ ॥

प्रद्योतनाः प्रद्योतसंज्ञाः ॥ ४—८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

श्रीमते रामानुजाय नमः ।

१—३ ॥

अष्टात्रिंशोत्तरं शतमिति कालावधिरुक्तः ॥ ४—१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

श्रीमते रामानुजाय नमः ।

तदेवं नवमस्कन्धेनोपक्रान्तसूर्यवंशावलिं तदनन्तरापादितसोमवंशावलिं च श्रीकृष्णावतारपर्यन्तां निरूप्य भगवतोऽवतारप्रभृतीनि स्वधामगमनान्तानि चरितानि दशमैकादशाभ्यां निरूपितानि अथ भाविसोमवंश्यपरम्परोत्तरावधि बुभुत्सया पृच्छति राजा—स्वधामानुगत इति । यदुवंशस्य भूषणावतंसभावहे श्रीकृष्णे स्वधाम स्वस्थानमनुगते सति ततः प[illegible] राजानां सोमवंश्यानाम् उक्तानां मध्ये कस्य वंशोऽभवत्तत्परम्परा प्रावर्तत तदेतन्मे मुने ! महाभाग वद ॥ १ ॥

बार्हद्रथवंशोऽभवदित्यभिप्रेत्य भाविनं तम् अनुवर्णयितुमारभते, योऽन्त्यः पुरञ्जयो नामेत्यादिना । पुरोर्वंशे उपरिचरोवसुस्तस्य बृहद्रथः तत्सुतो जरासन्धः तस्य सहदेवस्तस्य मार्जारिः तस्य श्रुतश्रवः प्रभृतयः पुरञ्जयान्ताः सुताः विंशति सङ्ख्या भाविनो नवमस्कन्ध एवोक्ताः योऽन्त्यः कनीयान् पुरञ्जयो नाम बार्हद्रथवंश्यो भविता तस्य पुरञ्जयस्यामात्यः यः शुनको नाम स स्वामिनं पुरञ्जयं हत्वा ॥ २ ॥

तस्यात्मजम् प्रद्योतनामानं राजानं कर्ता करिष्यति यस्य प्रद्योतनस्याऽलकः सुतः तं राजानं कर्तेति पूर्वेण सम्बन्धः तत्पुत्रः अलकपुत्रः विशाखयूपः ततो ऽराजको भविष्यति ॥ ३ ॥

तत्पुत्रो राजकपुत्रः नन्दिवर्धनः तस्य पुत्राः पञ्च प्रद्योतनाः प्रद्योतनसंज्ञिकाः त इमे नृपा अष्टत्रिंशोत्तरशतम् इत्यस्य समा इति शेषः । अयं कालावधिः एवमग्रेऽपि भोक्ष्यन्ति पालयिष्यन्ति ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीहनुमते नमः ।

पद्मावासालयं नत्वा पद्मभूपूर्वसर्गीड्यम् ।
द्वादशस्कन्धं व्याकुर्वे द्वादशात्मप्रीत्यै नित्यम् ॥

॥ १ ॥

श्रीनारायणकल्पसन्निभवंशादिकथनेन तन्माहात्म्यमेव कथयत्यस्मिन् स्कन्धे । तत्र प्रथमेऽध्याये वंशशेषं कथयति—[illegible] इति अन्त्यः वंशावसानभवः कस्य वंशान्ते भव इत्यत उक्तं बार्हद्रथ इति स्वामिनं रिपुञ्जयमात्मजं स्वस्येति शेषः ॥ २ ॥

यद्यस्य प्रद्योतस्य सुतः पालको नाम यस्तात्तस्याऽपत्यत्वात्-षष्ठी वा, यः पालको यस्य यत्पालकः स तस्य सुत इति ॥ ३ ॥

प्रद्योतनेन सार्कं पञ्च तेषां राज्यावधि कालमाह—अष्टेति । भोक्ष्यन्ति पालयन्ति “भुजो नवने” (१ । ३ । ६६) इत्यत्र परस्मैपदं पूर्ववंश्यवैलक्षण्यप्रद्योतनार्थं वा व्यत्यासः ॥ ४—७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

श्रीराधाकृष्णाभ्यां नमः ।

द्वादशक्रमसन्दर्भे सन्दर्भाणां समाहृतिः ।
क्रियते यद्विशेषेण स मेऽनन्यगतेर्गतिः ॥

१ ॥

तदेवमेकादशस्कन्धपर्यन्तग्रन्थेन निजाभीष्टं श्रीकृष्णस्वरूपमाश्रयं यथावन्निरूप्य पुराणोपसंहाराय द्वादशस्कन्ध आरभ्यते यत्र तदन्तर्ज्ञाने लोकानां दुःखमेव स्यादिति दर्शयित्वा कथाश्रयं भजतां तु निस्तारः स्यादिति दर्शयिष्यते श्रीशुक उवाच योऽन्त्यो रिपुञ्जय इत्यादिना ॥ २-२४ ॥

श्रीविश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

श्रीकृष्णचैतन्यचन्द्राय नमः ।

प्रणम्य श्रीगुरुं भूयः श्रीकृष्णं करुणार्णवम् ।
लोकनाथं जगच्चक्षुः श्रीशुकं तमुपाश्रये ॥
गोपरामाजनप्राणप्रेयसेऽतिप्रभूष्णवे ।
तदीयप्रियदास्याय मां मदीयमहं ददे ॥
त्रयोदशभिरध्यायैर्द्वादशे तु चतुर्विधः ।
निरोध उक्तः श्रीकृष्णकथास्वत्रोपसंहृता ॥
त्रिभिरादौ कलेर्धर्मद्रोहिणः कथ्यते कथा ।
एकेन प्रलयस्याथ द्वाभ्यां शुकपरीक्षितोः ॥
पुराणस्य तथैकेन मार्कण्डेयस्य च त्रिभिः ।
सूर्यस्याख्यानवृन्दस्य शास्त्रपूर्तेः क्रमात्त्रिभिः ॥
तत्र तु प्रथमे भाविभूमिपानां कथोच्यते ।
मागधान्वयजातानां कलिकल्मषशालिनाम् ॥

१ ॥

तदेवं चन्द्रवंशावतंसस्य श्रीकृष्णचन्द्रस्य चरितामृतकथासिन्धुः स्कन्धद्वयेन वर्णितस्तत्रैव लोकान् निमज्ज्यानन्दयितुं इदानीं तेषां ततोऽन्यत्र वैराग्यमुत्पादयितुं तस्यैव चन्द्रवंशस्यान्तिमो भागो वर्ण्यते; तत्र चन्द्रवंशशाखायां पुरोर्वंशे उपरिचरोवसुः तस्य पुत्रो बृहद्रथः तस्य जरासन्धः तस्य सहदेवः पुत्रोऽभूदित्युक्तं नवमस्कन्धे, पुनश्च तत्रैव सहदेवस्य मार्जारिस्तस्य श्रुतश्रवा इत्येवं रिपुञ्जयान्ता विंशतिर्भाविनो राजानो निरूपिताः अत्र स्कन्धे तदुपरितनं वंशं सङ्करादिदोषैर्मलिनीभूतं वर्णयति, योऽन्त्य इति । रिपुञ्जय एव पुरञ्जयः

शिशुनागस्ततो भाव्यः काकवर्णस्तु तत्सुतः ।
क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः ॥ ५ ॥
विधिसारः सुतस्तस्याऽजातशत्रुर्भविष्यति ।
दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः ॥ ६ ॥
नन्दिवर्द्धन आजेयो महानन्दिः सुतस्ततः ।
शिशुनागा दशैवैते षष्ठ्युत्तरशतत्रयम् ॥ ७ ॥
समा भोक्ष्यन्ति पृथिवीं कुरुश्रेष्ठ ! कलौ नृपाः ।
महानन्दिसुतो राजन् ! शूद्रीगर्भोद्भवो बली ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

बार्हद्रथः बृहद्रथवंश्यः स्वामिनं रिपुञ्जयं हत्वा स्वपुत्रं प्रद्योतं राजानं करिष्यति यत् यस्य प्रद्योतस्य सुतः पालकः पालकसंज्ञः प्रद्योतवंश्यत्वात् प्रद्योतनाः ॥ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीनिम्बार्काय नमः ।

श्रीकृष्णं यदनुध्यानान्मुक्तबन्धः परं व्रजेत् ।
नत्वा तं द्वादशे स्कन्धे प्रदीपोऽयं विरच्यते ॥
अवशिष्टो निरोधोऽत्र वर्ण्यते त्रिविधस्तथा ।
प्रासङ्गिकश्च वक्त्रर्थस्तत्तत्प्रश्नानुसारतः ॥

नवमस्कन्धे सूर्यवंशोद्भवे इक्ष्वाद्यारा सोमवंश्यावलिः प्रोक्ता तत्र श्रीमत्पुरुषोत्तमप्रादुर्भावो वर्णितस्तच्छ्रवणजन्यप्रमातिशयेन तत्स्वरूपगुणादिबुभुत्सुं राजानं प्रति तस्यावशिष्टस्य भगवतः श्रीकृष्णस्य क्रममुल्लङ्घ्य स्वरूपगुणादिविज्ञापिका लीला स्कन्धद्वयेन निरूपिता एकादशे मुक्तिश्च वर्णिताऽधुनाऽस्मिन् स्कन्धे निरोध उच्यते, तत्र सर्वस्य प्राकृतपदार्थस्य कालतो निरोध विषयत्वात्सर्वतो विरक्तः सन् हरिभजनेन आत्यन्तिक संसृत्यपरपर्यायं मुक्तिं सम्पादयेदिति निरूप्यते त्रिभिरध्यायैः तत्र तावत् भाविसोमवंश्यावलिं पृच्छति–स्वधामानुगते इति । यदुवंशस्य विभूषणे भास्वरे भुक्तिमुक्तिप्रदत्वे विनोदमय इत्यर्थः । स्वधाम अप्राकृतं लोकं गते सति यादवानां मध्ये कस्य वंशस्थिरकालत्वाविश्येनाऽभवत् एतन्मे आचक्ष्व ॥ १ ॥

उत्तरमाह—य इति । सोमवंशे वसुस्तत्पुत्रो पुरुस्तद्वंशे उपरिचरो वसुस्तस्य बृहद्रथस्तस्य जरासन्धस्तत्सुतः सहदेवः इत्युक्तं नवमस्कन्धे, सहदेवान्मार्जारिस्ततः श्रुतश्रव आदयो रिपुञ्जयान्ता विंशतिसंख्याकाः भविष्या राजानस्तत्रैवोक्ताः तत्र योऽन्त्यो रिपुञ्जय एव पुरञ्जयस्तस्यामात्यः शुनको नामस्वामिनं पुरञ्जयं हत्वा आत्मजं स्वपुत्रम् ॥ २ ॥

प्रद्योतसंज्ञं राजानं, कर्ता करिष्यति ॥ ३ ॥

प्रद्योतनाख्याः अष्टत्रिंशोत्तरशतं समा इति शेषः ॥ ४ ॥

———

भाषा टीका ।

श्रीवटपत्रशायिने नमः ।

अशेषनिर्जरव्रातकिरीटद्युतिकर्बुरम् ।
नत्वा श्रीरुक्मिणीकान्तचरणं शरणं वृणे ॥ १ ॥
द्वादशस्कन्धभावार्थबोधिनीं भक्ततोषिणीम् ।
टीकां भागवताचार्यः कुर्वे स्वच्छार्यभाषया ॥ २ ॥

राजोवाच ।

राजापरीक्षित्बोले, कि—हे मुने ! यदुवंश के विभूषण श्रीकृष्णचन्द्र महाराज, जब अपने धाम को पधारे तिनके पश्चात् इस पृथ्वी में किसका राज्य हुआ, सो आप कृपा कर मेरे आगे वर्णन करिये ॥ १ ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—हे राजन् ! बृहद्रथ के वंश में एक *पुरञ्जय नामवाला राजा होगा, उसका मंत्री शुनक अपने स्वामी राजा पुरंजय को मार कर प्रद्योत नामक अपने पुत्र को राजा करेगा, उस प्रद्योत का पुत्र पालक होगा, तिसका पुत्र विशाखयूप होगा, तिस से राजक नामवाला पुत्र उत्पन्न होगा, तिस राजक से नन्दिवर्द्धन पुत्र होगा, ये प्रद्योत से लेकर नंदिवर्द्धन पर्यन्त पांच राजा प्रद्योतन के वंशवाले एकसौ अड़तीस १३८ वर्ष तक इस पृथिवी पर राज्य करेंगे ॥ २—४ ॥

*नवमस्कन्ध के बाईसवें अध्याय में यहकथा है, कि—चन्द्रवंशी राजा पुरु के वंश में उपरिचर वसु हुए, तिनके बृहद्रथ राजा हुए तिनके जरासन्ध, तिनके सहदेव नामक पुत्र हुए, उस सहदेव के मार्जारि तिनके श्रुतश्रवा इत्यादि से सहदेव की बीसवी पीढ़ीमें रिपुञ्जय नामक (शुकदेवजी के कथन समय में भावी) राजा हुए, उनहिं रिपुञ्जय का ही पुरञ्जय यह भी नाम है, उसी रिपुञ्जय से आगे जो राजा हुए, तिनका निरूपण इस स्कन्ध में करते हैं ॥

महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत् ।
ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिकाः ॥ ९ ॥
स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः ।
शासिष्यति महापद्मो द्वितीय इव भार्गवः ॥ १० ॥
तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः ।
य इमां भोक्ष्यन्ति महीं राजानः स्म शतं समाः ॥ ११ ॥
नव नन्दान् द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ।
तेषामभावे जगतीं मौर्या भोक्ष्यन्ति वै कलौ ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नन्दो नाम कश्चिन्महापद्मसङ्ख्यायाः सेनायाः धनस्य वा पतिर्भविष्यति अत एव महापद्म इत्यपि तस्य नाम ॥ ९ ॥

एकमेव छत्रम् यस्यां तां पृथिवीम् शासिष्यति पालयिष्यति क्षत्रोत्सादने दृष्टान्तः भार्गवः परशुराम इव ॥ १० ॥

समाः सम्वत्सरान् ॥ ११ ॥

नवनन्दान्नन्दं च तत्पुत्रांश्चाष्टावित्येवं नव प्रपन्नान् शरणागतान् विश्वस्तान् विश्वासितान्वा द्विजः कौटिल्यवात्स्यायनादिपर्यायश्चाणक्यः उद्धरिष्यत्युन्मूलयिष्यति मौर्या मौर्यसंज्ञाः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः प्रद्योतनेभ्यः शिशुनागो भविता तत्सुतः शिशुनागसुतः काकवर्णः तस्य काकवर्णस्य सुतः क्षेमधर्मा तस्माज्जातस्तु क्षेत्रज्ञः ॥ ५ ॥

विधिसार इति तस्य क्षेत्रज्ञस्याजातशत्रुरित्यस्य विधिसारादित्यादिः तत्सुतः अजातशत्रुसुतः ॥ ६ ॥

नन्दिवर्द्धन इति आजेयः अज यस्यात्मजः तत्सुतः नन्दिवर्द्धन सुतः ॥ ७ ॥

कुरुश्रेष्ठेति सम्बोधनं महानन्दिसुत इति हे राजन् ! ॥ ८ ॥

महापद्मपतिरिति अन्वर्थं नाम महापद्मसङ्ख्यायाः सेनाया धनस्य वा पतिरिति स च (शूद्रा) शूद्रीगर्भोद्भवः बली अधिकबलयुक्तश्च क्षत्रकुलविनाशकश्च नन्द इति तस्यैव नामान्तरं यतोऽयं शूद्रीगर्भोद्भव अतएव तत आरभ्य नृपाः शूद्रप्राया अधार्मिकाश्च भविष्यन्ति ॥ ९ ॥

स इति महापद्म इति नामैकदेशग्रहणं महापद्मपतिः अनुल्लङ्घितशासनः प्रजाभिरनुल्लङ्घितमाज्ञारूपशासनं यस्य सः एकमेव छत्रं यस्यां तथाभूतां पृथ्वीं शासिष्यति पालयिष्यति द्वितीयो भार्गवः परशुराम इव ॥ १० ॥

तस्येति तस्य महापद्मपतेः सुमाल्यप्रमुखाः—च इति सहस्रं संवत्सरान् ॥ ११ ॥

नवनन्दानिति नन्दशब्दस्तत्सुतपरश्च "आत्मा वै पुत्रः" इति श्रुत्यनुरोधात् अतएव नन्दानिति बहुवचनेन चेति विशेषणं च तान् प्रपन्नान् विश्वस्तान् कश्चिद्द्विजस्तद्घातुकः कौटिल्यवात्स्यायनो द्विज उद्धरिष्यति उन्मूलयिष्यति नाशयिष्यति यावत् ततस्तेषां सपितृकाणां सुमाल्यप्रमुखानामभावे तेष्वतिक्रान्तेषु इत्यर्थः । एवं सोमवंशे समाप्ते मौर्यसञ्ज्ञा भोक्ष्यन्ति ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

महानन्दि विधिमाहि—महानन्दिरिति ॥ ८ ॥

महानन्दिवंशभवः क इति । कश्चिदिति महापद्मसङ्ख्यया सङ्ख्याता सेना महापद्मा तस्याः पतिः कुक्षत्रविनाशकृत ततः कुक्षत्राभावात् ॥ ९ ॥

स महापद्मो नाम्ना नन्दः ॥ १०–११ ॥

नन्देन सह नवसङ्ख्यान्नन्दान्नन्दवंशजानुद्धरिष्यत्यपह इति शेषः । मौर्या मुरवंशजाः हीनजातयः केवलाः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आजेयः अजस्य सुतः एकारमध्यत्वमार्षम् ॥ ७ ॥ ९ ॥

स नन्दः महापद्मपतिस्तान्महापद्मसङ्ख्यायाः सेनायाः धनस्य वा पतित्वान्महापद्मः क्षत्रविनाशकृत्त्वे दृष्टान्तः भार्गवः परशुराम इव ॥ १०—११ ॥

नवनन्दान् नन्दं च तत्पुत्रानष्टौ चेत्येवं नव प्रपन्नान् विश्वस्तान् द्विजश्चाणक्यः उद्धरिष्यति उन्मूलयिष्यति मौर्याः मौर्यवंशसञ्ज्ञाः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ततः प्रद्योतानन्तरम् ॥ ५ ॥

अजेयः अजेयस्य सुतः ॥ ७—८ ॥

महापद्मपतिः महापद्मसङ्ख्यायाः सेनायाः धनस्य वा पतिः कश्चिन्नन्दनामकः क्षत्रविनाशकृत् भविष्यति तत आरभ्य नृपाः शूद्रप्रायाः भविष्यन्ति ॥ ९ ॥

स नन्दः महापद्म इत्यपि तस्यैव नामान्तरम् न उल्लङ्घितं शासनमाज्ञा यस्य स एकमेव छत्रं यस्यां तां शासिष्यति पालयिष्यति द्वितीयो भार्गवः परशुराम इव ॥ १० ॥

स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ।
तत्सुतो वारिसारस्तु ततश्चाशोकवर्धनः ॥ १३ ॥
सुयशा भविता तस्य सङ्गतः सुयशःसुतः ।
शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति ॥ १४ ॥
शतधन्वा ततस्तस्य भविता तद्बृहद्रथः ।
मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरम् ॥ १५ ॥
समा भोक्ष्यन्ति पृथिवीं कलौ कुरुकुलोद्वह ! ।
(हत्वा बृहद्रथं मौर्यं तस्य सेनापतिः कलौ ।
पुष्यमित्रस्तु शुङ्गाह्वः स्वयं राज्यं करिष्यति) ॥०॥ विज० ।
अग्निमित्रस्ततस्तस्मात् सुज्येष्ठोऽथ भविष्यति ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य नन्दस्य समाः सम्वत्सरान् ॥ ११ ॥

नन्दानिति एको नन्दः अष्टौ सुमाल्यप्रमुखास्तत्पुत्राः एवं नवसङ्ख्याकान् प्रजाः नन्दयन्तीति नन्दास्तान् प्रजापालनपरान् प्रपन्नान् विश्वस्तान् कश्चित् विश्वस्तघातकः कौटिल्यवात्स्यायननामकश्चाणक्यः उद्धरिष्यति उन्मूलयिष्यति मौर्या मौर्यनामकाः जगतीं भोक्ष्यन्ति ॥ १२ ॥

भाषा टीका ।

तिसके पश्चात् शिशुनाग नामक राजा होगा, जिसका पुत्र काकवर्णी राजा होगा, उसका पुत्र क्षेमधर्मा राजा होगा, तिसका सुत क्षेत्रज्ञ राजा होगा ॥ ५ ॥

क्षेत्रज्ञ का विधिसार पुत्र होगा, जिसका अजातशत्रु नाम पुत्र राजा होगा, तिसका पुत्र दर्भक होगा तिसका अजय नामक पुत्र राजा होगा ॥ ६ ॥

अजय का पुत्र नंदिवर्द्धन, तिसका पुत्र महानंदि होगा, हे राजन् ! कलियुग में इस प्रकार शिशुनाग वंशी ये दश राजे तीनसौसाठ (३६०) वर्ष पर्यन्त पृथिवी के राज्य को भोगेंगे ॥ और हे राजन् ! महानंदी का पुत्र एक शूद्री के गर्भ से पैदा होगा और बड़ा बली होगा ॥ ७—८ ॥

और वह महापद्म सेना का अथवा महापद्म संख्या वाले द्रव्य का पति होगा और इसका नन्द ऐसा नाम होगा वह क्षत्रियों के वंश का नाश करने वाला होगा । इससे पीछे राजा लोग शूद्रप्राय और अधार्मिक होंगे ॥ ९ ॥

वह महापद्म अर्थात् नन्द एक छत्र पृथिवी पर राज्य करेगा और इसकी आज्ञा को कोई भी उल्लंघन नहीं कर सकेगा, जिस प्रकार परशुराम जी ने पृथिवी का शासन किया, वैसेही वह भी पृथिवी का शासन करेगा ॥ १० ॥

सुमाल्य से आदि लेकर उस नन्द के आठ पुत्र होंगे जो कि—राजा होकर इस पृथिवी पर सौ वर्ष तक राज्य करेंगे ॥ ११ ॥

उस समय कोई एक चाणक्य नामा ब्राह्मण, विना पुत्र सहित उन नवों नन्दों को विश्वास देकर राज्य से उखाड़ देगा, जब ये नव नन्द नहीं रहेंगे, तब उनके अभाव काल में कलि में पृथिवी को मौर्य लोग भोगेंगे ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथं भोक्ष्यन्ति ? तदाह—स एवेति । चन्द्रगुप्तं मौर्यप्रथमम् ॥ १३ ॥ १४ ॥

तेषां प्रथमो दशरथः पराशरादिभिरुक्तोऽशोकवर्धनसुतश्चैव: तेन सह मौर्या दश सप्तत्रिंशच्छतोत्तरं सप्तत्रिंशदुत्तरं शतं समाः ॥ १५—१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

के पुनस्ते मौर्याः ? कथं च भोक्ष्यन्ति ? तदाह—स एवेति त्रिभिः, यस्तेषां नवानामुद्धर्ता द्विजः स एव मौर्यसंज्ञं प्रथमं चन्द्रगुप्तसंज्ञं नाम स्वसुतम् राज्येऽभिषेक्ष्यति तत्सुतः चन्द्रगुप्तसुतः ततः वारिसारानन्तरं तत्सुतोऽशोकवर्धनसुतः ॥ १३ ॥

तस्याऽशोकवर्धनस्य ॥ १४ ॥

ततः मौर्या इति यद्यपि चन्द्रगुप्ताद्यो नवैव तथापि पराशरादिभिश्चन्द्रगुप्तादिषु दशरथ एक उक्तः तदभिप्रायेण एव दशेत्युक्तम् । यद्वा, चन्द्रगुप्तस्य यः पिता तेन सह दशेत्युक्तम् सप्तत्रिंशच्छतोत्तरं सप्तत्रिंशदुत्तरशतं समा इत्यर्थः । कुरुकुलोद्वहेति सम्बोधनम् ॥ १५ ॥

अग्निमित्र इति । मौर्यस्वकस्य बृहद्रथस्य सेनानीः पुष्यमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति अग्निमित्रादयो नव

वसुमित्रो भद्रकश्च पुलिन्दो भविता ततः ।
ततो घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ १७ ॥
ततो भागवतस्तस्माद्देवभूतिरिति श्रुतः ।
शुङ्गा दशैते भोक्ष्यन्ति भूमिं वर्षशताधिकम् ॥ १८ ॥
ततः काण्वानियं भूमिर्यास्यत्यल्पगुणान् नृप ! ।
शुङ्गं हत्वा देवभूतिं कण्वोऽमात्यस्तु कामिनम् ॥ १९ ॥
स्वयं करिष्यते राज्यं वसुदेवो महामतिः ।
तस्य पुत्रस्तु भूमित्रस्तस्य नारायणः सुतः ॥ २० ॥
(सुशर्माख्यो ऽथ नृपतिः कण्वानां भविता ततः) । (विज०)
(नारायणस्य भविता सुशर्मा नाम विश्रुतः ॥) सिद्धान्तप्रदीप०)
काण्वायना इमे भूमिं चत्वारिंशच्च पञ्च च ।
शतानि त्रीणि भोक्ष्यन्ति वर्षाणां च कलौ युगे ॥ २१ ॥

श्रीमच्छ्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तद्वंश्या दशैते शुङ्गसञ्ज्ञाः वर्षशताधिकं द्वादशाधिकं वर्षशतं भोक्ष्यन्ति इति सम्बन्धः ॥ १६—१८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कथं भोक्ष्यन्तीत्यत आह—स एवेति । स एव नवनन्दाचार्यः ॥ १३—१४ ॥

मौर्यसंज्ञा अपि मौर्याः ॥ १५ – १६ ॥

वंशाद्यस्यासं कथयति—हत्वेति । पुष्यमित्र इत्यादि जातिप्रयुक्तं नाम शुङ्ग इत्यादि विशेष नाम ॥ ० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कथं भोक्ष्यन्ति ? इत्यत आह—स एवेति । चन्द्रगुप्तं मौर्येषु प्रथमं ततश्चेति चकारात् विष्णुपुराणोक्तो दशरथो ज्ञेयः ॥ १३–१४ ॥

तत्तदनन्तरं राजा सप्तत्रिंशदुत्तरशतं समाः ॥ १५ ॥

बृहद्रथस्य सेनापतिः स्वामिनं हत्वा राज्यं करिष्यति स पुष्यमित्रो नाम शुङ्गानां प्रथमः ततोऽग्निमित्राद्यो नव इत्येवं शुङ्गा दश द्वादशाधिकं वर्षशतम् ॥ १६—१८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कथं भोक्ष्यन्ति ? के च ते मौर्याः ? तदाह, स इति सार्द्धैस्त्रिभिः । चन्द्रगुप्तं मौर्यम् ॥ १३ ॥ १४ ॥

चन्द्रगुप्तादयो द्विजेन सहिता दश मौर्याः सप्त त्रिंशच्छतोत्तरं सप्तत्रिंशदुत्तरं शतम् ॥ १५ ॥ १६–१७ ॥

भाषा टीका ।

वही ब्राह्मण चाणिक्य प्रथममौर्यराजा चन्द्रगुप्त को राज्य पर अभिषेक करेगा, उसका पुत्र वारिसार राजा होगा, तिसका अशोकवर्द्धन पुत्र राजा होगा ॥ १३ ॥

उस अशोकवर्द्धन का पुत्र सुयशा नामक राजा होगा, तिस सुयश का सुत सङ्गत राजा होगा, तिसका पुत्र शालिशूक राजा होगा, तिसका पुत्र सोमशर्मा राजा होगा ॥ १४ ॥

तिसके पश्चात् सोमशर्मा का पुत्र शतधन्वा राजा होगा तिसका पुत्र बृहद्रथ राजा होगा, ये दश राजा लोग मौर्य होंगे । और हे कुरुकुलोद्वह ! राजन् ! ये लोग एकसो सैंतीस (१३७)वर्ष तक कलियुग में पृथिवी पर राज्य करेंगे बृहद्रथ का सेनापति पुष्पमित्र ही शुङ्गलोगों में प्रथम राजा होगा तिसका अग्निमित्र, तिसका सुज्येष्ठ पुत्र होगा ॥ १५ ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बृहद्रथस्य सेनापतिः पुष्पमित्रो नाम स्वामिनं बृहद्रथं हत्वा राज्यं करिष्यति स च शुङ्गानां प्रथमः ततोऽग्निमित्रादयो नवेत्येवम् शुङ्गा दश वर्षशताधिकं द्वादशाधिकं वर्षशतम् ॥ १८ ॥

कथं कण्वान् यास्यति ? तदाह—शुङ्गमिति । परस्त्रीकामिनं देवभूतिनामानं शुङ्गम् हत्वा तदमात्यो वसुदेवनामा कण्वो राज्यं करिष्यति ॥ १९ ॥

हत्वा काण्वं सुशर्माणं तद्भृत्यो वृषलो बली ।
गां भोक्ष्यत्यन्ध्रजातीयः कञ्चित्कालमसत्तमः ॥ २२ ॥
कृष्णनामाऽथ तद्भ्राता भविता पृथिवीपतिः ।
श्रीशान्तकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः ॥ २३ ॥
लम्बोदरस्तु तत्पुत्रस्तस्माच्चिबिलको नृपः ।
मेघस्वातिश्चिबिलकादटमानस्तु तस्य च ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

काण्वानां चतुर्थः सुशर्मा ज्ञेयः ॥ २० ॥

इमे वसुदेवादयः काण्वायना वर्षाणां त्रीणि शतानि पञ्चचत्वारिंशद्वर्षाणि च भूमिं भोक्ष्यन्ति ॥ २१ ॥

काण्वानामन्तिमं सुशर्माणं हत्वा बली नामा तद्भृत्यो गां भोक्ष्यति ॥ २२—२५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कण्वान्निति बहुवचनं तत्सन्तानस्यापि विवक्षा निबन्धनम् ॥ १९ ॥

तस्य कण्वस्य ॥ २०—२७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ततः काण्वानिति । हे नृप ! अल्पगुणान् गुणहीनान् काणसंज्ञान् यास्यति तदधीना भविष्यति तैः पालिता भविष्यतीति यावत् के पुनस्ते काण्वाः ? कथं च तान्यास्यतीत्यत्राह—शुङ्गमिति सार्द्धद्वयेन । यः शुङ्गसंज्ञो देवभूतिकं कामिनं व्यालाख्यं हत्वा तदमात्यः काण्वः वसुदेवो नाम स्वयमेव कारिष्यति महामत इति पाठे सम्बोधनं नर्थेति इमे वसुदेवादयः काण्वायनसंज्ञाः पञ्चचत्वारिंशदधिकशतत्रयं समाः भोक्ष्यन्तीत्यर्थः । अत्र नारायणस्य सुतः सुशर्मानामा द्रष्टव्यः "हत्वा काण्वं सुशर्माणम्" इत्युत्तरग्रन्थानुरोधात् ॥ १९—२१ ॥

तद्भृत्यः सुशर्मणो भृत्यः बली बलीकनामा गां पृथिवीं कञ्चित्कालमिति अत्यल्पत्वात्तद्भोगकालस्यानादरेण सङ्ख्या न कृता ॥ २२ ॥

कृष्णनामेति तद्भ्राता बलीकभ्राता ॥ २३ ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

॥ १७ ॥

शुङ्गाः शुङ्गवंशजाः ॥ १८ ॥

कण्वाः शुङ्गवंशजाः तान्नृपान्यास्यति अल्पगुणा शौर्याद्गुणसम्पत्तिरहिताः कथं कण्वान्यास्यतीत्यत आह—शुङ्गमिति । शुङ्गं शुङ्गाख्यं राजानं देवभूतिं हत्वा नाम्ना वसुदेवः कण्वः तस्य शुङ्गस्यामात्यः कामिनं प्राप्तकर्मासक्तम् ॥ १९ ॥

काण्वायनाः कण्ववंशभवाः कण्वानां चतुर्थः सुशर्मा इमे च वसुदेवादयः काण्वायनाः वर्षाणां त्रीणि शतानि पञ्चचत्वारिंशद्वर्षाणि च भूमिं भोक्ष्यन्ति तस्य सुशर्मणो भृत्यः ॥ २०—२२ ॥

तस्य वृषलस्य भ्राता ॥ २३ ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कथं काण्वान् यास्यति ? तत्राह शुङ्गमिति । परस्त्रीकामिनं देवभूतिनामानं शुङ्गं हत्वा ॥ १९—२० ॥

वसुदेवादयः काण्वायनाः ॥ २१ ॥

सुशर्माणमिति काण्वानामन्तिमः सुशर्मा ज्ञेयः बली वृषलः ॥ २२—२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हत्वेति इति । बृहद्रथनामकस्य मौर्यस्य सेनापतिः पुष्पमित्रसंज्ञः बृहद्रथं हत्वा राज्यं कारिष्यति स शुङ्गानां प्रथमः तद्वंश्या अग्निमित्रादयो नव एवं शुङ्गा दशसङ्ख्याकाः वर्षशताधिकं कालपर्यन्तमधिकं शतम् ॥ १८ ॥

अल्पगुणान् वीर्यशौर्यादिगुणालेशयुक्तान् कण्वसंज्ञान् यास्यति कथं यास्यति ? तदाह—शुङ्गमिति । वसुदेवसंज्ञः कण्वः ॥ १९ ॥ २० ॥ २१ ॥

बलीनामा ॥ २२—२५ ॥

भाषा टीका ।

सुज्येष्ठ का पुत्र वसुमित्र राजा होगा, जिसका भद्रक, जिसका पुलिन्द पुत्र होगा, जिसका सुत घोष, और घोष का पुत्र वज्रमित्र राजा होगा ॥ १७ ॥

जिस वज्रमित्र से भागवत, भागवत से देवभूति पुत्र होगा ये शुङ्ग लोग दशहों सौ एक सौ बारह ११२ वर्ष पर्यन्त इस पृथिवी के राज्य को भोगेंगे ॥ १८ ॥

हे नृप ! तिसके पश्चात् यह भूमि अल्प गुणवाले काण्व

अनिष्टकर्मा हालेयस्तलकस्तस्य चाऽऽत्मजः ।
पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनन्दनः ॥ २५ ॥
चकोरो बहवो यत्र शिवस्वातिररिन्दमः ।
तस्यापि गोमतीपुत्रः पुरीमान् भविता ततः ॥ २६ ॥
मेदशिराः शिवस्कन्दो यज्ञश्रीस्तत्सुतस्ततः ।
विजयस्तत्सुतो भाव्यश्चन्द्रविज्ञः सलोमधिः ॥ २७ ॥
एते त्रिंशन्नृपतयश्चत्वार्यब्दशतानि च ।
षट्पञ्चाशच्च पृथिवीं भोक्ष्यन्ति कुरुनन्दन ! ॥ २८ ॥
सप्ताभीरा आवभृत्या दश गार्दभिनो नृपाः ।
कङ्काः षोडश भूपाला भविष्यन्त्यतिलोलुपाः ॥ २९ ॥
ततोऽष्टौ यवना भाव्याश्चतुर्दशतुरुष्ककाः ।
भूयो दश गुरुण्डाश्च मौना एकादशैव तु ॥ ३० ॥
एते भोक्ष्यन्ति पृथिवीं दशवर्षशतानि च ।
नवाधिकां च नवतिं मौना एकादश क्षितिम् ॥ ३१ ॥
भोक्ष्यन्त्यब्दशतान्यङ्ग ! त्रीणि तैः संस्थिते ततः ।
किलिकिलायां नृपतयो भूतनन्दोऽथ वङ्गिरिः ॥ ३२ ॥

भाषा टीका ।

लोगों पर आयगी, उस समय बड़ा बुद्धिमान् कण्व जो वसुदेव नामवाला, देवभूति शुङ्ग का मन्त्री होगा, वह परस्त्री लम्पट ऐसे अपने स्वामी देवभूति शुङ्ग को मारकर स्वयं आपही राज्य करेगा, तिस का पुत्र भूमित्र राजा होगा तिसका पुत्र नारायण नामक राजा होगा ॥ १९ ॥ २० ॥

ये चारों कण्ववंशी राजा कलियुग मे तीन सौ पैंतालीस ३४५ वर्ष पर्यन्त पृथिवी का राज्य करेंगे ॥ २१ ॥

तदनन्तर सुशर्मा नामवाले काण्व राजा का सेवक वृषल (नीच जाति) बली बड़ा दुष्ट अन्ध्रजाति वाला, उसी अपने स्वामी सुशर्मा को मार कर कुछ काल पृथिवी का राज्य करेगा ॥ २१ ॥

तिसके पीछे उसका भ्राता कृष्ण नाम वाला पृथिवी का पति होगा, तिसका पुत्र श्रीशान्तकर्ण नाम वाला होगा, तिसका सुत पौर्णमास राजा होगा, ॥ २३ ॥

तिसका पुत्र लम्बोदर राजा होगा, तिसका पुत्र चिबिलक नाम वाला राजा होगा, चिबिलक से मेघस्वाति पुत्र होगा, मेघस्वातिका पुत्र अटमान नामक राजा होगा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यत्र येषु बहुसङ्ख्येषु चरमः शिवस्वातिनामा भविता ॥ २६ ॥ २७ ॥ २८ ॥

आवभृत्याः अवभृतिनगरी तद्राजानः ॥ २९ ॥ ३० ॥

एते आभीरादयो मौनव्यतिरिक्ताः पञ्चषष्टिनृपा एकोनषष्ट्यधिकं वर्षसहस्रं पृथिवीं भोक्ष्यन्ति ततः पूर्वोक्ता एवैकादशमौनास्त्रीण्यब्दशतानि क्षितिं भोक्ष्यन्ति ॥ ३१ ॥

तैः संस्थिते तेषु मृतेषु किलिकिलायां पुर्यां नृपतयो भविष्यन्तीत्युत्तरेणान्वयः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एन इति एतद्व्यतिरिक्तनृपतिपरः अनन्तमेव मौनानां पृथक् चकारत्वात् इति ॥ २८—४३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अनिष्टकर्मेति । तस्याटमानस्यानिष्टकर्मा सुत इति पूर्वेण सम्बन्धः हालेयोऽनिष्टकर्मणः सुत इति ॥ २५ ॥

चकोर इति यत्र येषु चकोरसंज्ञेषु शिवस्वातिनाम चरमो-

शिशुनन्दिश्च तद्भ्राता यशोनन्दिः प्रवीरकः ।
इत्येते वै वर्षशतं भविष्यन्त्यधिकानि षट् ॥ ३३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

भविता इत्यर्थः । अरिन्दमेति सम्बोधनं सविसर्गपाठे शिवस्वाते विशेषणम् ॥ २६ ॥ २७ ॥

एत इति । एते बाह्लीकनामानः पञ्चविंशतिनृपतयः पृथिवीं भोक्ष्यन्तीति सम्बन्धः । वर्षसङ्ख्यामाह—त्रिशतचत्वारिंशच्छतानि षट्पञ्चाशच्चेति षडशीत्युत्तरचतुश्शतं वर्षाणीत्यर्थः ॥ २८ ॥

सप्तेति । ततः सप्ताभीरसञ्ज्ञा भाव्या इति उत्तरेणान्वयः । तान् विशिनष्टि—आवभृत्या अवभूतिर्नगरी तस्या राजानः आवभृत्यसञ्ज्ञा वा सप्त भाव्याः तान् विशिनष्टि, आभीराः आभीरजातीयाः ततो दशगर्दभिनः तत्सञ्ज्ञा एवमग्रेऽपि बोध्यं लोलुपाः कामिनः ॥ २९–३० ॥

एते भोक्ष्यन्तीति । मौना एकादश क्षितिम् इति मौनानां कालावधेः पृथगेव वक्ष्यमाणत्वादेत इत्यनेन तेभ्योऽन्ये परामृश्यन्ते दशवर्षशतानि नवाधिकाश्च नवतिम् इत्येकोनैकादशशतवर्षाणि इत्यर्थः ॥ ३१ ॥

अङ्ग हे राजन् ! संस्थिते इति भावे क्तः तैर्मौनैः संस्थायां नष्टत्वके मध्ये तेषु मृतेषु तेष्वपि यावत् किलकिलाख्या पुरी तस्यां भूतनन्द इत्यादयो नृपतयः भूतनन्दाद्या षडुत्तरशतं वर्षाणि भोक्ष्यमाणा भविष्यन्ति ॥ ३२ ॥ ३३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हावेयः हुताग्नेयः ॥ २५—३० ॥

एते आभीरादयो मौनव्यतिरिक्ताः पञ्चषष्टिनृपा एकोनशताधिकं वर्षसहस्रं पृथिवीं भोक्ष्यन्ति ततः पूर्वोक्ता एव एकादश मौनाः त्रीण्यब्दशतानि क्षितिं भोक्ष्यन्ति मौनाः मौनकुले जाताः एकादश त्रीणि अब्दशतानि ॥ ३१ ॥

कुले मौनकुले संस्थिते नष्टे किलकिलायां नगर्यां तस्य शिशुनन्देर्भ्राता भूतवंशोपवङ्गरैर्युक्ताः षट् षट् वर्षाण्यधिकानि ॥ ३२ ॥ ३३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अनिरुद्धकर्मेति हावेयस्य विशेषणम् ॥ २५ ॥

यस्य येषु नवसु भ्रातृकेषु नवमः शिवस्वातिरित्यर्थः । इति । आविशतिः गोमतीपुत्रपुरीमन्तौ द्वौ ॥ २६ ॥

अन्ये बाह्लीकादिसप्तसोमश्रिपर्यन्ताः पृथक् पृथगयथा इति ज्ञेयम् ॥ २७—३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यस्य येषु बहुलत्वेषु नवसु नवमः शिवस्वातिनामा भवति ॥२६-२८॥

आवभृत्या अवभूतिर्नगरी तत्र भवाः ॥ २९—३० ॥

एते मौनव्यतिरिक्ताः आभीरादयः पञ्चषष्टिनृपाः मौनास्त्वेकादश त्रीण्यब्दशतानि ॥ ३१ ॥

तैर्मौनैः संस्थिते मृते सति किलकिलायां पुर्याम् ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यत्र येषु चकोरः अनवमः कैश्चिद्गुणैः श्रेष्ठ इत्यर्थः ॥२६-२७॥

एते बाह्लीकप्रभृतयो नृपतयः पृथिवीं त्रिशतचत्वारिंशच्छतानि च षट् पञ्चाशच्च भोक्ष्यन्ति ॥ २८ ॥

आवभूतिर्नगरी तद्राजानः आवभृत्याः ॥ २९ ॥ ३० ॥

एते मौनव्यतिरिक्ताः आभीरादयः पञ्चषष्टिनृपाः दशवर्षशतानि नवाधिकां नवतिं च भोक्ष्यन्ति एकादश मौनास्तु ॥ ३१ ॥

त्रीणि अब्दशतानि भोक्ष्यन्ति तैर्मौनैः किलकिलायां पुर्यां नृपतयो भविष्यन्तीत्युत्तरेणान्वयः ॥ ३२ ॥

भाषाटीका ।

तिसका पुत्र अनिरुद्धकर्मा, तिसका पुत्र, हावेय, तिसका पुत्र नवक, तिसका पुत्र पुरीषभीरु तिसका पुत्र सुनन्दन राजा होगा ॥ २५ ॥

हे रिपुदमन ! सुनन्दन का चकोरक पुत्र होगा, तिस चकोरक के बहु संज्ञक नव पुत्र होंगे, तिनमें नवम शिवस्वाति पुत्र होगा, शिवस्वाति का गोमतीपुत्र तिससे पुरीमान् पुत्र होगा ॥ २६ ॥

तिसके मेदशिरा, तिसके शिवस्कन्द, तिसका पुत्र यज्ञश्री, तिसका पुत्र विजय, तिसका चन्द्रविज्ञ, तिसका सलोमधि पुत्र होगा ॥२७ ॥

हे कुरुनन्दन ! ये तीस ३० राजालोग चारसौछप्पन ४५६ वर्ष तक इस पृथिवी के राज्य को भोगेंगे ॥ २८ ॥

तदनन्तर अवभूति नगरी के सप्त ७ राजा आभीर जाति के (अहीर) होंगे, तिनके पीछे दश १० राजा गार्दभिन् होंगे, तदनन्तर सोलह १६ कङ्क नामक राजा होंगे, और ये बड़े लोलुप अर्थात् लोभी व्यभिचारी होंगे ॥ २९ ॥

तिनके पीछे आठ ८ यवन राजा होंगे, तिनके पश्चात् चौदह १४ तुरुष्क राजा होंगे, तिन के पीछे दश १० गुरुण्ड राजा होंगे, तिन के पीछे ग्यारह ११ मौन लोग राज्य करेंगे ॥ ३० ॥

ये आभीरों से लेकर गुरुण्ड पर्यन्त मौनों को छोड़कर सब पैंसठ ६५ राजा लोग एकसहस्र निन्यानवे १०९९ वर्ष पर्यन्त राज करेंगे, और एकादश मौनलोग जो हैं, सो तो इस पृथिवी को तीनसौ ३०० वर्षतक भोगेंगे, जब वे मौन लोग मरजावेंगे तिनके पीछे किलकिला नगरी में राजालोग होंगे, तहां प्रथम भूतनन्द राजा होगा, तिसके पीछे वंगिरि नामक राजा होगा ॥ ३१—३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अधिकानि च षड्वर्षाणि ॥ ३३ ॥

तेषां त्रयोदश सुता भवितारश्च बाह्लिकाः ।
पुष्पमित्रोऽथ राजन्यो दुर्मित्रोऽस्य तथैव च ॥ ३४ ॥
एककाला इमे भूपाः सप्तान्ध्राः सप्त कोसलाः ।
विदूरपतयो भाव्या निषधास्तत एव हि ॥ ३५ ॥
मागधानां तु भविता विश्वस्फूर्जिः पुरञ्जयः ।
करिष्यत्यपरो वर्णान् पुलिन्दयदुमद्रकान् ॥ ३६ ॥
प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः ।
वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ।
अनुगङ्गामाप्रयागं गुप्तां भोक्ष्यति मेदिनीम् ॥ ३७ ॥
सौराष्ट्रावन्त्याभीराश्च शूरा अर्बुदमालवाः ।
व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः ॥ ३८ ॥
सिन्धोस्तटं चन्द्रभागां कौन्तीं काश्मीरमण्डलम् ।
भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाऽब्रह्मवर्चसः ॥ ३९ ॥
तुल्यकाला इमे राजन् ! म्लेच्छप्रायाश्च भूभृतः ।
एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तेषां भूतनन्दादीनां यथावंशं बाह्लिकनामानस्त्रयोदश सुताः भविष्यन्ति अथ पुष्पमित्रो नामाऽन्यो राजन्यः अस्य च दुर्मित्रो नामपुत्रः ॥ ३४ ॥

तथा आन्ध्राः कोसलाः विदूरपतयो निषधाश्च एते च तत्तद्देशनामभिः प्रख्यातास्तुल्यकालाः खण्डमण्डलेषु भूपास्तत एव तेभ्यो बाह्लिकेभ्य एव भाव्या भविष्यन्ति ॥ ३५ ॥

ततश्च मागधानां तु राजा विश्वस्फूर्जिर्नाम भविता स च पूर्वोक्तात्पुरञ्जयादपरः पुरञ्जय इति प्रसिद्धः सन् वर्णान् ब्राह्मणादीन् पुलिन्दयदुमद्रकसङ्ख्यान् म्लेच्छप्रायान् करिष्यति अपरानिति पाठे अन्यान्पुलिन्दादिसङ्ख्यान्वर्णान्करिष्यतीत्यर्थः ॥ ३६ ॥

किञ्चैवं कृत्वाऽब्रह्मभूयिष्ठा अत्रैवर्णप्रचुराः सतीः प्रजाः स्थापयिष्यति पालयिष्यति स च पद्मवत्यां पुरि वसन् अनुगङ्गं गङ्गाद्वारमारभ्य प्रयागपर्यन्तं गुप्तां पालितां मेदिनीं भोक्ष्यति ॥ ३७ ॥

तदनन्तरं च सौराष्ट्रादिदेशवर्तिनो द्विजा व्रात्या उपनयनरहिता भविष्यन्ति ॥ ३८ ॥

अब्रह्मवर्चसः वेदाचारशून्याः ॥ ३९ ॥

इमे च म्लेच्छप्राया भूभृतस्तुल्यकाला भविष्यन्ति । किञ्च, एते सर्वेऽधर्माऽनृतपरा अधर्मेऽनृते च परिनिष्ठिताः फल्गुदा अल्पदातारः ॥ ४० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तेषां भूतनन्दादीनां बाह्लीकसङ्ख्यास्त्रयोदश सुताः भवितारो भविष्यन्ति इति तथा पुष्पमित्रो नामाऽन्यो राजान्यः अस्य दुर्मित्रनामा पुत्रः ॥ ३४ ॥

तथान्ध्राः कोसलाः वैदूरपतयः निषधाश्च तत्तद्देशनामभिः प्रख्याताः खण्डमण्डलेषु भूपास्तत एव बाह्लीकेभ्य एव भविष्यन्ति ते तेभ्यो जनिष्यन्त इत्यर्थः ॥ ३५ ॥

मागधानामिति ततस्तु मागधानां राजा विश्वस्फूर्जिर्नाम भविता स च पूर्वोक्तात्पुरञ्जयादतिप्रसिद्धः सन् वर्णान् ब्राह्मणादीन् पुलिन्दयदुमद्रकसङ्ख्यान् म्लेच्छप्रायान् करिष्यति अपरानिति पाठे अन्यान् पुलिन्दसङ्ख्यान् करिष्यतीत्यर्थः ॥ ३६ ॥

स चैवं कृत्वा प्रजाः अब्रह्मभूयिष्ठा अत्रैवर्णप्रचुरान् स्थापयिष्यति पालयिष्यति । किञ्च, वीर्यवानिति स वै विश्वस्फूर्जिः क्षत्रमुत्साद्य निर्मूल्य पद्मवत्यां पुरि वसन्निति शेषः अनुगङ्गां गङ्गाद्वारमारभ्य प्रयागपर्यन्तां गुप्तां मेदिनीं भोक्ष्यति तदनन्तरं च सौराष्ट्रादिदेशवर्तिनो द्विजा व्रात्याः उपनयनादिसंस्काररहिताः अत एव शूद्रप्राया भविष्यन्ति जनाधिपेति सम्बोधनं जनाधिपा इति पाठे ते शूद्रप्रायाः शूद्रप्रचुरा भविष्यन्तीत्यर्थः ॥ ३७ ॥ ३८ ॥

सिन्धोरिति । व्रात्याद्याः व्रात्या आद्या येषां ते शूद्रा म्लेच्छाश्च अब्रह्मवर्चस इति अस्यार्थस्याऽनुचितत्वाद्व्रात्यविशेषणं चन्द्रभागा-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ऽद्री तया तत्तीरं लक्ष्यते कोम्लीम् । वेषान् कोन्तीमिति पाठे कुन्तिदेशेषु भवां कौन्तीमिति चन्द्रभागाविशेषणम ॥ ३९ ॥

तुल्यकाला इति । एते म्लेच्छप्राया भूभुजस्तुल्यकाला भविष्यन्तीत्यर्थः । किञ्च, एते इति अधर्मे अनृते च परिनिष्ठिताः फल्गुदाः अल्पदातारः तीव्रः क्रोधो मन्युर्येषां ते स्त्रीबालेति परदारधनयोराहृता आदरयुक्ताः तद्ग्रहणशीला इत्यर्थः । उदितास्तमितप्रायाः उदितप्रायाश्चास्तमितप्रायाश्च क्षणे तुष्टाः क्षणे रुष्टा इत्यर्थः । अल्पसत्त्वा अल्पबला अल्पायुषश्च असंस्कृताः गर्भाधानादिसंस्काररहिताः प्रजा इति एवंविधाः ते प्रजाः भक्षयिष्यन्ति पीडयिष्यन्ति ॥ ४०—४२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बाह्लीकाः बाह्लीकदेशपतयः ॥ ३४ ॥

तथा आन्ध्रा अन्ध्रदेशपतयः कोसलाः कोसलविषयपतयः वैदूरयः वैदूराख्यनगरपतयो निषधाश्च एते तत्तद्देशनामभिः प्रख्याताः तुल्यकालाः खण्डमण्डलेषु भूपाः तत एव तेभ्यो बाह्लीकेभ्य एव भाव्या भविष्यन्ति ॥ ३५ ॥

ततश्च नैषधानां विषयाणां राजा पुरञ्जयः शत्रुग्रामाभिधेय । स पुलिन्दयदुमद्रकानवरान् वर्णान् करिष्यति किं बहुना सर्वाः प्रजाश्चापि निर्वाचिताः ॥ ३६ ॥

अब्रह्मभूयिष्ठाः बहुलनैर्दानिवः क्षापयिष्यति क्षिपरीकरिष्यति अनुगङ्गं गङ्गासमीपे आप्रयागं प्रयागाख्यक्षेत्रपर्यन्तं दीर्घां मेदिनीं पद्मवत्यां पुरि स्थितिं कृत्वा आप्रयागं गुप्तां पालिताम् ॥ ३७ ॥

तदनन्तरं सौराष्ट्राश्च आवन्त्याश्च आभीराश्च शूद्राश्च अर्बुदाश्च मालवाश्च व्रात्याः संस्कारहीनाः द्विजाः शूद्रप्रायाः जनाधिपतयो भविष्यन्ति ॥ ३८ ॥ ३९ ॥

किञ्च, एते सर्वे अधर्मानृतपराः अधर्मे अनृते च परिनिष्ठिताः फल्गुदाः अल्पदातारः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षड्वर्षाणि अधिकानि भविष्यन्ति भावीनि' इत्यत्र भोक्ष्यन्ति पालयिष्यन्ति ॥ ३३ ॥

तेषां भूतनन्दादीनां त्रयोदश बाह्लिकनामानो भविष्यन्ति अथैतेभ्य एव पुष्पमित्रः क्षत्रियोऽस्य दुर्मित्रो नाम पुत्रः ॥ ३४ ॥

एककालाः खण्डमण्डलपतयः ॥ ३५ ॥

ततश्च मागधानां मध्ये विश्वस्फूर्जिर्नाम पुरञ्जयः पुराजितापरः प्राचीनपुरञ्जयो द्वितीय इत्यर्थः । वर्णान् ब्राह्मणादीन् पुलिन्दयदुमद्रकसंज्ञान् म्लेच्छप्रायान् करिष्यति ॥ ३६ ॥

अब्रह्मभूयिष्ठाः वेदरहिताः बहुतराः क्षत्रं पुष्पकेतुम् उत्साद्य उत्सन्नं कृत्वा ॥ ३७ ॥

ततश्च सौराष्ट्रादिदेशवर्तिनो द्विजा व्रात्याः संस्कारहीनाः भविष्यन्ति ॥ ३८—४३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एते भूतनन्दादयः ॥ ३३ ॥

तेषां भूतनन्दादीनां बाह्लिकाः तत्नामानः अथाऽन्यो राजन्यः पुष्पमित्रो भविष्यति अस्य पुष्पमित्रस्य दुर्मित्रः पुत्रो भविष्यति ॥ ३४ ॥

तत एव हि तेभ्यो बाह्लिकसञ्ज्ञेभ्य एवान्ध्रादयः तत्तद्देशनामभिः प्रख्याताः एककालाः तुल्यकालाः भूपाः तत्तद्भूमिप्रदेशपालकाः भाव्याः भविष्यन्ति ॥ ३५ ॥

ततश्च पुरञ्जयः पूर्वोक्तात्पुरञ्जयादितरः अर्थात्तद्व्यतिरिक्तः विश्वस्फूर्जिर्नाम मागधानां राजा भविता स तु वर्णान् ब्राह्मणादीन् पुलिन्दयदुमद्रकान् म्लेच्छप्रायान् करिष्यति ॥ ३६ ॥

एवं कृत्वा विश्वस्फूर्जिः पद्मवत्यां पुरि वसन् अब्रह्मभूयिष्ठाः अवैदिकधर्मप्रचुराः प्रजाः स्थापयिष्यति यतो दुर्मतिः कलिदूषितमतिः नन्वस्य क्षत्रियाः कुतो न वारयिष्यन्तीत्यत आह, वीर्यवान् क्षत्रमुत्सादयिष्यति ॥ ३७ ॥

अनुगङ्गां गङ्गाद्वारमारभ्य आप्रयागं प्रयागपर्यन्तां गुप्तां पालितां मेदिनीं भोक्ष्यति तदनन्तरं सौराष्ट्रादिदेशवर्तिनो द्विजाः व्रात्याः उपनयनादिसंस्काररहिताः भविष्यन्तीत्यग्रिमेणान्वयः ॥ ३८ ॥

द्विजाः त्रैवर्णिका व्रात्याः असंस्कृताः सन्तः शूद्रप्रायाः भविष्यन्ति ॥ ३९ ॥

अब्रह्मवर्चसः वेदोक्तक्रियाशून्यत्वात् इति च म्लेच्छप्रायाः भूभृतस्तुल्यकालाः भविष्यन्ति ॥ ४० ॥ ४१ ॥

भाषा टीका ।

फिर तिस नंगिरि के पीछे नंगिरि का भ्राता शिशुनन्दि राजा होगा, और शिशुनन्दि के अनन्तर यशोनन्दि राजा होगा, यशोनन्दि के पीछे प्रवीरक राजा होगा, ये भूतनन्द से लेकर सब राजा लोग पृथिवी पर एकसौ छै १०६ वर्ष पर्यन्त राज्य करेंगे ॥ ३३ ॥

तदनन्तर इन भूतनन्दादि की की सन्तान तेरह १३ पुत्र होंगे, इनका नाम बाल्हिक पड़ेगा, उसी समय अन्य एक पुष्पमित्र नामक राजा होगा, तिसका पुत्र दुर्मित्र राजा होगा ॥ ३४ ॥

और इनहीं बाल्हिकों की सन्तान सात आन्ध्र, सात कोसल, तथा विदूरपति, और नैषध, इस प्रकार देश के नामों से प्रसिद्ध भार खंड मंडल के अधिपति होंगे ॥ ३५ ॥

मगधदेशों का राजा विश्वस्फूर्जित नामक दूसरा पुरञ्जय होगा, और वह ब्राह्मणादि वर्णों को पुलिन्द, यदु, मद्रक संज्ञावाले म्लेच्छ प्राय कर देगा, ॥ ३६ ॥

और वह दुर्मति, जिसमें प्राय करके त्रैवर्णिक लोग नहीं ऐसी नीच प्रजा का पालन करेगा, बड़ा पराक्रमी होगा और क्षत्रियों को उखाड़ कर पद्मावती पुरी में रह कर हरिद्वार से प्रयाग पर्यन्त पृथिवी का राज्य करेगा ॥ ३७ ॥

स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः ।
उदितास्तमितप्राया [illegible] ल्पकायुषः ॥ ४१ ॥
असंस्कृताः क्रि [illegible] तमसावृताः ।
प्रजास्ते [illegible] जन्यरूपिणः ॥ ४२ ॥
तन्नाथ [illegible] चारवादिनः ।
अन्योन्यतो राजभिश्च क्षयं यास्यन्ति पीडिताः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्याम् द्वादशस्कन्धे राजवंशानुकीर्त्तनं नाम
प्रथमोऽध्यायः ॥ १ ॥

भाषा टीका ।

सौराष्ट्र (सोरठ) देश के अवन्तिदेश के शूद्र, अर्बुद, और मालव देश के ब्राह्मण से लेकर तीनो वर्ण उपनयनादि संस्कारों से हीन होकर पतित होजावेंगे और वहां के राजा लोग शूद्र प्राय होजावेंगे ॥ ३८ ॥

सिन्धुनदी के किनारे २ तथा चन्द्रभागा के किनारे २ कौन्ती देश और काश्मीर मण्डल इन देशों को शूद्र पतित म्लेच्छादिक जो ब्रह्म तेज से हीन हैं वे राजा लोग भोगेंगे ॥ ३९ ॥

हे राजन् ! ये सब राजा लोग एकही काल में म्लेच्छ प्राय होंगे, वे सब अधर्म और असत्य परायण होंगे, एवं थोडा दान करने वाले होंगे, और तीव्र क्रोधी होंगे ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

उदितास्तमितप्रायाः हर्षशोकादिबहुलाः ॥ ४१ ॥

असंस्कृताः गर्भाधानादिसंस्काररहिताः प्रजाः भक्षयिष्यन्ति धनाद्यपहारादिना पीडयिष्यन्ति ॥ ४२ ॥

किञ्च, तन्नाथाः ते नाथा येषां ते जनपदा देशवर्तिनो मनुष्यास्तच्छीलाचारवादिनस्तेषामिव शीलमाचारो वादश्च तद्वन्तः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीमद्भागवतव्याख्याने
शुकपक्षीये द्वादशस्कन्धे
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तन्नाथा इति ते म्लेच्छा नाथा येषां ते जनपदादेशवर्तिनः तेषामेव शीलं स्वभावः आचारो वादश्च येषां सन्तीति तथा· ऽन्योन्यतः राजतः राजभिश्च पीडिताः नाशं यास्यन्ति ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
प्रथमोऽध्यायः ॥ १ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उदितास्तमितप्रायाः बहुलं सूर्योदयमस्तङ्गतमेव जानन्ति नापरम् अल्पकालावस्थायिनो वा ॥ ४१ ॥

असंस्कृताः गर्भाधानादिसंस्कारहीनाः प्रजाः भक्षयिष्यन्ति धनाद्यपहारादिना पीडयिष्यन्ति ॥ ४२ ॥

किञ्च, एवंविधाः ये त एव नाथा येषां ते तन्नाथा जनपदा देशवर्तिनो मनुष्याः तच्छीलाचारवादिनः तेषां शीलम् आचारश्च वादश्च तद्वन्तः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
प्रथमोऽध्यायः ॥ १ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इतिश्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
प्रथमोऽध्यायः १॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वादशे प्रथमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

उदिताऽस्तमितप्रायाः उत्पन्नविनष्टप्रायाः जन्ममरणबहुला इत्यर्थः ॥ ४२ ॥

भक्षयिष्यन्ति जीविकापहारादिना पीडयिष्यन्ति' जनपदा देशवर्तिनो जनाः तच्छीलाचारवादिनः भयात् तेषामिव शीलाचारवादाः सन्ति येषां ते ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
प्रथमाऽध्यायार्थप्रकाशः ॥१॥

भाषा टीका ।

स्त्री, बालक, गौ, द्विज, इनके मारने वाले होंगे, और पराई स्त्री पराये धन में आदर करने वाले होंगे और अल्पकाल में वृद्धिको प्राप्त होकर अल्पकाल में नष्ट होते रहैं गे, तथा अल्प पराक्रम, और अल्प आयु वाले होंगे ॥ ४१ ॥

और संस्कारों से रहित वैदिक क्रियाओं से हीन और और रजोगुण तमोगुण से ढके हुए होंगे, ऐसे वे राजाओं के चिन्ह धारण करने वाले म्लेच्छ लोग, प्रजा का भक्षण करेंगे अर्थात् प्रजाको दुःख देवेंगे ॥ ४२ ॥

और जब उस देश के लोगों के ऐसे अन्यायी स्वामी होंगे तब देश की सब प्रजालोग भी राजाओं के स्वभावको राजाओं के आचार को गृहण कर राजाओं के सदृश असत्य बोलने वाले होकर परस्पर में तथा राजाओं से पीड़ित होकर क्षय को प्राप्त होजाँय गें ॥ ४३ ॥

इति श्रीमद्भागवत द्वादशस्कन्ध में प्रथम अध्यायकी,
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ १ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे प्रथमोऽध्यायः ॥ १ ॥

द्विती[illegible]

श्री[illegible]वाच ।

ततश्चाऽनुदिनं धर्मः सत्यं शौचं क्षमा दया ।
कालेन बलिना राजन्नङ्क्ष्यत्यायुर्बलं स्मृतिः ॥ १ ॥
वित्तमेव कलौ नृणां जन्माऽऽचारगुणोदयः ।
धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥ २ ॥
दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके ।
स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ॥ ३ ॥
लिङ्गमेवाऽऽश्रमख्यातावन्योन्यापत्तिकारणम् ।
अवृत्त्या न्यायदौर्बल्यं पाण्डित्ये चापलं वचः ॥ ४ ॥
अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव तु ।
स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनम् ॥ ५ ॥
दूरे वार्ययनं तीर्थं लावण्यं केशधारणम् ।
उदरम्भरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ॥ ६ ॥
दाक्ष्यं कुटुम्बभरणं यशोऽर्थे धर्मसेवनम् ।
एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले ॥ ७ ॥
ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ।
प्रजा हि लुब्धैराजन्यैर्निर्घृणैर्दस्युधर्मभिः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वितीये तु कलेर्दोषवृद्धौ कल्क्यवतारतः ।
अधर्मिष्ठे जने नष्टे पुनः कृतयुगागमः ॥

कलिधर्मान्प्रपञ्चयति—ततश्चेत्यादिना ॥ १ ॥

धर्मन्याययोर्व्यवस्थायां बलमेव ॥ २ ॥

दाम्पत्ये भार्यापतिभावेऽभिरुचिरेव हेतुर्न कुलगोत्रादिः व्यावहारिके क्रयविक्रयादौ स्त्रीत्वे पुंस्त्वे च तयोः श्रैष्ठ्ये रतिकौशलमेव हेतुर्न कुलमाचारो वा ॥ ३ ॥

आश्रमाणां ख्यातौ ज्ञाने लिङ्गमेव दण्डाजिनादिकं हेतुर्नत्वाचारविशेषः अन्योन्यापत्तिकारणं चाऽऽश्रमादाश्रमान्तरप्राप्तौ च कारणम् यद्वा ब्रह्मक्षत्रादीनामन्योन्यापत्तौ नमस्कारादिव्यवहारे कारणम् । अवृत्त्या, मुद्रार्पणादिदानासामर्थ्येन न्याये दौर्बल्यं पराजयः, चापलं वचो बहुभाषणम् ॥ ४ ॥

असाधुत्वे चौर्याद्यभियोगे प्रसाधनमलङ्कारः ॥ ५ ॥

दूरे वर्तमानं वार्ययनं जलाशयस्तीर्थं न तु गुर्वादि स्वार्थः पुरुषार्थः ॥ ६ ॥ ७ ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

१ ॥ २ ॥

रुचिर्हेतुः नत्वाभिजात्यादि सा च व्यावहारिकी लोकव्यवहाराभिज्ञा मायैव विणक्प्रतिबन्धिनी स्त्रीत्वे चेति स्त्रीत्वपुंस्त्वयोर्हेतुर्नाभिजात्यपुंस्त्वैकान्तगुणवृत्तयोगो हेतुः किन्तु अभिरतिरेव सम्भोग एव इत्यर्थः ॥ ३ ॥

अवृत्तिः दारिद्र्यम् ॥ ४ ॥

स्वीकार एव न तु शास्त्रीयविधिरित्यर्थः ॥ ५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीया ।

उदरमिति उदरपोषणमेव स्वार्थः स्वस्य पुरुषार्थः ॥ ६—१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

"तत्कोलाचारवादिनः" इत्येतदेव प्रपञ्चयन् कृतयुगप्रवृत्तिसमीपकालं वदन् तत्प्रवृत्तिप्रकारं कलियुगप्रादुर्भावप्रकारञ्च वदन् राजवंशानुकीर्तनमुपसंहरति द्वितीयेन—ततश्चेत्यादिना । हे राजन् ! बलिना बलीयसा कालेन निमित्तेनानुदिनं धर्मादयो नङ्क्ष्यन्ति ॥ १ ॥

वित्तमेवेति । जन्माभिजात्यं गुणाः सद्गुणाः तदावहं वित्तमेवेत्यर्थः । तथा धर्मन्याययोर्व्यवस्थायां बलं धनबलमेव कारणं हेतुः ॥ २ ॥

दाम्पत्येति । दाम्पत्ये भर्तृभार्यात्वे अभिरुचिरेव कारणं नत्वाभिजात्यादिः व्यावहारिके क्रयविक्रयादिव्यापारे माया वञ्चनमेव नतु निष्कापट्य व्यावहारिकीतिपाठे लोकव्यवहारसिद्धा मायैव विवेकप्रतिबन्धनीत्यर्थः । स्त्रीत्वे पुंस्त्वे च तयोः प्राशस्त्ये रतिकौशलमेव हेतुर्नतु स्त्रीत्वपुंस्त्वैकान्तगुणावृत्तयः सूत्रमेव नतु उपनयनादि ॥ ३ ॥

लिङ्गमेवेति । आश्रमाणां ख्यातौ ज्ञाने लिङ्गमेव दण्डाजिनादिकमेव हेतुर्नत्वाचारविशेषः अन्योन्यापत्तिकारणम् आश्रमादाश्रमान्तरप्राप्तौ च कारणं वर्णान्तरात् वर्णान्तरप्राप्तौ नीचोत्तमभावप्राप्तौ वा कारणमित्यर्थः । अवृत्तिः दरिद्रता न्याये दौर्बल्यं पराजयः मन्तव्यमन्तपाठे तस्यां सत्यां न्यायदौर्बल्यं सा न्यायदौर्बल्ये हेतुरित्यर्थः । पाण्डित्ये चापलं वचः बहुभाषणं हेतुः ॥ ४ ॥

अनाढ्यतैवेति । असाधुत्वे निकृष्टत्वे अनाढ्यतैव हेतुः नतु कुलहीनता साधुत्वे उत्कृष्टत्वे दम्भः देहालङ्कारः उद्वाहे विवाहे स्वीकरणमेव नतु शास्त्रीयविधिः प्रसाधनं शरीरमलापनयनमेव स्नानं नतु विशुद्धतीर्थावगाहनम् ॥ ५ ॥

दूरे इति । यद्दूरे वर्तमानं वार्ययनं जलाशयस्तत् तीर्थं नतु गङ्गादिः नतु गुर्वादियों लावण्ये निमित्ते केशधारणं नतु शास्त्रविहिताङ्गत्वेन उदरभरणमेव सर्वपुरुषार्थः सत्यत्वे सत्यवादित्वे धार्ष्ट्यं प्रसहिष्णुत्वं नतु अनृतवादित्वम् ॥ ६ ॥

दाक्ष्ये समर्थत्वे कुटुम्बभरणं नतु धर्मादिपुरुषार्थसम्पादनं यशोर्थे नतु पारलोकार्थं एवम् इत्थम्भूताभिः प्रजाभिराकीर्णे भूमण्डले ॥ ७ ॥

ये ब्राह्मणादयस्तेषां मध्ये यो बली स एव नृपो भविता प्रजा हानि लुब्धैरर्थकामपरैरत एव निर्घृणैर्निष्कृपैः दस्युधर्मभिः चौरव्याघ्रप्रवृत्तिभिः राजन्यैः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कल्कचरितं तच्चरितं च युगविभागलक्षणं च वक्त्यस्मिन्नध्याये; तत्रादौ कलिवैभवमाह—ततश्चेति । कालस्वभावान्तरं धर्मादयो नङ्क्ष्यन्तीत्यन्वयः । कारकाभावादिति शेषः ॥ १ ॥

यदि कलौ नृणां वित्तमस्ति तर्हि तेषां जन्मादयः पूज्याः स्युरिति शेषः । अयं धर्मोऽयं न्याय इति व्यवस्थायां बलमेव कारणं धनमिति वा पाठः ॥ २ ॥

अभिरुचिरन्योन्यस्नेहलक्षणोक्ता हेतुः न कुलगोत्रादिगुणसम्बन्धः व्यावहारिके क्रयविक्रयादिव्यवहारविषये मायैव हेतुः अतिरतिः अतितरां मनोदर्शनीयताविशेषः सूत्रं तन्तुबन्धम् ॥ ३ ॥

आश्रमाणां ख्यातौ ज्ञाने अयमयमाश्रम इति ज्ञातव्ये अन्योन्यापत्तिकारणम् आश्रमादाश्रमान्तरप्राप्तिकारणं लिङ्गमुपाध्यायाः, खलत्वं छादनम् अन्यायदौर्बल्ये अन्यायाकरणे अवृत्तिवृत्तिराहित्यं दुरवमाथ एव हेतुः कृतोन्यायोन्याय इत्यर्थः अचापलम् अचञ्चलताभाषणं वचः कारणमित्यनुवर्तते ॥ ४ ॥

अनाढ्यता दारिद्र्यम् असाधुत्वे दुष्टत्वे स्वं मम जाया इति स्वीकारः हेतुः प्रसाधनं शरीरस्य शुचिरलङ्कारो वा ॥ ५ ॥

दूरवार्ययनं दूरतरजलयात्रा यत्र क्रियते तत्तीर्थं नतु गुर्वादि केशधारणं धम्मिल्लधारणम् उदरम्भरता स्वोदरपूर्णता स्वार्थः स्वप्रयोजनम् ॥ ६ ॥ ७ ॥

अथ ब्राह्मणाः दस्यूनां धर्माणि चौर्यादीनि येषां ते तथा तैः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—५ ॥

लावण्ये निमित्ते केशधारणमेव कारिष्यन्ति इति गम्यमानामन्वयः ॥ ६—२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

द्वितीये तु कलेर्दोषस्तदन्ते कल्किसम्भवः ।
कलेर्वृद्धिपरिम्लान तदन्ते सत्यमुच्यते ॥

कलिदोषानाह—तत इति ॥ १ ॥

वित्तमेवेति यस्य वित्तं वर्तते स एव सत्कुलजन्मा स एव सदाचारः स एव सद्गुणः इत्येवमेवात्र अपि व्याख्येयम् ॥ २ ॥ ३ ॥

अन्योन्यापत्तौ परस्परमुत्कर्षापकर्षप्राप्तौ लिङ्गमेव दण्डाजिनाक्षमालादिकमेव कारणं न तु ज्ञानसदाचारादिकम् अवृत्त्या मुद्राद्यर्पणासामर्थ्येनैव हेतुना न्यायदौर्बल्यं न्याये पराजयः चापलं वचः चापलयुक्तं भाषणम् ॥ ४ ॥ ५ ॥

वार्ययनं जलाशयः ॥ ६—१४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

कलिदोषं पुनः कृतप्रवृत्त्यादिकं च द्वितीयेऽध्याये निरूपयति, तत्र यदुक्तं श्लोकगाथाः शृण्वतो भविष्यन्तीत्यादितदनन्तरं किं भविष्यतीत्याकाङ्क्षायामाह—तत इति ॥ १ ॥

जन्माचारगुणानां मूलं यस्मात् स तथा जन्मादीनाञ्च हेतुर्वित्तमेव यो वित्तवान् स एव श्रेष्ठजन्मादिमानित्यर्थः । तथा

आच्छिन्नदारद्रविणा यास्यन्ति [illegible]
शाकमूलामिषक्षौद्रफल[illegible]
अनावृष्ट्या विन[illegible]
शीतवातातप[illegible] ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः

धर्मन्यायव्यवस्थायां बलमेव कारणं हेतुः क[illegible]
योज्यम् ॥ २ ॥

किञ्च दाम्पत्ये जायापतिभावे अभिरुचिरेव हेतुर्नतु कुलगोत्रादिः व्यावहारिके क्रयविक्रयादौ माया वञ्चनैव हेतुः नतु सत्यभाषणं स्त्रीत्वे पुंस्त्वे च तयोः श्रेष्ठत्वे रतिः अत्यासक्तिरेव हेतुर्नतु स्वधर्माचारः विप्रत्वे सूत्रमेव हेतुर्नतु सन्ध्योपासनसत्यशौचादिः ॥ ३ ॥

आश्रमाणां ख्यातौ ज्ञाने दण्डाजिनादिकं हेतुर्नतु गुरुशुश्रूषादि अन्योऽन्यतः दानदीक्षादिभिः आपत्तौ प्राप्तौ च लिङ्गम् हेतुर्नतु पात्रत्वादिः न्याये सदोषत्वनिर्दोषत्वाख्यां निग्रहानुग्रहलीलौ अवृत्त्या दौर्बल्यं निर्धनत्वादिना दण्डयत्वं भवति नतु सदोषत्वेन, पाण्डित्ये चापलंबलः लोकरञ्जनार्थं बहुभाषणं न तु तत्त्वज्ञता असाधुत्वे दरिद्रत्वे असाधुत्वे अनाढ्यता धर्माचरणादिराहित्यमेव हेतुर्नतु दुष्कृतित्वं साधुत्वे आदरणीयत्वे दम्भ एव नतु सुकृतित्वम् उद्वाहे विवाहे स्वीकार एव नतु पाणिग्रहणमन्त्राः प्रसाधनमलङ्कारः ॥ ४-५ ॥

यावन्तं जलाशयः दूरे स्थितं तीर्थं भवति यथाविहारप्रदत्वात्तु—

> गङ्गां च यमुनां चैव पुण्यजातां सरस्वतीम् ।
> रथवर्णां सरयूं चैव गण्डकीं गोमतीं तथा ॥
> अपर्युषितपापास्ते नद्यो सप्त पिबन्ति ये ॥

इति महाभारतादिप्रसिद्धानि तीर्थानि लावण्येति मिथ्रं केशधारणं नतु यथाशास्त्र ब्रह्मचर्यादिनिमित्तम् उदरंभरता उदरम्भरत्वमौपस्थ्यजेह्वयकसुखसाधनाचरणपरत्वं स्वार्थः पुरुषार्थः नतु तपोऽध्ययनाद्याचरणम् ॥ ६ ॥ ७ ॥ ८ ॥

भाषा टीका ।

श्रीकल्किभगवते नमः ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—हे राजन् ! तदनंतर बड़े बलवान् काल के प्रभाव से दिनोदिन धर्म, सत्य, शौच, क्षमा, दया, आयु, बल, स्मृति, ये सब नष्ट होते जांयगे अर्थात् घटते जांयगे ॥ १ ॥

कलियुग में जिन मनुष्यों के समीप धन होगा वेही उत्तम जन्मवाले, शुद्ध आचार वाले, उत्तम गुणवाले कहावेंगे, और धर्म न्याय की व्यवस्था में बल ही कारण होगा, अर्थात् जो बली होगा वह युक्त अयुक्त जैसा धर्म का न्याय निबेडेगा वही सबको मान्य होगा ॥ २ ॥

स्त्री पुरुष के युगल जोड़ी होने में राजी होना ही कारण रह जायगा, कुल गोत्र आदि से कुछ प्रयोजन नहीं, क्रय विक्रय आदि व्यवहार में कपट ही प्रधान रहेगा, स्त्रीपने और पुरुषपने में केवल रति कुशलता ही कारण होगी, कुल आचार कुछ नहीं, एवं ब्राह्मणपने में केवल यज्ञोपवीत (जनेऊ) मात्र का पहिरना रहजायगा और कर्म नहीं ॥ ३ ॥

आश्रम की पहिचान में दंडादिक आश्रम का चिन्हमात्र कारण रहेगा, और वही चिन्ह बदलना, आश्रम के बदलने में कारण होगा, आश्रम के अनुगुण आचारादिक कुछ नहीं। और घूंस रिसवत के देने में सामर्थ्य न होना ही। राजकीय न्याय (मुकद्दमा) मे हारने का कारण होगा, अपराध की सत्यता नहीं । बातों की चपलता ही पंडिताई में प्रधान कारण होगी, शास्त्राध्ययन आदि कुछ नहीं ॥ ४ ॥

निर्धनपना ही असज्जनता में कारण होगा, खोटा आचार नहीं । दंभ करना ही साधुता में कारण होगा, सदाचार नहीं । स्वीकार करलेना मात्र ही विवाह में कारण होगा, विधि नहीं । स्नान करना ही अलंकार समुझा जावेगा, भूषण वस्त्र तो कहां से आवेंगे ॥ ५ ॥

दूर जो जल हो वही तीर्थ समुझा जावेगा, हरि गुरु देव स्थल नहीं । केशधारण ही लावण्य में हेतु होगा, पेट भरलेना ही स्वार्थ कहावेगा, ढीठता ही सत्यपने में हेतु होगी ॥ ६ ॥

कुटुम्ब का पालन करना ही चतुराई होगी, यश के लियेही धर्म किया जावेगा, इस प्रकार की दुष्ट प्रजा से जब पृथिवी मंडल व्याप्त हो जावेगा ॥ ७ ॥

तब ब्राह्मण, क्षत्रिय, वैश्य, शूद्र, इनमें जो बली होगा वही राजा होजावेगा, और चोरों के सदृश धर्मवाले निर्दय लोभी राजा लोग, अपनी प्रजा के स्त्री और धन को छीन लिया करेंगे, इसी डर से प्रजा लोग पर्वतों में वनों में जाकर निवास करेंगे, और शाक, मूल, आमिष (मांस) मधु, फल, फूल, बीज अथवा छाल, से अपने भोजन का निर्वाह करेंगे ॥ ८ ॥ ९ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आच्छिन्ना अपहृता दारा द्रविणानि च येषां च ताः आच्छिन्नम् ॥ ९ ॥ १० ॥ ११ ॥

क्षुत्तृड्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया ।
त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम् ॥ ११ ॥
क्षीयमाणेषु देहेषु देहिनां कलिदोषतः ।
वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणाम् ॥ १२ ॥
पाषण्डप्रचुरे धर्मे दस्युप्रायेषु राजसु ।
चौर्यानृतवृथाहिंसा नानावृत्तिषु वै नृषु ॥ १३ ॥
शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु ।
गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु ॥ १४ ॥
अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु ।
विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु ॥ १५ ॥
इत्थं कलौ गतप्राये जने तु खरधर्मिणि ।
धर्मत्राणाय सत्त्वेन भगवानवतरिष्यति ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

क्षीयमाणेष्वित्यादीनामित्थं कलौ गतप्राये इति पञ्चमेनान्वयः क्षीयमाणेष्वल्पप्रायेषु ॥ १२ ॥

दस्युप्रायेषु चोरतुल्येषु चौर्यानृतवृथाहिंसाद्या नाना वृत्तयो येषां तेषु ॥ १३ ॥

छागप्रायासु प्रमाणतः क्षीरतश्चाजातुल्यासु ॥ १४ ॥

अणुप्रायासु श्यामाकतुल्यासु स्थास्नुषु वृक्षेषु विद्युत्प्रायेषु तडिद्बहुलेषु शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु ॥ १५ ॥

जने तु खरधर्मिणि दुःसहचेष्टिते कलौ गतप्राये समाप्तप्राये ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आच्छिन्नाः अपहृता दाराः द्रविणानि च यासां ताः प्रजाः गिरिकाननं चाश्रयन्ति तत्र शाकादिभोजनाः तत्र क्षौद्रं मधु अष्टिर्बीजम् ॥ ९ ॥

तत्राप्यनावृष्ट्या यः दुर्भिक्षकरः शाकाद्यभावकरः कालस्तेन यद्वा दुर्भिक्षे यः करः स्वामिग्राह्यो भागः तेन पीडिताः शीतादिभिरन्योन्यतश्च पीडिताः नङ्क्ष्यन्ति प्रावृषि हिममेव केवलं नतु वृष्टिरित्यभिप्रायेण प्रावृडित्युक्तं तृतीयान्तानामसामर्थ्येऽपि सामर्थ्यात्पीडिता इत्यनेन सम्बन्धः । तत्र सन्तापस्त्रिविधः तापः इत्थं पीडितानां नृणां परमायुर्विंशतिस्त्रिंशद्वर्षाणि ॥ १० ॥ ११ ॥

क्षीयमाणेष्विति—सप्तश्लोकानाम् इत्थं कलौ गतप्राये सतीति पञ्चमेन सम्बन्धः । वर्णाश्रमाचारादीनामपि वेदपथे वेदमार्गे तदुक्ते धर्मे च नष्टे सति ॥ १२ ॥

राजसु दस्युप्रायेषु सत्सु तदेव विवृणोति—चौर्येति चौर्यादिना वृत्तयो येषां तेषु ॥ १३ ॥

धेनुषु छागप्रायासु प्रमाणतः क्षीरतश्चाजातुल्यासु आश्रमेषु गृहप्रायेषु तद्धर्मैथुनधर्मपरेषु सत्सु बन्धुषु यौनप्रायेषु योनिसम्बन्धमात्रप्रधानेषु ॥ १४ ॥

ओषधीषु धान्येष्वणुप्रायासु अतिसूक्ष्मासु स्थास्नुषु वृक्षेषु शमीप्रायेषु परिमाणतः छायातः फलतश्च तुल्येषु इत्यर्थः मेघेषु विद्युत्प्रायेषु तडिद्बहुलेषु सद्मसु गृहेषु शून्यप्रायेष्वतिथिभोजनादिधर्मरहितेषु सत्सु ॥ १५ ॥

इतीत्थं खरधर्मिणि दुःसहचेष्टिते कलौ सत्त्वेन शुद्धसत्त्वमयेन देहेन ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आच्छिन्नदारद्रविणाः बलाद्गृहीतभार्यावित्ताः क्षौद्रं मधु "मधु मद्यं मधुक्षौद्रं मधुपुष्परसं विदुः" इत्यभिधानं शाकादिभोजनं येषां ते तथा ॥ ९ ॥

दुर्भिक्षकरनिमित्तपीडिताः हिमं नीहारः ॥ १० ॥

तृषया तृष्णया व्याधिभिः कुष्ठादिभिः ॥ ११ ॥ १२ ॥

चौर्यादयो नानावृत्तयो येषां ते तथा ॥ १३ ॥

छाग अत्र तृणभक्षो छिन्नदपत्यासं प्रति गृहमात्रमेव बन्धुत्वं योनिसम्बन्धमात्रम् ॥ १४ ॥

अणुप्रायेषु कलमाषप्रचुरासु जनशून्यप्रायेषु ॥ १५ ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

स्थास्नुषु वृक्षेषु ॥ १५ ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अष्टिर्बीजम् ॥ ९ ॥ १० ॥ ११ ॥

क्षीयमाणेष्वित्यादिसप्तश्लोकानामित्थं कलौ गतप्राये इति पञ्चमेन सम्बन्धः ॥ १२—१४ ॥

स्थास्नुषु वृक्षेषु ॥ १५ ॥

खरधर्मिणि सङ्घसंघातके गतप्राये समाप्तप्राये सत्त्वेन,

चराचरगुरोर्विष्णोरीश्व[illegible]
धर्मत्राणाय साधूनां [illegible] ॥
शम्भलग्राममुख्यस्य [illegible]नः ।
भवने विष्णुयशसः क[illegible]विष्यति ॥ १८ ॥
अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः ।
असिनाऽसाधुदमनमष्टैश्वर्यगुणान्वितः ॥ १९ ॥
विचरन्नाशुना क्षोण्यां हयेनाप्रतिमद्युतिः ।
नृपलिङ्गच्छदो दस्यून् कोटिशो निहनिष्यति ॥ २० ॥
अथ तेषां भविष्यन्ति मनांसि विशदानि वै ।
वासुदेवाङ्गरागातिपुण्यगन्धाऽनिलस्पृशाम् ।
पौरजानपदानां वै हतेष्वखिलदस्युषु ॥ २१ ॥
तेषां प्रजाविसर्गश्च स्थविष्ठः सम्भविष्यति ।
वासुदेवे भगवति सत्त्वमूर्त्तौ हृदि स्थिते ॥ २२ ॥
यदाऽवतीर्णो भगवान् कल्किर्धर्मपतिर्हरिः ।
कृतं भविष्यति तदा प्रजासूतिश्च सात्त्विकी ॥ २३ ॥
यदा चन्द्रश्च सूर्यश्च तथा तिष्यबृहस्पती ।
एकराशौ समेष्यन्ति तदा भवति तत्कृतम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नियन्तृभूतेन सत्त्वगुणेनोपलक्षित अवतरिष्यति आवि र्भविष्यति ॥ १९ ॥

भाषा टीका ।

वृष्टि न होने से दुर्भिक्ष और कर से पीडित होकर प्रजा अति दुःखित होकर, शीत, वात, आतप, वर्षा, हिम, इन हेतुओं से तथा परस्पर में क्लेश पाकर प्रजा के लोग नष्ट होवें गे ॥ १० ॥

क्षुधा, तृषा, व्याधि, सन्ताप, और चिन्ता से बहुत लोग नष्ट होजांयगे, और कलियुग में तीस वर्ष वा२० वर्ष पर्यन्त की मनुष्यों की बड़ी आयु कहावे गी ॥ ११ ॥

इस प्रकार जब कलियुग के दोषों से देह धारियों के देह भी क्षीण होने लगेंगे, और मनुष्यों के वर्णाश्रमों के धर्म नष्ट हो जांयगे तथा वेद का मार्ग जब नष्ट होजायगा ॥ १२ ॥

धर्म जब पाखंड प्रचुर हो जायगा, राजा लोग जब चोर-प्राय हो जांयगे, एवं चोरी, झूंठ, व्यर्थ हिंसा इत्यादिक में निरत नाना प्रकार की जब मनुष्यों की वृत्ति होजायगी ॥ १३ ॥

सब वर्ण जब शूद्रप्राय हो जांयगे, और गायें जब बकरी सदृश हो जांयगी, आश्रम जब गृहप्राय हो जांयगे, और योनि सम्बन्धि मात्र जब बन्धु हो जांयगे ॥ १४ ॥

औषधि जब अणुप्राय हो जांयगी, वृक्ष जब शमीप्राय हो जांयगे, वर्षा समय में बिजुली मात्र का जब अधिक कौंधा हुआ करेगा, और वर्षा कुछ न होगी, गृहस्थ लोगों के गृह जब किसी कारणों से शून्य प्राय हो जांय गे, ॥ १५ ॥

तब चराऽचर गुरु अखिलात्मा सम्पूर्ण जगत् के नियन्ता ऐसे श्रीविष्णु भगवान् का अवतार, साधु जनों के धर्म की रक्षा के लिये और उनके कर्म छुडाने के लिये, अर्थात् मोक्ष देने के लिये होगा ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एतत्प्रपञ्चयति-चतुर्भिः । चराचरगुरोरीश्वरस्येति च धर्म-त्राणे हेतुः गुरुत्वेश्वरत्वयोरुपपादानमखिलस्य विश्वस्याऽऽत्मनः कारणस्येति एवम्भूतस्य विष्णोर्जन्म साधूनां धर्मत्राणाय धर्म-त्राणप्रयोजनमाह—कर्मोपनुत्तये मोक्षाय ॥ १७ ॥

शम्भलग्रामे मुख्यस्य प्रधानस्य नाम्ना विष्णुयशसो ब्राह्म-णस्य भवने गृहे ॥ १८ ॥

श्रीधरस्वामिकृत[illegible] ।

धर्मत्राणप्रकारमाह—अश्वमिति । यद्वाश्वो देवदत्तो येन तमश्वमारुह्यासिना दस्यून् कोटिशो निहनिष्यतीत्युत्तरेणान्वयः । असाधुदमन इति पाठे कल्किविशेषणम् अणिमाद्यैश्वर्याणि गुणाश्च सत्यसङ्कल्पत्वादयस्तैरन्वितः ॥ १९ ॥

तत्प्रपञ्चः आशुना शीघ्रगामिना तेन हयेनाश्वेन क्षोण्यां पृथिव्यां विचरन् नृपलिङ्गच्छदो राजवेषच्छन्नान् ॥ २० ॥

ततश्च पुनः कृतयुगप्रवृत्तिं वक्तुमाह—अथेति, सार्द्धाभ्याम् । तेषां पौरजानपदानां मनांसि विशदानि भविष्यन्ति तत्र हेतुः वासुदेवस्याङ्गरागस्य चन्दनादिनाऽतिपुण्यगन्धो योऽनिलस्तं स्पृशन्तीति तथा तेषाम् ॥ २१ ॥

स्थविष्ठः स्थूलः ॥ २२ ॥

कृतयुगप्रवृत्तिमाह—यदावतीर्ण इति । प्रजानां सूतिः प्रसूतिः ॥ २३ ॥

तदवतारकालोपलक्षणमाह—यदा चन्द्रश्चेति । तिष्यः पुष्यः अयमर्थः चन्द्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगस्तदा तत् कृतयुगं भविष्यति यद्यपि च प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ वर्तमाने त्रिंशत्स्वमावास्यासु तेषां त्रयाणामपि पुष्ययोगः सम्भवति तथाऽपि तेषां सह प्रवेशोऽत्र विवक्षितः समेष्यन्तीति वचनात् अतो नातिप्रसङ्गः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आशुना आशुगतिना ॥ २०—२७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

धर्मत्राणायेत्यनेन धर्मपरित्राणमेवावतारप्रयोजनम् इत्युक्तं तदेव सहेतुकमुपपादयति—चराचरगुरोरिति । विशेषणानि हेतुगर्भविशेषणानि गुरुशब्देन हितप्रवर्तकत्वमभिप्रेतं तस्य सर्वविषयकत्वस्फोरणायाखिलात्मन इत्युक्तम् आत्मत्वं न केवलमन्तःप्रविश्य धारकत्वमेवापितु तत्प्रशासनगर्भमिति द्योतनायेश्वरस्येत्युक्तम् एवम्भूतस्य विष्णोर्जन्मावतारः साधूनां धर्मत्राणाय तत्प्रयोजनमाह—कर्मापनुत्तय इति । निःश्रेयसप्रतिबन्धककर्मनिवर्तनाय यद्वा दुष्कर्मनिवर्तनाय वा "विनाशाय च दुष्कृताम्" इत्युक्तेः ॥ १७ ॥

क्वावतरिष्यति ? किन्नाम ? इत्यत आह—शम्भलेति । शम्भलग्रामे मुख्यस्य श्रेष्ठस्य विष्णुयशसः भवने गृहे कल्किरितिनामावतरिष्यति ॥ १८ ॥

तस्य चेष्टितमनुवर्णयति द्वाभ्याम्—अश्वमिति । देवदत्तनामानम् आशु गच्छतीति तदा तमश्वमारुह्यासिनाऽसाधून् दमयतीति तथा दस्यून् कोटिशो निहनिष्यतीति उत्तरेण सम्बन्धः । अष्टैश्वर्याणि अणिमादीनि गुणाः शौर्यवीर्यादयः तैरन्वितः आशुना आशुगतिनाऽश्वेन क्षोण्यां पृथिव्यां विचरन् नृपलिङ्गच्छदः राजवेषच्छन्नान् ॥ १९—२० ॥

अथेति । अखिलेषु दस्युषु हतेषु सत्सु अथ तेषां पौरजानपदानां वासुदेवस्य कल्केः योऽङ्गरागः तस्य योऽतिशयितः पुण्यगन्धवायुः तं स्पृशन्तीति तथा तेषां हेतुगर्भमिदम् अतः मनांसि विशदानि निर्मलानि भविष्यन्ति ॥ २१ ॥

तेषां विशदमानसानां प्रजाविसर्गः पुत्रादिरूपः प्रपञ्चः स्थविष्ठः स्थूलः सम्भविष्यति वासुदेव इति हृदि स्थित इत्यस्य मनस्सु सात्त्विकं भविष्यतीति शेषः ॥ २२ ॥

तदा पुनः कृतयुगप्रवृत्तिमाह—यदेति । धर्मपतिर्धर्मगोप्ता कल्किरूपेणावतीर्णः तदा कृतयुगं भविष्यति तदा प्रजानां सूतिः प्रसूतिः सात्त्विकी सत्त्वगुणप्रधाना ॥ २३ ॥

कृतयुगप्रवृत्तिकालोपलक्षणमाह—यदेति । तिष्यः पुष्यः यदा सूर्यादयस्त्रयः एकराशौ सङ्गता भवन्ति तदा ततः कृतयुगं प्रवर्तत इत्यर्थः । यद्यपि प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ वर्तमाने त्रिंशत्स्वमावास्यासु तेषां त्रयाणामपि पुष्ययोगस्सम्भवति तथापि तेषां सह प्रवेशोऽत्र विवक्षितः "समेष्यन्ति" इति वचनात् अतो नातिप्रसङ्गः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विष्णोर्जन्म कर्म च साधूनां धर्मत्राणाय दुष्कर्मापनुत्तये च स्यादिति शेषः ॥ १७ ॥

शम्भलग्रामे मुख्यस्य प्रधानस्य नाम्ना विष्णुयशसः ब्राह्मणस्य भवने गृहे ॥ १८ ॥

आशुगं शीघ्रगामिनम् ॥ १९ ॥

नृपलिङ्गच्छदः राजलक्षणाच्छन्नान् ॥ २० ॥

वासुदेवस्याङ्गरागस्य चन्दनाद्यनुलेपनस्य प्रशस्तपुण्यगन्धेन युक्तं वायुं स्पृशन्तीति वासुदेवाङ्गरागातिपुण्यगन्धानलस्पृशः तेषाम् ॥ २१ ॥

प्रजाविसर्गः सन्ततीनामुत्पत्तिः स्थविष्ठः बहुलः ॥ २२ ॥

प्रजासूतिः सन्तानोत्पत्तिः ॥ २३ ॥

कृतप्रारम्भे लक्षणान्तरमाह—यदेति । तिष्यः पुष्यः चन्द्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रयोगः तदा कृतयुगं भविष्यति यद्यपि प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ वर्तमाने त्रिंशत्स्वमावास्यासु तेषां त्रयाणामपि पुष्ययोगः सम्भवति तथापि तेषां सह प्रवेशोऽत्र विवक्षितः "समेष्यन्ति" इति वचनात् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

विष्णोर्जन्म भविष्यति साधूनां कर्मापनुत्तये मोक्षाय ॥ १७ ॥ १८ ॥

देवैः प्रदापितत्वाद्देवदत्तम् ॥ १९ ॥

आशुना शीघ्रगामिना असाधवो दम्यन्ते येन तमसाधुदमनं नृपलिङ्गच्छदः राजवेषच्छन्नान् ॥ २० २१ ॥

स्थविष्ठः धर्मनिष्ठतया स्थूलतरः ॥ २२ ॥

सूतिः प्रसूतिः ॥ २३ ॥

सत्ययुगारम्भकालं लक्षयति—यदेति । तिष्यः पुष्यः अयमर्थः चन्द्रसूर्यबृहस्पतीनां यदा पुष्यनक्षत्रे योगस्तदा कृतयुगं भविष्यतीति यद्यपि प्रतिद्वादशाब्दं कर्कराशौ बृहस्पतौ वर्तमाने त्रिंशत्सु अमावास्यासु तेषां त्रयाणामपि पुष्ययोगः सम्भवति

ये ऽतीता वर्त्तमाना ये [illegible]
ते त उद्देशतः प्रो[illegible] ॥
आरभ्य भव[illegible]
एतद्वर्षसहस्रं [illegible] ॥ २६ ॥
सप्तर्षीणां तु [illegible] उदितौ दिवि ।
तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥ २७ ॥
तेनैव ऋषयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् ।
ते त्वदीये द्विजाः काले अधुना चाश्रिता मघाः ॥ २८ ॥
विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः ।
तदाऽविशत्कलिर्लोकं पापे यद्रमते जनः ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तथापि तेषां मह प्रवेशोऽत्र विवक्षितः "समेष्यन्ति" इति वचनात् अतो नातिप्रसङ्गः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एतत्प्रपञ्चयति—चराचरगुरोरिति चतुर्भिः । साधूनां बुभुक्षूणां मुमुक्षूणां च धर्मत्राणाय स्वर्गादिसाधनरक्षणाय कर्मोपनुत्तये मोक्षाय च विष्णोर्जन्म ॥ १७ ॥ १८ ॥

देवदत्तसञ्ज्ञम प्रसाधवो दस्यन्ते येन तमाशुगं शीघ्रगम् अश्वमारुह्य दस्यून् निहनिष्यतीत्युत्तरेण सम्बन्धः । अष्टैश्वर्यैः अणिमादिभिः गुणैः सत्यसङ्कल्पादिभिश्च अन्वितः ॥ १९ ॥

आशुना शीघ्रगामिना नृपलिङ्गच्छदः नरपालवेषच्छन्नान् ॥ २० ॥

तदनन्तरं पुनः कृतयुगप्रवृत्तिं वक्तुमाह—अथेति, सार्द्धद्वाभ्याम् । अखिलेषु दस्युषु हतेषु वासुदेवे हृदि स्थिते च मतिः तेषां वासुदेवस्य योऽङ्गरागस्तस्यातिपुण्यगन्धवायुं स्पृशन्तीति तथा तेषां पौरजानपदानां मनांसि विशदानि निर्मलानि भविष्यन्ति प्रजानां पुत्रपौत्रादीनां विसर्गश्च स्थविष्ठः स्थूलो भविष्यतीति सार्द्धद्वयोरन्वयः ॥ २१ ॥ २२ ॥

कृतयुगप्रवृत्तिमाह—यदेति । प्रजानां सूतिं प्रसूतिं सात्विकी सत्वगुणप्रधाना ॥ २३ ॥

कृतयुगप्रवृत्तिकालोपलक्षणमाह—यदेति । तिष्यः पुष्यः समेष्यन्ति युगपत्प्रवेशं करिष्यन्ति ॥ २४ ॥

भाषा टीका ।

इस प्रकार जब कलियुग प्राय करके बहुत बीत जायगा, और मनुष्य जब गर्दभ के सदृश चेष्टा वाले हो जावेंगे, तब धर्म की रक्षा के अर्थ भगवान् सत्व गुण से अवतार लेवेंगे ॥ १७ ॥

शम्भल ग्राम के विषे मुख्य महात्मा विष्णुयशा ब्राह्मण के गृह में कल्कि अवतार धारण कर भगवान् प्रकट होवेंगे ॥ १८ ॥

और देवताओं के दिये हुये शीघ्र गामी घोड़ा पर बैठकर, अष्ट ऐश्वर्य गुण युक्त जगत्पति कल्कि भगवान् हाथ में खड्ग लेकर दुष्टों का दमन करेंगे ॥ १९ ॥

अतुल कान्ति वाले श्रीकल्कि भगवान् शीघ्र गामी घोड़ा पर बैठकर विचरते हुए राजाओं के वेष धरने वाले किरोड़ो चोट्टों को मारेंगे ॥ २० ॥

जब सब चोट्टे दुष्ट लोग नष्ट होजांयगे तब श्रीवासुदेव भगवान् के श्रीअङ्ग के चन्दन की सुगन्ध को लेकर जो पवन चलेगा, उस पवन के स्पर्श मात्र से पुरवासी देशवासी लोगों के मन निर्मल पाप रहित होजांयगे ॥ २१ ॥

जब सत्व मूर्ति भगवान् वासुदेव उन लोगों के हृदय में विराजेंगे, तब उनकी सन्तान सतयुग सदृश दीर्घ और स्थूल होने लगेगी ॥ २२ ॥

जब धर्म के पति श्रीकल्कि भगवान् अवतार लेवेंगे, उसी समय से सतयुग हो जावेगा, और प्रजा की पैदाइस सात्विकी हो जावेगी ॥ २३ ॥

यह नियम है, कि—जब चन्द्र सूर्य और बृहस्पति, पुष्य नक्षत्र के साथ योग होता है, अर्थात् एक राशि में चारों जब एकही साथ प्रविष्ट होकर, स्थित होते हैं तबहीं कृत युग होता है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं नवमस्कन्धमारभ्यानुक्रान्तं वैवस्वतमनोर्वंशद्वयं निगमयति—येऽतीता इति । उद्देशतः संक्षेपतः ॥ २५ ॥

यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ।
तावत्कलिर्वै पृथिवीं पराक्रान्तुं न चाऽशकत् ॥ ३० ॥
यदा देवर्षयः सप्त मघासु विचरन्ति हि ।
तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥ ३१ ॥
यदा मघाभ्यो यास्यन्ति पूर्वाषाढां महर्षयः ।
तदा नन्दात्प्रभृत्येष कलिर्वृद्धिं गमिष्यति ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कलियुगावान्तरविशेषं वक्तुमाह—आरभ्येत्यादिना । वर्षसहस्रं पञ्चदशोत्तरं शतं चेति कयापि विवक्षयाऽवान्तरसङ्ख्येयम् वस्तुतस्तु परीक्षिन्नन्दयोरन्तरं द्वाभ्यां न्यूनं वर्षाणां सार्धसहस्रं भवति यतः परीक्षित्समकालं मागधं मार्जारिमारभ्य रिपुञ्जयान्ता विंशतिराजानः सहस्रसंवत्सरं भोक्ष्यन्तीत्युक्तं नवमस्कन्धे "ये बार्हद्रथभूपाला भाव्याः साहस्रवत्सरम्" इति ततः परं पञ्चप्रद्योतना अष्टत्रिंशोत्तरं शतम् शिशुनागाश्च षष्ठ्युत्तरशतत्रयं भोक्ष्यन्ति पृथिवीमित्यभवाक्यत्वात् ॥ २६ ॥

कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह—सप्तर्षीणामित्विति । अयमर्थः प्रागग्रशकटाकारं तारासप्तकं सप्तर्षिमण्डलम् तत्र किञ्चिदुन्नतेषाऽग्रस्थानीयो मरीचिः ततः पश्चाद्दूनयुगकन्धराकारो वसिष्ठः सभार्यः ततः पश्चादीषदुन्नतेषामूलस्थानीयोऽङ्गिराः ततः पश्चाच्चतुरस्रताराचतुष्के ईशान्यामत्रिः ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहः तत उत्तरतः क्रतुः एवं स्थिते तेषां मध्ये यौ पूर्वौ उदयसमय एव प्रथममुदितौ दृश्येते पुलहक्रतुसंज्ञौ तयोस्तु मध्ये तयोस्तु पूर्वयोस्तु मध्ये यत्समं दक्षिणोत्तरे रेखायां समदेशावस्थितमश्विन्यादिषु यद्न्यतमं नक्षत्रं दृश्यते तेन तथैव युक्ता नृणामब्दशतं तिष्ठन्ति ते च द्विजास्त्वदीये कालेऽधुना मघाश्रिता वर्तन्ते ॥२७ ॥ २८ ॥

तेषु मघासु वर्तमानेषु सत्सु यदा विष्णोर्भानुर्भानीति भानुः शुद्धसत्त्वात्मको देहो दिवं वैकुण्ठं गतस्तदा कलियुगमविशत् यस्मिन् युगे जनः पापे रमत इति कलियुगस्य लक्षणम् ॥ २९ ॥

ननु, श्रीकृष्णे पृथिव्यां वर्तमानेऽपि सन्ध्यारूपेण कलिः प्रविष्ट एवाऽऽसीत् सत्यम् तथापि तावत्तस्य पराक्रमो नाभवदित्याह—यावदिति । पराक्रान्तुमभिभवितुम् ॥ ३० ॥

अतो यथोक्त एव कलिप्रवेशकाल इत्याह—यदा देवर्षय इति द्वादशाब्दशतात्मक इति । दिव्येन मानेन सन्ध्यासन्ध्यांशाभ्यां सह यो द्वादशाब्दशतात्मकः स कलिस्तदा सन्ध्यामतिक्रम्य प्रविष्ट इत्यर्थः ॥ ३१ ॥

कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह—यदेति । तदा प्रद्योतनारभ्य भूतिं वृद्धिं गच्छन्नन्दात्प्रभृत्यतिवृद्धिं गमिष्यतीत्यर्थः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ते द्विजाः सप्तर्षयः ॥ २८ ॥

तेषु मघासु वर्तमानेषु सत्सु यदा विष्णोर्भानुः शुद्धसत्त्वात्मको देहः दिवं वैकुण्ठं गतः तदा कलियुगोऽविशत यत् यस्मिन् युगे जनः पापे रमते इति कलियुगस्य लक्षणम् ॥ २९—४४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्कन्धत्रयार्थमुपसंहरति—येऽतीता इति । सोमसूर्यवंशीया वंशप्रभवाः ते तुभ्यम् उद्देशतः उत्पत्तिक्रमतः संक्षेपतो वा प्रोक्ताः ॥२५॥

भवज्जन्मप्रभृति यावत्सोमवंशसमाप्ति कियान् कालो भविष्यति इत्यभिप्रायमावेदयन्नाह—आरभ्येति । नन्दाभिषेचनपर्यन्तेव सोमवंश्यानुवृत्तिरतो यावन्नन्दाभिषेचनमित्युक्तम् एतदन्तरं वर्षाणां पञ्चदशोत्तरशतं सहस्रमित्यर्थः । वर्षसहस्रं पञ्चदशोत्तरं शतं चेति कयापि विवक्षयाऽवान्तरसङ्ख्येयं वस्तुतः परीक्षिन्नन्दयोरन्तरं द्वाभ्यां न्यूनं वर्षाणां सार्धसहस्रं भवति यतः परीक्षित्समकालं मागधं मार्जारिमारभ्य रिपुञ्जयान्ता विंशतिराजानः सहस्रसंवत्सरान् भोक्ष्यन्तीत्युक्तं नवमस्कन्धे "ये बार्हद्रथभूपाला भाव्याः साहस्रवत्सरम्" इति, ततः परं च प्रद्योतना अष्टत्रिंशोत्तरं शतं शिशुनागाश्च षष्ट्युत्तरशतत्रयं भोक्ष्यन्ति पृथिवीमित्यत्रैवोक्तत्वात् ॥ २६ ॥

कदा तर्हि कलियुगारम्भ इत्यभिप्रायमावेद्य तद्वृद्धिकालं च विवक्षुस्तावदारम्भकालमुपलक्षयन्नाह— सप्तर्षीणामिति द्वाभ्याम् । अयमर्थः प्रागग्रशकटाकारं तारासप्तकं सप्तर्षिमण्डलं तत्र किञ्चिदुन्नतेषाग्रस्थानीयो मरीचिस्ततः पश्चाद्दूनयुगकन्धराकारो वसिष्ठः सभार्यस्ततः पश्चादीषदुन्नतेषामूलस्थानीयोऽङ्गिराः ततः पश्चाच्चतुरस्रताराचतुष्के ईशान्येऽत्रिः ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहः तत उत्तरतः क्रतुः एवंस्थिते तेषां मध्ये यौ पूर्वौ उदयसमये प्रथममुदितौ पुलहक्रतुसंज्ञौ तयोस्तु मध्ये तयोः पूर्वयोस्तु मध्ये यत्समं दक्षिणोत्तरसमदेशावस्थितमश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्यते तेन तथैव युक्ता ऋषयः नृणामब्दशतं तिष्ठन्ति ते च द्विजा ऋषयः त्वदीये काले अधुना मघामाश्रित्य वर्तन्ते पूर्वयोर्मघाणां च साध्यास्त्वदीये काले अधुना मघामाश्रित्य वर्तन्त इत्युपक्रमकालः कलियुगारम्भकाल इति सूचितं तदग्रे स्पष्टमेव वक्ष्यति ॥ २७ ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कदा तर्हि युगाभिमानिपुरुषप्रवेश इत्यतस्तमुपलक्षयन्नाह—विष्णोरिति । भानुः भातीति भानुः प्रकाशबहुलः कृष्णाख्यो भगवतो देहः यदा दिवं वैकुण्ठं गतस्तदा कलिरिमं लोकं [illegible] अविशत् यद्यस्मादुयुगाभिमानिपुरुषाद्धेतोः जनः पापे [illegible] युगसन्धौ हि भगवदवतारः प्रवृत्तेऽपि कलौ [illegible] भगवतः स्वधामानुगमनात् पूर्वं कलिपुरुषो [illegible] सूच्यते ॥ २९ ॥

तत् स्पष्टमेवाह—यावदिति । सः श्रीकृष्णः कलिपुरुषं [illegible] पराक्रान्तुमभिभवितुं नाशकत्स्वकार्यक्षमो बभूवेत्यर्थः ॥ [illegible] ॥

सूचितमर्थं स्पष्टमाह—यदा देवर्षय इति । मघासु विचरन्ति तासां समजवे चरितुमारब्धवन्त इत्यर्थः । तदा कलियुगं तस्य परिमाणं द्वादशाब्दशतात्मकं इति दिव्येन मानेन सन्ध्यासन्ध्यांशाभ्यां सह यो द्वादशाब्दशतात्मकः स कलिः प्रवृत्त इति सम्बन्धः ॥ ३१ ॥

कदा तर्हि कलिधर्माभिवृद्धिरित्यतस्तामुपलक्षयन्नाह—यदा मघाभ्य इति, मघाभ्य इति पञ्चमी तत्सम्बन्धेऽशं विहाय पूर्वाषाढानां (पूर्वफल्गुन्योः) समीपं यास्यन्ति तदा ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं नवमस्कन्धमारभ्यानुक्रान्तं वैवस्वतमनोर्वंशद्वयमुपसंहरति—येऽतीता इति । उद्देशतः सङ्क्षेपतः ॥ २५ ॥

कलियुगावान्तरविशेषमाह—आरभ्येति । वर्षसहस्रं पञ्चदशोत्तरशतं चेति क्वापि विवक्षयाऽवान्तरसङ्ख्येयं वस्तुतः परीक्षिन्नन्दयोरन्तरं द्वाभ्यामूनं वर्षाणां सार्द्धसहस्रं भवति यतः परीक्षित्समकालं मागधमार्जारिमारभ्य रिपुञ्जयान्ता विंशति राजानः सहस्रवत्सरं भोक्ष्यन्तीत्युक्तं नवमस्कन्धे "ये बार्हद्रथ भूपाला भाव्याः साहस्रवत्सरम्" इति ततः परं च प्रद्योतना अष्टत्रिंशाधिकं शिशुनागाश्च षष्ठ्युत्तरशतत्रयं भोक्ष्यन्ति पृथिवीमित्यत्रैवोक्तम् ॥२६ ॥

कलेः प्रवृत्तिं वृद्धिं च निरूपयितुं कालज्ञानोपलक्षणमाह, सप्तर्षीणामिति । अयमर्थः प्रागग्रं शकटाकारं तारासप्तकं सप्तर्षिमण्डलं तत्र किञ्चिदुन्नतरेखाया अग्रस्थानीयो मरीचिः ततः पश्चाद्दानग्रयुगन्धराकारो वसिष्ठः सभार्यः ततः पश्चादीषद्दुष्ट स्तेषां मूलस्थानीयोऽङ्गिराः ततः पश्चाच्चतुरस्रताराचतुष्के ईशान्येऽत्रिः ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहः तत उत्तरतः क्रतुः एवं स्थिते तेषां मध्ये यौ पूर्वौ उदयसमये प्रथममुदितौ पुलहक्रतुसञ्ज्ञौ तयोस्तु मध्ये तयोः पूर्वभागे मध्ये यत्समं दक्षिणोत्तरः समदेशावास्थितमश्विन्यादिषु यद् दृश्यतेऽम नक्षत्रं दृश्यते ॥ २७ ॥

अस्तेन तथैव युक्ताः नृणामब्दशतं तिष्ठन्ति ते च द्विजाः स्ववधीये काले अधुना(म)घाम आश्रिता वर्तन्ते ॥ २८ ॥

तेषु ऋषिषु मघासु वर्तमानेषु सत्सु ॥ २९ ॥

पराक्रान्तुं स्वसामर्थ्यं दर्शयितुम् ॥ ३० ॥

[illegible] द्वादशेति ॥ ३१ ॥ [illegible] हित्वा पश्चाद्वृत्तिः सा कदेति [illegible]

[illegible] स्वामिकृतक्रमसन्दर्भः ।

[illegible] गुणावतारस्य विष्णोस्तदंशावादुभिमस्य [illegible] भानुः सूर्यमण्डलस्थामीव दिवं प्राप [illegible] गोचरं मथुरादीनामेव प्रकाशविशेषरूपं वैकुण्ठं [illegible] तदा कलिर्लोकमविशत् एषां च प्रकाशः पृथिवीलोऽ [illegible] नशक्त्या तामस्पृशन्नेव विराजते भक्तस्तथा न स्पृश [illegible] पृथिव्यादिभूतमयैरस्माभिर्वाराहोक्तमहाकदम्बादिरिव यस्तु प्राप [illegible] लोकगोचरो मथुरादिप्रकाशः सोऽयं कृपया पृथिवीं स्पृश [illegible] स्तावतीर्णः भक्ततया स्पृश्यते तादृशैरस्माभिर्दृश्यमानकदम्बादिरिव यस्मिंश्च प्रकाशे यदावतीर्णो भगवांस्तदा तत्स्पर्शेना [illegible] तत्स्पर्शास्तांस्पृशन्नेवास्ते स्म सम्प्रति तदस्पृष्टप्रकाशे विहरमाण [illegible] पुनरस्पृशन्नेव भवति यद्यप्येवं तथापि द्वयोर्भेदेन कश्चिदभेदे [illegible] विवक्षा तत्रतत्रावगन्तव्या ॥ २९ ॥

तदेतदभिप्रेत्याह—यावदिति । पराक्रान्तुमित्यनेन तत्पूर्वमपि किञ्चित्कालं व्याप्य प्रविष्टोऽस्तीति ज्ञापितम् ॥ ३०–४४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नवममारभ्योपक्रान्तां कथामुपसंहरति—येऽतीता इति ॥ २५ ॥

एतद्वर्षसहस्रमित्यत्रैव सङ्ख्या प्रमाणीकर्तव्या परीक्षित्समकालवर्तिमार्जारिप्रभृतीनामानन्त्यात् भोगकालसङ्ख्या तु [illegible] न्यून सार्द्धसाहस्रं यद्वर्षाणि भवन्ति तत्तेषां खण्डमण्डलपती [illegible] विनाप्यानन्तर्येण सङ्ख्यानीति ज्ञेयम् ॥ २६ ॥

अथ कलेरुत्पत्तिकालं वृद्धिकालं च निरूपयितुं कालज्ञा [illegible] विशेषमाह—सप्तर्षीणामिति । प्रागग्रं शकटाकारतारासप्तकं सप्तर्षिमण्डलं तत्रावयवसमपूर्वौ प्रथममुदितौ पुलहक्रतुसञ्ज्ञौ [illegible] निशि दृश्येते तयोर्मध्यगतमश्विन्याद्यन्यतममेकैकं नक्षत्रं तिष्ठति एकैकं शतवर्षं व्याप्य तेन तेनैव युक्ता ऋषयस्तिष्ठन्तीति नियमः अधुना तु ते मघाश्रिता वर्तन्ते इति तत्राश्लेषाश्रितेषु तेषु श्रीकृष्णप्रादुर्भावः मघाश्रितेषु तेषु तदन्तर्धानं कलि प्रवेशश्च पूर्वाषाढाश्रितेषु कलेर्वृद्धिरित्युत्तरग्रन्थद्रष्टव्या ज्ञेया ॥ २७ – २८ ॥

तत्रापि मघास्वेव यदा भगवतो भानुः श्रीकृष्णाख्य किरणरूपो वैकुण्ठनाथः दिवं वैकुण्ठं गतः कृष्णाख्यः कृष्णश्वेतभासस्वकृष्णातियेव सः भातीति भानुः शुद्धसत्त्वात्मको देह इति स्वामिचरणाः ॥ २९ ॥

ननु, द्वापरस्य सन्ध्यांशशेषे भगवदवतारमध्य एव यदा दुर्योधनो द्यूतं प्रवर्त्तयामास ततो द्रौपदीवस्त्राकर्षणसमयमेव भगवद्दृष्टः कलिः पृथिव्यामधिकर्तुं प्रथमशुभमुहूर्तं प्रकारेति भूतं सत्यं तदपि स तदा ऽकिञ्चित्कर एवासीदित्याह—यावदिति । कृष्णावतारमध्ये किल "चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः" इति पृथिव्युक्तेस्त्रेतायुगतोऽपि धर्मस्य प्राचुर्यात् कुतः कलेस्तदा पराक्रम इति भावः ॥ ३० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

यतो मघादयेषु ऋषिषु [illegible] कलिः प्रविष्ट इत्याह—यदेति। द्वादशाब्दशतात्मकः इति दिव्येन मानेन सन्ध्यासन्ध्यांशाभ्यां सहेत्यर्थः॥ ३१॥

कलेर्वृद्धिकालमाह—यदेति,॥ ३२॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

नवमस्कन्धमारभ्य मनोर्वंशम्—

"श्रूयतां मानवो वंशः प्राचुर्येण परन्तप!।
न शक्यते विस्तरतो वक्तुं वर्षशतैरपि"॥

इत्यादिनोपक्रान्तं वंशद्वयमुपसंहरति–ये इति। उद्देशतः सङ्क्षेपतः॥ २५॥

प्रथमाध्याये नन्दाभिषेचनानन्तरं यदुक्तं "ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्मिकाः" इति तत्र नन्दाभिषेचनात् पूर्वस्मिन् काले नृपा शुद्धाः एव स कालो महजन्मारभ्य नन्दाभिषेचनपर्यन्तः कतिसम्वत्सरात्मक इत्येतज्जिज्ञासुमाशङ्क्याह आरभ्येति। वर्षाणां सहस्रं दशोत्तरं पञ्चगुणं शतञ्च एतत् दशाधिकं सार्धसहस्रवर्षाणां भवतीत्यर्थः। अभिमन्युसमकालो जरासन्धसुतः सहदेवः परीक्षित्समकालः सहदेवसुतो मार्जारिस्तमारभ्य रिपुञ्जयान्ताः विंशतिराजानः सहस्रसम्वत्सरं भोक्ष्यन्तीत्युक्तं नवस्कन्धे "ये बार्हद्रथभूपाला भाव्याः साहस्रवत्सरम्" इति ततः पञ्चप्रद्योतनाः अष्टत्रिंशोत्तरशतं तथा शिशुनागाश्च षष्ट्युत्तरशतत्रयं भोक्ष्यन्ति पृथिवीमित्यत्रोक्तत्वात् द्वादशसम्वत्सराणां शिशुनागराज्यभ्रंशनन्दाभिषेचनयोरन्तरालिकत्वाचोक्तसम्वत्सरसङ्ख्या सम्यक् सङ्गच्छते पञ्चशतेत्यत्र पञ्चगुणो वचनं विनोक्तसङ्ख्याविरोधः स्यात्॥२६॥

कदा कलेः प्रवृत्तिः वृद्धिश्चेत्याकाङ्क्षायां तत्प्रवृत्तिं वृद्धिं च वक्तुं कालज्ञानोपलक्षणमाह—सप्तर्षीणान्त्विति द्वाभ्याम्। अत्रेदं बोध्यम् प्रागग्रशकटाकारं तारासप्तकं सप्तर्षिमण्डलं तत्र किञ्चिदुन्नतरेखाग्रस्थानीयो मरीचिस्ततः पश्चादानम्रयुगकन्धराकारो वसिष्ठः समार्यस्ततः पश्चादीषदुन्नतरेखामूलस्थानीयोऽङ्गिराः ततः पश्चाच्चतुरस्रताराचतुष्के ईशानेऽत्रिस्ततो दक्षिणतः पुलस्त्यस्ततः पश्चिमतः पुलहस्तत उत्तरतः क्रतुः इत्थं संस्थितानां सप्तर्षीणां तु मध्ये यौ पूर्वौ उदितौ पुलहक्रतुसंज्ञौ दृश्येते तयोस्तु मध्ये यत्समं दक्षिणतः समदेशावस्थितमश्विन्यादिषु यदन्यतमं नक्षत्रं दृश्यते॥ २७॥

तेन तथैव युक्ता ऋषयो नृणामब्दशतं तिष्ठन्ति ते च द्विजाः त्वदीये कालेऽधुना मघामाश्रिताः सन्ति ॥ २८॥

यदा मघामाश्रित्य मुनयः संस्थितास्तदा असौ शास्त्रविषय भूतः मम हृद्गोचरः सर्वत्र सर्वोत्तमत्वेन भातीति कृष्णाख्यो भानुः दिवं निजलोकं गतः तदैव च लोकं कलिराविशत् यत् येन हेतुभूतेन यस्मिन्वा जनः पापे रमते ननु कालिरात्मनैव किं लोकं नाविशदित्यत आह यत यः कलिभंगवतो विष्णोरेव तदधीनस्थितिरतस्तदभावमात्रमित्यर्थः॥ २९॥

कृष्णाधीनत्वमेव कलेर्दर्शयति–यावदिति। अयमर्थः श्रीकृष्णास्ते तदाज्ञया सन्ध्यारूपेण शनैः प्रविष्टोऽपि पराक्रान्तुमभिभवितुं तु नाशक्नोदिति तत्र इत्यर्थः॥ ३०॥

तत्समाप्त्यनन्तरं एव कलिप्रवृत्तिकाल इत्याह–यदेति॥ ३१॥

कलेः प्रवृत्तिकालमुक्त्वा वृद्धिकालमाह—यदेति॥ ३२॥

भाषा टीका।

हे राजेन्द्र! जो व्यतीत होचुके, और जो वर्त्तमान हैं, और जो आगे होने वाले हैं, उन चन्द्रवंशी और सूर्यवंशी राजाओं का वर्णन हमने तुम्हारे सन्मुख नवम स्कन्ध से लेकर अब पर्यंत किया॥ २५॥

राजन्! तुम्हारे जन्म से लेकर जबतक नंदों का अभिषेक होगा, तब तक एक सहस्र एक सौ पंद्रह १११५ वर्ष बीतेंगे (अथवा १५१० वर्ष बीतेंगे)॥ २६॥

आकाश में सप्त ऋषियों के मध्य में उदय काल में जो पूर्व को पुलह और क्रतु ये दो ऋषियों के नक्षत्र देख पड़ते हैं उनके मध्य में उनके समान अश्विनी आदि में से जो नक्षत्र रात्रि में देख पड़ता है॥ २७॥

उसी नक्षत्र से युक्त होकर मनुष्यों के सौ १०० वर्ष तक सप्तऋषि उसी एक नक्षत्र पर स्थित रहते हैं। वे सप्त ऋषि अब इस तुम्हारे समय में मघा नक्षत्र पर हैं॥ २८॥

भगवान् श्रीविष्णु का कृष्ण नामक दिव्य देह जिस समय पर वैकुंठ गमन करता भया, उसी समय से कलियुगभी लोक में प्रवेश करचुका है, क्योंकि—मनुष्यों का चित्त पाप में रमता है॥ २९॥

जब तक रमापति श्रीकृष्णचन्द्र अपने श्रीचरण कमलों से पृथिवी का स्पर्श करते हुए विराजते थे, तब तक कलियुग पृथिवी में अपना पराक्रम करने को समर्थ नहीं हुआ॥ ३०॥

जिस समय में सातों देव ऋषि मघा नक्षत्र पर विचरते हैं तब ही से वह देवताओं के प्रमाण से बारह सौ १२०० वर्ष तक रहने वाला कलियुग प्रवृत्त होता है॥ ३१॥

जब सप्त ऋषि लोग मघा से पूर्वाषाढ नक्षत्र पर जावेंगे तब नंदों के अभिषेक से लेकर वह कलि वृद्धि को प्राप्त होवेगा॥ ३२॥

यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम्।
शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः ॥३०॥
यस्मात् क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः।
कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः॥३१॥
दस्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः।
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥३२॥
११ श स्कन्ध तृतीय अध्याय।

...शकम् ॥ ३४ ॥
... भुवि ।
...ो युगे ॥ ३५ ॥
...नाम् ।
...भुवि ॥ ३६ ॥
...जः ।
...ौ ॥ ३७ ॥
... ।
... ३८ ॥

... चतुर्युगम् ।
अनेन क्रमयोगेन भुवि प्राणिषु वर्तते ॥ ३९ ॥
राजन्नेते मया प्रोक्ता नरदेवास्तथाऽपरे ।
भूमौ ममत्वं कृत्वाऽन्ते हित्वेमां निधनं गताः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

ननु यदा कलेर्लिङ्गमुपलभ्यं तदैव प्रविष्ट इति युक्तम् ततः पूर्वमेव प्रवेशस्ततः परं वृद्धिरित्यत्र किं प्रमाणम्? तत्राऽऽह—यस्मिन्निति। प्रतिपन्नं प्रविष्टमिति ज्ञातम् पुराविदः पूर्वज्ञातारः ॥ ३३ ॥

कलेरनन्तरं कृतयुगप्रवेशमाह—दिव्याब्दानामिति। चतुर्थे कलौ प्रवेशनाब्दपरिमितेनांशेनाऽपि सहातीते सतीत्यर्थः। कृतयुगप्रवेशचिह्नमाह—यदा नृणां मन आत्मप्रकाशकं भविष्यति तदेति ॥ ३४ ॥

राजवंशोक्तां स्थितिं ब्राह्मणादिवंशेष्वप्यतिदिशति—इत्येष इति। यथा याभिरुच्चनीचावस्थाभिः तास्ता अवस्थाः वंशा इति वा पाठः ॥ ३५ ॥

एतत्कीर्तनस्य वैराग्योपयोगितामाह—एतेषामिति। नामैव लिङ्गम् ज्ञापकम् येषां तेषां कथामात्रेणैवावशिष्टानां कीर्तिरेव स्थिता न तु राज्यं पुत्रादयो वा ॥ ३६ ॥

कलावुत्सन्नानां राजवंशानां पुनः प्रवृत्तिप्रकारमाह—देवापिः सोमवंशजः मरुस्तु सूर्यवंशजः कलापग्रामो नाम योगिनामावासः प्रसिद्धः ॥ ३७ ॥ ३८ ॥

इममेव प्रकारं प्रतिचतुर्युगं दर्शयति—कृतमिति ॥ ३९ ॥

एतेषां नामलिङ्गानामित्यादि यदुक्तं तत्प्रपञ्चयति—राजन्निति पञ्चभिः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

परीक्षान्तं न बाधकमित्यनेन प्रविष्टस्यापि कलिपुरुषस्य भगवत्पादपद्मस्पर्शप्रभावात्स्वकार्याक्षमत्वमुक्तं तत्राभिप्रायान्तरमावेदयति—यस्मिन्निति। यस्मिन्नहनि जातः तस्मिन्नेवाहनि तत्रापि तस्मिन्नेव क्षणे कलियुगे प्रतिपन्ने स्वकार्यकरणे प्राप्तं प्राहुः पुराविदः कालाभिज्ञाः ॥ ३३ ॥

कलेरनन्तरं कृतयुगप्रवेशमाह—दिव्याब्दानामिति। चतुर्थे कलौ युगे दिव्यानामब्दानां यत्सहस्रं तस्यान्ते दिव्येन मानेन सहस्राब्दपरिमिते चतुर्थे युगेऽतिक्रान्ते सति इत्यर्थः। द्वादशाब्दशतात्मक इति सन्ध्ययोः सङ्कलय्योक्तम् अत्र तु तौ विना मध्यकालपरिमाणमुक्तम् इत्यतो न विरोधः। कृतयुगारम्भकालमुपलक्षयन्नाह—यदा नृणां मन आत्मप्रकाशकमित्यात्मस्वरूपगोचरत्वं भविष्यति तदा कृतयुगं भविष्यतीत्यर्थः ॥ ३४ ॥

तत्र प्रजाः कीदृश्यः इत्यभिप्रायमाविष्कुर्वन्नाह—इत्येष इति। इत्थम्भूत एव मानवः वैवस्वतमनुवंशः यथावद्वर्ण्यते वाभिवृद्ध-

श्रीमद्वीरराघवाचार्यकृत[illegible] ।

...भिश्चाऽवस्थाभिः सम्यक् वर्ण्यते कथ्यते [illegible] विट्शूद्रविप्राद्या तास्ता अवस्था युगे युगे बोध्या इत्यर्थः ॥ ३५ ॥

किं बहुना वंशानुकीर्तनेनेति तदर्थमाकूतं दर्शयति—एतेषामिति । नामलिङ्गशब्दो मत्वर्थीयाऽर्शआद्यजन्तः एवंविधनामरूपवताम् इत्यर्थः महात्मनाम् इत्यनेन तत्र कथाश्रिताभगवत्त्वं तत एव तदादिभक्ष्यावश्यभावित्वादिकञ्च सूच्यते कथामात्रावशिष्टानां नतु नामरूपाभ्यामनेन तयोरनित्यत्वं सूच्यते तेन च तात्पर्यावबोधनतया वैराग्यहेतुत्वं फलितं कीर्तिरेव स्थिता भुवीत्यनेनावश्यम् राजभिः कीर्तिमद्भिर्भवितव्यम् इति व्यज्यते ॥ ३६ ॥

ननु, कलावुत्सन्नराजवंशानृषीणां कुतः पुनः कृते प्रवृत्तिरित्यभिप्रायमालक्ष्याह—देवापिरिति । शान्तनोर्भ्राता देवापिनाम सोमवंश्यः मरुर्नामेक्ष्वाकुवंशजः सूर्यवंश्य इत्यर्थः । तावुभावधुना कलापग्रामे आसाते कलापग्रामो बदर्याश्रमस्थो योगिनामावासः प्रसिद्धः कथम्भूतौ महता योगबलेनान्वितौ ॥ ३७ ॥

ततः किमत आह—ताविति । कलेरन्तः कृतयुगादिः तदा भगवता मनुशिक्षितौ उपादिष्टवर्णाश्रमधर्मौ आदिष्टौ चेह लोके प्रत्यागत्य वर्णाश्रमधर्मं पूर्ववत्प्रवर्तयिष्यतः प्रकटीकरिष्यतः ॥ ३८ ॥

प्रतिचतुर्युगरीतिः कीदृशीत्यभिप्रायमालक्ष्याह—कृतमिति । अनेन क्रमयोगेन निरूपितचतुर्युगक्रमयोगरीत्यैव प्रतिचतुर्युगं प्राणिषु वर्तते निमित्ततया प्रवर्तत इत्यर्थः । इयमेव रीतिः प्रतिचतुर्युगमिति भावः यद्यप्यत्र त्रेताद्वापरयोः प्रकारो नोक्त इत्यनेन क्रमयोगेनेत्यसकृतं तथाप्याद्यन्तयुगरीतिनिरूपणे मध्ययोरपि युगयोर्निरूपितप्रायत्वैवेत्यभिप्रायेण तथोक्तम् ॥ ३९ ॥

कथामात्रावशिष्टानाम् इत्यत्रैव सूचितं विवृणोति—राजन्निति । हे राजन् ! एते मयाऽधुना निरूपिता वैवस्वतमन्वन्तराऽवस्थाश्च राजानस्तावद्भूमौ ममत्वं ममताबुद्धिं कृत्वाऽन्ते तद्योगनिमित्तपुण्यावसाने निधनं नाशङ्गताः तेनैव ममत्वेन युता निरयं प्राप्ता इति भावः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कृष्णस्वर्गारोहणानन्तरं कञ्चित्कालं हित्वा पश्चात्कलिः किं कश्चिदुत तस्मिन्नेवाहनीति सन्देहं व्यवच्छिनत्ति—यस्मिन्निति ॥ ३३ ॥

ततः कियान् कालः कृतप्रारम्भावधीति तत्राह—दिव्येति । यदा यस्मिन् कृतयुगे आत्मप्रकाशकं परमात्मप्रकाशकं भवतीति शेषः ॥ ३४ ॥

इतिशब्दः समाप्तिपर्यन्तं कथितः एष मानवो वंशः वैवस्वतमनुसम्बन्धी भुवि यथा सङ्ख्यायते तथा विट्शूद्रविप्राद्याणां वंशा अपि युगे युगे ज्ञेयाः बोद्धव्याः इत्यतिदेशोयम् ॥ ३५ ॥

एतेषां सर्वं किंज्ञापकमत्राह—एतेषामिति । नामलिङ्गयुक्तानां भवनेनैतिह्यं प्रमाणमुक्तं भवति ॥ ३६ ॥

• कलौ धर्मप्रतिष्ठापकः क इति तत्राह—देवापिरिति । महायोगबलान्वितौ महाज्ञानबलयुक्तौ अणिमाद्यैश्वर्ययुक्तौ वा ॥ ३७॥३८॥

कलियुगान्तमत्राह—कृतमिति ॥ ३९ ॥

एषामज्ञानमाह—राजन्निति ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, कथं प्रथमसन्ध्यायां कृष्णोऽवतीर्ण इति नवीना वदन्ति तत्रेत्याह—यस्मिन्निति । अतो युगानां पूर्वयुगसन्ध्यांशशेष एव आरम्भसमय इति यो नियमः सोऽपि कथं भगवत्प्रभावापूर्वं एवाभूदिति भावः ॥ ३३ ॥

कृतयुगप्रवेशकालमाह—दिव्येति । चतुर्थे कलौ तदीयसन्ध्यांशशेषसमय इत्यर्थः ॥ ३४ ॥

मानवो वंशो यथासङ्ख्यायते मनुवंश्यानां यावत्यः सङ्ख्या यथोक्ता इत्यर्थः । तथैव तत्र तत्रत्यानां वैश्यादीनां वैश्यादिवंश्यानामपि तावत्यः सङ्ख्या अनुक्ता अपि ज्ञेयाः ॥ ३५ ॥

नामैव लिङ्गं ज्ञापकं येषाम् ॥ ३६ ॥

कलावुत्सन्नानां राजवंशानां पुनः प्रवृत्तिप्रकारमाह—देवापिः सोमवंशजः ॥ ३७ - ३८ ॥

इममेव प्रकारं प्रतिचतुर्युगं दर्शयति—कृतमिति ॥ ३९ - ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यदुक्तं कृष्णाख्योंऽशो दिवङ्गतः तदाविशत्कलिर्लोकमिति तत्रापि कस्मिन्दिने कलिः प्रवृत्त इत्यत्राह—यस्मिन्निति । यस्मिन्नहनि कृष्णो दिवं यातः तस्मिन्नेवाहनि तत्रापि तदैव तस्मिन् क्षण एव प्रतिपन्नं प्रवृत्तं कलियुगं भवतीति पुराविदः पूर्वज्ञानारः प्राहुः ॥ ३३ ॥

कलेरनन्तरं कृतयुगप्रवृत्तिं दर्शयति—दिव्याब्दानामिति चतुर्थे कलौ दिव्यानामब्दानां यत्सहस्रं तदन्ते पुनः कृतं भविष्यति सहस्रमिति मुख्यकलियुगाभिप्रायं तत्र सन्ध्यासन्ध्यांशसमयस्य वत्सरशतद्वयत्वाद्युपपत्त्याम् आद्यादशानात्मक इत्युक्तत्वात् तत्प्रवृत्तिचिह्नमाह—यदा नृणां मनः आत्मप्रकाशकं भविष्यति तदा ॥ ३४ ॥

राजवंशोक्तां स्थितिं वर्णान्तरेष्वप्यतिदिशति—इत्येष इति । मानवो वैवस्वतमनुवंशः इक्ष्वाकुप्रभृतिद्वारा ऐलप्रभृतिद्वारा च यथा उत्तममध्यमाधमाभिरवस्थाभिः सम्यक् वर्ण्यते कथ्यते तथा विट्शूद्रविप्राद्यानां युगे युगे वंशाः ज्ञेयाः ॥ ३५ ॥

प्राकृतदेहगेहादीनामनित्यतां वैराग्योत्पादनायाह—एतेषामिति । एतेषां पूर्वोक्तानां महात्मनां स्वधर्मनिष्ठानां भगवत्कीर्तीनां नामलिङ्गानां नामरूपवतां मत्वर्थीयार्शआद्यजन्तो नामलिङ्गशब्दः कथामात्रैरेवावशिष्टानां कीर्तिरेव भुवि स्थिता नतु देहगेहादिकम् ॥ ३६ ॥ ३७ ॥

ननु, कलावुत्सन्नानां राजवंशादीनां कृते पुनः प्रवृत्तिः कुत इत्यत्राह देवापिरिति ॥ ३८ ॥

अयमेव युगप्रतिप्रकारः आगतानागतेषु सर्वेषु युगेषु बोध्य इत्याह—कृतमिति ॥ ३९ ॥

कृमिविट्भस्मसञ्ज्ञाऽन्ते [redacted] ॥
भूतध्रुक् तत्कृते स्वार्थं [redacted] ४१ ॥
कथं सेयमखण्डा भूः [redacted]
मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य वा ॥ ४२ ॥
तेजोऽबन्नमयं कायं गृहीत्वाऽऽत्मतयाऽबुधाः ।
महीं ममतया चोभौ हित्वाऽन्तेऽदर्शनं गताः ॥ ४३ ॥
येये भूपतयो राजन्! भुञ्जन्ति भुवमोजसा ।
कालेन ते कृताः सर्वे कथामात्राः कथासु च ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां द्वादशस्कन्धे कलिधर्म्मो नाम
द्वितीयोऽध्यायः ॥ २ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एतेषां नामचिह्नानामिति श्लोकार्थं प्रपञ्चयति—राजन्निति पञ्चभिः । अपरे विट्शूद्रविप्राः ॥ ४० ॥

भाषा टीका ।

जिस समय जिस दिन श्रीकृष्ण भगवान् स्वधाम को पधारे उसी दिन उसी समय कलियुग आकर प्राप्त हुआ इस प्रकार पहिले जानने वाले लोग कहते हैं ॥ ३३ ॥

देवताओं के सहस्र वर्ष बीतने पर जितना कि—कलियुग का परिमाण है, तिसके पश्चात् फिर सतयुग होवेगा, और उस सतयुग के होने का यही मुख्य निशान होगा, कि-मनुष्यों के मन में आत्मा का स्वरूपज्ञान होजायगा ॥ ३४ ॥

जैसे इस भूमि में यथाक्रम हमने तुम्हारे सामने मानववंश का वर्णन किया, उसीप्रकार वैश्य शूद्र और ब्राह्मणों के वंश की भी तिस २ युग में वह २ व्यवस्था जानना चाहिये ॥ ३५ ॥

एक नाम मात्रही जिन का ज्ञापक (जनाने वाला) रह गया ऐसे इन महात्मा पुरुषों की केवल कथा मात्रही अवशिष्ट रहगई, और कीर्त्ति उन लोगों की भूमि में अब तक विद्यमान है ॥ ३६ ॥

शान्तनु महाराज के भ्राता चन्द्रवंशी राजा देवापि, और इक्ष्वाकु वंशी राजा मरु, ये दोनों उत्तर में बदरिकाश्रम के समीप महान् योग के बल से कलाप ग्राम में अभी तपस्या कर रहे हैं ॥ ३७ ॥

ये दोनों श्रीवासुदेव भगवान् की शिक्षासे इस कलियुग के अन्त में वर्णाश्रमधर्म की पूर्व सदृश प्रथा बांधेंगे ॥ ३८ ॥

कृतयुग, त्रेता, द्वापर, कलियुग, ये चारों युग पृथिवी में इसी क्रमसे प्राणियों में वर्तते हैं ॥ ३९ ॥

हे राजन् ! ये जो हमने तुम्हारे सामने राजा लोग कहे और इन से अतिरिक्त अन्य बहुत से राजा लोग, इस भूमि में ममत्व कर अन्त में इस को छोड कर मरण को प्राप्त हो गये ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ममत्वं कुर्वन्नित्यनेन सूचितां भूतद्रोहप्रवृत्तिं निन्दति—कृमीति । राजन्नाऽस्तो राजेति नाम यस्य तस्यापि देहस्यान्ते क्रमशो विष्ठा भस्मेति वा संज्ञा भविष्यति तत्कृते तदर्थं यो भूतध्रुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद ? किन्तु नैव वेद कुतः इत्यपेक्षायां हेतुत्वेन भूतद्रोहं विशिनष्टि—यतो भूतद्रोहान्निरयो भवति ॥ ४१ ॥

ममत्वप्रकारं प्रपञ्चयति—कथमिति । सेयमखण्डा भूमिः पूर्वजैर्धृता सती इदानीं मत्पूर्वा च सती मत्पुत्रादेः कथं स्यादिति सेयम् ॥ ४२ ॥

उभौ महीं कायं च अदर्शनं मृत्युम् ॥ ४३ ॥

उपसंहरति-येये इति । ते सर्वे च कथासु किंवदन्तीषु कथामात्राः कालेन कृताः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
द्वितीयोऽध्यायः ॥ २ ॥

श्रीशुकदेवमतप्रकाशशुकपक्षीये

इति श्रीमद्भागवतव्याख्याने

शुकपक्षीये द्वादशस्कन्धे

द्वितीयोऽध्यायः ॥ २ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतदेव विशदयति—कृमीति । यस्य राजनाम्नोऽपि शरीरस्यान्ते कृमयो विष्ठा भस्मेति वा संज्ञा भविष्यति तत्कृते तस्य भूतेभ्यो द्रुह्यतीति तथा स किं स्वार्थं स्वाहितं वेद ? तत्र हेतुत्वेन भूतद्रोहं विशिनष्टि–यतो भूतद्रोहान्निरयो भवति ॥ ४१ ॥

ममतां कुर्वन्त्युक्तं ममताप्रकारं प्रपञ्चयति—कथमिति । अखण्डा भूमिरियं पूर्वजैर्धृता सती मदनन्तरं मत्पूर्वमह-मेव पूर्वो भर्ता यस्यास्तथाभूता सती मत्पुत्रादेः कथं स्यादि-त्येवम् ॥ ४२ ॥

किञ्च, तेज इति । अबुधाः देहातिरिक्तात्मज्ञानविधुरा अत एव तेजोऽन्नपरिणामरूपं कायम् शरीरमात्मतया गृही-त्वाऽभिमत्य महीं तु ममतया गृहीत्वा उभौ पृथ्वीकायौ हित्वाऽन्ते प्रारब्धान्तेऽदर्शनम् अयक्ताः प्राप्ताः ॥ ४३ ॥

कथामात्रावशिष्टानाम् इत्यस्य प्रपञ्चमुपसंहरति–ये य इति । हे राजन् ! येये राजानो भुवमोजसा पौरुषेण भुञ्जन्ति ते सर्वे कालेन कृताः समाप्ताः कथासु क्रियमाणासु कथामात्ररूपाः कृताश्च ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां

द्वितीयोऽध्यायः ॥ २ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

राजन्नाम्नोऽपि यस्य शरीरस्यान्ते नाशे कृमिविड्भस्म-संज्ञा तादृशं शरीरं प्राप्य भूभुक् स्वार्थं मनुते तत्स्वप्रयोजनं यतो भूतद्रोहान्निरयो भवति तं वेद किन्न तदेव यस्य पुरुष-शरीरस्यान्त इति वा ॥ ४१ ॥

स्वार्थंमननप्रकारमाह–कथमिति । मदन्वयानां सत्त्वामीति भूः येयं मत्पूर्वैः पुरुषैः धृता सेयं भूमिरखण्डा राजान्तराभि-भूता कथं स्यान्मत्पुत्रस्य मत्पौत्रस्य च मद्वंशस्य मह्यं पूर्वो यस्यां सा मत्पूर्वा च कथं स्यादिति मत्वा ॥ ४२ ॥

तेजोऽन्नमिदं कायमात्मतया नित्यत्वेन मुधा गृहीत्वा अमी राजानो ममत्वेन गृहीत्वा उभौ महीं च देहं च हित्वा अदर्शनं मरणं गता भवन्तीत्यन्वयः ॥ ४३ ॥

साकल्यं तेष्वेकोऽपि नास्तीत्याशयेनाह–य इति । पुराणादिगत-कथासु कथामात्राः सर्वात्मना कथैव येषां ते तथाकृताः अकृ-ष्टो न सन्तीति शेषः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

द्वितीयोऽध्यायः ॥ २ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इतिश्रीमद्भागवते महापुराणे द्वादशस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

द्वितीयोऽध्यायः २ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

राजनाम्नोऽपि देहस्य अन्ते मरणे सति कृम्यादिकमेव नाम भवेत् तस्य देहस्य कृते ॥ ४१ ॥

ममत्वप्रकारमाभिनयेन दर्शयति–कथमिति । मत्पूर्वा च सती मत्पुत्रादेः कथं स्यादित्येवम् ॥ ४२ ॥

कायम् आत्मतया महीं च ममतया गृहीत्वा उभौ महीकायौ अदर्शनं मृत्युम् ॥ ४३ – ४४ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

द्वादशस्य द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥ २ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं निधनाहंदेहाभिमनो देहाद्यर्थमकृत्यकारिणो मूर्खत्वं नरका-हत्वञ्चाह–कृमीति । राजेति नाम यस्य तस्यापि देहस्यान्ते कृम्यादि-संज्ञा भविष्यति तस्यैव देहस्य कृते यो भूभुक् प्राणिभ्यो द्रुह्यति स भूतद्रोही किं स्वार्थं वेद न किमपि तत्र स्वार्थः परार्थो वास्ति अपितु यतो भूतद्रोहान्निरय एव ॥ ४१ ॥

भूमौ ममत्वं कुर्वन्ति यदुक्तं तत्प्रपञ्चयति—कथमिति । या मे मम पूर्वजैर्धृता सेयमखण्डा सकला मत्पूर्वा अहं पुत्रादे-र्वंशस्य पूर्वः भर्ता यस्यास्तथाभूता सती मत्पुत्रादेः कथं स्यादिति ॥ ४२ ॥

किञ्च कायमात्मतया महीं ममतया च गृहीत्वा अन्ते जीवनान्ते उभयं हित्वा अदर्शनं क्षयं गताः यतोऽबुधाः ॥ ४३ ॥

उक्तां देहगेहाद्यनित्यतामुपसंहरति—ये इति । ये ये भुवम् ओजसा पौरुषेण भुञ्जन्ति ते सर्वे कथासु क्रियमाणासु कथा-मात्राः कालेन कृताः अतः सर्वं प्राकृतं देहादिकं निरोधविषय-मतस्तत्र विरक्तः सन् हरिं भजेदिति फलितोऽर्थः ॥ ४४ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

द्वितीयाऽध्यायार्थप्रकाशः ॥ २ ॥

———

भाषा टीका।

जिस देह का राजा यह नाम है, अन्त में उसी देह की कृमि, विष्ठा, और भस्म, ये तीन संज्ञा होती हैं, उसी देह के निमित्त यह पुरुष प्राणियों से द्रोह करता है, वह क्या स्वार्थ जानता है,? किन्तु नहीं जानता, क्योंकि? जिस भूत द्रोह करने से इसको नरक होता है॥ ४१॥

राजा लोग ऐसा विचार करते हैं, कि—यह अखण्ड भूमि का राज्य हमारे पहिले पुरुषाओं ने भोगा, और आज कल हम भोगते हैं परन्तु यह हमारे पुत्र पौत्र और वंश के इस राज्यको किस प्रकार निर्विघ्न भोगेंगे॥ ४२॥

हे राजन्! इस प्रकार सोच विचार करते हुए निर्बुद्धि लोगों ने जिस तेज जल अन्नमय शरीर को आत्मा करके [illegible] जिसको "यह मेरी है [illegible] को इन दोनों को [illegible] हो गये और, [illegible] भूमि (भूमि) को बलात्कार (जबरदस्ती) से भोगा है, उनही राजाओं की काल [illegible] कथाओं के बीच में कथा मात्र अवशिष्ट रखी है॥ ४४॥

इति श्रीमद्भागवत द्वादशस्कन्ध में द्वितीय अध्यायकी,

श्रीवृन्दावनस्थ पं० भागवताचार्यकृत

भाषा टीका समाप्त॥ २॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे द्वितीयोऽध्यायः॥ २॥

श्रीशुक उवाच ।

दृष्ट्वाऽऽत्मनि जये व्यग्रान्नृपान् हसति भूरियम् ।
अहो मां विजिगीषन्ति मृत्योः क्रीडनका नृपाः ॥ १ ॥
काम एष नरेन्द्राणां मोघः स्याद्विदुषामपि ।
येन फेनोपमे पिण्डे येऽतिविश्रम्भिता नृपाः ॥ २ ॥
पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमन्त्रिणः ।
ततः सचिवपौराप्तकरीन्द्रानस्य कण्टकान् ॥ ३ ॥
एवं क्रमेण जेष्यामः पृथ्वीं सागरमेखलाम् ।
इत्याशाबद्धहृदया न पश्यन्त्यन्तिकेऽन्तकम् ॥ ४ ॥
समुद्रावरणां जित्वा मां विशन्त्यब्धिमोजसा ।
कियदात्मजयस्यैतन्मुक्तिरात्मजये फलम् ॥ ५ ॥
यां विसृज्यैव मनवस्तत्सुताश्च कुरूद्वह ! ।
गता यथागतं युद्धे तां मां जेष्यन्त्यबुद्धयः ॥ ६ ॥
मत्कृते पितृपुत्राणां भ्रातॄणां चापि विग्रहः ।
जायते ह्यसतां राज्ये ममताबद्धचेतसाम् ॥ ७ ॥
ममैवेयं मही कृत्स्ना न ते मूढेति वादिनः ।
स्पर्द्धमाना मिथो घ्नन्ति म्रियन्ते मत्कृते नृपाः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तृतीये भूमिगीतैश्च राज्यदोषादि वर्ण्यते ।
कलौ च दोषभूयिष्ठे दोषघ्नी हरेर्नुतिः ॥

देहेऽहन्तां भूमौ च ममतां कुर्वन्त्यतोऽमुना इत्युक्तं तदेव भूमिगीतैः प्रपञ्चयति—दृष्ट्वेत्यादिना । आत्मनि पृथिव्यां जये व्यग्रानुत्सुकान् हासप्रकारमेवाह—अहो इति । मां माम् ॥ १ ॥

येन कामेन फेनोपमे पिण्डे देहेऽतिविश्रम्भिता विश्वासं नीता ये तेषां नरेन्द्राणामेव कामो मोघ एव स्यात् ॥ २ ॥

काममेव दर्शयति—जेष्याम पूर्वमिति । इन्द्रियषड्वर्गजयमन्तरेण न राज्यप्राप्तिः स्यादिति प्रथममिन्द्रियषड्वर्गं निर्जित्य राजमन्त्रिणो जेष्यामो वशीकरिष्यामः सचिवा अमात्याः करीन्द्रा हस्तिपास्तांश्च जेष्यामः कण्टकान् प्रतिपक्षान् अस्य नृपस्य [illegible] कण्टकानिति वा पाठः ॥ ३-४ ॥

एवं केचिदाशाबद्धहृदया एवं केचिन्मां पुनर्जित्वाऽत्यतितृष्णया अब्धिं विशन्ति तदेवमिन्द्रियजयेन ये राज्यं साधयितुमिच्छन्ति तेऽतिमन्दा इत्याह—कियदिति ॥ ५ ॥

अन्तकं न पश्यन्तीत्युक्तं तदेवाऽऽह—यामिति । कुरूद्वहेति भूमिगीतं कथयन् शुकः सम्बोधयति कुरोद्वह इति तु पाठः सुगमः ॥ ६ ॥

अबुद्धय इत्युक्तम् तत्प्रपञ्चयति ॥ ७ ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १ ॥
पिण्डे शरीरे ॥ २ ॥
अब्धिं विशन्ति द्वीपान्तरमभिजयन्ति ॥ ३—६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रपञ्चितां ममतां महीहासेन सम्बोधयन् वैराग्यमुत्पादयन् कश्चिद्रोषाश्रपञ्चयंश्च तन्निरसनोपायमुपदिशति तृतीयेन—दृष्ट्वात्म विजय इत्यादिना । आत्मनि भूमौ निमित्ते यो विजयः तन्नि- ध्यमानुघुकान् दृष्ट्वा इदं भूर्हसति, हासमेव प्रपञ्चयति—म इत्यादिभिः सार्धैर्द्वादशाभिः । मृत्योः क्रीडनकाश्चदर्शाना इमे नृपाः मां विजिगीषन्ति विजयेन मां मांकुर्विन्त्वन्तीत्यर्थः ॥ १ ॥

काम इति विदुषामपि । पित्रादिहप्राप्त्येव मृत्युवश्यतां पश्यता-मपि अयं कामः विजिगीषात्मकप्रकाशविशेषः मोघः व्यर्थः मोघत्वे हेतुतया कामं विशिनष्टि—येन कामेन फेनोपमे अश्वबुद्बुदतुल्ये पिण्डे शरीरे ये नृपाः अतीव विश्वम्भताः विश्वासं नीताः तेषां नरेन्द्राणामिति पूर्वेणासम्बन्धः ॥ २ ॥

विजिगीषुनां प्रपञ्चयति—सार्धद्वाभ्यां पूर्वमिति । इन्द्रिय-षट्कस्य न राज्यप्राप्तिः स्यादिति तावत् षड्गाम इन्द्रियषट्कं जित्वा तद्द्वारा देवताप्रसादमभिगत्येति भावः । क्रमेण राजमन्त्रि-प्रभृतीनस्य भूमण्डलस्य कण्टकतुल्यान् जेष्यामः तत्र सचिवा अमात्या अवान्तरव्यापारिणः पौराः पुरे भवाः तेषामाप्ताः करीन्द्रा हस्तिपाश्च तान् ॥ ३ ॥

ततः सागराः मेखला यस्यास्तां मेखलयेव सागरेण परि-वृताम् इत्यर्थः । पृथ्वीं जेष्यामः स्वाधीनां करिष्यामः इतीत्थं-भूताशया बद्धम हृदयम् येषां ते अन्तिके समीपे वर्तमानमन्तकं मृत्युं न पश्यन्ति नावलोकयन्ति किन्तु मां समुद्रावरणां जित्वा ततोऽब्धिं विशन्ति द्वीपान्तराणि प्रविशन्ति तान् विजिगीषन्ति इत्यर्थः । तावत्कृतस्येन्द्रियजयस्य नेदं फलमित्याह—कियदिति । एतत् कृत्स्नभूमण्डलस्य सप्तद्वीपस्यात्माधीनताप्रापणा-मिलनेनात् कियत्फलं न किञ्चिदेतदित्यर्थः । तत्फलस्य नश्वरत्वा-दिति भावः । किं तर्हि फलमित्यत आह—मुक्तिरात्मजयं तावत् फलमिति ॥ ४ ॥ ५ ॥

एतदेवोपपादयति—यामिति । कुरूद्वहेति सम्बोधनं भूमिर्गीतिं कथयन् शुकः सम्बोधयति कुलोद्वहेत्यपि पाठः सुगमः तत्-सुता मनुपुत्राश्च यां मां विसृज्यैव गताः मृताः तथा तां विजित्य विमूढामपि अबुधयो बुद्धिरहिताः युद्धे जेष्यन्ति युद्धेन वशी-करिष्यन्तीत्यर्थः । गतमित्यस्य तैरिति शेषः । तेष्वेवमेव गामव-स्तीत्यर्थः । अत्यन्तसादृश्येनाभेदमारोप्य गतमिति भूतनिर्देशः ॥ ६ ॥

प्रवृद्धितां प्रपञ्चयति मत्कृते इति । मत्कृते मदर्थं विग्रहः विरोधः जायते तत्र हेतुत्वेन तान् विशिनष्टि राज्ये ममताभिमानेन बद्धं चेतो येषां तेषामत एव चासतां दुरात्मनाम् ॥ ७ ॥

ममतावद्धचेतस्त्वमेवाभिनयेन दर्शयन्ती तामसत्वकमसत्कर्म दर्शयति—ममैवेति । हे मूढ त्वं तवेयं भूमिर्न भवति किन्तु ममैवेति वादान् कुर्वन्तः मिथः घ्नन्ति ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चतुर्युगधर्मविभागः कलिदं षपरिहारश्चेत्येतदस्मिन् अध्याये [redacted] भूमेः परिहासप्रकारमाह [redacted] कपरायणान् ॥ १ ॥

[redacted] मिति । षड्वर्गं सम्बोधि [redacted] ष्वयं च अनेन भूम्येक- [redacted] राजमन्त्रिणः राजा च मन्त्रिणश्च राज-मन्त्रिणः मन्त्री बुद्धिसहायः स्यादिति ततो मन्त्रिजयानन्तरं सचिवः कर्मसहायः "अमात्याः कर्मसचिवाः" इत्यमरः । आप्ताः विश्वस्ताः अथ पश्चात्कण्टकान् क्षुद्रशत्रून् ॥ ३ ॥

एवं क्रमेण राज्ञो जित्वा पृथ्वीं जेष्यामः वशीकरिष्यामः इत्याशयानितृष्णया अन्तकं मृत्युम् ॥ ४ ॥

एवं केचित्पुनः मां जित्वात्यन्ततृष्णयाऽब्धिं विशन्तीत्यनेन द्वितीयादिजयार्थं सूचयति—भूजयादिना न किमपि प्रयोजनमपि त्वनन्तोऽनर्थं एवाभिधीयते मनोजयफलापेक्षयेत्याह—किय-दिति । आत्मजयस्य मनोजयस्य फलापेक्षयैतद् भूजयादिकं कियत् फलम् आत्मजयं किं फलं येनायमेव साध्यः स्यादिति तत्राह मुक्तिरिति आत्मजये मुक्तिरेव फलं यस्मात्तस्मादिति शेषः ॥ ५ ॥

इतोऽपि मज्जयकामा मन्दा एवेत्याह—यामिति । मनवस्तत्-सुताश्च यां मां विसृज्य यथा गता याताः अबुधयः तां मां जेष्यन्तीत्यन्वयः आत्मजयवतां त्यागशक्तिरन्येषामन्यथेति सूच-यति ॥ ६ ॥

न केवलमितरेषां मत्कृते विग्रहोऽपि तु शरीरसम्बन्धिनामपि स्यादित्याह—मत्कृत इति, अपिशब्दः पुत्रादीनामित्यनेन सम्ब-न्धयितव्यः अयमपि प्रासङ्गिक इत्याह—असतामिति । असतामप्रशस्त-कर्मणाम् ॥ ७ ॥

किं प्रकारो विग्रह इति तत्राह—ममेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १–८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तृतीये तु भुवो हास्यं धर्मपादव्यवस्थितिः ।
कलेर्दोषो दोषहारि हरिस्मरणमुच्यते ॥

कथंसेयमस्वाधारामूरिसमुत्थानां मनोरथ उक्तस्तमेव पृथिव्या-वर्णनेन प्रपञ्चयति—दृष्ट्वेति । मा माम् ॥ १ ॥

येन कामेन पिण्डे देहे ॥ २ ॥

काममेव दर्शयति—पूर्वमिति द्वाभ्याम् । तदेन्द्रियार्थकस्य राज्यप्राप्तिर्न स्यादतः प्रथममिन्द्रियषड्गं जित्वा अस्य मममपि पश्चात्पश्य ॥ ३ ॥ ४ ॥

मां पृथ्वीं जित्वा अतितृष्णया अब्धिं विशन्ति तद्वीपस्था-न्याहर्तुमिति भावः । एवमिन्द्रियजयेन ये साधयितुमिच्छन्ति ते मन्दा इत्याह—कियदिति, ॥ ५ ॥

यथागतं यथाज्ञानं सकलानमनतिक्रम्य विरक्ता भूत्वा वनं गता इत्यर्थः । तां मामेते मन्दा युद्धे जेष्यन्ति ॥ ६–८ ॥

...र्नहुषो भरतोऽर्जुनः ।

...सगरो रामः खट्वाङ्गो धुन्धुहा रघुः ॥ ९ ॥

तृणबिन्दुर्ययातिश्च शर्यातिः शन्तनुर्गयः ।

भगीरथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः ॥ १० ॥

हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः ।

नमुचिः शम्बरो भौमो हिरण्याक्षोऽथ तारकः ॥ ११ ॥

अन्ये च बहवो दैत्या राजानो ये महेश्वराः ।

सर्वे सर्वविदः शूराः सर्वे सर्वजितोऽजिताः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

"तेजोऽबन्नमयं देहं गृहीत्वाऽऽत्मतया ऽबुधाः" इत्यत्रोक्तमबुधानं प्रपञ्चयन् कविदोषान् तन्निवृत्युपायञ्चाह—तृतीयेनाध्यायेन दृष्ट्वेति। आत्मनि भुवि यो जयः तत्र व्यग्रान् व्याकुलान् दृष्ट्वा इयं भूर्हसति हासप्रकारमाह—अहो इति सार्द्धद्वाभ्याम् ॥ १ ॥

येन कामेन पिण्डे देहे अनित्यविभ्रमिताः अनित्यविश्वासं गताः स एव नरेन्द्राणां विदुषामपि किमुत मूर्खाणां कामः विजिगीषालक्षणः मोघो व्यर्थः एव स्यात् ॥ २ ॥

काममेव दर्शयति—ह्यस्यां पूर्वमिति। "नचाजितेन्द्रियषड्वर्गो राजा वै राज्यमर्हति" इत्यतः पूर्वं षड्वर्गमिन्द्रियषट्कं निर्जित्य ततः क्रमेण राजमण्डलादीन् अस्य भूविजयस्य कण्टकतुल्यान् जेष्यामः वशीकरिष्यामः तत्र सचिवाः अमात्याः पौराः पुरे भवाः राजहितैषिणो धनिनः आप्ताः राजपूज्याः करीन्द्राः हस्तिपाः ॥ ३ ॥ ४ ॥

देशान्तरेषुचिन्मां जित्वापि सन्तोषं न कुर्वन्तीत्याह—अर्णैन समुद्रादिरयामिति। षड्वर्गजयस्य नेदं फलं किन्तु मुक्तिरिति दर्शयति—किमादिति । एतत् भूविजयादिकम् आत्मजयस्य सेन्द्रियमनोजयस्य कियत्फलं न कियदपि ॥ ५ ॥

हे कुरूद्वह ! युधिष्ठिर ! कृपया कुरूनुद्वहतीति स तथा हे धर्मं अनेन धर्मं प्रति भूमिगीतं भूम्योपादिष्टमिति गम्यते ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥

भाषा टीका ।

श्रीशुक उवाच ॥

श्रीशुकदेव जी बोले, कि—हे राजन् ! यह पृथिवी अपने (पृथिवी के) जीतने में व्यग्र होने वाले राजाओं को देखकर हँसती है, कि—अहो ! ये मृत्यु के खिलौने मेरे जीतने की इच्छा करते हैं ॥ १ ॥

वह राजा लोगों का मनोरथ व्यर्थ होजाता है, राजाओं की तो बात ही क्या है, किन्तु बड़े २ विद्वानों का भी वह मनोरथ व्यर्थ हो जाता है, जिस मनोरथ से फेन के ढेल सदृश इस पिण्ड (शरीर) में बड़े२ राजा लोग विश्वास को प्राप्त हुए हैं ॥ २ ॥

राजा लोग क्या मनोरथ करते हैं, कि—हम प्रथम तो षट् इन्द्रिय रूप शत्रुओं को जीतेंगे क्योंकि जो इन्द्रिय लम्पट होगा उसको राज्य की प्राप्ति कैसे हो सकी है। फिर इन्द्रियों को जीतकर राजमन्त्रियों को वश करेंगे, तदनन्तर सचिव (अमात्य) लोगों को वश करेंगे (यहां पर सलाह देनेवाले मन्त्री और सचिव वह जिसको दीवान कहते हैं) इस को वश करके पुरवासी आप्तजन और महावत प्रभृति कामवाले लोगों को वश करेंगे, तिसके पश्चात् राज्य में जो कण्टक रूप होंगे तिन्हों को निकाल कर नाश करेंगे ॥ ३ ॥

इस प्रकार समुद्र जिसकी मेखला है उस समग्र पृथिवी को जीतेंगे—इस प्रकार की आशा से जिन्हों का हृदय बँध रहा है वे लोग अपने समीप ही में आनेवाले काल को नहीं देखते हैं ॥ ४ ॥

कितने एक राजा लोग समुद्र से घिरी हुई सो पृथिवी को जीतकर द्वीपांतर की विजय अथवा रत्नों के लोभ से समुद्र में प्रवेश करते हैं। परञ्च जब मन को जीत लिया तब पृथिवी को जीतना तुच्छ है क्योंकि ? मन के जीतने से तो मुक्ति पर्यंत फल मिल सकता है ॥ ५ ॥

जिस मेरे लिये छोड़कर मनुलोग और उन के पुत्र लोग प्रियव्रतादि जैसे आये वैसे ही चले गये, तिस मेरे को ये निर्बुद्धि क्षुद्र राजा लोग क्या जीते गें ॥ ६ ॥

मेरे लिये ही पिता पुत्र और भ्राताओं का भी विग्रह (लड़ाई) होजाता है, यदि असत् हों तो, क्यों कि ? उन का चित्त ममता से बन्धा हुआ रहता है ॥ ७ ॥

हे मूढ ! यह समग्र पृथिवी हमारी है तेरी नहीं इस प्रकार कहते हुए परस्पर में स्पर्द्धा करते हुवे राजा लोग मारते हैं और मरते हैं ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

रामो नाम कश्चिद्राजा । यद्वा, दाशरथिरेव निर्दिष्टः ॥ ९ ॥ १० ॥

लोकं रावयति रोदयतीति लोकरावणः ॥ ११ ॥ १२ ॥

ममतां मय्यवर्तन्त कृत्वो[illegible]
कथाऽवशेषाः कालेन ह्य[illegible] ॥
कथा इमास्ते कथिता महीयसां [illegible]षाम् ।
विज्ञानवैराग्यविवक्षया विभो ! वचोविभूतीर्न तु पा[illegible]र्थ्यम् ॥ १४ ॥
यस्तूत्तमश्लोकगुणानुवादः सङ्गीयतेऽभीक्ष्णममङ्गलघ्नः ।
तमेव नित्यं शृणुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥ १५ ॥

राजोवाच ।

केनोपायेन भगवन् ! कलेर्दोषान् कलौ जनाः ।
विधमिष्यन्त्युपचितांस्तन्मे ब्रूहि यथा मुने ! ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

मयि उच्चैर्ममतां कृत्वा येऽवर्तन्त ते कालेन कथावशेषाः कृताः विभो इति सम्बोधनं कुरुद्वहेतिवत् ॥ १३ ॥

राजवंशानुकथनस्य तात्पर्यमाह—कथा इमा इति । विज्ञानं विषयाऽसारताज्ञानं ततो वैराग्यं तयोर्विवक्षया परंयुषां भूतानां वचोविभूतीर्वाग्विलासमात्ररूपा न तु पारमार्थ्यं परमार्थं युक्तं कथनं न भवतीत्यर्थः ॥ १४ ॥

कस्तर्हि पुरुषाणामुपादेयः परमार्थस्तमाह—यस्त्विति । नित्यं प्रत्यहम् तत्राऽप्यभीक्ष्णम् ॥ १५ ॥

कलिदोषोपचये सति भक्तेरसम्भवं मन्यमानः पृच्छति—केनोपायेनेति । विधमिष्यन्ति नाशयिष्यन्ति यथा यथावत् ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

न तु पारमार्थ्यात् न तु पुरुषार्थभूतत्वादित्यर्थः ॥ १४ ॥
यस्त्विति तथा विशेषणम् ॥ १५—१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इतरैरजिताश्च के पुनस्ते नृपा इत्यतस्तान् कांश्चिद्दर्शयति, पृथुरिति । अर्जुनः कार्तवीर्यः रामो नाम कश्चिद्राजा नघुः दाशरथिः धुन्धुहा धुन्धुमारः ॥ ९ ॥ १० ॥

लोकं रावयति भारयतीति लोकरावणो रावणः भौमो नरकासुरः ॥ ११ ॥

अन्येऽप्योऽन्ये दैत्या राजानश्च महीश्वराः पृथिवीपतयः ते सर्वे एव यद्यपि सर्वतः इतरैरजिताश्च ॥ १२ ॥

मय्यप्युपर्यधिकां ममतां कृत्वाऽवर्तन्त कञ्चित्कालमिति शेषः मर्त्यधर्मिण इति हेतुगर्भम् अतः कालेनाकृतार्थाः असमापितभोगाभिलाषाः कृताः विभो इति सम्बोधनं कुरुद्वहेतिवदुपाध्येयम (वाउयम) ॥ १३ ॥

राजवंशानुकीर्तनस्य तात्पर्यकमाह—कथा इति । लोकेषु यशोवितानं विस्तार्य परेयुषां परलोकं प्राप्तानां महीयसां माहात्म्ययुक्तानाम् इमाः कथाः ते तुभ्यं कथिताः विज्ञानवैराग्यविवक्षया विज्ञानं विषयाणामसारत्वज्ञानं ततो वैराग्यं तयोर्विवक्षया कथिता इति सम्बन्धः तत्र हेतुत्वेन कथा विशिनष्टि—वचोविभूतीः व्यत्ययेन प्रथमार्थे द्वितीया वाग्वैभवविषयाः अनेन विशेषणेनाभिप्रेतं विशदयति, न तु पारमार्थ्यमिति परमोऽर्थः पुरुषार्थः तस्य भावः पारमार्थ्यं तत्तु नहीत्यर्थः न ह्येभिर्भुक्तेषु भोग्येषु पारमार्थ्यमिति भावः ॥ १४ ॥

कस्तर्हि परमार्थोपाय इत्यत आह—यस्त्विति । सङ्गीयते इत्यस्य सङ्गिरित्यादिः उत्तमश्लोकस्य भगवतो गुणानामनुवादः स च अमङ्गलं संसृत्यापादकमशुभं कर्म हन्तीति तथा तमेवमन्वहं तत्राऽप्यभीक्ष्णं शृणुयात् अवणप्रयोजनं तदधिकारिणं विशिनष्टि—कृष्णेऽमलां भक्तिमभीप्समानः अमलामनन्यप्रयोजनां भक्तिमभीप्समानः कामयमानः अवणपरस्परया भगवति दृढा भक्तिर्भविष्यतीति भावः ॥ १५॥

तदा नन्दात्प्रभृति एव कलिर्वृद्धिं गमिष्यतीत्युक्तं तत्रावसरनिरूपणानन्तरं के पुनस्ते कलिवृद्धिप्रयुक्तदोषाः ? कश्च निस्तरणोपायः ? के पुनस्तद्गुणासाधारणगुणाः ? यावदेतत्तद्गुणप्रवृत्तिस्तनः कथं वा प्रलयः ? स च काले विधः ? इति पृच्छति राजा—केनेति द्वाभ्याम् । हे भगवन् ! कलौ युगे उपचितान् कलेर्दोषान् केनोपायेन साधनेन विधमिष्यन्ति नाशयिष्यन्ति तत्साधनं मे मह्यं यथावद्ब्रूहि ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र कांश्चिन्नृपान् निर्दिशति—पृथुरित्यादिना ॥ ९—१२ ॥

एते मर्त्यशरीरधर्मिणः सर्वेऽत्यमरणां नित्यानां मयि विषये ममतां कृत्वा अकृतार्थाः असाधितपुरुषार्थाः कालेन बलिना कथावशेषाः कृताः हि यस्मात्तस्मादमीषाम् अज्ञानमहो अतः ज्ञातव्यमेव मात्राणामित्यर्थः ॥ १३ ॥

निगमयति—कथा इति । लोकेषु यशो वितानं विस्तार्य परेयुषां लोकं प्राप्तानां महीयसां मन्वादीनाम् उत्तमानां पुरुषाणामिमाः

श्रीमद्विजयध्वज[illegible]

कथास्ते कथिता मयेति शेषः। [illegible] इति तथाह वचांसीति। वचोविभूतिः वचसां विभूतयो [illegible]विवक्षया ता विज्ञानवैराग्य-विवक्षया वां यस्य पुंसो विज्ञानवैराग्ये स्यातामित्यभिप्रेत्य विभूताः ननु पारमार्थ्यं परमार्थं उत्तमार्थो वेद मुख्यार्थो भगवांस्तत्-सम्बन्धविवक्षया नैव नस्य विधिनिषेधाविषयत्वात् विज्ञानविव-क्षया अपि सद्युक्त एव ग्राह्यो नान्योक्त इत्याह—वचोविभूती-रिति। अन्यवाचो विभूतयो वचनां बहुत्वाच्च पारमार्थ्यमुत्तम-पुरुषार्थसाधनज्ञानमुद्दिश्य न भवन्तीत्यर्थः । "वाचो विग्लापनं हि तत्" इति श्रुतेः ॥ १४ ॥

कुत इतरा वाचो विसृजेयुः पुरुषार्थोपयोगिन्यो न स्युरित्यत आह—यस्त्विति। यत्र यस्यां वाचि उत्तमश्लोकगुणानुवादः सङ्गी-यते पुरुषस्तामेव वाचं शृणुयात् गृणीयादित्यर्थः। श्रीहरिभक्त्य-नुत्पादकत्वादितरा वाचो हेया इत्यर्थः "अन्या वाचो विमुञ्चथ" इति श्रुतेः ॥ १५ ॥

ज्ञातकलिदोषपरिहारोऽपि राजा लोकोपकाराय पृच्छति—केनेति। कथं तत्कालदोषात् विधमिष्यन्ति परिहरिष्यन्ति उपचितान् सञ्चितान् तदुपायस्वरूपं वद यथावत् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पृथुरिति पञ्चकम् ॥ ९ ॥ ११ ॥

अन्ये चेति चकारादन्ते च मयि ममतां कृत्वा ऽत्यव-र्तन्त तत्र ये महेश्वरा भगवदवतारा भागवता वा ते सर्वे सर्वविदः शूराश्च ज्ञानक्रियाशक्तिभ्यां परमपर्याप्ता इत्यर्थः । अत एव सर्वजितः स्वयमजिताश्च सर्वत्रैव दोषातिरहितहर्ष-यातिहार्यविवक्षया च ॥ १२ ॥

ये तु तत्र मर्त्यधर्मिणो मत्यैश्वर्याभासकास्ते कालेना-कृतार्थाः कथामात्रावशेषिताश्च कृता इत्यर्थः ॥ १३ ॥

तदेव व्यनक्ति–कथा इमा इति द्वाभ्याम्। महीयसां भग-वदवतारभागवतेभ्य इतरेषां महाराजानाम् ॥ १४ ॥

उत्तमश्लोकानां भगवदवताराणां भागवतानां च गुणा-ऽनुवादो यस्तमेव नित्यं शृणुयात् तत्र स्वनिष्ठयैवाग्रहं कुर्या-दित्यर्थः। सर्वस्य तस्यापि परमं फलमाह-कृष्ण इति । कृष्णे "कृष्णस्तु भगवान् स्वयम्" इत्यादिना प्रसिद्धे श्रीगोपाल इत्यर्थः ॥ १५—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रामो नाम कश्चिदन्यो राजा ननु दाशरथिरिति स्वामि-चरणाः ॥ ९—१२ ॥

मयि उपेममतां कृत्वा येऽवर्तन्त ते काले कथावशेषा अभूवन् किन्तु तेन अकृतार्थाः अपितु कृतार्थाः एव प्राप्तमु-क्ताभीष्टा एव कृताः पेन्यान्ताः पूर्णा एव रूपगुणादिभि-स्तदपि ते कथावशेषा अभूवन् अर्वाचीनास्तु अकृतार्था अनादि-

मिरल्पपूर्णाः किमुतेति भावः। गुणपदर्याप्तयोः कृतं "पर्याप्तिः परिपूर्णता" इत्यमरः ॥ १३ ॥

राजवंशकथनस्य तात्पर्यमाह–कथा इति। महीयसां प्रिय-व्रतादीनां परेयुषां परं श्रीभगवत्समीपं प्राप्तानां किमर्थं कथितास्तत्राह-विज्ञानं तेषां भगवदनुभवः वैराग्यं च तयो-र्विवक्षया तेषां तथाचरणाम श्रोतृजना अपि शिक्षिष्यन्तीति भावः। हे विभो! इति त्वमपि तादृश एको भवसीति भावः किञ्च इमाः कथा वचोविभूतिर्वचसां विभूतयो न भवन्ति किन्तु पारमार्थ्यम् श्रोतॄणां कथानां परमार्थतैव हेयेत्यर्थः ॥ १४ ॥

तस्मान्महीयसां तेषां कथा नित्यम् शृणुयादेव कृष्णगुणा-ऽनुवादेषु तेभ्यो महिम्नोऽप्यधिकतमानां कृष्णलीलापरि-कराणां महतां कथाभिर्विचित्रे विशेषं शृणुयादित्याह-य इति। उत्तमश्लोकस्य भगवतो गुणानुवादस्तेषु तेषु स्कन्धेषु क्वचित् क्वचिद्धामे तु सर्वत्रैव तं नित्यमेव अभीक्ष्णमेव भक्तिमभी-प्समान एव शृणुयादेवेत्यवधारणात्पत्तुरुचम् ॥ १५ ॥

विधमिष्यन्ति नाशयिष्यन्ति वद यथावत् ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मयि ममतां कृत्वा उर्व्वधिपतित्वेनाऽवर्तन्त हे विभो! विष्णुमूर्ते धर्म! ॥ १३ ॥

यावद्विषयाणामनित्यताज्ञानं ततो वैराग्यं च न स्यात्ताव-त्तत्साधनभूताः राजवंशकथाः श्रोतव्याः तयोः सिद्धौ तु विशेषतो नित्यं श्रीकृष्णभक्तिसिद्धये तच्चरितं श्रोतव्यमित्याह, कथा इति द्वाभ्याम्। लोकेषु परिशिक्षार्थं यशोवितताय विस्तार्य परेयुषां परलोकं गतानां महीयसां महानुभावानाम् इमाः कथाः हे विभो! राज्यादिवासनात्यागे समर्थ! ते तुभ्यं विज्ञानं वैराग्य-विवक्षया विज्ञानं विविधानां विषयाणामनित्यताज्ञानं विषयेभ्यो वैराग्यं च तयोर्विवक्षया कथिताः कथानां सत्यतामाह, महा-मुनीनां व्यासादीनां वचोविभूतीः वाग्वैभवविषयाः जानीहि। ननु, आसतमयाणीविभूतिभूतानां हरिभक्तिसाधनत्वमस्त्वेव-मित्याह, न तु पारमार्थ्यमिति। परमार्थः मुक्त्युपायरूपश्रीकृष्ण-भक्तिसाधनं तस्य भावस्तत्त्वम राजकथानां विज्ञानवैराग्य-साधनत्वं न तु मुक्तिप्रदभक्तिसाधनत्वमित्यर्थः। सामान्यत इद-मुक्तमम्बरीषादिकथाश्रवणस्य हरिभक्तिजनकत्वात् ॥ १४ ॥

तर्हि कृष्णभक्तिसाधनं किं तत्राह-यस्त्विति । अमङ्गलं हन्तीति अमङ्गलघ्नः य अभीक्ष्णं पुनःपुनः सम्यक् गीयते वेदैर्मुनिभिश्च तमेव नित्यमनिशं तत्रापि अभीक्ष्णम् ॥ १५ ॥

श्रीकृष्णभक्तिरेव परमपुरुषार्थं इति निर्णीतमतस्तदनुष्ठान-सिद्ध्यर्थं कलिदोषनाशोपायं युगादिकं च पृच्छति केनेति द्वाभ्याम्, ॥ १६ ॥

भाषा टीका ।

पृथु, पुरूरवा, गाधि, नहुष, भरत, सहस्रबाहु, मान्धाता सगर, परशुराम, खट्वाङ्ग, धुन्धुहा, रघु, ॥ ९ ॥

युगानि युगधर्मांश्च मानं प्र
कालस्येश्वररूपस्य गतिं वि

श्रीशुक उवा

कृते प्रवर्तते धर्मश्चतुष्पात्तज्जनैर्धृतः ।
सत्यं दया तपो दानमिति पादा विभोर्नृप ! ॥ १८ ॥
सन्तुष्टाः करुणा मैत्राः शान्ता दान्तास्तितिक्षवः ।
आत्मारामाः समदृशः प्रायशः श्रमणा जनाः ॥ १९ ॥
त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः ।
अधर्मपादैरनृतहिंसाऽसन्तोषविग्रहैः ॥ २० ॥
तदा क्रियातपोनिष्ठा नाऽतिहिंस्रा न लम्पटाः ।
त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप ! ॥ २१ ॥
तपःसत्यदयादानेष्वर्द्धं ह्रसति द्वापरे ।
हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः ॥ २२ ॥
यशस्विनो महाशालाः स्वाध्यायाध्ययने रताः ।
आढ्याः कुटुम्बिनो हृष्टा वर्णाः क्षत्रद्विजोत्तराः ॥ २३ ॥
कलौ तु धर्महेतूनां तुर्यांशोऽधर्महेतुभिः ।
एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति ॥ २४ ॥

भाषा टीका ।

खट्वाङ्ग, ययाति, शर्याति, शन्तनु, गय, भगीरथ, कुवलयाश्व, ककुत्स्थ, नैषध, नृग, ॥ १० ॥

हिरण्यकशिपु, वृत्रासुर, लोकों को रुलाने वाला रावण, नमुचि, शम्बरासुर, भौमासुर, हिरण्याक्ष, और तारकासुर ॥ ११ ॥

और बहुत से दैत्य लोग, राजा लोग, जो कि—बड़े-ईश्वर (समर्थ) कहलाते थे, वे सबही सब को जीतनेवाले और आप किसीसे न जीते जावें ऐसे प्रतापी हुवे ॥ १२ ॥

और वे सब ही मेरे विषें बड़ा ममत्व रखकर वर्तते रहे। परन्तु हे राजन् ! पृथिवी कहती है, कि—उन सबों को कालने, अकृतार्थ ही करके कथा मात्र में अवशिष्ट रहने दिये और उनका नाम निशान कुछ नहीं रहने दिया ॥ १३ ॥

इस लोक में अपने यश को विस्तारकर परमात्मा को प्राप्त होनेवाले महान्पुरुषों की वे कथा हमने विज्ञान और वैराग्य के कहने की इच्छा से कहीं, हे विभो ! राजन् ! यह लौकिक वैभव तो केवल वाणी काही विलास है कुछ स्थिर स्वभाव से रहने वाला नहीं है ॥ १४ ॥

जो पुरुष श्रीकृष्णचन्द्र के विषय में निर्मल भक्ति की चाहना करने वाला हो तो निरन्तर अमङ्गलों (अशुभों) का नाश करने वाला उत्तमश्लोक श्रीकृष्णचन्द्र का जो गुणानुवाद गाया जाता है, उसी गुणानुवाद को निरन्तर श्रवण करे ॥ १५ ॥

राजोवाच ।

राजा बोले, कि—हे मुने ! हे भगवन् ! कलियुग के मनुष्य बढे हुए कलि दोषों को किसप्रकार दूर करेंगे वह उपाय आप यथा योग्य कहिये ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कलियुगे कः परो धर्म इति । बुभुत्सया पृच्छति—युगानीति । मूहीत्यनुषङ्गः, आत्यन्तिकप्रलयजिज्ञासया पुनः पृच्छति प्रलयकल्पयोः संहारस्थितिकालयोः न्यायं बहिर्मुखः प्रश्न इत्याह—कालस्येति ॥ १७ ॥

तत्र युगधर्मांस्तावदाह—कृत इति । तज्जनैस्तत्कालीनैर्जनैः दानमरागद्वेषतयाऽभयदानं तदेव प्रथमस्कन्धे शौचशब्देनोक्तं विभोः सम्पूर्णस्य धर्मस्य ॥ ॥ १८ ॥

तदानीन्तनजनानाह—सन्तुष्टा इति । मैत्रा भूतमैत्रीयुक्ताः श्रमणा आत्माभ्यासवन्तः ॥ १९ ॥



श्रीधरस्वामिकृतभावार्थदीपिका ।

अनृतेन सत्यं हिंसया दया असन्तोषेण तपः विग्रहेण दानम्- अन्यात यथासङ्ख्यं योज्यम् ॥ २० ॥

ब्रह्मोत्तरा ब्राह्मणाधिकाः ॥ २१ ॥

हिंसाऽतुष्ट्यनृतद्वेषैरित्ययं क्रमो न विवक्षितः अधर्मस्यार्धं ह्रसति क्षीयते अधर्मस्य लक्षणाऽऽहः पादैरित्यर्थः ॥ २२ ॥

यशस्विनः कीर्तिप्रियाः क्षत्राद्द्विजोत्तराः क्षत्रियब्राह्मण- प्रधानाः ॥ २३ ॥

कलौ धर्मपादानां तुर्यांशस्तुर्यांशोऽवशिष्यते ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अधर्मपादैरिति असन्तोषो नाम लोभकार्यो दानप्रतिभटः क्रोध- कार्यो विग्रहः, तत्प्रतिभटकामविकाराणामप्युपलक्षणार्थो विग्रहः कामस्यापि तपः प्रतिभटत्वात् ॥ २० ॥ २१ ॥

हिंसातुष्ट्यनृतद्वेषैरिति अतुष्टिरसन्तोषः अर्थ विग्रह- मूलमस्तमेदम् ॥ २२ ॥

महाशालाः महागृहाः ॥ २३—४३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्रलयस्य मानं वैविध्ये मानं लिङ्गिनाप्रि-कालस्येति । ईश्वरस्य रूपं शरीरं तस्य कालस्य गतिं प्रवृत्तिं ब्रूहीति सम्बन्धः महा- त्मन इति विशेषणसामर्थ्यादीश्वरस्यैव विशेषणम् ॥ १७ ॥

तत्र तावद्युगधर्मानाह-कृत इत्यादिना यस्मादमेयमित्यतः प्राक्तनेन । चत्वारः पादा यस्य स चतुष्पाद्धर्मः तज्जनैः कृतयुग- जनैर्धृतः प्रवर्तते के पुनस्ते पादाः इत्यत आह-सत्यमिति । हे नृप विभोः पुंसस्य धर्मस्य ॥ १८ ॥

कार्तयुगान् जनान् वर्णयति-सन्तुष्टा इति । अस्य दैवालुब्धे- मैत्र्यादिः करुणाः परदुःखनिराचिकीर्षवः भूतमैत्रीयुक्ताः निति- तवः द्वन्द्वसहिष्णवः समदृशः जातिगुणादितारतम्यानादरेण सर्वस्य श्रीभगवदात्मकत्वदर्शिनः श्रमणाः तपश्चर्यादिप्रयुक्त- कायक्लेशयुक्ताः ननु सर्वेऽप्येवंविधास्तेऽमुक्ता एव स्युरिति न युगा- न्तरप्रवृत्तिरित्याशङ्क्य व्यावृत्तये प्रायश इत्युक्तम् , एवंविधा इत्यर्थः ॥ १९ ॥

त्रेतायामिति अधर्मस्य पादैरनृतादिभिर्धर्मस्य पादानां तुर्यांशः शनैर्हीयते प्रतिपादं चतुर्थांशः क्षीयते असन्तोषेति कदः विग्रहः भूतविरोधः क्रमेणैतैः सत्यादीनां तुरीयांशा हीयन्त इत्यर्थः ॥ २० ॥

तात्कालिकान् जनान् आह-नदेति । न अत्यन्ताः नातीव विषय- लोलुपाः ब्रह्मोत्तरा ब्राह्मणाधिकाः त्रयीवृद्धाः वैदिककर्म- वृद्धाः ॥ २१ ॥

द्वापरे युगे अधर्मस्य लक्षणैश्चिह्नैः पादैरिति यावत् हिंसा- दिभिस्तुर्भिर्धर्मस्य पादेषु पादाद्विरस्वरूपेषु अर्धं ह्रसति हिंसा तुष्ट्य- नृतद्वेषैरिति क्रमो न विवक्षितः अनृतेन सत्यं हिंसया दया- असन्तोषेण तपः विग्रहेण दानम् इति यथार्हं योज्यम् ॥ २२ ॥

तादात्मिकजनानाह—यशस्विन इति । महाशीलाः महाचारा- नुष्ठानशीलाः महाभोगप्रियाः क्षत्राद्द्विजोत्तमाः क्षत्रियब्राह्मण- प्रधानाः ॥ २३ ॥

कलाविति । एवमप्येष्वनुक्रमस्वधर्मलक्षणं धर्महेतूनां धर्मपादानां तुर्यांशः कलावचशिष्यते सोऽप्येधमानैर्वर्धमानैरधर्मस्य हेतुभिः पादैरहरहः क्षीयमाणोऽन्ते सावधायं विनङ्क्ष्यति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कालस्य विष्णोर्गतिं गमनप्रकारं च ॥ १७ ॥

युगीकटाहन्यायेन युगधर्मस्वरूपमाह कृति-कृत इति । तज्जनैः कृतयुगजनैः के चत्वारः पादाः ? इत्यत आह-सत्यमिति । विभो- धर्मस्य ते पादाः ॥ १८ ॥

तत्राधर्मिणां स्वभावमाह-सन्तुष्टा इतिसमदृशः वस्तुयाथात्म्य- ज्ञानिनः करुणावन्तीति करुणाः आश्रमिणा इत्यनेन भावाध- वियोगमाह-नित्यगृहस्था इत्यर्थः ॥ १९ ॥

तुर्यांशस्तुर्यांशो दानलक्षणः पादो हीयते ह्रसति पादहानौ प्रतिपक्षमाह-अधर्मेति, ॥ २० ॥

तदा त्रेतायां यज्ञादिक्रिया तपोनिष्ठा भवन्ति न अत्यन्ताः विषयरागिणो न भवन्ति त्रैवर्णिकाः त्रिवर्गसहिताः त्रयीवृद्धाः वेदविद्यायां विशारदा त्रैविद्या इत्यर्थः ब्रह्मोत्तराः ब्राह्मणा- धिकाः ॥ २१ ॥

अधर्मलक्षणैः अधर्मस्वरूपपादैः हिंसातुष्ट्यनृतद्वेषैः हिंसा- तुष्ट्यनृतलक्षणद्वेषं द्विगुणं येषां न तथा तैः अतुष्टियुतमनृतम- तुष्ट्यनृतं धर्मस्य तपःसत्यदयादानेषु पादेष्वर्धं ह्रसति अनेन द्वापरशब्दो निरुक्तः ॥ २२ ॥

महाशाला इत्यनेन यज्ञकर्तारः ॥ २३ ॥

पर्यासो निरासः सोऽपि सत्यलक्षणोऽपि धर्मो वा ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

त्रेतायामित्यादिकं प्रथमस्कन्धसन्दर्भाऽनुसारेण सङ्गत्य ज्ञेयम् ॥ २०-३१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

युगानीति ब्रूहीत्यनुषङ्गः प्रलयकल्पयोः संहारस्थितिकालयोः नचायं बहिर्मुखः प्रश्न इत्याह—कालस्येति, ॥ १७ ॥

प्रथमयुगधर्मानाह-कृत इति । तज्जनैस्तत्कालमत्र्यलोकैः भूतो धृतः दानमिति "दैप् शोधने" इत्यस्मात् शोधनमित्यर्थः । तथैव प्रथमस्कन्धोक्तेः ॥ १८ ॥

श्रमणाः आत्माभ्यासपराः ॥ १९ ॥

अनृतेन सत्यम् हिंसया दया असन्तोषेण तपः विग्रहेण शौचम् ॥ २० ॥

ब्रह्मोत्तराः ब्राह्मणाधिकाः ॥ २१ ॥

हिंसेत्यत्र क्रमो न विवक्षितः ॥ २२—२३ ॥

तस्मिन् लुब्धा दुराचारा [redacted]
दुर्भगा भूरितर्षाश्च शूद्रदा[redacted] ॥
सत्त्वं रजस्तम इति दृश्यन्[redacted]
कालसञ्चोदितास्ते वै परिवर्तन्[redacted] ॥
प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च ।
तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः ॥ २७ ॥
यदा धर्मार्थकामेषु भक्तिर्भवति देहिनाम् ।
तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ! ॥ २८ ॥
यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः ।
कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः ॥ २९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

धर्महेतूनां सत्यादीनाम् अधर्महेतुभिरनृतादिभिः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

युगानि मानतः गृहीत्वनुषङ्गः महात्मनः परमात्मनः ईश्वरान् ब्रह्मादीन् तत्तत्काले तत्तदधिकारे रूपयति निरूपयति तस्य विष्णोः यः शक्तिभूतः कालस्तस्य च गतिं गृहीत्वन्वयः । यद्वा, चेतनेन रूपेण भिन्नोऽपि भगवच्छक्तित्वात्तदभिन्नोऽतस्त्रीणि विशेषणानि कालस्यैव ॥ १७ ॥

तत्र युगधर्मान् तत्तद्युगजनांश्चाह-कृत इत्यादिना । चतुष्पात् चत्वारः पादा यस्य स तथा तज्जनैः कृतजनैः विभोः सम्पूर्णस्य धर्मस्य सत्यादयः पादाः अमयाः तत्तद्धर्माने कृतधमाः ॥ १८—२० ॥

ब्रह्मोत्तरा ब्राह्मणाधिकाः ॥ २१ ॥

अधर्मस्य तप आदिषु पादेषु अर्द्धं ह्रसति क्षीयते तत्र असन्तुष्ट्या असन्तोषेण तप अनृतेन सत्यम् हिंसया दया द्वेषशब्देन तत्कार्यभूतो विग्रहो गृह्यते कार्यकारणयोरभेदात् तेन दानमित्यर्थः ॥ २२ ॥

क्षत्रद्विजाः उत्तमाः प्रधानाः येषु ते ॥ २३ ॥

कलौ तु धर्मस्य हेतूनां पादानां तुर्यांश एव शेषः । सोऽपि अधर्मस्य हेतुभिः पादैः प्रत्यहम् एधमानैः क्षीयमाणः अन्ते विनङ्क्ष्यति ॥ २४ ॥

भाषा टीका ।

तथा युग और युगन के धर्म, तथा प्रलय और कल्प का प्रमाण, तथा महात्मा परम समर्थ श्रीविष्णु रूप काल की गति को यथावत निरूपण करिये ॥ १७ ॥

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले कि—सतयुग के विषय धर्म चारों चरणों से प्रवृत्त होता है, सतयुग के लोग उस धर्म को धारण करते हैं, हे राजन् ! सत्य दया तप और दान यही धर्म के चारों चरण हैं, ॥ १८ ॥

सतयुग में प्राय करके सब जन सन्तुष्ट दयावान् मैत्र शान्त दांत तितिक्षु आत्माराम समदृष्टि और परिश्रमशील होते हैं ॥ १९ ॥

त्रेतायुग में धर्म के चरणों में से धीरे २ चतुर्थांश हीन होजाता है वह भी अधर्म के जो झूंठ हिंसा असन्तोष और विग्रह ये चार चरण हैं तिनसे होता है ॥ २० ॥

हे राजन् ! उस समय मनुष्य क्रिया और तप में निष्ठा वाले तथा न अति हिंसक और न अति लम्पट तथा धर्म अर्थ कामरूप त्रिवर्ग के सेवन करनेवाले वेदत्रयी के जाननेवाले ब्राह्मण जिनमें अधिक ऐसे वर्ण होते हैं ॥ २१ ॥

द्वापर में धर्म के जो तप सत्य दया दान ये चार चरण हैं तिनमें से अधर्म के हिंसा असन्तोष अनृत और द्वेष इन चार चरणों से अर्ध अर्थात् दो चरण ह्रास को प्राप्त होते हैं ॥ २२ ॥

उस समय यशस्वी महाशीलवाले स्वाध्याय अध्ययन में निरत आढ्य कुटुम्बी क्षत्रिय ब्राह्मण प्रधान जिनमें ऐसे चारों वर्ण हर्षित रहते हैं ॥ २३ ॥

और कलियुग में तो अधर्म के हेतु अधर्म के चारों चरणों से क्षीण होता हुआ धर्म के चरणों में चतुर्थांश अवशिष्ट रहता है, सो भी अन्त में अर्थात् घोर कलियुग में नाश को प्राप्त होगा ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शूद्रदाशोत्तराः शूद्रकैवर्तादिप्रधानाः ॥ २५ ॥

श्रीधरस्वामिकृत[illegible]

युगानामेवम्भूतवैषम्ये कारणमा[illegible] त्रिभिः ॥ २६ ॥

मनश्च बुद्धिश्चेन्द्रियाणि च [illegible] यदा प्रसन्नत्वातिशयेन वर्तन्ते ॥ २७ ॥

यदा धर्मादिषु भक्तिः प्रीतिस्तदा रजोवृत्तिप्रधानं त्रेतायुगमिति जानीहि ॥ २८ ॥

काम्यानां कर्मणां विषये यदा प्रीतिस्तदा रजस्तमःप्रधानं द्वापरं जानीहीति पूर्वेणानुषङ्गः ॥ २९ ॥

विषादनं दुःखम् ॥ ३० ॥

कलिदोषान् प्रपञ्चयति—यस्मादित्यादिना । यस्मात्कलेर्हेतोः क्षुद्रदृशो मन्दमतय क्षुद्रभाग्या अल्पभाग्याः महाशनाः बह्वाहाराः वित्तहीना अपि कामिनश्च स्त्रियश्च पुंश्चल्यः असतीरसत्यः ॥ ३१ ॥

दस्यव उत्कृष्टाः प्रचुरा येषु ते ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथाह—तस्मिन्नित्यादिना । शुष्कवैरिणः निर्हेतुकवैरिणः दुर्भगा भाग्यहीनाः भूरिः तर्षः अर्थकामतृष्णा येषां ते शूद्रदासोत्तरजनाः शूद्रा दासाः कैवर्तादयश्च ते उत्तराः प्रधाना येषां ते प्रजा इत्यपि पाठः यद्वा शुष्कवैरिणा इति लिङ्गव्यत्यय आर्षः ॥ २५ ॥

किं तर्हि युगस्यैवंविधवैषम्ये कारणमित्यपेक्षायां "कलौ कृतयुगं तस्य कलिस्तस्य कृते युगे । यस्य चेतसि गोविन्दो हृदि यस्य न केशवः ॥" इत्युक्तरीत्या कालानुगुणसत्त्वादिगुणोल्लासह्रासप्रयुक्तकार्यवैविध्यमेवेत्याह—सत्त्वमिति पञ्चभिः । इत्युक्तं ततः किमत आह—कालसञ्चोदिता इति । तेन सत्त्वादयो गुणाः कालेन सञ्चोदिता आत्मनि परिवर्तन्ते ह्रासोल्लासाभ्यां मनसि तत्तत्कार्यकराः प्रवर्तन्त इत्यर्थः ॥ २६ ॥

तत्र मनश्च तदुत्थानि बुद्धीन्द्रियाणि च यदा सत्त्वे प्रसन्नत्वातिशयेन वर्तन्ते उद्रिक्तसत्त्वप्रधाना भवन्तीत्यर्थः । तदा कृतयुगं विद्याज्जानीयात् यतः सत्त्वोल्लासकार्ये ज्ञाने तपसि च कार्तयुगधर्मे रुचिः कार्यविशेषेणैव कालविशेषानुमानमिति भावः ॥ २७ ॥

यदा कर्मस्वितिभक्तिरभिरुचिः तदा रजोवृत्तिप्रधानं त्रेतायुगमिति जानीहि बुद्धिमन्निति सम्बोधनम् ॥ २८ ॥

यदा लोभ इति मानो गर्वः स चोत्तमेष्ववमति-हेतुश्चित्तविकारः कर्मणामिति विषयविषयिभावसम्बन्धे षष्ठी अनुषक्तेन भक्तिपदेन सम्बन्धः काम्यकर्मस्वभिरुचिरित्यर्थः तत्तदा रजस्तमोवृत्तिप्रधानं द्वापरयुगं जानीहि इति पूर्वेण सम्बन्धः ॥ २९ ॥

यदेति । माया कापट्यं विषादनमान्तरं दुःखं शोको बाह्यमश्रुविमोचनादिरूपं दैन्यं कार्पण्यं तदा तामसः केवलतमोगुणवृत्तिप्रधानः कलिः स्मृतः ॥ ३० ॥

अथ कलौ विशिष्टेतद्दोषान्प्रपञ्चयति—यस्मादित्यादिना । यस्मात् मर्त्याः वक्ष्यमाणविधाः स कलिरिति पूर्वेण सम्बन्धः क्षुद्रदृशः मन्दमतयः क्षुद्रभाग्या अल्पभाग्याः असतीरसत्यः "दुःशीला कर्कशा चण्डी नित्यं कलहकारिणी" इत्युक्तविधाः ॥ ३१ ॥

जनपदाः देशवासिनः दस्युभिश्चोरादिभिरुत्कृष्टाः उपद्रुताः प्रजाभक्षाः प्रजापीडनपराः द्विजास्तु शिश्नोदरपोषणपराः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

शुष्कवैरिणः निष्प्रयोजनवैरिणः शूद्रदासोत्तराः प्राधान्येन शूद्राणां दासाः ॥ २५ ॥

सत्त्वादयो गुणा आत्मनि मनसि परिवर्तन्ते पर्यायेण वर्तन्ते ॥ २६ ॥

कथं तत्राह—प्रसीदन्तीति । यदा सत्त्वं प्रसीदति तदा मन आदीनि प्रसन्नानि भवन्ति लक्षणान्तरमाह—ज्ञान इति । यदा ज्ञानादिरुचिस्तदा कुत एतत्कल्प्यत इत्यत आह—तदेति । मन आदिप्रसादेन ज्ञानाद्यभिरुचिर्जायत इति यस्मात्तस्मात् इति ॥ २७ ॥

ईहितं यदा काम्यम् इति कामार्थेषु कर्मसु वर्णाश्रमाचारादीनामपि स्नेहविशेषो भवति तदा बुद्धिमान् रजोवृत्तिकां त्रेतेति जानीत जानातु ॥ २८ ॥

यदा आत्मनि लोभादयो दृश्यन्ते तदा रजस्तमः रजस्तमोगुणवृत्तियुतं द्वापरं जानातु ॥ २९ ॥

यदा मायादयो दृश्यन्ते तत्र स कलिस्तामसस्तमोगुणवृत्तिमानित्युपलक्षयते विषादनं विषण्णता ॥ ३० ॥

यस्मात् कलिदोषात् क्षुद्रदृशः अल्पज्ञानाः लोकोपद्रवकर्मज्ञाना वा वृत्तिहीना जीवनोपायरहिताः असतीस्त्रियः ॥ ३१ ॥

दस्यूत्कृष्टाः दस्यूपद्रुताः "कृष हिंसायाम्" इति धातुः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दस्यूत्कृष्टा दस्यव एव उत्कृष्टाः प्रधाना येषु ते ॥ ३२—४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

शूद्रदासोत्तरा शूद्रकैवर्तप्रधानाः ॥ २५ ॥

यथा एकस्यापि ग्रहस्य सूर्यादेर्दशायां सर्वेषां ग्रहाणामन्तर्दशा भवन्ति तथैकैकस्यापि युगस्य मध्ये चत्वारि युगानि तिष्ठन्त्यतः कलिमध्येऽपि कदाचित् कदाचिच्च धर्मह्रासतारतम्यं एकस्मिन् पुंस्यप्येवं प्रवर्तमानमाह—सत्त्वमिति । आत्मन्यन्तःकरणे परिवर्तन्ते यातायातं कुर्वन्ति ॥ २६ ॥

एतानि युगानि—प्रभवन्तीति । सत्त्वे निष्कामधर्मे ॥ २७ ॥

काम्येषु सकामधर्मेषु भक्तिः प्रीतिः ॥ २८ ॥

यदा काम्यानां कर्मणां काम्येषु कर्मस्वित्यर्थः । अकाराद्धर्मेष्वपि प्रीतिस्तदा रजस्तमःप्रधानं द्वापरं जानीहि तत्र लोभादयो भवन्तीत्यन्वयः ॥ २९ ॥

यदा केवलेष्वधर्मेष्वेव प्रीतिस्तदा तामसः प्रसिद्धः कलिरेव तदा मायाऽनृतादयः विषादनं विषादः ॥ ३० ॥

अथ कलेर्दोषान् प्रपञ्चयति—यस्मादिति यस्मात्कलेर्हेतोः ॥ ३१ ॥ ३२ ॥

अव्रता वटवोऽशौचा भि [illegible]
तपस्विनो ग्रामवासा न्या [illegible]
ह्रस्वकाया महाहारा भूर्य [illegible]
शश्वत्कटुकभाषिण्यश्चौर्य [illegible] ।
पणयिष्यन्ति वै क्षुद्राः किराटाः कूटकारिणः ॥
अनापद्यपि मंस्यन्ते वार्तां साधु जुगुप्सिताम् ॥ ३५ ॥
पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् ।
भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ॥ ३६ ॥
पितृभ्रातृसुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः ।
ननान्दृश्यालसम्वादा दीनाः स्त्रैणाः कलौ नराः ॥ ३७ ॥
शूद्राः प्रतिग्रहीष्यन्ति तपो वेषोपजीविनः ।
धर्मं वक्ष्यन्त्यधर्मज्ञा अधिरुह्योत्तममासनम् ॥ ३८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शूद्राः दाशाः कैवर्तादयश्च उत्तराः प्रधानाः यासु ताः शूद्रदासा इतिपाठे तु शूद्राः दासाः भृत्यभूताः भार्यापुत्रादय एव प्रधाना यासु न तु गुर्वादयस्ताः ॥ २५ ॥

युगानामुक्तवैषम्ये कारणमाह-सत्त्वमिति । आत्मनि मनसि परिवर्तन्ते अतः पुरुषेऽपि दृश्यन्ते ॥ २६ ॥

प्रभवन्ति प्रवर्तन्ते ॥ २७ ॥

भक्तिरुचिः ॥ २८ ॥

काम्यानां कर्मणां यदा रुचिः ॥ २९ ॥

माया वञ्चना: तन्द्राऽनवहितता विषादनमन्तर्दुःखित-त्वम ॥ ३० ॥

अथ कलेर्दोषान् विस्तरेणाह-यस्मादित्यादि चतुर्दशभिः । यस्मात् कलेर्हेतोः मर्त्याः वक्ष्यमाणप्रकाराः भविष्यन्ति स कलिः स्मृत इति पूर्वेण सम्बन्धः । क्षुद्राः अधर्मैकविषया दृक् दृष्टिर्येषां ते क्षुद्रमल्पं भाग्यं येषां ते महदशनं भोजनं येषां ते असतीधर्मबाह्याः स्त्रीः समाश्रित्य सत्योऽपि स्वैरिण्यः स्वच्छन्दचारिण्यो भविष्यन्ति ॥ ३१ ॥

दस्यवः उत्कृष्टाः बलोत्कटाः येषु ते पाषण्डैः स्वच्छन्दधर्माभासैः दूषिताः अभिभूताः ॥ ३२ ॥

भाषा टीका ।

तिस कलियुग में प्रजा के लोग बड़े लोभी दुराचारी शुष्क बैर करने वाले भाग्यहीन और बहुत तृष्णा वाले होंगे, तथा उन्हीं में शूद्र और कैवर्त इत्यादि लोग प्रधान होंगे ॥ २५ ॥

सत्त्व रज और तम ये तीनों गुण पुरुष में देख पड़ते हैं ये गुण काल से प्रेरित होकर आत्मा में परिवर्त्तन कोप्राप्त हुआ करते हैं ॥ २६ ॥

बस यही पहिचान है, कि-जिस समय मन बुद्धि और इन्द्रियें सत्त्व गुण में वर्त्तती हैं उसी समय में ज्ञान और तप में रुचि होती है, उसी समय सतयुग जानना चाहिये ॥ २७ ॥

हे बुद्धिमन्! राजन्! जिस समय पर काम्य कर्मों में रुचि होती है, उस समय रजोगुण की वृत्ति जानना और उसी समय को त्रेताभी जानना चाहिये ॥ २८ ॥

जिस समय लोभ असन्तोष मान दम्भ और मत्सर एवं काम्य कर्मों में रुचि होती है उसी, समय को रजोगुण तमोगुण मिश्रित द्वापर जानना ॥ २९ ॥

और जिस समय में कपट, झूठ, आलस्य, निद्रा, हिंसा दुःख, शोक, मोह, भय, और दीनता होवे; उसी समय में केवल तमोगुण की वृत्ति वाला कलियुग जानना ॥ ३० ॥

जिस कलि के प्रताप से मनुष्य क्षुद्र दृष्टि वाले, क्षुद्र भाग्य वाले, बहुत खाने वाले, कामी और धनहीन होवेंगे और स्त्रियें बड़ी खोटी व्यभिचारिणी होवेंगी ॥ ३१ ॥

देशों में चोर बहुत होजांयगे वेद पाखण्ड से दूषित हो जांयगे, राजा लोग प्रजा को भक्षण करने वाले होवेंगे, ब्राह्मण लोग शिश्नोदर परायण हो जांयगे ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अव्रता विहिताचारशून्याः अशौचाः शौचशून्याश्च वटवो ब्रह्मचारिणो भविष्यन्ति कुटुम्बिनश्च गृहस्थाः अत्र भिक्षाटन-

नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः ।
निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ ३९ ॥
वासोऽन्नपानशयनव्यवायस्नानभूषणैः ।
हीनाः पिशाचसन्दर्शा भविष्यन्ति कलौ प्रजाः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एव भविष्यन्ति नतु भिक्षां दास्यन्ति, तपस्विनो वनस्थाः वनं हित्वा ग्रामवासा भविष्यन्ति न्यासिनो धनयोऽर्थार्थलोलुपा भविष्यन्ति ॥ ३३ ॥

पुनरपि स्त्रीणां स्वभावमाह-ह्रस्वकाया इति । कटुकभाषिण्योऽप्रियवादिन्यः चौर्यं च माया कपटमुरु च साहसं यासां ताः ॥ ३४ ॥

किञ्च किराटा वणिजः पण्यविक्रयिणो भविष्यन्ति क्रयविक्रयादिव्यवहारं प्रवर्तयिष्यन्ति किञ्च सर्वे जना अनापद्यपि जुगुप्सितां निन्दितां वार्तां वृत्तिं साधु मंस्यन्ते ॥ ३५ ॥

सर्वोत्तममपि पतिं द्रव्यहीनं भृत्यास्त्यक्ष्यन्ति पतयश्च विपन्नं रोगादिभिरपारात्मं कौलं कुलपरम्परायातं त्यक्ष्यन्ति अपयस्विनीर्दुग्धहीनाः ॥ ३६ ॥

सौरतं सुरतनिमित्तं सौहृदं येषां ते अत एव नताः स्वरोऽत्र भार्याभगिन्यः श्याला भार्याभ्रातरस्तैः सम्वादो मन्त्रालोचनं येषां ते मनन्ह इति वा पाठः ॥ ३७—३९ ॥

पिशाचसन्दर्शाः पिशाचसदृशाः ॥ ४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

बटवो ब्रह्मचर्याश्रमिणः अव्रताः आश्रमोचितव्रतहीनाः शौचहीनाश्च भविष्यन्ति कुटुम्बिनो गृहस्थाः भिक्षवः भिक्षाटनपराः तपस्विनो वानप्रस्थाः ग्रामे वासो येषां ते वासशब्दोऽभिकरणव्युत्पन्नः न्यासिनः तुर्याश्रमिणः अर्थलोलुपाः वित्ताभिलाषिण इत्यर्थः ॥ ३३ ॥

पुनरपि स्त्रीणां स्वभावमाह-ह्रस्वकायाः अल्पपरिमाणाः भूरीण्यपत्यानि यासां ताः त्यक्तलज्जाः कटुकभाषिण्यः अप्रियवादिन्यः चौर्यं च माया कापट्यं च उरु साहसञ्चेति द्वन्द्वः ततो मत्वर्थीयोच् ॥ ३४ ॥

किराटाः वणिजः संहृत्य व्यापारिणः पण्यविक्रयिणो भविष्यन्ति क्रयविक्रयादिव्यापारं प्रवर्तयिष्यन्ति क्षुद्राः सन्ति व्यवहारे क्षुद्रचेष्टा भवन्ति किञ्च अनापद्यपि जुगुप्सितां निन्दितां वृत्तिं साधु मन्यन्ते ॥ ३५ ॥

अभिजोत्तमं सर्वोत्तममपि पतिं स्वामिनं भृत्यास्त्यक्ष्यन्ति तथा पतयोऽपि भृत्यं विपन्नं रोगादिभिरपारात्मं त्यक्ष्यन्ति कौलं कुलपरम्परागतं महाभागवतं धर्मं गावश्चापयस्विनीः दुग्धदोग्ध्रीः त्यक्ष्यन्ति इति सम्बन्धः ॥ ३६ ॥

विविक्ते । सौरतं सुरतनिमित्तं सौहृदं येषां ते अत एव नताः स्त्रोऽत्र भार्याभगिन्यः श्यालाः भार्याभ्रातरश्च तैः सम्वादो मन्त्रालोचनं येषां ते कुतः कीदृशाः स्त्रीवश्याः ॥ ३७ ॥

शूद्रा इति । तपोवेषेणोपजीवन्तीति तथा प्रतिग्रहीष्यन्ति तथाऽस्वधर्मज्ञा अत्युन्नतमासनमधिरुह्य धर्मं वक्ष्यन्त्युपदेक्ष्यन्तीत्यर्थः । अत्राद्यनानन्तर इत्येनाभिमिताः कलिकृतदोषकीर्तनं निहायन्तर्भावेन ह्रस्वकाया इति तत्कृतस्त्रीदोषकथनं तत एकेन तत्कृतवणिग्दोष कीर्तनं ततो द्वाभ्यां चातुर्वर्ण्यसहायकथनं तत एकेन शूद्रदोषकीर्तनम् इति विभागः ॥ ३८ ॥

अथ चातुर्वर्ण्यसाधारण्यात् तत्कृतदोषानाह-नित्यमिति पञ्चभिः । उद्विग्नमनसः इष्टचञ्चलमनसः भीतमानसा वा निरन्नेऽन्नरहिते दुर्भिक्षेण करेण स्वामिग्राह्यभागेन च कर्शिताः पीडिताः अनावृष्टिभयेनातिशयातुराः दुःखिताः ॥ ३९ ॥

वास इति व्यवायो मैथुनं वास आदिभिर्हीना पिशाचसन्दर्शाः पिशाचसदृशः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

बटवो ब्रह्मचारिणः अव्रताः महाव्रतादिव्रतहीनाः आश्रमकार्यादिव्रतहीना वा ॥ ३३ ॥

भूर्यपत्याः बहुसन्ताना ॥ ३४ ॥

क्षुद्राः दरिद्राः किराटाः परिमाणफलानि पण्यविक्रयिणः विक्रेष्यन्ति कूटकारिणः धातुवादकरणशीलाः वार्ता कुसीदादिधर्मवृत्तिम ॥ ३५ ॥

अभिजोत्तमं कुलादिनेति शेषः कौलं कुले विद्यमानं विपत्तम आपदं प्राप्तं भृत्यं पतयस्त्यक्ष्यन्ति अपयस्विनीः क्षीररहिता गाश्च त्यक्ष्यन्तीति शेषः ॥ ३६ ॥

सौरतं सुरतमात्रनिबन्धं सौहृदं प्रेम येषां ते तथा श्वशुरश्यालाभ्यां सह मन्त्रकृत् वादो येषां ते तथा ॥ ३७—३९ ॥

पिशाचवत्सन्दर्शो दर्शनं येषां तथा ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

बटवो ब्रह्मचारिणः अव्रताः व्रतहीनाः शौचहीनाश्च भविष्यन्ति कुटुम्बिनो गृहस्था भिक्षवः भिक्षाटनपरा न तु भिक्षां दास्यन्ति तपस्विनो वानप्रस्थाः वनं हित्वा ग्रामवासाः ग्रामं गृहस्थानेव स्वतपो दर्शयिष्यन्तीत्यर्थः । न्यासिनो यतयः अत्यर्थलोलुपाः वित्तसञ्चयं प्रयतिष्यन्ते ॥ ३३ ॥

पुनरपि स्त्रीणां पर्याप्त-ह्रस्वेति ॥ ३४ ॥

कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः ।
त्यक्ष्यन्ति च प्रियान् प्राणान् हनिष्यन्ति स्वकानपि ॥ ४१ ॥
न रक्षिष्यन्ति मनुजा स्थविरौ पितरावपि ।
पुत्रान् सर्वार्थकुशलान् क्षुद्राः शिश्नोदरम्भराः ॥ ४२ ॥
कलौ न राजन् ! जगतां परं गुरुं त्रिलोकनाथानतपादपङ्कजम् ।
प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाषण्डविभिन्नचेतसः ॥ ४३ ॥
यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा विवशो गृणन् पुमान् ।
विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥ ४४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

किराटा वणिजः कूटकारिणः अधर्मेण कपटं कृत्वा पणायिष्यन्ति व्यवहारं प्रवर्त्तयिष्यन्ते किञ्च सर्वे एव वर्णाः अनापद्यपि जुगुप्सितां वार्त्तां साधु मंस्यन्ते ॥ ३५ ॥

अखिलोत्तममपि पतिं निर्द्रव्यं भार्य्यास्तथा भृत्या अपि त्यक्ष्यन्ति पतयश्च विपन्नं रोगादिग्रस्तं भृत्यं कौलं कुलपरम्परागतमपि त्यक्ष्यन्ति गाश्च दुग्धस्रावपर्यासिमतीस्त्यक्ष्यन्ति ॥ ३६ ॥

ननान्दृरोऽत्र भार्य्याभगिन्यः ॥ ३७—४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

बटवो ब्रह्मचारिणः अव्रता विहितव्रतहीनाः तत्र नैष्ठिकामाबस्याह—अशौचाः बाह्याऽभ्यन्तरशौचहीनाः कुटुम्बिनो गृहस्थाश्च भिक्षवः तपस्विनो वानप्रस्था ग्रामे वासो येषां ते तथा न्यासिनः संन्यासिनः अर्थेष्विन्द्रियार्थेषु लोलुपाः लम्पटाः भविष्यन्ति ॥ ३३ ॥

पुनस्स्त्रीस्वभावमाह—ह्रस्वकाया इति ॥ ३४ ॥

किराटाः वणिजः क्रयविक्रयादिव्यवहारं प्रवर्तयिष्यन्ति अनापद्यतिजुगुप्सितां वार्तां वृत्तिं साधु मंस्यन्ते ॥ ३५ ॥

भृत्याः निर्द्रव्यम् अखिलोत्तममपि तत्रापि कौलं परम्पराप्राप्तं पतिं पतयोपि विपन्नं दुग्धस्रावादिना कार्याक्षमं भृत्यं च त्यक्ष्यन्ति अपयास्विनीः दुग्धदोहाः त्यक्ष्यन्ति ॥ २६ ॥

सौरतं सुरतहेतुकं सौहृदं येषां ते ननान्दरोऽत्र भार्याभगिन्यस्ताभिः श्यालैश्च सम्वादो मन्त्रालोचनं येषां ते ॥ ३७ ॥ ३८ ॥ ३९ ॥

पिशाचानामिव सन्दक् दर्शः दर्शनं यासां ताः ॥ ४० ॥

भाषा टीका ।

ब्रह्मचारि लोग शौच और शास्त्र विहित आचार से शून्य होजावें गे, और कुटुम्बी अर्थात् गृहस्थ लोग भिक्षुक होकर भिक्षाटन करेंगे आप भिक्षा न देवें गे, तपस्विलोग वनवास को छोड कर ग्राम वास करेंगे, एवं संन्यासी लोग धनी और द्रव्य के बडे लोभी हुआ करेंगे ॥ ३३ ॥

और फिर स्त्रियें कैसी होंगी कि—ह्रस्वकाय वाली अर्थात् कद की छोटी पर आहार बहुत करेंगी और उनों के लडके लडकी बहुत होंगे और वे स्त्रियें बडी निर्लज्ज होंगी, सदा कटुभाषण करने वाली तथा चोरी कपट और बडे साहस करने वाली होंगी ॥ ३४ ॥

और कपट करनेवाले क्षुद्र बनिये लोग नये २ क्रय विक्रय के व्यवहारों को प्रवृत्त करेंगे, तथा सब लोग अनापत्ति समय में भी निन्दितवृत्ति को अच्छी समुझेंगे ॥ ३५ ॥

नौकर चाकर लोग अपने उत्तम स्वामी (मालिक) को धन हीन होनेपर त्यागदिया करेंगे, तथा स्वामी लोग भी परम्परा से सदा के काम करनेवाले नौकरों को आपत्तिग्रस्त होनेपर त्यागदिया करेंगे, एवं दुग्ध नहीं देनेवाली गायों को पति लोग त्याग देंगे ॥ ३६ ॥

पिता, भ्राता, सुहृद, और जाति के लोगों को छोड़कर मैथुन के निमित्त सौहृद करेंगे, और कलियुग में मनुष्य स्त्रीपरायण होकर साली और श्याले से सलाह किया करेंगे, और उनके सामने दीन हुआ करेंगे ॥ ३७ ॥

तप के वेष से जीवन करनेवालेशूद्र लोग प्रतिग्रह [दान] लिया करेंगे, और वह शूद्र लोग धर्म को न जानकर भी उत्तम ऊंचे आसन पर बैठ कर धर्म का उपदेश करेंगे ॥ ३८ ॥

प्रजा के लोग दुर्भिक्ष और कर से पीडित होकर नित्य ही उद्विग्न मनवाले रहेंगे, हे राजन् ! भूतल में अन्न तो रहेगा नहीं तब निरन्न भूतल में अनावृष्टि के भय से लोग व्याकुल रहेंगे ॥ ३९ ॥

कलियुग में प्रजा के लोग वस्त्र, अन्न, पान, शयन, विहार मैथुन, स्नान, भूषण, इन सबों से वंचित (हीन) होकर पिशाच के सदृश होजायेंगे ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

काकिणिके विंशतिवराटकामात्रेऽप्यर्थे निमित्तभूते विगृह्य वैरं कृत्वा ॥ ४१ ॥ ४२ ॥

महान्तमनर्थमाह द्वाभ्यां—कलाविति । त्रिलोकनाथैरानतं नमस्कृतं पादपङ्कजं यस्य तं न यक्ष्यन्ति न, पूजयिष्यन्ति पाषण्डैर्विभिन्नमन्यथा कृतं चेतो येषां ते ॥ ४३ ॥

पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसम्भवान् ।
सर्वान् हरति चित्तस्थो भगवान् पुरुषोत्तमः ॥ ४५ ॥
श्रुतः सङ्कीर्तितो ध्यातः पूजितश्चाऽऽदृतोऽपि वा ।
नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभम् ॥ ४६ ॥
यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हन्ति धातुजम् ।
एवमात्मगतो विष्णुर्योगिनामशुभाशयम् ॥ ४७ ॥
विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः ।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

विषक्तो गृह्णन् सन् विमुक्ताः कर्मरूपा अर्गलाः प्रतिबन्धा यस्य सः ॥ ४४ ॥

तदेवं कलिदोषान् प्रपञ्च्य प्रस्तुतं तन्निस्तारोपायमाह, पुंसामिति षड्भिः । द्रव्यदेशात्मभिः सम्भवो येषां तान् चित्तस्थश्चित्ते स्फुरितः ॥ ४५ ॥ ४६ ॥

अयमेवोपायो नान्य इति सदृष्टान्तमाह—यथेति । धातुजं ताम्रादिसंश्लेषजातं हेम्नो दुर्वर्णं मालिन्यं तत्र स्थितो वह्निरेव हन्ति हरति, न तु तोयादि एवं योगिनामपि विष्णुरेव न तु योगादिकमित्यर्थः ॥ ४७ ॥

एतदेव विवृणोति—विद्येति । विद्या देवतोपासना ॥ ४८ ॥ ४९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

विमुक्तकर्मार्गलः विमुक्तकर्मवासनः ॥ ४४—४६ ॥
दुर्वर्णं रजतम् ॥ ४७—४९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

कलाविति । काकिणिके वराटिकामात्रेऽप्यर्थे विषये विगृह्य विरोधं कृत्वाऽतः त्यक्तं सौहृदं यैः ते ॥ ४१ ॥

नेति । स्थविरौ वृद्धौ अनेन "वृद्धौ च मातापितरौ" इत्यादिशास्त्रोक्तं सूचितं सर्वार्थेषु कुशलानपि पुत्रान् रक्षिष्यन्त्यपि तु तेऽपि विभज्य वर्तिष्यन्त इति भावः ॥ ४२ ॥

महान्तमनर्थमाह—कलौ नेति द्वाभ्यां । हे राजन् ! त्रैलोक्यनाथेन ब्रह्मणा आनतं नमस्कृतं पादपद्मं यस्य तमच्युतं न यक्ष्यन्ति नाराधयिष्यन्ति तत्र हेतुः पाषण्डैर्विभिन्नमन्यथा कृतं चेतो येषां ते ॥ ४३ ॥

यन्नामधेयमिति । म्रियमाणाद्यन्यतमः पुमान् यस्य भगवतो नामधेयं गृणन् कीर्तयन्विमुक्ताः कर्मरूपा अर्गलाः प्रतिबन्धाः यस्य सः उत्तमां गतिं मुक्तिं प्राप्नोति तं भगवन्तं न यक्ष्यन्ति अथातुरो रोगादिपीडितः पतत्स्खलनेन पतितो विवशितः स्वस्खलनेन स्ववर्णाश्रमाचारादविधुरः तत्र म्रियमाणो मरणातुरस्सन्नेवोत्तमां गतिं प्राप्नुवन्ति इतरेष्वप्यनायासाद्भुवः कीर्तनेति भावः । यद्वा, आतुराद्यन्यतमोऽपि म्रियमाणो गृणन् प्राप्नोतीति सम्बन्धः ॥ ४४ ॥

तदेवं कलिदोषान् प्रपञ्च्य तन्निस्तारोपायमाह—पुंसामिति षड्भिः । द्रव्यदेशात्मभिः सम्भवो येषां तान् तत्र द्रव्यदेशौ निषिद्धौ आत्मा विषयप्रवणं मनः चित्तस्थः ध्यानेन चित्ते स्थिरीकृतः हरति नाशयति ॥ ४५ ॥

कथं चित्तस्थो भवतीत्यत आह—श्रुत इति । श्रवणादिविषयः सन् हृत्स्थो भवति ततो जन्मायुतस्यापि अशुभं जन्मायुतार्जितमपि पापमित्यर्थः धुनोति नाशयति ॥ ४६ ॥

तदेव दृष्टान्तेनोपपादयति—यथेति । धातुस्ताम्रादिः तत्संश्लेषजातं हेम्नो दुर्वर्णं तत्र स्थितो वह्निर्हरति, एवं योगिनामात्मस्थितो मनसि स्थितो विष्णुरशुभाशयं हन्ति आशयो मनस्तस्य मालिन्यं हन्तीत्यर्थः ॥ ४७ ॥

इतोऽन्य उपायो नास्ति इत्याह—विद्येति । यथा त्रिविधपरिच्छेदरहितेऽप्युपासकानुग्रहार्थं हृदिस्थे भगवत्यनन्ते अन्तरात्मा मनोऽत्यन्तशुद्धिं लभते तथा विद्यादिभिर्न लभते तत्र विद्या शास्त्राध्ययनं तपोऽनशनादि वर्णाश्रमधर्मो वा प्राणनिरोधः प्राणायामः मैत्री अहिंसा व्रतम् एकादश्यादिव्रतादि जप्यं मन्त्रजपः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

विगृह्य विग्रहं वैरं कृत्वा काकिणिकेऽर्थे अल्पधनविषये ॥ ४१ ॥ ४२ ॥

पाषण्डशास्त्रोक्तविपर्ययेण विभिन्नचेतसः व्यामोहितचित्ताः ॥ ४३ ॥

किं माहात्म्योऽयं भगवान् येन तद्भजनं सप्रयोजनं स्यादिति तत्राह—यन्नामधेयमिति । विमुक्तं कर्मलक्षणमर्गलं तालकीलं यस्य स तथा विध्वस्तकर्मबन्धन इत्यर्थः ॥ ४४ ॥

केनोपायेनेत्यादिना पृष्टं परिहर्तुमाह—पुंसामित्यादिना । द्रव्यदेशात्मसम्भवान् द्रव्यदेशस्वभावोद्भूतान् किमपि नावशिष्यतेऽतः सर्वमित्युक्तम् ॥ ४५ ॥

चित्तस्थितिभावे नानासाधनमाह—श्रुत इत्यादिना । अशुभम-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इत्युपलक्षणं प्रथमकर्मभोगायतनप्रारब्धप्रभृतिसञ्चिताशुभमित्यर्थः ॥ ४६ ॥

मन्दाधिकारिणः क्षिप्रप्रबुद्ध्यर्थं सदृष्टान्तमाह-यथेति।शास्त्रोक्ता अष्टावष्टदोषा दुर्वर्णमित्यनेन गृह्यन्ते धातुजं गैरिकसमुद्भवं वा आत्मगतः चित्तगतः अशुभाशयं पापराशिं पापसंपृक्तजन्मनो वा ॥ ४७ ॥

विद्यादिनान्तःकरणशुद्ध्या श्रेयः क्वाचित्किञ्चित्तस्थेन हरिणेति तत्राह—विद्येत्यादिना । प्राणनिरोधः प्राणायामः अन्तरात्मा अन्तःकरणं हृदिस्थे सति ॥ ४८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदानीं पाषण्डविभिन्नचेतस्त्वेन तथाजनत्वेमुख्यं तु तन्नामविमुखानामेव ध्वादित्यभिप्रेत्य प्रायेणेत्येव व्यनक्ति-यन्नामेति । नामान्येवोपसंहरिष्यन्-कलेरित्यादिद्वाभ्याम् ॥ ४४ ॥

यत्रैव नाम भगवद्रूपेण स्फुरत् नाविद्धातीत्याह-पुंसामिति ॥ ४५ ॥

भगवतः स्वभाव एव तादृश इत्याह—श्रुत इति त्रिभिः ॥ ४६ ॥

तत्स्वभावत्वयं नान्यत्र सम्भवतीत्याह—यथेति द्वाभ्याम् । ॥ ४७—४८ ॥

श्रीविश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

काकिणिकं विंशतिवराटिकामात्रेऽपि अर्थविषये विगृह्य कलहं कृत्वा ॥ ४१—४२ ॥

किञ्च, कलेः मन्त्यानन्तरं तु महान्तमनर्थमाह-कलाविति । द्वाभ्याम् ॥ ४३—४४ ॥

ननुक्तं केनोपायेन कलिदोषान् नाशयिष्यन्ति तत्रोत्तरमाह-पुंसामिति । द्रव्यदेशमनःशुद्ध्यभावेन सम्भवो येषां तान् चित्तस्थः स्मृतः सन् न केवलमनेनेन दोषान् हरति अपितु प्राचीनार्वाचीनं सर्वमपि पापमित्याह-श्रुत इति ॥ ४५-४६ ॥

किञ्चान्तःकरणशुद्धौ भगवत्स्मरणादिरेवोपायो नान्य इति सदृष्टान्तमाह—यथेति । धातुजं ताम्रादिसंश्लेषजातं हेम्नो-दुर्वर्णं मालिन्यं तत्र स्थितो वह्निरेव हरति नतु तोयादि एवं योगिनामपि विष्णुरेव नतु यमनियमादिकम् ॥ ४७ ॥

एतद्विवृणोति—विद्येति ॥ ४८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

काकिणिके विंशतिवराटिकामात्रे ऽस्वर्थे विगृह्य विरोधं कृत्वा ॥ ४१ ॥ ४२ ॥

प्रायेणेत्यनेन भगवदनुगृहीताः केचित्तमाराधयिष्यन्त्यपीति सूचितम् ॥ ४३ ॥

विमुक्तो निवृत्तः कर्मार्गलः कर्मरूपः अर्गलो यस्य सः ॥ ४४ ॥

अथ कलिदोषनिस्तारोपायं दर्शयति—पुंसामिति षड्भिः । द्रव्यैः अयुक्ताद्यादिभिः देशैरयुक्तस्थलैः आत्मना मलिनेन मनसा सम्भवो येषां स्यात् ॥ ४५ ॥ ४६ ॥

आत्मगतः मनोगतः अशुभाशयमशुभयुक्तं मनः शोधयतीति शेषः ॥ ४७ ॥

विद्या शास्त्राध्ययनम् तपः वर्णाश्रमधर्मः प्राणनिरोधः प्राणजयः मैत्री सर्वेषु दया अन्तरात्मा मनः ॥ ४८ ॥ ४९॥

भाषा टीका ।

कलि में एक दमड़ी के वास्ते भी लड़ाई कर अपने सुहृदपने को छोड़ दिया करेंगे । और एक दमड़ी के वास्ते ही प्रियप्राणों को त्याग देवेंगे, और अपने लोगों को भी मारेंगे मरने मारने पर त्यार रहेंगे ॥ ४१ ॥

कलि के मनुष्य अपने माता पिताओं का अति वृद्ध होने पर भी पालन नहीं करेंगे, अपने पुत्र सर्व कार्य में कुशल होंगे तो भी उनका पालन नहीं करेंगे । क्योंकि ! जन निशदिन शिश्नोदर परायण होंगे ॥ ४२ ॥

हे राजन् ! एक और बड़ा अनर्थ होगा, कि—कलियुग मे जगत् के परम गुरु, और त्रिलोकी के नाथ जो ब्रह्म रुद्र इन्द्रादिक हैं वे भी जिनके श्रीचरणकमल को सदा नमस्कार करें, ऐसे अच्युत भगवान् श्रीविष्णु का मनुष्य लोग पाषण्डसे विभिन्न चित्तवाले होकर प्रायकर नहीं पूजन करेंगे ॥ ४३ ॥

आतुर पुरुष मरते समय, गिरने पर,, खिसलने पर,, विवश होकर भी जिन भगवान् के श्रीनाम का ग्रहण करता हुआ, कर्म की अर्गला (बेड़ी) से छूटकर उत्तम गति को को प्राप्त होता है, कलियुग में उनही श्रीविष्णु भगवान् को मनुष्य नहीं पूजेंगे ॥ ४४ ॥

द्रव्य देश और आत्मा से होने वाले कलिकृत पुरुषों के सम्पूर्ण दोषों को श्रीपुरुषोत्तम भगवान् चित्त में स्थित होकर हरते हैं ॥ ४५ ॥

श्रवण करने से, कीर्तन करने से, ध्यान करने से, पूजन करने से भगवान् हृदय में स्थित होजावें, तब मनुष्यों के कोटों जन्म के पापों का तत्काल में नाश कर देते हैं ॥ ४६ ॥

जैसे कि—अग्नि, स्वर्ण के तपाने से स्वर्ण के भीतर में आकर अन्य धातु के खोटे वर्ण को नष्ट करता है । इसीप्रकार योगियों के हृदय में स्थित होकर श्रीविष्णु भगवान् योगिजनों के खोटे अन्तःकरण को शुद्ध करते हैं ॥ ४७ ॥

विद्या, तप, प्राणायाम, मैत्री, तीर्थस्नान, व्रत, दान, जप, इन सबों से मन उस प्रकार की शुद्धि को नहीं प्राप्त होता है, जैसा कि—अनन्त भगवान् श्रीविष्णु के हृदय में स्थित होने से शुद्ध होता है ॥ ४८ ॥

तस्मात्सर्वात्मना राजन् ! हृदिस्थं कुरु केशवम् ।
म्रियमाणो ह्यवहितस्ततो याति परां गतिम् ॥ ४९ ॥
म्रियमाणैरभिध्येयो भगवान् परमेश्वरः ।
आत्मभावं नयत्यङ्ग ! सर्वात्मा सर्वसंश्रयः ॥ ५० ॥
कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ॥ ५१ ॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां द्वादशस्कन्धे युगानुवर्णनं नाम
तृतीयोऽध्यायः ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मभावं स्वस्वरूपम् ॥ ५० ॥
इदानीं कलिं स्तौति द्वाभ्याम्—कलेर्दोषनिधे राजन्निति ॥ ५१ ॥
तत्सर्वं हरिकीर्तनादेव कलौ भवति नान्यस्मिन् युगे उक्तं च—
"ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥
इति ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
तृतीयोऽध्यायः ॥ ३ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

आत्मभावम् आत्मसधर्मभावं साम्यापत्तिरित्यर्थः । "तद्भावभावमापन्नः" इत्यादिवाक्यैकार्थ्यात् तत्र हि भावशब्दः स्वभाववाची अन्यथा द्वितीयभावशब्दानन्वयात् ॥ ५०—५२ ॥

इति श्रीमद्भागवतव्याख्याने
शुकपक्षीये द्वादशस्कन्धे
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

उपायोपदेशमुपसंहरति—तस्मादिति । हि यस्मात्ततो हृदयस्थापनाद्धेतोः अवहितचित्तो म्रियमाणः परां गतिं याति तस्मात्त्वं हृदिस्थं केशवं कुरु इत्यर्थः ॥ ४९ ॥

इममेवार्थं दृढीकर्तुं पुनरप्याह—म्रियमाणैरिति । आत्मभावमात्मसमानं साम्यापत्तिमित्यर्थः । "तद्भावभावमापन्नः" इत्यादिवाक्यैकार्थ्यात् तत्र हि प्रथमभावशब्दः स्वभाववाची अन्यथा द्वितीयभावशब्दानन्वयात् अङ्गेति सम्बोधनम् आत्मभावं नयतीत्यत्र हेतुत्वेन तं विशिनष्टि—सर्वात्मा सर्वेषामात्मनामात्मा आत्मनो हि शरीरं निरतिशयप्रियमतस्तद्गतमनर्थं दूरीकरोतीति भावः । अनेन प्रापकत्वोपयुक्तनिरतिशयपुरुषार्थरूपत्वमुक्तम् आत्मा हि निरतिशयप्रीतिविषयः प्रापकत्वोपयुक्तं सौलभ्यमाह—सर्वसंश्रय इति । आत्मत्वादेव सर्वैः संश्रीयते इति संश्रयः आत्मा हि सर्वेषामेव सुलभ इति भावः ॥ ५० ॥

अथ बहुदोषाकरोऽयं कलिः सर्वथा भगवत्प्राप्तिं निरुणद्धीत्यभिप्रायमाशङ्क्याह—कलेरिति । दोषनिधेरपि कलेः कश्चिदतिसाधारणो महान् गुणोऽस्ति, कोऽसौ ? भगवतः कीर्तनादेव मुक्तबन्धः निरस्तप्राप्तिप्रतिबन्धकः परं परमपुरुषं व्रजेदित्यर्थः ॥ ५१ ॥

कृतादिषु ध्यानयागार्चनानां यत्फलं तत्सर्वं कलौ हरिकीर्तनादेव भवति कीर्तनं स्वप्रमाणमात्रानुष्ठितमित्यवगन्तव्यम् ॥ ५२ ॥

इतिश्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
तृतीयोऽध्यायः ॥ ३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपसंहरति—तस्मादिति ॥ ४९ ॥

आत्मभावम् आत्मनि भक्तिं नयति प्रापयति सर्वमादत्त इति सर्वात्मा सर्वेषु तत्सर्वा यस्मात्स सर्वसंश्रयः ॥ ५० ॥

कलिः केवलं न दोषाकरः किन्तु गुणाकरोऽपि भवति मोक्षोपायानुष्ठानादित्याह—कलेरिति ॥ ५१ ॥

ध्यानादिप्रधानसाधनमन्तरेण कीर्तनमात्रेण संसारबन्ध-

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

निर्मोकः कथमित्याशङ्क्य तत्तद्युगेषु भगवत्प्राप्तिसाधनत्वेन युक्तमिति मित्रत्याह-कृत इति । कृते वसत्स्वादिरित्यर्थः ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

तृतीयोऽध्यायः ॥ ३ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं तत्पृष्टार्थान् सर्वान् समाप्य विध्वंसतत्कर्तव्यमुपदिशति-तस्मादिति । सर्वात्मना कार्त्स्न्येन प्रयत्नेन तत्रैव कैमुत्येन हेतुमाह—म्रियेति । हि यस्मादन्योऽपि यः कश्चित् म्रियमाणोऽवहितः तस्मिन् कृताऽवधानमत्रस्तत्तन्मात्रादेव परां सर्वोत्कृष्टां गतिं याति त्वं पुनस्तस्य परमान्तरङ्गः किमुतेत्यर्थः ॥ ४९—५० ॥

अत एवान्यैरपि म्रियमाणैरभिध्येयः आत्मभावं परमप्रेष्ठया आत्मतुल्यतां कलिदोषप्रशमनत्वेन नामकीर्तनकस्यैव माहात्म्यमुक्त्वोपसंहरति—कलेरिति । स च भयोऽतिक्रमहेतूनां दोषाणां निधेरपि कलेरेको गुणः कीर्तनादुत्कृष्टो महानेवाचित कंसादेः श्रीनारदादेर इव अनन्तस्य विघ्नोद्यमाभावात् सिद्धत्वेन नाम कीर्तयितव्याह—कीर्तनादेवेति ॥ ५१ ॥

कीर्तनं हि कदाचिदपि सर्वगुणावारिभिरित्याह—कृत इति । यद्यत् कृतादिषु तेन तेन साधनेन स्यात् तत् तद्विलोकधापात्सर्वं प्राप्नोतीत्यर्थः । अत एवोक्तमन्यत्र—

"ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।

यदाप्नोति तदाप्नोति कलौ सङ्कीर्त्य केशवम् ॥

इति ॥ ५२ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

तृतीयोऽध्यायः ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यतो म्रियमाणोऽजामिलादिसदृशोऽपि जनः अवहितः न विद्यते ऽवहितम् अवहितं अवधानं यस्य तथाभूतोऽपि ततः केवलात् यथाकथञ्चिदपि स्मृतात् अभिध्येयः ध्यातुं शक्यश्चेत्तदा आत्मभावम् आत्मनि प्रेमाणं नयतीति तान् प्रापयति ननु तत्समये भगवद्ध्यानं तेषां कथं हेवं स्यात्तत्राह-सर्वात्मा लोकान् जानेतुनाम सन् जानाति एवेत्यर्थः । ननु कथं सकृद्ध्यानमात्रादेव प्रेमाणं ददाति तत्राह सर्वेषां साध्यानां च सम्भवो यस्मात् सः महोदारस्य तस्य किमेतावदसम्भवमिति भावः ॥ ४९—५० ॥

इदानीं कलेः सर्वेभ्योऽपि युगेभ्यः श्रैष्ठ्यमाह—कलेरि[...]

द्वाभ्याम् । दोषाणां निधेरपि कलेरेको गुणो राजन्नस्ति किं[...]

नामो राजेवाचित यथा एक एव राजा असङ्ख्यानपि दस्यू[...]

हन्ति तथैवैक एव गुणः सर्वानप्युक्तलक्षणदोषान् हन्तीति मा[...]

स एव कः ? तत्राह-कीर्तनादेवेति । नाम ध्यानादेरप्यपेक्षेत्यर्थः[...]

यद्वा कीर्तनादेव किमुत कीर्तनसहितध्यानादिभ्यः परं स[...]

त्कृष्टपुरुषार्थं प्रेमाणम् ॥ ५१ ॥

सर्वयुगगतानि भगवत्प्राप्तिसाधनानि कलिरेक एव दधा[...]

तथापि स्वस्वभावादेकस्मात् सर्वसुगमात् कीर्तनादेव द[...]

तीत्याह—कृते इति । तत्सर्वं हरिकीर्तनादेव भवति ॥ ५२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।

द्वादशे तृतीयोऽयं सङ्गतः सङ्गतः सताम् ॥ ३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मभावं स्वसाम्यम् ॥ ५० ॥

अथ कलेर्महान्तं गुणमाह-कलेरिति द्वाभ्याम् ॥ ५१ ॥ ५[...]

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

तृतीयाऽध्यायार्थप्रकाशः ॥ ३ ॥

भाषा टीका ।

हे राजन् ! तुम तो अब मरनेवाले हो, तस्मात् सर्व प्रकार से श्रीकेशव को सावधान होकर हृदय में स्थित करो, तिसीसे उत्कृष्ट गति को प्राप्त होवोगे ॥ ४९ ॥

म्रियमाण लोगों को अवश्य ही श्रीविष्णु भगवान् का ध्यान करना चाहिये । हे राजन् ! वे सर्वात्मा और सर्व के आश्रय श्रीविष्णु भगवान् अपने जन को अपने स्वरूप कर लेते हैं ॥ ५० ॥

हे राजन् ! यह कलियुग दोषों का भण्डार है, परन्तु इसका एक बड़ा ही उत्तम गुण है, कि—पुरुष श्रीकृष्ण के कीर्तन मात्र करने से मुक्तसङ्ग होकर परमात्मा को प्राप्त हो जाता है ॥ ५१ ॥

देखो कृतयुग में जो फल श्रीविष्णु भगवान् के ध्यान करनेवाले को होता रहा, और त्रेतायुग में यज्ञों से श्रीविष्णु भगवान् की पूजा करनेवाले को जो फल होता रहा, और द्वापर युग में जो श्रीहरि की परिचर्या से फल प्राप्त होता रहा, वे तीनों युगों के तीन प्रकार के फल कलियुग में केवल एक श्रीकृष्ण के कीर्तन मात्र से प्राप्त होते हैं ॥ ५२ ॥

इति श्रीमद्भागवत द्वादशस्कन्ध में त्रितीय अध्यायकी, श्रीवृन्दावनस्थ पं० भागवताचार्यकृत भाषा टीका समाप्त ॥ ३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ।

श्रीशुक उवाच ।

कालस्ते परमाण्वादिर्द्विपरार्धावधिर्नृप !।
कथितो युगमानं च शृणु कल्पलयावपि ॥ १ ॥
चतुर्युगसहस्रं च ब्रह्मणो दिनमुच्यते ।
सङ्कल्पो यत्र मनवश्चतुर्दश विशाम्पते !॥ २॥
तदन्ते प्रलयस्तावान् ब्राह्मी रात्रिरुदाहृता ।
त्रयो लोका इमे तत्र कल्पन्ते प्रलयाय हि ॥ ३ ॥
एष नैमित्तिकः प्रोक्तः प्रलयो यत्र विश्वसृक् ।
शेतेऽनन्तासनो विश्वमात्मसात्कृत्य चाऽऽत्मभूः ॥ ४ ॥
द्विपरार्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः ।
तदा प्रकृतयः सप्त कल्पन्ते प्रलयाय वै ॥ ५ ॥
एष प्राकृतिको राजन्! प्रलयो यत्र लीयते ।
आण्डकोशस्तु सङ्घातो विघात उपसादिते ॥ ६ ॥
पर्जन्यः शतवर्षाणि भूमौ राजन्न वर्षति ।
तदा निरन्ने ह्यन्योऽन्यं भक्षमाणाः क्षुधाऽर्दिताः ॥ ७ ॥
क्षयं यास्यन्ति शनकैः कालेनोपद्रुताः प्रजाः ।
सामुद्रं दैहिकं भौमं रसं साम्वर्तको रविः ॥ ८ ॥

श्रीधरस्वामीकृतभावार्थदीपिका ।

चतुर्थे तु चतुर्धोक्ता लया नैमित्तिकादयः ।
तत्र संसारनिस्तारो हरिकीर्त्यैव वर्ण्यते ॥

कलिदोषनिवर्तकं हरिनामसङ्कीर्तनादिकं स एव च कलौ परमो धर्म इति प्रश्नद्वयस्योत्तरमुक्तम् । यच्चान्यत्पृष्टं प्रलयकल्पयोर्मानं ब्रूहीति तदिदानीं तृतीयस्कन्धोक्तकालमानानुवादपूर्वकं निरूपयति—काल इति । "स कालः परमाणुर्वै यो भुङ्क्ते परमाणुनाम" इत्यादिना कालः कथितः "चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् । सङ्ख्यातानि सहस्राणि द्विगुणानि शतानि च" इति युगमानं कथितम् ॥ १ ॥

तत्र कल्पमानमाह—चतुर्युगेति । यत्र चतुर्दश मनवः क्रमेण भवन्ति ॥ २ ॥

[illegible] चतुर्विधः नैमित्तिकः प्राकृतिक आत्यन्तिको नित्यश्चेति तत्र नैमित्तिकं प्रलयं मानसहितमाह—तदन्त इति द्वाभ्याम् । तावान् चतुर्युगसहस्रप्रमाणः सैव ब्राह्मी रात्रिः ॥ ३ ॥

नैमित्तिकत्वं दर्शयति, यत्र यदा विश्वसृक् श्रीनारायणो विश्वमात्मसात्कृत्य आत्मन्युपसंहृत्य शेते आत्मभूर्ब्रह्मा च तस्मिन् शेते तयोरभेदविवक्षया वा ब्रह्मण एवानन्तासनत्वमुक्तं ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलयो नैमित्तिक इत्यर्थः ॥ ४ ॥

प्राकृतिकं प्रलयमाह—द्वाभ्याम् । द्विपरार्धे तु ब्रह्मण आयुषि सप्तप्रकृतयो महदहङ्कारपञ्चतन्मात्राणि ॥ ५ ॥

सङ्घातो महदादिकार्यभूतः प्रकृतीनां तत्कार्यब्रह्माण्डस्य च प्रलयात्प्राकृतिक इत्यर्थः । विघातं विघातकारणे उपसादिते सति ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेवाऽऽह-पर्जन्य इत्यादिना । बुद्धीन्द्रियार्थरूपेणोत्पन्नः प्राकृतेन प्रलयेन ॥ ७ ॥

सामुद्रादिक सर्वरसं रविः विवते आकर्षति ॥ ८ ॥ ९ ॥

———

श्रीमत्सुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—३ ॥

आत्मभूशब्दस्य चतुर्मुखपरत्वे तस्यानन्तासनत्वं प्रासादकल्पादिवैकुण्ठयायानुपपद्यते "कृष्णाभिमुखोऽङ्कुरकमलोदरशायिन" इत्यनन्तशायनभगवदभिप्रायशायित्वं स्मर्यते प्रलयाः ॥ ४ ॥

सप्तप्रकृतयः महदहङ्काराकाशादयः ॥ ५ ॥

यत्र प्रलयं प्रयडकांशो क्षीयत इत्यन्वयः । विघाते शैथिल्ये ॥ ६-९ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ यत्पृष्टं प्रलयकल्पयोर्मानं ब्रूहीति तत्तृतीयस्कन्धोक्तकालस्वरूपानुवादपूर्वकं निरूपयितुमारभते-काल इति । ते तुभ्यं कथित इति सम्बन्धः । परमाणुः आदिर्यस्य द्विपरार्द्धमवधिरुत्तरावधिर्यस्य सः कालः कथितः "स कालःपरमाणुर्वै यो भुङ्क्ते परमाणुताम्" इत्यादिना कथितः तथा "चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् । सङ्ख्यातानि सहस्राणि द्विगुणानि शतानि च" इति युगमानं च कथितम् इत्यर्थः । इदानीं कल्पलयावपि शृणु तयोर्मानं शृणु इत्यर्थ ॥ १ ॥

अत्र तावत्कल्पमानमाह-चतुर्युगसहस्रमिति । कल्पो द्विविधः दैनन्दिनो महांश्चेति तत्राद्यो ब्रह्मणो दिनात्मक एव कल्प इत्यभिधीयते तं विशिनष्टि—हे विशाम्पते ! यत्र कल्पे चतुर्दश मनवः क्रमेण भवन्ति मन्वन्तरमानं तु "स्वं स्वं कालं मनुर्भुङ्क्ते युगानामेकसप्ततिम्" इति तृतीयस्कन्ध एवोक्तमप्यनुसन्धेयम् इति ॥ २ ॥

प्रलयस्तु चतुर्विधः, नैमित्तिकः प्राकृतिकः आत्यन्तिको नित्यश्चेति । तत्र नैमित्तिकं प्रलयं निरूपयति—तदन्त इति द्वाभ्याम् । तदन्ते चतुर्युगसहस्रान्ते प्रलयकल्पनात् चतुर्युगसहस्रपरिमाणा: सैव ब्राह्मी रात्रिः दिनान्ते चतुर्युगसहस्रान्ते निवृत्तजगद्व्यापारः चतुर्मुखश्चेति स नैमित्तिकः प्रलय इत्यर्थः । तदेवाह-त्रय इति । यत्र रात्रौ इमे भूरादयस्त्रयो लोकाः प्रलयाय कल्पान्ते प्रलीना भवन्तीत्यर्थः ॥ ३ ॥

एष नैमित्तिकः प्रलयः प्रोक्तः तत्र नैमित्तिकशब्दस्य प्रवृत्तौ निमित्तमाह—यत्र विश्वसृगिति । विश्वसृजः शयननिमित्तकत्वादस्य प्रलयस्य नैमित्तिकत्वं कथम्भूतः शेते इत्यत्राह-अनन्तः शेषः आसनं शय्या यस्य सः विश्वमात्मसात्कृत्य आत्मगतं कृत्वा स्वाहिमनुपसंहृत्येति यावत् । अत्र विश्वसृगात्मभूशब्दयोश्चतुर्मुखपरत्वेऽपि तस्यानन्तशयत्वं प्रासादकल्पादिवैकुण्ठ्याद्यानुपपद्यते "कृष्णाभिमुखोऽङ्कुरकमलोदरशायिनः" इत्यनन्तशयनभगवदभिप्रायशायित्वं प्रलयाः स्मर्यते इति ॥ ४ ॥

एवं दैनन्दिनकल्पः नैमित्तिकप्रलयश्च निरूपितः । महाकल्पं प्राकृतप्रलयं च निरूपयति-द्विपरार्द्ध इति । द्विपरार्द्धे इत्यनेनायमेव महाकल्प इति सूचितम् सप्तप्रकृतयः महदहङ्कारौ भूतपञ्चकश्चेति सप्त अयं सप्तप्रकृतीनां लयात्मकत्वात् प्राकृतिको लय इत्युच्यत इत्यर्थः ॥ ५ ॥

प्रकृतयः सप्त कथं लीयन्ते इत्यत्र तत्प्रकारं वक्तुं प्रस्तौति यत्र लीयते इत्यादिना । विघाते विनाशनिमित्ते उपसादिते उपगते सति सङ्घातः प्रकृतिसप्तकसङ्घातः परिणामरूपोऽयमण्डकोशः यत्र प्राकृतिके प्रलये लीयते ॥ ६ ॥

कोऽसौ विघात इत्यत आह-पर्जन्य इति । अवर्षतीति सप्तम्यन्तं शतवर्षाणि पर्जन्ये ऽवर्षति सतीत्यर्थः । निरन्नैरिति विरुद्धपत्यय आर्षः अन्योन्यं भक्षयमाणाः प्रजा पशुमुपद्रुताः कालेन शनैः क्षयं यास्यन्तीति सम्बन्धः । सामुद्रमिति समुद्रादिषु भवं रसं जलं सावर्तको रविः प्रलयादित्यः ॥ ७ ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

भगवत्कटाक्षप्रेरणाभिमतकल्पप्रलयप्रकारं तत्स्वरूपं भागवतप्रवृत्तिं च कथयत्यस्मिन्नध्याये तत्रादावुक्तमनूद्य वक्तव्यं प्रतिविधत्ते—काल इति कथितस्तृतीयस्कन्धे । अथ कल्पप्रलययोरपि कालाधीनत्वेन तत्स्वरूपश्रवणानन्तरम् ॥ १ ॥

यत्र दिने ॥ २ ॥

यस्य दिनस्यान्ते ब्राह्मी ब्रह्मसम्बन्धिनी यत्र रात्रौ ॥ ३ ॥

यत्र प्रलये आत्मसात्कृत्य आत्मनि निधाय ॥ ४ ॥

सप्त प्रकृतयः महदहङ्कारावाकाशादिपञ्चभूतानि ॥ ५ ॥

यत्र प्रकृतिप्रलये सङ्घातश्चतुर्विंशतितत्त्वसमूहात्मकः, प्रलयप्रकारमाह—विघात इति । विघाते प्रलये उपसादिते आसन्ने सति ॥ ६—७ ॥

"रस द्रवणे" इति धातोः कालेन द्रवणहेतुना सामुद्रं समुद्रस्य विद्यमानं रसं जलं दैहिकं देहस्य विद्यमानं रसं रेतोलक्षणं वीर्यं भूमं रसं तिक्तादिलक्षणम् ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—३ ॥

एष नैमित्तिक इत्युपलक्षणं मन्वन्तरनिमित्तत्वमपि तदन्तर्भूतं ज्ञेयम् ॥ ४—२२ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

नैमित्तिकाद्यान् प्रलयांश्चतुर्थे चतुरः क्रमात् ।
उक्त्वोपसञ्जहार श्रीशुकः कृष्णकथामृतम् ॥

यत् पृष्टं प्रलयकल्पयोर्मानं ब्रूहीति तत्र तृतीयस्कन्धोक्तकालानुवादपूर्वकमाह—काल इति, ॥ १-२ ॥

तावान् चतुर्युगसहस्रप्रमाणः ॥ ३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

प्रलयाश्चत्वारस्तत्रैव प्रलयो नैमित्तिकः प्रथमः विश्वसृक् श्रीनारायणः आत्मसात्कृत्य अस्मिन्नुपसंहृत्य शेते आत्मभूर्ब्रह्मा च तस्मिन् प्रविश्य शेते अत एव ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलयो नैमित्तिकः एष एव दैनन्दिन-शब्दवाच्यश्च ॥ ४ ॥

प्राकृतिकं प्रलयमाह—द्विपरार्द्धे इति द्वाभ्याम् । आद्यः परार्द्धोऽतिक्रान्त एव द्वितीयेऽपि परार्द्धे अतिक्रान्ते सति ब्रह्मण आयुः-समाप्तौ सत्यां सप्तप्रकृतयो महदहङ्कारतन्मात्रपञ्चकानि ॥ ५ ॥

प्रकृतेः सकाशादुद्भूतवस्तूनां प्रकृतावेव प्रवेशात् प्राकृतिकः सङ्घातः महदादितत्त्वसमूह एवाण्डकोशः विघाते विघात-काल उपसन्ने सति ॥ ६ ॥

तत्र प्रकारमाह—पर्जन्य इति, ॥ ७–८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं राजेन्द्रहाद्युपलक्षितं सर्वं प्राकृतं निरोधविषयमुक्त्वाऽथ निरोधं प्रपञ्चयति । चतुर्थाध्यायेन, तत्र तावत् यत्पृष्टं कलिदोष-निवृत्त्युपायादिकं तदुत्तरं दत्त्वा यच्च पृष्टं युगानित्यतेन युग-मानादि प्रलयकल्पयोर्मानं, कालस्य च गतिं सूक्ष्मां, तदुत्तरमाह—काल इति । ते तुभ्यं "सकालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्" इत्यादिना तृतीयस्कन्धे कालः कथितः "चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम् । संख्यातानि सहस्राणि द्विगुणानि शतानि च" इति युगमानं च कथि-तम् अधुना कल्पलयावपि शृणु तयोर्मानं शृणु इति यावत् ॥१॥

तत्र तावत्कल्पमानमाह- चतुर्युगसहस्रमिति, ॥ २ ॥

प्रलयस्तु चतुर्विधः, नैमित्तिकः प्राकृतिकः आत्यन्तिको नित्यश्च, तत्र तावन्नैमित्तिकं प्रलयं मानसहितमाह—तदन्त इति । तदन्ते तस्य चतुर्युगसहस्रात्मकस्य ब्रह्मणो दिनस्यान्ते तावान् चतुर्युगसहस्रप्रमाणः प्रलयः सैव ब्राह्मी रात्रिः ॥ ३ ॥

यत्र विश्वसृक् श्रीनारायणः अनन्तः शेषः आसनं शय्या यस्य सः विश्वं लोकत्रयमात्मसात्कृत्य स्वस्मिन्नुपसंहृत्य शेते आत्मभूः ब्रह्मा च तस्मिन् शेते स च श्रीमन्नारायणो ब्रह्मणो निद्रां निमित्तीकृत्य प्रवर्तमानो लोकत्रयप्रलयो नैमित्तिक इत्य-भिधीयते कल्पान्ते श्रीनारायणे ब्रह्मादीनां प्रवेश उक्तो हरिवंशे

"ब्रह्माणमग्रतः कृत्वा प्रथमं विश्वतो मुखम् ।
सर्वे देवगणाश्चैव त्र्यस्त्रिंशच्च छन्दजाः ।
प्रविशन्ति महायोगं हरिं नारायणं प्रभुम्" ॥

इति ॥ ४ ॥

अथ प्राकृतिकं प्रलयमाह—द्विपरार्द्धे इत्यष्टादशभिः । महदहङ्कारौ पञ्चतन्मात्राणि चेत्येवं सप्त ॥ ५ ॥

एष वक्ष्यमाणकार्यकारणात्मिकायाः प्रकृतेर्वक्ष्यमाणेन प्रकारेण परे देवे लयात् प्राकृतिको लय इत्यभिधीयते इत्याह—एष इति विघाते विनाशनिमित्ते उपसादिते कालेन प्रापिते सति सप्तप्रकृतिसङ्घातः अण्डकोशः लीयते मूलप्रकृताविति शेषः ॥६॥

तदेवाह—पर्जन्य इत्यादिना ॥ ७ ॥

पिबते आकर्षति ॥ ८–९ ॥

भाषा टीका ।

श्रीहरये नमः ।

श्रीशुक उवाच ।

श्रीशुकदेवजी बोले, कि—हे राजन् ! परमाणु से लेकर द्विपरार्द्ध पर्यन्त कालका वर्णन तथा युगों का परिमाण हमने तुमारे आगे तृतीय स्कन्ध में वर्णन किया, अब तुम सावधान होकर कल्प और प्रलय को श्रवण करो ॥ १ ॥

एक सहस्र चतुर्युगी को ब्रह्माजी का दिन कहते हैं, और उसी का नाम कल्पभी है, हे राजन् ! जिसमें, कि-चतुर्दश १४ मनु राज करते हैं ॥ २ ॥

तिसके अन्त में उतनाही भारी प्रलय होता है, जिसको ब्रह्माजी की रात्रि कहते हैं उस समय में भूलोक भुवर्लोक और स्वर्ग लोक इन तीनों लोकों का प्रलय होजाता है ॥ ३ ॥

यहां नैमित्तिक प्रलय कहा जाता है, इसी नैमित्तिक प्रलय में श्रीनारायण सम्पूर्ण विश्वको अपने विषय में उप संहार करके श्रीशेषभगवान् पर आसन लगा कर शयन करते हैं, और उन श्रीनारायण के विषय ही ब्रह्माजी शयन करते हैं, ब्रह्माकी निद्राको निमित्त मानकर निद्रापर्यन्त यह प्रलय होता है इसी से यह नैमित्तिक प्रलय कहा जाता है ॥ ४ ॥

परमेष्ठी श्रीब्रह्माजी का जब द्विपरार्द्ध अतिक्रान्त हो जाता है तब, अर्थात् ब्रह्मा के आयु पूर्ण होने पर, सातों प्रकृति प्रलय को प्राप्त होती है, महत्तत्त्व अहङ्कार और शब्दादि तन्मात्रा ये सातों अपने २ कारणों में लीन होजाते हैं ॥ ५ ॥

हे राजन् ! यह सप्त प्रकृतियों के लीन होने से प्राकृतिकप्रलय कहा जाता है, और इस प्रलय में कारणों का नाश प्राप्त होने से ब्रह्माण्ड रूप कार्य का भी प्रलय हो जाता है ॥ ॥

हे राजन् ! जब प्रलय होता है तब प्रथम सौ सौ १०० वर्ष तक मेघ नहीं बरसते हैं, उस समय निरन्न इस संसार में क्षुधासे व्याकुल होकर जन्तु परस्पर में भक्षण करने लगते हैं ७ ॥

उस कालके उपद्रव से प्रजा लोग धीरे २ नाश को प्राप्त होते हैं । उस समय प्रलय कालके सूर्य भी अपनी तीक्ष्ण किरणों से समुद्र सम्बन्धि देह सम्बन्धि भूमि सम्बन्धि तीनों रसों को शोष लेते हैं ॥ ८ ॥

रश्मिभिः पिबते घोरैः सर्वं नैव विमुञ्चति।
ततः सम्वर्तको वह्निः सङ्कर्षणमुखोत्थितः ॥ ९ ॥
दहत्यनिलवेगोत्थः शून्यान्भूविवरानथ।
उपर्यधः समन्ताच्च शिखाभिर्वह्निसूर्ययोः ॥ १० ॥
दह्यमानं विभात्यण्डं दग्धगोमयपिण्डवत्।
ततः प्रचण्डपवनो वर्षाणामधिकं शतम् ॥ ११ ॥
परः साम्वर्तको वाति धूम्रं खं रजसाऽऽवृतम्।
ततो मेघकुलान्यङ्ग ! चित्रवर्णान्यनेकशः ॥ १२ ॥
शतं वर्षाणि वर्षन्ति नदन्ति रभसस्वनैः।
तत एकोदकं विश्वं ब्रह्माण्डविवरान्तरम् ॥ १३ ॥
तदा भूमेर्गन्धगुणं ग्रसन्त्याप उदप्लवे।
ग्रस्तगन्धा तु पृथिवी प्रलयत्वाय कल्पते ॥ १४ ॥
अपां रसमथो तेजस्ता लीयन्तेऽथ नीरसाः।
ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा ॥ १५ ॥
लीयते चानिले तेजो वायोः खं ग्रसते गुणम्।
स वै विशति खं राजंस्ततश्च नभसो गुणम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अनिलवेगोत्थो वायुवेगोद्भूतः अनिलवेगो वा इति पाठे अनिलेन वेगो यस्य सः वा: रविणा रश्मिभिः पीतमुदकं च दहतीत्यर्थः। अनिलवेगो वै इति तु पाठः सुगमः भूविवरान् पातालादीन् शून्यान् रविणा दैहिकरसाकर्षणात्प्राणरहितान् शिखाभिर्ज्वालाभिः ॥ १० ॥

किञ्चिदधिकं वर्षाणां शतं सम्वर्तकः प्रलयहेतुकः परो वायुर्वाति तदा रजसाऽऽवृतं खं धूम्रं भवति ॥ ११ ॥ १२ ॥

रभसस्वनैस्तीव्रगर्जितैः ब्रह्माण्डविवरान्तरं ब्रह्माण्डविवरमध्यगतं विश्वमेकोदकमेकार्णवोदकव्याप्तं भवति ॥ १३ ॥

उदप्लवे उदकेनाप्लवे सति प्रलयत्वायाभावाय ॥ १४-१६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

भूविवराणि पातालादीनि ॥ १०—१४ ॥
तेजः ग्रसतीत्यन्वयः। ता आपः ॥ १५-१६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

दुःसहैः रश्मिभिः पिबते न त्वधुनेव पीत्वा विमुञ्चतीत्यर्थः। तत इति अनिलवेगोत्थः वायुवेगोत्थः प्रलयाग्निः अनिलवेगोत्थ इति पाठे चार्जवं रविणा पीतावशिष्टोदकं च दहतीत्यर्थः। वेगस्वपाठस्तु सुगमः। अनिलेन वेगो यस्य स इति पाठद्वयेऽप्यर्थः। ततः शून्यान् त्रिलोकान् भूविवरान् पातालादीनि च दहतीति सम्बन्धः इत्थमुपर्यधः समन्ताच्च वह्निसूर्ययोः शिखाभिर्ज्वालाभिर्दह्यमानं ब्रह्माण्डं दग्धगोमयपिण्डवद्विभाति वर्तिष्यते तत इति. वर्षाणामधिकं शतं किञ्चिदधिकं वर्षाणां शतमित्यर्थः। प्रचण्डोऽतिनिष्ठुरः ॥ ९—११ ॥

परः बलीयान् सांवर्तकः प्रलयवायुर्वाति तदा रजसावृतं आकाशं धूम्रं भविष्यति ततो मेघकुलानीति। अङ्ग,हे राजन् ! रभसस्वनैः तीव्रगर्जितैर्नदन्ति गर्जितानि करिष्यन्ति चेत्यर्थः। [illegible] तृतीया तदा ब्रह्माण्डविवरं मध्यगतं विश्वम् एकोदकम् एकार्णवोदकव्याप्तं भविष्यति तदेत्थम् उदप्लवे उदकप्लवरूपे सति जगति भूमेर्गन्धगुणमापो ग्रसन्ते(न्ति) सोऽप्सु लीयते इत्यर्थः। ग्रस्तः गन्धो यस्याः सा पृथिवी प्रलयत्वायाभावाय कल्पते ॥ १२—१४ ॥

अपामिति। अथोऽनन्तरमपां रसगुणं तेजो ग्रसतीति वचनविपरिणामेनानुषक्तेन सम्बन्धः। अथ नीरसास्ता आपः लीयन्ते तेजसीति विभक्तिविपरिणामेनानुषक्तेन सम्बन्धः ततस्तेजसो रूपं वायुर्ग्रसते तदा तद्रहितं तेजः वायौ [illegible]

*शब्दं ग्रसति भूतादिर्नभस्तमनुलीयते ।
तैजसश्चेन्द्रियाण्यङ्ग ! देवान्वैकारिको गुणैः ॥ १७ ॥
महान् ग्रसत्यहङ्कारं गुणाः सत्त्वादयश्च तम् ।
ग्रसतेऽव्याकृतं राजन्!गुणान्कालेन चोदितम् ॥ १८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्युत्तरेण सम्बन्धः । वायोर्गुणं स्पर्शं खमाकाशो ग्रसते ॥ स वै स्पर्शरहितो वायुः हे राजन् ! खमाकाशं विशति तत्र लीयत इत्यर्थः । ततश्च नभसो गुणं शब्दं भूतादिस्तामसाहङ्कारो ग्रसति तदनु स्वगुणग्रसनानन्तरं तस्मिन् भूतादौ लीयते इत्यर्थः ॥ तैजसश्चेति । चशब्दः साहित्यद्योतकः राजसाहङ्कारसहितः वैकारिकः सात्त्विकाहङ्कारः गुणैर्वृत्तिभिः सह देवानिन्द्रियाणि ज्ञानेन्द्रियाणि ग्रसते ततोऽहङ्कारत्रिविधं महान् ग्रसते ततः सत्त्वादयो गुणाः तं महान्तं ग्रसन्ति गुणा ग्रसन्तीत्युपचारः गुणमयी प्रकृतिरेव महान्तं ग्रसतीत्यर्थः । ग्रसत इति । हे राजन् ! कालेन चोदितम् अव्याकृतं प्रधानं गुणान् ग्रसति विषमान् गुणान् समीकरोति समीकृतगुणं भवतीति यावत् तन्महदादिनामरूपविभागरहितं गुणसाम्यावस्थं प्रधानमव्याकृतशब्देनाभिधीयते ॥ १५—१८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सांवर्तकः प्रलयकालीनः ॥ ९ ॥

सत्वशून्यान् प्राणिरहितान् भूविवरान् पातालादीन् ॥१०-११॥

रजसावृतं खं धूम्रवर्णं चित्रवर्णानि नीलादिनानाविधानि ॥ १२ ॥

ब्रह्माण्डविवरान्तरं ब्रह्माण्डबहिर्विशेषं ब्रह्माण्डबिलोदरं धाम्नकोदकम् उदकात्मकं भवति ॥ १३ ॥

पञ्चभूतगुणलयप्रकारमाह—तदेति । उपप्लुते प्रलये ॥ १४ ॥

नीरसाः आपः तद्रहितं रूपरहितम् ॥ १५ ॥

तेजो वायौ लीयते स वायुः खं विशति तदनु शब्दगुणग्रसनानन्तरं तैजसानीन्द्रियाणि तैजसाहङ्कारे लीयन्ते इति शेषः ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पिबते आकर्षति ॥ ९—१० ॥

किञ्चिदधिकं वर्षाणां शतं व्याप्य वाति तदा रजसाऽऽवृतं खं धूम्रं भवति ॥ ११—१२ ॥

प्रलयत्वाय प्रकृष्टो लयो यस्याः सा प्रलया तस्या भावः प्रलयत्वं तस्मै नाशायेत्यर्थः ॥ १४ ॥

अपां रसं तेजो ग्रसति ॥ १५—१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भूमिः अम्बुभिः ॥ १०-११ ॥

परः महाबलः रजसाऽऽवृतं खं धूम्रं भवति ॥ १२ ॥

रभसस्वनस्तनयित्नुगर्जितैः ॥ १३ ॥

उदप्लवं उदकेन प्लावितं सति प्रलयत्वाय कारणभावाय १४—१५-१६ ॥

भाषा टीका ।

और वर्षा के समय पर उस सर्व रस को नहीं छोडते हैं, किन्तु थोडा २ वर्षते हैं । तब उस समय श्रीसङ्कर्षण देव के मुखसे प्रलय काल का अग्नि प्रकट होता है ॥ ९ ॥

और पवन के वेग से बढा हुआ वह अग्नि शून्य सब पातालों को जला देता है, उस समय ऊपर नीचे और चारों तरफ अग्नि और सूर्य की शिखाओं से ॥ १० ॥

जला हुआ यह ब्रह्मांड जले हुये गोबर के कण्डे सदृश देख पडता है, तिसके पश्चात् कुछ अधिक सौ १०० वर्ष तक बडा प्रचण्ड पवन ॥ ११ ॥

अर्थात् प्रलय काल का संवर्तक नामक वायु रज से आकाश को धूमल करता हुआ बहता है, तिसके अनन्तर चित्र विचित्र वर्ण वाले अनेक मेघों के समूह ॥ १२ ॥

सौ वर्ष पर्यन्त आकाश में घोर शब्द कर वर्षा करते हैं । उस समय में सब विश्व ब्रह्मांड के भीतर और बाहर जलमय होजाता है ॥ १३ ॥

ब्रह्मांड को जल में डूब ने पर पृथिवी के गन्ध रूप गुण को जल ग्रसलेते हैं । जब पृथिवी के गन्ध का ग्रास होजाता है, तब वह पृथिवी अपने कारण में लीन हो जाती है ॥ १४ ॥

ऐसेही जलों के रस को तेज ग्रस लेते हैं तब वे जल भी निरस होकर अपने कारण में लीन होजाता है । इसी प्रकार तेज के रूप को वायु ग्रस लेता है तब वह तेज उस समय रूपसे रहित होजाता है ॥ १५ ॥

और रूप रहित होकर वह तेज अनिल में लीन हो जाता है । तब वायु के स्पर्श गुण को आकाश ग्रस लेता है । हे राजन् ! तब यह वायु आकाश में लीन होजाता है तिसके पश्चात् आकाश का जो शब्द गुण है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भूतादिस्तामसोऽहङ्कारः गुणैर्वृत्तिभिः सह ॥ १७ ॥

अव्याकृतं प्रधानम् ॥ १८ ॥

न तस्य कालावयवैः परिणामादयो गुणाः ।
अनाद्यनन्तमव्यक्तं नित्यं कारणमव्ययम् ॥ १९ ॥
न यत्र वाचो न मनो न सत्त्वं तमो रजो वा महदादयोऽमी ।
न प्राणबुद्धीन्द्रियदेवता वा न सन्निवेशः खलु लोककल्पः ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तस्य तु लयो नास्तीत्याह—न तस्येति । कालावयवैरहोरात्रादिभिः गुणा भावविकाराः परिणामो विपरिणामः अव्यक्तमस्तित्वविकारशून्यं नित्यं सर्वदैकरूपं ह्रासवृद्धिरहितमित्यर्थः । अव्ययमपक्षयशून्यं सर्वत्र हेतुः कारणमिति ॥ १९ ॥

किञ्च, रागादिगोचरस्य सविशेषस्य विकारा भवन्तीदन्तु न तथेत्याह—न यत्रेति द्वाभ्याम् । लोककल्पो लोकरूपः सन्निवेशो रचनाविशेषो नास्ति ॥ २० ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

देवान् ज्ञानेन्द्रियाणि अहङ्कारो प्रसूत इत्यध्याहारः गुणा प्रसूयन्तीत्युपचारः गुणमयी प्रकृतिरेव प्रसूते महान्तमव्याकृतं गुणान् प्रसूतीतिविषमान् गुणान् समीकरोतीत्यर्थः ॥ १७—१८ ॥

परिणामशब्दो वृद्धेः पूर्वावस्थापरः ॥ १९ ॥

न यत्रेति जाग्रत् इत्यादि वचस्तद्गोचरं मनश्च न प्रवर्तेत इत्यर्थः । सत्त्वादिशब्दैर्विषमावस्थं गुणत्रयं विवक्षितम् ॥२०॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, तत् क लीयते ? इत्यभिप्रायमाशङ्क्य परस्मिन् देव एवेति वदन् तस्यापि कांचित्लयशङ्कां वारयितुं परमात्मस्वरूपं शोधयति—न यस्येति त्रिभिः । यच्छब्दस्य "तन्मूलभूतं पदमामनन्ति" इति तृतीयेन सम्बन्धः । पदशब्देनाऽव्याकृतशरीरस्थानं विवक्षितम् अव्यक्तस्य लयो नामाऽविभक्तनामरूपतया तमोवस्थापत्तिः यस्य परमात्मस्वरूपस्य कालावयवैरहोरात्रादिभिः परिणामादयो गुणा न सन्ति परिणामशब्दो वृद्धेः पूर्वावस्थापरः तत्र हेतुरनाद्यन्तमाद्यन्तरहितमत एवाऽव्यक्तं व्यक्तैरिन्द्रियैर्न व्यज्यत इति तथा नित्यमित्यनाद्यन्तत्वस्यैव विवरणम् । यद्वा, स्वरूपतः स्वभावतश्च नित्यं कारणमव्यक्तादिपृथिव्यन्तजगत्कारणम् अनेनाऽव्यक्तशरीरस्यास्यापि त्वं सूच्यते तथाप्यव्ययं कार्यगतैर्दोषैर्न व्येति न वैविध्यं गच्छतीति तथा ॥ १९ ॥

किञ्च, न यत्रेति जायते वर्धते इत्यादिवाचः तद्गोचरं मनश्च यत्र न वर्तन्ते यत्र स्वरूपे सत्त्वादयो न सन्ति सत्त्वादिशब्दैः साम्यवैषम्यावस्थं गुणत्रयं विवक्षितम् अनेन गुणत्रयवश्यत्वव्युदासः देवताशब्दो ज्ञानेन्द्रियपरः इन्द्रियशब्दः कर्मेन्द्रियपरः महदादयो न सन्तीत्यनेन कर्मायत्तमहदादिसङ्घातात्मकदेहसम्बन्धव्युदासः करणायत्तज्ञानवत्त्वाऽव्युदासो वा, लोकाः कल्प्यन्ते यत्र स लोककल्पः सन्निवेशः ब्रह्माण्डात्मकः यत्र नेत्यनेन सन्निवेशस्य परमात्मस्वरूपगतत्वव्युदासः । तस्य प्रकृतिस्वरूपगतत्वाविति भावः ॥ २० ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वैकारिका देवाः वैकारिकाहङ्कारे स्वगुणैः सह ॥ १७ ॥

तं महान्तं बीजं व्यञ्जकम् अव्याकृतं मूलप्रकृतिः कालेन हरिणा चोदितं प्रेरितं सत्त्वादिगुणान् प्रसूते ॥ १८ ॥

मूलप्रकृतिस्वरूपं वक्ति—न तस्येति । तस्याऽव्यक्तस्य त्रुटिलवादिकालावयवैः परिणामादयो गुणा न सन्ति तदव्यक्तं मूलप्रकृतिं विश्वसृजां कारणम् आमनन्तीति शेषः इतरविशेषणमुक्तयोः समभिव्याहारेणाह—अनादीति, ॥ १९ ॥

कालेनेत्युक्तस्य हरेः स्वरूपं दर्शयति—न यत्रेति । वागादयो यत्र कञ्चन विशेषं नापादयन्तीति शेषः ॥ २० ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भूतादिस्तामसोऽहङ्कारः तैजसोऽहङ्कार इन्द्रियाणि प्रसूते महान् अहङ्कारं गुणैस्तद्वृत्तिभिः सह प्रसूते तं महान्तम् ॥ १७ ॥

अव्याकृतं प्रधानम् ॥ १८ ॥

तस्य प्रधानस्य कालावयवैरहोरात्रैः परिणामो विपरिणामचतुर्थो विकारः अनादीति प्रथमो विकारो जन्मनः अनन्तमित्यन्तो न अव्यक्तमित्यस्तित्वलक्षणविकारो न नित्यं सर्वैकरूपमिति वृद्धिर्न अव्ययमित्यपक्षयो नेति विकारषट्कं निषिद्धम् ॥ १९ ॥

किञ्च, रागादिगोचरस्य सविकारस्य विकारा भवन्ति इदं तु न तथेत्याह—न यत्रेति द्वाभ्याम् । लोककल्पः लोकरूपसन्निवेशो रचनाविशेषः ॥ २०—२१ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भूतादिस्तामसो ऽहङ्कारः गुणैर्वृत्तिभिः सह तैजस इन्द्रियाणि प्रसूते अनेनेन्द्रियाणां स्वरूपतोऽणुत्वेपि वृत्तितः किञ्चिद्व्यापकत्वमिति सूचितम् ॥ १७ ॥

अव्याकृतं मूलप्रकृतिः भगवच्छक्तिः गुणान् सत्त्वादीन् प्रसूते समीकरोति अत्र चकारात् पुरुषाव्यक्तयोरिति वर्ण्यमानस्वाभावमयो बोध्यः प्रकृतिः परे देवे लीयते इति तथाचास्मच्छ्रुतौ सुबालोपनिषदि "पृथिव्यप्सु लीयते आपस्तेजसि तेज [illegible]

न स्वप्नजाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोऽग्निरर्कः ।
संसुप्तवच्छून्यवदप्रतर्क्यं तन्मूलभूतं पदमामनन्ति ॥ २१ ॥
लयः प्राकृतिको ह्येष पुरुषाव्यक्तयोर्यदा ।
शक्तयः सम्प्रलीयन्ते विवशाः कालविद्रुताः ॥ २२ ॥
बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति तदाश्रयम् ।
दृश्यत्वाव्यतिरेकाभ्यामाद्यन्तवदवस्तु यत् ॥ २३ ॥
दीपश्चक्षुश्च रूपं च ज्योतिषो न पृथग्भवेत् ।
एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्रलीयते वायुराकाशे प्रलीयते आकाश इन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते भूतादिर्महति महानव्यक्ते अव्यक्तमक्षरे अक्षरं तमसि तमः परे देवे एकीभवति" इति । अत्राकाशान्तः सुगमोऽन्वयः परत्र पाठक्रमादर्थक्रमस्य बलीयस्त्वेन आकाशस्तन्मात्रेषु तन्मात्राणि भूतादौ तामसाहङ्कारे इन्द्रियाणीन्द्रियेषु कार्यकारणयोरभेदात्कारणे राजसाहङ्कारे लीयन्त इत्यर्थः । तत्र तन्मात्रेष्विति बहुवचनं पृथिव्यादीनामपि गन्धादिद्वारा लयदर्शनार्थम् इन्द्रियेष्विति बहुवचनात् सात्त्विकाहङ्कारदेवताः मनश्च लीयन्ते इति भावः । त्रिविधोऽप्यहङ्कारो महति महानव्यक्ते लीयते अव्यक्तमक्षरे इत्यत्र गुणसाम्यगुणवैषम्यकार्योन्मुखत्वाभेदेन तमोऽक्षरमव्यक्तमिति प्रकृतेरेवावस्थात्रयम् तथाचाव्यक्तमक्षरे लीयते इति कार्योन्मुखत्वावस्थां परित्यज्य गुणवैषम्यावस्थां प्राप्नोति प्रकृतिरक्षरं तमसीति गुणवैषम्यावस्थां परित्यज्य गुणसाम्यावस्थां प्राप्ता सती परे देवे परब्रह्मणि श्रीपुरुषोत्तमे एकीभवति सूक्ष्मशक्तिरूपतयाऽवतिष्ठत इत्यर्थः ॥ १८ ॥

तत्सर्वकारणं परदेवात्मकं तत्त्वं कीदृशमित्याकाङ्क्षायां तत्स्वरूपं निरूपयति—न तस्येति त्रिभिः । अनाद्यन्तमत एव नित्यम् ॥ १९ ॥

वाचो मनश्च इयत्ताबोधकतया यत्र न प्रवर्तन्ते । किञ्च, यत्र सत्त्वादयः सन्निवेशान्ताः प्रातिकूल्येन प्रवर्तन्ते इत्यर्थः । लोकाः भूरादयः कल्प्यन्ते यत्र स लोककल्पः सन्निवेशः ब्रह्माण्डात्मकः ॥ २० ॥

भाषा टीका ।

जब आकाश के शब्द गुण को तामस अहङ्कार ग्रस लेता है, तब आकाश तामस अहङ्कार में लीन होजाता है हे राजन्! राजस अहंकार वृत्तियों सहित इन्द्रियों को ग्रस लेता है, तथा इन्द्रियों के अधिष्ठातृ देवताओं को सात्त्विक अहंकार ग्रस लेता है ॥ १७ ॥

[illegible] अहंकार को महत्तत्त्व ग्रस लेता है, तब वह त्रिविध अहंकार महत्तत्त्व में लीन होजाता है, और सत्त्वादिक जो गुण हैं, वे महत्तत्त्व को ग्रस लेते हैं तब महत्तत्त्व गुणत्रय में लीन होजाता है। हे राजन्! तदनन्तर काल से प्रेरित प्रकृति, तीनों गुणों को ग्रस लेती है, तब तीनों गुण प्रकृति में लीन हो जाते हैं ॥ १८ ॥

अब जिस परमात्मा में प्रकृति लीन होती है वहभी क्या किसी में लीन होता है, कि—नहीं? इस प्रकार के संशयको दूर करने के लिये, परमात्मा के स्वरूप का निरूपण करते हैं, वह परमात्मा का स्वरूप कैसा है, कि—जिस परमात्म स्वरूप के क्षण दिन मास वर्षादि कालके अवयवों से पारिणामिक गुण नहीं हैं, क्योंकि? वह आदि अन्त शून्य है, और इन्द्रियादि करणों से व्यक्त नहीं होता है, तथा स्वरूप और स्वभाव से नित्य है। और अव्यय है अर्थात् कार्यगत दोषों से विविध भाव को नहीं प्राप्त होता है, ऐसा वह परमात्म स्वरूप है ॥ १९ ॥

फिर वह परमात्म स्वरूप कैसा है, कि—जिसमें आयंत वर्तन इत्यादि वाणी नहीं वर्तती है, और उस वाणी के गोचर मन भी जहां नहीं वर्तता है। और जिसमें सत्त्व रज तम और महदादि प्रकृति के विकार नहीं हैं, तथा प्राण बुद्धि कर्मेन्द्रिय ज्ञान इन्द्रिय ये कुछ नहीं है, और जिसमें इन लोकों की कल्पना है वह ब्रह्मांड भी नहीं है ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वप्नजाग्रत् स्वप्नजागरावस्थायुक्तं सुषुप्तवदिन्द्रियाभावात् शून्यसादृश्ये हेतुः अप्रतर्क्यं न पुनः शून्यमेवेत्याह—तदिति, ॥ २१ ॥

उपसंहरति—लय इति । शक्तयः सत्त्वादयः ॥ २२ ॥

आत्यन्तिकं लयमाह—बुद्धीन्द्रियेति द्वादशभिः । आत्यन्तिकलयो मोक्षः स च ब्रह्मज्ञानेन सर्वप्रपञ्चलयात्मकः न च प्रपञ्चस्याऽऽत्मव्यतिरेकेण सत्त्वात् लयः कथं भवतीति ज्ञानरूपाद् ब्रह्मणः पृथग्भूतस्य तस्याऽसत्त्वमुपपादयति—बुद्धिश्चेन्द्रियाणि चार्थाश्चैवं ग्राहककारणग्राह्यरूपेण तेषामाश्रयभूतं ज्ञानमेव भाति न पृथक्

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति चोच्यते ।
मायामात्रमिदं राजन् ! नानात्वं प्रत्यगात्मनि ॥ २५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत्त्वमिमं स्वप्नादिकं जीवस्य तथा आदयो बहिरन्तरूपकारित्वेन नापेक्षिताः किन्तु सर्वनिरपेक्षत्वात् स्वानन्दतृप्तत्वाच्च संतृप्तवत् सर्वाविरोधित्वात्सर्वोपद्रवात्परत्वेनाशून्यत्वाच्छून्यवत् यत्तत्त्वं सर्वस्य मूलभूतं वेदाः आमनन्ति ॥ २१ ॥

उपसंहरति—लय इति । यदा पुरुषाव्यक्तयोः उपलक्षणमेतत् तमसोपि तथा च पूर्वोक्तानामव्यक्तादुत्तमःशब्दवाच्यानां प्रकृत्यवस्थानां परे देवे लयः शक्तयश्च पृथिव्यादिमहदन्ता उत्क्रमेण लीयन्ते तदैव प्राकृतिको लय इत्यभिधीयते यद्वा पुरुषो जीवः तस्य शक्तयो ऽहममादिवृत्तयः ॥ २२ ॥

अथ चेतनाचेतनयोर्ब्रह्मात्मकत्वमवधार्य गेहादौ मदीयत्वाभिमानं देहे आत्मत्वाभिमानं स्वरूपे स्वाधीनत्वाभिमानं च हित्वा ब्रह्मभावापत्तिलक्षणां मोक्षं साधनसम्पत्त्या प्राप्नोति तदेव नित्यप्रलय इति वक्तुं सर्वब्रह्मात्मकत्वपक्षस्य वैदिकस्य विरोधिभूतानां साङ्ख्यवैशेषिकादीनां पक्षाणामप्रामाण्यं द्योतयन् सर्वस्य ब्रह्मकार्यत्वात्तेना ब्रह्मात्मकत्वमाह—बुद्धीन्द्रियार्थरूपेणेत्यादिना । तत्र साङ्ख्याः अचेतनानां महदहङ्काराकाशादीनामचेतनमब्रह्मात्मकं प्रधानमेव कारणमित्याहुः—तदुक्तं षष्टितन्त्रसंहितायाम् "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति तन्मतं निराकरोति बुद्धिश्चेन्द्रियाणि च खं वायुर्ज्योतिरापश्च अर्थात् शब्दादयश्च तदाश्रयभूताः स्वावयवश्च तेषां रूपेण "एतस्माज्जायते प्राणः' मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी" इत्यादिश्रुतिप्रोक्तेन स्वकार्यरूपेण "सत्यं ज्ञानमनन्तं ब्रह्म" इतिश्रुतिप्रोक्तं ज्ञानमेव भाति सर्वस्य विश्वस्य तच्छक्तिपरिणामत्वात् हेतुगर्भं विशेषणं तदाश्रयमिति तेषां बुद्ध्यादीनामाश्रयम् आदौ मध्ये अन्ते च धारकम् अचेतनस्य प्रधानस्य स्वधारकत्वमपि न सम्भवति, कुतः ? पुनः परधारकत्वात् प्रयोजनमाह दृश्यत्वाऽव्यतिरेकाभ्यामिति । दृश्यत्वाय भोगमुक्तिसिद्धये आ समन्तात् व्यतिरेकः लोकसृष्ट्यादिव्यापाररहितो मोक्षदत्तसिद्धयं च बुद्ध्यादिरूपेण भाति एवम्भूतस्यैव ज्ञानरूपस्य जगत्कारणत्वमवित "तदैक्षत'एकोऽहं'बहुस्याम्" इत्यादिश्रुतेः । अतो न प्रधानं जगत्कारणम् एतेन परमाणुकारणवादोऽपि निराकृतः तथाऽऽह भगवान् सूत्रकारः "ईक्षतेर्नाशब्दम्" (१।१।५) इत्यादि केचिद्वाह्याः ब्रह्म मिथ्या जगन्मिथ्यामित्याहुः तन्मतं निराकरोति—आद्यन्तवदिति यद्वस्तु तदिति यद्वस्तु कारणं तद्भिन्नमवस्तु कार्यं तदाद्यन्तत्ववदनित्यं भवति अनादिवेदप्रामाण्यगात् जगत्कारणं ब्रह्म नित्यं कार्यभूतं जगदनित्यम् शास्त्रप्रमाणब्रह्मवादमन्तरा बाह्याः श्रेयस्कामैर्मुमुक्षुभिरनवलोक्या इतिभावः । अस्मिन् प्रकरणे केचिज्जगत् मिथ्येति प्रलपन्ति ते अप्रमाणिकत्वादुपेक्षणीयाः अध्यासवादस्य भ्रान्तिमूलत्वेनाध्यासभाष्ये सर्वथा निराकृतत्वादुपपद्यते ॥ २३ ॥

कार्यस्य बुद्ध्यादेः कार्यत्वावच्छिन्नेन रूपेणानित्यत्वमुक्तम् इदानीं "सदेव सौम्येदमग्र आसीत्" इतिश्रुत्युक्तरीत्या नित्यत्वमाह—दीपइति । दीपः कार्यं चक्षुरिन्द्रियमनुग्राहं रूपं गुणः ज्योतिषः कारणादनुग्राहकाद्गुणिनः सकाशाद्यथा पृथक् न भवेत् एवम् ऋतात् सत्यात्कारणात् कार्यभूताः धीप्रभृतयः अन्यतमा न स्युः कार्यमनित्यमपि कारणात्मना नित्यमेवेत्यर्थः । कारणात्पृथङ् विद्यते इ[redacted]: ॥ २४ ॥

[redacted]

और वह आत्म[redacted] जागता है न
सुषुप्ति अवस्था वाला[redacted]श, जल, पृथिवी
वायु, तेज, सूर्य, इनसे[redacted] नहीं है, किन्तु इन
सबों से भिन्न है, [redacted] शून्यता तर्कना
में नहीं आता है, [redacted]न्त मूल भूत पद
कहते हैं यह सब [redacted]मात्र का निरूपण है,
विग्रह का नहीं) ॥ [redacted]

हे राजन् ! वह[redacted] हमने तुम्हारे सामने
वर्णन किया, कि—[redacted]प्रकृति का लय होजाता
है, और जिसमें [redacted] से लेकर महत्तत्व
पर्यन्त सम्पूर्ण का[redacted]ा में लीन होजाता
है । और वह [redacted] विशेष नाम रूप के
विभाग रहित [redacted]ो देव मनुष्यादि नाम
रूप विभाग रहि[redacted] में लीन रहते हैं वही
प्राकृतिक प्रलय [redacted]

"सत्यं ज्ञान[redacted]श्रुति में ज्ञान शब्द से
कहे हुए जो [redacted]बुद्धि इन्द्रिय इत्यादि के
शरीरी होकर [redacted]धारक होकर प्रामाणिक
लोगों को निरन्तर ज्ञान होते हैं, ऐसे निबन्ता देख पड़ने से, तथा परमात्मा की सत्ता के बिना पदार्थ की स्थिति न होने से, परमात्मा ही बुद्धीन्द्रियार्थशरीरक भान होते हैं । और बुद्धि इन्द्रियादिक आद्यन्त वाले हैं इसीसे वो एक रूप से नहीं किन्तु निरन्तर परिणाम वाले हैं ॥ २३ ॥

जैसे कि दीप चक्षु और रूप इनों की बिना तेज के अवस्थिति नहीं, क्योंकि ? वे तेज के ही कार्यादिक हैं । इसी प्रकार बुद्धि इन्द्रियें और तन्मात्रा ये सब भी, इन सबों से भिन्नतम अर्थात् अत्यन्त विलक्षण जो परमात्मा है तिस बिना स्थित नहीं होसके हैं, क्योंकि ? परमात्मा के अंश हैं उसी से अनुग्रहीत हैं और उसी के आश्रित हैं तस्मात् इनका परमात्मा से व्यतिरेक नहीं है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यदा तु बुद्धेरसत्त्वं तदा तदवस्थानां सुतरामसत्त्वमित्याशयेनाऽऽह—बुद्धेरिति । ननु, विश्वतैजसप्राज्ञात्मता [illegible]

यथा जलधरा व्योम्नि भवन्ति न भवन्ति च ।
ब्रह्मणीदं तथा विश्वमवयव्युदयाप्ययात् ॥ २६ ॥
सत्यं ह्यवयवः प्रोक्तः सर्वावयविनामिह ।
विनाऽर्थेन प्रतीयेरन् पटस्येवाङ्ग ! तन्तवः ॥ २७ ॥
यत्सामान्यविशेषाभ्यामुपलभ्येत सभ्रमः ।
अन्योन्यापाश्रयात्सर्वमाद्यन्तवदवस्तु यत् ॥ २८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

बुद्धेरित्याशङ्क्याऽऽह—मायामात्रमिति । इदं विश्वतैजसप्राज्ञरूपम् ॥ २५ ॥

आद्यन्तवत्त्वादित्यस्य हेतोरसिद्धिमाशङ्क्य सावयवत्वेन साधयति—यथेति । अवयवीति, यत्सावयवं तदाद्यन्तवद्घटादिवदित्यर्थः । अत उदयाप्ययत्वादाद्यन्तवत्त्वाद्विश्वं सत्त्व भवतीत्यर्थः । यद्वा, पृथगेवागमापायित्वाद्विश्वं मिथ्या ब्रह्म तु तदवधित्वात् सत्यमित्यनेन साध्यते दृष्टान्तस्तु पूर्वोक्त एव यथा जलधरा व्योम्नीति दृष्टान्तत्वागमापायितदवधित्वमात्रे नतु मिथ्यात्वे ॥ २६ ॥

अन्यतमाद्यन्तादिति प्रतिज्ञातं कारणस्य सत्यत्वमुपपादयति सत्यमिति । "अवयवः कारणं प्रोक्तं वाचारम्भणं विकारो नामधेयं, मृत्तिकेत्येव सत्यम्"इत्यादिश्रुतिभिः । अत्र युक्तिमपि दर्शयति—विनेति । अङ्ग, हे राजन् ! किं यस्मादर्थेनावयविना पृथगेवावयवाः प्रतीयेरन् यथा पटस्यावयवास्तन्तवः पटात्पृथक् प्रतीयन्ते तद्वदिति ॥ २७ ॥

ननु, कार्याभावे कारणत्वं ब्रह्मणः कुतो घटेत ? सत्यम् तदपि नास्तीव सत्यमित्याह—यदिति । सामान्यं कारणं विशेषः कार्यं तद्रूपेणान्योऽन्यापाश्रयात्परस्परसापेक्षत्वेन निरूपणात्सहत्वादित्यर्थः । अतः कारणत्वमवधित्वं व्यापकत्वमित्यादिकमपि परस्परापेक्षत्वादाद्यन्तवत्तत्सर्वमवस्त्वित्यर्थः । यद्वा, तत्रैव हेत्वन्तरमेतत् यदुपलभ्येत स भ्रमः सामान्यविशेषरूपत्वात्स्वप्नवत् अन्योऽन्यापाश्रयादितीदमपि हेत्वन्तरं गुणगुणिविशेषणविशेष्यव्याप्यव्यापकत्वादिरूपेण परस्पराधीनसिद्धित्वात् रज्जुभुजङ्गवदिति निगमनम् अतो यदाद्यन्तवत्तत्सर्वमवस्त्विति ॥ २८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एवं सर्वस्य परमात्माधीनत्वे स्थिते जीवगतावस्थानामपि तथात्वं सिद्धं तत्राधिकविशेषमाह—बुद्धेरिति । अत्र बुद्धिशब्दो जीवात्मधर्मभूतज्ञानपरः । जीवस्य ज्ञानविकासङ्कोचविशेषरूपजाग्रदाद्यवस्थानानात्वं मायामात्रं प्रकृतिसम्बन्धमात्रकृतम् ॥ २५ ॥

एवंविधाः दोषाः सर्वाधारमपि परमात्मानं न स्पृशन्तीत्याह—यथा जलधरा इति । इदन्तया जलधरा इव इदन्तया भासमानं प्रत्यक्षादि प्रमाणगम्यं विश्वं [illegible] ॥ २६ ॥

सत्यमिति । पाणिपादाद्युपलम्भेऽप्यात्मनोऽनुपलभ्यत्वमुच्यते अवयविनां देवमनुष्यादीनां पाणिपादाद्यवयवाः प्रोक्ताः सन्ति, तास्ता व्यवह्रियन्ते नतु अर्थेन पुरुषार्थभूतेनात्मस्वरूपेण दोषादिव्यावृत्तधर्मोपेताः विना प्रतीयेरन् विना प्रतीतिः सर्वथा सम्भवति पटस्येवाङ्ग तन्तव इति जीवानधिष्ठितपटावयववत् जीवाधिष्ठितदेहावयवाश्चेतनेन विना प्रतीयन्त इत्यर्थः । यद्वा, जगतो ब्रह्मकार्यत्वं पूर्वश्लोकेन प्रकृतं तत्प्रसक्तमसत्कार्यवादनिरासमुच्यते अवयविनामवयवास्तावत्सन्ति अवयवी न तेभ्योऽतिरिक्तः अतिरेके देववत्त्वं न स्यादवयविनो ऽवयवा उपलभ्येरन् नच तथोपलभ्यन्ते नहि पटद्रव्यातिरेकेण तन्तव उपलभ्यन्त इत्यर्थः । पूर्वयोजना ऽत्रापि तनश्लोकसङ्गता ॥ २७ ॥

आत्मनो देहाद्यव्यावृत्ततया प्रतीतिर्भ्रम इत्याह—यत्सामान्येति । साधारणाकाराकारणारोपितविशेषतया च यदुपलम्भः सभ्रमः साधारणाकारस्यारोपितविशेषस्य चान्योन्यापाश्रयात् अन्योन्यसम्बन्धात् अविरोधादित्यर्थः । आत्मस्वरूपादेहस्य व्यावृत्ताकारमाह—सर्वमिति । सर्वशरीरस्याद्यन्तवत्त्वात्र स्थिरमित्यर्थः ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवं सर्वस्य परमात्मायत्तसत्तास्थितिप्रवृत्तिकत्वे स्थिते सति जीवगतावस्थानामपि तथात्वं सिद्धं तत्राधिकं विशेषमाह—बुद्धेरिति । अत्र बुद्धिशब्दो जीवात्मधर्मभूतज्ञानपरः जीवस्य ज्ञानविकाससङ्कोचविशेषरूपजागरणाद्यवस्थानानात्वं प्रत्यगात्मनि जीवे मायामात्रं प्रकृतिसम्बन्धमात्रकृतमित्यर्थः ॥ २५ ॥

एवंविधा दोषाः सर्वाधारमपि परमात्मानं न स्पृशन्तीत्याह—यथेति । इदन्तया भासमानं प्रत्यक्षादिप्रमाणगम्यं विश्वमवयविनि ब्रह्मणि उदयाप्ययौ यस्य तथाभूतं भवति च शरीरभूताचिदचिद्गता विकाराः स्वरूपस्थाकाशवन्निर्मलमिति भावः ॥ २६ ॥

इत्थं जगतो ब्रह्मकार्यत्वाभिधानात्सत्कार्यवादः फलितः तद्विरुद्धमसत्कार्यवादं निरस्यति—सत्यमिति । अवयविनामवयवाः सत्यत्वेन प्रोक्ताः अवयविना व्यवह्रियन्त इत्यर्थः । अवयवी तु न तेभ्योऽतिरिक्तः अतिरिक्तत्वे तु पटावयविनः पृथगवयवा उपलभ्येरन् च तथोपलभ्यन्ते न हि पटद्रव्यातिरेकेण तन्तव उपलभ्यन्त इत्यर्थः । तथा सत्कार्यवादाद्ब्रह्मणो न पृथग्भूतं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

जगद्रूपं कार्यमिति सत्कारणमेव जगदित्यर्थः । प्रकृतेति सम्बोधनं द्योतकम् अबाधिततन्त्वात्मकावयवसमुदाय एव व्यतिषङ्गविशेषं गतः पट इत्युच्यते प्रतीयते च तत्र पटरूपं कार्यं न तन्तुभ्योऽतिरिक्तं तथा प्रमाणप्रतिपन्नं चिदचिदीश्वरसमुदायात्मकं "सदेव सोम्येदम्" इत्यादिषु सच्छब्दवाच्यञ्जगद्रूपपरिणामविशेषमापन्नं कार्यमित्युच्यते प्रामाणिकैस्तथा तेषां प्रतीयते चातो नासत्कार्यत्वमिति भावः । अत्र "पटवच्च" [२।१।१९] इति सूत्रार्थः स्मारितः ॥ २७ ॥

ननु, बुद्धिशब्दान्तरादिभिः कार्यकारणयोर्भेद एवेत्यसत्कार्यत्वमेवोचितमित्यत आह—यदिति । घटशरावादिषु मृदयं घट इति सामानाधिकरण्येन प्रतीतिविषयं यत्सामान्यशब्देन मृदादिकं कारणं विवक्षितं विशेषशब्देन घटशरावादिविशेषाकारो विवक्षितः स च मृद्गतो विकारः नाऽयं यदन्यबुद्धिशब्दान्तरादिभिर्द्रव्यान्तरमुपलक्ष्यते असत्कार्यवादिनां सभ्रमः कार्यस्य द्रव्यान्तरत्वोपलम्भो भ्रमात्मकः, कुतः ? अन्योन्यापाश्रयत्वात् सामान्यविशेषयोरेव परस्परमाधाराधेयभावेनाभिन्नत्वात्सामान्यतस्तद्गतविकारापेक्षया द्रव्यान्तरस्यानुपलम्भाद्बुद्धिशब्दान्तरादीनां विकारावलम्बनत्वेनाप्युपपत्तेरितिभावः । एवं चिदचिदीश्वरसङ्घातस्य कार्यकारणोभयावस्थत्वं तयोरभेदश्चेत्युपपादितमसत्कार्यवादश्च प्रतिक्षिप्तः । अथ कार्यावस्थानामपि चिदचिदीश्वराणां मिथो व्यावृत्ताकारतां विवक्षुस्तावदात्मस्वरूपाद्देहस्य व्यावृत्ताकारमाह—सर्वमिति । यत्सर्वं शरीरमाद्यन्तवत्तद्गुणभंगिदमत अवस्थनात्मवस्त्वित्यर्थः ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न स्वप्नेत्यत्र स्वप्नाद्यवस्था अपि न ब्रह्मण इत्युक्तम् । तर्हि कस्य ता इति तत्राह—बुद्धेरिति । बुधं ज्ञानं धीयतेऽस्मिन्निति बुद्धिर्जीवः तस्य जागरणादिकमुच्यते ह "सता सोम्य" इत्यादि श्रुतिसिद्धम् अथ हे तत्पुरुषः स्वपिति नामेति च अनेन जाग्रदादीनां निरालम्बनतया मिथ्यात्वमपास्तम् ननु, सु(पु)ष्प्यवस्थावद्विश्वादीनामपि नानात्वं सत्यं स्यादिति तत्राह—मायामात्रमिति । प्रत्यगात्मनि परमात्मनि स्थितं नानात्वं मायया स्वेच्छया मात्रं निर्मितं ज्ञातं न स्वाभाविकम् एतेन कृष्णरामादिरूपाणां मिथोमूलरूपेण भेदो निरस्तः । तदुक्तम्—

"प्रत्येकं विष्णुरूपाणां भ्रान्तिमात्राभिदा मता ।
जगतश्चैव विष्णोस्तु सत्यो भेदः सदैव तु ॥
यथाकाशघनौ नित्यं भिन्नावेव परस्परम् ।
एवमीशो जगच्चैव भिन्नावेव परस्परम्" ॥

इति ॥ २५ ॥

नन्वेवं तर्हि जगद्ब्रह्मणोर्भेदो न पारमार्थिकः स्यादित्यतः सोदाहरणं भेदस्य सत्यत्वं समर्थयते—यथेति । तदभावयोर्भिदो विरुद्धधर्मत्वादेकवद्भावः । इदं विश्वं ब्रह्माधारतया सृष्टिसंहारौ याति गगनघनयोराधाराधेययोर्भेदो यथा सत्यस्तथा जगद्ब्रह्मणोरपीति एतदप्युक्तं यथाकाशघनाविह विना ॥ २६ ॥

ननु, जगद्ब्रह्मणोरिवावयवावयविनामपि भेदः सत्येव किं न स्यात्पटस्वामी तन्तव इति तत्प्रतीतेरिति ? तत्राह—एत इति । सर्वेषामवयविनां महदादीनां ये अवयवाः प्रोक्ताः वाद्यः एतेऽर्थेन विना भेदव्यवहारमन्तरेण प्रतीयेरन् हि तस्मात्तस्माद्भिन्ना इति शेषः । कथमभेदः ? इत्यत्राह—पटस्येति । पटस्यावयवास्तन्तवो ऽवयविना पटेना[redacted]कितव्यं तन्तुः पटः मृद्घटः शुक्लः प[redacted]दर्शनात् प्रत्येकं तन्तुना भेदेऽपि समुदाय[redacted]नाच तन्तव इति बहुवचनम् अत एव—

अवयव्यवयवा[redacted]तः ।
सोपि भेदो न[redacted]र्तन ॥

इति वाक्यमत्र गृहीतम्[redacted]नां भेद इति मतमपास्तं पटस्य तन्तव[redacted]यौक्तमिति यश्चि स्कर्षणार्थः सोपि श्रीह[redacted]कि विरोधः "अवयव्यवयवानान्तु कार्यकारण[redacted]व नियन्ताऽसौ हरिर्नारायणः परः" ॥ इति[redacted] ॥ २७ ॥

नन्वेवं वेदवादि[redacted]पि तदभेदः स्यादित्राह—यदिति । य[redacted]त्युच्यते भवावहव्यभाविविशेष इति [redacted]यवाभिन्नमित्युपलक्ष्येन सामान्यावयववत् [redacted]न्योन्यापाश्रयाद्विश्लेषात् तस्मादाद्यन्तवदवस्[redacted]मांशानां वाय्वाद्यंशिनां सामान्यविशेषशक्ति[redacted]लङ्घ्यते ? इति तत्राह यदिति । अन्योन्याप[redacted]विषयप्रमाणात् अल्पजनमोहाधिकृतत्वेन[redacted]मविद्यमानमेव ॥ २८ ॥

श्री[redacted]मसन्दर्भः ।

तदेवं धीप्रभृती[redacted]शक्तिमयत्वमुक्त्वा तथापि तेभ्यो बहिरङ्ग[redacted]ाकितटस्थशक्तिविशिष्टपरमात्मनोऽन्यतमत्व[redacted]जनया सदोषत्वमुक्त्वा तेषु धीप्रभृतीष्वध्या[redacted]षु धीवृत्तिषु तावच्छुद्धस्यैव जीवस्य सकारण[redacted]ति । बुद्धिवृत्तिरूपं जागरणं स्वप्नः सुषुप्तिः इतीद प्र[redacted]जीवे विश्वतैजसप्राज्ञत्वावधं नानात्वं मायामात्रं मायाकृताध्यासमात्रेण जातमित्यर्थः ॥ २५ ॥

ततः परमात्मनि बुद्ध्यादिमयस्य जगतः सतोपि सम्पर्कः सुतरां नास्तीत्याह—यथेति । यथा व्योम्नि व्योमकार्यवायुज्योतिः सलिलपार्थिवांशधूमपरिणामजलधराणामेवावयविनामुदयात् भवन्ति दृश्यन्ते अप्ययाच्च भवन्ति न दृश्यन्ते तेच तत्र स्पृशन्तीति ह्येवं तथा ब्रह्मणीदं विश्वमिति योज्यं ततः सूक्ष्मरूपेण तस्य स्थितिरस्त्येव जगच्छक्तिविशिष्टकारणांशितत्वात् इत्यमेवोक्तं सतोभिव्यञ्जकः काल इति ॥ २६ ॥

तदेव व्यक्तं कारणाश्रितत्वं दृष्टान्तेन प्रतिपादयति—सत्यमिति । सर्वेषामवयविनां स्थूलवस्तूनाम् अवयवः कारणं सत्यं सत्यो वाऽभिचाररहितः प्रोक्तः लोके तथा दर्शनादित्याह—विनेति । अर्थेन स्थूलरूपेण पटेनापि विना ॥ २७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदित्थं कार्यास्तित्वमपि व्यतिरेकेण प्रतिपादयति—यदिति । अयमर्थः यदेवमुच्यते पूर्वं सूक्ष्माकारेणापि जगन्नासीत् किन्तु तदेव शक्त्या निमित्तभूतया विशेषाकारेण जगद्रूपेण परिणतमिति तदसत् यदेवं सामान्यविशेषाभ्यामुपलभ्येत स भ्रमो विवर्तवाद एव तत्र हि शुद्धब्रह्मैवाज्ञानरूपया शक्त्या जगत्तया विवृतमिति मतं न चास्माकं तदप्युपपत्तिः परिणामवादस्य सत्कार्यतापूर्वकत्वादित्यर्थः । तत्पूर्वमेव कार्यमारम्भविवर्तवादिनामिव शुक्त्यादावपि जायतां तत्राह, यदाद्यन्तवत् अपूर्वं कार्यं तत्पुनर[illegible]मित्यर्थः । तत्र हेतुः अन्योन्यापाश्रयात् यावत्कार्यं न जायते तावत्कारणत्वं मृत्त्वादेर्न सिद्ध्यति कारण[illegible] च कार्यं न जायत एवं परस्परसापेक्षत्वे[illegible] अतः कारणस्यापि कार्यशक्तिसम्बन्धमभ्युपगन्तव्यं सा च कार्यसूक्ष्मावस्थैवेति कार्यास्तित्वं सिद्ध्यति तथापि स्थूलरूपतापादकत्वान्मृदादेः कारणत्वमपि सिद्ध्यतीति भावः ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु विश्वतैजसः प्राज्ञः इति जीवस्य नानात्वं तत्र बुद्धिवृत्तीनां त्रितयस्यात्मन्यपि [illegible] मिथ्यैवेत्याह—बुद्धेरिति । जागरस्वप्नसुषुप्तयस्तिस्रो वृत्तयो बुद्धेरेवोच्यन्ते अतस्तद्ध्यासात् प्रत्यगात्मनि जीवेऽपि [illegible] मायामात्रं मिथ्यैवेत्यर्थः ॥ २५ ॥

परिणामवादे कार्यकारणव्यतिरेको दर्शितः अथारम्भवादे विश्वस्याद्यन्तवत्त्वं तत्कारणस्य परमेश्वरस्य सत्यत्वं च क्रमेण दर्शयति—यथेति द्वाभ्याम् । भवन्ति नश्यन्ति तथैव ब्रह्मणीदं विश्वं भवति न भवति च [illegible] इति दृष्टान्तेन परमात्मनो निर्लिप्तता दर्शिता [illegible] तदा[illegible] पुनर्वत् घटादिवदित्यर्थः । अत [illegible] आद्यन्तवद्विश्वं न सर्वदा सत्यमित्यर्थः ॥ २६ ॥

किञ्च, सर्वेषामवयविनाम् अवयवाः कारणं सत्यं लोके यथा दर्शनादित्याह—विनेति । अङ्ग हे राजन् [illegible] हि यस्मात् अर्थेनावयविना विनापि पृथगेवावयवाः प्रतीयन्ते यथा [illegible] तन्तवः यस्मात् पृथक् प्रतीयन्ते तस्मात् अत्र "कार्यकारणवस्त्वैक्यदर्शनं पटतन्तुवत्" इति सप्तमोक्तेः [illegible] ब्रह्मैक्यं तु लभ्यत एव ॥ २७ ॥

विवर्तवादे तु ब्रह्मकार्यं जगद्यथा तथा ब्रह्मणः कारणत्वादिकमप्यसत्यमित्याह—यदिति । सामान्यं कारणं विशेषः कार्यं ताभ्यां यदुपलभ्यते स भ्रमः कुतः ? अन्योन्यापाश्रयात् परस्परापेक्षत्वेन निरूपणासहत्वादित्यर्थः । अयमर्थः, यथा रज्जुरेवाज्ञानेन सर्पत्वेन विवर्तते तत्र रज्जुः कारणं सर्पः कार्यं स तु मिथ्यैव तथैव सामान्यं ब्रह्मैव अज्ञानेन जगद्रूपतया विवृतं तत्र जगतः कार्यत्वाभावे तदपेक्षतया सिद्धं ब्रह्मणः कुतः कारणत्वमिति ॥ २८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं द्वाभ्यां श्लोकाभ्यामविद्याया ब्रह्मकार्यत्वानित्यत्वं नित्यत्वं च दर्शितमथ चेतनस्यापि कार्ये विश्वस्मिन् स्थितस्य विश्वसृष्ट्यादौ ज्ञानानन्दाविकृतौ भवतः बन्धनमूलत्वा न तु तत्स्वरूपे किञ्चिद्विकारादिकमस्तीति जागरणादिप्रदर्शनेन सूचयति—बुद्धेरिति । नानात्वं जाग्रत्स्वप्नसुषुप्त्यादि ॥ २५ ॥

ननु, भवतु जीवो निर्विकारस्वरूपः ब्रह्मणि तु जगत्संसर्गजा दोषा भवन्त्येव भविष्यन्ति जगदुपादाननिमित्तकारणत्वादित्येवेत्यत आह—यथेति । भवन्ति उत्पद्यन्ते न भवन्ति विलीयन्ते तस्य नाशना दोषमागमवति तथा अवयविब्रह्मणः परस्परप्रकृतिव्यसंयुक्तमिदं विश्वं ब्रह्मणि उदयास्तौ भवति तथापि भवति ज्ञानस्तुल्याविकास[illegible] बन्धमोक्षादयो धर्माः ब्रह्मांशभूतजीवविषयाः विकारत्वादयो धर्माः ब्रह्मशक्तिरूपप्रकृतिविषयाः विश्वसृजननियमनपालनादयः सत्यत्वज्ञानत्वानन्दत्वानिर्विकारत्वादयो धर्माः ब्रह्मविषया इति विवेकः ॥ २६ ॥

अथ सत्कार्यवादं निराचिकीर्षुः कृतात् [illegible] तमाः न स्युरिति प्रागुक्तं सत्कार्यवादं पुनर्दृढयति—सत्यमिति । हे अङ्ग विष्णुदत्त ! सर्वेषामवयविनां रथप्रासादादीनाम् पटस्य तन्तव इव कारणभूताः अवयवाः सत्यं प्रोक्ताः ते एव अवयव[illegible]वस्थां प्राप्नुवन्ति, तन्निरपेक्षा अवयविनो नोत्पद्यन्ते इति भावः । अन्यथा अर्थेन अवयवभूतेन विनैव रथादयः प्रतीयेरन्तु निर्बीजाः भवन्ति प्रतीयन्ते वा एवम् इह प्रकृतेऽपि ज्ञातव्यं यं सन्मूलमेव कार्यमुत्पद्यते तथा च श्रुतिः "सन्मूलाः सोम्येमाः प्रजाः" इत्यादिः ॥ २७ ॥

ननु, वायवीयतैजसाप्यपार्थिवपरमाणवो यदि [illegible] जगत्कारणतया नाङ्गीक्रियन्ते किन्तु [illegible] ब्रह्मैव जगत्कारणतयाङ्गीक्रियते तथापि सर्वात्मना ब्रह्मणो [illegible] कार्यकारणयोरत्यन्ताभिन्नत्वादित्यत आह—यदिति । अन्योन्यापाश्रयात् परस्पराश्रयात् युक्तितः व्यवहारादिना कार्यकारणयोरितरेतरः आश्रयो नास्ति, नहि घटबुद्ध्या मृत्पिण्डः आश्रयः न च मृत्पिण्डबुद्ध्या घटः तथा घटध्वंसे उत्पद्यमाने तदर्थतया न मृत्पिण्डस्फूर्तिरित्यादि स्वयमूह्यम् तस्मादन्योन्यापाश्रयात् [illegible] सामान्यविशेषाभ्याम् सामान्यं कारणं मृत्पिण्डादिविशेषः कार्यं घटादि ताभ्यां व्यवहितमाभ्याम् यत् यत्तयोऽत्यन्तभेदबोधः उपलभ्येत स वैशेषिकाणां भ्रमः मृत्पिण्डं विना घटलाभाभावात् अतोऽसत्कार्यवादो मुमुक्षुभिर्हेय इति भावः । ननु, तर्हि कार्यस्य जगतोऽपि ब्रह्मणा सत्परिणामपूर्वकं ब्रह्मभावापत्तिर्मुक्तिरिति कोऽयं दुराग्रहः ? इत्यत आह, सर्वमाद्यन्तवद्वस्तु यदिति । वस्तु कारणं तद्भिन्नं भवतु कार्यं यत् तत्सर्वमाद्यन्तवत्तो नित्यब्रह्मभावप्राप्तिरिति भावः ॥ २८ ॥

भाषा टीका ।

बुद्धि अर्थात् जीवात्माके धर्मभूतज्ञान की जागरण, स्वप्न और सुषुप्ति, ये तीन अवस्था हैं, हे राजन् ! सो ये तीन (जीव) में प्रकृति के सम्बन्ध होने से

विकारः ख्यायमानोऽपि प्रत्यगात्मानमन्तरा ।
न निरूप्योऽस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् ॥ २९ ॥
नहि सत्यस्य नानात्वमविद्वान् यदि मन्यते ।
नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वा तयोरिव ॥ ३० ॥
यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्य[illegible]
एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिक[illegible]१ ॥
यथा घनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च [illegible]
एवं त्वहं ब्रह्मगुणास्तदीक्षितो ब्रह्मांशकस्याऽऽत्मन[illegible]॥ ३२ ॥

भाषा टीका ।

हैं, ये तीनों अवस्था प्रकृति विनिर्मुक्त आत्मा की नहीं हैं ॥ २५ ॥

जैसे, कि–आकाश में जलधर (मेघ) होते हैं, और विलीन होजाते हैं, परन्तु उनके होने न होने से आकाश में कुछ विकार नहीं होता, किन्तु वह स्वरूप से निर्मल ही रहता है। इसी प्रकार अवयवि यह विश्व भी परमात्मा के विषे उदय होने से होता है, लय होने से नहीं होता है, परन्तु इस विश्व के होने न होने से कुछ परमात्मा के स्वरूप में विकार नहीं होता है, किन्तु विशेषणांशमें ही विकार है, तस्मात् श्रुतिप्रतिपाद्य परमात्मा का स्वरूप निर्मल ही है ॥ २६ ॥

लोक में सब अवयवियों के अवयव कारण होने से सत्य कहलाते हैं, परन्तु वे अवयव अवयविदशापत्तिकाल में अवयविरूप अर्थ के बिना प्रतीत नहीं होते हैं। हे राजन् ! जैसे, कि–पटके तन्तु पटावस्था को प्राप्त होने पर पट से अलग नहीं देख पड़ते हैं, परन्तु वह पट रूप कार्य कुछ तन्तुओं से पृथक् नहीं है, विलक्षण संस्थान को प्राप्त होने वाले तन्तुओं का नाम ही पट है । उसी प्रकार प्रमाण सिद्ध चेतन अचेतन ईश्वर इन तीनों का समुदाय रूप सत्य पदार्थ ही विलक्षण परिणाम को प्राप्त होकर कार्य रूप होने से जगत् कहाता है। तस्मात् कार्य और कारण दोनो सत्यहीं है असत्य नहीं ॥ २७ ॥

लोक में घट और मृत्तिका इन दोनों के वाचक शब्द भी भिन्न हैं, और इनकी बुद्धि भी भिन्न भिन्न ही होती है। तस्मात् कार्य कारण का भेद ही सिद्ध है, फिर अभेद कैसा ? तहां कहते हैं, कि–सामान्य शब्द हुआ मृत्तिका, और विशेष शब्द हुआ घट, तहां ऐसा व्यवहार होता है, कि–यह घड़ा मिट्टी है, इस में वस्तु का नाम तो मिट्टी हुआ और अवस्था का नाम घड़ा हुआ, अब मिट्टी और उसके विशेषाकार से घड़ा कोई और ही द्रव्यान्तर है, यही बड़ा भ्रम है। क्यों कि ? सामान्य और विशेष को अन्यो[illegible]सामान्य वस्तु गत विकार की अपेक्ष[illegible] द्रव्यान्तर नहीं हो सकता है, घट ऐसा[illegible] मृत्तिकी अवस्था को लेकर भी हो सकत[illegible] अवयवि यह शरीर प्रकृति ही ठहरता[illegible] वाला है इसी से यह आत्मा नहीं हो स[illegible] से भिन्न है ॥ २८ ॥

श्री[illegible]पिका ।

तदेवमनेकैर्हेतु[illegible] साधितम् तत्र शङ्का ननु, प्रपञ्चस्यापि [illegible]सत्त्वं किं न स्यादिति तत्राऽऽह–विकार[illegible]प्रकाशमानोऽपि विकारः प्रपञ्चः प्रत्यगात्म[illegible]ोऽपि न निरूप्योऽस्ति तं विना निरूप्यः स्या[illegible]मः स्याच्चित्प्रेयाऽऽत्मना समः स्वप्रकाशो [illegible]र्योऽत्मवत्स्यात् एकरूपः स्यादित्यर्थः ॥ २[illegible]

कुत इत्यत [illegible], सत्यस्याप्यात्मनो जीव-ब्रह्मरूपं नानात्व[illegible]यं नानात्वं मन्यते तर्हि अविद्वान् कथं तर्हि [illegible]पाधिकृत इत्याह–नानात्व-मिति । तत्र [illegible]काशयोरिवेति परिच्छेदा-परिच्छेदे दृष्टा[illegible]जलस्थयोः सूर्ययोरिवेपु-पाधिकृतविकार[illegible]योश्च शरीरस्थयाश्चयोरिवेति क्रियाभेदे ॥ ३० ॥

प्रमाण पद[illegible]नात्वं दृष्टान्तेन स्पष्टयति-यथेति । क्रियाभि[illegible]ा कटककुण्डलादिरूपेण लौकिकवैदिके[illegible]हितैः ॥ ३१ ॥

नन्वहङ्कारा[illegible]रयोन भेदव्यवहारहेतुत्वम् ? तस्य अकारण[illegible]मयाचारके वा सत्यापि प्रकाशासम्भव[illegible]न्तमाह–यथेति । अर्कप्रभव एव मेघरूपेणा[illegible]

"अ[illegible]मादित्यमुपतिष्ठते।
आ[illegible] ततः प्रजाः॥
इत्यादिवचना[illegible]र्केण [illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

तमः स्वरूपभूतार्कदर्शनप्रतिबन्धको भवति महमहङ्कारो ब्रह्मगुणः ब्रह्मांशभूतस्तद्दीधितस्तेनैव प्रकाशितश्चाऽऽत्मनो जीवस्याऽऽत्मदीप्तो ब्रह्मस्वरूपदर्शनप्रतिबन्धको भवति ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

देहाकारा आत्मनि न सन्तीत्याह—विकार इति । जातिगुणक्रियाऽपचयजन्मवृद्ध्यादिरूपः [illegible]ऽपि विकारो न निरूप्यः आत्मधर्मतया न चिन्त्यः [illegible] निरूपयत इति मन्यमानोऽस्मदनुबुद्ध्या नात्मविदित्यर्थः ॥ [illegible] ॥

औपाधिकानां [illegible]भेदानां जीवात्मन्यविद्यमानत्वमाह—नहीति । सत्यशब्दो जीवपरः "[illegible]नुप्रविश्य सच्च त्यच्चाऽभवत्, सत्यं चाऽनृतं च सत्यमभवत्" इति [illegible] "प्राणा वै सत्यम्" इति प्रयोगात् नहि परिशुद्धजीवात्म[illegible] देवमनुष्यादिनानात्वमिति अस्तीति आनन्दविज्ञानेन, औपाधि[illegible]भेदस्य स्वरूपस्पर्शित्वे तेजोवाय्वज्योतिरिच्छिद्राणि दृष्टान्तयति—[illegible]नात्वमिति । पूर्वापरदेहवर्तितयाभिन्नत्वेन प्रतीयमानयोरात्मनो[illegible]भेदे दृष्टान्तः छिद्रयोरिति । छिद्रवचनात् इयान् विशेषः भिन्नकालो[illegible]पाधिकृतभेदराहित्ये तुल्यकालोपाधिकृतभेदराहितवस्तु दृष्टान्तितमि[illegible] केषुचित् कोशेषु दृष्टत्वात् दुर्लभिन्द्रियार्थरूपेष्वीति श्लोकार्थं [illegible]व्याख्यातम् ॥ ३० ॥

व्यावहारिकैश्वर्यं क्रियार्थपरिच्छा[illegible] दृष्टान्तेन परिहरति—यथा हिरण्यमिति । यथा क्रियार्थत्वात् हि[illegible]पबहुत्वं सत्यम् एवं प्रमाणिकत्वात्परमात्मबहुत्वमपि सत्यमित्यर्थः ॥ ३१ ॥

मात्यन्तिकं प्रलयं वक्तुमुपक्रमते—[illegible] घन इति । धूमादिभिः तमोरूपत्वात्स्वत्वात् मेघस्यार्कप्रभव[illegible] आदित्याभिव्यक्तत्वात् चक्षुषः आदित्यांशत्वं तम इति [illegible]तिरोधायकत्वमुच्यते अहंशब्दोऽहमभिमानविषयदेहपरः [illegible]हङ्कारशब्देन निर्देशात् ब्रह्मगुणः परमात्मविशेषणभूतः आत्म[illegible]स्थानः ज्ञानप्रतिबन्धकः यथार्कांशस्य चक्षुषोऽर्कदर्शनं तत्प्रभो मेघः प्रतिबध्नाति एवं परमात्मांशभूतस्य जीवस्य परमात्मदर्शनं तद्गुणभूतो देहः प्रतिबध्नातीत्यर्थः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किञ्च न देहाकारा आत्मनि सन्तीत्याह—विकार इति । विकारः जातिगुणक्रियाजन्मवृद्ध्यादिविकारः [illegible]मानः आत्मनि देहात्माभिमानिनां प्रतीयमानोऽपि प्रत्यगात्मन[illegible] तं विनैव भवति न तस्मिन्नस्तीत्यर्थः । तदाह—नेति । न तस्मिन् विकारो निरूप्योऽस्तीत्यर्थः । विपर्ययेऽनिष्टमापादयति—[illegible]दिना । चेद्यद्यणुरपोऽपि विकारः आत्मनि [illegible] प्राकृत्ये मनुष्य मुक्ताऽऽत्माऽपि तत्समः देहसमः अविकारी [illegible]त्यर्थः । [illegible]तत्समः आत्मवादिति पाठान्तरं तदा [illegible]स्वरूपवदसदेकरूपः चित्समः ज्ञानात्मकात्मस्वरूप[illegible] प्रकाशश्च स्यात् मुक्तावप्येकरूपतया [illegible]त्यर्थः । न हि तथा [illegible] ॥ २[illegible] ॥

ननु, दृश्यमानोऽपि विकारः कुत आत्मनि नेत्युच्यते इत्यत्र औपाधिकत्वादित्याह—नहीति । सत्यशब्दोऽत्र जीवपरः "तदनुप्रविश्य सच्च त्यच्चाभवत् विज्ञानं चाविज्ञानं च सत्यानृतं च" इति "प्राणा वै सत्यम्" इति च प्रयोगात् नहि परिशुद्धजीवात्मस्वरूपस्य देवमनुष्यादिनानात्वमस्ति यत्तु यदयं नानात्वं मन्यते तर्हि न स विद्वान् देहविलक्षणात्मयाथात्म्यविदपितु देहात्माभिमानीति भावः । औपाधिकभेदस्य जीवस्वरूपास्पर्शित्वे नभस्तेजो वायवो दृष्टान्ताः इत्यभिप्रायेणाह—छिद्रयोरिति । यद्वा यथा छिद्रयोराकाशयोर्ज्योतिषोर्वायोर्वा यथा न नानात्वं तद्वदात्मनोः पूर्वापरदेहवर्तितयाऽभिन्नत्वेन प्रतीयमानयोरात्मनोर्भेदे दृष्टान्तत्वाभिप्रायेण छिद्रयोरित्यादिद्विवचननिर्देश इयान् विशेषः भिन्नकालोपाधिभेदराहित्ये तुल्यकालोपाधिकृतभेदरहितं वस्तु दृष्टान्तितमिति छिद्रयोरिति द्विवचनान्तेन मेघाद्युपहितावकाशप्रदेशौ विवक्षितौ घटाकाशमहाकाशौ वा ज्योतिश्शब्देन सूर्यादिबिम्बप्रतिबिम्बौ वातशब्देन बाह्यशारीरौ ॥ ३० ॥

एवमात्मनो देहाद्यावृत्ताकारत्वप्रतिपादनेनैव देहस्यापि ततोऽव्यावृत्ताकारत्वमर्थसिद्धं नाऽर्थात् परमात्मनोऽव्यावृत्ताकारतातु "न तस्य कालावयवैः" इत्यादिभिः श्लोकैः प्रतिपादितैव अत्रोपपादितविश्वविधिविशिष्टस्य विचित्रजगद्रूपेण परिणामं कार्यकारणयोरनन्यत्वं चोपसंहरन् कार्यमिथ्यात्वपक्षप्रतिक्षेपाय तत्सत्यत्वाय दृष्टान्तमाह—यथा हिरण्यमिति । व्यवहारमार्गेषु व्यवहारमार्गेषु निमित्तभूतेषु व्यवहारशब्दः प्रयोजनस्याप्युपलक्षणार्थः कुण्डलमानय कटकमानय बिभृहीत्यादि व्यवहारार्थं धारणादिप्रयोजनार्थं चेत्यर्थः । क्रियाभिः स्वर्णनिष्ठैकमेव सुवर्णं बहुधा कुण्डलादिरूपेण (भेदन) नृभिः समीयते प्रमीयते स्वर्णविशेषादिक्रियाहेत्वात्सा धारणादिप्रयोजनार्हत्वाच्च कटकादिकं सत्यमेव कारणात् सुवर्णात् अनन्यच्च न हि शुक्तिरजतादिकमर्थक्रियार्हमिति भावः एवं सूक्ष्मचिदचिच्छरीरकं भगवानेक एव लौकिकैर्वैदिकैश्च वचोभिर्जनैर्निर्दिष्टैतत्सर्वाभिश्च व्यवहार्यते विविधमाकार्यते विचित्रजगद्रूपेण परिणतः स्वार्थेन "कटकमुकुटकर्णिकादिभेदैः कनकमभेदमपीष्यते यथैकम् । सुरनरपशुपादपादिभेदैर्हरिराजनापि तथेष्यते तथैकः" इत्यादीनि लौकिकवचांसि "यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्' वाचारम्भणं विकारो नामधेयं लोहमणित्येव सत्यम्" इत्यादीनि वैदिकानि । भगवानित्यनेन कारणत्वाशङ्कितहेयाक्पदृतत्वव्यावृत्तिः सूच्यते ॥ ३१ ॥

अथ मोक्षापरपर्यायसंसृतिनिवृत्तिरात्यन्तिकः प्रलय इति विवक्षुस्तावत् कोऽसौ देहाद्यावृत्तस्यात्मनो बन्ध इत्यत्राह—घनेति । मेघस्यार्कप्रभवत्वमर्करश्मिजनितधूमादितमोरूपत्वात्स्वत्वाच्च—गम्यम् आदित्याभिव्यक्तत्वाच्चक्षुषोऽर्कांशत्वं यथा अर्कप्रभवोऽर्कांशप्रकाशितश्च मेघोऽर्कांशभूतस्य चक्षुषस्तमः तमोवदर्कदर्शनप्रतिबन्धकस्तिरोधायक इति यावत् । अहंशब्दोऽत्र देहात्माभिमानस्याहमभिमानविषयस्याहङ्कारः ब्रह्मगुणः परमात्मविशेषणाभूतः उद्दीपितकेन परमात्मना प्रकाशितः ब्रह्मांशकस्यात्मनः जीवस्यात्मस्वरूपज्ञानप्रतिबन्धकः यथा अर्कांशस्य चक्षुषोऽर्कदर्शने तत्प्रभवो मेघः प्रतिबन्धकः एवं परमात्मशरीरभूतस्य जीवस्य परमात्मदर्शनं तद्गुणभूतो देहः प्रतिबध्नातीत्यर्थः । तत्प्रतिबन्ध एव संसृतिप्रतिबन्धो नामेति भावः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथाऽवयव्यवयवादीनाम् अभेदो दुरवबोधः एवं पदार्थाना-मनन्तत्वात्तत्स्वरूपभेदोपि परमात्मानमन्तरेण दुर्बोध इत्याशयेनाह-विकार इति । वि निषेधे पृथग्भाव इत्यनः पृथक्कारो नानाविधो भेदः प्रत्यगात्मानं साक्षीभूतं श्रीनारायणम् अन्तरेणाणुरल्पोपि निरूप्यो नास्ति स एव निरूपयितुं शक्तः नानरत्वादित्याह-वचायमान इति । प्रतीयमानस्यासत्त्वं जुगुप्सितं प्रमाणाविरोधा-दित्यपिशब्दः ॥ २९ ॥

नन्वेकस्य प्रतिमानं तु कृतकाम विशिष्यत इतिवन्निर्धार-णायोग्य इति मन्नाह—नहीति । यद्यविद्यान् ब्रह्मरूपाणां नानात्वं मन्यते तर्हापि सत्यस्य ब्रह्मणो रूपाणां नानात्वं सत्यं न भवति अविद्वन्मतत्वात् । ननु, "युक्ताह्यस्य हरयः शतादश" इति श्रुतेः । कथं सत्यं नेत्यत्राह—नानात्वमिति । नेत्यनुवर्तते छिद्रयो र्बाह्यान्त-र्व्याकाशयोः यद्यथा नानात्वं नास्ति एक एव महाकाशो घटे जायमाने बहिरन्तश्चेति द्वित्वसंख्यामुपैति उत्पद्यमानो नीलि-माकारोऽप्याकाशो द्वित्वमेति तत्र प्रागुक्तो हरेरुपमितिर्न यानः पश्चादुक्तो जीवानामित्यर्थविशेषो द्विशब्देनोपात्तः । उक्तञ्च—

"महाकाशो बहिश्चाश्च घटाद्यन्तः स्थ एव च ।
द्वेधा समुदितोऽन्यो च ह्यावाकाशौ प्रकीर्तितौ ॥
घटरूपस्तवन्यश्च महाकाशात्परो लघुः ।
महाकाशवदेवात्र परमात्मा सनातनः ॥
घटान्तःस्थमहाकाशप्रतिमोऽन्तर्गतो विभुः ।
घटव्यान्तर्गताकाशो महाकाशात्परो मतः ॥
तद्वदेवाहवः सर्वे जीवा मुक्त्युपयोगिनः ।
तमोगाश्चैव ये सर्वे घटरूपस्तवन्नराः" ॥ इति ।

ज्योतिषोरधिदैवाध्यात्मसङ्गयोः "सहस्रं वा आदित्यस्य रश्मय आसु नाडिष्वाततः" इति श्रुतेर्वा तयोर्वानप्राणसङ्गयोः "अधिदैव मथाध्यात्मम्" इति श्रुतेश्च । अत्रापि विशेषः पूर्ववद्वगन्तव्य इति ॥ ३० ॥

बहुत्वसङ्ख्यावाचिन्याः श्रुतेः किं विनिगमकमत्राह—यथेति । बहुधा कटककुण्डलाद्यात्मना हेम नानासङ्ख्याविषयं समीयते तथा भगवानपि देवो नरो वराहः शुक्लः पीतो ह्रस्वोऽणुर्दीर्घो महानिति विविधाकारेण व्यवधायते प्रकाश्यत इति ॥ ३१ ॥

हरेस्तत्त्वस्वरूपं निरूप्य संसारप्रकारमाह—यथेति । अर्कशब्दे नात्तेजोवायवो लक्ष्यन्ते तेजःसम्बन्धेन धूम उपलक्ष्यते अर्क-प्रभवः धूमतेजोजलमरुत्प्रभवः प्रभव उत्पत्तिः यस्य स तथा अर्केण नभसि दर्शितः सूर्यप्रकाशे सत्येव दृश्यते नान्यथा यथा घनः सूर्यदर्शनप्रतिबन्धकः "आपो वा अर्कः" इति श्रुतेः । यथा-र्कांशस्य चक्षुषस्तमः सूर्यदर्शने प्रतिबन्धकम् "आदित्यश्चक्षुर्भूत्वा ऽक्षिणी प्राविशत्" इति श्रुतेः । एवमेवाहङ्कारो ब्रह्मापेक्षया गुणोऽ गुणः तद्दीक्षितः तेन प्रकाशितः ब्रह्मांशकस्य जीवस्य "पादो-ऽस्य विश्वा भूतानि" इतिश्रुतेः । ब्रह्मणो भिन्नांशस्य आत्मनो जीवस्यात्मानं भाति ज्ञानं बध्नातीत्यात्मबन्धनः "आत्मा देहे धृतौ जीवे" इत्यादौ याज्ञवल्क्यप्रकाशेन मतौ प्रयुक्तत्वात् "तद्ब्रह्म वेदाहं ब्रह्मास्मि" इति श्रुतेः । ब्रह्मणो विशेषभूत इति वा ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तदेवं स्वाभाविकशक्तिमयमेव परमात्मनोऽजगदित्युपसंहरति विकार इति । यद्यपि वचायमानः प्रकाश्यमान एव पृथग्वि स्वल्पोपि विकारः प्रत्यगात्मानं विना तद्व्यतिरेकेण स्वातन्त्र्यत न निरूप्योऽस्ति तदुक्तं "तदन्यस्वाविषयत्वा देव यदि" च विनापि स्यात् तदा विस्मयः स्यात् विद्रूपेण (स्वेनः प्रकाश एवा ऽभविष्यत् आत्मवत् परमात्मवच्चिरैकार्वत्स्यमा-भविष्यत् ॥ २९ ॥

ननु, यदि परमात्मा [redacted] ाहित तर्हि परमा त्मनः सोपाधित्वे निरुप [redacted] तस्मात् सोपाधे-र्निरुपाधिरन्य एव किमि [redacted] त्यस्य परमात्मनो नानात्वं न हि विद्यते [redacted] मन्यते तर्हाविद्वान् यतस्तस्य निरुपाधित्व [redacted] त्वं महाकाशघटा-काशयोर्यद्वत् तद्वत् पृ [redacted] तेजसोरिव बाह्य-शारीरवाय्वोरिव चेति [redacted]

यस्माद्विकारः क्वा [redacted] मन्तरा न निरू-प्योऽस्त्वणुरपि तस्मात् [redacted] एवेति सदृष्टान्त-माह—यथा हिरण्यमिति [redacted] नाभेदैः बहुधा कटक-कुण्डलादिरूपेण यथा [redacted] तत्तन्नामभिः प्रती-यते तथा लौकिकवैदि [redacted] भगवानेव व्यवधा-यते तदुक्तं "सर्वनाम [redacted] डितश्च सः" इति स्कान्दे ॥ ३१ ॥

तदेवं जगतः परम [redacted] व्यवत्वमुक्त्वा तेन च जीवकर्तृकेन ज्ञानेन [redacted] ज्ञ मोक्षार्थं तद-ध्यासपरित्यागमुपदेष्टुं [redacted] पि तस्योपाध्यध्या-सात्मकस्याहङ्कारस्य अ [redacted] त्वरूपं दोषं सदृष्टान्त-मुपपादयति—यथा घ [redacted] एव मेघरूपेण परि णता वर्षन्ति—

"अग्नौ प्रास्त [redacted] समुपतिष्ठते ।
आदित्याज्जाय [redacted] ततः प्रजाः" ॥

इत्यादिवचनात्तस्माद [redacted] अर्केणैव प्रदर्शितः प्रकाशितश्च घनो नि [redacted] न्य चक्षुषस्तमो दिवि भूमौ च महान्धकार [redacted] एवं प्राकृताहङ्कारः ब्रह्म गुणः परमात्मशक्ति [redacted] तेनैव प्रकाशितश्च ब्रह्मांशकस्य तटस्थ [redacted] परमात्मनो यो हीनांश-स्तस्य आत्मनो [redacted] ः स्वरूपप्रकाशावरको भवति ॥ ३२ ॥

श्रीमद्विश्व [redacted] ार्थदर्शिनी ।

किञ्च विकारः [redacted] प्रतिक्षिप्यमानवं प्रपञ्चः प्रत्यगात्मानं परमा [redacted] न निरूपणीयः किन्तु सर्वः परमात्मैव प [redacted] ापितः यथा मरीचिकायां जलत्वेन प्रसिद्धं [redacted] ाभावे न निरूप्यं किन्तु सर्वे तेज एव तेज [redacted] ः । ननु, च काचिद्वि-कारत्वेन प्रसिद्धि [redacted] ल । दृश्यते [illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

तस्मात्प्राधिकरणकत्वादिर्भगवत्पुरी च तथा हि "[illegible] भक्ति-योगस्य निर्गुणस्येत्युदाहृतम्" इति "मत्सेवायां तु निर्गुणाः" इति "मन्निकेतं तु निर्गुणम्" इति "निर्गुणो मदपाश्रयः" इति "मन्निष्ठं निर्गुणं स्मृतम्" इत्यादिभगवदुक्तेर्भक्त्युपकरणीभूतः पदार्थमात्र एव निर्गुणः तथा "तासां मध्ये साक्षाद्ब्रह्मगोपालपुरीहि" इति सच्चिदानन्दैकरसे भक्तियोगे तिष्ठतीति च गोपालतापनीश्रुतेः। भगवदुक्तो भक्तियोगश्च निर्गुण एवातः परमसत्य एवेति तत्राह—[illegible]ति। यदि निर्गुणत्वेन निरूप्यो भवति तर्हि सोऽपि चित्समः "सीतासासीत्तथा समा" इतिवदत्रैव उपमा[illegible] आत्मवत् परमात्मेव निर्गुणः परमात्माविद्यासत्त्वात्परमात्मैव स एक एवेत्यर्थः ॥ २९ ॥

ननु, केन प्रकारेणैकत्वं [illegible]म्? तत्राह—नहीति। सत्यस्य परमसत्यस्य चिद्वस्तुनो नानात्वं नहि नैवास्ति तदपि यदि नानात्वं मन्यते तर्ह्यविद्यात् यथा छिद्रयोर्घटद्वये इदमेकमाकाशमिदमपरमाकाशमिति एवं ज्योतिषोर्दीपद्वयगतयोर्वातयोर्देहद्वयगतयोः प्राणयोरिति ॥ ३० ॥

तदेवं सुष्ठिसमयेऽपि प्रपञ्चस्य [illegible]व्यवहारावस्थानत्वे दृष्टेऽप्येकं ब्रह्मैव आसीदित्याह—यथेति। क्रियाभिस्तत्तद्वचनाभेदैः बहुधा कटककुण्डलादिरूपेण एवं लौकिकवैदिकैर्वचोभिः ॥ ३१ ॥

ननु, यद्येवं सर्वमेव ब्रह्मकार्यत्वेनैकं ब्रह्मैव तर्हि ब्रह्मकार्यस्याहङ्कारस्यावरत्वेन ब्रह्मांशभूतादिनिकटस्थाः सत्त्वा जीवाः कथं म्रियन्ते ते वा तदावृताः कथं मुच्यन्तीति तत्र सदृष्टान्तमाह—यदिति। अर्करश्मय एव मेघरूपेण परिणताः वर्षन्ति—

"अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" ॥

इत्यादि वचनात् तस्मादर्कप्रभव एव [illegible] अर्केणैव दर्शितः प्रकाशितश्च यद् चार्कांशभूतस्य चक्षुषः [illegible] आवरकः एवमेव अहम् अहङ्कारः आत्मने जीवस्य आत्म[illegible] आत्मना स्वेनैव जीवं बध्नातीत्यर्थः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

एवं ज्ञानकृताद्यङ्गवाक्यः [illegible] सर्वकारणस्य भगवात्रित्वप्रपञ्चे मुक्तो गत्वो निरूपितः अथ बुद्धेर्जागरणादित्व निरूपितोऽपि गन्ता तार्किकाद्युक्तजीवस्वरूपतद्धर्मभूतज्ञानभ्रमेण मुमुक्षोः—

"अन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते।
किं तेन न कृतं पापं चोरेणात्मापहारिणा" ॥

इति वाक्योक्तोऽनर्थो माभूदिति तं [illegible] निरूपयति—विकार इति द्वाभ्याम्। तत्र तार्किकादयः आत्मा जडः ज्ञानगुणकः तज्ज्ञानं च नीलं पीतमित्येवं जायते नश्यति च तन्निराकरोति विकारः ज्ञानविकारः नीलपीताद्याकारैः वर्ण्यमानोऽपि तार्किकादिभिः [illegible] जीवमध्ये वस्तु अपि न निरूप्यो भवति [illegible] सन्देहयन्तं तार्किकादीनां मतैः [illegible]बोधनार्थं [illegible] विज्ञानविज्ञातेर्विपरि-[illegible] [illegible]हि स

चित्समः चित् "चेतनश्चेतनानाम्" इति श्रुतिप्रोक्तः ज्ञानस्वरूपप्रत्यगात्मा तत्तुल्यः ज्ञानात्मक एव मन्तव्यः किञ्च, आत्मवत् "नित्यो नित्यानाम्" इति श्रुतिप्रोक्तो नित्यः आत्मा प्रत्यगात्मा तद्वन्नित्य एव मन्तव्यः नतु नीलपीतादिनानाकार इत्यर्थः ॥ २९ ॥

नन्वेकस्यैव ब्रह्मणः किं महाकाशघटाकाशन्यायेन बिम्बप्रतिबिम्बादिन्यायेन वा महावातादल्पवातन्यायेन वा नानात्वं नेत्याह—सत्यस्य ब्रह्मणो नानात्वं स्वरूपतो न हि घटेत अभेद्यत्वात् यदि छिद्रयोः महाकाशघटाकाशयोर्यद्वत् नानात्वं तद्वत् यथा ज्योतिषोः सूर्यादिबिम्बप्रतिबिम्बयोरिव वातयोः महावाताल्पवातयोरिव नानात्वं मन्यते तदा अविद्यान् स्यात् प्रथमदृष्टान्तेन घटाद्यवच्छिन्नाकाशवदुपाध्यवच्छिन्नब्रह्मप्रदेशभूतजीवस्वीकारे जीवोऽकान्ताद्विविधावच्छिन्नाकाशोपाधिदोषप्रसङ्गात् द्वितीयदृष्टान्तेन सूर्यादिप्रतिबिम्बवत् ब्रह्मप्रतिबिम्बरूपजीवस्वीकारे व्यापकप्रतिबिम्बाऽनुपपत्त्यादिदोषापातात् तृतीयदृष्टान्तेन बृहदल्पवायुभेदवत् परजीवभेदस्वीकारे अवयवसावयवद्रव्यस्य वायोर्नानात्वं सम्भवति निरवयवे अखण्डैकरूपे नानात्वासम्भवात् अवच्छेदप्रतिबिम्बादौ पराभिमताध्यासगिरिवज्रादौ विस्तारतो निराकृतो ग्रन्थविस्तरभयान्नोपरम्यते तस्माज्ज्ञानगुणकः ज्ञानस्वरूपः भगवदंशभूतो जीव इति भावः ॥ ३० ॥

ननु, तर्हि ब्रह्मणः सकाशाज्जीवो भिन्नोऽभिन्नो वेति संशये जीवस्यैव का कथा यथा जलधरा व्योम्नि इत्युक्तस्य चेतनाचेतनस्य सर्वस्य विश्वस्य ब्रह्मकार्यस्य ब्रह्मभिन्नाऽभिन्नत्वं सर्वशास्त्रार्थसम्मततया प्रतिपादयति—हिरण्यमिति। यथा व्यवहारधर्मेषु पदार्थक्रयविक्रयमार्गेषु कारणतया एकमेव हिरण्यं क्रियाभिः कटककुण्डलादिरूपमात्रव्यापारैर्बहुधा नृभिः समीर्यते एवं सर्वज्ञः सर्वशक्तिः सर्वकारणो भगवान् विश्वभिन्नाऽभिन्नतया "एकः सन्बहुधा व्यवहारः" इत्यादिवैदिकवचोभिः

"अनेकमेकं बहुधा वदन्ति श्रुतिस्मृतिन्यायनिरीक्षणज्ञाः।
आद्यं त्वमात्मानमजं पुराणं विद्वो द्रष्टुं तमीशं प्रतिसंयताः" ॥

एकस्त्वमेव द्वयमद्वयं च—

इत्यादिभिर्लौकिकैः पौराणैर्वचोभिर्जैमिन्यादिभिश्च ऋषिभिर्व्याख्यायते इत्यर्थः सूत्रकृतापि बहूनि सूत्राणि "उभयव्यपदेशात्त्वहिकुण्डलवत्" (३।२।२८) इत्यादीन्युक्तानि ॥ ३१ ॥

एवं सर्वस्य ब्रह्मात्मकत्वं विजानतोऽहङ्कारादिदोषापगमं ब्रह्मध्यानेन तद्भावापत्तिलक्षणं नित्यप्रलयापरपर्यायं मोक्षं वक्तुमहङ्कारबन्धनं तन्निवृत्तिप्रकारं चाह—यथेति द्वाभ्याम्। यथा घनः अर्कप्रभवः अर्केण प्रवर्तितः अर्कदर्शितः अर्केणैव दर्शितश्च अर्कांशभूतस्य अर्कदैवतस्य चक्षुषस्तमो भवति अर्कादिदर्शनप्रतिबन्धको भवति एवमहमहङ्कारः देहगेहादावहंममाभिमानरूपः अन्तःकरणवृत्तिविशेष इत्यर्थः। ब्रह्मगुणः ब्रह्मशक्तिगुणमयः "नहीक्षितस्तेनैवानादिकर्मप्रवाहेनाप्रकाशितः" एष परस्यांशः "ममैवांशो जीवलोके जीवभूतः सनातनः" इति श्रुतिस्मृतिप्रसिद्धस्य ब्रह्मांशकस्यात्मनो जीवस्य आत्मबन्धकः आत्मविषये ब्रह्मभावापत्तौ प्रतिबन्धकः ॥ ३२ ॥

घनो यदाऽर्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा ।
यदा ह्यहङ्कार उपाधिरात्मनो जिज्ञासया नश्यति तर्ह्यनुस्मरेत् ॥ ३३ ॥
यदैवमेतेन विवेकहेतिना मायामयाऽहङ्करणात्मबन्धनम् ।
छित्त्वाऽच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यन्तिकम् [illegible] ॥ ३४ ॥

नित्यदा सर्वभूतानां ब्रह्मादीनां परन्तप !
उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः सम्प्रचक्षते ॥ [illegible]
कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा [illegible]
परिणामिनामवस्थास्ता जन्मप्रलयहेतवः [illegible]

भाषा टीका ।

जाति गुण क्रिया जन्म वृद्धि इत्यादि जो विकार प्रतीत होते हैं, वे जीवात्मा के नहीं किन्तु देह के हैं, अतएव आत्मा के विकार कोई अणुमात्र भी नहीं निरूपण कर सक्ता है। यदि आत्मा काभी कोई विकार निरूपण करें तो वह विकार भी आत्मा के सदृश स्वयं प्रकाश होगा, सो है नहीं तस्मात् स्वरूप में विकार नहीं है ॥ २९ ॥

सत्यशब्दवाच्य जीवात्मा के देव, तिर्यक्, मनुष्य, स्थावर, इत्यादिक नानाप्रकार के भेद नहीं है, यदि कोई इन भेदों को आत्मा के माने तो वह तत्त्ववेत्ता नहीं है। देहादिकृत औपाधिक भेद जीवात्मा को स्पर्श नहीं करते हैं इसमें तीन दृष्टान्त हैं। जैसे घट मठ के भेद से वास्तव घटाकाश मठाकाश का भेद नहीं होसक्ता है। जैसे, दीपक और मिसाल के भेदसे अग्निका भेद नहीं होसक्ता है, जैसे वेणु के षड्ज निषादादि भेद से वायु का भेद नहीं होसक्ता है, इसी प्रकार देव मनुष्यादि शरीर भेद होने से आत्म वस्तु का भेद नहीं, किन्तु आत्मा सब एकाकार ही हैं ॥३०॥

जैसे मनुष्य कटक कुण्डलादि रचना विशेष होने से सुवर्ण को व्यवहार के लिये और धारणादि प्रयोजन के लिये, उन २ नामों से पृथक् २ बोलते हैं। इसी प्रकार चेतनाचेतनविशिष्ट एक भगवान् श्रीअधोक्षज कोही लौकिक वैदिक जन भिन्न भिन्न नामों से व्यवहृत करते हैं, वास्तव में वही एक विशिष्ट तत्त्व श्रीविष्णु मात्र ही है ॥ ३१ ॥

परन्तु जैसे सूर्य की किरणों के सहकार से उत्पन्न हुआ, अत एव सूर्य से उत्पन्न भया कहो एसा जो मेघ है, वह सूर्य से प्रकाशित होकर सूर्य का अंशभूत जो चक्षु है उस को सूर्य के दर्शन में प्रतिबन्धक होता है। इसी प्रकार अहंशब्दवाच्य यह देहाभिमानी जीव का जो देह है, यह भी परमात्मा का विशेषण होने से ब्रह्म का गुण रूप भया, और यह देह परमात्मा के ईक्षण से प्रकाशित हुआ है, तोभी ब्रह्मात्मक इस जीवात्मा के ब्रह्मविषयक ज्ञान का प्रतिबन्धक होता है ॥ ३२ ॥

———

श्रीध[illegible]का ।

अत एवाहङ्कार[illegible]तीति तत्रैव दृष्टान्ते-नाह—घन इति । आत्[illegible]या विचारेण तर्हि तदाऽनुस्मरेत् ब्रह्माह[illegible] ३३ ॥

सोऽयमात्यन्तिक[illegible]—यदैवमिति । विवेक-हेतिना ज्ञानखड्गेन[illegible]धनम् अच्युतं परि-पूर्णमात्मानमनुभवति[illegible]

नित्यप्रलयमाह[illegible]

कुत इत्यत [illegible]णामिनां नदीप्रवाहप्रदीप-ज्वालादीनां [illegible]: कालरूपस्रोतसो वेगेनाऽऽशु ह्रियमा[illegible]स्ता एव नित्यदा जन्म-प्रलयहेतवो भव[illegible] ध्वंसी । प्रतिक्षण-मवस्थाभेदापत्ते[illegible]नम् ॥ ३८ ॥

[illegible]प्रदीपम् ।

मेघविना[illegible]दर्शनवद्देहतिरोधानविगमे जीवस्य परमात्[illegible]घनोयदेति । यदा ह्यह-मिति । अत्रान्वहङ्[illegible]वरदेहपरः "मायामयाह-ङ्करणात्मबन्धनम्[illegible] ॥

अच्युतेति अच्यु[illegible]नुभवो यस्य सोऽच्युतात्मा-ऽनुभवः आत्यन्तिक[illegible]: मोक्षः ॥ ३४ ॥

नित्यदेति स[illegible]वो विवक्षितः परिणामि-शब्देन शरीरं [illegible]

अवस्था अ[illegible]

श्रीमद्वी[illegible]भवतचन्द्रचन्द्रिका ।

मेघविन[illegible]रविदर्शनवद्देहतिरोधानविगमे जीवस्य पर[illegible]—घनो यदेति । विदीर्यते वायुना निरा[illegible]स्वरूपं, रविं पश्यति एवं यदा अहङ्कारः[illegible]त्मकः [illegible]

श्रीमच्छ्रीधरस्वामिपादकृतभागवतभावार्थदीपिका ।

वा देहः स एवोपाधिरात्मनो जिज्ञासया विचारपूर्वकोपासनया नश्यति तदा अनुस्मरेत् परमात्मानं साक्षात्कुर्यादित्यर्थः । दीप्त्या आत्मनो जिज्ञासया विचारेणानुस्मरेदात्मानमुपासीत तदोपाधिर्नश्यति तेनैव परमात्मानम् ईक्षेत इत्यर्थः । "ततस्तु तं पश्यते निष्कलं ध्यायमानः" इति श्रुतेः इति भावः ॥ ३३ ॥

एवमुपाधिविलये एवात्यन्तिकः प्रलय इत्याह— यदैवेति । एतेन [illegible] विवेकादिसाधनसम्पन्नानुगृहीतभगवदुपासनया [illegible] मायाविकाराहङ्कारपरिणामरूपदेहसम्बन्धं एवात्मनो [illegible] छित्त्वा अच्युते स्वान्तरात्मनि [स्वान्तर्यामिणि] अनुभवो यस्य स अवतिष्ठते इति यस्तमेव अङ्ग हे राजन् आत्यन्तिकं संप्लवं प्रलयमाहुः तत्त्वाध्यात्मविद इति कर्तृपदाध्याहारः ॥ ३४ ॥

अथ नित्यं प्रलयं निरूपयति—नित्यदेति हे परन्तप राजन् ब्रह्मादीनां सर्वभूतानां नित्यदा प्रतिक्षणम् उत्पत्तिप्रलया प्रभवन्ति [पूर्वपूर्वावस्था एके केचित्संप्रचक्षते] [illegible] नित्यशरीराणां सततपरिणामस्वभावत्वात्सोऽयं [illegible] पूर्वपूर्वावस्थानाशः प्रलय इत्याचक्षते । इमावेव नित्योत्पत्तिप्रलयाविति भावः स्थूलदृष्टिभिरसौ न ज्ञायते इत्यभिप्रायेण सूक्ष्मता इत्युक्तम् ॥ ३५ ॥

एतदेवोपपादयति—कालेति । काल एव स्रोतः प्रवाहः तस्य जवेन वेगेनाशु शीघ्रं ह्रियमाणस्य [illegible] विवक्षितः नदीप्रवाहवेगेन ह्रियमाणस्य [illegible] इत्यर्थः । परिणामिनां देहानां नित्यं [illegible] अवस्थाः ताः एता जन्मप्रलयहेतवः संयोगवियोगविषय[illegible] हेतव इत्यर्थः ॥ ३६ ॥

श्रीमद्विजयध्वजतीर्थकृत[illegible]रत्नावली ।

यदा घनोऽर्कप्रभया तीव्रया सूर्यप्रभया विदीर्यते नष्टो भवति तदा सूर्यो चक्षुः स्वरूपं स्वविषयं रविमीक्षते यथा तदा जीवस्यात्मनः परमात्मनो दर्शने उपाधिनिमित्तभूतो[illegible] जिज्ञासया परमात्मोपासनया तथा नश्यति तर्हि तदा जीवः स्वं परमात्मानमनुस्मरेत् अनुकूलस्मरणसमर्थो भवतीत्यर्थः । हिशब्देन "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः" इतीदं वाक्यमप्राह ॥ ३३ ॥

असम्प्रज्ञातसमाधिरूपप्रलयमाह—यदेति । एवमुक्तविधयोत्पन्नचेतया विवेकहेतिना निशितज्ञानासिना मायामयाहङ्कारमात्मबन्धनं भगवदिच्छानिर्मितं [illegible] छित्त्वा अच्युतात्मा नित्यमुक्तपरमात्मा ऽपरोक्षदर्शनेनासम्प्रज्ञातसमाधि[illegible] निवृत्तलिङ्गशरीराभिमानोऽवतिष्ठते एतमङ्ग ! आत्यन्तिकं [illegible] प्रलयमाहुः असम्प्रज्ञातसमाधिरूपावस्थाया: नामान्तरमेतत् ॥ ३४ ॥

इदानीं देवादिजन्मप्रलयावाह—नित्यदेति । दिने दिने ब्रह्मादीनां सर्वभूतानामुत्पत्तिप्रलयौ स्तः [illegible] सूक्ष्मता [illegible] नेनान्वयः ॥ ३५ ॥

चेतनानां निर्विकारत्वेन जन्माद्यभावात् [illegible] नित्यदा जन्माद्यस्तीति तत्राह—कालेति । [illegible] नदीप्रवाहवेगेन भिन्नं ह्रियमाणस्येव [illegible] ॥ ३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स चाध्यासपरित्यागः स्वतो न भवति किन्तु परमात्मजिज्ञासया तत्प्रभावेणैवेति वक्तुं पूर्ववदेव दृष्टान्तपरिपाटीमाह—घन इति । घनो यदार्कप्रभवो विदीर्यत इति दृष्टान्तांशे तद्विदारणस्य न चक्षुःशक्तिसाध्यत्वं किन्तु सूर्यप्रभावसाध्यत्वमिति व्यक्तम् अनेन दार्ष्टान्तिकेऽपि आत्मनः परमात्मनो जिज्ञासया ज्ञानेन तत्प्रभावेनाहङ्कारो नश्यति न स्वयमिति व्यक्तम् इत्यत्रांशे पुरुषज्ञानसाध्यत्वमहङ्कारनाशस्य खण्डितम् अतो निर्वर्त्तनीयो नाभ्युपगतः अत्र चापाधिरिति विशेषणेन स्वरूपभूतोऽहङ्कारस्तस्य एवेति व्यक्तीभूतम् एवं यथा दृष्टान्तेन घनमयमहान्धकारावरणाभावात्प्रभावेन योग्यताभावाच्चक्षुः कर्तृभूतस्वरूपं कर्मभूतमीक्षते स्वस्वरूपप्रकाशमाविर्भावेन ज्ञानाभिव्यक्तिप्राकट्यं लभत इत्यर्थः । कदाचित् नदीवृत्त्योन्मुखः सन् रविं पश्यते तथा दार्ष्टान्तिकेऽप्यनुस्मरेत् स्मर्तुमनुसन्धातुं योग्यो भवति आत्मानं परमात्मानं चेति ज्ञेयः ॥ ३३ ॥

निगमयति—यदैवेति । एतेन पूर्वोक्तेन विवेकखड्गेन मायामयमिति विशेषणं स्वरूपभूतस्याहङ्कारस्य अवतिष्ठते स्वरूपेणावस्थितो भवति न केवलमेतावदेव अच्युतात्मानुभवः अच्युते अच्युतनाम्नि आत्मनि परमात्मनि अनुभवो यस्य तथाभूत एव सन्नवतिष्ठते ॥ ३४—३६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तदर्थमहङ्कारस्य नाशे सत्यावरणभङ्गो ब्रह्मस्वरूपदर्शनं च भवतीति तेनैव दृष्टान्तेनाह—घन इति । विदीर्यते विनश्यति तदा चक्षुः कर्तृरूपं रविमीक्षते इति मनुष्यादेरेव चक्षुर्न तु उलूकादेश्चक्षुर्दर्शिनीक्षते यथा तथा भक्तिमतामेव ज्ञानिनां न तु भक्तिमकुर्वताम् इति "भक्त्याहमेकया ग्राह्यः" इत्याद्युक्तेः अनुस्मरेत् ब्रह्मानुभवति ॥ ३३ ॥

अहङ्कारविदारणी भक्तिमिश्रं ज्ञानं खलु साधनमित्याह यदेति । विवेकहेतिना ज्ञानास्त्रेण अच्युते भगवति आत्मनो मनसोऽनुभवः सुदृढध्यानं यस्य तथाभूतः सन्नवतिष्ठते यदा एवमहङ्कारं छित्त्वा छिन्नस्य योगिनः अच्युतात्मानुभवः पूर्णब्रह्मानुभवः सन्नवतिष्ठते स्थिरीभवति एतम् आत्यन्तिकं संप्लवं प्रलयम् आहुः ॥ ३४ ॥ ३५ ॥

नित्यप्रलयमाह—नित्यदेति । कुत इत्यत आह ; कालरूपस्रोतसो वेगेन आशु ह्रियमाणस्य एकतत्त्वमार्गे ह्रियमाणानामित्यर्थः परिणामिनां देहादीनाम अवस्था बाल्यपौगण्डाद्या जन्मप्रलयहेतवः जन्मप्रलययोरनुमापकाः देहाद्याः प्रतिक्षणजन्मप्रलयवन्तः । अवस्थाभेदानां दृश्यमानत्वात् प्रदीपादिवदित्यनुमानम् ॥ ३६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्मनः जीवस्य उपाधिः अहङ्कारः जन्ममरणप्रवाहात्मकः जिज्ञासया वेदान्तश्रवणाद्यभ्यासेन नश्यति तर्हि दानुस्मरेत् [illegible] परमात्मानं पश्यतीत्यर्थः ॥ ३३ ॥

अनाद्यन्तवताऽनेन कालेनेश्वरमूर्तिना ।
अवस्था नैव दृश्यन्ते वियति ज्योतिषामिव ॥ ३७ ॥
नित्यनैमित्तिकश्चैव तथा प्राकृतिको लयः ।
आत्यन्तिकश्च कथितः कालस्य गतिरीदृशी ॥ ३८ ॥
एताः कुरुश्रेष्ठ! जगद्विधातुर्नारायणस्याऽखिलसत्त्वधा[illegible]
लीलाकथास्ते कथिताः समासतः कार्त्स्न्येन नाजो[illegible] ॥ ३९ ॥
संसारसिन्धुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगव[illegible]
लीलाकथारसनिषेवणमन्तरेण पुंसो भवेद्विविधदुः[illegible]० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

आत्यन्तिकप्रलयमाह—यदेति । यदा च अहङ्कारनाशानन्तरं एवमुक्तप्रकारेण आत्मपरमात्मयाथार्थ्यविवेकज्ञानेन माया-मयं अहङ्कारमेव आत्मबन्धनं यस्मिन् तत्र तत्र तत् कार्य-कारणप्रकृतिमयदेहं छित्वाऽतिक्रम्य अच्युतानुभवः अवतिष्ठति हे अङ्ग, विष्णुदत्त! तं मोक्षमात्यन्तिकसम्प्लवमाहुः ॥ ३४ ॥

अथ नित्यं प्रलयमाह-नित्यदेति । ब्रह्मादीनां चतुर्मुखशरीरा-दीनाम् नित्यं प्रतिक्षणम् ॥ ३५ ॥

अनुमानेन देहादीनां नित्यं प्रलयं ज्ञापयति, कालेति । परि-णामिनां प्रतिक्षणं जन्मप्रलयवतां नदीप्रवाहदीपज्वालादीनां याः प्रसिद्धाः अवस्थाः ताः कालस्रोतोजवेन ह्रियमाणस्य कालरूपस्रोतोवेगेन चाल्यमानस्य देहादेः प्रतिक्षणं जन्मप्रलययोः साध्ययोर्हेतवः साधका ज्ञेयाः देहादिः सर्वोऽपि प्रपञ्चः प्रति-क्षणमुत्पत्तिसंहारवान् भौतिकत्वात् दीपप्रवाहादिवदनुमा-नम् ॥ ३६ ॥

भाषा टीका ।

जब सूर्य से उत्पन्न होने वाला मेघ विदीर्ण होजाता है, तब चक्षु सूर्य के स्वरूप को देखताहै । इसी प्रकार जब अहङ्कार का परिणाम रूप, और अहन्ता के अभिमानका विषय यह देह रूप उपाधि, ब्रह्मकी जिज्ञासा से नष्ट होजाता है। अथवा विशेषण मात्र अहन्ता का नाश होने से देह का नाश जब होजाता है, तब वह आत्मा उसी देह वा देहान्तर से परमात्मा की उपासना कर परमात्माको देखता है ॥ ३३ ॥

इस प्रकार पूर्व श्लोक में संसार का बन्धन रूप इस देह का निरूपण कर अब उक्त देह रूप उपाधि के विलय को अर्थात् मोक्ष को ही आत्यन्तिक प्रलय कहते हैं, यही श्रीशुकदेवजी निरूपण करते हैं, कि—हे राजन्! जब यह जीव विवेकादि साधन सप्तकसे प्राप्त जो भगवदुपासना रूप खड्ग तिस से देह सम्बन्ध रूप आत्मा के बन्धन का छेदन कर जब अपने अन्तर्यामि के अनुभव में मग्न होकर स्थित रहता है, उ[illegible]योग आत्यन्तिक प्रलय कहते हैं ॥ ३४ [illegible]

अब श्रीशुकदेव[illegible]निरूपण करते हैं, श्रीशुकदेवजी कहते [illegible]हे राजन्! ब्रह्मादि स्थावरान्त सम्पूर्ण प्रा[illegible]नको सततपरिणाम स्वभाव वाले होने [illegible] प्राप्तिरूप उत्-पत्ति और पूर्व पूर्व[illegible] रूप प्रलय, ऐसे नित्य उत्पत्ति प्रलय[illegible], इस प्रकार कोई सूक्ष्मज्ञ लोग कहते[illegible]

काल के प्रवा[illegible]यमान परिणामि-पदार्थों की जीन २[illegible]जन्म और प्रलय के हेतु होती हैं, नदी[illegible] बालु कंकर पत्थर की नीच ऊंच अ[illegible] ॥

श्री[illegible]पिका ।

ननु, यदि [illegible]प्रवृत्ति तर्हि किं न दृश्यन्ते अतो हेतुरसिद्ध [illegible]नाद्यन्तवता कालेन आव-माना अवस्था [illegible]यो गच्छतां ज्योतिषां चन्द्रादीनां गमन[illegible]न दृश्यन्ते तद्वत् अतो यथा तेषां प्रवे[illegible] गत्यवस्थाः कल्प्यन्ते तद्वदत्रापि चाल्यम[illegible]र्तिन्योऽवस्थाः कल्प्यन्त इति हेतुरसिद्ध [illegible]

उपसंहरति-[illegible]

पुराणार्थेषु[illegible] लीलाविषयाः कथा अजो ब्रह्माऽपि कार्त्स[illegible] ॥ ३९ ॥

ननु, यदि [illegible] शक्यन्ते तर्हि किं तद्-भिधानेन तत्रा[illegible]र्थं दुःखमेव इत्यो दावानल-स्तेनार्दितस्य [illegible]र्षोः पुंसो भगवतो याः लीलास्तासां [illegible]निषेवणमन्तरेणान्यः प्लवः तस्यासाधनं न[illegible]भवाम्सत्कल्याभवसमेव यथा-शक्ति निषेवणी[illegible]

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ईश्वरमूर्तिना ईश्वरमूर्त्या पुल्लिङ्गं आर्षः सूक्ष्मावस्थानां दुर्दर्शत्वे दृष्टान्तमाह—ज्योतिषामिवेति । नक्षत्रादीनां प्रतिक्षणं स्पन्दो यथा दुर्दर्शस्तद्वदित्यर्थः ॥ ३७—३८ ॥

भजोऽपि प्रह्वार्थप ॥ ३९—४३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदि प्रतिक्षणमवस्था भवन्ति तर्हि किं न लक्ष्यन्ते दृश्यन्ते—इत्यत्राह ? अनाद्यन्तवतेति—नित्येन ईश्वरमूर्तिना पुंस्त्वमार्षं ईश्वरमूर्तिना [तेन] कालेन या या नित्यमवस्थाः ता नैव दृश्यन्ते दुर्दर्शत्वे दृष्टान्तमाह—वियतीति । यथा वियत्याकाशे चरतां ज्योतिषां सूर्यादीनां प्रति क्षणं देशान्तरप्राप्तिर्न दृश्यते तद्वत् ॥ ३७ ॥

चतुर्विधं प्रलयनिरूपणं निगमयति—नित्यइत्यादि ॥ ३८ ॥

"तस्मात्सर्वात्मना राजन् हरिः सर्वत्र सर्वदा ।
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम्" ।

इति द्वितीये स्कन्धे मुमुक्षोः श्रवणीयत्वेन प्रतिज्ञातभगवत्कथानिरूपणं निगमयति—एता इति । जगद्विधातुः जगत्स्रष्टुरत एव नारायणस्य नराणां अयनस्य प्रापकस्याखिलसत्त्वधाम्नोऽखिलाधारस्य भगवतः एताः लीलाकथाः लीलारूपाणां चेष्टितानां कथाः ते तुभ्यं समासतः संक्षेपतः कथिताः नहि विस्तरतः कथयेत्यत्राह—कार्त्स्न्येनेति । अजो ब्रह्मापि कार्त्स्न्येन विस्तरेणाभिधातुं नेश्वरः न प्रभुः ॥ ३९ ॥

सत्यं कथिताः किमतः इत्यत आह—संसारेति । त्रिविधं दुःखमेव दवो दावानलः तेनार्दितस्य पीडितस्यात एवातिदुस्तरं संसारसागरम् उत्तितीर्षोः [तर्तुमिच्छोः] पुंसो यः भगवतो लीलाकथाः तासां रसस्तन्निषेवणमन्तरेण अन्यः प्लवः उत्तारणोपायः न भवेत् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्रतिदिनं जीवस्योत्पत्तिलक्षणविकारस्वरूपस्याभावस्थाः किं न स्युरिति तत्राह—अनाद्यन्तवतेति । आकाशे ज्योतिषां नक्षत्राणां यथा स्थितेर्भेदो नास्ति तथा चेतनस्यापि भेदः ॥ ३७ ॥

प्रलयमुपसंहरति, नित्य इत्यादिना कालस्य कालान्तर्यामिणो हरेर्गतिः स्थितिरीदृशी चतुर्विधेति ॥ ३८ ॥

परमप्रमेयमुपसंहरति—एता इति । "यद्योगतः स्थितिलोऽक्षरनाथ विष्वक्कोटीं तनुम्" इत्यादेन याः कथाः एताः जगद्विधातुरत्वं चतुर्मुखस्यास्तीति अतोऽखिलसत्त्वधाम्न इति सत्त्वगर्भत्वपुरःसरत्वमित्यतो नारायणस्येति "जलौ जीवजन्तु क्लीबे" इति यादवः । विस्तरतः कथनं किं न स्यादिति तत्राह, कार्त्स्न्येनेति अजो ब्रह्मा ॥ ३९ ॥

कथाकथनप्रयोजनमाह—संसारेति प्लवो नौः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

[illegible] तत्र कथैकपरत्वादिभिर्विद्वद्भिः श्रोतव्यैव मोक्षार्थिभिरप्यवश्यं श्रोतव्येत्याह—संसारेति । अन्यासामपि भक्तीनां तत्पूर्वकत्वेनैव प्रवृत्तेरुपायान्तरासम्भवत्वं युक्तम् ॥ ४०–४१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

यदि प्रतिक्षणम् अवस्था भवन्ति तर्हि किम् न दृश्यन्ते ? अतो हेतुरसिद्ध इत्याशङ्क्याह—अनाद्यन्तवता कालेन प्रतिक्षणम् उत्पत्त्याद्यवस्था नैव लक्ष्यन्ते यथा वियत्याकाशे गच्छताम् ज्योतिषां चन्द्रादीनां गमनावस्थाविशेषा नैव लक्ष्यन्ते तद्वत् अतो यथा तेषां देशान्तरप्राप्त्या प्रतिक्षणं गत्यवस्थाः कल्प्यन्ते तद्वदत्रापि बाल्ययौवनादि दर्शनेन तन्मध्यवर्तिन्यः सूक्ष्मा अप्यवस्थाः कल्प्यन्ते इति न तु हेतुरसिद्ध इत्यर्थः ॥ ३७ ॥

उपसंहरति, नित्य इति ॥ ३८ ॥

भगवत्कथाः उपसंहरति, एता इति ॥ ३९ ॥

एता विविधाः कथाः खलु विविधभक्तानां जीवातव एव मोक्षार्थिनामप्येताः कथाविज्ञानादिभिर्न मोक्ष इत्याह, संसारेति द्वाभ्याम् । त्वया यत् प्रथमत एव पृष्टं म्रियमाणस्य किम् कार्यम् ? तदुत्तरनिष्कर्षोऽयमित्याह, संसारेति । दुःसहाया: क्षुधाया भोजनमन्तरेण नोपशम इति यत् नान्यो ज्ञानादिकप्लवः स्तरणसाधनम् दुःसहायां क्षुधायां भक्ष्यचन्दनादिरिव तेनैतदुत्तरणाय यथाप्युपदिष्टत्वं महारहस्यभक्तिरत्नाच्छादनार्थं यज्ज्ञानं तत् त्वया स्वोपादेयत्वेन न प्रत्येतव्यमिति भावः । रसपदेन लीलाकथानाम् अमृतत्वमारोपितम् अत एव विविधदुःखरूपमहारोगार्त्ता दवा महाज्वालाकलितेषां सद्य एवैकममृतं विना नान्यदौषधं प्रयोक्तव्यमिति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सूक्ष्मत्वाः परिणामे इत्यनेन स्थूलवृद्ध्यो न पश्यन्तीति सूचितं तत्र कारणमाह—अनाद्यन्तवतेति । अनाद्यन्तवता नित्येन ईश्वरमूर्तिनेश्वराधिष्ठितेन तच्छक्तिभूतेन ज्योतिषां सूर्यादीनां वियत्याकाशे गच्छताम् अवस्था प्रतिक्षणं गमनावस्था नैव दृश्यन्ते तथा भूतानां प्रतिक्षणमुत्पत्तिप्रलयौ दुर्ज्ञेयावित्यर्थः ॥ ३७ ॥

चतुर्विधप्रलयनिरूपणमुपसंहरति, नित्य इति ॥ ३८ ॥

सोपाधिं सर्ववेदेतिहासानां सारमुपसंहरति—एता इति । अखिलजगतो विधातुः सृष्ट्यादिकर्तुः नारायणपदनिरुक्ति सूचयति अखिलानां सत्त्वानां नरादिप्रभूतानां धाम्नः आश्रयस्य "मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव" इति श्रीमुखवचनात् ॥ ३९ ॥

अस्य महापुराणस्य मुक्तिप्रदहरिचेष्टितप्रतिपादकत्वेन श्रेष्ठत्वमाह—संसारसिन्धुमिति ॥ ४० ॥

भाषा टीका ।

अनाद्यन्त वाला अर्थात् जिसका आदि न अन्त ऐसे, ईश्वर की मूर्ति रूप, इस काल के वेग से परिणामी पदार्थों

पुराणसंहितामेतामृषिर्नारायणोऽव्ययः ।
नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ॥ ४१ ॥
सवै मह्यं महाराज! भगवान्बादरायणः ।
इमां भागवतीं प्रीतः संहितां वेदसम्मिताम् ॥ ४२ ॥
एतां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिषाल[illegible]
दीर्घसत्रे कुरुश्रेष्ठ! सम्पृष्टः शौनकादिभिः [illegible]

इति श्रीमद्भागवते महापुराणे पारमहंस[illegible]
संहितायां वैयासिक्यां द्वादशस्कन्धे
चतुर्थोऽध्यायः ॥ ४ ॥

की अवस्था देखने में नहीं आती है। जैसे, कि—आकाश में चन्द्रादि ज्योतिष्मत्पदार्थों का परिस्पन्द अर्थात् किञ्चित् २ चलना नहीं मालूम होता है, परन्तु जब दूर का अन्तर होता है तब गमन का अनुमान होजाता है, कि—यदि सूक्ष्म क्रम से गमन न होता तो यह दूरका अन्तर कैसे होता, इसी प्रकार प्राणियों के देहादिकों का उपचय (वृद्धि) भी क्षण क्षण का नहीं मालूम पड़ता है, अधिक बढ़ने पर क्षण २ की वृद्धि का अनुमान होजाता है ॥ ३७ ॥

हे राजन्! यह नित्य, नैमित्तिक, प्राकृतिक और आत्यन्तिक चार प्रकार का प्रलय हमने कहा, और कालकी गति ऐसी सूक्ष्म है सो भी कही ॥ ३८ ॥

हे कुरुश्रेष्ठ! राजन्! ये सब जगत् के विधाता अखिल सत्त्व धाम श्रीनारायण की लीला कथा हमने तुमसे संक्षेप वर्णन की है, और पूर्ण रीति से कहने को तो ब्रह्माभी समर्थ नहीं हैं ॥ ३९ ॥

विविधदुःख रूप दवाग्नि से आर्त्त और अति दुस्तर संसार समुद्र को तरने वाले पुरुष को भगवान् श्रीपुरुषोत्तम की लीला कथा के रस का निरन्तर सेवन के बिना और कोई प्लव अर्थात् तरने का साधन नहीं होसका है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

श्रोतुराहरदाख्यायि सम्प्रदायप्रवृत्तिमाह—पुराणसंहितामिति त्रिभिः ॥ ४१ ॥

स वै बादरायणः प्रीतः सन्मह्यमिमां संहितां प्राहेति पूर्वेणान्वयः ॥ ४२ ॥

असौ सूत इति पुरतः स्थितमङ्गुल्या निर्दिश्याऽऽह—नैमिषालये नैमिषारण्यस्थाने ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
चतुर्थोऽध्यायः ॥ ४ ॥

श्री[illegible]पद्यीयम् ।
[illegible]वधाने
[illegible]न्धे
[illegible] ॥

श्रीमद्वीर[illegible]चन्द्रचन्द्रिका ।

श्रोतुरावरदाक[illegible]—त्रिभिः । पुराणसंहितामिति । एतां मा[illegible]रायणो ऽनिरुद्धरूपी नारदाय प्राह चतुर्मु[illegible]पुण प्राहेत्यर्थः । ब्रह्मा ऋषिश्चतुर्मुखशरीरक[illegible]नोपदिष्टां 'चतुःश्लोकीं बदर्याश्रमवासी [illegible] अन्यथा द्वितीयस्कन्धान्तसन्दर्भविरोधात्[illegible]य ॥ ४१ ॥

स कृष्णद्वै[illegible]व्यासः इमामष्टादशसहस्रग्रन्थसङ्ख्यां [illegible]म्मितां वेदतुल्यां मह्यं प्राह ॥ ४२ ॥

अथ भावि[illegible]ति । असौ सूत इति पुरतः स्थितस्याङ्गुल्या[illegible]मिषारण्यक्षेत्रे ॥ ४३ ॥

इति[illegible]णे द्वादशस्कन्धे
श्रीमद्वी[illegible]तचन्द्रचन्द्रिकायाम्
[illegible] ॥ ४ ॥

[illegible]पदरत्नावली ।

कथारस[illegible]मेव मुख्यसाधनमित्यभिप्रेत्य तस्यातिमुख[illegible]ति, पुराणेति ॥ ४० ॥

संहितायाम्[illegible] वेदसम्मितामिति ॥ ४२॥४१ ॥

इ[illegible]पुराणे द्वादशस्कन्धे
[illegible]पदरत्नावल्याम्
[illegible]: ॥ ४ ॥

(* वि[illegible]नसगा[illegible]

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
चतुर्थोऽध्यायः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

श्रीशुकस्वप्रभावं शुकमविच्छिन्नमनुसृत्यैवैतत् पठनपाठनश्रवणश्रावणादिकं कार्यमित्यभिप्रायेणाह—पुराणेति । ऋषिर्नारायणो भगवते—इत्यध्याहार्यं स च मह्यं अन्वयः अपराधाभावाङ्गिकव्यवहितो नारदाय पुराणसंहितामेतामिति इमां भागवतीमिति वाक्यभेदान्न पौनरुक्त्यम् ॥ ४१—४२ ॥

असौ सूत इति पुरोऽवस्थितमङ्गुल्या निर्दिशति ॥ ४३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वादशस्य चतुर्थोऽपि सङ्गतः सङ्गतः सताम् ॥ ४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवत्प्रोक्तत्वेन परमं श्रैष्ठ्यमाह—पुराणसंहितामिति ॥ ४१ ॥

वेदसम्मितां वेदतुल्यां स द्वैपायनः मह्यमाह ॥ ४२ ॥

अनयैव सूतशौनकादिद्वारा प्रवृत्तया अतः पवित्रीभविष्यतीत्याशयेनाह—एतामिति । असौ पुरतो विराजमानः ॥ ४३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे ।
चतुर्थोऽध्यायः ॥ ४ ॥

भाषा टीका ।

हे राजन्! इस श्रीभागवत पुराण की संहिता को पहिले श्रीनारायण आद्य ऋषि नारद जी को कहते हुए, और वे श्रीनारद जी हमारे पिता श्रीकृष्णद्वैपायन महर्षि को कहते हुए ॥ ४१ ॥

हे राजन्! भगवान् श्रीबादरायण इस वेद सम्मित संहिता को प्रसन्न होकर मेरेलिये पढ़ाते हुए ॥ ४२ ॥

हे कुरुश्रेष्ठ! अब इस आगे संहिता को नैमिषारण्य में शौनकादिक के पूछने पर यह सूत दीर्घसत्र में ऋषियों को इसी भागवत को वर्णन करेगा ॥ ४३ ॥

इति श्रीमद्भागवत द्वादशस्कन्ध में चतुर्थो अध्यायकी,
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्त ॥ ४ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे चतुर्थोऽध्यायः ॥ ४ ॥



पञ्चमोऽध्यायः ।

श्रीशुक उवाच ।

अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान् हरि[illegible]
यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः ॥ [illegible]
त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि [illegible]
न जातः प्रागभूतोऽद्य देहवत्त्वं न नङ्क्ष्यसि [illegible]
न भविष्यसि भूत्वा त्वं पुत्रपौत्रादिरूपवान् [illegible]
बीजाङ्कुरवद्देहादेर्व्यतिरिक्तो यथाऽनलः ॥ [illegible]
स्वप्ने यथा शिरश्छेदं पञ्चत्वाद्यात्मनः स्वय[illegible]
यस्मात्पश्यति देहस्य तत आत्मा ह्यजोऽ[illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

"पञ्चमे तु समासेन परब्रह्मोपदेशतः ।
राज्ञस्तक्षकसन्दंशान्मृत्युभीतिनिवारणम्" ॥

एतत्पुराणं शृण्वतामभयं प्राप्नोतीत्यभिप्रेत्य पुराणार्थमनुस्मारयति–अत्रेति । अयं भावः जगतः कर्त्ता ब्रह्माऽपि यस्य प्रसादजः प्रसादोऽत्र रजोवृत्तिर्हर्षः ततो जातत्वात्परतन्त्रः सर्वसंहर्त्ता रुद्रश्च यस्य क्रोधसम्भवो स न तु स्वतन्त्रः स विश्वस्याऽऽत्मा नियन्ता भगवानत्रानुवर्ण्यते अत एवंभूतं भगवन्तं शृण्वतः कुतोऽन्यस्माद्भयशङ्केति ॥ १ ॥

त्वं पुनः कृतार्थ एवेत्यनुस्मारयति त्वमित्यादि । पशुबुद्धिमविवेकम् यस्मात्त्वं नङ्क्ष्यसि कुत ? इत्यत आह—न जात इति । यथा देहः प्रागभूत पश्चाच्च जातो नङ्क्ष्यति न चैवं त्वं पूर्वं नाभूर्न चाद्य जातोऽस्यतो न नङ्क्ष्यसि ॥ २ ॥

ननु, बीजादङ्कुरवत्त्वस्मात्पुत्ररूपेणापि त्वमेव भवति यथाऽऽह श्रुतिः "अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्रनामाऽसि सञ्जीव शरदः शतम्" इति ततः पुनरङ्कुराद्बीजमिव पौत्रादिरूपेणापि त्वमेव भवति "पिता पुत्रेण पितृमान्योनियोनौ" इति श्रुतेः । अतस्तेषु नष्टेषु कथं न नङ्क्ष्यामीति चेत्तत्राऽऽह, न भविष्यसीति । भूत्वा पुत्रपौत्रादिरूपवान्बीजाङ्कुरवन्न भविष्यसि यस्माद्देहादेर्व्यतिरिक्तस्त्वं यथाऽनलः काष्ठात् देहाद्देहो जायते नाऽऽत्मेति भावः ॥ ३ ॥

जन्मादीनां देहधर्मत्वं दृष्टान्तेन प्रपञ्चयति, स्वप्ने यथाऽऽत्मनः शिरश्छेदं स्वयं पश्यति एवं जागरणेऽपि यथा यस्माद्देहस्य पञ्चत्वादिकं पश्यति ततस्तद्द्रष्टाऽऽत्मन इदं भ्रममात्रम् वस्तुतस्त्वाऽऽत्माऽजोऽमरश्चेत्यर्थः तदुक्तम्—

"आत्मनः [illegible] [illegible]त्मादव्ययो
न भवाद्व्यय[illegible] [illegible]ः" ॥
इत्यादि ॥ ४ ॥

श्री[illegible] [illegible]पम् ।

॥ १—२ ॥

भूत्वा पुत्रपौत्रा[illegible] [illegible]विष्यसि न पुनर्जनन बीजाङ्कुरन्यायेन [illegible] [illegible] भविष्यसीत्यर्थः यथाऽनलः काष्ठादिति [illegible]

स्वप्ने देहादन्य[illegible] [illegible] ॥ ४ ॥

श्रीमद्वीर[illegible] [illegible]चन्द्रचन्द्रिका ।

एवं भागवत[illegible] [illegible]य समस्तार्थं प्राधान्येन प्रतिपाद्यं निष्कृष्य [illegible] [illegible]विमर्शनपूर्वकं स्वशरीरक परब्रह्मानुसन्धान[illegible] [illegible]तुःखो मुक्तोऽभविष्यसीत्याह पञ्चमेन । [illegible] [illegible]ां संहितायां हरिरभिन्नबन्धहरो भगव[illegible] [illegible]त इत्यत्र,तत्रैव "कार्यं तु ध्येयः" इत्यु[illegible] [illegible]मापन्नत्वमुपेक्षितस्वमाह—यस्येति । यस्य[illegible] [illegible]ः ॥ १ ॥

निष्कृष्य [illegible] [illegible]म्भिप्रति । अनात्मगमरणानां तु स[illegible] [illegible] इति न श्रुत्याभिप्रायः हे राजन् ! म[illegible] [illegible]बुद्धिमो [illegible] जहि [illegible] प्रत्यगेवात्मत[illegible] [illegible]दितिभा[illegible]

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

न त्वं देहवत्प्रागभूतोऽविद्यमानः सन् न जातः नोत्पन्नः नापि नङ्क्ष्यसि न मरिष्यसीत्यर्थः ॥ २ ॥

भूत्वा उत्पद्य पुनर्बीजाङ्कुरवत्पुत्रपौत्रादिरूपवान् भविष्यसि तत्र हेतुत्वेन विशिनष्टि-देहाद्व्यतिरिक्त इति। तत्र दृष्टान्तः यथाऽनल इति काष्ठादिविशेषः। यथा काष्ठादग्निर्व्यतिरिक्तस्तथेत्यर्थः ॥ ३ ॥

स्वप्नदेहादिवज्जाग्रद्देहादावप्यात्मविलक्षणः इत्याह-स्वप्न इति। स्वप्ने यथा आत्मनः शिरश्छेदं [illegible] पश्यत्येवं जागरेऽपि तत्र यथा—द्रष्टा [illegible]देहाद्विलक्षणः एवं जागरेपीति भावः। यस्मात्तु देहस्य [illegible] मरणादिकं पश्यति ततः आत्मा देहाद्विलक्षणः (देहाद्रष्टा [illegible]) अतो न जायत इति तथा ऽमरः मरणरहित श्च ॥ ४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सम्यक् विषयमाह-अत्रेति। [illegible] इतरेभ्यः श्रेष्ठ्यं येना[illegible]रेण प्राप्ता स्यादित्यतो वाऽऽह—[illegible]। विष्णुवशित्वेन प्रज्ञा[illegible]स्वतन्त्रः किं न स्यादित्यत आह-[illegible]। अनेन "आत्मा वै पुत्रनामासीत्" इति वाक्यप्राप्ता तदात्म[illegible]पि दूरीकृतेति ॥ १ ॥

ननु,जातो मृतोऽहमिति पुत्र[illegible]वाचः कथं चेतनस्य परिणामाद्यवस्थाभाव इत्याशङ्कय [illegible]लोकन्यायेन तस्याविकारित्वमाह-त्वञ्चेति। मरिष्य[illegible] [illegible]भावेन घटादिनाशवैलक्षण्यं देहवियोगस्य दर्शयति [illegible] सुखमेव दर्शयति-नेति। "न जायते म्रियते वा कदाचित्" [illegible] देहवदिवानन्त्यलक्षमभिसम्बध्यते नेति च स्वदेहवत् [illegible] तर्हि प्रागसत्त्वेऽप्याह, प्रागिति। देहवत्प्रागभूतोऽनुत्पन्न सन् [illegible] पञ्च परिणामसि ॥ २ ॥

देहान्तरेणच भविष्यसि पुत्रपौत्र[illegible] भूत्वा त्वं देह एव स्वरूपसि कथमिव पुत्रादि[illegible]मिति तत्राह-बीजेति। बीजाङ्कुरपरम्परा यथा तथा [illegible]मात्र इति तत्राह, देहादेरिति। हेतुगर्भं विशेषणम् [illegible] निदर्शनं यथाऽनल इति दार्वादेरिति शेषः। पुत्रादिरूपत्वे [illegible] प्राप्त इत्यतो वाऽऽह, यथा बीजपरम्परया भेदः प्रभिन्नः तथा [illegible]ति शेषः प्राग्वत् ॥ ३ ॥

ननु, जातो मृत इत्येवमवलीक[illegible]कः कथमनलदृष्टान्तः परमात्मनि सङ्गत इति तत्राह-स्वप्न इति आत्मनो जीवस्य स्वप्ने शिरश्छेदः, यथा मिथ्या [illegible] इदं स्वानुभवसिद्धमित्याह, यस्मादिति। त्वं [illegible] पश्यसीति यस्मात्तत आत्मा अजो न जातो [illegible] मृतश्चेति तस्माद्देहस्यैव जन्मादयो न चेतनस्ये[illegible] ॥ ४ ॥

श्रीमज्जीवगोस्वामि[illegible]

अत्रानुवर्ण[illegible] [illegible]मद्भक्तिकृद्रिष्यन्तीति [illegible] [illegible]कालेषु मुख्यो यथा तथा [illegible] [illegible]हेतुं भावं प्रतिज्ञानुसरण [illegible] [illegible] इत्यर्थः ॥ १ ॥

प्रथमस्कन्धान्ते तत्र म्रियमाणस्य कृत्यम् यत् पृष्टम् तत्तु इत्यादेन तथा युक्तमित्याभिप्रेत्य प्रस्तावेऽत्र, त्वन्त्विति। पशुबुद्धिमिति यतः पश्योरेव सा बुद्धिर्युक्ता न तु तवेति भावः। न जात इत्यन्तर्भूतानन्तरमेनवरूपार्थं देहत्वादिति भावः व्यतिरेके दृष्टान्तः देहवत् दृश्यमानदेह एव ॥ २ ॥

दृश्यमाने चाग्निमपेक्ष्याभावाच्च भविष्यतीति ॥ ३ ॥

साधारण्यानामपि तद्वाक्यो ऽभूत एवेत्याह, स्वप्न इति पञ्चभिः ॥ ४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

एतच्छास्त्रार्थतात्पर्यंच्छाद्धमायात्र पञ्चमे।
ब्रह्मज्ञानोपदेशः श्रीमुनीन्द्रेण नृपे कृतः ॥

शास्त्रार्थमुपसंहृत्य श्रीमन्मुनीन्द्रः किञ्चिदात्मनैव परामृश्य अहो मयात्यनुष्ठितं जन्महारहस्यरत्नमसमानाधिकं सहृदयसम्पुटादुद्घटय्य सर्वलोकदृष्टिगोचरीकृतं यः खलु मत्प्रभुणा "राजविद्याराजगुह्यम्" इत्यनेन विद्यानां राजेति गुह्यानां राजेत्युक्तः पुनश्च "सर्वगुह्यतमं भूयः शृणु मे" इत्यनेन सर्वगुह्यशब्देनोक्तः स खलु भक्तियोगोऽत्र शास्त्रे मया परीक्षितकृपापरवशतया प्रायः प्रकटीकृत्यैवोक्तः तथाहि—

"अकामः सर्वकामो वा मोक्षकाम उदारधीः।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम्" ॥

इत्यादिना "मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह" इत्यत्र "य एषां साक्षादात्मप्रभवमीश्वरम्। न भजन्त्यवजानन्ति स्थानाद्भ्रष्टाः पतन्त्यधः" इत्यादिना चान्वयव्यतिरेकाभ्यां भक्तिरेव सर्वफलसाधनत्वेन प्रतिपादिता स्वर्गादिसाधनानि कर्मादीनि दूरे तावदासतां मोक्षसाधनत्वेनातिप्रसिद्धस्यापि ज्ञानस्य मोक्षकारणत्वं परास्तीकृतमेव "नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम्" इति चतुर्थाश्रमिणो ज्ञानिनोऽपि "स्थानाद्भ्रष्टाः पतन्त्यधः" इति "आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रयः" इत्याद्युक्तेर्ज्ञानान्वयेऽपि भक्त्या विना मोक्षासिद्धेः—

"यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत्।
सर्वं मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा" ॥ इति

ज्ञानव्यतिरेकेऽपि भक्त्यैव मोक्षसिद्धेरुक्तत्वात् मोक्षं प्रतिज्ञानं नैवान्वयव्यतिरेकीति तदपि ज्ञानान्मोक्ष इति वा प्रसिद्धिस्तत्र ज्ञानगता गुणीभूता भक्तिरेव मोक्षं जनयेत् ज्ञानस्य तु नाममात्रेणैव कारणता "भक्त्याहमेकया ग्राह्यः" इति "न तपो नात्ममीमांसा" इति—

"किं वा योगेन साङ्ख्येन न्यासस्वाध्याययोरपि।
किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः" ॥

इत्यादिवाक्यैर्ज्ञानुभवं प्रतिज्ञानस्य सहकारितापि वस्तुतो न प्रतिपादितेति भक्तेरेव साधनत्वमुपक्रमोपसंहाराभ्यामेतु प्रपञ्चितं तदपि यदन्तराज्ञानयोगादिकमप्युपन्यस्तं तत् खलु भक्तेरुत्कर्षं तत्तन्मतानि च भक्तानुज्ञापयितुमेवेति किञ्च "य सामेवमनयानुकर्णितमायमङ्गात यस्मरद्यादपि कश्चित्" इति

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

"अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्तते नाम तुभ्यम्" इति यन्नाम सकृत् श्रवणात् पुक्कसोऽपि विमुच्यते संसारादित्यादिरूपः किञ्चिन्मात्रापि भक्त्या मोक्ष इति तथा "तापत्रयेणाभिहतस्य घोरे सन्तप्यमानस्य भवाध्वनीह" पश्यामि नान्यच्छरणं तवाङ्घ्रिद्वन्द्वातपत्रादमृताभिवर्षात्" इत्यादि नान्येनोपायेन संसारादपि मोक्ष इत्यपि निर्द्धारितम् । किञ्च,"भक्त्या तयैव परया निवृत्त्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितो यन्नाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्थाः" इति "मयि सञ्जायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते" इति " न पारमेष्ठ्यं न च सार्वभौमम् ... किञ्चिदपवर्गमपि" इति "सा ब्रह्मणि स्वमहिम्न्यपि नाथ माऽभूत्" इति "स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः" इत्यादिवाक्यैश्चतुर्थ-पुरुषार्थमपि तिरस्कृत्य भक्तेरेव पुरुषार्थशिरोमणित्वं च मया ख्यापितं किञ्च, मुक्त्यन्तरायकस्य प्रामाण्यमापेक्षिकमेव महाकपटस्य तु प्रामाण्यमात्यन्तिकमेवेति सर्वत्र वैकुण्ठेऽपि प्रसिद्धिर्भूयसी "परोक्षवादा ऋषयः परोक्षं मम च प्रियम्" इतिभगवदुक्तेर्महारहस्योद्घाटनपटिष्ठा भूत्वा भगवद्विग्रहरूपोऽयमहमभूवं तद्भूमा किं करिष्ये पुराणार्थश्च समाप्तीकृत एव स्वधुनापि भक्तेर्महामहिमानं संवरितुं यतिष्ये यथा कश्चिन्महारत्नमतिगोप्यं रभसत्वेन मञ्जूषाकात् बहिर्दर्शयित्वापि पुनः किञ्चित्परामृश्य तदच्छिन्नं सम्पुटगतं कृत्वा महाकोषाभ्यन्तरे संस्थाप्य स्वमात्सरं बहिः प्रकाशयामैनेवास्माकं सर्वार्थसिद्धिरिति ब्रूते तथैवाधुना राजानमहं ज्ञानमुपदेक्ष्यामि यथा गमनसमये तु शुकः परीक्षिते ज्ञानमेवोपदिष्टवानिमिति भगवन्मायाप्रभावाज्ज्ञानमेवोत्कृष्टं भक्तिस्तु नश्वरैश्वर्यमेवेति मंस्यन्ते किञ्च भक्तिम्मितात् जनान् प्रतिपादुर्भूय भगवांस्तान् परीक्षमाणो मोक्षं गृह्णातीति यथा ब्रूते तथैवानेन ज्ञानोपदेशेनास्य भक्तिरूपस्य परीक्षितो भक्तिमूलत्वमुत्पत्तिं च परीक्षिष्ये परीक्षा च सर्वज्ञेनापि जगत्यस्मिन् परीक्षितत्वभक्तिनिष्ठाख्यापनार्था ज्ञेया किञ्च भक्तिज्ञानयोः फलमन्ततो मुक्तिरेव केवलमित्यमभिज्ञस्याववादं नैव मदभिप्रायस्तस्य तु स्वयं यतो—

"राजन् ! पतिर्गुरुरलं भवतां यदूनां
दैवं प्रियः कुलपतिः क्व च किङ्करो वः ॥
अस्त्वेवमङ्ग ! भगवान् भजतां मुकुन्दो—
मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्" ॥

इत्युक्तवता मया मुक्तेः सकाशादपि भक्तेरुत्कृष्टफलत्वस्य प्रतिपादितत्वात् न चोपदेष्टव्येनानेन ज्ञानेन परीक्षितो निर्वाण-मुक्तिप्राप्तिरेवेत्याशङ्कनीयम्—

"स वै महाभागवतः परीक्षित्—
येनापवर्गाख्यमदभ्रबुद्धिः ॥
ज्ञानेन वैयासकिशब्दितेन—
भेजे खगेन्द्रध्वजपादमूलम्" ॥

इति मदभिप्रायाभिज्ञेनानेन मच्छिष्येण सूतेनाग्रे वक्ष्यमाणत्वात् मयापि "राजन्! पतिर्गुरुरलम्" इत्यत्र भवद्भ्यस्तु स्वभक्तियोगं ददातीति परीक्षितः तेनभक्तिप्राप्तिरभिव्यञ्जितैव न चोपदिश्यमानेनानेन, देहादिव्यतिरिक्तात्मज्ञानेन ब्रह्मानुभवः सिध्येत् किं तस्यापि ज्ञानस्य भक्त्या निर्जयेनैव यदुक्तं भगवता "द्रव्यं दिशः फलं कालो ज्ञानं कर्म च कारकः ।
श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव च ॥
सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः ।
दृष्टं श्रुतमनुध्यातं बुद्धया वा पुरुषर्षभ ॥
एताः संसृतयः पुंसो गुणकर्मनिबन्धनाः ।
येनेमे निर्जिताः सौम्य ! गुणा जीवेन चित्तजाः ॥
भक्तियोगेन म[illegible]ते" ॥ इति ।

किञ्च, भगवद्[illegible] नास्ति ज्ञानेन प्रयोजनं यदुक्तं स्वयं भग[illegible]—

"ज्ञाने कर्म[illegible]वधारणे ।
यावानर्थो [illegible] चतुर्विधः" ॥ इति

तस्मादहं तेन स[illegible] ज्ञानस्य स्पष्टतयैव मोहनीसाधन[illegible] इसुराः प्रेमसुधया वञ्चिता एव म[illegible]ज्ञानोपदेशात् प्रागेकं वाक्यं पुनरुञ्जनया[illegible]यितुं भक्तिरसव्यञ्जनमेव करिष्ये, तद[illegible]न्यापि यानि भक्तिप्रतिकूलानि वस्ये[illegible]कूलार्थान्येव करिष्ये इत्यादिविचार्येह—[illegible]कृते अर्थिमन् पुराणशास्त्र इत्यर्थः । य[illegible]णि प्रसादस्य सत्त्वगुणत्वात् ब्रह्मया[illegible]तस मद्भक्तने तथा रुद्रकोपसमुद्भव [illegible]त्वात् 'स्वरूपेण तामसः कोपोऽपि न सम[illegible] स्यात्तस्माद्यावर्मत-मतिशयोक्त्या य[illegible]नवैवं निर्गुणस्य भगवतः स्वभक्तसं[illegible]स्वभक्तद्रोहिण्यपि कोपश्च हृदन्तो च भक्त[illegible]सत्त्वस्वरूपावेवेत्यत एवं व्याख्येयं यस्य प्र[illegible]त्यो मान्यविशेषा ब्रह्मांशकमहत्ताख्य[illegible]र्थमेव भक्तैर्यत्कृतार्थं तथैवांशसाध्यसाधन[illegible] एवेत्युक्तस्तदनुरूप 'एव व्रतमित्यमित्यत [illegible]मिति भावः । ननु, यदि श्रीशुकदेवेन श्री[illegible] समाप्तीकृतं कथं तर्हि प्रथमस्कन्धस्यापि [illegible]गवतत्वम् उच्यते ? सत्यं यथा प्रागुत्तरक[illegible]मेव नाटकशास्त्रस्य यथा प्राक् पश्चाद्गत[illegible]रपि नाटकत्वमेव तथैव प्रथमद्वादशाकयो[illegible]था च—

"गीता [illegible]न्यैः शास्त्रविस्तरैः ।
या [illegible]ाद्विनिःसृता" ॥

इत्यष्टादशाध्याया[illegible]त्प्रोक्तत्वाभावेऽपि भगवत्प्रोक्तत्वमुच्यते त[illegible]व श्रीभागवतस्य सर्वस्य शुकप्रोक्तत्वम[illegible] समाधिः ॥ १ ॥

अथ ज्ञान[illegible] तु भिक्षोपक्रमे मरिष्येतीत्यर्थं मरीष्य[illegible]मि जहि विवेकेन नाशयेति—

"तं [illegible]प्रा—
[illegible]त्समीक्षे ।
द्विजो[illegible] द्रा—
दं[illegible]न्याः" ॥ इति ।

श्रीभागवतभव[illegible]तिज्ञातस्तस्य प्रसक्तिरेव न[illegible]ज्ञानोपदे[illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मरिष्येव किन्तु ये पशुबुद्धयोऽन्ये तानेव प्रति तदपि राजन्निति सम्बोधनं तु तमेव लक्ष्यीकृत्यान्यविषयकस्याप्युपदेशस्य वक्तुमोदिष्टांशस्यैव तच्छिक्षणपरत्वात् यथा सर्वविषयकोऽप्युपदेशो गीतायामर्जुनं लक्ष्यीकृत्यैवोक्तं विवेकमेवाह, नं जात इति । यथा देहः प्रागभूतः एव इदानीं जातोऽथ नङ्क्ष्यति न तथा त्वं जातः नापि प्रागभूतः नाप्यनङ्क्ष्यसि त्वं जीवात्मा अहाद्युपाधेः पृथगेवासीति नायं भक्तिप्रतिकूलोऽर्थः ॥ २ ॥

यथा देहो भूत्वा पुनर्भवति न तथा त्वमात्मा इत्याह—नेति । पुत्रपौत्रादिरूपवानिति यथाह श्रुतिः—

"अङ्गादङ्गात् सम्भवसि हृदयादभिजायसे ।
आत्मा वै पुत्रनामासि सञ्जीव शरदः शतम्" ॥ इति

बीजाङ्कुरवत्स्वयमेव पुत्रो भवति ततः पुनरङ्कुरात् बीजमिव पौत्रोऽपि स्वयमेव [illegible]वति तथात्वं न भविष्यसि यस्मा-देहादेरुपाधेर्जडात्त्वमात्मा व्यतिरिक्तः यथा अनलः काष्ठात् देहादेहो जायते नात्मेति भावः ॥ [illegible] ॥

जन्ममरणाद्यवस्थावतो देह[illegible]ः पार्थक्यं दृष्टान्तेन स्पष्टयति, स्वप्ने इति । नहि स्वप्न[illegible] स्वं पश्येत् अत आत्मा ततः पृथगेव न दृष्टा तथैव जागर[illegible] तस्मात्पृथग्भूत एव आत्मनो देहस्य प्रध्वंसादिपश्यति ततो [illegible]ऽयमात्मा अजो जन्मरहितः अमरो मृत्युरहितश्च ॥ ४ ॥

श्रीमच्छुकदेवकृतसि[illegible]द्धान्तप्रदीपः ।

अत्रेदं बोध्यं निष्कामकर्मयोगेन शुद्धान्तःकरणः भगवद्विषयकं ज्ञानं ततो भगवद्भक्तिं तदनन्तरमेव [illegible]समश्नुते इतिश्रुते अरमकलेवरे एव भगवन्तं ध्याने प्राप्नोति चरमकलेवरत्यागानन्तरं च भगवद्रूपेण भगवद्[illegible] मोक्षं प्राप्नोति मुमुक्षुः इति श्रीमुखेनैवोक्तम्—

"योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्" ॥

इति "भक्तियोगेन भक्तिष्ठो मद्भावायोपपद्यते" तत्र देहत्यागानन्तरं गत्वा भगवद्भावापत्तिः षष्ठेऽध्याये [illegible] स्फुटीभविष्यति इदतूक्तसाधनबलेन निर्भयः सन् अस्मिन्नेव [illegible] एव श्रीकृष्णं परमात्मानं प्राप्नुहीत्याह राजन् [illegible] भगवान् शुकः—अत्रेति अत्रास्मिन् महापुराणे हरिः [illegible] शङ्करः यथार्थे भगवान् स्वाभाविकषडैश्वर्यसम्पन्नः [illegible]स्य प्रसादजः ब्रह्मा रुद्रश्च क्रोधसमुद्भवः सर्वेश्वरः [illegible]तिशयशून्य इत्यर्थः विश्वात्मा चेतनाचेतनात्मयोरन्तरं [illegible]ः समुदायभूतस्य आत्मा कारणं यद्विज्ञानेन [illegible]स्वरूपादिकं विज्ञातं भवति सः भगवान् श्रीकृष्णः अभीक्ष्णं पुनः पुनः नवभिर्लक्षणैः सहितः अनुवर्णितः [illegible] ॥

तदेवाद्यामृतरूपं परमात्मानं [illegible] विविधलक्षणभक्तिबलेन तमेव परमात्मानं ध्यानेन [illegible] तथाभूतं त्वां सर्पस्य तु का कथा मृत्युरपि [illegible]—त्वामित्याति सार्द्धैर्द्वाभिः । [illegible] प्रासविप[illegible] देवस्वरूपं [illegible] [illegible]ः [illegible]रूपो मुक्त

प्रबुद्धस्मरणान्धावेन विवेके जातेऽपि संस्कारवशात्स्फुरितां मरिष्ये इति पशुबुद्धिमवमति जहि त्यज सन्निधिरार्थः । आत्मानात्मविवेकं पूर्वं नानाव्याख्यापूर्वमनुस्मारयति प्रागभूत्वा अविद्यमानः न जातः नापि देहवत् नङ्क्ष्यसि मरिष्यसि ॥ २ ॥

किञ्च भूत्वा उत्पद्य बीजाङ्कुरवत् पुत्रपौत्रादिरूपवान् [illegible] न भविष्यसि यतः यथा दारुस्वप्रकाशकः अग्निर्दारुव्यतिरिक्तः तथा देहेन्द्रियमनोबुद्धिप्राणादिरूपस्तेषां प्रकाशकस्त्वं व्यतिरिक्तोऽसि अयमर्थः आत्मा ऽविकारी पुत्रादिरूपेण न विक्रियते किन्त्वात्माधिष्ठितो देह एव विक्रियते " अङ्गादङ्गात्सम्भवसि हृदयादभिजायसे । आत्मा वै पुत्रनामासि सञ्जीव शरदः शतम् " इतिश्रुतेः ॥ ३ ॥

देहादेर्व्यतिरिक्तत्वमेवाह—स्वप्ने इति । स्वप्ने यथा आत्मनः स्वप्नदेहात्पृथग्भूत एव शिरश्छेदं स्वं पश्यति एवं जागरेऽपि देहात्पृथग्भूत एव आत्मनो यो देहस्तस्य पञ्चत्वादि पश्यति ततो हेतोरात्मा अजः जन्मशून्य अमरः मृत्युवर्जितश्च ॥ ४ ॥

भाषा टीका ।

श्रीशुकउवाच ।

श्री शुकदेवजी बोले, कि—इस भागवत संहिता में निरन्तर विश्वात्मा भगवान् श्री हरि का वर्णन किया है जिन परमात्मा के हर्ष से श्रीब्रह्मा जी उत्पन्न हुए, और जिन के क्रोधसे सर्व संहार करने वाले श्रीरुद्रदेव उत्पन्न हुए हैं ॥ १ ॥

हे राजन् ! तुम तो अब " मैं मरूंगा " इस पशु बुद्धि को छोड़ दो । जैसे यह देह पहिले कभी न हुआ रहा, और अब उत्पन्न भया है, और नष्ट होजायगा, इसी तरह तू अर्थात् तेरा आत्मा न कभी पहिले उत्पन्न हुआ न अब उत्पन्न हुआ है, और न अब कभी नष्ट होवेगा ॥ २ ॥

हे राजन् ! तुम पुत्र पौत्रादि रूप वाले होकर बीजांकुर की तरह जैसे बीज से अंकुर होता है ऐसे नहीं उत्पन्न होओगे, तुमतो देहादिक से व्यतिरिक्त हो, जैसे—काष्ठ से अग्नि पृथक् है कुछ उत्पन्नही होता है इसी प्रकार देहसे देहही उत्पन्न होता है आत्मा नहीं ॥ ३ ॥

आत्मा तो देहसे भिन्नही है जैसे प्राणी स्वप्न समय में अपने स्वप्न देहका शिर छेदन मरण आपही देखता है सो देखने वाला मरने वाले से अन्य है । इसी प्रकार इस विद्यमान देह से भी आत्मा अन्य है, क्योंकि ? जिसहेतु से इस देह काभी मरणादिक यह देखता है तिसी हेतुसे देह जन्म मरण वाला है और अजन्मा आत्मा अजर अमर है ॥ ४ ॥

घटे भिन्ने यथाऽऽकाश आकाशः स्याद्यथापुरा ।
एवं देहे मृते जीवो ब्रह्मसम्पद्यते पुनः ॥ ५ ॥
मनः सृजति वै देहान् गुणान् कर्माणि चाऽऽत्मनः ।
तन्मनः सृजते मायां ततो जीवस्य सं[illegible] ॥ ६ ॥
स्नेहाधिष्ठानवर्त्यग्निसंयोगो यावदीयते । [illegible]
ततो दीपस्य दीपत्वमेवं देहकृतो भव[illegible]
रजःसत्त्वतमोवृत्त्या जायतेऽथ विनश्य[illegible]
न तत्राऽऽत्मा स्वयञ्ज्योतिर्यो व्यक्ताव्यक्त[illegible]
आकाश इव चाधारो ध्रुवोऽनन्तोपमस्तत[illegible]

श्रीधरस्वामिकृतभावार्थदीपिका ।

यस्माद्देहोपाधिकोऽयमात्मनो जन्मादिसंसारभ्रमस्तस्मात्तदुपाधिनिवृत्तौ मुच्यत इति सदृष्टान्तमाह—घट इति । यथा पुरा घटोत्पत्तेः पूर्वमिव पुनर्घटे भिन्ने तदन्तर्वर्त्याकाश आकाश एव स्याद्यथा एवं देहे मृते तत्त्वज्ञानेन क्षीणे सति ॥ ५ ॥

ज्ञानेन क्षयं भावयितुं मायाकृतमात्मनो देहाद्युपाधिसम्बन्धप्रकारमाह—मन इति । मन आत्मनो देहादीन्सृजति तच्च मनो माया सृजति ततो मायाद्युपाधिसमुदायाज्जीवस्य संसृतिर्भवतः ॥ ६ ॥

यस्मादुपाधिनिबन्धनो जीवस्य संसारोऽतस्तन्नाशे जीवत्वं नश्यतीत्येतदेव सदृष्टान्तमाह, सार्धेन स्नेहेति । दीपस्य ज्योतिषो दीपत्वं ज्वालारूपः परिणामः तत्र तैलस्थानीयं कर्म तदधिष्ठानस्थानीयं मनः वर्तिस्थानीयो देहः अग्निसंयोगस्थानीयश्चैतन्याध्यासः दीपस्थानीयः संसार इति योज्यम् देहकृतः देहनिबन्धनः भवः, देहकृतो मनसो न त्वात्मनः ॥ ७ ॥

अतो दीपवत्संसार एव नश्यते न त्वात्मा ज्योतिर्वदित्याह, नेति । ननु, तत्र प्रतीयमान आत्मा कुत? इत्यत आह, य इति । व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोः परोऽन्यः यतः स्वयञ्ज्योतिः परत्वं प्रपञ्चयति, आकाश इवेति । आधारो देहादेः प्रपञ्चस्य ध्रुवो निर्विकारः नास्त्यन्त उपमा च यस्य सोऽनन्तोपमः ततो विभुः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यथा पुरास्यात् निरुपाधिकः स्यात् एवं जीवो ब्रह्म सम्पद्यते परिशुद्धावस्थो भवतीत्यर्थः । ब्रह्मशब्दोऽत्र मुक्तात्मवाची "ब्रह्मभूयाय कल्पते, ब्रह्मणो हि प्रतिष्ठाहम्" इति प्रयोगात् ॥ ५ ॥

मनः सृजतीति मनसो देहादिसृष्टिहेतुत्वं पुण्यपापद्वारेत्याह—कर्माणि चेति । माया प्रकृतिः ॥ ६ ॥

एवं देहकृतो भव इति कर्मारब्धदेहेन्द्रियाद्यावधिको भवति इत्यर्थः । रजः सत्त्वं तमोवृत्त्या गुणत्रयसंसर्गादात्मनो जन्ममरणादिः स्वतस्तु तद्विलक्षणो नित्य इत्यर्थः ॥ ७ ॥

परो जीवादन्यः ॥ ८ ॥

श्रीमद्वीर[illegible]तचन्द्रचन्द्रिका ।

यस्त्वेवं तत[illegible]विवेकयुक्तस्य मुक्तिरेव स्यादित्याह—घट इ[illegible]ोपहिताकाशः घटे भिन्ने सति यथापुराऽऽ[illegible]ाधिक आकाशः स्यादेवं जीवोऽपि देहे मृ[illegible]निरवशेषं प्रकृतिसम्बन्धविगमे सति ब्र[illegible]पो भवतीत्यर्थः । ब्रह्मशब्दोऽत्र मुक्तात्म[illegible]कल्पते, ब्रह्मणोऽपि प्रतिष्ठाहम्" इति प्रयोगा[illegible]

कथमनादेर्बन्ध[illegible]ाधिकत्वादित्यभिप्रेत्य तदुपपादयति—मन इ[illegible]गुणमयानात्मनो जीवस्य देहान् सृजति मन[illegible]पापद्वारेत्याह, कर्माणीति । तन्मनः कर्म मा[illegible] माया अतो देहकर्मभ्यः जीवस्य संसृतिः[illegible]

एतदेव सदृ[illegible]न स्नेहेति । दीपस्य ज्योतिषः दीपत्वं ज्वालारूप[illegible]स्थानीयं कर्म तदधिष्ठानस्थानीयं मनः [illegible]अग्निसंयोगस्थानीयो देहात्माभिमानः दीप[illegible] योज्यम् एवम्भवः संसारः देहकृतः कर्मारब्ध[illegible]इत्यर्थः । अतो रजस्सत्त्वतमोवृत्त्या गुण[illegible]ो जन्ममरणादि स्वतस्तु तद्रहितोऽस्तीत्यर्थः [illegible] देहे जायमाने नश्यति च सत्यात्मा न आ[illegible] तत्र हेतुः व्यक्ताव्यक्तयोः परः व्यक्तं शरीर[illegible]ः ताभ्यां परोऽन्यः तत्र हेतुः स्वयञ्ज्योतिः[illegible]जीवत्वादिति भावः ॥७।८॥

श्री[illegible]पदरत्नावली ।

अधुना [illegible]रणावस्थामाह—घट इति । घटे भिन्ने कथ[illegible]मितो ब्रह्माकाशो [illegible]कारबाहित्या[illegible] तदेवार्थः । एवं देहे मृते सति जीवः [illegible] घटे यदान्[illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यथा तथा पुरा जीवः प्राणधारकः परमात्मान्तर्यामी ब्रह्मस्वाभिन्नस्वरूपमाप्नोति घटान्तर्गतभूताकाशः पुरा यथा महाकाशाभिन्नः पश्चादपि तदधीनतामापद्यते तथा चरमदेहान्तलिङ्गशरीरे भग्ने नष्टे जीवो मुक्तियोग्यः । आत्मा परं ज्योतिः सम्पद्य स्वेन रूपेणाभिनिष्पद्यते "महाकाशो बहिःस्थश्च घटाद्यन्तस्थ एव च" इति तत्त्वसंहितावचनाद्वगन्तव्य इति ब्रह्म मोक्षं पुनरावृत्तिशून्यं च ॥ ५ ॥

प्रकारान्तरेण संसारावस्थामाह—मन इति । आत्मनो जीवस्य मनः सुरनरादिदेहान्गुणात्मकानि आवृत्तिहेतुभूतानि पुण्यपापकर्माणि च सृजति मायाद्यति शब्दादिविषयासक्तिहेतुभूतानि वा एवंविधं मनः सत् किं तत्राह, तदिति । माया जडप्रकृतिः तन्मन उत्पादयति सृजत इत्यात्मनेपदप्रयोगेणाभिप्रायं मन इति सूचयति ततो जडमनसो जीवस्य संसारो वर्तत इति शेषः ॥ ६ ॥

कियन्तं कालं जन्मात्मकः संसार इति तत्राह—स्नेहेति । यावद्यावन्तं कालं तैलादिस्नेहपात्रवर्तिशिखाग्निसंयोगस्तावत्तावन्तं कालं दीपस्य दीपत्वं प्रकाशसामर्थ्यम् एवं देहकृतो देहादिकर्मनिमित्तकृतो भव इत्यन्वयः । तैलाद्यभावेन यथा दीपादेः शून्यता एवं जीवस्यापि देहाद्यभावेन शून्यत्वमायातमित्याह, रज इति । मनसो रजः सत्त्वादिगुणोपजीवनेन देहो जायते (१) इत्यादि ॥ ७ ॥

तत्र तस्यामवस्थायामपि योऽव्यक्ताव्यक्तयोर्देहप्रकृत्योः परो विलक्षणः स आत्मा जीवो न जायते न वर्धते न नश्यति कुतः? स्वयंज्योतिर्ज्ञानात्मा इदानीमुपलक्षितप्रकारं विधत्ते, आकाश इति । आकाशवत्ततो व्याप्तो ध्रुवाधारो नित्याधारो ध्रुवो नित्यश्च यः नाशरहितः तस्माद्वस्तुपरिमाणपरिमितिश्च ॥ ८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देह इति देहद्वयम् इत्यर्थः । ब्रह्मैव सम्पद्यते यथार्थं प्राप्नोति ॥ ५ ॥

मायादीनां अपृथक्त्वं यत् किंचिद्धेतुत्वात् ॥ ६ ॥

दीपस्य ज्योतिषो दीपत्वं स्नेहाद्यधिष्ठातृत्वेन विकारित्वमित्यर्थः । ततस्तस्मात् अव्यक्तो महदादिरूपत्वादनन्तोपमः परमात्मस्वरूपः "स्वराड् व्याप्तो" इति श्रुतिः ॥ ७—८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तद्ध्वात्मनो लिङ्गशरीरे व्याप्तो सूक्ष्मो वा नाशे सति निर्विशेषत इत्यैकात्म्यवादिनां इत्याश्रयमाह—घट इति । भिन्ने विदीर्णे यथापुरेति घटोत्पत्तेः पूर्वं यथा महाकाशाभिन्नतयैव घटे सम्प्रेऽपीत्यर्थः । एवं देहे मृते नाशिते जीवे [illegible] यथा जीवात्मा तथा परमात्मापि ताद्भुमावपि [illegible] लिङ्गमङ्गे सत्यामपि मुक्तौ स्यातामिति कथं [illegible] तत्र परमात्मन आवरणं कालमयोऽपि नास्तीति सत्यम् [illegible] इति । यथा पुरेति

घटे वर्तमानेऽपि आकाश एव यथा अनावृतत्वेनैव घटे सम्प्रेऽपीत्यर्थः । आकाशस्य घटान्तर्बहिर्मध्येऽपि वर्तमानत्वादाकाशं घटः कथमावृणोतीति भावः । एवं देहे अमूर्ते वर्तमानेऽपि अजीवो जीवभिन्नः परमात्मा ब्रह्म सर्वव्यापकः स्वेनैव सम्पद्यते विराजते ॥ ५ ॥

ज्ञानेन स्वयं सम्भावयितुं मायाकृतमात्मनो देहाद्युपाधिसम्बन्धप्रकारमाह—मन आत्मनो देहादीन् सृजति यदुक्तं "यतो यतो धावति दैवचोदितं मनो विकारात्मकम्" इत्यादि तच्च मनो माया सृजति ततो मायाद्युपाधिसमुदायात् ॥ ६ ॥

एतदेव दृष्टान्तमाह—सार्द्धेन स्नेहेति । दीपस्य ज्योतिषः दीपत्वं ज्वालारूपः परिणामः तत्र तैलस्थानीयं कर्म तदधिष्ठानस्थानीयं मनः वर्तिस्थानीयो देहः अग्निसंयोगस्थानीयश्चैतन्याध्यासः दीपस्थानीयः संसार इति योज्यं देहकृतो देहसंयोगनिबन्धनोऽयं भवः संसारः ॥ ७ ॥

अतो दीपवत् संसार एव नश्यति न त्वात्मा ज्योतिर्वेदित्याह—नेति । ननु तत्र प्रतीयमान आत्मा कुतः? इत्यत आह य इति व्यक्ताव्यक्तयोः परः स्थूलसूक्ष्मदेहाभ्यामन्यः यतः स्वयंज्योतिः त एव हेतोः आधारो देहस्य प्रपञ्चस्य ध्रुवो निर्विकारः नास्त्यन्तः उपमा च यस्य सोऽनन्तोपमः यद्वा यः खलु व्यक्ताव्यक्तयोः कार्यकारणयोः परः कारणरूपः परमात्मा सतु आकाश इव सर्वाधार इत्यादि ॥ ८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवंभूतात्मानात्मविवेकेन भागवतः प्रथमं निर्बन्धनं स्वरूपं प्राप्नोति पुनः ब्रह्मसम्पद्यत इत्याह—घट इति । घटे भिन्ने सति तदावृतः आकाशः यथा पुरा अनावृतः आकाशः तथैव स्यात् एवं देहे मृते अत्र देहशब्देन तत्कारणभूता प्रकृतिर्गृह्यते तस्यामुपरतायामित्यर्थः ।—

"यद्योपरता देवी माया वैशारदी मतिः ।
सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते" ॥

इत्युक्तत्वात् जीवः स्यात् निरावरणः स्यात् पुनः स एव निर्बन्धनो जीवः ब्रह्म ब्रह्मसाम्यं प्राप्नोति "निरञ्जनः परमं साम्यमुपैति" इति श्रुतेः ॥ ५ ॥

प्रकृतौ उपरतायां स्वस्वरूपं सम्पद्यत इत्युक्तं तत्र प्रकृतिकृतएव जीवस्य संसार इति हेतुमाह—मन इति । यस्मात् माया कृतएव मनः एव महदादिद्वारा सृजति तदेव सत्त्वावरकं गुणान् सङ्कल्परूपान् कर्माणि देहांश्च सृजति—

"यतो यतो धावति दैवचोदितं मनो विकारात्मपि पञ्चसु ।
गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते" ॥

इत्युक्तत्वात् एवं ततो देहशब्देन गृहीतायाः प्रकृतेरेव जीवस्य संसृतिः ॥ ६ ॥

एतदेव दृष्टान्तेनाह—स्नेहेति । स्नेहादीनां संयोगो यावदविद्यमानं तावदेव दीपस्य दीपत्वं संयोगापगमे तु तदभाव एवं एवं देहकृतो भवः कार्यकारणरूपः प्रकृतिकृतो भवजन्ममरणप्रवाहरूपः संसारः ॥ ७ ॥

एवमात्मानमात्मस्थमात्मनैवाऽऽमृश प्रभो ! ।
बुद्ध्याऽनुमानगर्भिण्या वासुदेवानुचिन्तया ॥ ९ ॥
चोदितो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः ।
मृत्यवो नोपधक्ष्यन्ति मृत्यूनां मृत्युमीश्वरम् ॥ १० ॥
अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम् ।
एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले ॥ ११ ॥
दशन्तं तक्षकं पादे लेलिहानं विषाननैः ।
न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स च देहः प्रकृतेरेव मनुष्यदेवतिर्यगादिशरीराकारेण रजःसत्त्वतमोवृत्त्या जायते विनश्यति च मायामोहितो जीवस्तद्वशात् जातोऽस्मि मरिष्ये इति मन्यते वस्तुतस्तु यः तत्र मनुष्यादिशरीरे आत्मा जीवः स न जायते न विनश्यति मनुष्यादिदेहस्तत्प्रकाशः स स्वयञ्ज्योतिः यतो व्यक्ताव्यक्तयोः कार्यकारणयोः शरीरप्रकृत्योः परः ताभ्यामन्य आकाश इव असङ्गत्वात् आधारः देहादिधारकत्वात् ध्रुवो नित्यस्ततो हेतोरनन्त आद्यन्तशून्यः अव्ययः अविकारी ॥ ८ ॥

———

भाषा टीका ।

अस्तु, देह से आत्मा भिन्नहुआ तिससे क्या हुआ, तहां कहते हैं कि—इसप्रकार के भेदज्ञानवाले विवेकी मुक्त हो जाते हैं, जैसे कि—घट के भीतर का आकाश घट के फूटने पर निरुपाधिक आकाश हो जाता है, इसी प्रकार परमात्मा की उपासना से अपुनर्भावी देह सम्बन्ध नष्ट होने पर अर्थात् प्रकृति सम्बन्ध छूटने पर वह जीव ब्रह्म हो जाता है, अर्थात् जीव मुक्त हो जाता है इस जगह ब्रह्म शब्द मुक्त का वाचक है जैसे, कि—"ब्रह्म भूयाय कल्पते, ब्रह्मणो हि प्रतिष्ठाऽहम्,, इन प्रमाणों में है ॥ ५ ॥

सत्त्वादि गुण सब देहों को मन सृजता है, और अपने कर्मों को सृजता है, और उस मन को माया जो प्रकृति है वह सृजती है, तिन माया मन देह और कर्मों से इस जीव को संसार होता है ॥ ६ ॥

जब तक तेलके अधार दीपक में बत्ती और अग्नि का संयोग रहता है, तबही तक दीपक में दीपपना है, इसी प्रकार यह देह कृत संसार है, इहां पर तेल के ठिकाने पर देह है, अग्नि संयोग के ठिकाने हर देहात्माभिमान है, दीपक के ठिकाने पर यह संसार है। इस प्रकार जब तक यह कर्मारब्ध देह की प्राप्ति होती रहती है तबहीं तक संसार है इसीसे तीनों गुणों का संबन्ध रूप उपाधि से आत्मा का जन्म मरणादिक है अतः सो आत्मा जन्ममरणादिक से रहित है गुणत्रय के सम्बन्धही से जन्म बना है और मरना है ॥ ७ ॥

इस प्रकार देहके उत्पन्न [illegible] नेपर और नष्टहोने पर आत्मा न उत्पन्न होता है [illegible] है, क्योंकि ? यह, व्यक्त शरीर और अव्य[illegible] इन दोनों से अन्य है । अन्यभी क्योंहै, [illegible] ज्योति अर्थात् स्वयं प्रकाश है, और [illegible] नहीं है । इसमें, दृष्टान्त यह है, कि—जैसे [illegible] का आधार आकाश है उसी तरह यह [illegible] रक है, स्थिर है, अनन्त है अतएव अव्य[illegible] से ही विकार रहित है ॥ ८ ॥

[illegible] दीपिका ।

अनन्तत्वमेवं [illegible] न । आत्मैक्यं देहाद्युपाधिस्थितम् आमृश[illegible] नगर्भिणया दृग्दृश्ययोरन्वयव्यतिरेकयुक्त्या [illegible]

एव च सा[illegible] देहादिस्वाह–चोदित इति । तत्र हेतवः मृ[illegible] : ॥ १० ॥

विमर्शप्रकार[illegible] दर्शयति–द्वाभ्याम । योऽहं स ब्रह्मैव य[illegible] शिवत् तथाहं ब्रह्मेति भावनया जीवस्य [illegible] ब्रह्मास्मीति भावनया च ब्रह्मणः पारोक्ष्यनिवृत्ति[illegible] दर्शितः निष्कले निरुपाधौ आत्मनि ब्रह्मा[illegible]

विषयुक्तैरा[illegible] क्षकम लेलिहानं सर्पम् यद्वा लेलिहानं जि[illegible] ष्वमास्वादयन्तम आत्मनः पृथक् ॥ १२ ॥

[illegible] शुकपक्षीया ।

परमात्मान[illegible] आत्मक्षम ॥ ९ ॥

न त्वां ध[illegible] भविष्यतीत्यर्थः । मृत्यव इति ईश्वरो मृत्यु[illegible] त्युर्धक्ष्यति एवं तक्षकादपि नेत्यर्थः ॥ १० [illegible]

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अहं ब्रह्मेति ब्रह्माहमिति च तात्पर्यभेदेन विशेषणप्रधानो विशेष्यप्रधानश्च निर्देशभेदः पर पद परमप्राप्यम् ॥ ११ ॥

न द्रक्ष्यसीति भगवत्स्मृत्याहृतत्वद्भक्ततया तु आदिहेतुभूतमन्य द्रष्टव्यसीत्यर्थः ॥ १२ ॥ १३ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्र दृष्टान्तः—आकाश इवेति । यथा घटाद्युपाधिराकाशःपरन्तु स्वाधारः देहस्य धारकः अनन्तः स्वभावतोऽपरिच्छिन्नः अव्ययः स्वरूपतो विकाररहितः ततः किमत आह—एवंविधमिति । एवंविधमात्मस्वरूपं परमात्मनश्च देहत्वं वा आत्मानम् आत्मनैवानुसृत्य विचार्य प्रत्यक्षत्वाद्यात्मनैवस्थितः ॥ ९ ॥

बुद्धयेति—अनुमानगर्भितया अनुमीयतेऽनेन सूक्ष्मार्थम् इत्यनुमानं शास्त्रं तद्गर्भितया शास्त्रजन्यज्ञानयुक्तयेत्यर्थः । बुद्ध्या आत्मविमर्शनात्मिकया वासुदेवानुचिन्तया वासुदेवानुचिन्तारूपया बुद्ध्या वा उपलक्षितं त्वां विषोल्बणः प्रज्वलितोऽपि तक्षकः न धक्ष्यति तत्र हेतुर्नातः अमीतित्वात् त्वयेति अमृतत्वेति । ईश्वरो हि मृत्यूनां मृत्युरनन्त इत्यर्थः मृत्युहेतवः न धक्ष्यन्ति एवं तत्प्राप्त्यभिप्रायः ॥ १० ॥

अहमिति अहं ब्रह्मेति ब्रह्माऽहमिति च तात्पर्यभेदेन विशेषणप्रधानो विशेष्यप्रधानश्च निर्देशभेदः परं धाम परमं पदमिति च ब्रह्मविशेषणं परमं पदं प्राप्यं एवमित्थं समीक्षन् सन्दधानः निष्कल प्राकृतशरीररहिते आत्मनि परमात्मन्यात्मानं प्रत्यगात्मानमाधाय परमात्मशेषत्वैकरसं आत्मेत्यर्थः । यद्वा, अनादिमायी विद्यया सुस्पष्टात्म बुद्धिस्वभूतनिजस्वरूप राजानं नित्यं श्रीभगवच्छेषभूतमात्मानं देहाद्विलक्षणं गुणत्रयातीतं अजविलक्षणं सर्वस्य चेतनं नित्यं इदं परमात्मस्वरूपाधीनसत्तास्वरूपं विशिष्यत्युपदिशति—अहं ब्रह्मेत्यादिना । धाम निरुपाधिकचेतनं प्रकाशवत्तमं तेजोमयं ज्योतिःस्वरूपं परमं श्रेष्ठं जडविलक्षणम् अत एव अव्ययत्वेऽभिन्नमपि पद स्वरूपं यस्य तत् ब्रह्म महत्तत्त्वं जीवस्वरूपं ब्रह्मपरं प्रधानं श्रेष्ठं मान्यं पूज्यं सेव्यं यस्य तत् अत एव ब्रह्माहं ब्रह्मणः अहं ब्रह्माहं ब्रह्मणः परमात्मनः शेषित्व एवाहं शेषो मान्यस्य नादितरस्य सर्वस्यापि चेतनाचेतनस्य * शेषत्वादिति तदभिप्रायः मम च शेषी ब्रह्मैव परमात्मैव नान्यः । तथा सति सर्वेऽपि शेषिण एव स्युः अतो न शेषस्य शेषीति श्रुतावेक एव शेषी वर्णितः "एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" "न तत्समश्चाऽप्यधिकश्च दृश्यते" इत्यादि श्रुतिः । "नत्वत्समोऽस्त्यऽभ्यधिकः कुतोऽन्यः" इत्यादि श्रीगीतोपनिषत्सु च शेषी एक एव श्रीमन्नारायणः शेषास्तु सर्वे इति सर्वशेषिणो नियन्तुः आज्ञा शेषभूतैस्सदैव पालनीयेति तत्परत्वात्त्वयधारणीयः । अन्यथा शेषस्वरूपमेव न सिध्यतीतिदिक् एवञ्च सर्वस्य

* शेषस्य शेषो, ह अर्थात् शेषिण एव शेषो भवति न शेषस्य शेषः इति इत्यभिमीति वि[illegible]

शेषी परब्रह्मश्रीमन्नारायण एव नान्य इति यथा राजपुरुष इत्यादौ षष्ठीसमासघटितपुरुषस्य राजान्यं प्रसिद्धम् तत्र भवादिनः आत्मा एवेति परब्रह्मपराधीनमेतादृशस्वरूपं जीवतत्त्वं यस्मिन् स्वस्वरूपं निष्कल आत्मनि जीवस्वरूपे आत्मानमन्तर्यामिणं परमात्मानं श्रीमन्नारायणं निजस्वामिनं श्रीरमानाथं निजनाथं (परमात्मस्वरूपे या आत्मान स्थाप्य शेषभूतं) समीक्षन् सम्यक् पश्यन् नित्यस्वामिसेवकभावेन सम्यगालोकयन् ध्यानेन दृशा प्रत्यक्षमिव कुर्वन् निश्चलभक्तिवैराग्यज्ञानानुरागभक्तियत्नैः प्रत्यक्षमिव कुर्वन्नहं जडदेहादिविलक्षणो निर्गुणः शुद्धो मुक्तस्वरूपश्चात्माप्यहं न स्वयं ब्रह्मा ब्रह्माहमस्मि किन्तु स्वयं ब्रह्मणः सर्वेशितुः श्रीस्वामिनो दास एवाहमस्मि इति सदा श्रीनिवासार्थसारोऽयमर्थः । एतादृशभावपूर्वकं श्रीभगवद्ध्यानानुरागी त्वं देहं स्थूलदेहं दशन्तं तक्षकं स्थूलं सूक्ष्मञ्च शरीरमुभयं देहोत्पादकर्मविद्याप्रधानादिकं सर्वं जगद्विश्वं च तन्नाशादिकरं कालं च न द्रक्ष्यसि अथवा श्रीभगवद्व्यतिरिक्तं किमपि न पश्यसि परमात्मानमेव नित्यमात्मन्यन्तर्यामिणं परमात्मानि व्यापकं श्रीस्वामिनं वा नित्यव्यापकभूतं सदा शेषरूप निजस्वरूपं सम्यगालोचयिष्यसीति सर्वमकृतमनवद्यम् ॥ ११ ॥

दशन्तमिति । विषयुक्तैरास्यैर्मुखैर्लिहानमास्वादयमानं दशन्तं च तक्षकमात्मनः परमात्मनः पृथक्स्थितं शरीरं विश्वं च न द्रक्ष्यसि भगवत्स्मृत्याह्लादे मग्नतया दुःखादिहेतुभूतमन्यत्र चेत्यसीत्यर्थः ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवंविधमाहात्म्योपेतमात्मस्वरूपं स्वहृदयकुहरनिलयमात्मानं परमात्मानमात्मनैव मनःप्रयत्नेनानुसृत्य स्वर्यावज्जीवोपास्व प्रभो इत्युपास्तिमाश्रित्याह—दुर्मेराग्यात्प्रभृत्यस्य मम देहत्यागेऽपि मोक्षो नास्तीति न चिन्तनीयमाशयेनाह, बुद्ध्येति । आत्मा स्वकीयान्तर्वृत्तित्वात्कार्मिनित्यानित्याधिकरणां मेयत्वात् इत्यात्मसिद्धिरिति वेदः स्वान्तर्वृत्तित्वात् कार्मिनित्यानित्याधिकरणां मेयत्वात् घटवदित्यनुमानगर्भितया वासुदेवानुचिन्तया हरेर्निरन्तरमनुपासनया वर्तमानं त्वाम् ॥ ९ ॥

विप्रकुमारवाक्येन चोदितः प्रेरितस्तक्षको न धक्ष्यति तवदोषं नापादयतीत्यन्वयः । मृत्यूनां मारकाणां मृत्युं मारकम् ईश्वरम् उप समीपे स्थितं मृत्यवो न सर्पन्ति त्वां न प्राप्नुवन्ति ॥ १०॥

वेदवादोपासनस्वर्गेण प्रकारान्तरेणोपायमाह—अहमिति । न हन्यत इत्यहं न हीयत इति वा कदापि न जहाति स्वर्गाकीर्तिमान् वा एवं विश्वमीश्वरं विहाय कदापि न तिष्ठत्यस्त्यानन्द्यादित्यर्थः उपासनाफलमाह—एवमिति । एवंविधत्वं निष्कले आत्मनि परमात्मानं समाधाय संयुज्य समीक्षन् सम्यक् ध्यायन् ॥ ११ ॥

विषयुक्तास्यैः पदं दशन्तं तक्षकं लेलिहानं सर्पं न द्रक्ष्यसि इतरसर्पवदिति शेषः आत्मनो हरेः पृथक् ज्ञातोऽयंसा स्थितं विश्वं शरीरं च न पश्यसीत्यन्वयः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पूर्वोक्तानिर्देशेनोपदिशति—एवमिति । आत्मानमन्तर्भूतभगवत्पार्षद्भावात्मकम् आत्मना जीवस्वरूपेण सहात्मस्थं बुद्ध्वामृश कीदृशा पूर्वोक्तानुमानगर्भितया तथा वासुदेवध्यानुगतचिन्ता यस्यां तथा ॥ ९ ॥

त्वां पूर्वोक्तरूपं यतो मृत्यव इति ॥ १० ॥

कुतोऽहमीश्वरः तदेकपार्षदत्वाभिमानेन तच्छक्त्यैव स्वशक्त्यभिमानेन वा तदभेदाभिमानादित्याह—अहं ब्रह्मेति युग्मकेन। निष्कले मायातीते आत्मनि ब्रह्मणि आधाय निवेश्य आत्मनः पृथक् यच्छरीरं विश्वं च तत् द्रक्ष्यसि इति किमुत तदपकारेण आपकारम् मन्यसे इति ॥ ११ ॥ १२ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

आत्मस्थं देहाद्युपाधिविधिनम् आत्मना मनसा आमृश विचारय बुद्ध्यादिप्रवर्तकत्वेन यदात्मनोऽनुमानं तदेव गर्भेऽन्तर्युक्तया बुद्ध्या साध्यवसायवत्या सह वासुदेवचरणानुचिन्ता यस्यां तया स्वामात्मानं देहात्पृथग्भूतं तक्षकस्य का वार्ता स्वं मृत्यवोऽपि मूर्तिमन्तः पश्ये ईश्वरम् उपाधिमुक्तत्वादिहात्परतन्त्रं मृत्यूनां मत्यान्तरायाणां मृत्युं नाशहेतुं त्वां प्राप्य मत्यान्तराया ब्रह्मशापाद्य एव वैयर्थ्यांपन्ना एव बभूवुरित्यर्थः ॥ ९—१० ॥

विमर्शप्रकारं वर्णयन् तत्प्रकारदर्शनं दर्शयति—द्वाभ्याम्। योऽहं स ब्रह्मैव ब्रह्मैवाहं न संसारीति भावनया शोकादिनिवृत्तिः ब्रह्माहमिति अहमेव ब्रह्मेति भावनया च ब्रह्मणः पारोक्ष्यनिवृत्तिर्भवतीति व्यतिहारो दर्शितः निष्कले निरुपाधौ आत्मनि ब्रह्मणि पश्ये अहं धाम सूर्योपमस्य परमेश्वरस्य त्विट् कणाक्षिका एवेत्यर्थः । गृहदेहत्विट् प्रभावा धामानि" इत्यमरः कीदृशं ब्रह्म परं "नारायणपरो विप्रः" इतिवत् ब्रह्मोपासकमित्यर्थः । अत एव ब्रह्माहं ब्रह्मणः परमेश्वरस्यैवाहमिति षष्ठीतत्पुरुषः एवं परमं पदं ब्रह्म स्वरूपं चरणारविन्दं वा समीहय आत्मान आत्मनि परमात्मनि कृष्णे निष्कले निष्को यथोऽलङ्कारस्तद्वदिति ॥ ११ ॥

विषाननैर्विषयुक्तैराननैः दशन्तं लेलिहानं जिह्वाभिरोष्ठप्रान्तं स्त्रनिष्पेषमास्वादयन्तं तक्षकं न द्रक्ष्यसि नापितेन दष्टं शरीरं च आत्मनः पृथग्भूतं विश्वं च पश्ये श्रीकृष्णचरणारविन्दसाक्षात्कारानन्दमूर्च्छां प्राप्तस्त्वं न द्रक्ष्यसीति ॥ १२ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, प्रकृतिबन्धनिवृत्त्यनन्तरं निर्बन्धनो ब्रह्म प्राप्नोतीति यदुक्तं तत्प्राप्तये अधुना मया किमनुष्ठेयमत्राह—एवमिति। अनुमीयते अनुभवविषयीक्रियते वेदार्थभूतो भगवान् येन तदनुमानं वेदः तद्गर्भितया तदर्थशीलिन्या बुद्ध्या भगवद्ध्यानेन वासुदेवानुचिन्त्या वासुदेवानुरक्तिर्भक्तिस्तया च आत्मनः "एष ते आत्मान्तर्यामी" इति श्रुतिप्रोक्तमात्मस्थं आत्मनि संस्थितमात्मना निर्मलेन मनसा एव यथोपदिष्टम् आमृश विचारय अत्र "ब्रह्मसमश्नुते" इतिश्रुत्युक्तं ब्रह्मप्राप्स्यसीति भावः । प्रभो इति सम्बोधनं उक्तार्थं द्योतयति ॥ ९ ॥

एवं कुर्वाणं त्वां न कोपि धर्षयिष्यतीत्याह—योऽति इति । ईश्वरं समर्थम् ॥ १० ॥

ननु, येन सम्बन्धेन स विमर्शनीयः स सम्बन्धो भवता वक्तव्य इत्यतः "आत्मेतितूपगच्छन्ति ग्राहयन्ति च" (४।१।३) इति सूत्रकारोक्तम् वेदृवेद्ययोस्तादात्म्यसम्बन्धमाह—अहमिति । अहमणुस्वरूपः जीवः "अणुर्ह्येष आत्मा" एव परस्यांशः "ममैवांशो जीवलोके जीवभूतः सनातनः" इति श्रुतिस्मृतिप्रोक्तः। परं पूर्णं ब्रह्मैव अंशस्य स्वरूपतो भिन्नत्वेपि अंशिव्यतिरिक्तस्थितिप्रवृत्त्याद्यभावेन तदभिन्नत्वात् अनेन "द्वितीयाद्वै भयं भवति" इति भवच्छोकादिनिवृत्तिर्जीवस्य भवति परमं पदं ब्रह्म चाहम् अंशिनः स्वरूपतोऽनन्तत्वेऽपि सर्वात्मत्वेन अंशवियुक्तत्वाभावात् अनेन ब्रह्म [illegible] नित्यप्राप्त्या पारोक्ष्य निवृत्तिर्भवति एष एव [illegible] सम्बन्धः सूत्रकारेण काशकृत्स्नो [illegible] प्रतिपादितः सर्वश्रुति सङ्गत्यर्थम् "अंशो नाना [illegible] पि दाशकितवादित्वमधीयत एके" इत्य [illegible] ीकृतः एवं निष्कले निर्मले आत्मनि ब्र [illegible] वेश्य आधाय समीचीन् सन्दधानः तक्षक [illegible] णा सम्बन्धः ॥ ११ ॥

लेलिहानं जिह्वाभि [illegible] स्वादयन्तम् विषयुक्ताननैर्दशन्तं तक्षकम [illegible] शरीरं च किं बहुना विश्वं च न द्रक्ष्यसि [illegible] प्राप्तत्वात् ॥ १२ ॥

हे प्रभो! आत् [illegible] क्ति से और श्रीवासुदेवके अनुचिन्तन से इस [illegible] आत्मा को अपने मनही से विचारो, कि- [illegible] से अन्य हो ॥ ९ ॥

अब तुम वासु [illegible] ोगे तब तुमको विप्रवाक्य से प्रेरित [illegible] जलावेगा क्योंकि ईश्वर तो मृत्युओं [illegible] ों के हेतु जोहै वे ईश्वर को नहीं जला [illegible] ईश्वर में भावना करने वालों को भी नहीं [illegible] ॥ १० ॥

मैं ब्रह्मस्वरूप [illegible] हूं जो ब्रह्मपर हूं अर्थात् ब्रह्मपरायण हूं और [illegible] र्थात् निवास हूं अन्तर्यामि होकर भगवान् [illegible] त एव उत्कृष्ट पद धाम स्वरूपवालाहूं इ [illegible] इस प्रकार आत्मा को अच्छी तरह जानकर [illegible] त परमात्मा के विषै अपने आत्माको अवतं [illegible] में परमात्मा का ही एक अनन्य सेवक हूं [illegible] ध्यान करेगा ॥ ११ ॥

तब विषय [illegible] ाह में डसते वाले सर्पको

एतत्ते कथितं तात ! यथाऽऽत्मा पृष्टवान् नृप ! ।
हरेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां द्वादशस्कन्धे ब्रह्मोपदेशो नाम
पञ्चमोऽध्यायः ॥ ५ ॥

भाषा टीका ।

और आत्मा से पृथक् स्थित शरीर और विश्वको तू नहीं देखेगा ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

हरेश्चेष्टामात्मा त्वं यत्पृष्टवांस्तदेतत्ते कथितम् शिष्यस्य कृतार्थतापरीक्षणाय पृच्छति, किमिति ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

इति श्रीमद्भागवतव्याख्याने द्वादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अखिलप्रश्नोत्तरं निगमयति-एतदिति । हे तात ! हे नृप ! हरेश्चेष्टां प्रति यद्वदात्मा त्वं पृष्टवान् तत्सर्वं ते तुभ्यं कथितं कृतार्थता परीक्षायै पृच्छति-किं भूयः श्रोतुमिच्छसीति । भूयः पुनः॥१३॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अथान्तरप्रमेयमुपसंहरति-एतदिति । चेष्टेति पाठे सा कथितेति शेषः ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
पञ्चमोऽध्यायः ॥ ५ ॥
(विजयध्वजरीत्या चतुर्थः ॥)

श्रीमज्जीवगोस्वामिकृत[illegible]सन्दर्भः ।

श्रीभागवतैकदेशस्य तस्य [illegible] तु नातिदीर्घमाख्य-
[illegible]पसंहरति-एतदिति । ते [illegible] राजन् मरिष्येति"
इत्यादिना कथितम् । ननु, ममानभीष्टमनुपक्रान्तं च तत् कथं कथितं तत्राह—आत्मनस्तत्त्व जिज्ञासुत्वाभिप्रायेण मया पृष्टत्वात् परीक्षितोऽस्यात्मज्ञानं जातमस्ति नवेति सन्दिह्य तत्तदेवमपि यज्जातुमिच्छसीत्यर्थः । अहं त्वनुवर्णयिष्यामीत्यादिनोपक्रान्तं श्रीभगवन्महिमानमेव पुनरपि वर्णयिष्यामीत्याह—हरेरिति । विश्वात्मन इति किं स्वरूपात्मनः स्वरूपादिवर्णनेनेति भावः । नन्वस्मिन् प्रकरणे श्रीशुकदेवस्योपदेशो ब्रह्मज्ञाने तात्पर्यं इति सन्दिहानं प्रति पुनर्विचार्यते तत्र "अथानुवर्ण्यतेऽभीक्ष्णम्" इत्याद्युपक्रमे "एतत्ते कथितं तात" इत्याद्युपसंहारेऽपि नामरूपमहिमादेव पूर्वोक्तलीलाकथाश्रवणस्यैव प्राधान्यात् ततोऽनुपक्रमोपसंहार-निर्दिष्टत्वात् तत्त्वोपलक्षितभक्तेरेवात्रापि प्राधान्यं यत्तु तन्मध्ये "त्वं तु राजन् मरिष्येति" इत्यादिना ज्ञानोपदेशः स च तस्य प्रागेव गता या भक्तिनिष्ठा तस्याः सत्यामपि स्थैर्यप्रकटनार्थं एव एकान्तभक्तेषु भगवता मोक्षदानेच्छुरेवनन पूर्वमपि तन्नि-ष्ठया स्वत एव सद्यो मरणपरित्यागात् अनन्तरं च श्रुत्वापि तज्ज्ञानोपदेशं स्वस्य भक्तिनिष्ठाया एव स्वयं दर्शयिष्यमाणत्वात् तत्र प्राचीना भक्तिनिष्ठा यथा प्रथमे "कृष्णाङ्घ्रिसेवामभिमन्यमानः" इति "दध्यौ मुकुन्दाङ्घ्रिमनन्यभावः" इत्यादि तन्निष्ठयैव तत्त्ववर्णत्यागो यथा तत्रैव "द्विजोपसृष्टः कुहकस्तक्षको वा दशत्वलं गायत विष्णुगाथाः" इति तज्ज्ञानोपदेशश्रवणानन्तरमपि तादृशनिष्ठायाः स्थैर्यदर्शनं यथा तत्र तावत्पद्यद्वयेन तदा ज्ञानोपदेशं बहु मत्वा श्रवणलक्षणया भक्त्या एव कृतार्थत्व-मुक्तं षष्ठाध्यायारम्भे "सिद्धोऽस्म्यनुगृहीतोऽस्मि" इत्यादि "नात्यद्भुतमिदं मन्ये" इत्यादि "पुराणसंहिताम्" इत्यादि पुनश्लोकेन पञ्चम तृतीयचतुर्थाध्यायाङ्गीकृतस्य ब्रह्मज्ञानस्य तक्षकादिभयनिवृत्ति-हेतुत्वमुक्त्वाऽनन्येन तत्फलमभ्यासज एव भक्त्यैव मोक्षणाम-कीर्तनध्यानयेशानुज्ञा प्रार्थिता "राजर्षेऽस्मत्कृते इत्यादिना "अनुजानीहि मां ब्रह्मन्" इत्यादिना अथ पुनरन्येन पद्येनाज्ञान निराकरणज्ञानविज्ञानसिद्धिश्च भगवत्पादारविन्ददर्शनसुखास्तत्त्वैव मम स्फुरतीति ज्ञापितम् "अज्ञानञ्च निरस्तं मे ज्ञानविज्ञाननिष्ठया ! भवता दर्शितं क्षेमं परं भगवतः पदम्" इति अत्र पञ्चाध्यायस्य भवता दर्शितं क्षेमं परं भगवतः पदम्" इति अत्र पद्यद्वयस्य चरणारविन्दाभिधानकत्वे "ज्ञानेन वैराग्यविरक्तिभावेन मेऽज्ञ भगवच्चरणपादमूलम्" इत्येवादिना अथमे साधक तदेतत्प्रकरणार्थस्तु श्रीसूतेनैव स्पष्टीकृतः—

"ब्रह्मकोपोत्थितादत्र तक्षकात्प्राणविप्लवात् ।
न सम्मुमोहोरुभयाद्भगवत्यर्पिताऽऽशयः" ॥
नोत्तमश्लोकवार्त्तानां जुषतां तत्कथामृतम् ।

श्रीमज्जीवगोस्वामिकृतबृहत्क्रमसन्दर्भः ।

स्यात्सम्भ्रमोऽन्तकालेऽपि स्मरतां तत्पदाम्बुजम्" ॥
इति । तथा पूर्वं द्वादशस्य तृतीये प्रथमस्कन्धान्तस्थस्य—
"अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुम् ।
पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा" ॥
इत्यस्य राजप्रश्नस्योत्तरत्वेन भगवद्ध्यानकीर्तने एव स्वयं श्रीशुकदेवेनाप्युपदिष्टे—
"तस्मात् सर्वात्मना राजन् ! हृदिस्थं कुरु केशवम् ।
म्रियमाणो ह्यवहितस्ततो याति परां गतिम् ।
म्रियमाणैरभिध्येयो भगवान् परमेश्वरः ।
आत्मभावं नयत्यङ्ग ! सर्वात्मा सर्वसम्भवः ॥
कलेर्दोषनिधे राजन् !" ।—
इत्यादिना । ततश्चात्र केशवे अवहितः कृतावधान आत्मभावं आत्मनो भक्तिम् अन्तु तावद्यायाससाध्यं ध्यानं हि यस्मादनायाससाध्यात् कीर्तनादेरित्यर्थः । द्वितीयस्कन्धेऽपि "नह्यतो ऽन्यः शिवः पन्थाः" इत्यादिना "एवमेतन्निगदितम्" इत्यन्तेन ग्रन्थेन नानाङ्गवान् शुद्धभक्तियोग एव तत्रोत्तरत्वेन पर्यवसितः तत्र "पिबन्ति ये भगवतः" इत्यादिना लीलाकथाश्रवण एव तत्पर्यवसानं दृश्यते तस्मात् साधूक्तं "त्वन्तु राजन् मरिष्यति" इत्यादिकं तद्भक्तिनिष्ठाप्रकरणार्थमेवेति अतो भक्त्यैव तदुपदेशस्य तात्पर्यम् अत एव द्वितीयस्याऽष्टमे राजप्रार्थना च नान्यथा स्यात् "कृष्णे निवेश्य निःसङ्गमनस्त्यक्ष्ये कलेवरम्" ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
पञ्चमोऽध्यायः ॥ ५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एतत्त ब्रह्मज्ञानं त्वया सम्प्रश्नपृष्टमपि ते कथितं यदीदृशं ब्रह्म अहम् आत्मा त्वं पृष्टवान् मां पूर्वमपृच्छः तां तु पूर्वमेवावोचमिति शेषः । शिष्यस्य तस्य पूर्णत्वज्ञापनाय पृच्छति, किमिति ॥ १३ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वादशे पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सर्वप्रश्नोत्तरमुपसंहरति—एतदेव इति । तन्मुखेनैव तत्कृतार्थतां श्रोतुमाह किम्भूयः श्रोतुमिच्छसीति ॥ १३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
पञ्चमाऽध्यायार्थप्रकाशः ॥ ५ ॥

भाषा टीका ।

हे तात ! हे राजन् ! जो तुमने विश्वात्मा श्रीहरिकी लीला का प्रश्न किया रहा, सो हमने तुम्हारे सामने कहा अब तुम और क्या सुनने की इच्छा करते हो सो कहो ॥ १३ ॥

इति श्रीमद्भागवत द्वादशस्कन्ध में पांचमें अध्यायकी,
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ ५ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे पञ्चमोऽ[illegible]

———

षष्ठोऽध्यायः ।

सूत उवाच ।

एतन्निशम्य मुनिनाऽभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन ।
तत्पादमूलमुपसृत्य नतेन मूर्ध्ना बद्धाञ्जलिस्तमिदमाह स विष्णुरातः ॥ १ ॥

राजोवाच ।

सिद्धोऽस्म्यनुगृहीतोऽस्मि भवता करुणात्मना ।
श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥ २ ॥
नात्यद्भुतमहं मन्ये महतामच्युतात्मनाम् ।
अज्ञेषु तापतप्तेषु भूतेषु यदनुग्रहः ॥ ३ ॥
पुराणसंहितामेतामश्रौष्म भवतो वयम् ।
यस्यां खलूत्तमश्लोको भगवाननुवर्ण्यते ॥ ४ ॥
भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहम् ।
प्रविष्टो ब्रह्मनिर्वाणमभयं दर्शितं त्वया ॥ ५ ॥
अनुजानीहि मां ब्रह्मन् वाचं यच्छाम्यधोक्षजे ।
मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ॥ ६ ॥
अज्ञानं च निरस्तं मे ज्ञानविज्ञाननिष्ठया ।
भवता दर्शितं क्षेमं परं भगवतः पदम् ॥ ७ ॥

सूत उवाच ।

इत्युक्तस्तमनुज्ञाप्य भगवान् बादरायणिः ।
जगाम भिक्षुभिः साकं नरदेवेन पूजितः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठे परीक्षितो मोक्षः सर्पदंशाद्द्विजस्य तु ।
वेदशाखाविभागोक्तो त्रिवेदीशाखवर्णनम् ॥

एतत्पुराणं निशम्य निखिलात्मा हरिरेव पश्यति निखिलं चाऽऽत्मनि पश्यतीति तथा तेन अतः समेन नतेनाऽवनतेन मूर्ध्ना तत्पादतलमुपसृत्य तत्पादौ शिरसि(सि) निधायेत्यर्थः ॥१॥

सिद्धः कृतार्थोऽस्मि यतोऽनुगृहीतोऽस्मि अनुग्रहमेवाऽऽह— यद्यस्माच्छ्रावितः [illegible] श्रावितम् ॥ २ ॥

करुणात्मनामभिनन्दति—द्वाभ्याम्, नात्यद्भुतमिति ॥ ३ ॥

अश्रौष्म श्रुतवन्तः भवतः सकाशात् ॥ ४ ॥

सिद्धोऽस्मीत्युक्तं तदेवाऽऽविष्करोति, भगवन्निति। भवता त्वया दर्शितं ब्रह्म प्रविष्टः कथम्भूतम्? अभयम् यतो निर्वाणं कैवल्यरूपम् ॥ ५ ॥

किं भूयः श्रोतुमिच्छसीति यदुक्तं तत्र सिद्धोऽहं न किञ्चिच्छ्रोतुमिच्छामि केवलमनुज्ञां देहीत्याह, अनुजानीहीति। वाचमित्युपलक्षणं सर्वेन्द्रियाणां वाचं नियच्छ किं करिष्यसि तत्राह, मुक्ताः कामाशया यस्मात्तथाभूतं चेतोऽधोक्षजे प्रवेश्यासून्विसृजामि ॥ ६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, किं प्राणत्यागेन किञ्चित्कालं ज्ञाननिष्ठो भवेति चेत्तत्राऽऽह, ब्रह्मानं चेति । चकारात्तत्संस्कारश्च तत्र स्वात्मरूपवैचेत्याह, भगवतेति ॥ ७—८ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—४ ॥

ब्रह्मनिर्वाणम् आनन्दरूपं ब्रह्म ॥ ५—१० ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

आत्मनः सिद्धार्थतां कृतज्ञतां चाविष्कुर्वन्नाह राजेत्याह सूतः—एतदिति । मुनिना शुकेनाभिहितम् एतत् किं भूयः श्रोतुमिच्छसी त्येतन्निशम्य कथम्भूतेन समेनेति भावप्रधानो निर्देशः साम्येन निखिलात्मनः पश्यतीति तथा तेन मतेन नम्रेण मूर्ध्ना तस्य पादपद्ममुपसृत्य संस्पृश्य स विष्णुरातः परीक्षित् तं मुनिं प्रति इदं वक्ष्यमाणमाह ॥ १ ॥

उक्तिमेवाह—सिद्ध इति । सिद्धोऽस्मीति सिद्धार्थोऽस्मि कुतः यतः भवताऽनुगृहीतोऽस्मि कोऽसावनुग्रहः ? मे मह्यमनादिनिधनो हरिः यशःश्रवणप्राप्त्युपायश्च भाषित इति शेषः ॥ २ ॥

करुणात्मतामाविष्करोति—नेति । अच्युते आत्मा मनो येषां तेषाम् अत एव महतां यत् वात्सल्यसौशील्यादिगुणोत्कृष्टानां भवतामिदं नात्यद्भुतं किन्तद्वदेवेत्थं एव तापत्रयतप्तेषु भूतेष्वनुग्रह इत्येतत् ॥ ३ ॥

पुराणसंहितामिति । भवतः सकाशाद्भौष्म श्रुतवन्तः कथम्भूतां वक्ष्यां संहितायाम् ॥ ४ ॥

सिद्धोऽस्मीत्येतदुपपादयति—भगवन् ! इति । अभयहेतुत्वेनात्मानं विशिनष्टि, त्वया दर्शितमभयं निर्वाणमानन्दरूपं (मार्गं) ब्रह्म प्रविष्टः तदनुभवामि इत्यर्थः ॥ ५ ॥

तदुक्तं किं भूयः श्रोतुमिच्छसीति तत्र सिद्धोऽहं न किञ्चिच्छ्रोतुमिच्छामि किन्त्वनुज्ञां देहीत्याह—अनुजानीहि हे ब्रह्मन् ! वाचं यच्छामि मौनं बिभर्मि मुक्ताः कामाः आशया तद्वासनाश्च यस्मात्तथैव अधोक्षजे निवेश्यासून् प्राणान् विसृजामि तदर्थं मामनुजानीहि ॥ ६ ॥

पुनरपि कृतार्थतामेवाविष्करोति—अज्ञानमिति । ज्ञानमुपदेशजन्यं विज्ञानं भगवदनुभवात्मकन्तन्निष्ठयाऽज्ञानन्देहात्मभ्रमः स्वतन्त्रात्मभ्रममूलं निरस्तं भवतास्तेनं केवलं सुखरूपं भगवतः परं स्वरूपं यतो दर्शितम् ॥ ७ ॥

इतीति । तं राजानमनुज्ञायानुज्ञातेन नरदेवेन राज्ञा पूजितः भिक्षुभिः मुनिभिः सह जगाम ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

श्रीनारायणानुग्रहेण परीक्षितो देहवियोगलक्षणं मरणं जनमेजयस्य पितृभक्तिप्रदर्शनाय सर्पयागः शकलस्य च शाखस्य वर्विभागपातोपेक्षां कथयत्यस्मिन्नध्याये; तत्रादौ परीक्षितः शुकानुज्ञानदानप्रार्थनाप्रकारं वक्तुमाह—एतदिति । एतत्पुराणं निखिलं पूर्णमात्मानं पश्यतीति निखिलात्मदृक् तेन समस्तदर्शिनेत्यर्थः वा ॥ १ ॥

सिद्धः सम्पादितपुरुषार्थदेहः ॥ २ ॥

दीनेष्वनुग्रह इति वर्त्तते ॥ ३ ॥

कोऽयमनुग्रह इति तमाह—पुराणेति ॥ ४ ॥

भयाभावे निमित्तमाह—प्रविष्ट इति । निर्वाणमानन्दं प्राकृतशरीररहितं वा ॥ ५ ॥

कामानामाशयः शयनं यस्मात्तत्तथाऽधोक्षजे निगृह्याऽधोक्षजे प्रवेक्ष्ये ॥ ६ ॥

क्षेमं मङ्गलं "क्षेमो ना प्रतिरक्षायां मोक्षेऽन्यक्षी तु मङ्गले" इति यादवः ॥ ७—८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १ ॥

सिद्धोऽस्मीत्यादि । किञ्च, अच्युतात्मनाम् अच्युतस्यैवात्मा स्वभावो येषां तेषां महतामात्मारामाणामपीति तद्भावभावितत्वादनुग्रहादयो गुणा युक्ता एव तस्मान्नात्यद्भुतमित्यर्थः ॥ २ ॥ ४ ॥

यस्माद्भौष्म तस्मादेव भगवन्निति अधुना तु यदुपादिष्टं तच्च मम जातमेवेत्याह—प्रविष्ट इति निर्वाणं परमानन्दस्वरूपं ब्रह्म सर्वतो बृहद्भगवत्तत्त्वं प्रविष्टस्तस्मिन्नाविष्ट इत्यर्थः ॥ ५ ॥

अधोक्षजे श्रीकृष्णे "अधोऽनेन शयानेन" इत्यादि श्रीहरिवंशोक्तेः ॥ ६ ॥

भगवतःपदमित्यत्र पदशब्दस्य चरणारविन्दवाचकत्वं "ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम्" इत्येवाग्रिम प्रथमे साधकम् ॥ ७–८ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

षष्ठे कृष्णपदप्राप्तीराज्ञोऽथ जनमेजयात् ।
सर्पहोमस्ततो वेदत्रयशाखोपवर्णनम् ॥

निखिलात्मा श्रीकृष्णस्तं पश्यतीति तेन यद्वा, निखिलानामन्वा, त्मानं मनः [illegible]ात्कालिकेन ब्रह्मज्ञानोपदेशेन तत्रत्यानां के[illegible] मनः आनन्दितमिति भावः । यतः समेन ॥ १ [illegible]

सि[illegible]ऽस्मि मे साक्षादिति गर्भे बाल्ये च साक्षात्क[illegible]णः स एवं भाषितस्त्वया स एव मया [illegible]

अच्युत [illegible]णां तेषाम् ॥ ३ ॥

ननु, म[illegible]क: [illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

इत्यपेक्षायामाह-पुराणेति । भगवाननुवर्ण्यते इत्यन्यवर्णन- स्यापि तत्पोषणार्थत्वेन तदङ्गत्वात् भगवदनुवर्णनत्वमेवेति भावः ॥ ४ ॥

किन्त्वेकमेव वाक्यं सम्यगनोऽभिप्रेतं त्वया मां प्रति प्रोक्तं यद्यपि तत्तदपीशाकूतवतो ममैतावदेवासह्यमभूदित्याह-हे भगवन् ! सर्वज्ञ ! मच्चित्तस्य भक्त्येकनिष्ठत्वं जानन्नपि किमेवमुपदिशसीति भावः । तक्षकादिभ्यस्तथा विविधजन्मान्तरप्राप्तेभ्यो मृत्युभ्यः सकाशादहं न बिभेमि किन्तु त्वया दर्शितमभयं ब्रह्म निर्वाणं प्रविष्टः सन्नेव बिभेमीत्यर्थः । अत्र गृहे स्थितो नानोपद्रवेभ्यो न बिभेमि किन्तु वनं प्रविष्टः सन्नेवेति यत् तस्मादहं न प्रवि- क्ष्यामीति तत्राभिप्रायः तथैवात्रापि तक्षकादिभ्यः पुनः पुन- र्मृत्युभ्यश्च सकाशादपि त्वया दर्शितादुब्रह्मनिर्वाणान्मम महाभय- मिति वाक्यार्थः । तेन पञ्चमस्कन्धवाक्याद्भगवदीयत्वेनैव समाप्त सर्वार्थानां "नारायणपराः सर्वे न कुतश्चनबिभ्यति । स्वर्गापवर्ग- नरकेष्वपि तुल्यार्थदर्शिनः" इत्युक्तवता भगवता श्रीमन्महा- रुद्रेणैव प्रकटिताभिप्रायाणामस्माकं भक्तानां निर्वाणमोक्षः स्वदृशमस्य एव तत्रापि "पुनश्च भूयाद्भगवत्यनन्ते रतिः प्रसङ्गश्च तदाश्रयेषु । महत्सु यां यामुपयामि सृष्टिं मैत्र्यस्तु सर्वत्र नमो द्विजेभ्यः" इति प्रायोपवेशारम्भत एव प्रतिज्ञातवन्तं मामपि ब्रह्मनिर्वाणमुपदिशामीति श्रीमुनीन्द्रे ईदृशेन ध्वनिना तथापि तस्य तद्भक्तिनिष्ठां परीक्षमाणस्य सुखमेवाभूत् यथा रामा- रहसे माद्यां लङ्कयन्तीनां व्रजसुन्दरीणां श्रीरुक्मिण्या कृष्णस्य अत्र किञ्चिदाक्षेपवाक्यमेव "स्वामात्म वचिम विदुषां समनायोऽत्र तिष्ठति" इति "आत्मीयां मतिमादाय स्थितानात्र निर्दिष्ट तत्" इत्यस्य पूर्वार्धान्ते यथा किञ्चिदाक्षेपवाक्यं [illegible]- तया व्याख्यानात् व्याख्यानान्तरं तु शास्त्रस्य [illegible]प्रतिपा- दकं भक्तैरग्राह्यम् ॥ ५ ॥

तस्मात् कृपया मामेतदेवाज्ञापयस्वैतत् प्रतिकूलमित्याह— अनुजानीहि अनुज्ञां देहीत्यर्थः । अधोक्षजे श्रीकृष्णे मुक्तकामा- शयं त्यक्तकामवासनम् ॥ ६ ॥

ज्ञानं भगवद्विषयकं विज्ञानं तदैश्वर्यादिकं [illegible] ज्ञान- विज्ञाननिष्ठा तव कुतो जातेत्यत [illegible], भवतीति । परं, स्वरूपं चरणकमलं धाम वा ॥ ७ ॥

भिक्षुभिः-सर्वमुनीन्द्रैः ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

षष्ठाध्याये श्रीशुकस्य गमनं राज्ञो मुक्तिः सर्पयज्ञे वेदशाखा प्रवृत्तिश्च वर्ण्यते-एतदिति । निखिलात्मानं सर्वात्मानं श्रीकृष्णं पश्यतीति संज्ञेन ॥ १ ॥

चकारात् तत्प्राप्तिसाधनं च भक्तिम् ॥ २—३ ॥

अभीक्ष्णं श्रुतवन्तः ॥ ४

त्वया दर्शितं ब्रह्म श्रीकृष्णाख्यं निर्वाणं समाप्तानिरयानन्द- [illegible] ॥ ६ ॥

यदुक्तं किं भूयः श्रोतुमिच्छसि" इति तत्र अन्यत्र प्राप्तनिष्ठ- त्वात् किञ्चिच्छ्रवणेच्छाऽस्तीत्याह— अनुज्ञां देहीत्याह—अनुजानीहीति । वाचं वागिन्द्रियोपलक्षितानि सर्वाणीन्द्रियाणि यच्छामि निवृत्ति- कानि करोमि अधोक्षजे श्रीकृष्णे चेतः प्रवेश्य असून् विसृ- जामि ॥ ६ ॥

भगवतः परं प्रकृतिगणकलाद्या ह्यदेशीयं पदं स्थानं दर्शि- तम लोकं तं गोपानां तमसः परमित्यादिषु प्रथमः दर्शित- मेव देहं हित्वा तत्र यास्यामीति भावः ॥ ७—८ ॥

भाषा टीका ।

त्रिवेदिव्यासकर्तृ श्रीकृष्णमुखेन नमः ।

सूत उवाच ।

श्रीसूतजी बोले, कि—सब आत्मान को समता से देखने वाले, व्यासनन्दन श्रीशुकदेवजी के कथन को सुनकर विष्णु- रात राजा परीक्षित् । श्रीशुकदेवजी के चरण कमल के समीप आकर मस्तक झुकाकर अंजलि जोड़कर ऐसे बोलते हुए ॥ १ ॥

राजोवाच ।

राजा बोले, कि—हे भगवन् ! करुणा रस परिपूरित हृदय ! आप के अनुग्रह से मैं अब कृतार्थ हुआ । क्योंकि ? जो आपने साक्षात् अनादिनिधन श्रीहरि का श्रवण कराया है ॥ २ ॥

अच्युत श्रीकृष्ण में मन लगाने वाले आप सदृश महा- त्माजनों की यह बात, कुछ मैं अद्भुत नहीं मानता हूं । जो कि—संसार के तापों से तप्त हुए मेरे सदृश अज्ञ प्राणियों पर अनुग्रह करना । यह तो भगवज्जनों का काम ही है ॥ ३ ॥

यह श्रीमद्भागवत महापुराण की संहिता मैंने आप से श्रवण करी, कि—जिसमें उत्तमश्लोक श्रीभगवान् ही का वर्णन किया गया है ॥ ४

हे भगवन् ! मैं तक्षकादि रूप मृत्युओं से नहीं डरता हूं क्योंकि ? मैं आनन्द मात्र ब्रह्म के विषे प्रविष्ट होगया अर्थात् ब्रह्मानुभव में मग्न होरहा हूं जोकि, अभय ब्रह्म आपने दिखाया है ॥ ५ ॥

हे ब्रह्मन् ! अब आप मुझे आज्ञा दीजिये मैं अपनी वाणी का उपराम करूं । और सम्पूर्ण कामनाओं से मुक्त ऐसे अपने चित्तको अधोक्षज श्रीकृष्ण में लगा कर प्राणों का त्याग करूं ॥ ६ ॥

और ज्ञान विज्ञान की निष्ठा से मेरा अज्ञान निवृत्त हो गया, आपने परम क्षेम रूप उत्कृष्ट भगवान् का पद दिखा- दिया है ॥ ७ ॥

सूत उवाच ।

श्रीसूतजी बोले, कि—हे शौनकादिकऋषियो ! जब राजा ने श्रीशुकदेवजी से ऐसी प्रार्थना करी, और विधिपूर्वक पूजन किया, तब भगवान् श्रीव्यासनन्दन बादरायणि ने पूजित होकर

परीक्षिदपि राजर्षिरात्मन्यात्मानमात्मना ।
समाधाय परं दध्यावस्पन्दासुर्यथा तरुः ॥ ९ ॥
प्राक्कूले बर्हिष्यासीनो गङ्गाकूल उदङ्मुखः ।
ब्रह्मभूतो महायोगी निःसङ्गश्छिन्नसंशयः ॥ १० ॥
तक्षकः प्रहितो विप्राः ! क्रुद्धेन द्विजसूनुना ।
हन्तुकामो नृपं गच्छन् ददर्श पथि कश्यपम् ॥ ११ ॥
तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणम् ।
द्विजरूपप्रतिच्छन्नः कामरूपोऽदशन्नृपम् ॥ १२ ॥
ब्रह्मभूतस्य राजर्षेर्देहोऽहिगरलाग्निना ।
बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनाम् ॥ १३ ॥
हाहाकारो महानासीद्भुवि खे दिक्षु सर्वतः ।
विस्मिता ह्यभवन् सर्वे देवासुरनरादयः ॥ १४ ॥
देवदुन्दुभयो नेदुर्गन्धर्वाप्सरसो जगुः ।
ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः ॥ १५ ॥
(१)जन्मेजयः स्वपितरं श्रुत्वा तक्षकभक्षितम् ।
यथा जुहाव सङ्क्रुद्धो नागान्सत्रे सहद्विजैः ॥ १६ ॥

भाषा टीका ।

राजा को आज्ञा देकर अनेक सन्यासी विरक्त भागवत पर महंतों के सहित वहां से सिधारते हुए ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मना बुद्ध्या आत्मानं मन आत्मनि प्रत्यक् प्रकाशे समाधाय परमात्मानं दध्यौ अस्पन्दासुः लीनप्राणः यथा तरुः स्थाणुः ॥ ९ ॥

तमेव विशिनष्टि—प्राक्कूले प्रागग्रे बर्हिषि दर्भे ॥ १० ॥

तदेवं ब्रह्मभूते तस्मिंस्तक्षकागमनादिकं पिष्टपेषणमिवाभवदिति दर्शयति—तक्षक इति त्रिभिः । हे विप्राः ! ॥ ११ ॥

तं विषचिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनायागच्छन्तम् तत्र स्वाशीर्वादवटवृक्षस्य भस्मीभूतस्य पुनरङ्कुरादिक्रमेणोत्थापना-द्विषहारिणं तदपेक्षितद्रविणैः सन्तर्प्य ततो निवर्त्य द्विजरूपेण तिरोहितः सन्नदशत् ॥ १२ ॥

तस्य पुनरुक्तत्वमिव जातमित्याह—ब्रह्मभूतस्येति ॥ १३ ॥

तत्र यद्यपि सर्वेषां दुःखं च ततः परमुत्सवं चाऽऽसीत्, तथाप्याह । हाहाकार इति ॥ १४—१५ ॥

प्रासङ्गिकमाह—जन्मेजय इत्यादि । सर्पाभिचारसत्रे द्विजैः सह वर्तमानो यथावद्यजुहाव जुहावेति वा सर्वसर्पावाहने कारणमाह—सङ्क्रुद्ध इति ॥ १६—१७—१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

परीक्षिदपि इति । आत्मनि परमात्मन्यात्मानमात्मनैव सम्यगाधाय परमात्मन्येकरसं स्वात्मानमेव ध्यातवानित्यर्थः ॥ ९ ॥

गङ्गातीरे प्रागग्रदर्भेषु उदङ्मुख आसीनः यथा तरुस्तद्वदस्पन्दासुः तिरोहितसर्वेन्द्रि[illegible]व्यापारः निस्सङ्गः देहतदनुबन्ध्यभिमानरहितः छिन्नाः [illegible]जीवपरमात्मभेदाभेदादिसंशयाः येन सः [illegible]युक्तः ब्रह्मभूतः संशुद्धात्मस्वरूपः ब्रह्मशब्दो [illegible] मुक्तोऽभवदित्यर्थः ॥ १० ॥

तदा [illegible]जसूनुना प्रचोदितः तक्षकः नृपं हन्तुकामो [illegible] कश्यपं ददर्श ॥ ११ ॥

तं विष[illegible]रक्षणेन [निर्धार्य तत]द्रव्यार्जनाय गच्छन्तं [illegible]भूतस्य पुनरङ्कुरादिक्रमेणोत्पाद-

(१) जनमेजय इति विज० वीर०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

नाशिविषहारिणं तदपेक्षितद्रविणैः सन्तर्प्य निवार्य द्विजरूपेण तिरोहितः सन्नदशत् ॥ १२ ॥

निर्जीवस्य शरीरस्य दंशनेन भस्मीकरणं पुत्रकल्पमिव जातमित्याह--ब्रह्मभूतस्येति। मुक्तावस्थां प्राप्तस्य राजर्षेर्देहः सर्वदेहिनां पश्यतां सतां सद्य एव गरजाग्निना भस्मसादभवत् ॥१३॥

तदर्शनजं सर्वेषां दुःखं ततः परमुत्सवञ्चाह--द्वाभ्याम्। हाहाकार इति। भुवि खे आकाशे सर्वतः सर्वासु दिक्षु ॥ १४ ॥

देवदुन्दुभय इति स्वयमेव दध्वनुः ॥ १५ ॥

प्रासङ्गिकमाह--जनमेजय इत्यादिना। तदा सर्प्रे क्रोधेन प्रारब्धे सर्पाभिचारयोगे सर्पानाजुहाव मन्त्रैराकर्षं सर्वसर्पाह्वाने कारणं सत्रकुल इति ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

अस्पन्दासुर्निश्चलेन्द्रियः विषयव्यापारशून्येन्द्रिय इत्यर्थः ॥ ९ ॥
ब्रह्मणि भूतः ॥ १० ॥
हे विप्राः ! ॥ ११ ॥ १२ ॥
अहिगरजाग्निना सर्पविषाग्निना ॥ १३—१५ ॥
कथान्तरमारभ्यते—जनमेजय इत्यादिना ॥ १६ ॥ १७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

परमधोक्षजं तदाख्यं श्रीकृष्णमेव दध्यौ ब्रह्मभूतः प्रसन्नेत्यादिरीत्या ब्रह्मभूतः ॥ ९—२९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

आत्मना बुद्ध्या आत्मानं श्रीकृष्णम् आत्मनि मनसि परम् अतिशयेन अस्पन्दासुः अन्तरेव लीनप्राणः ॥ ९ ॥

प्राक्कूले बर्हिषि प्रागग्रे दर्भे त्रिगुणैर्भिन्नत्वाद्ब्रह्मभूतः "तासां मध्ये साक्षाद्ब्रह्म गोपालपुरी हि" इतिवत् ॥ १० ॥

तदेवं ब्रह्मभूते तस्मिन् तक्षकागमनादिकं शिष्टेष्वश्रमवदिति दर्शयति--तक्षक इति त्रिभिः ॥ ११ ॥

तं विषचिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनार्थमागच्छन्तं तत्र ज्ञातविद्यावटवृक्षस्य भस्मीभूतस्य पुनरङ्कुरादिकमेणोत्थापनात् विषहारिणं तदपेक्षितद्रविणैः सन्तर्प्य ततो निवर्त्य द्विजरूपेण तिरोहितः सन्नदशत् ॥ १२ ॥

तत्र पुत्रकल्पमित्याह--ब्रह्मभूतस्येति ॥ १३—१५ ॥

यथा यथावत् निरसर्पमिदं जगत् करिष्य इति वदन् क्रुद्धः द्विजैः सह स्थितः सन् ॥ १६—२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अस्पन्दासुः जितप्राणः ॥ ९ ॥

प्राक्कूले बर्हिषि प्रागग्रे दर्भे ब्रह्मभूतं प्राधान्ये प्राप्तं येन

प्रकृतेः परं ब्रह्मप्राप्तस्य देहो भस्मसाद्बभूव राजर्षिस्तु "एतां गतिं भागवतो गतो यः स वै पुनर्नेह विषज्जतेऽङ्ग" इति श्रीशुकप्रोक्तेन मार्गेण प्रकृतेः परं लोकं परं विरजस्कं निशोकं याज्ययत्वं भागवतप्रधानः इति सर्वेषां महामुनीनां वचनादित्यर्थः ॥ १३--२१ ॥

भाषा टीका।

राजऋषि परीक्षित् भी अपने आप अपने मनको परमात्मा के विषे लगाकर वृक्ष के तरह निष्पन्दप्राण वाले होकर परमात्मा का ध्यान करने लगे ॥ ९ ॥

श्रीविष्णुपदी के पूर्व किनारे पर उत्तर दिशा को मुखकर कुशके आसन पर बैठकर, समस्त संगों को त्यागकर संशय जिनके सब दूर हुए, ऐसे महायोगी राजा परीक्षित् ब्रह्मभूत अर्थात् मुक्तप्राय होकर श्रीकृष्ण का ध्यान करते हुए ॥ १० ॥

सूत पौराणिक बोले, कि—हे विप्रहो ! क्रुद्ध ब्राह्मण के पुत्र के शाप से प्रेरित राजा को मारने की कामना वाला तक्षक सर्प राजा को डसने को चला, तहां मार्ग में तक्षक ने कश्यप को देखा ॥ ११ ॥

तक्षक ने ब्राह्मण से पूछा कि-कहां जाते हो विप्र बोला, कि—राजा परीक्षित् को सर्प के विष से जिवाकर द्रव्य लाऊंगा, तब तक्षक ने कहा कि-यदि तुमारी इतनी शक्ति है तो मैं इस हरे भरे वट के पौदे को डसता हूं तुम अच्छा करो इतना कहकर तक्षक ने वट के वृक्ष में दंत लगाये कि वट का वृक्ष सूख गया, ब्राह्मण ने अपनी विद्या से वृक्ष को हरा कर दिया। तब तक्षक को यह विश्वास हुआ कि यह ब्राह्मण अवश्य ही राजा को अच्छा कर देगा तब मेरा काटनाही निष्फल होगा, ऐसा विचार तक्षक ने उपेक्षित द्रव्य देकर तृप्त कर उस विषहरने वाले ब्राह्मण को निवृत्त किया। और यथेष्ट रूप धारण करने वाले उस तक्षक ने ब्राह्मण का रूप लेकर राजा के समीप जाकर छिपकर राजा को डस लिया ॥ १२ ॥

इस समय पर मुक्त स्वरूप राजऋषि परीक्षित् का देह सर्प के विष की अग्नि से, सब प्राणियों के देखते २ तत्काल भस्म होगया ॥ १३ ॥

उस समय पृथिवी आकाश और सब दिशाओं में बड़ा हा हा कार शब्द मचगया। और देव असुर मनुष्य आदि सब ही लोग विस्मय को प्राप्त होते हुए ॥ १४ ॥

आकाश में देवताओं के दुन्दुभि बाजने लगे, गन्धर्व गान करने लगे, अप्सरा पुष्पों की वर्षा करने लगीं, देव लोग जय जय शब्द करने लगे, ॥ १५ ॥

परीक्षित् महाराज के पुत्र राजा जनमेजय ने अपने पिता को तक्षक सर्प से भक्षित सुन कर बड़ा क्रोध किया, और ब्राह्मणों के साथ सर्प यज्ञ में सर्पों का अच्छी तरह हवन करने लगा ॥ १६ ॥

सर्पसत्रे समिद्धाग्नौ दह्यमानान् महोरगान् ।
दृष्ट्वेन्द्रं भयसंविग्नस्तक्षकः शरणं ययौ ॥ १७ ॥
अपश्यंस्तक्षकं तत्र राजा पारीक्षितो द्विजान् ।
उवाच तक्षकः कस्मान्न दह्येतोरगाधमः ॥ १८ ॥
तं गोपायति राजेन्द्र ! शक्रः शरणमागतम् ।
तेन संस्तम्भितः सर्पस्तस्मान्नाऽग्नौ पतत्यसौ ॥ १९ ॥
पारीक्षित इति श्रुत्वा प्राहर्त्विज उदारधीः ।
सहेन्द्रस्तक्षको विप्राः ! नाग्नौ किमिति पात्यते ॥ २० ॥
तच्छ्रुत्वाऽऽजुहुवुर्विप्राः सहेन्द्रं तक्षकं मखे ।
तक्षकाऽऽशु पतस्वेह सहेन्द्रेण मरुत्वता ॥ २१ ॥
इति ब्रह्मोदिताक्षेपैः स्थानादिन्द्रः प्रचालितः ।
बभूव सम्भ्रान्तमतिः सविमानः सतक्षकः ॥ २२ ॥
तं पतन्तं विमानेन सह तक्षकमम्बरात् ।
विलोक्याङ्गिरसः प्राह राजानं तं बृहस्पतिः ॥ २३ ॥
नैष त्वया मनुष्येन्द्र ! वधमर्हति सर्पराट् ।
अनेन पीतममृतमथवा अजराऽमरः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कस्मात्तक्षको न दह्यतेऽत्युक्ताः सन्तो द्विजा ऊचुः तमिति तेनेन्द्रेण स्तम्भितः सर्पः ॥ १९ ॥

ऋत्विजः प्रत्याह—सहेन्द्र इन्द्रसहितः किमिति न पात्यते ॥२०॥

तद्राज्ञो वचः श्रुत्वा आजुहुवुः साक्षेपमाह्वानं दर्शयति—तक्षकेति । इहाग्रावाशु पतस्व मरुत्वता मरुद्गणवतेन्द्रेण सह ॥ २१ ॥

ब्राह्मणैरुक्तैराक्षेपैः परुषवाक्यैः ॥ २२ ॥

तं तक्षकम् आङ्गिरसः पुत्रो बृहस्पतिः प्राह ॥ २३—२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सर्पसत्र इति । समिद्धे प्रज्वलिते दह्यमानान्दृष्ट्वा तक्षकाख्यः सर्पः इन्द्रं शरणं ययौ ॥ १७ ॥

अपश्यन्निति । पारीक्षितः परीक्षितः पुत्रः तक्षकमपश्यन् उवाच उक्तिमेवाह तक्षक इति ॥ १८ ॥

इत्थं पृष्टाः प्राहुः विप्राः किमिति हे राजेन्द्र ! तं तक्षकं शरणं गतं शक्र इन्द्रः गोपायति रक्षति तस्मात्तेन शक्रेण संस्तम्भितः निवारितोऽसौ तक्षकः सर्पोऽग्नौ न पतति ॥ १९ ॥

इति विप्रवचः श्रुत्वा पारीक्षित उदारधीः विपुलबुद्धिः पुनः ऋत्विजः प्राह तदेवाह—सहेन्द्र इति । हे विप्राः ! इन्द्रसहितः तक्षकः किमिति न पात्यते ॥ २० ॥

तत्पारिक्षितोक्तं श्रुत्वा विप्राः ऋत्विजः मखे यागे सहेन्द्रं तक्षकमाजुहुवुः आह्वानप्रकारं दर्शयति—तक्षकेति । हे तक्षक मरुत्वता मरुद्गणावृतेनेन्द्रेण सहाग्रावाशु पतस्वेति ॥ २१ ॥

इत्थंभूतैः ब्राह्मणोदिताक्षेपैर्ब्राह्मणोक्तपरुषवाक्यैः सविमानः सतक्षकः स्थानात् प्रकम्पितः सम्भ्रान्तमतिर्भीतचित्तो बभूव ॥ २२ ॥

तमिति । तमिन्द्रमम्बरात्पतन्तमविलोक्याङ्गिरसः पुत्रो बृहस्पतिः राजानं जनमेजयं प्राह ॥ २३ ॥

तदाह चतुर्भिः—नेति । हे मनुष्येन्द्र ! एषः सर्पराट् तक्षकः त्वया वधं नार्हति न वध्य इत्यर्थः । तत्र हेतुः अनेन तक्षकेण ॥२४॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तत्र यज्ञे कुण्डाग्नौ ॥ १८ ॥ १९ ॥

हे विप्राः ! पात्यतामिति शेषः ॥ २० ॥

मरुत्वता मरुद्भिर्युक्तेन ॥ २१ ॥

ब्रह्मोदिताक्षेपैः ब्राह्मणैरुक्तैर्धर्षणमन्त्रवचनैः ॥ २२ ॥

आङ्गिरसोऽङ्गिरो गोत्रभवः किमित्यत्रेन्द्रस्योपेक्षाकारित्वपातेन हीन्द्रस्य ब्राह्मणोक्त्योऽभिभवो भवेद्गोत्तमत्वादिति चाद्भुता न कार्या जनमेजयस्य बालत्वानोऽक्षत्वेन तत्प्रीतिकामेनेन्द्रेणोपेक्षा कृता—

जीवितं मरणं जन्तोर्गतिः स्वेनैव कर्मणा ।
राजंस्ततोऽन्यो नान्यस्य प्रदाता सुखदुःखयोः ॥ २५ ॥
सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप ! ।
पञ्चत्वमृच्छते जन्तुर्भुङ्क्त आरब्धकर्म तत् ॥ २६ ॥
तस्मात्सत्रमिदं राजन् ! संस्थीयेताऽभिचारिकम् ।
सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते ॥ २७ ॥
सूत उवाच ।
इत्युक्तः स तथेत्याह महर्षेर्मानयन् वचः ।
सर्पसत्रादुपरतः पूजयामास वाक्पतिम् ॥ २८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"अनन्तानन्दमूर्तिं कीर्त्या याजयन् जनमेजयम् ।
शक्रोऽप्यशक्तयत्प्युरिन्द्र आसीदुपेक्षकः ॥
एवमेव अपीयां च कीर्तिं योजयताऽमुना ।
कृतोपेक्षा मदंहृया किमु विष्णुः परात्परः ॥
तस्माद्विष्णोरशक्यं न भूतमव्ययमत्रस्थापि ।
नत्वानिष्टं गुणैरेव पूर्णो नारायणः सदा" ॥ इति ॥ २३ ॥
अथ तस्मात् ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मरुत्वतेति । अरे इन्द्र ! तव देवेन्द्रोऽहमिति गर्वोऽस्ति तस्मात्त्वां देवैरपि समं पातयाम इति भावः "मरुतौ पवनामरौ" इत्यमरः ॥ २१ ॥
अथ मायाः खलु गता एवेति सम्भ्रान्ता व्याकुला मतिः यस्य सः ॥ २२ ॥
आङ्गिरसः आङ्गिरसः पुत्र इति गौरवव्यञ्जना एव सतक्षक इन्द्रः ॥ २३ ॥
मनुष्येन्द्रेण त्वया देवेन्द्रस्य वधानौचित्यात् सर्वथा तक्षकेण सह राजत इति सः अथ अत एव वै निश्चितम अजरामरः ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ब्रह्मोदिताक्षेपैः ब्राह्मणोक्तपरुषवाक्यैः ॥ २२ ॥
आङ्गिरसः पुत्रः बृहस्पतिः ॥ २३—२५ ॥

भाषाटीका ।

दीप्ताग्नि वाले सर्पयज्ञ में बड़े २ सर्पों को जलते हुए देखकर तक्षक बड़ा घबड़ाया, और इन्द्र के शरण आता हुआ ॥ १७ ॥

परीक्षित् के पुत्र राजा जनमेजय उस जगह तक्षक को न देखकर ब्राह्मणों से बोले, कि—सर्पों में अधम वह तक्षक क्यों नहीं जलता है ॥ १८ ॥

तब ब्राह्मण लोग राजा से बोले, कि—हे राजेन्द्र ! वह तक्षक इन्द्र के शरण गया है, इस कारण इन्द्र उसकी रक्षा कर रहा है । इन्द्र के स्तंभन करने से वह अग्नि में नहीं पड़ता है ॥ ॥ १९ ॥

उदार बुद्धि वाले जनमेजय ऐसा सुनकर ऋत्विजों से बोले, कि—हे विप्रो ! तो फिर इन्द्र सहित तक्षक को क्यों नहीं अग्नि में गिराते हो, ऐसा मंत्र पढ़ो कि—जिसमें तक्षक सहित इन्द्र का सिंहासन कुंड में पड़े ॥ २० ॥

राजा के उस वचन को सुन कर ब्राह्मण लोग उस यज्ञ में इन्द्र सहित तक्षक के हवन करने को मंत्र पढ़ने हुए । ब्राह्मण लोग मंत्र में बोले, कि—हे तक्षक ! तू देवताओं के स्वामी इन्द्र सहित शीघ्र पड़ ॥ २१ ॥

इस प्रकार के ब्राह्मणों के परुष (कठिन) वाक्यों से इन्द्र भी विमान और तक्षक सहित चलायमान भया, और घबड़ाया ॥ २२ ॥

इन्द्र को आकाश से तक्षक और विमान सहित गिरते हुए देखकर, अंगिरा के पुत्र बृहस्पतिजी महाराज राजा जनमेजय से कहने लगे ॥ २३ ॥

देवगुरु बृहस्पतिजी बोले, कि—हे मनुष्येन्द्र ! आपको इस सर्प का वध करना उचित नहीं, क्योंकि—इसने अमृत पान किया है इसी से वह अजर अमर हुआ है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भवतु नामाऽजरामरस्तथाऽपि पितृमारकं वध्यामीति चेत्तत्राऽऽह-जीवितमिति । गतिः परलोकः अतो दुर्मरणनिमित्ता पितुर्दुर्गतिरनेन कृतेऽपि न शङ्कनीयेत्यर्थः ॥ २५ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

कथमन्यः सुखदुःखप्रदाता नास्ति सर्पादीनामुपलभ्यमानत्वादिति चेत्तत्राऽऽह-सर्पादिना जन्तुः पञ्चत्वं मृत्युमृच्छति प्राप्नोतीति यत्तदारब्धं कर्मैव भुङ्क्ते स्वकर्मप्रयुक्ता एव सर्पादयो न स्वतन्त्रा इति भावः ॥ २६ ॥

संस्थीयत समाप्यताम् आभिचारिकं हिंसाफलम् दिष्टं प्राचीनं कर्म अतः सर्पादयप्रयुक्तस्य तवाप्ययं नापराध इति भावः ॥ २७ ॥

वाक्पतिं बृहस्पतिम् ॥ २८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पितृघातकतक्षकविषयक्रोधशान्तये तत्त्वमुपदिशति-जीवितमिति । जन्तोः प्राणिनः गतिः स्वर्गनरकादिगतिश्च अतो हे राजन् ! तेन स्वकर्मणा विना सुखदुःखप्रदः नान्योऽस्तीत्यर्थः ॥ २५ ॥

नन्वपरोक्षं तक्षकेण मत्पिता दग्धो दृष्टः नतु कर्मणेत्यत आह-सर्पेति । सर्पादिभिः जन्तुः मरणमृच्छति प्राप्नोति इति यत्तदारब्धं कर्मैव भुङ्क्ते स्वकृतकर्मप्रयुक्ताः सर्पादयो न स्वतन्त्रा इति भावः ॥ २६ ॥

तस्मादिति । यत एवं तस्मात्ते राजन् ! इदमाभिचारिकं सत्रं संस्थीयेत समाप्यतां वृथा निरपराधाः सर्पा दग्धाः, कुतः ? हि यस्माज्जनैर्दिष्टं प्रारब्धमेव भुज्यते ॥ २७ ॥

इतीति स जनमेजयः महर्षेर्बृहस्पतेर्वचो मानयंस्तथेत्याह, सर्पसत्रं समाप्यताम् इत्याह, सर्पसत्रादिति वाक्पतिं बृहस्पतिम् ॥२८॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मरणं देहवियोगलक्षणं गतिः परलोकावाप्तिलक्षणा स्वेन स्वतन्त्रेण हरिणैवाऽऽलोचितेन स्वानुष्ठितेन कर्मणा तेन स्वकर्मोद्बोधकेन हरिणा विना सुखदुःखयोः प्रदाताऽन्यो नास्ति ॥ २५ ॥

कर्मणः कारणत्वे सर्पादिना मृतो विष्णुमित्र इति कथमुपपद्येतेत्याशङ्क्य तेपि कर्म निमित्तीकृत्य कारणमिति भावेनाह-सर्पेति । आदिशब्देन वृक्षादिभ्यः पतनं गृह्यते सुखादिभोगहेतुत्वाच्च कर्मप्रधानकारणमित्याह—भुङ्क्त इति ॥ २६ ॥

फलितमाह-तस्मादिति । संस्थीयेत समाप्तं भवतु आभिचारिकं जनोपद्रवकारकं कर्म एकस्यापराधेनानपराधिबहुजननाशेन पापमेव स्यादिति भावेनाह-सर्पा इति । ननु, तज्जातित्वात्तक्षकापराध एषामपराधस्तस्मादनागसो न स्युः "एकः पापानि कुरुते फलं भुङ्क्ते महाजनः" इत्याशङ्क्य तक्षकस्याप्यपराधो नास्ति दैवेन तद्द्वारेण स्वकृतकर्मपूर्वकेण परीक्षितो मरणस्य क्लृप्तत्वादिति भावेनाह, जनैरिति । दिष्टं दैवकृतं कर्मफलम् ॥ २७ ॥

इत्यादियुक्तिपूर्वकेण वचसा वाक्पतिं बृहस्पतिं "वाग्वै बृहती" इतिश्रुतेः तद्बृहतोः करपल्लोश्चोरदेवतयोरिति सुरसत्तोपद्य ॥ २८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

हे राजन् ! स्वपितृशोकादेवं यद्व्यवस्यसि तत्र तत्त्वं शृण्वित्याह—जीवितमिति । गतिः स्वर्गादिः जन्तोरिति निकृष्टजीवस्यैवयं व्यवस्था तव पितुस्तु जीवितमरणभगवद्धामप्राप्तये भगवत्कृता एव तथाहि स्वहस्तेनैव द्रौपदपुत्रात् रक्षणं मुनिशापद्वारा निधनप्रापणं स्वप्रियशुकोपदेशद्वारा स्वपदप्रापणमिति तस्यैवैतानि कर्माणि तक्षकस्तु नाममात्रेणैव निमित्तमिति भावः ॥ २५ ॥

प्राकृत एव लोकः सर्पादिभिः कर्मवशान्मरणं प्राप्नोति नतु त्वत्पिता महाभक्तराज इत्याह—सर्पेति । जन्तुरिति निकृष्टजीवः ॥ २६ ॥

संस्थीयेत समाप्यतां यत आभिचारिकं निन्द्यं वृथैव एतावन्तः सर्पा दग्धाः तत्रापि तव नापराध इत्याह—जनैरिति । दिष्टं प्राचीनं कर्म सर्वैरपि स्वप्रारब्धफलं भुक्तमिदमिति भावः ॥ २७—२८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पञ्चत्वं मरणं सर्पादिभ्यो यत् ऋच्छति प्राप्नोति तत् प्रारब्धं कर्म भुङ्क्ते स्वारब्धं कर्म प्रेरिता एव सर्पादयो मारका इति भावः ॥ २६ ॥

तस्मात्तव पितुर्मरणस्य तत्कर्मफलत्वात् आभिचारिकं हिंसाफलं सत्रं संस्थीयेत समाप्यतां जनैः सर्वैरपि दिष्टं पूर्वकृतं कर्म भुज्यते, सर्पा अपि स्वादिष्टवशान्मृता इति भावः ॥ २७ ॥

वाक्पतिं बृहस्पतिम् ॥ २८ ॥

भाषा टीका ।

हे राजन् ! जन्तु का जीवन मरण और गति ये सब अपने कर्मसे ही होती हैं तिसी से तुम यह जानो कि—दूसरा दूसरे के सुख दुःख का देने वाला कोई नहीं है ॥ २५ ॥

हे नृप ! सर्प, चोर, अग्नि, बिजुली, क्षुधा, तृषा व्याधि, इत्यादिकों से जो प्राणी मृत्युको प्राप्त होता है, सो तुम यही जानो कि-वह अपने किये हुए प्रारब्ध कर्म कोही भोगता है ॥ २६ ॥

हे राजन् ! तस्मात् अब तुम यह शत्रुओं के मारने वाला यज्ञ समाप्त करो, बहुत से निरपराधी सर्प इसमें जलगये । और जन तो अपने प्रारब्धही को भोगते हैं इसमे इनका कुछ दोष नहीं है ॥ २७ ॥

जब बृहस्पतिजी ने इस प्रकार राजा को समझाया तब राजा जनमेजयभी महर्षि के वचन को मानते हुए यों बोले कि-महाराज ! जो आपकी आज्ञा, हम इस यज्ञ से उपरत हुवे ऐसे कहकर राजा सर्पों के यज्ञ से उपराम को प्राप्त होकर बृहस्पति जीका पूजन करते हुए ॥ २८ ॥

सैषा विष्णोर्महामायाऽबाध्ययाऽलक्षणा यया ।
मुह्यन्त्यस्यैवाऽऽत्मभूता भूतेषु गुणवृत्तिभिः ॥ २९ ॥
न यत्र[1] दम्भीत्यभया विराजिता मायात्मवादेऽसकृदात्मवादिभिः ।
न [2] यद्विवादो विविधस्तदाश्रयो मनश्च सङ्कल्पविकल्पवृत्ति यत् ॥ ३० ॥
न यत्र सृज्यं सृजतोभयोः परं[3] श्रेयश्च जीवस्त्रिभिरन्वितस्त्वहम् ।
तदेतदुत्सादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत्स्वयं[4] मुनिः ॥ ३१ ॥
परम्पदं वैष्णवमामनन्ति तद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः ।
विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समाहितैः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, कथं विदुषामप्येवं सम्मोहो यतो ब्रह्मकोपात्परीक्षितो मृत्युः जनमेजयकोपात्सर्पाणामित्यादि तत्राऽऽह—सैषेति । तस्या महत्त्वं दर्शयति अबाध्यया न बाध्यते इत्यबाध्यया अवितर्क्येत्यर्थः । कासावित्यत आह—यया अस्य विष्णोरेवाऽऽत्मभूता आत्मांशभूताः प्राणिनो गुणवृत्तिभिः क्रोधादिभिः सह भूतेषु मुह्यन्ति बाध्यबाधकतां व्रजन्तीत्यर्थः । ननु भगवद्विद्यया बाधितया देहेषु तेषां कुतो मोहः स्यात्तत्राऽऽह अबाध्यया बाधितुमशक्यया ॥ २९ ॥

कथं तर्हि मायातत्कार्यनिवृत्तिरित्याशङ्क्य श्रीविष्णुस्वरूपनिरूपणपूर्वकं तद्भजनात्मज्ञानेनैव निवृत्तिरिति शास्त्रार्थमुपसंहरति, न यत्रेति पञ्चभिः । दम्भीति मायाकपटत्वेनायं पुमानित्येवं भूतानां मुह्यत्यसकृद्विलक्षयमाना या मायेत्यर्थः । सात्मवादे क्रियमाणे आत्मवादिभिर्यत्राभया न विराजिता न प्रकाशिता किन्तु भीतेव स्वकार्यं मोहादिकमकुर्वती कथञ्चिद्वर्तते इति प्रतिपादितेत्यर्थः । तदुक्तम्—

"तस्मै नमो भगवते वासुदेवाय धीमहि ।
यन्मायया दुर्जयया मां वदन्ति जगद्गुरुम् ॥
विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया ।
विमोहिता विकत्थन्ते ममाहमिति दुर्धियः" ॥ इति

किञ्च यदस्मिन् तदाश्रयो मायाश्रयो विविधो विवादोऽपि नास्ति विशेषविषयत्वाद्विवादानां तस्य निर्विशेषत्वादिति भावः । सङ्कल्पविकल्पा वृत्तयो यस्य तन्मनोऽपि यत्र नास्ति सङ्कल्पविकल्पानामपि विशेषविषयत्वात् ॥ ३० ॥

किञ्च सृज्यं कर्म सृजता कारकवर्गेण सहोभयोः सृज्यस्रष्ट्रोः परं साध्यं श्रेयःफलमपि गुणत्रिभिः सृज्यस्रष्टृफलैरन्वितो जीवश्चाहङ्कारात्मको यत्र नास्ति अत एवोत्सादितौ निरस्तौ बाध्यबाधकौ यस्मिन् तदेतत्स्वयमात्मस्वरूपमित्यर्थः तद्धिमूर्मीनहङ्कारादीन्निषिध्य विरमेत् निवृत्तो भवेत् क्रीडेदित्यर्थः ॥ ३१ ॥

यतस्तद्वैष्णवं पदमामनन्तीत्याह—परमिति । यदेतत्तदेव परं वैष्णवं पदं स्वरूपमामनन्ति के अतत् आत्मव्यतिरिक्तमुत्सि-सृक्षवस्त्यक्तुमिच्छवः यतोऽनन्यसौहृदाः नान्यस्मिन् सौहृदं येषां ते कुतः ? दौरात्म्यं देहाद्यहंभावं विसृज्य देहेऽहङ्कारा-भावादन्यत्र सौहृदं नात्यन्तस्त्यक्तुमिच्छव इत्यर्थः । कथं नेति नेतीत्येवम् अत्र निःशङ्कमनुभवमपि प्रमाणयन्ति हृदोपगुह्य ध्यानादिना ततः समाहितैरवसितं निश्चितं यद्वा अवसितमवबद्धमात्मतया गृहीतमित्यर्थः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

गम्भीररया दुर्निरूपवेगा आत्मवादे आत्मनिरूपणे बुद्धिमात्रा वा माया न यत्र यस्मिन् परमात्मनि नास्ति विविधो विवादो न तदाश्रयः परमात्माश्रयः परमात्मा तु साधकबाधकाऽऽलोऽवर इत्यर्थः । मनश्च तत्प्रवणं न तदाश्रयमित्यर्थः ॥ ३० ॥

न यत्र सृज्यमिति यत्र परमात्मस्वरूपे सृज्यं शरीरं नास्ति सृजता इति सृज्यशरीरोत्पादकं निमित्तं कर्म च नास्ति उभयोः परं न कर्म तत्कृतदेहादिरूपं सृष्टं यस्मात् देवमनुष्यादिकाऽहङ्कारं च यत्र न वर्तते त्रिभिरन्वितः गुणत्रयवश्यो जीवश्च यः जीवरूपेणावस्थितो यः तन्मुनिः तादृशपरमात्मरूपमननपरः एवं पूर्णज्ञानाश्रयं निषिध्य ऊर्मीन् अशनायापिपासाशोकमोहजरामृत्यूंश्च निषिध्य विरमेत् शमः समाहितमनस्कतया निवृत्तव्यापारो भवेत् उत्सादितबाध्यबाधकमिति क्रियाविशेषणं परस्परमुद्धवाभिभवहेतुभूतं गुणत्रयं यथा उत्सादितं स्यात्तथा निषिद्धेत्यर्थः ॥ ३१ ॥

समाधिदशायामनुभवस्थैवं परस्वरूपमित्याह—परमपदमिति । पद्यते इति पदं स्वरूपं नेति नेतीति प्राकृतानि जडाजडवस्तु यादृशं तादृक् न भवतीत्याह—आमनन्तीति । अतद् विदचिद्वैलक्षण्यात् उत्सिसृक्षवः तद्व्यतिरिक्तं चेतनाचेतनं त्यक्तुं त्यक्तुमिच्छवः दौरात्म्यं रागद्वेषादि अन्यत्र भगवत्सौहृदव्यतिरिक्ते सौहृदं येषां नास्ति तैः अनन्यसौहृदैः तैः अवसितं निश्चितम् अनुभूतम् ॥ ३२—३३ ॥

(१) गम्भीररया इति शुकप० दुर्मोऽप्यतयाति वीर० विज०पा० (२) यद्विकार इति वीर० पा० । (३) यदर्थेति वीर० टी० (४) विरमेत्तत्स्वमुनिरिति शुकप० पा० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु, कथं विष्णुमप्येवं सम्मोहनं यतो ब्रह्मणाऽकाशवाण्यपरीक्षिता मृत्युः जनमेजयकोपाच्च सर्पाणामित्यादि तत्राह—सैवेति । बाध्यबाधकेति भावप्रधानो निर्देशः बाध्यत्वबाधकत्वे अत्रप्यापादयति तथा तत्त्वं न साक्षात्किन्तु जीवमोहनद्वारेत्यभिप्रेत्याह—ययेति । यया मायया निदानभूतया भूतेषु क्रीडाविषयेषु गुणवृत्तिभिः क्रीडादिभिरसावात्मा मुह्यति (ते) ॥ २९ ॥

विष्णोर्महामायेति सम्बन्धोक्त्या तस्यापि तया मोहादिशङ्कां वारयन् समाधिदशायामनुसन्धेयं परमात्मस्वरूपमाह—न यत्रेति । आत्मवादिभिः परमात्मस्वरूपनिरूपकैः सङ्कल्प्यात्मवादे परमात्मस्वरूपनिरूपणे क्रियमाणे दुर्विभाव्यतया दुर्विभाव्यत्वेन न विभाव्यते न स्वकार्यकरणेनावतिष्ठते सा माया यत्र परमात्मस्वरूपे न स्वकार्यक्षमेति किम्पुनर्वक्तव्यमित्यर्थः । किं च यदत्र परमात्मनि तदाश्रयः मायाश्रयः मायाप्रयुक्तमोहमूलकः विविधो विकारः कुतर्करूपो नास्ति तस्य तदविषयत्वादिति भावः । यदत्र सङ्कल्पविकल्पाभ्यां वर्तत इति तथा तन्मनश्च नास्ति न तद्विषयीकरोति निवृत्तसङ्कल्पविकल्पयोगपार्श्वशुद्धमनोविषयत्वादिति भावः ॥ ३० ॥

किञ्च नेति सृज्यं शरीरं सृजतीति सृजत् कर्म तेन सह सृज्यं यत्र नास्ति कर्म तदाश्रयं शरीरं च यत्र नास्तीत्यर्थः । उभयोः कर्मतत्कल्पितदेहयोः परं ताभ्यां साध्यं सुखदुःखादिरूपं फलं च यत्र नास्तीत्यर्थः । प्रपञ्चः देवमनुष्यादिशब्दजातं च यत्र न वर्तते तद्विलक्षणभूतं परमात्मस्वरूपमित्यर्थः । ततः किमत आह—जीवः स्वयं त्रिभिरन्वितोऽपि गुणत्रयवश्योऽपि तन्मुनिः तादृशपरमात्मस्वरूपमननपरः पुनःपृथिव्यादिविस्तरं निषिध्य परिहृत्य ऊर्मीनशनायापिपासाशोकमोहजरामृत्यूंश्च निषिध्य विरमेत् समाहितमनस्कतया निवृत्तव्यापारो भवेत् उत्सादितबाध्यबाधकमिति क्रियाविशेषणं परस्परम् उन्नताभिभवहेतुभूतं गुणत्रय यथोत्सादितं स्यात्तथा निषिध्येत्यर्थः ॥ ३१ ॥

किञ्च तदेव वैष्णवं पदं परमामनन्ति वैष्णवमित्यभेदसम्बन्धे विशेषणं परं प्रकृतिपुरुषविलक्षणं परं सर्वोत्कृष्टं वा पद्यत इति पदं स्वरूपं किं तत् यत्तदिति नेति प्रकृतिप्राकृतजडाजडवस्तु यादृशं तादृशं न भवतीत्यत उत्तिसिसृक्षवः तद्व्यतिरिक्तचेतनाचेतनं त्यक्तुमिच्छवः दौरात्म्यं रागद्वेषादिकमहं ममाभिमानं वा विसृज्य अनन्यसौहृदाः नान्यस्मिन् भगवद्व्यतिरिक्ते सौहृदं येषां ते हृद्युपगुह्य ध्यानादिनासंश्लिष्य समाहितैः समाधिनिष्ठैरध्यासितं निश्चितम् ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सुखादेर्जीवादृष्टमेव मुख्यं कारणं नान्यदित्याशङ्कां परिहरति—सैवेति । यादृशादृष्टाधिका सैषा महामाया महदपरिमितं माहात्म्यं तस्य विष्णोस्तस्मात् दुर्गाख्योच्यते याध्ये स्थितत्वात् बाध्यात्मत्वेन जानाति सत्त्वादिगुणवृत्तिभिः कार्यैः विषयैरित्यभिध्येयादिरिति शेषः ॥ २९ ॥

मुख्यात्मा परमात्मेति शङ्कामपाकरोति—नेति । आत्मवादिभिः उपनिषद्विचारचतुरैः पुरुषैः असकृद्बहुधात्मात्मवादे परमात्मविचारे कृते सति मायामोहनशक्तिर्यत्र हरौ न विराजते मोहकत्वेन न प्रवर्तते अन्यैर्दुर्विभाव्यतया स्थिताऽऽत्मा उपक्रमादितात्पर्यलिङ्गैः क्रियमाण एव विचारो निर्णायको ननु यथा प्रतीतार्थं इत्याह, नेति । त्रिविधो यद्विवादः तदाश्रयो ब्रह्मविषयो न भवति "यद्वाचानभ्युदितम्" इति श्रुतेः । तर्हि मननसमर्थस्य मनसो विषयत्वं स्यादित्याह—मनश्चेति । सोऽप्ययं मनोऽपि यद्ब्रह्म न विषयीकरोति "यन्मनसा न मनुते" इति श्रुतेः । सङ्कल्पविकल्पाभ्यां वृत्तियस्य तत्तथा अनेन मनसोऽस्थिरत्वेन विषयीकरणसामर्थ्यं नास्तीति सूचितं "मनसा वा अग्रे सङ्कल्पयत्यथ वाचा व्याहरति" इति श्रुतेः । वचो विषयो नेति किं वक्तव्यमिति कैमुत्यन्यायोऽप्यवधिं अत्र वागादिशब्देन तदभिमानिदेवता उपदिश्यन्ते तासां अस्वातन्त्र्येण प्रवृत्त्यनुपपत्तेः ॥ ३० ॥

सृज्यं विश्वं यत्र न वर्तते बाधकतयेति शेषः । उभयोर्देवासुरयोः परं निखिलम् आनन्दलक्षणं श्रेयः सृजता ददता येन नैवरूप्यनैर्घृण्यं नाप्येते इति शेषः । त्रिभिः सत्त्वादिगुणैर्धर्मार्थकामैर्वान्वितो जीवः स्वयं च यत्र न कश्चन विशेषमापादयतीति शेषः । यस्तदेतत् ब्रह्म जानाति तन्मुनिः स ज्ञानी तदूर्मीर्निषिध्य विरमेत कृत्यादिति शेषः कीदृशं ब्रह्म उत्सादितबाध्यबाधकम् उत्सादितौ बाध्यबाधकौ येन तत्तथा ॥ ३१ ॥

किन्नामधेयं ब्रह्मेति तत्राह—परं पदमिति । यदेति नेति इत्यनर्थोत्सिसृक्षवो विचक्षणाः यदेवं स्थितं तद्वैष्णवं पदमामनन्ति वदन्तीत्यन्वयः । कीदृशं तदिमवेत्र समाहितैः करणैरध्यासितं सम्यग्वशीकृतम् ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कथं तर्हि विष्णुर्दम्भीये न तस्य महामायेत्युच्यते तत्राह—न यत्रेति । यत्र विष्णौ यस्य विष्णोः सन्निधाने निमित्ते मा ईषत् विराजिता यत्किञ्चित् लब्धसामर्थ्यापि दम्भी दम्भप्रधानमित्याभिधा न भवति किन्तु तस्मिन् दम्भादर्शनात् सभियेव भवतीत्यर्थः । माया हि सदम्भ एव निरर्गला भवतीति तदुक्तं "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया" इति किञ्चात्मवादिभिरात्मवादे कर्तव्ये यत् यत्र तदाश्रयो विविधो विवादो न विद्यते आत्मनः परत्वादिति भावः । अतो मनश्चेति ततस्तु सुतरां विवादाभाव इति भावः । तदेवं तत्सान्निध्यमात्रेण स्थिता न तु तत्सम्मता तस्यामनासक्तत्वात् तदेवेति स्थितम् ॥ ३० ॥

मायाश्रयव्यवधानमसत्त्वं विवृणोति—न यत्र सृज्यमिति । जीवस्यस्वरूपमिथ्यात्वं निगमयति तत्पूर्वनिर्दिष्टमेतत्प्रकारमुत्सादितबाध्यबाधकं विष्णुतत्त्वमिति तदेतन्मननेनोर्मीर्माया-दीन्निषिध्य मुनिर्विरमेत् तस्मादन्यत्र स्वयमेव विरतो भवति न तु यत्नान्तरेणेत्यर्थः ॥ ३१ ॥

॰ श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पुनस्तदेव विवृणोति—परमपदमिति । अतत् विष्णुतत्त्वव्यतिरिक्तं दौरात्म्यं तस्मिन् सौहृदाभावं समाहितैस्तस्मिन् समाहितान्तःकरणैः आत्मारामैरपि वा भवति तदनुभूतम् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, कथं विदुषामप्येवं सम्मोहः ? यतो जनमेजयस्य कोपात् सर्पाणां यज्ञस्तत्सभासदां विदुषामपि विप्राणामाभिचारिके सत्रे प्रवर्त्तनमिति तत्राह—सैषेति । महत्त्वं दर्शयति, अव्ययया न लङ्घ्यत इत्यलङ्घ्यया अपनेतुमशक्ययेत्यर्थः । यया अव्यया विद्वद्भिरपि बाधितुमशक्यया मुह्यन्ति, के ते ? इत्यत आह, अस्यैव विष्णोरात्मभूता आत्मांशभूताः प्राणिनः भूतेषु प्राणिषु विषयेषु याः गुणवृत्तयः क्रोधद्वेषाद्यास्ताभिर्मुह्यन्ति ॥ २९ ॥

ननु, यदि क्रोधद्वेषादिमत्सु सर्वजीवेष्वेवास्या मायाया मोहकत्वेनाधिकारस्तर्हि कुत्र नाधिकार इति चेत् "विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया "विमोहिता विकत्थन्ते ममाहमिति दुर्धियः" इति ब्रह्मोक्तेर्भगवति विष्णौ भागवते च लोकेऽस्या नैवाधिकारः सत्यं कीदृशं तर्हि विष्णोः स्वरूपमित्यपेक्षायामाह—न यत्रेति त्रिभिः । यत्र विष्णुस्वरूपे माया न प्रभवति कीदृशी दम्भिनि इत्यभवति पुरुषे इणो गमने आक्रम इत्यर्थः अभया निर्भयेव विराजिता "इण् गतौ" क्रयन्तः विष्णौ तत्कर्त्री दम्भाभावात् तत्र सभयाविराजमानैव भवतीति भावः तथा आत्मवादिभिरपि मल्लवत् पुनः पुनः आत्मवादे प्रवर्तिते सति यत् यत्र विष्णुस्वरूपे स्फुरिते सति विवादो नास्ति कीदृशाः मध्यस्थाः मां मायामेवाश्रयन्त इति सः यदुक्तं "यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवन्ति" इति तथा सङ्कल्पविकल्परूपा मायिक्यो वृत्तयो यस्य तथाभूतं मनोऽपि यत्र नास्ति ॥ ३० ॥

यथा यत्र स्फुरिते सति सृज्यं वस्तु सृजता कारणवर्गेण सह न स्फुरतीत्यर्थः । यतः उभयोः परं सृज्यसृष्टृभ्यां पृथग्भूतं तस्य रूपं यथा यत्र स्फुरिते सति अपवर्गादिफलमपि न स्फुरति तथा त्रिभिर्गुणैर्जागरादिभिर्वा अन्वितो अहङ्कारात्मको जीवोऽपि न तत् तस्मादेतत् विष्णुस्वरूपम् उत्सादिता निरस्ता यास्या जीवा बाधका गुणाश्च यस्मिंस्तथाभूतम् ननु, तर्ह्येतत् कः प्रकाशयेत् तत्राह, निषिद्ध्येति स्वभक्त्युद्गतान् ऊर्मीन् कामक्रोधादीन् स्वयमेव तत्र विशेषतो रमेत तत्प्रसिद्धम् ॥ ३१ ॥

तद्वैष्णवं पदं विष्णोः स्वरूपम् आमनन्ति भक्ताः पुनः पुनः स्मरन्तोऽनुभवन्ति कीदृशाः दौरात्म्यम् अहममेति दौर्जन्यं विसृज्य नेति नेति नैतदनुकूलं नैतदनुकूलमिति कृत्वा अतत् तद्व्यतिरिक्तं देहगेहपुत्रकलत्रादिकमहं ममतास्पदं च उत्सिसृक्षवः क्रमेण त्यक्तुमिच्छवः यतोऽनन्येषु ऐकान्तिकभक्तेष्वेव सौहृदं येषां ते अतः समाहितैरेकाग्रचित्तैरेव भक्तैर्हृदा मनसा उपगुह्य अधिवसितं तद् वैष्णवं पदमवगत्य आप्यैः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ननु, शृङ्गिक्रोधात् परीक्षितो मृत्युः जनमेजयक्रोधात्सर्पाणां च मृत्युरित्येवम्भूते मोहे को हेतुरित्याह—सैषेति । यया अस्य विष्णोः आत्मभूताः आत्मन उत्पन्नाः स्वांशभूताः जीवाः गुणवृत्तिभिः क्रोधादिभिः भूतेषु देहेषु मुह्यन्ति बाध्यबाधकतां प्राप्नुवन्ति सा एषा मोहहेतुभूता विष्णोरेव महामाया ननु स्वमोहकरीं सर्वे कुतो न जानन्तीत्यत आह—अव्ययाव्ययादिरूपेण पृथिव्यादिरूपेण च अनुकूलतया प्रतीयमानापि मोहकतया न लक्ष्यते इत्यलक्ष्यया । ननु, एवम्भूतामहितकरीं कथञ्चिज्ज्ञात्वा कुतो न निवारयन्त्यत आह—अबाध्ययेति । विष्णुकृपां विना बाधयितुमशक्ययेत्यर्थः ॥ २९ ॥

कथं तर्हि महामायातो जीवस्य निर्मुक्तिरित्यत्र हरौ निष्ठातिशयेनेत्याह—न यत्रेत्यादिना । यत्र जीवे भगवति अभया विराजितापि माया स आत्मवादिभिः मल्लवदपि आत्मवादे आत्मनः परमात्मनः वा स्वरूपगुणादिनिर्णये क्रियमाणे इति हेतोः दम्भी न भवेत् अयमर्थः यस्य विष्णोः स्वरूपगुणादिनिर्णये क्रियमाणे मायागुणोऽपि अवद्यपरो दम्भी न भवति किन्तु साधुरेव भवति "अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः" इति श्रीमुखवचनात् यत् यस्मिन् परमात्मनि तदाश्रयः मायाश्रयः विविधो विवादोऽपि नास्ति सर्वस्यैकवेद्यत्वात् सङ्कल्पविकल्पवृत्ति मनुष्यं यन्मनस्तदपि यस्मिन् न प्रवर्तेत तस्मिन् परमात्मनि विष्णौ यदा जीवो विरमेत् तदा मायाविनिर्मुक्तो भवेदिति द्वयोरन्वयः ॥ ३० ॥

तस्मिन् विष्णौ जीवः ऊर्मीन् शोकमोहादीन् निषिध्य मुनिः मननशीलः सन् विरमेत् विशेषतो रमेत समुच्चयेत इति शेषः । ननु जीवस्येदं देहादिकं प्रियं भवतीत्यत आह—सृजतीति । सृजत् विश्वसृड्गणाः तेन सह इदं सृज्यं विश्वं यत्र यस्मिन् चिन्त्यमाने श्रेयो हितं न भवति । किञ्च, तयोः सृज्यस्रष्ट्रोः परं कारणं प्रधानमपि न श्रेयो भवति तदा त्रिभिरन्वितः कफवातपित्तसमन्वितोऽभिमानिनां देहः श्रेयान्नेति किमु वक्तव्यम् । ननु, स्वस्वरूपानन्देनैव कृतार्थतासिद्धौ किं तत्र रमणेनेत्यत आह—अहमिति । एतत् विष्णुत्वेन प्रसिद्धम् उत्सादितौ बाध्यबाधकभावौ यस्मात् अहम् अस्मच्छब्दार्थभूतं जीवतत्त्वमपि यस्मिन् विचार्यमाणे श्रेयो न "सर्वेषामपि वस्तूनां नृप स्वात्मैव वल्लभः । इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥ तस्यापि भगवान् कृष्णः किमतद्वस्तु रूप्यताम् । कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्" इति श्रीशुकवचनात् ॥ ३१ ॥

किं तत्परमात्मस्वरूपमित्यत आह—परमिति । दौरात्म्यं दुराग्रहं अहंममाभिमानं विसृज्य हृदा उपगुह्य ध्यानादिभिरालिङ्ग्य यत् यैः समाहितैरधिवासितं निश्चितं तत्त्व एव मुख्यतया भगवत्तत्त्वाः नान्यत्र भगवदतिरिक्ते सौहृदं येषां ते अतत् भगवद्व्यतिरिक्तम् उत्सिसृक्षवः परं क्षराक्षराभ्यां विलक्षणम्—

"यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" ॥

इति अनुवर्णितं वैष्णवं पदं विष्णुस्वरूपमामनन्तीत्यन्वयः ॥ ३२ ॥

न एतदधिगच्छन्ति विष्णोर्यत्परमं पदम् ।
अहं ममेति दौर्जन्यं न येषां देहगेहजम् ॥ ३३ ॥
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ ३४ ॥
नमो भगवते तस्मै कृष्णायाकुण्ठमेधसे ।
यत्पादाम्बुरुहध्यानात्संहितामध्यगामिमाम् ॥ ३५ ॥

शौनक उवाच ।

पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः ।
वेदाश्च कतिधा व्यस्ता एतत्सौम्याभिधेहि नः ॥ ३६ ॥

सूत उवाच ।

समाहितात्मनो ब्रह्मन् ! ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ ३७ ॥
यदुपासनया ब्रह्मन्! योगिनो मलमात्मनः ।
द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्यपुनर्भवम् ॥ ३८ ॥

भाषा टीका ।

यह वही श्रीविष्णु भगवान् की बड़ी भारी प्रपञ्चरूप माया है, कि—जिस माया के प्रभाव से उनही परमात्माके अंश रूप बिचारे जीव, काम क्रोधादिकों से देहों में मोहित होजाते हैं ॥ २९ ॥

तो फिर उस माया की और माया के कार्यों की निवृत्ति किस प्रकार होसकी है ऐसी शंका में श्रीविष्णु भगवान् के भजन से ही सर्व अनर्थों की निवृत्ति होसकी है, इस तरह के सिद्धांत कहने को प्रथम श्रीविष्णु के स्वरूप का निरूपण करते हैं—कि, जिन श्रीविष्णु भगवान् के स्वरूप के विषे आत्मावाद के विषैं अर्थात् आत्मनिरूपण में दुर्विभाव्य जो माया है, वह प्रभव होकर नहीं विराजती है। क्योंकि ? ब्रह्माजी ने कहा है कि—हे नारद ! उस वासुदेव भगवान् को नमस्कार है, जिनकी दुर्जयमाया से मुझे जगद्गुरु कहते हैं-और जिस माया से विमोहित दुर्बुद्धि लोग मैं मेरा ऐसा प्रलाप करते हैं। वह माया जिन श्रीविष्णु भगवान् की दृष्टि के सामने खड़े होने को भी लज्जित होती है। और जिन परमेश्वर के विषय में मोहकृत विविध प्रकार का विकार नहीं हैं। तथा सङ्कल्प विकल्प रूप वृत्तियों वाला मन भी जिनको नहीं ग्रहण कर सका है ॥ ३० ॥

जिस परमात्म के विषे कर्माधीन देह सहित कर्म नहीं है। और वह कर्म और देह दोनों से पर है, जिनको वाणी भी नहीं ग्रहण करती है कर्म देह वाणी युक्त अहङ्कार प्रधान जीव जिनको नहीं देख सका है, जिस परमात्मस्वरूप से बाध्य बाधक सब दूर हैं। पुरुष मनन शील होकर अहंकारादिकों का निषेध कर उसी परमात्मा में विशेष रमण करे, अर्थात् सर्वदा श्रीविष्णुपरायण हो जावे ॥ ३१ ॥

जिनका यह स्वरूप निरूपण किया परमात्म व्यतिरिक्त वस्तु के परित्याग करने वाले लोग, उसी को विष्णुसम्बन्धि परम पद कहते हैं, क्योंकि—वे महात्माजन दुरात्मता को छोड़ कर उसी भाव में मौजूद करने वाले हैं, समाहित अन्तःकरणों से वे साधुजन स्वरूप का निश्चय कर हृदय में छुपा कर उसी तत्त्व का ध्यान करते हैं ॥ ३२ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

एतत्प्राप्त्यधिकारिणो दर्शयति—एतदिति । देहजमहमिति गेहजं ममेति ॥ ३३ ॥

तत्प्राप्त्युपायमाह—अतिवादानिति, ॥ ३४ ॥

शास्त्रसमाप्तौ गुरुं प्रणमति—नम इति। कृष्णाय व्यासाय अध्यगामधिगतवानहम् ॥ ३५ ॥

इमां संहितामध्यगामित्युक्तं तत्र पुराणसंहिताविभागं विवक्षुर्वेदविभागमपि प्रसङ्गात्पृथक् पृच्छति—पैलादिभिरिति। हे सौम्य !॥ ३६ ॥

तत्र प्रथमं वेदाविर्भावप्रकारमाह—समाहितात्मन इत्यादिभिः ।

ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् ।
यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥
शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् ।
येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ब्रह्मणो हृदि य आकाशस्तस्मान्नादोऽभूत् यः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरोधादन्यदाऽपि विभाव्यते चिन्तयते ॥ ३७ ॥

अमङ्गलादेरुपासकानां मोक्षफलमाह—यस्य नादस्योपासनयाऽऽत्मनो मलं धूत्वाऽशेषं कथंभूतं मलं तमाह—द्रव्यमधिभूतम् क्रिया अध्यात्मम् कारकमधिदैवम् एवं त्रिधा भूता आख्या यस्येति तथा तम् ॥ ३८ ॥

त्रिवृत् त्रिमात्रः अपठितश्रुतिभिरुच्यमानस्योङ्कारस्याक्षरसमाम्नायान्तर्गतत्वात्सूक्ष्मतया तं विशिनष्टि—अव्यक्तः प्रभवो यस्य सः तदेवाऽऽह—स्वराट् स्वत एव हृदि प्रकाशमानः तमेव कार्येण लक्षयति—यत्तदिति । नपुंसकत्वं लिङ्गशब्दविशेषणत्वात् लिङ्गं गमकम् ॥ ३९ ॥

कोऽसौ परमात्मा तमाह—शृणोतीति । इमं स्फोटमव्यक्तमोङ्कारम् । ननु, जीव एव तं शृणोतु नेत्याह सुप्तश्रोत्रे कर्णपिधानादिनाऽवृत्तिकेऽपि श्रोत्रे सति जीवस्तु करणाधीनज्ञानत्वात्तदा श्रोता तदुपलब्धिश्चस्तु तस्य परमात्मकर्तृकैवेति भावः । ईश्वरस्तु नैवम् यतः शून्यदृक् शून्येऽपीन्द्रियवर्गे दृक् ज्ञानं यस्य तथाहि सुप्तो यदा शब्दं श्रुत्वा प्रबुध्यते न तदा जीवः श्रोता लीनेन्द्रियत्वात् अतो यस्तदा शब्दं श्रुत्वा जीवं प्रबोधयति स यथा परमात्मैव तद्वत् कोऽस्यौङ्कारस्तं विशिनष्टि—वाग्भिन । येन वाग्वृत्तिर्व्यज्यते यस्य च हृदयाकाशे आत्मनः सकाशाद्व्यक्तिरभिव्यक्तिः ॥ ४० ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कृष्णाय व्यासाय अकुण्ठमेधसे अप्रतिहतज्ञानाय ॥३५-३६॥

नादः आकाशगुणभूतः शब्दः ॥ ३७ ॥

यदुपासनया अपुनर्भवं यान्तीति ज्ञानोत्पादनद्वारेणेति भावः । द्रव्यं शरीरं क्रियाकारकशब्दाभ्यां बन्धकं कर्म विवक्षितम् ॥३८॥

ततोऽभूत्त्रिवृदोङ्कार इति प्रथमं धारणारूपेण प्रतिपन्नःशब्दः प्रणवो व्यक्तोऽभूदित्यर्थः । अव्यक्तप्रभवः अयोगिभिरज्ञातप्रभवः स्वयमेव राजते इति स्वराट् लिङ्गं ज्ञापकं वाचकम् ॥ ३९ ॥

इदं स्फोटं प्रणवरूपं यः शून्यदृक् अर्थान्तरज्ञानरहितः शृणोतीत्यन्वयः । येनेति । येन परमात्मना विश्वं कार्यं व्यज्यते सृज्यते यस्यात्मनः आकाशो व्यक्तकार्यभूतः आकाशादिप्रपञ्चकारणस्य तस्य ब्रह्मणो वाचक इत्यन्वयः । यद्वा, येन प्रणवेन परमात्मा व्यज्यते यस्य प्रणवस्य व्यक्तिरात्मनः आकाशे परमात्मनः स्थाने हृदयाकाशे ॥ ४०—४१ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

द्वैरात्म्यं विसृज्येत्युक्त्वा तस्यागस्य साधननिष्ठावतश्चाऽगस्त्यानिष्ठाधिकत्वं सूचितं तत्फलमेवाह—एतदिति । येषां देहगेहजं देहगेहविषयम् अहं ममेति दौर्जन्यं नास्ति त एते तद्विष्णोः परमं पदम् अभिगच्छन्ति उपासनया साक्षात्कुर्वन्ति तदर्थाः मुमुक्षवः यथा प्राप्नुवन्ति ॥ ३३ ॥

तदेवं वाच्यवाचकभावस्य भगवन्मायाप्रयुक्तत्वमभिधाय तदनुपसक्तश्च परिहृतं तन्मायानिर्णयं वृत्तिमाह—अतिवादानिति । अतिकालान्तवादानिरवद्यवादान् परतन्त्रवाभिप्रीति यावत् इमं मर्त्यं देहमाश्रित्यात्मत्वेन[आत्मीयत्वेन]अभिसन्धाय केनापि वैरं न कुर्यात् ॥ ३४ ॥

शास्त्रसमाप्तौ गुरुतत्त्वकारात्मकं मङ्गलमाचरति—नम इति । कृष्णाय कृष्णद्वैपायनायाकुण्ठमेधसे अमङ्कुचितबुद्धये मध्यानामधिगतवानस्मि ॥ ३५ ॥

इमां संहितामध्यगाम इत्युक्तं तत्र पुराणसंहितानिर्माणं निरूपयतां बभ्रुसूतात्तद्गुरुभूतवेदविभागं पृच्छति शौनकः—पैलादिभिरिति । वेदाचार्यैः वेदाचार्यैरेतैः व्यासशिष्यैः कतिधा व्यस्ताः विभक्ताः एतद्विभागवैविध्यं नोऽस्मभ्यमभिधेहि ॥३६॥

इत्थमापृष्टस्तद्विभागं विवक्षुस्तावत् (यावत्) वाचस्त्रयीजन्माद्यागतैव अवृत्त इति वक्तुं तावदोङ्काराविर्भावक्रममाह—समाहितेति । हे ब्रह्मन् शौनक ! भगवति समाहितात्मनः येन तस्य परमेष्ठिनस्तुर्मुखस्य हृदि य आकाशस्तस्मात् नादोऽभूत् आकाशसंस्पृष्टवायुपरिणामात्मकप्राणघोषः अभूत् आविर्बभूव, तं विशिनष्टि—यो वृत्तिरोधात्कर्णपुटनिरोधात्मकात् श्रोत्रविधानाच्छृणुते इत्यर्थः ॥ ३७ ॥

किञ्च यस्य नादस्योपासनया योगिनः योगीश्वराः द्रव्यक्रियाकारकाख्यात्मनो मलं विधूयापुनर्भवं मोक्षं प्राप्नुवन्ति मोक्षोत्पादककालदुरापमाया इति भावः द्रव्यं शरीरं क्रिया पुण्यापुण्यात्मकं कर्म कारकम् इन्द्रियम् एवम् त्रिधा आख्याते इति तथा देहेन्द्रियतदनुभवनिष्पाद्यकर्मोत्थं मलमित्यर्थः ॥ ३८ ॥

तत इति । ततो नादात् त्रिवृदोङ्कारोऽभवत्प्रथमं साधारणरूपेण प्रतिपन्नः शब्दः प्रणवरूपेण व्यक्तो बभूवेत्यर्थः । त्रिवृत् त्रयाणामकारोकारमकाराणां वृत्तं यस्मिन् सः त्रिमात्रो वा तमेव विशिनष्टि—अव्यक्तप्रभवः अयोगिभिरज्ञातप्रभवः स्वयमेव राजत इति स्वराट् यत्तद्ब्रह्मणः परमात्मनो लिङ्गं ज्ञापकं वाचकम् यत्तदिति नपुंसकत्वं लिङ्गविशेषणत्वात् ॥ ३९ ॥

कोऽसौ परमात्मेत्यत्रास्य वदन् प्रणवस्य तद्वाचकतामाह—शृणोतीति सार्धेन । सुप्तश्रोत्रेऽपि सममतं परं य इमं स्फोटं प्रणवरूपम् शब्दम् सुप्तश्रोत्रेऽपि शृणोति श्रोत्रे पिहिते

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सत्यपि शृणोतीत्यर्थः । यः श्रोत्रयोर्दृढपिहितयोः सतोरिमं स्फोटम् शृणोति स परमात्मैव न तु जीवस्तस्य करणा-धनपेक्षज्ञानत्वादिति भावः । परमात्मनस्तत्करणापेक्षत्वाभावे हेत्वाह—शून्यदृगिति । शून्यं करणरहितं सर्वेन्द्रियवर्गं पश्यतीति शून्यदृक्जीवस्य नादो-पलब्धिस्तु परमात्मद्वारिकेति भावः । यद्वा प्रयत्नमन्तरेण विशिष्टमिह शृणोतीति । शून्यदृगर्थान्तरे ज्ञानरहितः पिहितकर्णेन विषयान्तरागोचरतया श्रूयमाण इत्यर्थः । येन वागव्यज्यते प्रवर्तिता सत्यभिव्यज्यते यस्यात्मनः आकाशो व्यक्तिः शरीरम् [स्वरूपम्] यद्वा येन प्रणवेन वागव्यज्यते लौकिकवैदिकवागभि-व्यज्यते यस्यात्मनः प्रणवस्वरूपस्याकाशः हृदयाकाशव्यक्ति-रभिव्यक्तिस्थानम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अत्र प्रमाणमाह—तदेतदिति ॥ ३३ ॥

अतिवादान् दुष्टवचनानि ॥ ३४ ॥

अंतःप्राप्तौ तस्मादिदं प्रकृतव्याख्यानमित्याशयेनाह—नम इति । श्रीकृष्णचरणारविन्दप्रणतिस्मरणपूर्वकं भागवतपुराणलक्षणा-संहिताश्रवणमननादिकं मुख्यसाधनमित्यर्थः ॥ ३५ ॥

(विजयतीर्थधनञ्जयीव्याऽत्र पञ्चमोऽध्यायस्समाप्यते ।

भगवन्माहात्म्यप्रकटनाय तत्प्रेरितेन चतुर्मुखेन नादादि वेदान्तशास्त्राणिमुखत्वाध्यापनेन पुत्रेभ्यो विभागानं तच्छिष्येभ्यो विभज्य दानमनुयुगं पुनरपि तद्विभागं पुराणावतरणं च निग-दति अनेनाध्यायेन । तत्रादौ शौनकः सूतं वेदविभागं पृच्छति, पैलादिभिरितित्रिपदेन वेदादेरभिव्यक्तिमूलं वेदविभक्तिश्च कथयन्नति सूचयति व्यासशिष्यैरित्यनेन कस्मिन्युगे किं विभक्तवेदान्व्यवस्थ-ताविभक्तानिति वेदाचार्यैरित्यनेन वेदोपयोगिकल्पप्रणयनतिपुणौ रितिमहात्मभिरित्यनेन तपोबलाद्वेददर्शनसमर्थैरिति अभिधेहि अनेनाभ्यर्थनापूर्वकं वदति ॥ ३६ ॥

तत्रादौ सूचितः सूतः प्रश्नं परिहर्तुं कथामाह—समाहि-तात्मन इति । सं समीचीने निर्दुःखानन्दानुभवे हरावाहित आत्मा मनो यस्य स तथा तस्य ब्रह्मपदस्यानेकार्थे वृत्तं निश्चितमर्थमाह—परमेष्ठिन इति।शब्दस्याकाशविशेषगुणत्वेन नभो भिव्यक्तियुक्तेति सूचयति—हृदाकाशादिति । तत्सत्वे किं प्रमाण-मत्राह—वृत्तिरोधादिति । स नादः सर्वेन्द्रियवृत्तिस्तम्भाद्वायु-वृत्तिनिरोधाच्च निमाव्यते ज्ञायते योगिभिरिति शेषः ॥ ३७ ॥

किममुना नादेन शून्यकल्पेन फलमिति तत्राह—यदुपासन-येति । यस्य नादस्योपासनया योगिनो द्रव्याणि पञ्चभूतानि तत्नि-र्मितदेहो वा क्रिया कर्मेन्द्रियं कारकं ज्ञानेन्द्रियम् एतेषु आवरणं प्रक्षालितम् उत्पन्नमिति यावत् आत्मनो मनसो मलं पुनरा-अपुनर्भवं मोक्षं यान्तीत्यन्वयः—

"स्त्रीपुत्रपुम्भकारमायं नादो ब्रह्मविनिर्मितः ।
प्रयटविमानसदृशो मुक्तिस्वर्गादिदो विभु." ॥

इतिवचनादपुनर्भवं तारतम्योपेतं फलमाप्नुवन्तीति भावः ॥ ३८ ॥

ततो नादात् यदृच्छानादानुकारात् त्रीन् अकारोकारमकारा-राख्यान् वर्णान् शृणोतीति त्रिवृत् ओङ्कारोऽव्यक्तप्रभवोऽव्यक्तः अव्यक्तस्य प्रपञ्चस्य प्रभव उत्पत्तिर्यस्य स तथा "भूतं भव-द्भविष्यदिति सर्वमोङ्कार एव"इति श्रुतेः । पक्षान्तरे अव्यक्तस्य हरेः सकाशात्प्रभवो यस्य स तथा स्वेन एव राजतीति, स्वराट् स्वयम्प्रकाशमानः स्वं परमात्मानं राजयतीति वा एतदेवाह—यत-दिति । यदोङ्काराख्यं वस्तु हरेर्लिङ्गं ज्ञापकं "ॐ तस्य वाचको ह्योङ्कारो वक्ता सो तद्गुणो ततः" इतिवचनात् चतुर्मुखस्याप्युक्तं परमात्मन इति ॥ ३९ ॥

शम उक्तं वाचयति वेत्यादिरिति शून्यं परं ब्रह्म पश्यतीति शून्यदृक्, सो ब्रह्मा परोक्षीयत्त्व सुतः ब्रह्मपाशः स इमं स्फोटं प्रणवलक्षणं ध्वनिं शृणोति क इव श्रोतेव भगवानिव "श्रोता मन्ता" इति श्रुतेः । अनेनास्य सर्वे प्रमाणमुक्तं भवति । किञ्च, यत्ओङ्कारेण वागिन्द्रियलक्षणा व्यज्यते अकारस्य प्रणवात्मकत्वात् अकारो वै सर्वा वाक्"इति श्रुतेः।प्रणवस्य वेदादित्वादकारस्यापि सर्वादित्वाद्वाचोरादिभूतत्वेनेति श्रुतेः आत्मनः परमात्मनः उत्प-न्नमान आकाशो यस्य व्यक्तिः स्थानं "आत्मन आकाशः सम्भूतः" इति श्रुतिः आकाशात्सर्वमुत्पद्यत इति च ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तत्र पूर्वाङ्गमाह—त एतदिति द्वाभ्याम् ॥ ३३ ॥ ३४ ॥

तदेतच्च श्रीमद्भागवतादेव ज्ञायत इत्यभिप्रेत्य स्वकीयमतस्तुत्य-देवतां प्रणमति—नम इति । यद्यप्यस्य श्रीशुकदेवोपदेशः तथापि श्रीकृष्णद्वैपायननमस्कारस्तत्कृतोपदेशस्यापि तत्प्रसादप्राप्तत्वेन मननात् तदेतदाह—यदिति, ॥ ३५ ॥ ३६ ॥

वृत्तिरोधादिति गुरूपदेशवर्त्मना समाहितेऽन्तःकरणे सती-त्यर्थः ॥ ३७ ॥

तथा श्रूयमाणस्य तस्योपासनाफलमाह—यदुपासन-यात ॥ ३८ ॥

लिङ्गं बोधद्वारम् भगवद्रूपं वा ॥ ३९ ॥

ननु, तस्य शब्दस्य सदास्तित्वं किं प्रमाणं कर्णौ पिहिते अवणमेवेति चेत् हुङ्कारादिकमपि श्रूयते तथा सुप्तो जाग्रद्वा नाऽऽहूतिमहत्त्वेनावधारयितुं यो न शक्यते तेन तु जन्मबधिरे-णेन्द्रियाभावात् न श्रूयत एव सः तत्राह—शृणोतीति । यः परमात्मा सुप्ते श्रोत्रे चकारात् असुप्तेऽपि शृणोति तस्य जीववदि-न्द्रिया (वेद्या) तदपेक्षा नास्तीत्याह—शून्यदृगिति । "अपाणिपादः" इत्यादि "स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः । तत्र हेतुमाह—येन वागादीन्द्रियमपि व्यज्यते यस्य चात्मनो व्यक्तिः कार्यरूपेणाविर्भावः शब्दाश्रयः आकाशः किमुत स्पर्शाद्याश्रयो वाय्वादिरित्यर्थः । तस्माज्जीवस्तु तदुपासनया तदनुग्रहेणैव शृणोतीति भावः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उक्तमर्थं स्पष्टीकृत्य व्याचष्टे—न हीति । अभिगच्छन्तीति अन्तर्भावितण्यर्थः दोर्जन्यमिति दौरात्म्यपदस्यार्थः ॥ ३३ ॥

किञ्चैतद्विष्णुस्वरूपं काव्यपराधे सति तिरोहितं भवेदतः अपराधानुसूचकं प्रकारं शिक्षयति, अतिवादान् कटूक्तीः तितिक्षेतैव नतु तैरेव कटुप्रत्युत्तरं दद्यादित्यर्थः । इमं साधकदेहमाश्रित्येति साधकदशायामपि स्वमर्थमाश्रयं अतएव सिद्धदेहं आश्रित्य तु स्वमर्यादया सह वैरं न कुर्यादिति रागानुगीयसिद्धान्ता अभिप्रायमाहुः कश्चन स्वमन्तारमपि ॥ ३४ ॥

शास्त्रं समाप्य स्वहृदेवं भगवन्तं प्रणमति, नम इति । अध्यगां श्रीशुकमुखादधिगतवानस्मि ॥ ३५ ॥

संहितामध्यगामिति श्रुत्वा संहिताविभागं बुभुत्सते, पैलादिभिरिति ॥ ३६ ॥

वेदकल्पतरोः फलं साधुतया निरूप्य शाखा अपि सङ्क्षेपतो निर्दिशन्नस्य प्रथममाविर्भावप्रकारमाह—समाहितेत्यष्टभिः । समाहितस्य परमेष्ठिनो हृदि च आकाशात्तस्माज्जातो नादोऽभूत् यः कर्णपुटपिधानेन श्रोत्रवृत्तिनिरोधादस्मदादिभिरपि विभाव्यते निशम्यते ॥ ३७ ॥

यस्य नादस्योपासनया द्रव्यक्रियाकारकाणि अधिभूतादीनि आख्या अस्य तं मलं धूत्वा नाशयित्वा ॥ ३८ ॥

ततो नादात् त्रिवृत् अकारोकारमकारात्मकः अव्यक्तोऽप्रकटः प्रभवो जन्म यस्य सः स्वराट् साक्षात्परमेश्वर एव यत् यो भगवद्ब्रह्मपरमात्मनः लिङ्गं गमकं भक्तज्ञानियोगिभिरुपास्यत्वात् लिङ्गशब्दविशेषणत्वाद्दित्यस्य नपुंसकत्वम् ॥ ३९ ॥

भगवद्ब्रह्मशब्दवाच्यः स परमेश्वर एव कतमत्राह—शृणोतीति । स इमं स्फोटमव्यक्तं नादात्मकमोङ्कारं शृणोति सः । ननु, जीव एव शृणोति नेत्याह, सुप्तश्रोत्रे कर्णपिधानादिना श्रोत्रं श्रवणेन्द्रिये सुप्ते सति वृत्तिकेऽपि सति यः शृणोतीत्यर्थः । जीवस्तु कर्णाधीनज्ञानत्वान्न तदा श्रोता किन्तु परमात्मैव तस्य श्रोता तदपि जीवस्य या तदुपलब्धिः सा परमात्मद्वारिकैवेति ज्ञेयम् । यतः स परमेश्वरः अश्रुतदृक् श्रोत्रेन्द्रियेण विनैव दृक् ज्ञानं यस्य सः तथाहि सुप्तो यदा शब्दं श्रुत्वा प्रबुध्यते न तदा जीवः श्रोता लीनेन्द्रियत्वात् अतो यत्तदा शब्दं श्रुत्वा जीवं प्रबोधयति स परमात्मैव कोऽसावोङ्कारस्तं विशिनष्टि, यस्मिन् । येन वाक् वेदलक्षणा बृहती व्यज्यते यस्य च हृदयाकाशे आत्मनः सकाशादभिव्यक्तिः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

ते एव एतत् शास्त्रप्रसिद्धं विष्णुस्वरूपं गच्छन्ति ॥ ३३ ॥

प्राप्तिसाधनविशेषमाह—अतिवादानिति ॥ ३४ ॥

शास्त्रसमाप्तौ गुरुप्रणामात्मकमङ्गलमाचरति—नम इति । अध्यगामधिगतवानस्मि ॥ ३५ ॥

इमां संहितामध्यगामिति श्रुत्वा पुराणसंहिताविभागं श्रोतुं तन्मूलभूतस्य वेदस्य विभागं पृच्छति शौनकः—पैलादिभिरिति ॥ ३६ ॥

वेदविभागं वक्तुं वेदाविर्भावप्रकारमाह—समाहितात्मन इत्यष्टभिः । परमेष्ठिनः चतुर्मुखस्य हृदि च आकाशात्तस्माज्जातः नादः अभूत् यः वृत्तिरोधात् श्रोत्रवृत्तिनिरोधात् अधुनापि विभाव्यते श्रूयते इत्यर्थः ॥ ३७ ॥

यदुपासनया यस्य नादस्योपासनया परब्रह्मविषयकज्ञानमुत्पद्यते इत्यध्याहारो बोध्यः । द्रव्यक्रियाकारकाणि आधिभूताध्यात्माधिदैवानि आख्या यस्य तं मलं धूत्वा अपहाय अपुनर्भवं मोक्षम् ॥ ३८ ॥

ततो नादतः त्रिवृत् त्रयाणामकारोकारमकाराणां वृत्तयो यस्मिन् सः ओङ्कारः अभवत् तस्य पूर्वसिद्धत्वमाह—अव्यक्तात् सर्वकारणकारणात् भगवतः प्रभवः प्रादुर्भावो यस्य सः अनपेक्षत्वेनास्मिन् कारणे वाचकतया राजते इति स्वराट् यत् यतः परमेष्ठिनः परमोपि तिष्ठतीति परमेष्ठी श्रीपुरुषोत्तमस्तस्य भगवतः तत् लिङ्गं ज्ञापकं लिङ्गशब्दविशेषणत्वात्तदित्यस्य नपुंसकत्वम् ॥ ३९ ॥

कथम्भूतस्य य इमं स्फोटमव्यक्तमोङ्कारं शृणोति तस्य । ननु, जीवोपि कर्णपुटपिधाने शृणोति सत्यं स तु कर्णपुटपिधानेऽपि अश्रुतेनैव श्रोत्रेण शृणोति भगवांस्तु सुप्तश्रोत्र एव शृणोति यतः श्रुतदृक् श्रोत्रेन्द्रियं विनापि ज्ञानं यस्य सः कथम्भूतः स ओङ्कारः येनोङ्कारेण वाक् बृहती व्यज्यते यस्य चाकाशे हृदयाकाशे आत्मनः परमात्मनः सकाशात् व्यक्तिरभिव्यक्तिः सः ॥ ४० ॥

भाषा टीका ।

जो यह श्रीविष्णु का उत्कृष्ट पद है तिसको वही लोग प्राप्त होते हैं, जो कि—देह गेहादिकों में, मैं मेरा पने रूप दुर्जनता का स्पर्श भी नहीं करते हैं ॥ ३३ ॥

जो इस पद को चाहै तो अगोंके खोटे वाक्यों को सुन कर सहन करे, किसी का अपमान न करे, और इस अस्थिर देह को पाकर किसी से वैर न करे ॥ ३४ ॥

उस अकुण्ठ बुद्धि वाले श्रीकृष्ण मुनि व्यास भगवान् को नमस्कार है जिनके चरण कमलके ध्यान से मैंने इस संहिता का अध्ययन किया है ॥ ३५ ॥

शौनक उवाच ॥

शौनक महर्षि बोले, कि-श्रीव्यासजी महाराज के शिष्य वेदाचार्य पैलादिक महात्माओं ने वेदों के कितने प्रकार के विभाग किये। हे सौम्य! यह हमारे लिये कथन कीजिये ॥ ३६ ॥

सूत उवाच ।

श्रीसूत पौराणिक बोले, कि—हे ब्रह्मन् ! हे श्रीशौनकजी ! परमेष्ठी श्रीब्रह्माजी ने जब मन का समवधान किया, तब उनके हृदयाकाश में नाद उत्पन्न हुआ। जो कि—कान बंद करने पर हम लोगों को भी मालूम होता है ॥ ३७ ॥

हे शौनक ! जिसकी उपासना से योगीजन द्रव्य क्रिया कारक नाम वाले अपने आत्माके मलको दूरकर मोक्षको प्राप्त होते हैं ॥ ३८ ॥

स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ।
स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम् ॥ ४१ ॥
तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह !।
धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तयः ॥ ४२ ॥
ततोऽक्षरसमान्नायमसृजद्भगवानजः ।
अन्तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ॥ ४३ ॥
तेनाऽसौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ।
सव्याहृतिकान्सोङ्कारांश्चातुर्होत्रविवक्षया ॥ ४४ ॥
पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन् ब्रह्मकोविदान् ।
ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ॥ ४५ ॥
ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ।
चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः ॥ ४६ ॥
क्षीणायुषः क्षीणसत्त्वान् दुर्मेधान् वीक्ष्य कालतः ।
वेदान् ब्रह्मर्षयो व्यस्यन् हृदिस्थाऽच्युतचोदिताः ॥ ४७ ॥
अस्मिन्नप्यन्तरे ब्रह्मा भगवाँल्लोकभावनः ।
ब्रह्मेशाद्यैर्लोकपालैर्याचितो धर्मगुप्तये ॥ ४८ ॥

भाषा टीका।

उस नाद से तीन मात्रा का (अ उ म) इन तीन अक्षरों के विभाग वाला ॐकार प्रकट हुआ। जो कि—अव्यक्त से प्रकट होता है, वह कैसा है, कि—हृदय में स्वयं प्रकाशमान है, और परब्रह्म परमात्मा श्रीभगवान् का वाचक है ॥ ३९ ॥

वह परमात्मा कौन है? कि—जो इस स्फोट शब्द को श्रोत्र इन्द्रिय के नहीं बंद करने पर भी सुनता है। क्योंकि उसका ज्ञान तो इन्द्रियों के आधीन नहीं है। वह ओंकार भी कौन है? तहां कहते हैं, कि—जिससे वाणी व्यञ्जित होती है, और जिसका प्राकट्य हृदयाकाश में आत्मा से होता है ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

किञ्च, स्वधाम्नः स्वस्याऽऽश्रयः कारणं यद्ब्रह्म तस्य। किञ्च, परमात्मनोऽपि समस्तदेवतावाचकोऽपीत्याशयेनाह—स इति। सर्वमन्त्राणामुपनिषद्रहस्यम् सूक्ष्मरूपमित्यर्थः। तत्र हेतुः वेदानां बीजं कारणम् बीजत्वेऽप्यविकारितामाह—सनातनं सदैकरूपम् तस्य ब्रह्मरूपत्वात् ॥ ४१ ॥

इदानीं ततः सर्वप्रपञ्चोत्पत्तिप्रकारमाह—तस्य हीति। त्रयस्त्रिसंख्यायुक्ता भावा यैरकारोकारमकारैर्धार्यन्ते तत्कारणत्वात् तानेवाऽऽह—गुणाः सत्त्वादयः नामानि ऋग्यजुःसामानि अर्था भूर्भुवःस्वर्लोकाः वृत्तयो जाग्रदाद्याः ॥ ४२ ॥

ततस्तेभ्यो वर्णेभ्यः अक्षराणां समाम्नायं समाहारं तमेवाऽऽह—अन्तस्था यरलवाः ऊष्माणः शषसहाः स्वरा अकाराद्याः स्पर्शाः कादयः ह्रस्वदीर्घाश्च आदिशब्दादल्पमहाप्राणादयः त एव लक्षणं स्वरूपम् यस्य तम् ॥ ४३ ॥

विभुश्चतुर्मुखस्वरूपो भगवान् असृजदिति पूर्वेणैवाऽन्वयः चातुर्होत्रविवक्षया चत्वारो होत्रोपलक्षिता ऋत्विजश्चातुर्होतारस्तेषाम् होत्राध्वर्यवादिकं कर्म चातुर्होत्रं तद्विवक्षया ॥ ४४ ॥

पुत्रान् मरीच्यादीन् तान्वेदान् ब्रह्मकोविदान् वेदोच्चारणादिनिपुणान् ॥ ४५ ॥

एवं चतुर्युगेषु प्राप्ताः द्वापरादौ द्वापरमादिर्यस्य तद् व्यांशलक्षणस्य कालस्य तस्मिन् द्वापरान्ते वेदविभागप्रसिद्धेस्तदनुसरणकालं व्यासावतारप्रसिद्धेश्च व्यस्ता विभक्ताः ॥ ४६ ॥

तत्र हेतुः क्षीणायुषो जनान् तर्हि पुरुषबुद्धिप्रभवत्वदनादरणीयत्वं स्यादित्याशङ्क्याऽऽह—हृदिस्थेति, ॥ ४७ ॥

एवं सामान्यतो वेदविभागक्रममुक्त्वा वैवस्वतमन्वन्तरे विशेषतो निरूपयितुमाह—अस्मिन्नपीति ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वैकारादिभिः त्रयो भावाः सत्त्वादयः तेन गुणत्रय-व्याप्यत्वभूताः ॥ ४२ ॥

ततः प्रणवात् अन्तस्था यरलवाः ऊष्माणः शषसहाः स्वरा अचः स्पर्शाः कादयो मावसानाः वर्णाः ॥ ४३ ॥

चातुर्होत्रविवक्षया यज्ञप्रकाशनेच्छया ॥ ४४—५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वधाम्नः स्वमहिम्नि प्रतिष्ठितस्य ब्रह्मणः परमात्मनो वाचकः किञ्च स इति सर्वेषां मन्त्राणामुपनिषदां वेदानां च बीजं कारणं सनातनम् इत्यनेन तस्य हृदयाकाशेऽभिव्यक्तिमात्र-मनुत्पत्तिविनाशित्वमभिमतम् ॥ ४१ ॥

तस्येति । हे भृगूद्वह ! तस्य प्रणवस्योङ्कारस्य अकाराद्या अकारोकारमकाराः वर्णा आसन् त्रयः पृथक् यदा, तस्य प्रणवस्य प्रकृतिभूतास्त्रयो वर्णाः तान् विशिनष्टि—धार्यन्त इति । वैका-रादिभिस्त्रयो भावा अर्थाः अनन्याहङ्कारपरिणामस्वरूपा ... भोग्यस्वरूपाः गुणानां सत्त्वादीनां प्रतिपादकत्वाद्धर्मादिगुणा नाम-पादकानां नारायणादिपदानां अर्थेषु या वृत्तयोऽभिव्यक्त्या धार्यन्ते प्रकाशकतया कारणभूता इति भावः ॥ ४२ ॥

ततः प्रणवादक्षरसमाम्नायमसृजदित्याह—ततोऽसृजत् भगवान् चतुर्मुखशरीरकः परमपुरुषः अक्षरसमाम्नायमेव विभज्य निदर्शयन्नपि—अन्तस्थेति । यरलवा अन्तस्थाः शषसहा ऊष्माणः अचः स्वराः कादयो मावसानाः स्पर्शाः ह्रस्वदीर्घशब्दौ भावप्रधानौ आदिशब्देन प्लुतोदात्तानुदात्त-स्वरितविसर्गानुस्वारजिह्वामूलीयोपध्मानीयमूर्धन्यादयः तैर्लक्षणं स्वरूपं यस्य तम् अक्षरसमाम्नायमिति सम्बन्धः ॥ ४३ ॥

तेनैवेति । तेनाक्षरसमाम्नायेनैवासौ चतुर्मुखशरीरको विभु-श्चतुरो वेदानाविष्कृतवानिति शेषः । ततश्चातुर्होत्रविवक्षया चातुर्होत्रं होतारः अध्वर्यूद्गातृब्रह्माख्या ऋत्विजः तैर्निर्वर्त्यं कर्म चातु-र्होत्रं तद्विवक्षया यज्ञप्रकाशनेच्छया इत्यर्थः । सव्याहृतिकान् सप्रणवान् चतुरो वेदान् पुत्रान् मरीच्यादीनध्यापयत् ॥ ४४ ॥

पुत्रानिति । "मतिबुद्धि" (१।४।५२) इत्यादिना कर्मसंज्ञा द्वितीया पुत्रान् विशिनष्टि—ब्रह्मवादिनः वेदाध्ययनादिनिपुणान् न तु मरीच्या-दयोऽपि वैदिकधर्मोपदेष्टारः स्वपुत्रेभ्यः कश्यपादिभ्यः धर्मानिमान् उपदिदिशुः ॥ ४५ ॥

एवं परम्परया तत्त्वविद्भिर्वेदास्तेषां शिष्यैर्धृतव्रतैः महर्षिभि-श्चतुर्षु युगेषु प्रतिचतुर्युगपर्याये प्राप्ताः तत्र प्रतिद्वापरान्तो प्रति द्वापरमादिर्यस्य तस्यान्त्यभिमतस्य कालस्य तस्मिन् द्वापरान्ते वेदविभागप्रसिद्धेः शन्तनुसमकालं व्यासावतारप्रसिद्धेश्च ॥ ४६ ॥

कालतः युगधर्मेण क्षीणायुषः अल्पायुष्कान् क्षीणसत्त्वान् अल्पबलान् अल्पबुद्धींश्च जनान् लोकस्य वेदास्तु विभक्ता इत्यन्वयः । अल्पमेधां मामा ऽपारेऽस्य चतुर्णां वेदानां राशिरूपस्य उद्धृत्य संहिताकरणेन प्रवर्तनं तर्हि पुरुषबुद्धिप्रभवत्वापादकत्वादिदोषः स्यादित्याशङ्क्याह—वेदानिति । हृदिस्थेन अच्युतेन चोदिताः वेदान् व्यस्यन्ति न तु स्वबुद्धिमान्द्यमिति भावः ॥ ४७ ॥

तत्र वैवस्वतमन्वन्तरद्वापरादौ वेदविभागकर्तृविशेषनिरू-

पयति—पत्रमिनोति—अस्मिन्निति । अस्मिन्नन्तरे वैवस्वतमन्वन्तरेऽष्टाविं-शतिचतुर्युगद्वापरादौ इत्यर्थः । लोकभावनः लोकान् भावयति अभ्यु-दितान् करोतीति तथा हरिर्ब्रह्मेशाद्यभिमतः अतः सत्यवत्यां पराशरात् इत्यर्थः ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पूर्वं विष्णुत्वेन सामान्यतश्चोक्तम अधुना वाचकत्वेनाह—स्वधाम्नः स्वयं प्रकाशकस्य ओङ्कारस्य स्तनोऽनुमानत्वमाह—स इति । स ओङ्कारः सनातनं महान्तं सर्वमन्त्रोपनिषद्वेदानां बीजं फल-वद्यथाङ्कुरजनकशुक्लत्वादित्यर्थं ओघनष्टाद्यदिक्कृतवेदानामार्थं-भाग्यं मन्त्रमन्त्रादीनां अचेतानां फलदानसामर्थ्यं जनयतीति भावः ॥ ४१ ॥

त्रिवृदित्युक्तं विवृणोति—तस्येति । अकाराद्यास्त्रयो वर्णाः कस्योङ्कारस्यावयवा आसन्नित्यन्वयः । इत्यनेन साम्यमात्माख्याक्षर-मोङ्कारं त्रिमात्रं वादिनां मन्त्राः अकारोकारमकारा इत्यादिप्रसि-द्धमाह—यद्वा, पूर्वाभिव्यक्तौ प्रत्याहारः क्रियत इति सूचयति । प्रत्याहारो प्रसिद्धौ हेर्व्याविधानम् पश्य: भूर्भुवः स्वरितिनामाभि-व्यक्ति योक्ति—धार्यन्त इति । वैकारादयस्त्रयो भावा व्याहृति-लक्षणा धार्यन्ते व्याहृतिरूपोऽक्षरसमाम्नायो व्यज्यते ज्ञानादिगुणाना-मर्थे निमित्तभूते इतीवृत्तिर्येषां ते तथोक्ताः सर्वलोकगुणा-र्थेषु नारायणादीश्वरव्याहृत्याद्याहृतय इत्यर्थः । यद्वा, भूरादि-लोकेषु शब्दादिगुणानां भोगलक्षणप्रयोजनप्रवर्तकाः ॥ ४२ ॥

ततो व्याहृतिरूपोऽक्षरसमाम्नायमकारादिकारान्तानामक्ष-राणां सर्गोत्पत्ति सत्कार्यं गुरुपारम्पर्यक्रमसमृजदित्यन्वयः । कोऽसौ भव इति न व्यपुष्यति—अन्तस्थेति । यरलवा अन्तस्थाः शषसहा ऊष्माणः अचः स्वराः कादयो मावसानाः स्पर्शाः "एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकम्" इत्यत्र आदिशब्दो विवृतः ॥ ४३ ॥

तदक्षरसमाम्नायेन सव्याहृतिकान् "भूर्भुवः सुवरिति वा एता-स्तिस्रो व्याहृतयः" इत्यादिव्याहृतिसहितान् सोङ्कारानोमित्येतदक्षर-मिदं सर्वमित्यादोङ्कारसहितान् विनियोगमाह—चातुर्होत्रेति । चतुर्भिर्होतृभिः क्रियमाणं कर्म चातुर्होत्रम् ॥ ४४ ॥

ब्रह्मवादिनः वेदाभ्यासविचक्षणान् ते पुत्राः ॥ ४५ ॥

ते वेदाः चतुर्युगेषु सर्वात्मकत्वेन परम्परया प्राप्ताः यथाक्रमं गुरुमुखनार्जिता अध्यापिताश्च तथा अध्ययनं प्राप्ता इत्यर्थः । उक्ता-नुवादमाह—अथेति । अथ त्रेतानन्तरं द्वापरादौ महर्षिभिर्वेदा व्यस्ता अभूवन् ॥ ४६ ॥ 1

एतदेव विवृणोति—क्षीणायुष इति । तत्त्वेषां ज्ञानरूपमाप-निर्माणमित्याह—हृदिस्थेति ॥ ४७ ॥

ननु, सत्यवत्यामुत्पन्नेन वेदाः कस्मिन् युगे व्यस्ता इत्यत्राह—अस्मिन्नपि कस्मिन् आवर्तमानमन्वन्तरे ॥ ४८—४९

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वधाम्नो ब्रह्मण इति आत्मानन्दिनामिव लक्षणा माहत्वं "आत्मि-त्वयज्ञाया नरिष्टं नाम" इति श्रुतः ॥ ४१—४२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

नन इति स्वरा उदात्तादयः ह्रस्वदीर्घादयश्च सन्त्युना अचः त्रिवर्गादयश्च प्रत्याहारश्च सोऽङ्कारादीनामोङ्कारस्य कारणस्याविकारेषु पुनरुक्तिर्वैवर्ण्यं स्वरादिभेदेन ॥ ४३—४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

किञ्च, स्वस्य धाम आश्रयो यत् ब्रह्म तस्य परमात्मनो भगवतश्च वाचकः "ओमित्येतद्ब्रह्मणो नेदिष्ठं नाम" इति श्रुतेः । स प्रणवः सर्वे मन्त्रा उपनिषदश्च यत्र तस्य वेदस्य बीजं कारणं बीजत्वे ऽप्यधिकारितामाह—सनातनं सदेकरूपं तस्य ब्रह्मरूपत्वात् ॥ ४१ ॥

तस्य वेदबीजत्वमेव दर्शयति—तस्य प्रणवस्य त्रयः अकारोकारमकाराः यैरेव त्रिभिर्वर्णैस्त्रयो भावा वेदा धार्यन्ते येश्च त्रिभिर्वेदैर्गुणनामार्थवृत्तयो धार्यन्ते तत्र गुणा ओजः प्रसादाद्याः नामानि शब्दाः अर्था वाच्याभिकूट्यङ्गवृत्तयोऽभिधालक्षणा व्यञ्जना यथा वटबीजेनैव वटवृक्षो धार्यते तेन च स्कन्धशाखा पुष्पफलादयः ॥ ४२ ॥

प्रणवाद्वेदोत्पत्तौ क्रमं दर्शयति—यतः ओङ्कारात् अक्षराणां समाम्नायं समाहारः तमेवाह—अन्तस्था यरलवाः ऊष्माणः शषसहाः स्वरा अकाराद्याः स्पर्शाः कादयो मावसानाः ह्रस्वदीर्घाः स्वरभेदाः आदिशब्दाज्जिह्वामूलीयादयः त एव लक्षणं स्वरूपं यस्य तं तेनाक्षरसमाम्नायेन विभुर्विष्णुरूपो ब्रह्मा असृजदिति पूर्वस्यैवानुषङ्गः ॥ ४३-४४ ॥

पुत्रान् मरीच्यादीन् ॥ ४५ ॥

ते वेदाः ॥ ४६-४७ ॥

अन्तरे वैवस्वतमन्वन्तरे ॥ ४८—४९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुनः कथंभूतः स्वस्य अभिव्यक्तिस्थानतया वाच्यत्वेन च धाम आश्रयः यद्ब्रह्म तस्य परमात्मादिपदाभिधेयस्य वाचकः किञ्च, सर्वेषां मन्त्राणामुपनिषदां वेदानां च बीजं कारणम् ॥ ४१ ॥

किञ्च, तस्य ओङ्कारस्य त्रयो वर्णाः अकारोकारमकाराः यैर्वर्णैस्त्रयो भावाः धार्यन्ते तत्राकारेण सर्वमूलभूतं गम्यं परं ब्रह्म धार्यते "स ब्रह्मा" इति श्रुतेः "अक्षराणामकारोऽस्मि" इति स्मृतेः उकारेण उन्नयतीति उर्गमयिताचार्यो धार्यते अनेनैव मुक्तिकाले यतः प्राकृतात् परमं पदं मुमुक्षुर्नीयते तद्वचनतं तत्वं व्याप्यात्म मकारेण "पञ्चविंशोऽयं पुरुषः" इति श्रुतेः । गन्ता जीवो धार्यते साधान् विशिनष्टि—गुणानामार्थवृत्तयः गुणानां सत्त्वरजस्तमसां नाम्नां वाचकानामर्थानां वाच्यानां शक्तिविभूत्यादिपदार्थानां वृत्तिः येषु ते तथा एव एव प्रणवार्थन्त्रयप्रधानात्मकः गायत्रीसहितेषु तन्मूलेषु सर्वेषु वेदेषु तन्मूलेषु शास्त्रेषु च प्रपञ्चितो ज्ञेयः ॥ ४२ ॥

ततः ओंकारादेव अक्षराणां समाम्नायं समाहारं भगवानजो ऽसृजत् तदेवाह—अन्तस्था यरलवाः ऊष्माणः शषसहाः स्वराः अकारादयः स्पर्शाः कादयो मावसानाः ह्रस्वदीर्घौ स्वरभेदौ आदिशब्दो ऽनुक्तसमुच्चयार्थः अन्तस्थाद्याः लक्षणं स्वरूपं यस्य तम् ॥ ४३ ॥

तेनाक्षरसमाम्नायेन चतुर्भिर्होतृभिः अध्वर्यूपलक्षितैः ऋत्विग्भिः अनुष्ठेयं कर्म चातुर्होत्रं तत्सिद्ध्यर्थं चतुर्भिर्वदनैः "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुत्यासूचितान् प्रणवपुरःसरान् व्याहृतिसहितान् चतुरो वेदानसृजदिति पूर्वेणान्वयः ॥ ४४ ॥

पुत्रान्मरीच्यादीन् अपुत्रेभ्यः काश्यपादिभ्यः ॥ ४५ ॥

ते वेदा एवं परम्परया तच्छिष्यैः चतुर्युगेषु प्राप्ताः यद्वा द्वापरादि द्वापरमारभ्य द्वापरान्तस्य तस्मिन् तस्मिन् द्वापरान्ते सामान्यतो महर्षिभिर्व्यस्ता इत्यर्थः ॥ ४६ ॥

तत्र हेतुमाह—क्षीणायुष इति । कालतः क्षीणायुष अल्पायुष्कान् तत्रापि क्षीणसत्त्वान् रजस्तमोव्याप्तत्वादल्पसत्त्वान् अत एव दुर्मेधान् वीक्ष्य वेदान् ब्रह्मर्षयो व्यस्यन् । ननु वेदानां विभागे तेषां का शक्तिः तत्राह—अच्युतचोदिता इति ॥ ४७ ॥

वैवस्वतमन्वन्तरगताष्टाविंशतिमद्वापरान्ते तु वेदविभागक्रमं विशेषतो निरूपयति—अस्मिन्निति । अन्तरे वैवस्वतमन्वन्तरे भगवान्व्यतीर्णः इत्युत्तरेणान्वयः ॥ ४८ ॥

भाषा टीका ।

किञ्च वह प्रणव अपने आश्रय परब्रह्म परमात्मा का साक्षात् वाचक है, और वह सम्पूर्ण मन्त्र और उपनिषद् रूप है, और वेदका सनातन बीज है ॥ ४१ ॥

हे भृगूद्वह ! उस ओंकार के अकारादि तीन वर्ण हुए जिनतीनों वर्णोंसे सत्त्वादितीनों गुण ऋगयजुः साम ये तीनों नाम, भूः भुवः स्वः ये तीनों लोक, जाग्रत् स्वप्न सुषुप्ति ये तीनो वृत्ति, धारण की जाती हैं ४२ ॥

भगवान अज श्रीब्रह्माजी उन तीन वर्णों से ही अन्तःस्थ [यरलव] ऊष्माण [शषसह] स्वर [अकरादि] स्पर्श [क से म तक २५ वर्ण] ह्रस्वदीर्घ जिह्वामूलीयादि स्वरूप इन अक्षरों के समुदाय को सृजते हुये ॥ ४३ ॥

फिर उसी अक्षरोंके समुदाय से चातुर्होत्र कर्मके कहने की इच्छा से श्रीब्रह्माजी चारों वदनों से, व्याहृति प्रणव सहित चारों वेदों को सृजते हुए, यहां पर 'असृजत्' इति पद की आनुपूर्वी [पूर्वापरीभाव) का मुख से उच्चारण करनाही सृजना है ॥ ४४ ॥

तदनन्तर ब्रह्माजी ने ब्रह्मर्षि वेदोच्चारण करने में निपुण ऐसे अपने पुत्रों को वेद पढ़ाये, फिर वे धर्मोपदेष्टा ब्रह्मर्षि लोग अपने पुत्रों पढ़ाते हुए ॥ ४५ ॥

भूतव्रत तिन २ महर्षियों के शिष्यों ने चारों युगों में परंपरा से उन वेदों को प्राप्त किये । फिर द्वापर के अन्त में महर्षि श्रीवेदव्यास और उनके शिष्यों ने वेद वेदोंका विभाग किया ॥ ४६ ॥

पराशरात्सत्यवत्यामंशांशकलया विभुः ।
अवतीर्णो महाभाग ! वेदं चक्रे चतुर्विधम् ॥ ४९ ॥
ऋगथर्वयजुःसाम्नां राशीनुद्धृत्य वर्गशः ।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ॥ ५० ॥
तासां स चतुरः शिष्यानुपाहूय महामतिः ।
एकैकां संहितां ब्रह्मन्नेकैकस्मै ददौ विभुः ॥ ५१ ॥
पैलाय संहितामाद्यां बह्वृचाख्यामुवाच ह ।
वैशम्पायनसञ्ज्ञाय निगदाख्यं यजुर्गणम् ॥ ५२ ॥
साम्नां जैमिनये प्राह तथा छन्दोगसंहिताम् ।
अथर्वाङ्गिरसीं नाम स्वशिष्याय सुमन्तवे ॥ ५३ ॥
पैलः स्वसंहितामूच इन्द्रप्रमितये मुनिः ।
बाष्कलाय च सोप्याह शिष्येभ्यः संहितां स्वकाम् ॥ ५४ ॥
चतुर्धा व्यस्य बोध्याय याज्ञवल्क्याय भार्गव ! ।
पराशरायाग्निमित्रे इन्द्रप्रमितिरात्मवान् ॥ ५५ ॥
अध्यापयत्संहितां स्वां माण्डूकेयमृषिं कविम् ।
तस्य शिष्यो देवमित्रः सौभर्यादिभ्य ऊचिवान् ॥ ५६ ॥

भाषाटीका ।

हृदय में स्थित श्री अच्युत भगवान् की प्रेरणा से महर्षियों ने जन्तुओं को काल के प्रभाव से क्षीण आयु और क्षीणपराक्रम वाले तथा अल्प बुद्धि वाले देखकर वेदों का विभाग किया ॥ ४७ ॥

हे ब्रह्मन् ! इस मन्वन्तर में भी धर्म की रक्षा के लिये ब्रह्मरुद्रादि लोकपालों की प्रार्थना से लोक की रक्षा करने वाले भगवान् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अंशो माया तस्या अंशः सत्त्वं तस्य कलयांऽशेनावतीर्णः सन् ॥ ४९ ॥

चातुर्विध्यमेवाह—ऋगिति । ऋगादिमन्त्राणां राशीन् । वर्गशः तत्तत्प्रकरणभेदेनोद्धृत्य यथाऽनेकविधमणिराशेर्मणिगणाः पद्मरागादयो विविच्योद्ध्रियन्ते तद्वदुद्धृत्य तैर्मन्त्रैस्तत्र ऋगादिसंहिताश्चक्रे ॥ ५० ॥

तासां संहितानां मध्ये एकैकाम् ॥ ५१ ॥

ऋक्समुदायरूपत्वाद्बह्वृचाख्याम् नितरां प्रश्लेषेण गद्यप्रायत्वान्निगदाख्यम् ॥ ५२ ॥

छन्दः सुगीयमानत्वाच्छन्दोगाख्यां संहिताम् ॥ ५३ ॥

तत्र ऋग्वेदशाखाविभागमाह—पैल इति । स्वसंहितां द्विधा विभज्य इन्द्रप्रमितये बाष्कलाय ऊचे, स बाष्कलोऽपि स्वकां संहितां चतुर्धा व्यस्य बोध्यादिभ्यः शिष्येभ्य आह, हे भार्गव ! इन्द्रप्रमितिरपि स्वां संहितां स्वसुतं माण्डूकेयमध्यापयामास तस्य माण्डूकेयस्य शिष्यो देवमित्रः ॥ ५४—५५—५६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अतः सत्यवत्यामंशांशकलयावतीर्णः हे महाभाग, शौनक ! ॥ ४९ ॥

चातुर्विध्यमेवाह—ऋगिति । ऋगादीनां राशीन् स्वयं साक्षात्कृत्येति शेषः । वर्गशः प्रकरणभेदेन राशिभ्यः उद्धृत्य चतस्रः संहिताश्चक्रे राशीनुद्धृत्येति पाठः सुगमः रत्नानि तथा दर्शनात् । यथानेकविधमणिराशेर्मणिगणानुद्धृत्य मालाः कुर्वन्ति तद्वत् ॥ ५० ॥

अथ तासां संहितानां चतसृणां मध्ये एकैकां संहितां चतुरः शिष्यानुपाहूय तत्रैकैकस्मै एकैकां संहितां महामतिः पाराशर्यः ददौ उपदिष्टवान् ॥ ५१ ॥

कस्मै कां ददौ इत्याह—पैलायेति द्वाभ्याम् । अनेकऋक्समुदायरूपत्वाद्बह्वृचाख्याम् "तेषां ऋग्यत्रार्थवशेन पाद-

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

व्यवस्था" इति ऋग्लक्षणं तेषां मन्त्रब्राह्मणात्मकवेदैकदेशरूपाणां मध्ये यत्र वेत्थर्थभेदेन विशिष्टैकार्थप्रतिपादकत्वेऽप्यवान्तरार्थभेदवशात्पादव्यवस्था सा ऋगिति तदर्थः । यजुर्गणस्य नितरां गद्यमानत्वान्निगदाख्यत्वं यद्यपि ऋक्सामाभ्यामन्यत्प्रश्लिष्टपठितं मन्त्रजातं तदेव यजुस्तया च सूत्रितम् "शेषे यजुःशब्दः" इति "उच्चैर्ऋचा क्रियते उपांशु यजुषा" इति यजुष उपांशुपाठस्यैव श्रवणान्निगदाख्यसंज्ञाविरोधश्च तथापि निगदत्वमत्र न यजुषः लक्षणम् उच्यते किन्तु यजुःसंज्ञेष्वेव केषुचिन्मन्त्रेषु परसम्बोधनरूपेषु "प्रोक्षणीरासादय" इत्येवमादिषु परसम्बोधनाय नितरां गद्यन्ते इति व्युत्पत्त्या वाचनिकोपांशुत्वबाधेन कार्यवशादुच्चैर्धर्मयोग उक्तः ॥ ५२ ॥

सामानीति । यत्र गीत्याधारभूता ऋचः सामशब्दविवक्षिताः "गीतिषु सामा" इति गीतिमात्रस्य सामत्वसूत्रणात्साम्नां सम्बन्धिनीं छन्दोगसंहितां छन्दोगाख्यां संहितां जैमिनये प्राह अथर्वाङ्गिरसं नाम शाखां सुमन्तवे पैलादयोऽपि स्वस्वशाखां स्वशिष्येभ्यः ऊचुरित्याह—पैल इति । स्वसंहितां बह्वृचाख्यां द्वेधा विभज्य स्वपुत्राय इन्द्रप्रमितये शिष्याय बाष्कलाय ऊचे स च बाष्कलोऽपि स्विकां संहिताम् ॥ ५३ ॥ ५४ ॥

चतुर्धा व्यस्य विभज्य हे भार्गव ! बोध्यादिभ्यः चतुर्भ्यः प्राह आत्मवान् धीमानिन्द्रप्रमितिरपि ॥ ५५ ॥

स्वां संहितां स्वसुतं कविं विद्वांसं माण्डूकेयमृषिमध्यापयामास तस्य माण्डूकेयस्य शिष्यो देवमित्रः सौभर्यादिभ्यः शिष्येभ्यः ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदेव विवृणोति—ऋगिति । ऋगादीनां राशीन्वर्गशो वर्गसङ्ग्रहयोद्धृत्य चतस्रः संहिताश्चक्रे सूत्रैः स्यूताः ॥ ५० ॥

तासां संहितानां मध्ये एकैकाम् ॥ ५१ ॥

एकैकामित्युक्तं विशिनष्टि, पैलायेति ॥ ५२ ॥

तथा साम्नामुत्सूनां छन्दोगसंहितां जैमिनये प्राह ॥ ५३—५४ ॥

इन्द्रप्रमितिरपि स्वसंहितां चतुर्धा व्यस्य विभज्य शिष्यान् नाम्ना निर्दिशति—बोध्यायेति । हे भार्गव ! इन्द्रप्रमितिरपि आत्मवान्परमात्मज्ञानी ॥ ५५ ॥

कविनाम्ना माण्डूकेयमृषिं च स्वसंहिताम् अध्यापयत्तस्य माण्डूकेयस्य ॥ ५६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अंशो महापुरुषः तस्यांशो विष्णुः तस्य कलया अंशेन विभुः भगवान् ४९-५५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, ब्रह्मणैव चतुर्भिर्मुखैश्चत्वारो वेदाः प्रथममेव कृतास्तत् कथमुच्यते वेदं चक्रे चतुर्विधमिति ? तत्राह—ऋग्यजुरिति । राशीन् कृत्वा वर्गशस्तत्तत्प्रकरणमेवैर्मणिगणा इवेति यथा मणिः शेषेऽपि पद्मरागहीरकादय उद्धृत्य विविच्य पृथक् पृथक् कूटं क्रियन्त इति चतस्रः ऋगादिसंहिताः ॥ ५० ॥ ५१ ॥

बह्वृचाख्याम् ऋक् संहितां नितरां गद्यमानत्वान्निगदाख्यम् ॥ ५२ ॥ ५३ ॥

तत्र ऋग्वेदशाखाविभागमाह—पैल इति । स्वसंहितां द्वेधा विभज्य इन्द्रप्रमितये बाष्कलाय ऊचे स बाष्कलोऽपि चतुर्धा स्वसंहितां व्यस्य बोध्यादिभ्यश्चतुर्भ्यः स्वशिष्येभ्य आह हे भार्गव ! हे शौनक ! इन्द्रप्रमितिरपि स्वसंहितां सुतं माण्डूकेयमध्यापयामास तस्य माण्डूकेयस्य शिष्यो देवमित्रः ॥ ५४—५६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भगवानवतीर्णः इत्यत्र व्यापकमाह—अंशांशकलया अंशानां स्वासाधारणधर्मज्ञानवैराग्यादिभगानामंशकलयोपलक्षितो विष्णुर्विष्णुरेवावतीर्णः इत्यर्थः ॥ ४९ ॥

चातुर्विध्यं दर्शयति—ऋगिति । ऋगादिमन्त्राणां राशीन् वर्गशस्तत्प्रकरणमेवोद्धृत्य तैः राशिभूतैर्मन्त्रैश्चतस्रः संहिताश्चक्रे यथा मणिगणाः पद्मरागादयः नानाविधमणिमञ्जूषातः उद्धृत्य पृथक् पृथक् क्रियन्ते तद्वत् प्रणवरूपभगवतैव सर्ववेदाः बीजान्तर्गतशाखा इव ब्रह्माणं प्रति सूक्ष्मबीजोपदेशेन कथिताः तेन मरीच्यादिभ्यः अङ्कुरवत् किञ्चित्प्राकट्येनोपदिष्टाः भगवता श्रीवेदव्यासेन तु यथेष्टं विभक्ता इत्यर्थः । अतः "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति "तेनासौ चतुरो वेदान् चतुर्भिर्वदनैर्विभुः" इति च सङ्गच्छते ॥ ५० ॥

तासां संहितानां मध्ये एकैकामेकैकस्मै ददौ ॥ ५१ ॥

तदेवाह—पैलायेति द्वाभ्याम् । ऋक्समुदायरूपत्वाद्बह्वृचाख्याम् ऋक्संहिताम् ऋक्लक्षणम् तेषामृक् यत्रार्थभेदेन पादव्यवस्थेति तेषां वेदवाक्यानां मध्ये यत्रार्थभेदेन विशिष्टैकार्थप्रतिपादकत्वेऽप्यवान्तरार्थभेदवशात्पादव्यवस्थास्ति सा ऋगित्यर्थः । नितरां गद्यमानत्वान्निगदाख्यं यजुर्गणम् अयमर्थः ऋक्सामाभ्यामन्यत् यत् प्रश्लिष्टपठितं मन्त्रजातं तद्यजुः तथाह सूत्रकारः "शेषे यजुःशब्दः" इति तत्र यजुषः उपांशुपाठ उच्चैर्ऋचां क्रियते उपांशुयजुःसंज्ञेषु केषुचिन्मन्त्रेषु प्रोक्षणीः आसादयेत्येवमादिप्रभृतिषु परसम्बोधनाय वाचनिकोपांशुत्वबाधनार्थो नितरां गद्यते इत्युच्चैरुच्चारणात्मको धर्मयोगो निगदाख्यमिति पदेनोक्तः ॥ ५२ ॥

गीताश्रयः ऋचः सामानि तथाह सूत्रकारः "गीतिषु साम" इति तेषां साम्नां सम्बन्धिनीं छन्दोगाख्यां संहिताम् ॥ ५३ ॥

तत्र पैलतच्छिष्यप्रशिष्यकृतऋग्वेदशाखाविभागमाह—पैल इति । पैलः स्वसंहितायां द्विधा विभज्य इन्द्रप्रमितये बाष्कलाय च ऊचे सोऽपि बाष्कलोऽपि ॥ ५४—५५ ॥

तस्य माण्डूकेयस्य शिष्यो देवमित्रः ॥ ५६ ॥

शाकल्यस्तत्सुतः स्वान्तु पञ्चधा व्यस्य संहिताम् ।
वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ॥ ५७ ॥
जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ।
बलाकपैजवैतालविरजेभ्यो ददौ मुनिः ॥ ५८ ॥
बाष्कलिः प्रतिशाखाभ्यो बालखिल्याख्यसंहिताम् ।
चक्रे बालायनिर्भज्य कासारश्चैव तां दधुः ॥ ५९ ॥
बह्वृचाः संहिता ह्येता एभिर्ब्रह्मर्षिभिर्धृताः ।
श्रुत्वैतच्छन्दसां व्यासं सर्वपापैः प्रमुच्यते ॥ ६० ॥
वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् ।
यच्चेरुर्ब्रह्महत्यांऽहःक्षपणं स्वगुरोर्व्रतम् ॥ ६१ ॥
याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् ! कियत् ।
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥ ६२ ॥
इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया ।
विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति ॥ ६३ ॥
देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम् ।
ततो गतोऽथ मुनयो ददृशुस्तान्यजुर्गणान् ॥ ६४ ॥

भाषा टीका।

हे महाभाग ! परम समर्थ श्रीनारायण अपने अंशांश-कला करके अर्थात् आवेशावतार लेकर पराशर ऋषिसे सत्यवती देवी के विषें अवतार लेकर एक वेद के चार-विभाग करते हुये ॥ ४९ ॥

ऋग्वेद अथर्ववेद, यजुर्वेद, सामवेद, इस प्रकार ऋक् आदि मन्त्रों को प्रकरणवश भेदों से अलग २ निकाल कर ऋगादि पृथक् २ चार संहिता करदी। जैसे कि-गानोपयुक्त मंत्रों के समुदाय को एकत्र कर साम संहिता करी इत्यादि ॥ ५० ॥

हे ब्रह्मन् ! तत्पश्चात् व्यासजी ने चार शिष्यों को बुलाकर उन चारों संहिताओं में से एक एक संहिता एक २ शिष्य को पढाई ॥ ५१ ॥

पैल नामक शिष्य को बह्वृच जिसका नाम ऐसी आद्य-संहिता पढाई, और वैशंपायन को निगद जिसका नाम ऐसी यजुर्वेद की संहिता पढाई ॥ ५२ ॥

तथा जैमिनि को छन्दोग जिसका नाम ऐसी सामवेद की संहिता पढाई, और अथर्व की आंगिरसी संहिता अपने शिष्य सुमन्तु को पढाते हुये ॥ ५३ ॥

पैल मुनि ने ऋक् संहिता को दो शाखाकरके अपने शिष्य इन्द्रप्रमिति और बाष्कल को पढाई। बाष्कल ने भी अपनी संहिता को अपने शिष्यों को पढाई ॥ ५४ ॥

हे भार्गव ! बाष्कलने अपनी संहिता के चार विभाग किये, और बोध्य, याज्ञवल्क्य, पराशर, अग्निमित्र इन चार शिष्यों को पढाई ॥ ५५ ॥

जितमनस्क इन्द्रप्रमिति ने भी अपनी संहिता को माण्डूकेय ऋषि को पढाई, जोकि-बड़े कवि थे। और माण्डूकेय के शिष्य देवमित्र ने सौभरि प्रभृतियों को अध्ययन कराया ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

तत्सुतो माण्डूकेयसुतः शाकल्यो वात्स्यादिषु पञ्चधाधात् तानध्यापयामासेत्यर्थः ॥ ५७ ॥

तच्छिष्यः शाकल्यशिष्यः स्वसंहितां त्रेधा विभज्य चतुर्थं वैदिकपदार्थव्याख्यानरूपं निरुक्तं च कृत्वा बलाकादिभ्यश्चतुर्भ्यो ददौ ॥ ५८ ॥

बाष्कलिः पूर्वोक्तस्य बाष्कलस्य पुत्रः प्रतिशाखाभ्यः उक्तसर्वशाखाभ्यः बालखिल्याख्यसंहितामुद्धृत्य चक्रे तां बालायन्यादयस्त्रयोऽधीतवन्तः ॥ ५९ ॥

ऋक्शाखोपसंहारपूर्वकं तच्छ्रवणफलमाह-बह्वृचा इति। एतच्छन्दसामेतेषां छन्दसाम् ॥ ६० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह—वैशम्पायनशिष्या इत्यादिना । चरकनामनिरुक्तिमाह—यच्चेरुरिति । यद्यस्माद्ब्रह्महत्यारूपमंहः क्षपयतीति तथा तत्स्वगुरोरनुष्ठेयं व्रतं तच्चरणाच्चरका इत्यर्थः ॥ ६१ ॥

नांल्पसारैः पूर्वेरंल्पसाराणामेतेषां चरितेन कियत् सुदुश्चरमहं चरिष्यामीति ॥ ६२ ॥

विप्रावमन्त्राऽवज्ञाकर्त्रा मत्तोऽधीतमाशु त्यजेति ॥ ६३ ॥

देवरातसुतो याज्ञवल्क्यः ॥ ६४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

चरकाध्वर्यवः अध्वर्युशाखाध्ययनादध्वर्यवः चरकशब्दनिरुक्तये चेरुरिति ॥ ६१ ॥

अल्पसाराणां अल्पतपसामितरशिष्याणाम् ॥ ६२—६६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तत्सुतः मण्डूकेयसुतः शाकल्यस्तु स्वां संहितां पञ्चधा विभज्य वात्स्यादिषु पञ्चसु जनेषु तानध्यापयामासेत्यर्थः ॥ ५७ ॥

तच्छिष्यः शाकल्यशिष्यो जातूकर्ण्यस्तु सनिरुक्तां संहितां विभज्य निरुक्तं नाम वैदिकपदव्याख्यानं तेन साकं चतुर्धा विभज्येत्यर्थः । बलाकादिभ्यश्चतुर्भ्यो ददौ ॥ ५८ ॥

बाष्कलिः पूर्वोक्तबाष्कलस्य पुत्रः प्रतिशाखाभ्य उक्तसर्वशाखाभ्य उद्धृत्येति शेषः । वालखिल्याख्यां शाखां चक्रे तां च पैलायन्यादयः त्रय जगृहुः ॥ ५९ ॥

एवमृक्शाखाविभागप्रकारमभिधाय तच्छ्रवणफलमाह—बह्वृच इति । एतच्छन्दसाम् एतेषां छन्दसां व्यासं विभागं श्रुत्वा सर्वैः पापैः प्रमुच्यते ॥ ६० ॥

अथ तैत्तिरीयशाखोत्पत्तिं प्रस्तौति—वैशम्पायनशिष्या इति । चरकाध्वर्यवः अध्वर्युशाखाध्ययनादध्वर्यवश्चरकाश्चासन् तत्र चरकशब्दं निर्वक्ति—ये चेरुरिति । ब्रह्महत्यारूपम् अंहः पापं क्षपयतीति तथा तत्स्वगुरोरनुष्ठेयं व्रतं चेरुः व्रतचरणाच्चरकसंज्ञाश्चाभवन् इत्यर्थः ॥ ६१ ॥

याज्ञवल्क्य इति । तच्छिष्यः वैशम्पायनशिष्यः याज्ञवल्क्यः अयं पूर्वोक्तादन्यः आह—गुरुमिति शेषः । उक्तिमेवाह—अहो इत्यादिना सुदुश्चरम् इत्यन्तेन । हे भगवन् ! अहो अल्पसाराणां अल्पतपसामेतेषां चरितेन कियदिदन्तु सुदुष्करं व्रतं चरिष्यामीति ॥ ६२ ॥

इत्युक्त इति । विप्रावमन्त्रा विप्रावमानकर्त्रा हेतुगर्भमिदं शिष्येण याज्ञवल्क्येनेतीत्थमुक्तः कुपितो गुरुरप्याह, किमिति त्वयाऽलं याहि मदधीतं मत्तोऽधीतमाशु त्यजेति ॥ ६३ ॥

अथ देवरातसुतो याज्ञवल्क्यः यजुषां गणं छर्दित्वोत्ससर्ज ततः ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तस्य सुतौ वेदमित्रस्य पुत्रः वात्स्यादिषु पञ्चसु अध्याय अदात् ॥ ५७ ॥

तस्य शाकल्यस्य शिष्यः सनिरुक्तां निरुक्तसहिताम् ॥ ५८ ॥

बाष्कलिः पूर्वोक्तबाष्कलपुत्रः प्रतिशाखाभ्यः पूर्वोक्तसर्वशाखाभ्यः उद्धृत्य वालखिल्याख्यसंहितां चक्रे तां नाम्ना वालखिल्यसंहितां बालायनिप्रभृतयो त्रयः अधीतवन्तः ॥ ५९ ॥

उक्ता एताः संहिता नाम्ना विशिनष्टि—बह्वृचा इति । ऋग्वेदसंहिताः किमनेन छन्दसां व्यासेन श्रुतेनाधीतेन निःश्रेयसानुपयुक्तेनेति तत्राह, श्रुत्वेति ॥ ६० ॥

चरकास्तीर्थसेवकाः अध्वर्यवो यज्ञकर्मणि निपुणाः ऋत्विग्विशेषाः ॥ ६१ ॥

तस्य वैशम्पायनस्य शिष्यो याज्ञवल्क्यो गुरुमित्याह—हे भगवन्गुरो ! ब्रह्महत्यांहःक्षपणाय व्रतं चेरुरिति यस्मात्तस्मादंहः प्रत्यल्पसाराणामेतेषां चरितेन कियत्किम्प्रयोजनं स्यादहं सुदुश्चरं व्रतं चरिष्ये करिष्यामीति ॥ ६२ ॥

ततो गुरुणा किमुक्तमत्राह—इतीति । विप्रावमन्त्रा ब्राह्मणावज्ञाकर्त्रा शिष्येण त्वयाऽलं इतो याहि किं च मदधीतं आशु त्यज उत्सृजेति ॥ ६३ ॥

देवरातसुतः याज्ञवल्क्यः ततो गुरुकुलात ॥ ६४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्सुतः माण्डुकेयसुतः शाकल्यः वात्स्यादिषु पञ्चसु जनेषु तान् अध्यापयामास ॥ ५७ ॥

तच्छिष्यः शाकल्यशिष्यः स्वसंहितां त्रेधा विभज्य चतुर्थं वैदिकपदार्थव्याख्यानरूपं निरुक्तं च कृत्वा बलाकादिभ्यश्चतुर्भ्यो ददौ ॥ ५८ ॥

बाष्कलिर्बाष्कलपुत्रः प्रतिशाखाभ्यः शाखाभ्यः शाखाभ्यः सङ्गृह्य ॥ ५९ ॥

यजुर्वेदे तैत्तिरीयकशाखोत्पत्तिप्रकारमाह—वैशम्पायनेति । चरकनामनिरुक्तिमाह, ये चेरुरिति । ब्रह्महत्यारूपमंहः क्षपयतीति तथा तत्स्वगुरोरनुष्ठेयं व्रतं तच्चरणाच्चरकाश्च ते अध्वर्यवश्चेति ते तथा ॥ ६१ ॥

याज्ञवल्क्योऽपि तच्छिष्यः वैशम्पायनशिष्यः अल्पसाराणामेषां चरितेन प्रायश्चित्ताचरणेन कियत् एते सुखं तिष्ठन्तु अहमेक एव तपः समर्थश्चरिष्यामि ॥ ६२ ॥

कुपित इति यतो गर्ववशात् एतान् विनीतानपि अल्पसारानुक्त्वा आक्षिपसि तस्मात् याहि इतोऽपसर त्वया शिष्येण ममालं ततश्च भवत्वहं यामीत्युक्त्वा जिगमिषन्तं तं पुनराह—मदधीतमिति ॥ ६३ ॥

देवरातसुतो याज्ञवल्क्यः ॥ ६४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शाकल्यस्तत्सुतः माण्डूकेयसुतः ॥ ५७ ॥

तच्छिष्यः शाकल्यशिष्यः जातूकर्ण्यश्च स्वसंहितां चतुर्धा

यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः ।
तैत्तिरीया इति यजुःशाखा आसन्सुपेशलाः ॥ ६५ ॥
याज्ञवल्क्यस्ततो ब्रह्मन् ! छन्दांस्यधिगवेषयन् ।
गुरोरविद्यमानानि सूपतस्थेऽर्कमीश्वरम् ॥ ६६ ॥

याज्ञवल्क्य उवाच ।

ओं नमो भगवते आदित्यायाऽखिलजगतामात्मस्वरूपेण कालस्वरूपेण च चतुर्विधभूतनिकायानां ब्रह्मादिस्तम्बपर्यन्तानामन्तर्हृदयेषु बहिरपि चाकाश इवोपाधिनाऽव्यवधीयमानो भवानेक एव क्षण-लवनिमेषावयवोपचितसम्वत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति ॥ ६७ ॥

यदु ह वाव विबुधर्षभ ! सवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदु-रितवृजिनबीजावभर्जन! भगवतः समभिधीमहि तपन ! मण्डलम् ॥ ६८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विभक्तां निरुक्तेन वैदिकपदार्थव्याख्यानेन चतुर्थेन संहितायां चतुर्भ्यो बलाकादिभ्यो ददौ ॥ ५८ ॥

बाष्कलिर्बाष्कलस्य पुत्रः वालायनिः भज्यः कासारश्च एते त्रयो दधुः आदधुः अधीतवन्तः ॥ ५९ ॥ ६० ॥

यजुर्वेदे तैत्तिरीयशाखोत्पत्तिं दर्शयति, वैशम्पायन इत्यादिना । अध्वर्युशाखाध्ययनादध्वर्यवः यत् यस्मात् ब्रह्महत्यारूपमंहः पापं क्षपयतीति ब्रह्महत्यांहःक्षपणं गुरोरनुष्ठेयं व्रतं चेरुस्तस्मा-च्चरकाः अभवन् तादृशव्रतचरणाच्चरकसंज्ञा अभवन्नित्यर्थः ॥ ६१ ॥

तच्छिष्यः वैशम्पायनशिष्यः याज्ञवल्क्यः आह गुरुमिति शेषः । अल्पसाराणामल्पतपसाम् एतेषां भवच्छिष्याणां चरितेन व्रताचरणेन कियत् अहमेकः सुदुष्करं व्रतं चरिष्ये चरिष्यामि ॥ ६२ ॥

याज्ञवल्क्येन इत्येवमुक्तः गुरुः कुपित आह-विप्रावमन्त्रा-निष्कारणं विप्रावज्ञाकर्त्रा शिष्येण ममाऽलम् अतो मदधीतं मत्तोऽधीतमाशु त्यज याहि आश्रमादपसर ॥ ६३ ॥

देवरातस्य सुतः स याज्ञवल्क्योऽपि यजुषां गणं छर्दित्वा उद्गीर्य गतः आश्रमात् ॥ ६४ ॥

भाषाटीका ।

मांडूकेय के पुत्र शाकल्य ने अपनी पठित संहिता के पांच ५ विभाग कर वात्स्य, मुद्गल, शालीय, गोखल्य, और शिशिर, इन्हों को पढाई ॥ ५७ ॥

शाकल्य के शिष्य जातूकर्ण्य ने अपनी संहिता के तीन विभाग करे, और वैदिक पदार्थों के व्याख्यान रूप निरुक्त चौथा करके बलाक, पैज, वैताल, विरज, इन चारों शिष्यों को पढाई ॥ ५८ ॥

बाष्कल के पुत्र बाष्कलि जी उक्त सम्पूर्ण शाखाओं से वालखिल्याख्य संहिता करते हुए, जिस संहिता को वालायनि, भज्य और कासार ने धारण करी ॥ ५९

बहुत ऋचाओंवाली इन संहिताओं को इन पूर्वोक्त ब्रह्मऋषियों ने धारण करी, इस वेदके विभाग को सुनकर पुरुष समस्त पापों से छूटजाता है ॥ ६० ॥

वैशंपायन के शिष्य चरक अध्वर्यु होते हुए, उनका चरक नाम क्यों हुआ, कि—उन्होंने अपने गुरुके ब्रह्महत्याके पाप के छुटाने वाला व्रतका आचरण किया ॥ ६१ ॥

वैशंपायन के शिष्य याज्ञवल्क्य बोले, कि-हे भगवन् ! इन अल्पतप वाले आप के शिष्योंके व्रताचरण से क्या होना है, मैं बड़े दुष्कर व्रतका आचरण करूंगा ॥ ६२ ॥

याज्ञवल्क्य ने ऐसा कहा तब गुरु वैशंपायनजी कुपित होकर बोले, कि—जो ब्राह्मणों के अपमान करने वाले तेरे सरीखे शिष्य से हम को कुछ प्रयोजन नहीं, तूने जो हम से पढा है उसे जल्दी त्यागकर ॥ ६३ ॥

इतनी बात को सुनकर याज्ञवल्क्य ने भी उन यजुर्गणों का छर्दन (वान्ति-उलटी) कर दिया । तदनन्तर मुनि लोगों ने उन यजुर्गणों को देखा ॥ ६४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

छर्दितस्याऽऽदानं विप्ररूपेणानुचितमिति तित्तिराः पक्षिविशेषा भूत्वाऽऽददुः ततश्च तैत्तिरीया इति प्रसिद्धाः सुपेशला अतिरम्याः बहुवचनमवान्तरभेदविवक्षया ॥ ६५ ॥

काण्वमाध्यन्दिनादिशाखाप्रवृत्तिमाह-याज्ञवल्क्य इत्यादिना । गुरोर्वैशम्पायनस्य व्यासेन विभज्यानुक्तत्वादविद्यमानान्यधिकानि गवेषयन् मृगयन् सूपतस्थे सम्यक् तुष्टाव ईश्वरमृगादिवेदानां तथा च श्रुतिः "ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अह्नः सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः" इति ॥ ६६ ॥

नमो भगवते तुभ्यमादित्याय यो भवानेक एवेमां लोकयात्रामनुवहतीत्यन्वयः । तदेव दर्शयति-अखिलजगतामात्मस्वरूपे-

य इह वाव स्थिरचरनिकराणां निजनिकेतनानां मनइन्द्रियासुगणाननात्मनः स्वयमात्माऽन्तर्यामी प्रचोदयति ॥ ६९ ॥

य एवेमं लोकमतिकरालवदनान्धकारसञ्ज्ञाजगरग्रहगिलितं मृतकमिव विचेतनमवलोक्यानुकम्पया परमकारुणिक ईक्षयैवोत्थाप्याहरहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्रवर्तयत्यवनिपतिरिवासाधूनां भयमुदीरयन्नटति ॥ ७० ॥

परित आशापालैस्तत्र तत्र कमलकोशाञ्जलिभिरुपहृतार्हणः ॥ ७१ ॥

अथ ह भगवंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वन्दितमहमयातयामयजुःकाम उपसरामीति ॥ ७२॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ण्यान्तर्हृदयेषु काशस्वरूपेण च बहिरपि वर्तमान इति अखिल-जगतामित्यस्य प्रपञ्चः चतुर्विधेति हृदयान्तर्वर्तित्वेऽपि जीव-वत्तेनोपाधिनाऽव्यवधीयमानो अनाच्छाद्यमानः । काशस्वरूपेण चेत्यस्य प्रपञ्चः क्षणेति क्षणलवादयो येऽवयवास्तैरुपचिताः संवत्सरास्तेषां गणेन अपामादानं शोषणं विसर्गो वृष्टि-स्ताभ्याम् अनेन गायत्रीप्रथमपादोक्तवरेण्यताऽनुवर्णिता ॥ ६७ ॥

द्वितीयपादार्थानुवर्णनेन स्तौति—यदुहेति । हे विबुधर्षभ ! हे सवितः ! यदुह वाव भगवतस्तव मण्डलं तपति तत्सम्यगभिधी-महीति सम्यगाभिमुख्येन ध्यायेम पुनस्तस्यैव सम्बोधनं प्रत्यहं त्रिषवणं वैदिककर्ममार्गेण स्तुवतां भक्तानां याम्याखिलानि दुरितानि तत्फलानि च वृजिनानि दुःखानि तेषां बीजमज्ञानं च तेषामवभर्जन ! विनाशक ! हे तपन ! इति ॥ ६८ ॥

तृतीयपादेन स्तौति—य इहेति । यो भवान् स्थावरजङ्गमसमूहानां स्वाश्रयाणां जीवानां मनइन्द्रियप्राणगणानात्मनो जडान् स्वयमात्मैवान्तर्यामी सन् प्रचोदयति प्रवर्तयति ॥ ६९ ॥

तृतीयपादमेव मण्डलपरतया व्याचक्षाणः स्तौति—य एवेति । य एक एव भगवानतिकरालवदनो योऽन्धकारसञ्ज्ञो-ऽजगरग्रहस्तेन गिलितमत एव मृतकमिव विचेतनं स्वधर्माख्यं यदात्मावस्थानं प्रत्यक्प्रवणत्वं तदेव श्रेयस्तस्मिन्प्रवर्तयति किञ्च, यो भवानवनिपतिरिवाटति गच्छति ॥ ७० ॥

आशापालैरिन्द्रादिभिः कमलकोशयुक्तैस्तत्तुल्यैर्वाऽञ्जलि-भिरुपहृतार्हणो दत्तार्घः ॥ ७१ ॥

यत एवम्भूतस्त्वमथातः ह स्फुटमयातयामान्यन्यैर्यथावद्-विज्ञातानि यजूंषि तत्कामोऽहमुपसरामि भजामि ॥ ७२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

नम इत्यादि आदित्यमण्डलान्तर्वर्तिभगवत्स्तुतिः ॥ ६७ ॥

यदुहेति यन्मण्डलं तपति इह स्थितोऽन्तर्यामी देहेन्द्रिया-सुगणानात्मनश्च प्रचोदयतीत्यन्वयः ॥ ६८ ॥

स्थिरचरनिकराणामित्यादि एकमेवास्या य एवेति तस्य तव चरणयुगलमुपसरामीत्यन्वयः ॥ ६९—८० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ मुनयः छर्दितानामादानं विप्ररूपेणाऽनुचितम् इति मन्वानाः तित्तिराख्यपक्षिविशेषा भूत्वा तच्छर्दालोलुपतयाऽऽददुः जगृहुः अतो यजुःशाखाः तैत्तिरीयसंज्ञा आसन् सुपेशलाः अतिरम्याः बहुवचनमवान्तरभेदविवक्षया ॥ ६५ ॥

कायवमाध्यन्दिनशाखाप्रवृत्तिं प्रस्तौति—याज्ञवल्क्य इत्यादिना । हे ब्रह्मन् ! गुरोरधीतानि छन्दांस्यधिगतंगतमन्येवमच्छर्दयन् छर्दितवानिति भावः अर्कमादित्यमण्डलान्तर्वर्तिनमीश्वरम् सुष्ठु उपतस्थे तुष्टाव ॥ ६६ ॥

स्तुतिमेवाऽऽह—ॐ नम इत्यादिना । यो लोकयात्रामनुवहति तस्मै भगवते आदित्याय तुभ्यं नमः इति सम्बन्धः । तमेव दर्शयति—अखिलेत्यादिना । अखिलजगदात्मत्वमेव प्रपञ्चयति—चतुर्विध-भूतनिकायानां देवमनुष्यपशुपादपभेदेन जरायुजाण्डजस्वेदजो-द्भिज्जरूपेण वा चतुर्विधं भूतसमुदायानां किं बहुना ब्रह्मादिस्तम्ब-पर्यन्तानामन्तर्हृदयेष्वाकाश इव व्यवधायुपाधिना ब्रह्मादिस्तम्ब-पर्यन्तेनाऽव्यवधीयमान अनपोह्यमान अस्पृष्टव्याच्छादितश्च इत्यर्थः । कालरूपतां प्रपञ्चयति—बहिःक्षणादिभिरवयवैरुपचितेन संवत्सरगणेन तोयादानविसर्गाभ्यामिमां लोकयात्रां धाकवृत्ति-मनुवहति निर्वहति ॥ ६७ ॥

अखिलजगदात्मस्वरूपेणात्ममेनाऽन्तःप्रविश्य प्रेरकस्वरूपो गायत्रीप्रथमपादस्य सवितृशब्दार्थ उक्तः । अथ द्वितीयपादस्य भर्गशब्दार्थवर्णनेन स्तौति—यदुह वेति । उहवावेति प्रसिद्धि-द्योतको निपातसमुदायः भगवतस्तव यन्मण्डलमवतपति तत्सम-धीमहीति सम्बन्धः । स्वधीमहि सुष्ठु ध्यायेमेत्यर्थः । हे विबुधर्षभ ! हे सवितः ! हे तपनेति त्रीणि सम्बोधनानि मण्डलं विशिनष्टि—अहरहरनुसवनम् त्रिसन्ध्यमाम्नायविधिना वैदिकमार्गेण उप-तिष्ठमानानां जनानां याम्याखिलानि दुरितानि पापानि वृजनानि तन्मूलानि दुःखानि च तान्येव बीजानि । यद्वा, दुरितानां बीजमज्ञानं च भर्जयतीति भर्जनं तद्गुणः भर्जो यस्य तत् ॥ ६८ ॥

अथ तृतीयपादार्थसमर्थप्रचोदयितृत्वकथनेन स्तौति, यदुहवा-वेति उह वावेति । पूर्ववत् यो भवान्निजनिकेतनानां स्वशरीराणां स्थावरजङ्गमसमूहानां मन इन्द्रियप्राणगणात्मनो जीवांश्च स्व-मात्माधारकोऽन्तर्यामी च सन् प्रचोदयति ॥ ६९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चतुर्विधपुरुषार्थप्रदत्वमाविःकुर्वन्स्वाभिप्रेतं निवेदयति—य एवेति । अतिकरालवदनो योऽन्धकारस्तद्रूपोऽजगरस्तद्ग्रस्तेन गृहीतं गिलितमत एव मृतकमिवाचेतनं निःसञ्ज्ञमिमं लोकम् अव-लोक्यानितरसाधारणया कृपावत्तया उत्पाद्य महदहङ्कारि-सञ्ज्ञं स्वधर्माख्यावस्थाने स्वधर्मार्थं स्वाराधनधर्मार्थं यद्धाधारमात्मधारणावस्थानं चित्तसमाधानं तस्मिन् श्रेयसि प्रवर्तयिष्यति यश्च भगवद्वलीपतिरिवानिमिषाणां देवानामधिपतिरसाधूनां दुष्ट-सत्त्वानां भयमुदीरयत्युत्पादयन्नटति यश्च परित आशापालैर्दिक्-पालैः कर्तृभिः कमलकोशाञ्जलिभिः कमलकोशाकारैरञ्जलिभिरुप-हृतं समर्पितमर्हणाम् यस्य सः अटतीति पूर्णेणान्वयः ॥ ७० ।७१॥

अथ ह ननु, खलु हे भगवंस्त्रिभुवनगुरुभिर्ब्रह्मादिभिरभि-वन्दितमुक्तविधस्य पदकमलयुगलमहमयातयामयजुःकामः अया-तया मात्मव्यैर्वन्द्यावद्विद्वाताश्यगतसाराणि या यजूंषि कामय-मान उपसरामि भजामीत्युपनतार्थे इति पूर्वेणान्वयः ॥ ७२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तल्लोलुपतया यजुर्गण्यमहंणाच्छादनानादतुः कचोचकुः ॥ ६५ ॥

छन्दांस्यभिगवेषयन्नप्यंतु मृगयन्नर्क परमानन्दरूपत्वादाह्लि-दात्माचंनाख्, सूर्यान्तर्यामित्वाच्च तन्नामानमीश्वरं नारायणं सुष्टु-पतस्थे तुष्टाव ॥ ६६ ॥

ॐ नमस्ते " ॐ नमो भगवते ब्रह्मपतयेनुगाथाम"इति यावत्: "अथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन् गुणा"इति श्रुतेः गुणो-तोरत्वाद्ब्रह्मारव्याव्ययमेवार्थः इममेवार्थं सूचयति, भगवत इति । भगवते षड्गुणपूर्णाय अयं वसिष्ठादिर्वविद्वानीत्यतो भगवानित्याह, आदिभाय आदिमयाय पुरातनाय । यद्वा, प्रत्यग्विन्द्रेन्श्वर्याय एतत् द्रवमुपपादयति—अखिलेति । यो भगवान् ब्रह्मादिस्तम्बपर्यन्तानां अण्डजादिभेदेन चतुर्विधभूतसमूहानां हृदयेष्वन्तरखिलजगदा-त्मस्वरूपेण समस्तजगदन्तर्यामिस्वरूपेण स्थितो बहिरपि लवा-द्युनिमेषाद्यवयवोपचितमन्वत्सरगणलक्षणेन कालरूपेणाकाश इव उपयुज्यमानः तोयादानविसर्गाख्यां प्रत्यङ्गन्तोयस्य आदानं शोषणं विसर्गं वृष्टिस्ताभ्यामिमां लोकयात्रामनुवहति । यद्वा, घटाद्युपाधिनाकाश इव सुरनरादिशरीरोपाधिना उपयुज्यमानः परिच्छिद्यमान इति ॥ ६७ ॥

हे विबुधर्षभ ! हे सवितः ! तव यद्दो मण्डलमनुसवनं तपति प्रकाशते इह वा वेदघट्कारार्थः हे तपन! प्रकाशमशीक्ष! तत्सम-भिधीमहि सम्यक्विन्तयामः कीदृशं मण्डलमहरहरान्मायविधिना वेदोक्तप्रकारेणोपतिष्ठमानानां सेव्यमानानामखिलानां दुरितानां दुष्पापानां दुःसहानां वृजिनानां दुःखानां बीजानि दुष्कर्मा-ण्यवमर्जयितुं शीलमस्यास्तीति अस्मिन्नर्थे ल्युट्प्रत्ययः ॥ ६८ ॥

इह भुवि ये वाव स्वनिकेतनानां स्वाश्रयाणां स्थिरचर-निकराणामात्मा स्वामी अन्तः स्थित्वा सुखवेदकश्च तत्वमनारो-पितस्वभावः स्वयं नेषामनात्मन अचेतनप्रायान् मनइन्द्रियासु-गणान्प्रचोदयति प्रेरयति अनेन विशेषणद्वयेन " तत्सवितुर्व-रेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्" इत्ययं विवृतः यो नो धियो मानसाधनत्वादिन्द्रियाणि प्रचोदयात्तस्य सवि-तुर्जगत्स्रष्टुः भर्गः सकलदुःखबीजभर्जनकं वरेण्यं रमणीयं तन्मण्डलं धीमहीति "आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च" इति ॥ ६९ ॥ ७० ॥

अतिकरालं वदनं यस्य स तथा स एवान्धकारः अज्ञान-लक्षणस्तत्साऽन्या ऽजगरसर्पेण गृहीतं अतः मृतकमिव शयवच्चे-तनकरमिमं लोकं अनमवलोक्य दुःखीकृतचित्तवृत्त्या परमका-रुणिको यो भवानीशवेव कटाक्षनिरीक्षणेनैव समुत्थाप्यानुदिन-मात्मनः परमात्मनोऽवस्थानं प्रासर्पणमात्रतया तस्मिन्स्वधर्माख्य श्रेयसि प्रवर्तयत्येव " चित्रं देवानामुदगादनीकं चक्षुर्मि-त्रस्य वरुणस्याग्नेः" इति श्रुतेः । कालप्रणायको यश्च भवा-नाशापालैरिन्द्रादिभिः कमलकुड्मलाञ्जलिभिस्तत्र तत्र समुप-स्थितोऽसाधूनां भयमभयमुदीरयन् परितः अटति परिवर्तते "आ-प्रा द्यावापृथिवी अन्तरिक्षम"इति श्रुतिः । तस्मै तुभ्यं नम इति पूर्णे-णान्वयः ॥ ७१ ॥

स्वाभिप्रायमुद्घाटयति—अथेति । यस्मादेवात्यामयजुष्कामोऽस्मि तस्मात्त्रिभुवनगुरुभिरभिवन्दितं तव चरणारविन्दयुगलमुपसरामि शरणं गतोऽस्मीति सुद्धार्थत्यर्थः ॥ ७२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ईश्वरमिति तदन्तर्यामिरूपेण भाव्यमानमित्यर्थः ॥ ६६—७३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वाजिनस्याह्वानं विप्ररूपेणायुक्तमिति तेनिरा पक्षिविशेषा भूत्वा अतस्तु मतश्च तैत्तिरीया इति ख्याताः ॥ ६५ ॥

अभिगवेषयन् अन्विष्यन् गुरोर्वैशम्पायनस्यापि अविद्यमानानि तेमाद्यन्यधिगतानीत्यर्थः ॥ ६६ ॥

यो भगवानेक एव इमां लोकयात्रामनुवहति तस्मै आदि-त्याय अखिलजगतां भगवते श्रीमते नम इत्यन्वयः "भगं श्री-काममाहात्म्य"इत्यमरः चतुर्विधभूतनिकायानाम् अन्तर्बहिरपि क्षणे-णात्मस्वरूपेण कालस्वरूपेण च वर्तमान इत्यर्थः।हृदयान्तर्वर्तित्वेपि जीववत्तेन उपाधिना अव्यवधीयमानः अनाच्छाद्यमानः आका-शवत् क्षणलवादयो येऽवयवास्तैरुपचिताः संवत्सरास्तेषां गणेन प्रत्यब्दमेव अपाम आदानं शोषणं विसर्गं वृष्टिस्ताभ्याम् ॥ ६७ ॥

हे विबुधर्षभ ! सवितः ! यन्मण्डलं तपति तदः समभिधी-महि अनुसवनं प्रतिसमयम् अहरहः प्रत्यहं च आम्नायविधिना वैदिकमार्गेण उपतिष्ठतां स्तुवतां यान्यखिलानि दुरितानि तत्फलानि वृजिनानि दुःखानि च तेषां बीजमज्ञानं च तेषा-मवमर्जन ! विनाशक ! हे तपन! ॥ ६८ ॥

अनात्मनो जडान् प्रचोदयति प्रवर्तयति ॥ ६९ ॥

रेवयैवोत्थाप्य पूर्वाद्धिष्टुतिरस्य ईर्षणप्रदानेनेत्यर्थः। स्वधर्माख्यं यत् आत्मावस्थानम् आत्मोपासनं तत्र ॥ ७० ॥

आशापालैर्दिक्पालैरिन्द्रादिभिः कमलकोशमुकुलरूपैर्वा अञ्जलिभिरुपहृतार्हणः इत्यर्थः ॥ ७१ ॥

अयातयामानि ऊर्ध्वस्थानि अन्यैरप्यनवगतानीत्यर्थः । यानि यजूंषि तत्कामोऽहमुपसरामि भजामि ॥ ७२—७३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

छर्दितस्य यजुर्गणस्य विप्ररूपेणादानमयुक्तमतस्तित्तिराः पक्षिविशेषा भूत्वा तानि यजूंषि जगृहुः, अतो यजुःशाखाः तैत्तिरीयाः इति प्रसिद्धाः सुपेशलाः सुरम्याः बहुवचनमवान्तरभेदाभिप्रायम् ॥ ६५ ॥

काण्वमाध्यन्दिनादिशाखाप्रवृत्तिप्रकारमाह-याज्ञवल्क्य इत्यादिना। ततः गुरोराश्रमान्निर्गमनानन्तरं श्रीव्यासेन विभज्यानुपदिष्टत्वाद्गुरोर्वैशम्पायनस्य अविद्यमानानि अधिगवेषयन् अधिकानि अन्विष्यन् अर्कमीश्वरमिति "एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यकेशः हिरण्यश्मश्रुः आप्रणखात् सुवर्णः" इति श्रुत्युक्तान्तरात्मानं भगवन्तमित्यर्थः। उपतस्थे सम्यक् तुष्टाव अनेन समर्थो याज्ञवल्क्यः कोऽधामासमिवेष्याऽयातयामयजुराननाते गुरुणेव प्रवर्तित इति ज्ञायते अन्यथा "नारायणोऽपयाति गुरोः प्रच्युतस्य बुबुत्सेः। कमलं जलादपेतं संशोषयति रविर्न पोषयति" इत्यादि शास्त्रविरोधः स्यात् ॥ ६६ ॥

यो भगवान् एकः निःसमातिशयः इमां लोकयात्रामनुवहति तस्मै भगवते आदित्याय नमः इत्यन्वयः। आदित्यशब्देनात्र सूर्यमण्डलाभिमानिहिरण्यवानन्तरात्मा सर्वशक्तिः सर्वात्मा श्रीवासुदेवो गृह्यते तदेव स्फुटतया दर्शयति-यः चतुर्विधभूतनिकायानां जरायुजाण्डजस्वेदजोद्भिज्जप्राणिसमुदायानाम् ब्रह्मादिस्तम्बपर्यन्तानां किं बहुना निखिलजगतामनेककोटिब्रह्माण्डानाम् अन्तर्हृदयेषु बहिरपि च आत्मस्वरूपेण स्वासाधारणेन रूपेण आकाश इव वर्तमानः उपाधिना चतुर्विधभूतनिकायेन ब्रह्मादिस्तम्बपर्यन्तेन चाखिलैर्जगद्भिश्च अव्यवधीयमानः अनाच्छिद्यमानश्च इमां लोकयात्रामनुवहति निर्वहति केनानुवहतीत्यत आह-कालरूपेणेति। तदेव प्रपञ्चयति, क्षणेति। क्षणलवादिभिरवयवैरुपचितानां संवत्सराणां गणेन अप्स्वम्बुम् अपामादानविसर्गाभ्यां जलग्रहणत्यागाभ्याम् अनेन गायत्रीप्रथमपादगतसवितृपदार्थो वर्णितः ॥ ६७ ॥

द्वितीयपादगतभर्गशब्दार्थं दर्शयन् स्तौति-यदुहेति। हे विबुधर्षभ! सुवते विश्वं यतस्तत्सम्बोधने हे सवितः! अहरहः प्रतिदिनम् अनुसवनं प्रतिसमयं त्रिकालमित्यर्थः आम्नायविधिना वेदविधिना उपतिष्ठतां स्तुवताम् हे अखिलदुरितवृजिनबीजावभर्जन! हे सकलपापमूलविनाशक! हे तपन! उह वावेति प्रसिद्धिद्योतको निपातसमूहः "तस्य भासा सर्वमिदं विभाति"

"यदादित्यगतं तेजो जगद्भासयतेऽखिलम्।

यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" ॥

इत्यादिशास्त्रप्रसिद्धं यत् भगवतस्तव मण्डलमवस्तपति तस्य समिधीमहि सम्यगभिमुख्येन ध्यायेम ॥ ६८ ॥

तृतीयपादार्थं सर्वधीप्रेरकत्वं दर्शयन् स्तौति, य इति। यो भवान् निजनिकेतनानाम् "अन्तः प्रविष्टः शास्ता जनानाम्" इत्येवं स्वाश्रितानां स्थिरचरनिकराणां स्थावरजङ्गमयूथानां मनआदिगणान् अनात्मनः जडान् स्वयमात्मनैवान्तर्यामी सन् प्रचोदयति ॥ ६९ ॥

तस्य सर्वोपकारकस्य कारुणिकस्य सर्वाभिवन्दितं चरणं यजुःकामः शरणागतोऽस्मीत्याह-य एवेत्यादिना। उपसरामीत्यनेन यो भवान् अतिकरालवदनेन अन्धकारसञ्ज्ञेन अज्ञानाख्येन अजगरसर्पेण गिलितं कवलीकृतम् अतो मृतकमिव विचेतनं निःसत्त्वम् इमं लोकम् अवलोक्य उत्थाप्य "अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्" इति स्वधर्माख्ये आत्माख्याने परमात्मप्रख्याने भेषसि प्रवर्तयति यश्च भवान् अवनिपतिरिव असाधूनां भयमुदीरयन् अटति ॥ ७० ॥

यश्च आशापालैः दिक्पालैरिन्द्रादिभिः कमलकोशाञ्जलिभिः पद्मकोशयुक्ताः तत्तुल्या वा अञ्जलयो येषां तैः उपहृतार्हणः उपहृतं समर्पितमर्हणं यस्य स तथा ॥ ७१ ॥

अथ अतो हेतोः भगवतस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्ब्रह्मादिभिर्वन्दितम् अयातयामयजुःकामः अन्यैर्येष्वावदविज्ञाततयाऽगतसाराणि यजूंषि तत्कामोऽहं उपसरामि शरणं व्रजामि ॥ ७२ ॥

भाषा टीका।

और वे मुनि लोग उन यजुर्वेद के मन्त्रों को उन मन्त्रों के लोभसे तीतर पक्षी होकर चुगते हुए, तबसे वे अतिरम्य तैत्तिरीय शाखा होती हुई ॥ ६५ ॥

सूतजी बोले, कि—हे ब्रह्मन्! उस समय से याज्ञवल्क्य भी उन वेदोंकी तलाश में रहे जो कि—गुरुके पास नहीं विद्यमान रहे, ऐसे मन्त्रों को ढूढते हुए सूर्य भगवान् का उपस्थान करते हुए ॥ ६६ ॥

याज्ञवल्क्य उवाच

श्रीसूर्यनारायण की स्तुति करते हुए याज्ञवल्क्य महर्षि बोले, कि—उन श्रीआदित्य भगवान्को नमस्कार है, जो कि—ब्रह्मा से आदि लेकर तृण पर्यंत चतुर्विध प्राणियों के हृदयमें आत्मस्वरूपसे और बाहर क्षण लव निमेष रूप अवयवों से बढ़े हुए सम्वत्सरोंके समुदायात्मक काल रूप से आप एकही उपाधि से रहित आकाश की तरह व्याप्त होकर समय २ पर जलों के सुखाने और बर्षानेसे इस लोक की यात्राको चलाते हो ॥ ६७ ॥

हे देवन में श्रेष्ठ! हे सवितृदेव! लोग त्रिकाल प्रतिदिन आम्नाय विधि से आप को उपस्थान देते हैं, आप उन्हों के खोटे कर्म और उनके फल जो दुःख तिन के बीज रूप अज्ञान के नाश करने वाले हो। हे तपन! यह जो आपका मण्डल तप रहा है, हम उसी का समीचीन प्रकार से ध्यान करते हैं ॥ ६८ ॥

जो श्रीआदित्य भगवान् अपने निवास स्थल रूप स्थावर जङ्गम प्राणि समुदायों के जड़रूपी मन इन्द्रिय और प्राणों को स्वयं आत्मा अन्तर्यामी रूप से प्रेरणा कर के चलाते हैं तिन सूर्यनारायण को नमः हो ॥ ६९ ॥

जो सूर्य भगवान् अति कराल वदन अन्धकार नामक अजगर से ग्रसित अत एव मृतक विचेतन सदृश इसलोक को

सूत उवाच ।

एवं स्तुतः स भगवान् वाजिरूपधरो हरिः ।
यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥ ७३ ॥
यजुर्भिरकरोच्छाखा दशपञ्च शतैर्विभुः ।
जगृहुर्वाज[1]संन्यस्ताः काण्वमाध्यन्दिनादयः ॥ ७४ ॥
जैमिनेः सामगस्यासीत्सुमन्तुस्तनयो मुनिः ।
[2]सुन्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहिताम् ॥ ७५ ॥
सुकर्मा चापि तच्छिष्यः सामवेदतरोर्महान् ।
सहस्रसंहिताभेदं चक्रे साम्नां ततो [3]द्विजः ॥ ७६ ॥

भाषा टीका ।

अवलोकन कर, परम कारुणिक कृपा कर अपनी दृष्टी से मत्रों को उठाकर निश्चिदिन नृपति के तरह स्वधर्म स्थितिरूप भय में प्रवृत्त करते हैं । और दुष्टों को भय दिखाते हुए, राजा के तरह पर्यटन करते हैं ॥ ७० ॥

और जहां २ पर्यटन करते हैं उस २ जगह दिक्पाल लोग कमल के कली सदृश अञ्जलि जोडकर आप को भेट देकर पूजन करते हैं ॥ ७१ ॥

अब हे भगवन् ! त्रिभुवन गुरुओं से वन्दित आप के दोनों चरण कमलों की, अयातयाम नवीन यजुर्वेद के मन्त्रों की कामना वाला मैं शरण लेता हूं आप मेरा मनोरथ पूर्ण करें ॥ ७२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं स्तुतः प्रसादितश्च ॥ ७३ ॥

पञ्चदश शाखाः याः शतैरपरिमितैर्यजुर्भिरकरोत् स तैरिति पाठे स एव याज्ञवल्क्यस्तैर्यजुर्भिरकरोदिति जगृहुरधीतवन्तः रविणाऽश्वरूपेण वाजेभ्यः केसरेभ्यो वाजेन वेगेन वा संन्यस्ताः दत्ताः शाखा वाजसनीसंज्ञास्ताः शाखा इति वा ॥ ७४ ॥

सामशाखाविभागमाह—जैमिनेरिति । तत्सुतः सुमन्तुसुतः ताभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह ॥ ७५ ॥

तच्छिष्यो जैमिनेः शिष्यः महामतिर्मेधावी सहस्रसंहितारूपं भेदं चक्रे साम्नां तं संहितामेवम् ततस्तदनन्तरम् ॥ ७६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिति स्तुतः प्रसादितश्च हरिरादित्यशरीरकः भगवान् वाजिरूपधरोऽश्वरूपधरो मुनये याज्ञवल्क्यायाऽदात् उपदिदेश ॥ ७३ ॥

यजुर्भिरिति विभुर्याज्ञवल्क्यः शतैरपरिमितैर्यजुर्भिर्दशपञ्च-पञ्चदश शाखा अकरोत् स तैरिति पाठे तु स विभुस्तैर्वाजि-रूपेण हरिणा दत्तैर्यजुर्भिरकरोत्ततो वाजिना संन्यस्ताः सम्य-ग्याज्ञवल्क्ये निहिताः शाखास्तत्रत्याः काण्वा माध्यन्दिनाश्च जगृहुरधीतवन्तः ॥ ७४ ॥

जैमिनेः साम्नां विभागमाह-जैमिनेरिति । सामगस्य जैमिने र्मुनेस्तनयः सुमन्तुर्नामासीत्तत्सुतः सुमन्तुसुतः सुतन्वांस्ताभ्यां तत्पुत्रपौत्राभ्यां चतुर्धं स्तामिदं द्वेधा विभज्यैकैकां प्राहे-त्यर्थः ॥ ७५ ॥

तस्य जैमिनेः शिष्यः महान् माहात्म्ययुक्तः सुकर्मा नाम सामवेद एव तरुस्तस्मात्साम्नां सहस्रं संहितानां शाखानां भेदं चक्रे हे द्विज ! ॥ ७६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वाजिरूपधरः अश्वरूपधरः अयातयामानि अगतसाराणि वीर्यवन्तीत्यर्थः ॥ ७३ ॥

वाजसनः सूर्यस्तत आगताः शाखा वाजसन्यः ताः शाखाः काण्वादयो माध्यन्दिनादयश्च ॥ ७४ ॥

साम गायतीति सामगः तस्य जैमिनेस्तनयः सुमन्तुर्नाम तस्य सुमन्तोः सुतः सुमन्वानाम ताभ्यां सुमन्तुसुमन्वभ्यां पुत्रपौत्राभ्यां क्रमशएकामेकां प्राह ॥ ७५ ॥

सुकर्मापि तस्य जैमिनेः शिष्यः महामतिप्रभावान् सामवेदवृक्षतरोः साम्नां सहस्रं संहितारूपं भेदं चक्रे ॥ ७६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

वाजसन्यस्ता इत्यत्र प्रथमे व्याख्याने "वा पदान्तस्य" इत्यनु-स्वारस्य नकारः व्याख्यान्तरे "अनाचि च" इति द्वित्वम् ॥ ७४-८० ॥

(१) वाजिसंन्यस्ता इति (२) सुतन्वांस्तत्सुत इति च वीर० पा० सुमन्वानिति विज० पा० (३) द्विजाः । इति वीर० पा०

हिरण्यनाभः* कौशल्यः* पौष्यञ्जिश्च सुकर्मणः ।
शिष्यो जगृहतुश्चान्य आवन्त्यो ब्रह्मवित्तमः ॥ ७७ ॥
उदीच्याः सामगाः शिष्या आसन्पञ्च शतानि वै ।
पौष्यञ्ज्यावन्त्ययोश्चापि(१) तांश्च प्राच्यान्प्रचक्षते ॥ ७८ ॥
(?)लौगाक्षिर्माङ्गलिः कुल्यः(२) कुशीदः कुक्षिरेव च ।
पौष्यञ्जिशिष्या जगृहुः संहितास्ते शतं शतम् ॥ ७९ ॥
कृतो हिरण्यनाभस्य चतुर्विंशतिसंहिताः ।
शिष्य ऊचे स्वशिष्येभ्यः शेषाः आवन्त्य आत्मवान् ॥ ८० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां द्वादशस्कन्धे ब्रह्मोपदेशो नाम
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पञ्चदश शाखाः शतैरपरिमितैर्यजुर्भिरकरोदिति स तैरिति दम्भ पाठे स विभुर्याज्ञवल्क्यस्तैर्यजुर्भिरकरोत् वाजेभ्यः सूर्याश्वकेशरेभ्यः सम्यक् नयम्तीति वाजसनेय्यः शाखास्ताः काण्वादयो मुनयो जगृहुरधीतवन्तः ॥ ७४ ॥

सामवेदशाखाविभागमाह—जैमिनेरिति । तत्सुतः सुमन्तुसुतः जैमिनिस्ताभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह ॥ ७५ ॥

तच्छिष्यः जैमिनेः शिष्यः सामवेदतरोः सामवेदतरुमरुस्वकर्मी तच्छिष्यो महानभूदित्यर्थः । अत एव साम्नामेव संहिताभेदं चक्रे हिरण्यनाभः कौशल्यः कोशलदेशोद्भवः पौष्यञ्जिश्च सुकर्मणः शिष्यं अन्य आवन्त्यश्च तच्छिष्यः सोऽपि जग्राह ॥ ७६—७७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

स सर्पाश्वप्रभावो रविः एवं स्तुतः प्रसादितश्च वाजिरूपधरोऽश्वरूपधरः मुनये याज्ञवल्क्याय यजूंषि प्रदादुपदिष्टवान् ॥ ७३ ॥

वाजिरूपिणा वाजेभ्यः सम्बन्ता: याज्ञवल्क्ये गूढतया सम्यग्गाहिताः विभुः पूर्णज्ञानः याज्ञवल्क्योऽपि प्रकटतया शतैर्बहुभिर्यजुर्भिः दशपञ्च पञ्चदश शाखाः अकरोत् । जगृहुः अधीतवन्तः ॥ ७४ ॥

सामवेदशाखाविभागमाह—जैमिनेरित्यादिना । तत्सुतः सुमन्तुसुतः ताभ्यां पुत्रपौत्राभ्याम् ॥ ७५ ॥

तच्छिष्यः जैमिनेः शिष्यः सुकर्मा सामवेदतरोः सहस्र संहिता रूपं भेदं चक्रे हे द्विजाः ! ततो हेतोः साम्नां महान् विस्तर इति शेषः ॥ ७६ ॥

भाषा टीका ।

सूत उवाच

श्री सूतजी बोले, कि—इस प्रकार याज्ञवल्क्य ने स्तुति से जब सूर्यको प्रसन्न किये, तब सूर्य भगवान् वाजि (घोड़े) का रूप धारण कर याज्ञवल्क्य को अयातयाम (ताजे) यजुर्वेद के मन्त्र देते हुए ॥ ७३ ॥

वे याज्ञवल्क्य उन यजुर्मन्त्रों से पांच शाखा करते, हुए उन वाजसनी संहिताओं का काण्व और माध्यन्दिनोंने ग्रहण करी ॥ ७४ ॥

सामगान वाले जैमिनि के पुत्र सुमन्तु मुनि हुए । सुमन्तु के पुत्र सुन्वान् हुए, इन दोनों पुत्र पौत्रों को जैमिनि ने एक २ संहिता पढ़ाई ॥ ७५ ॥

तिस के अनन्तर जैमिनि के महान् शिष्य सुकर्माने साम वेदरूप वृक्ष की सहस्र शाखा, संहिताओं का भेद किया ॥ ७६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सुकर्मणः शिष्य एकः कौशल्यो हिरण्यनाभः पौष्यञ्जिर्नामैकस्तौ जगृहतुः आवन्त्यश्चान्यस्तस्यैव शिष्यः सोऽपि जग्राह॥७७॥

पौष्यञ्ज्यावन्त्ययोरपि चकाराद्धिरण्यनाभस्यापि पञ्चशतानि शिष्या आसन् ते तावतीः शाखा यथायथं जगृहुः तानुदीच्यान्प्रचक्षते काश्चित्प्राच्यांश्च प्रचक्षत इत्यर्थः । यथोक्तं वैष्णवे—

"उदीच्याः सामगाः शिष्यास्तस्य पञ्चशतं स्मृताः ।
हिरण्यनाभात्तावत्यः संहिता यैर्द्विजोत्तमैः ॥

---

*कौसल्यः * पौष्पिञ्जश्चेति वीर० पा० (१)तांश्चोदीच्यान्(२)कुसीदः इति वीर० विज० पाठ (?) लोकाक्षिर्लौङ्गलिः कल्य इति वीर पाठः

श्रीधरस्वामिकृतभावार्थदीपिका ।

गृहीतास्तेऽपि चोदन्ते पण्डितैः प्राच्यसामगाः" ।

इति ॥ ७८ ॥

पुनरप्येतेषां प्रजायां सुकर्मणः शिष्याणां शिष्यान्तरैः शाखाबाहुल्यं दर्शयति-लोगाक्षिरिति द्वाभ्याम् ॥ ७९ ॥

कृतो नाम हिरण्यनाभस्य शिष्यः स्वशिष्येभ्य ऊचे शेषा अन्या अपि याः प्रसिद्धाः शाखास्ता आवन्त्यः स्वशिष्येभ्य ऊच इति ॥ ८० ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
षष्ठोऽध्यायः ॥ ६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्

इति श्रीमद्भागवतव्याख्याने द्वादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

हिरण्यनाभ इति कौसल्य इति हिरण्यनाभविशेषणं पौष्यिञ्जी नामैकः तौ सुकर्मणः शिष्यौ जगृहतुः, तथा आवन्त्यश्चान्यस्तस्यैव शिष्यः स च ब्रह्मवित्तमः सोऽपि जग्राहेत्यर्थः ॥ ७७ ॥

उदीच्या इति पौष्यिञ्ज्यावन्त्ययोश्चापि अपि शब्दाद्धिरण्यनाभस्यापि पञ्चशतानि शिष्या आसन् तांश्चोदीच्यान् सतः कांश्चित् प्राच्यांश्च प्रचक्षत इत्यर्थः यथोक्तं वैष्णवे—

"उदीच्याः सामगाः शिष्यास्तस्य पञ्चशतं स्मृताः ।
हिरण्यनाभश्चावन्त्यः संहिता यैर्द्विजोत्तमैः ॥
गृहीतास्तेऽपि चोदन्ते पण्डितैः प्राच्यसामगाः" ।

इति ॥ ७८ ॥

पुनरप्येतेषां त्रयाणां सुकर्मणः शिष्यान्तरैः शाखाबाहुल्यं दर्शयति-लोकाक्षिरिति द्वाभ्याम् । लोकाक्ष्यादयश्चत्वारः पौष्यिञ्जिशिष्याः शतं शतं संहिता जगृहुरित्यर्थः ॥ ७९ ॥

कृतो नाम हिरण्यनाभस्य शिष्यः स च स्वशिष्येभ्यश्चतुर्विंशति-संहिता ऊचे शेषा अन्या अपि याः प्रसिद्धाः शाखास्ता आवन्त्यः स्वशिष्येभ्यः ऊचे ॥ ८० ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

कौसल्यः कोसलपुत्रः हिरण्यनाभश्च पौष्यञ्जिश्च सुकर्मणः शिष्यौ जगृहतुः सामशाखामिति शेषः । अन्य आवन्त्य उदीच्याश्च सामशाखां जगृहतुरिति शेषः । पौष्यञ्ज्यावन्त्ययोश्चापि सामगाः पञ्चशतानि शिष्या आसन् ॥ ७७—७८ ॥

तेषां समुदितानां मतानां नामानीति पौष्यञ्जिशिष्या लौगाक्ष्यादयः नाम्ना शतं शतं संहिता जगृहुः ॥ ७९ ॥

हिरण्यनाभस्य शिष्यः नाम्ना कृतः चतुर्विंशतिसंहिताः स्वशिष्येभ्य ऊचे शेषा अन्याः संहिता आत्मज्ञानवानावन्त्यः स्वशिष्येभ्य ऊचे ॥ ८० ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
षष्ठोऽध्यायः ॥ ६ ॥

(विजयध्वजतीर्थीयटीकाऽत्राध्यायो न समाप्यते)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
षष्ठोऽध्यायः ॥ ६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्र हिरण्यनाभस्य पञ्चशतानि शिष्या उदीच्या आसन् पौष्यञ्ज्यावन्त्ययोरपि तावन्त एव शिष्यास्तांस्तु प्राच्यान् प्राच्यसामगान् ते च ते च तावतीः शाखा जगृहुः ॥ ७८—७९ ॥

पुनरपि पौष्यञ्जिशिष्या लोकाक्ष्यादयः पञ्च पुनरपि हिरण्यनाभस्य शिष्यः कृतः शेषा अन्या अपि या शाखा प्रसिद्धास्ता आवन्त्यः स्वशिष्येभ्य ऊचे ॥ ८० ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
षष्ठोऽध्यायो द्वादशस्य सङ्गतः सङ्गतः सताम् ॥ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तमेव महान्तं विस्तरं दर्शयति-हिरण्यनाभ इत्यादिना । सुकर्मणः हिरण्यनाभः पौष्यञ्जिश्चेति द्वौ शिष्यौ कौशल्य इति हिरण्यनाभविशेषणं तौ जगृहतुः सामवेदगताः शाखा इति शेषः । अन्यो ब्रह्मवित्तमः आवन्त्यः सुकर्मणः शिष्यो जग्राह ॥ ७७ ॥

पौष्यञ्ज्यावन्त्ययोश्चकाराद्धिरण्यनाभस्य च पञ्चशतानि शिष्याः आसन् ते तावतीः शाखाः यथायथं जगृहुः तानुदीच्यान् सतः कालयोगात् प्राच्यान् प्रचक्षते यथोक्तं वैष्णवे—

"उदीच्याः सामगाः शिष्यास्तस्य पञ्चशतं स्मृताः ।
हिरण्यनाभात्तावन्त्यः संहितास्तैर्द्विजोत्तमैः ॥
गृहीतास्तेऽपि प्राच्यन्ते पण्डितैः प्राच्यसामगाः" ।

इति ॥ ७८ ॥

पुनरपि सुकर्मणः शिष्याणां त्रयाणां शिष्यान्तरैः शाखाबाहुल्यं दर्शयति-लोकाक्षिरिति द्वाभ्याम् ॥ ७९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

शेषाः अन्याः अपि प्रसिद्धाः आवन्त्यः स्वशिष्येभ्य ऊचे ॥८०॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
षष्ठाऽध्यायार्थप्रकाशः ॥ ६ ॥

———

भाषा टीका।

सुकर्मा के हिरण्यनाभ नामक कौसल्य और पौष्यञ्जि ये दोनों शिष्य तथा वेद पढ़ने में कुशल आवन्त्य एक शिष्य, ये तीनों शिष्य उन संहिताओं को पढ़ते हुए ॥ ७७ ॥

पौष्यञ्जि आवन्त्य और और हिरण्यनाभ के सामगान वाले उदीच्य पांच सौ५००शिष्य हुए, उन्हों ने उन संहिताओं को पढ़ा। फिर उन्ही उदीच्य शिष्यों को प्राच्यभी कहने लगे ॥ ७८ ॥

लौगाक्षि माङ्गलि कुल्य कुसीद कुक्षि ये पौष्यञ्जि के पांचो शिष्य सौ सौ संहिता ग्रहण करते हुए ॥ ७९ ॥

हिरण्यनाभ का कृत नामक शिष्य चौबीस संहिताओं को अपने शिष्यों को पढ़ाता हुआ। शेष संहिताओं को वशीकृतमनवाले आवन्त्य ने अर्थात् अवंती पुरी के रहनेवाले शिष्य ने अपने शिष्यों को पढ़ाई ॥ ८० ॥

इति श्रीमद्भागवत महापुराण द्वादशस्कन्ध में षष्ठ अध्याय की
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषाटीका समाप्ता ॥ ६ ॥

———

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे षष्ठोऽध्यायः समाप्तः ॥ ६ ॥

—○:०:○—

सप्तमोऽध्यायः ।

सूत उवाच ।

अथर्ववित्सुमन्तुश्च शिष्यमध्यापयत् [1] स्वकाम् ।
संहितां सोऽपि पथ्याय वेददर्शाय चोक्तवान् ॥ १ ॥
शौक्लायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः ।
वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ।
कुमुदः शुनको ब्रह्मन् ! जाजलिश्चाप्यथर्ववित् ॥ २ ॥
बभ्रुः शिष्योऽथाङ्गिरसः सैन्धवायन एव च ।
अधीयेतां संहिते द्वे सावर्ण्याद्यास्तथाऽपरे ॥ ३ ॥
नक्षत्रकल्पः शान्तिश्च कश्यपाङ्गिरसादयः ।
एते आथर्वणाचार्याः शृणु पौराणिकान्मुने ! ॥ ४ ॥
त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ।
[2] वैशम्पायनहारीतौ षड्वै पौराणिका इमे ॥ ५ ॥
अधीयन्त व्यासशिष्यात् संहितां मत्पितुर्मुखात् ।
एकैकामहमेतेषां शिष्यः सर्वाः समध्यगाम् ॥ ६ ॥
कश्यपोऽहं च सावर्णी रामशिष्योऽकृतव्रणः ।
अधीमहि व्यास [3] शिष्याच्चतस्रो मूलसंहिताः ॥ ७ ॥
पुराणलक्षणं ब्रह्मन् ! ब्रह्मर्षिभिर्निरूपितम् ।
शृणुष्व बुद्धिमाश्रित्य वेदशास्त्राऽनुसारतः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सप्तमेऽथर्वविस्तारः पुराणव्यसनं ततः ।
पुराणलक्षणादीनि फलं भागवतश्रुतेः ॥

क्रमप्राप्तमथर्ववेदविभागमाह—अथर्वविदिति । शिष्यं कबन्धनामानं स्वकां स्वकीयां संहितां सोऽपि शिष्योऽपि तां द्विधा विभज्य तदुक्तं वैष्णवे—

"अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः ।
शिष्यमध्यापयामास कबन्धं सोऽपि च द्विधा ॥
कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान्" ।

इति ॥ १ ॥

तत्र वेददर्शः स्वसंहितां चतुर्धा विभज्य चतुरः शिष्यानध्यापयामास पथ्यश्च त्रिधा विभज्य त्रीनित्याह—शौक्लायनिरिति ॥ २ ॥

आङ्गिरसः शुनकस्य शिष्यो बभ्रुः सैन्धवायनश्च तदुक्तम्—

"शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे ।
द्वितीयां संहितां प्रादात्सैन्धवायनसंज्ञिने" ॥

इति । सावर्ण्याद्याः सैन्धवायनादीनां शिष्याः ॥ ३ ॥

नक्षत्रकल्पः शान्तिकल्पश्चेति द्वौ तदुक्तम्—

"नक्षत्रकल्पो वेदानां संहितानां तथैव च ।
चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः" ॥

(१) शिवकामिति वीर० पा०। (२) वैशम्पायनहारीताविति विज० पा०। (३) पुत्रादिति वीर० विज० पा०।

श्रीधरस्वामिकृतभावार्थदीपिका ।

इति । नक्षत्रकल्पादीनां कर्तारस्तत्तन्नामभिरुच्यन्ते ॥ ४—५ ॥

मत्पितुर्मुखादिति प्रथमं व्यासः षट्संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् तस्य च मुखादेते त्रय्यारुण्यादय एकैकां संहितामधीयन्त एतेषां पञ्चानां शिष्योऽहं ताः सर्वाः समधीतवान् ॥ ६ ॥

रामशिष्यो योऽकृतव्रण एवं चत्वारो वयम् मूलसंहिता इत्यनेन ततः संहिता बाहुल्यं सूचितम् ॥ ७ ॥

शुकपरीक्षित्संवादे निरूपितमपि पुराणलक्षणं तद्भेदकथनाय दर्शयति, पुराणेति ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—१० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ क्रमप्राप्तमथर्ववेदविभाग माह—अथर्वविदित्यादिना । शिष्यं कबन्धनामानं स्वकां संहितामध्यापयत्सोऽपि शिष्योऽपि तां द्विधा विभज्य तदुक्तं वैष्णवे—

"अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः ।
शिष्यमध्यापयामास कबन्धं सोऽपि च द्विधा ॥
कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान्" ॥

इति ॥ १ ॥

स्वसंहितां चतुर्धा विभज्य शौक्लायन्यादिभ्यश्चतुर्भ्योऽध्यापयामास पथ्यस्तु त्रिधा विभज्य श्रीनित्याह—सार्धेन, शौक्लायनिरिति । हे ब्रह्मन् ! ॥ २ ॥

तत्र शुनकेन द्विधा विभक्तां स्वसंहितां ततो बभ्रुः सैन्धवायनावधीतवन्तौ इत्याह—बभ्रुरिति । बभ्रुः सैन्धवायनश्चाङ्गिरसगोत्रप्रभवः शौनकशिष्याविव्यर्थः । सावर्णाद्याः सैन्धवायनबभ्र्वोः शिष्याः ॥ ३ ॥

आद्यशब्दविवक्षितानाह—नक्षत्रकल्प इति । नक्षत्रकल्पः शान्तिश्च नक्षत्रकल्पः शान्तिकल्पश्चेति द्वौ तदुक्तं "नक्षत्रकल्पो वेदश्च शान्तिकल्पस्तथैव च" इति काश्यपाः कश्यपगोत्रोद्भवाः आङ्गिरसाः मङ्गोत्रोद्भवाः एते नक्षत्रकल्पादीनां कर्तृत्वात्तत्तन्नामभिरुच्यन्ते ते आथर्वणाचार्या अथर्ववेदशाखाविभागजननेन तत्प्रवर्तका इत्यर्थः । इत्थं वेदसंहिताविभागमभिधायाऽथ पुराणसंहिताप्रपञ्चशुश्रूषामावश्च तावत्तत्प्रवर्तकान् श्रोतुं प्रचोदयति—शृणु पौराणिकान्मुने इति । हे मुने ! ॥ ४ ॥

के पुनस्ते इत्यत्राह—त्रय्यारुणिरिति । त्रय्यारुण्यादय इमे षट् मत्पितुर्मुखादेकैकां संहितां पुराणसंहितामधीयन्त मत्पितुः मुखादित्यनेन वादरायणः षट् संहिता रोमहर्षणाय प्रोवाच तस्मादेते षडप्येव इति सूच्यते अहन्तु एतेषां पञ्चानां शिष्यो भूत्वा सर्वाः षडपि संहिता अध्ययनमधीतवानस्मि ॥ ५ ॥ ६ ॥

किञ्च, काश्यप इति रामस्य भार्गवस्य शिष्यो योऽकृतव्रणः स एते चत्वारो वयं व्यासपुत्रात् श्रीशुकाच्चतस्रो मूलसंहिता अधिमहि ॥ ७ ॥ अधीमहि मूलसंहिता इत्यनेन पुराणसंहिताबाहुल्यं सूच्यते तदग्रे स्पष्टीकरिष्यन् तावत् शुकपरीक्षित्संवादाभिव्यापितमपि पुराणलक्षणं तद्भेदकथनाय दर्शयति, पुराणेत्यादिना । वेदशास्त्रानुसारेण निरूपितं पुराणलक्षणं बुद्धिमाभिश्च शृणु अवहितमनाः शृणु इत्यर्थः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सोऽपि सुमन्तोः शिष्योऽपि पथ्याय ॥ १ ॥

कुमुदादयः पथ्यशिष्याः ॥ २ ॥

बभ्रुसैन्धवायनौ पथ्यशिष्यस्य आङ्गिरसोऽङ्गिरोगोत्रे विद्यमानस्य शुनकस्य शिष्यौ अधीयेताम् अधीतवन्तौ—

"शुनकस्तु द्विधा कृत्वा ददावेकान्तु बभ्रवे ।
द्वितीयां संहितां प्रादात्सैन्धवायनसञ्ज्ञिने" ॥

इति । सावर्णाद्याश्च सैन्धवायनादीनां शिष्याः ॥ ३ ॥

आथर्वणाचार्याः अथर्ववेदाचार्याः पाठतोऽर्थतश्चाथर्ववेदप्रवर्तका इत्यर्थः । पौराणिकान् पुराणाचार्यान् ॥ ४-५ ॥

मत्पितुर्मुखात्पुराणसंहितामधीयन्त त्रय्यारुण्यादयः कथम् एकैकामधीतवन्तः त्वन्तु कथं सर्वानधीतवानिति ? तत्राह, अहमिति । अहमेतेषां शिष्यः सर्वा पुराणसंहितामपठम् ॥ ६ ॥

व्यासपुत्राच्छ्रीशुकात् ॥ ७ ॥

प्रसङ्गात्पुराणलक्षणं वक्तुं प्रतिजानीते, पुराणेति ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

१—३ ॥

...स्य विभागज्ञापनार्थमाह—शृणु पौराणिकानिति ॥

४ ॥ ५ ॥

एकैकामिति त्रिभिस्त्रिभिर्मिलित्वैकैकां त्रिषड्भिरिति बहवमा... तत्र आद्यं पाद्मं वैष्णवमिति मिलित्वैकेत्यादिक्रमात् अवान्तरसंहिता तु कश्चिदेका यथा श्रीभागवतस्य परमहंससंहिताख्यं काचिदेकैकस्यैव विभागशः यथा स्कान्दस्य सनत्कुमारप्रोक्तसंहितानामादिका श्रीशुकात्तु श्रीभागवतस्य पञ्चाङ्गयुक्तिः सूर्यादिव यजुर्भागस्य वाजसनेयस्य ज्ञेयम् ॥ ६ ॥

मूलसंहिता इति तिसृणितिहासविशेषापेक्षया ज्ञेयम् बहूनामन्येषाम् इतिहासानां मूलत्वात् मूलम् एवं च परिशेषेण लभ्यते "इतिहासपुराणानां पिता मे रोमहर्षणः" इत्युक्तेः ते च महाभारताद्याः शृणु पौराणिकानिति नूपलब्ध...क्तम् ॥ ७ ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सर्गेऽस्याथर्वणो व्यासं पुराणस्य च तस्य च ।
लक्षणानि दश प्रोच्य तस्य संख्या च कथ्यते ॥

शिष्यं विष्णुपुराणोक्तं कबन्धसञ्ज्ञकम् ॥ १-२ ॥

आङ्गिरसः शुनकस्य शिष्यो बभ्रुः सावर्णाद्याः सैन्धवायनादीनां शिष्याः ॥ ३—५ ॥

मत्पितुः रोमहर्षणस्य एतेषां पञ्चानामप्यहं शिष्यः ॥ ६-७ ॥

(१)सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षान्तराणि च ।
वंशो वंश्यानुचरितं संस्थाहेतुरपाश्रयः ॥ ९ ॥
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।
केचित्पञ्चविधं ब्रह्मन् ! महदल्पव्यवस्थया ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

व्यासशिष्यात् लोमहर्षणात् ब्रह्मर्षिभिः श्रीशुकचरणोरुप-क्रमे यदुक्तं प्रायेण तदेवोपसंहारेऽप्युच्यते ॥ ८—९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सप्तमे क्रमप्राप्तमथर्ववेदविभागं पुराणविभागं तल्लक्षणादिकं चाह—अथर्वविदित्यादिना । सुमन्तुः स्वकां स्वकीयां संहितां शिष्यं कबन्धमध्यापयत् सोऽपि कबन्धोऽपि तां द्विधा विभज्य पथ्याय वेददर्शाय चोक्तवान् तथोक्तं विष्णुपुराणे—
"अथर्ववेदं सुमतिः सुमन्तुरमितद्युतिः ।
शिष्यमध्यापयामास कबन्धं सोऽपि तं द्विधा ॥
कृत्वा तु वेददर्शाय तथा पथ्याय दत्तवान्" ।
इति ॥ १ ॥

तत्र वेददर्शः संहितां चतुर्धा विभज्य शौक्लायन्यादीन् पथ्यस्तु त्रिधा विभज्य कुमुदादीन् अध्यापयामासेत्याह—शौक्लायनिरिति सार्द्धेन ॥ २ ॥

आङ्गिरसः शुनकस्य शिष्यः तदुक्तम्—
"शुनकस्तु द्विधा कृत्वा ददावेकां तु बभ्रवे ।
द्वितीयां संहितां प्रदात्सैन्धवायनसञ्ज्ञिने" ॥
इति । सावर्णयाद्याः सैन्धवायनादिशिष्याः ॥ ३ ॥

आदिशब्देन निर्दिष्टान् स्फुटतया दर्शयति—नक्षत्रकल्प इति ॥ ४—५ ॥

मत्पितुः रोमहर्षणस्य अहं तु एषां षण्णां शिष्यः सर्वाः षडपि संहिताः अध्यगामधीतवान् ॥ ६ ॥

व्यासशिष्यात् रोमहर्षणादेव एतेन संहिताबाहुल्यं सूचितम् ॥ ७ ॥

"अत्र सर्गो विसर्गश्च स्थानपोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः" ॥
इत्यनेन द्वितीयस्कन्धे श्रीशुकपरीक्षित्संवादे निरूपितमपि पुराणलक्षणं तद्दृढकथनाय पुनरपि निरूपयति—पुराणलक्षणमित्यादिना ॥ ८ ॥

भाषा टीका ।

सूत उवाच ।

सूतजी बोले, कि—अथर्व के वेत्ता सुमंतु ऋषि अपने शिष्य कबन्ध को अपनी संहिता पढाते हुये, और वे कबन्ध भी अपने शिष्य पथ्य और वेददर्श को विभाग करके संहिता को पढाते हुये ॥ १ ॥

वेददर्श के शौक्लायनि, ब्रह्मबलि, मोदोष, और पिप्पलायनि, ये चार शिष्य हुए, अर्थात् इन चारों शिष्यों को वेददर्श ने विभाग कर अपनी संहिता पढाई । हे ब्रह्मन् ! अब पथ्य के शिष्यों को सुनो कुमुद शुनक और जाजलि ये तीनों पथ्य के शिष्य अथर्व वेत्ता हुए ॥ २ ॥

शुनक के शिष्य आंगिरस बभ्रु और सैन्धवायन दो हुए उन्होंने दो संहिताओं का अध्ययन किया । और इसी प्रकार सावर्णि प्रभृति और बहुत से सैन्धवायनादि कों के शिष्य हुए ॥ ३ ॥

नक्षत्रकल्प और शांतिकल्प के करने वाले इनहीं नामों से विख्यात कश्यप आंगिरस प्रभृति और भी हुए, ये सब अथर्वण वेद के आचार्य हुए, हे शौनक ! अब तुम पौराणिकों का श्रवण करो ॥ ४ ॥

त्रय्यारुणि, कश्यप, सावर्णि, अकृतव्रण, वैशंपायन, और हारीत, ये छै पौराणिक हुए ॥ ५ ॥

इन छहोंने व्यासजी के शिष्य मेरे पिता रोमहर्षण के मुख से एक २ संहिता का अध्ययन किया, और इन छहों का शिष्य मैं हुआ, मैंने इन्हीं से सब ६ संहिताओं का अध्ययन किया है ॥ ६ ॥

कश्यप और मैं तथा सावर्णि और परशुरामजी का शिष्य अकृतव्रण हम इन चारों ने व्यासजी के शिष्य हमारे पिता के अथवा शुकदेवजी के समीप से चार मूल संहिताओं का अध्ययन किया ॥ ७ ॥

हे ब्रह्मन् ! शुकपरीक्षित् के संवाद में पुराण का लक्षण ब्रह्मर्षि श्रीशुकदेवजी ने निरूपण किया है । अब तुम बुद्धि का आश्रय लेकर वेद शास्त्र के अनुसार पुराण का लक्षण सुनो ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अथ विश्वस्य
"अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रय." ॥
इत्यत्रोक्ते स्थानपोषणे वृत्तिरक्षाशब्दाभ्यामुक्ते अन्तराणि मन्वन्तराणि वंश्यानुचरितमीशानुकथाः संस्था निरोधः अनेनात्यन्तिकलयरूपा मुक्तिरप्युक्ता । हेतुशब्देन जीवोऽभिधीयते अपाश्रयः ऊतयो गृहीताः ॥ ९ ॥

दशभिर्लक्षणैर्युक्तं महापुराणं विदुः केचित्पञ्चविधं,

(१) सर्गोऽथ विसर्गश्चेति विज० पा० ।

अव्याकृतगुणक्षोभान् महतस्त्रिवृतोऽहमः ।
(१)भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते ॥ ११ ॥
पुरुषानुगृहीतानामेतेषां वासनामयः ।
* विसर्गोऽयं समाहारो(२) बीजाद्बीजं चराचरम् ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम्" ॥

इति महत्पुराणमल्पं चेति व्यवस्थया यत्र दशापि लक्षणानि (पृथक्) पृथङ्निरूप्यन्ते तन्महापुराणम् यत्र त्वन्येषां पञ्चस्वेवान्तर्भावस्य विवक्षा तदल्पमिति व्यवस्थयेत्यर्थः ॥ ॥ १० ॥

सर्गादिलक्षणानि व्याचष्टे—अव्याकृतेत्यादिना । अव्याकृतस्य प्रधानस्य गुणानां क्षोभाद्यो महांस्तस्मात्त्रिवृदहङ्कारस्तस्माद्भूतमात्राणां सूक्ष्माणामिन्द्रियाणां च तदर्थानां च स्थूलानां देवतानां च सम्भवः सर्गः कारणसृष्टिसर्ग इत्यर्थः । उच्यत इति यथाऽपेक्षमुत्तरत्राप्यनुषङ्गः ॥ ११ ॥

विसर्गं व्याचष्टे—पुरुषेणेश्वरेणानुगृहीतानामेतेषां महदादीनाम् पूर्वकर्मवासनाप्रधानोऽयं समाहारः कार्यभूतश्चराचरप्राणिरूपो बीजाद्बीजमिव प्रवाहापन्नो विसर्ग उच्यत इत्यर्थः ॥१२॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अव्याकृतगुणक्षोभात् मूलप्रकृतेर्गुणक्षोभात् अहमः अहङ्कारस्य ॥ ११ ॥

विसर्गोऽयमिति तत्त्वसमुदायात्मकं बीजात् बीजकारणात् कारणरूपेण सन्तन्यमानं स्थावरजङ्गमात्मकं च यत्कार्यजातं स विसर्ग इत्यर्थः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किन्तदित्यत्राह—सर्गश्चेति दशभिः । सर्गादिभिर्लक्षणैर्युक्तं तदेव पुराणमिति तद्विदः पुराणलक्षणविदः विदुः अत्र स्थानपोषणे वृत्तिरक्षाशब्दाभ्यामुच्येते अन्तराणि मन्वन्तराणि वंशो वंश्यानुचरितं च संस्था निरोधः अनेनैवात्यन्तिकप्रलयरूपा मुक्तिरप्युक्ता हेतुशब्देनोतयः पृथग्गृहीताः काचिदिति हे ब्रह्मन् ! महदल्पव्यवस्थया कश्चित्पञ्चविधश्च लक्षणम्, महापुराणस्योक्तानि दशलक्षणानि अल्पपुराणन्तु—

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंश्यानुचरितञ्चेव पुराणं पञ्चलक्षणम्" ॥

इत्युक्तविधमित्यर्थः ॥ ९ ॥ १० ॥

क्रमेण सर्गादीनां स्वरूपं निरूपयति, अव्याकृतेत्यादिना । अव्याकृतस्य मूलप्रकृतेर्गुणानां सत्त्वरजस्तमसां क्षोभाद्यो महान् गुणत्रयपरिणामरूपः तस्मादहङ्कारः तथाभूतः तस्माच्च भूतानामाकाशादीनां तत्सूक्ष्माणां शब्दादीनां इन्द्रियाणां चेतनार्थानां वस्तूनां सम्भवः स सर्ग इत्युच्यते ॥ ११ ॥

विसर्गं निरूपयति—पुरुषानुगृहीतानामिति । पुरुषेण परमपुरुषेणानुगृहीतानामाहितसृष्टिसामर्थ्यानाम् एतेषां महदादितत्त्वानां यः समाहारः सङ्घातपरिणामः स विसर्ग इत्यर्थः कोऽसौ समाहारः इत्यतस्तं दर्शयति, चराचरात्मकमिति । चराचरात्मकं जगदेव तत्समाहारः इत्यर्थः । तत्र दृष्टान्तः बीजाद्बीजमिति । कारणबीजात् कार्यबीजमिव कारणादव्याकृतान्महदादिक्रमेण चराचरात्मकं यत्कार्यजातं स विसर्ग इत्यर्थः । विसर्गस्य जीवकर्मवासनाप्रयुक्तत्वात् वासनामयत्वम् ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

वृत्तिश्च रक्षा च अन्तराणि च वृत्तिरक्षान्तराणि ॥ ९ ।

पुराणस्य महदल्पव्यवस्थया कश्चित्पक्षे पञ्चविधं पञ्चलक्षणप्रकारोपेतम् ॥ १० ॥

तत्र सर्गादिकं क्रमेण लक्षयति—अव्याकृतेति । अव्याकृतगुणक्षोभात्प्रकृतिगुणानामन्योन्यसंयोगलक्षणसञ्चलनान्महतः महत्तत्त्वस्य वैकारिकादिभेदेन त्रिवृतोऽहमः अहङ्कारस्य भूतसूक्ष्मेन्द्रियाणां पञ्चभूतसूक्ष्मेन्द्रियविषयाणां सम्भवो जन्मभूतमात्रेन्द्रियार्थियां जन्मेत्यधस्तादुक्तम् ॥ ११

पुरुषेण भगवतानुगृहीतानामनुप्रवेशलक्षणानुग्रहवतामेतेषां तत्त्वानां सकाशाद्वासनामयो यः समाहारस्तत्तत्कर्मवासनानुसृतिः सृष्टिः सविसर्गो जीवः अजीवश्च चेतनाचेतनलक्षणः चराचरः चराचरात्मको ब्रह्माण्डसर्गः "ब्रह्मणो गुणवैषम्याद्विसर्गः पौरुषः स्मृतः" इति ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सर्गोऽस्येत्यादिकं द्वितीयस्कन्ध एव व्याख्यातम् ॥ ९—१५॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

केचित् पञ्चविधमिति—

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम्" ॥

इति । महत् अल्पं चेति व्यवस्थया यत्र, दशापि लक्षणानि पृथक् निरूप्यन्ते तन्महापुराणं यत्र त्वन्येषां पञ्चस्वेवान्तर्भावो विवक्षितस्तदल्पमिति व्यवस्थयेत्यर्थः ॥१० ॥

(१) भूतसूक्ष्मेन्द्रियार्थानामिति * विसर्गो य इति च वीर० विज० पा० । (२) जीवोऽजीवश्चराचर इति विज० पा० ।

वृत्तिभूतानि भूतानां चराणामचराणि च ।
(१)कृतास्वेन नृणां तत्र कामाच्चोदनयाऽपि वा ॥ १३ ॥
रक्षाऽच्युतावतारेहा विश्वस्यानुयुगे युगे ।
तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः ॥ १४ ॥
मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वराः ।
ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते ॥ १५ ॥
राज्ञां (२)ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ।
(३)वंशानुचरितं तेषां वृत्तं वंशधराश्च ये ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्र सर्गं व्याचष्टे—अव्याकृतस्य प्रधानस्य गुणानां क्षोभात् यो महान् तस्मात् त्रिविधाहङ्कारस्तस्मात् भूतमात्रादीनां सम्भवः सर्गः अत्रार्थशब्देन देवताः ज्ञेयाः कारणसृष्टिः सर्ग इत्यर्थः । उच्यत इति यथापेक्षमुत्तरत्राप्यनुषङ्गः ॥ ११ ॥

विसर्गं व्याचष्टे, पुरुषेणेश्वरेणानुगृहीतानामेतेषां यः समाहारः कार्यभूतः समष्टिव्यष्टिजीवोपाधिरूपः, कीदृशः ? वासनामयः सर्वसद्वासनाप्रधानः स विसर्गः तत्र चराचरं जङ्गमस्थावरात्मकं जगदिदं बीजाद्बीजमिव प्रवाहापन्नं भवति ऊतयः कर्मवासनाः इति पूर्वव्याख्याता या ऊतिः सात्र विसर्गे एवान्तर्भाविता ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अस्य विश्वस्य सर्गः ॥ १ ॥ विसर्गः ॥ २ ॥ वृत्तिस्थितिः ॥ ३ ॥ रक्षापोषणलक्षणा ॥ ४ ॥ अन्तराणि मन्वन्तराणि ॥ ५ ॥ वंशो वंशानुचरितमितीशानुकथा ॥ ६ ॥ संस्था निरोधः ॥ ७ ॥ संस्थाशब्देनात्यन्तिकप्रलयरूपा मुक्तिरप्युक्ता ॥ ८ ॥ हेतुशब्देन जीवाश्रयवासनाद्यव्याकृतवाच्याः ऊतयो गृहीताः ॥ ९ ॥ अपाश्रयो ब्रह्म ॥ १० ॥ ९ ॥

एतैर्दशभिः सर्गादिभिर्लक्षणैर्युक्तं तद्विदः पुराणलक्षणाभिज्ञाः पुराणं विदुः केचित्तु—

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥"

इति पञ्चविधं पुराणं विदुः एतदुभयं महदल्पविवक्षया बोध्यं दशलक्षणयुक्तं महापुराणं यत्र तु पञ्चैवामीषां यथायथमन्तर्भावस्तत्पञ्चलक्षणयुक्तमल्पपुराणमित्यर्थः ॥ १० ॥

सर्गं विवृणोति-अव्याकृतेति । अव्याकृतस्य भगवच्छक्तेः प्रकृतेर्गुणक्षोभात् त्रिवृत् महान् महतः त्रिवृदहं त्रिवृतोऽहमः भूतसूक्ष्मेन्द्रियरूपाणाम् आकाशादिभूतानां सूक्ष्माणां तन्मात्राणामेकादशेन्द्रियाणां च अर्थानां पदार्थानां सम्भवः सर्गः उच्यते ॥ ११ ॥

विसर्गं विवृणोति-पुरुषानुगृहीतानामिति । पुरुषेण परमेश्वरेण अनुगृहीतानां तत्प्रसादाल्लब्धसृष्टिसामर्थ्यानामेतेषाम् जीवानां वासनामयः पूर्वकर्मवासनाप्रधानः अयं समाहारः कार्यभूतः चराचरं जङ्गमाजङ्गमरूपः बीजाद्बीजमिव प्रवाहरूपो विसर्गो ज्ञेयः ॥ १२ ॥

भाषा टीका ।

सर्ग विसर्ग वृत्ति रक्षा मन्वन्तर वंश वंशानुचरित संस्था हेतु और आश्रय ॥ ९ ॥

इन दश लक्षणों से युक्त जो होवे पुराण वेत्ता लोग उसको पुराण कहते हैं । हे ब्रह्मन् ! कोई महर्षि लोग कहते है, कि—जो दश लक्षण युक्त होवे वह महापुराण है और जो पंच लक्षण युक्त है वह अल्प पुराण है, इस व्यवस्था से कहते हैं ॥ १० ॥

प्रकृति के गुणों के क्षोभ होने से महत्तत्त्व उत्पन्न हुआ तिस से त्रिवृत् जो अहंकार उत्पन्न हुआ तिस त्रिगुण विशिष्ट त्रिविध अहंकार से भूतों की सूक्ष्मावस्था तन्मात्रा और पञ्चभूत तथा इन्द्रिय और देवता इन कार्यों की सृष्टिका नाम सर्ग है ॥ ११ ॥

ईश्वरसे अनुगृहीत महदादि को का वासनामय अर्थात् पूर्व कर्म प्रधान जैसे बीजसे बीज उत्पन्न होता है इस प्रकार प्रवाह को प्राप्त होनेवाली कार्यभूतचराचर प्राणियों की सृष्टि का नाम विसर्ग है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चराणां भूतानां सामान्यतोऽचराणि चकाराच्चराणि च [कामात्] वृत्तिः तत्र नृणां येन स्वभावेन कामाच्चोदनयाऽपि वा या नियता वृत्तिर्जीविका कृता सा वृत्तिरुच्यत इत्यर्थः ॥ १३ ॥

तिर्यङ्मर्त्यर्षिदेवेषु येऽच्युतावतारास्तेषामीहा लीला सा विश्वस्य रक्षोच्यत इत्यर्थः । यैरवतारैरिति समासान्निष्कृष्य कथंचित्सम्बन्धः त्रयीद्विषो दैत्याः ॥ १४ ॥

षड्विधं मन्वन्तरमुच्यते ; षड्विधत्वमेवाह-मनुरिति । मन्वादयः षडेते यत्रांशाधिकारेण यदा प्रवर्तन्ते तन्मन्वन्तरमित्यर्थः ॥ १५ ॥

टि० (१) कृतेनेति (२) मनुप्रसूतानामिति विज० पा० (३) वंशानुचरितमिति पा० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

वंशमाह—राज्ञामिति । ब्रह्मणः सकाशात्प्रसूतिर्येषां शुद्धानामित्यर्थः । तेषामन्वयो वंशः [तत्र भवा वंश्याः] तेषां वृत्तम् ये च तद्वंशधरास्तेषां च वृत्तं वंशा [श्या] नुचरितम् उच्यते ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वृत्तिरिति । चराणां भूतानाम् अचराणि भूतानि वृत्तिर्जीवनोपाय इत्यर्थः । कृतेति सा च वृत्तिः केवलं रागप्राप्ता शास्त्राविरुद्धा चेत्यर्थः ॥ १३ ॥

अवतारेहा अवतारचेष्टा यैः अवतारैः ॥ १४ ॥

मन्वन्तरमेव मन्वादिभिः षड्विधं वंशधराः पुत्रपौत्रादयः ॥ १५—१८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वृत्तिं निरूपयति——वृत्तिरिति । चराणां भूतानामचराणि भूतानि वृत्तिर्जीवनोपाय इत्यर्थः । सा चेशेनेश्वरेण कृता साच नृणां कामाद्रागात्तत्रापि चोदनया विधिना न केवलं रागप्राप्ता शास्त्राविरुद्धा चेत्यर्थः । कृताच्चेनेतिपाठे स्वेनेश्वरेणैव कृतेत्यर्थः ॥ १३ ॥

अथ रक्षामाह—प्रतियुगं तिर्यगादिष्वच्युतस्यावतारस्तच्चेष्टा विश्वस्य रक्षेत्यर्थः । अवतारतच्चेष्टितानां विश्वरक्षारूपत्वं दर्शयति, हन्यन्त इति । यैरवतारचेष्टितैस्त्रयीद्विषः वैदिकधर्मविरोधिनः हन्यन्ते ॥ १४ ॥

अन्तराणि लक्षयति, मन्वन्तरमिति । षड्विधं मन्वन्तरमुच्यते इति सम्बन्धः मन्वादयः षडेते यत्र तन्मन्वन्तरम् उच्यतेत्यर्थः । षड्विधत्वमेवाह, मनुरिति । हरेरंशावताराश्चेति सम्बन्धः सुरेश्वरा इन्द्राः ॥ १५ ॥

वंशमाह-राज्ञामित्यर्द्धेन । मनोः प्रसूतानां राज्ञां यः त्रैकालिकः कालत्रयगोचरोऽन्वयः स वंशः इत्यर्थः । तदनुचरितमेवाह, वंशानुचरितमिति । ये च वंशधराः वंशनिर्वाहकाः तेषां वृत्तं वंशानुचरितम् उच्यत इत्यर्थः ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पञ्चानां भूतानां पञ्चभूतान्येवान्योन्यं वृत्तिर्जीवनमन्नमित्यर्थः । तेजोवृत्तिः पार्थिवानि दारूणीत्यादि । यद्वा, भूतानां पिशाचानां भूतानि मनुष्यलोकस्थानि शरीररुधिराणि "पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" इत्यमरः । चराणां गतिमताम् अचराणि स्थावररूपाणि व्रीह्यादीनि वृत्तिः ईशेन हरिणा कृता कल्पिता

> "अहस्तानि सहस्तानां अपदानि चतुष्पदाम् ।
> फल्गूनि तात ! महतां जीवो जीवस्य जीवनम्" ॥

इत्युक्तम् । तत्रैवं स्थितिर्नृणां वृत्तिः कामादिच्छातः फलमूलादीनि चोदनया विधिना तत्तत्क्रियानुसारेण विहिता यवपुरोडाशादिलक्षणा ॥ १३ ॥

युगेयुगे विश्वस्य अनुयोग्या अच्युतावतारेहा हरेरवतारेण चेष्टापरिरक्षणं रक्षा "यदा यदा हि धर्मस्य" इति गीतार्थो कुत्रेति तत्राह—तिर्यगिति । यैरवतारैस्त्रयीद्विषः वेदवैरिणोऽसुरा हन्यन्ते तेषां चरितवर्णनं रक्षणमित्यर्थः । "स्थितिर्वैकुण्ठविजयः" इति पोषणं तदनुग्रह इति च ॥ १४ ॥

एतन्मन्वन्तरं षड्विधमुच्यते षण्णां कथाकथनं मन्वन्तरमित्यर्थः । तत्रांशकानामिति शेषः । मन्वन्तरेषु सद्धर्मा इति मन्वादिधर्मकथनमित्यर्थः ॥ १५ ॥

मनुप्रसूतानां राज्ञामन्वयो वंश इत्युच्यते कीदृशस्त्रैकालिको भूतभविष्यद्वर्तमानविषयः एतत्कथनमत्रेति वंशस्यानुचरितं नाम तेषां राज्ञां वृत्तिकथनं ये वंशधरा स्वस्ववंशं धृतवन्तस्तेषां च वृत्तम् ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

ब्रह्मप्रसूतानां ब्रह्मत आरब्धानामित्यर्थः ॥ १६॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पूर्वोक्तं स्थानं पालनमेवात्र वृत्तिशब्देनोच्यते तां व्याचष्टे—वृत्तिरिति । चराणां भूतानां सामान्यतोऽचराणि चकाराच्चराणि च कामाद्वृत्तिः तत्र नृणां स्वेन स्वभावेन कामात् चोदनयापि या या नियता वृत्तिर्जीविका कृता सा वृत्तिरुच्यत इत्यर्थः । तेषां चराचराणामन्याश्रयः सर्वैव वृत्तिरिति वृत्तिप्रसङ्ग एव भूगोलवर्णनं पञ्चमस्कन्धे निरूपितम् ॥ १३ ॥

"पोषणं तदनुग्रहः" इति पूर्वलक्षितं पोषणमेवात्र रक्षाशब्देनोच्यते तां व्याचष्टे—रक्षेति । तिर्यगादिषु या अच्युतस्यावतारेहा अवतारकरणं सैव रक्षा कुत इत्यत आह, यैरवतारैस्त्रयीद्विषो हन्यन्ते इत्यतो दुष्टनिग्रहात् स्वभक्तरक्षणमेव रक्षेत्यर्थे भावात् । उपलक्षणमेतदन्यदापि महाभयात् स्वभक्तरक्षणं रक्षोच्यते अत एव षष्ठे अजामिलादिभक्तानां रक्षोक्ता ॥ १४ ॥

मन्वन्तराणि सद्धर्म इति पूर्वलक्षितं मन्वन्तरं व्याचष्टे—मन्वन्तरमिति । विदधाति स्वस्वकृत्यं कुर्वन्तीति विधा मन्वादयस्ते षट् यत्र तत् षड्विधं षडङ्गमित्यर्थः । मन्वादयः षडेते स्वस्वाधिकारेण यत्र प्रवर्त्तन्ते तन्मन्वन्तरमित्यर्थः ॥ १५ ॥

वंशं व्याचष्टे—राज्ञामिति । ब्रह्मणः सकाशात् प्रसूतिर्येषां तेषामन्वयो वंशः वंशानुचरितं व्याचष्टे—तेषां मध्ये ये वंशधराः प्रसिद्धाः प्रियव्रतध्रुवपृथ्वादयस्तेषां वृत्तं चरितं वंशानुचरितमुच्यते एतद्वयं पूर्वमीशानुकथायामेवान्तर्भावितम् ॥१६॥

नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः।
संस्थेति कविभिः प्रोक्ता चतुर्धाऽस्य स्वभावतः ॥ १७ ॥
हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः।
यं (१)चानुशयिनं प्राहुरव्याकृतमुतापरे ॥ १८ ॥
(२)व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु।
(३)मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ॥ १९ ॥
पदार्थेषु यथा द्रव्यं (४)तन्मात्रं रूपनामसु।
बीजादिपञ्चतान्तासु ह्यवस्थासु युतायुतम् ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

वृत्तिं विवृणोति-वृत्तिरिति। चराणामचराणि चकाराच्चरा-ण्यपि स्वेन स्वकीयेन कर्मफलदात्रा कृता वृत्तिर्वा तत्र नृणां कामात् रागतः चोदनयापि वा प्रवृत्तिरिति शेषः ॥ १३ ॥

रक्षां विवृणोति—रक्षेति। अच्युतावतारशब्दस्येहाशब्देन समासः क्रमोत्क्रमत्वात्कृतः पादयोजनायान्तु समासो विच्छिन्नः तथाच अनु युगेयुगे प्रतियुगं तिर्यङ्मर्त्यर्षिदेवेषु वर्तमानैः यैरच्युतावतारैः त्रयीद्विषः हन्यन्ते तेषामच्युतावताराणां ईहा चेष्टा अस्य विश्वस्य रक्षेति पदयोजना ॥ १४ ॥

अन्तराणि एकमन्वन्तरकथनेन विवृणोति—मन्वन्तर-मिति ॥ १५ ॥

वंशं वंश्यानुचरितं च विवृणोति-राज्ञामिति। ब्रह्मणः सकाशात् प्रसूतिर्येषां तेषां राज्ञां त्रैकालिकोऽन्वयः वंशः तत्र मर्त्याः वंशधराः वंश्याः तेषां वृत्तं वंश्यानुचरितम् एतदुभय-मीशानुकथैरुच्यते ॥ १६ ॥

———

भाषाटीका।

चर भूत प्राणियों की जीविका सामान्य रीति से अचर है और चर जो हैं वह जीविका कामना से है परन्तु मनुष्योंकी स्वभाव से कामना से अथवा विधि से जो नियत जीविका है, उसीको वृत्ति कहते है ॥ १३ ॥

युग २ में तिर्यक् मनुष्य ऋषि और देवताओं में विश्वके पालन करने के लिये श्रीहरि जो अवतार लेने की चेष्टा है, उसीको रक्षा कहते हैं। जिन अवतारों को धारण कर वेद त्रयी के द्वेषियों को भगवान् मारते है ॥ १४ ॥

मनु, देवता, मनुपुत्र, इन्द्र, ऋषि, और श्रीहरि के अंशावतार यह छै प्रकार का मन्वन्तर कहा जाता है ॥ १५

ब्रह्माजीसे उत्पन्न होने वाले राजाओं की सर्व कालकी वंश परंपरा का नाम वंश है। और उन राजाओं के तथा उन के वंश धारण करने वाले पीछे के राजाओं के जो चरित्र हैं उनको वंश्यानुचरित कहते हैं ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

अस्य विश्वस्य स्वभावतो मायातो निष्पन्नस्य यद्वा, मायातो यश्चतुर्विधो लय इति ॥ १७ ॥

अस्य जगतः सर्गादेर्हेतुर्निमित्तं जीवः सोऽत्र हेतुरुच्यत इत्यर्थः। तस्य निमित्तत्वमाह-अविद्यया कर्मकारकः कर्मकर्ता जीवा-दृष्टमयुक्तत्वाद्विश्वसर्गादेः अतु तत्र हेतुरित्यर्थः। तमनुशायी निमित्तमिति केचित् अव्याकृतमित्यपरे तथाऽह, यमिति। चैतन्य-प्राधान्येनानुशयिनमुपाधिप्राधान्येनाव्याकृतम् ॥ १८ ॥

अपाश्रयमाह-व्यतिरेकेति। जाग्रदादिष्ववस्थासु जीवतया वर्तन्त इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु मायामयेषु साक्षि-तयाऽन्वयः समाध्यादौ च व्यतिरेको यस्य तद् ब्रह्म संसार-प्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रय उच्यत इत्यर्थः ॥ १९ ॥

एतदेव सदृष्टान्तं प्रपञ्चयति-पदार्थेषु घटादिषु द्रव्यं मृदादि-यथा युतमन्वितमयुतं च बहिरप्यवस्थानात् रूपनामसु च तन्मात्रं सत्तामात्रं यथा एवं बीजं गर्भाधानमादिर्यासां पञ्च-ताऽन्तो यासां तासु देहावस्थासु तथाऽन्यधिष्ठानत्वेन साक्षि-त्वेन च युतमयुतं च यत्तदपाश्रय इति ॥ २० ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

व्यतिरेकेति। मायामयेषु प्रकृतिसम्बन्धः कार्येषु जाग्रदाद्य-वस्थाविशेषेषु यस्य ब्रह्मणो जीववृत्त्या अन्वयव्यतिरेकौ अवस्था-निर्वाहकतया अवस्थानादन्वयः अवस्थाभिरस्पृष्टत्वात् व्यति-रेकः सर्वाधारत्वात् व्यपाश्रय इत्यर्थः ॥ १९ ॥

ब्रह्मणस्तत्तदवस्थितिशरीरकरूपेण सर्वावस्थान्वयः। स्वेन रूपेण ताभिर्व्यतिरेकश्चेत्युक्तं भवति। पदार्थेष्विति बीजादि-पञ्चतान्तासु जन्मादिविनाशान्तास्ववस्थास्वनामरूपान्वितेषु घटपटादि पदार्थेषु द्रव्यमात्रं जन्माद्यवस्थाभिः युतायुतं द्रव्यं घटत्वादि विशिष्टरूपेण जन्मादियुतं तद्विशिष्टद्रव्यस्वरूपेण मात्ररूपेण जन्मादिरहितत्वं तद्वदित्यर्थः। नहि कटकविनाशे कनकस्यापि विनाशः ॥ २० ॥

(१) अनुशायिनमिति। (२) व्यतिरेकान्वयाविति। (४) तन्मात्रमिति च वीर० विज० पा०। (३) मायामयास्विति विज० पा०।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

संख्यामाह, नैमित्तिक इति । स्वभावतः कालकर्मस्वभावादस्य विश्वस्य सर्गादेः चतुर्धा चतुर्विधः नैमित्तिकादिरूपो लयः संख्येति कविभिः प्रोक्तः ॥ १७ ॥

हेतुं निरूपयति, हेतुरिति । अविद्याकर्मकारकः अज्ञानमूलकं पुण्यापुण्यात्मकं कर्म करोतीति तथा स जीवः एकत्वं आत्माभिप्रायकम् अस्य विश्वस्य सर्गादेर्हेतुर्जीवस्य कर्मफलानुभावार्थत्वात्सर्गादेस्तन्निमित्तत्वं तस्मात् स हेतुरित्यर्थः । हेतुत्वमुपपादनाय जीवं विशिनष्टि, यमिति । अनुशयो भुक्तफलकर्मावशेषः सोऽस्यास्तीति अनुशयी तथाभूतं यं जीवं प्राहुः भुक्तावशेषकर्मवासनायुक्तं प्राहुः उतापि चापरेऽव्यक्तमव्याकृतं देवादिनामरूपरहितं प्राहुः सृष्टेः पूर्वं देवादि[वासना]नामरूपरहितं प्राहुः सृष्टेः पूर्वं देवादिनामरूपरहिता वासनायुक्ताः जीवा अस्य सर्गादेर्निमित्तमिति स हेतुरित्यर्थः ॥ १८ ॥

अथापाश्रयमाह–द्वाभ्याम् । व्यतिरेकान्वयाविति मायामयेषु प्रकृतिकार्येषु शरीरेषु जाग्रदादिषु जीवस्य वृत्तिषु यस्यान्वयव्यतिरेकौ तद्ब्रह्मापाश्रयः सर्वाधारत्वादपाश्रय इत्युच्यत इत्यर्थः । ब्रह्मणो जीववृत्तिनिर्वाहकतयाऽवस्थानात् अन्वयः । अवस्थाभिरस्पृष्टत्वाद्व्यतिरेकश्च भवति, ब्रह्मण्यस्तत्तादवस्थ्यविशिष्टतारूपेण सर्वावस्थान्वयः स्वेन रूपेण ताभिर्व्यतिरेकश्चेत्युक्तं भवति ॥ १९ ॥

अत्र दृष्टान्तमाह–पदार्थेष्विति । बीजादिपञ्चत्वान्तास्ववस्थासु जन्मादिविनाशान्तासु अवस्थासु रूपनामसु नामरूपवत्सु पदार्थेषु घटपटादिषु यद्द्रव्यं तन्मात्रं तद्द्रव्यमात्रं जन्माद्यवस्थाभिर्युतायुतं तत्वादिविशिष्टतारूपेण जन्मादियुतं तत्प्रहाणादशाय विप्रेष्यमाणरूपेण जन्मादिरहितं च तद्वदित्यर्थः ॥ २० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्य जगतः स्वभावतश्चतुर्धा लयः संख्येति कविभिः प्रोक्ता ॥ १७ ॥

यं च प्रलये परमात्मानमनुविश्य शायिनं स्वपन्तमाहुः अपरे अव्याकृतम् अव्याकृताकाशवाविकारं प्राहुः सोऽविद्यया कर्मकारकः कर्मकर्ता अस्य जगतः सर्गादिनिमित्तभूतो जीवो हेतुरित्युच्यते जीवसमुदायः सुखदुःखप्राप्तये तं हेतुं कृत्वा जगतः सृष्ट्यादिकं प्रवर्तत इति "निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः" इति ॥ १८ ॥

अपाश्रयं लक्षयति—व्यतिरेकान्वयाविति । अपगत आश्रयो यस्य स तथा अद्वितीय इत्यर्थः । अद्वितीयत्वं कथमुच्यते अन्वयव्यतिरेकाभ्यां ज्ञायत इति यस्य हरेर्जीववृत्तिषु जीवानां जीवनोपायभूतासु जाग्रत्स्वप्नसुषुप्तिषु व्यतिरेकान्वयौ स्तः जाग्रदाद्यभावेऽपि विद्यत इति व्यतिरेकः तद्भावेऽप्यवस्थितत्वमन्वयः मायामयासु श्रीहरीच्छारचितासु तद्ब्रह्मापाश्रय इत्युच्यते ॥ १९ ॥

प्रकारान्तरेण आश्रयं लक्षयति–पदार्थेष्विति । रूपनामयुक्तेषु पदार्थेषु यद्द्रव्यमुपादानादिकारणभूतं प्रकृत्याख्यं तन्मात्रं पदार्थस्वरूपं तस्मिन् द्रव्ये बीजादिपञ्चतान्तासु जन्मादिमरणावस्थान्तास्ववस्थासु युतायुतम् अन्वयव्यतिरेकाभ्यां वर्तते तद्ब्रह्मापाश्रयम् यद्वा, रूपनामप्रपञ्चपदार्थेषु युतायुतमन्वयव्यतिरेकवत्त्वेन ध्यानुमानेन यत्तन्मात्रं विज्ञानानन्दमात्रं द्रव्यं पूर्णं ज्ञेयं यत् बीजत्वाद्यवस्थासु वस्तुतः पञ्चत्वावसानलक्षणावस्थासु युतायुतं वर्तते तद्ब्रह्मेति ॥ २० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

स्वभावतो मायायाः स्वाभाविकशक्तितः ॥ १७-२२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पूर्वोक्तनिरोधशब्दवाच्यां संख्यां व्याचष्टे–नैमित्तिक इति । अस्य विश्वस्य स्वभावतः स्वस्य भावेषु कारणेषु पृथिव्यादितत्त्वेषु क्रमेण लयः संख्यायते ॥ १७ ॥

हेतुं व्याचष्टे–अस्य जगतः सर्गादेर्हेतुर्निमित्तं जीवः स च अविद्याकर्मकारकः अविद्यया कर्मकर्ता जीवार्थमेव भगवता विश्वस्य सर्गादेः कृतत्वात् जीवो निमित्तमिति भावः। अत एवम् अनुशायिनं मायिकोपाधिमनुशयानं मायिकशरीरवन्तमेवैके प्राहुः अपरे भक्तास्तु मायिककर्मकर्तारं जीवं साधुसङ्गवशाद्भक्तिमार्गस्थं सति अव्याकृतम् अप्राकृतं चिन्मयपार्षदशरीरवन्तमपि प्राहुः अत्रैव उतशब्दः यदुक्तं नारदेन—

"प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् ।
आरब्धकर्मनिर्वाणो न्यपतत्पाञ्चभौतिकः" ॥ इति ॥

अत एवोक्तं वेदस्तुतावपि—

बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः ।
मात्रार्थं च भवार्थं च आत्मने कल्पनाय च ॥ इति ॥

आत्मने कल्पनाय बुद्धीन्द्रियमनःप्राणान् सं प्रापयितुमिति तत्रार्थः एतन्मत एव नवमं लक्षणं पूर्वोक्तं "मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः" इति विशेषेण चिद्घनशरीरत्वेनावस्थितिरिति तत्र व्याख्या ॥ १८ ॥

अपाश्रयं व्याचष्टे—व्यतिरेकेति । जाग्रत्स्वप्नसुषुप्तिष्ववस्थासु तथा मायामयेषु सर्वेष्वेव पदार्थेषु यस्य हेतुतया अन्वयः तेभ्यो व्यतिरेकश्च तद्ब्रह्माऽपाश्रय उच्यते ॥ १९ ॥

एतदेव सदृष्टान्तं प्रपञ्चयति–पदार्थेषु घटादिषु द्रव्यं मृदादिवस्तु युतम् अन्वितम् अयुतं च बहिरवस्थानात् रूपनामसु वाच्यवाचकवस्तुषु यथा तन्मात्रं [गन्धादिकञ्च] तन्मात्रकारणं तामसाहङ्कारश्च तथैव बीजादिपञ्चतान्तासु बीजाङ्कुरावस्थादियासां पञ्चता अन्तो यासां तासु देहावस्थासु अधिष्ठितत्वेन साक्षित्वेन च युतमयुतं च यत्तदपाश्रयः ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

संख्यां विवृणोति—नैमित्तिक इति । स्वभावतः स्वकीयो यो भावः "सदेव सोम्येदमग्र आसीत्" इत्यादिषु सदादिशब्दनिर्दिष्टः परमकारणभूतः परमात्मा तस्मात्तद्धेतुभूतात् अस्य कार्यजातस्य चतुर्धा लयः कविभिः संख्या प्रोक्ता ॥ १७ ॥

विरमेत यदा चित्तं हित्वा[1] वृत्तित्रयं स्वयम् ।
योगेन वा तदाऽऽत्मानं [2] वेदेहाया निवर्त्तते ॥ २१ ॥
एवं लक्षणलक्ष्याणि पुराणानि पुराविदः ।
मुनयोऽष्टादश प्राहुः क्षुल्लकानि महान्ति च ॥ २२ ॥
ब्राह्मं पाद्मं वैष्णवं च शैवं लैङ्गं सगारुडम् ।
नारदीयं भागवतमाग्नेयं स्कान्दसञ्ज्ञितम् ॥ २३ ॥
भविष्यं ब्रह्मवैवर्तं मार्कण्डेयं सवामनम् ।
वाराहं [3] मात्स्यं कौर्मं च ब्रह्माण्डाख्यमिति त्रिषट् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हेतुर्विवृणोति—हेतुरिति । अस्य विश्वस्य सर्गादेः जीवो । हेतुर्निमित्तम्—

"बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः ।
मात्रार्थं च भवार्थं च आत्मने कल्पनाय च"

इत्यादौ जीवानामेवोपकारार्थं भगवान् विश्वं करोतीति प्रपञ्चितम् जीव इत्यत्र एकवचनं जातौ "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इत्यादि बहुत्वश्रवणाद् जीवस्य सर्गादिनिमित्तत्वं हेतुगर्भेण विशेषणेन दर्शयति, अविद्याकर्मकारक इति । विशेषणेन तद्भिन्नो मुमुक्षुः सूचितः अविद्याकर्मकारक इति अविद्यया अज्ञानेन पुनः पुनर्जन्ममरणप्रदानि कर्माणि करोतीति तथा अज्ञानमूलकर्मकर्तृत्वेन हेतुमाह—यमनुशायिनं प्राहुरिति । अनुशायशब्देन जीवविमोहहेतुभूता नानावासनाप्रदा अनाद्यविद्योच्यते तद्गतं य यज्जीवम् 'अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः' इत्यादिना प्राहुः अविद्याकर्मकारकविशेषणेन तद्भिन्नो मुमुक्षुः सूचितस्तम् अपरे अव्याकृतं प्राकृतप्रपञ्चरहितं "निरञ्जनः परमं साम्यमुपैति" इत्यादिना प्राहुः मुमुक्षुर्मुमुक्षुश्च विश्वसर्गादौ हेतुरित्यर्थः ॥ १८ ॥

अपाश्रयमाह—व्यतिरेकान्वयाविति द्वाभ्याम् । यस्य जाग्रदादिषु जीववृत्तिषु जीवविवर्तावस्थासु जीवावस्थात्वया मायामयेषु महदादिदेहपर्यन्तेषु च मायावस्थात्वयान्वयः स्वरूपेण व्यतिरेकोऽनन्वयश्च तद्ब्रह्म वृहत्स्वरूपगुणत्वात्तयाश्रयो भगवान् श्रीपुरुषोत्तमः अपाश्रयः स्वयं सर्वाश्रयः आश्रयान्तरशून्यः आश्रय इत्यर्थः ॥ १९ ॥

उक्तार्थं दृष्टान्तेन स्पष्टयति—पदार्थेष्विति । यथा पदार्थेषु घटादिषु बीजादिमत्स्यान्तासु तत्तदवस्थासु च तन्मात्रं तत्तत्पदार्थमात्रं द्रव्यं महदादियुतं समन्वितम् अयुतं च पृथे उच्यते भिन्ने च भूतोऽनुत्पन्नत्वादविनष्टत्वाद आधारत्वादिना वहिर्व्यवस्थानाच्च तथा रूपनामसु वाच्यवाचकेषु कार्यरूपेषु चिदचिद्विशिष्टात्मकेषु युतमन्वितं स्वरूपेणायुतं तत्तद्विलक्षणं वस्तुब्रह्म अपाश्रयः जगद्विलक्षणं श्रीपुरुषोत्तमाख्यं ब्रह्मानन्याश्रयमित्यर्थः २० ॥

———

भाषा टीका ।

पूर्वोक्त नैमित्तिक, प्राकृतिक, नित्य, और आत्यन्तिक इन चार प्रकार के प्रलय को ही कवि लोग संस्था कहते हैं। यह स्वभाव से चतुर्विध कही गई हैं ॥ १७ ॥

अज्ञान से पुण्य पाप रूप कर्म करनेवाले जीव को ही इस सृष्ट्यादि का हेतु कहते हैं । जिस अनुशायी को अर्थात् प्रलयकाल में परमात्मा जलशायी के पीछे शयन करनेवाले को कोई लोग अव्याकृत भी कहते हैं अर्थात् देव मनुष्यादि नाम रूप विभाग रहित कहते हैं ॥ १८ ॥

मायामय अर्थात् प्रकृति के कार्यरूप शरीरों में जो जाग्रत, स्वप्न, सुषुप्ति, ये जीव की वृत्ति हैं। उन वृत्तियों में जिसका अन्वय व्यतिरेक है, वही ब्रह्म सबका आधार होने से आश्रय कहा जाता है । ब्रह्म को जीव की जाग्रदादि अवस्थाओं का निर्वाहक होने से उन अवस्थाओं में ब्रह्म का अन्वय है । और उन अवस्थाओं का ब्रह्म को स्पर्श न होने से व्यतिरेक है ॥ १९ ॥

इसमें यही दृष्टांत है, कि—जैसे नामरूप वाले घटादि पदार्थों में बीज से लेकर अर्थात् उत्पत्ति से नाश पर्यन्त अवस्थाओं में वह मृत सुवर्णादि द्रव्य, नाम रूप के मेलयुक्त होने से उन अवस्थाओं से युक्त भी है, और अपने स्वरूप से अयुक्त भी है। इसी प्रकार ब्रह्म भी चेतनाचेतन विशिष्ट होने से अन्वित भी है, और स्वरूप से व्यतिरिक्त भी है ॥ २० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवं दशापि लक्षणानि व्याख्याय—

"दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् । वर्णयन्ति महा-

(१) वृत्तित्रयोत्थमिति वीर० विज० पा० (२) वेदात्मा तन्निवर्तते, वेदेहावांनवर्तते इति वीर० वेदात्मात्मनिवर्तते इति विज० पा० (३) मात्स्यकौर्मेऽथेति वीर० पा० ।

[१]ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं [२]मुनेः ।
शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजो [३]विवर्धनम् ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यां द्वादशस्कन्धे
सप्तमोऽध्यायः ॥ ७ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्मानः" इति यदुक्तं तदाह—विरमेतेति । यदा सर्गादीनां मायामयत्वानुसन्धानेन वामदेवादेरिव स्वयमेव चित्तं विरमेत ईहेयानुष्ठितेन योगेन वा देवहूत्यादिवत् तदा विक्षेपाभावादात्मानं वेद तदा चाविद्यानिवृत्तेरीहाया: संसाररूपाया निवर्तेत इत्यर्थः ॥ २१ ॥

पुराणविभागवचनावेन तल्लक्षणादिप्रासङ्गिकमुक्त्वा प्रस्तुतमाह, एवं विधैर्लक्षणैर्लक्ष्याणि ॥ २२—२३ ॥

त्रिषड्दशा ॥ २४ ॥

उपसंहरति-ब्रह्मन्निति । मुनेर्व्यासस्य शिष्यादीनां च ब्रह्मतेजो ब्रह्मवर्चसं तद्विवर्धनम् श्रोतृणामिति शेषः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

वृत्तित्रयं स्वयम् अयत्नतः योगेन योगाभ्यासयत्नेन वा वैदेहाय विदेहभावाय मोक्षाय ॥ २१ ॥ २५ ॥

इति श्रीमद्भागवतव्याख्याने द्वादशस्कन्धे
श्रीसुदर्शनसूरिकृतशुकपक्षीये
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तं "दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्" इति तदाह—विरमेतेति । वृत्तित्रयाश्रयमिति भावप्रधानो निर्देशः यदा चित्तं जाग्रदादिवृत्तित्रयाश्रयत्वं हित्वा स्वयमयत्नतः योगेन योगाभ्यासयत्नेन वा विरमेत विषयेभ्य इति शेषः । तदात्मानमाश्रयार्थं वेद आत्मा चित्तं तत् ततः निवर्तेते वेदेहाया निवर्तेते इति पाठान्तरं तदात्मानं वेद ततः ईहायाः संसाररूपायाः निवर्तेत इत्यर्थः वैदेहाया निवर्तेत इति पाठान्तरं तदा यस्य चित्तं विरमेत स आत्मानं वेदेति शेषः । ततः वैदेहाय विदेहभावाय प्राकृतदेहाभावायेति यावत् निवर्तेते संसारबन्धान्निवर्तेत मुच्यत इत्यर्थः ॥ २१ ॥

तदेवं पुराणसंहिताविभागप्रसङ्गेन तल्लक्षणान्यभिधाय प्रस्तुतमाह—एवमिति । एवंविधैः दशभिः पञ्चभिर्वा लक्षणैः लक्ष्याणि महान्ति क्षुल्लकानि अल्पानि च अष्टादशपुराणानि पुराविदः पूर्वकालाभिज्ञा मुनयो विदुः ॥ २२ ॥

कानि पुनस्तान्यष्टादशेत्यत्राह—ब्राह्ममितिद्वाभ्याम् । मात्स्यकौर्मं मिति समाहारद्वन्द्वः मात्स्यं कौर्मं चेत्यर्थः । इतीत्थं त्रिषट् अष्टादश ॥ २३—२४ ॥

पुराणवेदसंहिताविभागोपपादनं निगमयति—ब्रह्मन्निति । हे ब्रह्मन् ! मुनेर्बादरायणस्य शिष्याणां प्रशिष्याणां शाखाप्रणयनं वेदपुराणसंहिताप्रवर्तनं तच्च श्रोतृणां ब्रह्मतेजसः ब्रह्मवर्चसः विदीपनमुद्दीपनमिति फलकीर्तनमिदं ॥ २५ ॥

इतिश्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतादृशब्रह्मप्राप्तिः कदा स्यादिति तत्राह—विरमेतेति । वृत्तिः त्रयाश्रयं जाग्रत्स्वप्नसुषुप्तिलक्षणवृत्तित्रयविरुद्धं चित्तं हित्वा वृत्तित्रयाद्विरमेत उपरतं भवति तदा योगेन ध्यानलक्षणयोपासनया निरन्तरं श्रीनारायणकथाश्रवणलक्षणोपासनया चात्मानं परमात्मानं वेद जानाति लभते प्राप्नोति च ततः किमत्राह—नेति । आत्मा जीवः पुनर्निवर्तते नैव "न च पुनरावर्तते न च पुनरावर्तते" इति श्रुतेः ॥ २१ ॥

उपसंहरन्नेव पुराणानां विप्रप्रवृत्तये संख्यामाह—एवमिति । क्षुल्लकानि श्लोकसङ्ख्यापरिमितानि न त्वर्थतः कानिचिदर्थतः शब्दतः फलतोऽपि महान्ति ॥ २२ ॥

तानि क्रमेण निर्दिशति—ब्राह्ममित्यादिना ॥ २३ ॥

त्रिषट् अष्टादश ॥ २४ ॥

अत्र शिष्यप्रशिष्यैः शाखाप्रणयनं वेदपुराणकर्तुर्ब्रह्मणोऽभिमतं कृतमिति भावाकूतिस्याह—ब्रह्मन्निति । शिष्यादीनामेतच्छाखाप्रणयनं ब्रह्मणैव समाख्यातं कथितं कीदृशं ब्रह्मतेजो विदीपनं

---

[१] ब्रह्मन्नेतावदिति [२] मुने ! इति च विज० पा० (३] विदीपनमिति वीर० विज० पा० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

ब्रह्मतेजसः प्रकाशकं निरर्थकं प्रणयनं किमर्थं कृतमित्यतो वाह—ब्रह्मेति ब्रह्मणः परमात्मनस्तेजसः प्रभावस्य विदीपनं प्रकाशनकरम् ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्

सप्तमोऽध्यायः ॥ ७ ॥

(विजयध्वजरीत्या षष्ठः ॥ ६ ॥)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तथाच वाराहे—

ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ।
तथान्यं नारदीयं च मार्कण्डेयं च सप्तमम् ॥
आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा।
दशमं ब्रह्मवैवर्त्तं लिङ्गमेकादशं तथा ॥
वाराहं द्वादशं प्रोक्तं स्कान्दं चात्र त्रयोदशम् ।
चतुर्दशं वामनं च कौर्मं पञ्चदशं तथा ॥
मात्स्यं च गरुडं चैव ब्रह्माण्डाष्टादशं तथा ॥

शैवपुराणे—

ब्राह्मं पुराणं तत्राद्यं संहितायां विभूषितम् ।
श्लोकानां दशसाहस्रं नानापुण्यकथायुतम् ॥
पाद्मं द्वितीयं कथितं तृतीयं वैष्णवं स्मृतम् ।
चतुर्थं वायुना प्रोक्तं वायवीयमिति स्मृतम् ॥
ततो भागवतं प्रोक्तं भागद्वयविभूषितम् ।
चतुर्भिः पञ्चभिः प्रोक्तं भविष्यं तदनन्तरम् ॥
मार्कण्डेयमथा ह्येवं नारदीयमतः परम् ।
दशमं ब्रह्मवैवर्त्तं लिङ्गमेकादशं स्मृतम् ।
भागद्वयेन लिङ्गं च ततो वाराहमुत्तमम् ।
संयुक्तमष्टभिः खण्डैः स्कान्दं चैवात्र विस्तरम् ॥
ततस्तु वामनं कौर्मं भागद्वयविराजितम् ।
मात्स्यं च गारुडं प्रोक्तं ब्रह्माण्डं च ततः परम् ॥
भागद्वयेन कथितं ब्रह्माण्डमपि संज्ञितम् ।
इदं ब्रह्मपुराणस्य खिलं सौरमनुत्तमम् ॥
संहिताद्वयसंयुक्तं पुण्यं शिवकथाश्रयम् ।
आद्या सनत्कुमारोक्ता द्वितीया सूतभाषिता ॥

कूर्मपुराणे—

अन्यान्युपपुराणानि मुनिभिः कथितान्यपि ।

मात्स्ये—

अष्टादशभ्यस्तु पृथक् पुराणं यत्प्रदृश्यते ।
विजानीध्वं द्विजश्रेष्ठास्तदेतेभ्यो विनिर्गतः ॥
पञ्चाङ्गानि पुराणं स्यादाख्यानमितरं स्मृतम् ।
पाद्मे पुराणे या प्रोक्ता नरसिंहोपवर्णना ॥
तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते ।
यत्र साम्बं पुरस्कृत्य भविष्येऽपि कथानकम् ॥
प्रोच्यते तत्पुनर्लोके साम्बमेव मुनिव्रतैः ।
एवमादित्यसंज्ञं च तत्रैव परिपठ्यते ॥ २३ ॥ २४ ॥

शाखाप्रणयनमिति पुराणेतिहासानां शाखास्थानीयस्वादि-त्यभिप्रायः शिष्याः साक्षादुपदेश्याः शिष्यप्रशिष्याः शिष्याणां शिष्यपरम्पराः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे

सप्तमोऽध्यायः ॥ ७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

एवं दशलक्षणानि व्याख्यायेदानीं " दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् । वर्णयन्ति महात्मानः " इति यदुक्तं तदाह विरमेतेति " अरण्यवाशु वा कोपं निर्गार्ह्ममनसो यथा " इति न्यायेन केवलया भवणकीर्त्तनादिभक्त्यैव क्रमेण वृत्तित्रयम् हित्वा चित्तं क्रमेण विरमेत गुणेभ्यो विरतं स्यात् भगवच्चरणारविन्दे विशेषेण रमेत वा योगेनाष्टाङ्गयोगेन वा विरमेत चित्तं निर्वाणं स्यात्तदा आत्मानं वेद परमात्मानमनुभवति तदैव ईहायाः वैषयिकात् कामात् निवर्त्तेत ॥ २१ ॥ २२ ॥

त्रिपद् अष्टादश ॥ २३

मुनेर्व्यासस्य शिष्याणां शिष्यास्तेषामपि प्रशिष्यास्तेषां शाखाप्रणयनं ब्रह्मतेजो विवर्द्धनमिति श्रोतॄणामिति शेषः॥२४॥२५॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वादशे सप्तमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं दशलक्षणानि व्याख्याय यदुक्तं "दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम् । वर्णयन्ति महात्मान." इति तदाह विरमेतेति चाद्यन्तः एवमर्थं एवमुक्तसर्गादिनवलक्षणानां योगेन चिन्तनेन आत्मानं दशममाश्रयं तत्तद्विवोहकत्वादिना प्रधानभूतं परमात्मानं यदा चित्तं वेद वृत्तित्रयं हित्वा तस्मिन्नेव विषयतो-रमेत च तदा ईहायाः संसाररूपायाः निवर्तेत इत्यर्थः सर्गादिश्रवणेन परमात्मज्ञानं तदनन्तरं तस्मिन् रतिस्तदन-न्तरं संसारनिवृत्तिरिति फलितोऽर्थः ॥ २१ ॥

एवमुक्तप्रकारैर्लक्षणैर्लक्षितानि पुराणानि पुराविदः पुराणज्ञाः अष्टादशसंख्याकान्याहुः ॥ २२ ॥

त्रिपद् अष्टादश ॥ २३ ॥ २४ ॥

उपसंहरति—एवमिति । मुनः श्रीवेदव्यासस्य ब्रह्मतेजोविवर्धनं श्रोतॄणामिति शेषः ॥ २५ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

सप्तमाध्यायार्थप्रकाशः ॥ ७ ॥

भाषाटीका।

जिस समय पुरुष का चित्त आत्मद्रादि तीनों वृत्तियों को त्यागकर स्वयं आपही बिना ही वश किये किंवा योगाभ्यास के बल से जब विषयों से विराम को प्राप्त होता है, तब वह पुरुष द्वाम ब्रह्म परमात्मा को जान लेता है। और जानकर सांसारिक चेष्टा से निवृत्त होकर मुक्त होजाता है ॥ २१ ॥

पूर्वकाल के ज्ञाता मुनि लोग इन लक्षणों से लक्षित पुराणों को अठारह कहते हैं। उन अठारहों में कोई अल्प पुराण और कोई महापुराण हैं ॥ २२ ॥

ब्राह्म १ पाद्म २ वैष्णव ३ शैव ४ लैङ्ग ५ गारुड ६ नारदीय ७ भागवत ८ आग्नेय ९ स्कान्द १० ॥ २३ ॥

भविष्य ११ ब्रह्मवैवर्त १२ मार्कण्डेय १३ वामन १४ वाराह १५ मात्स्य १६ कौर्म १७ ब्रह्माण्ड १८ ये अठारह पुराण हुए ॥ २४ ॥

हे शौनक! यह मैंने मुनि श्रीव्यासजी के शिष्य प्रशिष्यों के द्वारा ब्रह्म तेज के बढ़ाने वाला वेद की शाखाओं का प्रवचन तुमारे सम्मुख वर्णन किया ॥ २५ ॥

इति श्रीमद्भागवत द्वादशस्कन्ध में सातवें अध्यायकी,

श्रीवृन्दावनस्थ पं० भागवताचार्यकृत

भाषा टीका समाप्ता ॥ ७ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः ।

शौनक उवाच ।

सूत ! जीव चिरं साधो ! वद नो वदतांवर ! ।
तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः ॥ १ ॥
आहुश्चिरायुषमृषिं मृकण्डुतनयं जनाः ।
यः कल्पान्ते उर्व्वरितो येन ग्रस्तमिदं जगत् ॥ २ ॥
स वा अस्मत्कुलोत्पन्नः कल्पेऽस्मिन् भार्गवर्षभः ।
नैवाधुनाऽपि भूतानां सम्प्लवः कोऽपि जायते ॥ ३ ॥
एक एवार्णवे भ्राम्यन् ददर्श पुरुषं किल ।
वटपत्रपुटे तोकं शयानं त्वेक*मद्भुतम् ॥ ४ ॥
एष नः संशयो भूयान् सूत[१] कौतूहलं यतः ।
तं नश्छिन्धि महायोगिन् ! पुराणेष्वपि सम्मतः ॥ ५ ॥

सूत उवाच ।

प्रश्नस्त्वया महर्षेऽयं कृतो (२)लोकभ्रमापहः ।
नारायणकथा यत्र गीता कलिमलापहा ॥ ६ ॥
प्राप्तद्विजातिसंस्कारो मार्कण्डेयः पितुः क्रमात् ।
छन्दांस्यधीत्य धर्मेण तपः स्वाध्यायसंयुतः ॥ ७ ॥
बृहद्व्रतधरः शान्तो जटिलो वल्कलाम्बरः ।
बिभ्रत्कमण्डलुं दण्डमुपवीतं समेखलम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अष्टमे तु तपश्चर्यां मार्कण्डेयस्य मोहकैः ।
कामादिभिरसम्मोहो नरनारायणस्तुतिः ॥

पुराणविभागप्रसङ्गेन पुराणकर्तुर्मार्कण्डेयस्य चरितप्रश्नमाह, सूतेति । त्वमेव वक्तुं योग्य इत्याह तमसि संसारे भ्रमतां पारदर्शनस्तत्त्वितकः ॥ १ ॥

वक्तव्यमाह—आहुरिति । उर्व्वरितोऽवशिष्टः येन कल्पान्तेन एतत्कथं घटते ? इत्येकः प्रश्नः ॥ २ ॥

प्रकृतमप्युत्सृज्य तेन घटत इत्याह—स वा इति । यतो भार्गवर्षभः कोऽपि प्राकृतिको नैमित्तिको वा ॥ ३ ॥

अत्यद्भुतमघटितमेवेत्याह—एक एवेति । तोकं बालकम् ॥ ४ ॥

कौतूहलमौत्सुक्यम् तं संशयं न केवलं त्वं महायोगी किन्तु पुराणेष्वपि ज्ञातृत्वेन सम्मतः ॥ ५ ॥

प्रश्नमभिनन्दति, हे महर्षे ! अयं प्रश्नः तत्र हेतुः नारायणेति यत्र प्रश्नविषये ॥ ६ ॥

तत्र मार्कण्डेयस्तपसा भगवन्तमाराध्य मायाप्रदर्शनं वव्रे ततश्च तेनैव भगवन्मायया सप्तकल्पा दृष्टाः मार्कण्डेयायुष्यं वक्तुमादित आरभ्य तस्य चरितमाह—प्राप्त इत्यादिना । मार्कण्डेयो मृत्युं जिग्ये इति पूर्वप्रश्नश्लोकेनान्वयः । मध्यमग्रन्थेन तस्य धर्मः कथ्यते प्राप्तो द्विजातिसंस्कार उपनयनाख्यो येन सः पितुः सकाशाद्धर्माध्यानाधिकमात् छन्दांसि वेदान् ॥ ७ ॥

---

* अर्भकम् इति वीर० पा० । [१] जातः कौतूहलमिति विज० पा० । (२) लोकमलापहः इति वीर० पा० ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

बृहद्व्रतधरो नैष्ठिको ब्रह्मचारी सन् ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मार्कण्डेयस्य एतत्कल्पप्रसूतत्वे शास्त्रान्तरे परिहारो द्रष्टव्यः एतत्कल्पप्रसूतो मार्कण्डेयोऽन्यो वा इत्याविरोधः उर्वरितः आपदो निर्मुक्तः ॥ १—१५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

पुराणगणनायां मार्कण्डेयपुराणमित्युक्तं तत्र तत्पुराणकर्तुः मार्कण्डेयस्य मुनेश्चरितं बुभुत्सुस्तत्कथनाय सूतं स्तौति शौनकः—सूतेति । हे सूत ! हे साधो ! हे वदतांवर ! चिरञ्जीव नोऽस्मभ्यं वद बहुव्यच्छुश्रूषितं तद्वदेत्यर्थः । यतस्त्वमपारे तमसि अज्ञाने तत्कार्ये संसारे वा भ्रमतां जनानां नृणां तत्पारं दर्शयतीति तथाभूतस्त्वमेवातो वदेत्यर्थः ॥ १ ॥

किं तच्छुश्रूषितमित्यत्राह—प्राहुरिति । चिरायुषमेव दर्शयितुं विशिनष्टि—यः कल्पान्तेऽप्युर्वरितः अवशिष्टः येन भगवतेदं जगद्ग्रस्तं तं च ददर्शेति शेषः । यद्वा, येनेदं जगत्कल्पान्ते ग्रस्तं तेनोर्वरितो ऽवशेषितो य इति सम्बन्धः । मार्कण्डेयस्य एतत्कल्पप्रसूतत्वे शास्त्रान्तरविरोधपरिहारो द्रष्टव्यः एतत्कल्पप्रसूतो मार्कण्डेयोऽन्यो वास्त्वाहित्यविरोधः ॥ २ ॥

तत्र आत्मनः संशयमुद्घाटयति—स वा इति । हे भार्गवर्षभ स वै मार्कण्डेयः अस्मिन्नेव कल्पे (स्व)अस्मत्कुलोत्पन्नः ततः किमत आह, नैवेति । अधुनापि भूतानां सम्प्लवः प्रलयः कोपि नैव जायते अस्मिन्नेव कल्पे जातः कथमसञ्जातं सम्प्लवमद्राक्षीदिति संशय इत्यर्थः ॥ ३ ॥

उर्वरितमेव प्रपञ्चयति—एक एवेति । अर्णवे प्रलयार्णवे भ्राम्यन् वटपत्रस्य पुटे तल्पे शयानं शोकम् अर्भकं बालकं पुरुषं ददर्श बालस्याल्पत्वसूचनाय तोकमित्युक्तमतो न पौनरुक्त्यम् ॥ ४ ॥

इत्थं संशयमाविष्कृत्य तन्निरासाय चोदयाति—एष इति । एषः "स वा अस्मत्कुलोत्पन्नः" इत्यादिनोक्तः यतः संशयान्महत्कौतूहलं तद्वृत्तान्तश्रवणौत्सुक्यं भवति ततोऽस्माकं संशयं छिन्धि न केवलं त्वं योगी किन्तु पुराणेष्वपि ज्ञातृत्वेन सम्मतः ॥ ५ ॥

इत्थमापृष्टस्तच्चरित्रं विस्तरतो विवक्षुस्तानत्प्रश्नमभिनन्दति, सूतः—प्रश्न इति । हे महर्षे ! त्वया कृतोऽयं प्रश्नः लोकस्य मलमपहन्तीति तथा तत्र हेतुः यत्र यत्प्रश्नोत्तरे कलिमलं कलियुगप्रयुक्तं मलमपहन्तीति तथाभूता नारायणकथा गीता भविष्यति ॥ ६ ॥

आदितस्तच्चरित्रं वर्णयति—प्राप्तेत्यादिना यावदध्यायसमाप्ति । मार्कण्डेयो मृत्युं विजिग्ये इति पञ्चमेनान्वयः क्रमाद्गर्भाधानादि संस्कारक्रमात्प्राप्तः द्विजातिसंस्कारः उपनयनसंस्कारो येन सः धर्मेण शास्त्रोक्तविधिना छन्दांसि वेदानधीत्य तपसा स्ववर्णाश्रमोचितेन स्वाध्यायेन वेदेन च संयुक्तः ॥ ७ ॥

बृहद्व्रतधरः नैष्ठिकब्रह्मचर्यव्रतधरः नियमवत्सु नियमवत्सु

अथर्ववत्सु मृगेषु सदैव कमण्डल्वादिकं बिभ्राणः सन्ध्ययोस्सायम्प्रातः सन्ध्ययोरग्न्यादिषु हरिमर्चयन् तत्रात्मा अहरहर्गुरुं भैक्षमाहृत्य तेनानुज्ञातश्चेत्तर्हि बुभुजे सकृदेकवारं नो चेदननुज्ञातश्चेदुपोषितो भवति ॥ ८—१० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अस्मिन्नध्याये मार्कण्डेयकथाव्याजेन हरेर्निरतिशयमाहात्म्यं सूते पुराणविभागप्रसङ्गेन पुराणकर्तुर्मार्कण्डेयस्य चरितं तत्र शौनकः सूतं पृच्छति—सूतेति । यद् भगवत्कथायोनिर्ना कथामिति शेषः ॥ १ ॥

येन कल्पान्तेन इदं जगद्ग्रस्तं तस्मिन् कल्पान्तेऽप्युर्वरितः अवशिष्टः ॥ २ ॥

अस्मत्कुलसम्बन्धित्वात्तच्चरितमवश्यं श्रवणार्हमित्याशयवानाह—स वा इति । तस्य भूतानां मध्ये कोपि सम्प्लवो, यथा न जायते तद्वदे अद्य पञ्चभूतानां कोपि सम्प्लवो नाद्य इति वा ॥ ३ ॥

तस्यामवस्थायां प्रलय इत्यार्णवे पुरुषं ददर्श किलेति वा ॥ ४ ॥

यतः संशयान्महाकौतूहलविषयोऽयं मम संशयच्छेदनं कथमुपपद्यत इति तत्राह—पुराणेष्विति । ज्ञातृत्वेन सम्मतां भवानिति ॥ ५ ॥

मार्कण्डेयकथाया लोकाज्ञाननिवारणसामर्थ्यं कुतः ? इत्यत्राह, नारायणेति । यत्र मार्कण्डेयकथायां तत्कथाविषयः प्रश्नः ॥ ६ ॥

पितुर्मृकण्डोः प्राप्तद्विजातिसंस्कारः अन्नप्राशनोपनयनान्तब्राह्मणसंस्कारान्प्राप्तः ॥ ७ ॥

बृहद्व्रतधरः ब्रह्मचारिव्रतधरः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः

तदेवं नानाप्रमाणानां कथामयं पुराणमिदं समाप्यमानं वितत्य तत्र निजकुलावतंसतादृशमार्कण्डेयकथामप्रस्तुतां प्रस्तावयति—सूतजीवेत्यादिना ॥ १ ॥

कल्पस्यान्ते उर्वरितः अवशिष्टत्वेन दृष्टः ॥ २ ॥

कल्पान्तत्वं न घटत इत्याह—स वा इति । कथमस्मिन्नेव कल्प इति ज्ञायते तत्राह—नैवेति । कल्पान्ते सम्प्लवस्यावश्यं भावित्वाच्छ्रुतपरम्पराया अविच्छेदेन सम्प्रति प्राप्तत्वादिति भावः ॥ ३ ॥

कल्पान्ते उर्वरितत्वे किं प्रमाणं तत्राह—एक एवार्णव इति । किल प्रसिद्धौ ॥ ४—५ ॥

इह खलु कल्पे मन्वन्तरावयवेषु कल्पान्ते सम्प्लवश्च तदन्ते प्रलयागमेव यस्तु एक एवार्णवे भ्राम्यन्नित्यादि भवता पृष्टं तत्खलु मायिकमेव सप्तानामपि कल्पानां मायिकत्वे तु स्वप्नमात्रत्वेन सम्भवाच्चिरञ्जीवित्वविघातः इत्यादिपुत्तरयितुमाह—प्रश्न इति ॥ ६ ॥

प्राप्तेति पञ्चकम् ॥ ७—११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अष्टमेऽत्र तपोमज्जाशक्तिः स्वर्वाविर्भाव्यते ।
मार्कण्डेयस्य तेनाऽथ नरनारायणस्तुतिः ॥

मार्कण्डेयं सखामर्गामिति मार्कण्डेयपुराणकर्त्तृत्वेन ख्याति

कृष्णाजिनं साक्षसूत्रं कुशांश्च [1]नियमर्द्धये ।
अग्न्यर्कगुरुविप्रात्मस्वर्चयन् सन्ध्ययोर्हरिम् ॥ ९ ॥
सायम्प्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः ।
बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥ १० ॥
एवं तपःस्वाध्यायपरो वर्षाणामयुतायुतम् ।
आराधयन् हृषीकेशं जिग्ये मृत्युं सुदुर्जयम् ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

पद्यमाकस्य मार्कण्डेयस्य चरितं प्रष्टुमाह—सूतेति । तमसि संसारे ॥ १ ॥

उर्वरितः अवशिष्टः येन कल्पान्तेन ॥ २ ॥

स कल्पान्ते उर्वरित इति प्रसिद्धिः किन्तु अधुनापि सम्प्लवः प्रलयो नास्तीति संशयः ॥ ३ ॥

अन्यदप्यघटितमाह—एक एवेति ॥ ४ ॥

यतः संशयादेव कौतूहलं कौतुकं तम संशयं छिन्धि न केवलं त्वं महायोगी किन्तु पुराणेष्वपि ज्ञातृत्वेन सम्मतः ॥ ५-१२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मार्कण्डेयं सर्वामनामिति मार्कण्डेयपुराणाख्यातश्रवणेन स्वकुलोत्पन्नत्वेन च तच्चरितश्रवणे जातश्रद्धः शौनकस्तच्चरितं पृच्छति—सूतेति । नोऽस्मभ्यं वद ॥ १ ॥

पृष्टव्यमेवाह—आयुरिति । येन कल्पान्तेन इदं जगत् ग्रस्तं तस्मिन् कल्पान्ते यः उर्वरितः एतत् कथं घटते इत्येकः संशयः ॥ २ ॥

स अस्मिन् कल्पे ऽस्मत्कुले भृगुवंशे उत्पन्नः सर्वत्वस्तु अस्मिन् कल्पे कोपि प्राकृतिको नैमित्तिको वा नैवातः कथं प्राप्तं सम्प्लवमद्राक्षीदिति द्वितीयः संशयः उत्पत्तिस्तु भृगुपुत्रो धाता तत्पुत्रो मृकण्डुस्तत्पुत्रो मार्कण्डेयः तथा भृगुपुत्रश्च्यवनस्तत्पुत्रः प्रमतिस्ततो रुरुशुनकादिक्रमेण शौनक इति ॥ ३ ॥

अत्यद्भुतमाश्चर्यमद्राक्षीदित्याह—एक एवेति । यतः संशयतः कौतूहलमौत्सुक्यं तत्संशयं छिन्धि ॥ ४—५ ॥

तस्यार्थिनेन भगवता स्वयोगमायां तस्मै दर्शयता प्रलयः प्रकाशितस्ततो रक्षितश्च शिववरेण अजरामरत्वादिकं च तस्य जातमित्युत्तरं विवक्षुः प्रश्नमभिनन्दति—प्रश्न इति । तत्र तु का कथा लोकानामन्येषां भ्रममपहन्तीति स तथा प्रश्नः कृतः किञ्च यत्र प्रश्नविषये कलिमलापहा नारायणकथा गीता भविष्यतीति शेषः ॥ ६ ॥

तच्चरितमाह—प्राप्तद्विजातिसंस्कार इत्यादिना । मार्कण्डेयः मृत्युं जिग्ये इति पञ्चानां सम्बन्धः ॥ ७ ॥

बृहद्व्रतधरो नैष्ठिकब्रह्मचारी ॥ ८ ॥

भाषा टीका ।

ॐ नरनारायणात्मकाय नमः ।

शौनक उवाच

शौनक ऋषिबोले, कि—हे सूतजी ! हे साधो ? आप बहुत काल पर्यन्त जिओ, हे कहने वालों में श्रेष्ठ ! आपजो हम पूछें सो कहो । क्योंकि ? इस अपार अज्ञान रूप अन्धकारमें भ्रमने वाले मनुष्यों को तुमही पार दिखाने वाले हो ॥ १ ॥

मनुष्य, मृकण्ड के पुत्र मार्कण्डेय को बड़े चिरायु कहते हैं जो प्रलय इस जगत् को ग्रस लेता है उस प्रलय के अन्त में भी वो अवशिष्ट रहते हैं । प्रलय में उनका नाश नहीं होता है, यह बातभी कैसे घटती है ॥ २ ॥

वह भार्गव श्रेष्ठ मार्कण्डेय इस कल्प में हमारे कुल में उत्पन्न हुएहैं । और भूत प्राणियोंके मध्य में उनका अबभी किसी प्रकार का नैमित्तिक वा प्राकृतिक प्रलय नहीं होता है ॥ ३ ॥

जो मार्कण्डेय समुद्र में एकही भ्रमते हुए, वटपत्रके पुटमें शयन किये हुए परमपुरुष को एक अद्भुतबालक रूप में देखते हुए ॥ ४ ॥

हे सूत जी ! यह हमको बड़ा संशय है, जिस संशय से यह कौतूहल होरहा है । हे महा योगिन् ! आप हमारे इस संशय को दूरकरो, क्योंकि—आप केवल योगी ही नहीं किन्तु पुराणोंके भी एकही ज्ञाता हो ॥ ५ ॥

सूत उवाच

सूतजी बोले, कि—हे महर्षे ! यह प्रश्न तुमने लोकों के भ्रम को दूर करने वाला किया है । क्योंकि ? जिसमें कलिमल को दूर करने वाली नारायण की कथा गाई गई है ॥ ६ ॥

मार्कण्डेय क्रम से अपने पिता से द्विजातियों के उचित संस्कार को प्राप्त होकर, धर्म से वेदों का अध्ययन कर, तप और स्वाध्याय संयुक्त हुए ॥ ७ ॥

नैष्ठिक ब्रह्मचारी होकर शान्त स्वरूप जटाओं को धारण किये वल्कलाम्बरों को पहने, दंड कमण्डलु और मेखला सहित उपवीत को धारण किये ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नियमर्द्धये धर्मवृद्ध्यै अग्न्यादिषु पञ्चसु हरिमर्चयन् ॥ ९ ॥

---

[1] नियमैधुत इति विज० पा०

ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च येऽपरे ।
नृदेवपितृभूतानि तेनासन्नतिविस्मिताः ॥ १२ ॥
इत्थं बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः ।
दध्यावधोक्षजं(१) योगी ध्वस्तक्लेशान्तरात्मना ॥ १३ ॥
तस्यैवं युञ्जतश्चित्तं महायोगेन योगिनः ।
व्यतीयाय महान् कालो मन्वन्तरषडात्मकः ॥ १४ ॥
एतत्पुरन्दरो ज्ञात्वा सप्तमेऽस्मिन् किलान्तरे ।
तपोविशङ्कितो ब्रह्मन्नारेभे तद्विघातनम् ॥ १५ ॥
गन्धर्वाप्सरसः कामं वसन्तमलयानिलौ ।
मुनये प्रेषयामास (२)रजस्तोकमदौ तथा ॥ १६ ॥

श्रीमच्छ्रीधरस्वामिकृतभावार्थदीपिका ।

भैक्ष्यं गुर्वर्थमाहृत्य तेनानुज्ञातश्चेत्तर्हि बुभुजे नोचेत्सकृत्कदाचिदुपोषितो भवति ॥ १०—११ ॥

तेन मृत्युजयेन ॥ १२ ॥

ध्वस्ताः क्लेशा रागादयो यस्य तेनान्तरात्मना प्रत्याहृतमनसा ॥ १३—१४ ॥

तस्य तपोनिष्ठामितिहासेन वर्णयति—एतदित्यादिना । अस्मिन् सप्तमे मन्वन्तरे तपसा मत्पदं ग्रहीष्यतीति विशङ्कितः ॥ १५ ॥

मुनये मुनिं धर्षयितुम् रजस्तोकमतिप्रियमपत्यं लोभो मदश्च तौ ॥ १६—१७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

रजस्तोक इति कस्यचिन्नाम ॥ १९—२९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिति सुदुर्जयं सुतरां दुःखेनापि जेतुमशक्यं मृत्युं जिग्ये जितवानित्यर्थः ॥ ११—१२ ॥

इत्थमिति । योगेन ध्वस्ताः क्लेशाः रागादयो यस्य तेनान्तरात्मना प्रत्याहृतेन मनसाऽधोक्षजं दध्यौ ध्यातवान् ॥ १३ ॥

तस्येति । युञ्जतः समादधतः सतः महान्भूयान् तदेवाह मन्वन्तरषडात्मकः व्यतीयाय व्यतिक्रान्तोऽभूत् ॥ १४ ॥

तस्य तपोनिष्ठाद्रार्ढ्यम् इतिहासेन वर्णयति—एतदित्यादिना । पुरन्दर इन्द्रः एतत्तपश्चर्यां ज्ञात्वा सप्तमेऽस्मिन्मन्वन्तरे वैवस्वत मन्वन्तरे हे ब्रह्मन् तपसा विशङ्कितः किं वायं मत्पदं जिघृक्षेदिति संशयं प्राप्तः तद्विघातनं तपोविघातमारब्धवान् ॥ १५ ॥

गन्धर्वांश्चाप्सरसश्च ताः मुनये मुनिं धर्षयितुं गन्धर्वादीन् प्रेषयामास स्वयं रजस्तोकमदौ रजस्तोको लोभस्तस्य रजोगुणप्रभवत्वात्तं च मदं च तौ च प्रेषयामास ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

हरिं स्मरन्निति शेषः ॥ ९ ॥

नोचेदनुज्ञाभावे ॥ १०—११ ॥

तेन कर्मणा ॥ १२ ॥

मनोयोगादन्तरात्मनान्तर्यामिणा ध्वस्तक्लेशः ॥ १३—१४ ॥

अस्मिन् सप्तमे मन्वन्तरे तपसो विशङ्कितस्तद्विघातनं तस्य तपसो विघ्नम् ॥ १५ ॥

रजोगुणं लोभमदौ स्वधर्मकर्मदर्पौ च अत्र कामादयः मूर्तिमन्तो निर्दिश्यन्ते ॥ १६—१७—१८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सायं प्रातरिति समावर्तनात् पूर्वावस्थायामेव ज्ञेयं वर्षाणामयुतायुतमिति कल्पाभिप्रायेण कल्पजीवित्वात् यावज्जीवमेवाराधयतस्तस्य मृत्युर्न छिद्रं प्रापेत्यर्थः । तस्यैवं युञ्जत इति वक्ष्यमाणपद्यद्वयात् ॥ १०—२० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ध्वस्ताः क्लेशा रागादयो यस्य तेन अन्तरात्मना मनसा ॥ १३ ॥ १४ ॥

तपसा तत्पदं ग्रहीष्यतीति विशङ्कितः ॥ १५ ॥

रजस्तोकमपत्यं लोभश्च मदश्च तौ ॥ १६–२० ॥

---

(१) योगादिति । (२) रजस्तोममदा विति च विज० पा० ।

ते वै तदाश्रमं जग्मुर्हिमाद्रेः पार्श्व उत्तरे ।
पुष्पभद्रा नदी यत्र चित्राख्या च शिला विभो ! ॥ १७ ॥
तदाश्रमपदं पुण्यं पुण्यद्रुमलताऽञ्चितम् ।
पुण्यद्विजकुलाकीर्णं पुण्यामलजलाशयम् ॥ १८ ॥
मत्तभ्रमरसङ्गीतं मत्तकोकिलकूजितम् ।
मत्तबर्हिनटाटोपं मत्तद्विजकुलाकुलम् ॥ १९ ॥
वायुः प्रविष्ट आदाय हिमनिर्झरशीकरान् ।
सुमनोभिः परिष्वक्तो ववावुत्तम्भयन् स्मरम् ॥ २० ॥
उद्यच्चन्द्रनिशावक्त्रः प्रवालस्तबकादिभिः ।
(१)गोपद्रुमलताजालैस्तत्राऽऽसीत्कुसुमाकरः ॥ २१ ॥
अन्वीयमानो गन्धर्वैर्गीतवादित्रयूथकैः ।
अदृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मरः ॥ २२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

निवसन्नेव धर्मवृद्धये अग्न्यादिषु हरिमर्चयन् ॥ ९ ॥

सायं प्रातश्च भैक्ष्यं गुरवे गुर्वर्थमाहृत्य गुर्वनुज्ञातश्चेत्तर्हि बुभुजे सकृदेकदा नो चेदनुज्ञातस्तदोपोषितो भवति ॥ १० ॥

एवमिति । इत्थं तपःस्वाध्यायप्रधानः सुदुर्जयमपि मृत्युं जिग्ये जितवान् ॥ ११ ॥

तेन मृत्युजयेन ॥ १२ ॥

ध्वस्ताः क्लेशा यस्य तेनान्तरात्मना निर्जितेनान्तःकरणेन ॥१३॥

व्यतीयाय व्यतिक्रान्तः ॥ १३ ॥ १४ ॥

तपसा महीयं पदं ग्रहीष्यतीत्येवं विशङ्कितः भीतस्तद्विघातनं तपसो विघ्नमारेभे आरब्धवान् ॥ १५ ॥

रजस्तोकमपत्यं लोभः स च मदश्च तौ ॥ १६ ॥ १७ ॥

भाषा टीका ।

और धर्म की वृद्धि के लिये काले मृगचर्म को लिये पलाश माला धारण किये, कुश मुष्टि हस्त में लिये, दोनों सन्ध्याओं में अग्नि सूर्य गुरु विप्र और आत्मा में श्रीहरि का पूजन करते हुए ॥ ९ ॥

सायंकाल और प्रातःकाल मौन धारणकर ग्राम से भिक्षा लाकर गुरु को निवेदन करते रहे, और गुरु की आज्ञा से एकबार भोजन करते थे, यदि गुरु आज्ञा न दें तो उपवास करके रहते थे ॥ १० ॥

इस प्रकार तप, और स्वाध्यायपरायण होकर लाखों वर्ष तक श्रीहृषीकेश भगवान् का आराधन करते हुए दुर्जय मृत्यु को मार्कण्डेय जी जीत गये ॥ ११ ॥

ब्रह्मा जी भृगु महादेवजी दक्षप्रजापति तथा और सब ब्रह्मा जी के पुत्र एवं नरदेव पितृलोग और समस्त भूत प्राणि उस मृत्यु के जीतने से बड़े विस्मय को प्राप्त होते हुए ॥ १२ ॥

इस प्रकार नैष्ठिक ब्रह्मचर्य व्रत को धारणकर तप स्वाध्याय और संयमों से वह योगी मार्कण्डेय मुनि नष्ट क्लेश वाले अन्तःकरण से अधोक्षज श्रीनारायण का ध्यान करते हुए ॥ १३ ॥

इस तरह उन योगी मार्कण्डेय को महायोग करके श्रीहरि में चित्त लगाते २ इतना भारी काल बीत गया, कि जिसमें छै मन्वन्तर बीत चुके ॥ १४ ॥

तब इस सातवें मन्वन्तर में इन्द्रने इस बात को जान कर उन मार्कण्डेय के तप से बड़ी शंका करी । हे ब्रह्मन् ! और उनके तपके विघात करने का आरंभ किया ॥ १५ ॥

तब उसी समय इन्द्रने गंधर्व, अप्सरा, कामदेव वसंत-ऋतु, मलयानिल, लोभ, और मद इन सबों को मुनि के समीप भेजे ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदाश्रमपदं प्रविष्टो वायुर्ववाविति तृतीयेनान्वयः । पुण्यैर्द्रुमैर्लताभिश्चाञ्चितं पूजितम् पुण्यद्विजानां मृगीणां कुलैराकीर्णम् पुण्या अमला जलाशया यस्मिन् ॥ १८ ॥

मत्तभ्रमराणां सङ्गीतं यस्मिन् मत्तकोकिलानां कूजितं यस्मिन् मत्ता बर्हिण एव नटास्तेषामाटोपो नृत्यसंभ्रमो यस्मिन् मत्तानां द्विजानां पक्षिणां कुलैराकुलं व्याप्तम् ॥ १९ ॥

(१) गावद्रुमेत्यादि विज० पा० ।

हुत्वाऽग्निं समुपासीनं ददृशुः शक्रकिङ्कराः ।
मीलिताक्षं दुराधर्षं मूर्तिमन्तमिवानलम् ॥ २३ ॥
ननृतुस्तस्य पुरतः स्त्रियोऽथो गायका जगुः ।
मृदङ्गवीणापणवैर्वाद्यं चक्रुर्मनोरमम् ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एवम्भूतं तदाश्रमपदं प्रविष्टः सन् वायुर्मलयानिलो ववौ प्रससार उत्तम्भयन्नुद्दीपयन् तत्र वृक्षेषु प्रवेशात्मांद्यं हिमनिर्झरकणानामादानाच्छैत्यं पुष्पपरिष्वङ्गात्सौगन्ध्यं चोक्तम् ॥२०॥

किञ्च, उद्यंश्चन्द्रो यस्मिंस्तन्निशाचक्रं रजनीमुखं यस्मिन्सः प्रवालस्तबकानामालयः आश्रयो येषु तैः गुल्मन्ति विटपैः संश्लिष्यन्तीति गोपाः द्रुमा लताश्च तेषां जालैः समूहैरुपलक्षित आविर्बभूव ॥ २१ ॥

किञ्च, तदा गीतवादित्रयूथकैर्गायकादिसमुदायैर्गन्धर्वैरन्वीयमानः तथा स्वःस्त्रियोऽप्सरसस्तासां यूथस्य पतिः मात्तं चापमिषुञ्च येन सस्मरश्च तत्राऽदृश्यत ॥ २२ ॥

दुराधर्षमभिभवितुमशक्यम् ॥ २३—२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ते वा इति । गन्धर्वादयः हिमाचलस्योत्तरे पार्श्वे तत्रापि यत्र पुष्पभद्रा नाम नदी तत्रापि यत्र च चित्राख्या शिला तत्र महाश्रमं मार्कण्डेयाश्रमं जग्मुः हे विभो ! इति सम्बोधनम् ॥ १७ ॥

तस्येति । तस्य मार्कण्डेयस्याश्रमपदं प्रविष्टो वायुर्ववाविति तृतीयेनान्वयः । आश्रमपदं विशिनष्टि—पुण्यं पुण्यावहं पुण्यैर्द्रुमैर्लताभिश्चाञ्चितं पूजितम् आकुलमिति पाठान्तरं पुण्यानां द्विजानामृषीणां कुलैः समूहैराकीर्णं पुण्या अमलाश्च जलाशया यस्मिंस्तत् ॥ १८ ॥

मधुपानमत्तानां भ्रमराणां सङ्गीतं यस्मिन् मत्तकोकिलानां कूजितं यस्मिन् मत्ता बर्हिणो मयूरा एव नटास्तेषामाटोपः सम्भ्रमो यस्मिन् मत्तानां द्विजानां पक्षिणां कुलैः आकुलं व्याप्तम् ॥ १९ ॥

इत्थम्भूतं तदाश्रमपदं मलयानिलः शीतलगिरिनदीशीकरानादाय सुमनोभिः कुसुमैः परिष्वक्तः स्मरं काममुत्तम्भयन्नुद्दीपयन् ववौ प्रससार एवं मलयानिलस्य व्यापार उक्तः ॥ २० ॥

अथ वसन्तस्य तमाह-उद्यदिति । उद्यंश्चन्द्रो यस्मिंस्तन्निशाचक्रं रजनीमुखं यस्मिन् प्रवालानां पल्लवानां स्तबकानां गुच्छानां चालयः आश्रयो येषु तैः गोपद्रुमलताजालैः गुल्मन्ते विटपैः संश्लिष्यन्ते इति गोपाः द्रुमाः लताश्चेति तेषां जालैः समूहैरुपलक्षितः कुसुमाकरो वसन्तः तत्र प्रादुर्बभूव ॥ २१ ॥

अथ कामस्य तमाह—अन्वीयमान इति । गीतवादित्राणां मृदङ्गादीनां यूथं येषामस्तीति तथा तैः गन्धर्वीबहुन् गन्धर्वैरन्वीयमानः पुज्यमानः गृहीतधनुर्बाणः स्वर्गस्त्रीणाम् अप्सरसां यूथस्य पतिः स्मरः काम अदृश्यताऽदृश्यत ॥ २२ ॥

हुत्वेति । उपासीनं तं मार्कण्डेयं मूर्तिमन्तं पुंविग्रहधारिणम् अनलमिव स्थितं ददृशुः ॥ २३ ॥

ननृतुरिति तस्य मार्कण्डेयस्य अग्रे अथ वाद्यं स्तुतिसूचकं ध्वनिं चक्रुः ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आटोपं सविलासनृत्यम् ॥ १९ ॥

उत्तम्भयन्वर्धयन् ॥ २० ॥

उद्यंश्चन्द्रो यस्य स तथा स च निशावक्त्रः प्रदोषो यस्य स तथा कुसुमाकरः वसन्तः प्रवालस्तबकालिभिः भृङ्गैर्गोपद्रुमलतामुकुलैः सहासीदाविरिति शेषः ॥ २१ ॥

आत्तचापेषुर्धनुर्ज्यासहितबाणः स्वःस्त्रीयूथपतिः स्वर्गस्त्रीगणनाथः ॥ २२ ॥

अग्निं हुत्वोपासीनमग्निसमीपे तिष्ठन्तं दुराधर्षं चलितेन्द्रियं कर्तुमशक्यम् ॥ २३—२५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उद्यदिति । गां पृथ्वीं फलपुष्पादिभिः पान्तीति गोपाः सर्वसन्तर्पका ये द्रुमा इत्यर्थः ॥ २१—२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

उद्यंश्चन्द्रो यस्मिंस्तादृशं निशावक्त्रं निशामुखं यस्मिन् सः प्रवालानां स्तबकानामालयो यत्र तैः गाः किरणान् पान्ति रक्षन्ति ये द्रुमा लताश्च तेषां जालैः सह कुसुमाकरो वसन्तः॥२१॥

गीतवादित्रयूथकैः गीतवादित्रयूथवद्भिः अदृश्यत मुनिमनांसि स्वयमेव किञ्चिदप्यभूयतेति व्यक्तरूपत्वेनेति प्रवोध्यादिभिरिति चर्वितोपीत्यग्निमवाक्यादवगम्यते मत्पर्यीवद्भ्य ॥ २२ ॥

समुपासीनं मुनिम ॥ २३—२४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तदाश्रमपदं प्रविष्टो वायुर्ववौ इति तृतीयेन सम्बन्धः पुण्यैर्द्रुमैर्लताभिश्च अञ्चितं पूजितम् ॥ १८ ॥

मत्ता बर्हिण एव नटाः तेषामाटोपः सम्भ्रमो यत्र ॥ १९ ॥२०॥

उद्यच्चन्द्रो यस्मिन् तादृक् निशामुखं यस्मिन् स प्रवालानां पल्लवानां स्तबकानां गुच्छानामालयाः येषु तैः गाः भ्रमरादिवाणीरूपाः प्रतिध्वनिरूपाश्च पान्तीति गोपाः द्रुमाः लताश्च तेषां आलैः समूहैरुपलक्षितः कुसुमाकरो वसन्तः प्रासीदाविर्बभूव ॥ २१ ॥

सन्दधेऽस्त्रं स्वधनुषि कामः पञ्चमुखे तदा ।
(१)मधुर्मनो रजस्तोक इन्द्रभृत्या व्यकम्पयन् ॥ २५ ॥
क्रीडन्त्याः पुञ्जिकस्थल्याः कन्दुकैस्तनगौरवात् ।
भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः ॥ २६ ॥
इतस्ततो भ्रमद्दृष्टेश्चलन्त्या अनुकन्दुकम् ।
वायुर्जहार तद्वासः सूक्ष्मं त्रुटितमेखलम् ॥ २७ ॥
विससर्ज (२)तदा बाणं मत्वा तं स्वजितं स्मरः ।
सर्वं तत्राऽभवन्मोघमनीशस्य यथोद्यमः ॥ २८ ॥
त इत्थमपकुर्वन्तो मुनेस्तत्तेजसा मुने ! ।
दह्यमाना निववृतुः प्रबोध्याहिमिवार्भकाः ॥ २९ ॥
इतीन्द्रानुचरैर्ब्रह्मन् धर्षितोऽपि महामुनिः ।
यन्नागादहमो भावं न तच्चित्रं महत्सु हि ॥ ३० ॥
दृष्ट्वा निस्तेजसं कामं सगणं भगवान् स्वराट् ।
श्रुत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परम् ॥ ३१ ॥
तस्यैवं युञ्जतश्चित्तं तपः स्वाध्यायसंयमैः ।
अनुग्रहायाऽऽविरासीन्नरनारायणो हरिः ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

गीतवादित्रयूथकैः गीतवादित्रसमूहवद्भिः ॥ २२—३४ ॥

भाषा टीका ।

इन्द्रके भेजे हुए वे सब हिमाद्रिके उत्तर तरफ जहां पुष्पभद्रा नदी और चित्रशिला नामक शिला है, उस जगह मार्कण्डेयके आश्रम को जाते हुए ॥ १७ ॥

महर्षि मार्कण्डेय का वह आश्रम बड़ा रमणीय, और रमणीय लताओं से सुशोभित हो रहा, रमणीय पक्षि समूहों से व्याप्त और रमणीय निर्मल जलाशय जिसमें भरे हुए हैं ॥ १८ ॥

मत्त भ्रमर जिसमें गान कर रहे हैं, मत्त कोकिल जहां पञ्चम स्वरसे कूज रहे हैं, मत्त मयूर जहां नृत्य कर रहे हैं इस प्रकार मत्त पक्षियों के समुदायों से वह आश्रम कूज रहा है ॥ १९ ॥

जिस जगह हिमके झिरनाओं के छोटे२ जलकणों को लेकर पुष्पों से आलिंगन करता हुआ वायु आकर काम का उद्दीपन करता हुआ बह रहा है ॥ २० ॥

इस प्रकार के उस आश्रम में रात्रि के आरम्भ समय की शोभा देखो तो चन्द्रमा की चांदिनी न्यारी खिल रही है बड़े छोटे वृक्षों की शाखा परस्पर आलिङ्गन कर रहीं हैं उन वृक्ष और लताओं के जालों के साथ अर्थात् लताओं के समूहों सहित वसन्त ऋतु वहां प्रकट होता हुआ ॥ २१ ॥

तथा उसी समय पर गाने बजानेवालों के यूथों सहित गन्धर्व लोग जिसके साथ में ऐसा अप्सराओं का यूथपति कामदेव हाथ में धनुष बाण लिये हुए देख पड़ता भया ॥ २२ ॥

इस प्रकार इन्द्र के किंकरों ने वहां जाकर मार्कण्डेय जी को देखा, कि—वे मुनि अग्नि में हवन करके नेत्र बन्द कर श्रीहरि की उपासना कर रहे हैं । और देखने में बड़े दुर्धर्ष मानो मूर्त्तिमान् अग्नि बैठा हो ऐसे देख पड़ते हैं ॥ २३ ॥

उन मुनि के आगे जाकर अप्सरा लोग नृत्य करने लगीं, और गायक गन्धर्व लोग गान करने लगे । बाजे बजानेवाले मृदंग वीणा पणव इत्यादि बाजों को बहुत ही मनोहर बजाने लगे ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

शोषणदीपनसन्मोहनतापनोन्मादनाख्यानि पञ्चमुखानि यस्य तद्स्त्रं सन्दधे तदैव मधुर्वसन्तः रजस्तोकस्य पुत्रस्तमोधेय अस्य चेन्द्रभृत्याश्चास्य मनो व्यकम्पयन् ॥ २५—२६ ॥

किञ्च, वायुर्मलयानिलः पुञ्जिकस्थल्याः सूक्ष्मं वासो जहार ॥ २७ ॥

(१) मधुर्मनोरजस्तोक इति (२) तत इति च विज० पा० ।

श्रीधरस्वामिकृतभावार्थदीपिका।

सर्वं तेषां कर्म तत्र तस्मिन् मोघं व्यर्थं - अनीशस्य निर्दैवस्य ॥ २८ ॥

मुनेरपकुर्वन्तः प्रतिकूलमाचरन्तः हे मुने ! ॥ २९ ॥

अहमोऽहङ्कारस्य भावं विकारम् ॥ ३० ॥

निस्तेजसं म्लानवदनं स्वराडिन्द्रः ॥ ३१ ॥

नरनारायणरूपो हरिः ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

अहमो भावं अहङ्कारं रागात् न प्राप्तः ॥ ३०—३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

सन्दध इति। पञ्चारविन्दादीनि मुखानि यस्य तदस्त्रं स्वे धनुषि सन्दधे मधुर्वसन्तः रजस्तोको लोभो मदश्चेति एते इन्द्रभृत्याः व्यकम्पयन् क्षोभमकुर्वन् ॥ २५ ॥

क्रीडन्त्या इति पुञ्जिकस्थलीनामाप्सराः तस्याः कन्दुकैः क्रीडन्त्याः स्तनभाराक्रान्तमुद्रिप्तमध्याया: लम्बमध्यायाः केशेभ्यो विस्रंसिता स्रग्यस्यास्तस्याः ॥ २६ ॥

कन्दुकमनुसृत्य इतस्ततो भ्रमन्त्यो दृष्टी यस्याश्चलन्त्याः अतएव त्रुटिता मेखला यस्मिन् तत्सूक्ष्मं वासो वस्त्रं वायुर्जहार ॥ २७ ॥

विससर्जेति। तदा पुञ्जिकस्थलया: नग्नतावस्थायां तत्र तस्मिन् मुनौ सर्वमेतत्कृत्यं मोघं व्यर्थमभवत् यथाऽनीशस्य निर्धनस्योद्यमस्तद्वत् ॥ २८ ॥

त इति। हे मुने मुनेः मुनये इत्थमपकुर्वन्तस्तस्य मुनेस्तेजसा दह्यमाना निवर्त्तुर्निवृत्ता बभूवुः यथार्भकोऽहिं सर्पं प्रबोध्य ततो निवर्त्तते तद्वत् ॥ २९ ॥

चित्रमेतदहो तस्य जितेन्द्रियत्वमिति विस्मयमानभावो-क्त्याह-इतीति। हे ब्रह्मन् धर्षितः प्रक्षोभितोपि यदहमोऽहङ्कारस्य भावं विकारं मोहं नागादिति नप्रापेत्येतन्महत्सु न चित्रम् ॥ ३० ॥

दृष्ट्वेति। स्वराडिन्द्रः निस्तेजसं परिम्लानवदनं कामं दृष्ट्वा ब्रह्मर्षेः मार्कण्डेयस्य प्रभावं श्रुत्वा च परं भृशं विस्मयमगात् ॥ ३१ ॥

तस्येति नरनारायणो नरसहितः श्रीनारायणः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

पुञ्जिकस्थल्याः अप्सरसां प्रधानायाः कस्याश्चिदप्सरसः केश विस्रंसितस्रजः केशभागात् विस्रंसिता विभ्रष्टा स्रक् यस्याः सा तथा तस्याः ॥ २६ ॥

अनुकन्दुकम् उत्पतत् कन्दुकानुकूलं यथा भवति तथा चलन्त्याः सूक्ष्ममणुतरं त्रुटितमेखलं त्रुटिता छिन्ना मेखला काञ्ची यस्याः तत्तथा तत् ॥ २७ ॥

अनात्मना जितम् ॥ २८ ॥

अर्भका अहिं प्रबोध्येव ॥ २९ ॥

अहमोऽहङ्कारस्य भावं भोगात् कपालमुक्तनारिकेलफलवदहङ्काराभिमानरहित इत्यर्थः ॥ ३० ॥

निस्तेजसं धुर्यं स्वराडिन्द्रः ॥ ३१ ॥

नरेण युक्तो नारायणः नरनारायणः ॥ ३२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

व्यकम्पयन् विकम्पयितुमारब्धाः ॥ २५ ॥

पुञ्जिकस्थलयात्तकाम्यायाः ॥ २६ ॥ २७ ॥

अनीशस्य अनीश्वरवादिनः उद्यमः पारलौकिकप्रयत्नः ॥ २८ ॥ २९ ॥

धर्षितोपि धर्षितुमारब्धोपि ॥ ३०—३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

शोषणमोहनसन्दीपनतापनमादनाख्यानि पञ्चमुखानि यस्य तत् मधुर्वसन्तः रजस्तोकश्च पुंस्त्वभावं व्यकम्पयन् मनश्चालयामासुः ॥ २५—२७ ॥

अनीशस्य भाग्यरहितस्य ॥ २८ ॥

प्रबोध्याहिमिति न जानीमहे अद्य किं भविष्यतीति भीताः अत्राहिदृष्टान्तेन प्रथमं किञ्चिदुद्भूतं कामं प्रति क्रोधोऽभूत् पश्चाद्विवेकेन कामक्रोधयोरुभयोरप्युपशमः कृत इत्यवसीयते ॥ २९ ॥

अहमोऽहङ्कारस्य ॥ ३० ॥

स्वराट् इन्द्रः ॥ ३१ ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

शोषणदीपनसम्मोहनतापनोन्मादनानि पञ्चमुखानि यस्य तत्पञ्चमुखम् तस्य मनः व्यकम्पयन् मधुर्वसन्तः रजस्तोकश्च पुंस्त्वभावं आत्मइन्द्रभृत्याः महादयः ॥ २५-२९ ॥

अहमः अहङ्कारस्य भावं विकारं मोहम् ॥ ३० ॥ ३१ ॥

नरनारायणो नरेण सहितो नारायणः ॥ ३२ ॥

भाषाटीका।

उसी समय कामदेव ने भी अपने धनुष पर पंचमुख का बाण धारण किया, वसन्त और लोभ तथा अन्य इन्द्र के किंकर मुनि के मन को कम्पाने लगे ॥ २५ ॥

उसी समय ऋषि के आगे पुञ्जिकस्थली अप्सरा गेंद हाथ में लेकर खेल रही थी, तब उसके स्तनों के भारीपने से उसका सूक्ष्म कटिभाग टूटा सा जाता तिसकी शोभा न्यारी हो रही, और उसके गेंद के खेल के आवेश में केशों से माला खुल २ कर न्यारी पृथिवी पर गिरने लगीं ॥ २६ ॥

गेंद के पटकने पर जहां २ गेंद जाती थी उसी गेंद के पीछे जानेवाली उस पुंजिकस्थली अप्सरा की दृष्टि गेंद

तौ शुक्लकृष्णौ नवकञ्जलोचनौ चतुर्भुजौ रौरववल्कलाम्बरौ ।
पवित्रपाणी उपवीतकं त्रिवृत्कमण्डलुं दण्डमृजुं च वैणवम् ॥ ३३ ॥
पद्माक्षमालामुत जन्तुमार्जनं वेदं च साक्षात्तप [(१)] एव रूपिणौ ।
तपत्तडिद्वर्णपिशङ्गरोचिषा प्रांशू दधानौ विबुधर्षभार्चितौ ॥ ३४ ॥

ते वै भगवतो रूपे नरनारायणावृषी ।
दृष्ट्वोत्थायाऽऽदरेणोच्चैर्ननामाङ्गेन दण्डवत् ॥ ३५ ॥
स तत्सन्दर्शनानन्दनिर्वृतात्मेन्द्रियाशयः ।
हृष्टरोमाऽश्रुपूर्णाक्षो न सेहे तावुदीक्षितुम् ॥ ३६ ॥
उत्थाय प्राञ्जलिः प्रह्वः औत्सुक्यादाश्लिषन्निव ।
नमो नम इतीशानौ बभाषे गद्गदाक्षरः ॥ ३७ ॥
तयोरासनमादाय पादयोरवनिज्य च ।
अर्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥ ३८ ॥
सुखमासनमासीनौ प्रसादाभिमुखौ मुनी ।
पुनरानम्य पादाभ्यां गरिष्ठाविदमब्रवीत् ॥ ३९ ॥

मार्कण्डेय उवाच ।

किं वर्णये तव विभो ! यदुदीरितोऽसुः संस्पन्दते तमनु वाङ्मन इन्द्रियाणि ।
स्पन्दन्ति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि [(२)] भावबन्धुः ॥ ४० ॥

भाषा टीका ।

के पीछे भ्रमती रही इतने में कटि से अति सूक्ष्म कटि सूत्र के टूटने से अति सूक्ष्म वस्त्र की साडी पहिने थी वह शिथिल हुई और कन्दुक क्रीडा के आवेश में उस अप्सरा को खबर नहीं पडी इतने में ही मलयगिरि के पवन ने उस सूक्ष्म साडी को पुंजिकस्थली के शरीर से उडाकर पृथक् करदी ॥ २७ ॥

काम ने जाना कि मैंने अपने कर्त्तव्य से अब ऋषि को जीत लिया, ऐसा मानकर ऋषि के ऊपर अपना बाण छोड दिया, परन्तु उन ऋषि के ऊपर तो इनका सब ही प्रयोग निष्फल होगया, जैसे, कि—असमर्थ का उद्यम व्यर्थ हो जाता है ॥ २८ ॥

सूत जी कहने लगे, कि—हे शौनक ! वे इन्द्र के किंकर मुनि का इस प्रकार अपराध करके अब उनके तेज से जलने लगे, तब वहां से निवृत्त हुए ॥ जैसे, कि छेडे २ बालक सर्प को चैतन्य करके दूर होजावें ॥ २९ ॥

[illegible] इस तरह इन्द्र के अनुचरों ने महामुनि श्रीमार्कण्डेय का अपराध भी किया, तो भी जो उनको अहंकार नहीं हुआ यह बात हरिभक्त महात्माओं में कुछ नहीं विचित्र नहीं है ॥ ३० ॥

इन्द्र भी परिकर सहित कामदेव को बिना तेज का फीका देखकर ब्रह्मर्षि के प्रभाव को सुनकर बडे विस्मय को प्राप्त होता हुआ ॥ ३१ ॥

तप स्वाध्याय और संयमों से इस प्रकार श्रीहरि में चित्त लगानेवाले उन मार्कण्डेय ऋषि के ऊपर अनुग्रह करने को मर्न दुःख हरन करनेवाले श्रीनरनारायण भगवान् आकर ऋषि को दर्शन देते हुए ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तावनुवर्णयति द्वाभ्याम्-ताविति । रौरवं कृष्णाजिनं वल्कलं चाम्बरं ययोस्तौ पवित्रे पाण्योर्ययोस्तौ त्रिवृत्त्रिगुणं नवतन्तुकमिति वा त्रिवृद्बहिः अक्षमालामित्यादौ मशके प्रयोगात् उपवीतकादीन्दधानौ ॥ ३३ ॥

(१) एवरूपिणाविति वीर० विज० पा० (२) भावबन्ध इति विज० पा० ।

श्रीवरखामिकृतभावार्थ[illegible]

येषं धर्ममुष्टिं किञ्च, साक्षात्तप एव [illegible]प-स्तडिद्वर्णौ देदीप्यमानविद्युत्सङ्काशं यदि[illegible]णौ मूर्तिमन्तौ तादृक्तेजोयुक्तमूर्तिभ्यां [illegible]मानाविस्यर्थः । प्रांशू उन्नतौ ॥ ३४ ॥

उच्चैर्महताऽऽदरेण ॥ ३५ ॥

तयोः सन्दर्शनेन च आनन्दस्तेन [illegible]तात्मेन्द्रियाशया देहेन्द्रियमनांसि [illegible] स[illegible] न सेहे नाशक्नोत ॥ ३६ ॥

आश्लिष्यन्निव[illegible]ाश्लिष्यन्निवाञ्जलिभ्यामिव ॥ ३७ ॥

पादयोरवनिज्य पादौ प्रक्षाल्य अर्हणेनाऽर्हयेत् ॥ ३८ ॥

पादाभ्यां पादाबानम्य गरिष्ठौ पूज्यतमौ तौ प्रति ॥ ३९ ॥

अन्तर्यामित्वकथैव प्राणादिप्रवर्तकत्वाद्यात्मकत्वस्तुता अध्यात्मन्यं पश्यन्नाह—किमिति । तव त्वां किमहं वर्णये कथं स्तौमि यद्येन त्वयैवोदीरितोऽसुः प्राणः संस्पन्दते प्रवर्तते तमनु च वागादयः स्पन्दन्ति अत्र हेतुः पै अन्वयव्यतिरेकाभ्यां "प्राणस्य प्राणम्"इत्यादिश्रुतिभिश्चेतत्प्रसिद्धमित्यर्थः । न केवल प्राकृतानां तनुभृतां किं त्वजशर्वयोश्चातः अस्य ममापि तथैव एवं यद्यपि न कस्यापि स्वातन्त्र्यमथापि दारुयन्त्रवत्त्वत्प्रवर्तिते-ष्वपि वागादिभिर्भजतां पुंसां भावबन्धुरात्मबन्धुरसि ननु पित्रादिवद्देहमात्रबन्धुः अहो कृपालुता तवेत्यर्थः ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

यदुदीरितो येन प्रेरितः असुः प्राणः अस्यापि तथापि सर्वस्मा-त्परोऽसि ॥ ४०-४२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ताविति । तौ नरनारायणौ वीक्ष्य उत्थायेत्युपरितनेनान्वयः कथं-भूतौ शुक्लकृष्णौ तत्र नरः शुक्लः श्रीनारायणः कृष्णवर्णः रौरवं कृष्णाजिनं वल्कलं च ते अम्बरे ययोस्तौ पवित्रे पावने यस्य ययोस्तौ त्रिवृत् त्रिगुणं नवतन्तुकमिति वा तदुपवीतं ब्रह्मसूत्रं ययोस्तौ ब्रह्मचारिणावित्यर्थः पद्माक्ष्या मालया च कृतपरिग्रहौ पवित्रं ब्रह्मणः दयार्द्रौ नयनौ यस्य दयाद्रम ॥ ३३ ॥

पद्माक्षाणां मालाम् उतापि च जन्तुमार्जनं मशकादिजन्तुप-नोदनवस्त्रं वेदं दर्भमुष्टिं च दधानौ साक्षात्तप एव एकं रूपं मूर्तिरनयोरस्तीति तथा तपस्तडिद्वर्णौ दीप्यमानतडिद्वर्णसदृशं यदिरशाङ्गोचिकरेण प्रांशू प्रगता व्याप्ता अंशवो ययोस्तौ विबुधश्रेष्ठै ब्रह्मादिभिरर्चितौ ॥ ३४ ॥

ते इति । रूपापेक्षया नपुंसकनिर्देशः वीक्ष्येति उच्चैर्महताऽऽदरेण देहेन ॥ ३५ ॥

स मार्कण्डेयस्तयोः सन्दर्शनेन यो आनन्दस्तेन निर्वृताः सुखिताः आत्मा वा आत्मेन्द्रियाशयाः देहेन्द्रियमनांसि यस्य सः हृष्टानि उत्पुलकितानि रोमाणि यस्य सः तावत्तौ नरनारा-यणौ द्रष्टुमपि न सेहे न शशाक ॥ ३६ ॥

उत्थायेति । प्रश्नः नम्रः आश्लिष्यन्निव परिरम्भमाण इव केवलं गद्गदाक्षरं नमो नम इति वाक्यम् ईश्वरौ प्रत्यावभाषे गद्गदाक्षरमिति क्रियाविशेषणम् ॥ ३७ ॥

तयोरिति । आधाय निधाय पादयोरवनिज्य पादौ प्रक्षाल्या-र्हणेन योग्येनानुलेपनेन चन्दनेन धूपमाल्यैः कुसुमैश्च समपूजयत् ॥ ३८ ॥

सुखं यथा तथा आसीनः गरिष्ठौ पूज्यतमौ प्रत्याह वक्ष्य-माणमब्रवीत् ॥ ३९ ॥

उक्तिमेवाह——किमित्यादिना, यावदध्यायसमाप्ति । युवयोर्दर्शनं न मे तपःफलं तस्यापि सर्वेन्द्रियप्राणप्रवो-दयित्रा त्वयैव कारितत्वादतः केवलं त्वत्कृपाफलमेवेत्यभि-प्रेत्याह—किमिति । हे विभो ! तव त्वां किं वर्णये कथं स्तौमि यतः अस्य मम तनुभृतां किं बहुना अजशर्वयोः ब्रह्मरुद्रयोश्चासुः प्राणः यतो येन त्वयोदीरितः प्रेरितः संस्पन्दते चलति स्वव्यापारक्षमो भवति तं स्पन्दमानं प्राणमनुसृत्य वागादीनि स्पन्दन्ति तनुरात्मैस्वस्वव्यापारं भजन्तीत्यर्थः यद्येवं तर्हि सर्वेऽपि त्वामिव किं न मामुपासते इत्यत्राह—तथापीति । प्राणमात्रस्य प्राणादिप्रचोदयितृत्वेऽपि भजतां पुंसामेव भावबन्धुर्भावस्त्वत्कृपाभक्तिरूपोऽभिप्रायविशेषः तं बध्नाति स्थिरी-करोतीति तथा त्वमेव किञ्चिदानुकूल्ययुक्तानामेव भावबन्धुस्त्व-मिति भावः ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

दरोर्विद्यमानं रौरवं वल्कलं चाम्बरं वा ययोस्तौ ॥३३ ॥

जन्तुमार्जनं पिञ्छरचितपुञ्जं चामरविशेषमित्यर्थः । वेदं दर्भ-मुष्टिं तपती प्रकाशमाना तडित्सदृशतडित् तद्वद्वर्णेन पिशङ्ग-रोचिषा कपिलप्रभया तप एकरूपिणौ प्रांशू अत्युन्नतौ दधानौ जग्मतुरिति शेषः । उपवीतादिकं च दधानौ रूपविशेषणम् ॥३४॥

तौ नरनारायणावृषी वीक्ष्य ननाम नमने हेतुमाह—ते इति । ते द्वे रूपे वै यस्मात्तस्मात् ॥ ३५ ॥

तयोः सन्दर्शनादुत्पन्नेनाऽऽनन्देन निर्वृतात्मेन्द्रियाशया यस्य स तथा ॥ ३६ ॥

गद्गदाक्षरं वचः ॥ ३७ ॥ ३८ ॥

पादाभ्यां पादावुद्दिश्य गरिष्ठौ गुरूणां ब्रह्मादीनामपि गुरू ॥ ३९ ॥

अपरिमितमहिम्नोर्युवयोः पुरतो यत्किञ्चिद्वर्णनं किं वर्णये न किमपि माहात्म्यानामनन्तत्वात्तदेकदेशमपि वर्णयितुं न शक्नोऽस्मि वागादीन्द्रियाणामस्वाधीनत्वेन त्वत्प्रसादायत्तत्वादिति-शेषः । एतत्कथमित्याशङ्क्य सर्वेन्द्रियनायकः प्राणोऽपि भग-वत्प्रेरित एव चेष्टते किमुतान्यानीति भावेनाह—यदुदीरित इति । येन त्वयोदीरितः प्रेरितोऽसुः प्राणः तमनु प्राणमनु तनु-भृतां मम इन्द्रियाणि मत्प्रेरितानि स्पन्दन्ति चेष्टन्ते किञ्च अजशर्वयोश्चेन्द्रियाणि येन प्रेरितानि अनेनाजशर्वौ समत्वेन त्वत्प्रेरितानि विषयेषु प्रवर्तन्ते अतो स्वमिच्छ[illegible] हेतुरिति निरस्तम् तथापि स्वादीन्द्रियप्रवृत्तौ हेतोऽयंमित्यारस्तद[illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इति मन्दाशङ्कां परिहरति-त्वय्येति । अस्येन्द्रियाद्यपि त्वत्प्रेरितानि यद्यप्येवं स्वतन्त्रोऽसि स त्वमथापि भजतां पुंसां भाव-बन्धोऽसि भक्तिवश्योऽसि तस्मात्परतन्त्र इव प्रतीयसे मादृशानामित्यर्थः ॥ ४० ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

उपवीतादिकं दधानौ ॥ ३३—३९ ॥

किं वर्णय इति । तथापि भावेन भक्त्या बन्धुः स्निग्धोऽसि ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

रौरवं कृष्णाजिनं वल्कलम् अम्बरं ययोस्तौ त्रिवृत् त्रिगुणं नवतन्तुकम् उपवीतं दधानौ कमण्डल्वादिकं हस्तेषु दधानौ वंशं वेणुदण्डं जन्तूनां मार्जनं शुद्धिर्यतस्तं वेदं दर्भमुष्टिमिति केचित् तप एव रूपिणौ तपोमूर्ती इत्यर्थः । तपस्तडिद्वर्णौ दीप्यमानविद्युत्सदृक्षाय यत् पिशङ्गं रोचिस्तेन प्रांशु प्रत्युन्नतौ ॥ ३३ ॥ ३४ ॥ ३५ ॥

न स्वेहं न शशाक ॥ ३६ ॥

प्रह्वो नम्रः ॥ ३७—३९ ॥

येन त्वयैव उदीरितः प्रेरितोऽसुः प्राणः स्पन्देन प्रवर्तते तमनु च वागादीनि स्पन्दन्ते "ओत्रस्य श्रोत्रम" इत्यादिश्रुतिभिर्निश्चितमेवेत्यर्थः । न केवलं प्राकृतानां तनुभृतामपि त्वदधीनयोश्च अतः स्वस्य ममापि यद्यप्येवम् अथापि भजतां जनानां भावेन प्रेम्णा बन्धुर्बन्धुरिव बद्धोऽसि प्राणबुद्धीन्द्रियादीनामत्वमेव स्वभजनं कारयसि पुनस्तादृशभजनस्य प्रत्युपकारं असमर्थो ऋणीव भूत्वा तत्प्रेमबद्धो भवसीत्यद्भुतं तव कृपावैभवमिति भावः ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नरः शुक्लः श्रीनारायणः कृष्णः रौरवं कृष्णाजिनं ते अम्बरे ययोस्तौ त्रिवृत् त्रिगुणं नवतन्तुकं वा उपवीतकं कमण्डल्वादिकं च दधानावित्युत्तरेणान्वयः ऋजुमवक्रं दण्डम् ॥ ३३ ॥

जन्तुमार्जनं पिपीलिकामशकादिजन्त्वपनोदकम् तपत दीप्यमानं तडिद्वर्णसदृशं पिशङ्गरोचिस्तेन साक्षात्तप एव रूपिणौ मूर्तिमन्तौ ॥ ३४ ॥

दण्डवत् आदरेण ॥ ३५ ॥

तयोः सन्दर्शनानन्देन निर्वृताः आनन्दिताः आत्मेन्द्रियाशयाः देहेन्द्रियमनांसि यस्य सः ॥ ३६ ॥

आश्लिषन् आलिङ्गन् इव ॥ ३७—३९ ॥

सर्वचेतनचेष्टानियन्तारं भगवन्तं स्तोतुं प्रवृत्तस्तत्सुतौ आत्मनः सामर्थ्याभावं प्रथमं दर्शयति—किमिति । हे विभो ! सर्वसंसारकस्य तव किं वर्णये न किमपि वर्णयितुं शक्नोमीत्यर्थः । यथा ज्वालाकस्य वह्न्यादेः सकाशात् जातो विस्फुलिङ्गादिः किमपि न कर्तुं शक्नोति तद्वद्विनिभाव: किञ्च अस्य मम तथाऽन्येषामपि तनुभृतां किम्बहुना अजशर्वयोश्च असुः प्राणः तमनु वाङ्मनइन्द्रियाणां स्पन्दन्ति एवम्भूतः सर्वेन्द्रियनायकः प्राणः येन त्वयैवोदीरितः स्पन्दते प्रवर्तते अथापि भगवत्त्वमपि प्रमाणादिमतां भवत्पादभजनामनुभूतानां भजताम्मस्माकं भावेन बन्धुः असाधारणेन भक्तिप्रवणभावेनैव बन्धुर्वेद्योऽसि ॥ ४० ॥

भाषा टीका ।

वे दोनों नर और नारायण कैसे हैं, कि—एक शुक्ल और एक कृष्ण वर्ण हैं, दोनों नवीन कमल सदृश विशाल लोचनवारे हैं, और जिनके भुजा, मृगचर्म और वल्कलों के वस्त्र धारण किये, कुशाओं के पवित्रों (पहितियों) को हाथों में धारण किये । त्रिगुण यज्ञोपवीत कमंडलु और सरल वेणु का दण्ड इनको भी दोनों स्वरूप धारण किये ॥ ३३ ॥

तथा कमलाक्ष की माला, जन्तु मार्जन और दर्भ की मुष्टि इनको भी धारण किये दोनों साक्षात् तप की मूर्ति दीप्यमान विद्युत्सदृश जो कान्ति तिससे उपलक्षित और बड़ उन्नत, तथा बड़े २ देवताओं में श्रेष्ठ जो ब्रह्म रुद्रादि तिनसे पूजित ऐसे उन दोनों को मार्कण्डेय ने देखा ॥ ३४ ॥

साक्षात् ऋषी नर नारायण दोनों उन भगवत्स्वरूपों को देखकर बड़े आदर पूर्वक उठकर मार्कण्डेय महर्षि साष्टांग दण्डवत् करतेहुए ॥ ३५ ॥

भगवान् के दर्शन से उन मार्कण्डेय ऋषि का आत्मा, इन्द्रिय, और अन्तःकरण तीनों आनन्द में निमग्न होगये, उस समय महर्षि को आनन्द से रोमाञ्च हो आये तथा नेत्र आनन्दाश्रुओं से पूरित होगये कि—जिससे यथावत् भगवान् के दर्शन करने को भी मुनि समर्थ न हुए ॥ ३६ ॥

फिर साष्टांग दण्डवत् से उठकर हाथ जोड़ नम्र होकर उत्सुकता के मारे जानो कि भगवान् को आलिंगन ही कर लेंगे इस प्रकार प्रेम से गद्गदाक्षर होकर दोनों जगत् के नियन्ताओं से ऋषि नमो नमः ऐसे बोलते हुए ॥ ३७ ॥

ऋषि दोनों को आसन देकर दोनों के चरणारविन्दों का प्रक्षालनकर अर्घ्य चन्दन धूप दीप मालाओं से पूजन करते हुए ॥ ३८ ॥

सुख पूर्वक आसनों पर विराजमान अपने ऊपर अति प्रसन्न दोनों आदि मुनियों के चरण कमलों को फिर नमस्कार करके परमपूज्य अपने दोनों प्रभुओं से मुनि इस प्रकार बोलते हुए ॥ ३९ ॥

मूर्ती इमे भगवतो [illegible] क्षेमाय तापविरमाय च मृत्युजित्यै ।
नाना बिभर्ष्यवितु [illegible] पुनर्ग्रसति सर्गमिवोर्णनाभिः ॥ ४१ ॥
तस्यावितुः स्थिरच [illegible] यत्स्थं न कर्मगुणकालरजः स्पृशन्ति ।
यद्वै स्तुवन्ति निन [illegible] णं ध्यायन्ति वेदहृदया मुनयस्तदाप्त्यै ॥ ४२ ॥
नान्यं तवाङ्घ्र्युपनय [illegible] मं जनस्य परितो भिय ईश विद्मः ।
ब्रह्मा बिभेत्यलमतो [illegible] ः कालस्य ते किमुत तत्कृतभौतिकानाम् ॥ ४३ ॥
तद्वै भजाम्यृतधिय [illegible] द्विन्देदमात्मच्छदि चाऽऽत्मगुरोः परस्य ।
देहाद्यपार्थमसदन्त्य [illegible] न्देत ते तर्हि सर्वमनीषितार्थम् ॥ ४४ ॥

भाषाटीका ।

मार्कण्डेय उवाच ।

मार्कण्डेय महर्षि बोले, कि—हे विभो ! मैं आपकी क्या स्तुति करूं ? क्योंकि—जिन कारणों से स्तुति होती वे कारण तो सब आपके आधीन हैं, जिन आपकी प्रेरणा से मुख्य प्राण प्रवृत्त होता है, कि—जिस प्राण के पीछे देहधारियों की वाणी मन और इन्द्रियें अपने २ कार्य में प्रवृत्त होती हैं। अन्य प्राणियों की तो बात ही क्या कहूं परन्तु ब्रह्मा महादेव तथा मेरी भी वाणी मन और इन्द्रियें जिनके चलाने से चलती हैं तथा आप ऐसे कृपालु हैं, कि—हम लोगों के भजन से प्रसन्न हो जाते हैं ॥ ४० ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, कथमावां प्राणादिप्रवर्तकौ धर्मपुत्रत्वादावयोरिति चेत्तत्राऽऽह—मूर्ती इति । हे भगवन् ! भगवतस्तव इमे मूर्ती त्रिलोक्याः क्षेमाय पालनाय तापविरमाय च दुःखनिवृत्त्यै मृत्युजित्यै मोक्षाय ननु त्वं कस्यापि पुत्र इत्यर्थः । अत्र दृष्टान्तः यथेदं विश्वमवितुमन्यास्तनूर्मत्स्यकूर्मादिरूपा नाना अनेकप्रकारा बिभर्षि तद्वत् न केवलं पालनमात्रं तव कर्म किन्तु सृष्टिलयावपीत्याह—सृष्ट्वेति । तत्राप्यन्यनिरपेक्षत्वे दृष्टान्तः ऊर्णनाभिरिवेति ॥ ४१ ॥

यस्मादेवम्भूतस्त्वं तस्मात्तवाङ्घ्रिमूलं भजामीत्याह तस्येति तस्यावितुः पालकस्य स्थावरजङ्गमानामीश्वरस्याङ्घ्रिमूलं भजामीति तृतीयश्लोकस्थेनान्वयः कथम्भूतमङ्घ्रिमूलम् यत्स्थं यत्र स्थितम् कर्मगुणकालानां रजोमलम् अन्ये च पूर्वोक्तास्तापादयो न स्पृशन्ति रुज इति वा पाठः यतो वेदो हृदये येषां ते वेदतात्पर्यविदो मुनयो यदेव स्तुवन्ति निरन्तरं नमन्ति तदाप्त्यै तत्प्राप्तये एव स्तवनादि कुर्वन्ति ॥ ४२ ॥

यतोऽन्यः पुरुषार्थो नास्तीत्याह—नान्यमिति । अङ्घ्र्युपनयात् अङ्घ्रिप्रापणादन्यत् क्षेमं न विद्मः परितः सर्वेष्वपि लोकेषु भीर्यस्य तस्य जनस्य तदेवाऽऽह ब्रिपरार्धं भिन्नयं स्थानं यस्य सः ब्रह्माऽपि ते कालस्य त्वद्भ्रूविजृम्भरूपात्कालादयं बिभेति अतः किमुत वक्तव्यं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति ॥ ४३ ॥

यस्मादेवं तस्मात्तव पादमूलं भजामि कथम्भूतस्य ऋतधियः सत्यज्ञानस्वरूपस्य यद्वा सत्या धीर्यस्य यस्मिन्वा तस्याऽऽत्मगुरोर्जीवनियन्तुरतः कारणात्परस्य किं कृत्वा आत्मच्छदि आत्मावरकमपार्थं च निष्फलमसच्च . तुच्छमन्त्यञ्च नश्वरमिदं देहादिहित्वा देहादिभजनं त्यक्त्वा भगवन्तं कथं पश्येत तत्राऽऽह आभिमाथम महात्मचमत्कारिकत्वात्मतमात्रम न ततः पृथगस्तीत्यर्थः अन्यपवर्गाय भवतु भगभजनं फलान्तरार्थं त्वन्यभजनं कार्यमेव तत्राऽऽह नहीति यदि त्वां भजति पुरुषस्तर्हि ते त्वत्त एव सर्वं मनीषितमर्थं विन्देतेति ॥ ४४ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

परितोभियः सर्वसुलभभयस्य जनस्य द्विपरार्द्धकालस्थापि लोकाः कालस्य कालरूपस्य ते त्वत्तः ॥ ४३ ॥

ऋतधियः सत्यसङ्कल्पस्य परस्यात्मगुरोस्तव पादमूलं आत्माभिमतं मूलं भजामि सर्वाभीष्टपुरुषार्थरूपं यत्पादं मुमुक्षुजनो देहादिकमपास्य विन्देत ॥ ४४ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

ननु प्राणादीनामुद्दीपयितेश्वरः नाहमित्यत्र भगवदवतारभूतावेव युवामित्यभिप्रयन्नवतारप्रयोजनमाह—मूर्ती इति । हे भगवन् ! भगवतः वाङ्गपपूर्णस्यैव इमे मूर्ती अवतारो किमर्थं त्रिलोक्याः क्षेमाय सुखाय तापविरमाय ज्ञानोपदेशेनाध्यात्मिकादितापत्रिधानाय मृत्युजित्यै मृत्युजयाय मोक्षायेति यावत् अत्र दृष्टान्तान्तरालाभात्स्वावतारानेव दृष्टान्तयति । नानाबिभर्षि इतिवथा नानाविधा अन्यतनूः रामकृष्णादितनूः इदं जगदवितुं रक्षितुं बिभर्षि तद्वत् न केवलं जगद्रक्षैव त्वद्व्यापारः किन्तु सृष्टिसंहारावपीत्याह सर्वं इदं जगत्सृष्ट्वा पुनर्ग्रससि ननु किं

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

त्वमेकस्यैव सृष्टृत्वं पुनरनुप्रवेशम् इत्यतो दृष्टान्तमाह—इवोर्ण-नाभिरिति ऊर्णनाभिरिवेत्यर्थः ॥ ४१ ॥

यतः सर्वजगत्कारणभूतोऽतस्त्वामेव "कारणं तु ध्येयः" इत्यादि वेदार्थतात्पर्यज्ञा ध्यायन्तीत्याह—तस्येति । तस्य सृष्टिसंहार-कर्तुरविभुः अवतारे रविभुः चराचराणामन्तः प्रविश्य चार येन नियन्तुश्च तव यत्पादमूलं तद्वै भजामीत्युपरिष्टात् सम्बन्धः कथम्भूतं यस्मात्तदुपासनादित्यर्थः न कर्मगुणकालरजः स्पृशन्ति कर्मगुणकालानां रजोमलं यदुपासकान् न स्पृशन्ति रज इति पाठे तथा कर्मादयो यदुपासकं न स्पृशन्ति यदुपासका कर्मादीन स्पृशन्तीति वा तत्र कर्म पुण्यपापात्मकं तदेव कर्मणो रजः रजोवत् मलावहत्वात्सुखदुःखे गुणरजः शब्देन रजआदि गुणकार्यं कामक्रोधादिकं विवक्षितं काल-शब्देन तदुपयुक्तशीतातपवर्षादयो विवक्षिताः रज इति पाठे रजो-दोषाः किञ्च वेदहृदयाः वेदा हृदये येषां ते वेदतात्पर्यविद मुनयः इत्यर्थः । यजन्त्याराधयन्ति तदाराधयेत्पादमूलमवाप्त्यै ॥ ४२ ॥

किं तदाप्त्येत्यत आह तस्या एव निरतिशयपुरुषार्थरूपतामाह, नान्यमिति । अमिय इति छेदः हे अपवर्गमूर्ते ! निरतिशयपुरुषार्थ-रूप! हे ईश ! परितो न भीमयं यस्मात्त्वदङ्घ्र्युपनयात्त्वदङ्घ्रि-प्राप्तेरन्यं क्षेमं श्रेयो न विद्मः भिय इति छेदः परितोभिय इति समस्तं पदं जनस्य विशेषणं ननु, चतुर्मुखलोकप्राप्तेरपि क्षेम एवेत्यत आह—आब्रह्मेति । अस्य नितरां कालस्य कालरूपस्य ते स्वतः बिभेति कुतः यतः सोपि द्विपरार्धस्थिरायः द्विपरार्ध-कालावस्थायिलोकः अतो बिभेतीति सम्बन्धः । यतो ब्रह्मा एवं भयं किमुत तत्कृतानां तत्सृष्टानां भौतिकानां भूतपरिणा-मकदेहभाजाम् ॥ ४३ ॥

यतस्त्वदङ्घ्र्युपनय एव क्षेमः अतस्तत्पादमूलमेव तत्प्राप्त्यै भजामीत्याह—तस्मा इति । अर्हतिय:सत्यसङ्कल्पस्य परमात्मनो गुरोश्च, परस्य सर्वस्मात्परस्य च तवात्माहितं तदेतत्पादमूलं भजामि अर्हतिय इत्यनेन "तेषामहं समुद्धर्ता मृत्युसंसारसागरात्" इत्युक्तविधसत्यसङ्कल्पत्वं विवक्षितम् आत्मगुरोरित्यनेनान्तः प्रविश्य नियमनेन साधुकर्मकारयितृत्वं ज्ञानोपदेशेन उपकर्तृत्वं च प्राप्यत्वोपयुक्तमुक्तम् "हित्वैतदात्मविहितमात्मगुरोः परस्य देहाद्य पार्थमसदन्त्यमभिज्ञमात्रम्" इति पाठे असदसत्यमसद्भूतपार्थ मित्यर्थं च देहादि हित्वा भवाद्यात्माहितं पादमूलं भजा-मीति सम्बन्धः । हित्वेदमात्मच्छदिमात्मगुरोरिति पाठे तु आत्म-च्छदिमात्मज्ञानावरकं देहादि हित्वा भजामीत्यर्थः । देहा-द्यपार्थमसदिदमन्त्यमभिज्ञमात्रमिति च क्वचित्पाठः तदा अपार्थ-मसदिति च न भवत्यभिज्ञमात्रम् यस्मात्तद्देहादि हित्वेत्यर्थः यावदान्तरत्वात् कुतः यदेवं तेऽस्मां यो भजेदितिशेषः । नहि स एव सर्वं मनीषितार्थमभिमतं सर्वं पुरुषार्थं विन्देत लभेत आद्यपाठे तु यदेवेति शेषः । यस्य ते अभिज्ञमात्रं त्वत्पादमूलविषयक-ज्ञानमात्रमस्ति नहि स एव सर्वमभीष्टार्थं विन्देत "विन्दन्ति ते सर्वमनीषितार्थम्" इति च पाठो दृश्यते तदाभिज्ञमात्रमित्यस्य देवाभिरित्यादिः ते विन्दन्ति सन्त इति सम्बन्धः ॥ ४४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

आगच्छत इदानीं—मूर्तीरिति । हे भगवन् ! सकलस्वस्य भगवत इमे मूर्ती मत्स्याद्यवतारः त्रिलोक्याः क्षेमाय रक्षायै साधुजनमनस्तोषाय मृत्युञ्जयाय संसारावधाननुजयाय भवतः किञ्च, यः यथा अनुपमान्यतनूर्नानाविधा अनुपमा मत्स्यकूर्म-रूपा अवतारवरतनूर्मूर्तीर्बिभर्षि त्रिलोकीक्षेमादिकार्यायेति शेषः । किञ्च ऊर्णनाभिरिव इदं सर्वं यथापूर्वं सृष्ट्वा पुनर्यथा पूर्वं प्रविशसि अनेन मायाविशुद्धरूपमहत्त्वं न चित्रं स्वादिति शङ्का परिहृता । सत्यसङ्कल्पस्य तदीयमहात्म्यं तन्मात्र-रूपमहत्त्वोपपत्तेः "तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः । यद्वा, अतनूरप्राकृतशरीरस्त्वं यथा सर्वमिदं सृष्ट्वा पुनर्प्रविशसि तथानु-पमानि नानाविधानि शरीराणि बिभर्षि प्रविशसि अन्तर्गतानि करोषि । त्रिलोकीक्षेमोदये भवतां क्षेमाद्यनन्तरमेकीकरणा-मिति विशेषः भगवत इमे मूर्ती च नमामि ॥ ४१ ॥

एतमर्थं प्रमाणयति—तस्येति । यत्स्थं यस्मिन्पादमूले स्थितं पुरुषं कर्मगुणकालरजः पुष्कर्मगुणाः सत्त्वादयः कालो जन्मादिहेतुः रजः आर्तवम् शुक्रशोणितात्मकम् एकवस्त्राव-स्थितस्यैकस्थानं न स्पृशन्ति नोत्पादिन न दुःखमापादयन्ति वेदस्य हृदयम् येषां ते वेदहृदयाः वेदतात्पर्यज्ञा मुनयो ब्रह्मादयः विष्णुपादोरविन्दुः पालकस्य तव अङ्घ्रिमूलं स्तुवन्ति "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" इति नितरां नमन्ति नमो विष्णवे महते करोमीति यजन्ति "त्र्यम्बकम् यजामहे सुगन्धिं—पुष्टिवर्धनम्" इति ध्यायन्त्यात्मानमेव लोक-मुपासीत इति यदस्मात्स्मात्त्वदङ्घ्रिसेवनाभ्यां तदेतमाहं वा इत्यर्थः । तस्य तवाङ्घ्रिमूलं यत्स्थं कर्मादयो न स्पृशन्ति तस्य पादमूलं भजामीत्येकवाक्यं वा ॥ ४२ ॥

किमर्थमेतदेव स्तुवन्ति नित्यं मुमुक्षवोऽपि नान्यत्किं न क्वापीति तत्राह—नेति । हे ईश ! अपवर्गमूर्ते ! पुरुषार्थस्वरूप ! यस्मै परितोऽभयः सर्वस्मादभयः जनस्य तवाङ्घ्र्युपनयात् अङ्घ्रिप्राप्ति-प्राप्तेरन्यत् क्षेमं न विद्मः परितो भिय इति वा पाठः अन-द्येति विशेषणं सर्वस्माद्भीयम् यस्य स तथा तस्य । ननु, स्वयम्भुवः क्षेमकर्ता ब्रह्मास्ति "प्रजापते न त्वदेतान्यन्यः" इति-श्रुतेः । अत्राह ब्रह्मेति यतः परितोभयः अतो द्विपरार्धस्थायिस्थ-स्थितयं यस्य स तथा स ब्रह्मा कालस्य ते तव सकाशाद्विभे-तीति "यस्मां निशाम्य सदनाद्रुकरूपमासम्, यो सर्वमाविभुनदं मेति तद्विभक्तमाप्यमोदणाय" इति श्रुतेः । भूतप्राणस्य विधित्रा-सभयं निवर्तमानस्य भोक्तृणाम् लोकाधिपस्यस्य दृष्टान्तस्यां ते संस्थोपलब्धेर्भ्राणात् तथाभावः किं तदादीनि मल्लाशङ्कां कैमुत्यन्यायेन परि-हरति, किमुतेति । अत इत्युत्तरत्रापि सम्बन्धः ब्रह्मापि भवं बिभेति यतोऽतस्तत्कृतभौतिकानां तेन ब्रह्मणा कृतानि भौति-कानि शरीराणि येषां ते तथा तेषां प्राणिनां भयमस्तीति किमुतेत्यन्वयः ॥ ४३ ॥

तेनायामित्थं मामाह—तस्मै इति । अर्हणीयः एकप्रकार-पुरुषोत्तमस्तुतिरित्यर्थः आत्मगुरोः जीवगुरोः परस्य परमा-त्मनस्तव पादमूलमेतद्देहाद्यभिमानं हित्वा यदि भजामि तर्हि ते नव प्रसादात्सर्वं मनीषितार्थं विन्देय इत्यन्वयः । कीदृशम्

श्रीमद्विजयध्वजतीर्थकृतपद[illegible]

आत्मच्छिद्रम् आत्मनाशहेतुम् अत एव [illegible] प्रयोजनशून्यम् असदसत्यम् अनभिज्ञमा[illegible] केवलाविद्याकृतं वा अनेन देहेऽहंभावो [illegible] हेतुरिति कथितं भवति ॥ ४४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमस[illegible]

नद्वै इति तैः अभिज्ञमात्रमित्यस्य टीकाया[illegible] न्यायप्रस्थाने भ्रमादेव प्रतीतिर्यस्य तादित्यर्थ[illegible]

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसा[illegible]

तस्मात् स्वभजनं कारयितुं भजन[illegible]क-प्रेमवशो भवितुं च तवावतारः न केवलमेत[illegible]-नार्थमपीत्याह—मूर्त्ती इमे इति । मृत्युजित्वे[illegible] ऽन्यतनूर्मत्स्यकूर्माद्या बिभर्षि तथैमामपि त[illegible] यस्य पालनार्थं तनूं बिभर्षि तत्सर्वं पु[illegible] रित्यद्भुतं तव लीलाधिभवमपीति भावः [illegible]

नस्य तवाङ्घ्रिमूलं भजामीति [illegible]ः यत्स्थं यदङ्घ्रितलस्थं भक्तजनं कर्मगु[illegible]र-त्वादिभवं मालिन्यं च न स्पृशन्तीति [illegible]-मिति कर्मेति दुष्कृतं सुकृतं प्राचीनम[illegible] न स्पृशन्तीति पुष्करपलाशे जलमिवेति म[illegible] अभीक्ष्णं स्तुवन्ति मुनयो मौनशीला वेद[illegible]ः तत्प्राप्त्यर्थं ध्यायन्ति ॥ ४२ ॥

अङ्घ्र्युपनयात् चरणप्राप्तेरन्यत् क्षेमं कुशलं परितो भियः संसारादिभयतो जनस्य न विद्मः यतो ब्रह्मेत्यादि ते कालस्य कालस्वरूपत्वात् इतः अस्मात् किमुत वक्तव्यं तत् कृतानां ब्रह्मकृतानां भौतिकानां प्राणिनां भयमिति ॥ ४३ ॥

अन्तर्भयः स्वज्ञानस्य आत्मच्छिद्रं हित्वा आत्माच्छादकं देहादि देहगेहादिममत्वं स्वरूपतया अपार्थं निष्फलम् असत् तुच्छं अन्त्यं नश्वरम् एवमन्योपि यो भजति स ते त्वामभिज्ञमात्रं भक्त-भावाभिज्ञमेव प्राप्नोति । ननु, तर्हि निष्काम एव मां भजतु सकाम-स्त्वन्यं तत्राह—तर्हीति । यदि त्वां विन्देत तर्हि सर्वमनीषितार्थं नाडिकृतार्थं विन्देतैव ॥ ४४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

ननु, प्राणप्रवर्त्तको भगवानात्मानुतापसा विरत आह—मूर्त्ती इति । हे भगवन् ! नारायण ! इमे नरनारायणाख्ये मूर्त्ती भगवत एवाविर्भूते आविर्भावप्रयोजनमाह, त्रिलोक्याः क्षेमाय रक्षार्थं तापविरमाय त्रिविधतापनिवृत्त्यै मृत्युजित्यै संसारनिवृत्तये च तत्र दृष्टान्तमाह, यथेदं विश्वमवितुमन्यस्तनूः मत्स्यकूर्मादिरूपाः भवान् बिभर्षि तद्वत् विश्वनिर्गमनप्रवेशस्थानत्वप्रतिपादनेन भग-वतो वर्हीति, सर्वं विश्वं सृष्ट्वा पुनर्ग्रससीति अपांकारणत्वेऽपि निर्विकारित्वं दृष्टान्तेन बोधयति ऊर्णनाभिरिति ॥ ४१ ॥

एवम्भूतस्य तवाङ्घ्रिं भजामीत्याह—नस्येति । तस्य अङ्घ्रिमूलं भजामीति तृतीयश्लोकादानीतेनाध्याहृतेन वा क्रियापदेनान्वयः तदाश्रये अङ्घ्रिमूलप्राप्तये ॥ ४२ ॥

अङ्घ्रिप्राप्तेरन्यत्क्षेमं नेत्याह—नान्यमिति । परितो भीर्यस्य तस्य जनस्य यद्वा, परितः सर्वत्र नास्ति भीर्यस्मात्तस्य तव अङ्घ्र्युप-नयात् श्रीमत्पादपद्मप्राप्तेः अन्यत्क्षेमं न विद्मः भगवच्चरणप्राप्ति-रेवोपादेयपदार्थं इति द्रढयितुं सर्वं ब्रह्मादिस्तम्बपर्यन्तं काल-ग्रस्तत्वादनुपादेयमित्याह, ब्रह्मेति । द्विपरार्द्धकालस्थायिधिष्ण्यं स्थानं यस्य सोपि ते तव शक्तिरूपस्य कालस्य वेगादिति-शेषः । भृशं नितरां बिभेति तत्कृतभौतिकानां तेन कृतानां भौति-कानां प्राणिनां भयमिति का कथा ॥ ४३ ॥

तस्मार्थे पादमूलप्राप्त्यर्थं श्रुता धीर्येभ्यस्तस्य तव धीमेर-कस्य वेदमात्रार्थभूतस्य आत्मनां ब्रह्मादिसर्वजीवानां गुरोः परस्य पूज्यस्य तव पादमूलं भजामि नन्वन्यासक्तस्य मे भजने-ऽधिकार इत्यत आह, हित्वेति । इदं दृश्यमानमैहिकम् अन्त्यं पारलौकिकम् असदयुक्तम् अत एवापार्थं निष्फलम् आत्माच्छादि आत्माच्छादकं हित्वा उपेक्ष्यैवेत्यर्थः । भगवत्प्राप्तिकामो भग-वन्तं भजेदिति फलितोर्थः यदि क्षेत्रज्ञस्वरूपमात्रप्राप्तिकामः अर्थ-प्राप्तिकामो वा तर्हि ते त्वत्त एव अभिज्ञमात्रं क्षेत्रज्ञस्वरूप-मात्रं मनीषितार्थं वा विन्देतैव तदापि त्वमेव नान्यः क्षेत्र-ज्ञस्य त्वदंशत्वात् अर्थस्य सर्वस्य त्वदचिच्छक्तिमयत्वाच्चेति भावः ॥ ४४ ॥

भाषा टीका।

हे भगवन् ! आप इन दोनों मूर्त्तियों को इस त्रिलोकी के मंगल के लिये, और दुःख दूर करनेके लिये, तथा मोक्ष के लिये, धारण करते हो। तथा इस जगत की रक्षार्थ और भी नानाप्रकार की मूर्त्तियों को धारण करते हो। और इस जगत् को रचकर ऊर्णनाभि (मकरी) की तरह फिर सबको ग्रस लेते हो ॥ ४१ ॥

जगत के पालन करनेवाले स्थिर चरों के नियंता ऐसे आप के चरणकमल को मैं भजता हूं । जिस चरणकमल के समीप स्थित रहनेवाले पुरुष को कर्म गुण काल और रजोगुण ये सब स्पर्श नहीं कर सक्ते हैं । और वेद के अभिप्राय जाननेवाले मुनि लोग जिन आप के चरणकमलों की प्राप्ति के अर्थ उनही चरणकमलों की स्तुति करते हैं, नमस्कार करते हैं, पूजन करते हैं, और निरन्तर ध्यान करते हैं ॥ ४२ ॥

हे ईश ! अपवर्ग मूर्त्ति जो आप हो तिन आप के चरणार-विंद की प्राप्ति को छोड़कर सर्वत्र भयभीत इस जन को और भी कोई क्षेम है इस बात को मैं नहीं जानता हूं। द्विप-रार्द्ध पर्यंत स्थित रहनेवाले ब्रह्माजी भी, जिन आप के भृकुटी विलासरूप काल से अत्यन्तही डरते हैं । और जो विचारे ब्रह्मा की सृष्टि के प्राणी हैं उनको भय होवै इसमें क्या आश्चर्य है ॥ ४३ ॥

सत्त्वं रजस्तम इतीश ! तवात्मबन्धो ! मायामयाः स्थितिलयोदयहेतवोऽस्य ।
लीलाधृता यदपि सत्त्वमयी प्रशान्त्यै नान्ये नृणां व्यसनमोहभियश्च याभ्याम् ॥ ४५ ॥
तस्मात्तवेह भगवन्नथ तावकानां शुक्लां तनुं स्वदयितां कुशला भजन्ति ।
यत्सात्वताः पुरुषरूपमुशन्ति सत्त्वं लोको यतोऽभयमुतात्मसुखं न चान्यत् ॥ ४६ ॥
तस्मै नमो भगवते पुरुषाय भूम्ने विश्वाय विश्वगुरवे [१]परदैवताय ।
नारायणाय ऋषये च नरोत्तमाय हंसाय संयतगिरे निगमेश्वराय ॥ ४७ ॥
यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः सन्तं स्वखेष्वसुषु हृद्यपि दृक्पथेषु ।
[२]तन्माययाऽऽवृतमतिः स उ एव [३]साक्षादाद्यस्तवाऽखिलगुरोरु[४]पसाद्य वेदम् ॥ ४८ ॥
यद्दर्शनं निगम आत्मरहःप्रकाशं मुह्यन्ति यत्र कवयोऽजपरा यतन्तः ।
तं सर्ववादविषयप्रतिरूपशीलं [५]वन्दे महापुरुषमात्मनि गूढबोधम् ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
वैयासिक्यां द्वादशस्कन्धे नारायणस्तवो नाम
अष्टमोऽध्यायः ॥ ८ ॥

भाषा टीका ।

आत्मा के आवरण करनेवाले तुच्छ नाशवान् इस देहादि में आसक्ति छोड़कर, सत्य संकल्प आत्मा के अज्ञान को दूर करनेवाले, ज्ञान स्वरूप परात्पर ऐसे आप के चरणकमल को मैं भजता हूं ॥ यदि पुरुष आप का भजन करता है तब वह आपही से संपूर्ण वांछितार्थ को प्राप्त हो जाता है ॥ ४४॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

ननु, ब्रह्मरुद्रावपि ममैव मूर्ती अतो मामेव किमत्यन्त-माश्रियसे तत्राऽऽह—सत्त्वमिति । यद्यपि यद्यपि तथैव मायया कृता एता लीलास्त्वयैव धृतास्तथापि या सत्त्वमयी सैव प्रशान्त्यै मोक्षाय न केवलमेव प्रशान्त्यभावमात्रमन्ययोर्न किन्त्वनिष्टं च भवेदित्याह—व्यसनेति ॥ ४५ ॥

तदेव सदाचारेण द्रढयति—तस्मादिति । हे भगवन् ! तव शुक्लां तनुं श्रीनारायणाख्याम् अथ तावकानां च शुक्लां तनुं नारायणम् यदस्मात्सात्वताः सत्त्वमेव पुरुषस्येश्वरस्य रूपं मुशन्ति मन्यन्ते न त्वन्यद्रजस्तमसीति अत्र हेतुः यतः सत्त्वाल्लोको वैकुण्ठाख्यः लोकस्य सत्त्वमभयं च भोगे सत्त्वप्रात्मसुखं च ॥ ४६ ॥

अतस्तं प्रणमति—तस्मै नम इति । हंसाय शुद्धाय संयतगिरे नियतवाचे अथ च निगमेश्वराय वेदमार्गप्रवर्तकाय ॥४७॥

वेदार्थस्याज्ञानप्रवर्तने हेतुत्वं वदन्स्तौति—यमिति । वितथाक्षपथैः कपटैरिन्द्रियमार्गैर्भ्रमद्धीर्विक्षिप्तबुद्धिः पुमान् खेष्विन्द्रियादिषु नियन्तृत्वेन सन्तमपि यं त्वां न वेद दृक्पथेषु विषयेषु बुद्धिविक्षेपे हेतुः तन्मायया तस्य तवैव मायया आवृता आत्मनिष्ठा मतिर्यस्य स उ सोऽपि आद्य एव पूर्वमखिलाम्नायवाखिलगुरोस्तव त्वत्प्रवर्तितं वेदमुपसाद्य प्राप्य तं त्वां साक्षाद्वेद ॥ ४८ ॥

वेदेनैव त्वज्ज्ञानमित्युपपाद्य प्रणमति—यस्य तव दर्शनं निगमे भवति कथम्भूतम् ? आत्मनस्तव रहः रहस्यं तस्य प्रकाशकम् अन्यथा दुर्ज्ञेयतामाह—अजपरा ब्रह्ममुख्याः कवयोऽपि साङ्ख्ययोगादिभिर्यतमाना यत्र त्वयि मुह्यन्ति कुतः ? इत्यत आह, सर्वेषां साङ्ख्यादिवादिनां ये वादास्तेषां विषया भेदाद्यस्तेषां प्रतिरूपं तत्तदनुसारिशीलं स्वभावो यस्य तम् । कुतः ? आत्मना देहादिसङ्ग्रहेण निगूढो बोधो यस्य तम् एवम्भूतं महापुरुषं त्वां वन्दे ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
अष्टमोऽध्यायः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मायामयाः प्रकृतिसम्बन्धिन्यस्तत्तद्धर्मा इत्यध्याहारः शुक्लां तनुमित्यनन्तरोक्तेः लीलाधृता लीलया धृता अन्ये रजस्तमसी न प्रशान्त्यै याभ्यां व्यसनादिः स्यात् ॥ ४५ ॥

यस्मात्त्वं ते रूपं भावयता दर्शितं तस्मात् आत्मज्ञानाय ज्ञानप्रदमित्यर्थः ॥ ४६ ॥

(१) परदेवताय (२) त्वन्मायया (३) साक्षाद्यः (४) उपपद्य (५) अन्वहमहं इति भिन्न० पा० ।

श्रीसुदर्शनसूरिकृतशुकपक्षी[illegible]

आत्मसुखम् आत्मानुभवमेवं कामं [illegible] नर्वाभ्रमिमित्यर्थः ॥ ४७ ॥

यं वै इति वितथाभ्रपथैः भ्रमद्धीः [illegible] भ्रान्तमनाः जन्तुः सर्वपदार्थेषु सन्तमपि न[illegible] ण्याधिकारी तवाङ्घ्रिमुपसाद्य त्वां वेद [illegible] योजना । यद्वा, अखिलगुरोरिति द्वितीय[illegible]

यद्दर्शनमिति यस्य दर्शनोपायभूतां [illegible] मिति निगमविशेषणम् अजो ब्रह्मा येषां [illegible] मपरिच्छेद्यज्ञानवैभवम् ॥ ४९ ॥

इति श्रीमद्भागवतव्याख्याने द्वा[illegible]

श्रीसुदर्शनसूरिकृतशुक[illegible]

अष्टमोऽध्यायः ॥ [illegible]

———

श्रीमद्वीरराघवाचार्यकृतभागवत[illegible]

ननु, ब्रह्मरुद्रावपि मयैव मूर्ती [illegible] कि-मिति भजसे इत्यत आह—सत्त्वमिति । [illegible]न्धो ! जीवबन्ध ! यद्यपि यद्यपि अस्य जगत[illegible] तत्र विष्णुरुद्रब्रह्मतनव इति त्रिशब्दमव्य[illegible]त्यग्रे दर्शनास्ताश्च सत्त्वं रजस्तम इति याः तव माया तयैव कृताः लीलाधृताः लीलयैव भृता लीलापदेन विष्णवाद्या[illegible]तनुसम्बन्धस्य कर्ममूलत्वव्यावृत्तिः तथापि तत्र सत्त्वमयी या तनुः सैव नृणामुपास्यमाना शान्त्यै मोक्षोपयुक्तशान्तये भवति नान्येऽन्ये ब्रह्मरुद्राख्ये तन्वौ न शान्त्यै भवतः प्रत्युत ताभ्याम् उपास्यप-मनमोहमिथो भवेयुः व्यसनं दुःखं भीभयं यद्वत्वत्र स्थितिहेतु-भूताया विष्णवाख्यतनोरपि मायाकृतत्वोक्त्याऽप्राकृतसत्त्वगुण-परिणामरूपत्वमवगम्यते तत्र "सत्त्वादयो न सन्तीशे यत्र च प्राकृता गुणाः" इति श्रीभगवद्विग्रहे प्रतिषिद्धं तथापत्र सत्त्व-मिति या माया रजस्तमश्चेति च या माया ताभ्यां मायाभ्यां कृता इति योज्यम् तत्र सत्त्वशब्देन [illegible] सत्त्वं गुण-सत्त्वाद्विलक्षणमित्युक्तं शुद्धसत्त्वमयं त्रिगुणात्मकप्रकृतिद्रव्य-विलक्षणं विवक्षितम् इत्थं योजनार्थमेव सत्त्वं रजस्तम इति व्यस्तनिर्देशः कृतः प्रथमाध्यायेऽपि "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते" इत्यत्रायमेवार्थः रजस्तमःशब्दाभ्यां सत्त्वमिश्रौ तौ विवक्षितौ ॥४५॥

यतः सत्त्वमय्येव प्रशान्त्यै न त्वन्ये तस्मात्तिपुणा बुधा एता-मेव उपासते तस्मादिति । अथ ननु, हे भगवंस्तावकानां त्वद्भ-क्तानां त्वद्विना त्वस्य तव च दयितां शुक्लां शुद्ध-सत्त्वमयीं तनुं कुशला भजन्ति काऽसौ शुक्ला तव तनुरित्यत्राह, सात्वताः पुरुषरूपमुशन्ति सत्त्वं लोका इति सात्वताः पञ्च-रात्रसिद्धान्तनिष्ठा लोका जना यन्नारायणाख्यं यत्पुरुषरूपं पुरुषाकृत्याविष्कृतं रूपं पुरुषस्य तव रूपं वा सत्त्वं विशुद्ध-सत्त्वमुशन्ति उपास्यत्वेनेच्छन्ति सैव शुक्ला तनुरित्यर्थः । तद्वि-धिनाह—यतः पुरुषरूपात्सत्त्वादुपास्यमानादभयं संसृतिभयाभावः

उतापि चात्मसुखम् आत्मानुभवसुखं तथाभ्युदयरूपमभयसुखं नास्ति ॥ ४६ ॥

इत्थमनन्तकल्याणगुणगणं स्तोतुमहं न शक्नोमीत्यभिप्रेत्यो-पस्थितैर्गुणैर्विशिंषन् प्रणमति—तस्मा इति । पुरुषाय पुरुषिणामसि, ददासीति तथा चतुर्विधपुरुषार्थप्रदायेत्यर्थः । भूते सर्वान्तरात्म-त्वेन भूमगुणविशिष्टत्वात् एव विश्वाय विश्वरूपेण वर्तमानत्वात् एव विश्वगुरवे विश्वस्य हितकराय आत्मनः शरीरिणां गुरवे च तत्वादिति भावः । परदेवतायै इत्यनेन ततोऽधिकदैवतान्तरव्यावृत्तिः नारायणायेत्यनेन प्राप्यत्वं प्रापकत्वं च विवक्षितम् ऋषय इत्यनेन सर्वज्ञत्वं नारायणपदसमभिव्याहृततरोत्तमशब्देन शिष्याचार्यरूपेण वाखिलाध्यात्मविद्याप्रवर्तनद्वारा जगदुज्जीवनपरत्वं विवक्षितम् । हंसायेत्यनेनाश्रितानां पापनिराकर्तृत्वं संयतगिरे इत्यनेन "सर्वमिदम-भ्यात्तोऽवाक्य नादर इत्यत्रेव परिपूर्णतयाप्युक्तवचनपाकत्वं निगमे-श्वरायेत्यनेन वेदाऽऽचार्यत्वं च विवक्षितमिति ॥ ४७ ॥

ननु, त्वम् इव माम् इत्थं भूतं सर्वेऽपि किं न विदन्ति तत्राह यं वा इति । त्वन्मायया सृता सृतिर्यस्यात एव वितथैर्मिथ्याके-रवपथैरिन्द्रियमार्गैर्भ्रमन्ती धीर्यस्य सः देहात्माभिमानिनी धीर्यस्ये-त्यर्थः भ्रमद्धीरिति पाठे विषयप्रावण्येन चञ्चद्भिर्वितथापथ-पथैर्यं त्वां न वेद कथम्भूतमपि जनेषु चेन्द्रियादिषु जनकेष्व-सुषु प्राणेषु हृदि हृदयं स्वरूपेषु विषयेषु नियन्तृतया सन्तमपि नाहं न कोऽपि वेदेत्याह—यत्नवाखिलगुरोरपि, प्रथमं त्वत्प्रवर्तितः यः तं वेदमुपसाद्य स्थित इति शेषः स उ एव सद्यस्त्वां साक्षात्वेन वेदान्तविहितोपासनाविशुद्धमनसा वेदेत्यर्थः ॥४८॥

वेदेनैव ज्ञानमित्युपपादयन्प्रणमति—यदिति । यस्य दर्शनो-पायभूतो निगमो वेद आत्मरहस्यप्रकाशकः अन्यथा दुर्बोधत्वमाह—अजपरा इति । अजो ब्रह्मा पर उत्कृष्टःप्रधानो येषां ते ब्रह्म-मुख्याः कवयो यतन्तः साङ्ख्ययोगादिभिर्यतमाना अपि । यद्वा, हिरण्यगर्भकपिलादयः योगसाङ्ख्यादितन्त्रप्रणयनेन स्वात्मरूपाव-मर्शनाय यतमाना अपि यत्र त्वयि विषयभूते मुह्यन्ति तामसं भूतं सर्वावविषयप्रतिरूपशीलं सर्वेषां वादा योगसाङ्ख्यादिवादाः प्रकृत्युपादानत्वपुरुषनिमित्तत्वादिवादास्तेषां प्रतिक्षेपकं रूपं स्वरूपं शीलं स्वभावः सार्वज्ञसर्वशक्तित्वादिः प्रकृतिपुरुषादिष्वसम्भावितो यस्य तमात्मनि त्वस्मिन् गूढस्तैरविज्ञातः बोधः अपरिच्छेद्य-ज्ञानवैभवो यस्य तं महापुरुषं वन्दे ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्

अष्टमोऽध्यायः ॥ ८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देहादिमात्रस्य निमित्ते रजस्तमसी तद्भावस्य सत्त्वं स्थापि-यतामिति भावेनाह—सत्त्वमिति । हे देव ! आत्मबन्धो ! सत्त्वं रज-स्तम इति गुणास्त्वया लीला धृताः जगत्सर्गस्थितिनाशे धृताः अङ्गीकृताः । ननु, जीववद्दानिव किङ्कुर्वन् [illegible] धार्याः स्युरिति तत्राह, स्थित्येति । अस्य जगतः स्थित्यादिहेतवः किमा-त्मका इति तत्राह, मायामया इति । इच्छात्मकाः यद्यपि यद्यपि

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तथापि सत्त्वमयः सात्त्विकः प्रशान्त्यै मुक्तये भवति अन्ये राजसतामसाः प्रशान्त्यै न स्युः किन्तु देहाहंभावेन संसाराय स्युरित्यर्थः । यद्वा, सत्त्वादन्ये रजस्तमसी शान्त्यै न स्यातां पुनः कस्मै भवतः इति तत्राह, नृणामिति । याभ्यां रजस्तमोभ्यां नृणां व्यसनादयः स्युः च एवार्थे त्रिविधानां नृणां मध्ये सत्त्वमेव एव इति वा ॥ ४५ ॥

उपसंहरन्नेव स्तौति—तस्मादिति । यस्मात्सत्त्वमेव निःश्रेयसहेतुस्तस्मादिह कुशलाः भगवतः कल्याणानां तावकानामीश उपासायोग्यां स्वतो दयितां शुक्लां तव तनुं भजन्ति तावकानामिति किं विशिष्यतेऽत्रेति तत्राह, सात्वता इति सात्वताः साधुगुणयुक्ताः पुरुषाः सत्त्वं सत्त्वगुणप्रवर्तकं पुरुष इति रूपं शब्दो यस्य तत्तथा पुरुषशब्दवाच्यमित्यर्थः यजन्ति कामयन्त इति यद्यस्मात्तस्माद्विशेषवचनम् यतः पुरुषरूपात् लोकोऽभयं विन्दति आत्मसुखमनेनापि लभते तस्मादन्यदभयादिदं न यद्वा, यतः सत्त्वाल्लोको रक्षितो भवति अभयममृतात्मसुखमाप्नोति अन्यद्रजस्तम इति यद्वयं स्वरूपसुखादिहेतुर्न भवति ॥ ४६ ॥

निरन्तरध्यानासमर्थस्योपास्तिप्रकारमाह—तस्मा इति । विश्वाय विश्वनाम्ने अस्य सर्वनामसंज्ञा नास्ति सर्वान्तरस्थात्सर्वप्रेरकत्वेनाभिप्रायेण वीप्सत्वेन संयतगिरं मितभाषणाय ॥ ४७ ॥

भवत्साक्षात्कारो भवत्प्रसादायत्तो न स्वप्रयत्नसाध्य इत्याह, यमिति । हे वितत ! यः पुरुषोऽसत्पथैः शब्दादिभिः भ्रमद्धीर्वै त्वां न वेद कीदृशं स्वेषु स्वेन्द्रियेषु असुषु प्राणेषु हृद्यपि दृक्पथेषु दृग्विषयेषु च अन्तः निर्दोषत्वेन वर्तमानं ज्ञापकाभावात् न जानातीति नेत्याह, तवेति । अखिलगुरोस्तव वेदं ज्ञापकप्रमाणम् उपपद्यापि सः साक्षाद्यः अहमयोग्यः विषयभोगशीलः तस्य तव मायया बन्धकशक्त्या आवृतमतिः आच्छादितज्ञानस्तस्मात्त्वत्प्रसादेन त्वज्ज्ञानं सुलभमित्यर्थः ॥ ४८ ॥

त्वज्ज्ञानस्य किं माहात्म्यं येन त्वदनुग्रहेण सर्वपापाद्यं स्यादिति तत्राह—यद्दर्शनमिति । यस्य तव दर्शनं ज्ञानं निगमे तत्त्वनिर्णायके वेदे प्रतिपादितम् आत्मरहःप्रकाशो यस्मात्तथा तत् अजपराः विष्णुपरायणा यतन्तः कृतोपासनप्रयत्नाः कवयो यत्र परमात्मरहस्ये मुह्यन्ति इदमित्थमिति ज्ञातुम् उपदेष्टुं च न शक्नुवन्ति तं भगवन्तं वन्दामहे इत्यन्वयः । सर्ववादानां सर्वसिद्धान्तानां विषयाणां प्रतिपाद्यानाम् अर्थानां प्रतिरूपशीलं विरुद्धस्वभावं तदुक्तानन्यार्थत्वस्वभावमित्यर्थः आत्मनि जीवविषये गूढबोधं जीवेनाज्ञातस्वरूपमित्यर्थः । आत्मना ब्रह्मेति वा ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
अष्टमोऽध्यायः ॥ ८ ॥
(विजयध्वजतीर्थीयटीका समाप्ता)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

सत्त्वं रज इति युग्मम् ॥ ४५-४७ ॥

यं वै हीति । स्वेषु स्वेन्द्रियेषु सन्तमपि एषामेव नियन्तृत्वेन असुषु कर्मेन्द्रियेषु दृक्पथेषु ज्ञानेन्द्रियेषु इत्युभयात्मके "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति श्रीगीतोपनिषद्भ्यः ॥ ४८—४९ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
अष्टमोऽध्यायः ॥ ८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ननु, सत्यमहं ज्ञानि देवनारायणमपि भजतु नरनारायणं भजनमेव [illegible] देवा अन्यमूर्तय एव ते इति तत्राह—सत्त्वमिति । आत्मबन्धो ! हे मायानाथ! यस्य इन्द्रचन्द्रादि देवमनुष्यादिमयस्य जगतः स्थित्यादिहेतवः सत्त्वादयो गुणास्तेऽपि मायामया एव किं पुनस्तत्कार्यभूता इन्द्राद्यास्तेषां भजने मायातीतं त्वां कथं विन्दन्तीति भावः । भवदीयासु लीलासु मध्ये सत्त्वमयी लीला प्रशान्तौ भूता [illegible] रजस्तमोमय्यौ याभ्यां व्यसनमोहमियौ भवतः तद्धेतेनाविशतोऽपि लीला मायामय्य एवेत्यन्वयः ॥ ४५ ॥

ततस्तव मायामयीमिन्द्रादिमूर्तिं गुणां विहाय शुद्धसत्त्वस्वरूपा एव तस्य तद्भक्तानां च मूर्तीरभिमता उपासते इत्याह, तस्मादिति यत् यतः सात्वता नारदाद्याः पुरुषरूपं विष्णुस्वरूपं सत्त्वम् उपासन्ति । ननु, कीदृशं सत्त्वं तत्राह, यतो लोकः किं स्वर्गादिकः न यत्र अभयं पातहेतुकभयाभावः आत्मसुखम् आत्मभूतं सुखं च ननु कर्मफलं स लोको वैकुण्ठो यतस्तत् शुद्धसत्त्वं न चान्यत् प्राकृतं सत्त्वम् ॥ ४६ ॥

पुरुषाय पुरुषाकारत्वेऽपि भूम्ने सर्वव्यापकाय तथापि विश्वाय देवमनुष्यतिर्यगादिसर्वरूपाय आविर्भावप्रयोजनमाह—विश्वगुरवे भक्तिज्ञानवैराग्याण्युपदेष्टुं न केवलमुपदेशेन स्वयमपि तु भजनीयमित्याह, परदेवताय अभीष्टदेवाय ज्ञाऽनामका नरनारायणमाह, ऋषये ऋषिस्वरूपनारायणाय ऋषिस्वरूपनराय स्वमाय च त्यक्तपरिग्रहत्वमाह हंसाय मौनशालित्वमाह संयतगिरे तथापि निगमेशाय वेदप्रवर्तकाय ॥ ४७ ॥

सर्वदुर्ज्ञेयत्वमाह—यं न इति । वितथाभिपथैः रूपरसादिभिः गन्धादिग्राहकमार्गै-र्भ्रममतिः भ्रान्तबुद्धिः पुमान् स्वेषु स्वेन्द्रियेषु असुषु प्राणेषु हृद्यपि नियन्तृत्वेन सन्तमपि यं त्वां न वेद अन्तर्यामिणम् दृक्पथेषु सन्तमपि त्वां तत्रापि तया प्रसिद्धया मायया आवृतमतिर्न वेद अन्येषां का वार्ता ! स तु [illegible] आद्यो ब्रह्मापि तवाखिलगुरोः साक्षादेवमुपलभ्य प्राप्यापि यं त्वां नैव वेद ॥ ४८ ॥

वेदव्याख्यातृत्वेऽपि दुर्ज्ञेयत्वमाह—यस्य तव दर्शनं ज्ञानं निगमे वेदशास्त्र एव, कीदृशम् आत्मनस्तव रहस्यस्य प्रकाशकं

श्रीमद्विश्वनाथचक्रवर्तिकृत[illegible]

ननु, नहि वेददर्शिन [illegible] मां [illegible] मुह्यन्तीति। यत्र वेदे भजवतः भजो [illegible] ते मुनयोपि यजन्तोपि भवत्तत्वाज्ञा[illegible] परोक्षवादित्वाद्गम्भाद्भेदत्वमिति [illegible] विविनक्ति-सर्वे वादा विवादयो [illegible] तेषां प्रतिरूपमेव मत्वनुरूपं शीलं चरित[illegible] आत्मन्येव गूढो गुप्तीकृतो बोधः स्वतत्वं [illegible]

इति सारार्थदर्शिन्यां हर्षिण्यां भ[illegible]

द्वादशेऽष्टमोऽध्यायः सङ्गतः [illegible]

श्रीमच्छुकदेवकृतसिद्धान्त[illegible]

ननु, ब्रह्मशिवयोरपि भवन्मूर्तित[illegible] वेको भजनीयः कुतः ? इत्यत्राह-सत्वमि[illegible] आत्मबन्धो ! आत्मनां ब्रह्मादीनामंशभूत[illegible] तस्य सम्बोधने हे आत्मबन्धो ! अस्य [illegible] सत्वं रजस्तम इति यद्यपि तव मायाम[illegible] मूर्तयः मायामय्यः यद्यपि यद्यपि तवैव [illegible] तथापि सत्वमयी प्रशान्त्यै मुक्तये भवति [illegible] शान्त्यै न भवत इत्यर्थः। प्रत्युत [illegible] भवन्ति सत्वमयीत्वेन स्थितत्वं [illegible] कृतमसत्वमयी बोध्या ननु प्राकृतसत्व[illegible] "सत्वादयो न सन्तीशे यत्र च प्राकृता [illegible] माया मया इति श्रुतियो वाक्तीतिमनुकू[illegible] ॥ ४५ ॥

यस्मादेवं तस्मात् हे भगवन् ! इह भजनभूमौ खद्यितां भगवत्प्रियां तावकानां भवदीयानां च दयितां शुद्धां शुद्धां तमःशब्दवाच्यप्रधानविलक्षणां तव तनुं कुशलाः भजन्ति, यत् यतः सात्वताः सत्वं शुद्धमप्राकृतं सत्वं पुरुषस्य परमपुरुषस्य रूपं विग्रहम् उशन्ति मन्यन्ते भजनफलमाह यतः शुक्लतनुभजनतः भजनकाले एव आत्मसुखम् अत्र "ब्रह्मसमश्नुते" इति ज्ञेयप्राप्तिसुखम् अभयं सर्वतो हि भयाभावः चरमकलेवरत्यागानन्तरं लोको भगवल्लोको लभ्यते भन्यत्संसारो नेत्यन्वयः ॥ ४६ ॥

नमस्करोति—तस्मा इति ॥ ४७ ॥

नन्वेवम्भूतमन्यः कुतो न जानातीत्यत्राह—यमिति। वितथाभ्रपथैर्निरर्थकेन्द्रियमार्गैर्भ्रमन्ती धीर्यस्य सः यतस्त्वन्मायया आवृता मतिर्यस्य सः सदेहारामाभिमानीयं खलु इन्द्रियेषु असुषु प्राणेषु हृदयि नियन्तृतया अवतारवेलायां रूपयत्स्वपि सन्तं न वेद किं बहुना ऊ प्रसिद्धो यः स आद्यो ब्रह्मापि साक्षात्त्वा तस्त्वेव नैव वेद पुनः अखिलगुरोस्तव वेदमासाद्य वेदेतियोजना ॥ ४८ ॥

वेदद्वारा यत्किञ्चिद्ब्रह्मापि जानातीत्युक्तमियत्तावच्छिन्नतया तु ब्रह्मादयो नैव त्वां जानन्ति तं त्वां वन्दे इत्याह—यदिति। यस्य तव दर्शनं ज्ञानं निगमे एव कोशतम् आत्मरहः प्रकाशम् आत्मा परमात्मनस्तव रहस्यप्रकाशकम् यत्र दर्शने त्वयि चा अजप्रा ब्रह्मप्रमुखाः यतन्तोपि मुह्यन्ति अत एव सर्वे वेदाः हैरण्यगर्भपाशुपतादयस्तेषां ये विषयास्तत्प्रतिरूपं प्रतिकूलं मत्वनुकूलं शीलं यस्य तस्याम् आत्मन्येव गूढो बोध इयत्तानवच्छिन्नज्ञानैश्वर्यलक्षणः प्रबोधो यस्य तं महापुरुषं वन्दे ॥ ४९ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

अष्टमाऽध्यायार्थप्रकाशः ॥ ८ ॥

भाषा टीका।

हे देव ! हे आत्मा के सखा ! इस जगत् के पालन संहार और उत्पत्ति करने वाली अपनी इच्छामय सत्व रज और तम ये तीन प्रकार की तनुओं को आप लीला से ही धारण करते हो, परन्तु उनके मध्य में सत्वमयी जो विष्णुतनु है वही मोक्ष देने के लिये समर्थ है, और जो रजोगुणी तमोगुणी ब्रह्मा महादेव रूप दो तनू हैं, वे नहीं। सो इतना ही मात्र नहीं, कि—उन दोनों के भजने से शांति मात्र का अभाव है, किंतु उनके भजने से अनिष्ट भी होता है, क्योंकि ? व्यसन मोह और भय ये भी उनही के भजने का फल होता है ॥ ४५ ॥

तस्मात् हे भगवन् ! इस संसार में जो कुशल जन हैं वे आप की जो शुद्ध सात्विक नारायणाख्य तनु हैं, और भक्तोंजन के मध्य में जो शुद्ध सात्विक नराख्य तनु हैं तिन हीं का भजन करते हैं, क्योंकि—वो ही उनको प्रिय लगती है। और उसमें कारण यह भी है, कि—जो सात्वत (पंचरात्र) निष्ठ भागवत हैं, वे सत्व को ही परम पुरुष का रूप मानते हैं और रज तम को नहीं। क्यों कि ? जिस सत्व से वैकुण्ठ लोक की प्राप्ति और अभय तथा आत्मसुख की भी प्राप्ति होती है ॥ ४६ ॥

षड्गुण परिपूर्ण, भूमा पुरुष, विश्वरूप, विश्व के गुरु, परम देवत, शुद्धस्वरूप, नियतवाणी वाले, निगमके ईश्वर, ऐसे श्रीनारायण और नरोत्तम जो आपरूपी दोनों आप हैं, तिन आप को नमस्कार हो ॥ ४७ ॥

असत् इन्द्रियों के मार्गों से विक्षिप्त बुद्धि वाले, और आप की माया से आवृत मति वाले, पुरुष अपने हृदयाकाश में, प्राणों में नेत्रों में आप के वर्त्तमान होने पर भी जिन आप को नहीं जानते हैं। तथा आपकी माया से विमोहित बुद्धिवाले साक्षात् ब्रह्माजी भी अखिल गुरु जो आप हो तिन से वेदों को प्राप्त होकर के ही ज्ञाता हुए हैं ॥ ४८ ॥

बडे २ यत्न करने वाले ब्रह्मा प्रभृति ज्ञानी लोग जिस वेद के विषय में मोह को प्राप्त होते हैं वही वेद जिन

भाषा टीका।

आपके रहस्य का प्रकाश करने वाला और जिन आपके यथार्थ ज्ञान कराने वाला है, तिन महापुरुषों को मैं वन्दन करता हूं। आप कैसे हैं? कि—सर्व वाद के विषय के अनुकूल स्वभाव वाले हैं अर्थात जो जैसे निरूपण करें उसको, उसी के अनुकूल भान होने वाले हो, फिर आप कैसे हैं, कि? आप ने ही अपने बोध को अर्थात स्वविषयक ज्ञान को [illegible] अत्यंत गुप्त करके रखा है, कि—जिसमें प्राकृत मनुष्य वाले आपको न जान सकें ॥ ४९ ॥

इति श्रीमद्भागवत द्वादशस्कन्ध में आठवें अध्यायकी, श्रीवृन्दावनस्थ पं० भागवताचार्यकृत भाषा टीका समाप्ता ॥ ८ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे अष्टमोऽध्यायः ॥ ८ ॥

[illegible]ऽध्यायः ।

—:०:—

[illegible] उवाच ।

संस्[illegible] मार्कण्डेयेन धीमता ।
नारा[illegible]प्रीत आह भृगूद्वहम् ॥ १ ॥

[illegible]गवानुवाच ।

भो[illegible]ति सिद्ध आत्मसमाधिना ।
मा[illegible]न्या तपःस्वाध्यायसंयमैः ॥ २ ॥
व[illegible]म त्वद्बृहद्व्रतचर्यया ।
व[illegible] वरदेशादभीप्सितम् ॥ ३ ॥

[illegible]षिरुवाच ।

[illegible] प्रपन्नार्तिहराच्युत! ।
[illegible]मो यद्भवान् समदृश्यत ॥ ४ ॥
[illegible] यस्य श्रीमत्पादाब्जदर्शनम् ।
म[illegible] स भवान् मेऽक्षगोचरः ॥ ५ ॥
[illegible]च्च ! पुण्यश्लोकशिखामणे ! ।
द्रष्टुं[illegible] यया लोकः सपालो वेदसञ्ज्ञिदाम् ॥ ६ ॥

सूत उवाच ।

(१)इतीडितोऽर्चितः काममृषिणा भगवान् मुने! ।
तथेति स स्मयन् प्रागाद्बदर्याश्रममीश्वरः ॥ ७ ॥
तमेव चिन्तयन्नर्थमृषिः स्वाश्रम एव सः ।
वसन्नग्न्यर्कसोमाम्बुभूवायुवियदात्मसु ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवमे भगवन्माया दिदृक्षोर्दर्शने मुहुः ।
मायाशिशोर्दर्शनं च मुनेर्निर्वेदनिर्गमैः ॥

भगवतः परितोषपूर्वकं तदपेक्षितवरदानं कथयितुमाह, संस्तुत इत्यादिना ॥ १ ॥

आत्मसमाधिना चित्तैकाग्र्येण ॥ २ ॥

एवं ते परितुष्टाः स्मेति बहुवचनं सर्वदेवाभिप्रायेण वर- देशादित्येकवचनं द्वयोरैक्याभिप्रायेण प्रतीक्ष्य गृहाण ॥ ३ ॥

वरेण छन्दयता त्वया जितमुत्कर्षो दर्शितः मम तु वरा- काङ्क्षा नास्तीत्याह, वरैत्रेति ॥ ४ ॥

यस्य तव श्रीमत्पादाब्जदर्शनं मनसापि पुरुषैरपि प्राप्य कृतार्था भजन्तो भवन्ति स भवान्मेऽक्षगोचरो जातोऽस्ति किमतः परं वरेणास्तु॥ ५ ॥

द्रष्टुमिच्छामि लोकपालैर्ब्रह्मादिभिः सहितोऽयं लोको जनो यया सन्ति वस्तूनि भेदम ॥ ६ ॥

---

*ब्रह्मर्षिवर्योऽसीति वीर० विज० पा० (१) इतीरित इति वि० पा०

श्रीधरस्वामिकृतभावार्थदीपिका ।

तथेति द्रक्ष्यसीति स ईश्वरः स्मयन् प्रागात् पाठान्तरे क्रियाविशेषणम् ॥ ७ ॥

तमेवार्थं मायादर्शनरूपम् अग्न्यादिमूर्तिषु ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—५ ॥

मायाम् आश्चर्यशक्तिम् ॥ ६—१२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं संस्तुतस्तदभिमतं प्रायच्छदित्याह—संस्तुत इत्यादिना । हे भृगूद्वह ! द्वितीयान्तपाठे भृगूद्वहं मार्कण्डेयमित्याह ॥ १ ॥

उक्तिमेवाह—भोभो इति द्वाभ्याम् । आत्मसमाधिना चित्तैकाग्र्येणानपायिन्याऽविच्छिन्नया मयि भक्त्या च तव आहिमित्र सिद्धो ब्रह्मर्षिश्रेष्ठोऽसि ॥ २ ॥

तव बृहद्व्रतचर्यया नैष्ठिकब्रह्मचर्येण वयं परितुष्टाः स्मः यथामिति बहुवचनं सर्वदेवाभिप्रायकं वरदानामीशोऽस्मत्तः वरं प्रतीच्छ वृणीहि ते तुभ्यं भद्रं शुभमस्तु ॥ ३ ॥

इत्थं वराय प्रचोदितः प्राह—जितं त इति त्रिभिः । देवदेवो ब्रह्मा तस्याधीश ! प्रपन्नानामार्तिं क्लेशं हरतीति तथाभूत ! आभिमुख्य ज्यावर्ततीति तथा योऽस्माकं भवान् सम्यगदृश्यतेति यदेतावतैव वरेणालम् ॥ ४ ॥

तत्र हेतुतया तद्दर्शनस्य दुर्लभतामाह—वाञ्छन्तीति । ब्रह्मादयो ब्रह्मादयः योगपक्वेन योगविशुद्धेन मनसा यस्य श्रीमत्पादाब्जदर्शनं केवलं वाञ्छन्ति न तु पश्यन्ति स भवान् ममाक्षिगोचरोऽसि ॥ ५ ॥

अथापीति । यद्यपि त्वद्दर्शनमेव परं तथापि तव मायामाश्चर्यशक्तिं द्रष्टुं द्रष्टुमिच्छामि इत्यर्थः । तां विशिनष्टि यया मायया लोकपालैर्ब्रह्मादिभिः सहितो लोको जनसन्निधौ सत्स्वप्यद्ये त्वयि भिन्नां भेदं देवतिर्यङ्मनुष्यस्थावरभेदं वेद यया कृतां भिदां वेद तां मायामित्यर्थः ॥ ६ ॥

इतीति । ईडित उत्कीर्तितश्च भगवान् हे मुने ! स्मयो मन्दहासस्तेन सहितं यथा तथा तथेति द्रक्ष्यसीत्यनुगृह्य बदर्याश्रमं प्रति प्रागात् ॥ ७ ॥

तमेवेति । तमेवार्थं मायादर्शनरूपमर्थं चिन्तयन् कदा द्रक्ष्यामीति चिन्तयन्नित्यर्थः । अग्न्यादिष्वप्सु तत्रात्महृदयम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

संस्तुत इति ॥ १ ॥

आत्मनो हरेः समाधिनोपासनाऽभ्यध्यानेन सिद्धः कृतकृत्यः ॥ २ ॥

प्रतीच्छ स्वीकुरु ॥ ३ ॥

अनन्यभक्तेर्भगवद्दर्शनं परं वरविषयमपि भगवद्दर्शनादितरो वरोऽनभीष्टो मुमुक्षोरिति हृदि कृत्वा प्रतिवक्ति—जितमिति ॥ ४ ॥

ब्रह्मादिदुर्लभं तूक्तं भावस्तदेव साध्यमस्य तदभावात्तथापि तुष्यमितेच्छमपि कृपयेति तथाह—वाञ्छन्तीति । भक्तियोगपक्वेन भक्तपुण्यावतारो परिपाकं प्राप्तेन वाऽक्षगोचरोऽभूदिति शेषः ॥ ५ ॥

ननूक्तं सत्यं तथापि भवत्प्रसादेनैव फलं मान्यदस्तीति किमत्राह—अथापीति । मायाघटनाघटकशक्तिलक्षणां लोकोपकारकत्वादिगुणकत्वेन द्रष्टुमपेक्षामाह, ययेति सतः परस्याः सर्वस्मात् भिन्नां वैलक्षण्यं वेद तादृशीं द्रष्टुमिच्छामि द्रष्टुमाश्चर्यलक्षणामित्यर्थः ॥ ६ ॥

स्मयमानः स्मितं तथा द्रक्ष्यसीत्युक्त्वा ॥ ७ ॥

आत्मनि हरिमनु ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १ ॥

तपस्वाध्यायसंयमैर्यं आत्मसमाधिश्चित्तैकाग्र्यं तेन वा अनपायिनी मयि च भक्तिः तया सिद्धोऽसीत्यन्वयः ॥ २ ॥ ३ ॥

एतावता हरेर्दर्शनं पर्याप्तिर्जाता किं तत् वक्तव्यमिति ॥ ४ ॥

यतो वृणीतेति । अजादयोऽपि कृतार्था भवन्तीति शेषः ॥ ५ ॥

अथापि माहात्म्यमयकौतुकप्रश्रयेति भावः । ननु जगत्पश्यन् मम मायां पश्यन्नेवासि, तत्राह ययेति । अत्र सतो वस्तुनो भिदां विकारं यत्र तया मोहितया सत्या सद्वस्तु अन्योऽपि सपालो लोको वेद जानीयात् ॥ ६ ॥ ७ ॥

तमेव श्रीहरिमेव अर्थं परमार्थरूपं चिन्तयन् ननु मायादर्शनमित्यर्थः । अकर्मफलनिर्दिष्टमिति न्यायेन ॥ ८—१९ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मायादर्शनजं दुःखं नवमे तु मुनेः स्थिरौ ।
प्रवेशो निष्क्रमः पानो वटाब्धौ वटपर्यये मुहुः ॥ १ ॥ २ ॥

वयमिति बहुवचनमत्र प्रस्तोऽस्मादृषिणोमायभिप्रायेण ॥ ३ ॥

जितन्ते तव सर्वोत्कर्षोऽस्त्वेव ॥ ४ ॥

गृहीत्वा कृतार्था भवन्तीति शेषः ॥ ५ ॥

द्रष्टुं विश्वं यतः कारणस्य भिदां कार्याकारेण नानाभेदं यद्वा सतो ब्रह्मणश्च भिदां प्रपञ्चं सति विकारयाम ॥ ६ ॥

स्मरणीति । मायादर्शनं दुःखानुभवहेतुरेव केवलं न एव परो म्रियते देहस्य एव परस्याप्रपञ्चरूपत्वात् किन्तु मायादर्शनकौतुकं मायामायादिनमिच्छन्यथा तदनुबुभूषा नैव निवर्तिष्यते तस्माद् दुःखमनुभूयैव ततो निवर्ततां यथा वायु-वहेतावपि कर्मणि कांक्षमसंमाने हठेन स्थाने निवर्त्तयितुमसमर्थस्य पितुस्त्वनुग्रहदानमेवेति किन्तु भक्तस्यास्य निहतार्थे

ध्यायन [illegible] भावद्रव्यैरपूजयत् ।
क्वचि [illegible] प्रेमप्रसरसम्प्लुतः ॥ ९ ॥
तस्यै [illegible] पुष्पभद्रातटे मुनेः ।
उपा [illegible] ब्रह्मन् ! वायुरभून्महान् ॥ १० ॥
तं चण्डशब्द [illegible] लाहका अन्वभवन्करालाः ।
अक्षस्थविष्ठ [illegible] स्तनन्त उच्चैरभिवर्षधाराः ॥ ११ ॥
ततो व्यदृश्य [illegible] समन्ततः क्ष्मातलमाग्रसन्तः ।
समीरवेगोर्मि [illegible] यावर्त्तगभीरघोषाः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसा [illegible]

धिशुरूपेण तन्मध्येपि स्वदर्शनानन्दो [illegible] व-
त्वज्ञकं हिमतम् ॥ ७ ॥
तमेवार्थं मायादर्शनरूपम् ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धा [illegible]

एवं संस्तुताद्भगवतः सकाशात् [illegible] कं वर
लब्ध्वा मुनिना यदनुभूतं तत्रवमे वर्ण [illegible] भृगूद्वहं
मार्कण्डेयम् ॥ १ ॥
आत्मसमाधिनाऽऽत्मविषयकसम [illegible]
प्रतीच्छ गृहाण ॥ ३ ॥
ते तव जितमुत्कर्षो वर्त्तते ॥ [illegible]
यस्य तव श्रीमत्पादाब्जदर्शने [illegible] शा अजा-
दयो भवन्ति चतुर्मुखत्वादिमाप्य [illegible] अजादयः
कृतार्था भवन्तीत्यध्याहारः स भव [illegible] प्रत्यक्षो
जातः किमतः परं वरेणेत्यर्थः ॥ ५ ॥
यद्यपि भवद्दर्शनमेव वरः अथापि तव मायामाश्चर्य-
रूपां शक्तिं द्रष्टुमिच्छामि यया स पालो लोकपालै-
र्ब्रह्मादिभिः सहितो लोको जनः सद्भिदां सतः कारणस्य नाना-
वस्थारूपं भेदं वेद तां तव मायावैभवदर्शनेन त्वच्छरणो भवि-
ष्यामीति भावः—
"स एवमनुभूयेदं नारायणविनिर्मितम् ।
वैभवं योगमायायाः तमेव शरणं ययुः" ॥
इतिवक्ष्यमाणात् ॥ ६ ॥
स भगवान् स्मयन् मन्दहासं कुर्वन् तथेतिस्वीकृत्य प्रागात् ॥७।८॥

भाषा टीका ।

ॐवटदलपुटशायिने नमः ।

सूत उवाच ।

सूतजी बोले, कि—बुद्धिशाली मार्कण्डेय ने जब भगवान् की
इस प्रकार स्तुति करी, तब नरके सखा श्रीनारायण भगवान्,
भृगुकुलोत्पन्न मार्कण्डेय ऋषि पर प्रसन्न होकर बोलते हुए ॥ १ ॥

श्रीभगवानुवाच ।

श्रीभगवान् बोले, कि—हे ब्रह्मर्षिवर्य ! तुम चित्त के
एकाग्रपने से और मेरे विषै निर्विघ्न भक्तिसे तथा तप
स्वाध्याय और संयमों से सिद्ध हुए ॥ २ ॥
हे महर्षे ! हम तुम्हारे नैष्ठिक ब्रह्मचर्यसे अत्यन्त सन्तुष्ट
हुए, हम वर देने वालों के ईश हैं, तस्मात् जो तुमको
इच्छित वर हो उसे मांग लो तुमारा मङ्गल हो ॥ ३ ॥

ऋषिरुवाच ।

मार्कण्डेय ऋषि बोले, कि—हे देवदेवेश ! हे प्रपन्नार्ति-
हर ! हे अच्युत ! बस हम इतने ही वरसे परिपूर्ण हैं, कि—जो
साक्षात् आपने दर्शन दिये ॥ ४ ॥
हे भगवान् ! ब्रह्मादिक भी समाधिके बीच में परिपक्व मनसे
जिन आपके श्रीयुक्त चरणारविन्दों के मानसिक दर्शन
कोभी प्राप्त होकर कृतार्थ हो जाते हैं, वही साक्षात् आप
मेरे नेत्रों के सन्मुख दर्शन दे रहे हो ॥ ५ ॥
हे कमलदल लोचन ! हे पुण्यश्लोकशिखामणे ! तथापि
इतना वर मुझे दीजिये, कि—मैं आपकी उसमाया को देखूं,
कि—जिस से लोकपालों सहित सम्पूर्ण लोक सत्पदार्थ में
भेद अथवा कपट जानते हैं ॥ ६ ॥

सूत उवाच ।

सूतजी बोले, कि—हे मुने ! हे शौनक ! ऋषिने जब भग-
वान् की इस प्रकार स्तुति और पूजाकरी तब भगवान् भी
"तथास्तु" ऐसा कह सुन्दर हंसते हुए बदरिकाश्रमको जाते
हुए । कहा भी है, कि—"हासो जनोन्मादकरी च माया" अर्थात्
भगवान का हंसनाही जो माया का प्रसार है सो आप हँसकर
गये ॥ ७ ॥
ऋषिभी अपने आश्रम में बैठे हुए उसी विचार में रहे,
कि—माया कब देखूंगा । आश्रम में बसते हुए, अग्नि, सूर्य, चन्द्र,
जल, पृथिवी, वायु, आकाश, आत्मा, इन सबों में ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भावद्रव्यैर्मनोमयैर्द्रव्यैः क्वचित्कदाचित्प्रेमप्रसरसम्प्लुतः प्रेमो-
द्रेक प्राप्तः ॥ ९ ॥

अन्तर्बहिश्चाद्भिरतिद्युभिः खरैः शतह्रदाभिरुपतापितं जगत् ।
चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत् ॥ १३ ॥
तस्यैवमुद्वीक्षत ऊर्मिभीषणः प्रभञ्जनाऽऽघूर्णितवार्महार्णवः ।
आपूर्यमाणो वरषद्भिरम्बुदैः क्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः समम् ॥ १४ ॥

वर्षाणां सहस्राणि...

श्रीधरस्वामिकृतभावार्थदीपिका ।

मायादर्शनमाह--तस्येत्यादिना ॥ १० ॥

तं वायुमनु बलाहका मेघा अभवन्नाविर्बभूवुः ते च तडिद्भिः सहिता उच्चैः स्वनन्तो गर्जन्तः अक्षो रथाक्षं तद्वत्स्थविष्ठा अभितो वर्षधारा मुमुचुः ॥ ११ ॥

चतुर्दिक्षु वर्तमानाः समुद्रा समीरवेगेनोर्मिवद्भिर्भूतलं ग्रसन्तः उग्रा नक्रा येषु महाभया आवर्ता येषु गभीरा घोषो येषु ते च तेच तेच ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

सर्वत्र गोविप्रादिषु हरिं ध्यायन् भावद्रव्यैर्मनोमयैर्द्रव्यैरपूजयत मानसोपचारैः अपूजयदित्यर्थः । कश्चिदिति । भक्तिप्रसरेण प्रीत्यात्मकभक्तिपरीवाहेण सम्प्लुतः व्याप्तः तां पूजामपि विस्मृतवान् ॥ ९ ॥

मायादर्शनमुपवर्णयति—तस्येत्यादिना यावदध्यायसमाप्ति । हे भृगुश्रेष्ठ ! तस्य मुनेः मार्कण्डेयस्य उपासीनस्य सतः हे ब्रह्मन् ! महान् वायुरभूत् ॥ १० ॥

तमिति । तं वायुमनु बलाहका मेघाः करालाः भयङ्कराः अभवन्नाविर्बभूवुः ते च तडिद्भिः सहिता उच्चैर्ध्वनन्तो गर्जन्तः अक्षः शकटाक्षः तद्वत्स्थविष्ठाः अतिस्थूला अभितो वर्षधारा मुमुचुः ॥११॥

ततं इति । चतुर्दिक्षु वर्तमानाः समुद्राः परितः क्ष्मातलं भूमण्डलम् उग्रा नक्रा येषु तैः समीरवेगोत्थितैरूर्मिभिः ग्रसन्तः भयानका आवर्ता येषु गभीरो घोषो येषु ते च व्यदृश्यन्त ॥ १२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

किम्बहुना सर्वत्र च व्याप्तं भावद्रव्यैः मनःकल्प्यपुष्पादिद्रव्यैः अर्हणाद्यैरित्यर्थः । कश्चित्कदाचित् विस्मरणे कारणं भक्तिप्रसरसंप्लुत इति ॥ ९ ॥

वरदानफलं वक्तुमुपक्रमते—तस्येति । तस्याश्रमे महान् वायुरभूत् ॥ १० ॥

तं वायुमन्वनन्तरं ते बलाहकाः अश्वभिताः अबलाविष्ठाः अक्षो रथाक्षमीषो दण्डस्तद्वत्स्थूलतमा वर्षधारा मुमुचुः तडिद्भिः सह ॥ ११ ॥

समीरवेगेनोत्थितोर्मिभिः सह उग्रनक्रैर्भयानकस्य भयङ्करस्यावर्तस्य गभीरा गम्भीरा घोषा येषां ते तथा ॥ १२ ॥

श्रीविश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

... द्रव्यैर्मनोमयैः ॥ ९ ॥

मायादर्शनमाह--तस्येत्यादिना ॥ १० ॥

अक्षो रथाक्षं तद्वदतिस्थूलाः ॥ ११ ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

भावद्रव्यैर्मनोमयद्रव्यैः ॥ ९—१० ॥

तं वायुमनु बलाहकाः मेघा अभवन् ते च तडिद्भिः सह गर्जन्तः अक्षवद्रथाक्षवत् स्थविष्ठाः वर्षधाराः मुमुचुः ॥११॥

उग्रनक्राश्च महाभयावर्ताश्च गभीरघोषाश्च ते तथा चतुर्दिक्षु वर्तमानाः समुद्राः समीरवेगोर्मिभिः समन्ततः क्ष्मातलमाग्रसन्तो व्यदृश्यन्त ॥ १२ ॥

भाषाटीका ।

तथा सर्वत्र सर्वत्र भी श्रीहरि का ध्यान करते हुए, भावमय द्रव्यों से श्रीहरि का पूजन करते हुए । किसी समय में मार्कण्डेयजी प्रेम के प्रवाह में डूबकर पूजा के उपचारों को भूलने लगजाते, इस प्रकार अपने आश्रम में निवास करते रहे ॥ ९ ॥

हे शौनकजी ! एक समय पुष्पभद्रा नदी के तट पर सन्ध्या के समय बैठे हुए, मार्कण्डेयजी श्रीहरिकी उपासना करते रहे । हे ब्रह्मन् ! इतने में ही बड़ा भारी पवन चलने लगा ॥ १० ॥

बड़े प्रचंड शब्द करने वाले उस पवन के पीछे ही चारों तरफ से बड़े विकराल मेघ घुमड़ आये, और (चक्र के बीच का काष्ठ जिसमें अरा पुहे हुए रहते हैं उसका नाम अक्ष है) उस अक्ष के बराबर मोटी धाराओं से बर्षने लगे, बीजलियों के कौंध बड़े जोर शोर से होने लगे, मेघों में कड़कड़ाहट जोर से होने लगा ॥ ११ ॥

तदके पीछे ऋषि क्या देखते हैं, कि—चारों ओर से चारों समुद्र, पवन के वेग से चढ़ी हुई तरंगोंसे इस भूतल को डुबाते हुए चले आते हैं । जिन समुद्रों में बड़े उग्र मकर मच्छ और बड़े भयंकर भँवर पड़ रहे हैं, और बड़ा ही भारी शब्द हो रहा है ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

आत्मना सह जरायुजादिचतुर्विधं जगदन्तर्बहिश्चोपतापितं वीक्ष्य क्ष्मां च जलाप्लुतां वीक्ष्य मुनिः समत्रसद्भयं प्राप कमा-

सक्ष्मान्तरिक्षं [illegible] त्रैलोक्यमासीत्सह दिग्भिराप्लुतम् ।
स एक एवो [illegible] भ्राम विक्षिप्य जटा जडान्धवत् ॥ १५ ॥
क्षुत्तृट्परीतो [illegible] ठरुपद्रुतो वीचिनभस्वता हतः ।
तमस्यपारे [illegible] दिशो न वेद खं गाञ्च परिश्रमेषितः ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदी [illegible] ाहका

पतावितम् मद्भिः कल्पभूताभिः अतिय [illegible] ाभिः खरैश्च सुर्वरश्मिभिर्वायुभिर्वेति शेषः [illegible] ुद्भिः दीर्घत्वमार्षं छन्दोऽनुसारेण ॥ १३ ॥

प्रभञ्जनेनाऽघूर्णितं प्रकम्पितं वा [illegible] अप्य-वाच्छादयामास समं सह ॥ १४ ॥

सक्ष्माऽन्तरिक्षं भूम्यन्तरिक्षस्यप्रा [illegible] र्गांश्च देवसहितं भागणा ज्योतिर्गणास्तै [illegible] विक्षिप्य विकीर्य ॥ १५ ॥

परिभ्रमेण इषितो गतः प्राप्त [illegible] " इत्य-स्मात् ॥ १६ ॥

श्रीसुदर्शनसूरिकृत [illegible]

चतुर्विधं देवतिर्यङ्मनुष्यस्था [illegible] त् ॥१३॥
वाताघूर्णितजलमध्ये तिरस्र [illegible]
समागणां ज्योतिर्गणसहित [illegible] ः ॥१५–१७॥

श्रीमद्वीरराघवाचार्य [illegible] का ।

अन्तर्बहिरिति । खरैरित्यस्य [illegible] ेषः । शतह्रदा-दिभिर्विद्युद्भिश्छन्दोनुसारेण [illegible] तिद्युभिरतिक्रान्ता योयाभिस्ताभिरद्भिर्जलैश्चाप्ल [illegible] चतुर्विधं देव-तिर्यङ्मनुष्यस्थावरात्मकं [illegible] मां भूमिं च वीक्ष्य मुनिर्विमनाः समत्रसद्भैषीत [illegible]

तदयेति । तस्य मुनेरित्थमुद्विग्नस्य सतः वर्षैर्भिरम्बुदैरापूर्यमाणः प्रभञ्जनेन वायुना आघूर्णितं भ्रामितं वाः उदकं यस्मिन् ऊर्मिभि-र्भीषणश्चासावर्णवः द्वीपवर्षादिभिस्समं सह सहितामित्यर्थः क्ष्मामत्यथात् छादयामास ॥ १४ ॥

सक्ष्मान्तरिक्षमिति । भूम्यन्तरिक्षसहितं सदिवं सर्गसहितं समागणं भनक्षत्रगणसहितं त्रैलोक्यमद्भिः आप्लुतमासीत्तदा स मुनिरेक एव उर्वरितः अवशेषितः विक्षिप्ताः जटाः येन सः जड-वदन्धवच्च विचचार ॥ १५ ॥

किञ्च क्षुत्तृड्भ्यां परितो व्याप्तः तृतीयान्तपाठे मकरादीनां विशेषणं वीचिभिस्तरङ्गैर्नभस्वता वायुना च हतः ताडितः अत एव परिभ्रमेणाषितो व्याप्तः दिवमन्तरिक्षं अमाबाद्यं गां भूमिं च न वेद ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली

घनैर्मेघैरभिवृष्टाभिरद्भिरुत्पातितमाप्लावितमभितो पृथि-व्याम् मतीभिः शतह्रदाभिर्विद्युद्भिश्चोपतापितं चतुर्विधं चराचरमभि-जलाप्लुतां वीक्ष्य ॥ १३ ॥

अत्यथात् छादितवांस्तस्य मुनेरुद्विग्नतः ॥ १४ ॥

सदिवं स्वर्गेण सहितं समागणं सनक्षत्रगणं जडवत् अन्धवत् ॥ १५ ॥

वीचिनभस्वता तरङ्गवायुना भ्रमन्त्या दिशो यस्य स तथा वृष्टिमायुरित्यलोपमिति वचनात् द्यावन्तो दिशश्च परि-भ्रमेषितः दुःखसमुद्रवासी ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अतिक्रान्ता द्यौर्याभिस्ताभिरद्भिः खरैः सूर्यरश्मिभिः शत-ह्रदाभिर्विद्युद्भिः दीर्घत्वमार्षम् ॥ १३ ॥ १४ ॥

समागणां ज्योतिर्गणसहितम् ॥ १५ ॥

वीचियुक्तेन नभस्वता आहतः प्राप्ताघातः परिभ्रमेण इषितः व्याप्तः "इषगतौ" इत्यस्मात् ॥ १६—१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अतिद्युभिः अतिक्रान्ता द्यौर्याभिस्ताभिरद्भिः खरैर्वायुभिरिति शेषः शतह्रदाभिर्विद्युद्भिः दीर्घत्वं छान्दसं सहात्मना जरायु-आदिचतुर्भेदं जगदन्तर्बहिरुपतापितं जलाप्लुतां क्ष्मां च वीक्ष्य विमनाः सन् समत्रसत् ॥ १३ ॥

समं सह अत्यथात् आच्छादयामास ॥ १४ ॥

जटा विक्षिप्य विकीर्य ॥ १५ ॥

परिभ्रमेण ईषितः व्याप्तः ॥ १६ ॥

भाषा टीका ।

स्वर्ग का भी उल्लंघन करने वाले जलों से तथा बड़े तीक्ष्ण पवन और बीजलियों से ताप सहित जरायुजादि चार प्रकार के प्राणियों वाले जगत् को ताप युक्त देखकर, तथा पृथिवी को जल से डूबी हुई देखकर, ऋषि बड़े दुःखित हुए और त्रास को प्राप्त होते हुए ॥ १३ ॥

उन ऋषि के इस प्रकार देखते २ तरंगों से भयंकर और पवन से घूम रहे जल जिसमें ऐसा वह महासमुद्र, [illegible]

क्वचिद्गतो महावर्त्ते तरलैस्ताडितः क्वचित् ।
यादोभिर्भक्ष्यते क्वापि स्वयमन्योन्यघातिभिः ॥ १७ ॥
क्वचिच्छोकं क्वचिन्मोहं क्वचिद्दुःखं सुखं भयम् ।
क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः ॥ १८ ॥
अयुतायुतवर्षाणां सहस्राणि शतानि च ।
व्यतीयुर्भ्रमतस्तस्मिन् विष्णुमायावृतात्मनः ॥ १९ ॥
स कदाचिद्भ्रमंस्तस्मिन् पृथिव्याः ककुदि द्विजः ।
न्यग्रोधपोतं ददृशे फलपल्लवशोभितम् ॥ २० ॥
प्रागुत्तरस्यां शाखायां तस्यापि ददृशे शिशुम् ।
शयानं पर्णपुटके ग्रसन्तं प्रभया तमः ॥ २१ ॥
महामरकतश्यामं श्रीमद्वदनपङ्कजम् ।
कम्बुग्रीवं महोरस्कं सुनासं सुन्दरभ्रुवम् ॥ २२ ॥
श्वासैजदलकाभातं कम्बुश्रीकर्णदाडिमम् ।
विद्रुमाधरभासेषच्छोणायितसुधास्मितम् ॥ २३ ॥
पद्मगर्भारुणापाङ्गं हृद्यहासावलोकनम् ।
श्वासैजद्वलिसंविग्ननिम्ननाभिदलोदरम् ॥ २४ ॥

भाषा टीका ।

करने वाले मेघों के सहित द्वीप खंड और पर्वतों सहित पृथिवी को डुबा देना भया ॥ १४ ॥

उस समय पृथिवी, अंतरिक्ष, स्वर्ग, तारागण, और दिशाओं सहित तीनों लोक जल में मग्न हो गये, और वे महामुनि, मार्कंडेय जी एकले ही बच रहे, सो वो भी अपने जटाओं को बिखेर कर जड़ और अन्ध की तरह उस जल में भ्रमते रहे ॥ १५ ॥

भूखे प्यासे, और मकर तिमिंगल इत्यादि नाना प्रकार के जल जंतुओं से उपद्रुत, कभी तरंगों की टक्करों से कभी पवन से ताडित होते हुए, उस अपार अंधकार में पड़े हुए मारे परिश्रम के थक गये, और उस समुद्र में भ्रमते २ दिशाओं का ज्ञान न रहा, और न आकाश को जानते हुए न पृथिवी को ॥ ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अन्योन्यघातिभिस्तद्भक्षणाय परस्परं युध्यद्भिः ॥ १७—१८ ॥
विष्णुमायावृतात्मन इति स तथा स्वयमित्यर्थः ॥ १९ ॥
ककुद्युन्नतप्रदेशे न्यग्रोधपोतं कोमलवटम् ॥ २० ॥
तस्योत्तरदिक्शाखायां शिशुमपि ॥ २१ ॥
श्रीमत्सुन्दरं वदनपङ्कजं यस्य तं कम्बुवद्रेखात्रययुता ग्रीवा यस्य तं महोरस्कं वि[illegible] सुनासं शोभना नासा यस्य तं सुन्दरे भ्रुवौ यस्य [illegible]म् ॥ २२ ॥

श्वासैरेजन्तः कम्पमाना[illegible] अलकास्तैराभातं शोभितम् कम्बुवत् मण्डलेन श्रीर्ययोस्ती कम्बुश्रियौ तयोः कर्णयोर्दाडिमपुष्पं यस्य तं विद्रुमतुल्यावधरस्तस्य भासा ईषच्छोणायितं सुधातुल्यं स्मितं यस्य तम् ॥२३॥

पद्मगर्भवत् आ ईषदरुणावपाङ्गौ नेत्रप्रान्तौ यस्य तं हृद्यौ हासावलोकनौ यस्य तम् श्वासैरेजन्त्यश्चलन्त्यो वलयस्तिस्रो रेखास्ताभिः संविग्ना चञ्चला निम्ना गम्भीरा नाभिर्यस्मिंस्तद्दलवदश्वत्थपत्रसदृशमुदरं यस्य तम् ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मृत्युमिव ॥ १८—१९ ॥
पृथिव्याः ककुदि उन्नतप्रदेशे फलपुष्पाकरम् आभरणभाशो-
नम् ॥ २० ॥

अन्तरिदं जगत् यस्यदेहे विपुलदेशान्तर्भावोऽल्पकाये बहु-
कालान्तर्भावः तदितरजनाक्रमकर्मानारिकमुक्ति पदार्थं[illegible]काय-
चापि सलिलादिमूर्तिरीश्वरस्य सर्वशक्तित्वादुपपन्नम् ॥ २१-२४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवत[illegible]

कचिदिति । तरङ्गैस्तरङ्गैरन्योन्यघाति[illegible] द्यामिः जलजन्तुभिः भयम् भक्षितम् ॥ [illegible]

कचिन्मोहमिति—मृत्युं मृत्युमिव ॥ १८ ॥

अयुतायुतवर्षाणामिति । विष्णोर्मायया [illegible] यस्य तस्य मुनेः तस्मिन् जले भ्रमत[illegible] व्यतीयायेत्यर्थः ॥ १९ ॥

स इति । पृथिव्याः ककुदि तरुकुसुमपल्लव[illegible] शोभितं न्यग्रोधपोतं कोमलवटवृक्षं ददर्श [illegible] ॥ २० ॥

प्रागिति । तस्य न्यग्रोधपोतस्य प्रागुत्तरस्यां [illegible] दिशि या शाखा तस्यां शिशुमपि ददर्श, तं विशिनष्टि—[illegible] । तमोऽन्धकारं प्रसन्तं निराकुर्वन्तम् ॥ २१ ॥

इन्द्रनीलवच्छ्यामं श्रीमद्रूपं वदनपङ्क[illegible] वत्कम्बुवद्रेखायुता ग्रीवा यस्य तम् म[illegible] वयसम् शोभना नासा यस्य तम् [illegible] तम् ॥ २२ ॥

[illegible]निःश्वासैरेजन्तः कम्पमानाः ये अ[illegible] मानम्) शोभितं कम्बुवद्वर्तुलकेन [illegible] तयोः कर्णयोर्दाडिमपुष्पसदृशा[illegible] अधरोष्ठस्तस्य भासा ईषच्छोण[illegible] यस्य तम् ॥ २३ ॥

पद्मगर्भाविवारुणावपाङ्गौ [illegible] हृदयम् हास्ययुक्तम् अवलोकनम् [illegible] वलयः लिपिरूपिशरेखा यास्ताभिः [illegible] च नाभि वेश्मिन् तदश्वत्थदल[illegible] यस्य तम् ॥ २४ ॥

श्रीम[illegible]रत्नावली ।

तरङ्गैस्तरङ्गै[illegible]

ककुदि [illegible]

तस्य [illegible]

श्वासेन मुख[illegible] कम्पमानानामलकानां प्रातेन भिन्नया भिया मुक्त[illegible]दाडिमं कर्णाभरणं यस्य स तथा तम् ईषच्छोणाश्लिष्टा ॥ २३ ॥

पद्मगर्भवत् अरुणावपाङ्गौ नेत्रान्तौ यस्य तं श्वासैरेजन्त्य अवलग्नयो वलयवलितर्वलिरेखास्ताभिः संविग्नगम्भीरा नाभि-र्यस्य स तथा चलमुदरं यस्य स तथा श्वासैजद्वलिसंविग्न-निम्ननाभिश्चलोदरश्च स तथा तं दलोदरमिति वा पाठः दल-वदश्वत्थदलवत् पत्रवत् उदरं यस्येति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अयुतायुतवर्षाणामिति तस्य मानं ज्ञातमित्यर्थः १९—३३ ॥ सप्तकल्पान्तर्याने इत्यन्तः यदेहेति अनीश ईहायामसमर्थः तेन निर्मिता ईहा वाञ्छा यया तयोक्तवर्षेतया तस्माद्रे स्वाद्यवाञ्छाविषयोऽपि भगवानन्तर्हित इत्यर्थः ॥ ३२—३४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ककुदि उन्नतप्रदेशे ॥ २०—२२ ॥

श्वासैरेजन्तः कम्पमाना अलकास्तैराभातं कम्बुर्वदन्तर्वलयेन श्रीवंयोक्तौ कम्बुश्रियौ तयोः कर्णयोर्दाडिमपुष्पे यस्य तम् ॥२३॥

श्वासैरेजन्त्यश्चलन्त्यो वलयवलितर्वलिरेखास्ताभिः सह संविग्नं चञ्चलं निम्नया नाभिगम्भीरया नाभिर्दलोदरं दलमश्वत्थपत्रं तद्वदुदरं यस्य तम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्योन्यघातिभिस्तज्जन्तुयाथै परस्परं युध्यद्भिः ॥ १७ ॥

मृत्युं विस्मृतिम् ॥ १८ ॥

विष्णुमायया आवृतः आत्मा मनो यस्य ॥ १९ ॥

ककुदि उन्नतप्रदेशे न्यग्रोधपोतं कोमलं वटम् ॥ २० ॥

तस्य न्यग्रोधपोतस्य ॥ २१ ॥ २२ ॥

श्वासैरेजद्भिः कम्पमानैरलकैराभातम् शोभितम् कम्बु-वत् श्रीवंयोक्तौ कम्बुश्रियौ तयोः कर्णयोर्दाडिमपुष्पे यस्य तं विद्रुमवदधरोऽधरस्तद्भासया शोणायितं सुधासदृशं स्मितं मन्दहसितम् यस्य तम् ॥ २३ ॥

पद्मगर्भवत् किञ्चिदरुणौ अपाङ्गौ नयनप्रान्तौ यस्य तम् हृद्ये हृदयप्रिये हासावलोकने यस्य तम् श्वासैजद्वलिभिः प्राणसञ्चारेण कम्पमानाभिर्वलिर्त्रयाभिः संविग्नाऽतिप्ररा निम्ना नाभिर्यस्मिन् तदश्वत्थदलनिभमुदरं यस्य तम् ॥ २४ ॥

भाषाटीका ।

किसी जगह बडे भँवर में पडजाते, किसी समय तरंगों से ताडित होते, और किसी जगह परस्पर में घातकरने वाले जलजन्तु भी मुनि को भक्षण करने लगते थे ॥ १७ ॥

किसी समय शोक को प्राप्त होते, कभी मोह को, कभी दुःख को कभी सुख को, कभी भय को, और कभी व्याधियों से पीडित होकर मृत्यु सदृश दुःख को भी प्राप्त होजाते थे ॥ १८ ॥

इस प्रकार श्रीविष्णुकी माया देखने वाले मुनिको उस समुद्रमें भ्रमते २ लाखों करोडों वर्ष व्यतीत हो गई, ॥ १९ ॥

वह ऋषि किसी एक समय भ्रमते२ एक पृथिवी के टीले पर अति मनोहर फल और पल्लवों से सुशोभित एक वटके पोदे को देखते हुए ॥ २० ॥

और वटकी ईशान कोणकी एक शाखामें एक पत्रके पुटमें सोये हुए सुन्दर शिशु को देखते हुए, कैसा वह शिशु है, कि—अपनी कान्ति से उस प्रलय कालके अंधेरे को दूर कर रहा है ॥ २१ ॥

चार्वङ्गुलिभ्यां पाणिभ्यामुन्नीय चरणाम्बुजम् ।
मुखे निधाय विप्रेन्द्रो धयन्तं वीक्ष्य विस्मितः ॥ २५ ॥
तद्दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनाम्बुजः ।
प्रहृष्टरोमाऽद्भुतभावशङ्कितः प्रष्टुं पुरस्तं प्रससार बालकम् ॥ २६ ॥
तावच्छिशोर्वै श्वसितेन भार्गवः सोऽन्तःशरीरं मशको यथाऽऽविशत् ।
तत्राप्यदोन्यस्तमचष्ट कृत्स्नशो यथापुराऽमुह्यदतीव विस्मितः ॥ २७ ॥
खं रोदसी भगणानद्रिसागरान् द्वीपान् सवर्षान् ककुभः सुरासुरान् ।
वनानि देशान् सरितः पुराकरान् खेटान् व्रजानाश्रमवर्णवृत्तयः ॥ २८ ॥
महान्ति भूतान्यथ भौतिकान्यसौ कालं च नानायुगकल्पकल्पनम् ।
यत्किञ्चिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवावभासितम् ॥ २९ ॥
हिमालयं पुष्पवहां च तां नदीं निजाश्रमं तत्र ऋषीनपश्यत् ।
विश्वं विपश्यन् श्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ॥ ३० ॥
तस्मिन् पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानम् ।
तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपाङ्गनिरीक्षणेन ॥ ३१ ॥
अथ तं बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि ।
अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजम् ॥ ३२ ॥

भाषा टीका ।

महामरकतमणि के सदृश श्याम और शोभा युक्त वदनकमल जिसका, शङ्ख सरीखा विशाल वक्षःस्थल, सुन्दर नासिका और सुन्दर भृकुटि जिसकी ॥ २२ ॥

श्वास से कम्पित हो रही जो अलकावली तिससे शोभित, और शंख के तरह भीतर वलय से शोभा वाले दाड़िम के पुष्प सदृश कर्ण हैं जिसके, और प्रवाल (मूंगा) के सदृश ओष्ठ की कान्ति से किञ्चित ललाई को लिये हुए अमृत सदृश मन्द हंसन जिसकी ॥ २३ ॥

कमल के गाभे के सदृश अरुण अपांग (नेत्र की कोर) हैं जिसके, और हृदय ग्राही है हास पूर्वक चितवन जिस की, तथा श्वास से चलायमान जो त्रिवली तिससे चंचल और गंभीर है नाभि जिसमें ऐसा पीपल के दल सदृश है उदर जिसका ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

चारवोऽङ्गुलयो ययोस्ताभ्यामुन्नीयाऽऽकृष्य धयन्तं पिबन्तम् ॥ २५ ॥

हृत्पद्मं चक्षुर्विलोचनाम्बुजं च प्रोत्फुल्लानि तानि यस्य सः अद्भुतभावाश्चर्यकरं तेन शङ्कितः तथापि तं प्रष्टुं पुरः प्रससार समीपं गतः ॥ २६ ॥

अदः इदं जगत् यथा पुरा प्रलयात्पूर्वं न्यस्तं विन्यस्तं दृष्टवानीव विस्मितः सन्मुमोह ॥ २७ ॥

कृत्स्नशो दर्शनं प्रपञ्चयति—खमित्यादिना । ककुभो दिशः पुराण्याकरांश्च खेटान् कर्षकग्रामान् व्रजान् गोकुलानि आश्रमांश्च वर्णांश्च तेषां वृत्तीश्चेत्यर्थः ॥ २८ ॥

नानायुगानि कल्पांश्च कल्पयति तेन कल्पनम् इति तथा तं कालं च भाविन परमार्थं इवावभासितं तेनैव ॥ २९—३० ॥

वटं च तोकं च वीक्ष्य तस्य प्रेम्णा सुधातुल्येन स्मितेनापाङ्गनिरीक्षणेन निरीक्षितः सन् अथ तं बालकमधोक्षजं परिष्वक्तुमभ्ययादिति द्वयोरन्वयः कथम्भूतम् ? नेत्राभ्यां हृदि धिष्ठितमधिष्ठितम् ॥ ३१—३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

चारवः सुन्दराः अङ्गुलयो ययोस्ताभ्यां पाणिभ्यां चरणाम्बुजम् उन्नीय उद्धृत्य मुखे निधाय तदङ्गुष्ठं धयन्तं पिबन्तम् इत्यद्भुतम् शिशुं विलोक्य विस्मितो बभूवेत्यर्थः २५ ॥

तद्दर्शनादिति। तस्य शिशोर्दर्शनात् वीतो गतः परिश्रमो यस्य सः प्रोत्फुल्लानि हृत्पद्मं विलोचनाम्बुजं च यस्य स अद्भुत-

श्रीमद्वीरराघवाचार्यकृतभागवत [illegible]

भावेनात्याश्चर्यरूपेण शङ्कितोऽपि तं बाल [illegible] र समीपं गतः इत्यर्थः ॥ २६ ॥

तावत्तदा हे भार्गव ! स मुनिः [illegible] क-बदन्तःशरीरमाविशत् शिशोः श्वास [illegible] तः प्राविशदित्यर्थः । तत्रापि तद्रु [illegible] दोऽन्यमप [illegible] था-विधं शिशुमचष्ट यथा पुरा तच्छरीरान्तःप्रवे [illegible] तथाः कृत्स्नमाचष्ट तद्वत् एव दृष्ट्वाऽतीव विस्मितः [illegible]

कृत्स्नशो दर्शनं प्रपञ्चयति—खमिति । [illegible] दसी द्यावापृथिव्यौ भगणाञ्ज्योतिर्गणानद्रीं [illegible] कुमो दिशः सुरांश्चासुरांश्च तान् पुराणि [illegible] राम् रत्नाद्युत्पत्तिस्थानानि खेटान् कर्वकान [illegible] नि न आश्रमांश्चतुरो वर्णान् तेषां वृत्तीश्चेरयन् [illegible]

महान्ति भूतान्याकाशादीनि प [illegible] ज्ञुण्या-दीनसौ मुनिः नानायुगानि कल्पां [illegible] तथा तं कालं च किं बहुना यत्किञ्चिद्व्यवहा [illegible] विविधं विश्वस्यापिव्यवहारं प्रति कारणं [illegible] म् स दिवाविभासितमश्नानां नित्यमिव प्रति [illegible] तत्सर्वं ददर्श ॥ २९ ॥

किञ्च । हिमालयमिति ॥ ऋषी [illegible] य विद्रुतं विपश्यन् शिशोः श्वासितात् श्वा [illegible] सितः पुनः प्रलयाब्धौ न्यपतत् ॥ ३० ॥

पश्यन्निति । तत्पर्णपुटे शय [illegible] ट शयानं तोकं शिशुं च पश्यन् तस्य शि [illegible] न च युक्ते-नापाङ्गनिरीक्षणेन निरीक्षितो [illegible] ॥

अथेति । नेत्राभ्यां हृदि [illegible] बालकमधोक्षजं पुनर्बहिः परिष्वक्तुमभ्ययाद [illegible] ॥

श्रीमद्विजयध्व [illegible] ली ।

अयन्तं पिबन्तम् [illegible]

अद्भुतमा [illegible] श्चर्यकौत [illegible] शङ्कितः अपि पुरः प्रससार समीपङ्गतः ॥ २६ ॥

स भार्गवः मार्कण्डेयः तावत्ततः पूर्वेण श्वसितेनान्तर्गच्छता सह शिशोरन्तःशरीरं मशको यथा तथाविशदित्यन्वयः । तत्रो-दरान्ते निग्यक्तमदो विश्वं कृत्स्नशोऽचष्ट दृष्टवान् दृष्ट्वा च पुरा यथा बहिर्विस्मितो मुह्यन्तथामुह्यदित्यन्वयः । अत्र मोहो नामाश्चर्यबुद्धिरेव नत्वन्यथाज्ञानं तथात्वे प्राचीनाचीर्णपुण्यराशे-र्वैयर्थ्यापत्तेरिति ॥ २७ ॥

विश्वं विशिनष्टि—खं रोदसी इत्यादिना । आश्रमवर्णवृत्तयो वार्ताश्च ॥ २८ ॥

महान्ति भूतानि पञ्चभूतानि नानायुगकल्पनं येन स तथा तं कालं च अन्यत्किञ्चिद्व्यवहारकारणं हानोपादानादिसमर्थं तथाप्राचीनं मन्दिप्रभवेन वर्णार्थत्वेनैवावभासितं प्रकाशितं मिथ्याभूतार्थन ॥ २९ ॥

पुनः किमभूदित्याह—विश्वमिति । बहिः श्वसतः शिशोः श्वासेन बहिर्निरस्तो पुनः प्रलयाब्धौ न्यपतत् ॥ ३० ॥

वटं च तोकं च वीक्ष्य तस्य शिशोः प्रेमसुधायाः प्रेमा-मृतानुबद्धस्मितसहितनापाङ्गनिरीक्षणेन निरीक्षितो ऽभूदि-त्यन्वयः ॥ ३१ ॥

अथ तं बालकं परिष्वक्तुमभ्यगात् ॥ ३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

गवरणाम्बुजे कीदृशं मधु वर्तते यत एतदास्वादनार्थं बहवो मद्भक्ता यतन्ते तस्मादिदमहमप्यास्वाद्य परीक्षेय इतीव धयन्तं पिबन्तम् ॥ २५ ॥

अद्भुतभावेन अत्याश्चर्यस्वरूपेण शङ्कितः नायं प्राकृतो बालक इति प्राप्ताशङ्कोऽपि प्रष्टुम् ॥ २६ ॥

अदः जगत् यथा पुरा प्रलयात्पूर्वम् ॥ २७—२८ ॥

स मार्कण्डेयः दिवा दिवस एव अवभासितं प्रकाशयुक्तं ददर्श पुष्पभद्रां पुष्पभद्राम् ॥ २९ ॥

लयाब्धौ निपत्य पुनरप्ययुतायुतवर्षपर्यन्तम् कष्टमनुभूय पृथिव्याः ककुदि वटपत्रशायिनं बालं ददर्श तस्य प्रेम्णा सुधा-तुल्यस्मितयुक्तेनापाङ्गनिरीक्षणेन निरीक्षितः सन् पुनरपि तदीय-श्वासेन पूर्ववत् प्रवेशनिर्गमौ एवमेव समकरवः अपेक्षानिर्म-मावप्रिमताकयदृश्या ज्ञेयौ ॥ ३०—३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

धयन्तं पिबन्तम् ॥ २५ ॥

प्रोत्फुल्लानि दृग्पद्म विलोकने च यस्य सः अद्भुतेनाश्चा-र्येण भावेन शङ्कितः किमयमीश्वर इति शङ्का प्राप्ता यस्य सः तं प्रष्टुम् पुरः समीपं प्रससार ॥ २६ ॥

तत्रापि तच्छरीरमध्येऽपि अदः इदं विश्वम् यथा पुरा प्रल-यात्पूर्वम् तथैवाचष्ट अतोऽतीव विस्मितः ॥ २७—२८ ॥

नानायुगानि कल्पांश्च कल्पयतीति स तथा तं च इदकाल पदार्थे सर्वकारणभूतं चकारेण तत्तदाकारेण च भासितम् इदं भगवत्कृतम् सर्वम् सत्यमेव सर्वस्य तदात्मकत्वात् ॥२९—३०॥

तस्मिन् लयाब्धौ पृथिव्याः ककुदि वटं तत्पर्णपुटे तोकम् च वीक्ष्य तस्य प्रेम्णा सुधातुल्यस्मितयुक्तेन अपाङ्गनिरीक्षणेन निरीक्षितः सन् तं बालं नेत्राभ्यां हृदि धिष्ठितमपि पुन-र्बहिरपि परिष्वक्तुमभ्ययादिति द्वयोरन्वयः ॥ ३१—३२ ॥

भाषा टीका ।

मुनिने और कैसा उस बालक को देखा, कि सुन्दर मनोहर छोटी २ अंगुलियों वाले दोनों हाथों से अपने चरण कमल को ऊंचा उठाकर मुख में अगुष्ठ देकर पीरहा है । ऐसे उस अद्भुत बालक को देखकर मार्कण्डेय जी बड़े विस्मय को प्राप्त हुए ॥ २५ ॥

मुनि का भी सब परिश्रम उस बालक के दर्शन [illegible]

तावत्स भगवान् साक्षाद्योगाधीशो गुहाशयः ।
अन्तर्दध ऋषेः सद्यो यथेहानीशनिर्मिता ॥ ३३ ॥
तमन्वथ वटो ब्रह्मन् ! सलिलं लोकसम्प्लवः ।
तिरोधायि क्षणादस्य स्वाश्रमे पूर्ववत्स्थितः ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वादशस्कन्धे मार्कण्डेयोपाख्याने भगवन्मायादर्शनं नाम
नवमोऽध्यायः ॥ ९ ॥

भाषा टीका ।

दूर होगया, तथा हृदय कमल और नेत्र कमल प्रफुल्लित होगये, रोमाञ्च न्यारे हो गये, और आश्चर्य से शंकित होकर मुनि उस बालक से पूछने को उसके सन्मुख समीप गये ॥२६॥

इतने में ही भृगु वंशी वह मुनि उस बालक के श्वास के साथ बालक के शरीर में मच्छर के तरह भीतर चले गये, भीतर भी जाकर इस समग्र जगत को जैसा का तैसा रचा हुआ देखकर बड़े विस्मय को प्राप्त होकर मोहित होते हुए ॥२७॥

मुनिने बालक के उदर में क्या देखा कि—आकाश, द्यावा-पृथिवी, नक्षत्रगण, पर्वत, समुद्र, खण्डोंसहित द्वीप, दिशायें सुर, असुर, वन, देश, सरितायें, पुर, खानें, छोटे२ ग्राम, गोधन के बाड़े, आश्रम और वर्णोंकी जीविकायें ॥ २८ ॥

बड़े २ भूत प्राणी, भौतिक पदार्थ, तथा नाना युग और कल्प जिनमें कल्पना किये जांय इतने बड़े काल को भी बालक के उदर में देखा, अर्थात् उस जगह बहुत काल बीत गया, और भी जो कुछ व्यवहार कारण और नित्य॰ सरीखा भान होने वाला विश्व है, तिसको भी देखा ॥ २९ ॥

तिसमें भी हिमालय पर्वत, और पुष्पभद्रा नदी, और उसके तट पर अपना आश्रम भी मार्कण्डेय ऋषि ने देखा, तथा वहां पर रहने वाले ऋषियों को भी देखा, इस प्रकार उस बालक के उदर में विश्व को देख रहे थे, कि—इतने में ही बालक का बाहर को श्वास निकला उसके साथ निकल फिर भी मार्कण्डेय ऋषि उसी प्रलय के समुद्र में गिरे ॥ ३० ॥

वहां फिर भी पृथिवी के एक टीले पर जमे हुए एक छोटे से वट के वृक्ष को देखते हुए, और उसके पत्र के पुट में सोये हुए एक मनोहर बालक को देखते हुए। और ऋषि उस बालक की प्रेम रूप अमृत युक्त मन्द मुसकानि सहित कटाक्षों के निरीक्षण के पात्र हुए ॥ ३१ ॥

जो बालक अन्तर्यामि रूप से हृदय में विराजमान है उसी नेत्रों से बालक को देखकर, ऋषि प्रथम बहुत क्लेश को प्राप्त हुए रहे अतएव अधोक्षज के आलिङ्गन करने को उनके समीप गये ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तावदिति । आश्चर्यमात्रपूर्वमेव ऋषेरन्तर्हितो बभूव ननु-धर्मवैफल्यं ... अनीशो निर्दैवस्तेन निर्मिता ईहा चेष्टा यथेति ॥ ३३ ॥

अन्तर्हिते भगवत्यनुवटः सलिलं लोकसम्प्लवश्च तिरोधाय्यन्तर्हितः स्वाश्रम एव यथापूर्वं स्थित इति ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
नवमोऽध्यायः ॥ ९ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीभागवतव्याख्याने द्वादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तावदिति । तावद्भगवानखिल ... विशिष्टानिरवधिकाश्चर्यादि-गुणगणपूर्णः योगाधीशः आश्चर्यशक्तियोगानां ... गुहाशयः सर्वान्तरात्मा अन्तर्हितवान् तदा ऋषेरीशा अलिङ्गितः ... यथा अनीशानीशिता निर्दैवेन कृता तद्वदन्तर्हितवान् ॥ ३३ ॥

तमिति । तं तिरोहितं शिशुमनु वटोऽपि लोकसम्प्लवं सलिलं तिरोधाय तत्क्षणादेव मुनेः सकाशाददृष्टोऽन्तर्दधे इति पूर्वेण सम्बन्धः । यद्वा, भगवान् मायया तिरोभावमन्तर्दधे तमनु वटोऽपि अन्तर्दधे इति सम्बन्धः मुनिस्तु स्वाश्रमे पूर्ववत्स्थितः अदर्शने विपुलवर्षशाखादिरपि अल्पकाले बहुकालत्वस्य भावः तद्विमरजनादुत्पन्नकर्षादि-विक्रमस्तान्मूलत्वप्रत्यक्षतद्धेतुत्वकालावस्थाविशेषविशिष्टप्रतीति-सर्वमीश्वरस्य सर्वशक्तित्वादुपपन्नम् ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायां
नवमोऽध्यायः ॥ ९ ॥

श्रीमद्विजयध्वजतीर्थकृतपद [illegible]

अनीशेनासमर्थेन निर्मिता ईहा मा [illegible] विभ्रमन्तर्धाति तथैवमन्तर्धानहोऽप्यु [illegible] मिच्छाव्ये ॥ ३३ ॥

अन्तर्हितं भगवन्तमनु बोकस्य सध्य [illegible] री-चापि तिरोहितमभूत् ॥ ३४ ॥

इति श्रीमद्भागवते महापुरा [illegible]

श्रीमद्विजयध्वजतीर्थकृतपद [illegible]

नवमोऽध्यायः ॥ ९ ॥

(विजयध्वजतीर्थटीका [illegible])

श्रीमज्जीवगोस्वामिकृत [illegible]

इति श्रीमद्भागवते महापुरा [illegible]

श्रीमज्जीवगोस्वामिकृत [illegible]

नवमोऽध्यायः ॥ [illegible]

श्रीमद्विश्वनाथचक्रवर्ति [illegible]

अनीशो हरिद्रुष्टस्य ईहा अनी [illegible] यथोत्पद्य एव क्षीयते तद्वदित्यर्थः ॥ [illegible]

ब्रह्माद्यश्चेति । ब्रह्ममायकालम [illegible] : कायः प्रविष्टोऽभूदतर्व भगवच्छक्त्यैवेति [illegible] कमंकर्तरि चिप् ॥ ३४ ॥

इति सारार्थदर्शिन्यां [illegible] म् ।

द्वादशे नवमोऽध्यायः [illegible] ॥ ९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

यावत्परिच्छन्नं कर्तुमुपक्रान्तावस्तस्य पश्चान्तर्दधे तदा प्रुवे ईहा परिच्छन्नचेष्टा यथा अनीशेनासमर्थेन जीवेन विर्मित वृथा भवति तथा जाता ॥ ३३ ॥

तं सर्वसाक्षि भगवन्तं कारणमनु तदंश प्रकाशितं यदादि कार्यजातमन्तर्हितमासीदित्याह—तमन्विति । लोकस्य ककुभः प्रभवस्य ॥ ३४ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे

नवमाऽध्यायार्थप्रकाशः ॥ ९ ॥

इतनी ही देर में योगाधीश गुहाशय वे साक्षात् भगवान्, ऋषि के देखते २ तत्काल अन्तर्धान को प्राप्त हो गये, जैसे कि—मन्द भाग्यवाले पुरुष की निष्फल क्रीडा ॥ ३३ ॥

हे शौनक ! तिसके पश्चात् वह वट और जल, और लोकों को जल में डूबना वे सब ऋषि को क्षण मात्र में अन्तर्हित हो गया और ऋषि अपने आश्रम के विषें पूर्ववत् स्थित होगये ॥ ३४ ॥

इति श्रीमद्भागवत द्वादशस्कन्ध में नवम अध्याय की

श्रीवृन्दावनस्थ पं० भागवताचार्यकृत

भाषाटीका समाप्त ॥ ९ ॥

श्रीमद्भागवते महापुराणे द्वादशस्कन्धे नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः ।

सूत उवाच ।

स एवमनुभूयेदं नारायणविनिर्मितम् ।
वैभवं योगमायायास्तमेव शरणं ययौ ॥ १ ॥

मार्कण्डेय उवाच ।

प्रपन्नोऽस्म्यङ्घ्रिमूलं ते प्रपन्नाभयदं हरे ! ।
यन्माययाऽपि विबुधा (१) मुह्यन्ति ज्ञानकाशया ॥ २ ॥

सूत उवाच ।

तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् ।
रुद्राण्या भगवान् रुद्रो ददर्श स्वगणैर्वृतः ॥ ३ ॥
अथोमा तमृषिं वीक्ष्य गिरिशं समभाषत ।
*पश्येमं भगवन् ! विप्रं निभृतात्मेन्द्रियाशयम् ॥ ४ ॥
(२)निभृतोदझषव्रातं वातापाये यथाऽर्णवम् ।
कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ॥ ५ ॥

श्रीभगवानुवाच ।

नैवेच्छत्याशिषः क्वापि ब्रह्मर्षिर्मोक्षमप्युत ।
भक्तिं परां भगवति लब्धवान् पुरुषेऽव्यये ॥ ६ ॥
अथाऽपि संवदिष्यामो भवान्येतेन साधुना ।
अयं हि परमो लाभो नृणां साधुसमागमः ॥ ७ ॥

सूत उवाच ।

इत्युक्त्वा तमुपेयाय भगवान् स सतां गतिः ।
ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनाम् ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

दशमे शिव आगत्य मुनेस्तुष्टो वरान्ददौ ।
तेन साकं महर्षीशो समाभाष्य समाजगत् ॥

॥ १ ॥

ज्ञानकाशया ज्ञानवत्प्रकाशमानया स्वभजनं विना विद्वांसोऽपि यस्य तव मायया ज्ञानिनो वयमित्यहङ्कारेण विमुह्यन्तीत्यर्थः ॥ २ ॥

श्रीनारायण एव स्वमायादर्शनमात्रेण शिवरूपेण सान्त्वयामास तदाह—तमेवमित्यादिना । निभृतात्मानं समाहितचित्तम् । रुद्राण्या भवान्या ॥ ३ ॥

निभृता निश्चला आत्मेन्द्रियाशया देहेन्द्रियमनांसि यस्य तम् ॥ ४ ॥

निभृतं निश्चलमुदकं झषव्रातश्च यस्मिंस्तम् अर्णवमिव पूर्ण

---

(१) मुह्यन्त्यज्ञानकातराः इति वीर० विज० पा० । (२) निभृतोदमर्णवमिव वातापाये इति च विज० । * पश्येम इति वीर० ।

श्रीधरस्वामिकृतभावा[illegible]

साक्षात्कुरु प्रकटीकुरु यतो [illegible] बुभुत्सवः । तत्र निमित्तम् अत्र हेतुः भक्ति[illegible]

संवदिष्यामः संवादं करिष्यामः ॥[illegible]

सताङ्गतित्वे हेतुः ईशान इति ॥ [illegible]

श्रीसुदर्शनसूरिकृतशुकपक्षीय[illegible]

मार्कण्डेयस्य तत् कुलप्रसूनत्वे व्याख्या[illegible] पनत् कदयात् प्रसूतमार्कण्डेयो ऽन्यो [illegible] रितः आपदो निर्मुक्तः ॥ १—१५ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतच[illegible]

इत्थं भगवता दत्तं तद्योगमायादर्शन[illegible] ततो रुद्राख्यानयुक्तिर्वैभाकल्पान्तमायु[illegible] पुराणाचार्यत्वं च येन इति [illegible] यमित्यादिना । नारायणेन विनिर्मित[illegible] तमेव नारायणमेव तन्मायातत्त्वाय [illegible]

तदेवाह—प्रपन्नोऽस्मीति । प्रपन्ना[illegible] प्रपन्नानीति तथा यस्य तव मायया [illegible] विभ्रान्तचित्ताः सन्तो मुह्यन्ति तां तेषु [illegible] ॥ २ ॥

तामिति । इत्थं निभृतात्मानं [illegible] सम्बन्धः दिदृक्षतामिति ॥ ३ [illegible]

अथेति । उमा रुद्राणी [illegible] । यथा निभृतं निश्चलम् उदकम् [illegible] समुद्रः (तथा [illegible]) [illegible] निभृतात्मेन्द्रियाशयं निश्चलदेहेन्द्रियान्तः [illegible] मुनिं [illegible] सिद्धतपसः संसिद्धिं फलं कुरु यतो भवान् [illegible] ॥ ५ ॥

एवमुक्तः [illegible] । आशिषः कामानुगापत्य मोक्षपर्यन्तं [illegible] हेतुः परामनन्यप्रयोजनां भगवति [illegible] भगवदेकान्तभक्ताः किञ्चिदपि नाकाङ्क्षन्ति [illegible] ॥

तथा[illegible] तथापि हे भवानि साधुनाऽनेन मुनिना सम्वदिष्यामः [illegible] करिष्यामः किं तावन्मात्रेण तत्रेत्यत्राह, अयं हीति । नृणाम् [illegible] अयमेव परमो लाभः कोऽसौ यत्साधुसमागमः न तस्य लाभः किन्त्वस्माकमेवेति भावः । यद्वा अन्योन्यस्य समागमो ऽन्योन्यस्य लाभ इति भावः । नृणामिति बाहुल्याभिप्रायो लोकपरिपाटीप्रदर्शनाभिप्रायकः ॥ ७ ॥

इतीति । स भगवान् रुद्रः सताङ्गतिरस्मत्सर्वविद्यानिर्वाहकत्वसर्वदेहीश्वरत्वजगदात्मत्वाद्यात्मभूतपरमपुरुषद्वारकाणीति विवक्षितानि "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" (१।१।३१) इति न्यायात्तद्गतदाविद्यायतनात्वाद्या तानि विवक्षितानि ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

मार्कण्डेय; पुनः किमकार्षीदित्यपेक्षायां स्तूयतां हरौ भक्तिसमुद्रेककरीति हार्दं शौनकादीनां योग्यम् परिहरति, स च मिति । यः पूर्वस्याश्रमे स्थितः सः योगमायायाः अखिलमर्त्य विभूतेः वैभवं व्याप्ति अरूपवत्के: प्रभावं वा ॥ १ ॥

यस्य हरेर्माया मोहनशक्त्या विबुधा ब्रह्मादयस्ता [illegible] पद्मयोनाद्योऽन्यविरुद्धेन मायाशब्दो व्याख्यात इति ज्ञातव्यम् ॥

निभृतात्मानं पूर्णमनसं इन्द्रियेषु निभृतं धृतमनसं वा [illegible] व्योम्नि ॥ ३—४ ॥

निभृतो ननु, पूर्वं एव तपःपाते यथाकाले ऋषीणां [illegible] मतसमूहो यस्य स तथा पूर्वविशेषणार्थं हेतुत्वम् अस्य मुनेः ॥५॥

रुद्रः प्रतिवक्ति, नैवेति । मोक्षमपि नेच्छति किमुतान्या आशिषः तत्र हेतुमाह भक्तिमिति ॥ ६ ॥

यद्यप्येवं तथापि भवत्या वचनगौरवाद्वदिष्यामहे इत्याशयेनाह—अथापीति । हे भवानीति एतेन साधुना मुनिना सह सङ्कथनेन किं प्रयोजनमत्राह, अयं हीति । साधूनां समागमः सङ्गतिः ॥ ७ ॥

समुपेत्याथ सम्प्राप्य अयं साक्षान्मो भगवान् किन्तु केन [illegible] एवेत्याशयेनाह—ईशान इति । अनेन श्रीहरिज्ञानमपि रुद्रप्रसादात्फलवत्स्यादित्युक्तं भवति तत्कुत इत्यत्राह, ईश्वर इति श्रोत्रादीन्द्रियवतां जीवानां शिवाधीनत्वेन तत्तदिन्द्रियजन्यज्ञानस्यापि तत्प्रसादायत्तत्वं युक्तम् ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सोमेशदर्शनं तस्य स्तुतिस्तेनाभिनन्दनम् ।
मुनेः स्वेष्टवरप्राप्तिरत्राध्याये उच्यते ॥

॥ १ ॥

ज्ञानकाशया ज्ञाने वर्तमानेऽपि काशया प्रकाशितुं समर्थेत्यर्थः । तत्राहमेव प्रमाणमभूवमिति भावः ॥ २—४ ॥

निभृतानि निश्चलीभूतानि उदकानि झषव्राताश्च यत्र सः ॥५॥

(मार्कण्डेयस्य एतत् कुलप्रसूनत्वे व्याख्यान्तरपरिहारो द्रष्टव्यः)

आशिषोऽनामयाद्याः निर्वृतिः तर्हि मोक्षं देहीति तत्राह—मोक्षमपीति तर्हि भक्तिं देहीति तत्राह भक्तिमिति ॥ ६—७ ॥

सताम् अभीप्सितभक्तिप्रदायित्वाद्गतिः न केवलं सतामेव गतिरपि तु सकामानामपीत्याह—ईशान इति । तत्र चिह्नमित्याह—ईश्वर इति ॥ ८ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवं भगवद्योगमायावैभवदर्शनं भगवत्प्रसादान्मार्कण्डेयेन लब्धम् अथ द्वयोर्मे शिवप्रसादाल्लब्धं तद्वक्तुं प्रस्तौति, स चैकमित्यादिना । योगमायायाः अत्याश्चर्यरूपायाः भगवच्छक्तेः ॥ १ ॥

ज्ञानकाशया ज्ञाने तदपि प्रकाशमानया ज्ञानवतामपि प्रोद्भासकया इत्यर्थः ॥ २ ॥

तयोरागमनं साक्षादीशयोर्जगदात्मनोः ।
न वेद रुद्धधीवृत्तिरात्मानं विश्वमेव च ॥ ९ ॥
भगवांस्तदभिज्ञाय गिरिशो योगमायया ।
आविशत्तद्गुहाकाशं वायुश्छिद्रमिवेश्वरः ॥ १० ॥
आत्मन्यपि शिवं प्राप्तं तडित्पिङ्गजटाधरम् ।
त्र्यक्षं दशभुजं प्रांशुमुद्यन्तमिव भास्करम् ॥ ११ ॥
(१)व्याघ्रचर्माम्बरधरं शूलखट्वाङ्गचर्मभिः ।
अक्षमालाडमरुककपालासिधनुःसह ॥ १२ ॥
बिभ्राणं सहसा भातं विचक्ष्य हृदि विस्मितः ।
किमिदं कुत एवेति समाधेर्विरतो मुनिः ॥ १३ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

दिवि अन्तरिक्षे ॥ ३ ॥

निभृताः नियमिताः आत्मेन्द्रियाशयाः शरीरेन्द्रियमनांसि येन तम् ॥ ४ ॥

निभृतं निश्चलमुदकं झषव्रातः मीनसमूहो यस्मिन् सः संसिद्धिं साक्षात्कुरु प्रकटीकुरु ॥ ५ ॥

आशिषः सिद्धीः ॥ ६ ॥

संवदिष्यामः संभाषं करिष्यामः ॥ ७ ॥

इत्युक्तवत्यामित्यस्य श्रीरुद्रस्य भगवत्त्वं सर्वदेहिनामीशत्वं सर्वात्मत्वादिकं च श्रीविष्णुप्रसादजं ज्ञेयम् सोऽप्यवीदरं पृथग्विध "अहमेव पशूनामधिपतिरसानी "अस्य देवस्य मीढुषोऽवयो विष्णोरेव„ इत्यादिश्रुतेः "सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः" इत्यादिस्मृतेश्च भगवान्—

"उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति "॥

एवमुक्तलक्षणः सतां साधूनां हरिभक्तप्रवृत्तानां गतिः सर्वदेहिनां सुरासुरादीनामीश्वरो नियन्ता ॥ ८ ॥

———

भाषा टीका ।

सूत उवाच ॥

सूतजी बोले, कि—वह मार्कंडेय ऋषि नारायण के रचे हुए योग माया के वैभव को इस प्रकार देखकर उनही श्रीनारायण की शरण जाते हुए ॥ १ ॥

मार्कंडेय उवाच ।

मार्कंडेयजी बोले कि—हे हरे ! प्रपन्नजनों के अभय देने वाले आपके चरणों की मैं शरण आया हूं, ज्ञानवत् प्रकाशमान जिनकी माया से विद्वान् लोग भी मोहित होते हैं ॥ २॥

सूत उवाच ॥

सूतजी बोले, कि—श्रीपार्वतीजी सहित वृषभ के ऊपर बैठे हुए आकाश मार्ग में होकर अपने गणों सहित श्री-शिवजी जा रहे थे, उन्होंने, नारायण की शरण प्राप्त होने से इस प्रकार चित्त समाहित करके बैठने वाले मार्कंडेय ऋषि को देखा ॥ ३ ॥

तदनन्तर श्रीपार्वतीजी ने उस ऋषि को देखकर श्रीशिव जी से कहा, कि—हे भगवन् ! अपनी इन्द्रियें और अंतःकरण का समाधान करके बैठे हुए इस विप्र को तो आप देखो ॥ ४ ॥

जैसे, कि—पवन के अभाव काल में जल और जल जन्तु जिसके स्थिर होते हैं, ऐसे समुद्र के तरह स्थिर होकर बैठा है। हे भगवन् ! इसके तप की सिद्धि आप करो। क्यों कि, आप साक्षात् सिद्धि देने वाले हो ॥ ५ ॥

श्रीभगवानुवाच ॥

श्रीमहादेवजी बोले, कि—देवि ! यह ब्रह्मर्षि लौकिक मनोरथों का तो क्या परन्तु मोक्ष की भी इच्छा नहीं करता है क्यों कि—अव्यय पुरुष जो भगवान् हैं तिनके विषे इसको भक्ति प्राप्त हुई है ॥ ६ ॥

हे भवानि ! तो भी हरिभक्त इस सन्त महात्मा से संवाद ही करेंगे। क्योंकि ! पुरुषों को इस संसार में यही परम लाभ है, कि—जो साधुजन का समागम प्राप्त हो ॥ ७ ॥

सूत उवाच ॥

सूतजी बोले, कि—इस प्रकार श्रीपार्वतीजी से कहकर भगवान् सन्तों के गति श्रीमहादेवजी, ऋषि के समीप पधारे। आप कैसे हैं, कि—विद्याओं के अधिपति और सर्व प्राणियों के नियन्ता हैं ॥ ८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

रुद्धा धियोऽन्तःकरणस्य वृत्तयो येन सः ॥ ९—१० ॥

(१) व्याघ्रचर्माम्बरशूलधनुरिष्वसिचर्मभिः । अक्षमालाडमरुककपालं परशुं सह ॥ इति सिद्धा० ॥

नेत्रे उन्मील्य ददृशे सगणां सोमया गतम् ।
रुद्रं त्रिलोकैकगुरुं ननाम शिरसा मुनिः ॥ १४ ॥
तस्मै सपर्यां व्यदधात् सगणाय सहोमया ।
स्वागतासनपाद्यार्घ्यगन्धस्रग्धूपदीपकैः ॥ १५ ॥
आह त्वात्मानुभावेन पूर्णकामस्य ते विभो ! ।
करवाम किमीशान ! येनेदं निर्वृतं जगत् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपि[illegible]

न केवलं बहिरेवाऽऽत्मन्यपि प्राप्तं शिव[illegible] शिवमा कथं प्राप्तम् सहसाऽकस्मादेव हृदि माव[illegible] ? तदि तडित्पिशङ्गा जटा धारयन्तीति तथा तं श्रीवत्स[illegible] गुर्वा- दिभिः सहायुधमात्रादिन् बिभ्राणमित्यन्वयः[illegible] रीणां दुर्दै- वयम् ॥ ११—१२ ॥

विस्मयपूर्वकं बहिर्दर्शनमाह-किमिद[illegible] ॥

सोमया उमया सहागतं रुद्रं ददृशे नन[illegible] ॥ १४—१५ ॥

पूर्णकामत्वं व्यनक्ति, येन [illegible] निर्वृतं भव- तीति ॥ १६ ॥

श्रीसुदर्शनसू[illegible]

सरस्वाय ज्ञानस्वैकगुरु[illegible] गुरवाति सुख- वतीति प्रसङ्गः ॥ १९ ॥ २० ॥

श्रीमद्वीरराघव[illegible] चन्द्रिका ।

नयोरिति । त[illegible]गमनमात्मानं देहं विश्वं च न वेद[illegible] कर्तृपदाध्याहारः अवेदने हेतुत्वेन मार्कण्डेय[illegible] वृत्तिः तद्याः धीवृत्तयः अन्तःकरण[illegible]

ततो रुद्रः कि[illegible] भगवानिति । योगमायया भग वदुपासनप्रभाव[illegible] सामर्थ्यात्मिकया आश्चर्यं- भूतया तस्य मु[illegible] हृदयाकाशमाविशद्यथा वायुः छिद्रमाविशति तद्वत्[illegible]

आत्मन्यपीति [illegible]: आत्मशब्दो हृदयपरः निरुद्धधी- वृत्तित्वाद्दृष्ट्वापि न वेदाति सम्बन्धः । कथम्भूतं तडित इव पिङ्गा जटा धारयन्तीति तथा तम् श्रीवत्सौ अष्टौ भुजा यस्य तम् उद्यन्तं भास्करमिव स्थितं प्रांशुं प्रकृष्ट- देहिनम् ॥ ११ ॥

व्याघ्रचर्माम्बरम् शूलं च बाणकृपाणेश्च धः धनुश्चाक्ष- मालादीश्च ॥ १२ ॥

विस्मितं महसा अकस्मादेव हृदयमाते मुनिः व्यचष्टेति सम्बन्धः ततः किमिदं कुत एवेति विस्मितः समाधेरुपरतः ॥ १३ ॥

नेत्रे इति । स मुनिरुमया भवान्याऽन्वितम् सोमयेति सहित- ार्थः सगणं रुद्रं ददर्श शिरसा ननाम च ॥ १४ ॥

तस्मा इति । स्वागतादिभिः सपर्यां व्यदधादकरोत् स्वागतं कुशलागमनप्रश्नः ॥ १५ ॥

आहचेति, उक्तमेवाह—आत्मानुभावेनेत्यादिना । आत्मा- नुभावेन स्वप्रभावेन पूर्णाः समग्राः कामाः यस्य तस्य तव हे ईशान ! किं करवाम किमिदं करवाम न किञ्चिदित्यर्थः । कर्तव्यम् इदम् हि सुखं सर्वस्य जगतः सुखमापादयितुः किमस्माभिः कर्तव्यमस्तीत्याह-येनेदमिति । येन त्वयेदं जगन्निर्वृतं सुखितम् पूर्ववत् "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इति न्यायेनान्तरात्मभूत- परमपुरुषदृष्ट्या पूर्णकामत्वजगदानन्दकरत्वे विवक्षिते एवमर्थोऽपि द्रष्टव्यम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

तदा मुनिना किमकारीति तत्राह-नयोरिति । अहङ्कारदृष्टेषु जगदात्मनोरिति अज्ञाने किं कारणमत्राह, रुद्धधीवृत्तिरिति । धीपूर्वकरवादीन्द्रियवृत्तेस्तन्निरोधे सर्वेन्द्रियनिरोधः युक्त इति रुद्ध- धीवृत्तिरित्युक्तम् आत्मानं स्वं विश्वम् पुरोवर्ति सर्वम् ॥ ९ ॥

योगमायया अचिन्त्यैश्वर्ययोगसामर्थ्येन छिद्रं रोमकूपादि-, सुषिरम् ॥ १० ॥

न केवलं बहिरेव आत्मनि स्वस्मिन्नपि ॥ ११ ॥

इषुयुक्तं धनुश्च असिश्च चर्म च नानि तैर्युक्तं करे इमरुकम् अनुगतत्वात्पश्चाद्दृश्यं चर्म पिनाकमुक्तं इत्यायम ॥ १२ ॥

व्यचष्ट अपश्यत् ॥ १३ ॥

सह उमया सोमामविन्दवित्यादेः ॥ १४—१५ ॥

पूर्णकामत्वं व्यनक्ति येन त्वया जगन्निर्वृतं भवति ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भगवांस्तद्भिज्ञायेति स्वाभिप्रायमिव्यक्तये स्वयं श्रीविष्ण्वाधिष्ठि- तोऽपि स्वनीति गिरिशस्य तदुक्त्युद्रामसामर्थ्यायोगात् यद्वा, श्रीभग- वान् शिवाभिप्रायं विज्ञाय योगमायया गिरिशः सन् तद्रूपमाधितः पुनस्तस्य मार्कण्डेयस्य गुहाकाशं हृदयमाविशदित्यर्थः । तत्र हेतुरीश्वर इति एवमेवोक्तं तैः श्रीनारायण एव स्वमायया ईशान- भावं शिवरूपेण सम्पत्स्यसेति ॥ १०—१६ ॥

नमः शिवाय शान्ताय सत्त्वाय प्रमृडाय च ।
रजोजुषेऽप्यघोराय नमस्तुभ्यं तमोजुषे ॥ १७ ॥

सूत उवाच ।

एवं स्तुतः स भगवानादिदेवः सतां गतिः ।
परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत ॥ १८ ॥

श्रीभगवानुवाच ।

वरं वृणीष्व नः कामं वरदेशा वयं त्रयः ।
अमोघं दर्शनं येषां मर्त्यो यद्विन्दतेऽमृतम् ॥ १९ ॥
ब्राह्मणाः साधवः शान्ता निःसङ्गा भूतवत्सलाः ।
एकान्तभक्ता अस्मासु निर्वैराः समदर्शिनः ॥ २० ॥
सलोका लोकपालास्तान् वन्दन्त्यर्चन्त्युपासते ।
अहं च भगवान् ब्रह्मा स्वयं च हरिरीश्वरः ॥ २१ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

न केवलं तयोरागमनं वेद अपितु आत्मानमप्येवं विश्वमिदञ्चापरं च ॥ ९—१३ ॥

सोमया स मार्कण्डेयः उमया सह "सोऽचि लोपे चेत्पादपूरणम्" (६।१।१३४) इति सोर्लोपः ॥ १४—१६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अन्तरात्मनोः जगतामात्मप्रिययोः ॥ ९—११ ॥

शूलादिभिः सहाक्षमालादीन् ॥ १२ ॥

विभ्राणम् अक्षमालादीनां द्रष्टृत्वम् । सः मार्कण्डेयः उमया सह आगतं ददर्श ॥ १३—१५ ॥

निर्वृतं सुखितम् ॥ १६ ॥

भाषाटीका ।

जब श्रीमहादेवजी आये उस समय मार्कण्डेय समाधि में स्थित होने से ब्रह्मानन्दरूप की वृत्ति वाले थे, मन एवं आत्मा का और विश्वका भी उनको भान न था, इसी से जगदात्मा साक्षात् श्रीभवानी और शंकर के आगमन को भी मुनि ने नहीं जाना ॥ ९ ॥

भगवान् श्रीकैलासवासी शिवजी इस बात को जानकर अपनी योग माया के बल से ऋषि के हृदयाकाश में घुस गये, जैसे वायु छिद्र में प्रवेश करे ॥ १० ॥

तब मुनि ने आत्मा में बिजुली सी पीली जटाओं को धारण किये, तीन नेत्र और दशभुजाओं को धारण किये, बड़े उन्नत, उदय को प्राप्त होते हुए भास्कर के सदृश शिवजी को समाधि में ही देखे ॥ ११ ॥

कैसे देखे, कि—व्याघ्रचर्म का वस्त्र पहिने, त्रिशूल, धनुष, बाण, खड्ग, ढाल, इन सहित रुद्राक्ष माला, डमरू, कपाल, परशु इन सबों को धारण किये ॥ १२ ॥

ऐसे महादेवजी को एका एकी हृदय में भान होते हुए देखकर ऋषि बड़े विस्मय को प्राप्त हुए, "यह क्या है, और कहां से आया" ऐसे विचार कर मुनि समाधि से विरत होगये ॥ १३ ॥

और नेत्र उघाड़ कर गणों सहित और पार्वतीजी सहित त्रिलोक के एक गुरु शिवजी को देखकर मुनि शिर से नमस्कार करते हुए ॥ १४ ॥

गणों सहित और पार्वतीजी सहित उन श्रीमहादेवजी की स्वागत कुशल पूछकर, आसन पाद्य अर्घ्य चन्दन माला धूप दीप इत्यादि उपचारों से ऋषि पूजा करते हुए ॥ १५ ॥

और ऋषि बोलते भी हुए, ऋषि बोले—कि हे विभो! अपने प्रभाव से पूर्णकाम जो आप हो आपका मैं क्या उपकार करूं, हे त्रिलोक के नियामक! आप से यह सब जगत् सुख को प्राप्त होता है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

निर्गुणत्वेन त्रिगुणात्मत्वेन च नमस्करोति—नमः शिवाय निर्गुणाय सत्त्वाय सत्त्वाधिष्ठात्रे अत एव प्रमृडयति सुख-यतीति तथा तस्मै ॥ १७ ॥ १८ ॥

नोऽस्मत्तः वयं ब्रह्मविष्णुमहेश्वराः वरदेश्वराः ते वयम् ॥ १९ ॥

वरदानादिना प्रसन्नैरेवास्माभिः किमयं मदनुग्रहो अन-ग्रहस्य [illegible] इत्यादि त्रिभि वाक्यैः ब्राह्मणाः साधवः [illegible] निःसङ्गा निष्कामाः ॥ २० ॥

न केवलं त एव किन्त्वहं चेत्याह ॥ २१ ॥

न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते ।
नाऽऽत्मनश्च जनस्यापि तद्युष्मान्वयमीमहि ॥ २२ ॥
न ह्यम्मयानि तीर्थानि न देवाश्चेतनोज्झिताः ।
ते पुनन्त्युरुकालेन यूयं दर्शनमात्रतः ॥ २३ ॥
ब्राह्मणेभ्यो नमस्यामो येऽस्मद्रूपं त्रयीमयम् ।
बिभ्रत्यात्मसमाधानं तपःस्वाध्यायसंयमैः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पूज्यत्वमत्र हेत्वन्तरमाह–नेति । अण्वल्पमपि भिदां न चक्षते न पश्यन्ति तस्मात्तद्वेदभूतान् युष्मान् [illegible] भजेम ॥ २२ ॥ २३ ॥

ब्राह्मणेभ्यो ब्राह्मणान् आत्मसमाधानं [illegible] तप आलोचनम् स्वाध्यायोऽध्ययनम् संयमो [illegible] भक्तैः ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

न ते मयीति अजे मयि चाच्युते [illegible] अच्युते इत्यर्थः "स ब्रह्मा स शिवः" इति श्रुति [illegible] सर्वान्त-रात्मत्वात् भेदाभिधानस्य [illegible] स्फुटीकृत-त्वात्मनः जनस्यापीति नहि भेदं च [illegible] ॥ २१—२८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रिका ।

यतो न किञ्चित्करणीयं [illegible] कृत्वा नमस्य-मित्युक्त्वा प्रणमति–नम इति शिवाय [illegible] शान्ताय घोर-रहिताय प्रमृ[illegible] मृडयति सुखयतीति प्रमृड तस्मै सत्त्वाय [illegible] रजोजुषे ब्रह्मरूपाय तमो[illegible] अतएव घोराय घोररूपाय तुभ्यं नमस्[illegible]

इत्थं [illegible] भावत इत्याह सूतः, एव मिति । प्रसन्नात्मा [illegible] भगवान् रुद्रः ॥ १८ ॥

भावमेवाह–वरमिति सत्तम । मत्तः (मोऽस्मत्तः) कामं यथेष्टं वरं वृणीष्व यतो वयं त्रयः ब्रह्मविष्णुरुद्राः वरदेशाः वरदश्रेष्ठाः न मे किञ्चिदपेक्षितमित्यत आह, अमोघमिति । येषां त्र्यायाणा-मस्माकं दर्शनममोघमव्यर्थम् अतो यत्किञ्चिद्वृणीष्वेति भावः । यद्धि अमृतत्वं दातुमर्हसि प्रभवसि किमित्यत्राह–मर्त्यो यद्धि अमृतत्वं अश्नुते इति । यत् येऽस्माकं सोऽमृतं मोक्षं विन्दते तत्प्रदाने सत्कारकोपाय-भूताऽस्मीति भावः । साक्षात् श्रीभगवदुपासनस्यापि ब्रह्मरुद्रयोः श्रीभगवद्विभूतित्वानुसन्धानस्यावश्यकत्वात् ॥ १९ ॥

यथा मुनिः [illegible] आत्मानं तुष्टाव तथा स्वयमपि तद्रूपत्या ब्राह्मणानस्तौति–ब्राह्मणा इति द्वाभ्याम् । ये साधुस्वाभि-गुणयुक्ताः ब्राह्मणास्ते च लोका लोकपाला इन्द्रादयः वयमप्यसं-ज्ञानामेव इति मत्वन्धः साधुसमाचारनिरता ब्राह्मणाः विशिष्टाः शान्ताः रागाद्यकलुषितचित्ताः निःसङ्गाः विषयसङ्गरहिता एकान्त भक्ता इत्यस्य भगवतीश्वरादि देवम अस्मासु रुद्रादिषु निर्वैराः श्रीभगवद्विभूतित्वानुसन्धानेन वैररहिताः, कुतः? भूतवत्सलाः सर्व-भूतेषु वात्सल्ययुक्ताः किं बहुना समदर्शनाः कृत्स्नस्यापि जगतो भगवद्विभूतित्वानुसन्धानेन समदृशः ॥ २० ॥

सलोका देवमनुष्यादिजनसहिताः लोकपालाः इन्द्रादयः किं बहुना वर्णनेनेत्याह–महामिति । वयमपि त्रयः रुद्रादयः तान् वन्दामहे अर्चयामहे उपास्महे चेत्यर्थः ॥ २१ ॥

तत्र हेतुमाह–नैते इति । एते साधवो ब्राह्मणाः नते इति पाठे ते ब्राह्मणाः अजे अच्युते मयि चाच्युते चेत्यन्वयः । ब्रह्मशरीरके मच्छरीरके चाच्युते इत्यर्थः । अण्वपि ईषदपि यथान्या भिदां भेदं न चक्षते न पश्यन्त्यजं मां चाच्युतात्पृथक्त्वेन न पश्यन्तीति निर्बन्धार्थः "स ब्रह्मा स शिवः सेन्द्रः" इत्यादि श्रुत्या श्रीभगवतो ब्रह्मादिशरीरकत्वेन सर्वात्मत्वमनुसन्धानाना भिधानादात्मतत्त्वभेददर्शनमेवा निषिध्यते इत्यर्थं तत्रैव स्फुटीकुर्वन्नाह, नेति आत्मनः स्वस्य जनस्य स्वेतरस्य चापि अच्युते भिदां चक्षते इत्यन्वयः । आत्मजनयोरन्योन्यम् आत्मात्मसम्बन्धिना तु स्वरूप न हि नैः सह ब्रह्माद्याः स्वरूपभेदो ऽभेदवादिनामपि सर्वसा आविद्यकेन नाद्यारऽयत्य तन्मते परित्यागाद्धि अनन्यार्थत्वान् स्वाभाविकः येन तत स्वरूपाभेदः सिद्धयेत अतो भाविविशेषो यादृशो भेदनिषेधः स्यात्तऽप्यविषयत्वादृश एव विवक्षितायां दिक् यतो भिदां च न चक्षते तत्तस्माद्वयमपि युष्मानीमहि भजाम तत्र सलोका लोकपाला अहं ब्रह्मा चेति च भगवद्विशेषाभिप्रायत्वबुद्ध्या युष्मान्भजाम अच्युतस्तु "ब्राह्मणास्मैव मे मतम्" इति "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इत्युक्तयाभिमानविशेषेण भजनीति विशेषय इति भावः ॥ २२

तद्दर्शनेनात्मनः कृतकृत्यतामभिप्रेत्य स्तौति—नहीति । अम्मयानि जलमयानि तीर्थानि न दर्शनमात्रतः पुनन्ति चिरं स्नानादिभिस्तानि पुनन्ति, तथा मृच्छिलामयाः देव प्रतिकृतयश्च न दर्शनमात्रतः पुनन्ति चिरमाराधनादिभिरुप-चारपूजादिभिरिति भावः । यूयं दर्शनमात्रादेव पुनीथेति किं तादृशेभ्यो युष्मभ्यं नम इति भावः ॥ २३ ॥

यथा नेन "नमः शिवाय" इत्यादिना नमस्कृतं तथाऽहमेव ब्रह्म

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

ब्राह्मणोऽस्य इति। नमस्याम: नमस्कुर्म: नाभिविजानीम:, ये ब्राह्मणाः त्रयीमयं (वेद) त्रयीप्रमुखमात्मसमाख्यादिभि: सहितं रूपं बिभ्रति इमाति विस्तृय ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

सत्वाय पराक्रमयुक्ताय सद्वृत्ताय यत्र्यं याति गच्छतीति सात्वकतस्मै वा प्रसृष्टाय प्रकृष्टपावाय तत्तद्वस्तुयोग्यतानुमानेन रक्षार्थं सत्वादिगुणप्रवर्तकत्वात्सत्वाय रजोजुषे इत्युक्तम् ॥ १७ ॥ १८ ॥

यतो ब्रह्मादयो येषां त्वयाणां दर्शनममोघं तत्र हेतुमाह, त्वं इति। मर्त्योऽमृतं मुक्तिं विन्दते यदस्माद्दर्शनात् यश्चोमृतं वा ॥ १९ ॥

ब्राह्मणभक्तिं दर्शयति–ब्राह्मणा इति। ब्राह्मणा ब्रह्मवादैकनिष्ठा: साधवो रागादिदोषविधुराः शान्ताः भगवन्निष्ठापरायणा: अत एव नि:सङ्गाः दुष्टसङ्गरहिताः अत एव भूतेषु प्राणिषु वत्सलाः स्निग्धा एकान्तेन विष्णुरेव सर्वोत्तमो नान्य इति निर्णयेनास्मासु भक्ताः योग्यतातिरेकेण वेदपुष्टा: सम्यं ब्रह्म तद्दर्शनं येषां ते तथा ॥ २० ॥

य• एवंविधांस्तान्वदन्ति स्तुवन्तीत्यादिसपर्यां कुर्वन्त इत्यर्थः। अहं ब्रह्मा च हरेः पृथक् स्वतन्त्रो न तदधीनावेव अत्र हेतुरीश्वर इति ईशनशीलः स्वं रूपः स्वातन्त्र्यलक्षणयोर्वर ईशानाय वर इति यस्मात्तस्मात् द्वयोर्वर इत्युक्तम् एवं के इत्यतो वाह, अहमिति। स्वयमिच्छया हरेरेव स्वातन्त्र्यं आवयोरावां तदधीनाविति स्पष्टमुक्तम् अत्रान्वयमेव हेतुरीश्वर इति "ईश ऐश्वर्ये" इति धातोरनुपहतैश्वर्यमूर्तिरत्वादीश्वर इत्युच्यते ॥ २१ ॥

इतोऽपि ब्राह्मणा एव पूज्या यत एवंविधं तत्त्वं त एव जानन्तीत्याह–मत इति। ते ब्राह्मणा मयि स्थितत्वान्मयीत्युक्तप्राणे इरावजे च स्थितत्वादजप्रह्वाद्ये च पृथक् स्थिते अच्युते च भिदामणवपि परमाणुमात्रमपि न पश्यन्ते न पश्यन्ति। किं च जगतो जगद्वतः स्थावरजङ्गमरूपस्य प्रपद्यन्ति। जगत्स्याहमन्तर्यामित्वाच्च भिदां न पश्यन्ति अविद्यमानेन "एको द्वयात्मनोऽन्तर्यामित्वाच्च भिदां न पश्यन्ति" इति श्रुतिं प्रमाणयति। तत्तस्मादयम् युष्मानखिलैः पूज्यान्कः" इति श्रुतिं प्रमाणयति। तत्तस्मादयम् युष्मानखिलैः पूज्यावीमहि युष्मामहे यद्वा, भवि भिदामन्यथाज्ञानं विष्णुर्यामित सीमहि युष्मामहे यद्वा, अपि भिदामन्यथाज्ञानं विष्णुरन्तर्यामित्वेनापि न पश्यन्त्यपितु ततो विलक्षणत्वेन तत्कटाक्षाधीनत्वेन जगत्संहर्तृत्वेन ततोऽनन्तगुणहीनत्वेनैव मत्तत्वं चाहितत्वाद्धितत्वेन जगत्संहर्तृत्वेन ततोऽनन्ताद्यहीनत्वेनैव मत्तत्वं पश्यन्ति चतुर्मुखे यथास्थितं पश्यन्ति। अच्युते च तथा यथा श्रुतिविहितमात्मनश्चेतनसमुदायस्य अन्यत इति अतो देहदन्तादिजडत्वादि तत्त्वं यथातथा अन्यथा न पश्यन्ति ॥ २२ ॥

सर्वस्मादत्युत्तिहेतुत्वाच्च ब्राह्मणा एव पूज्या इत्याह, नहीति ॥ २३ ॥

अस्मात्स्मिन्ना• सकमाकल्पादिद्विजा एव श्रेयांस इत्याह, ब्राह्मणोऽस्य इति। त्रयीमयं वेदमुखप्रतिपाद्यम् आत्मनि सम्यगाधानरूपं शुश्रूषाणं अविधानलक्षणं यस्य तपसा तप आलोचनम्

स्वाध्यायोऽध्ययनं संयमो रागादिनियमस्तैर्बिभर्ति "आचारहीनं न पुनन्ति वेदाः" इत्यनन्तरं इत्यादि ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

ब्राह्मणा इति। यतस्ते समदर्शनास्तस्मात् मदादिषु या भिदा वर्तते तामणवपि यथाकथञ्चित् न पश्यन्ति इति सत्यमेव किन्तु, तेभ्योऽपि युष्मान् इत्येकान्तभक्तान् वयमीमहि प्रियत्वेन जानीम इत्यर्थः। तदुक्तं तेनैव चतुर्थे "अथ भागवता यूयं प्रियाः स्थ भगवान् यथा। न मद्भागवतानां च प्रेयानन्योऽस्ति कर्हिचित्" इति अभेदं [illegible] मार्कण्डेयस्य तदनुभवे समाधिविरतिर्न स्यात् अत्राभेदं [illegible] हरिरीश्वर इत्यनेन हरेरेव प्राधान्यमुक्तं तस्य [illegible] स्वयमीश्वरत्वं चोक्तं प्रथमस्कन्धे "पार्थिवाद्दारुणो धूमः" इत्य[illegible] ब्रह्मपुराणे शिववाक्यमपि तथा—

यो [illegible] मां दुष्टुमिच्छेत ब्रह्माणं वा पितामहम्।
[illegible] भगवान् वासुदेवः प्रतापवान्॥"

इति परब्रह्म[illegible]स्य तस्य विज्ञानेन सर्वविज्ञानादिति भावः ॥
॥ २०—२२ ॥

नहीति। [illegible] इन्द्रादिप्रतिमा ननु भगवत्प्रतिमा युष्माभिस्त्वा राध्यत्वादिति [illegible]वः ॥ २३ ॥

नमस्कारे हे[illegible]:–यस्मादिति। त्रयीमयं वेदलक्षणम् उपकारत्वादिति भावः ॥ २४—२५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

सोऽस्मत्त: यत [illegible]व: ॥ १७-१९ ॥

ये ब्राह्मणा अस्माके [illegible]मकात्तान् लोकपाला एव वन्दन्ते॥२०॥

न केवलं लोकपाला [illegible]व वन्दन्ते किन्त्वहं चेत्याह ॥ २१ ॥

मयि वापि अणुमात्रमपि न [illegible] न पश्यन्ति यथैवास्मासु भेदं न पश्यन्ति तथैवात्मनः [illegible]प्यपि सुखदुःखादिषु भेदं न पश्यन्ति, तस्मादेवंभूतान् युष्मा[illegible] [illegible]हि भजेम ॥
॥ २२—२३ ॥

[illegible]मयमात्मानं विष्णुध्यानम् ॥ २४—२५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदी[illegible]पः।

प्रकर्षेण मृडयति सुखयतीति स तथा ॥ १७-१८ ॥

सोऽस्मत्त: यत येभ्यः ॥ १९-२१ ॥

साधुत्वादय: समदर्शित्वान्ता: ब्राह्मणानां सर्वपूज्यत्वे हेतवः उक्तास्तत्र समदर्शित्वं प्रपञ्चयति–मेति। ते ब्राह्मणाः साधुत्वादिधर्मवन्तः मयि अजे चकारात्त्रिनेत्रादिषु आत्मनः क्षेत्रज्ञस्य जगत्य अविद्याध्यात्मकतिकावतो: सर्वस्य कार्यकारणस्य च अच्युते जगत्कारणे भगवति अणवपि भिदां न जाने पश्यन्ति चेतनाचेतनप्रपदार्थानामहपत्वात्म जडत्वकर्तृत्वा[illegible]भिः तत्प्रकाशत्वावैर्धर्मैः स्वरूपेण भिन्नत्वेऽपि तत्पृथक् [illegible]स्थितिप्रवृत्त्यभावाद

श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि वः ।
शुध्येरन्नन्त्यजाश्चापि किमु सम्भाषणादिभिः ॥ २५ ॥

सूत उवाच ।

इति चन्द्रललामस्य धर्मगुह्योपबृंहितम् ।
वचोऽमृतायनमृषिर्नातृप्यत्कर्णयोः पिबन् ॥ २६ ॥
स चिरं मायया विष्णोर्भ्रामितः कर्शितो भृशम् ।
शिववागमृतध्वस्तक्लेशपुञ्जस्तमब्रवीत् ॥ २७ ॥

[illegible]रुवाच ।

अहो ई[illegible] [illegible]दुर्विभाव्या शरीरिणाम् ।
यन्नमन्[illegible]पाणि स्तुवन्ति जगदीश्वराः ॥ २८ ॥
धर्मं [illegible]पितुं [illegible]यः प्रवक्तारश्च देहिनाम् ।
आच[illegible] क्रियमाणं स्तुवन्ति च ॥ २९ ॥
नै[illegible] स्वमायामयवृत्तिभिः ।
[illegible]स्तैर्मायिनः कुहकं यथा ॥ ३० ॥

श्रीमच्छुकदेवकृत[illegible]

अभिन्नत्वमित्यर्थः "स ब्रह्मा [illegible] [illegible]त्मात्मा ब्रह्म' सर्वं खल्विदं ब्रह्म" इत्याद्या [illegible] [illegible] तत्तस्मात् वयं युष्मानीमहि भजेम ॥ २२-२५ ॥

भाषा[illegible]

[illegible] [illegible]गुण को सेवन करनेवाले [illegible] [illegible] सेवन करने वाले [illegible] ॥ १७ ॥

[illegible] ॥

[illegible] [illegible] के गति भगवान् महादेवजी [illegible] करने से ऋषि के ऊपर परितुष्ट [illegible] हंसते हुए ऋषि से बोले ॥ १८ ॥

[illegible]वान् उवाच ।

[illegible] —हे मुने ! तुम हमसे यथेष्ट वर मांगो हम [illegible] के ईश हैं, और हम तीनों का दर्शन [illegible] है, [illegible] मनुष्य हम लोगों से अमृत मोक्ष को [illegible]

जो [illegible] निःशंक, भूतवत्सल और निर्वैर हैं वे हम [illegible] भक्त होकर समदर्शी रहते हैं २०

लोकपाल [illegible] लोक उनका वंदन करते हैं, अर्चन करते हैं और उपासना करते हैं, वे तीन लोक हैं कि—मैं और भगवान् ब्रह्माजी और स्वयं ईश्वर साक्षात् श्रीहरि ये हैं ॥ २१ ॥

वे भक्त जन मेरे विषें अच्युत के विषें तथा ब्रह्माजी के विषें अणुमात्र भी भेद नहीं देखते, एवं अपना और मनुष्यों का भी भेद नहीं देखते तस्मात् तुमारे सदृश भक्तजनों को हम भजते हैं ॥ २२ ॥

जलमय तीर्थ, और प्राणवायु के सम्बन्ध रहित ऐसे देवमूर्ति, ये दोनों सेवन करने से बहुत काल में पवित्र करते हैं, और आप लोग तो दर्शन मात्र से ही पवित्र करते हैं ॥ २३ ॥

हम ब्राह्मणों को नमस्कार करते हैं, जो ब्राह्मण चित्त का समाधान कर तप स्वाध्याय और संयमों से त्रयीमय जो हमारा रूप है तिसको धारण करते हैं ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च, श्रवणादित्यादि ॥ २५ ॥

चन्द्रो ललामो भूषणं यस्य तस्य धर्मरहस्ययुक्तममृतात्मकं वचः कर्णाभ्यां पिबन्नातृप्यदिति नामम्भत कर्णयोरमृतायनमिति वाऽन्वयः ॥ २६ ॥

शिवस्य वागेवामृतं तेन ध्वस्तः क्लेशपुञ्जो यस्य सः ॥ २७ ॥

इयं लीला दुर्विभाव्याऽवितर्क्या यया ईशितव्यानि नियम्यानि यानि भूतानि तानि जगदीश्वराः स्वयं नमन्ति स्तुवन्ति चेति ॥ २८ ॥

सृष्ट्वेदं मनसा विश्वमात्मनाऽनुप्रविश्य यः ।
गुणैः कुर्वद्भिराभाति कर्तेव स्वप्नदृग्यथा ॥ ३१ ॥
तस्मै नमो भगवते त्रिगुणाय गुणात्मने ।
केवलायाऽद्वितीयाय गुरवे ब्रह्ममूर्त्तये ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अथवा लोकसङ्ग्रहमात्रमेतदित्याह—धर्ममिति । प्रवक्तारोऽपि यत् स्वयं देहिनां धर्मं ग्राहयितुमाचरन्ति ॥ २९ ॥

नन्वेतरत्प्रमाणान्तरस्कारकं कथं मया क्रियते ? तत्राऽऽह, नैतावतेति । एतावता लोकसङ्ग्रहमात्रेण तैर्नमनादिभिः कथम्भूतैः, स्वमायामयी वृत्तिर्येषु तैर्भगवतो मायिनस्तवानुभावो न दुष्येत यतः प्रसिद्धस्य मायिनः कुहकं कपटं यथा तथा एतानि नमनादीनि अतस्तस्य तथा कुहकेनात्मानुभावो न दुष्यति तद्वत् प्रदुष्येतानुभाव इति पाठे नकारस्य दृष्टान्तेऽप्यनुषङ्गः ॥ ३० ॥

मायाचेष्टितं प्रपञ्चयति—सृष्ट्वेति । स्वप्नदृग्यथेत्यविद्याचेष्टिते दृष्टान्तः ॥ ३१ ॥

त्रिगुणायेत्यपि न जीववत्तदभिभूताय किन्तु गुणानामात्मने नियन्त्रे ॥ ३२ ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

मायामयवृत्तिभिः आश्चर्यचेष्टाभिः ॥ २९ ॥

शास्त्रदृष्ट्या भगवदात्मकत्वं मन्वान आह-सृष्ट्वेदमिति । सृष्टादिवत् अप्रदर्शयतीति स्वात्मन्यपीदि कुर्वन्निव स्थितः कर्मानुगुणैः कर्मपरिणामिभिर्गुणैः विषमसृष्टिं कुर्वद्भिः कुर्वन्निवाभातीत्यर्थः ॥ ३० ॥

ब्रह्ममूर्त्तये वेदनिर्वाहकाय ज्ञानप्रवर्त्तकाय वा ॥ ३१—३२ ॥

———

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

येषां च दर्शनश्रवणाद्दर्शनाच्छ्रवणाच्च महापातकिनोऽन्त्यजाश्च विशुद्ध्येरन् चक्षुरादिभिः विशुद्धयन्तीति किमु वक्तव्यम् तेभ्यो ब्राह्मणेभ्यो नमस्याम इति सम्बन्धः ॥ २५ ॥

इतीति चन्द्रो ललामं भूषणं यस्य तस्य चन्द्रलयोर्भूतं धर्मगुह्योपबृंहितं मार्कण्डेयात्मकधर्मरहस्य युक्तं कर्णयोरमृतायमानं वचः पिबन्नातृप्यत् कर्णाभ्यां पिबन्वा ॥ २६ ॥

स इति । स मुनिः विष्णोर्मायया आश्चर्यकरया चिरं भ्रामितः अत एव नितरां कर्शितश्च शिवस्य वाचोऽमृतं तेन स्वस्थः •क्लेशपुञ्जः भ्रमणप्रयुक्तक्लेशसमुदायो यस्य सः तं शिवम् इदं वक्ष्यमाणमब्रवीत् ॥ २७ ॥

तदेवाह—मतमिः अहो इति । यदुक्तं "वरं वृणीष्व" अमोघं दर्शनं येषाम्" इति तत्र तद्वदुनानाय किञ्चित्प्रार्थयितुमिच्छुस्तावत् "ब्राह्मणाः साधवः" इत्यादिना तथा "परस्परं भावयन्तः श्रेयः परमवाप्स्यथ" इत्युक्तरीत्या आचरन्त्याह—अहो इति पञ्चभिः । ईश्वरयोर्ब्रह्मेशाद्यभिभूतिभूतानां यथा चेष्टा शारीरिका दुर्विभाव्या दुर्विज्ञेया दुर्विभाव्यतामेव प्रकटयति यतः स्वयं जगदीश्वराः जगन्नियन्तारः अपीशितव्यान्यधस्तनानि भूतानि नमन्ति स्तुवन्ति चेत्यात्मनो नैच्यमनुसंहितम् इत्थंभूतैव हि भागवतानां परिपाटी ॥ २८ ॥

कस्तर्हीशितव्यप्रणामादावभिप्राय इति विचार्य निश्चिन्वन्नाह-धर्ममिति । देहिनां प्रवक्तारः धर्मोपदेष्टारोऽपि धर्मान् ग्राहयितुं प्रायशोऽनुतिष्ठन्ति क्रियमाणं धर्मं तत्कर्तारं वा अनुमोदन्ते अभिनन्दन्ति स्तुवन्त्यभिनन्दनं सन्तोषः ॥ २९ ॥

नैतावतेति । यद्यप्येवमप्यात्येतावता भवतरानुमोदन स्तुतिमात्रेण तैरीशितव्यप्रणामस्तुत्यादिभिश्च कथम्भूतैः भगवतः पूज्यस्य स्वमायामयवार्त्तारहस्यदर्शनया चेष्टा येषु तैः प्रभावो न दुष्येत न विहन्येत यथा मायिनः लोकप्रसिद्धमायाविनः कुहकैर्व्यापारैस्तस्य प्रभावो न दुष्येत न विहन्येत प्रत्युत स्वमायाविष्करणप्रभावाविष्कारः तद्वत् ॥ ३० ॥

शास्त्रदृष्ट्या भगवदात्मकत्वं मन्वानः सर्वकारणत्वादिभिर्विशिनष्टि नमतीति—२ सृष्ट्वेति द्वाभ्याम् । यो मनसा सङ्कल्पमात्रेणेदं जगत्सृष्ट्वा आत्मना स्वान्तःप्रविश्य कुर्वद्भिः पूर्वकर्मवासनानुगुणपरिणामिभिः सत्त्वादिभिः पुण्यापुण्यात्मकविषमसृष्टिं कुर्वद्भिर्गुणैः स्वयं कर्तेवाभाति इत्यर्थः परमार्थतः पुण्यापुण्यात्मककर्मकर्तृत्वाभावः परमात्मनि वर्तते जीवद्वारेण तत्र कर्तृत्वात् अकर्तुरपि कर्तृत्वाभासे दृष्टान्तः स्वप्नदृग्यथेति । न हि स्वप्नार्थसृष्टिकर्त्ता स्वप्नं दृश्यपि तत्कर्म प्रणाशत्वं कानुभाव्यतत्कालमात्रावस्थायि स्वाप्नपदार्थसृष्टा परमपुरुषः "न तत्र रथा न रथयोगा" इत्यारभ्य "सृजते स हि कर्ता" य एषु सुप्तेषु जागर्ति कामं पुरुषो निर्मिमाणस्तदेव" इति च श्रवणात् यथा स्वप्नार्थसृष्टिकर्तृत्वेऽपि तत्तदभिमानी जीवाभिकर्तृकाभिमानस्तथा पुण्यापुण्यकर्तृत्वादेर्जीवगतस्याज्ञानतां प्राप्य एषजीवभावेन तत्कर्तृत्वाभिमानमात्रमिति विवक्षितार्थः ॥ ३१ ॥

तस्मै इति । त्रिगुणाय त्रैगुणवनियन्त्रे अत एव प्रतिहतसङ्कल्पाय केवलाय निरस्तनिखिलदोषायाद्वितीयाय स्वतुल्यवस्त्वन्तररहिताय ब्रह्ममूर्त्तये वेदनिर्वाहकाय रूपतोऽपि ब्रह्मणे वा ॥ ३२ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

न केवलं दर्शनाच्छुद्धिरपि तु श्रवणादपीति समुच्चयत्वादाह—श्रवणादिति । तद्धितकशुद्धिः कर्माणि तत्राह किञ्चिदिति आदिपदेन नामस्मरणं गृह्यते ॥ २५ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

चन्द्रललामस्य चन्द्रशेखरस्य धर्मगुह्योपबृंहितं धर्मरहस्य-युतम् अमृतायनम् अमृतवद्वसंमतं कर्णयोर्हितम् ॥ २६ ॥

शमिनः समाधेः सञ्चालिनः मनस एव कार्श्नितः अनेन संयमिनां समाधेरन्यत्सुखं नास्तीति ज्ञापितम् ॥ २७ ॥

इयं वाग्लक्षणा चेष्टा ईशितव्यानि मवद्भिर्नियम्यानि प्रमुकुलानि स्तुवन्ति यच्छमात्तस्मात् ॥ २८ ॥

मुनिः स्वयमेव स्तवनादेरभिप्रायं वक्ति, धर्ममिति । न केवलं देहिनां धर्मस्य प्रवक्तारः आचरन्ति च आचरतोऽनुमोदन्ते क्रियमाणं धर्मं स्तुवन्ति च ॥ २९ ॥

ननु, विद्यादिवर्जितानां भवतां धर्माचरणादिना तेजः क्षतिः स्यादित्याह–नेति । "वृत्तिस्तु ग्रन्थसन्दर्भे" इति वचनात् स्वमायामयवृत्तिभिः स्वेच्छया कृता वृत्तिर्येषां ते तथा तैः सत्वादिनिर्विहूनेनैतावता कर्मणा भगवतोऽनुभावः प्रभावो न प्रदुष्येत प्रदुष्टो न भवति कुहकैरिन्द्रजालव्यापारैर्मायिनोऽनुभावः निश्चयो यथा तथेति ॥ ३० ॥

प्रकारान्तरेण दोषाभावं वक्ति, सृष्टेति । यो भगवान् मनसा स्वेच्छया इदं विश्वं सृष्ट्वान्तर्यामिरूपेणान्तःप्रविश्य दर्शनादिकुर्वाङ्ग-गुणादिभिरिन्द्रियैरहङ्कृतेति निरूप्य जीव इवाभातीत्येतावता जीव-वत् दुष्टो न भवति, कथमिव स्वप्नहश्मगवादिस्वच्छयोद्बोधितमानस-वासनया करितुरगादिपदार्थान् सृष्ट्वा यथा नरदेव लिप्तो न भवति ॥ ३१ ॥

तस्मै भगवते नम इत्य[illegible] गुह्या यस्य स तथा तस्मै गुह्यत्वं दोषस्य[illegible] केवलायेति निर्दोषाय निर्दोषत्वं मुक्तस्या[illegible] अद्वितीयायेति । मुक्तानिर्दोषत्वं हरिप्रसादायत्तं [illegible] समाधिकशून्यत्वात् कथमयमर्थः सम्पद्यत इत्य[illegible]त । ब्रह्मादीनां स्वात्म-रहस्योपदेष्टृत्वेन गुरुत्वात्तेन[illegible] । निराकारस्योपदेष्टृत्वं कथं घटत इति तत्राह[illegible]विगुह्याकाराय बृहन्तो यस्मिन् गुह्या इति [illegible]नादाकारः सिद्ध इति ॥ ३२ ॥

श्रीम[illegible]कृतक्रमसन्दर्भः ।

धर्मगुह्यं भगवद्[illegible] तम सत एवामृतायनं परमानन्दरूपत्वात्[illegible] मानुष्यत् ननु स्तुत्ये-त्यर्थः ॥ २६ ॥

विष्णुमाययेति [illegible]थः । शिवस्यापि च विषया-विष्टत्वं व्यावर्त[illegible]तत्त्वः ॥ २७—२८ ॥

धर्ममित्यत्र [illegible] निजकृत्या च देहिना-मिति देहस्य [illegible] इति मन्यमानानामित्यर्थः । अत एव प्रवक्तारस्[illegible] ॥

तेषु मुख्यं [illegible]त्र दोषान्तरं निरस्यति–नैताव तेति त्रिभिः [illegible]षु भक्तेषु वामाया कृपात्मय-वृत्तिभिरिति [illegible]था रीतिः प्रवर्त्तेतेति कृपया स्वमीति[illegible] स्पर्विरेकेण दृष्टान्तः मायिनः कुहकं

यथा प्रदुष्येत तथेति न दुष्यतेति पाठेपि मायिनः कुहकं यथा दुष्येत तथा न किन्तु न दुष्येतेत्यर्थः ॥ ३०—३२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

धर्मः एकान्तभक्ता इति नात्मनश्च परस्येत्यादि गुह्यं तत् युष्मान् वयमीमहीत्यादिनाऽप्यामुपबृंहितं मानुष्यवदिति नाथं स्वस्तवोऽयं मानन्द: किन्तु स्तुतिर्निषेधात्स्मात् धर्मप्रवर्त्तक-त्वमात्रेतादृशधर्मवता मया भवितव्यमित्युपदेशायेत्युक्त एवं ह्ययः ॥ २३ ॥ २७ ॥

दुर्विभाव्या अतर्क्या ईशितव्यानि अनियन्त्र्याण्यपि भूतानि ॥ २८ ॥

अथवा लोकसङ्ग्रहमात्रमेतदित्याह–धर्ममिति । क्रियमाणं धर्मं स्तुवन्तीति धन्योऽयं धर्मः यः सद्भिराचार्यैर्महाद्भिः क्रियते इति धर्मस्तुतिर्धर्मकर्तृत्वेन पर्याप्नोति ॥ २९ ॥

एतावता लोकसङ्ग्रहमात्रेण तैर्भवतादिभिस्तवानुभावो न प्रदुष्यति कीदृशैः मायामयेव वृत्तिश्चेष्टा येषु तैः मायिनः कुहकमिति यथा मायिनः ऐन्द्रजालिकेन केनापि स्वमुखा-दुत्पादितः कश्चिन्नरः स्तूयते नमस्क्रियते च तेन तस्या-नुभावो न दुष्यतीति न दुष्येतेति पाठे नकारस्य दृष्टान्ते-नानुषङ्गः । यद्यपि श्रीरुद्रेण तदीयस्तुत्यादयो न मायया कृता-स्तदपि सस्तुत्या लज्जितेन मुनिना प्रयुक्तोऽयं दृष्टान्तो नानु-पपन्नः ॥ ३० ॥

मनसा सङ्कल्पमात्रेण कुर्वद्भिर्गुणैः जीवैः जीवनकर्तापि कर्त्तेवाभातीति न गुणलेप इति भावः । अविद्यया स्वप्नं सृजतो जीवस्यापि वस्तुतस्तत्सम्बन्धो नास्ति किमुत तस्येति दर्शयन् दृष्टान्तयति स्वप्नदृग् यथेति ॥ ३१ ॥

गुह्यात्मने गुह्यनिबन्धे ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

चन्द्रः ललामः शिरोभूषणं यस्य इति पूर्वोक्तम् धर्मस्य साधवः शान्ता इत्यादि स्तुतिमिषेणोपदिष्टेन गुह्येन भक्त्युक्ते अजे पेयमोक्षेण तत्वसम्बन्धरूपरहस्येन च युक्तम् अत एवामृतायनममृतास्पदम् कर्णयोः कर्णाभ्यां पिबन्नपि नातृप्यत् ॥ २६ ॥

शिवस्य वागमृतेन स्वस्तो निरस्तः क्लृप्तपुञ्जो यस्य सः ॥ २७ ॥

ईश्वरचर्या ईश्वराणां भवतेऽजस्याच्युतस्य च लीला दुर्वि-भाव्या दुर्वितर्क्या ईशितव्यानि स्वानियम्यानि ॥ २८ ॥

ईश्वरा सन्तोपीशितव्यानि नमन्तीत्यत्र तदभिप्रायमाविष्करोति, धर्ममिति । देहिनां प्रवक्तारोपि धर्मस्यावितारोपि स्वयं गुरवो-पीत्यर्थः । तथापि धर्मं ग्राहयितुमाचरन्ति ग्राहयितृत्वेन "आचरि-तस्तत्प्रवर्तकत्वात्" (५।१।१) इति स्वाभाविकाचारमाचरन्तीति द्योतितम् ॥ २९ ॥

कं वृणे नु परं भूमन् ! वरं त्वद्वरदर्शनात् ।
यद्दर्शनात्पूर्णकामः सत्यकामः पुमान् भवेत् ॥ ३३ ॥
वरमेकं वृणेऽथापि पूर्णात्कामाभिवर्षणात् ।
भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥ ३४ ॥

सूत उवाच ।

इत्यर्चितोऽभिष्टुतश्च मुनिना सूक्तया गिरा ।
तमाह भगवान् शर्वः शर्वया चाभिनन्दितः ॥ ३५ ॥
(१)कामो महर्षे ! सर्वोयं भक्तिमांस्त्वमधोक्षजे ।
आकल्पान्ताद्यशः पुण्यमजरामरता तथा ॥ ३६ ॥
ज्ञानं त्रैकालिकं ब्रह्मन् ! विज्ञानं च विरक्तिमत् ।
ब्रह्मवर्चस्विनो भूयात्पुराणाचार्यताऽस्तु ते ॥ ३७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

नावृत्तिर्येषु एवम्भूतैस्तैर्नमनादिभिः भगवतोऽनुभावो न प्रदुष्येत न विहन्येत तत्र दृष्टान्तमाह, मायिनःकुहक यथेति मायिनः नटादेः कुहकं नाट्यादिकं तदनुभावं न दूषयति यथा तद्वत् ॥३०॥

समान्यतः ईश्वराणां स्तुतिं कृत्वा विशेषतो हरिं प्रणमति—मृद्धिति द्वाभ्याम् । यश्च सर्वोपास्यः स्वयं हरिरिति निर्दिष्टः मनसा सङ्कल्पमात्रेणेदं विश्वं सृष्ट्वाऽनुप्रविष्टः गुणैः प्राकृतांनुरूपैः सत्त्वादिभिः देवमनुष्यादिविषमसृष्टिं कुर्वन्निव स्वयं विषमसृष्टिकर्त्रेवाभाति तस्मै नम इति द्वयोरन्वयः । अवैषम्यकर्तुरपि वैषम्यकर्तृत्वावभासे दृष्टान्तमाह, स्वप्नदृग्यथेति "य एव सुप्तेषु जागर्त्ति कामं कामं पुरुषो निर्मिमाणः तद्ब्रह्म" इति श्रुतिप्रसिद्धः परमात्मा स्वप्नरथादिस्रष्टा भवति भ्रान्त्या तु स्वप्नदृक् जीवस्तत्कर्ता प्रतीयते तद्वदित्यर्थः ॥ ३१ ॥

अत्रिगुणाय त्रिगुणविग्रहादिसम्बन्धशून्याय गुणात्मने गुणनियन्त्रे केवलाय स्वाश्रयाय अद्वितीयाय निःसमानातिशयाय ब्रह्ममूर्त्तये बृहद्ब्रह्माय ॥ ३२ ॥

भाषाटीका ।

महापातकी लोग भी तथा अन्त्यज चांडाल लोग भी आपके श्रवण और दर्शन से शुद्ध होजाते हैं, फिर सम्भाषणादि से तो कहना ही क्या ॥ २५ ॥

सूत उवाच ॥

चन्द्रललाम श्रीमहादेवजी का धर्म रहस्य युक्त और अमृत के आस्पद ऐसे वचनों को कर्णों के द्वारा पीते हुये ऋषि तृप्त न हुये ॥ २६ ॥

वह मार्कंडेय ऋषि बहुत काल से श्रीविष्णु के माया से भ्रमते रहे, इस कारण अत्यन्त क्लेशित रहे। अब शिवजी की अमृत रूप वाणी से ऋषि के सब क्लेश पुंज नष्ट हुए तब ऋषि महादेवजी से बोले ॥ २७ ॥

ऋषिरुवाच ।

मार्कंडेयजी बोले, कि—अहो ! समर्थ ईश्वर लोगों की लीला मनुष्यों की तर्कना में नहीं आसक्ती है। क्योंकि—वे जगदीश्वर होकर भी अपने निवश्यजनों की स्तुति करा करते हैं ॥२८॥

प्रायः करके ये ईश्वर लोग अन्य लोगों को धर्म सिखाने के लिये ऐसा धर्म कहते हैं, आचरण करते हैं और अनुमोदन करते हैं, तथा जो कोई आचरण करता है उसकी प्रशंसा भी करते हैं ॥ २९ ॥

अपनी कृपा प्रधान वृत्ति वाले इन आचरणों से आप लोगों का प्रभाव भी दूषित नहीं होता है, जैसे, कि प्रसिद्ध मायावी के कपटाचरण से उसका प्रभाव नहीं दूषित होता है ॥ ३० ॥

जो आप अपने मन से इस विश्व को रचकर आपही इसमें प्रविष्ट होकर कार्य करने वाले गुणों से [illegible] कर्त्ता सदृश मालूम होते हो, जैसे स्वप्न का देखने वाला ईश्वर रचित स्वप्न दृष्ट पदार्थों का कर्त्ता आप ही मालूम होता है ॥३१॥

भगवान् त्रिगुण वाले, गुणात्मक, केवल, अद्वितीय, ब्रह्ममूर्त्ति, ऐसे जो गुरु आप ही तिनको नमस्कार हो ॥३२॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

वरं वृणीष्वेति यदुक्तं तत्राऽऽह—कमिति । वरं दर्शनं यस्य तस्मात् त्वत्तः परं कं नु वरं वृणे, यस्य तव दर्शनमात्रलोकमात्पूर्णकामः सर्वानन्दसन्दोहरूप सत्यकामो यथेच्छप्राप्तसर्वानन्दः ॥ ३३ ॥ ३४ ॥

वरदानाय स्वयमेव प्रवृत्तः शर्वोऽनया वाऽभिनन्दितोऽनुमोदितः सन्नाह ॥ ३५ ॥

(१) कामस्तेयं महर्षेऽस्तु इति पाठान्तरम् ।

श्रीधरस्वामिकृतभावार्थदीपिका [illegible]

कामोऽयं सर्वोऽप्यस्त्वथ , यत्पुण्यं य[illegible]वर्च-स्विनस्ते भूयादित्युत्तरयोरन्वयः यतस्त्व[illegible]जे भक्ति-मान् ॥ ३६ ॥ ३७ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

सार्धेन सार्धपद्या ॥ ३४—३५ ॥
ज्ञानं तत्त्वज्ञानं ब्रह्मवर्चस्विनः वृद्धत्रवर्चस्विनः ॥ ३६—४० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

यदुक्तं वरं वृणीष्वेति तत्रोत्तरमाह—कमिति । हे भूमन् ! वरदर्षभात् त्वत्तः अतः परमन्यं कं वरं वृणे वरिष्यामि वरं बुद्ध्या सम्भाव्यत इति निर्देशः कृतः वरदर्शनादिति पाठे वरं श्रेष्ठं दर्शनं यस्य तस्मात्त्वत्तः अतद्यावद्विवक्षितं विद्यमाहि, यदीशानः पूर्णकामः इति । यत् यतः पुमान् ईशानः ईश्वरः स्वतन्त्रः अकर्मवश्य इति यावत् पूर्णकामः सत्यकामश्च भवेत्तस्मा-दत इति सम्बन्धः ॥ ३३ ॥

यद्यप्यतः परो वरणीयो वरो नास्ति तथापि पूर्णकामाभि-वर्णकारत्वात् एनं वरं वृणे एतावेवाभाव भावः कोऽसौ भग-वत्यच्युते तत्परेषु तद्भक्तेषु तथा त्वयि च भक्तिमित्यनेन वर-मिति सम्बन्धः तत्परेष्वित्यनेन गतार्थत्वेऽपि पुनस्त्वयीत्युक्तित्व-स्याचार्यविषयया गोवलीवर्दन्यायात्तत्र भगवद्भक्तेषु भक्तिर्नाम भगवद्विभूतित्वानुसन्धानुसन्धानात्मिका ॥ [illegible]४ ॥

इतीति । सूक्त[illegible]या [illegible]यया अभिनन्दितस्तं मुनिमाह ॥ ३५ ॥

उक्तिमेवाह—[illegible] । विभौ भगवति कामं नितरां भोक्तृणां [illegible] ॥ ३६ ॥

त्रैकालिक[illegible]गोचरवस्तुज्ञानं ब्रह्मविज्ञानं ब्रह्मस्वरूपरूपादि[illegible]कमत् विरक्तियुक्तम् ॥ ३७ ॥

श्रीम[illegible]कृतपदरत्नावली ।

यत एवं [illegible]धिकः समो वा नास्ति सर्व-श्रेष्ठश्चातस्तत्रूपि[illegible]मन्यं कं वरं वृणे वरं वरेण्यं दर्शनम् [illegible] तस्मात् एतदेवाह—यद्दर्शना-द्येनोपदिष्ट[illegible]मः स्यात् अत एव सत्य-कामश्च ॥ ३३ ॥

महदर्थ[illegible] वृणीष्वेति मद्वचनं अवर्णमभू-दिति मा [illegible]द्यपि वरो न प्रार्थनीयस्तथापि त्वद्वचनस[illegible] पूर्णकामाभिवर्णनादिति शेषः कोऽसौ [illegible]नीति । तत्परेषु तद्भक्तश्रेष्ठे त्वयि च ॥ ३४

सार्धेन सार्धपद्या [illegible] ३५ ।

[illegible]मान्, वृद्ध[illegible]

पुण्यम् यशो ऽजरामरत्वता च भूयात्त्वेति शेषः ॥ ३६ ॥

किञ्च, वरान्तरं च स्यादित्याह—ज्ञानमिति ॥ ३७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

दोषाद्यपशमेन दर्शयति—सृष्ट्वामिति, युग्मकम् । इदं विश्वं मनसा सङ्कल्पेनैव निमित्तेन गुणैः उपादानैः सृष्ट्वापि तत्त्वा-त्मना स्वयं तदनुप्रविश्य प्रवेशेन स्थापयित्वाऽपि तदनुपच-यार्थेन संहृत्यापि कर्तृवदेवाभाति न तु कर्त्तेवेति तत्र हेतु-त्वाय गुणान् विशिनष्टि—कुर्वद्भिरिति । तत्सांनिध्यप्रभावेण चेतना इव गुणा एव सर्वं कुर्वन्ति न तु स्वयमिति सङ्कल्प-स्याभासमात्रत्वेन तदसम्बन्धादित्यर्थः । तत्राविद्यया स्वमं सृज-तस्तद्दोषतदर्शंशस्य जीवस्यापि वस्तुतस्तत्सम्बन्धो नास्ति किमुत तस्येति दर्शयन् दृष्टान्तयति—स्वमदृग्यथात । अव-गम्भनामयथेमरूपा गुणा यस्य तस्मै गुणा ऐश्वर्यादयोऽपि आत्मानः स्वरूपभूता यस्य तस्मै केवलाय प्रकृतिसङ्गशून्याय अद्वितीयाय स्वतुल्यरहिताय अत एव गुरवे सर्वोपदेष्ट्रे ब्रह्मोति-स्वोपदेश्यम् यद्ब्रह्म वेदः तदपि मूर्तिः स्वरूपम् यस्य तस्मै ॥ ३१ (क) ३३ ॥

तथा त्वयीति त्वयि च तत्पर इत्यर्थः—
"क वर्णये तव विभो यदुदीरितोऽसुः—
संस्पन्दते तमनुवाङ्मन इन्द्रियाणि ॥
स्पन्दन्ति वै तनुभृतामजशर्वयोश्च" ॥
इत्यनेनैव श्रीनारायणादिषु प्रत्युक्तत्वात् ॥ ३४—४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

वरं वृणुष्वेति यदुक्तं तत्राह—किमिति । वरो दर्शनम् यस्य तस्मात् सत्यकामः सत्यसङ्कल्प एव तत्परेषु तद्भक्तेषु तथा तद्भक्तश्रेष्ठे त्वयि भक्त्युपदेष्टरि गुरौ तेन त्वयि मे भक्तिस्त-द्भक्तत्वेनैवास्तु नत्वीश्वरत्वेनेति भावः ॥ ३३ ॥ ३५ ॥

अयं सर्वोऽपि कामस्ते अस्तु यतस्त्वमधोक्षजे भक्तिमान् ॥ ३६—४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

शिष्यं प्रत्याह—कमिति द्वाभ्याम् । यदुक्तं वरं वृणीष्व नः कामामिति तत्र कं परं श्रेष्ठं वरं वृणे यत् यस्य ॥ ३३ ॥

भगवति श्रीहरौ तद्भक्तेषु त्वयि तद्भक्तमुख्ये च ॥ ३४ ॥

अत एव वरं दातुं प्रवृत्तः मार्थयोभया वाच्याभिनन्दितो ऽनुमोदितः सन् तं मुनिमाह ॥ ३५ ॥

अयं सर्वोऽपि कामस्तेऽस्तु यतस्त्वमधोक्षजे भक्तिमान् यश आदि च ब्रह्मवर्चस्विनस्ते भूयादित्यग्रिमेणान्वयः ॥ ३६—३७ ॥

सूत उवाच ।

एवं वरान् स मुनये दत्त्वाऽगात् त्र्यक्ष ईश्वरः ।
देव्यै तत्कर्म कथयन्ननुभूतं पुराऽमुना ॥ ३८ ॥
सोऽप्यवाप्तमहायोगमहिमा भार्गवोत्तमः ।
विचरत्यधुनाप्यद्धा हरावेकान्ततां गतः ॥ ३९ ॥
अनुवर्णितमेतत्ते मार्कण्डेयस्य धीमतः ।
अनुभूतं भगवतो मायावैभवमद्भुतम् ॥ ४० ॥
एतत्केचिदविद्वांसो मायासंसृतिमात्मनः ।
अनाद्यावर्तितं नृणां कादाचित्कं प्रचक्षते ॥ ४१ ॥
य एवमेतद्भृगुवर्य ! वर्णितं रथाङ्गपाणेरनुभावभावितम् ।
संश्रावयेत्संशृणुयादुतावुभौ तयोर्न कर्माशयसंसृतिर्भवेत् ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यां द्वादशस्कन्धे
दशमोऽध्यायः ॥ १० ॥

भाषा टीका ।

हे भगवन् ! वर देने वालों में श्रेष्ठ जो आप हैं, तिन आप से अब मैं क्या वर मागूं । क्योंकि—आप के दर्शन मात्र ही से पुरुष पूर्णकाम और सत्य काम होजाता है ॥ ३३ ॥

तथापि परिपूर्ण और मनोरथों के पूर्ण करने वाले आपसे एक वर मांगता हूं, कि—मेरी भगवान् के विषै निश्चल भक्ति होय, तथा भगवद्भक्तों में और आप में भी भक्ति होय ॥ ३४ ॥

सूत उवाच ॥

सूतजी बोले, कि—मुनि ने सुन्दर वाणी से इस प्रकार जब पूजन और स्तुति करी, तब श्रीपार्वतीजी सहित महादेवजी प्रसन्न होकर ऋषि से बोलते हुए ॥ ३५ ॥

श्रीमहादेवजी बोले, कि हे महर्षे ! यह मनोरथ तुम्हारा सिद्ध होय । और तुम भगवान् के विषै भक्तिमान् भी होऊं तथापि तुम्हारा पुण्य यश कल्पान्त तक रहे, तथा तुम अजर अमर होव ॥ ३६ ॥

हे ब्रह्मन् ! तुमको त्रिकाल सम्बन्धि ज्ञान हो, और विरक्ति वाला विज्ञान भी हो, और, ब्रह्मवर्चस् अखंडित रहे । तथा तुम पुराण के आचार्य भी होव ॥ ३७ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

तदेव कर्मतत् [illegible] अमुना पुराऽनुभूतं भगवन्मायावैभवं तत् कथयन् ॥ ३८ ॥

अवाप्तो महायोगमहि[illegible] येन सः ॥ ३९ ॥

एतन्मार्कण्डेयस्य चरितं [illegible]तानुभूतं तेऽनुवर्णितम् ॥ ४० ॥

नन्वेतदत्यन्तमाश्चर्यमुत्पन्न[illegible] कल्पावृत्तं पूर्वेकल्पमात्रं विरुद्धमेव तत्राऽऽह—एतन्मार्क[illegible]नानुभूतं भगवन्मायावैभवं नानाकल्परूपं कादाचित्कमभिप्रैति [illegible] तत्त्वैकाकालिकं न तु सर्वसाधारणम् एतत्केचिदविद्वांसो[illegible] देवयुगसहस्रद्वयमानेन पुनः पुनः परिवर्तितं [illegible]ते [illegible] न नृणां संसृतिं सर्गप्रलयादिरूपामात्मनो भगव[illegible] मायेत्यवबुद्धाम: विद्वांसस्तु मायाशिक्षा: [illegible] प्रवेशनिर्गमन: [illegible] इति वदन्तो न विरोध इत्यर्थः ॥ ४१ ॥

संशृणुयात् उ हन्ति हर्षे संश्रावये[illegible] तावुभौ तयो: कर्मवासनात्मिका संसृतिर्न भवेदिति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे [illegible]स्कन्धे
श्रीधरस्वामिकृतभावार्थदीपि[illegible]
दशमोऽध्यायः ॥ १० ॥

———

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

एतदिति । केचन संसारानादित्वानभिज्ञाः कादाचित्कत्व-मातुरित्यर्थः ॥ ४१—४२ ॥

इति श्रीमद्भागवतव्याख्याने द्वादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
दशमोऽध्यायः ॥ १० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिति । सः ऽयक्षिलोचन ईश्वरः रुद्रः मुनये मार्कण्डेयाय वरान्दत्त्वाऽमुना मुनिना यत् पुरा अनुभूतं तत्कर्म भगवन्मायाप्रदर्शनात्मकं कर्म देव्यै शर्वाण्यै कथयन् अगात् जगाम ॥ ३८ ॥

सोपीति । भार्गवोत्तमो मार्कण्डेयः अवाप्तः महायोगवैभवो येन सः हरौ भगवति एकान्तिताम् अनन्यप्रयोजनभक्तिमत्त्वं गतः अधुनापि चरति मह्यां स्फुटं नात्र संशय इति भावः ॥ ३९ ॥

उपसंहरति—अनुवर्णितमिति । यन्मार्कण्डेयस्य तेनानुभूतमद्भुतम् भगवतो मायाया आश्चर्यशक्तेर्वैभवं तत्ते तुभ्यम् अनुवर्णितम् ॥ ४० ॥

प्रसक्तान्मार्कण्डेयस्य कादाचित्कमायावैभवदर्शनवज्जीवस्यापि संसारः पूर्वमविद्यमान एव कदाचित्स्त्रीभगन्मायया भवतीति केषाञ्चिन्मतं प्रतिक्षिपति—एतदिति । केचिदविद्वांसः संसारानादित्वानभिज्ञाः नृणां जीवानामात्मनो भगवतो मायया संसृतिं कादाचित्कं यथा तथा प्रचक्षते इत्यनुवादः तद्दर्शयति—एतदनाद्यावर्त्तितमिति । संसरणमित्यध्याहार्यम् एतत्संसरणमनादितया आवर्त्तितं परिवर्त्तितं भवत्यन्यथा "न कर्माविभागात्" (२।१।३५) इत्याद्यधिकरणविरोधात् इति ॥ ४१ ॥

प्रकृतमार्कण्डेयच[illegible]श्रावणादि [illegible]माह—य इति । भृगुवर्यस्य मार्कण्डेयस्य [illegible] य: । कथंभूतं रथाङ्गपाणेर्भगवतः अनु[illegible] [illegible]काशितम् यः संभावयेद्यः शृणुयात्तयोरुभयो[illegible] [illegible]नामिता संसृतिर्न भवेत् ॥ ४२ ॥

इति श्री[illegible]पुराणे द्वादशस्कन्धे
श्रीमद्वी[illegible]भागवतचन्द्रचन्द्रिकायां
[illegible]ोऽध्यायः ॥ १० ॥

श्री[illegible]कृतपदरत्नावली ।

अमुना मा[illegible]

अवाप्तमहायो[illegible] [illegible]अवाप्तमहिमाप्राप्तमहाणिमादियोगमहिमा [illegible]भक्तताम् ॥ ३९ ॥

भागवतो [illegible]नुभूतं हरेर्मायावैभवं तेनुवर्णितमेतच्छृणु [illegible]ांस आत्मनो हरेर्मायाप्रवृत्तिसामर्थ्यवि[illegible]चते अकाले प्रदर्शितत्वेन कादाचित्कं किं [illegible]ति । अनादिकालवर्तिनं न नूतनं यद्वोपसंहरा[illegible] मार्कण्डेयस्यैतच्चरितं तेनुवर्णितं किन्तच्चरित[illegible] अवेयत्वे मतभेदमाह एतदिति ॥ ४०—४[illegible]

इमोध्येतत्कृतंयमिति फलमाह—य इति । अनुभावेन भावितं नत्वर्जितम् तयोरुभयोः भावयितृश्रोत्रोः कर्माशयसंसृतिः कर्मणामाशयः स्थान देयस्तन्निमित्तसंसारो न भवेदिति स्वरूपनाश एवोच्यते अस्य श्रीहरिभक्तिमुख्यहेतुरतोऽच्युतां भक्तिमित्याह ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
दशमोऽध्यायः ॥ १० ॥
(विजयध्वजतीर्थीयरीत्या नवमः)

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एतत् मार्कण्डेयदृष्टमात्मनो भगवतो मायासंसृतिस्तत्प्रार्थनया मायाप्रसार एव तदेतदपि केचिदविद्वांसः अनादित एवावर्त्तितं भगवता पुनः प्रापितं कदाचित्कं प्रलयं प्रचक्षते अन्ये तद्द्रष्टाः कल्पास्तु मन्वन्तरावधयेति भावः ॥ ४१ ॥

स इति पक्षान्तरे संभावयेद्वा तावुभौ तुल्यावित्यर्थः । फलमाह, तयोरिति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
दशमोऽध्यायः ॥ १० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

एतन्मार्कण्डेयदृष्टम् आत्मनः परमेश्वरस्य मायासंसृतिवैभवमित्यर्थः । भगवतः शिशुस्वरूपस्य परमात्मनः श्वासोच्छ्वासाभ्यां सप्तकृत्वस्तदुदरप्रवेशनिर्गमकालात्मकं कादाचित्कमेव केचिदविद्वांसो नृणामनाद्यावर्त्तितम् अनादिकं बहुकालत आवर्त्तितं तदेव युगसहस्रमानेन पुनःपुनरावर्त्तितं सप्तकल्पमेव प्रचक्षते ॥ ४१ ॥

हे भृगुवर्य ! अनुभावेन भावितं वासितं भावयेत् यश्च शृणुयात्तावुभौ तुल्यावेवेति शेषः अतस्तयोः कर्माशयमयी संसृतिर्न भवेत् ॥ ४२ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वादशे दशमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तस्य मुनेः कर्मतप आदि यदमुनाऽनुभूतं भगवन्मायावैभवम् तच्च कथयत् ॥ ३८ ॥

अवाप्तः संप्राप्तो महायोगमहिमा येन सः ॥ ३९–४० ॥

एतत् मार्कण्डेयेनानुभूतम् आत्मनः परमात्मनः मायासंसृतिः योगमायायाः वैभवं कादाचित्कं मार्कण्डेयमनोरथपूर्त्यर्थं भगवता कदाचित्तम् प्रलयेव प्रवर्त्तितम् केचित्तु नृणाम् जीवानाम् हिताय अनादितः भगवता आवर्तितम् प्रचक्षतेऽविद्वांसः ॥ ४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

हे भृगुवर्य, शौनक ! एतन्मार्कण्डेयचरितं रथाङ्गपाणेः अनुभावेन भावितम् समर्थितम् यः संशृणुयात् उत संश्रावयेत् तावुभौ सफलितौ ज्ञेयौ इति शेषः । फलमाह—तयोः कर्माशय संसृतिः कर्मवासनाकृतसंसृतिः कर्मवासनाकृतसंसारो न भवेदिति ॥ ४२ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
दशमाऽध्यायार्थप्रकाशः ॥ १० ॥

भाषाटीका ।

सूत उवाच ॥

सूतजी बोले, कि—वे तीन नेत्र वाले ईश्वर, श्रीशिवजी मुनि को इस प्रकार वर देकर, मुनि के प्रथम अनुभूत कर्म को श्रीपार्वतीजी से कहते हुए चले गये ॥ ३८ ॥

और वे भार्गवोत्तम मार्कण्डेयजी भी महा योगमहिमा को प्राप्त होकर, अब भी विचरते रहते हैं ॥ ३९ ॥

हे शौनकजी ! हमने यह श्रीमान् मार्कण्डेयजी का वैभव तुम्हारे सन्मुख वर्णन किया, और जैसा ऋषि ने भगवान् की मायाके अद्भुत वैभव का अनुभव किया सो वर्णन किया ॥४० ॥

मार्कण्डेय ने जिसका अनुभव किया वह भगवान् की माया का नाना कल्प रूप वैभव काादाचित्क था अर्थात् भगवदिच्छा से केवल मार्कण्डेय ऋषि मात्र के अनुभव गोचर था सर्व साधारण नहीं, इसको भगवन्माया के संसर्ग को नहीं जानने वाले कोई २ अविद्वान् जन अनादिकाल से प्रवर्तित कल्पों में से सप्तकल्प मार्कण्डेय को बीत चुके ऐसा कहते हैं सो बात नहीं है ॥ ४१ ॥

हे भृगुवर्य ! हे शौनक ! श्रीहरिके प्रभाव युक्त वर्णन किये हुए इस चरित्र को जो सुनावे और जो सुने उन दोनों श्रोता वक्ताओं को कर्म वासनाकृत संसार नहीं प्राप्त होवे है ॥ ४२ ॥

इति श्रीमद्भागवत द्वादश स्कन्ध में दशमेऽध्याय की
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषा टीका समाप्ता ॥ १० ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे दशमोऽध्यायः ॥ १० ॥



एकादशोऽध्यायः ।

——:o:——

शौनक उवाच ।

अथेममर्थं पृच्छामो भवन्तं बहुवित्तमम् ।
समस्ततन्त्रराद्धान्ते भवान् भागवत ! तत्त्ववित् ॥ १ ॥
तान्त्रिकाः परिचर्यायां केवलस्य श्रियःपतेः ।
अङ्गोपाङ्गायुधाऽऽकल्पं कल्पयन्ति यथा च यैः ॥ २ ॥
तन्नो वर्णय भद्रं ते क्रियायोगं बुभुत्सताम् ।
येन क्रियानिपुणेन मर्त्यो यायादमर्त्यताम् ॥ ३ ॥

सूत उवाच ।

नमस्कृत्य गुरून् वक्ष्ये विभूतीर्वैष्णवीरपि ।
याः प्रोक्ता वेदतन्त्राभ्यामाचार्यैः पद्मजादिभिः ॥ ४ ॥
मायाद्यैर्नवभिस्तत्त्वैः सविकारमयो विराट् ।
निर्मितो दृश्यते यत्र सचित्के भुवनत्रयम् ॥ ५ ॥
एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः ।
ना[illegible]ः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभोः ॥ ६ ॥
[illegible]ः प्रजननमपानो मृत्युरीशितुः ।
त[illegible] लोकपाला मनश्चन्द्रो भ्रुवौ यमः ॥ ७ ॥
लज्जो[illegible]ऽधरो लोभो दन्ता ज्योत्स्ना स्मयो भ्रमः ।
रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्द्धजाः ॥ ८ ॥

[illegible]भावार्थदीपिका ।

एक[illegible]पुरुषवर्णनम् ।
रवे[illegible]प्रतिमासं पृथक् पृथक् ॥
येन[illegible]र्योऽसौ मार्गवोत्तमः ।
तं[illegible]र्गं साङ्गोपाङ्गादिकल्पितम् ॥

अथेति । [illegible]ति भवान् समस्ततन्त्रराद्धान्ते तत्त्वविद्रहस्यज्ञः [illegible]

प्रष्टव्य[illegible] । परिचर्यायामुपासनायां विषये केवलस्य [illegible] पादादीनि, उपाङ्गानि गरुडादीनि, आ[illegible]नि, आकल्पाः कौस्तुभादयस्तेषां द्वन्द्वैक्यम् तद्यथा कल्पयन्ति येश्च तत्त्वैः कल्पयन्ति, तन्नो वर्णयेति ॥ २ ॥ ३ ॥

गुरूपदेशागम्यत्वाद्वक्ष्यार्थस्य तन्नमस्कारपूर्वकमाह—नमस्कृत्येति । विभूतीर्विराड्विग्रहाद्याः ॥ ४ ॥

अङ्गादिकल्पनां भूरादिभिर्वक्तुं प्रथमं तावद्यथा कल्प[illegible] प्रश्नस्य वैराजरूपेणोत्तरं वक्तुं विराड्विग्रहमाह, मा[illegible] प्रकृतिसूत्रमहदहङ्कारपञ्चतन्मात्रैर्नवभिस्तत्त्वैः विकार एका[illegible]न्द्रियाणि पञ्चमहाभूतानीति षोडश तन्मयो विराट् स [illegible] निर्मितः यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं [illegible] अनेनाङ्गादिकल्पनासौकर्यं दर्शितम् ॥ ५ ॥

ए[illegible] पौरुषं रूपम् पुरुषस्य वैराजस्य रूपमेवेश्वरस्याधि-

[illegible]स्वामिकृतभावार्थदीपिका ।

हितत्वात्तदभेदविवक्षया तस्य रूपमुच्यते । अङ्गकल्पनामाह, भूःपादावित्यादिभिः । भूराद्यनुवादेन भगवत्पादादिभावना विधीयते ॥ ६ ॥

प्रजननं मेढ्रम् अपानः पायुः ॥ ७ ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १–२ ॥

अमरवैतान्निरामयात्मनीत्यस्मुक्तिम् ॥ ३–४ ॥

मायाद्यैरिति मायासंज्ञा प्रकृतिः महानहङ्कारो भूतानि पञ्चाकाशश्च तव नरकानि विराट् ब्रह्माण्डम् ॥ ५ ॥

पौरुषं भगवदीयं नमो नाभिः ॥ ६–७ ॥

हमयः स्मितं भ्रमः भ्रमाभिमानी देवतात्मकः ॥ ८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

इत्थं परिपृष्टं मार्कण्डेयवृत्तान्तमनुवर्ण्य कृत्स्नप्रबन्धार्थमुपसञ्जिहीर्षुं सूतमाश्रय निमिजायन्तेय श्रीभगवद्गुणसत्त्वादाविमुखेनाक श्रीभगवत्पूजात्मककर्मयोगं समाराध्य श्रीभगवदङ्गोपाङ्गायुधाद्याभिमन्तव्यानि तत्त्वानि बुभुत्सुः पृच्छति—अथेत्यादिना । इमं वक्ष्यमाणमर्थं वक्तु बहुविस्मयत्वमेव प्रपञ्चयति—समस्ततन्त्रेत्यादि । हे भागवत ! भवान् समस्ततन्त्राणां पुराणपञ्चरात्रादीनां यो राद्धान्तस्तद्विभक्तस्तत्त्ववित् ॥ १ ॥

को ऽसावर्थं इत्यत्रत्वमाह—तान्त्रिका इति । केवलस्य केवलशुद्धसत्त्वमयदिव्यमङ्गलविग्रहस्य श्रियः पतेः परिचर्यायां तान्त्रिकाः श्रीभगवदाराधनात्मतन्त्रपरिनिष्ठाः यैर्यत्र यैस्तत्त्वैः अङ्गोपाङ्गायुधाकल्पम् अङ्गानि पाणिपादादीनि उपाङ्गानि हृदयादीनि आयुधानि सुदर्शनादीनि आकल्पा भूषणानि तेषां द्वन्द्वैकवत् तत्कल्पयन्ति यत्तत्त्वाभिमानिदेवतात्वेन ध्यायन्तीति यत् तद्वेतन्नो ऽस्माकं वर्णयेत्युत्तरेण सम्बन्धः ॥ २ ॥

कथम्भूतानां क्रियायोगं श्रीभगवदाराधनात्मकक्रियायोगापेक्षितं बोद्धुमिच्छतां किं तत इत्यत्राह—येनेति । येन क्रियानैपुणेन तत्त्वात्मकाङ्गादिकल्पनोपेतरूपेण क्रियाकौशलेनामर्त्यो जनः मृत्याद्यधीनः मुक्तिं यायात्तदाश्रुणात ॥ ३ ॥

तद्वर्णयितुं प्रतिजानीते—नमस्कृत्येति । वेदादीः त्रिविधवृद्धगार्दिभिरभिमन्तव्याः विभूतीरन्तश्चमूतीरहं वक्ष्य न विशेषणेन—पद्मजादिभिः ब्रह्मनारदादिभिराचार्यैः वेदरूप आगमः तन्त्रं पञ्चरात्रं ताभ्यां पञ्चरात्रमिदम् याः विभूतयो विज्ञाता इति शेषः ॥ ४ ॥

तावद्ब्रह्माण्डम् श्रीभगवद्विग्रहाभिमन्तव्यमित्याह , मायाद्यैरिति । मायासंज्ञाप्रकृतिः महान् अहङ्कारः भूतानि पञ्च काशान्तानि नवभिस्तत्त्वविकारैः एतद्विकारसहितैः तत्त्वैः विकारशब्देनैकादशेन्द्रियाणि पञ्च तन्मात्राणि च विवक्षितानि निर्मितो यो विराट् ब्रह्माण्डं दृश्यते शास्त्रेण ज्ञायते यत्र यस्मिन् विराजि ब्रह्मिण्डे मध्ये भुवनत्रयं दृश्यते ॥ ५ ॥

एतद्ब्रह्माण्डं पौरुषं परमपुरुषस्याभिव्यक्तरूपम् अत्र सामानाधिकरण्यमभिमन्तव्ययोरभेदविवक्षानिबन्धनम् श्रीभगवद्दिव्यमङ्गलविग्रहाभिमन्तव्यं ब्रह्माण्डमित्यर्थः एवमग्रेऽपि एतदेव विभज्य दर्शयति—भूरित्यादिना । भूशब्देनाऽतलादिभिः सह सप्तलोकाभिमानिनः नभो नाभिः हे शौनक ! ॥ ६ ॥

प्रजापतिः प्रजनन मेढ्रम् ईशितुः परमपुरुषस्य मृत्युरपानं गुदम् यस्मां मृत्यो मृत्यते ॥ ७ ॥

उत्तर उत्तरोष्ठः लोभस्त्वधरोष्ठः ज्योत्स्ना दन्ताः भ्रूः भ्रमः परमात्मनः स्मयः स्मितं भूरुहा वृक्षाः रोमाणि मेघाः पुरुषस्य परमपुरुषस्य मूर्धजाः केशाः ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

स्थूलतनौ नामुपासनार्थं पूर्वरूपस्य दर्शयितुं तत्प्रकारं यद् तत्स्मरण्यां, तत्र नदूर्ध्वमुखया शौनकः पृच्छति—अथेति । शुद्धमार्गविततत्त्वार्थनायिषु स्वमतान्तरस्थितासु मन्त्रयन्त्रादिवासनायां लक्षणाक्षाक्षिप्तासु उक्तं यज्ञागमम् भगवद्विषयम् तत्त्वं तद्वदेति ॥ १ ॥

तान्त्रिकाः श्रीनारायणपूजाविधायकशास्त्रपठकः श्रियः पतेः पत्युः प्रयोगदक्षैः प्राबल्याद्भ्रमणात् नैकाडिपका इति बोद्धव्यं परिचर्यायां पूजायाम् येभ्यः यादि पदार्थैः अङ्गोपाङ्गायुधाकल्पम् अङ्गानि पादादीनि उपाङ्गानि गरुडादीनि कल्पयन्त्याकल्पमाभरणं कौस्तुभादि ॥ २ ॥

तान् पदार्थान् क्रियायोगम् पूजालक्षणम् बुभुत्सतां शाठकामानां क्रियानैपुण्येन क्रियाकुशलेन अमर्त्यतां मरणराहित्यम् मुक्त्यात्मकम् ॥ ३ ॥

वेदागमतन्त्राख्यानां वेदाध्यायनमेव तन्त्राणां ज्ञेया च पद्मजादिभिराचार्यैः पाणयादिना याचना विभूतिः ॥ ४ ॥

[illegible] प्रकृतिः आदिशब्देन महदहङ्कारतन्मात्राणि पञ्चभूतानि च गृहीत [illegible] इन्द्रियादयः विराट् ब्रह्माण्डं यस्मिन्के [illegible] ब्रह्माण्डे भुवनत्रयं दृश्यते ॥ ५ ॥

[illegible] पौरुष रूपम् [illegible] पुरुषाभिमानात्म्यप्रतिमाकार [illegible] कल्पयन्ति नाना [illegible] इति । तत्र निरवयं पूर्वं यत्तम ॥ ६ ॥

प्रजापतिर्मेढ्रः प्रजननमुपस्थम् ॥ ७ ॥

उत्तरोष्ठो लोभः लज्जा अधरोष्ठो [illegible] ज्योत्स्ना स्मयो भ्रान्तिः स्मयो [illegible] अस्मत् अङ्गकल्पना ॥ ८ ॥

श्रीमद्गिरिधरगोस्वामिकृतबालप्रबोधिनी ।

केवलस्य स्वरूपभूताङ्गोपाङ्गादिविशिष्ट[illegible] श्रियः पतेः स्वरूपभूतत्वेन वक्ष्यमाणाया भक्त्याः पञ्चरात्रोक्त[illegible] कल्पयन्ति मायिकत्वभ्रमविनाशनपार्थं तत्त्वं [illegible] मर्त्यः अपञ्चान्निर्गोऽपि ॥ १–३ ॥

विष्णोरपि विभूतीः मायान्[illegible] तत्र वैष्णवीतत्स्वरूपभूता अपि वक्ष्य इत्यर्थः ॥ ४ ॥

मायाद्यैरिति चतुर्दशैकवाक्यं । तत्र विराट् [illegible] सम्पादनीयत्वेनापाधिष्ठिते ॥ ५ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

भूः पादाविन्यादौ तत्पादादिरूपत्वेन भूरादीनां शक्तिरित्य-भिप्रायेणोपास्यत इत्यर्थः ॥ ६—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

महापुरुषपूजार्थमङ्गोपाङ्गविभूतयः ।
एकादशे रविव्यूहकथा अपि निरूपिताः ॥

सत्यव्रतपूर्वपुरुषो मार्कण्डेयस्तान्त्रिकं भगवत्पूजाविधौ विशारद आसीत्तत्कृतं पूजाविवेकं जिज्ञासेत्याह—अथेति । येन पूजाप्रकारेण स मुनिर्भगवन्तमपरोक्षीचकार इममर्थं पृच्छामः राद्धान्ते सिद्धान्ते ॥ १ ॥

अङ्गानि पाणिपादादीनि उपाङ्गानि गरुडादीनि आयुधानि सुदर्शनादीनि आकल्पाः कौस्तुभादयः तेषां मध्ये कल्पं यत् यथा कल्पयन्ति येन तत्त्वैः कल्पयन्ति तत्त्वो वर्णय सच्चिदानन्द-वपुषो भगवतो येषां येषामङ्गानां मायाविभूतयो मायिकप्रपञ्चोऽत्र दृश्यन्ते ताभिरेव पुनस्तत्तदङ्गान्युपासनार्थं कल्पयन्ति इत्यर्थः ॥ ॥ २—३ ॥

गुरूपदेशागम्यत्वाद्वक्ष्यमाणस्य तन्नमस्कारपूर्वकमाह—नमस्कृ-त्येति ॥ ४ ॥

भगवतो विभूतिभिः कल्पितो विग्रहो विराडेवास्तीत्याह, मायाद्यैः प्रकृतिसूत्रमहदहङ्कारपञ्चतन्मात्रैर्नवभिः विकारा एकादशेन्द्रियाणि पञ्चमहाभूतानि चेति षोडश तन्मयो विराट् स प्रसिद्धो निर्मितः यत्र विराजि सचित्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते ॥ ५ ॥

पौरुषं पुरुषस्य भगवतो मायिकं रूपं न तु स्वरूपमित्यर्थः कया कया विभूत्या किं किमङ्गं कल्पितं तदाह—भूरिति । सच्चिदा-नन्दवपुषो भगवतो [illegible] विभूतिर्भूः तयास्य पादौ कल्पिता-विति तदभेद[illegible] एवं सर्वत्र ज्ञेयम् एतच्च विराट्-पुरुषस्य पा[illegible]दानन्दपुरुषस्य पादादीनि स्वस्व-रूपाणि यथ[illegible] अपादाश्च तद्विभूतिं पृथिवीं बिभर्ति वि[illegible]यं बिभर्ति इत्येवं सर्वाण्येव वस्तूनि [illegible]पदङ्गान्येव तद्विभूतित्वादित्यतः सर्वभावना[illegible] विवेकः ॥ ६ ॥

प्रजननं [illegible]: उत्तर ओष्ठो लज्जा अधर ओष्ठो लोभः स्मय[illegible] ॥ ७—८ ॥

[illegible]सिद्धान्तप्रदीपः ।

भगवद्[illegible]मा[illegible] भगवन्तमपरोक्षीकृतवानतोऽति हर्षेण भग[illegible] पृच्छति—अथेति । इमं वक्ष्य-माणम्, हे [illegible]

केवल[illegible]पा[illegible]परिचर्यायां विषये तान्त्रिकाः अङ्गानि प[illegible]नि[illegible]ङ्गानि गरुडादीनि आयुधानि सुदर्शनादीनि आकल्पाः कौस्तुभादयः तेषां [illegible] यथा कल्पयन्ति भावयन्ति तथा नोऽस्माकं वर्णयेत्यन्वयः ॥ २ ॥ ३ ॥

गुरुपरम्परागम्यत्वाद्वक्ष्यमाणस्य तत्प्रणामपूर्वकमाह—नमस्कृत्ये विभूतीर्विराड्विग्रहायाः पद्मजो ब्रह्मा आदिर्येषां सनत्कुमार नारदादयो बोध्यास्तैः ॥ ४ ॥

विराडवयवभूतैः भूरादिभिरङ्गादिकल्पनां निरूपयितुं विरा विग्रहमाह—मायाद्यैः मायासूत्रमहदहङ्कारपञ्चतन्मात्ररूपैर्नवभि तत्त्वैः एकादशेन्द्रियपञ्चमहाभूतानीति षोडशविकारमयः स सचित्के सजीवे भुवनत्रयं दृश्यते स विराट् निर्मितो भगवते ज्ञेयः ॥ ५ ॥

पुरुषस्य वैराजस्य विष्णोः एतन्मायामयं रूपम् शरीर अङ्गकल्पनामाह—भूःपादावित्यादिना ॥ ६ ॥

प्रजननं मेढ्रम् अपानं गुह्यम् ॥ ७ ॥

उत्तरः ओष्ठो लज्जा अधरः ओष्ठो लोभः स्मयः हास भ्रमो विभ्रमो विलासविशेषः ॥ ८ ॥

भाषा टीका ।

शौनक उवाच ।

शौनकजी बोले, कि–हे परम भागवत ! हे सूतजी ! जिस हेतुसे आप समस्तसिद्धान्तके तत्त्ववेत्ता हो, और बहुश्रु हो इसीसे हम आपसे इस अर्थको पूछते हैं ॥ १ ॥

कि–तान्त्रिक लोग केवल श्रियःपति की परिचर्या में भग-वान् के अंग, उपांग, आयुध, भूषण, ये सब जिन तत्त्वों से जैसे कल्पना करते हैं ॥ २ ॥

हे सूत ! तुम्हारा कल्याण हो क्रिया योगके जानने की इच्छावाले हमलोगों को उस का वर्णन करो, जिस क्रिया-योगके नैपुण्य से मनुष्य दिव्य भावको प्राप्त हो जाता है ॥ ३ ॥

सूत उवाच ।

सूतजी बोले, कि–मैं गुरुजनों को नमस्कार कर वैष्णवी विभूति का वर्णन करता हूं जिन विभूतियों को वेद और तन्त्रों में ब्रह्मादिक आचार्योंने वर्णन करी है ॥ ४ ॥

मायादिक नव तत्त्वों सहित और उनके विकारों सहित निर्मित हुए चेतनतत्त्व सहित जिस विराट में यह भुवनत्रय देख पडता है ॥ ५ ॥

यही पुरुषका रूप है । भूमितो चरण हैं, स्वर्ग मस्तक है, आकाश नाभि है, सूर्य नेत्र हैं, वायु नासिका है, दिशायें कर्ण हैं यही सब प्रभुके अङ्ग हैं ऐसी भावना करे ॥ ६ ॥

प्रजापति ईश्वरका मेढ्र इन्द्रिय है, मृत्यु अपान है, लोकपाल उसके बाहु हैं, चन्द्रमा मन है, यमराज भ्रुकुटि है, ॥ ७ ॥

लज्जा ऊपरका ओष्ठ है, लोभ नीचे का ओष्ठ है, चांदिनी दंत है, स्मय भ्रम है, तथा भूमा पुरुषके वृक्ष रोम हैं, मेघ केश हैं ॥ ८ ॥

यावानयं वै पुरुषो यावत्या संस्थया मितः ।
तावानसावपि महापुरुषो लोकसंस्थया ॥ ९ ॥
कौस्तुभव्यपदेशेन स्वात्मज्योतिर्बिभर्त्यजः ।
तत्प्रभा व्यापिनी साक्षाच्छ्रीवत्समुरसा विभुः ॥ १० ॥
स्वमायां वनमालाख्यां नानागुणमयीं दधत् ।
वासश्छन्दोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरम् ॥ ११ ॥
बिभर्ति साङ्ख्यं योगं च देवो मकरकुण्डले ।
मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयङ्करम् ॥ १२ ॥
अव्याकृतमनन्ताख्यमासनं यदधिष्ठितः ।
धर्मज्ञानादिभिर्युक्तं सत्त्वं पद्ममिहोच्यते ॥ १३ ॥
ओजःसहोबलयुतं मुख्यतत्त्वं गदां दधत् ।
अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनम् ॥ १४ ॥
नभोनिभं नभस्तत्त्वमसिं चर्म तमोमयम् ।
कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिम् ॥ १५ ॥
इन्द्रियाणि शरानाहु[1]राकूतीरस्य स्यन्दनम् ।
तन्मात्राण्यस्याभिव्यक्तिं मुद्रयाऽर्थक्रियात्मताम् ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अनुक्तमप्यदद्भुतमुक्तमित्याह—यावानयं व्यष्टिः पुरुषः स्वमानतः स्वहस्तवितस्तिभिः संस्थयाऽवयवसन्निवेशेन मितः परिमितः ॥ ९ ॥

भूषणादीन्याह—कौस्तुभेत्यादिना । स्वात्मज्योतिः शुद्धं जीवचैतन्यम् या तस्य कौस्तुभस्य प्रभा तामेव श्रीवत्सं बिभर्ति ॥ १० ॥

त्रिवृत्स्वरं त्रिमात्रं प्रणवम् ॥ ११ ॥

पारमेष्ठ्यं पदं ब्रह्मलोकम् ॥ १२ ॥

अव्याकृतं प्रधानम् यदधिष्ठाय स्थितः तदासनभूतं पद्मं सत्त्वं सत्त्वगुणः ॥ १३ ॥

मुख्यं तत्त्वं प्राणतत्त्वम् "प्राणो वै मुख्यः" इति श्रुतेः । दरवरं शङ्खम् ॥ १४ ॥ १५ ॥

आकूतीः क्रियाशक्तियुक्तं मनः अस्य रथस्याभिव्यक्तिं बहिरभिव्यक्तं रूपम् मुद्रया सूचनयाऽर्थक्रियात्मतां वराभयादिरूपत्वं बिभर्ति तत्तन्मुद्रया तथा तथा भावयेदित्यर्थः ॥ १६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

संस्थया अवयवसंस्थानेन ॥ ९ ॥

आत्मज्योतिः स्वांशभूतम् ज्ञानाकारं जीवात्मस्वरूपं कौस्तुभो जीवतत्त्वाभिमानिनी देवतेत्यर्थः । तत्प्रभा जीवस्य ज्ञानप्रभा श्रीवत्सादिषु तत्त्वविभागः पुराणान्तरप्रसिद्धोऽपि श्रुतिवैविध्यसम्भवात् तन्मूलतया परिहर्तव्यः ॥ १० ॥

नानागुणमयीं मायां पञ्च[illegible]कार्यात्मिकां प्रकृतिं भूतपञ्चकमयीं वनमालामित्यर्थः । ब्रह्मसू[illegible] प्रणवाभि[illegible]मानिनी देवतेत्यर्थः ॥ ११ ॥

पारमेष्ठ्यं पदं ब्रह्मलोकं मुख्यं तत्त्वं प्रधा[illegible]त्मकम् [illegible] ॥ १३ ॥

महत्तत्त्वं महान्वै बुद्धिलक्षणः बुद्धिश्च [illegible] गदेति [illegible]गतं दरवरः शङ्खः ॥ १४ ॥ १५ ॥

आकूतिः स्यन्दनं देहाभिमानिनी [illegible]ता अभिव्यक्तिः सर्वावतारेषु आविष्कारः मुद्राज्ञानमुद्रा[illegible]मानिनी देवता अर्थक्रियाकारिताभिमानिनी ॥ १६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्[illegible]न्द्रिका ।

अनुक्तमप्यस्ति एवमूह्यम् इत्याह—यावा[illegible]ति । अयम् व्यष्टिपुरुषः यावान्यावदवयवान् यावत्या स्वमा[illegible]: सर्वाङ्गविन्यास[illegible] परिमाणया संस्थयाऽवयवसंस्थानेन मितः पर[illegible]ोऽसौ महापुरुषः परमपुरुषोऽपि लोकसंस्थया लोकाभिमा[illegible]देवतात्मकपादाद्य-

(१) आकूतिः स्यन्दनं विभोरिति शुकप० विज० पा० । वीर०

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

स्वस्वपर्वसंख्यानेन (तावान्) तावदवयवान् मानं स्वाराधकसुखयनुगुणमिति भावः ॥ ९ ॥

तदेवमङ्गोपाङ्गाद्यभिमन्तव्यानि तत्त्वानीत्युक्त्वाऽथ भूषणाद्यभिमानिदेवतात्मकमन्तव्यान्याह—कौस्तुभव्यपदेशेनेत्यादिना। अजः परमपुरुषः कौस्तुभव्याजेन आत्मज्योतिर्बिभर्ति आत्मज्योतिः अशेषभूतं ज्ञानाकारं चिदात्मस्वरूपं कौस्तुभो जीवधर्माभिमानी देवतेत्यर्थः। तत्प्रभा जीवस्य प्रभा धर्मभूतज्ञानम् इत्यर्थः। व्यापिनी विष्वी तां प्रभुर्भगवानुरसा श्रीवत्सं बिभर्ति श्रीवत्सवत्सप्रभाभिमानिदेवतेत्यर्थः। पुराणान्तरविरोधस्तु श्रुति वैचित्र्यसम्भावनया तन्मूलतया परिहर्तव्यः ॥ १० ॥

नानागुणमयीं पञ्चभूतात्मककार्यावस्थां भूतपञ्चकमयीं स्वमायां वैषम्यावस्थसत्त्वादिगुणत्रयमयीं वा प्रकृतिं वनमालाख्यां वधूविस्रायाः मायवाछन्दः पूर्ववदेवनिबद्धाभिप्रायकः पीतं विशङ्कं वासो वस्त्रं छन्दोमयं गायत्र्यादिच्छन्दोमयं वासः छन्दोऽभिमानिनी देवतेत्यर्थः। त्रिवृत् त्रिमात्रमकारोकारमकारात्मकं वा स्वरं प्रणवं ब्रह्मसूत्रं बिभर्ति ॥ ११ ॥

साङ्ख्यं च योगञ्चेति द्वन्द्वमेकवं तद्वदेवेत्युभे मकरकुण्डले सर्वलोकोत्तरं पारमेष्ठ्यं पदं ब्रह्मलोकं मौलिं किरीटं बिभर्ति ॥१२॥

येन परमपुरुषेणाधिष्ठितमनन्ताख्यं शेषाख्यमासनमव्याकृतं मूलप्रकृतिः धर्मसत्त्वं विशुद्धं सत्त्वं तद्धर्मज्ञानादिभिर्युक्तम् पद्ममुच्यते आदिशब्देन वैराग्यैश्वर्यधर्माज्ञानावैराग्यानैश्वर्याधर्मविमलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहाः संगृह्यन्ते ॥ १३ ॥

ओजः इन्द्रियशक्तिः सहो मनःशक्तिः बलं दैहिकं तैर्युतं मुख्यं तत्त्वं मुख्यप्राणः "प्राणो वै मुख्यः" इति श्रुतेः। ओज आदीनां प्राणाश्रितत्वात्तस्य तद्युक्तत्वम् तदेव गदां दधत् यद्वा, मुख्यतत्त्वं प्रथमोत्पन्न[illegible]त्वं महत्तत्त्वं बुद्धिप्राणाति यावत् "महान्वै बुद्धिलक्षणः" [illegible]स्मृतेः तस्यां प्रसूतायामोजःप्रभृतीनि भवन्तीति[illegible]रूपां तत्त्वं जलतत्त्वं दरवरः शङ्खः ॥१४॥

नभोनि[illegible]गावान्महत्तत्त्वम् असि खड्गं तमोमयं चर्म खेटं [illegible]त्यन्वयः। शार्ङ्गं नाम धनुः काल रूपं कालाभि[illegible]। तथा कर्ममयः इषुधीर्बाणकोशो यस्य स[illegible]

इन्द्रिय[illegible]श्चानाकूतिर्मनः यस्य परमपुरुषस्य स्यन्दनं [illegible]तदेहात्माभिमानो भगवद्रथ इत्यर्थः अस्याभिव्य[illegible]तीशकतन्मात्राणि इन्द्रियार्थाः इन्द्रियप्रजा[illegible]व्यापारा इति यावत्। तन्मात्रा यतयाभि[illegible]रीनामुक्तत्वात्ते यस्य क्रियाः गतिक्रियाभि[illegible]। मुद्रार्थक्रियात्मतेतिपाठे मुद्रा वरदाभया[illegible]देनया अर्थक्रियात्मना प्रयोजनक्रियाक[illegible] मुद्रयार्थक्रियात्मताम् इति पाठे तया तां [illegible]ः ॥ १६ ॥

[illegible]कृतपदरत्नावली।

योऽस्य [illegible]ः लोकसंख्यया यावत्या संख्यया मितः परिमितोऽसौ महान्पुरुषस्तदन्तःस्वपुरुषः भगवान् तावान् तावत्परिमाणोपेतः ॥ ९ ॥

उपाङ्गान्याह—कौस्तुभेति। अजो विष्णुः आत्मज्योतिः ज्योतिःस्वरूपः। यद्वा, आत्मीनम्रशाख्यज्योतिः श्रीरित्यध्याहार्य तेन लक्षितस्य श्रीवत्सस्य प्रभां व्याप्नोतीति तत्प्रभाव्यापिनीति तां श्रीवत्समुरसा बिभर्ति ॥ १० ॥

स्वां मायां श्रियम् नानावर्णगुणमयीं छन्दोमयम् वेदस्वरूपं त्रिवृत् त्रिवर्णात्मकं स्वरं प्रणवलक्षणां ब्रह्मसूत्रं दधत् ॥११॥

साङ्ख्यं ज्ञानं योगं कर्म एतद्द्वयात्मके मकरकुण्डले पारमेष्ठ्यं पदं स्थानं मौलिं किरीटम् ॥ १२ ॥

सर्वाधिष्ठानमासनं पीठं तदनन्ताख्यम् अव्याकृतं विकाररहितं सत्त्वं सत्त्वगुणाभिमानिनी श्रीः पद्मम् ॥ १३ ॥

मुख्यतत्त्वं मुख्यप्राणरूपं गदां दधत् ॥ १४ ॥

नभोनिभमाकाशवर्णीवर्यां नभस्तत्त्वरूपमसिं नन्दकं तमोमयं तमोगुणवदाच्छादनकरं चर्म दधत् पुण्यकर्मस्वरूप इषुधी च ॥ १५ ॥

अस्य [illegible]ः स्यन्दनमाकृतिः पृथिवी अस्याभिव्यक्तिः तन्मात्राणि शब्दादीनि इन्द्रियार्थाः कर्मेन्द्रियविषयाः क्रियामताः विसर्गादीनि कर्माणि ज्ञातव्यानि ॥ १६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

कौस्तुभेति। अत्र भूतादीनामिव जीवाख्यस्यात्मज्योतिरादीनामपि कौस्तुभादिरूपं बहिरङ्गत्वं दर्शितं आत्मज्योतिष एवेन्द्रियद्वारा प्रकाशः श्रीवत्सतया कल्प्यत इत्यर्थः ॥ १०—१५ ॥

आकूतिरिति व्यख्याया क्रियाशक्तियुक्तं मनो यस्य भगवतः स्यन्दनमाहुः तन्मात्रायत्तस्य भगवतोऽभिव्यक्तिमाहुः तथास्य स्वार्थक्रियात्मतां वरदाभयादिरूपतां मुद्रामाहुः मुद्रामेवाहुरित्यर्थः। गोत्रेण गार्ग्य इतिवत्तृतीया ॥ १६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

समष्टिव्यष्ट्योः प्रायेणैक्यात् व्यष्टिपुरुषस्य प्राकृतत्वान्मलिनस्य दर्शनेनैव निर्मलं सच्चिदानन्दमयं पुरुषं परिचाययति—यावानयमिति। मितः परिमितः ॥ ९ ॥

अङ्गान्युक्त्वा भूषणान्याह—कौस्तुभस्य व्यपदेशेन स्वरूपेण आत्मज्योतिः शुद्धजीवचैतन्यं कौस्तुभस्यैव विभूतिं यत्र तथाहि—

"अकारेणोच्यते विष्णुः श्रीरुकारेण कथ्यते।
मकारस्तु तयोर्दासः पञ्चविंशः प्रकीर्तितः" ॥

इत्यतः स्वदासं भगवान् हृदि धत्ते यदुक्तं "साधवो हृदयं मह्यं साधूनां हृदयं त्वहम्" इति भगवान् भक्तभक्तिमानिति च तत्प्रभा तस्य कौस्तुभस्यैव प्रभाव्यापिनी दक्षिणस्तनो[illegible]वर्तिगामिनी या तामेव श्रीवत्सं दक्षिणावर्तशुभ्रसूक्ष्मरोमावलयाकारं बिभर्ति यस्य विभूतिधर्मः तथैव वामस्तनार्द्धे [illegible]—

मण्डलं देवयजनं दीक्षा संस्कार आत्मनः ।
परिचर्या भगवत आत्मनो दुरितक्षयः ॥ १७ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

निकषाश्मनि कनकरेखेव अनुक्तापि ज्ञेया श्रीवत्सरूपया विभूत्या राजमानोऽयं ॥ १० ॥

नानागुणमयीमिति—त्रिगुणात्मिका माया वनमालाख्या विभूतिः वास इति पीतवाससो विभूतिश्छन्दांसि ब्रह्मसूत्रमित्युपवीतस्य विभूतिस्त्रिवृत्स्वरः त्रिमात्रः प्रणवः ॥ ११ ॥

एवमेव सर्वत्र स्वविभूत्या सामानाधिकरण्यं पारमेष्ठ्यं ब्रह्मलोकम् ॥ १२ ॥

यत् अधिष्ठितः अधिष्ठाय स्थितः तदासनम् अनन्ताख्यम् अव्याकृतं प्रधानमुच्यते इति अनन्तस्यैव विभूतिप्रधानं जगत्सृष्ट्यादिकारणीभूतं वनमालाविभूतिर्माया तु ततोऽपि सूक्ष्मभूता ज्ञेया तत्र च धर्मादियुक्तमासनं पद्मं तु सत्त्वं सत्त्वगुणः ॥ १३ ॥

मुख्यतत्त्वं प्राणतत्त्वं "प्राणो वै सुखम्" इति श्रुतेः । इत्यरं शाङ्खमसि नभस्तत्त्वं नभोनिभम् आकाशतुल्यं निर्मलं चर्म तमोमयं तमस्तत्त्वम् ॥ १४—१५ ॥

आकूतिं क्रियाशक्तियुक्तं मनः स्यन्दनं रथः रथस्य विभूतिः तन्मात्राणि शब्दादयो विषयाः अभिव्यक्तिः अस्य अभिव्यक्तेराविर्भावस्य विभूतयः विषयाजिघ्रक्षारूपस्य मनोरथस्य बहिरभिव्यक्तिरूपा एव शब्दादयो विषयाः इन्द्रियग्राह्या इत्यर्थः मुद्रया वराभयदानरूपया धृतया अर्थक्रिया विभूतिर्यस्मिन्नाम अर्थक्रियालोकव्यवहारस्तत्स्वरूपतां धत्ते वरदत्वस्य अभयदत्वस्य विभूतयस्तास्ता अर्थक्रिया इत्यर्थः ॥ १६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनुक्तं लोकप्रसिद्धपुरुषवद्दृष्टमित्याह—यावानिति । अयं लोकप्रसिद्धः व्यष्टिपुरुषः यावान् सप्तवितस्तिपरिमाणवान् यावत्या संख्यया यावदवयवसंख्यानेन मितः परिमितः तावान् असौ अपि समष्टिरूपोऽपि ॥ ९ ॥

आकल्पोपाङ्गादीनाह—कौस्तुभेत्यादिना । अजः कर्मनिबन्धनजन्मरहितः भगवान् स्वकीयमंशभूतमात्मज्योतिः जीवात्मतत्त्वं कौस्तुभव्यपदेशेन बिभर्त्ति तत् तस्य कौस्तुभस्य या प्रभा धर्मभूतज्ञानात्मिका तां श्रीवत्सं बिभर्त्ति ॥ १० ॥

त्रिवृत्स्वरम् त्रिमात्रम् प्रणवं नानागुणमयीं क्षुभितगुणाम् ॥ ११ ॥

पारमेष्ठ्यं चतुर्मुखलोकम् ॥ १२ ॥

यदधिष्ठितः अधिष्ठाय स्थितस्तदव्याकृतं गुणसाम्यावस्थापन्नं प्रधानमासनमुच्यते इह आसने धर्मज्ञानादिसंयुतं सत्त्वं सत्त्वगुणः पद्ममुच्यते नैराग्यादिरूपपदार्थः ॥ १३ ॥

मुख्यतत्त्वं "प्राणो वै मुख्यम्" इति श्रुतिप्रसिद्धम् ॥ १४ ॥

नभोनिभम् नभोवर्णमेवम् नभस्तत्त्वमेवासिम ॥ १५ ॥

अस्य श्रीभगवतः आकूतिः क्रियाशक्तिः मनः स्यन्दनं रथः तन्मात्राणि शब्दादयो विषयाः अस्य रथस्याभिव्यक्तिमाहुः मुद्रया सफलमुद्रया धृतया अस्य रथस्य अर्थक्रियाशक्त्यर्थगमनादिव्यापाराणाम् आत्मा आश्रयः तस्याम् निग्रहानुग्रहरूपार्थगमनादिव्यापाराश्रयत्वं रथस्य तन्मुद्रया आधत्ते इत्यर्थः ॥ १६ ॥

भाषा टीका ।

और अनुक्त सब बातें इसी प्रकार जानो, जैसा यह पुरुष अपने परिमाणसे सात वित्ता के अवयवसंनिवेशवाला है । इसी प्रकार परमपुरुष भी अपने परिमाणसे लोकों के संनिवेश से उतने ही परिमाणके हैं ॥ ९ ॥

भगवान् कौस्तुभमणिके नामसे जीव तत्त्वको धारण करते हैं, और विभु श्रीहरि व्यापिनी जो कौस्तुभमणि की प्रभा है, तिसको श्रीवत्सके नाम से वक्षःस्थल में धारण करते हैं ॥१०॥

नाना गुणवाली अपनी मायाको वनमालाके नामसे धारण करते हैं, इसी प्रकार गायत्र्यादि छन्दोमय पीताम्बरको धारण करते हैं, तथा तीन मात्राके प्रणवको ब्रह्मसूत्र [यज्ञोपवीत] करके धारण करते हैं, ॥ ११ ॥

तथा श्रीहरि सांख्य और योग इन दोनों को मकर कुण्डलके नामसे धारण करते हैं, और सर्व लोक को अभय करने वाले ब्रह्मलोक को किरीट के नाम से धारण करते हैं ॥ १२ ॥

प्रधान तत्त्व को अनन्त नामक आसन में ग्रहण किया है, जिसपर विराजे हुए हैं । और धर्मज्ञानादियुक्त जो सत्त्व है, उसको पद्मके नामसे धारण करते हैं ॥ १३ ॥

ओज सह बल इन सहित प्राणतत्त्वको गदाके नामसे धारण करते हैं । जलतत्त्वको शङ्ख, और तेजस्तत्त्वको चक्र के नामसे धारण करते हैं ॥ १४ ॥

आकाशतत्त्वको नन्दक खड्ग के नामसे, अन्धकार को ढाल के नाम से कालतत्त्वको शार्ङ्ग धनुषके नामसे, [illegible] कर्मको तूणीर (तरकस) के नामसे धारण करते हैं ॥ १५ ॥

परमपुरुष इन्द्रियोंको बाणों के नामसे, मनको रथके नाम तन्मात्राओंको अभिव्यक्ति करके, अर्थ क्रि[illegible]को मुद्रा करके, धारण करते हैं ॥ १६ ॥

श्रीवरस्वामिकृतभावार्थदीपि[illegible] ।

मण्डलं देवपूजाभूमिं सुवर्णपद्मस्थानेन [illegible]विभर्त्तीत्यर्थः । आत्मसंस्कारलक्षणं वा दीक्षासंस्कार आत्मनो [illegible]लक्षणं दीक्षा-मेवाऽऽत्मनस्तत्पूजाधिकारनं भावयतीत्यर्थः । परिचर्यामिति भगवतस्तां परिचर्यां स्वस्य सकलपापक्षयार्थमेव [illegible]विभर्त्तीत्यर्थः ॥ १७ ॥

भगवान् भगशब्दार्थं लीलाकमलमुद्वहन् ।
धर्मं यशश्च भगवांश्चामरव्यजनेऽभजत् ॥ १८ ॥
आतपत्रं तु वैकुण्ठं द्विजा धामाऽकुतोभयम् ।
त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषम् ॥ १९ ॥
अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ।
विष्वक्सेनस्तन्त्रमूर्तिर्विदितः पार्षदाधिपः ।
नन्दादयोऽष्टौ द्वाःस्थाश्च तेऽणिमाद्या हरेर्गुणाः ॥ २० ॥
वासुदेवः सङ्कर्षणः प्रद्युम्नः पुरुषः स्वयम् ।
अनिरुद्ध इति ब्रह्मन्! मूर्तिव्यूहोऽभिधीयते ॥ २१ ॥
सविश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः ।
अर्थेन्द्रियाशयज्ञानैर्भगवान् परिभाव्यते ॥ २२ ॥
अङ्गोपाङ्गायुधाऽऽकल्पैर्भगवांस्तच्चतुष्टयम् ।
बिभर्ति स्म चतुर्मूर्तिर्भगवान् हरिरीश्वरः ॥ २३ ॥
द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक् स्वमहिमपरिपूर्णो मायया च स्वयैतत् ।
सृजति हरति पातीत्याख्ययाऽनावृताक्षो विवृत इव निरुक्तस्तत्परैरात्मलभ्यः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पूर्वमासनपद्ममुक्तमिदानीं करस्थं पद्ममाह—भगवानिति । भगशब्दार्थमैश्वर्यादिषाड्गुण्यम् ॥ १८ ॥

हे द्विजाः! एकवचनान्तो वा पाठः अकुतोभयं कैवल्यं धाम गृहमम[illegible], वैकुण्ठस्य विशेषणमकुतोभयं यस्मा-मेति [illegible]सामरूपी वेदः "सुपर्णोऽसि गरुत्मां-स्त्रिवृत्" [illegible]विज्ञाय यज्ञं यज्ञरूपं पुरुषम् "यज्ञो वै विष्णुः" [illegible] ॥

अ[illegible]: तत्र हेतुः साक्षादात्मनः स्वरूपस्य चिद्रूप[illegible]त्यर्थः । तन्त्रमूर्तिः पञ्चरात्राद्यागम-रूपः वे[illegible]ते हरेर्द्वारपालाः नन्दादयः ॥ २० ॥

तत्[illegible]माह—वासुदेवादिशब्दैः पुरुषः श्रीनारा[illegible]तिर्मेदैरुपास्य इत्यभिधीयते ॥२१॥

तदे[illegible]सनामाह—स एव भगवान्विश्वादि शब्दैर्वृत्ति[illegible]: परिभाव्यते तद्धेतुपाधीनाह, अर्थो बाह्यः [illegible]माशयस्तदुभयसंस्कारयुक्तमज्ञानम् ज्ञानं चिन्[illegible]

उक्त[illegible] पूर्वोक्तमङ्गाद्युपासनमाह—अङ्गेति । अङ्गादिभि[illegible] हरिर्वासुदेवादिचतुर्मूर्तिः सन् विश्वादि[illegible] विश्वादिभावेऽपि तत्तिचतुष्टयस्य न जीवत्व[illegible]ष्टयं बिभ्रदपि भगवानीश्वर एवेति ॥ २[illegible]

तस्यैव ब्रह्मादित्रिमूर्तितामाह—द्विजऋषभेति । स एष एव भग-वान् ब्रह्मयोनिर्वेदस्य कारणमित्यादिहेतुत्रयम् यस्तु[illegible] महा-मायदेतज्जगत्स्वगतमायया सृजति हरति पातीति कृत्वा मायया ब्रह्मादिरूपयाऽनावृताक्षोऽनाच्छन्नज्ञानोऽपि विवृत इव भिन्न इव निरुक्तः व्याख्येषु ननु भिन्नः अत्र विवृतत्वमक्षं प्रमाणयति, यतस्तत्परैरात्मत्वेनैव लभ्यत इति ॥ २४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

भगवत्कं पद्माद्याकारं देवयजनं यजमानयागभूम्यभिमानि-देवता संस्कारः प्रोक्षणादिः दीक्षा यागदीक्षाभिमानिदेवता परिचर्या यागपरिचर्याभिमानिदेवता दुरितक्षयःभिमानिनी ॥ १७—१८ ॥

द्विजा इति सम्बोधनम् ॥ १९—२१ ॥

वृत्तिभिः स विश्वस्तैजसः प्राज्ञः तुरीय इति परिभाव्यते इत्यन्वयः । विश्वतैजसादि शब्दाः अनिरुद्धादिष्वेव सृष्टिस्थिति संहृतिमत्सु जाग्रत्स्वप्नसुषुप्त्यभिमानिषु वर्तन्ते तुरीयशब्दो मुक्त्यभिमानिनि वासुदेवे वर्तते तदेवाह—अर्थेन्द्रियाशयज्ञाने रिति । अर्थशब्दो बाह्येन्द्रियार्थावभासकार्यजाग्रदवस्थापरः इन्द्रियशब्देन मनोविषयेण स्वप्नहेतुना स्वप्नावस्थायेकं प्राप्यते मनस्युपरते वासनामात्रवशेषा सुषुप्त्यवस्था आशय-शब्देन प्राप्यते परिशुद्धाऽनवच्छिन्नज्ञानैकाकारावस्था [illegible]

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

शब्देन प्रदर्श्यते तत्तदभिमानी भगवान् परिभाव्यत इत्यर्थः ॥ २२ ॥

अङ्गोपाङ्गेति अङ्गोपाङ्गायुधाकल्पैः विशिष्टो भगवान् चतुर्मूर्तिः वासुदेवादिरूपेण तच्चतुष्टयं बिभर्ति सृष्ट्यादि चतुष्टयं निर्वहतीत्यर्थः ॥ २३ ॥

माययेति उपलक्षितः अनावृतात्मा असङ्कुचितज्ञानः विवृत इव स्फुट इव निरुक्तः ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

मण्डलं तदधिष्ठानरूपं पद्माकारं मण्डलं देवयजनं यज्ञभूतव भिमानिदेवता: आत्मनः यजमानस्य दीक्षा यागदीक्षा संस्कारः प्रोक्षणावघातादिश्च भगवतः परिचर्या तयोरभिमानिदेवता परिचर्येत्यर्थः सैव दुरितघ्नवाभिमानिनीति ॥ १७ ॥

भगवच्छब्दार्थं भगवच्छब्दस्य यः शब्दो भगवच्छब्दस्तद्वाच्यभूतस्तस्यार्थं ज्ञानादिषाड्गुण्यं तल्लीलार्थं कमलं तदभिमन्तव्यं लीलाकमलमित्यर्थः । लीलाकमलाभिमन्तव्यं षाड्गुण्यं वा उद्वहन् बिभ्राणः हे भगवः ! हे भगवन् ! धर्मो यशश्चेत्यनेन चामरव्यजने अभजत प्राप्तवान् भगवांश्चेति पाठान्तरम् ॥ १८ ॥

आतपत्रमिति । द्विजा इति सम्बोधनं द्विजेत्यपि क्वचित् पाठः, निजधामेत्यपि पाठः नास्ति कुतोपि भयम् यस्मिन्तद्वैकुण्ठं नाम यन्निजधाम तदातपत्रमभजदिति सम्बन्धः । वैकुण्ठाभिमानिनी देवता आतपत्रमित्यर्थः । यो यज्ञं यज्ञाराध्यं परमपुरुषं वहति तद्वाहनभूत इत्यर्थः । कोसौ सुपर्णाख्यो गरुडः स त्रिवृद्वेदः ऋग्यजुःसामात्मको वेदः वेदाभिमानिनी देवता गरुड इत्यर्थः ॥ १९ ॥

श्रीर्लक्ष्मीः हरेरनपायिनी शक्तिः तत्र हेतुः साक्षात्परमात्मनः आत्मभूतात्स्वभावः धर्मभूतेति यावत् प्रभेत्यस्य भास्करस्येत्यादि; कर्मतस्य यः पार्षदाधिपः सेनानीर्विष्वक्सेनः स तस्य मूर्तिर्विग्रहविशेष इत्यर्थः ॥ २० ॥

नन्दादयोऽष्टौ हरेर्द्वारपालाः अणिमाद्या गुणाः अणिमाद्यैश्वर्याभिमानिन्यो देवता इत्यर्थः । वासुदेव इति यो वासुदेव इत्यादिमूर्तिव्यूहः मूर्तिसमूहः स परमपुरुषः स्वयमेवाभिधीयते न तत्राभिमान्याभिमन्तव्यभावोस्तीत्यर्थः । ब्रह्मन्निति सम्बोधनं स इति वासुदेवादिचतुर्मूर्तिव्यूहः वृत्तिभिः जागरत्स्वप्नसुषुप्ति मुक्त्यवस्थाभिर्वो विश्वस्तैजसः प्राज्ञस्तुरीयः मुक्त इति कथ्यते, जीवस्तदभिमानी विश्वादिशब्दैर्जागराद्यवस्थिता जीवा उच्यन्ते यद्यप्येकैकस्यैव जीवस्यावस्थाचतुष्टयान्वयस्तथापि एकैकस्यैव तत्तदवस्थायां विश्वादिशब्दैर्व्यवहारः जागराद्यवस्थाप्रयुक्तविश्वादिसंज्ञकजीवाभिमानिन्यो वासुदेवादय इत्यर्थः । क्रमस्त्वविवक्षितः तत्र मुक्त्यवस्थाभिमानिनी देवता वासुदेवः सङ्कर्षणस्तु समाधेरस्य (प्रद्युम्नो जागरावस्थाभिमानी सुषुप्त्यवस्थाभिमानी चाऽनिरुद्ध इति ज्ञेयमिति भावः ।) इतरो इतरयोरित्यूह्यम् ॥ २१ ॥

तदेवाह—अर्थेन्द्रियेति इति । अर्थशब्दो बाह्येन्द्रियैरर्थावभासकजाग्रदवस्थापरः इन्द्रियशब्देन मनोविषयेण स्वप्नहेतुना स्वप्नावस्था बोध्यते मनस्युपरते वासनामात्रावशेषा सुषुप्त्यवस्था आशयशब्देन शाप्यते परिशुद्धज्ञानशब्दवाच्यं च मुक्त्यवस्थाज्ञानशब्देन प्रदर्श्यते तत्तदवस्थाभिमानी भगवान् परिभाव्यते इत्यर्थः ॥ २२ ॥

तदेवं तत्तदभिमानितया निरूपितैरङ्गादिभिर्विशिष्टपमाह, अङ्गेति । अङ्गोपाङ्गायुधाकल्पैर्विशिष्टो भगवान् वासुदेवादिचतुर्मूर्तिश्वरः तत्प्रसिद्धं चतुष्टयं सृष्टिस्थितिसंहारमोक्षात्मकं बिभर्ति निर्वहति, तत्रानिरुद्धः सृजति प्रद्युम्नः पालयति सङ्कर्षणः संहरति वासुदेवो मोक्षयतीत्यर्थः ॥ २३ ॥

तदैवं तस्यैव ब्रह्मरुद्रान्तर्यामितया अष्टृत्वसंहर्तृत्वे ज्ञानतारतम्या रक्षितृत्वमाह—द्विजऋषभेति । एष भगवान् कोसौ यः स्वमायया सृष्ट्यादिकं करोतीति हेतोः मायया ब्रह्मरुद्रादिसंज्ञया उपलक्षितः ब्रह्मरूपेण गुणैश्च निरतिशयबृहत्त्वयुक्तः योनिः सर्वकारणभूतः अयं एक अयं सर्वं युगपत्साक्षात्पश्यतीति तथा अयं प्रकाशोऽथ अनेनाञ्जनतत्त्वाद्युक्तक्रमहिमेव पूर्णः अवाप्तसमस्तकामः अनेन मुक्तनित्यसज्जीवस्याप्याप्तिः तयोः परिपूर्णतायाः भगवत्सङ्कल्पायत्तत्वेन स्वमहिमायत्तत्वाभावादिति भावः अनावृतात्मा अनवच्छिन्नज्ञानः अनेन बद्धजीवव्यावृत्तिः इत्यद्भुतं किं सर्वेन ज्ञायते इत्यत्राह, विवृत इव गूढ इव निरुक्तः "तं दुर्दर्शं गूढमनुप्रविष्टम् । गूढात्मा न प्रकाशते" इत्यादिभिः शास्त्रैर्गूढत्वेनोक्त इत्यर्थः । तर्हि केनापि दृश्यते इत्यत्राह—तत्परैरतदुपासकैरात्मना योगपरिशुद्धमनसा दृश्यत इति ॥ २४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

देवयजनं हरेः पूजास्थानं पद्माऽजादिकं मण्डलम आत्मनः परमात्मनः सकाशात्संस्कारः शरीरशुद्धिर्दीक्षा दीक्षया हि देहशुद्धिः भगवतः परिचर्या आत्मनः स्वस्य दुरितघ्नः पापनाशनम् ॥ १७ ॥

भगवान्पूज्यः भगशब्दात्मा भगशब्दस्वरूप ऐश्वर्यादिगुणस्वरूप इत्यर्थः । धर्मं यशः आश्रये चामरव्यजने ॥ १८ ॥

निजधाम तद्वैकुण्ठं तदभिमानिदेवता आतपत्रं त्रिवृत् त्रिविधो वेदः सुपर्णाख्यो यज्ञं पुरुषं यज्ञपुरुषं वहति ॥ १९ ॥

साक्षादनपायिनी नित्यावियोगिनी श्रीर्हरेरात्मभूताश्रितेदृशा नाम विष्वक्सेनः पार्षदाधिपो विदितः तन्त्रमूर्तिः तन्त्राभिमानी ॥ २० ॥

अष्टौ नन्दादयो द्वाःस्थाः हरेरणिमाद्या गुणास्तदभिमानाः मूर्तिव्यूहे मूर्तित्वापन्न वासुदेवः सङ्कर्षणः प्रद्युम्नोऽनिरुद्धः स्वयमभिधीयते ॥ २१ ॥

स भगवानेव विश्वादिशब्दवाच्य इति [illegible] ते अर्थेन्द्रिया- [illegible] शयज्ञानैः वृत्तिभिः अर्थज्ञानवृत्त्युपहृत्या [illegible] दवस्थया विश्वः मन आदीन्द्रियगतवासनाज्ञानवृत्त्युपहृत्या [illegible] [illegible] दवस्थया तैजसः आशया सुषुप्तिगतदवस्थाज्ञानवृत्त्युपहृत्या [illegible] [illegible] प्राज्ञः प्रज्ञा एतं कार्यं सुखमस्वाप्सम इत्यनुभवाद् [illegible] [illegible] [illegible] इत्यत्राह, ज्ञान इति । ततो ज्ञानतोऽपरिच्छिन्न इत्यर्थः [illegible] मात्रया- तत इति । [illegible] गितं तत् निर्वाभिमतम् ॥ २२ ॥

अङ्गादिकथनस्योपयोगमाह—अङ्गेति । [illegible] विशेषवाच्यवासुदेवादयाऽनन्तरयोर्भगवत्पूजकस्य तदर्थत्वेन [illegible] [illegible] ः । अङ्गादिचतुष्टयस्यापि हरिरेवाधार इत्याह, तद्विति । [illegible] [illegible] अङ्गादि- चतुष्टयं बिभर्ति । तत्रायं विभागः [illegible] ः वासुदेवाद्याः स्वयमुपाङ्गादिषु ब्रह्मादिषु सन्निहितत्वेन [illegible] [illegible] स्पष्टार्थं हरिरपि इत्युक्तं भगवान्महिमाद्यावतमो [illegible]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पुरन्दरो वान्यतमः किं न स्यादित्यत उक्तमीश्वर इति सोपि सदाशिवः स्यादत उक्तं चतुर्मूर्त्तिरिति सोऽष्टमूर्त्तिरिति प्रसिद्धः ॥ २३ ॥

यद्वेदान्तवेद्यं तदेवात्र पुरुषरूपेणोच्यते तस्मादिदं मुमुक्षुभिः सदोपास्यमिति श्लोकद्वयेनाह-द्विजवृषभेति । हे द्विजवृषभ ! तत्परैस्तद्भक्तैः आत्मलभ्यः आत्मनि मनसि लभ्यः प्रकाश्यो भवति यद्वा, आत्मनैव स्वानुग्रहेणैव लभ्यः प्राप्यः "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः । किं लक्षणकः कोयं पुरुष इति तत्राह-माययेति । स्वया मायया स्वेच्छयैव सृजतीत्याद्यन्वया निरुक्तः कथं सृजतीति स्रष्टा हरतीति हरः पातीति पाता "स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु" इत्यादेः अत्र किं प्रमाणम् ? तत्राह-ब्रह्मेति । ब्रह्म वेदादिशब्दराशिर्योनिर्ज्ञप्तिकारणं यस्य स तथा वेदादिशब्दराशिवेद्यमर्थं मानमित्यर्थः । चतुर्मुखस्यापि सृष्ट्यादिकर्तृत्वस्य प्रमितत्वात्कथं हरेरेवेति निश्चीयते "ब्रह्मा देवानां प्रथमः सम्बभूव" इति श्रुतिरित्यतो वाह-ब्रह्मेति । ब्रह्मणश्चतुर्मुखस्य योनिः कारणं "यो ब्रह्माणं विदधाति" इति श्रुतेः लोकवत्परोपदेशेन कर्मणि न प्रवर्तते किन्तु स्वरूपज्ञानेनेत्यनेनेत्याशयेनाह-स्वयं दृगिति । स्वयं भूतज्ञानत्वेपि कर्मणपेक्षाविनाभूतं दृष्टमत्राह-स्वमहिमेति । स्वे महिम्नि"इति श्रुतेः । स्वयं प्रकाशमानस्य प्रद्योतमानस्य मेघाद्यावरणेनेव हरेर्ज्ञानस्यापि तत्स्यादित्यत्राह, अनावृताक्ष इति आवरणरहितदृष्टिः कथं प्रकाश्यत इत्यत्राह-विसृजत इति । स्रष्टा अयमित्युपासमानस्य विविधं सृजन इति प्रकाशते संहर्त्ता अयमिति ज्ञानवतः संहरतीव रक्षतीव इत्यस्य उपलक्षणमेतत् यान्यान् गुणानुप[illegible]स्ते तत्तद्गुणत्वेन प्रकाशत इति ॥ २४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

देवस्य यजनं यत्र कुत्रचिद्भगवतः पूजास्थानमेव मण्डलं भगवतो निजस्थानत्वकत्वं संस्कारो भगवतः साक्षात्प्राप्तियोग्यता ॥ १७ ॥

भगःब्देनाप [illegible] लीलाकमलं तु तदतीतमयं तथापि द्वयोरभे [illegible] ॥ १८ ॥

वैकुण्ठं [illegible] कुण्ठासुनाविर्भावितं तत्पदमस्य विराडधिष्ठा [illegible] पत्रं भावबोदित्यर्थः ॥ १९ ॥

साक्षाद [illegible] स्य या हरेर्भगवती श्रीः सैव जगतः श्री [illegible] ॥ २० ॥

वासुदेवा [illegible] रूपा इति वासुदेव इत्यादिपद्यद्वयार्थः [illegible]

तेषामर्था [illegible] दिरूपेण बिभर्तीति अङ्गाद्यभेदेनार्थाद्द्वयो [illegible] ॥ २३ ॥

यस्मै मे [illegible] माहात्म्यं दर्शयति, द्विजेति । ब्रह्मयोनिस्त्वा [illegible] किर्दर्शिता तत्र मायादोषेण छिन्नत्वमाश [illegible] नावृताक्ष इति तत्र हेतुः स्वया स्वाधीनयेति [illegible] दं सृजतीत्याद्या व्याप्तिः

विश्वातिर्यथा एवम्भूताविन्त्यमाहात्म्योपि [illegible] इव करकलित इव निरुक्तः प्रतिपादितः । यतस्तैरात्मनि चित्ते लभ्यः अनुभवितुं शक्य इति ॥ २४ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

सूर्य्यस्येव भगवद्विग्रहस्य यन्मण्डलं तत् देवयजनं देवपूजाभूमिः दीक्षा तन्मन्त्रोपदेश एव आत्मनो जीवस्य संस्कारः तन्मन्त्रप्रयोगस्य विमूर्तिर्जीवसंस्कार इत्यर्थः । परिचर्य्येति तत्परिचर्य्याया जीववृत्तित्वमेव विभूतिः ॥ १७ ॥

भगशब्दस्यार्थम् अर्थचतु(ष्कं)यं लीलाकमलं दधाति लीलाकमलस्य विभूतयः ऐश्वर्यधर्मज्ञानवैराग्याणि प्राकृतानि धर्मः यशश्च प्राकृतं चामरव्यजनयोर्विभूती ॥ १८ ॥

हे द्विजाः ! अकुतोभयं धाम वैकुण्ठमेव आतपत्रं छत्रम् अभजदिति लोकगतं यत्किञ्चिन्निर्भयत्वं प्रतीयते तत् खलु, छत्रस्यैव विभूतिरित्यर्थः । त्रिवृत् ऋग्यजुस्सामरूपो वेदः वेदात्मा वाहनादिरित्यर्थः ॥ १९ ॥

अनपायिनी एकरूपा साक्षात्स्वरूपभूता शक्तिः अस्याह्लादिनीशक्तेर्विभुतिर्लौकिकः स्वर्गाद्यानन्दः ऊहः तन्त्रमूर्त्तिः पञ्चरात्राद्यागमरूपः इति पञ्चरात्राद्यागमाः विष्वक्सेनस्य विभूतय इत्यर्थः । द्वाःस्था ये नन्दादयस्तेऽणिमाद्या गुणा अन्यगता विभूतयः ॥ ॥ २० ॥

द्वाःस्थानुक्त्वा दिक्चतुष्टयगतांश्चतुरो व्यूहानाह-वासुदेवं इत्यादि(व्यूह)मूर्त्तिममूः स्वयं पुरुषो भगवानेवेत्यन्वयः ॥ २१ ॥

चतुर्णां व्यूहानां विभूतीराह-स इति । अर्थाद्या इन्द्रियं मनः आशयस्तदनुभवसंस्कारयुक्तं सुखमहमस्वाप्समिति सुखं न किञ्चिदमेदिषमित्याकारकमज्ञानं च तथा ज्ञानं चेति तेषां विश्व इत्याद्या वृत्तयस्ताभिः स भगवानेव परिभाव्यते परिच्छिद्यते चतुर्णां व्यूहानामेव विश्वाद्याश्चतस्रो वृत्तयो नियम्या विभूतय इति, भावः । अत्र वासुदेवस्य विश्वः सङ्कर्षणस्य तैजसः प्रद्युम्नस्य प्राज्ञः अनिरुद्धस्य तुरीयो ज्ञानमिति विभूतयो विवेचनीयाः ॥ २२ ॥

व्यञ्जितमेवार्थं स्पष्टयति-अङ्गादिभिः सहित एव चतुर्मूर्त्तिर्भगवान् (तत्) चतुष्टयं विश्वादिचतुष्कं नियामकतया बिभर्ति अङ्गोपाङ्गायुधाकल्पसहितस्यैव वासुदेवस्य विभूतिर्विश्व इत्येवमेव सङ्कर्षणादीनां तैजसाद्या विभूतयः हरिरित्युपासकानां दुरितहर्ता ईश्वरो विश्वादीनां नियन्ता ॥ २३ ॥

तस्य चतुर्मूर्तितामुक्त्वा त्रिमूर्त्तितामाह-हे द्विजऋषभ ! एष भगवान् ब्रह्मणो वेदस्य योनिः प्रकाशकः न चास्य कोपि प्रकाशक इत्याह—स्वयं दृक् स्वप्रकाशः नचास्य दृशं दृश्येऽप्यवधि पक्षस्यपेक्षेत्याह,स्वमहिमपरिपूर्णः किन्तु क्रीडार्थमेव स्वया [illegible] मायया मायिकया ब्रह्मादिनाम्ना सृजति हरति पाति इत्येवम् अनावृताक्षोपि अपरिच्छिन्नज्ञानोपि मायया छिन्न इव कृतविपर्य्यय इव निरुक्त इव वस्तुतस्तु निर्वक्तुं विचारितुं ब्रह्मादिभिरप्ययमशक्य एवेति भावः । तर्हि, किमर्थमेतावानायासः [illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

दृढ़ाह, तत्परैस्तद्भक्तजनैरात्मना मनसा एतादृशध्यानेन लभ्य इति, अत्र तत्पादादीनां विभूतिभिः पृथिव्यादिभिरेवस्मृताभिरेव तत्पादादिस्मरणं सुखेन भवेत् तथाहि सर्वदा व्यवस्य मत्प्रभो-श्चरणस्यैव विभूतिरियं पृथ्वी सर्वदा दृश्यते अतः पृथ्वीमाश्रिताः स्थावरजङ्गमाः मत्प्रभोश्चरणाश्रिता एव ते मया सम्माननीया एव न तु द्वेष्टव्याः तथा मत्प्रभोर्वक्षसि धृतस्य कौस्तुभस्य विभूतयः सर्वेऽपि जीवाः अतस्तेषामेकोऽपि मया द्वेष्टुं निन्दितुं वा न युज्यत इत्येवं भावनैवात्र फलं द्रष्टव्यम् ॥ २४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

श्रीभगवतो मङ्गलमूर्तेः साङ्गोपाङ्गादिभावनाध्यानादिकं स्व-यति-मण्डलमिति । मण्डलं स्वर्णमण्डलमुपलक्षणं चैतत् इत्यक महार्हाणां सुवर्णमण्डलहृत्पद्मादिकं देवयजनं द्रव्योपासनस्थानम् दीक्षा गुरुकृता मन्त्रदीक्षा आत्मनः उपासकस्य संस्कारः उपा-सनाङ्गत्वेन फलमाह भगवतः परिचर्या दुरितक्षय इति ॥ १७ ॥

भगशब्दार्थम् ऐश्वर्यादिषाड्गुण्यम् ॥ १८ ॥

आतपत्रं तु वैकुण्ठमभजत् द्विजाः मुनयः अकुतोभयं धाम तद्धामत्वात् भवति त्रिवृद्वेदः ऋग्यजुःसामरूपः सुपर्णाख्यः सुपर्णः इत्याख्या यस्य सः गरुडः यज्ञं विष्णुं पुरुषं वहति ॥ १९ ॥

आत्मनः परमात्मनोऽनपायिनी साक्षाद्भगवती धर्मभूता ज्ञान-रूपा शक्तिः श्रीर्लक्ष्मीः चिन्तनीयाः तन्त्रमूर्तिः पञ्चरात्रागम-रूपः अणिमाद्याः गुणाः नन्दादयोऽष्टौ द्वाःस्थाः द्वारपालाः मन्तव्याः ॥ २० ॥

वासुदेवः सङ्कर्षणः प्रद्युम्नः अनिरुद्धः इति मूर्तिव्यूहः मूर्ति-भेदः पुरुषो वैराजः स्वयमेवाभिधीयते ॥ २१ ॥

अर्थो बाह्य इन्द्रियं मनः आशयः किञ्चिदात्मसुखसंस्पर्शी जाग्रत्स्वप्नपदार्थविस्मृतिलक्षणान्तःकरणवृत्तिभेदः ज्ञानं त्रिष्वनु-गतम् तैर्विश्वतैजसः प्राज्ञस्तुरीय इति या वृत्तयोऽवस्थास्ताभि-र्विवस्थाभिर्नियन्ता स वैराजो भगवान् परिभाव्यते अनु-भूयते ॥ २२ ॥

अवस्थाभोक्ता स नेत्याह-अङ्गेति। चतुर्मूर्तिः चतुर्व्यूहरूपोपास्यः तत्तदवस्थानियन्तृतया चतुर्मूर्तिर्वा भगवान् एतच्चतुर्थमवस्था-चतुष्टयं नियन्तृतया बिभर्ति पुष्णाति न तु भुङ्क्ते तत्र हेतुगर्भाणि विशेषणानि यतः भगवान् षाड्गुण्यनिधिः संसारहारिः ईश्वरः सर्वं कर्तुं समर्थः स अङ्गोपाङ्गायुधाकल्पैर्विभाव्यते इति पूर्वेणान्वयः जीववत् विश्वाद्यवस्थानियन्ता भगवानित्यर्थः ॥ २३ ॥

एवं परब्रह्मपुरुषोत्तमोपासनायामधिकारसिद्धये तदंशभूत वैराजोपासना श्रीशुकोक्तैव किञ्चिद्विशेषनयार्थकत्वात् तया स्थिर-चित्तैर्मुमुक्षुभिः प्राप्यं च सर्वशास्त्रार्थभूतमनन्ताखिलाद्भुत-गुणगणाश्रयं भगवन्तं ब्रह्मादिपदाभिधेयं पुरुषोत्तमं प्रति-पादयन् तस्य सर्ववेदैकवेद्यत्वं, स्वप्रकाशत्वपरिपूर्णत्वविश्व-जन्मादिहेतुत्वादीन् गुणानाह-द्विज इति । हे द्विजर्षभ ! शौनक ! योऽस्मिन् पुराणे वैराजादिरूपैः प्रतिपादितः स एव ब्रह्मयोनिः [illegible] वेदः योनिः ज्ञापकं प्रमाणं यस्मिन् सः स्वयं इक् स्वयं प्रकाशः स्वाभाविकेन महिम्ना परिपूर्णः एतत् विश्वं स्वया स्वकीयया शक्तिभूतया मायया सृजति पाति हरति च यतोऽसावावृताक्षो ऽनावृतज्ञानः इतिशब्दः प्रसिद्धौ भावयता आत्मावकवचनम् । प्रसिद्धं ब्रह्माकाशप्राणादिनामभिः "बृहत्त्वात् बृंहणत्वाच्च तस्माद्ब्रह्मेत्युच्यते परं ब्रह्म" आ समन्तात् काशते इत्याकाशः प्रकर्षेण अणतीति प्राणः इत्येवं विद्वद्भिः इव निरुक्तो यः सः तत्परैः परमात्मोपासकैः आत्मनैव लभ्यः प्राप्यः "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः ॥ २४ ॥

भाषाटीका ।

इस प्रकार भावना करता हुआ अधिकारी देवताओं की पूजा की भूमि को सुवर्ण मण्डल करके भावना करे, और गुरु-दत्त दीक्षाको आत्माके संस्कार की भावना करे, तथा भगव-त्परिचर्या को अपने दुरितक्षय करने वाली है एसी भावना करे ॥ १७ ॥

भगवान्, भगशब्द का अर्थ जो षाड्गुण्य है, तिसको लीला कमल करके धारण करते हैं। धर्म और यश का चामर और व्यजन करके सेवा में स्वीकार करते हैं ॥ १८ ॥

हे द्विज ! निर्भय धाम जो श्रीवैकुंठ है, उसी को भगवान् का छत्र जानों । ऋग यजु सामरूप वेद त्रयी को गरुड में भावना करो, और यज्ञ में पुरुष की भावना करो ॥१९॥

श्रीहरि की अनपायिनी श्री में लक्ष्मीजी की भावना करो, पार्षदों के अधिपति विष्वक्सेन, पांचरात्रादितन्त्र मूर्ति विदित ही हैं। श्रीहरि के अणिमादिक अष्ट गु[illegible], व ही नन्दादिक अष्ट द्वारपाल हैं ॥ २० ॥

हे ब्रह्मन् ! पुरुष जो स्वयं श्रीनारायण हैं वे ही वासुदेव, सङ्कर्षण, प्रद्युम्न, अनिरुद्ध, इन चार मूर्ति भेदों से उपास्य हैं दूसरा कोई नहीं ॥ २१ ॥

वेही भगवान्, अर्थ, इन्द्रिय, आशय, और ज्ञान, इन उपा-धियों से अर्थात् विषयों के द्वारा जाग्रत् स्वप्न सुषुप्ति और तुरीय इन अवस्थाओं से विभा[illegible] होते हैं ॥ २२ ॥

अङ्ग उपाङ्ग आयुध और भूषण [illegible] से रूपों [illegible] श्रीहरि वासुदेवादि चतुर्विध मूर्ति होकर [illegible] आदि चारों अवस्थाओं को धारण करते हैं, और इन अवस्थाओं के नियामक होने से जीवभाव को नहीं [illegible] होते, किन्तु भगवान् ईश्वर ही रहते हैं ॥ २३ ॥

हे द्विज श्रेष्ठ ! वे ही भगवान् [illegible] स्वयं [illegible] अपनी महिमा से परिपूर्ण श्रीहरि [illegible] मायाशक्ति से इस विश्व को रचते हैं, हरते हैं, और [illegible] हैं, इसी से विविध भावनाओं (नामों) को धारण [illegible] हैं, और सदा जिनका ज्ञान आवृत नहीं होता [illegible] उनको को दूर सरीखे कहे जाते हैं परंच भक्तों [illegible] आत्मा ही में प्राप्त हो जाते हैं ॥ २४ ॥

श्रीकृष्ण ! कृष्णसख ! [1] वृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य !
गोविन्द ! [2] गोपवनिताव्रजभृत्यगीततीर्थश्रवः ! श्रवणमङ्गल ! पाहि भृत्यान् ॥ २५ ॥

य इदं कल्य उत्थाय महापुरुषलक्षणम् ।
तच्चित्तः प्रयतो जप्त्वा ब्रह्म वेद गुहाशयम् ॥ २६ ॥

शौनक उवाच ।

शुको यदाह भगवान् विष्णुराताय शृण्वते ।
सौरो गणो मासिमासि नाना वसति सप्तकः ॥ २७ ॥
तेषां नामानि कर्माणि संयुक्तानामधीश्वरैः ।
ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो हरेः ॥ २८ ॥

सूत उवाच ।

अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनाम् ।
निर्मितो लोकतन्त्रोऽयं लोकेषु परिवर्तते ॥ २९ ॥
एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः ।
सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ॥ ३० ॥
कालो देशः क्रिया कर्ता करणं कार्यमागमः ।
द्रव्यं फलमिति ब्रह्मन् ! नवधोक्तो जया हरिः ॥ ३१ ॥
मध्वादिषु द्वादशसु भगवान् कालरूपधृक् ।
लोकतन्त्राय चरति पृथग्द्वादशभि[3] र्गणैः ॥ ३२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

स्वदेवमप्य [illegible] श्रीकृष्णं प्रार्थयते-कृष्णसख । अर्जुनस्य [illegible] वनिध्रुहो ये राजन्यास्तेषां वंशदव दहन ! अ [illegible] वरय गोपवनितानां व्रजाः समूहाः भृत्या नारदा [illegible] मूतं श्रवः कीर्तिर्यस्य श्रवणमेव मङ्गलं [illegible]

एतज्जप [illegible] नं फलमित्याह--य इति । कल्ये उषःकाले [illegible] : शुचिश्च स जप्त्वा गुहाशयं हरिरूपं [illegible]

अथ द्वयं [illegible] पृच्छ्यमानतो मूर्तिव्यूहप्रसङ्गेन रविव्यूहोऽप [illegible] इति । पञ्चमे यदाह तथाऽन्ये च ऋषयो ग [illegible] नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो [illegible] ना सौरः सूर्यसम्बन्धी सप्तकः सप्तानां ग [illegible]

तेषां स [illegible] रपतिभिस्तत्तन्मासाधिकृतसूर्यैर्व्यूहं विभाग [illegible]

एवं ता [illegible] र्दु प्रथमं सूर्यस्वरूपमाह-अनाद्य-विद्यया मायया अयं सूर्यः लोकतन्त्रो लोकयात्राप्रव-र्तकः ॥ २९ ॥

अतस्तस्य क्रियाभेदोपाधिकमेव नानात्वं न स्वत इत्याह-एक एवेति "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतेः । जगदात्मा आदिकृत् सृष्टिकर्ता हरिरेव सूर्यः स च सर्वासां वेदोक्तक्रियाणां मूलं संश्लेषोपाधिना बहुधोक्तः ॥ ३० ॥

कालरूपधारिणो हरेर्द्वादशादिरूपं भेदं क्रियोपाधिकं दर्शयितुं प्रथमं सर्वकर्मप्रवृत्तये मायाकृतं नवधा भेदमाह-काल इति । कालः प्रातरादिः देशः समादिः क्रिया अनुष्ठानम कर्ता ब्राह्मणादिः करणं स्रुगादिः कार्यं यागादि आगमो मन्त्रादिः द्रव्यं व्रीह्यादिः फलं स्वर्गादि ॥ ३१ ॥

तत्र च कालस्वरूपधारी भगवान् पृथक् चरति मध्वादिषु चैत्रादिषु लोकतन्त्राय लोकयात्रानिर्वाहाय ॥ ३२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अवनिध्रुग्राजन्यवंशदहन ! भूमेरपकारिराजन्यकुलदहन !

---

(१) वृष्ण [illegible] (२) गोद्विसुरार्तिहरावतारेत्यादि । (३) गुणातान् च विज० पा० ।
* विजय [illegible]

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

...मायाक अनपवर्गवीर्यं अप्रतिहितवीर्यं इत्यर्थः । येन पावनकीर्तेः ...गीतैः स्वच्छन्द इत्यथः ॥ २५—२८ ॥

अविद्यया ज्ञानविरोधिन्या प्रकृत्या तस्य क्रियामूलत्वं ...कालावच्छिन्नया कालो देशोऽव्यादि कार्यम् अपूर्वम् आगमः प्रमाण...भूतो वेदः, देशकालादिपर्यन्तम् सर्वं क्रिया इति सर्वसाधन...त्वेन च क्रियान्तर्भूतम् एभिर्निर्दिष्टा क्रिया इत्यर्थः ...या क्रियया बहुधोक्तः तत्तद्देवताद्रव्यशरीरकत्वात् बहु...धोक्त इत्यर्थः ॥ २९—३१ ॥

मध्वादिषु चैत्रादिमासेषु गणैः प्रत्येकं सप्तसङ्ख्यैः ॥ ३२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

तदेवं तत्तत्त्वात्मकश्रीभगवदङ्गादीनि निरूप्य कृष्णपदव्याख्या...नुपसंहर्तुं तावत्स्वेष्टदेवतां नमस्कारव्याजेन प्रार्थयते-श्रीकृष्णे-त्यादि—

"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥

इति व्युत्पत्त्या तादृशार्थो ज्ञेय इत्यर्थः । इमानि नव सम्बोधनानि तत्राद्येन सर्वान्तर्यामित्वं द्वितीयेन सौशील्यं तृतीयेन सौलभ्यं तुरीयेन दुष्कृद्विनाशकत्वं पञ्चमेनापारवीर्यत्वं षष्ठेन सर्वाधारत्वं सप्तमेन साधुपरित्रातृत्वम् अष्टमेन पावनकीर्तिमत्त्वं नवमेना-न्ह्रेण भोग्यत्वं विवक्षितम् कृष्णोऽर्जुनसखस्य सखे ! तथा वृष्णिऋषभः अवनिध्रुग्राजन्यवंशदहन नाशन ! वृष्णयो राजन्या एव वंशा वेणवस्तेषां दहन नाशन ! यद्वा, अवनिध्रुग्राजन्यानां वंशाः सन्तानाः तस्य दहन ! अनपवर्गवीर्येति पाठः अमरतम्यवीर्येति पाठे परत्वं विवक्षितं गतां द्विजानां सुराणां चार्ति हरतीति तथाभूतो यस्य तीर्थे पुण्याम्बुद ! ... प्रभो यस्य श्रवणमात्रेण मङ्गलप्रद ! भृत्यान् अवतात् रक्ष ॥ २५ ॥

प्रकृतभगवदङ्गादिनिरूपणप्रकरणकीर्तनफलमाह-य इति । कल्ये [प्रातः] "प्रभाते उत्थाय इदं महापुरुषस्य लक्षणं चिह्नभूताङ्गोपाङ्गा-द्यादिनिरूपणपरं प्रकरणं तस्मिन् परमपुरुष एव चित्तं यस्य सः समाहितेन्द्रियश्च यः स जपेत् गुहाशयं हृदयगुहाशयस्थितं ब्रह्म वेद प्राप्नोतीत्यर्थः ॥ २६ ॥

अथ कथितद्वादशाध्यायसमाप्तिपर्यन्तं कथितेति प्रष्टव्यम् पुनरुप लक्षितस्य वासुदेवादिव्यूहप्रसङ्गात्सूर्यादि-व्यूहान् पञ्चमे स्कन्धे दिङ्मात्रेण प्रदर्शितान् विस्तरतो बुभुत्सुः पृच्छति शौनकः-शुक इति द्वाभ्याम । शृण्वते श्रवणं कुर्वते विष्णुराताय परीक्षिते श्रीशुको यदाह किन्तत् सौर्यैः सूर्यात्मकः गुणः समकः समानामादित्यानां समु-दायकः मासिमासि नानायुक्ति नानाविधं कर्म वहतीति यत् तथाविधमुक्तं पञ्चमे "तथान्ये च ऋषयो गन्धर्वा अप्सरसो नागा ग्रामण्यो यातुधाना देवाः इत्येकैकशो गणाः सप्त चतुर्दश मासिमासि भगवन्तं सूर्यमात्मानं नानानामानं पृथक् नामानः पृथक् कर्मभिर्द्वन्द्वश उपासते" इति ॥ २७ ॥

तेषामिति अप्सरोनागग्रामणीयातुधानानाम् अर्धः सूर्यैः नियुक्तानां तदात्व-तिभिः तत्तन्नामात्मकस्य सूर्यैर्नियुक्तानामित्यर्थः । प्रतिमासं सूर्यं स्वनाम-मेरणायसमर्थं सार्धमर्धैरिति बहुवचनं अप्सरात्मसूर्यपरमात्मोपा-सनार्थं सूर्यकर्माणि तेषां नामानि तेषां गणानां प्रतिमासं तद्विभि-नानि वा आनन्देन सहैव सूर्ये वदन्ते सूर्यात्मनः सूर्यशरीरस्य हरेरात्मक तेषां गणानां व्यूहं तन्नामानि कर्माणि च प्रह्व-तानां नाऽस्माकं ब्रूहीति सम्बन्धः ॥ २८ ॥

तत्र व्यूहाभिरूपयितुं तावत्सूर्यस्य तत्त्वमाह—अनादीति । सर्वदेहिनामन्तरात्मनो विष्णोरनिर्वाच्यया अनाद्यविद्यया आवि-ष्टहतया ज्ञानविरोधिन्या प्रकृत्या निर्मितोऽयं सूर्यः लोकतन्त्रः लोकयात्रात्मकोऽत एव लोकेषु प्रवर्तते परिभ्रमति अनाद्य-विद्यया निर्मित इत्यनेन सूर्यविग्रहस्य प्रकृतिपरिणामविशेषात्म-कत्वमुच्यते ॥ २९ ॥

तस्य भगवदात्मकत्वं वदन् लोकतन्त्रत्वमुपपादयति-एक एव हीति । यो लोकानामादिकृत् सृष्टिकर्ता एक अद्वितीयः अनुक्ष-णं स्वस्वान्तरहितः सर्वान्तरात्मा हरिः स एव सूर्यो हरिरेव सूर्यशरीरकत्वेनावस्थित इत्यर्थः । कथम्भूतः सर्वासां वेद-क्रियाणां मूलभूतः वैदिकक्रियामूलत्वं कालावच्छेदकतया वह-नतत्त्वात् ऋषिभिः पराशरादिभिर्बहुधा द्वादशधा उदितः उक्तः ॥ ३० ॥

तत्र दृष्टान्तमाह-कालेति । हे ब्रह्मन् ! यथा हरिरेक एव कालादिशरीरकत्वेन तथा उक्तः तद्वदित्यर्थः । तत्र कालो वस-न्तादिर्देशः "समे यजेत" इत्याद्युक्तः क्रिया यागादिरूपा करणं साधनं कार्यं स्वर्गादि कार्यमपूर्वाख्यम् आगमः प्रमाणभूतो वेदः द्रव्यं चरुपुरोडाशादि फलं स्वर्गादि "यथोक्तो बहुधा हरि" इति पाठान्तरं देशकालादिफलपर्यन्तमिदं सर्वं साधनत्वेन साध्यत्वेन तत्र क्रियान्तर्भूतम् एभिर्निर्दिष्टा क्रिया इत्यर्थः । यथा क्रियया हरिर्बहुधोक्तः द्रव्यादि शरीरकत्वादिति भावः ॥ ३१ ॥

विवक्षितमर्थं तावदनुप्रवर्तयाह—मध्वादिष्विति । मध्वादिषु चैत्रादिषु द्वादशसु मासेषु कालकरूपभूत(कृ)कालावच्छेदकरूपभूत(कृ) भगवान् सूर्यः लोकतन्त्राय लोकयात्रानिर्वाहकाय पृथग्द्वादशभि-र्गणैः सह चरति एकैकस्मिन् मासे एकैको गणः प्रतिगणं गणिनश्च सप्तसप्तेत्यर्थः । यद्यपि पञ्चमे स्कन्धे चतुर्दशोक्ताः तथापि तत्र प्रधानाः सप्त सप्तेति [illegible] इति भावः ॥ ३२ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एतदनुपाठक कुर्वतः फलमाह—य इति । कल्ये उषसि महापुरुषलक्षणं जपति स जपन् हृदय[illegible] इति हृदयगुहाशयं ब्रह्म जानाति [illegible] ॥ २६ ॥

(विजयध्वजतीर्थरीत्याऽत्रैव [illegible])

सर्वोपाख्यानेभ्योऽधिकत्वस्यैव [illegible] तत्र शौनकः कर्तव्यमिति तद्दृष्टिमकार्षुं कथयत्[illegible] तत्र शौनकः पृच्छति—शुक इति । शुको भगवान्विष्णुरातेन [illegible] नामरूपादि ... गणो मासिमासि नानानामानं [illegible] ... मायाः सौरैः सूर्यस्य विद्यमाने [illegible] वसति

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

"तथा अन्ये च ऋषयो गन्धर्वाप्सरसो नागाः" इत्यादि पञ्चमस्कन्धे यदाह ॥ २७ ॥

तदा तेषां पृथङ्नामानि पृथक्कर्माणि चानुक्तान्यतः अह धामानां नाऽन्यानि नामानि मूर्तीत्यन्वयः । सूर्यात्मनः सूर्यान्तर्यामिणो हरेर्व्यूहं स्थितिनिशेष च यह सूर्यात्मनो हरेः परितः स्थितं तेषां व्यूहं पृथक् पृथगिति शेष इति वा ॥ २८ ॥

अयं कर्त्ता हरेर्बुद्धिपूर्वं प्रवर्तितत्वान्न मिथ्याभूत इति भावेनाह-अनादीति । लोकं तन्त्रयति व्यापारयतीति लोकतन्त्रो लोकप्रवृत्तिहेतुरयं सूर्यादिः लोकेषु परितो चरन् उदयादिनिमित्तव्यापाराय उदयादिकं गच्छतीत्यर्थः । कीदृशः सर्वदेहिनामात्मनो विष्णोः अनाद्यविद्यया * कारणशून्येच्छया निर्मितः 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" इति श्रुतेः ॥ २९ ॥

सरतीति सूर्य इति सूतिप्रापकत्वात्सूर्य इति तच्छब्दप्रवृत्तिनिमित्तस्य तदेकाधीनत्वान्मुख्यकर्त्ता हरिः एक एवेत्याह, एक एवेति । लोकानामुभयेषाम् आत्मा "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतिः । दिनस्यादिकृत् "कर्तोच्छेदने" इतिधातोर्दिनादिच्छेत् मन्त्रकर्त्ता च "प्रातरुत्थायाय सन्ध्यामुपासीत" इति श्रुतेः सर्वत्रोक्तक्रियामूलमत एव ऋषिभिर्बहुधोदितः उदितमिति पाठे तत्स्वरूपं नानात्वेन कथितम् अत्र द्वादशसूर्येष्वेकः स्वयं हरिरन्यत्रान्तर्यामित्वेनेति विशेषः ॥ ३० ॥

नानात्वमुपपादयति-काल इति । अजया मायया ऽनाद्यविद्यया नवधोक्तः कालः प्रातरादिः देशः समादिः क्रिया अनुष्ठानं कर्त्ता ब्राह्मणादिः कारणमिन्द्रियं कार्यं देहः द्रव्यं चक्षुरादि भूतपञ्चकं वा आगमो वेदादिशास्त्रं फलं स्वर्गादि कालादिषु स्थितस्या तत्कर्मकारकत्वेन कालादिशब्दवाच्यत्वेन नवधा हरिरुक्तः इति ज्ञातव्यम् ॥ ३१ ॥

एक एव हरिः अनेकत्वमवसर्पतीत्युक्तं तत्प्रकारं दर्शयति-मध्वादिष्विति । कालरूपधृक् भगवान् लोकतन्त्राय लोकव्यापाराय मध्वादिषु चैत्रादिषु मासेषु द्वादशभिर्गणैर्व्यादर्शविधकालगुणैः पृथक् पृथक् चरतीत्यन्वयः ॥ ३२ ॥

[illegible]स्वामिकृतक्रमसन्दर्भः ।

तमेव नाम[illegible]पयन् प्रार्थयते । यद्वा, ममत्वीदृश एव स पुरु[illegible]दृशमेव तं प्रार्थयते—श्रीकृष्णेति । तत्र श्री[illegible] पुरलीला गोविन्दस्यादिना व्रजलीला तत्र प्र[illegible]न्ते निर्देशात्तत्रैव निजाभिव्यक्तिर्दर्शिता तीर्थेत्य[illegible]पाश्च वनिताश्चतद्गनाश्च व्रजस्तत्रस्था अन्य[illegible]श्च तैर्गीतेति विग्रहः वर्त्तमाने क्तः भूत[illegible]वानस्मान् स्वयमेव तत् सिद्धि संपाद[illegible]वणेन कृतं साधनसाध्यनैरपेक्ष्यं दर्शितम् ॥ [illegible]

प्रह्व [illegible]श्रयं कुरुष्वमपि ॥ २६ ॥

* अनन [illegible]दिः कारणं यस्याः सा अनाद्या सा च वि[illegible]ग्रहः सूचितः ।

शुक इति युग्मकम् । ननु, श्रुतभागवततत्त्वस्य तव सूर्यगणश्रवणे कोऽयमाग्रहस्तत्राह-सूर्यस्यात्मा अन्तर्यामी हरिः तस्यैव व्यूहं तत्रैव पर्यवसानादिति भावः । इति गायत्र्युपासना तत्पर्यवसानं व्यञ्जितम् ॥ २७—२८ ॥

अनादिरविद्या या तया मायया विष्णोरेव सकाशाद्विनिर्गतोऽयं सूर्यः ॥ २९ ॥

अतस्तदनन्यत्वन्यायेन हरिरेव सूर्यः हरेर्विशेषणं "लोकानामेक एवात्मा" इत्यादि अत एव सूर्योऽपि तेषामात्मादिरित्यर्थः ॥ ३०—५० ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी ।

यदंशस्यैवमुपासनमुक्तं तं श्रीकृष्णं स्वेष्टदेवं परिभावयन् प्रार्थयते-श्रीकृष्णेति । कृष्णस्याजुर्नस्य सखे इति पाण्डवेषु स्नेहः स्ववशीकारकः वृष्णयृषभेति यादवेषु तत्र किं द्योतकमित्यत आह-अवनिध्रुहो ये राजन्यास्तेषां वंशस्य दहन ! यद्वा, त एव वंशास्तत्परस्परसंघर्षोत्थवह्ने ! केन पाण्डवानां यादवानां च वैरिणः संहृत्य तेषां पालक इति अनपवर्गमक्षीणं वीर्यं पराक्रमो यस्मादिति पाण्डवान् यादवांश्च यो भगवान् सर्वजयिनश्चकारेति भावः । गोविन्देति व्रजस्थलोकेषु ततोऽप्यतिस्नेहः स्वातिवशीकारकः तत्र किं द्योतकमित्यत आह-गोपवनितानां व्रजस्य समूहस्य यो भृत्यः "आसामहो चरणरेणुजुषामहं स्याम" इत्युक्तेस्तासामीप्सितभृत्यभाव उद्धवस्तेन गीतं, "ता नमस्यामिदं जगौ" इति श्रीशुकोक्तेर्यद्गीतं तीर्थं जगत्पावनं श्रवो यशस्तदेव श्रवणमङ्गलं कर्णसुखप्रदं यस्य हे तथाभूत ! ॥ २५ ॥

य इदं महापुरुषलक्षणं ब्रह्मतत्त्वस्वरूपं अदस्य वेद स गुह्याशयं परमात्मानमपि वेदत्यन्वयः ॥ २६ ॥

हन्तानेन शुकपरीक्षित्संवादमयम् श्रीभागवतशास्त्रमसमग्रं कथितं तदनन्तरमपूर्वपुरुषस्य मार्कण्डेयस्य चरितं तदनुष्ठितभगवत्पूजनतत्त्वं चापात्प्रश्नानुबोधानुक्रम इदानीम् यस्य श्रीभागवतस्य (त) यच्छ्रियरस्य स्वयं भगवतश्च दृष्टान्तः श्रीसूर्यः "कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह । कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः" इत्येतदुक्त्या "कृष्णद्युमणिनिम्लोच" इत्युद्धवोक्त्या चावगतस्तं द्वादशात्मकम् सकलग्रहराजमधुना द्वादशस्कन्धात्मकपुराणराजममासिसमर्थं संस्तावयितुमहमर्हामीति मनसि पर्यालोच्याह-शुक इति । पञ्चमे यदाह "तथा अन्येच ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त" इत्यादिना सौरः सूर्यसम्बन्धी ॥ २७ ॥

अधीश्वरैः अधीश्वरेण परमेश्वरेणेत्यर्थः । तत्किं सूर्यविषयकेण प्रश्नेन तत्राह—सूर्यात्मनः सूर्यस्वरूपस्य हरेरेव व्यूहं ब्रूहि ॥ २८ ॥

सच्चिदानन्दस्वरूपस्य स्वयम् भगवतः कृष्णस्य श्रीभागवतस्य च दृष्टान्तीभूतोऽयं सूर्यः प्राकृतो भवितुं नार्हतीति मा मंस्था इत्याह-अनाद्यविद्ययेति । सर्वदेहिनामात्मनो विष्णोः

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

देवैवं निर्मितः विष्णुनैवायं स्वतेजोमूर्त्तिः सूर्य्यो ऽनाद्यविद्यया मायया निर्मितः लोकतन्त्रः लोकयात्राप्रवर्त्तकः ॥२९॥

एक एव लोकानामात्मा हरिः सूर्य्यो बहुधा द्वादशधा उक्तः ॥ ३० ॥

न केवलं सूर्य्यरूपेण बहुधा कर्मप्रवर्त्तनार्थं कालादिरूपेणापि बहुधेत्याह—काल इति । कालः प्रातरादिः देशः वेदिस्थलादिः क्रिया अनुष्ठानं कर्त्ता ब्राह्मणादिः करणं स्रुगादि कार्य्यं यागादि आगमः मन्त्रादिः द्रव्यं व्रीह्यादि फलं स्वर्गादि ॥ ३१ ॥

कालरूपधारी भगवानेव सूर्य्यरूपः सन् लोकतन्त्राय लोकयात्रानिर्वाहणाय ॥ ३२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

एवंविधः कः इत्याकाङ्क्षायां तं प्रतिपादयन् तमेव स्वानन्यभक्तरक्षार्थं प्रार्थयते—श्रीकृष्ण इति । हे श्रीकृष्ण । श्रीयुक्तसदानन्द । हे कृष्णसख! अर्जुनसख हे वृष्ण्यृषभ! हे अवनिध्रुग्राजन्यवंशदहन! अवनिद्रुहो ये राजन्यास्तद्वंशनिर्णाशक! हे अनपवर्गवीर्य नित्यवीर्य, गां वेदलक्षणां वाणीं विन्दयते इति गोविन्दः तस्य सम्बोधने हे गोविन्द ! गोपवनिताव्रजभृत्यगीततीर्थश्रवः गोपवनितानां व्रजैः समूहैः भृत्यैः श्रीनारदादिभिश्च गीतं तीर्थभूतं श्रवः कीर्त्तिर्यस्य हे श्रवणमङ्गल ! श्रवणमेव मङ्गलं यस्य स तथाभूत ! भृत्यान् पाहि रक्ष ॥ २५ ॥

महापुरुषस्य वैराजस्य इदं लक्षणमङ्गोपाङ्गादिरूपम् कल्ये उषःकाले उत्थाय अथवा गुहाशयम् सर्वान्तरात्मानं ब्रह्म बृहत्स्वरूपगुणादिकं भगवन्तम् परवासुदेवं विश्वकारणं द्विजऋषभेति श्लोकद्वयोक्तं वेद ॥ २६ ॥

पञ्चमस्कन्धे श्रीशुकेन संक्षेपत उक्तं सूतमुखाच्छ्रुतमपि मूर्त्तिव्यूहप्रसङ्गेन सूर्यव्यूहं विस्तरतो बुभुत्सुः पृच्छति-शुक इति द्वाभ्याम् । पञ्चमस्कन्धे "तथा मन्यं च ऋषयो गन्धर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः सप्त" इत्यादिना शुकोक्तं यत् यमाह स सौरः सूर्यसम्बन्धी गणः सप्तकः सूर्यादिसप्तानां समूहः मासिमासि नाना पृथक् वसति ॥ २७ ॥

तेषामधीश्वरैस्तत्तद्गणमुख्यैः सूर्यैः सहयुक्तानां स्वे स्वे कर्मणि योजितानां नामानि कर्माणि च ब्रूहि सूर्यात्मनः सूर्यरूपांशात्मना स्थितस्य व्यूहं विभागं च ब्रूहि ॥ २८ ॥

तत्र व्यूहतोऽपि सूर्यस्वरूपनिरूपणपूर्वकमाह—अनादीत्यादिना । सर्वदेहिनामात्मनो विष्णोरेवायमंशभूतः सूर्यः, ननु अंशभूतस्य क्षेत्रज्ञमात्रस्य कथं लोकप्रकाशकत्वम्?तत्राह-अनाद्यविद्यया अनादिकर्मप्रवाहरूपया "अविद्याकर्मसंज्ञान्या तृतीया शक्तिरिष्यते" इति श्रुतिप्रसिद्धया निर्मितः अतः लोकतन्त्रो लोकयात्रानिर्वाहकः सन् लोकेषु परिभ्रमति लोकान्प्रकाशयतीत्यर्थः ॥ २९ ॥

आदिकृत् विश्वकर्ता लोकानां चेतनाचेतनानामात्मा हरिरेवैकोऽशात्मना सूर्यः सन् सर्ववैदिकक्रियाणां प्रातरादिकालद्वारा-मूलभूतः ऋषिभिर्बहुधा द्वादशधोदितः कथितः ॥ ३० ॥

न चैकः सूर्य एव द्वादशात्मकः सर्वकालादिकं द्वादशात्मकमेवेत्याह-काल इति । मायया इत्युपलक्षणं चेतनाचेतनभूतानां शक्तीनां चेतनाचेतनभूताभिः शक्तिभिः कालादिरूपं नवधा हरिरेवोक्तः तत्र कालः प्रातरादिः देशः समादिः "समे यजेत" इति वचनात् क्रिया अनुष्ठानम् कर्ता ब्राह्मणादिः कारणं स्रुवादि कार्यं यागादि आगमः मन्त्रादिः द्रव्यं व्रीह्यादि फल स्वर्गादि ॥ ३१ ॥

विवक्षितमाह—मध्वादिष्विति । कालं प्रातरादिकरूपवतीति कालरूपं सूर्यंतत्र धृष्णोति भगवान् इति कालरूपधृक् भगवान् सूर्यात्मा हरिः मध्वादिषु चैत्रादिद्वादशसु मासेषु स्वात्मकैः द्वादशभिर्गणैः पृथक् पृथक् लोकतन्त्राय लोकयात्रानिर्वाहाय चरति ॥ ३२ ॥

भाषा टीका ।

हे श्रीकृष्ण ! हे अर्जुन के सखा ! हे यदूत्तम ! हे पृथिवी के द्रोही दुष्ट राजाओं के वंश की आग ! हे अमित वीर्य वाले ! हे गोविन्द ! हे गोप वनिता और व्रज के दासोंसे गान होने लायक पवित्र कीर्ति वाले ! हे श्रवण में मंगल रूप ! आप हम सब भृत्यों की रक्षा करो ॥ २५ ॥

जो पुरुष प्रातः काल में उठ कर परम पुरुष में चित्त लगा कर इस महा पुरुष के लक्षणों को पवित्र होकर जपे वह अन्तर्यामि ब्रह्म के स्वरूप का ज्ञान वाला होवे ॥ २६ ॥

शौनक उवाच ।

शौनक ऋषि बोले, कि—हे सूत जी ! भगवान् श्रीशुकाचार्य ने सुनते हुए विष्णु रात राजा परीक्षित के लिये, मास मास में सूर्य के समीप रहने वाले ऋषि गन्धर्व अप्सरा, नाग, यक्ष, राक्षस, देवता, इन सातों का समुदाय कहा है ॥ २७ ॥

तिनके नाम और कर्म सर्वेश्वर श्रीसूर्य के संयुतों के कहो ! क्योंकि ? सूर्यात्मक श्रीहरि के व्यूह श्रवण करने में हम लोगों की बड़ी श्रद्धा है ॥ २८ ॥

सूत उवाच ।

सूत जी बोले, कि—श्रीविष्णु की अनादि माया से निर्मित होकर सब देह धारियों के लोक यात्रा के निर्वाह के लिये ये यह सातों का समुदाय लोकों में परिवर्तन होता है ॥ २९ ॥

सूर्यात्मक श्रीहरि सब लोकों के एक ही आत्मा हैं सब वेद क्रियाओं के मूल हैं, और ऋषियों ने बहु प्रकार गाये हैं ॥ ३० ॥

काल देश क्रिया कर्त्ता करण कार्य आगम द्रव्य और फल में श्रीहरि के माया कृत नव भेद हैं ॥ ३१ ॥

काल रूप धारण करने वाले भगवान् सूर्यात्मक श्रीहरि इस लोक तन्त्र के चलाने को चैत्र से आदि लेकर, द्वादश मासों में पृथक् २ द्वादश गणों से विचरते हैं ॥ ३२ ॥

धाता कृतस्थली हेतिर्वासुकी रथकृन्मुने ! ।
पुलस्त्यस्तुम्बुरुरिति मधुमासं नयन्त्यमी ॥ ३३ ॥
अर्यमा पुलहोऽथौजाः प्रहेतिः पुञ्जिकस्थली ।
नारदः कच्छनीरश्च नयन्त्येते स्म माधवम् ॥ ३४ ॥
मित्रोऽत्रिः पौरुषेयोऽथ तक्षको मेनका हहाः ।
रथस्वन इति ह्येते शुक्रमासं नयन्त्यमी ॥ ३५ ॥
वसिष्ठो वरुणो रम्भा सहजन्यस्तथा हुहूः ।
शुक्रश्चित्रस्वनश्चैव शुचिमासं नयन्त्यमी ॥ ३६ ॥
इन्द्रो विश्वावसुः श्रोता एलापत्रस्तथाऽङ्गिराः ।
प्रम्लोचा राक्षसो [1] वर्यो नभोमासं नयन्त्यमी ॥ ३७ ॥
विवस्वानुग्रसेनश्च व्याघ्र आसारणो भृगुः ।
अनुम्लोचा शङ्खपालो नभस्याख्यं नयन्त्यमी ॥ ३८ ॥
पूषा धनञ्जयो वातः सुषेणः सुरुचिस्तथा ।
घृताची गौतमश्चेति तपोमासं नयन्त्यमी ॥ ३९ ॥
क्रतुर्वर्चा भरद्वाजः पर्जन्यः सेनजित्तथा ।
विश्व ऐरावतश्चैव तपस्याख्यं नयन्त्यमी ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

नामेव गणानाह-धातेति द्वादशभिः । धाता सूर्यः कृतस्थली अप्सराः हेती राक्षसः वासुकिर्नागः रथकृद्यक्षः पुलस्त्य ऋषिः तुम्बुरुर्गन्धर्वः मधुमासं चैत्रं नयन्त्यनुवर्तयन्ति ॥ ३३ ॥

अथौजा [illegible] राक्षसः नारदो गन्धर्वः कच्छनीरो नागः माध[illegible] ॥

मित्र[illegible] राक्षसः रथस्वनो यक्षः शुक्रमासं ज्येष्ठम् ॥ ३५ ॥

वरुणः [illegible] रम्भो यक्षः शुक्रो नाम नागः चित्रस्वनो राक्षसः शुचि[illegible] ॥ ३६ ॥

इन्द्रः सू[illegible] वसुर्गन्धर्वः श्रोता यक्षः एलापत्रो नागः वर्यो राक्षस [illegible] श्रावणाख्यं नभो मासम् श्रावणम् ॥ ३७ ॥

विवस्वा[illegible] गन्धर्वः व्याघ्रो राक्षसः आसारणो यक्षः शङ्खपा[illegible] नभस्य यं भाद्रपदम् ॥ ३८ ॥

धनञ्जयो[illegible] राक्षसः सुषेणो गन्धर्व सुरुचिर्यक्षः तपोमासं माघ[illegible] क्रमोक्तादित्यानुक्रमानुसारेण वैष्णवे तु मा[illegible] विशामव्यत्ययस्तु कल्पभेदेनेति ज्ञेयम् ॥ ३९ ॥

क्रतुर्यक्षः वर्चा राक्षसः पर्जन्यः सूर्यः सेनजिदप्सराः विश्वो गन्धर्वः ऐरावतो नागः तपस्याख्यं फाल्गुनम् ॥ ४० ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

धाता आदित्यः कृतस्थली अप्सरा हेतीराक्षसः वासुकिः भुजङ्गः रथकृत् यक्षः पुलस्त्यः ऋषिः तुम्बरुः गन्धर्वः ॥ ३३ ॥

अथौजा यक्षः प्रहेती राक्षसः नारद ऋषिर्गायकश्च कच्छनीरो नागः ॥ ३४ ॥

अत्रिः ऋषिः पौरुषेयो राक्षसः तक्षको नागः हाहा-गन्धर्वः रथस्वनो यक्षः ॥ ३५ ॥

वरुण आदित्यः सहजन्यशुक्रौ यक्षराक्षसौ चित्रस्वनः गन्धर्वः ॥ ३६ ॥

इन्द्र आदित्यः विश्वावसुर्गन्धर्वः श्रोता यक्षः एलापत्रः नागः ॥ ३७ ॥

उग्रसेनव्याघ्रौ यक्षराक्षसौ ३८ ॥

पूषा सूर्यः धनञ्जयो नागः सुषेणो यक्षः सुरुचिर्गन्धर्वः वातो राक्षसः ॥ ३९ ॥

वर्चा आदित्यः पर्जन्यो गन्धर्वः सेनजिद्राक्षसः ऐरावतो नागः॥४०॥

---

(१) वर्य इति [illegible] पा० ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

के पुनस्ते प्रतिगणं समागच्छन्ति इत्यत्राह—धातेत्यादिना, धाता आदित्यः कृतस्थली अप्सराः हेती राक्षसः वासुकिः भुजङ्गः रथकृद्यक्षः हे मुने, शौनक ! पुलस्त्य ऋषिः तुम्बुरुर्गन्धर्वः इत्येते सप्त मधुमासं चैत्रमासं नयन्ति स्वस्वकर्मभिः सूर्यं गमयन्तीत्यर्थः । मधुमासमित्यत्यन्तसंयोगे द्वितीया एवमग्रेऽपि ज्ञेयम् ॥ ३३ ॥

अर्यमेति । अर्यमा सूर्यः पुलह ऋषिः रथौजाः यक्षः प्रहेतिः राक्षसः पुञ्जिकस्थली अप्सराः नारदो यक्षः [गन्धर्वः] कच्छनीरो नागः एते माधवम् वैशाखमासम् ॥ ३४ ॥

मित्रः सूर्यः अत्रिः ऋषिः पौरुषेयो राक्षसः तक्षको नागः मेनका अप्सराः हाहाः गन्धर्वः रथस्वनो यक्षः शुक्रमासं ज्येष्ठमासम् ॥ ३५ ॥

वसिष्ठः ऋषिः वरुणः सूर्यः रम्भा अप्सराः सहजन्यो यक्षः हूहूर्गन्धर्वः शुक्रो नागः चित्रस्वनो राक्षसः शुचिमासम् आषाढमासम् ॥ ३६ ॥

इन्द्रः सूर्यः विश्वावसुर्गन्धर्वः श्रोता यक्षः एला[प]पुत्रो नागः अङ्गिरा ऋषिः प्रम्लोचा अप्सराः वर्यो राक्षसः नभोमासम् श्रावणमासम् ॥ ३७ ॥

विवस्वान् सूर्यः उग्रसेनो गन्धर्वः व्याघ्रो राक्षसः आसारणो यक्षः भृगुः ऋषिः अनुम्लोचा अप्सराः शङ्खपालो नागः नभस्याख्यम् भाद्रपदं मासम् ॥ ३८ ॥

पूषा सूर्यः धनञ्जयो नागः वातो राक्षसः सुषेणो गन्धर्वः सुरुचिर्यक्षः घृताची अप्सराः गौतम ऋषिः तपोमासं माघमासं मासक्रमविलङ्घनं तु कूर्मोक्तादित्यक्रमानुसारेण । यद्वा, मासक्रमो न विवक्षितः यथा गणानाम् अत्रत्वाऽर्थक्रमानुरोधेन ...र्यादिश्लोकद्वय, तदनन्तरश्लोकद्वयात्परतो योज्यं त्वष्ट्रादि- ...श्लोकद्वयं तु तत्पूर्वश्लोकद्वयात्पूर्वं योज्यम् ॥ ३९ ॥

ऋतुवर्चा राक्षसः भरद्वाजः ऋषिः पर्जन्यः सूर्यः सेनजित् अप्सराः विश्वा गन्धर्वः ऐरावतो नागः तपस्याख्यं फाल्गुनं मासम् ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इदानीं तेषां नामान्याह—धातेत्यादिना । धाता सूर्यः कृतस्थली अप्सराः हेतीराक्षसः वासुकिर्नागः रथकृद्यक्षः पुलस्त्यः ऋषिः तुम्बुरुर्गन्धर्वः अमी धात्रादयो मधुमासं नयन्ति ते तत्तत्क्रिया-प्रवर्तकत्वेन तन्मासमभि... ॥ ३३ ॥

अर्यमा सूर्यः पुलहः ... रथौजाः यक्षः प्रहेतीराक्षसः पुञ्जिकस्थली अप्सराः ... गन्धर्वः कच्छनीरो नागः एते माधवमासाधिपतिं माधव... नयन्ति शरणं प्राप्योपासते एवमुत्तरत्राप्यनुसन्धेयम् ॥

मित्रः सूर्यः अत्रिः ऋषिः पौरुषेयो राक्षसः तक्षको नागः मेनका अप्सराः हाहा गन्धर्वः ...रथस्वनो यक्षः ॥ ३५ ॥

वसिष्ठ ऋषिः वरुणः सू... अप्सराः सहजन्यो राक्षसः हूहूर्गन्धर्वः शुक्रो नागः चि... ॥ ३६ ॥

इन्द्रः सूर्यः विश्वावसुर्गन्धर्वः श्रोता यक्षः एलापत्रो नागः अङ्गिरा ऋषिः प्रम्लोचा अप्सराः वर्यो नाम राक्षसः ॥ ३७ ॥

विवस्वानादित्यः उग्रसेनो गन्धर्वः व्याघ्रो राक्षसः आसारणो यक्षस्तथा भृगुऋषिः अनुम्लोचा अप्सराः शङ्खपालो नागः ॥ ३८ ॥

पूषा आदित्यः धनञ्जयो नागः वातो राक्षसः सुषेणस्तथा सुरुचिर्गन्धर्वः घृताच्यप्सराः गौतम ऋषिः ॥ ३९ ॥

ऋतुरप्सराः वर्चा गन्धर्वः भरद्वाज ऋषिः पर्जन्य आदित्यः सेनजित्तथा विश्वो राक्षसः ऐरावतो नागः ॥ ४० ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सौरो गणो मासि मासीति यत् पृष्टं तत्र प्रथमश्चैत्रमासस्य गणमाह-धाता सूर्यः कृतस्थली अप्सराः हेतिः राक्षसः वासुकिर्नागः रथकृत् यक्षः पुलस्त्यः ऋषिः तुम्बुरुर्गन्धर्वः ॥ ३३ ॥

अर्यमा सूर्यः पुलह ऋषिः अथौजा यक्षः प्रहेती राक्षसः पुञ्जिकस्थली अप्सराः नारदो गन्धर्वः कच्छनीरो नागः माधवं वैशाखम् ॥ ३४ ॥

मित्रः सूर्यः अत्रिर्मुनिः पौरुषेयो राक्षसः तक्षको नागः मेनका अप्सरा हाहा गन्धर्वः रथस्वनो यक्षः शुक्रमासं ज्येष्ठम् ॥ ३५ ॥

वसिष्ठो मुनिः वरुणः सूर्यः रम्भा अप्सराः सहजन्यो राक्षसः हूहूर्गन्धर्वः शुक्रो नागः चित्रस्वनो यक्षः शुचिमासं आषाढम् ॥ ३६ ॥

इन्द्रः सूर्यः विश्वावसुर्गन्धर्वः श्रोता यक्षः एलापत्रो नागः अङ्गिरा मुनिः प्रम्लोचा अप्सराः वर्यो राक्षस इति गणोऽयम् व्याख्यातं नभोमासं श्रावणम् ॥ ३७ ॥

विवस्वान् सूर्यः उग्रसेनो गन्धर्वः व्याघ्रो राक्षसः आसारणो यक्षः भृगुर्मुनिः अनुम्लोचा अप्सराः शङ्खपालो नागः नभस्याख्यं भाद्रपदम् ॥ ३८ ॥

पूषा सूर्यः धनञ्जयो नागः वातो राक्षसः सुषेणो गन्धर्वः सुरुचिर्यक्षः घृताची अप्सराः गौतमो मुनिः तपोमासं माघम् ॥ ३९ ॥

ऋतुर्वर्चा राक्षसः भरद्वाजो मुनिः पर्जन्यः सूर्यः सेनजित् अप्सराः विश्वो गन्धर्वः ऐरावतो नागः तपस्याख्यं फाल्गुनम् ॥ ४० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तानेव गणान् तेषु मासेषु विभज्य ...यन् तेषां नामानि गृहीत्वाऽऽचष्ट—धातेति द्वादशभिः । हे ...! अमी मधुमासं चैत्रमासं नयन्ति वर्तयन्ति तत्र धाता सूर्यः कृतस्थली अप्सराः हेती राक्षसः वासुकिः नागः रथकृत् यक्षः पुलस्त्य ऋषिः तुम्बुरुः गन्धर्वः ॥ ३३ ॥

एते अर्यमादयः माधवं वैशाखं नयन्ति तत्र अर्यमा सूर्यः पुलहः ऋषिः अथौजाः यक्षः प्रहेतिः राक्षसः पुञ्जिकस्थली अप्सराः नारदो गन्धर्वः कच्छनीरो नागः ॥ ३४ ॥

अमी शुक्रमासं ज्येष्ठमासं नयन्तीत्येके तान् आह—मित्रः सूर्यः अत्रिः ऋषिः पौरुषेयो राक्षसः तक्षको नागः मेनका अप्सराः हाहा गन्धर्वः रथस्वनो यक्षः इत्येते ॥ ३५ ॥

अथांशुः कश्यपस्तार्क्ष्य(१) ऋतसेनस्तथोर्वशी ।
विद्युच्छत्रुर्महाशङ्खः सहोमासं नयन्त्यमी ॥ ४१ ॥
भगः स्फूर्जोऽरिष्टनेमिरूर्णा आयुश्च पञ्चमः ।
कर्कोटकः पूर्वचित्तिः (२)पुष्यमासं नयन्त्यमी ॥ ४२ ॥
त्वष्टा ऋचीकतनयः ✻कम्बलश्च तिलोत्तमा ।
(३)ब्रह्मापेतोऽथ शतजिद्धृतराष्ट्र इषम्भराः ॥ ४३ ॥
विष्णुरश्वतरो रम्भा(४) सूर्यवर्चाश्च सत्यजित् ।
विश्वामित्रो मखापेत ऊर्जमासं नयन्त्यमी ॥ ४४ ॥
एता भगवतो विष्णोरादित्यस्य विभूतयः ।
स्मरतां सन्ध्ययोर्नॄणां हरन्त्यंहो दिने दिने ॥ ४५ ॥
द्वादशस्वपि मासेषु देवोऽसौ षड्भिरस्य वै ।
चरन् समन्तात्तनुत परत्रेह च (५)सन्मतिम् ॥ ४६ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अमी वसिष्ठादयः शुचिमासमाषाढम् नयन्ति वसिष्ठ-ऋषिः वरुणः सूर्यः रम्भा अप्सराः सहजन्यो यक्षः हूहूः गन्धर्वः शुक्रो नागः चित्रस्वनो राक्षसः ॥ ३६ ॥

अमी इन्द्रादयः नभोमासं श्रावणं नयन्ति इन्द्रः सूर्यः विश्वावसुः गन्धर्वः श्रोता यक्षः एलापत्रो नागः अङ्गिरा ऋषिः प्रम्लोचा अप्सराः वर्यो राक्षसः ॥ ३७ ॥

अमी विवस्वत्प्रभृतयः नभस्याख्यं भाद्रपदं नयन्ति विवस्वान् सूर्यः उग्रसेनो गन्धर्वः व्याघ्रो राक्षसः आसारणो यक्षः भृगुः ऋषिः अनुम्लोचाः अप्सराः शङ्खपालो नागः ॥ ३८ ॥

पूषा सूर्यः धनञ्जयो नागः वातो राक्षसः सुषेणो गन्धर्वः सुरुचिर्यक्षः घृताची अप्सराः गौतम ऋषिः तपोमासं माघमासं क्रमो वा विर्वाचनः ॥ ३९ ॥

क्रतुर्यक्षः वर्चा राक्षसः भरद्वाजः ऋषि पर्जन्यः सूर्यः सेनजित् अप्सराः विश्वो गन्धर्वः ऐरावतो नागः तपस्याख्यं फाल्गुणम् ॥ ४० ॥

भाषा टीका ।

तहां चैत्र मास का प्रकार कहते हैं, कि—चैत्रमास को धाता सूर्य, कृतस्थली अप्सरा, हेति राक्षस, वासुकि सर्प, रथकृत् यक्ष, पुलस्त्य ऋषि, तुम्बरु गन्धर्व, ये सातों व्यतीत करते हैं अर्थात् चलाते हैं ॥ ३३ ॥

अर्यमा सूर्य, पुलह ऋषि, अथौजा यक्ष, प्रहेति राक्षस, पुञ्जिकस्थली अप्सरा, नारद गन्धर्व, कच्छनीर नाग, ये सब वैशाख मास को चलाते हैं ॥ ३४ ॥

मित्र सूर्य, अत्रि ऋषि, पौरुषेय राक्षस, तक्षक नाग, मेनका अप्सरा, हाहा गन्धर्व, रथस्वन यक्ष, इतने ज्येष्ठ मास को चलाते हैं ॥ ३५ ॥

वसिष्ठ ऋषि, वरुण सूर्य, रम्भा अप्सरा, सहजन्य यक्ष, हूहू गन्धर्व, शुक्र नाग, चित्रस्वन राक्षस, ये सब आषाढ मास को चलाते हैं ॥ ३६ ॥

इन्द्र सूर्य, विश्वावसु गन्धर्व, श्रोता यक्ष, एलापत्र नाग, अङ्गिरा ऋषि, प्रम्लोचा अप्सरा, वर्य राक्षस, इतने श्रावण मास को व्यतीत करते हैं ॥ ३७ ॥

विवस्वान् सूर्य, उग्रसेन गंधर्व, व्याघ्र राक्षस, आसारण यक्ष, भृगु ऋषि, अनुम्लोचा अप्सरा, शंखपाल नाग ये सब भाद्रपद मास को चलाते हैं ॥ ३८ ॥

पूषा सूर्य, धनंजय नाग, वात राक्षस, सुषेण गन्धर्व, सुरुचि यक्ष, घृताची अप्सरा, गौतम ऋषि, ये सब माघ मास को चलाते हैं, यहां मास के कथन का व्यति क्रम है ॥ ३९ ॥

क्रतु यक्ष, वर्चा राक्षस, भरद्वाज ऋषि, पर्जन्य सूर्य, सेनजित् अप्सरा, विश्व गन्धर्व, ऐरावत नाग, ये सब फाल्गुनमास को चलाते हैं ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अंशुः सूर्यः अंश इति वा पाठः तार्क्ष्यो यक्षः ऋतसेनो गन्धर्वः विद्युच्छत्रू राक्षसः महाशङ्खो नागः सहोमासम् मार्गशीर्षम् ॥ ४१ ॥

(१) धृतसेनः (२) सहस्यमासम् (३) मखरातः (४) सूर्यवर्चाश्चसत्यकौ इत्येते विज० पाठाः । ✻कम्बलाश्च इति (५) सद्गतिम् इति च वीर० पा०

सामर्ग्यजुर्भिस्तल्लिङ्गैर्ऋषयः संस्तुवन्त्यमुम् ।
गन्धर्वास्तं प्रगायन्ति नृत्यन्त्यप्सरसोऽग्रतः ॥ ४७ ॥
उन्नह्यन्ति रथं नागा ग्रामण्यो रथयोजकाः ।
चोदयन्ति रथं पृष्ठे नैर्ऋता बलशालिनः ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भगः सूर्यः स्फूर्जो राक्षसः अरिष्टनेमिर्गन्धर्वः ऊर्णा यक्षः आयुर्ऋषिः कर्कोटको नागः ॥ ४२ ॥

त्वष्टा सूर्यः ऋचीकतनयो जमदग्निः कम्बलो नागः ब्रह्मापेतो राक्षसः शतजिद्यक्षः धृतराष्ट्रो गन्धर्वः इषम्भरा आश्विनपालकाः ॥ ४३ ॥

विष्णुरादित्यः अश्वतरो नागः सूर्यवर्चा गन्धर्वः सत्यजिद्यक्षः मखापेतो राक्षसः ऊर्जमासं कार्त्तिकमासम् ॥ ४४ ॥

एते चादित्यादयः कौर्मे विभज्योक्ताः—

"धाताऽर्यमा च मित्रश्च वरुणश्चेन्द्र एव च ।
विवस्वानथ पूषा च पर्जन्यश्चांशुरेव च ॥
भगस्त्वष्टा च विष्णुश्च आदित्या द्वादश स्मृताः ।
पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोऽथाङ्गिरा भृगुः ॥
गौतमोऽथ भरद्वाजः कश्यपः क्रतुरेव च ।
जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः ॥
रथकृच्चोऽरिष्टनेमिर्ग्रामणीश्च रथस्वनः ।
रथचित्रस्वनः श्रोता अरुणः सेनजित्तथा ॥
तार्क्ष्यश्चारिष्टनेमिश्च शतजित्सत्यजित्तथा ।

एते यक्षाः—

अथ हेतिः प्रहेतिश्च पौरुषेयो वधस्तथा ।
वर्यो व्याघ्रस्तथाऽऽपश्च वायुर्विद्युद्दिवाकरः ॥
ब्रह्मापेतश्च विप्रेन्द्र ! यज्ञापेतश्च राक्षसः ।
वासुकिः कङ्कनीरश्च तक्षकः सर्पपुङ्गवः ॥
एलापत्रः शङ्खपालस्तथैरावतसंज्ञितः ।
धनञ्जयो महापद्मस्तथा कर्कोटको द्विजाः ॥
कम्बलोऽश्वतरश्चैव वहन्त्येनं यथाक्रमम् ।
तुम्बुरुर्नारदो हाहा हूहूर्विश्वावसुस्तथा ॥
उग्रसेनो वसुरुचिर्विश्वावसुरथापरः ।
चित्रसेनस्तथोर्णायुर्धृतराष्ट्रो द्विजोत्तमाः ॥
सूर्यवर्चा द्वादशैते गन्धर्वा गायतां वराः ।
कृतस्थलाप्सरो वर्या तथाऽन्या पुञ्जिकस्थली ॥
मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमाः ।
अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा ॥
अन्या च पूर्वचित्तिः स्यादन्या चैव तिलोत्तमा ।
रम्भा चेति द्विजश्रेष्ठास्तथैवाप्सरसः स्मृताः "॥

इति ॥ ४५ ॥

एतेषां पृथक्कर्माणि निरूपयन्ति—द्वादशस्वपीति त्रिभिः । असौ देवः सूर्यः षड्भिर्गन्धर्वादिभिरन्वय जनस्य समन्ताच्चरन् इमां मतिं तनुते गायद्भ्योऽनेन सूचितः ॥ ४६ ॥

तालुङ्कैः सूर्यप्रकाशकैः ॥ ४७ ॥

उन्नह्यन्ति दृढं बध्नन्ति ग्रामण्यो यक्षाः नैर्ऋता राक्षसाः ॥ ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

तार्क्ष्यो यक्षः कृतसेनो गन्धर्वः ॥ ४१ ॥

स्फूर्जो राक्षसः अरिष्टनेमिः यक्षः ऊर्णा गन्धर्वः पूर्वचित्तिः देवस्त्री ॥ ४२ ॥

त्वष्टा आदित्यः कम्बलाख्यो नागः ब्रह्मापेतो राक्षसः शतजित् यक्षः धृतराष्ट्रो गन्धर्वः इषम्भराः इषमासनिर्वाहकाः ॥ ४३ ॥

विष्णुरादित्यः अश्वतरो नागः सत्यजित् यक्षः मखापेतो राक्षसः ॥ ४४—५० ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अंशुमान् सूर्यः कश्यप ऋषिः तार्क्ष्यो यक्षः ऋतुसेनो गन्धर्वः ऊर्वशी अप्सराः विद्युच्छत्रुः राक्षसः महाशङ्खो नागः सहोमासं मार्गशीर्षं नयन्ति ॥ ४१ ॥

भगः सूर्यः स्फूर्जो राक्षसः अरिष्टनेमिः गन्धर्वः ऊर्णो यक्षः आयुः ऋषिः कर्कोटको नागः पूर्वचित्तिः अप्सराः पुष्यमासं पौषमासं नयन्ति ॥ ४२ ॥

त्वष्टा सूर्यः ऋचीकतनयः जमदग्निः ऋषिः कम्बलाख्यो नागः तिलोत्तमा अप्सराः ब्रह्मापेतो राक्षसः शतजिद्यक्षः धृतराष्ट्रो गन्धर्वः इषम्भराः एते आश्विनमासनिर्वाहकाः ॥ ४३ ॥

विष्णुरादित्यः अश्वतरो नागः रम्भा अप्सराः सूर्यवर्चा गन्धर्वः सत्यजित् यक्षः विश्वामित्रः ऋषिः मखापेतो राक्षसः ऊर्जमासं कार्त्तिकमासं नयन्ति ॥ ४४ ॥

अथ व्यूहसमूह[निरूपणा]मुपसंहरन् तत्स्मरणफलमाह—एता इति । हे विप्र ! आदित्यस्वरूपिणो भगवत एताः समाख्याताः विभूतयः ताः सन्ध्ययोः स्मरतां नृणामंहः पापं हरन्ति ॥ ४५ ॥

अथैषां प्रत्यक्कर्माण्याह त्रिभिः—द्वादशस्वपीति । अथादित्यरूपो देवः द्वादशस्वपि मासेषु पर्यायशः षड्भिः प्रतिमासमादित्येन विना षड्गणस्थानि षड्भिरित्युक्तम् । तेन सह सप्त भवन्तीति तदभिप्रायेण "मासाद्वहति सप्तकः" इत्युक्तं पूर्वस्मात् । बहु, बालखिल्यगणेन सह सप्तसमानि तेन विनाऽत्र षड्भिरित्युक्तं प्रतिगणमादित्यकीर्त्तनं तु नामसंकीर्त्तनतया प्राधान्यविवक्षया वा

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

निग्रहान्तरेण स्वान्तरात्मभूतभगवद्रूपात्मकत्वचिन्तनया सेवितिमा-मनीय समस्तात्पातकभरम् सवर्त जनस्य इह लोके परत्र च लोके सद्गतिं शुभां गतिं तनुते सम्पातिमिति पाठे इहामुत्र श्रेयोविषयां मतिं तनुत इत्यर्थः ॥ ४६ ॥

सामभिः ऋग्भिः यजुर्भिश्च तल्लिङ्गैः सूर्यप्रकाशकैरमुं सूर्यमृषयः स्तुवन्ति ॥ ४७ ॥

नागाः रथमुपनह्यन्ति दृढं बध्नन्ति ग्रामण्यो यक्षाः नैर्ऋताः राक्षसाः पृष्ठे पश्चाद्रथं नोदयन्ति गमयन्ति प्रेरयन्ति ॥ ४८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

अंशुरादित्यः कश्यप ऋषिः तार्क्ष्यस्तथा ऋतसेनो गन्धर्वः उर्वशी अप्सराः विद्युच्छत्रुः राक्षसः महाशङ्खो नागः ॥ ४१ ॥

भग आदित्यः स्फूर्जो राक्षसः अरिष्टनेमिस्तथा ऊर्णो गन्धर्वः आयुस्तथा कर्कोटको नागः पूर्वचित्तिरप्सराः ॥ ४२ ॥

त्वष्टा आदित्यः ऋचीकतनयो राक्षसः कम्बलाख्यो नागः तिलोत्तमाऽप्सराः ब्रह्मापेत ऋषिः शतजित्तथा धृतराष्ट्रो गन्धर्वः इषं बिभ्रतीति इषम्भराः इषमासप्रवर्तकाः इत्यर्थः ॥ ४३ ॥

विष्णुरादित्यः अश्वतरो नागः रम्भाऽप्सराः सूर्यवर्चा गन्धर्वः अश्वो राक्षसः सत्यकस्तथा विश्वामित्र ऋषिः ॥ ४४ ॥

उपसंहरंस्तत्कथनप्रयोजनमाह—एता इति । आदित्यान्तर्यामिणो हरेः "ध्येयः सदा सवितृमण्डलमध्यवर्ती" इति वचनमत्र प्रमाणम् ॥ ४५ ॥

एतदभिप्रेत्य पुनरपि लोकद्वयोपभोग्यफलमाह—द्वादशास्विति । द्वादशसु मासेषु षड्भिर्गणैर्धात्रादिरूपैः षट्सङ्ख्यकैरनुपतैः सह समस्तात्सरन् देवोऽस्य सेवकस्येह परत्र च सन्मतिं निर्दुःखसुखानन्दानुभवलक्षणां तनुते यथायोग्यं वितृत्य ददातीत्यर्थः ॥ ४६ ॥

इदानीं तेषां कर्माण्याह—सामेति । सामर्ग्यजुर्भिस्तल्लिङ्गैस्तल्लक्षणैस्तत्सम्बन्धिभिर्वेदैः उपह्नयन्ति सम्यक्कीर्तयन्ति ग्रामण्यस्तथाद्याः नैर्ऋता राक्षसाः ॥ ४७ ॥ ४८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अंशु सूर्यः अंशः इति च पाठः कश्यपो मुनिःतार्क्ष्यो यक्षः ऋतसेनो गन्धर्वः उर्वशी अप्सराः विद्युच्छत्रू राक्षसः महाशङ्खो नागः सहोमासं मार्गशीर्षम् ॥ ४१ ॥

भगः सूर्यः स्फूर्जो राक्षसः अरिष्टनेमिर्गन्धर्वः ऊर्णो यक्षः आयुर्मुनिः कर्कोटको नागः पूर्वचित्तिरप्सराः पुष्यं पौषम् ॥ ४२ ॥

त्वष्टा सूर्यः ऋचीकतनयो जमदग्निर्मुनिः कम्बलाश्वो नागः तिलोत्तमा अप्सराः ब्रह्मापेतो राक्षसः शतजित् यक्षः धृतराष्ट्रो गन्धर्वः इषम्भरा एते आश्विनपालकाः ॥ ४३ ॥

विष्णुः सूर्यः अश्वतरो नागः रम्भा अप्सराः सूर्यवर्चा गन्धर्वः सत्यजित् यक्षः मखापेतो राक्षसः ऊर्जमासं कार्तिकम् ॥ ४४—४५ ॥

असौ देवः सूर्यः षड्भिर्गन्धर्वादिभिः स्वविभूतिभिः सह ॥ ४६ ॥

एतेषां पृथक्कर्माणि निरूपयति—सामेति । तल्लिङ्गैः सूर्यप्रकाशकैः ॥ ४७ ॥

उपनह्यन्ति दृढं बध्नन्ति ग्रामण्यो यक्षाः रथं योजयन्ति चोदयन्ति बलेन नोदनैश्चालयन्ति नैर्ऋताः राक्षसाः ॥ ४८—४९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अंशः सूर्यः कश्यप ऋषिः तार्क्ष्यो यक्षः ऋतसेनो गन्धर्वः उर्वशी अप्सराः विद्युच्छत्रुः राक्षसः महाशङ्खो नागः सहोमासं मार्गशीर्षम् ॥ ४१ ॥

भगः सूर्यः स्फूर्जो राक्षसः अरिष्टनेमिः गन्धर्वः ऊर्णो यक्षः आयुः ऋषिः कर्कोटको नागः पूर्वचित्तिरप्सराः पुष्यमासं पौषमासम् ॥ ४२ ॥

त्वष्टा सूर्यः ऋचीकतनयो जमदग्निः ऋषिः कम्बलाश्वो नागः तिलोत्तमा अप्सराः ब्रह्मापेतो राक्षसः शतजित् यक्षः धृतराष्ट्रो गन्धर्वः इषम्भराः आश्विनपालकाः ॥ ४३ ॥

विष्णुः सूर्यः अश्वतरो नागः रम्भा अप्सराः सूर्यवर्चा गन्धर्वः सत्यजित् यक्षः विश्वामित्रः ऋषिः मखापेतो राक्षसः ऊर्जमासं कार्तिकमासम् ॥ ४४ ॥

सूर्यव्यूहस्मरणफलं दर्शयति—एता इति । विष्णोः आदित्यस्य आदित्याख्यस्य सूर्यान्तरात्मन इति फलितोऽर्थः ॥ ४५ ॥

कर्माणि गृहीत्वकर्मात्मानमाह—द्वादशस्विति त्रिभिः । असौ विष्णुः षड्भिः ऋष्यादिभिः सह द्वादशसु मासेषु पृथक् पृथक् धात्रादिसूर्यात्मना चरन् अस्य जनस्य इह परत्र च विपदं सन्मतिं तनुते ॥ ४६ ॥

अमुं सूर्यरूपं विष्णुम् ॥ ४७ ॥

नागा वासुक्यादयः रथमुपनह्यन्ति दृढं बध्नन्ति ग्रामण्यो यक्षाः नैर्ऋता राक्षसाः ॥ ४८ ॥

भाषाटीका ।

अंशु सूर्य, कश्यप ऋषि, तार्क्ष्य यक्ष, ऋतसेन गन्धर्व, उर्वशी अप्सरा, विद्युत्शत्रु राक्षस, महाशंख नाग, ये सब मार्गशीर्ष मास को चलाते हैं ॥ ४१ ॥

भग सूर्य, स्फूर्ज राक्षस, अरिष्टनेमि गंधर्व, ऊर्ण यक्ष, आयु ऋषि, कर्कोटक नाग, पूर्वचित्ति अप्सरा, ये सब पूष मास को चलाते हैं ॥ ४२ ॥

त्वष्टा सूर्य, जमदग्नि ऋषि, कंबलाश्व नाग, तिलोत्तमा अप्सरा, ब्रह्मापेत राक्षस, शतजित यक्ष, धृतराष्ट्र गन्धर्व, ये सब आश्विन मास के निर्वाहक हैं ॥ ४३ ॥

विष्णु सूर्य, अश्वतर नाग, रंभा अप्सरा, सूर्यवर्चा गन्धर्व, सत्यजित् यक्ष, विश्वामित्र ऋषि, मखापेत राक्षस, ये सब कार्तिक मास को चलाते हैं ॥ ४४ ॥

ये सब आदित्यान्तर्यामी श्रीविष्णु भगवान् की विभूति हैं, ये सब दोनों संध्याओं में स्मरण करने वाले म[illegible] के रात दिन के पापों का हरण करलेते हैं ॥ ४५ ॥

वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोऽमलाः ।
पुरतोऽभिमुखं यान्ति स्तुवन्ति स्तुतिभिर्विभुम् ॥ ४९ ॥
एवं ह्यनादिनिधनो भगवान् हरिरीश्वरः ।
कल्पे कल्पे स्वमात्मानं व्यूह्य [1]लोकानवत्यजः ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वादशस्कन्धे आदित्यव्यूहविवरणं नाम
एकादशोऽध्यायः ॥ ११ ॥

भाषा टीका ।

साठहजार महात्माओं के विषे ये श्री सूर्य देव आपसे व्यतिरिक्त गन्धर्वादिकों के साथ चारों तरफ विचरते हुए, परलोक और इस लोक में सुन्दर मति का विस्तार करते हैं ॥४६॥

अब साथ में जाने वाले ऋषि प्रभृतियों का कार्य कहते हैं, कि—ऋषि लोग साम ऋग और यजुः के जो ये देव के प्रकाशक अर्थात् प्रति पादक मंत्र हैं, तिनसे श्रीसूर्य देवकी स्तुति करते हैं । गन्धर्व लोग गान करते हैं, अप्सरा आगे में नृत्य करा करती हैं ॥ ४७ ॥

नाग लोग रथ को बांधते हैं, यक्ष लोग रथ को जोड़ते हैं, और बलशाली राक्षस लोग पिछले भाग से रथ को चलाते हैं ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

किञ्च, वालखिल्या इति एवं प्रतिमासं त एव स्तुवन्ति विभुं सूर्यम् ॥ ४९ ॥
व्यूह्य विभज्य ॥ ५० ॥
इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

इति श्रीमद्भागवतव्याख्याने द्वादशस्कन्धीये
श्रीसुदर्शनसूरिकृतशुकपक्षीये
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

वालखिल्या इति । पुरतोऽभिमुखं सूर्यमावृत्य स्थित्वा तेन सह यान्ति गच्छन्ति सूर्यं स्तुवन्ति स्तुतिं कुर्वन्ति चेत्यर्थः ॥ ४९ ॥

उपसंहरति—एवमिति । अनादिनिधन आद्यन्तरहितः नित्यो यो भगवानित्थं प्रतिकल्पं स्वमात्मानं प्रकृतिपुरुषशरीरकं स्वमात्मानं व्यूह्य द्वादशगणरूपेण विभज्य लोकानवति तं तं कर्माणि प्रवर्त्तयति ॥ ५० ॥
इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

एवं गणगणमन्तरेणाप्येषि सन्तीत्याह—वालखिल्या इति ॥ ४९ ॥
अध्यायार्थमुपसंहरति—एवमिति । अवति आवर्त्तयति ॥ ५० ॥
इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
एकादशोऽध्यायः ॥ ११ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
एकादशोऽध्यायः ॥ ११ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

व्यूह्य विभज्य ॥ ५० ॥
इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
एकादशो द्वादशेऽत्र सङ्गतः सङ्गतः सताम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विभुं सर्वरूपं विष्णुम् ॥ ४९ ॥
उपसंहरति—एवमिति । स्वमात्मानं चिदचिच्छक्तिमन्तं विभज्य चिच्छक्तिः देवता आद्यादित्यादिरादिमभावा अचि-

(१) लोकांस्त्वपत्यज इति विज० पा० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

व्याप्तिः क्षेत्रं धात्रादिशरीरं स्वयं तयोर्नियन्ता एवम् व्यूह्य विभज्य भगवान् श्रीविष्णुर्लोकानवति ॥ ४९ ॥

धात्रादिगतक्षेत्रज्ञानाम् "स एष आदित्ये हिरण्मयः पुरुषो दृश्यते" इत्यादिश्रुत्युक्तसाक्षाद्धिरण्मयपुरुषभूतत्वात् कृतपुण्य पुञ्जत्वं सर्वपूज्यत्वादिकमस्त्येव ॥ ५० ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
एकादशाध्यायार्थप्रकाशः ॥ ११ ॥

भाषा टीका ।

अमल ब्रह्मर्षि साठ हजार बालखिल्य ऋषि, अग्र भागी मैं सम्मुख हाथ जोड़कर स्तुतियों से विभु श्रीसूर्य नारायण का स्तवन करते हैं॥ ४९ ॥

इस प्रकार अनादि निधन भगवान् ईश्वर श्रीहरि कल्प २ में अपने आत्मा का विभाग करके लोकों का पालन करते हैं ॥ ५० ॥

इति श्रीमद्भागवत द्वादशस्कन्ध में ग्यारहवें अध्याय की
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषाटीका समाप्ता ॥ ११ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे एकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः ।

——:०:——

सूत उवाच ।

नमो धर्माय महते नमः कृष्णाय वेधसे ।
ब्रह्मणेभ्यो नमस्कृत्य धर्मान् वक्ष्ये सनातनान् ॥ १ ॥
एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतम् ।
भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितम् ॥ २ ॥
अत्र सङ्कीर्तितः साक्षात् सर्वपापहरो हरिः ।
नारायणो हृषीकेशो भगवान् सात्वतां पतिः ॥ ३ ॥
(१)अत्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययम् ।
ज्ञानं च (२)तदुपाख्यानं प्रोक्तं विज्ञानसंयुतम् ॥ ४ ॥
भक्तियोगः समाख्यातो वैराग्यं च तदाश्रयम् ।
पारीक्षितमुपाख्यानं नारदाख्यानमेव च ॥ ५ ॥
प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः ।
शुकस्यैव च (३)ब्रह्मर्षेः सम्वादश्च परीक्षितः ॥ ६ ॥
योगधारणयोत्क्रान्तिः सम्वादो नारदाजयोः ।
अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः ॥ ७ ॥
विदुरोद्धवसम्वादः क्षत्तृमैत्रेययोस्ततः ।
पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

द्वादशे तु पुराणोक्तसर्वार्थानुक्रमः कृतः ।
प्रथमस्कन्धमारभ्य प्राधान्येन समासतः" ॥

तदेवास्मिन् पुराणे विस्तरेणोक्तानर्थान्संक्षेपतो वर्णयिष्यन् धर्मादीन् प्रणमति—नम इति । महते हरिभक्तिलक्षणाय ब्राह्मणेभ्यो ब्राह्मणान् सनातनान् धर्मानित्युपलक्षणं पुराणोक्तानाम् ॥ १ ॥

पुरुषस्य उचितं श्रवणादियोग्यम् ॥ २ ॥

एतत्प्रपञ्चयति—अत्रेति । भगवानैश्वर्यादिषड्गुणः साक्षात् सङ्कीर्तित इति देवताकाण्डार्थः ॥ ३ ॥

ब्रह्मकाण्डार्थमाह—अत्र ब्रह्मेति । गुह्यं निर्गुणम् प्रभवाप्ययम् प्रभवश्चाप्ययश्च यस्मादिति प्रभवम् अप्येत्यस्मिन्नित्यप्ययम् तच्च तच्च अनेनाऽऽश्रयाख्योऽर्थो दर्शितः विज्ञानम् [illegible] ज्ञानम् तदुपाख्यानं तज्ज्ञानमुपाख्यायते प्रतिपाद्यते येन तज्ज्ञानसाधनमित्यर्थः ॥ ४ ॥

कर्मकाण्डार्थमाह—भक्तियोगश्च साध्यसाधनरूपः तदाश्रयं भक्तियोगेन निष्पादितम् एवं सामान्यतो निरूपितार्थान् द्वादशस्कन्धप्रकरणार्थाननुक्रामति—पारीक्षितमुपाख्यानं परीक्षिज्जन्मादि तत्प्रस्तावाच्च नारदाख्यानञ्च ॥ ५ ॥

ब्रह्मर्षेः ब्राह्मणोत्तमस्य इति प्रथमस्कन्धार्थः ॥ ६ ॥

उत्क्रान्तिरर्चिरादिगतिः प्राधानिकः प्रधानकार्याङ्कुररूपः सर्गः अग्रत आदितो महदादिक्रमेणेत्यर्थः इति द्वितीयार्थः ॥ ७ ॥

महापुरुषस्य संस्थितिः पञ्चमे तृतीयार्थः ॥ ८ ॥

---

(१) यत्तद्ब्रह्म (२) तदुपाख्यानं (३) ब्रह्मर्षभस्य इति विज० । वीर० पा०

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

॥ १—४ ॥

अथ नारायणस्य निखिलवेदान्तवेद्यजगत्कारणपरब्रह्मत्वज्ञानाय भक्तिज्ञानां नारायणप्रबन्धमहावाक्यार्थं उक्तः अवान्तरवाक्यार्थं विशेषानाह—पारीक्षितिमिति ॥ ५—८ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

नन्वेवं कार्त्स्न्येन शान्तां बुभुत्सामालक्ष्य सुखमद्धायावितः प्रबन्धार्थान् सङ्क्षेपेणानुक्रमिष्यन् तावदस्य प्रबन्धस्य महावाक्यस्यार्थो नारायण एव वेदान्तवेद्यो जगत्कारणभूतः ब्रह्मशब्दाभिधेय इति प्रवक्तुं स्वगुरुदेवतानमस्कारपूर्वकं प्रतिजानीते—नम इति कृष्णशब्देनात्र भगवान्नारायणो बादरायणो वा विवक्षितः तत्राद्ये धर्माय नित्यरूपधर्माय कृष्णाय द्वितीये धर्मप्रवर्तकाय कृष्णाय भगवद्भक्तिलक्षणधर्माय चेति वा वेधसे ब्रह्मणे चतुर्मुखाय ब्राह्मणेभ्यो नारदबादरायणश्रीशुकादिभ्यः शाश्वताऽनाविच्छिन्नोपदेशपरम्परामाप्तान् धर्मानेतत्प्रबन्धप्रतिपाद्यान् भागवतान् धर्मान् वक्ष्यामि सङ्क्षेपेणेति शेषः ॥ १ ॥

महावाक्यार्थमाह—एतदिति । एतत्कथितं परमाद्भुतं पुराणं विष्णोश्चरितं चरित्रत्वप्रतिपादकं तद्विशिनष्टि—यत्प्रसङ्गं सर्वाङ्गः पूतः यत्र नराणां जीवानां पुरुषोचितं पुरुषत्वे मनुष्यत्वे सति उचितं श्रवणादिबोधनम् ॥ २ ॥

विष्णोश्चरित्रत्वमेवोपपादयति—अत्रेति । अत्र पुराणे श्रवणमात्रेण सर्वाणि पापानि हरतीति तथा हरिरभिहितबन्धहरः इन्द्रियाधीशः भगवान्षाड्गुण्यपरिपूर्णः भक्तपालकः श्रीनारायणः कीर्त्यते ॥ ३ ॥

तमेव विशिनष्टि—यदिति । गुह्यं वेदान्तरहस्यं जगतः प्रभवाप्ययं प्रभवत्यस्मादिति प्रभवम् अप्येत्यस्मिन्नित्यप्ययं तच्च तस्य तत्सृष्टिसंहारकारणमित्यर्थः । अथवा अवान्तरवाक्यार्थानुक्रमिष्यंस्तावत्प्रथमस्कन्धार्थानुक्रमते—द्वयेन ज्ञानमिति । अत्रेत्यनुषज्यते साधूपाख्यानं साधूनां भवतामुपाख्यानं प्रश्नात्मकमुपाख्यानं विज्ञानसंयुतं ज्ञानं च प्रोक्तं तत्र ज्ञानं प्रकृतिपुरुषविवेचनात्मकं विज्ञानं परमात्मस्वरूपगुणविचारात्मकम् ॥ ४ ॥

तत्राश्रयं भक्तियोगाङ्गं वैराग्यं च समाख्यातम् पारीक्षितं परीक्षिज्जन्मादिः नारदस्य प्रस्तावाय नारदस्याख्यानं च ॥ ५ ॥

राजर्षेः परीक्षितो विप्रशापात्प्रायोपवेशश्च व्याख्यातशब्दस्यानुषक्तस्य यथायोग्यलिङ्गेन विपरिणामस्य प्रथमान्तैः सम्बन्धः अथ द्वितीयस्कन्धार्थाननुक्रामति सार्धेन शुकस्येति । ब्रह्मर्षभस्य ब्राह्मणोत्तमस्य शुकस्य परीक्षिता सह संवाद इति कृत्स्नस्कन्धार्थः ॥ ६ ॥

तदवान्तरार्थानाह—योगधारणयेति । । उत्क्रान्तिरर्चिरादिना गतिः नारदाजयोर्नारदचतुर्मुखयोः संवादः तत्रावतारानुगीतमनुवर्णनम् अनुचरितम् इति पाठे अवतारास्तदनुचरितञ्च प्रकृतः व्यक्तिस्तुष्टः पूर्वं प्राधानिकः प्राकृतः सर्गः महदादितत्त्वसर्गः ॥ ७ ॥

अथ तार्तीयार्थाननुक्रामति—षड्भिः । विदुरोद्धवसंवाद इत्यादि तृतीयचतुरीयस्कन्धद्वयस्वरूपप्रदर्शनं पुराणात्मिका या संहिता तस्याः प्रश्नः तदर्थप्रश्नः महापुरुषस्य भगवतः संस्थितिः सम्बन्धप्रभवेऽवस्थानम् ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

उपसंहारमुखेनानुसन्धातुं द्वादशस्कन्धात्मकं भागवतार्थं संक्षिप्य कथयत्यस्मिन्नध्याये—एतद्ध इत्यादिना । एतद्विष्णोश्चरितं तद्वक्तव्यत्वे हेतुमाह—भवद्भिरिति । प्रश्नेति विशिष्टं सूचयति—नराणामिति । नराणां मध्ये सतां पुरुषाणामस्वे श्रोतुमुचितं भवनाधिकारसामर्थ्यं सूचितम् ॥ १ ॥ २ ॥

श्रोतव्यार्थे मुख्यहेतुमाह—अत्रेति । अत्र श्रीभागवते कस्मात् मुख्यत्वमत्राह—सर्वेति । वृत्रादिसर्वपापहन्तृत्वामिन्द्रत्वाच्चकृतीरवत उक्तं नारायण इति नायं साङ्केतिकनारायण इत्याह—हृषीकेश इति हृषीकाणामीशो जीवोऽपि स्यादत आह—भगवानिति ऐश्वर्यादिगुणसमुद्रो हि भगवान् एवंविधो नान्य इत्याह, सात्वतां पतिरिति ॥ ३ ॥

सगुणमेवोक्तं निर्गुणमतं नेत्याह—यदिति । जगतः प्रभवाप्ययकरणपरं गुह्यम् ब्रह्म तत्प्रोक्तं तद्विषयज्ञानं सताम् उपाख्यानम् येन तत् ॥ ४ ॥

सा भक्तिराश्रयो यस्य तत्तदाश्रयम् अत्रेत्येतत्प्रतिवाक्यमनुसन्धातव्यम् ॥ ५ ॥ ६ ॥

योगधारणया मरणपद्धत्या अखण्डधारणया नारदाजयोर्नारदब्रह्मणोः अवतारणामनुगीतं कथनं प्राधानिकः प्रकृतिसर्गः सिसृक्षुत्वविशेषः ॥ ७ ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कृष्णाय तदाख्ययातिप्रसिद्धाय स्वयम् भगवते वेधसे अवतारादिसर्वविधाने तस्य स्वैश्वर्येण नियन्तः ब्राह्मणेभ्यो नमस्कृत्येति सनातनान् "कालेन नष्टा प्रलये वाणीयम्" इत्यादिप्रमाणेन प्रसिद्धान् धर्मान् भागवतान् वक्ष्य इति तत्तत्प्रसङ्गानुक्रमेण नामानि सूचयिष्यामि "पतितःस्खलितः" इत्यादिना च साक्षाद्वक्ष्यामीत्यर्थः ॥ १ ॥

तत्रैव भगवच्चरित्रश्रवणमेव मुख्यमित्यभिप्रायेण तेनैव महाप्रसङ्गमुपसंहरन् ताननुक्रमितुमुपक्रमते—एतदिति । नराणां मध्ये ये पुरुषास्तेषामेवोचितं ननु ये तेषां मध्ये पशवस्तेषामित्यर्थं इति तद्व्यावृत्तिमुखेन गाढिमप्रदानेनेत्युक्तम "श्वविड्वराहोष्ट्रखरैः" इत्यादि यद्वा नराणां जीवानां पुरुषे श्रीभगवति यदुचितम् ॥ २ ॥

अत्र श्रीभागवते हरिर्भगवदाख्ययानन्ताविर्भावः परमेश्वरस्तान्यमुख्यत्वेन कीर्त्यते तत्रापि गुणरूपलीलाभिः साक्षादेव-

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

कीर्त्यते तच्च च नामान्येन भेदद्वयं दर्शितमित्याह—नारायणः सर्वजीवाश्रयः हृषीकेशस्तदीयसर्वेन्द्रियप्रवर्त्तकश्च परमात्मेत्यर्थः। इत्येको भेदः। द्वितीयमाह-भगवानिति। स च सात्वतां पतिः स्वयं भगवान् श्रीवासुदेवरूपत्वेन कीर्त्यत इत्यर्थः ॥ ३ ॥

अत्र ब्रह्मेति सार्द्धकम्। अत्र भगवत्तत्त्वकीर्त्तन एव तदीयनिर्विशेषप्रकाशरूपम् यद् ब्रह्म यदेव जगज्जन्मादिना सामान्यतो लक्षितं तदपि प्रोक्तम् ॥ ४ ॥

तद्धर्ममेव ज्ञानविज्ञानभक्तियोगाः यथोत्तरोत्कर्षसोपानवत् क्रमेण समाख्यातास्तदाश्रयं तदुपयोगिवैराग्यं चेति पद्यद्वयेन वेदतात्पर्यरूपो ब्रह्मकाण्डार्थो दर्शितः तदेवं सामान्यकं प्रतिपाद्यमुक्त्वा क्रमोक्तमाह—पारीक्षितमिति ॥ ५—२८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

प्रथमादित आरब्धोपाख्यानविततेः पुनः।
अनुक्रमः प्रसिद्धाया: द्वादशे क्रियते स्फुटम् ॥

महते भक्तिलक्षणाय कृष्णाय तत्प्राप्याय वेधसे सर्वकारणाय ब्राह्मणेभ्यः व्यासादिभ्यस्तत्प्रकाशकेभ्यः द्वितीयार्थे चतुर्थी धर्मान् भगवच्चरित्राणि श्रवणकीर्तनादिविषयत्वे सति भगवच्चरितान्येव परमधर्मा भवन्तीति भावः। सनातनान् नित्यान् भगवतो भक्तियोगस्य च तच्चरितानां च नित्यत्वादिति भावः ॥ १

नराणां मध्ये ये पुरुषास्तेषामुचितम् ननु नराणां मध्ये ये पशवस्तेषामिति यदुक्तम् "श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः" इति ॥ २ ॥

यः सर्वपापहर्तृत्वेन हरिशब्देनोच्यते यश्च नारस्य जीवसमूहस्य आश्रयत्वेन नारायणशब्देनाप्युच्यते यश्च सर्वेन्द्रियाणां प्रवर्तकत्वेन हृषीकेशशब्देनोच्यते स एव भगवानत्र द्वादशस्वपि स्कन्धेषु कीर्त्यते स हि क इत्यत आह—सात्वतामुख्यादीनां पतिः ॥ ३ ॥

तदीयनिर्विशेषप्रकाशरूपं यद्ब्रह्म तदपि प्रोक्तं वागादीन्द्रियग्राह्यत्वाभावाद्ब्रह्म तर्हि कथं प्रोक्तं तत्राह-जगतः प्रभव उत्पत्तिस्थित्योः लयश्च यतस्तल्लक्षणप्रकारेणैव प्रोक्तं नतु साक्षात् प्रोक्तमिति भावः। तत्प्राप्तिसाधनं ज्ञानं च तदुपाख्याने प्रकाश्यते येन तज्ज्ञानसाधनं च विज्ञानमपरोक्षानुभवस्तत्सहितं च ॥ ४ ॥

भक्तियोगः साधनरूपः साध्यरूपश्च सम्यगुपक्रमोपसंहाराभ्यामेवाख्यातः तदाश्रयं तदुत्थम् अथ प्रथमस्कन्धत एव प्राकरणिकानर्थाननुक्रामति-पारीक्षितमिति। अत्रानुक्रमणिकाध्याये यत्प्रसिद्धमपि किञ्चित् किञ्चिदुपाख्यानमुल्लङ्घितं नात्रानिष्ठमाशङ्कनीयमनुक्रमणिका हि नोक्तसमस्तार्थव्यापिनी भवेत् यत्प्रथमत एव जन्म गुह्याध्यायकथा अतिप्रसिद्धाप्युल्लङ्घिता एवं ध्रुवचरित्रमीश्वरनियमनादिकथा चित्रकेतुत्रिपुरवधादिकथा अम्बरीषादिकथा ब्रह्मासुरवधब्रह्ममोहनादिकथा बहुधा परोल्लङ्घिता क्वचित् व्युत्क्रमेणाप्युक्ता' इति ॥ ५—७ ॥

महापुरुषे पद्मनाभे संस्थितिः प्रलये ब्रह्मणस्तदुदरे शयनम् ॥ ८—९ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

द्वादशेऽध्याये श्रीमद्भागवतार्थं श्रीकृष्णं तत्प्रापकान्धर्मान्सम्यानभ्यान्नरार्थांश्च सङ्क्षेपतो वर्णयिष्यन् धर्मादीन् प्रणमति, नम इति। महते श्रीकृष्णप्रापकाय धर्माय नमः वेधसे सर्वकारणाय धर्मफलभूताय कृष्णाय नमः धर्मप्रवर्तकेभ्यः ब्राह्मणेभ्यः श्रीसनकनारदव्यासशुकादिभ्यो नमस्कृत्य सनातनान् गुरुपरम्पराप्राप्तान् धर्मान् कर्मज्ञानभक्त्यादीन् वक्ष्ये श्रीमद्भागवतोक्तार्थसङ्क्षेपेणेति भावः ॥ १ ॥

यदुक्तं भवद्भिरहं कस्मिन् युगे प्रवृत्तेयमित्यादिना पृष्टः तदेतदद्भुतं पुरुषोचितं पुरुषाणामुचितं श्रोतुं योग्यं विष्णोश्चरितं प्रतिपाद्यप्रतिपादकयोरभेदविवक्षया श्रीमद्भागवतं महापुराणं वो युष्माकं तथा नराणामन्येषां च हिताय कथितम् ॥२॥

अत्र श्रीमद्भागवते हरिनारायणादिपदाभिधेयः साक्षाद्भगवान् श्रीकृष्णः सम्यक्कीर्तितः ॥ ३ ॥

धर्मानाह-अत्रेतिसार्द्धेन। अत्र श्रीमद्भागवते गुह्यं विज्ञानसंयुतं ज्ञानं च प्रोक्तम् कथम्भूतं ब्रह्मपरं परब्रह्मस्वरूपरूपगुणविभूत्यादिविषयम् कथम्भूतं जगतः संसारिणः प्रभृत्य भवस्य प्रकाश्यते येन तज्ज्ञानसाधनं कर्म च प्रोक्तम् ॥ ४ ॥

भक्तियोगः सम्यगाख्यातः तदाश्रयं भक्तियोगोपकारकं वैराग्यं चाख्यातम् अथ प्रथमस्कन्धतः श्रीमद्भागवतोक्तान् बहूनर्थानाह-पारीक्षितमुपाख्यानमित्यादिना। अत्र केषाञ्चिदर्थानामनुक्तिः केषाञ्चित् व्युत्क्रमोक्तिश्च तत्तत्स्कन्धे प्रसिद्धत्वात् ॥ ५—६—७—८ ॥

भाषा टीका।

सूत उवाच।

सूतजी बोले, कि—भगवद्भक्तिस्वरूप जो महाधर्म है, तिसको नमस्कार हो, वेधा जो श्रीकृष्ण हैं तिनको नमस्कार हो, अब मैं ब्राह्मणों को नमस्कार करके सनातन धर्मों को अर्थात् सनातन धर्म प्रचुर पुराणोक्त अर्थों को निगमन रूप से कहता हूं। अर्थात् इस अध्याय में संक्षेप से संपूर्ण श्रीमद्भागवत पुराण के अर्थ को कहता हूं ॥ १ ॥

हे विप्र हो! जो तुमने हमसे प्रश्न किया रहा (प्रथम स्कन्ध में) कि, मनुष्यों के मध्य में पुरुष को जो उचित होय सो कहो, सो हमने श्रीविष्णु का अद्भुत चरित्र आप लोगों से वर्णन किया ॥ २ ॥

इस श्रीभागवत पुराण के विषे सर्व पाप हरण करने वाले साक्षात् श्रीहरि को कीर्तन किया गया है, इस पुराण का प्रमेय नारायण हृषीकेश भक्तों के पति साक्षात् भगवान् हैं ॥ ३ ॥

ततः प्राकृतिकः सर्गः सप्त वैकृतिकाश्च ये ।
ततो ब्रह्माण्डसम्भूतिर्वैराजः पुरुषो यतः ॥ ९ ॥
कालस्य स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः ।
भुव [१]उद्धरणेऽम्भोधेर्हिरण्याक्षवधो यथा ॥ १० ॥
ऊर्ध्वतिर्यग*वाक्सर्गो रुद्रसर्गस्तथैव च ।
अर्धनारीनरस्याथ यतः स्वायम्भुवो मनुः ॥ ११ ॥
शतरूपा च या स्त्रीणामाद्या प्रकृतिरुत्तमा ।
सन्तानो धर्मपत्नीनां कर्दमस्य प्रजापतेः ॥ १२ ॥
अवतारो भगवतः कपिलस्य महात्मनः ।
देवहूत्याश्च सम्वादः कपिलेन च धीमता ॥ १३ ॥
नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनम् ।
ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः ॥ १४ ॥
नारदस्य च सम्वादस्ततः प्रैयव्रतं द्विजाः ! ।
नाभेस्ततोऽनुचरितमृषभस्य भरतस्य च ॥ १५ ॥
द्वीपवर्ष[२]समुद्राणां गिरिनद्युपवर्णनम् ।
ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः ॥ १६ ॥

भाषा टीका ।

इस श्रीभागवत के विषें परम गोप्य जगत् की उत्पत्ति और नाश के हेतु, परब्रह्म कीर्तित है, ज्ञान और ज्ञान का साधन विशेष ज्ञान सहित निरूपण किया है ॥ ४ ॥

भक्तियोग का इस पुराण में सम्यक् प्रकार निरूपण किया है, तथा भक्ति योग से सिद्ध होने वाले वैराग्य का भी निरूपण किया है । प्रथम से इस पुराण में राजा परीक्षित् का उपाख्यान है, तिसके प्रस्ताव के विषे श्रीनारदजी का आख्यान है, ॥ ५ ॥

तिसके पीछे विप्र शाप से राजा परीक्षित् का प्रायोपवेश अर्थात् सर्वस्व त्यागकर गंगा तट पर अनशन व्रत लेने का वर्णन किया है । वहां पर ब्रह्मर्षि श्रीशुकदेवजी का और राजा परीक्षित् के सम्वाद का वर्णन है यह प्रथमस्कन्ध की कथा है ॥ ६ ॥

द्वितीय स्कन्ध में योग धारणा से अर्चिरादिगति कही, नारद और ब्रह्माजी का संवाद कहा, अवतारों का चरित वर्णन किया, तथा विराट् रूपकी आदि से सृष्टि कही, यह द्वितीयस्कन्ध का अर्थ भया ॥ ७ ॥

तृतीयस्कन्ध में विदुर और उद्धवजी का संवाद, तदनन्तर मैत्रेय विदुर का सम्वाद, पुराण संहिता का प्रश्न, और प्रलयकाल में भगवान् का निर्व्यापार होकर स्थित होना वर्णन किया है ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

प्राकृतिकः प्रकृतिभवो गुणक्षोभरूपः वैकृतिकाः महदादयश्चकाराद्विकाराश्च ये तेषां सर्गः ॥ ९ ॥

गतिः स्वरूपम उद्धरणे उद्धारणे ॥ १० ॥

अर्धाङ्ग्यां नारी च नरश्च तस्य सर्गः ॥ ११ ॥

सन्तानो धर्मपत्नीनामिति नवब्रह्मसमुत्पत्तिरित्यस्यानन्तरं द्रष्टव्यम इति तृतीयार्थः ॥ १२ ॥ १३ ॥

चतुर्थस्कन्धार्थमाह—नवब्रह्मणां मरीच्यादीनां समुत्पत्तिः सन्तानः ॥ १४ ॥

पञ्चमस्कन्धार्थमाह-ततः प्रैयव्रतं प्रियव्रतस्य चरितम् ॥ १५ ॥

द्वीपाद्युपवर्णनं प्रथमं सङ्क्षेपतस्ततो द्वीपादीनां ये गिरयो नद्यश्च तेषामुपवर्णनम् पातालानां नरकादीनां च संस्थितिः अनेनैव नरकनिवर्तकमजामिलोपाख्यानं गृहीतं ततः पराचीनम् ॥ १६ ॥

(१) उद्धरणेति वीर० विज० पा० * अधस्सर्ग इति वीर० विज० (२ ततो द्वीप समुद्रादि वर्ष नद्यादि पाठान्तरम् ।

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

अत्र ब्रह्मा वैराजः पुरुषो देवादिशरीरम् ॥ ६—४१ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

प्राकृतिकः प्रकृतिगुणक्षोभात्मकः ततो वैकृतिकाः सप्त महदहङ्कारभूतपञ्चकात्मका व्याख्याता इत्यर्थः । ततस्तेभ्यो वैकृतिभ्यो ब्रह्माण्डस्योत्पत्तिः तद्विशिनष्टि यतो यत्र ब्रह्माण्डे ब्रह्मा वैराजः पुरुषः चतुर्मुखो जात इत्यर्थः । स्थूलसूक्ष्मस्य परमाणवादिवत्सरान्तसूक्ष्मस्थूलरूपेणावस्थितस्य कालस्य गतिः सर्वेषां सत्वानां ब्रह्मादिभूतानामुत्पत्तिः अम्भोधेर्भुव उद्धरणम् उद्धरणम् ॥ ९ ॥ १० ॥

ऊर्ध्वतिर्यगधस्सर्गः देवतिर्यग्भोक्तृसर्गः अर्धांश्यां नारीनरश्च तयोः समाहारः तस्य सर्गः तद्विशिनष्टि—यतः यत्र नारीनरे, स्वायम्भुवो मनुः ॥ ११ ॥

तस्य या पत्नी शतरूपा स्त्रीणामाद्या प्रकृतिराकृतिरत एवोत्तमा तस्य नारीनरस्य सर्ग इति सम्बन्धः ततः कर्दमस्य धर्मपत्नीनामिति बहुवचनं पूज्याभिप्रायकं धर्मपत्न्या देवहूत्याः सन्तानः कलाऽनसूयादिनवकन्यकारूप सन्तानः तथा कपिलाख्यस्य भगवतोऽवतारः कपिलेन साकं देवहूत्याः संवादश्चोक्त इत्यर्थः ॥ १२ ॥ १३ ॥

अथ चतुर्थार्थानुक्रामति—नवब्रह्मसमुत्पत्तिरित्यादिना नारदस्य च संवाद इत्यन्तेन । पञ्चमार्थानुक्रमते प्रैयव्रत इत्यादिना पातालनरकस्थितिरित्यन्तेन । द्विजा इति सम्बोधनं प्रैयव्रतः प्रियव्रतवृत्तान्तः आर्षभस्य भरतस्य चानुचरितमिति सम्बन्धः ॥ १४ ॥ १५ ॥

द्वीपादीनामुपवर्णनम् ॥ १६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

प्राकृतिकः प्रकृतिविकृतः ते सप्त महदहङ्कारपञ्चभूतानीति वैकृतिकाः इन्द्रियविषयाः यतो यत्र ब्रह्माण्डे ॥ ९ ॥

पद्मसमुद्भवो नाभेरिति शेषः अम्भोधेर्भुव उद्धरणम् उद्धारः ॥ १० ॥

ऊर्ध्वतिर्यगधःसर्गः देवतिर्यङ्मनुष्यसृष्टिः अर्धनारीनरस्य ब्रह्मणः सकाशात्स्वायम्भुवो मनुर्यथोत्पन्नस्तथा ॥ ११ ॥

या स्त्रीणां मध्ये आद्या प्रकृतिः स्त्री सा शतरूपा च यथोत्पन्ना तथा ॥ १२ ॥ १३ ॥

नवब्रह्मसमुत्पत्तिः नवप्रजापतीनां मरीच्यादीनां सकाशात्सृष्टिः तेषामुत्पत्तिर्वा ॥ १४—१६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

भुव उद्धरणमम्भोधेः सकाशात् सकारलोपश्छान्दसः ॥ १० ॥

अर्धांश्यां नारी च नरश्च नरौ ॥ ११—१३ ॥

नवब्रह्मभ्यः मरीच्यादिभ्यः समुत्पत्तिः ॥ १४—२० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

प्राकृतिकः प्रकृतिगुणक्षोभरूपः वैकृतिका महदादयः चकारादिन्द्रियकाराश्च ये तेषां सर्गः ॥ ९—१०—११—१२ ॥ २३ ॥

नवभ्यो ब्रह्मभ्यः ब्राह्मणेभ्यो मरीच्यादिभ्यः समुत्पत्तिस्तत्सन्तत्यसृष्टिः ॥ १४ ॥

प्रैयव्रतं प्रियव्रतचरितम् ॥ १५—२० ॥

भाषा टीका ।

तदनन्तर प्रकृति से होने वाला गुणों के क्षोभरूप सर्गका वर्णन, जिसके पीछे प्रकृति के विकार से होने वाली महत पृथिव्यादिविकारों सहित महदादिकोंकी सृष्टि कही, तिन सर्गों से मिलकर ब्रह्माण्डकी उत्पत्ति कही, जिसमें विराट् पुरुषने अपने शरीरका अभिमान करलिया ॥ ९ ॥

तत्पश्चात् स्थूल और सूक्ष्म काल की गति कही, श्रीशेषशायी भगवान् की नाभिकमल से ब्रह्मा की उत्पत्ति, समुद्रसे पृथिवी का उद्धार, तथा हिरण्याक्ष का वध कहा ॥ १० ॥

तदनन्तर ऊर्ध्व सृष्टि देवोंकी तिर्यक् सृष्टि पशु पक्षियोंकी अवाक् (नीची) सृष्टि मनुष्योंकी कही, फिर रुद्रकी सृष्टि कही तदनन्तर ब्रह्माके आधे२ अङ्गसे नर नारी की सृष्टि जिन्हों में नर स्वायंभुव मनु हुए, और नारी शतरूपा रानी हुई, जो शतरूपा सबसे प्रथम स्त्रियों में उत्तम प्रकृति हुई, फिर कर्दम प्रजापति की धर्मपत्नी श्रीदेवहूति जी की जो कला अनुसूया इत्यादि सन्तान हुई तिसका वर्णन है ॥ ११ ॥ १२ ॥

तदनन्तर श्रीकपिलदेव के अवतार का वर्णन, फिर देवहूति के साथ श्रीकपिलदेव जी के संवाद का वर्णन है ॥ १३ ॥

फिर मरीच्यादिक नव प्रजापतियों की उत्पत्ति [यह मरीच्यादि नव ब्राह्मणों की उत्पत्ति का कथन, कर्दमजी की सन्तान के कथन के पूर्व जानना चाहिये] यह तृतीय स्कन्ध की कथा समाप्त हुई ॥ चतुर्थस्कन्ध में प्रथम दक्ष-प्रजापति के यज्ञ का भङ्ग, फिर ध्रुव जी का चरित्र, पश्चात् पृथु का चरित्र, फिर प्राचीन बर्हि का चरित्र, इस प्रकार चतुर्थ स्कन्ध की कथा समाप्त हुई ॥ १४ ॥

पञ्चमस्कन्ध में पहिले, नारद महर्षि और प्रियव्रत महाराज का संवाद, फिर नाभि महाराज का चरित्र, फिर श्रीऋषभदेव जी का चरित्र, फिर भरत महाराज के चरित्र का वर्णन है ॥ १५ ॥

तदनन्तर द्वीप समुद्र आदि भूखण्ड सर्गों इनका वर्णन है । फिर ज्योतिश्चक्र की स्थिति, तथा पाताल और नरक की स्थिति का वर्णन है ॥ १६ ॥

दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च सन्ततिः ।
यतो देवासुरनरास्तिर्यङ्नरखगादयः ॥ १७ ॥
त्वाष्ट्रस्य जन्म निधनं पुत्रयोश्च दितेर्द्विजाः ! ।
दैत्येश्वरस्य चरितं प्रह्लादस्य महात्मनः ॥ १८ ॥
मन्वन्तरानुकथनं गजेन्द्रस्य विमोक्षणम् ।
मन्वन्तरावताराश्च विष्णोर्हयशिरादयः ॥ १९ ॥
कौर्मं धान्वन्तरं मात्स्यं वामनं च जगत्पतेः ।
क्षीरोदमथनं तद्वदमृतार्थे दिवौकसाम् ॥ २० ॥
देवासुरमहायुद्धं राजवंशानुकीर्तनम् ।
इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः ॥ २१ ॥
इलोपाख्यानमत्रोक्तं तारोपाख्यानमेव च ।
सूर्यवंशानुकथनं शशादाद्या नृगादयः ॥ २२ ॥
सौकन्यं चाथ शर्यातेः ककुत्स्थस्य च धीमतः ।
खट्वाङ्गस्य च मान्धातुः सौभरेः सगरस्य च ॥ २३ ॥
(१)रामस्य कोशलेन्द्रस्य चरितं किल्बिषापहम् ।
निमेरङ्गपरित्यागो जनकानां च सम्भवः ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

षष्ठार्थमाह-दक्षजन्मेति ॥ १७ ॥

सप्तमार्थमाह-पुत्रयोश्चेति ॥ १८ ॥

अष्टमार्थमाह-मन्वन्तरानुकथनमिति । क्वचित्कस्यचिदनुक्तिर्व्युत्क्रमोक्तिश्च भक्तिरसाकुलत्वेनेति द्रष्टव्यम् ॥ १९ ॥ २० ॥

नवमार्थमाह-राजवंशेति ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

षष्ठार्थाननुक्रामति-सार्द्धेन, दक्षजन्मेति । तत्पुत्रीणां दक्षपुत्रीणां ना विशिनष्टि-यतो याभ्यो दक्षपुत्रीभ्यो देवादयो बभूवुरित्यर्थः ॥ १७ ॥

त्वाष्ट्रस्य वृत्रासुरस्य जन्म निधनं मरणं च । अथ सप्तमार्थाननुक्रामति—[पुत्रयोश्चेति] दैत्येश्वरस्येत्यर्द्धेन । हिरण्यकशिपोः प्रह्लादस्य चरितम् ॥ १८ ॥

अष्टमार्थानाह-मन्वन्तरेत्यादिना देवासुरं महायुद्धमित्यन्तेन । विष्णोः हयग्रीवादयः मन्वन्तरेष्ववताराः ॥ १९ ॥

तथा जगत्पतेः कौर्मादीनि रूपाणि दिवौकसां देवानाममृतार्थे क्षीरोदमन्थनम् ॥ २० ॥

नवमार्थाननुक्रमते-राजवंशानुकीर्तनमित्यादिना " वृष्णिश्च गोकुले इत्यन्तेन । अत्र क्वचित्कस्यचिदनुक्तिः व्युत्क्रमोक्तिश्च प्रसिद्धिकृतादनादरादिति ज्ञेयम् तद्वंशे इक्ष्वाकुवंशे ॥ २१ ॥ २२ ॥

सौकन्यं सुकन्याचरितम् ॥ २३—२७ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यतः सन्ततेर्देवासुरनरादयः आसन् ॥ १७—१८ ॥

मन्वन्तरानुचरितं मन्वन्तरराजानुचरितम् ॥ १९—२१ ॥

तारोपाख्यानं ताराया देव्या उपाख्यानम् ॥ २२ ॥

सुकन्यायाश्चरितं ककुत्स्थस्य चरितम् ॥ २३—२४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सुद्युम्नस्येत्यत्र उपाख्यानमिति शेषः ॥ २१—२७ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

सुद्युम्नस्योपाख्यानमिति शेषः ॥ २१—२७ ॥

(१) कौशलेन्द्रस्य चरितं मङ्गलमिति विज० पा० ।

रामस्य भार्गवेन्द्रस्य निःक्षत्रकरणं भुवः ।
ऐलस्य सोमवंशस्य ययातेर्नहुषस्य च ॥ २५ ॥
दौष्यन्तेर्भरतस्यापि शन्तनोस्तत्सुतस्य च ।
ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोऽनुकीर्तितः ॥ २६ ॥
यत्रावतीर्णो भगवान् कृष्णाख्यो जगदीश्वरः ।
वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले ॥ २७ ॥
तस्य कर्माण्य[१]पाराणि कीर्तितान्यसुरद्विषः ।
पूतनाऽसुपयःपानं [२]शकटोच्चाटनं शिशोः ॥ २८ ॥
तृणावर्तस्य निष्पेषस्तथैव बकवत्सयोः ।
*(अघासुरासुसंहारः कस्य मायाप्रदर्शनम् ।)
धेनुकस्य सहभ्रातुः प्रलम्बस्य च सङ्क्षयः ॥ २९ ॥
गोपानां च परित्राणं दावाग्नेः परिसर्पतः ।
दमनं कालियस्या[३]हेर्महाहेर्नन्दमोक्षणम् ॥ ३० ॥
व्रतचर्या तु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः ।
प्रसादो यज्ञपत्नीभ्यो विप्राणां चानुतापनम् ॥ ३१ ॥
गोवर्द्धनोद्धारणं च शक्रस्य सुरभेरथ ।
यज्ञाभिषेकं कृष्णस्य स्त्रीभिः क्रीडा च रात्रिषु ॥ ३२ ॥

भाषा टीका ।

षष्ठस्कन्ध में प्रचेताओं से दक्ष का जन्म, दक्षकी पुत्रियों की संतान का वर्णन, जिससे देव असुर नर तिर्यक् नग खग आदिक उत्पन्न हुए ॥ १७ ॥

तदनंतर वृत्रासुर का जन्म और मरण का वर्णन है यह षष्ठ स्कन्ध का अर्थ समाप्त भया । सप्तमस्कन्ध में दिति के दोनों पुत्रों का चरित, तथा दैत्येश्वर महात्मा श्रीप्रह्लाद जी का चरित्र है, सप्तमस्कन्ध का अर्थ समाप्त हुआ ॥ १८ ॥

अष्टम स्कन्ध में मन्वंतर का अनुचरित, गजेन्द्र मोक्ष का वर्णन, मन्वन्तरों में श्रीविष्णु के हयग्रीवादि अवतारों का वर्णन है, यहां पर कहीं २ कथा का व्युत्क्रम कहीं २ अनुक्रम भक्ति रस के अनुकूलता से है ॥ १९ ॥

तदनंतर कूर्म चरित, मत्स्य भगवान का चरित, नृसिंह चरित, वामनजी का चरित्र, तथा अमृत के लिये देवताओं का समुद्र का मथन, ॥ २० ॥

तथा देवासुर संग्राम का वर्णन है, यह अष्टम स्कन्ध का अर्थ समाप्त भया ॥ नवम स्कन्ध में राजवंशों का कथन है इक्ष्वाकु महाराज का जन्म, और उनके वंश का वर्णन, और सुद्युम्न का चरित्र है ॥ २१ ॥

फिर सुद्युम्न के स्त्री होने का आख्यान, फिर तारोपाख्यान कहा, फिर सूर्य वंश का कथन किया, फिर शशाद और नृग आदि नृपों का आख्यान है ॥ २२ ॥

तदनंतर सुकन्या का आख्यान, शर्यातिका आख्यान, धीमान् ककुत्स्थ महाराज का आख्यान, तथा खट्वांग और मान्धाता महाराज का चरित, सौभरि ऋषि का आख्यान, तथा सगर के चरित्र का वर्णन है ॥ २३ ॥

फिर श्रीसूर्यवंशध्वज सर्व लोकाभिराम कोशलेन्द्र श्रीरामचन्द्र के पाप नाशक चरितों का वर्णन है ॥ फिर निमि महाराज के अंग का परित्याग, फिर जनक वंशों की उत्पत्ति का कथन है ॥ २४ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

सोमवंशादिभूतवर्णनस्य चरितम् ॥ २५ ॥

तत्सुतस्य भीष्मस्य ॥ २६ ॥ २७ ॥

कथमाथमाह—तस्य कर्माणि । पूतनाया असुभिःसह स्तन्यपयसः पानम् ॥ २८ ॥

सहभ्रातुः सगणस्य ॥ २९ ॥ ३० ॥ ३१ ॥

यज्ञाभिषेकम् यज्ञः पूजा अभिषेकश्च तयोर्द्वन्द्वैकवत्त्वम् ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥

(१) उदाराणि इति (२) शकटोत्पाटनम् इति च वीर० पाठः । * इत्यधिकः पठ्यते वीर० । (३) अहेः इति वीर० पाठः ।

शङ्खचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः ।
अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ॥ ३३ ॥
व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः ।
गजमुष्टिकचाणूरकंसादीनां च यो वधः ॥ ३४ ॥
मृतस्याऽऽनयनं सूनोः पुनः सान्दीपनेर्गुरोः ।
मथुरायां निवसता यदुचक्रस्य यत्प्रियम् ॥ ३५ ॥
कृतमुद्धवरामाभ्यां युतेन हरिणा द्विजाः ।
जरासन्धसमानीतसैन्यस्य बहुशो वधः ।
घातनं यवनेन्द्रस्य कुशस्थल्या निवेशनम् ॥ ३६ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

अथ दशमार्थमनुक्रामति–तस्य कर्माण्यपारादिना । विप्रशापापदेशेनेत्यतः प्राक्तनेन ग्रन्थेन ॥ २८ ॥

निष्पेषो वधः अघासुरस्यासुसंहारः प्राणापहारः कस्य चतुर्मुखस्य स्वमायाप्रदर्शनं सहभ्रातुः सवत्सस्य धेनुकस्य प्रलम्बस्य च सङ्क्षयः वधः परिसर्पतः दवाग्नेः सकाशाद्गोपानां परित्राणम् दमनमनुशिक्षणमहो इत्याश्चर्यं नन्दस्य वरुणस्य मोक्षणं साकाशादिति शेषः । कन्यानां गोपकन्यानां व्रतचर्यां तां विशिनष्टि यतो यस्यां व्रतैरच्युतस्तुष्टः यज्ञपत्नीभ्य इति चतुर्थ्यन्तं प्रसादोऽनुग्रहः शक्रस्योत्सेकस्य परिभवायेति शेषः यज्ञाभिषेकः यज्ञः पूजा अभिषेकश्च तयोर्द्वन्द्वैक्यम् ॥ २९—३३ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सोमवंशोद्भवस्यैकस्यैलापुत्रस्य चरितम् ॥ २५—३० ॥
यत्र व्रतचर्यायाम् ॥ ३१ ॥
यज्ञः पूजा अभिषेकः तयोर्द्वन्द्वैक्यम् ॥ ३२—३६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

तस्य वृद्धिश्च गोकुल इति चकाराज्जन्मचेत्यर्थः । अन्यथा वृद्धिस्त्वित्येवोक्तं स्यात् अस्य स्थापनं "नन्दस्त्वात्मज उत्पन्न" इत्यादौ कृष्णसन्दर्भे कृतमेव ॥ २७—३० ॥

विप्रानुतापनं सूक्ष्ममपि अत्रावधापनाय स्मारितं शक्रकर्तृकं सुरभिकर्तृकं च यज्ञाभिषेकम् ॥ ३१—३५ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

पूतनाया असुसहितस्य स्तन्यपयसः पानम् शिशोः शिशुना निष्पेषः संमर्दः सहभ्रातुर्ज्ञातिसहितस्य ॥ २८—३१ ॥

शक्रस्य शङ्कया सुरभेः सुरभ्या यज्ञः पूजनमभिषेकश्च तत् ॥ ३२—३५ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पूतनायाः असुपयःपानं प्राणसहितस्य पयसः पानम् ॥२८॥

निष्पेषः शिशावामिति शेषः सहभ्रातुः सवत्सस्य ॥ ॥ २९—३१ ॥

यज्ञः पूजा अभिषेकश्च तयोः द्वन्द्वैक्यम् ॥ ३२—३६ ॥

भाषाटीका ।

फिर भृगु वंशी श्रीपरशुरामजी का पृथिवी को निःक्षत्रिय करने का वर्णन, चन्द्रवंशी राजा ऐल ययाति और नहुष महाराज का चरित्र ॥ २५ ॥

दुष्यन्त के पुत्र भरतजी का चरित, शंतनु और उनके पुत्र का चरित, तथा ययाति के जेष्ठ पुत्र महाराज यदु के वंश का कीर्त्तन यह नवम स्कन्ध की कथा है ॥ २६ ॥

दशम स्कन्ध में जिनके यहां जगदीश्वर भगवान् श्रीकृष्णचन्द्र ने अवतार लिया है, उन वसुदेव के गृह में भगवान् के जन्म का वर्णन फिर गोकुल में वृद्धि को प्राप्त हुए ॥ २७ ॥

तिन श्रीगोकुलचन्द्र के अपार कर्मों का कीर्त्तन है, तहां प्रथम असुर नाश लीला में पूतना के प्राणों का पान करना, फिर शिशु का शकटासुर को उच्चाटन करने का वर्णन ॥ २८ ॥

फिर तृणावर्त का तथा बकासुर वत्सासुर और धेनुकासुर का वध करना, भ्राता सहित प्रलंबासुर का मारना ॥ २९ ॥

बढती हुई दावाग्नि से गोप लोगों की रक्षा करना, काली का दमन और महासर्प से नंद बाबा का छुटावना ॥ ३० ॥

व्रज की कन्याओं का व्रत करना और उस व्रत से श्रीकृष्ण का प्रसन्न होकर चीर हरण करना ॥ फिर श्रीकृष्ण का यज्ञपत्नियों पर प्रसन्न होना, और याज्ञिक माथुर ब्राह्मणों का पश्चात्ताप करना ॥ ३१ ॥

फिर श्रीगिरि गोवर्द्धन का उठावना, इन्द्र और सुरभिने श्रीकृष्ण का गोविन्दाभिषेक करना, फिर शरद की रात्रियों में व्रज की स्त्रियों के साथ रास लीला करना ॥ ३२ ॥

आदानं पारिजातस्य सुधर्मायाः सुरालयात्।
रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः ॥ ३७ ॥
हरस्य जृम्भणं युद्धे बाणस्य भुजकृन्तनम्।
प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ॥ ३८ ॥
चैद्यपौण्ड्रक(मा)शाल्वानां दन्तवक्रस्य दुर्मतेः।
शम्बरो द्विविदः पीठो मुरः पञ्चजनादयः ॥ ३९ ॥
महात्म्यं च वधस्तेषां वाराणस्याश्च दाहनम्।
भारावतरणं भूमेर्निमित्तीकृत्य पाण्डवान् ॥ ४० ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

द्विषतः शत्रून् प्रमथ्य ॥ ३७ ॥ ३८ ॥

ये च शम्बरादयस्तेषां माहात्म्यं प्रभावो वधश्च ॥ ३९—४० ॥

श्रीवीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका।

गजः कुवलयापीडाख्यः सान्दीपनेर्गुरोः पुत्रस्य मृतस्य पुनरानयनं यमस्य सकाशादिति शेषः। मथुरायामिति। हे द्विजाः उद्धवरामाभ्यां युक्तेन हरिणा मथुरायां निवसता यदूनां समूहस्य प्रियं कृतं तथा यवनेन्द्रस्य कालयवनस्य कुशस्थल्यां द्वारकायाम् ॥ ३४—३६ ॥

सुधर्मायाश्चादानमिति संबन्धः द्विषतश्शत्रून्प्रमथ्य हरेर्हरिणा रुक्मिण्या हरणम् ॥ ३७ ॥

प्राग्ज्योतिषपतिं भौमम् ॥ ३८ ॥

ये शम्बरादयः तेषां माहात्म्यं वधश्चेति संबन्धः ॥ ३९ ॥

निमित्तीकृत्य द्वारीकृत्य ॥ ४० ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली।

दाहनं दहनम् ॥ ४०—४१ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

उद्धवरामाभ्यामित्युद्धवस्यापि माहात्म्यं दर्शितम् ॥ ३६-३८ ॥

चैद्यादीनां माहात्म्यं वधश्च येच शम्बरादयस्तेषां चान्वयः ॥ ३९—४५ ॥

श्रीमद्विश्वनाथचक्रवर्त्तिकृतसारार्थदर्शिनी।

माहात्म्यं चैद्यादीनां पराक्रमः ॥ ३९-४१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

द्विषतः रुक्मिप्रभृतीन् ॥ ३७—३९ ॥

माहात्म्यम् आसुरः प्रभावः ॥ ४०—४१ ॥

भाषा टीका।

फिर दुर्बुद्धि शंखचूड़ का वध, केशीदानव और अरिष्टासुर का संहार करना, अक्रूर का व्रज में आना, पीछे श्रीकृष्णचन्द्र और बलदेव जी का मथुरा को प्रस्थान करना ॥ ३३ ॥

फिर व्रजस्त्रियों के विलाप का वर्णन, तदनन्तर श्रीकृष्ण का मथुरा देखना, फिर कुवलयापीड़ हाथी मुष्टिक चाणूर मल्ल और कंस राजा इनका वध करना ॥ ३४ ॥

सान्दीपन गुरु के मरे हुए पुत्र को फिरकर ला देना, मथुरा में बसकर उद्धव बलदेव सहित मिलकर यादवों का प्रिय करना। यह पूर्वार्द्ध की कथा समाप्त हुई ॥ आगे उत्तरार्द्ध में हे विप्रो! जरासन्ध की लाई हुई सेना का बहुतार वध होना, फिर कालयवन को मुचुकुन्द के द्वारा मारना, और द्वारका के बसाने का वर्णन करना ॥ ॥ ३५ ॥ ३६ ॥

फिर स्वर्ग से पारिजात वृक्ष और सुधर्मा सभा का ले आना, फिर युद्ध में शत्रुओं को मथकर श्रीकृष्ण का श्रीरुक्मिणी जी को हरण करना ॥ ३७ ॥

तदनन्तर बाणासुर के युद्ध में महादेव जी का जम्हाना, और श्रीकृष्ण का बाणासुर की भुजाओं का काटना, फिर प्राग्ज्योतिषपुर के पति को मारकर कन्याओं का लाना ॥ ३८ ॥

पश्चात् शिशुपाल पौण्ड्रक शाल्व और दुर्मति दन्तवक्र का वध, तथा शम्बर द्विविद पीठ मुर और पञ्चजन इत्यादिकों का माहात्म्य और वध, तथा काशीपुरी का जलाना, और पाण्डवों को निमित्त करके भूमि का भार उतारना यह दशम स्कन्ध की कथा सम्पूर्ण भई ॥ ३९ ॥ ४० ॥

विप्रशापापदेशेन संहारः स्वकुलस्य च।
उद्धवस्य च सम्वादो वासुदेवस्य चाद्भुतः ॥ ४१ ॥
यत्रात्मविद्या ह्यखिला प्रोक्ता धर्मविनिर्णयः।
ततो मर्त्यपरित्याग आत्मयोगानुभावतः ॥ ४२ ॥
युगलक्षणवृत्तिश्च कलौ नृणामुपप्लवः।
चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा ॥ ४३ ॥
देहत्यागश्च राजर्षेर्विष्णुरातस्य धीमतः।
शाखाप्रणयनमृषेर्मार्कण्डेयस्य सत्कथा।
महापुरुषविन्यासः सूर्यस्य जगदात्मनः ॥ ४४ ॥
इति चोक्तं द्विजश्रेष्ठाः! यत्पृष्टोऽहमिहास्मि वः।
लीलावतारकर्माणि कीर्तितानीह सर्वशः ॥ ४५ ॥
पतितः स्खलितश्चार्तः क्षुत्वा वा विवशो ब्रुवन्।
हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥ ४६ ॥
सङ्कीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम्।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः ॥ ४७ ॥
मृषागिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः।
तदेव सत्यं तदुहैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥ ४८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

एकादशार्थमाह—विप्रशापेति ॥ ४१ ॥

धर्मविनिर्णयो वर्णाश्रमधर्मविनिश्चयः मर्त्यपरित्यागो मनुष्यदेहस्यान्तर्धानम् ॥ ४२ ॥

द्वादशार्थमाह—युगेति। युगलक्षणं तदनुरूपा वृत्तिश्च। त्रिविधा प्राकृतिकी नैमित्तिकी नित्या चेति ॥ ४३ ॥

मार्कण्डेयस्य सूर्यस्य च विन्यास इत्यर्थः ॥ ४४ ॥

इति चोक्तमिति चकाराद्यदपि वो युष्माभिरिह यत्पृष्टोऽस्मि तदुक्तमिति किमेवं नानार्थकथनेन तत्राऽऽह लीलेति सर्वशः तत्र तत्र कीर्तनादरो ह्यत्रार्थः ॥ ४५ ॥

तत्कीर्तनस्यापि विशिष्यावश्यं तत्फलमाह द्वाभ्याम्—पतितः कूपादिषु स्खलितः सोपानादिषु आर्तो दुःखितः क्षुत्वा क्षुतं कृत्वा विवशोऽपि ॥ ४६ ॥

सङ्कीर्त्यमानो यद्वा श्रुतोऽनुभावो यस्य स पुंसां चित्तं प्रविश्य निःशेषं दुःखं विधुनोति हन्ति स्वतोऽनुभवं प्रमाणयति अर्को निविडमपि दृष्टान्तं न धुनोति तस्यापरितोषाद्दृष्टान्तान्तरमाह—अतिवातोऽभ्रमिवेति ॥ ४७ ॥

हरिसङ्कीर्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्यालापमात्रमिति प्रपञ्चयति—मृषागिर इति चतुर्भिः। मृषागिरो मिथ्यावाचः असतीरसत्यः असतां कथा यासु ताः यत्रासु उत्तमश्लोकस्य यशोऽनुगीयत इति यत्तदेव सत्यं तदेव हि मङ्गलम् उह इति हर्षे भगवद्गुणानामभ्युदयो यस्मात्तत् ॥ ४८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम्।

मर्त्यशरीरत्यागः ॥ ४२—४३ ॥

महापुरुषविन्यासः देवसंस्थानं सूर्यस्य जगदात्मनः इति विन्यास इत्यनुषङ्गः ॥ ४४ ॥

कैमर्थं प्रपञ्चमित्यर्थः ॥ ४५ ॥

पुराणकथाश्रवणफलं वक्तुं भगवत्कीर्तनश्रवणानुभावमाह, पतितः स्खलितः पतितः स्खलितः वदन इत्यध्याहार्यम् ॥ ४६—४७ ॥

भगवद्गुणानामुदयः प्रकाशो यस्मिन् तद्भगवद्गुणोदयं नवं नवं इति वचन इति प्रथमाध्याय इति द्वितीयार्थः ॥ ४८—४९ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एकादशार्थानुक्रमते—विप्रशापेति द्वाभ्याम् । अपदेशो व्याजस्तेन ॥ ४१ ॥

संवादं विविनक्ति—यत्रेति । धर्मविनिर्णयः वर्णाश्रमधर्मनिर्णयः मर्त्यपरित्यागः मर्त्यलोकपरित्यागः भूमिपरित्याग इति पाठान्तरम् ॥ ४२ ॥

द्वादशार्थानुक्रमते—युगेति । (सार्द्धत्रयेण)युगलक्षणानि तेषु वृत्तयश्च उपप्लवः कलिदोषैरुपद्रवः चतुर्विधः प्राकृतिको नैमित्तिक आत्यन्तिको नित्यश्चेति चतुर्विधः प्रलयः त्रिविधा प्राकृतिकी नित्या नैमित्तिकी चेति त्रिविधा उत्पत्तिः ॥ ४३ ॥

विष्णुदत्तस्य परीक्षितः महापुरुषविन्यासः अङ्गोपाङ्गादिविन्यास जगदात्मनः लोकयात्राप्रवर्तनेन नियामकस्य सूर्यस्य गणाविभागः इत्यर्थः।इति चोक्तमिति चकारादन्यदपि हे द्विजश्रेष्ठाः!यो युष्माभिः यत्पत्यहं पृष्टोऽस्मि तदुक्तम् इतीत्थम् इह पुराणे सर्वशः कार्त्स्न्येन हरेर्लीलारूपाणि अवतारकर्माणि एव कीर्तितानि ॥ ४४—४५ ॥

एतत्पुराणकथनश्रवणफलं वक्तुं भगवत्कीर्तनश्रवणानुभाव माह–पतित इति । क्षुत्वा क्षुत्कृत्य प्रस्खलेति वा पाठः तदा हरये नम इति श्रुत्वेत्यर्थः हरये नम इत्युच्चैर्गृणातीति सम्बन्धः ॥ ४६ ॥

किञ्च सङ्कीर्त्यमान इति । श्रुतोऽनुभावो यस्य तथाभूतो वा हरिः पुंसां सङ्कीर्तयतां शृण्वतामात्मनः चित्तं प्रविश्याशेषं व्यसनं दुःखं तत्सतत्त्वुरितं वा धुनोति यथाऽर्कः सूर्यस्तमो धुनोति यथा वाऽतिवातः चण्डवायुरभ्रं धुनोति तद्वत् ॥ ४७ ॥

किञ्च भगवत्सङ्कीर्तनमेव महाफलं तद्व्यतिरिक्तं सर्वं मिथ्या लापमात्रमिति प्रपञ्चयति चतुर्भिः—मृषागिर इति । यत्र भगवानधोक्षजो न कथ्यते न प्रतिपाद्यते ता मृषागिरः मिथ्यावाचः प्रत्युतासत्यीरसत्याः दोषावहाः यद्भगवद्गुणानामुदयः प्रकाशो यस्मिं स्तदेव वाचः सत्यं मङ्गलावहं पुण्यावहं च अत्यादरात्प्रतिपदं तच्छब्दप्रयोगः ॥ ४८ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यत्रोद्धववासुदेवसंवादे आत्मविद्याः परमात्मविद्याः अखिला अनुवर्णितत्वेनोक्ताः वर्णाश्रमविनिर्णयश्चोक्तः ॥ ४२ ॥

युगलक्षणं तदनुरूपा वृत्तिश्च उपप्लवो नाशः राजसादिभेदेनोत्पत्तिस्त्रिविधा प्राकृतिकी नैमित्तिकी नित्या च ॥ ४३ ॥

विष्णुदत्तस्य परीक्षितः महापुरुषविन्यासः महापुरुषस्याङ्गोपाङ्गादिव्यवस्थितिविशेषः सूर्यस्य स्थितिश्च इति समाप्तिपर्यन्तं सर्वमुक्तम् ॥ ४४—४५ ॥

क्षुत्वा क्षुतं कृत्वा ॥ ४६ ॥

अतिशयितो वातः अभ्रं मनोरं नीरदमिव ॥ ४७ ॥

अधोक्षजो भगवान् याभिर्गीर्भिर्न कीर्त्यन्ते ता गिरोऽसत्कथाः मृषा निष्फलाः असतीरसत्योऽमङ्गलाः यत्रस्थो भगवद्गुणोदय तदेव सत्यं यथोक्तफलम् ॥ ४८ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

पतित इति कैमुत्यार्थमुक्तिः ॥ ४६—४६ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

मर्त्यस्य मर्त्यलोकस्य परित्यागः आत्मनो योगमायाप्रभावत इति लोकैर्बुद्धिभिर्दत्ता व्यञ्जिता ॥ ४२ ॥

युगलक्षणं तदनुरूपा वृत्तिश्च उपप्लवो धर्मविप्लवः त्रिविधा प्राकृती नैमित्तिकी नित्या च ॥४३—४५ ॥

एतावत्कथाकीर्तनस्य फलं ब्रूहीति चेत्तत्र कैमुत्येनाह, पतित उच्चप्रदेशात्पतितः प्राप्तः स्खलितः समानप्रदेशेऽपि स्खलनात् पादविन्यासात्प्रच्यवमानः क्षुत्वा क्षुतं कृत्वा उच्चैरतिघोरपापादपि ॥ ४६ ॥

चित्तं प्रविश्य व्यसनं धुनोति अर्कस्तम इव सच गुहागतं तमो न धुनोतीत्यपरितोषादाह—अतिवातोऽभ्रमिव ॥ ४७ ॥

अस्य शास्त्रस्य कृष्णकीर्तनं एव तात्पर्यमितरत्कीर्तनमविगीतमपि न कुर्यात् तत्कीर्तनं यत्प्रसङ्गात्तद्गीतमतिनन्दितं तदपि कुर्यादित्याह—मृषेति । ताः सत्या अपि गिरो मिथ्या एव प्रिया अपि गिरोऽसतीरसत्याः कटूक्तय एव तथा सतां त्रियुगामपि कथा असत्कथा एव कुतः यत् यतो भगवान्न कथ्यते इति अतः असत्यात्वाद्यपि मिथ्यात्वादि गिरोवक्तोऽपि कटुभाषी सत्कथकोऽप्यसत्कथक उच्यते इति भावः । च कलितत्वात्सत्यापि भगवद्यशोऽन्वितं तदेव सत्यं महाप्रमाणितत्वं सकलत्वात्मङ्गलमपि तदेव मङ्गलं नान्यत् भगवतः पवित्रादृग्गुणादिकमपुण्यमेतत्सर्वमेकमपि तदेव पुण्यं यतो भगवतो गुणास्त्वेव ननु दोषयोर्वचो वक्तव्यत ॥ ४८ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

मर्त्यस्य अनित्यलोकस्य परित्यागः ॥ ४२ ॥

युगलक्षणानि तेषु युगलक्षणानुरूपा वृत्तिश्च कलौ नृणाम् उपप्लवः बुद्धिव्यामोहः त्रिविधा प्राकृतिकी नैमित्तिकी नित्या चेति ॥ ४३—४५ ॥

सर्वांसत्युपलक्षणं शृण्वन्नित्यस्यापि ॥ ४६ ॥

श्रुतोऽनुभावो यस्य सः सङ्कीर्त्यमानः श्रुतानुभावमात्रो वेत्यर्थः । एतदप्युपलक्षणम् "स्मृतो वा ध्यातो वा" इत्यादेः ॥ ४७ ॥

मृषागिरः निरर्थिकाः वाचः असतीः असत्यः अमतां कथा यासु ताः यत् यासु भगवान् न कथ्यते सत्यं सफलैव भगवद्गुणानामुदयो यस्मात्तत् ॥ ४८ ॥

———

भाषा टीका ।

फिर एकादश स्कन्ध में ब्राह्मणों के शाप के मिष से अपने यदुकुल का संहार करना, जिसके पीछे उद्धव और श्रीवासुदेव का अद्भुत सम्वाद है ॥ ४१ ॥

जिस सम्वाद में सम्पूर्ण आत्मविद्या और धर्म का निर्णय किया है । पश्चात् अपने योगप्रभाव से श्रीकृष्ण का मनुष्य लोक को त्यागना, यह एकादश स्कन्ध का अर्थ समाप्त हुआ ॥ ४२ ॥

तदेव (१) रम्यं रुचिरं नवन्नवं तदेव शश्वन्मनसो महोत्सवम् ।
तदेव शोकार्णवशोषणं नृणां यदुत्तमश्लोकयशोऽनुगीयते ॥ ४९ ॥
न(य)तद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत (२)कर्हिचित् ।
तद्ध्वाङ्क्षतीर्थं नतु हंससेवितं यत्राच्युतस्तत्र हि साधवोऽमलाः ॥ ५० ॥
स वाग्विसर्गो जनताऽघसंप्लवो यस्मिन् प्रतिश्लोकमबद्धवत्यपि ।
नामान्यनन्तस्य यशोङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥ ५१ ॥
नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।
कुतः पुनः शश्वदभद्रमीश्वरे न ह्यर्पितं कर्म (३)यदप्यनुत्तमम् ॥ ५२ ॥
यशःश्रियामेव परिश्रमः परो वर्णाश्रमाचारतपःश्रुतादिषु ।
अविस्मृतिः श्रीधरपादपद्मयोर्गुणानुवादः श्रवणादिभिर्हरेः ॥ ५३ ॥
अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च ।
सत्त्वस्य शुद्धिं (४)परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम् ॥ ५४ ॥
यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतम् ।
नारायणं देवमदेवमीश(५)मजस्रभावा भजताऽऽविवेश्य ॥ ५५ ॥
अहं च संस्मारित आत्मतत्त्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ।
प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वताम् ॥ ५६ ॥

भाषाटीका ।

कलियुग में मनुष्यों की उन वृत्तियों का व्यत्यय । फिर चार प्रकार के प्रलय और तीनप्रकार की उत्पत्ति का कथन ॥ ४३ ॥

पश्चात राजर्षि विष्णुरात परीक्षित का देह त्याग, फिर व्यास जी से वेद की शाखाओं का विभाग, फिर मार्कण्डेय ऋषि की सुन्दर कथा है, महापुरुष श्रीविष्णु के अंग पार्षद आयुध और भूषणों का विन्यास, फिर जगदात्मा श्रीसूर्यनारायण का विन्यास कहा है ॥ ४४ ॥

हे द्विजश्रेष्ठ हो ! जो तुमने प्रश्न किया सो इसप्रकार सम्पूर्ण तुम्हारे आगे वर्णन किया, तथा श्रीकृष्ण की लीला और अवतारों के कर्मों का सर्वत्र कीर्त्तन किया है ॥ ४५ ॥

पुरुष उच्चस्थान से गिरपड़े तब, चलने में फिसल पड़े उस समय में, अथवा आर्त्त होने पर, वा छींक लेकर भी "हरये नमः" इसप्रकार ऊँचे स्वर से यदि उच्चारण करे तो प्राणी सम्पूर्ण पातकों से छूट जाता है ॥ ४६ ॥

श्रीअनन्त भगवान् का कीर्त्तन करने से तथा प्रभाव सुनने से वे आप ही स्वयं चित्त में प्रवेश कर पुरुषों के सम्पूर्ण दुःखों को नष्ट करते हैं । जैसे अन्धकार को सूर्य दूर करता है, तथा जैसे प्रचण्ड पवन मेघ को नष्ट कर देता है ॥ ४७ ॥

जिन वाणियों में भगवान् श्री अधोक्षज नहीं गाये गये, वो वाणी मिथ्या और खोटी हैं, तथा असद्वालाप रूप हैं और जिनमें भगवद्गुणानुवाद का ही वर्णन है, वो ही सत्य है, वही वाणी मङ्गल रूप है, और वही पुण्य रूप है ॥ ४८ ॥

———

श्रीधरस्वामिकृतभावार्थदीपिका ।

नवनवं यथा भवति तथा रुचिरं रुचिप्रदम् महानुत्सवो यस्मात् ॥ ४९ ॥

चित्राणि पदानि यस्मिन् तदपि जगत्पवित्रयतीति तथा तद्धरेर्यशो न प्रगृणीत न वर्णयेत्तद्वचो ध्वाङ्क्षतीर्थं काकतुल्य-नराणां रतिस्थानं नतु हंसैर्ज्ञानिभिः सेवितम् तत्र हेतुः यत्रेति ॥ ५० ॥

स वाग्विसर्गः स एव वाचः प्रयोगो जनताऽघसंप्लवो जन-समूहाघनाशकः यद्यस्मात्तान्येवान्यैः कीर्त्यमानानि शृण्वन्ति श्रोतरि सति गायन्ति नो चेत्स्वयमेव गृणन्ति ॥ ५१ ॥

(१) पुण्यं । (२) यदि कर्हिचिदहरेत् । (३) यदप्यकारणम् । (४) परमात्मभक्तिं । (५) अवाह्यभावाभजताभिवेश्य । इति विज०पाठः । मन्त्राह्यभावाभजताभिवेश्य इति वीर० पाठः ।

श्रीधरस्वामिकृतभावार्थदीपिका ।

इदानीं ज्ञानकर्मादरादपि भगवत्कीर्तनादिष्वेवाऽऽदरः कर्तव्य इत्याह—त्रिभिः । नैष्कर्म्यं ब्रह्म तत्प्रकाशं यज्ज्ञानं यतो निरञ्जनमुपाधिनिवर्तकं तदप्यच्युतभक्तिवर्जितं चेन्न शोभते नापरोक्षपर्यन्तं भवतीत्यर्थः । ईश्वरे न चेदर्पितं नहि यदनुत्तमं सर्वोत्तममपि कर्म तदपि पुनः कुतः शोभते यतः शश्वत्साधनकाले फलकाले चाभद्रं दुःखात्मकम् ॥ ५२ ॥

किञ्च, वर्णाश्रमाचारादिषु यः परो महान् परिश्रमः स यशोयुक्तायां श्रियामेव कीर्तिः सम्पत्तिश्च केवलं परः पुरुषार्थ इत्यर्थः । गुणानुवादादिभिस्तु श्रीधरपादपद्मयोरविस्मृतिर्भवति ॥ ५३
ततः किमत आह—अविस्मृतिरिति । क्षिणोति नाशयति ॥ ५४ ॥

अथेदानीं श्रोतॄनात्मानं चाभिनन्दन्नाह—यूयमिति द्वाभ्याम् । हे द्विजाग्र्याः ! यद्यस्मादात्मन्यन्तःकरणे श्रीनारायणमभिनिवेश्य शश्वद्भजत सम्भावनायां लोट् अतो भूरिभागा बहुपुण्याः कथम्भूतम्? अखिलात्मभूतं सर्वान्तर्यामिणम् अत एव देवं सर्वोपास्यम् यदेतं न देवोऽन्यो यस्य तम् कुतः ईशं यद्वा, यस्माद्यूयं भूरिभागास्तत एव आदिस्वरूपप्रकाशकतो नारायणं भजतेति विधिः ॥ ५५ ॥
स मया श्रुतम् ॥ ५६ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

चित्रपदमपि भगवत्कीर्तनवर्जितं वचो न शोभते किं तद्ध्वाङ्क्षतीर्थं न वर्णानां यतो नैष्कर्म्यभंश्यं हंसशब्दो निर्मलपुरुषपरः वाग्विसर्गः वाचः मुखारणं जनताघविप्लवः विप्लवहेतुः ॥ ५० । ५१

नैष्कर्म्यं ज्ञाननिष्ठा तदपि भगवद्भक्तिरहितं चेत् निरञ्जनतया न शोभते किन्तु ज्ञानानां सवरूपं निष्कृष्टं श्रीभगवति ईश्वरेऽनर्पितं कर्म न शोभते इति किं पुनर्योगमिश्रम् ॥ ५२ ॥

वर्णाश्रमाचारादिषु परिश्रमो यत्कीर्तनादेः प्रकृष्टयाऽर्थ्याऽति शुद्धिः रजस्तमोरहितं ज्ञानं प्रकारिज्ञानं प्रकारज्ञानं तदेवम् अत्र पाठान्तरव्याख्या च वक्ष्याराधनीयो देवो नास्ति तम उद्दृश्यमाना विषयान्तरेषु अवद्ध्यमनसः आत्मन्यभिनिवेश्येत्यन्वयः ॥ ५३-५७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

रमणीयं नवं नवं रुचिरं रुचिजनकं तदेव शाश्वत् सदा मनसो महोत्सवं महानन्दकरं शोकार्णवस्य शोषणं किं तत् यदत्र उत्तमश्लोकस्य भगवतो यशोऽनुवर्ण्यते भगवद्गुणविवर्णितमुक्तत्वेऽप्यादरादपुनरुक्तम् ॥ ४९ ॥

एतदेव व्यतिरेकेणाह द्वाभ्याम्—नेति । यद्वचः चित्राणि पदानि यस्मिंस्तथाभूतमपि जगत्पवित्रं हरेर्यशः कीर्तिं न वक्ति न प्रतिपादयति तद्वचः ध्वाङ्क्षतीर्थं काकतुल्यानां कामिनां रतिस्थानं नतु हंसमहर्षीणां निषेवितं तत्र हेतुः यत्र प्रबन्धः अच्युतः प्रतिपाद्य इति शेषः तत्रैव हंसाः निर्मलान्तःकरणाः सात्त्विकाः रमन्त इति शेषः ॥ ५० ॥

तद्वाग्विसर्गः स एव वाचः प्रयोगः जनतायाः जनसमूहस्य पापविनाशकः कोऽसौ यस्मिन् वाग्विसर्गे प्रतिश्लोकमबद्धवत्यपि यद्यप्युक्तेष्वनन्तस्य भगवतो यशसा अङ्कितानि यशःप्रकाशकानि नामानि भवन्ति यत एवमतः साधवः तद्वाग्विसर्गं शृण्वन्ति सत्सु गायत्सु श्रोतृषु सत्सु कथयन्ति तद्वाग्विसर्गं केवलं गायन्तीत्यर्थः ॥ ५१ ॥

विशुद्धज्ञानयोगनिष्ठापि भगवद्गुणादिश्रवणादिविधुरा न शोभते किंपुनः कर्मयोगनिष्ठेत्याह—नैष्कर्म्यमिति । निर्गतं कर्म यस्मात् स निष्कर्मा तदेव नैष्कर्म्यं सकलकर्मबन्धविध्वंसकमित्यर्थः निरञ्जनं प्रकृतिसम्बन्धरहितमत एव निर्मलं ज्ञानमच्युतभाववर्जितमच्युतगुणानुश्रवणादिभिर्विधुरं चेत् नितरां न शोभते ततः प्रत्यूहमवाप्नोतीति भावः । यतो ज्ञानमेवालं न शोभते कुतः पुनः कर्म शोभेत करणभूतम् ईश्वरे तत्रार्पितं नार्पितमत एव शश्वत्सदा अभद्रमनुष्ठानदशायां च पतनशङ्कया दुःखावहं किंबहुना यदप्यनुत्तमं सर्वोत्तममपि कर्म कुतः पुनः शोभेत अहैतुकमिति पाठे अनभिसंहितफलमर्पितमित्यर्थः ॥ ५२ ॥

किञ्च यशःश्रियामिति यशोयुक्ता या श्रीः सम्पत्तस्याः निमित्तभूतायाः तदर्थमित्यर्थः । यो वर्णाश्रमधर्मः तपोऽध्ययनादिषु निष्ठाविशेष इति शेषः स परो महान् परिश्रमः परिश्रमफलक एव यशःश्रियोः क्षयिष्णुत्वेन पुरुषार्थाभासत्वादिति भावः । तर्हि तस्य किं फलमित्यत्राह—गुणानुवादश्रवणादरादिभिः श्रीधरपादपद्मयोरविस्मृतिः यदि वर्णाश्रमाचारादिषु निष्ठा तर्हि तथा भगवद्गुणानुवादादिभिरपि तदर्थं भगवत्पादपद्मयोरविस्मृत्या एवं वर्णाश्रमनिष्ठा सफलेत्यर्थः ॥ ५३ ॥

किमविस्मृत्येत्यत आह—अविस्मृतिरिति । अभद्राणि दुःखनिमित्तानि दुरितानि क्षिणोति शं शान्तिं दावाग्निकल्पितां च तनोति सत्त्वस्य शुद्धिं रजस्तमोऽनभिभूतिं सत्त्वगुणाभिवृद्धिम् इति यावत् । तत् ततः परमात्मनि भक्तिं ज्ञानम् यथावस्थितभगवत्स्वरूपज्ञानम् विज्ञानेन प्रकारज्ञानेन विरागात् विषयान्तरवैमुख्येन च युक्तं तनोतीत्यनुषङ्गः ॥ ५४ ॥

यतो भगवद्गुणानुवादादिरीदृशफलवतां यूयमेव च कृतार्था इत्याह द्वाभ्याम्—यूयमिति । हे द्विजाग्र्याः ! यूयम् भूरिभागाः महाभाग्यवन्तः कुतः यतः अन्तःस्थाः न बाह्यानि विषयान्तराणि भजन्तीति अतः बाह्यविषयनिवर्तितान्तःकरणा इत्यर्थः । नारायणमात्मनि हृदये अभिनिवेश्य भक्त्या श्रवणादि द्वारा मनसि स्थिरं कृत्वा भजत सम्भावनायां लोट् अखिलात्मभूतानाम् अन्तरात्मभूतं देवम् स्वतेजसा दीप्यमानम् अतः यस्मादाराधनीयो देवो नास्ति इति तमत एव ईशं सर्वनियन्तारम् ॥ ५५ ॥

यूयं महोपकारिण इत्यभिप्रेत्याह—यदिति । यूयमपि संसारिणम् आत्मतत्त्वमात्मतत्त्वप्रकाशकं पुराणं यस्य सोऽहं च कृतार्थ इति भावः । अनुभूतविषयज्ञानात्मकत्वात् कथम् श्रुतमित्यत्राह—श्रुतमिति । स मया महर्षिसकाशाच्छुकमुखान्महतामृषीणां च शृण्वतां सतां परीक्षितः प्रायोपवेशे सभायाम् मया श्रुतमिति सम्बन्धः ॥ ५६ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पुनरपि स्तौति—तदेवेति । तदेव पुण्यं पुण्यकरं रुचिरं सुन्दरं महानुत्सवो येन तत्तथा ॥ ४९ ॥

न यद्वच इत्यादिश्लोकत्रयं व्याख्यातार्थम् ॥ ५०—५२ ॥

ननु, वर्णाश्रमाचारादिना निःश्रेयसं वर्णाद्याश्रमाचारयुक्तो गृहस्थोऽपि निर्मुच्यत इत्यतोऽच्युतभावेन किं तत्राह—यश इति । यद्यच्युतभाववर्जितस्तर्हि वर्णाश्रमाचारतपःश्रुतादिषु यः परिश्रमः यशःश्रियामेवार्थं तस्मात्त्वनिष्कामसिद्ध्यै भवति। ननु, अच्युतभावः केन स्यात्तत्राह—अविस्मृतिरिति । गुणानुवादश्रवणादिभिः कृष्णाच्युतभक्तेः पुंसः श्रीधरपादारविन्दयोरविस्मृतिः निरन्तराभ्यासलक्षणं स्मरणं भवति ॥ ५३ ॥

सा कर्तुः किं करोति फलमित्याह—अविस्मृतिरिति । सत्त्वस्यान्तःकरणस्य ॥ ५४ ॥

यूयमत्राह्मणा अनन्यभक्ताः यदेवं देवेभ्योऽन्यं नारायणं देवमात्मनि मनस्यभिनिवेश्य भजतेति यतस्तस्मादतिभूरिभागा अति भाग्यवन्तः ॥ ५५ ॥

अहञ्च भूरिभाग इति द्योतयति—अहञ्चेति, भवद्भिरहञ्चात्मतत्त्वं संस्मारितः ममापीश्वरात्मतत्त्वमाम्नायतः, गामित्याह—श्रुतमिति । प्रसङ्गोऽप्यनुकूल इत्याह—प्रायेणेति ॥ ५६—५७ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

न यद्वच इति । यत्राच्युतो गीयत इति शेषः ॥ ५० ॥

स वाग्विसर्ग इति प्रथमं व्याख्यातमेव उत्तमगायके सति शृण्वन्ति अन्य तु तादृशत्वे सति गायन्ति तदुभयाभावे शृण्वन्ति गीर्भिर्गृणन्त्यभ्यस्यन्ति चेत्यर्थः ॥ ५१—५७ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

अरण्यमपि प्रस्थितरामानुगमनभल्लूकबिलप्रवेशादिकं यत् तत् रम्यमेव रुचिरमिति भक्तानामरोचकमपि श्रीजानकीत्यागादिकं रुचिरमेव पुरातनमपि भगवच्चरित्रं नवं नवमेव मारीचानुगमनानन्तरम् रावणकृतसीताहरणादिकं मनसो महोत्सवनाशकमपि महोत्सवकरमेव पतिपुत्रादिवैराग्योत्पादकत्वेन शोकार्णवकरमपि तत् शोकार्णवशोषणमेव ॥ ४९ ॥

न यद्वच इति श्लोकत्रयम् भक्तेरेव सर्वोत्कर्षं व्यापकं महापुराणस्यास्य प्रान्तेऽपि शेषेऽपि स्थापितं यथा महामन्त्रः कश्चिदाद्यन्तयोर्निमा बीजत्रयेण पुटितः स्यादिति ॥ ५० ॥ ५१ ॥

अनुत्तमं श्रेष्ठं निष्कामकर्म ॥ ५२ ॥

किञ्च, वर्णाश्रमादिषु यः परो महान् परिश्रमः स यशोयुक्तायाम् श्रियामेव पर्यवसितः प्रायो भवेत् यशःसम्पत्तिसाधक एव न तु भगवत्प्राप्तिसाधक इत्यर्थः । हरेर्गुणानुवादश्रवणादिभिस्तु यः परिश्रमः सतु श्रीधरपादपद्मयोरविस्मृतिर्न भवति विस्मृतिर्यस्मात् सः ॥ ५३ ॥

ततः किमत आह—अविस्मृतिरिति । शमं बुद्धेर्भगवन्निष्ठां "शमो मन्निष्ठता बुद्धेः" इति भगवदुक्तेः ॥ ५४ ॥

तदेवं न विद्यते देवो यस्य यस्मादिति वा, भजतेति तद्भावनायां लोट् ॥ ५५—६१ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

तत् वचः एव रम्यत्वादिगुणवत् यत् यस्मिन् वचसि ॥ ४९ ॥

जगत्पवित्रयतीति तत्तथा वायसतीर्थं नराकारकाकसेवितम् ॥ ५० ॥

वाग्विसर्गः स एव वाचकः प्रयोगः ॥ ५१ ॥

निर्गतानि कर्माणि यस्मात्तन्निष्कर्मं तदेव नैष्कर्म्यं केवलक्षेत्रज्ञविषयकं ज्ञानम् निरञ्जनं सर्ववासनाशून्यम् तदप्यच्युतभावेन "देहेन्द्रियमनोबुद्धिप्राणादिभ्यो विलक्षणः" ज्ञानस्वरूपः ज्ञातृत्वादिधर्मकः क्षेत्रज्ञोऽच्युतात्मकः अतोऽच्युत उपाश्रयणीय इत्येवंभूतेन वर्जितं चेन्न शोभते यदनुत्तमं नास्त्युत्तमं यस्मात्तदनुत्तमं निष्कामं कर्मापीश्वरेऽनर्पितं चेत्तदपि न शोभते यदा तदा शश्वदभद्रं काम्यं कर्म कुतः शोभते न कुतोऽपीत्यर्थः ॥ ५२ ॥

किञ्च,वर्णाश्रमाचारादिषु परः भगवत्सम्बन्धवर्जितो यः परिश्रमः यशोयुक्तायाः श्रियाः सम्पदेव चरितार्थो भवति दुःखोदर्कफलो भवतीत्यर्थः । हरेर्गुणानुवादादिभिस्तु श्रीधरपादपद्मयोरविस्मृतिः स्यात् ॥ ५३ ॥

अविस्मृतिफलमाह—अविस्मृतिरिति । शमं श्रीकृष्णप्राप्तिसुखम् ॥ ५४ ॥

देवं सर्वघातकमदेवमनन्यधीरत्यम् यतः भजत अतोभूरिभागाः ॥ ५५ ॥

आत्मा सर्वात्मा भगवान् तत्त्वमुपादेयो यस्मिन् तत्पुराणं मे मया परमर्षेः श्रीशुकस्य वक्त्रात् अधुना तु भवद्भिरहं संस्मारितः स्मृतात्मतत्त्वः कृतः ॥ ५६ ॥

भाषा टीका ।

जिस वचन में उत्तम श्लोक का यश गाया जाता है वही, रम्य है रुचिर है तथा भक्तों को नवीन २ सदृश जान पड़ता है, और वही सदा मन के महान उत्सवका करने वाला है और वही मनुष्यों के शोक समुद्र को सुखाने वाला है ॥ ४९ ॥

चित्रपदों वाला भी जो वचन कदापि जगत्पवित्र श्रीहरि के यश को नहीं कहता है, वह काकों का तीर्थ है, उसका सेवन हंस नहीं करते, क्योंकि? जहां श्री अच्युत भगवान् गाये जाते हैं सब साधुजन उन्हीं में रमते हैं, ॥ ५० ॥

वह वाणी का उच्चारण जनों के पापों का नाश करने वाला है; जिसमें प्रति श्लोक अबद्ध होने पर भी अनंत भगवान् के यश से अंकित नाम गाये जाते हैं और जिसको साधु जन वक्ता के मिलने पर श्रवण करते है, श्रोताओं के मिलने पर कथन करते हैं, दोनों के अभाव काल में आपही मनन करते हैं, ॥ ५१ ॥

ब्रह्म के कथन करने वाला उपाधियों का निवर्तक ऐसा भी ज्ञान हो परंच यदि श्रीकृष्ण के भक्ति से वर्जित होवे

एतद्वः कथितं विप्राः ! कथनीयोरुकर्मणः ।
माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनम् ॥ ५७ ॥
य एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः ।
श्रद्धावान् योऽनुशृणुयात्पुनात्यात्मानमेव सः ॥ ५८ ॥
द्वादश्यामेकादश्यां वा शृण्वन्नायुष्यवान् भवेत् ।
[1]पठत्यनश्नन् प्रयतस्ततो भवत्यपातकी ॥ ५९ ॥
पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् ।
उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ॥ ६० ॥
देवता मुनयः सिद्धाः पितरो मनवो नृपाः ।
यच्छन्ति कामान् गृणतः शृण्वतो यस्य कीर्तनात् ॥ ६१ ॥
[2]ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविन्दते ।
मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलम् ॥ ६२ ॥
पुराणसंहितामेतामधीत्य प्रयतो द्विजः ।
प्रोक्तं भगवता [तो] यत्तु तत्पदं परमं व्रजेत् ॥ ६३ ॥
विप्रोऽधीत्याऽऽप्नुयात्प्रज्ञां राजन्योदधिमेखलाम् ।
वैश्यो निधिपतित्वं च शूद्रः शुध्येत पातकात् ॥ ६४ ॥

भाषा टीका ।

तो वह ज्ञान अच्छी प्रकार शोभा को नहीं प्राप्त होता, तब फिर सर्वोत्तम कर्म भी हो और यदि ईश्वर में अर्पण नहीं किया गया हो, तो वह सदा अमंगल है, इसमें क्या संदेह है ५२

वर्ण आश्रम आचार तप इनमें जो परिश्रम है वह केवल यश से युक्त सम्पत्ति की ही कीर्ति है, और हरि के गुणानुवाद श्रवणादि से श्रीधर के चरण कमल का जो अविस्मरण है वही परमपुरुषार्थ है ॥ ५३ ॥

श्रीकृष्ण के चरणारविन्दों का अविस्मरण ही समस्त अमंगलों को नाश करता है, और शांति का विस्तार करता है, तथा सत्त्व की शुद्धि परमात्मा की भक्ति और विज्ञान वैराग्य सहित ज्ञान का भी विस्तार करता है ॥ ५४ ॥

हे द्विज श्रेष्ठ हो ! आप लोग बड़े भाग्य शाली हो आप लोग, सम्पूर्णों के आत्म स्वरूप सर्वोपास्य और जिनका अन्य कोई उपास्य नहीं ऐसे श्रीनारायण को अपने आत्मा में ध्यान द्वारा प्रवेश करके निरंतर भावना युक्त होकर उन्हीं को भजो ॥ ५५ ॥

आपने कृपा करिके मेरे लिये उस आत्मतत्त्वका स्मरण कराया, जो कि मैंने गंगा तट पर राजा परीक्षित की सभा में बड़े २ ऋषियों के सुनते २ पूर्व काल में श्रीशुकदेव जी के मुख से सुना रहा ॥ ५६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

एतत्पुराणकीर्तनादिफलं प्रपञ्चयितुमाह-एतदित्यष्टभिः ॥ ५७ ॥

यामक्षणं याम क्षणं वाऽनन्यधीः । आत्मानमेव सः पुनाति न तु स्नानादिकमपेक्षत ॥ ५८—६१ ॥

ऋगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविन्दते तत्फलमेतां पठित्वाऽनुविन्दत इति ॥ ६२ ॥

किञ्च, प्रोक्तमिति ॥ ६३ ॥

राजन्य उदधिमेखलां पृथ्वीं अभिप्रायः ॥ ६४ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

कालदेशादिविशेषयोगात् फलविशेषमाह—श्रद्धावानिति ॥ ५८—६० ॥

फलप्रदानाह-देवता इति ॥ ६१ ॥

फलातिशयमाह-ऋच इति ॥ ६२—६३ ॥

अधिकारानुरूपफलविशेषमाह—विप्र इति । उदधिमेखलां भूमिम् ॥ ६४ ॥

(१) पठत्यनश्नन् प्रयतः पूतो भवति पातकी इति वीर० (२) ऋषयः इति च ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतत्पुराणकीर्तनादिफलं प्रपञ्चयति—षड्भिः, एतदिति । कथनीयानि उरुक्रमपरिमितानि कर्माणि चरितानि यस्य तस्य विष्णोः वासुदेवस्य माहात्म्यप्रकाशकं वो युष्मभ्यं कथितमेतत्पुराणं सर्वाशुभविनाशकं कीर्तयतां सर्वामङ्गलविघातकम् ॥ ५७ ॥

श्रवणफलमाह-य एवमिति । यामं क्षणं चेत्यर्थः स आत्मानं पुनात्येव ॥ ५८ ॥

कालविशेषयोगात्फलविशेषानाह—द्वादश्यामिति । यः पातकवापि प्रयतः समाहितचित्तः अनन्यः प्रयोजनान्तररहितः सन् पठति स पूतो भवति अनक्षाणीति पाठान्तरम् ॥ ५९ ॥

पुष्कर इति यतात्मवान्समाहितमनाः ॥ ६० ॥

सर्वफलसाधनत्वं वदन् फलदानाह-देवतादयः इति । येऽत्र पुराणेऽनुकीर्तिताः ते देवादयः गृणतः कथयतः शृण्वतो वा पुरुषस्य कामानिष्टार्थान्यच्छन्ति देवताद्यन्तर्यामी भगवान् यच्छतीति भावः ॥ ६१ ॥

फलातिशयमाह-ऋच इति । वेदत्रयमधीत्य यत्फलं प्राप्नुयान्मधुकुल्यादिरूपो यत्फलं मध्वादिप्रवाहयुक्तावदानाद्यत्फलमित्यर्थः । तत्फलं प्राप्नुयात् ॥ ६२ ॥

किञ्चैताम् पुराणसंहितामधीत्य भगवतः विष्णोः परमं पदं प्रोक्तं प्रतिपादितं तद्व्रजेत्प्राप्नुयात् ॥ ६३ ॥

अधिकारानुरूपान् फलविशेषानाह-विप्र इति । राजन्यः अम्बुधिमेखलां पृथ्वीं शूद्रः श्रुत्वा पातकान्मुच्यत इत्यर्थः ॥ ६४ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

यामं क्षणं च नान्यानन्तरितायां द्वितीया आत्मानम् मनः ॥ ५८ ॥

कालविशेषमाह-द्वादश्यामिति ॥ ५९ ॥

देशविशेषमाह-पुष्कर इति । पुष्करे वराहक्षेत्रे भयात् संसारभयात् ॥ ६० ॥

अत्र ये देवादयः कीर्तिताः तेऽपि संहितापाठादिकुर्वतोऽभीष्टानि ददतीत्याह, देवता इति ॥ ६१ ॥

किञ्च, ऋगादीन्यधीत्य यत्फलं तस्मादेतत्संहितामधीत्य स्यादित्याह-ऋच इति । मधुकुल्या मधुनद्यः मधुनद्यादिकथनं सुखातिशयार्थम् ॥ ६२ ॥

न केवलमैहिकं फलं किन्तु मुक्तिरपीति कथयति, पुराणेति यदिष्णोः परमं पदं तद्व्रजेत् ॥ ६३ ॥

अम्बुधिमेखलां भूमिम् ॥ ६४ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवमिति-आत्मानमेव पुनातीति किं वक्तव्यं काका सर्वमेव पुनातीत्यर्थः ॥ ५८ ॥

द्वादश्यामेकादश्यां वेति यदा यस्यां व्रतं प्राप्यते तदा तस्यामेवेत्यर्थः ॥ ५९—६३ ॥

विप्रोऽधीत्येत्यादिकं तत्तत्कामाग्रहपराणां प्रलोभनार्थमापातफलम् ॥ ६४ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

ऋगाद्यधीत्य द्विजो मधुकुल्यादि यदनुविन्दते तत्फलमेतां पठित्वा अनुविन्दते इति ॥ ६२ ॥ ६३ ॥

राजन्य उदधिमेखलां सन्धिरार्षः ॥ ६४ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

माहात्म्यं माहात्म्यप्रकाशकं महापुराणं वाच्यवाचकयोरभेदात् ॥ ५७—६१ ॥

मधुकुल्यादि यदनुविन्दते तत्फलं प्रयतः सावधानः एतामधीत्यानुविन्दते यत्पूर्वत्र बहुधः प्रोक्तं भगवतः पदं तच्च व्रजेदिति द्वयोरन्वयः ॥ ६२—६३ ।

राजन्योदधिमेखलां भुवं सन्धिरार्षः ॥ ६४ ॥

भाषाटीका

हे विप्र हो ! कथन करने योग्य हैं चरित्र जिनके ऐसे श्रीवासुदेव भगवान् के सर्व अशुभों को नाश करने वाला यह माहात्म्य हमने तुमसे कहा ॥ ५७ ॥

इसको जो पुरुष नित्य प्रहर भर अथवा क्षण मात्र भी अनन्य बुद्धि होकर श्रवण करावे और जो पुरुष श्रद्धावाला होकर श्रवण करे, वह अपने आत्मा को अवश्य ही पवित्र करता है ॥ ५८ ॥

द्वादशी अथवा एकादशी में श्रवण करने से पुरुष आयुष्य वाला होता है, और जो पुरुष प्रयत्न पूर्वक उपवास करके इस संहिता का पाठ करते हैं, उनके समस्त पातक नष्ट होजाते हैं ॥ ५९ ॥

पुष्कर में मथुरा में अथवा द्वारका में जितेन्द्रिय होकर उपवास करके जो पुरुष इस संहिता का पाठ करते हैं, वे संसार के भय से छूटकर परम धाम को प्राप्त होते हैं ॥ ६० ॥

जो पुरुष इस संहिता का श्रवण करते हैं, कीर्तन करते हैं, तथा मनन करते हैं, देवता मुनि सिद्ध पितर और नृपलोक उनकी कामना को पूर्ण करते हैं ॥ ६१ ॥

द्विज वर्ण, ऋग्वेद यजुर्वेद और सामवेद को पढ़ने से जिन सहत की नदी घृत की नदी और दुग्ध की नदी रूप फल को प्राप्त होते हैं, सो सब इस संहित के पढ़ने से प्राप्त होते हैं ॥ ६२ ॥

हे ब्राह्मण हो ! प्रयत्न पूर्वक इस पुराण संहिता को पढ़कर पुरुष श्रीविष्णु भगवान् के सर्वोत्कृष्ट परमपद को प्राप्त होता है ॥ ६३ ॥

ब्राह्मण, इस संहिता को पढ़कर बुद्धि को प्राप्त होता है, क्षत्रिय, समुद्रान्त पृथिवी के राज्य को प्राप्त होता है, वैश्य, निधि का पति होता है, तथा शूद्र, सम्पूर्ण पातकों से शुद्ध होता है ॥ ६४ ॥

कलिमलसंहतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णम् ।
इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसङ्गैः ॥ ६५ ॥
तमहमजमनन्तमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिम् ।
द्युपतिभिरजशक्रशङ्कराद्यैर्दुरवसितस्तवमच्युतं नतोऽस्मि ॥ ६६ ॥
उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजङ्गमालयाय ।
भगवत उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ॥ ६७ ॥
*स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजितरुचिरलीलाकृष्टसारस्तदीयम् ।
व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां
द्वादशस्कन्धे द्वादशस्कन्धार्थनिरूपणं नाम
द्वादशोऽध्यायः ॥ १२ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

अस्य पुराणस्यैवंप्रभावातिरेके कारणमाह—कलिमलानां संहतिं समूहं कालयति विनाशयतीति तथा इतरत्र शास्त्रान्तरे ॥ ६५ ॥

शास्त्रप्रतिपादितं भगवन्तं नमस्करोति—तमिति द्वाभ्याम् । जगदुदयस्थितिसंयमा आत्मनो रज आद्यः शक्तयो यस्य तम् द्युपतिभिर्देवैरपि दुरवसितोऽज्ञातस्तवः स्तोत्रम् यस्य तम् इति ॥ ६६ ॥

उपचिताभिरुद्रिक्ताभिर्नवशक्तिभिः प्रकृतिपुरुषमहदहङ्कारतन्मात्ररूपाभिः स्वः आत्मन्येवोपरचितं स्थिरं जङ्गमं चाऽऽलयो यस्य तस्मै भगवते ॥ ६७ ॥

श्रीगुरुं नमस्करोति—स्वसुखेनैव निभृतं पूर्णं चेतो यस्य तेनैव व्युदस्तोऽन्यस्मिन् भावो यस्य तथाभूतोऽप्यजितस्य रुचिराभिर्लीलाभिराकृष्टः सारः स्वसुखगतं स्थैर्यं यस्य सः तत्त्वदीपं परमार्थप्रकाशकं श्रीभागवतं यो व्यतनुत तं नतोऽस्मीति ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायां
द्वादशोऽध्यायः ॥ १२ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

ग्रन्थान्तरवैलक्षण्यमाह—कलिमलेति । इतरत्र राजसादिपुराणेषु ॥ ६५ ॥

जगदुदयस्थितिसंयमात्मशक्तिं संयमहेतुभूतात्मशक्तिं तम शाक्तय इत्युक्ताः ॥ ६६ ॥

उपलब्धिमात्रधाम्ने अज्ञानप्रसङ्गरहितज्ञानात्मकतेजःस्वरूपाय ॥ ६७ ॥

स्वसुखमात्मानुसन्धानसुखं तेनानुकूलचेताः तेन व्युदस्तान्यभावः श्रीभगवद्व्यतिरिक्तभक्तिरपि शब्दः समुच्चये । यद्वा, सुलभसमाधितया साक्षात्कृतस्वरूपोऽपि भगवल्लीलाभिराकृष्टचित्त इत्यर्थः । तत्त्वदीपम् तत्त्वप्रकाशकम् ॥ ६८ ॥

इति हारीतकुलतिलकवाग्विजयसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयश्रीसुदर्शनसूरिणाऽभिहिते श्रीमद्भागवतमहापुराणव्याख्याने श्रीशुकपक्षीये द्वादशस्कन्धः
समाप्तः ॥ १२ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एतत्प्रबन्धस्योत्कर्षप्रभावातिशयकारणं प्रबन्धान्तरवैलक्षण्यमाह—कलीति । कलिमलानां संहतिं कालयति विनाशयतीति तथा सोऽखिलानाम् ईश्वरो हरिरितरत्र राजसादिप्रबन्धान्तरेषु अभीक्ष्णं पुनःपुनः न गीयते अत्र तु तत्कथाप्रसङ्गैरनुपदं पठितः प्रतिपादितः ॥ ६५ ॥

एतत्प्रबन्धप्रतिपादितं भगवन्तं नमस्करोति द्वाभ्याम्—तमिति । जगदुदयादिस्थितिसंयमा जगदुदयादिहेतवः आत्मनः स्वज आद्यः शक्तयो यस्य तं देवैरप्यनवसितः स्तवः स्तोत्रं यस्य तं नतोऽस्मि ॥ ६६ ॥

किञ्च, उपचिताभिः समृद्धियुक्ताभिः कालप्रकृतिमहदहङ्कारपञ्चभूतात्मिका नवशक्तयस्ताभिरात्मन्येवोपरचिताः स्थिराः स्थावरा जङ्गमाश्च आलया यस्य तस्मै उपलब्धिमात्रधाम्ने ज्ञानस्वरूपाय अनङ्कुरितधर्मभूतज्ञानात्मकतेजःस्वरूपाय सुरऋषभाय देवश्रेष्ठाय सनातनाय भगवते नम इति ॥ ६७ ॥

अत्र कश्चिदध्यायसमाप्तिः कल्पितमिति दृश्यम् ॥

ग्रन्थान्ते स्वगुरुनमस्कारात्मकं मङ्गलमाचरति—स्वसुखेति । स्वसुखं स्वानन्दस्वात्मानुसन्धानसुखं तेन निभृतं पूर्णं चेतो यस्य सः तेन स्वसुखेन व्युदस्तान्यभावः निरतिशयानन्द-

---

* श्लोकोऽयं श्रीवीरराघवीये [तत्त्वदीपमसारम्] इति श्लोकानन्तरं पठ्यते　* अत्राध्यायसमाप्तिः वीरराघवीये

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

स्वनिष्ठित्वमङ्कः अविशब्दः समुच्चये यद्वा सुलभतरसमाधि- तया साक्षात्कृतान्तरात्मस्वरूपोऽपि भगवल्लीलाभिराकृष्टचित्त इत्यर्थः । तद्विषमजितस्वरूपरूपगुणविभूतिप्रकाशकं तत्त्वानां चिद- चिद्वस्तूनाम् अनारोपिताकारायां दीपमिव प्रकाशकमत एवाखिल- पापघ्नम् इदं पुराणं यः कृपया व्यतनुत प्रकाशितवान् तं व्यास- सूनुं श्रीशुकं नतोऽस्मि ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिकायाम्
द्वादशोऽध्यायः ॥ १२ ॥
[अत्राध्यायो न समाप्यते]

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

इतरपुराणेभ्योऽस्य माहात्म्याधिक्यात्फलाधिक्यं माहात्म्याधिक्यं च प्रतिपदं प्रत्यक्षरं च श्रीनारायणस्य गुणगणप्रतिपादकत्वेन- त्याह—कलिमलेति । कलिमलं संसारं च कालयति नाशयतीति कलिमलसंसृतिकालनः इतरत्र पुराणेषु इह पुराणे अशेषमूर्तिः कथाप्रसङ्गैः । ६५ ॥

गुरुनमस्कारानन्तरं तदुपदिष्टस्वरूपं श्रीनारायणं नमति, नमामि । यो भागवतस्याद्यपद्यमारभ्य प्रतिपादितस्तं नतोऽस्मीत्यन्वयः जगदुदया- दिषु आत्मशक्ति स्वरूपशक्तिम् आत्मतन्त्रं स्वतन्त्रम् अजं सर्वज्ञं देहयत एव ज्ञानोत्पत्तेः अस्य तदभावात् स्वज्ञानेनैव सर्वं जाना- तीति ईशानः कालतो गुणतश्चानन्तं नृपतिभिश्चीनपतिभिरज- शङ्कराद्यैः दुरवसितस्तवम् अनिश्चितस्तुतिम् अच्युतं मायानिमित्त- च्युतिरहितम् ॥ ६६ ॥

उपचितनवशक्तिभिः मूलप्रकृतिमहदहङ्कारमनःपञ्चभूताख्य- नवशक्तिभिः आत्मनि स्वाधारतया उपरचितयोः स्थिरजङ्गमयोः येन स तथा तस्मै उपलब्धिमात्रधाम्ने केवलज्ञानस्वरूपाय सुर- ऋषभाय देवोत्तमाय भगवते शब्दमात्रैकविषयाय नमः अनेन श्लोकद्वयेन जन्माद्यस्य यत इत्यादिरर्थो वर्णित इति ॥ ६७ ॥

सूतो ग्रन्थावसानेऽपि गुरुनमस्कारं करोति, स्वसुखेति । स्वा- नन्दत्वात् स्वः परमात्मा तन्निष्ठं सुखं स्वसुखं तेन निभृतं पूर्णं चेतो यस्य स तथा स्वरूपसुखस्य निभृतज्ञानस्य स्वसुखनिभृत- चेताः चेतो ज्ञानमिति वा तेन सुखेन व्युदस्तान्यभावः निरस्तान्य- विषयबुद्धिः तेन विज्ञानेन निरस्तान्यज्ञान इति वा अपि कृत- करणोऽपि अजितस्य हरेरुचिरया लीलया आकृष्टसारः विवशी- कृतचित्तस्थैर्यः अस्य हरेः सम्बन्धि अत एव तत्त्वदीपकं पुराणं व्यतनुत व्याख्यया विस्तृतवान् तं व्याससूनुं शुकं नतोऽस्मि॥६८॥

> सत्यं ज्ञानमनन्तमच्युतमजं निर्दुःखमाखण्डिम—
> निर्दोषाखिलमन्वितमहं वन्दे मुकुन्दं सदा ॥
> यद्भक्त्या कमलाब्जजेशगिरिशानन्तादिदेवाः पदम्—
> सायुज्यं प्रभवन्त्यनेकविधया सत्यो विरत्या च तम् ॥
> व्याख्या भागवतस्य कृष्णरचिता स्वप्रीतिकामात्मना—
> प्रीतस्त्वं भवदासि तत्प्रतिनिधि तद्वाञ्छितं वरान् ॥
> प्राक्तन्निकस्वनतां तव प्रतिभवं पादारविन्दात्मना—
> संसक्ति सुखतीर्थशास्त्रविजराहारस्य पारं तथा ॥
> पदरत्नावलीकण्ठे राजतां हि मुरद्विषः ।
> वनमालेव मालेव मौक्तिकी कृष्णवल्लभा ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीमद्विजयध्वजतीर्थकृतपदरत्नावल्याम्
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

कलिमलेति । कालनो नाशनः इतरत्र कर्मब्रह्मादिकप्रतिपादक- शास्त्रान्तरे अखिलेशो विराडन्तर्यामी नारायणोऽपि तत्पालको विष्णु- र्वाऽपि न गीयते कश्चिद्गीयते वा तत्तत्त्वमीक्ष्यं नैव गीयते तुशब्दोऽवधारणे साक्षाच्छ्रीभगवान् पुनरिह श्रीभागवत एवाभीक्ष्णं गीयते नारायणादयो वा यत्र वर्णितास्तेऽप्येषा एव मूर्त- योऽवतारा यस्य सः तथाभूत एव गीयते नत्वितरत्रेव तद- विवेकेनेत्यर्थः । अत एव तत्तत्कथाप्रसङ्गैरप्यनुपदं पदेऽपद- मपि अङ्गीकृत्य भगवानेव परि सर्वतोभावेन पठितो व्यक्त- मेवोक्त इति ॥ ६५—६७ ॥

नमस्कुर्वन्नेव वक्तृहृदयनिष्ठापर्यालोचनया समस्तग्रन्थतात्पर्यं निर्धारयति—स्वसुखेति । अत्राखिलवृजिनं तादृशभावस्य प्रतिकूल- मुदासीनं च सर्वं क्षयम् अजितशब्देनात्र श्रीकृष्ण एवेति प्रथमे श्रीबादरायणिभाष्ये व्यक्तीकृतोऽस्ति ॥ ६८ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
द्वादशोऽध्यायः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

कालनः विनाशकः अनुपदं प्रतिप्रकरणमेव ॥ ६५ ॥

शास्त्रप्रतिपादितं देवं प्रणमति—तम् अजं नतोऽस्मि किं ब्रह्माणं नमसि न अनन्तं । किं प्रधानं न आत्मतत्त्वं चेतन- स्वरूपं किं शुद्धं जीवं न जगदुदयादयं आत्मशक्तितो यस्य तं किं दुर्गापतिं शंभुं न नृपतिभिर्देवैरजाद्यैरपि दुरवसित- स्तवम् अज्ञातस्तुतिकम् अच्युतम् श्रीकृष्णम् ॥ ६६ ॥

तमेव स्वान्तर्यामित्वेन प्रणमति—नवशक्तिभिः प्रकृति- पुरुषमहदहङ्कारतन्मात्ररूपाभिः ॥ ६७ ॥

स्वेष्टदेवं प्रणम्य श्रीगुरुं प्रणमति—स्वसुखेन ब्रह्मानन्देन निभृतं परिपूर्णं चेतो यस्य सः तेन तथात्वेनैव व्युदस्तो दूरीभूतो अन्यत्र भावो मनोव्यापारो यस्य तथाभूतोऽप्यजितस्य कृष्णस्य रुचिरलीलया कर्त्री अतिबलवत्या आकृष्टः तस्माद्ब्रह्मा- नन्दात् सकाशादपि स्वस्मिन्नानीतः सारो रसानुभवसाम- र्थ्यम् यस्य सः ब्रह्मसाक्षात्कारादपि लीलारसास्वादे माधु- र्याधिक्यमनुभूय तत्रैव यः प्राप्तनिष्ठोऽभूदिति भावः । तेन लीलारसोऽयं तस्य न समाधिप्रतिबन्धकः [illegible]

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

... सति तेन पुनरपि तादृशमनमाध्यर्थमेवायनिष्यत ननु तथा कृतं मंयुत कृपयाऽन्येऽप्योपि तादृशलीलारसास्वादादिरसया तत्त्वदीपं श्रीलीलारसतत्त्वप्रकाशकं व्यतनुत अत एवोक्तम् "हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः" इति 'परिनिष्ठितोऽपि नैर्गुण्य' इत्यादि च ॥ ६८ ॥

इति सारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम् ।
द्वादशे द्वादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ १२ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

अनुपदं प्रतिप्रकरणम् ॥ ६५ ॥

उक्तमाहात्म्यस्य महापुराणस्य विषयं भगवन्तं नमस्करोति, ततीति द्वाभ्याम् । जगदुदयाद्यात्मानकतत्त्वतन्त्रः प्रकृत्याद्याः शक्तयो यस्य स तम् ॥ ६६ ॥

उपचिताभिः समृद्धाभिः प्रकृतिपुरुषमहदहङ्कारतन्मात्ररूपाभिः नवशक्तिभिः स्व आत्मन्येव उपचिताः स्थिताः स्थिरजङ्गमाः आलयो यस्य तस्मै श्रीभगवत्पादपद्मयोर्नित्यवतेन विग्रहः गुणाः "हिरण्मयः पुरुषः" इत्यादिश्रुतिप्रसिद्धाः सूचिताः । स्वरूपगुणान् "अस्थूलः" इत्यादिश्रुतिप्रसिद्धान् सूचयितुं विशिनष्टि-उपलब्धिमात्रधाम्ने इति । उपलब्धिमात्रं स्थूलत्वादिप्राकृतदोषविवर्जितं धाम स्वरूपं यस्य तस्मै ॥ ६७ ॥

हरिं प्रणतस्य गुरुं प्रणमामि, स्वसुखेति । स्वसुखेन निभृतं परिपूर्णं चेतो यस्य सः तेनैव व्युदस्तो दूरीभूतोऽन्यस्मिन् ऐहिकामुष्मिकपदार्थे भावो यस्य तथाभूतोऽपि अजितस्य श्रीकृष्णस्य रुचिराभिः लीलाभिरनन्तस्वरूपगुणाद्यतिशयाभिः आकृष्टः स्वसुखादपहृत्याकृष्य परमस्वरूपगुणाद्यनुभवानन्दं स्थापितः सारः धैर्यं यस्य सः अत एव अन्येष्वपि तादृशानन्दार्थिनस्तदीयं श्रीकृष्णरूपलीलाप्रतिपादकं पुराणं तत्त्वदीपं श्रीकृष्णस्वरूपगुणादियाथात्म्यप्रकाशकं कृपया यो व्यतनुत तं नतोऽस्मि ॥६८

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपे
द्वादशाध्यायार्थप्रकाशः ॥ १२ ॥

भाषा टीका ।

कलियुग के मलके समूह को नाश करने वाले श्रीहरि इतर शास्त्र में निरन्तर नहि गाये हैं, और इस श्रीभागवत में तो अंशावमूर्ति श्रीभगवान् कथा प्रसङ्गों के द्वारा पद पद में गाये गये हैं, इसी से यह पुराण सर्वोत्तम है ॥ ६५ ॥

जगत् की उत्पत्ति स्थिति और संहार करने वाली जिन की शक्ति है, ब्रह्मा इन्द्र और शङ्करादि देवताओं से जिनकी स्तुति होना दुष्पार है, ऐसे अज अनन्त आत्मतत्त्व जो श्रीअच्युत भगवान् हैं, तिन को मैं नमस्कार करता हूं ॥ ६६ ॥

वृद्धिको प्राप्त होने वाली नव शक्तियों से अपने आत्मा ही में रचा है, स्थावर जंगम प्राणियों का निवास स्थान जिन्होंने ऐसे, ज्ञानमात्र स्वरूप वाले, सनातन, देवताओं में श्रेष्ठ, जो श्रीविष्णु भगवान् हैं, तिनको नमस्कार है ॥ ६७ ॥

निज सुख से भरा हुआ है चित्त जिनका, तिसी से दूर हुआ है अन्य में भाव जिनका ऐसे, और पश्चात् श्रीकृष्ण लीला से खींचा गया है, मन जिनका, ऐसे जिन श्रीशुकदेव जी ने कृपाकर श्रीहरि के तत्त्व को प्रकाश करने वाले इस पुराण का विस्तार किया, सम्पूर्ण दुःखों के नाशक उन श्रीव्यासनन्दन को मैं नमस्कार करता हूं ॥ ६८ ॥

इति श्रीमद्भागवत द्वादशस्कन्ध में बारहवें अध्याय की,
श्रीवृन्दावनस्थ पं० भागवताचार्यकृत
भाषाटीका समाप्त ॥ १२ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः ।

——:०:——

सूत उवाच ।

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै—
वेदैस्साङ्गपदक्रमोपनिषदैः गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो—
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः

पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना—
न्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः ।
यत्संस्कारकलानुवर्त्तनवशाद्वेलानिभेनाम्भसां—
यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥२॥

पुराणसङ्ख्यासम्भूतिमस्य वाच्यप्रयोजने ।
दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ॥ ३ ॥
ब्राह्मं दशसहस्राणि पाद्मं पञ्चोनषष्टि च ।
श्रीवैष्णवं त्रयोविंशच्चतुर्विंशतिशैवकम् ॥ ४ ॥
दशाष्टौ श्रीभागवतं नारदं पञ्चविंशतिः ।
मार्कण्डं नव वाह्नं तु दशपञ्चचतुःशतम् ॥ ५ ॥
चतुर्दश भविष्यं स्यात्तथा पञ्चशतानि च ।
दशाष्टौ ब्रह्मवैवर्तं लिङ्गमेकादशैव तु ॥ ६ ॥
चतुर्विंशतिवाराहमेकाशीतिसहस्रकम् ।
स्कान्दं दश तथा चैकं वामनं दश कीर्तितम् ॥ ७ ॥
कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ।
एकोनविंशत्सौपर्णं ब्रह्माण्डं द्वादशैव तु ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोदशे पुराणानां सङ्ख्यामाह यथाक्रमम् ।
दानं दानस्य माहात्म्यं श्रीमद्भागवतस्य च ॥

सर्वपुराणसङ्ख्यादीनुपवर्णयिष्यंस्तत्प्रतिपाद्यं देवं प्रणमति, यमिति । स्तवैर्वेदैश्च स्तुन्वन्ति स्तुवन्ति उपनिषच्छब्दस्याकारान्तत्वं छन्दोऽनुरोधेन ध्यानेनावस्थितं निश्चलं तद्गतं च यन्मनस्तेन यस्यान्तं न विदुः सुरासुरगणाः ॥ १ ॥

क्षीराब्धिमथनादौ दुर्वहं स्वबलं प्रदर्शयितुं कूर्मावतारमनुस्मारयन्नाशिषः प्रार्थयते—पृष्ठे भ्राम्यन्नमन्दो मन्दरगिरिर्यस्य मन्दराचलस्तस्य ग्रावाणस्तेषामग्राणि तैः कण्डूयनात्तेन सुखेन निद्रालोर्निद्राशीलस्य येषां श्वासानिलानां संस्कारास्तेषां कलाश्च लेशास्तदनुवर्त्तनवशाज्जलनिधेरम्भसाम् यातायातं न विश्राम्यति । ननु, समुद्रक्षोभादेव तत्र संस्कारवशात्तत्राऽऽह—वेलाछद्मतस्तस्य निभेन मिषेण ॥ २ ॥

पुराणसंहितानां सङ्ख्याख्यानां सम्भूतिं समाहारम् अस्य तु श्रीभागवतस्य वाच्यं विषयः प्रयोजनं च दानं च तस्य पाठादेश्च माहात्म्यं निबोधत ॥ ३ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

त्रयोविंशत् त्रयोविंशतिः वैष्णवं चतुर्विंशति चतुर्विंशतिः सहस्राणि शैवकं शिवपुराणम् ॥ ४ ॥

ब्राह्ममग्निपुराणम् दशपञ्चसहस्राणि चत्वारिंशतानि च ॥ ५ ॥ ६ ॥

स्कान्दं शताधिकैकाशीतिसहस्रम् ॥ ७ ॥

सौपर्णं गरुडपुराणमेकोनविंशदेकोनविंशतिः ॥ ८ ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।

(अस्मिन्नध्याये टीका नास्ति)

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

किंचिदेतत्प्रबन्धमन्यत्सकृद्दयापरिमाणमिति पुनर्मुमुक्षणामाकृष्य तद्धक्तु तत्प्रसङ्गात्तावत्पुराणान्तराणि तत्परिमाणं च वक्तुं तावत् सर्वानपायादेवं प्रणमति—यमिति । यं ब्रह्मादयस्तन्वैर्वेदैः स्तुवन्ति सर्वानपाय देवं प्रणमति—यमिति । यं ब्रह्मावरुणेन्द्रैर्वेदैः स्तुवन्ति कथम्भूतैरङ्गादिभिः सहितैः उपनिषच्छब्दस्याकारान्तत्वम् छन्दानुरोधात् ध्यानेनावस्थितं निश्चलं च तेन तद्गतेन मनसा यं योगिनः पश्यन्ति साक्षात्कुर्वन्ति सुरासुरगणा यस्यान्तं प्रभावपर्यन्तं न विदुस्तस्मै भगवते नमः इति भावः ॥ १ ॥

बुद्धिस्थस्यैव प्रदर्शयितुं कूर्मावतारमनुस्मरन्नाशिषं प्राणोति—पृष्ठेति । पृष्ठे भ्राम्यदमन्दाः गरिष्ठः मन्दरगिरिरूपस्य ग्रावाग्रस्तेषामग्राणि तैः कण्डूयनात् सुखेन निद्रालोर्निद्राशीलस्य भगवतः कमठाकृतेः कूर्मरूपस्य हरेः श्वासानिलाः श्वासवायवः पान्तु, तान् विशिनष्टि—येषां श्वासानिलानां संस्कारः तेषां लेशः तदनुवर्तनवशात्तद्वेलामसमं यातायातं गमनागमनम् अतन्द्रितम् यथा तथा अद्यापि न विश्राम्यति ननु समुद्रक्षोभादेव तत्र संस्कारवशात्तत्राह—वेलाच्छलेनेति । वेलासमुद्रक्षोभस्तस्य छलेन मिषेण ॥ २ ॥

किञ्च पुराणेति । पुराणानां सङ्ख्यासङ्ख्यानां सम्भूतिं समाहारं अस्य श्रीभागवतस्य वाच्यं विषयस्तत्प्रयोजनञ्च दानं पुस्तकदानं दानस्य पाठादेश्च माहात्म्यं निबोधत शृणुत इत्यर्थः ॥३॥

ब्राह्ममिति । त्रयोविंशत् त्रयोविंशतिः शैवं चतुर्विंशतिसहस्राणि ॥ ४ ॥

ब्राह्ममाग्नेयं पुराणं पञ्चदशसहस्राणि चत्वारि शतानि च ॥ ५ ॥

(भविष्यं पुराणं चतुर्दशसहस्राणि पञ्चशतानि भाति पञ्चसहस्राणि) ब्रह्मवैवर्तं दशसहस्राणि पञ्च शतानि चेति उक्त। एकादशैव एकादशसहस्राण्येव ॥ ६ ॥

स्कान्दं तु शताधिकैकाशीतिसहस्रम् ॥ ७ ॥

सौपर्णं गारुडं पुराणम् एकोनविंशदेकोनविंशतिसहस्राणि भारतरामायणेतिहाससंवलिततयोर्विंशत्या नोक्ता ॥ ८ ॥

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

सर्वैर्वेदैश्च स्तुन्वन्ति स्तुवन्ति उपनिषच्छब्दस्याकारान्तत्वं ध्यानेनावस्थितं निश्चलं तद्गतं यत्मनस्तेन यस्यान्तं न विदुः सुरासुरगणाः ॥ १ ॥

पृष्ठे भ्राम्यत अमन्दो गरिष्ठो मन्दरगिरिरूपस्य ग्रावाग्रास्तेषामग्राणि तैः कण्डूयनात्तेन सुखेन निद्रालोः निद्राशीलस्य येषां श्वासानिलानां संस्कारात्तेषां कलाश्च लेशाः तदनुवर्तनवशात् अद्यापि वेलारूपमसमं यातायातं न विश्राम्यति । ननु, समुद्रक्षोभादेव तत्र संस्कारवशात्तत्राह वेलाक्षोभस्तस्य मिषेण मिषेण ॥२॥

पुराणसङ्ख्यानामां सम्भूतिं समाहारं वा अस्य श्रीभागवतस्य वाच्यं विषयः प्रयोजनं दानं च तस्य पाठादेश्च माहात्म्यं निबोधत ॥ ३ ॥

त्रयोविंशत् त्रयोविंशतिः चतुर्विंशतिसहस्राणि शैवकं शिवपुराणम् ॥ ४ ॥

मार्कण्डेयं तत्र नाङ्गीक्रियते वा पाठः आग्नेयपुराणं दशपञ्चसहस्राणि चत्वारिंशतानि ॥ ५—६ ॥

स्कान्दं शताधिकैकाशीतिसहस्रम् ॥ ७ ॥

सौपर्णं गरुडपुराणम् एकोनविंशत् एकोनविंशतिः ॥ ८ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

॥ १—८ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

त्रयोदशे पुनर्नत्वा मङ्गलाचरणं प्रभोः ।
पुराणसङ्ख्या दानादि फलं चाहात्र चोदितम् ॥

अन्तिमेऽध्यायेऽपि पुनरपि भगवन्तं प्रणमन् मङ्गलमाचरति, यमिति । स्तुन्वन्ति स्तुवन्ति उपनिषच्छब्दस्याकारान्तत्वमार्षं तेनैतत्पुराणपाठेन भगवत्स्तवः स्तुतिः सङ्कीर्तनध्यानमेव मम यथा कर्णाङ्कुरश्च भूयात् सर्वगतस्य इति भावः ॥ १ ॥

किञ्च, यथा समुद्रमथनं भगवतैव कूर्मादिरूपेण कृतं द्विजोक्तयां तु तत्र नाममात्रेणैव निमित्तता तथैतत्पारमेष्ठ्यं भगवता कृतमित्यभिप्रायः श्री-महासमुद्रमथनं यथाऽसौ भगवतैव कृतमित्यभिप्रायं श्री-व्यासोक्तमनुवदति, पृष्ठेति । पृष्ठे भ्राम्यदमन्दा महागुरुमन्दरगिरेः ग्रावाग्राणि तेषामग्राणि तैः कण्डूयनात् निद्रालोः कण्डूयनसुखेन निद्राशीलस्य श्वासानिलाः पान्तु वः इति मन्दरपर्वतसमुद्रे मथितुं तेन भगवता मोहिनीरूपेण असुरान् समुद्रे मथितं तेन भगवता अकारि यथा श्वासानिलाः पृष्ठे अकार मन्थनानेन । यथा श्वासानिलानां संस्कारास्तेषां कलाः लेशास्तदनुवर्तनवशात् अद्यापि रूपमसमं यातायातं न विश्राम्यति । ननु, तत्समुद्रक्षोभादेव न तत्संस्कारवशात्तत्राह वेलाक्षोभस्तस्य मिषेण मिषेण ॥ २ ॥

यथा पृथ्वीपतेः प्रत्ययम मा दत्तेश्वरो प्रत्ययम इति गणयन्ते सर्वेषु महापुराणचक्रवर्तिनः श्रीभागवतस्य महिमा पुराणान्तरप्रतिपादनानि: पुराणानां सङ्ख्यायाः सम्भूतिं समाहारं तथा अस्य श्रीभागवतस्य वाच्यं च प्रयोजनं चाह ॥ ३ ॥

त्रयोविंशत् त्रयोविंशतिः शैवकं शिवपुराणम् ॥ ४ ॥

वाह्नि वह्निपुराणं दशपञ्चसहस्राणि चत्वारि शतानि च ॥ ५—६ ॥

स्कान्दं शताधिकैकाशीतिसहस्रम् ॥ ७ । ८ ॥

एवं पुराणसन्दोहश्चतुर्लक्ष उदाहृतः ।
तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥ ९ ॥
इदं भगवता पूर्वं ब्रह्मणे नाभिपङ्कजे ।
स्थिताय भवभीताय कारुण्यात्संप्रकाशितम् ॥ १० ॥
आदिमध्यावसानेषु वैराग्याख्यानसंयुतम् ।
हरिलीलाकथाव्राताऽमृतानन्दितसत्सुरम् ॥ ११ ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

अथांशेऽस्मिन् सर्वशास्त्रसाररूपश्रीमद्भागवतश्रेष्ठ्यं वर्णयिष्यन् तद्विषयभूतभगवन्नतिपूर्वकं पुराणसङ्ख्यासम्भूतिं दर्शयति— यमिति सार्द्धैर्द्वाभ्याम्। स्तुन्वन्ति स्तुवन्ति उपनिषच्छन्दस्याकारात्मकत्वं कामदत्वं स्तुतिगानध्यानविषयत्वेऽप्यवसानानवच्छिन्नत्वं दर्शयति, अन्तं न विदुर्यस्य ॥ १ ॥

भगवतः स्वस्वाभाविकत्वं कैमुतिकन्यायेन दर्शयितुं सर्वावताराणां कूर्मावतारचिन्तनानां सुखदत्वं दर्शयन् समुद्रमथनलीलया अमृतोत्पादनवत्सकलशास्त्रमथनेन श्रीमद्भागवतोत्पत्तिं च द्योतयति, पृष्ठे भ्राम्यत् अमन्दोऽतिशयवान् गरिष्ठश्च यो मन्दरपर्वतस्य ग्रावाग्रैः कण्डूयनात् सुखोत्पादकसङ्घर्षणात् हेतोर्निद्रालोः निद्राशीलस्य श्वासानिलाः वः पान्तु यत् येषां श्वासानिलानां संस्कारकलानुवर्त्तनवशात् जलनिधेरद्यसमायातं निरन्तरं यातायातमद्यापि न विश्राम्यति नन्वस्मत्सां गमनागमनं समुद्रक्षोभाद्भवतीत्यत आह, वेलानिभेनेति। वेलाक्षोभस्तस्य निभेन मिषेण अनेन वाय्वग्निजलादिष्वचेतनपदार्थेषु यत्रयत्र क्रिया सा भगवत्कर्तृकैवातः स्वभाववादो नाङ्गीकार्य इति द्योत्यते ॥ २ ॥

पुराणानां पृथक् पृथक् याः सङ्ख्यास्तासां सम्भूतिं समाहारम् अस्य श्रीमद्भागवतस्य वाच्यप्रयोजने विषयफले दानं तन्माहात्म्यं पाठादेर्माहात्म्यम् आदिशब्देन श्रवणादे र्ग्रहणम् ॥ ३ ॥

त्रयोविंशत् त्रयोविंशतिः ॥ ४ ॥

ब्राह्ममाग्नेयं दशपञ्च सहस्राणि चत्वारि शतानि च ॥ ५—८ ॥

भाषा टीका।

सूत उवाच ॥

सूतजी बोले कि—ब्रह्मा वरुण और मरुत् अर्थात् देव लोग दिव्य स्तोत्रों से जिनकी स्तुति करते हैं। तथा साम गान करने वाले, अंग पद क्रम उपनिषदों सहित वेदों से जिनकी स्तुति करते हैं, और ध्यान में स्थित होकर जिन परमात्मा के विषय मन लगाकर योगिजन जिनको देखते हैं, तथा सुर असुर गण जिनके अंत को नहीं जान सकते, ऐसे देव श्रीनारायण को नमस्कार हो ॥ १ ॥

पीठ पर भ्रमते हुए बड़े भारी मंदराचल की शिलाओं के अग्र भाग से गात्र खुजाने के समान निद्रा का अनुभव करने वाले श्रीकच्छपरूप भगवान् के श्वास से निकले हुए पवन, तुम सबों की रक्षा करो, जिस पवन के संस्कार के लेशमात्र अनुवर्तन के वश से समुद्र की लहर के बहाने [मिष] से समुद्र के जलों का आना जाना निरंतर अब भी नहीं विश्राम लेता है ॥ २ ॥

सूतजी दो श्लोकों में मंगला चरण करके बोले कि—हे शौनकादिक हो! अब तुम पुराणों की संख्या का समाहार और श्रीमद्भागवत का विषय प्रयोजन और दान तथा पाठादि का माहात्म्य श्रवण करो, ॥ ३ ॥

ब्रह्मपुराण दशसहस्र १०००० है, अर्थात् ब्रह्मपुराण के के दश सहस्र श्लोक हैं, पद्मपुराण पचपन सहस्र ५५००० है, श्री विष्णु पुराण तेईस सहस्र २३००० है, शैवपुराण चौबीस सहस्र २४००० है ॥ ४ ॥

यह श्रीमद्भागवत पुराण अठारह सहस्र १८०० है, नारद पुराण पच्चीस सहस्र २५००० है, मार्कण्डेय पुराण नव सहस्र ९००० है, अग्नि पुराण पन्द्रह हजार चार सौ १५४०० है ॥ ५ ॥

भविष्य पुराण चौदह हजार पांच सौ १४५०० है, ब्रह्मवैवर्तपुराण अठारह सहस्र १८००० है, लिंग पुराण एकादश सहस्र ११००० है ॥ ६ ॥

वाराह पुराण चौबीस सहस्र २४००० है, स्कन्द पुराण इक्यासीसहस्र एकसौ ८११०० है, वामन पुराण दश सहस्र १०००० है ॥ ७ ॥

कूर्म पुराण सत्रह सहस्र १७००० है, मत्स्य पुराण चतुर्दश सहस्र १४००० है, गरुड़ पुराण उन्नीस सहस्र १९००० है, और ब्रह्माण्डपुराण द्वादश सहस्र १२००० है, ॥ ८ ॥

श्रीधरस्वामिकृतभावार्थदीपिका।

महाभारतं स्वितिहासः रामायणं च आर्षिप्रोक्तं काव्यम् अतः पुराणानां सन्दोहः समूहश्चतुर्लक्षसङ्ख्याक एव इदानीमस्य वाच्यप्रयोजनादीन् दर्शयितुमाह—तत्रेत्यादिना ॥ ९ ॥ १० ॥

हरिलीलाकथानां व्रातः समूहः स एवामृतं तेनानन्दिताः सन्तः सुराश्च येन तत् ॥ ११ ॥

सर्ववेदान्तसारं यद्ब्रह्मात्मैकत्वलक्षणम् ।
वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम् ॥ १२ ॥
प्रौष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितम् ।
ददाति यो भागवतं स याति परमां गतिम् ॥ १३ ॥
राजन्ते तावदन्यानि पुराणानि सतां गणे ।
यावन्न दृश्यते साक्षाच्छ्रीमद्भागवतं परम् ॥ १४ ॥
सर्ववेदान्तसारं हि श्रीभागवतमिष्यते ।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥ १५ ॥
निम्नगानां यथा गङ्गा देवानामच्युतो यथा ।
वैष्णवानां यथा शम्भुः पुराणानामिदं तथा ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

तन्निष्ठं तद्विषयम् ॥ १२ ॥

प्रौष्ठपद्यां भाद्रपद्याम् हेमसिंहसमन्वितं सुवर्णसिंहासनाऽऽरूढम् ॥ १३ ॥ १४ ॥

तद्रस एवाऽमृतं तेन तृप्तस्य निर्वृतस्य ॥ १५—१७ ॥

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

एवमिति । अतः पुराणानां सन्दोहः समूहश्चतुर्लक्षसंख्याक एव दृष्टान्तिस्य वाक्यादीन् दर्शयितुमाह तत्रेत्यादिना ॥ ९ ॥

इदमिति भगवता श्रीनारायणेन सम्प्रदर्शितं चतुःश्लोकरूपेणेति शेषः ॥ १० ॥

कथ्यमानादिमध्यावसानेषु पृथगाख्यानैर्नानाविधैराख्यानैः संयुतं तथापि सर्वत्र हरिलीलाकथानां व्रातः समूह एवाऽमृतं तेनाऽऽनन्दिताः सन्तश्च सुराश्च येन तत् ॥ ११ ॥

अनेन वाक्यं प्रधानं सूचितं—तत्स्वरूपमाह—सर्वेति । सर्ववेदान्तेषु यत् सारभूतं ब्रह्म आत्मा च तयोर्मिथः ब्रह्मात्मत्वं स्वरूपतो गुणतश्च निरतिशयबृहत्त्वमन्तःप्रविश्य प्रशासनेन भर्तृत्वं च तदेवैकं लक्षणम् असाधारणधर्मो यस्य तत् । यद्वा, ब्रह्मात्मैकत्वलक्षणमिति ब्रह्मात्मशब्दवाच्यम् यदेकं वस्तु तस्य भावस्तत्त्वं तल्लक्षणम् यस्य तदद्वितीयं समाभ्यधिकवस्त्वन्तररहितं वस्तुप्रतिपाद्यो विषय इत्यर्थः । तन्निष्ठं तादृशवस्त्वधीनं कैवल्यं प्रकृतिसम्बन्धराहित्यं मुक्तिरिति यावत् तदेवैकं प्रयोजनं दानपाठादिप्रयोजनं यस्य ॥ १२ ॥

(शेषं श्रीधरीयव्याख्यायामेव द्रष्टव्यम्) ॥ १३—२१ ॥

श्रीविजयध्वजतीर्थकृतपदरत्नावली ।

पुराणानां सन्दोहः समूहः चतुर्लक्षसङ्ख्याक एव ॥ ९—१० ॥

हरिलीलाकथानां व्रातः स एवाऽमृतं तेनाऽऽनन्दिताः सन्तः सुराश्च येन तत् तन्निष्ठं तद्विषयम् ॥ ११ ॥

प्रौष्ठपद्यां भाद्रपद्यां हेमसिंहसमन्वितं स्वर्णसिंहासनाऽऽरूढम् ॥ १२—१३ ॥

तद्रस एवामृतं तेन तृप्तस्य ॥ १४—१५—१६ ॥

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

एवमिति । तैः मत्स्यपुराणोक्तं निर्णयः—

> अष्टादश पुराणानि कृत्वा सत्यवतीसुतः ।
> भारताख्यानमखिलं चक्रे तदुपबृंहितम् ॥
> लक्षेणैकेन तत्प्रोक्तं वेदार्थपरिबृंहितम् ।
> वाल्मीकिनापि यत्प्रोक्तं रामोपाख्यानमुत्तमम् ॥
> ब्रह्मणाऽभिहितं तच्च शतकोटिप्रविस्तरात् ।
> आहृत्य नारदेनैव वाल्मीकाय पुनः पुनः ॥
> वाल्मीकिना च लोकेषु धर्मकामार्थसाधनम् ।
> एवं सपादाः पञ्चैते लक्षास्ते परिकीर्त्तिताः ॥

इति ॥ ९ ॥

इदमिति त्रिकम् । गर्भोदकशायिनो नाभिपङ्कजे स्थिताय ब्रह्मणे भगवता श्रीकृष्णेन प्रकाशितं सन्त आत्मारामा एव सुराः "इत्थं सतां ब्रह्मसुखानुभूत्या" इत्यत्र सदुक्तत्वात् सर्वेति ब्रह्मात्मनोरेकत्वं तदेव लक्षणं यस्य तदद्वितीयं सर्ववेदान्तसारं वस्तु तन्निष्ठमित्यन्वयः । अयमर्थः "सत्यं ज्ञानमनन्तं ब्रह्म" इति यस्य स्वरूपमुक्तं "येनाश्रुतं श्रुतम्भवति" इति "एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय अचिन्त्यशक्तित्वमिति एव नानाधर्मो अच्युतः "सदेव सोम्येदमग्र आसीत्" इत्यादिना निखिलजगदेककारणता "स ऐक्षत बहु स्याम्" इत्यनेन सत्यसङ्कल्पता च प्रतिपादिता तेन ब्रह्मणा स्वरूपशक्तिभ्यां बृहत्त्वेन जगत्कस्माद्बृहत्त्वे ब्रह्म बृंहति बृंहयति चेति श्रुतिभिः "बृहत्त्वाद्बृंहणत्वाच्च तद्ब्रह्म परमं विदुः" इति विष्णुपुराणादिभिश्च प्रतिपादितेन सार्द्धम् 'अनेन जीवेनात्मना' इत्यादिसन्दीपनरूपायां श्रुतौ निर्द्देशेन सतां भिन्नत्वेऽप्यात्मना निर्देशेन तदात्मांशविशेषत्वेन

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

अस्यैव "ममैवांशो जीवलोके जीवभूतः सनातनः" इत्यादिप्रतिपादितस्य "अंशो नानाव्यपदेशात्" (२।३।४२) इति न्यायसिद्धस्य जीवात्मनो यदैकत्वं तत्त्वमसीत्यादौ ज्ञातं तदंशभूतचिद्रूपत्वेन समानाकारता तदेव ब्रह्मत्वमापाततो ज्ञानं साधकतमं यस्य तथाभूतम्—

"वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" ॥

इति त्रिधाऽऽविर्भूतं यत् सर्ववेदान्तसारमद्वितीयं वस्तु तन्निष्ठमिदं पुराणं तथा कैवल्यैकप्रयोजनं केवलः शुद्धः स च प्रोज्झितकैतवो यो भक्तः स एव धर्मः प्रोज्झितकैतवोऽत्र परम इत्युक्तत्वात् तस्य भावः कैवल्यं मोक्षादिकामरहिता भक्तिः "कैवल्यसम्मतपथस्त्वथ भक्तियोगः" इत्यत्र कैवल्यमित्येव सम्मतः पन्था भक्तियोग इति तैर्व्याख्यातत्वात् अत्र पन्था इति भगवत्प्राप्त्युपाय इत्यर्थः सा भक्तिः प्रेमलक्षणैव तस्यैव तत्र मुख्यत्वात् तस्मात्कैवल्यं भगवत्प्रेमैव पुरुषार्थत्वे प्रतिपाद्यं यस्य तत् सालोक्यसार्ष्टिसारूप्येत्यादिवचनवृन्देभ्य इति ॥ १०—१२ ॥

तद्दानस्यापि तादृगेव फलमाह—प्रोष्ठपद्यामिति । परमां परमस्य भगवतः सन्निधिरूपां "ज्ञानेन वैयासकिशब्दितेन" इत्यादेः इति ॥ १३ ॥

राजन्ते इति । स्वर्णसिंहासनारूढत्वे हेतुतया राजत्वमेव दर्शितम् ॥ १४ ॥

तदेव व्यनक्ति—सर्वेति । तद्रसः श्रीभगवद्भक्तिरसः "पिबत भागवतं रसमालयम्" इत्युक्तेः "नात्यन्तिकं विगणयन्त्यपि" इत्यादेश्च अत एवाह, निम्नगानामिति ॥ १५—१६ ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

तत्राष्टादशेति यथैवावतारत्वादवतारमध्ये कृष्णं गणयित्वा पुनः "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इति कृष्णस्य पृथग्गणना तथैव पुराणत्वात् पुराणमध्ये श्रीभागवतं गणयित्वा "तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते" इति पुनर्गणना पुराणचक्रवर्तित्वव्यञ्जिका यथा च तत्र स्वयम् पदम् सर्वोत्कर्षव्यञ्जकं तथैवात्रापि श्रीमदिति पदम् इदं प्रक्रान्तं सम्पूर्णमेव ॥ ९ ॥ १० ॥

वाच्यप्रयोजने चाह हरेर्लीलाकथानां व्रातः समूह एव अमृतं तेन आनन्दिताः सन्तो भक्ता एव सुरा येन तदिति लीलाकथाव्रातशब्देन भक्तिरूपं वाच्यं व्यञ्जितम् । स एव अमृतमिति प्रेमरूपं प्रयोजनं च प्रेम्णैव भक्तेरमृतवदास्वाद्यत्वसिद्धेः तेन सहनामानन्द इति प्रेम्णोऽनुभावः अत्र कथाया अमृतत्वारोपेण तत्सम्प्रदायानां सताम् सुरत्वारोपेण च तत्सम्प्रदायानुः शास्त्रस्यास्य मोहिनीत्वारोपो लभ्यते मोहिन्यैव सुरेभ्योऽमृतदानप्रसिद्धेः ततश्च सुरान् भक्तान् स्वं विदुषः - प्रतिसूरिकृणैव अन्यजनानाञ्चितं यथा श्रुते स्म महाविभावकस्यैव युष्मदानुकूल्यमेव कर्तव्यं प्रयोजनं चासुरान् वञ्चयित्वा युष्मभ्यमेवामृतप्रदानं यथा चासुरान् अतत्त्वमविदुषः अद्यापि मूर्खानेवं रूपमेव श्रुते स्म अविमोहस्य युष्माकं विजयप्रापणमेव कर्तव्यम् प्रयोजनं । युष्मभ्यममृतप्रदानमितीदं गौणमेव, मुख्यं प्रयोजनं त्वेतद् यदानन्दचमत्कारं युष्मान् नित्यं प्रापयामि युष्मद्गृहस्थितेभ्यो तत् प्रथममेतानतिदीनान् निकृष्टान् देवान् किञ्चित् परिवेषयामीति तथैवेदं श्रीभागवतं शास्त्रमपि अतत्त्वज्ञान् अभक्तान् हरिलीलास्वर्णपर्णेन अवाच्यं अप्रयोजनं च "परोक्षवादा ऋषयः परोक्षं च मम प्रियम्" इति भगवदुक्तेर्व्यञ्जनवृत्त्या सर्वलोकालक्षितमुक्त्वा अतत्त्वमविदुषः शास्त्रमानिनः प्रकटमेव अवाच्यप्रयोजनं अन्ये एवाहुः सर्ववेदान्तानां सारं यत् ब्रह्मणा सह आत्मैक्यमद्वितीयं वस्तु तन्निष्ठं तस्मिन् वाचकत्वेन निष्ठा यस्य तत् कैवल्यमेकं मुख्यं प्रयोजनं यस्य तत् केचित् पुनरेवं व्याचक्षते शास्त्रेऽस्मिन् भक्तिज्ञानयोर्द्वयोरपि मार्गयोरुक्तत्वात् भक्तिप्रेमणी वाच्यप्रयोजने उक्त्वा ज्ञानकैवल्ये अपि वाच्यप्रयोजने आह—सर्ववेदान्तेति । कैवल्यमप्येकं प्रयोजनं यस्य तत् अपरे त्वेवमाहुः शास्त्रेऽस्मिन्नुपक्रम एव "धर्मः प्रोज्झितकैतवोऽत्र परमः" इत्यनेन परमधर्मस्य भक्तेरेव वाच्यत्वावगमात् ईश्वरः "सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः" इत्यनेन प्रेम्ण एव प्रयोजनत्वावगमाच्च तथा सर्वेष्वपि स्कन्धेषु ज्ञानात्तत्साध्यात्[मुक्तेरपि]मोक्षादपि सकाशात् भक्तेरेव प्राधान्यदर्शनात् प्राधान्येन व्यपदेशा भवन्तीति न्यायात् भक्तिप्रेम्णोरेवाभिधेयत्वप्रयोजनत्वे व्यज्येते तस्मान्मोहिनी स्वभक्तप्रापकप्रकटार्थमेतत् पद्यमाऽन्यतरेणार्थान्तरेण योजनीयं तद्यथा ब्रह्मात्मैकत्वलक्षणं यद्वस्तु तन्निष्ठं ततोऽपि निःसृत्य तिष्ठतीति, तत्तथा ज्ञानकर्मस्वर्गाद्यभिलाष[युक्त]रहिताः केवला अनन्यभक्तास्तेषां भावः कैवल्यं तदेव प्रयोजनम् यस्य तदिति ॥ ११ ॥ १२ ॥

प्रोष्ठपद्यां भाद्रसम्बन्धिन्यामिति नाद्भुत एव श्रीमन्मुनीन्द्रैः शास्त्रमेतत्समापितं कृतमिति पाद्मोत्तरखण्डगतभागवतमाहात्म्यं दृष्टं हेमसिंहसमन्वितमिति सर्वशास्त्रमहाराजस्य पुराणसूर्यस्यास्य साम्राज्यार्थं सिंहासनोचितत्वात् सर्वमहाराजस्यैतदुपमानस्य सूर्यस्यापि तदानीं सिंहराशिगतत्वेन सिंहासनाधिरूढता दृष्टैव अस्य सर्वशास्त्रमहाराजत्वमेवाह—राजन्ते इति । अन्यानि पुराणान्यपि प्रायस्तावत् शास्त्रराजानि यावदेति श्रीभागवतं तु सम्राडेवातः शास्त्रमहाराजमिति भावः । यद्वा, अस्य पुराणसूर्यत्वमाह—राजन्ते दीप्यन्ते राज्ञो नक्षत्राणीवेति भावः । यावद्दृश्यन्ते यावदेति सति सूर्ये न दृश्यते ॥ १३—१४ ॥

सर्ववेदान्तेभ्योऽपि सारं श्रेष्ठं गङ्गेति सर्वपापनाशनत्वेन अच्युत इति सर्वोत्कर्षेण शम्भुरिति सर्ववैष्णवधर्मोपदेष्टृत्वेनोपमा ॥ १५—१७ ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

पुराणानां सन्दोहः समूहः श्रीमद्भागवतस्य सर्वपुराणेभ्यो भगवत्कृतत्वादिना श्रेष्ठ्यं वक्तुमाह—तत्रेति । अष्टादशसाहस्रमुक्तसङ्ख्यापूरकश्लोकसङ्ख्यामानेन ज्ञेयम् ॥ ९ ॥

अत्रेदमवधेयम् उपास्यरूपं तदुपासकरूपं कृपाफलं भक्तिरसः

क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा ।

तथा पुराणव्रातानां श्रीमद्भागवतं द्विजाः ! ॥ १७ ॥

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते ।

तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं तच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥ १८ ॥

कस्मै येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा तद्रूपेण च नारदाय मुनये कृष्णाय तद्रूपिणा ।

योगीन्द्राय तदात्मनाऽथ भगवद्राताय कारुण्यतस्तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ॥ १९ ॥

नमस्तस्मै भगवते वासुदेवाय साक्षिणे ।

य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे ॥ २० ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

विरोधिरूपश्चेति श्रीमद्भागवतस्यार्थपञ्चकं विषयः "धर्मः प्रोज्झितकैतवः" इत्यत्रोपपादितः तत्र 'यद्विज्ञानेन सर्वं विज्ञातं भवति' इति श्रुतेर्मुख्यो विषयो भगवानिति तत्र चोपास्यं भगवन्तं विषयतयोपासकमधिकारितया विरोधिपदार्थं मुक्तिप्रतिबन्धकतया भक्तिरसं ससाधनं मोक्षोपायतयेति पदार्थचतुष्कं पञ्चमं तत्फलरूपां विषयविशेषमेव प्रयोजनत्वेनाह-इदमिति त्रिभिः । भवभीताय मोक्षविरोधिसंसारभययुक्ताय ब्रह्मणे सर्वाधिकारिमुख्याय भगवतैवेदं श्रीमद्भागवतं प्रोक्तम् ॥ १० ॥

वैराग्यमुपलक्षणं ज्ञानादिसाधनानां ज्ञानवैराग्यादिभिः साधनैराख्यायते प्रकाश्यते इति वैराग्याख्यानं भक्तिरहस्यं तत्संयुतम् हरेर्मुख्यविषयकथानां व्रातः समूहः स एवामृतं तेनानन्दिताः सन्तः साधवः सुराश्च अधिकारिणो येन तम् ॥ ११ ॥

कथम्भूतं सर्ववेदान्तसारम् यद्वा, सर्ववेदान्तानां सारं मुख्यं प्रतिपाद्यम् अद्वितीयं निःसमानातिशयं ब्रह्मपरमात्मनारायणवासुदेवादिपदाभिधेयं "वेदैश्च सर्वैरहमेव वेद्यः" इति भगवद्गीतं यद्वस्तु तन्निष्ठम् ब्रह्म जगत्कारणं सर्वज्ञं सर्वशक्ति 'सत्यं ज्ञानमनन्तम्' वस्त्वेवंनोक्तं तत्पदवाच्यम् आत्माणुपरिमाणकोऽल्पज्ञत्वं पदार्थः तयोः अंश्यंशयोः स्वभावतः एव गुणगुणिवत्कार्यकारणवच्च भिन्नस्वरूपयोः स्वभावतः एवैकत्वं लक्ष्यते ज्ञायते यत्र तत् ब्रह्मजीवयोः द्वैताद्वैतसम्बन्धप्रतिपादकमिदं पुराणमित्यर्थः । अनेन पुराणेन केवलभेदवादिनां तार्किकादयः केवलाभेदवादिनश्च शाङ्कर्यादयः निराकृताः वेदविरुद्धत्वादिति भावः । कैवल्यं केवलस्य कार्यकारणप्रकृतिसम्बन्धरहितस्य निरञ्जनस्य भावः भगवत्साम्यलक्षणः कैवल्यं तदेकप्रयोजनमिदमित्यर्थः ॥ १२ ॥

एवं कर्तृतः विषयप्रयोजनाभ्यां चास्य श्रैष्ठ्यं दर्शितम् इदानीं दानमाहात्म्यादिकथनेनाऽस्य श्रैष्ठ्यमाह—प्रौष्ठपद्यामित्यादिना, प्रौष्ठपद्यां भाद्रपद्याम् हेमसिंहसमन्वितं स्वर्णसिंहासनारूढम् ॥ १३—१७ ॥

भाषाटीका ।

इस प्रकार अठारह पुराणों का समूह चार लक्ष ४००००० है, जहां वह श्रीमद्भागवत अठारह सहस्र १८००० है ॥ ९ ॥

यह श्रीमद्भागवत पूर्व काल में संसार से भयभीत, और अपने नाभिकमल में स्थित, ऐसे ब्रह्माजी को श्रीभगवान् ने कृपा करके प्रकाशित किया रहा ॥ १० ॥

यह पुराण आदि मध्य और अंत में वैराग्य के आख्यानों से संयुक्त है, तथा श्रीहरि की लीला कथाओं के समूह रूप अमृत से साधुजन और देवताओं को आनन्द देने वाला है ॥ ११ ॥

यह सम्पूर्ण वेदान्त का सारभूत है, और परब्रह्म के साथ जीवात्मा के निष्कपट भाव को दर्शाने वाला है, और यह अद्वितीय वस्तु है, तथा परमात्मा का प्रतिपादक है, और इसके पठन श्रवण का मोक्ष ही एक प्रयोजन है, ॥ १२ ॥

भाद्रपदमास की पूर्णमासी में सुवर्ण के सिंहासन पर विराजमान कर जो श्रीभागवत के पुस्तक का दान करता है, वह परमगति को प्राप्त होता है ॥ १३ ॥

अमृत का समुद्र रूप श्रीमद्भागवत पुराण जब तक नहीं सुनने में आता है, तब ही तक सन्तों के समाज में अन्य पुराण शोभा देते हैं, श्रीभागवत के आगे कोई भी नहीं शोभा देते हैं ॥ १४ ॥

यह श्रीमद्भागवत सम्पूर्ण वेदान्त का सार है, इसके रसामृत से जो पुरुष तृप्त हैं, उनकी अन्यत्र कहीं भी प्रीति नहीं होती है ॥ १५ ॥

जैसे, कि—नदियों के मध्य में श्रीविष्णुपादोदकी श्रीगंगा जी सब से श्रेष्ठ है, जैसे, देवों में श्री अच्युत भगवान् सर्वोत्तम है, जैसे विष्णु भक्त वैष्णवों के मध्य में श्रीशंकर श्रेष्ठ हैं, इसी प्रकार पुराणों के मध्य में यह श्रीमद्भागवत पुराण श्रेष्ठ है ॥ १६ ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

पारमहंस्यं परमहंसैः प्राप्यम् नैष्कर्म्यं सर्वकर्मोपरमः भक्त्या तच्छ्रवणादिपरो विमुच्यते ॥ १८ ॥

श्रीभागवतसम्प्रदायप्रवर्त्तकरूपेण भगवद्ध्यानलक्षणां मङ्गलमाचरति-कस्मै ब्रह्मणे अतुलोऽसमः अयम् श्रीभागवतरूपः पुरा कल्पादौ तद्रूपेण ब्रह्मरूपेण नारदाय तद्रूपिणा नारद-

श्रीधरस्वामिकृतभावार्थदीपिका ।

रूपिणा कृष्णाय व्यासाय तद्रूपिणा योगीन्द्राय शुकाय तदात्मना शुकरूपेण तत्परम् सत्यम् श्रीनारायणाख्यं तत्त्वं धीमहि इति गायत्र्यैव यथोपक्रममुपसंहरन् गायत्र्याख्यब्रह्मविद्येयमिति दर्शयति ॥ १९ ॥

तमेव देवतारूपेण गुरुरूपेण च प्रणमति—नम इति, प्राञ्जलम् । व्याख्यातं व्याख्यातत्वात् ॥ २०—२३ ॥

———

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।

पारमहंस्यं परमहंसैः प्राप्यम् ॥ १७—२३ ॥

———

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः ।

किञ्च श्रीभागवतमिति वैष्णवानां प्रियमित्यनेनैव तथा विवक्षितं तत्रानुषङ्गिकं गुणमाह—यस्मिन्निति । विमुच्येत सर्वमन्यत्तरार्थेभ्योऽपि निस्तरेत् ॥ १७—१८ ॥

पूर्वं वक्त्वाद्वितीयं तद्विशुद्धमिति सामान्यतस्तात्पर्यं दर्शयित्वा जन्माद्यस्येत्याद्युपक्रमपोषकं श्रीभगवत्त्वेव तस्य पर्यवसानं दर्शयन्नुपसंहरति—कस्मा इति । कस्मै ब्रह्मणे महावैकुण्ठं दर्शयता श्रीभगवता येन विभासितः प्रकाशितः ननु तदा विरचितः अयं श्रीमद्भागवद्रूपः पुरा पूर्वपरार्द्धादौ तदात्मनेत्यस्योत्तरेणान्वयः तत्र तदात्मना श्रीशुकरूपेणेति गम्यं तद्रूपेणेत्यादिभिस्त्रिभिः पदैर्न केवलं चतुःश्लोक्येव तेन प्रकाशिता अपि तु तत्र तत्राविष्टेनाखण्डमेवेदं पुराणमिति द्योतितम् श्रीसङ्कर्षणसम्प्रदायप्रवृत्तिस्तु श्रीकृष्णद्वैपायनकर्तृकप्रकाशनान्तर्गतमेवेति पृथङ्नोक्ता तत्परं सत्यं भगवदाख्यं तत्त्वं धीमहि "सत्यपरमनुत्तमम्" इति सहस्रनामस्तोत्रे तच्छब्दस्य तन्नामत्वेन गणितत्वात् परत्वेन च श्रीभगवानेवोच्यते 'आद्योऽवतारः पुरुषः परस्य' इति द्वितीयात् ब्रह्मादीनां बुद्धिवृत्तिप्रेरकत्वेनाभिधानात् गायत्र्योपलक्षितेन धीमहीति गायत्रीपदेनोपसंहारः ॥ १९ ॥

तदेवं श्रीभागवततात्पर्यत्वेनोपसंहृत्य तं सर्वगुरुं श्रीभगवन्तमेव प्रणमति—नम इति । मुमुक्षवे तद्भक्तिं विना सर्वमन्यं त्यक्तुमिच्छवे ॥ २० ॥

———

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी ।

सर्वोत्कर्षमेवोपपादयति—भागवतं पुराणमेव श्रीमत् सर्वशोभायुक्तं न भवन्ति मलाः त्रिगुणोत्था यस्मात्तत् यत् यतो वैष्णवानां प्रियं भक्त्युत्कर्षप्रतिपादकत्वादिति भावः । भक्त्युत्थज्ञानप्रतिपन्नोऽभिभक्तैर्ज्ञानसिद्धैरात्मारामैरप्येतदाश्रयणीयमेवेत्याह—यस्मिन्निति । परमहंसेभ्यो हितं पारमहंस्यं ज्ञानं यत्र पारमहंस्यं परं भक्त्युत्थत्वात् श्रेष्ठं ज्ञानसाधकैरप्येतदवश्यं सेव्यमित्याह, यत्रेति । नैष्कर्म्यं सर्वकर्मोपरमः ॥ १८ ॥

श्रीभागवतसम्प्रदायप्रवर्तकरूपस्य भगवतो ध्यानलक्षणं मङ्गलमाच[illegible]—कस्मै [illegible] सर्वनामत्वमाषम् [illegible] एकत्वात्मक एव ग्रन्थः पुरा कल्पादौ तद्रूपेण नारदाय तद्रूपिणा कृष्णाय व्यासाय व्यासरूपेण योगीन्द्राय शुकाय तदात्मना शुकरूपेण भगवद्राताय विष्णुराताय तत्परं सत्यं श्रीनारायणस्वरूपं धीमहीति गायत्र्यैव यथोपक्रान्तवांस्तथैवोपसंहरन् गायत्र्याख्यब्रह्मविद्येयमिति दर्शयति ॥ १९ ॥

शास्त्रसमाप्तौ स्वाभीष्टदेवं प्रणमति—नम इति । वासुदेवाय वसुदेवनन्दनाय साक्षिणे इति अहं तस्य भक्तो भक्तिरहितो वा शिष्टो दुष्टो वा तदभिप्रेतमर्थं ज्ञातुं वेद्मि वा न वेद्मि वा स एव साक्षात्पश्यति तत्कृपैव मे शरणमिति भावः अहं तावत्को वराको ब्रह्मापि तत्कृपां विना श्रीभागवतार्थं न वेत्तीत्याह—य इदमिति । मुमुक्षवे कृपया व्याचचक्षे तदीयोपदेशात्पूर्वमेव तस्य मुमुक्षा आसीत् एतदुपदेशानन्तरं तु प्रेमपर्यवाकाङ्क्षा मोक्षे तूपेक्षैवाजनिष्टेति भावः ॥ २० ॥

———

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः ।

परमहंसैः हेयोपादेयविवेकिभिर्ग्राह्यम् नैष्कर्म्यं मुक्तिविरोधिकर्मराहित्यम् ॥ १८ ॥

श्रीमद्भागवतसम्प्रदायप्रवर्तकभगवद्ध्यानलक्षणं मङ्गलमाचरति—कस्मै काय चतुर्मुखाय, अतुलः अनुपमः अयम् श्रीमद्भागवतरूपः ज्ञानप्रदीपः पुरा कल्पादौ येन विभासितः तद्रूपेण चतुर्मुखरूपेण नारदाय तद्रूपिणा कृष्णाय पाराशर्याय तद्रूपिणा योगीन्द्राय शुकाय तदात्मना भगवद्राताय परीक्षिते तत्परं पूर्णं सत्यं जगत्कारणं नित्यंपरमात्मस्वरूपं धीमहि ध्यायेमः उपक्रमे उपसंहारे च धीमहीति गायत्रीपदोपन्यासः अस्य शास्त्रस्य गायत्र्यर्थप्रकाशकत्वं सूचयति ॥ १९ ॥ २० ॥

———

भाषा टीका ।

जैसे पुण्यक्षेत्रों के मध्य में श्रीकेशव निर्मित काशी श्रेष्ठ है, हे विप्र हो ! इसी प्रकार पुराण समूहों में यह श्रीमद्भागवत सब से श्रेष्ठ है ॥ १७ ॥

श्रीमद्भागवत जो है, सो निर्मल पुराण है, जो कि वैष्णवों को प्रिय है, और जिसमें केवल पारमहंस्य अमल ज्ञान गाया गया है । जिसमें ज्ञान वैराग्य और भक्ति सहित नैष्कर्म्य प्रकट किया है, उसको भक्ति से सुनता हुआ पढ़ता हुआ विचार करता हुआ इस संसार से मुक्त होजाता है ॥१८॥

अब श्रीमद्भागवत की परंपरा कहते हैं, कि—प्रथम श्रीनारायणने यह अतुल ज्ञान प्रकाश करने वाला पुराण ब्रह्मा को प्रकाशित किया, फिर श्रीनारायण रूप ब्रह्माने नारदमुनि को उपदेश किया, फिर ब्रह्मरूप नारदजी ने कृष्णमुनि श्री वेदव्यासजी को दिया, पश्चात् नारद रूप व्यासजीने योगीन्द्र श्रीशुक मुनि को दिया, फिर व्यास रूप श्रीशुक ने करुणा करके महाराज राजा परीक्षित को दिया, ऐसे इस पुराण के प्रतिपाद्य शुद्ध विमल विशोक अमृत पर सत्य ब्रह्म का हम लोग ध्यान करते हैं ॥ १९ ॥

योगीन्द्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे ।
संसारसर्पदष्टं यो विष्णुरातममूमुचत् ॥ २१ ॥
भवे भवे यथा भक्तिः पादयोस्तव जायते ।
तथा कुरुष्व देवेश ! नाथस्त्वं नो यतः प्रभो ! ॥ २२ ॥
नामसङ्कीर्तनं यस्य सर्वपापप्रणाशनम् ।
प्रणामो दुःखशमनस्तं नमामि हरिं परम् ॥ २३ ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्याम्
अष्टादशसहस्रसंहितायां वैयासिक्यां द्वादशस्कन्धे
त्रयोदशोऽध्यायः ॥ १३ ॥
समाप्तश्चायं द्वादशस्कन्धः ।
हरिः ओम् ॥

भाषा टीका ।

उन साक्षी श्रीवासुदेव भगवान् को नमस्कार है, कि-जिनने इस पुराणको मुमुक्षु ब्रह्मा के लिये कथन किया ॥ २० ॥

श्रीधरस्वामिकृतभावार्थदीपिका ।

भावार्थदीपिकामेतां भगवद्भक्तवत्सलाम् ।
परमानन्दपादाब्जभृङ्गश्रीः श्रीधरोऽकरोत् ॥
स्वबालचपलालापैः स्वलीलापरिनर्तितैः ।
प्रीयतां परमानन्दतनुहरिः सद्गुरुः स्वयम् ॥
श्रीपरानन्दसन्तोषार्थं गुह्यं भागवतं मया ।
तन्मतेनैव व्याख्यातं न तु मन्मतिवैभवात् ॥
क्वेदं नानानिगूढार्थं श्रीमद्भागवतं क्व नु ।
मन्दबुद्धिरहं कृष्णप्रेम किं न कारयेत् ॥
इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे
श्रीधरस्वामिकृतभावार्थदीपिकायाम्
त्रयोदशोऽध्यायः ॥ १३ ॥
समाप्तश्चायं द्वादशस्कन्धः ॥ १२ ॥
समाप्ता चेयं भावार्थदीपिका ॥
श्रीकृष्णार्पणमस्तु ॥

श्रीसुदर्शनसूरिकृतशुकपक्षीयम् ।
(श्रीशुकपक्षीयरीत्या द्वादशभिरध्यायैरेव
समापितोऽयं द्वादशस्कन्धः)॥
श्रीमते रामानुजाय नमः ।

श्रीमद्वीरराघवाचार्यकृतभागवतचन्द्रचन्द्रिका ।

योऽसौ हृदम्बुजतले हृदि संनिविष्टः—
स्वप्नेऽपि बुद्धिगतकल्मषयाञ्च यथा मे ।
प्राचीलिखितस्करतलेन्द्रियदैवतेन्द्र—
मूर्तिस्तमेनमनघं 'प्रणवे' वरेण्यम् ॥

* योऽसौ पिनाकपरिधिर्मममादधूनार—
गन्धर्विमताकलितश्रीसुगात्रीचिह्नितेन ।
सञ्ज्ञापितेन च मया परिरब्धमूर्तिः—
स्तमेव नमामि शरणं वसुदेवसूनुम् ॥
क्वेदं गभीरनिगमान्तरहस्यसारं—
क्वाहं सुमन्दमतिरत्र परं निदानम् ।
श्रीमद्वीरराघवकरुणाकलिता नमन्—
श्रीशैलवेशिकवरं शरणं गतोऽस्मि ॥
चिक्कीर्षोऽमोघा सा निरवधिकृपालोककलिका—
यया बद्धाज्ञानं विधूतिरजनाकाः समगमम् ।
स एव श्रीशैलो गुरुरखिलविद्याजलनिधिः—
मम स्यातां स्वान्तस्मरणकमलं सम्प्रकटयन् ॥
इति श्रीवात्सल्यपयःपारावारराकासुधाकरस्य श्रीशैलगुरोः
सूनवेन तच्चरणपरिचर्याप्रसन्नतत्सूक्तिमर्माधिगतश्रीम-
द्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघव-
विदुषा निर्मितायां श्रीमद्भागवतचन्द्र-
चन्द्रिकायां व्याख्यायां द्वादशस्कन्धे त्रयोदशोऽध्यायः॥
(श्रीमद्वीरराघवीयरीत्या द्वादशोऽध्यायः ॥ १२ ॥)
समाप्तोऽयं द्वादशस्कन्धः ॥१२ ॥
श्रीमते रामानुजाय नमः ।

श्रीमद्विजयध्वजतीर्थकृतपदरत्नावली ।
इति श्रीमन्महेन्द्रतीर्थपूज्यपादशिष्य-
विजयध्वजतीर्थभट्टारकस्य कृतौ
श्रीमद्भागवतटीकायां पदरत्ना-
वल्यां द्वादशस्कन्धे सूतोक्तौ
त्रयोदशोऽध्यायः ॥ १३ ॥
समाप्तश्चायं द्वादशस्कन्धः ॥ १२॥

---

* कार्ष्णिकथापपरिधिरिति पाठान्तरम् ।

श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भः।

तत्रापि श्रीगुरुरूपं प्रणमामि, योगीन्द्राय तस्मात्मनेत्युक्तेः तदंशं तस्य मम हि मानं स्मृत्वा कारुण्यं स्मरति, संसारेति। संसरत्याविर्भवतीति संसारः प्रपञ्चः स एव श्रीकृष्णाभिज्ञाने बोद्धुमशक्यत्वात् सर्पः सर्वव्यापिविषधरः तेन दष्टं दंशनेनात्यर्थं नाडीरहदुःखेन पीडितं विष्णुरातं श्रीपरीक्षितं योऽमूमुचत् तां पीडां त्यक्तुमुत्कण्ठां प्रेरयामास अनन्तक्षणमात्राद्दुःखं यत्र तस्मान्मोचनं तत्तदुभाभ्यामपि नाहनमिति भावः। नाहशप्रेरिण्या च हेतुर्विष्णुरातमित्येव तेन विष्णुना यो रातः स भक्तेभ्यः प्रसादीकृतः स परमतदीय एवेति ॥ २१—२३ ॥

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धीये
श्रीमज्जीवगोस्वामिकृतक्रमसन्दर्भे
त्रयोदशोऽध्यायः ॥ १३ ॥

नामश्चिन्तामणिः कृष्णचैतन्यरसविग्रहः।
पूर्णः शुद्धो नित्यमुक्तोऽभिन्नत्वान्नामनामिनोः ॥
अत एव—
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।
सन्न्यासकृत् समः शान्तो निष्ठाशान्तिपरायणः ॥
एवं सहस्रनामोक्तः कृष्णचैतन्यसंज्ञितः।
मां पादाम्बुजरेणुस्थः स्वप्रेमांशेन तुष्यतु ॥
स्वामिपादैः न यद्व्यक्तं यद्व्यक्तं चास्फुटं क्वचित्।
तत्र तत्रैव विज्ञेयः सन्दर्भः क्रमसञ्ज्ञकः ॥
इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनश्रीमद्रूपसनातनानुशासनभारतीगर्भे श्रीभागवतसन्दर्भे क्रमसन्दर्भो नाम सप्तमः सन्दर्भः ॥ श्रीवृषभानुनन्दिनी जयताम् ॥
समाप्तश्चायं श्रीभागवतक्रमसन्दर्भः ॥
श्रीकृष्णचन्द्रो जयति ॥
समाप्तोऽयं द्वादशस्कन्धः ॥ १२ ॥

श्रीमद्विश्वनाथचक्रवर्तिकृतसारार्थदर्शिनी।

श्रीगुरुदेवं प्रणमामि—योगीन्द्राय भक्तियोगज्ञानयोगकर्मयोगाष्टाङ्गयोगनिष्ठानां महानुभवाय ब्रह्मरूपिणे परब्रह्मस्वरूपाय, संसारसर्पदष्टं विष्णुरातममीति यथाऽर्जुनस्य मोहं गीताख्यया भगवद्गीतया मोहमेकादशेन भगवानिवर्तयामास तथैव परीक्षितः संसारं श्रीशुक इति प्राकृतलोकप्रतीत्यैवोक्तिर्वस्तुतस्तु भगवत्पार्षदत्वेन नित्यपार्षदत्वात् संसारशङ्कागन्धोऽपि किन्तु जीवहितप्रख्यापनाय चातुर्वर्ण्यधुरन्धराणां महाकृपालूनां महतां कमप्येकं महासिद्धजनमण्डलस्यैव हितोपदेशसन्ततिरिति नीतिरेषा अत एवात्र विष्णुरातमिति प्रयुक्तम् विष्णुना कृपया युधिष्ठिराय रातः दत्तः स्वयं गृहीतो वा यस्तस्य संसारः कः खलु मन्दबुद्धिराशङ्केतेति भावः। किञ्च, सर्पविषहरा मन्त्रा यथा लोके अर्थज्ञानमपि नापेक्षन्ते तदर्थं जानातु न जानातु वा श्रीभागवतीयाः शब्दा एव संसारविषं निर्मूलयन्तीत्याचार्याभिप्रायो द्रष्टव्यः ॥ २१—२३ ॥

इति श्रीसारार्थदर्शिन्यां हर्षिण्यां भक्तचेतसाम्।
त्रयोदशो द्वादशस्य सङ्गतः सङ्गतः सताम् ॥ १३ ॥
ॐ तत्सत् ॥

नमोऽस्तु गुरवे तस्मै श्रीकृष्णाय नमो नमः।
कृपार्णवाय श्रीलोकनाथाय प्रभवे नमः ॥
कृष्णचैतन्यगौराङ्ग! साङ्गोपाङ्गसपार्षद!।
निरुपाधिकृपासिन्धो! प्रेम्णा मां परिपूरय ॥
जय वृन्दावनक्रीडारसिकद्वय! मां नय।
स्वप्रियालिगणं गीतमवेतत् करुणां मम ॥
अत्यज्ञोऽपि त्वयैवाहं स्वव्याख्यायां प्रवर्त्तितः।
हे कृष्ण! श्रीभागवत! प्रसीद त्वं तदेनया ॥
मद्बुद्धीरपि गोपाल! श्रीकृष्ण परिपालय।
पिबन्नासां पयः प्रीत्या स्वभक्तानपि पायय ॥
ऋत्वर्षिवसुभूमिमिते शाके राधाकृष्णसरस्तटे।
शुक्लपञ्चम्यां सिते माघे टीकेयं पूर्णतामगात् ॥
टीकेयं वैश्वनाथी भवतु भगवतो भक्तलोकस्य रक्षा—
यद्दृष्ट्वाऽऽगमव्यवाम्नो मधुरिमलहरीवर्षिणोऽनन्तवृत्तेः ॥
यत्तत्वारोचकत्वे कृतिरतिकृतिनः सर्वसाधुप्रगाययां—
दृष्ट्वा सारव्याख्यानतुल्यात्यनुपदविधुरा स्यात्तनीनुभैगम ॥
आरम्भे परिणामे च विवर्त्तेऽपि न हि क्षतिः।
श्रीमद्भागवते भक्तेः पुरुषार्थशिरोमणेः ॥
व्याख्ययाऽस्य भक्त्या गम्या सा श्रीगुरोः कृपयेष्यते।
तस्मान्नमो नमस्तस्मै गुरवे गुरवे नमः ॥
हे भक्ताः! द्वारि वश्चञ्चदुपलक्षीयते जनः।
नात्याविशिष्टः श्रेयातः प्रसादं लभतां मनाक् ॥

श्रीगोवर्द्धनाय हरिदासवर्याय नमः।
श्रीराधाकुण्डाय श्रीकृष्णकुण्डाय नमोनमः
समाप्ता चेयं सारार्थदर्शिनी टीका ॥
शुकशास्त्रं च परिसमाप्तम्।
श्रीराधायैनमोनमः ॥

श्रीमच्छुकदेवकृतसिद्धान्तप्रदीपः।

गुरुं प्रणमति—योगीन्द्रायेति। व्याख्यानं व्याख्यातवान् ॥ २१ ॥ २३

भिन्नाभिन्नं जगद्यस्मात्पृथिव्या ओषधयो यथा।
तं राधामाधवं वन्दे करुणागुणसागरम् ॥
सर्वेश्वरमहं वन्दे श्रीगुरुं तत्पदाश्रयम्।
पूर्वाचार्यान् सुविख्यातान् श्रुतिस्मृत्यर्थभास्करान्।
हंससनकदेवर्षिनिम्बार्कप्रमुखान् प्रभून्।
नैष्ठिकान् वेदसिद्धान्तसम्प्रदायप्रवर्तकान् ॥
समालोक्य मुहुस्तेषां कृतीः सम्यक् मनोरमाः।
श्रीभागवतसिद्धान्तप्रदीपोऽयं कृतो मया ॥
श्रीसनकसम्प्रदायप्रवर्त्तकाचार्यश्रीभगवन्निम्बार्कचरणचिन्तक शुकसुधीप्रणीते श्रीमद्भागवतसिद्धान्तप्रदीपे द्वादशस्कन्धीये त्रयोदशाध्यायार्थप्रकाशः ॥ १३ ॥
समाप्तोऽयं द्वादशस्कन्धः ॥ १२ ॥

भाषाटीका।

ब्रह्मरूप योगीन्द्र श्रीशुकदेवजीको नमस्कार है, जिनने संसार सर्प के डसे हुए राजा परीक्षित् को छुड़ाया है ॥ २१ ॥

अब श्रीसूतजी ग्रन्थकी समाप्ति में श्रीहरिसे प्रार्थना करते हैं, कि—हे देवेश ! जैसे जन्म जन्म में आपके चरणारविन्दों की भक्ति हमको रहे, ऐसी आप कृपा करो । क्योंकि ? हे प्रभो ! आप हमारे स्वामी हो ॥ २२ ॥

जिनका नाम सङ्कीर्तन ही सम्पूर्ण पापों का नाश करने वाला है, और जिनके विषें प्रणाम करनाही समस्त दुःखोंका शमन करने वाला है, परात्पर उन श्रीहरिको मैं नमस्कार करता हूं ॥ २३ ॥

द्वादशस्कन्धभावार्थबोधिनी भक्ततोषिणी ।
भाषा भागवताचार्यकृता सम्पूर्णतामियात् ॥

इति श्रीवृन्दावननरकुञ्जमन्दिरस्थोभयवेदान्तनिष्णाततार्किककेसरि-
प्रबोधमहोदधि श्रीसुदर्शनाचार्याधिगतबोधलेशेन,
श्रीबलरामस्वामिचरणाश्रितेन, श्रीवृन्दावनस्थ-
पण्डितभागवताचार्येणाकृता श्रीभागवत-
द्वादशस्कन्धे त्रयोदशाध्यायस्य
भाषाटीका समाप्ता ॥ १३ ॥

श्रीरुक्मिणीरमणो जयति ॥

———

इति श्रीमद्भागवते महापुराणे द्वादशस्कन्धे त्रयोदशोऽध्यायः ॥ १३ ॥

समाप्तिं गतश्चायं द्वादशः स्कन्धः ॥ १२ ॥
परिसमाप्तश्चायं श्रीभागवतशास्त्रम् ॥

हरिः ओम् तत् सत्
श्रीकृष्णार्पणमस्तु ॥

———○:०:○———

संशोधको वास्य ग्रन्थरत्नस्य काशीमण्डलान्तर्वर्त्ति 'कान्दूर' पं० श्रीरङ्गाचार्य—'श्रीवृन्दावनस्थ' पं० भागवताचार्यौ ॥

———○:०:○———

॥ श्रीः ॥

श्रीकृष्णचरणौ नत्वा भुक्तिमुक्तिप्रदायकौ ।
वेदर्तुनन्देन्दुमिते वैक्रमाब्देऽथफाल्गुने ॥ १ ॥
कृष्णपक्षस्य पञ्चम्यां वृन्दावनशुभस्थले ।
श्रीमन्नित्यस्वरूपाख्यब्रह्मचारिप्रवर्तनात् ॥ २ ॥
अष्टटीकासमायुक्तश्रीमद्भागवतस्यच ।
लक्ष्मणाचार्यविदुषा शोधनं परिपूरितम् ॥ ३ ॥
हरिभक्तिविवर्धनकार्यरतम्
त्विह मुद्रणव्ययसुपूर्तिकरम् ॥
हरिरेव विवर्धयतादनिशम्
वनमालिबाहादुररायवरम् ॥ ४ ॥
श्रीमद्भागवतं पूर्णमर्पितं कृष्णपादयोः ।
जनानामघनाशाय सर्वलोके प्रवर्तताम् ॥ ५ ॥

श्रीकृष्णचैतन्यचन्द्राय नमः

श्रीकृष्णार्पणमस्तु

श्रीरस्तु

सं० १९६४ फाल्गुनकृष्ण पञ्चम्यां शनिवासरे समाप्तम् ।





श्री १०८ श्रीराधारमणो जयति ।

श्रीमत्पद्मपुराणान्तर्गत—

श्रीमद्भागवतमाहात्म्यम् ।





तदिदं,

परमहंसपरिव्राजकाचार्य्यपूज्यपादश्रीमत्स्वामिप्रकाशानन्दसरस्वतीप्रवराशिष्येण,

श्रीनित्यस्वरूपब्रह्मचारिणा

सम्पादितम् ।

बङ्गदेशान्तर्गत ताडास भूपति श्रीराधाविनोद प्रेम सेवा परायण राजर्षि राय

"श्रीवनमालिराय बहादुरस्य",

सम्पूर्ण साहाय्येन

प्रकाशितञ्च ।

तच्च

काञ्चीमण्डलान्तर्वर्त्ति 'कान्नूर्' पं० श्रीरङ्गाचार्यद्वारा संशोध्य

श्रीवृन्दावनधामनि

स्वकीये "श्रीदेवकीनन्दन", यन्त्रालये

मुद्रापितम् ।

सम्वत १९६४



॥श्रीः॥श्रीः॥श्रीः॥

श्रीपद्मपुराणान्तर्गत-

श्रीमद्भागवतमाहात्म्यम्॥

अथ प्रथमोऽध्यायः प्रारम्भः।

श्लोकः

यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव।
पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥१॥
नैमिषे सूतमासीनमभिवाद्य महामतिम्।
कथामृतरसास्वादकुशलः शौनकोऽब्रवीत् ॥२॥

शौनक उवाच।

अज्ञानध्वान्तविध्वंसकोटिसूर्यसमप्रभ।
सूताख्याहि कथासारं मम कर्णरसायनम् ॥३॥
भक्तिज्ञानविरागाप्तो विवेको वर्द्धते कथम्।
मायामोहनिरासश्च वैष्णवैः क्रियते कथम् ॥४॥
इह घोरे कलौ प्राप्ते जीवश्चासुरतां गतः।
क्लेशाक्रान्तस्य तस्यैव शोधने किं परायणम् ॥५॥
श्रेयसां यद्भवेच्छ्रेयः पावनानां च पावनम्।
कृष्णप्राप्तिकरं शश्वत्साधनं तद्वदाधुना ॥६॥
चिन्तामणिर्लोकसुखं सुरेन्द्रः स्वर्गसम्पदम्।
प्रयच्छति गुरुः प्रीतो वैकुण्ठं योगिदुर्लभम् ॥७॥

सूत उवाच।

प्रीतिः शौनक चित्ते ते यतो वच्मि विचार्य च।
सर्वसिद्धान्तनिष्पन्नं संसारभयनाशनम् ॥८॥
भक्त्योघवर्धनं यच्च कृष्णसन्तोषहेतुकम्।
तदहं तेऽभिधास्यामि सावधानतया शृणु ॥९॥
कालव्यालमुखग्रासत्रासनिर्णाशहेतवे।
श्रीमद्भागवतं शास्त्रं कलौ कीरेण भाषितम् ॥१०॥
एतस्मादपरं किञ्चिन्मनःशुद्ध्यै न विद्यते।
जन्मान्तरे भवेत्पुण्यं तदा भागवतं लभेत् ॥११॥
परीक्षिते कथां वक्तुं सभायां संस्थिते शुके।
सुधाकुम्भं गृहीत्वैव देवास्तत्र समागमन् ॥१२॥
शुकं नत्वा वदन्सर्वे स्वकार्यकुशलाः सुराः।
कथासुधां प्रयच्छस्व गृहीत्वैव सुधामिमाम् ॥१३॥
एवं विनिमये जाते सुधा राज्ञा प्रपीयताम्।
प्रपास्यामो वयं सर्वे श्रीमद्भागवतामृतम् ॥१४॥
[illegible] सुधा क्व कथा लोके क्व काचः क्व मणिर्महान्।
[illegible]रातो विचार्येति तदा देवाञ्जहास ह ॥१५॥
अभक्तांस्तांश्च विज्ञाय न ददौ स कथामृतम्।
श्रीमद्भागवती वार्ता सुराणामपि दुर्लभा ॥१६॥
राज्ञो मोक्षं तथा वीक्ष्य पुरा धाताऽपि विस्मितः।
सत्यलोके तुलां बध्वा ऽतोलयत्साधनान्यजः ॥१७॥
लघून्यन्यानि जातानि गौरवेण इदं महत्।
तदा ऋषिगणाः सर्वे विस्मयं परमं ययुः ॥१८॥
मेनिरे भगवद्रूपं शास्त्रं भागवतं क्षितौ।
पठनाच्छ्रवणात्सद्यो वैकुण्ठफलदायकम् ॥१९॥
सप्ताहश्रवणेनैव सर्वथा मुक्तिदायकम्।
सनकाद्यैः पुरा प्रोक्तं नारदाय दयापरैः ॥२०॥
यद्यपि ब्रह्मसम्बन्धाच्छ्रुतमेतत्सुरर्षिणा।
सप्ताहश्रावणविधिः कुमारैस्तस्य भाषितः ॥२१॥

शौनक उवाच।

लोकविग्रहयुक्तस्य नारदस्यास्थिरस्य च।
विधिश्रवे कुतः प्रीतिः संयोगः कुत्र तैः सह ॥२२॥

सूत उवाच।

अत्र ते कीर्तयिष्यामि भक्तियुक्तं कथानकम्।
शुकेन मम यत्प्रोक्तं रहःशिष्यं विचार्य च ॥२३॥
एकदा तु विशालायां चत्वार ऋषयोऽमलाः।
सत्सङ्गार्थं समायाता ददृशुस्तत्र नारदम् ॥२४॥

कुमार ऊचुः।

कथं ब्रह्मन् दीनमुखः कुतश्चिन्तापरो भवान्।
त्वरितं गम्यते कुत्र कुतश्चागमनं तव ॥२५॥
इदानीं शून्यचित्तोऽसि गतवित्तो यथा जनः।
तवेदं मुक्तसङ्गस्य नोचितं वद कारणम् ॥२६॥

नारद उवाच।

अहं तु पृथिवीं यातो ज्ञात्वा सर्वोत्तमामिति।
पुष्करं च प्रयागं च काशीं गोदावरीं तथा ॥२७॥
हरिक्षेत्रं कुरुक्षेत्रं श्रीरङ्गं सेतुबन्धनम्।
एवमादिषु तीर्थेषु भ्रममाण इतस्ततः ॥२८॥
नापश्यं कुत्रचिच्छर्म मनःसन्तोषकारकम्।
कलिनाऽधर्ममित्रेण धरेयं बाधिताऽधुना ॥२९॥
सत्यं नास्ति तपः शौचं दया दानं न विद्यते।
उदरम्भरिणो जीवा वराकाः कूटभाषिणः ॥३०॥

मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः ।
पाषण्डनिरताः सन्तो विरक्ताः सपरिग्रहाः ॥ ३१ ॥
तरुणी प्रभुता गेहे श्यालको बुद्धिदायकः ।
कन्याविक्रयो लोभाद्दम्पतीनाञ्च कल्कनम् ॥ ३२ ॥
आश्रमा यवनै रुद्धास्तीर्थानि सरितस्तथा ।
देवतायतनान्यत्र दुष्टैर्नष्टानि भूरिशः ॥ ३३ ॥
न योगी नैव सिद्धो वा न ज्ञानी सत्क्रियो नरः ।
कलिदावानलेनाद्य साधनं भस्मतां गतम् ॥ ३४ ॥
*अट्टशूला जनपदाः शिवशूला (१) चतुष्पथाः ।
कामिन्यः केशशूलिन्यः सम्भवन्ति कलाविह ॥ ३५ ॥
एवं पश्यन् कलेर्दोषान् पर्यटन्नवनीमहम् ।
यामुनं तटमापन्नो यत्र लीला हरेरभूत् ॥ ३६ ॥
तत्राश्चर्यं मया दृष्टं श्रूयतां तन्मुनीश्वराः ।
एका तु तरुणी तत्र निषण्णा खिन्नमानसा ॥ ३७ ॥
द्वौ वृद्धौ पतितौ पार्श्वे निःश्वसन्तावचेतनौ ।
शुश्रूषन्ती प्रबोधन्ती रुदन्ती च तयोः पुरः ॥ ३८ ॥
दशदिक्षु निरीक्षन्ती रक्षितारं निजं वपुः ।
वीज्यमाना शतस्त्रीभिर्बोध्यमाना मुहुर्मुहुः ॥ ३९ ॥
दृष्ट्वा दूरागतः सोऽहं कौतुकेन तदन्तिकम् ।
मां दृष्ट्वा चोत्थिता बाला विह्वला चाब्रवीद्वचः ॥ ४० ॥

बालोवाच ।

भो भो साधो क्षणं तिष्ठ मच्चिन्तामपि नाशय ।
दर्शनं तव लोकस्य सर्वथाऽघहरं परम् ॥ ४१ ॥
बहुधा तव वाक्येन दुःखशान्तिर्भविष्यति ।
यदा भाग्यं भवेद्भूरि भवतो दर्शनं तदा ॥ ४२ ॥

नारद उवाच ।

कासि त्वं काविमौ चेमा नार्यः काः पद्मलोचनाः ।
वद देवि सविस्तारं स्वस्य दुःखस्य कारणम् ॥ ४३ ॥

बालोवाच ।

अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ ।
ज्ञानवैराग्यनामानौ कालयोगेन जर्जरौ ॥ ४४ ॥
गङ्गाद्याः सरितश्चेमा मत्सेवार्थं समागताः ।
तथापि न च मे श्रेयः सेवितायाः सुरैरपि ॥ ४५ ॥
इदानीं शृणु मद्वार्तां सचिन्तस्त्वं तपोधन ।
वार्ता मे विततास्त्यस्ति तां श्रुत्वा सुखमावह ॥ ४६ ॥
उत्पन्ना द्राविडे साऽहं वृद्धिं कर्णाटके गता ।
क्वचित्क्वचिन्महाराष्ट्रे गुर्जरे जीर्णतां गता ॥ ४७ ॥
तत्र घोरकलेर्योगात्पाषण्डैः खण्डिताङ्गका ।
दुर्बलाऽहं चिरं जाता पुत्राभ्यां सह मन्दताम् ॥ ४८ ॥
वृन्दावनं पुनः प्राप्य नवीनेव सुरूपिणी ।
जाताहं युवती सम्यक्प्रेष्ठरूपा तु साम्प्रतम् ॥ ४९ ॥

---

*अट्टमन्नं शिवो वेदः शूलो विक्रय उच्यते ।
केशो भगमिति प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥
(१) द्विजादयः ।

इमौ तु शयितावत्र सुतौ मे क्लिश्यतः श्रमात् ।
इदं स्थानं परित्यज्य विदेशं गम्यते मया ॥ ५० ॥
जरठत्वं समायातौ तेन दुःखेन दुःखिता ।
साहन्तु तरुणी कस्मात्सुतौ वृद्धाविमौ कुतः ॥ ५१
त्रयाणां सहचारित्वाद्वैपरीत्यं कुतः स्थितम् ।
घटते जरठा माता तरुणौ तनयाविति ॥ ५२ ॥
अतः शोचामि चात्मानं विस्मयाविष्टमानसा ।
वद योगनिधे धीमन् कारणञ्चात्र किं भवेत् ॥ ५३ ॥

नारद उवाच ।

ज्ञानेनात्मनि पश्यामि सर्वमेतत्तवानघे ।
न विषादस्त्वया कार्यो हरिः शं ते करिष्यति ॥ ५४ ॥

सूत उवाच ।

क्षणमात्रेण तज्ज्ञात्वा वाक्यमूचे मुनीश्वरः ।

नारद उवाच ।

शृणुष्वावहिता बाले युगोऽयं दारुणः कलिः ॥ ५५ ॥
तेन लुप्तः सदाचारो योगमार्गस्तपांसि च ।
जना अघासुरायन्ते शाठ्यदुष्कर्मकारिणः ॥ ५६ ॥
इह सन्तो विषीदन्ति प्रहृष्यन्ति ह्यसाधवः ।
धत्ते धैर्यं तु यो धीमान् स धीरः पण्डितोऽथवा ॥ ५७ ॥
अस्पृश्यानवलोक्येयं शेषभारकरी धरा ।
वर्षे वर्षे क्रमाज्जाता मङ्गलं नापि दृश्यते ॥ ५८ ॥
न त्वामपि सुतैः साकं कोऽपि पश्यति साम्प्रतम् ।
उपेक्षितानुरागान्धैर्जर्जरत्वेन संस्थिता ॥ ५९ ॥
वृन्दावनस्य संयोगात्पुनस्त्वं तरुणी नवा ।
धन्यं वृन्दावनं तेन भक्तिर्नृत्यति यत्र च ॥ ६० ॥
अत्रेमौ ग्राहकाभावान्न जरामपि मुञ्चतः ।
किञ्चिदात्मसुखेनेह प्रसुप्तिर्मन्यतेऽनयोः ॥ ६१ ॥

श्रीभक्तिरुवाच ।

कथं परीक्षिता राज्ञा स्थापितो ह्यशुचिः कलिः ।
प्रवृत्ते तु कलौ सर्वसारः कुत्र गतो महान् ॥ ६२ ॥
दयापरेण हरिणाप्यधर्मः कथमीक्ष्यते ।
इमं मे संशयं छिन्धि त्वद्वाचा सुखिताऽस्म्यहम् ॥ ६३ ॥

नारद उवाच ।

यदि पृष्टस्त्वया बाले प्रेमतः श्रवणं कुरु ।
सर्वं वक्ष्यामि ते भद्रे कश्मलं ते गमिष्यति ॥ ६४ ॥
यदा मुकुन्दो भगवान् क्ष्मां त्यक्त्वा स्वपदं गतः ।
तद्दिनात्कलिरायातः सर्वसाधनबाधकः ॥ ६५ ॥
दृष्टो दिग्विजये राज्ञा दीनवच्छरणं गतः ।
न मया मारणीयोऽयं सारङ्ग इव सारभुक् ॥ ६६ ॥
यत्फलं नास्ति तपसा न योगेन समाधिना ।
तत्फलं लभते सम्यक्कलौ केशवकीर्तनात् ॥ ६७ ॥
एकाकारं कलिं दृष्ट्वा सारवत्सारनीरसम् ।
विष्णुरातः स्थापितवान् कलिजानां सुखाय च ॥ ६८ ॥

कुकर्माचरणात्सारः सर्वतो निर्गतोऽधुना ।
पदार्थाः संस्थिता भूमौ बीजहीनास्तुषा यथा ॥ ६९ ॥

विप्रैर्भागवती वार्ता गेहेगेहे जनेजने ।
कारिता कणलोभेन कथासारस्ततो गतः ॥ ७० ॥

अत्युग्रभूरिकर्माणो नास्तिका रौरवा जनाः ।
तेऽपि तिष्ठन्ति तीर्थेषु तीर्थसारस्ततो गतः ॥ ७१ ॥

कामक्रोधमहालोभतृष्णाव्याकुलचेतसः ।
तेऽपि तिष्ठन्ति तपसि तपःसारस्ततो गतः ॥ ७२ ॥

मनसश्चाजयाल्लोभाद्दम्भपाषण्डसंश्रयात् ।
शास्त्रानभ्यसनाच्चैव ध्यानयोगफलं गतम् ॥ ७३ ॥

पण्डितास्तु कलत्रेण रमन्ते महिषा इव ।
पुत्रस्योत्पादने दक्षा अदक्षा मुक्तिसाधने ॥ ७४ ॥

नहि वैष्णवता कुत्र सम्प्रदायपुरःसरा ।
एवं प्रलयतां प्राप्तो वस्तुसारः स्थलेस्थले ॥ ७५ ॥

अयन्तु युगधर्मो हि वर्तते कस्य दूषणम् ।
अतस्तु पुण्डरीकाक्षः सहते निकटे स्थितः ॥ ७६ ॥

सूत उवाच ।

इति तद्वचनं श्रुत्वा विस्मयं परमं गता ।
भक्तिरूचे वचो भूयः श्रूयतां तच्च शौनक ॥ ७७ ॥

श्रीभक्तिरुवाच ।

सुरर्षे त्वञ्च धन्योऽसि मद्भाग्येन समागतः ।
साधूनां दर्शनं लोके सर्वसिद्धिकरं परम् ॥ ७८ ॥

जयति जयति मायां यस्य कायाधवस्ते—
वचनरचनमेकं केवलं चाकलय्य ।
ध्रुवपदमपि यातो यत्कृपातो ध्रुवोऽयं—
सकलकुशलपात्रं ब्रह्मपुत्रं नतास्मि ॥ ७९ ॥

इतिश्रीपद्मपुराणे उत्तरखण्डे श्रीभागवतमाहात्म्ये
भक्तिनारदसमागमोनाम
प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ॥

नारद उवाच ।

वृथा खेदायसे बाले अहो चिन्तातुरा कथम् ।
श्रीकृष्णचरणाम्भोजं स्मर दुःखं गमिष्यति ॥ १ ॥

द्रौपदी च परित्राता येन कौरवकश्मलात् ।
पालिता गोपसुन्दर्यः स कृष्णः क्वापि नो गतः ॥ २ ॥

त्वन्तु भक्ते प्रिया तस्य सततं प्राणतोऽधिका ।
त्वयाहूतस्तु भगवान् याति नीचगृहेष्वपि ॥ ३ ॥

सत्यादित्रियुगे बोधवैराग्ये मुक्तिसाधके ।
कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी ॥ ४ ॥

इति निश्चित्य चिद्रूपः सद्रूपां त्वां ससर्ज ह ।
परमानन्दचिन्मूर्तिः सुन्दरीं कृष्णवल्लभाम् ॥ ५ ॥

बद्ध्वाञ्जलिं त्वया पृष्टं किं करोमीति चैकदा ।
त्वां तदाऽऽज्ञापयत्कृष्णो मद्भक्तान्पोषयेति च ॥ ६ ॥

अङ्गीकृतं त्वया तद्वै प्रसन्नोऽभूद्धरिस्तदा ।
मुक्तिं दासीं ददौ तुभ्यं ज्ञानवैराग्यकाविमौ ॥ ७ ॥

पोषणं स्वेन रूपेण वैकुण्ठे त्वं करोषि च ।
भूमौ भक्तविपोषाय छायारूपं त्वया कृतम् ॥ ८ ॥

मुक्तिं ज्ञानं विरक्तिञ्च सहकृत्वा गता भुवि ।
कृतादिद्वापरस्यान्तं महानन्देन संस्थिता ॥ ९ ॥

कलौ मुक्तिः क्षयं प्राप्ता पाषण्डामयपीडिता ।
त्वदाज्ञया गता शीघ्रं वैकुण्ठं पुनरेव सा ॥ १० ॥

स्मृता त्वयाऽपि चात्रैव मुक्तिरायाति याति च ।
पुत्रीकृत्य त्वयेमौ च पार्श्वे स्वस्यैव रक्षितौ ॥ ११ ॥

उपेक्षातः कलौ मन्दौ वृद्धौ जातौ सुतौ तव ।
तथापि चिन्तां मुञ्च त्वमुपायं चिन्तयाम्यहम् ॥ १२ ॥

कलिना सदृशः कोऽपि युगो नास्ति वरानने ।
तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने ॥ १३ ॥

अन्यधर्मान् तिरस्कृत्य पुरस्कृत्य महोत्सवान् ।
तदा नाहं हरेर्दासो लोके त्वां न प्रवर्तये ॥ १४ ॥

त्वदन्विताश्च ये जीवा भविष्यन्ति कलाविह ।
पापिनोऽपि गमिष्यन्ति निर्भयाः कृष्णमन्दिरम् ॥ १५ ॥

येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी ।
न ते पश्यन्ति कीनाशं स्वप्नेऽप्यमलमूर्तयः ॥ १६ ॥

न प्रेतो न पिशाचो वा राक्षसो वाऽसुरोऽपि वा ।
भक्तियुक्तमनस्कानां स्पर्शने न प्रभुर्भवेत् ॥ १७ ॥

न तपोभिर्न वेदैश्च न ज्ञानेनाऽपि कर्मणा ।
हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः ॥ १८ ॥

नृणां जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते ।
कलौ भक्तिः कलौ भक्तिः भक्त्या कृष्णः पुरः स्थितः ॥ १९ ॥

भक्तिद्रोहकरा ये च ते सीदन्ति जगत्त्रये ।
दुर्वासा दुःखमापन्नः पुरा भक्तविनिन्दकः ॥ २० ॥

अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः ।
अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा ॥ २१ ॥

सूत उवाच ।

इति नारदनिर्णीतं स्वमाहात्म्यं निशम्य सा ।
सर्वाङ्गपुष्टिसंयुक्ता नारदं वाक्यमब्रवीत् ॥ २२ ॥

श्रीभक्तिरुवाच ।

अहो नारद धन्योऽसि प्रीतिस्ते मयि निश्चला ।
न कदाचिद्विमुञ्चामि चित्ते स्थास्यामि सर्वदा ॥ २३ ॥

कृपालुना त्वया साधो मद्बाधा ध्वंसिता क्षणात् ।
पुत्रयोश्चेतना नास्ति ततो बोधय बोधय ॥ २४ ॥

सूत उवाच ।

तस्या वचः समाकर्ण्य कारुण्यं नारदो गतः ।
तयोर्बोधनमारेभे कराग्रेण विमर्दयन् ॥ २५ ॥

मुखं संयोज्य कर्णान्ते शब्दमुच्चैः समुच्चरन् ।
ज्ञान प्रबुध्यतां शीघ्रं रे वैराग्य प्रबुध्यताम् ॥ २६ ॥

वेदवेदान्तघोषैश्च गीतापाठैर्मुहुर्मुहुः ।
बोध्यमानौ तदा तेन कथञ्चिच्चोत्थितौ बलात् ॥ २७ ॥
नेत्रैरनवलोकन्तौ जृम्भन्तौ सालसावुभौ ।
बकवत्पलितौ प्रायः शुष्ककाष्ठसमाङ्गकौ ॥ २८ ॥
क्षुत्क्षामौ तौ निरीक्ष्यैव पुनः स्वापपरायणौ ।
ऋषिश्चिन्तातुरो जातः किं विधेयं मयेति च ॥ २९ ॥
अहो निद्रा कथं याति वृद्धत्वं च महत्तरम् ।
चिन्तयन्निति गोविन्दं स्मारयामास भार्गव ॥ ३० ॥
व्योमवाणी तदैवाभून्मा ऋषे खिद्यतामिति ।
उद्यमः सफलस्तेतु भविष्यति न संशयः ॥ ३१ ॥
एतदर्थं तु सत्कर्म सुरर्षे त्वं समाचर ।
तत्ते कर्माभिधास्यन्ति साधवः साधुभूषणाः ॥ ३२ ॥
सत्कर्मणि कृते तस्मिन् सनिद्रावृद्धतानयोः ।
गमिष्यति क्षणाद्भक्तिः सर्वतः प्रसरिष्यति ॥ ३३ ॥
इत्याकाशवचः स्पष्टं तत्सर्वैरपि विश्रुतम् ।
नारदो विस्मयं लेभे नेदं ज्ञातमिति ब्रुवन् ॥ ३४ ॥

नारद उवाच ।

अनयाऽऽकाशवाण्यापि गोप्यत्वेन निरूपितम् ।
किंवा तत्साधनं कार्यं येन कार्यं भवेत्तयोः ॥ ३५ ॥
क भविष्यन्ति सन्तस्ते कथं दास्यन्ति साधनम् ।
मयात्र किं प्रकर्तव्यं यदुक्तं व्योमभाषया ॥ ३६ ॥

सूत उवाच ।

तत्र तावपि संस्थाप्य निर्गतो नारदो मुनिः ।
तीर्थं तीर्थं विनिष्क्रम्य पृच्छन्मार्गे मुनीश्वरान् ॥ ३७ ॥
वृत्तान्तः श्रूयते सर्वैः किञ्चिन्निश्चित्य नोच्यते ।
असाध्यं केचन प्रोचुर्दुर्ज्ञेयमिति चापरे ॥ ३८ ॥
मूकीभूतास्तथान्ये तु कियन्तस्तु पलायिताः ।
हाहाकारो महानासीत् त्रिलोक्यां विस्मयावहः ॥ ३९ ॥
वेदवेदान्तघोषैश्च गीतापाठैर्विबोधितम् ।
भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकं यदा ॥ ४० ॥
उपायो नापरोस्तीति कर्णे कर्णे जपन् जनाः ।
योगिना नारदेनापि स्वयं न ज्ञायते तु यत् ॥ ४१ ॥
तत्कथं शक्यते वक्तुमितरैरिह मानुषैः ।
एवं ऋषिगणैः पृष्टैर्निर्णीयोक्तं दुरासदम् ॥ ४२ ॥
ततश्चिन्तातुरः सोऽथ बदरीवनमागतः ।
तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः ॥ ४३ ॥
तावद्ददर्श पुरतः सनकादीन् मुनीश्वरान् ।
कोटिसूर्यसमाभासानुवाच मुनिसत्तमः ॥ ४४ ॥

नारद उवाच ।

इदानीं भूरिभाग्येन भवद्भिः सङ्गमोऽस्ति मे ।
कुमारा वदतां शीघ्रं कृपां कृत्वा ममोपरि ॥ ४५ ॥
भवन्तो योगिनः सर्वे बुद्धिमन्तो बहुश्रुताः ।
पञ्चहायनसंयुक्ताः पूर्वेषामपि पूर्वजाः ॥ ४६ ॥
सदा वैकुण्ठनिलया हरिकीर्तनतत्पराः ।
लीलामृतरसोन्मत्ताः कथामात्रैकजीविनः ॥ ४७ ॥
हरिः शरणमेव हि नित्यं येषां मुखे वचः ।
अतः कालसमादिष्टा जरा युष्मान्न बाधते ॥ ४८ ॥
येषां भ्रूभङ्गमात्रेण द्वारपालौ हरेः पुरा ।
भूमौ निपतितौ सद्यो यत्कृपातः परङ्गतौ ॥ ४९ ॥
अहो भाग्यस्य योगेन दर्शनं भवतामिह ।
अनुग्रहस्तु कर्तव्यो मयि दीने दयापरैः ॥ ५० ॥
अशरीरगिरोक्तं यत्तत्किं साधनमुच्यताम् ।
अनुष्ठेयं कथं तावत् प्रब्रुवन्तु सविस्तरम् ॥ ५१ ॥
भक्तिज्ञानविरागाणां सुखमुत्पद्यते कथम् ।
स्थापनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः ॥ ५२ ॥

कुमारा ऊचुः ।

मा चिन्तां कुरु देवर्षे हर्षं चित्ते समावह ।
उपायः सुखसाध्योऽत्र वर्तते पूर्व एव हि ॥ ५३ ॥
अहो नारद धन्योसि विरक्तानां शिरोमणिः ।
सदा श्रीकृष्णदासानामग्रणीर्योगभास्करः ॥ ५४ ॥
त्वयि चित्रं न मन्तव्यं भक्त्यर्थमनुवर्तिनि ।
घटते कृष्णदासस्य भक्तेः स्थापनता सदा ॥ ५५ ॥
ऋषिभिर्बहवो लोके पन्थानः प्रकटीकृताः ।
श्रमसाध्याश्च ते सर्वे प्रायः स्वर्गफलप्रदाः ॥ ५६ ॥
वैकुण्ठसाधकः पंथाः सतु गोपिषु वर्तते ।
तस्योपदेष्टा पुरुषः प्रायो भाग्येन लभ्यते ॥ ५७ ॥
सत्कर्म तव निर्दिष्टं व्योमवाचा तु यत्पुरा ।
तदुच्यते शृणुष्वाद्य स्थिरचित्तः प्रसन्नधीः ॥ ५८ ॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथा परे ।
स्वाध्यायज्ञानयज्ञाश्च तेतु कर्मविसूचकाः ॥ ५९ ॥
सत्कर्मसूचको नूनं ज्ञानयज्ञः स्मृतो बुधैः ।
श्रीमद्भागवतालापः स तु गीतः शुकादिभिः ॥ ६० ॥
भक्तिज्ञानविरागाणां तद्घोषेण बलं महत् ।
व्रजिष्यति द्वयोःकष्टं सुखं भक्तेर्भविष्यति ॥ ६१ ॥
प्रलयं हि गमिष्यन्ति श्रीमद्भागवतध्वनेः ।
कलिदोषा इमे सर्वे सिंहशब्दाद्वृका इव ॥ ६२ ॥
ज्ञानवैराग्यसंयुक्ता भक्तिःप्रेमरसावहा ।
प्रतिगेहं प्रतिजनं ततः क्रीडां करिष्यति ॥ ६३ ॥

नारद उवाच ।

वेदवेदान्तघोषैश्च गीतापाठैः प्रबोधितम् ।
भक्तिज्ञानविरागाणां नोदतिष्ठत्त्रिकन्तु यत् ॥ ६४ ॥
श्रीमद्भागवतालापात्तत्कथं बोधमेष्यति ।
तत्कथासु तु वेदार्थः श्लोके श्लोके पदेपदे ॥ ६५ ॥
छिन्दन्तु संशयं ह्येनं भवन्तोऽमोघदर्शनाः ।
विलम्बो नात्र कर्तव्यः शरणागतवत्सलाः ॥ ६६ ॥

कुमारा ऊचुः ।

वेदोपनिषदां साराज्जाता भागवती कथा ।
अत्युत्तमा ततो भाति पृथग्भूता फलोन्नतिः ॥ ६७ ॥

...रसस्तिष्ठत्यपि न ...था ।
सम्भूय च पृथग्भूतः फले विश्वमनोहरः ॥ ६८ ॥
यथा दुग्धे स्थितं सर्पिर्न स्वादायोपकल्पते ।
पृथग्भूतं हि तद्दिव्यं देवानां रसवर्धनम् ॥ ६९ ॥
इक्षूणामपि मध्यान्तं शर्करा व्याप्य तिष्ठति ।
पृथग्भूता च सा मिष्टा तथा भागवती कथा ॥ ७० ॥
इदं भागवतं नाम पुराणं ब्रह्मसंमितम् ।
भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितम् ॥ ७१ ॥
वेदान्तवेदसुस्नाते गीताया अपि कर्तरि ।
परितापवति व्यासे मुह्यत्यज्ञानसागरे ॥ ७२ ॥
तदा त्वया पुरा प्रोक्तं चतुःश्लोकसमन्वितम् ।
तदीयश्रवणात्सद्यो निर्बाधो बादरायणः ॥ ७३ ॥
तत्र ते विस्मयः केन यतः प्रश्नकरो भवान् ।
श्रीमद्भागवतश्रावे शोकदुःखविनाशनम् ॥ ७४ ॥

नारद उवाच ।

यद्दर्शनञ्च विनिहन्त्यशुभानि सद्यः —
श्रेयस्तनोति भवदुःखदवार्दितानाम् ॥
निःशेषशेषमुखगीतकथैकपानः —
प्रेमप्रकाशकृतये शरणं गतोऽस्मि ॥ ७५ ॥
भाग्योदयेन बहुजन्मसमर्जितेन —
सत्सङ्गमञ्च लभते पुरुषो यदा वै ॥
अज्ञानहेतुकृतमोहमदान्धकार ।
नाशं विधाय हि तदोदयते विवेकः ॥ ७६ ॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये
कुमारनारदसम्वादोनाम
द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ॥

नारद उवाच ।

ज्ञानयज्ञं करिष्यामि शुकशास्त्रकथोज्ज्वलम् ।
भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः ॥ १ ॥
कुत्र कार्यो मया यज्ञः स्थलं तद्वाच्यतामिह ।
महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः ॥ २ ॥
कियद्भिर्दिवसैः श्राव्या श्रीमद्भागवती कथा ।
को विधिस्तत्र कर्तव्यो ममेदं [१] वदतामिति ॥ ३ ॥

कुमारा ऊचुः ।

शृणु नारद वक्ष्यामो विनम्राय विवेकिने ।
गङ्गाद्वारसमीपे तु तटमानन्दनामकम् ॥ ४ ॥
नानाऋषिगणैर्जुष्टं देवसिद्धनिषेवितम् ।
नानातरुलताकीर्णं नवकोमलवालुकम् ॥ ५ ॥
रम्यमेकान्तदेशस्थं हैमपद्मसुशोभितम् ।
यत्समीपस्थजीवानां वैरं चेतसि न स्थितम् ॥ ६ ॥
ज्ञानयज्ञस्त्वया तत्र कर्तव्यो ह्यप्रयत्नतः ।
अपूर्वा रसरूपा च कथा तत्र भविष्यति ॥ ७ ॥
पुरस्थं निर्बलञ्चैव जराजीर्णकलेवरम् ।
तद्द्वयञ्च पुरस्कृत्य भक्तिस्तत्र गमिष्यति ॥ ८ ॥
यत्र भागवती वार्ता तत्र भक्त्यादिकं व्रजेत् ।
कथाशब्दं समाकर्ण्य तत्त्रिकं तरुणायते ॥ ९ ॥

सूत उवाच ।

एवमुक्त्वा कुमारास्ते नारदेन समन्ततः ।
गङ्गातटं समाजग्मुः कथापानाय सत्वराः ॥ १० ॥
यदा यातास्तटं ते तु तदा कोलाहलोऽप्यभूत् ।
भूर्लोके देवलोके च ब्रह्मलोके तथैव च ॥ ११ ॥
श्रीभागवतपीयूषपानाय रसलम्पटाः ।
धावन्तोऽप्याययुः सर्वे प्रथमं ये च वैष्णवाः ॥ १२ ॥
भृगुर्वसिष्ठश्च्यवनश्च गौतमो मेधातिथिर्देवलदेवरातौ ।
रामस्तथा गाधिसुतश्च शाकलो मृकण्डुपुत्रोऽत्रिजपिप्पलादयः ॥
योगेश्वरौ व्यासपराशरौ च —
छायाशुको जाबालिजह्नुमुख्याः ॥
सर्वेऽप्यमी मुनिगणाः सहपुत्रशिष्याः —
स्वस्त्रीभिराययुरतिप्रणयेन युक्ताः ॥ १४ ॥
वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राः समूर्तयः ।
दशसप्तपुराणानि षट्शास्त्राणि तदा ययुः ॥ १५ ॥
गङ्गाद्याः सरितस्तत्र पुष्करादिसरांसि च ।
क्षेत्राणि च दिशः सर्वाः दण्डकादिवनानि च ॥ १६ ॥
नागादयो ययुस्तत्र देवगन्धर्वकिन्नराः ।
गुरुत्वात्तत्र नायातान् भृगुः सम्बोध्य चानयत् ॥ १७ ॥
दीक्षिता नारदेनाथ दत्तमासनमुत्तमम् ।
कुमारा वन्दिताः सर्वैर्निषेदुः कृष्णतत्पराः ॥ १८ ॥
वैष्णवाश्च विरक्ताश्च न्यासिनो ब्रह्मचारिणः ।
मुख्यभागे स्थितास्ते च तदग्रे नारदः स्थितः ॥ १९ ॥
एकभागे ऋषिगणास्तदन्यत्र दिवौकसः ।
वेदोपनिषदोऽन्यत्र तीर्थान्यत्र स्त्रियोऽन्यतः ॥ २० ॥
जयशब्दो नमःशब्दः शङ्खशब्दस्तथैव च ।
चूर्णलाजप्रसूनानां निक्षेपस्सुमहानभूत् ॥ २१ ॥
विमानानि समारुह्य कियन्तो देवनायकाः ।
कल्पवृक्षप्रसूनैस्तांस्तत्र सर्वान्समाकिरन् ॥ २२ ॥

सूत उवाच ।

एवं तेष्वेकचित्तेषु श्रीमद्भागवतस्य च ।
माहात्म्यमूचिरे स्पष्टं नारदाय महात्मने ॥ २३ ॥

कुमारा ऊचुः ।

अथ ते सम्प्रवक्ष्यामो महिमा शुकशास्त्रजः ।
यस्य श्रवणमात्रेण मुक्तिः करतले स्थिता ॥ २४ ॥
सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा ।
यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् ॥ २५ ॥

---

[१] ...वताशुना इति पाठान्तरम् ।

ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः ।
परीक्षिच्छुकसम्वादः शृणु भागवतं च तत् ॥ २६ ॥
तावत्संसारचक्रेऽस्मिन् भ्रमत्यज्ञानतः पुमान् ।
यावत्कर्णगता नास्ति शुकशास्त्रकथा क्षणम् ॥ २७ ॥
किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः ।
एकं भागवतं शास्त्रं मुक्तिदानेन गर्जति ॥ २८ ॥
कथा भागवतस्यापि नित्यं भवति यद्गृहे ।
तद्गृहं तीर्थरूपं हि वसतां पापनाशनम् ॥ २९ ॥
अश्वमेधसहस्राणि वाजपेयशतानि च ।
शुकशास्त्रकथायाश्च कलां नार्हन्ति षोडशीम् ॥ ३० ॥
तावत्पापानि देहेऽस्मिन् निवसन्ति तपोधनाः ।
यावन्न श्रूयते सम्यक् श्रीमद्भागवतं नरैः ॥ ३१ ॥
न गङ्गा न गया काशी पुष्करं न प्रयागकम् ।
शुकशास्त्रकथायाश्च फलेन समतां नयेत् ॥ ३२ ॥
श्लोकार्द्धं श्लोकपादम्वा नित्यं भागवतोद्भवम् ।
पठस्व स्वमुखेनैव यदीच्छसि परां गतिम् ॥ ३३ ॥
वेदादिर्वेदमाताच पौरुषं सूक्तमेवच ।
त्रयी भागवतं चैव द्वादशाक्षर एव च ॥ ३४ ॥
द्वादशात्मा प्रयागश्च कालः संवत्सरात्मकः ।
ब्राह्मणाश्चाग्निहोत्रञ्च सुरभिर्द्वादशी तथा ॥ ३५ ॥
तुलसीच वसन्तश्च पुरुषोत्तम एव च ।
एतेषां तत्त्वतः प्राज्ञैर्न पृथग्भाव इष्यते ॥ ३६ ॥
यश्च भागवतं शास्त्रं वाचयेदर्थतोऽनिशम् ।
जन्मकोटिकृतं पापं नश्यते नात्र संशयः ॥ ३७ ॥
श्लोकार्धं श्लोकपादम्वा पठेद्भागवतं च यः ।
नित्यं पुण्यमवाप्नोति राजसूयाश्वमेधयोः ॥ ३८ ॥
उक्तं भागवतं नित्यं कृतञ्च हरिकीर्तनम् ।
तुलसीपोषणञ्चैव धेनूनां सेवनं समम् ॥ ३९ ॥
अन्तकालेतु येनैव श्रूयते शुकशास्त्रवाक् ।
प्रीत्या तस्यैव वैकुण्ठं गोविंदोपि प्रयच्छति ॥ ४० ॥
हेमसिंहयुतञ्चैतद्वैष्णवाय ददाति च ।
कृष्णेन सह सायुज्यं स पुमान् लभते ध्रुवम् ॥ ४१ ॥
आजन्ममात्रमपि येन शठेन किञ्चित्—
चित्तं विधाय शुकशास्त्रकथा न पीता ।
चाण्डालवच्च खरवद्बत तेन नीतं—
मिथ्या स्वजन्म जननीनिजदुःखभाजा ॥ ४२ ॥
जीवच्छवो निगदितः सतु पापकर्मा—
येन श्रुतं शुककथावचनं न किञ्चित् ।
धिक् तं नरं पशुसमं भुवि भाररूप—
मेवं वदन्ति दिवि देवसरोजमुख्याः ॥ ४३ ॥
दुर्लभैव कथा लोके श्रीमद्भागवतोद्भवा ।
कोटिजन्मसमुत्थेन पुण्येनैव तु लभ्यते ॥ ४४ ॥
तेन योगनिधे धीमन् श्रोतव्या सा प्रयत्नतः ।
दिनानां नियमो नास्ति सर्वदा श्रवणं मतम् ॥ ४५ ॥

अशक्यत्वात्कलौ बोध्यो विशेषोऽत्र शुकाज्ञया ॥ ४६ ॥
मनोवृत्तिजयश्चैव नियमाचरणं तथा ।
दीक्षां कर्तुमशक्यत्वात्सप्ताहश्रवणं मतम् ॥ ४७ ॥
श्रद्धातः श्रावणे नित्यं माघे तावद्धि यत्फलम् ।
तत्फलं शुकदेवेन सप्ताहश्रवणे कृतम् ॥ ४८ ॥
मनसश्चाजयाद्रोगात्पुंसां चैवायुषः क्षयात् ।
कलेर्दोषबहुत्वाच्च सप्ताहश्रवणं मतम् ॥ ४९ ॥
यत्फलं नास्ति तपसा न योगेन समाधिना ।
अनायासेन तत्सर्वं सप्ताहश्रवणं लभेत् ॥ ५० ॥
यज्ञात् गर्जति सप्ताहः सप्ताहो गर्जति व्रतात् ।
तपसो गर्जति प्रोच्चैस्तीर्थान्नित्यं हि गर्जति ॥ ५१ ॥
योगाद्गर्जति सप्ताहो ध्यानाज्ज्ञानाच्च गर्जति ।
किं ब्रूमो गर्जनं तस्य रेरे गर्जति गर्जति ॥ ५२ ॥

शौनक उवाच ।

साश्चर्यमेतत्कथितं कथानकं—
ज्ञानादिधर्मान् विगणय्य साम्प्रतम् ।
निःश्रेयसं भागवतं पुराणं—
जातं कुतो योगविदादिसूचकम् ॥ ५३ ॥

सूत उवाच ।

यदा कृष्णो धरां त्यक्त्वा स्वपदं गन्तुमुद्यतः ।
एकादशं परिश्रुत्वा ऽप्युद्धवो वाक्यमब्रवीत् ॥ ५४ ॥

उद्धव उवाच ।

त्वन्तु यास्यसि गोविन्द (१) भक्तकार्यं विधाय च
मच्चित्ते महती चिन्ता तां श्रुत्वा सुखमावह ॥ ५५ ॥
आगतोयं कलिर्घोरो भविष्यन्ति पुनः खलाः ।
तत्सङ्गेनैव सन्तोपि गमिष्यन्त्युग्रतां यदा ॥ ५६ ॥
तदा भारवती भूमिर्गोरूपेयं कमाश्रयेत् ।
अन्यो न दृश्यते त्राता त्वत्तः कमललोचन ॥ ५७ ॥
अतः सत्सु दयां कृत्वा भक्तवत्सल मा व्रज ।
भक्तार्थे सगुणो जातो निराकारोऽपि चिन्मयः ॥ ५८ ॥
त्वद्वियोगेन ते भक्ताः कथं स्थास्यन्ति भूतले ।
निर्गुणोपासने कष्टमतः किञ्चिद्विचारय ॥ ५९ ॥
इत्युद्धववचः श्रुत्वा प्रभासेऽचिन्तयद्धरिः ।
भक्तावलम्बनार्थाय किं विधेयं मयेति च ॥ ६० ॥
स्वकीयं यद्भवेत्तेजस्तच्च भागवतेऽदधात् ।
तिरोधाय प्रविष्टोयं श्रीमद्भागवतार्णवम् ॥ ६१ ॥
तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्तते हरेः ।
सेवनात् श्रवणात्पाठात् दर्शनात्पापनाशिनी ॥ ६२ ॥
सप्ताहश्रवणं तेन सर्वेभ्योऽप्यधिकं कृतम् ।
साधनानि तिरस्कृत्य कलौ धर्मोऽयमीरितः ॥ ६३ ॥
दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च ।
कामक्रोधजयार्थं हि कलौ धर्मोयमीरितः ॥ ६४ ॥

[१] भक्ति ।

अन्यथा वैष्णवी माया देवैरपि सुदुस्त्यजा ।
कथं त्याज्या भवेत्पुम्भिः सताह्येतः प्रकीर्तितः ॥ ६५ ॥

सूत उवाच ।

एवं नगाहश्रवणोरुधर्मे प्रकाश्यमाने ऋषिभिः सभायाम् ।
आश्चर्यमेकं समभूत्तदानीं तदुच्यते संश्रृणु शौनक त्वम् ॥ ६६ ॥
भक्तिः सुतौ तौ तरुणौ गृहीत्वा प्रेमैकरूपा सहसाऽऽविरासीत् ।
श्रीकृष्ण गोविन्द हरे मुरारे नाथेति नामानि मुहुर्वदन्ती ॥६७॥
तां चागतां भागवतार्थभूषां सुचारुवेषां ददृशुः सदस्याः ।
कथं प्रविष्टा कथमागतेयं मध्यं मुनीनामिति तर्कयन्तः ॥६८॥
ऊचुः कुमारा वचनं तदानीं कथार्थतो निष्पतिताऽधुनेयम् ।
एवं गिरः सा ससुता निशम्य सनत्कुमारं निजगाद नम्रा ॥६९॥

भक्तिरुवाच ।

भवद्भिरद्यैव कृतास्मि पुष्टा कलिप्रणष्टाऽपि कथारसेन ।
क्वाहन्तु तिष्ठाम्यधुना ब्रुवन्तु ब्राह्मया इदं तां गिरमूचिरे ते ७० ॥
भक्तेषु गोविन्दसुरूपधर्त्री प्रेमैककर्त्री भवरोगहन्त्री ।
सा त्वं च तिष्ठस्व सुधैर्यसंश्रया निरन्तरं वैष्णवमानसेषु ॥७१॥
ततोऽपि दोषाः कलिजा इमे त्वां द्रष्टुं न शक्ताः प्रभवोऽपि लोके ।
एवं तदाज्ञावसरेऽपि भक्तिस्तदा निषण्णा हरिदासचित्ते ॥७२॥
सकलभुवनमध्ये निर्धनास्तेऽपि धन्या—
निवसति हृदि येषां श्रीहरेर्भक्तिरेका ॥
हरिरपि निजलोकं सर्वथाऽतो विहाय--
प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ॥ ७३ ॥
ब्रूमोऽद्य ते किमधिकं महिमानमेवं—
ब्रह्मात्मकस्य भुवि भागवताभिधस्य ॥
यत्संश्रयान्निगदिते लभते सुवक्ता-
श्रोताऽपि कृष्णसमतामलमन्यधर्मैः ॥ ७४ ॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीभागवतमाहात्म्ये
भक्तिकष्टनिवर्तनो नाम
तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ।

सूत उवाच ।

अथ वैष्णवचित्तेषु दृष्ट्वा भक्तिमलौकिकीम् ।
निजलोकं परित्यज्य भगवान् भक्तवत्सलः ॥ १ ॥
वनमाली घनश्यामः पीतवासा मनोहरः ।
काञ्चीकलापरुचिरो लसन्मुकुटकुण्डलः ॥ २ ॥
त्रिभङ्गललितश्चारुकौस्तुभेन विराजितः ।
कोटिमन्मथलावण्यो हरिचन्दनचर्चितः ॥ ३ ॥
परमानन्दचिन्मूर्तिर्मधुरो मुरलीधरः ।
आविवेश स्वभक्तानां हृदयान्यमलानि च ॥ ४ ॥
वैकुण्ठवासिनो ये च वैष्णवा उद्धवादयः ।
तत्कथाश्रवणार्थं ते गूढरूपेण संस्थिताः ॥ ५ ॥
तदा जयजयारावो रसपुष्टिरलौकिकी ।
चूर्णप्रसूनवृष्टिश्च मुहुः शङ्खरवोऽप्यभूत् ॥ ६ ॥
तत्सभासंस्थितानाञ्च देहगेहात्मविस्मृतिम् ।
दृष्ट्वा च तन्मयावस्थां नारदो वाक्यमब्रवीत् ॥ ७ ॥
अलौकिकोऽयं महिमा मुनीश्वराः—
सप्ताहजन्योऽद्य विलोकितो मया ॥
मूढाः शठा ये पशुपक्षिणोऽत्र—
सर्वेऽपि निष्पापतमा भवन्ति ॥ ८ ॥
अतो नृलोके ननु नास्ति किञ्चित्—
चित्तस्य शोधाय कलौ पवित्रम् ॥
अघौघविध्वंसकरं तथैव—
कथासमानं भुवि नास्ति चान्यत् ॥ ९ ॥
के के विशुद्ध्यन्ति वदन्तु मह्यं सप्ताहयज्ञेन कथामयेन ।
कृपालुभिर्लोकहितं विचार्य प्रकाशितः कोऽपि नवीनमार्गः १०॥

कुमारा ऊचुः ।

ये मानवाः पापकृतस्तु सर्वदा-
सदा दुराचाररता विमार्गगाः ॥
क्रोधाग्निदग्धाः कुटिलाश्च कामिनः—
सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ ११ ॥
सत्येन हीनाः पितृमातृदूषकाः—
तृष्णाकुलाश्चाश्रमधर्मवर्जिताः ॥
ये दाम्भिका मत्सरिणोऽपि हिंसकाः—
सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ १२ ॥
पञ्चोग्रपापाच्छलछद्मकारिणः-
क्रूराः पिशाचा इव निर्दयाश्च ये ॥
ब्रह्मस्वपुष्टा व्यभिचारकारिणः—
सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ १३ ॥
कायेन वाचा मनसाऽपि पातकं—
नित्यं प्रकुर्वन्ति शठा हठेन ये ॥
परस्वपुष्टा मलिना दुराशयाः—
सप्ताहयज्ञेन कलौ पुनन्ति ते ॥ १४ ॥
अत्र ते कीर्तयिष्यामः इतिहासं पुरातनम् ।
यस्य श्रवणमात्रेण पापहानिः प्रजायते ॥ १५ ॥
तुङ्गभद्रातटे पूर्वमभूत्पत्तनमुत्तमम् ।
यत्र वर्णाः स्वधर्मेण सत्यसत्कर्मतत्पराः ॥ १६ ॥
आत्मदेवः पुरे तस्मिन् सर्ववेदविशारदः ।
श्रौतस्मार्तेषु निष्णातो द्वितीय इव भास्करः ॥ १७ ॥
भिक्षुको वित्तवान् लोके तत्प्रिया धुन्धुली स्मृता ।
स्ववाक्यस्थापिका नित्यं सुन्दरी सुकुलोद्भवा ॥ १८ ॥
लोकवार्तारता क्रूरा प्रायशो बहुजल्पका ।
शूरा च गृहकृत्येषु कृपणा कलहप्रिया ॥ १९ ॥
एवं निवसतोः प्रेम्णा दम्पत्यो(१)रनपत्ययोः ।
अर्थाः कामास्तयोरासन् सुखाय गृहादिकम् ॥ २० ॥

---

[१] रमगाणयोः इति पाठान्तरम् ।

पश्चाद्धर्मीः समारब्धास्ताभ्यां सन्तानहेतवे ।
गोभूहिरण्यवासांसि दीनेभ्यो यच्छतः सदा ॥ २१ ॥
धनार्धं धर्ममार्गे[र्गे]ण ताभ्यां नीतं तथापि च ।
न पुत्रो नापि वा पुत्री ततश्चिन्तातुरो भृशम् ॥ २२ ॥
एकदा स द्विजो दुःखाद्गृहं त्यक्त्वा वनं गतः ।
मध्याह्ने तृषितो जातस्तटाकं समुपेयिवान् ॥ २३ ॥
पीत्वा जलं निषण्णस्तु प्रजादुःखेन कर्शितः ।
मुहूर्तादपि तत्रैव संन्यासी कश्चिदागतः ॥ २४ ॥
दृष्ट्वा पीतजलं तन्तु विप्रो यातस्तदन्तिकम् ।
नत्वा च पादयोस्तस्य निश्वसन् संस्थितः पुरः ॥ २५ ॥

यतिरुवाच ।

कथं रोदिषि विप्र त्वं का ते चिन्ता बलीयसी ।
वद त्वं सत्वरं मह्यं स्वस्य दुःखस्य कारणम् ॥ २६ ॥

ब्राह्मण उवाच ।

किं ब्रवीमि ऋषे दुःखं पूर्वपापेन सञ्चितम् ।
मदीयाः पूर्वजास्तोयं कवोष्णमुपभुञ्जते ॥ २७ ॥
मद्दत्तं नैव गृह्णन्ति प्रीत्या देवा द्विजातयः ।
प्रजादुःखेन शून्योऽहं प्राणांस्त्यक्तुमिहागतः ॥ २८ ॥
धिग्जीवितं प्रजाहीनं धिग्गृहञ्च प्रजां विना ।
धिग्धनं चानपत्यस्य धिक्कुलं सन्ततिं विना ॥ २९ ॥
पाल्यते या मया धेनुः सा वन्ध्या सर्वथा भवेत् ।
यो मयाऽऽरोपितो वृक्षः सोऽपि वन्ध्यत्वमाश्रयेत् ॥ ३० ॥
यत्फलं मद्गृहायातं शीघ्रं तच्च विशुष्यति ।
निर्भाग्यस्यानपत्यस्य किमितो जीवितेन मे ॥ ३१ ॥
इत्युक्त्वा स रुरोदोच्चैस्तत्पार्श्वे दुःखपीडितः ।
तदा तस्य यतेश्चित्ते करुणाऽभूद्गरीयसी ॥ ३२ ॥
तद्भालाक्षरमालाञ्च वाचयामास योगवान् ।
सर्वं ज्ञात्वा यतिः पश्चाद्विप्रमूचे सविस्तरम् ।

यतिरुवाच ।

मुञ्चाज्ञानं प्रजारूपं बलिष्ठा कर्मणो गतिः ।
विवेकन्तु समासाद्य त्यज संसारवासनाम् ॥ ३४ ॥
शृणु विप्र मया तेऽद्य प्रारब्धन्तु विलोकितम् ।
सप्तजन्मावधि तव पुत्रो नैव च नैव च ॥ ३५ ॥
सन्ततेः सगरो दुःखमवापाङ्गः पुरा तथा ।
रे मुञ्चाद्य कुटुम्बाशां संन्यासे सर्वथा सुखम् ॥ ३६ ॥

ब्राह्मण उवाच ।

विवेकेन भवेत्किम्मे पुत्रं देहि बलादपि ।
नोचेत्त्यजाम्यहं प्राणांस्त्वदग्रे शोकमूर्च्छितः ॥ ३७ ॥
पुत्रादिसुखहीनोऽयं सन्न्यासः शुष्क एव हि ।
गृहस्थः सरसो लोके पुत्रपौत्रसमागतः ॥ ३८ ॥
इति विप्राग्रहं दृष्ट्वा प्राब्रवीत्स तपोधनः ।
चित्रकेतुर्गतः कष्टं विधिलेखविमार्जनात् ॥ ३९ ॥
न यास्यसि सुखं पुत्राद्यथा दैवहतोद्यमः ।
अतो हठेन युक्तोऽसि ह्यर्थिनं किं वदाम्यहम् ॥ ४० ॥

इदं भक्षय पत्न्या त्वं ततः पुत्रो भविष्यति ॥ ४१ ॥
सत्यं शौचं दयादानमेकभक्तन्तु भोजनम् ।
वर्षावधि स्त्रिया कार्यं तेन पुत्रोऽतिनिर्मलः ॥ ४२ ॥
एवमुक्त्वा ययौ योगी विप्रस्तु गृहमागतः ।
पत्न्याः पाणौ फलं दत्वा स्वयं यातस्तु कुत्रचित् ॥ ४३ ॥
तरुणी कुटिला तस्य सख्यग्रे च रुरोद ह ।
अहो चिन्ता ममोत्पन्ना फलं चाहं न भक्षये ॥ ४४ ॥
फलभक्षेण गर्भस्स्याद्गर्भेणोदरवृद्धिता ।
स्वल्पभक्षस्ततोऽशक्तिर्गृहकार्यं कथं भवेत् ॥ ४५ ॥
दैवाद्धाटी व्रजेद्ग्रामे पलायेद्गर्भिणी कथम् ।
शुकवन्निवसेद्गर्भस्तं कुक्षेः कथमुत्सृजेत् ॥ ४६ ॥
तिर्यक्चेदागतो गर्भस्तदा मे मरणं भवेत् ।
प्रसूतौ दारुणं दुःखं सुकुमारी कथं सहे ॥ ४७ ॥
मन्दायां मयि सर्वस्वं ननन्दा सा हरेत्तदा ।
सत्यशौचादिनियमो दुराराध्यः स दृश्यते ॥ ४८ ॥
लालने पालने दुःखं प्रसूतायाश्च वर्त्तते ।
वन्ध्या वा विधवा नारी सुखिनी चेति मे मतिः ॥ ४९ ॥
एवं कुतर्कयोगेन तत्फलं नैव भक्षितम् ।
पत्या पृष्टं फलं भुक्तं भुक्तञ्चेति तयेरितम् ॥ ५० ॥
एकदा भगिनी तस्यास्तद्गृहं स्वेच्छयागता ।
तदग्रे कथितं सर्वं चिन्तेयं महती हि मे ॥ ५१ ॥
दुर्बला तेन दुःखेन ह्यनुजे करवाणि किम् ।
साऽब्रवीन्मम गर्भोऽस्ति तं दास्यामि प्रसूतितः ॥ ५२ ॥
तावत्कालं सगर्भेव गुप्ता तिष्ठ गृहे सुखम् ।
वित्तं त्वं मत्पतेर्यच्छ स ते दास्यति बालकम् ॥ ५३ ॥
षाण्मासिको मृतो बाल इति लोके वदिष्यति ।
तं बालं पोषयिष्यामि नित्यमागत्य ते गृहम् ॥ ५४ ॥
फलमर्पय धेन्वै त्वं परीक्षार्थं तु साम्प्रतम् ।
तत्तदाचरितं सर्वं तथैव स्त्रीस्वभावतः ॥ ५५ ॥
अथ कालेन सा नारी प्रसूता बालकं तदा ।
आनीय जनको बालं रहस्ये धुन्धुल्यै ददौ ॥ ५६ ॥
तया च कथितं भर्त्रे प्रसूतः सुखमर्भकः ।
लोकस्य सुखमुत्पन्नमात्मदेव प्रजोदयात् ॥ ५७ ॥
ददौ दानं द्विजातिभ्यो जातकर्म विधाय च ।
गीतवादित्रघोषोऽभूत्तद्द्वारे मङ्गलं बहु ॥ ५८ ॥
भर्तुरग्रेऽब्रवीद्वाक्यं स्तन्यं नास्ति कुचे मम ।
अन्यस्तन्येन निर्दुग्धा कथं पुष्णामि बालकम् ॥ ५९ ॥
मत्स्वसायाः प्रसूताया मृतो बालस्तु वर्तते ।
तामाकार्य गृहे रक्ष सा तेऽर्भं पोषयिष्यति ॥ ६० ॥
पतिना तत्कृतं सर्वं पुत्ररक्षणहेतवे ।
पुत्रस्य धुन्धुकारीति नाम मात्रा प्रतिष्ठितम् ॥ ६१ ॥
त्रिमासे निर्गते चाथ सा धेनुः सुषुवेऽर्भकम् ।
सर्वाङ्गसुन्दरं दिव्यं निर्मलं कनकप्रभम् ॥ ६२ ॥

दृष्ट्वा प्रसन्नोऽभवत्तु संस्कारान्स्वं दधे ।
श्रुत्वाश्चर्यं जनाः सर्वे दिदृक्षार्थं समागताः ॥ ६३ ॥

भाग्योदयोऽधुना जात आत्मदेवस्य पश्यत ।
धेन्वा बालः प्रसूतस्तु देवरूपीति कौतुकम् ॥ ६४ ॥

न ज्ञातं तद्रहस्यं तु केनापि विधियोजितः ।
गोकर्णं तं सुतं दृष्ट्वा गोकर्णं नाम चाकरोत् ॥ ६५ ॥

कियत्कालेन तौ जातौ तरुणौ तनयावुभौ ।
गोकर्णः पण्डितो ज्ञानी धुन्धुकारी महाखलः ॥ ६६ ॥

स्नानशौचक्रियाहीनो दुर्भक्षी क्रोधसंयुतः ।
दुष्परिग्रहकर्ता च शवहस्तेन भोजनः ॥ ६७ ॥

चोरः सर्वजनद्वेषी परवेश्मप्रदीपकः ।
लालनायार्भकान् धृत्वा सद्यः कूपे निपातयत् ॥ ६८ ॥

हिंसकः शस्त्रधारी च दीनान्धानां प्रपीडकः ।
चाण्डालाभिरतो नित्यं पाशहस्तश्च सङ्गतः ॥ ६९ ॥

तेन वेश्याकुसङ्गेन पैत्र्यं वित्तन्तु नाशितम् ।
एकदा पितरौ ताड्य पात्राणि स्वयमाहरत् ॥ ७० ॥

तत्पिता कृपणः प्रोच्चैर्धनहीनो रुरोद ह ।
वन्ध्यत्वन्तु समीचीनं कुपुत्रो दुःखदायकः ॥ ७१ ॥

क्व तिष्ठामि क्व गच्छामि को मे दुःखं व्यपोहयेत् ।
प्राणांस्त्यजामि दुःखेन हा कष्टं मम संस्थितम् ॥ ७२ ॥

तदानीं तु समागत्य गोकर्णो ज्ञानसंयुतः ।
बोधयामास जनकं वैराग्यं परिदर्शयन् ॥ ७३ ॥

असारः खलु संसारो दुःखरूपी विमोहकः ।
सुतः कस्य धनं कस्य स्नेहवान् ज्वलतेऽनिशम् ॥ ७४ ॥

न चेन्द्रस्य सुखं किञ्चित् न सुखं चक्रवर्तिनः ।
सुखमस्ति विरक्तस्य मुनेरेकान्तजीविनः ॥ ७५ ॥

मुञ्चाज्ञानं प्रजारूपं मोहतो नरके गतिः ।
निपतिष्यति देहोयं सर्वं त्यक्त्वा वनं व्रज ॥ ७६ ॥

तद्वाक्यं तु समाकर्ण्य गन्तुकामः पिताऽब्रवीत् ।
किं कर्तव्यं वने तात तत्त्वं वद सविस्तरम् ॥ ७७ ॥

अन्धकूपे स्नेहपाशैर्बद्धः पङ्गुरहं शठः ।
कर्मणा पतितो नूनं मामुद्धर दयानिधे ॥ ७८ ॥

गोकर्ण उवाच ।

देहेऽस्थिमांसरुधिरेऽभिमतिं त्यज त्वं—
जायासुतादिषु सदा ममतां विमुञ्च ।
पश्यानिशं जगदिदं क्षणभङ्गनिष्ठं—
वैराग्यरागरसिको भव भक्तिनिष्ठः ॥ ७९ ॥

धर्मं भजस्व सततं त्यज लोकधर्मान्—
सेवस्व साधुपुरुषान् जहि कामतृष्णाम् ।
अन्यस्य दोषगुणचिन्तनमाशु मुक्त्वा—
सेवाकथारसमहो नितरां पिब त्वम् ॥ ८० ॥

एवं सुतोक्तिवशतोऽपि वनं विहाय—
सञ्जातो गृहं स्थिरमतिर्गतषष्टिवर्षः ।
युक्तो हरेरनुदिनं परिचर्ययाऽसौ—
श्रीकृष्णमाप नियतं दशमस्य पाठात् ॥ ८१ ॥

इति श्रीमत्पद्मपुराणे उत्तरखण्डे
श्रीभागवतमाहात्म्ये विप्रमोक्षो नाम
चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ॥

सूत उवाच ।

पितर्युपरते तेन जननी ताडिता भृशम् ।
क्व वित्तं तिष्ठते ब्रूहि हनिष्ये लत्तया न चेत् ॥ १ ॥

इति तद्वाक्यसन्त्रासाज्जनन्या पुत्रदुःखतः ।
कूपे पातः कृतो रात्रौ तेन सा निधनं गता ॥ २ ॥

गोकर्णस्तीर्थयात्रार्थं निर्गतो योगसंस्थितः ।
न दुःखं न सुखं तस्य न वैरी नापि बान्धवः ॥ ३ ॥

धुन्धुकारी गृहे तिष्ठत्पञ्चपण्यवधूवृतः ।
अत्युग्रकर्मकर्ता च तत्पोषणविमूढधीः ॥ ४ ॥

एकदा कुलटास्तास्तु भूषणान्यभिलिप्सवः ।
तदर्थं निर्गतो गेहात् कामान्धो मृत्युमस्मरन् ॥ ५ ॥

यतस्ततश्च संहृत्य वित्तं वेश्म पुनर्गतः ।
ताभ्योऽयच्छत्सुवस्त्राणि भूषणानि कियन्ति च ॥ ६ ॥

बहुवित्तचयं दृष्ट्वा रात्रौ नार्यो व्यचारयन् ।
चौर्यं करोत्यसौ नित्यमतो राजा ग्रहीष्यति ॥ ७ ॥

वित्तं हृत्वा पुनश्चैनं मारयिष्यति निश्चितम् ।
अतोऽर्थगुप्तये गूढादस्माभिः किं न हन्यते ॥ ८ ॥

निहत्यैनं गृहीत्वार्थं यास्यामो यत्र कुत्रचित् ।
इति ता निश्चयं कृत्वा सुप्तं सम्बध्य रश्मिभिः ॥ ९ ॥

पाशं कण्ठे निधायास्य तन्मृत्युमुपचक्रमुः ।
त्वरितं न ममारासौ चिन्तायुक्तास्तदाऽभवन् ॥ १० ॥

तप्ताङ्गारसमूहांश्च तन्मुखे हि विचिक्षिपुः ।
अग्निज्वालातिदुःखेन व्याकुलो निधनं गतः ॥ ११ ॥

तं देहं मुमुचुर्गर्ते प्रायः साहसिकाः स्त्रियः ।
न ज्ञातं तद्रहस्यं तु केनापीदं तथैव च ॥ १२ ॥

लोकैः पृष्टा वदन्ति स्म दूरं यातः प्रियो हि नः ।
आगमिष्यति वर्षेऽस्मिन् वित्तलोभविकर्षितः ॥ १३ ॥

स्त्रीणां नैव तु विश्वासं दुष्टानां कारयेद्बुधः ।
विश्वासे यः स्थितो मूढः स दुःखैः परिभूयते ॥ १४ ॥

सुधामयं वचो यासां कामिनां रसवर्धनम् ।
हृदयं क्षुरधाराभं प्रियः को नाम योषिताम् ॥ १५ ॥
संहृत्य वित्तं ता याताः कुलटा बहुभर्तृकाः ।
धुन्धुकारी बभूवाथ महान्प्रेतः कुकर्मतः ॥ १६ ॥

वात्यारूपधरो नित्यं धावन्दशदिशोऽन्तरम् ।
शीतातपपरिक्लिष्टो निराहारः पिपासितः ॥ १७ ॥

न लेभे शरणं कुत्र हा दैवेति मुहुर्वदन् ।
कियत्कालेन गोकर्णो मृतं लोकादबुध्यत ॥ १८ ॥

अनाथं तं विदित्वैव गयाश्राद्धमचीकरत् ।
यस्मिंस्तीर्थे तु संयाति तत्र श्राद्धं प्रवर्तयन् ॥ १९ ॥

एवं भ्रामन्स गोकर्णः स्वपुरं समुपेयिवान् ।
रात्रौ गृहाङ्गणे स्वप्तुमागतोऽलक्षितः परैः ॥ २० ॥

तत्र सुप्तं स विज्ञाय धुन्धुकारी स्वबान्धवम् ।
निशीथे दर्शयामास महारौद्रतरं वपुः ॥ २१ ॥

सकृन्मेषः सकृद्धस्ती सकृच्च महिषोऽभवत् ।
सकृदिन्द्रः सकृच्चाग्निः पुनश्च पुरुषोऽभवत् ॥२२ ॥

वैपरीत्यमिदं दृष्ट्वा गोकर्णो धैर्यसंयुतः ।
अयं दुर्गतिकः कोऽपि निश्चित्याथ तमब्रवीत् ॥ २३ ॥

गोकर्ण उवाच ।

कस्त्वमुग्रतरो रात्रौ कुतो यातो दशामिमाम् ।
किंवा प्रेतः पिशाचो वा राक्षसोऽसीति शंस नः ॥ २४ ॥

सूत उवाच ।

एवं पृष्टस्तदा तेन रुरोदोच्चैः पुनःपुनः ।
अशक्तो वचनोच्चारे संज्ञामात्रं चकार ह ॥ २५ ॥

ततोऽञ्जलौ जलं कृत्वा गोकर्णस्तमुदीरयत् ।
तत्सेकाद्गतपापोऽसौ प्रवक्तुमुपचक्रमे ॥ २६ ॥

प्रेत उवाच ।

अहं भ्राता त्वदीयोऽस्मि धुन्धुकारीति नामतः ।
स्वकीयेनैव दोषेण ब्रह्मत्वं नाशितं मया ॥ २७ ॥

कर्मणां नास्ति संख्या मे महाज्ञानविवर्तिनः ।
लोकानां हिंसकः सोऽहं स्त्रीभिर्दुःखेन मारितः ॥ २८ ॥

अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहम् ।
वाताहारेण जीवामि दैवाधीनफलोदयात् ॥ २९ ॥

अहो बन्धो कृपासिन्धो भ्रातर्मामाशु मोचय ।
गोकर्णो वचनं श्रुत्वा तस्मै वाक्यमथाब्रवीत् ॥ ३० ॥

गोकर्ण उवाच ।

त्वदर्थं तु गयापिण्डो मया दत्तो विधानतः ।
तत्कथं नैव मुक्तोऽसि ममाश्चर्यमिदं महत् ॥ ३१ ॥

गयाश्राद्धान्न मुक्तिश्चेदुपायो नापरस्त्विह ।
किं विधेयं मया प्रेत तत्त्वं वद सविस्तरम् ॥ ३२ ॥

प्रेत उवाच ।

गयाश्राद्धशतेनापि मुक्तिर्मे न भविष्यति ।
उपायमपरं कञ्चित्त्वं विचारय साम्प्रतम् ॥ ३३ ॥

इति तद्वाक्यमाकर्ण्य गोकर्णो विस्मयं गतः ।
शतश्राद्धैर्न मुक्तिश्चेदसाध्यं मोचनं तव ॥ ३४ ॥

इदानीं तु निजं स्थानमातिष्ठ प्रेत निर्भयः ।
त्वन्मुक्तिसाधकं किञ्चिदाचरिष्ये विचार्य च ॥ ३५ ॥

धुन्धुकारी निजं स्थानं तेनादिष्टस्ततो गतः ।
गोकर्णश्चिन्तयामास तां रात्रिं न तदध्यगात् ॥ ३६ ॥

तत्सर्वं कथितं तेन यज्ज्ञातं च यथा निशि ॥ ३७ ॥

विद्वांसो योगनिष्ठाश्च ज्ञानिनो ब्रह्मवादिनः ।
तन्मुक्तिं नैव पश्यन्ति पश्यन्तः शास्त्रसञ्चयान् ॥ ३८ ॥

ततः सर्वैः सूर्यवाक्यं तन्मुक्तौ स्थापितं परम् ।
गोकर्णः स्तम्भनं चक्रे सूर्यवेगस्य वै तदा ॥ ३९ ॥

तुभ्यं नमो जगत्साक्षिन् ब्रूहि मे मुक्तिहेतुकम् ॥ ४० ॥

तच्छ्रुत्वा दूरतः सूर्यः स्फुटमित्यभ्यभाषत ।
श्रीमद्भागवतान्मुक्तिः सप्ताहं वाचनं कुरु ॥४१ ॥

इति सूर्यवचः सर्वैर्धर्मरूपं तु विश्रुतम् ।
सर्वेऽब्रुवन् प्रयत्नेन कर्तव्यं सुकरं त्विदम् ॥ ४२ ॥

गोकर्णो निश्चयं कृत्वा वाचनार्थं प्रवर्तितः ।
तत्र संश्रवणार्थाय देशग्रामाज्जना ययुः ॥ ४३ ॥

पङ्ग्वन्धवृद्धमन्दाश्च तेऽपि पापक्षयाय वै ।
समाजस्तु महान् जातो देवविस्मयकारकः ॥ ४४ ॥

यदैवासनमास्थाय गोकर्णोऽकथयत्कथाम् ।
स प्रेतोऽपि तदा यातः स्थानं पश्यन्नितस्ततः ॥ ४५ ॥

सप्तग्रन्थियुतं तत्रापश्यत्कीचकमुच्छ्रितम् ।
तन्मूलच्छिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ ॥ ४६ ॥

वातरूपी स्थितिं कर्तुमशक्तो वंशमाविशत् ।
वैष्णवं ब्राह्मणं मुख्यं श्रोतारं परिकल्प्य सः ॥ ४७ ॥

प्रथमस्कन्धतः स्पष्टमाख्यानं धेनुजोऽकरोत् ।
दिनान्ते रक्षिता गाथा तदा चित्रं बभूव ह ॥ ४८ ॥

वंशैकग्रन्थिभेदोऽभूत्सशब्दं पश्यतां सताम् ।
द्वितीयेऽह्नि तथा सायं द्वितीयग्रन्थिभेदनम् ॥ ४९ ॥

तृतीयेऽह्नि तथा सायं तृतीयग्रन्थिभेदनम् ।
एवं सप्तदिनैर्वंशसप्तग्रन्थिविभेदनम् ॥ ५० ॥

कृत्वा पि द्वादशस्कन्धश्रवणात्प्रेततां जहौ ।
दिव्यरूपधरो जातो तुलसीदाममण्डितः ॥ ५१ ॥

पीतवासा घनश्यामो मुकुटी कुण्डलान्वितः ।
ननाम भ्रातरं सद्यो गोकर्णमिति चाब्रवीत् ॥ ५२ ॥

त्वयाऽहं मोचितो बन्धो ! कृपया प्रेतकश्मलात् ।
धन्या भागवती वार्ता प्रेतपीडाविनाशिनी ॥ ५३ ॥

सप्ताहोऽपि तथा धन्यः कृष्णलोकफलप्रदः ।
कम्पन्ते सर्वपापानि सप्ताहश्रवणे स्थिते ॥ ५४ ॥

अस्माकं प्रलयं सद्यः कथा चेयं करिष्यति ।
आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्मभिः कृतम् ॥ ५५ ॥

श्रवणं विदहेत्पापं पावकः समिधो यथा ।
अस्मिन् वै भारते वर्षे सूरिभिर्देवसंसदि ॥ ५६ ॥

अकथाश्राविणां पुंसां निष्फलं जन्म कीर्तितम् ।
किम्मोहतो रक्षितेन सुपुष्टेन बलीयसा ॥ ५७ ॥

अध्रुवेण शरीरेण शुकशास्त्रकथां विना ।
अस्थिस्तम्भं स्नायुबद्धं मांसशोणितलेपितम् ॥ ५८ ॥

चर्मावनद्धं दुर्गन्धं पात्रं मूत्रपुरीषयोः ।
जराशोकविपाकार्तं रोग[illegible]

दुष्पूरं दुर्धरं दुष्टं सदोषं क्षणभङ्गुरम् ।
कृमिविड्भस्मसंज्ञान्तं शरीरमिति वर्णितम् ॥ ६० ॥
अस्थिरेण स्थिरं कर्म कुतोऽयं साधयेन्न हि ।
यत्प्रातः संस्कृतं चान्नं सायं तच्च विनश्यति ॥ ६१ ॥
तदीयरससम्पुष्टे काये का नाम नित्यता ।
सप्ताहश्रवणाल्लोके प्राप्यते निकटे हरिः ॥ ६२ ॥
अतो दोषनिवृत्त्यर्थमेतदेव हि साधनम् ।
बुद्बुदा इव तोयेषु मशका इव जन्तुषु ॥ ६३ ॥
जायन्ते मरणायैव कथाश्रवणवर्जिताः ।
जडस्य शुष्कवंशस्य यत्र ग्रन्थिविभेदनम् ॥
चित्रं किमु तदा चित्तग्रन्थिभेदः कथाश्रवात् ॥ ६४ ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि सप्ताहश्रवणे कृते ॥ ६५ ॥
संसारकर्दमालेपप्रक्षालनपटीयसी ।
कथातीर्थे स्थिते चित्ते मुक्तिरेव बुधैः स्मृता ॥ ६६ ॥
एवं ब्रुवति वै तस्मिन् विमानमगमत्तदा ।
वैकुण्ठवासिभिर्युक्तं प्रस्फुरद्दीप्तिमण्डलम् ॥ ६७ ॥
सर्वेषां पश्यतां भेजे विमानं धुन्धुलीसुतः ।
विमाने वैष्णवान् वीक्ष्य गोकर्णो वाक्यमब्रवीत् ॥ ६८ ॥

गोकर्ण उवाच ।

अत्रैव बहवः सन्ति श्रोतारो मम निर्मलाः ।
आनीतानि विमानानि न तेषां युगपत्कुतः ॥ ६९ ॥
श्रवणं समभागेन सर्वेषामिह दृश्यते ।
फलभेदः कुतो जातः प्रब्रुवन्तु हरिप्रियाः ॥ ७० ॥

हरिदासा ऊचुः ।

श्रवणस्य विभेदेन फलभेदोऽपि संस्थितः ।
श्रवणं तु कृतं सर्वैर्न तथा मननं कृतम् ॥ ७१ ॥
फलभेदस्ततो जातो भजनादपि मानद ।
सप्तरात्रमुपोष्यैव प्रेतेन श्रवणं कृतम् ॥ ७२ ॥
मननादि तथा तेन स्थिरचित्ते कृतं भृशम् ।
अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतम् ॥ ७३ ॥
सन्दिग्धो हि हतो मन्त्रो व्यग्रचित्तो हतो जपः ।
अवैष्णवो हतो देशो हतं श्राद्धमपात्रकम् ॥ ७४ ॥
हतमश्रोत्रिये दानमनाचारहतं कुलम् ।
विश्वासो गुरुवाक्येषु स्वस्मिन् दीनत्वभावना ॥ ७५ ॥
मनोदोषजयश्चैव कथायां निश्चला मतिः ।
एवमादि कृतं चेत्स्यात्तदा वै श्रवणे फलम् ॥ ७६ ॥
पुनः श्रवान्ते सर्वेषां वैकुण्ठे वसतिर्ध्रुवम् ।
गोकर्ण ! तव गोविन्दो गोलोकं दास्यति स्वयम् ॥ ७७ ॥
एवमुक्त्वा ययुः सर्वे वैकुण्ठं हरिकीर्तनाः ।
श्रावणे मासि गोकर्णः कथामूचे तथा पुनः ॥ ७८ ॥
सप्तरात्रवतीं भूयः श्रवणं तैः कृतं पुनः ।
कथासमाप्तौ यज्जातं श्रूयतां तच्च नारद ॥ ७९ ॥

विमानैः सह भक्तैश्च हरिराविर्बभूव ह ।
जयशब्दा नमःशब्दास्तत्रासन् बहवस्तदा ॥ ८० ॥
पाञ्चजन्यध्वनिं चक्रे हर्षात्तत्र स्वयं हरिः ।
गोकर्णं तु समालिङ्ग्याकरोत्स्वसदृशं हरिः ॥ ८१ ॥
श्रोतॄनन्यान् घनश्यामान् पीतकौशेयवाससः ।
किरीटिनः कुण्डलिनस्तथा चक्रे हरिः क्षणात् ॥ ८२ ॥
तद्ग्रामे ये स्थिता जीवा आश्वचाण्डालजातयः ।
विमाने स्थापितास्तेऽपि गोकर्णकृपया तदा ॥ ८३ ॥
प्रेषिता हरिलोके ते यत्र गच्छन्ति योगिनः ।
गोकर्णेन स गोपालो गोलोकं गोपवल्लभम् ॥ ८४ ॥
कथाश्रवणतः प्रीतो निर्ययौ भक्तवत्सलः ।
अयोध्यावासिनः पूर्वं यथा रामेण सङ्गताः ॥
तथा कृष्णेन ते नीताः गोलोकं योगिदुर्लभम् ॥ ८५ ॥
यत्र सूर्यस्य सोमस्य सिद्धानां न गतिः कदा ।
तं लोकं हि गतास्ते तु श्रीमद्भागवतश्रवात् ॥ ८६ ॥
ब्रूमोऽद्य ते किं फलवृन्दमुज्ज्वलं सप्ताहयज्ञेन कथासु सञ्चितम् ।
कर्णेन गोकर्णकथाक्षरो यैः पीतश्च ते गर्भगता न भूयः ॥ ८७ ॥
वाताम्बुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसञ्चितैः ।
योगैश्च संयान्ति न तां गतिं वै सप्ताहगाथाश्रवणेन यान्ति याम् ॥ ८८ ॥
इतिहासमिमं पुण्यं शाण्डिल्योऽपि मुनीश्वरः ।
पठते चित्रकूटस्थो ब्रह्मानन्दपरिप्लुतः ॥ ८९ ॥
आख्यानमेतत् परमं पवित्रं श्रुतं सकृद्वै विदहेदघौघम् ।
श्राद्धे प्रयुक्तं पितृतृप्तिमावहेन्नित्यं सुपाठादपुनर्भवं च ॥ ९० ॥

इति श्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये
गोकर्णवर्णनं नाम
पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः ॥

कुमारा ऊचुः ।

अथ ते सम्प्रवक्ष्यामः सप्ताहश्रवणे विधिम् ।
सहायैर्वसुभिश्चैव प्रायः साध्यो विधिः स्मृतः ॥ १ ॥
दैवज्ञं तु समाहूय मुहूर्तं पृच्छ्य यत्नतः ।
विवाहे यादृशं वित्तं तादृशं परिकल्पयेत् ॥ २ ॥
नभस्य आश्विनोर्जौ च मार्गशीर्षः शुचिर्नभाः ।
एते मासाः कथारम्भे श्रोतॄणां मोक्षसूचकाः ॥ ३ ॥
मासानां विग्रहे यानि तानि त्याज्यानि सर्वथा ।
सहायाश्चेतरे चात्र कर्तव्याः सोद्यमाश्च ये ॥ ४ ॥
देशे देशे तथा ज्ञेया वार्ता प्रेष्या प्रयत्नतः ।
भविष्यति कथा चात्र आगन्तव्यं कुटुम्बिभिः ॥ ५ ॥
दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्तनाः ।
स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत् ॥ ६ ॥
देशे देशे विरक्ता ये वैष्णवाः कीर्तनोत्सुकाः ।
तेष्वेव पत्रं प्रेष्यं च तल्लेखनमितीरितम् ॥ ७ ॥

सतां समाजो भविता सप्तरात्रं सुदुर्लभः ।
अपूर्वरसरूपैव कथा चात्र भविष्यति ॥ ८ ॥

श्रीभागवतपीयूषपानाय रसलम्पटाः ।
भवन्तश्च तथा शीघ्रमायात प्रेमतत्पराः ॥ ९ ॥

नावकाशः कदाचिच्चेद्दिनमात्रं तथापि तु ।
सर्वथा गमनं कार्यं क्षणोऽत्रैव सुदुर्लभः ॥ १० ॥

एवमाकारणं तेषां कर्तव्यं विनयेन च ।
आगन्तुकानां सर्वेषां वासस्थानानि कल्पयेत् ॥ ११ ॥

तीर्थेऽपि वने वापि गृहे वा श्रवणं मतम् ।
विशाला वसुधा यत्र कर्तव्यं तत्कथास्थलम् ॥ १२ ॥

शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम् ।
गृहोपस्करमुद्धृत्य गृहकोणे निवेशयेत् ॥ १३ ॥

अर्वाक् पञ्चाहतो यत्नादास्तीर्णानि प्रमेलयेत् ।
कर्तव्यो मण्डपः प्रोच्चैः कदलीखण्डमण्डितः ॥ १४ ॥

फलपुष्पदलैर्विष्वक् वितानेन विराजितः ।
चतुर्दिक्षु ध्वजारोपो बहुसम्पद्विराजितः ॥ १५ ॥

ऊर्ध्वं सप्तैव लोकाश्च कल्पनीयाः सुविस्तरम् ।
तेषु विप्रा विरक्ताश्च स्थापनीयाः प्रबोध्य च ॥ १६ ॥

पूर्वं तेषामासनानि कर्तव्यानि यथोत्तरम् ।
वक्तुश्चापि तदा दिव्यमासनं परिकल्पयेत् ॥ १७ ॥

उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा ।
प्राङ्मुखश्चेद्भवेद्वक्ता श्रोताचोदङ्मुखस्तदा ॥

अथवा पूर्वदिक् ज्ञेया पूज्यपूजकमध्यतः ।
श्रोतृणामागमे प्रोक्ता देशकालादिकोविदैः ॥ १९ ॥

विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत् ।
दृष्टान्तकुशलो धीरो वक्ता कार्योऽतिनिःस्पृहः ॥ २० ॥

अनेकधर्मविभ्रान्ताः स्त्रैणाः पाषण्डवादिनः ।
शुकशास्त्रकथोच्चारे त्याज्यास्ते यदि पण्डिताः ॥ २१ ॥

वक्तुः पार्श्वे सहायार्थमन्यः स्थाप्यस्तथाविधः ।
पण्डितः संशयच्छेत्ता लोकबोधनतत्परः ॥ २२ ॥

वक्त्रा क्षौरं प्रकर्तव्यं दिनाद्वर्वाक् व्रताप्तये ।
अरुणोदयेऽसौ निर्वर्त्य शौचं स्नानं समाचरेत् ॥ २३ ॥

नित्यं सङ्क्षेपतः कृत्वा सन्ध्याद्यं सम्प्रयत्नतः ।
कथाविघ्नविघाताय गणनाथं प्रपूजयेत् ॥ २४ ॥

पितॄन् सन्तर्प्य शुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ।
मण्डलञ्च प्रकर्तव्यं तत्र स्थाप्यो हरिस्तथा ॥ २५ ॥

कृष्णमुद्दिश्य मन्त्रेणाचरेत पूजाविधिं क्रमात् ।
प्रदक्षिणनमस्कारान् पूजान्ते स्तुतिमाचरेत् ॥ २६ ॥

संसारसागरे मग्नं दीनं मां करुणानिधे ।
कर्ममोहगृहीताङ्गं मामुद्धर भवार्णवात् ॥ २७ ॥

श्रीमद्भागवतस्यापि ततः पूजा प्रयत्नतः ।
कर्तव्या विधिना प्रीत्या धूपदीपसमन्विता ॥ २८ ॥

ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत् ।
स्तुतिः प्रसन्नचित्तेन कर्तव्या केवलं तदा ॥ २९ ॥

श्रीमद्भागवताख्योऽयं प्रत्यक्षः कृष्ण एव हि ।
स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे ॥ ३० ॥

मनोरथो मदीयोऽयं सफलः सर्वथा त्वया ।
निर्विघ्नेनैव कर्तव्यो दासोऽहं तव केशव ॥ ३१ ॥

एवं दीनवचः प्रोक्त्वा वक्तारं चाथ पूजयेत् ।
सम्भूष्य वस्त्रभूषाभिः पूजान्ते तं च संस्तवेत् ॥ ३२

शुकरूप प्रबोधज्ञ सर्वशास्त्रविशारद ।
एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥ ३३ ॥

तदग्रे नियमः पश्चात्कर्तव्यः श्रेयसे मुदा ।
सप्तरात्रं यथाशक्त्या [१] धारणः सर्व एव हि ॥ ३

वरणं पञ्चविप्राणां कथाभङ्गनिवृत्तये ।
कर्तव्यं तैर्हरेर्जाप्यो द्वादशाक्षरविद्यया ॥ ३५ ॥

ब्राह्मणान्वैष्णवांश्चान्यांस्तथा कीर्तनकारिणः ।
नत्वा सम्पूज्य दत्ताज्ञः स्वयमासनमाविशेत् ॥ ३६ ॥

लोकवित्तधनागारपुत्रचिन्तां व्युदस्य च ।
कथाचित्तः शुद्धमतिः स लभेत्फलमुत्तमम् ॥ ३७ ॥

आसूर्योदयमारभ्य सार्धत्रिप्रहरान्तकम् ।
वाचनीया कथा सम्यक् धीरं कण्ठं सुधीमता ॥ ३८ ॥

कथाविरामः कर्तव्यो मध्यान्हे घटिकाद्वयम् ।
तत्कथामनु कार्यं वै कीर्तनं वैष्णवस्तदा ॥ ३९ ॥

मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः ।
हविष्यान्नेन कर्तव्यो ह्येकवारं कथाऽर्थिना ॥ ४० ॥

उपोष्य सप्तरात्रं वै शक्तिश्चेच्छृणुयात्तदा ।
घृतपानं पयःपानं कृत्वा वै शृणुयात्सुखम् ॥ ४१ ॥

फलाहारेण वा भाव्यमेकभुक्तेन वा पुनः ।
सुखसाध्यं भवेद्यत्तु कर्तव्यं श्रवणाय तत् ॥ ४२ ॥

भोजनं तु वरं मन्ये कथाश्रवणकारकम् ।
नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि ॥ ४३ ॥

सप्ताहव्रतिनां पुंसां नियमान् शृणु नारद ।
विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे ॥ ४४ ॥

ब्रह्मचर्यमधःसुप्तिः पत्रावल्यां च भोजनम् ।
कथासमाप्तौ भुक्तिञ्च कुर्यान्नित्यं कथाव्रती ॥ ४५ ॥

द्विदलं मधुतैलञ्च गरिष्ठान्नं तथैव च ।
भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती ॥ ४६ ॥

कामं क्रोधं मदं मानं मत्सरं लोभमेव च ।
दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती ॥ ४७ ॥

वेदवैष्णवविप्राणां गुरुगोव्रतिनां तथा ।
स्त्रीराजमहतां निन्दां वर्जयेद्यः कथाव्रती ॥ ४८ ॥

रजस्वलां त्यजेन्म्लेच्छपतितव्रातकैस्तथा ।
द्विजाद्विट् वेदबाह्यैश्च न वदेद्यः कथाव्रती ॥ ४९ ॥

सत्यं शौचं दयामौनमार्जवं विनयं तथा ।
उदारमानसं तद्वदेवं कुर्यात्कथाव्रती ॥ ५० ॥

दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मवान् ।
अनपत्यो मोक्षकामः शृणुयाच्च कथामिमाम् ॥ ५१ ॥

---

(१) धारणीयस्स एव हि इति

अपुष्पा काकवन्ध्या च वन्ध्या या च मृतार्भका ।
स्रवद्गर्भा च या नारी तया श्राव्यः प्रयत्नतः ।
एतेन विधिना श्रावेत्तदक्षय्यतरं भवेत् ।
अत्युत्तमा कथा दिव्या कोटियज्ञफलप्रदा ॥ ५३ ॥

एवं कृत्वा व्रतविधिमुद्यापनमथाचरेत् ।
जन्माष्टमीव्रतमिव कर्तव्यं फलकाङ्क्षिभिः ॥ ५४ ॥

अकिंचनेषु भक्तेषु प्रायो नोद्यापनाग्रहः ।
श्रवणेनैव पूतास्ते निष्कामा वैष्णवा यतः ॥ ५५ ॥
एवं नगाहयज्ञेऽस्मिन् समाप्ते श्रोतृभिस्तथा ।
पुस्तकस्य च वक्तुश्च पूजा कार्यातिभक्तितः ॥ ५६ ॥

प्रसादतुलसीमालाः श्रोतृभ्यश्चाथ दीयताम् ।
मृदङ्गतालललितं कर्तव्यं कीर्तनं ततः ॥ ५७ ॥

जयशब्दो नमःशब्दः शङ्खशब्दश्च कारयेत् ।
विप्रेभ्यो याचकेभ्यश्च वित्तमन्नं च दीयताम् ॥ ५८ ॥

विरक्तश्चेद्भवेच्छ्रोता गीता वाच्या परेऽहनि ।
गृहस्थश्चेत्तदा होमः कर्तव्यः कर्मशान्तये ॥ ५९ ॥

प्रतिश्लोकं च जुहुयाद्विधिना दशमस्य च ।
पायसं मधुसर्पिश्च तिलान्नादिकसंयुतम् ॥ ६० ॥

अथवा हवनं कुर्याद्गायत्र्या सुसमाहितः ।
तन्मयत्वात्पुराणस्य परमस्य च तत्त्वतः ॥ ६१ ॥

होमाशक्तो बुधो हैम्यं दद्यात्तत्फलसिद्धये ।
नानाच्छिद्रनिरोधार्थं न्यूनताधिकताख्ययोः ॥ ६२ ॥

दोषयोः प्रशमार्थं च पठेन्नामसहस्रकम् ।
तेन स्यात्सफलं सर्वं नास्त्यस्मादधिकं यतः ॥ ६३ ॥

द्वादश ब्राह्मणान् पश्चाद्भोजयेन्मधुपायसैः ।
दद्यात्सुवर्णं धेनुं च व्रतपूर्णत्वहेतवे ॥ ६४ ॥

शक्तौ पलत्रयमितं स्वर्णसिंहं विधाय च ।
तत्रास्य पुस्तकं स्थाप्यं लिखितं ललिताक्षरम् ॥ ६५ ॥

संपूज्यावाहनाद्यैस्तदुपचारैः सविस्तरम् ।
वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥ ६६ ॥

आचार्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः ।
एवं कृते विधाने च सर्वपापनिवारणे ॥ ६७ ॥

फलदं स्यात्पुराणं तु श्रीमद्भागवतं शुभम् ।
धर्मार्थकाममोक्षाणां साधनं स्यान्न संशयः ॥ ६८ ॥

कुमारा ऊचुः ।

इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि ।
श्रीमद्भागवतेनैव भुक्तिमुक्ती करे स्थिते ॥ ६९ ॥

सूत उवाच ।

इत्युक्त्वा ते महात्मानः प्रोचुर्भागवतीं कथाम् ।
सर्वपापहरां पुण्यां भुक्तिमुक्तिप्रदायिनीम् ॥ ७० ॥

शृण्वतां सर्वभूतानां सप्ताहं नियतात्मनाम् ।
यथाविधि ततो देवं तुष्टुवुः पुरुषोत्तमम् ॥ ७१ ॥

तदन्ते ज्ञानवैराग्यभक्तीनां पुष्टता परा ।
तारुण्यं परमं चाभूत् सर्वभूतमनोहरम् ॥ ७२ ॥

नारदश्च कृतार्थोऽभूत् सिद्धे स्वीये मनोरथे ।
पुलकीकृतसर्वाङ्गः परमानन्दसंभृतः ॥ ७३ ॥

एवं कथां समाकर्ण्य नारदो भगवत्प्रियः ।
प्रेमगद्गदया वाचा तानुवाच कृताञ्जलिः ॥ ७४ ॥

नारद उवाच ।

धन्योऽस्म्यनुगृहीतोऽस्मि भवद्भिः करुणापरैः ।
अद्य मे भगवान् लब्धः सर्वपापहरो हरिः ॥ ७५ ॥

श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः ।
वैकुण्ठस्थो यतः कृष्णः श्रवणाद्यस्य लभ्यते ॥ ७६ ॥

सूत उवाच ।

एवं ब्रुवति वै तत्र नारदे वैष्णवोत्तमे ।
परिभ्रमन् समायातः शुको योगेश्वरस्तदा ॥ ७७ ॥

तत्राययौ षोडशवार्षिकस्तदा—
व्यासात्मजो ज्ञानमहाब्धिचन्द्रमाः ।

कथावसाने निजलाभपूर्णः—
प्रेम्णा पठन् भागवतं शनैःशनैः ॥ ७८ ॥

दृष्ट्वा सदस्याः परमोरुतेजसं सद्यः समुत्थाय ददुर्महासनम् ।
प्रीत्या सुरर्षिस्तमपूजयत्सुखं स्थितोऽवदत्संशृणुतामलां गिरम्

श्रीशुक उवाच ।

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां—
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ॥

श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः ।
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात् ॥ ८१ ॥

श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनम् ।
यस्मिन्पारमहंस्यमेकममलं ज्ञानं परं गीयते—
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतम् ।
तच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः ॥ ८२ ॥

स्वर्गे सत्ये च कैलासे वैकुण्ठे नास्त्ययं रसः ।
अतः पिबन्तु सद्भाग्या मा मा मुञ्चत कर्हिचित् ॥ ८३ ॥

सूत उवाच ।

एवं ब्रुवाणे सति बादरायणे
मध्ये सभायां हरिराविरासीत् ।
प्रह्लादबल्युद्धवफाल्गुनादिभिः
वृतः सुरर्षिस्तमपूजयच्च तान् ॥ ८४ ॥

दृष्ट्वा प्रसन्नं महदासने हरिं
ते चक्रिरे कीर्तनमग्रतस्तदा ।
भवो भवान्या कमलासनस्तदा
तत्रागमत् कीर्तनदर्शनाय ॥ ८५ ॥

प्रह्लादस्तालधारी तरलगतितया चोद्धवः कांस्यधारी
वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्तार्जुनोऽभूत्।
इन्द्रोऽवादीन्मृदङ्गं जयजयसुकराः कीर्तने ते कुमारा-
यत्राग्रे भाववक्ता रसविरचनया व्यासपुत्रो बभूव ॥ ८६ ॥

ननर्त मध्ये त्रिकमेव तत्र
भक्त्यादिकानां नटवत्सुतेजसाम्।
अलौकिकं कीर्तनमेतदीक्ष्य-
हरिः प्रसन्नोऽपि वचोऽब्रवीत्तत् ॥ ८७ ॥

मत्तो वरं भागवता वृणुध्वं—
प्रीतः कथाकीर्तनतोऽस्मि साम्प्रतम्।
श्रुत्वेति तद्वाक्यमतिप्रसन्नाः—
प्रेमार्द्रचित्ता हरिमूचिरे ते ॥ ८८ ॥

नगाहगाथासु च सर्वभक्तै—
रेभिस्त्वया भाव्यमिति प्रयत्नात्।
मनोरथोऽयं परिपुरणीय—
स्तथेति चोक्त्वान्तरधीयताच्युतः ॥ ८९ ॥

ततोऽनमत्तच्चरणेषु नारदस्तथा शुकादीनपि तापसांश्च।
अथ प्रहृष्टाः परिनष्टमोहाः सर्वे ययुः पीतकथामृतास्ते ॥ ९० ॥

भक्तिः सुताभ्यां सह रक्षिता सा—
शास्त्रे स्वकीयेऽपि तदा शुकेन।
अतो हरिर्भागवतस्य सेवनात्—
चित्ते समायाति हि वैष्णवानाम् ॥ ९१ ॥

दारिद्र्यदुःखज्वरदाहितानां—
मायापिशाचीपरिमर्दितानाम्।
संसारसिन्धौ परिपातितानां—
क्षेमाय वै भागवतं प्रगर्जति ॥ ९२ ॥

शौनक उवाच।

शुकेनोक्तं कदा राज्ञे गोकर्णेन कदा पुनः।
सुरर्षये कदा ब्रह्मन्छिन्धि मे संशयं त्विमम् ॥ ९३ ॥

सूत उवाच।

आकृष्णनिर्गमात्त्रिंशद्वर्षाधिगते कलौ।
नवमीतो नभस्ये च कथारम्भं शुकोऽकरोत् ॥ ९४ ॥
परीक्षिच्छ्रवणान्ते च कलौ वर्षशतद्वये।
शुद्धे शुचौ नवम्यां च धेनुजोऽकथयत्कथाम् ॥ ९५ ॥

तस्मादपि कलौ प्राप्ते त्रिंशद्वर्षे गते सति।
ऊचुरूर्जे सिते पक्षे नवम्यां ब्रह्मणः सुताः ॥ ९६
इत्येतत्ते समाख्यातं यत्पृष्टोऽहं त्वयाऽनघ।
कलौ भागवती वार्ता भवरोगविनाशिनी ॥ ९७ ॥

कृष्णप्रियं सकलकल्मलनाशनं च—
मुक्त्यैकहेतु इह भक्तिविलासकारि।
सन्तः! कथानकमिदं पिबतादरेण—
लोके हितार्थपरिशीलनसेवया किम् ॥ ९८ ॥

स्वपुरुषमपि वीक्ष्य पाशहस्तं—
वदति यमः किल तस्य कर्णमूले।
परिहर[१] भगवत्कथासु मत्तान्—
प्रभुरहमन्यनृणां न वैष्णवानाम् ॥ ९९ ॥

असारे संसारे विषयविषसङ्गाकुलधियः—
क्षणार्धं क्षेमार्थं पिबत शुकगाथातुलसुधाम्।
किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितपथे—
परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने ॥ १०० ॥

रसप्रवाहसंस्थेन श्रीशुकेनेरिता कथा।
कण्ठे सम्बध्यते येन स वैकुण्ठप्रभुर्भवेत् ॥ १०१ ॥

इति च परमगुह्यं सर्वसिद्धान्तसिद्धं—
सपदि निगदितं ते शास्त्रपुञ्जं विलोक्य।
जगति शुककथातो निर्मलं नास्ति किञ्चित्—
पिब परसुखहेतोर्द्वादशस्कन्धसारम् ॥ १०२ ॥

एतां यो नियततया शृणोति भक्त्या—
यश्चैनां कथयति शुद्धवैष्णवाग्रे।
तौ सम्यग्विधिकरणात्फलं लभेते—
याथार्थ्यान्न हि भुवने किमप्यसाध्यम् ॥ १०३ ॥

इतिश्रीपद्मपुराणे उत्तरखण्डे श्रीमद्भागवतमाहात्म्ये
श्रवणविधिकथनं नाम
षष्ठोऽध्यायः ॥ ६ ॥

[१] मधुसूदनप्रपन्नान् इति पाठान्तरम् ॥

इति श्रीभागवतमाहात्म्यं सम्पूर्णम्

हरिः ओम्।

श्रीकृष्णार्पणमस्तु।